CALCUTTA SANSKRIT SERIES

under the direction of

PANDIT AMARESWAR THAKUR, M.A., Ph. D.

No. 1.

ब्रह्मसूत्रशाङ्करभाष्यम्

भामत्यादिव्याख्योपव्याख्या-नवकोपेतम्

BRAHMASUTRA-SANKARA-BHASHYAM

WITH NINE COMMENTARIES

Part I.

EDITED BY

MAHAMAHOPADHYAYA VEDANTAVISARADA

ANANTAKRISHNA SASTRI

LECTURER IN SANSKRIT, CALCUTTA UNIVERSITY, VICE-PRESIDENT
SANSKRIT SAHITYA-PARISHAD, CALCUTTA, AUTHOR OF
VARIOUS VEDANTA AND MIMAMSA WORKS &C.

PUBLISHED BY
THE METROPOLITAN PRINTING & PUBLISHING
HOUSE, LIMITED, CALCUTTA.

1933.

Printed By Sajani Kanta Das
At The Metropolitan Printing & Publishing House, Limited,
56, Dharamtala Street, Calcutta.



ब्रह्मसूत्रभाष्यकाराः श्रीशङ्कर भगवत्पादाः

श्रुति-स्मृति-पुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

L30

BRAHMASUTRA-SANKARA-BHASYA

[with nine commentaries]

with an English Foreword

BY HIS HOLINESS

JAGADGURU SRI SANKARACARYA

OF

GOVARDHANMATH, PURI.

Ed. with a Sanskrit Introduction

BY

Mahamahopadhyaya Anantakrisna Sastri, Vedanta-Visarada.

COMMENTARIES :—

(i) PANCAPĀDIKĀ, a commentary on Śaṅkara's Bhāṣya by Padmapādācārya.

(ii) PANCAPĀDIKĀVIVARAṆA, a commentary on Pañcapādikā by Prakāśātmayati.

(iii) ṚJUVIVARAṆA, a commentary, older than Tattvadīpana, on Pañcapādikāvivaraṇa by Viṣṇu-Bhaṭṭopādhyāya, son of Janārdana who became Ānandagiri after sannyāsa, *published for the first time.*

(iv) TATTVADĪPANA, a commentary on Pañcapādikāvivaraṇa by Akhaṇḍananda Muni, disciple of Ānandagiri.

(v) BHĀMATĪ, a commentary on Śaṅkara's Bhāṣya by Vācaspati Miśra.

(vi) ṚJUPRĀKĀŚIKĀ, a commentary on Bhāmatī by Akhaṇḍānanda, probably the author of the Tattvadīpana, *published for the first time.*

(vii) BHĀṢYABHĀVAPRAKĀŚIKĀ, a commentary on Śaṅkara's Bhāṣya reconciling both Bhāmatī-prasthāna and Vivaraṇa-prasthāna by Citsukha-Muni, *published for the first time.*

(viii) VĀRTIKA, an exhaustive commentary on Śaṅkara's Bhāṣya, referred to in the Siddhānta-leśasaṁgraha and the Vedānta-siddhānta-sūkti-mañjarī, by Nārayaṇa Sarasvatī, probably the preceptor of Gauḍa Brahmānanda, *published for the first time.*

(ix) PRADĪPA, a comparative study of Vedānta by the editor M. M. Anantakṛṣṇa Śāstrī.

[*N.B.* There are two *prasthānas* of Advaita Vedānta : (i) the Bhāmatī-prasthāna and (ii) the Vivaraṇa-prasthāna of which the latter is represented by the Catuḥ-sūtrī portion of the Brahmasūtra-Śāṅkarabhāṣya. Hence, this edition is brought out up to the Catuḥ-sūtrī portion only.]



द्वारकामठमास्थाय गोवर्द्धनमधिष्ठितः। भारतीकृष्णतीर्थोऽयं वर्धते धर्मवर्धनः॥



श्रीगोवर्द्धनमठाधीश-
प्रातःस्मरणीय-स्वनामधन्य-वैदिकमार्गप्रतिष्ठापक-षण्मतस्थापनाचार्य-
जगद्गुरु-श्रीशङ्करभगवत्पादाः परमहंसपरिव्राजकादि—
श्री१००८भारतीकृष्णतीर्थस्वामिपादाः

FOREWORD

ON

GOD, The SOUL And The UNIVERSE

BY

HIS HOLINESS

JAGADGURU SHANKARACHARYA

Swami Shri Bharati Krishna Teerthaji Maharaj

of

Shri Govardhan Math,

PURI.

ॐ

FOREWORD

1. हौत्राग्निहोत्राग्निहविष्यहोतृ—होमादिसर्वाकृतिभासमानम् ।
यद्ब्रह्म तद्बोधवितारिणीभ्यां नमो नमः श्रीगुरुपादुकाभ्याम् ॥ १ ॥

2. उद्धारार्थं मुमुक्षोररचिषत पुरा ब्रह्मसूत्राणि यानि
कृष्णद्वैपायनेन श्रुतिपरमतिनाऽऽम्नायशीर्षार्थवक्त्रा ॥
कृत्वा भाष्यं तदीयं निखिलबुधनुतं गूढतत्त्वोपदेष्टा
निर्द्वैतानन्ददायी जगति विजयते शङ्करो देशिकेन्द्रः ॥ २ ॥

Throughout the vast length and breadth of the Universe, there never was, there is not, and there never will be, even one sentient and thinking being in whose mind the great question, of the Kathopanisad (अस्तीत्येके नायमस्तीति चैके) i. e. "Was I or was I not, before I was born ? If so, what, where and how was I ? Whence have I come ? What am I now ? When I die, shall I or shall I not be ? If so, what, where and how shall I be ? Where shall I go ? What is my ultimate goal ? And what is the means by which I shall reach that goal ?"—has never arisen and has never clamantly insisted on an answer ! The whole difference between the wise man and the fool is that the former goes on constantly studying, meditating, reflecting and pondering over the problem until it yields up its secret to him, whereas the latter, not having the requisite mental and intellectual calibre to solve such problems, soon tires of them and gives them up in despair ! But there cannot be the shadow of a doubt that thinkers and fools alike have always felt and will ever feel, the question thrusting itself on them ! The only difference is in the result !

THE NECESSITY

This is a subject which it is absolutely necessary for all thinking people to study seriously, investigate carefully and decide correctly. Because, it is axiomatic that so long as we do not know whither we are bound, we cannot possibly think of the path and the means which will carry us to that goal. And even for the elementary peace of our minds, it is absolutely indispensable for us to solve these problems—what we were, what we are, what we should be and how to transplant ourselves from where we are to where we should be or should like to be ! To investigate these questions, we must first all of find out what the attributes, qualities, and nature or, in scientific terminology, the properties of the Soul are and so forth. This introduction, therefore, will briefly deal with the various standpoints

from which the question may be considered and the conclusion which a profound study thereof necessarily and ultimately drives one to.

And to tackle this problem satisfactorily and arrive at a correct answer, we shall first have to prove, philosophically and scientifically too, the existence of the Soul, in order that we may have a firm foundation on which to build the desired complete and perfect edifice later on. The Śrīmad Bhāgawata says :—

"न शयानः पतत्यधः"

i. e. One who is lying down does not fall down ; the fear of a fall and of all its consequences is to him who climbs ; for, the higher he climbs, the greater is the risk he incurs—if he falls—of breaking his bones or limbs and even of losing his life too ! And therefore, when we climb from one argument to another or from one stage to another, we must make sure that our foundations are well and truly laid.

From this point of view, we shall have to analyse the question of the Existence of the Soul, God and the Universe, the inter-relationship between them and so on from different angles of vision, to wit, the Scriptural, the theological, the metaphysical, the psychological and so on ; but luckily it so happens that, on this particular question, at any rate, all the various stand-points—including the philosophical and the scientific—really lead us to the same conclusion. We may, therefore, abbreviate the procedure by combining these stand-points, as we go on, if, when and because they are found actually coinciding with one another !

THE PRAMĀṆA

The first point, however, to be considered is as regards the प्रमाण (or ultimate authority) on which we shall have to rely in our consideration of such questions. It will not do to say that प्रत्यक्ष (perception by our own senses) is the only criterion by which we shall be guided. For, even the things relating to the merely physical and material realm around us and coming within the purview of our senses cannot be decided, in that way. For example, one cannot—by one's own sense-born experience and recollection of the fact—determine who is one's own mother (let alone, the father) ?

Nor can अनुमान (logical inference) suffice by itself, or even in combination with प्रत्यक्ष (sense-perception). For, the utmost that we can postulate by means of inference is that, just as others within our experience are invariably born of a mother, so we too must have had a mother ! But as to which *particular* person bore us, mere inference can give no help.

And that takes us to शब्द (the *spoken* or *written evidence* of those who having no axes of their own to grind but impelled by a sense of Truth and Loving Service, tell us the Truth for our own benefit) ! This being so even in purely mundane matters within the reach of our physical senses, much more therefore must this be the case in respect of matters beyond the jurisdiction of our physical

perceptions i. e. in things pertaining to the psychic (or super-physical) affairs of this life and this world and still more so to those of our future lives and other worlds than this !

It is for this reason that our Scriptures say :—

1. नावेदविद् मनुते तं बृहन्तम्। i. e. He who does not know the Veda cannot know Him the Great (Universal) one ;

2. मातृमान्पितृमानाचार्यवान्पुरुषो वेद i. e. He alone can know, who has been well guided by his mother, his father and his preceptor (this being the natural physio-psychological order in which children are taught);

3. तं त्वौपनिषदं पुरुषं पृच्छामि i. e. I seek to learn about Him who is knowable through the Vedānta alone ;

4. शास्त्रयोनित्वात् i. e. He is the fountain-head of the Scriptures and is knowable through them only ;

5. उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः i. e. Those wise ones who not merely *know* the Divine Wisdom theoretically but have *realised* it by actual practical experience thereof, will teach you to realise it.

INDEPENDENT INQUIRY

But this does not mean that these problems are to be solved by means of *Blind Faith* in the Scriptures, heedless of reason, logical inferences, arguments and the like. No ; on the other hand, our Scriptures clearly and categorically say :—

1. श्रोतव्यो मन्तव्यो निदिध्यासितव्यः i. e. *Learn* (from a Guru who has *realised* the Divine Truth), *Reflect* (on his teachings with the aid of Reason) and then (when the Doctrine has been absorbed) Concentrate on and assimilate it making it the Working Principle of your Daily Life) !

2. यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः i. e. He alone—and none else--can understand the Dharma who has studied it, weighed it and meditated on it in the light of Rational and Logical Reasoning !

3. तद्विद्धि प्रणिपातेन परिप्रश्नेन i. e. Learn with the utmost humility (for humility alone befits the Seeker after Knowledge) but by inquiring (asking questions from every possible view-point and clearing off all doubts and difficulties that may possibly arise).

THE SEARCH AFTER TRUTH

Thus, Truth for its own sake and as arrived at by dispassionate Reflection is the goal of our Religion (the Sanātan-Dharma of the Vedas and other ancient scriptures of India). Other Religions too enjoin Truth-speaking and other virtues on their followers ; but, as for themselves, they shelter themselves behind such Expressions as "But *I* say unto you", claim to be beyond the region of Reason, and therefore—ultimately and in reality—call for and depend on Pure Blind Faith ! But Sanātan Dharma is unique in offering itself too to be tested by the absolute touchstone of Truth and proclaims :—

1. सत्यान्नास्ति परो धर्मः (i. e. There is no Religion higher than Truth); and

2. युक्तियुक्तं वचो ग्राह्यं बालादपि शुकादपि ।
युक्तिहीनं वचस्त्याज्यं वृद्धादपि शुकादपि ॥

(i. e. That which is consonant with Rational Reasoning ought to be accepted whether proceeding from a boy or even from a parrot); and that which is inconsistent with Right Thinking ought to be rejected, even though emanating from an old man or from the great Sage Śukadevajī himself) !

And the emphasis thus laid on Truth and Intellectual Conviction is not merely a theoretical thing for display's sake or for mere sentiment, but is illustrated and consecrated in actual historic practice by the Lord Śrī Kṛṣṇa Himself in the Bhagawad Gita ! For there, although we find the great devotee Arjuna throwing himself at the feet of the Lord and praying :—

यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे ।
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥

(i. e. Decide for me what is for my welfare and tell me ; I am thy disciple and have sought shelter under thee ; *order* me what I should do), yet, even in response to that most devout supplication of His devotee, the Lord does not *order* him but explains, expounds, enlightens and illumines by *answering* all questions (including even supplementary interpellations) at great length—in 17 chapters—and removing all doubts and difficulties and finally says to Arjuna :—

कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसंमोहः प्रणष्टस्ते धनञ्जय ॥

(i. e. I hope you have, with concentrated mind, heard all that I have been saying ? and I hope the Darkness of Ignorance has now gone !). And Arjuna replies :—

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥

(i. e. Thanks to your grace, my ignorance has gone, I have recollected myself, all my doubts have been dispelled, I shall act as advised by you). From this, it must be obvious that not only by precept but by His own superb Example too, the Lord Śrī Kṛṣṇa Himself has taught us the Right procedure herein i. e. of श्रवण, मनन and निदिध्यासन (viz. learning from the Illumined Ones, meditating thereon with the aid of Right Reasoning and Assimilation thereof thereafter) !

THE SANĀTAN-DHARMI TEXTS

Following this procedure, therefore, and as sincere and earnest Seekers after Truth, let us, divest our minds of all prejudices, prepossessions and partialities (however natural or even unconscious they may be) and go on to study the Relationship between God, the individual Soul and the Universe. Beginning with श्रवण (i.e. the Scriptural teaching thereon), the most essential thing to be noted is that when we leave aside, for the moment, the Scriptures dealing with other matters and not

with this point at all, and take into account only the Vedic texts which specifically discuss this question, there is a most wonderful unanimity of all such Scriptures whereby they not merely do *not* teach us to believe in—but, on the contrary, positively prohibit all thoughts of—Difference between God, the Individual Soul and the Universe ! In other words, they teach us Absolute MONISM. Thousands of such texts may be cited ; but, owing to considerations of space, only a few select ones are given :—

1. एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा (i. e. One and the same God is concealed within all things, pervades all things and is the real Soul within all things).

2. नेह नानास्ति किंचन (i. e. there is absolutely no difference—in reality—between one thing and another, in the entire Universe).

3. मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति (i. e. He goes on into an endless succession of births and deaths who sees *many-ness* in the Universe).

4. द्वितीयाद्वै भयं भवति (i. e. It is the conception of *other-ness* that gives rise to fear, suspicion, anxiety, hostilities, hatred and all the unhappiness in the world).

5. उदरमन्तरं कुरुते, अथ तस्य भयं भवति (i. e. He entertains the least feeling of difference, then does he begin to fear).

6. स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः (i. e. The soul within this person and the soul within the Sun are the same).

7. सर्वाणि भूतानि आत्मैवाभूद्विजानतः (i. e. To the True Seer, all things become his own Self).

8. तत्र को मोहः कः शोक एकत्वमनुपश्यतः (i. e. To him who sees the unity of all things, there is no ignorance and no sorrow).

9. यस्मिन्नेकस्मिन्विज्ञाते सर्वमिदं विज्ञातं भवति (i. e. By knowing which one thing, we know all the things in the Universe).

10. ईशावास्यमिदं सर्वम् (i. e. The whole Universe ought to be conceived of as covering the one Reality i. e. God).

11. ऐतदात्म्यमिदं सर्वम् (i. e. All this Universe is of the nature of God).

12. स आत्मा तत्त्वमसि श्वेतकेतो (Oh Śwetaketu, He is the Soul : Thou art He).

Apart from all these detailed and separate texts, we have to consider the pregnant fact that in the Muktikopaniṣad, we have the Lord Śrī Rāmacandra Himself giving to Śrī Hanumān a detailed list and description of the 108 Upaniṣads and saying that the quintessence of them all is to be found in the Māṇḍūkyopaniṣad :—

माण्डूक्यमेकमेवालं मुमुक्षूणां विमुक्तये ।

(i. e. To those who seek Emancipation from bondage, Māṇḍūkya alone is sufficient). Now, the Māṇḍūkyopaniṣad begins with the Mantras :—

13-14. ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोंकार एव यच्चान्यत् त्रिकालातीतं तदप्योंकार एव । सर्वं ह्येतद्ब्रह्म अयमात्मा ब्रह्म [i, e. The Sacred A-U-M symbolises the changeless one (viz, God); everything is only its manifestation ; whatever was, is or shall be, is all A-U-M ; and whatever is beyond the past, present and future—that too is A-U-M ; all this Universe is God ; this (individual) Soul is God]. The Māṇḍūkyopaniṣad then proceeds to equate the individual Soul in the waking, dreaming and sleeping states with the Universal Almighty Himself (in different states of manifestation) and with A-U-M which together go to make up God.

This Māṇḍūkyopaniṣad which contains only 12 short Mantras and is therefore, quantitatively, the smallest of all the Upaniṣads but which has been described by Bhagawān Śrī Rāmacandra Himself as, qualitatively, the greatest of them all, preaches the Adwaita (Absolute Monism) Doctrine of Bhagawān Ādi Jagadguru Śrī Śaṅkarācārya. In fact, Māṇḍūkyopaniṣad and Adwaita (Monism) are practically synonymous terms. To profess belief in the former and to reject the latter is, therefore, a clear Contradiction in terms.

The texts which describe how God "*created*" the world are also equally clear on this point :—

15. सच्च त्यच्चाभवत् (He himself became the Visible and the Invisible universe).

16. बहु स्यां प्रजायेय (He willed :—"I shall *become* many, I shall *manifest myself* in many forms" : and thus the universe was "created") ! He did not say, "I shall *create* many things", but simply "I shall *become* many things" ! He did not say, "I shall manifest many things," but merely "I shall manifest *myself* in many shapes" ! If we grant that God is omnipotent and is not a bungler (who contemplates doing one thing but actually does the opposite), then it must be obvious to the meanest intelligence that when God *willed* to *become* many and thereupon the universe came into existence, we must either quietly admit that the whole world is only a manifestation—in different shapes—of Himself or, we must deny His omnipotence and regard Him as a bungler ! There is no third alternative logically permissible !

For the satisfaction even of those modernists who accept the authority of the *saṁhitā* portion alone (but not of the *Upaniṣad* portion) of the Vedas, we may mention that the Puruṣa-Sūkta (of the Kṛṣṇa and Śukla Yajur-Veda Saṁhitās) clearly says :—

17. प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ॥ (i.e. It is the Creator who moves within the womb. It is the Birthless One that takes birth in many shapes). And, in passing, we may point out that even Swami Dayānanda Saraswatī (the Founder of the Ārya Samāj and the progenitor of the Saṁhitā—alone recognising School of thought) has, in his Śukla-Yajur-Veda-Saṁhitā-Bhāṣya, expounded this passage in exactly the same way as we have done !

Passing on to the Bhagawad-Gitā which all of us accept as authoritative, which the western philosophical world (e. g., Carlyle, Emerson etc.) too so acknowledge and which it has become a modern fashionable symbol of dilettantism to pay lip-homage to, let us briefly point out that the Bhagawad-Gitā too preaches Adwaita. Two passages will suffice to make this clear :—

18. ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

(i.e., The act of presenting a sacrificial oblation is God, the sacrificial oblation is God, the sacrificial fire is God, the sacrificer is God, the concentrated meditation behind the act is God and the fruit to be reaped thereby is God).

19. इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्र-क्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥

(i.e., The body is called the soil ; the soil is he who feels towards it, saying "this is mine" ; know *me* to be the soul in all bodies ; this knowledge of the soil and the soul is, in my view, the only true knowledge".

In passing, here again, we may just mention that even Hariprasād "Vaidik Muni" (the Ārya-Samāji Commentator) has, in his स्वाध्यायसंहिता, explained the above passage just exactly as we have done.

OTHER RELIGIONS

Now, श्रवण (or learning) from Sanātan Dharmi Scriptures having been briefly accomplished, let us proceed to मनन (i.e., meditation), firstly by comparison of this doctrine of Adwaita as Expounded by the Vedas with the teachings of other Religions and secondly, by the independent method of tackling the problem on the intrinsic merits.

To begin with, we may note with interest that the Bible does not devote much space to this question; and we are compelled to infer that this is because the persons to whom the Biblical teachings were given were Adhikāris, not for metaphysical disquisitions but only for elementary Ethical precepts and were consequently given only the latter! But, in those rare passages where the Bible does touch hereon, we find it too, preaching, in reality, the same doctrine i.e., of Advaita (Monism)! for example, we see Christ Himself saying : —

20. The kingdom of God is within you!

21. Ye are gods!

There are some other similar passages, especially in St. John's "Gospel," his "Epistles" and his "Revelation" that clearly show—that a lot of Greek and Roman historical records too prove that it was India's Adwaita Vedānta which Christ carried from India into and preached in Palestine, but the Jews being

fanatical Dwaitis (i.e., monotheists on the lips and pluralists at heart) could not tolerate such "heretical" teachings and therefore became his inveterate enemies with the consequence that, prosecuted by them before the Roman courts first for sedition and then for blasphemy, he was made to wear the crown of thorns and bear the Cross of shame! It is interesting to note that it was only his favourite disciple St. John who could assimilate such philosophical teachings and that even now, barring a few exceptions, Christians as such, on the whole, fight shy of St. John's Gospel and other books, dismiss them as being too "mystical" for them and confine themselves to the Gospels of St. Matthew, St. Mark and St. Luke (all three of whom were evidently on a non-metaphysical temperament)! However that may be, no unbiassed and impartial person who believes in Christ as his "Lord, Master and Saviour" can be justified in accepting Dwaita (which He fought against) and rejecting Adwaita (which He died for preaching)!

As for Islam, we need only say that the only Musalmans who deal with these questions of Metaphysical philosophy are the Sufis: and they are out-and-out Adwaitis!

THE PHILOSOPHERS OF THE WEST

We need not go into further details, but may conclude this comparative study portion of our मनन by mentioning the outstanding fact of the history of philosophy that beginning from Plato of ancient Greece to Swedenborg, Wordsworth, Browning, Carlyle, Emerson, Bishop Berkeley, Hegel, Fichte, Immanuel Kant, Ralph Walds Trine, Thomas Hill Green, William Walker Atkinson, Ella Wheeler Wilcox, Professor Deussen and so forth amongst modern philosophers, all the great Psychologists and Metaphysicians of the Western World too have been supporters of the Idealism of the Lord Śrī Śaṅkara as against the Realism of the materialists, with this only essential and noteworthy point of difference that whereas the Western Idealists (including alas! the greatest perhaps of them all, to wit, Immanuel Kant, even in his "Critique of Pure Reason") got frightened by the conclusions to which they were driven by their own unbiassed reasoning and ratiocination on the subject, it was only Śaṅkara – the greatest of the world's Intellectuals and Reasoners—that had the Courage unflinchingly to accept the conclusion, which His faultless reasoning and solid meditations on the subject logically pushed Him to the Doctrine par excellence, i. e., of Absolute Monism!

We ought also to remember in this connection that, if in spite of her present all-round degraded condition in all other respects, India holds the most brilliant philosophical thinkers of the Western world captive still, it is Śaṅkara's Adwaita Vedānta Siddhānta which the brightest intellects of the Universe have been compelled to bow their heads reverentially down before, that India has to thank for this supremely astounding and otherwise incomprehensible historic phenomenon!

THE REASON

And this leads us naturally on to the second part of our मनन, namely, the independent study of the problem on its own intrinsic merits, philosophical and scientific. For, our comparative study has just confronted us, in effect, with the next question (in psychologically chronological order) as to how we are to account for this most marvellous experience that all these great thinkers of the West—most of them having no faith in the Vedas, some of them perhaps even ignorant of their very name—have all, although dimly and although not correctly in all details, yet—by their own different and independent methods of ratiocination—accepted the Adwaita doctrine contained in the Vedānta as expounded by Bhagawān Śaṅkara? And the only answer which any right-thinking and justice-loving, impartial and fair-minded person can possibly give to this question, is and must be that Adwaita (Monism) is the only Doctrine consistent with and justified by relentlessly correct thought and that consequently even the Western philosophers (notwithstanding all their natural temperamental bias against Eastern Idealism) have been, as honest thinkers, driven and compelled to accept the Truth of Adwaita! In other words, it is Monism and only Monism of the Vedānta that Reason too supports and substantiates!

THE METHOD

In order to solve the problem carefully from this point of view, let us now go back to the questions with which we commenced this study, namely, where have we come from, what is our real nature, what are we now, where do we seek to go and so on? This is the question of questions in Metaphysics, a proper answer to which will go far to bring real happiness within the reach of all. But, unfortunately, it is this most important subject that dilettante dabblers in Metaphysics have, by their muddled methods, made a bugbear to the ordinary inquirer! In this connection, we are reminded of the old story of the University Professor of Philosophy who (when asked by his little boy what a "philosophical discussion" was) gravely said :—"If A talks to B and B talks to A and neither understands the other, then you have what you may call a philosophical discussion"! It is this attitude of so-called "philosophers" that is responsible for all the ugly terror that Metaphysics inspires in the normal or average human being: and it is our object in the remaining paragraphs of this Foreword to demonstrate how easy and simple it really is, even for the ordinary "man in the street", to adopt a particular procedure of मनन by which, without being initiated into any technical intricacies of the recondite treatises on the abstractions of Metaphysics, he too can easily *realise* for himself the real ONENESS of God, the individual Soul and the Universe, as taught by the Vedānta. This we now proceed to do.

THE SOUL

Let us go back and begin from the very beginning by making it clear to ourselves whether such a thing as the 'Soul' really exists, what exactly we mean

by the term and so on. For, unless and until we go beyond the atheist's denial of the Soul and the agnostic's middle stage of doubt about its Existence and become —by rational introspection—positively sure of its existence, we cannot possibly proceed further in our investigation of the question on hand.

When we speak of the soul, what do we really mean by it ? We may begin our study hereof by defining "Soul" as that object which we have in mind when we use the first personal pronoun (the word 'I'). Do we then, when using the word 'Soul', really mean our body thereby ? Certainly not. Because when you say, "I am lean", or "I am stout", you simply mean that your *body* is lean or stout as the case may be ; and when you say 'my body', that very *Ṣaṣṭhī Vibhakti* (possessive case) in the word "my", shows that there are two things i. e., a property and its proprietor ! For instance, when you say 'my watch' you mean that the watch is the property and that you are its owner : therefore, you cannot yourself be one with the watch ! So, the very word 'my' used in juxtaposition with the word 'body' shows that the body is the property and you are its proprietor.

Let us proceed further inward, go on eliminating all those things which we often confuse with the soul and, when all the wrong things have thus been eliminated, alight on the one thing that remains to the last and can never be eliminated and define that as the soul ! Following the same procedure as we did with regard to the body, we can easily see that when you say 'my eyes', 'my ears', 'my nose' and so forth, the difference of propertyship and proprietorship continues and therefore, the word "I" cannot mean the senses !

Going further inwards, we see that the senses work in conjunction with the mind and are under its commands, but the latter sometimes, (e. g., in dreams) works independently of the former ! So, is the mind the real proprietor within i. e., the Soul ? No. Because you often feel and say "my mind is straying or going astray. I shall concentrate it or correct it with my intellect" ! Thus, the mind too is not what we mean by our "I".

Is it then the intellect ? We may note its difference from the mind and make it clear by means of a simple worldly illustration. Suppose you take a document for registration before the Sub-Registrar whose jurisdiction and duty it is to register it. You have executed the document, go to him, pay him the prescribed fee at the prescribed time, at the prescribed place and in the prescribed manner and present your document for registration. If he is satisfied on all these points, he does not bother himself and you with further details about the contents of the document, e. g., your right to execute it, the desirability of your doing so and all that sort of thing. He mechanically and automatically registers it for you. You have perhaps executed a document selling away a property which belongs to some one else and which, therefore, you have no right to sell at all ! Even then, the Sub-Registrar registers that document too away and does not

concern himself with your right, the goodness or badness of the action and all the rest of it! But when the man who has paid you and taken the document from you goes over to take possession of the property and the real owner objects and is shown the document of sale executed and even registered by you, he simply says: "The fellow who has sold this property to you is a knave and you are a fool. Go to court, prove and establish your title, get your decree and have it executed." You then go to a civil court; and then it is not the Sub-Registrar's registration of the document that settles the matter, but the Judge's finding and orders based on the *pros* and *cons*, the rights and the wrongs! This difference between the Sub-Registrar (who mechanically registers) and the Judge (who weighs, considers and decides) is the difference between the *manas* and the *buddhi* i. e., between the mind and the intellect. For, the mind is that part of our internal constitution and structure wherewith we register and take into our records every thing that strikes us: and it is the intellect which afterwards weighs the *pros* and *cons* and decides. For example, when we hear something said to us, we do not —nay, generally cannot—simultaneously hear with the ears and also judge by the intellect whether it is true or false, right or wrong and so on! There is, therefore, the preliminary portion of merely recording or registering all the things which our eyes, ears, nose, tongue and skin tell us: and the inner faculty by means of which this function is performed is the mind. Just as it is the Sub-Registrar's work to mechanically register every document presented to him, so it is the function of the mind to mechanically record everything that is thrown into it, it may be by the eyes, the ears or any other one amongst the five senses or even directly straight into it. The last case too is possible, because when you dream and these senses are asleep and you wake up afterwards and say you dreamt, or when you deliberately close your eyes and meditate, even then the mind is at work and, without the help of the extraneous senses, you receive lots of impressions which are seemingly external experiences but which are really the products—unconscious (as in dream) or conscious (as in meditation)—of your own mind! And when these impressions are there in the waking state, the dream-state or the meditation-state, it is the *Buddhi* (the intellect) which is the faculty wherewith you judge what is right and what is wrong, what is good and what is bad and so on!

Is *Buddhi* then the soul? No; because even there, you sometimes say: "I did not keep my intellect in proper order at that time," "I shall apply my intelligence to find out the real inner truth behind this matter" and so forth. So, even there, you are speaking of it as your property, as an instrument in your hands with which you are going to accomplish a certain piece of work. Therefore, the intellect too is not the Soul but only its servant.

In this way, going further and further and deeper and deeper within, we come to the stage when we think of the proprietor of all these things. It is this real pro-

prietor whom we refer to when we use the word "I" or the word "Soul". In other words, the Soul is what we really refer to when we use the word "I" in relationship to various things on earth, that ultimate thing which is inside us all, over all things and above all things and which claims to be the proprietor and master of all things (including the body, the senses, the mind and the intellect), although very often alas ! we have the actual experience that, far from being the master of the senses as it ought to be, it is frequently enslaved by the senses, as for example, when the taking of unwholesome food has made you ill and even then your tongue still urges you to take some more unwholesome stuff ! Truly a case of the tail wagging the dog ! But anyhow, the rightful proprietor and master is the Soul !

CHARACTERISTICS THEREOF

Having by this process ascertained the existence of the Soul and defined it as the proprietor behind of the body, senses, mind, etc., let us now proceed to determine what is the स्वरूप or लक्षण (i. e., the natural inherent and essential characteristic or property) of this thing which we call the "Soul" ! If we can find this out, we can easily answer those other questions which we often ask ourselves, viz., 'where did we come from' and 'where shall we go' ? There are various ways in which we may tackle this problem, but we shall—in this Foreword—merely outline those particular methods of meditation which have been helpful to us personally, so that perchance they may throw similar light on the path and afford similar help to others who are aspirants on the path !

To begin with, we must first know clearly what is the correct लक्षण of लक्षण (i. e., definition of a definition) so that we may avoid the blunder that people generally commit by confusing what, in Sanskrit technical terminology, are called लक्षण, उपलक्षण and उपाधि which we proceed to explain and elucidate immediately. A *Lakṣaṇa* is a natural inherent or inseparable quality or property of the particular object in question. An *Upalakṣaṇa* is that which, owing to accidental combinations of circumstances, seems for the time being a Lakṣaṇa, but is really not so. For example, if you stay in your quarters and send your servant to hand a certain book over to a certain person in the same street, if he does not know the house and cannot identify it and therefore, wants instructions from you, if you then go over to the terrace or a verandah of an upper floor where you reside and, pointing in the same street to a house just two or three doors off the house just opposite to yours, describe that house to your servant by saying : "There is a crow sitting on that top of the house, a victoria is standing in front of it on the road and three women are talking there on the street in front of it : go to that house," if the servant then says : "Yes, Sir, I have understood whither I have to go" and proceeds thither, book in hand in order to hand it over to the proper person as named by you and if, in the meantime, it so happens that the crow on the top has flown off, the victoria has left and the women have all departed,

will he on that account say that the house itself has gone ? They were merely descriptions given to him in order to carry understanding for the moment ; but they help him to identify the house not merely for the moment but permanently ! For that permanent knowledge which he has gained, you gave him some means of identification which, however, was not in the nature of a *definition* of the place itself ! It was only an accident that the crow, the victoria and the women were there to supply you with an effectual means for carrying understanding to your servant for purposes of permanent identification, and you took advantage of that accident. Such an accidental factor is what we call an *Upalakṣaṇa* (i. e., true for the time being and no more). Now the third means of identification—what is termed an *Upādhi*—is quite sufficient to help a person to identify an absolutely new thing and that too, permanently : but the definition is not *true* even at the time it is being given at but is utterly false even then and for ever ! For instance, how do we point out the moon to a little child who does not know the moon and wishes to know who or what the moon is ? Do we not simply point to the moon in a particular direction and say : "Look there, there is that tree there ; just between that branch and that other branch of that tree, you see a white round mass of light : that is the moon" ? The child understands you and identifies the object pointed out to him. But even when you are describing it, you know the moon is really not between those two branches, but thousands of miles away ! And yet, though it is false even at that time, it seems to be true and its seeming truth of the moment gives the child a permanent knowledge of the identity of the moon ; and the next day, when the moon is elsewhere, the child looks up at the sky and not through the branches and identifies the moon ! Thus there are three kinds of definitions : (1) *Lakṣaṇas* (natural and permanently true) (2) *Upalakṣaṇas* (accidental and temporarily true) and (3) *Upādhis* (accidental and permanently false) : and yet by all these methods, we can give to others a correct knowledge of the thing which we are speaking about. And in all these ways, we may identify the Soul : but, after doing so, we must cast off the *Upalakṣaṇas* and the *Upādhis* and correctly understand the real *Swarūpa* or correct *Lakṣaṇa* of the Soul.

HOW TO FIND OUT ALL ABOUT THE SOUL

There are many ways of finding out the true *Lakṣaṇas* or correct attributes of our Soul : but the two easiest and simplest methods are what, in technical English phraseology, may be called the introspective or analytical method and the teleological or synthetic method. We shall use both these processes and get our problems solved for us thereby.

THE ANALYTICAL METHOD

The Analytical procedure is the afore-explained one of eliminating the *upāḍhis* and even the *upalakṣaṇas* and thus arriving at the Lakṣaṇas. For

example, although we all have experience both of cold water and of hot water, yet the śāstras tell us that cold and not heat is the natural property of water. Why? Because when we come across a quantity of hot water, we know that the heat is not the natural or inherent property of the water, but due to its having been heated over a fire or by the rays of the sun i. e., due to an external cause of an accidental or temporary character! And when we go to a place like Viramgain (in North Gujarat) and find there a tank naturally full of intensely hot water, we at once ask: "why is this water hot"? This very "*why*" of ours is positive and sufficient proof that it is *not* natural for water to be hot! We are given the explanation that there are natural sulphur springs which are responsible for that heat. But the very need for an explanation shows that cold is the natural property of water, and that heat comes to it because of an external factor. Another characteristic peculiarity of the situation is that whatever the cause of the heat and the intensity thereof, even such water when kept aside for a time becomes less and less hot and ends by cooling down altogether! Thus the heat needs an external cause for coming in, but requires none for going out! Therefore, the heat in hot water is merely an *upalakṣaṇa* like the crow, the victoria and the women we referred to in our illustration. Similarly, even though you may cleanse a copper vessel with citric acid or tartaric acid or any other acid for that matter, make it shine brilliantly and carefully preserve it from all possibility of being touched by dust or dirt, yet in course of time it comes gradually, but automatically back to its original dirty green colour! Why? Because dirtiness and not brilliancy is its natural quality or *Lakṣaṇa.* All these examples show that the real attribute or natural quality of an object does not provoke the question "why", does not call for an explanation and, even when subdued for a time by powerful forces (artificial or natural) breaks out again and exhibits itself! By this process of careful elimination, we can and shall presently see what are the real characteristics or *swarūpa* of the soul and re-establish all the grand and sublime truths of the Vedānta.

THE TELEOLOGICAL METHOD

The Teleological method is, however, of a much simpler and easier character and is therefore more suitable even to the layman and the "man in the street". It is, too, the method by which we can find out not merely the nature of the soul, but also whence it came and whither it is destined! It is the method explained in the *Taittirīyopaniṣad* where we find Bhṛgu (afterwards the great Maharṣi but then only a boy) going to his father Varuṇa and asking him the very same question that we are discussing now. The God Varuṇa merely gave him a simple clue and asked Bhṛgu to find things out for himself. The clue given was that "that from which all things come out, that by which they are supported and that into which they finally go are not different from one another but are the same thing i. e., God"! Many examples can be cited, even from the merely physical

life around us, to prove the universality of the principle underlying this teaching of Varuṇa. A seed, for instance, comes out from the earth, stands supported by earth and, at death, goes back therein so!

A less recondite and more popular instance may be taken from the case of fishes. Ordinarily, all people know that fishes have their natural element in water. But let us imagine the hypothetical case of a man who does not know this fact, finds by chance a fish in great discomfort and struggling on the bank of a tank or a river, fancies that the same kind of comfort which he himself enjoys, will relieve the fish of its suffering, takes it up, exposes it to the cool breeze, finds it unrelieved, carries it home, puts it on his own bed, even then sees it in great pain and uneasiness, fails in all his attempts to make it happy, takes it back to tank or river, puts it into the water again (in the course of his experiments for its benefit) and finds it ceasing from its struggles and swimming about joyously, what would and should be his natural conclusion? Well, he certainly would and should conclude that water is the real natural element of fish and that it was all the while leaping about and struggling, only to get back into the water which it came out from and was maintained by!

From this, the inference is plain that *what we are always seeking and can never really be happy without is our real nature or natural element.* This, in brief, is the purport of the Teleological method. By this method too, the whole of the Adwaita Siddhānta can be re-established. Applying both these and other supplementary methods, let us enter on our study of the natural and real attributes of the Soul.

ETERNAL EXISTENCE

The first attribute of the soul, according to our Śāstras, is सत् or त्रिकालाबाध्य-मस्तित्वम् (i.e., eternal existence). We may meditate hereon from various standpoints as follows:—

1. *The Psychological.*—We all talk of "death" and say so and so has "died". But what do we really mean by "death"? Let us remember that we have already defined the "Soul" as that which all of us refer to when we use the word "I". Let us now see whether there is even the least possibility of that word "I" and the word "die" being correlated together as real subject and real predicate? Never. The doctor or the relations feel the pulse and say the man is dead; or the man himself is in doubt and fears that he may die: but the actual mental and psychological experience about *having died* never comes; it is simply impossible. The words 'I' and 'die' never go together. Even when the man says: "I am dying' and is seemingly using the *present* (imperfect) tense, he really means and indicates and talks about the future, not the past or even the present.

In this connection, we may refer to sleep which may be described as a short death. In fact, death has often been called a long sleep; for example, the poet Kālidāsa (in Raghuvaṁśa canto xii) describing the killing of the sleep-loving Kumbhakarṇa by Bhagawān Śrī Rāma says:—

अकाले बोधितो भ्रात्रा प्रियस्वप्नो वृथा भवान् ।
रामेषुभिरितीवासौ दीर्घनिद्रां प्रवेशितः ॥

(i.e., It seemed as if, saying: "Oh lover of sleep thou hast been awakened by thy brother untimely and unnecessarily", the arrows of Śrī Rāma sent Kumbhakarṇa to long sleep! Now, the funny thing about sleep is that you may say: 'I was sleeping,' 'I am going to sleep', 'I am very sleepy' and so forth, but you can never say: "*I am sleeping.*" If you do say so, it is itself the clear proof that you are *not* sleeping! Thus, even the word 'sleep' cannot go with the word 'I': it is inherently impossible. Much more therefore, it is impossible for the word 'die' to go with the word "I"! from this, the natural inference is that death can never be predicated about the soul.

And sometimes it so happens that owing to some curious acrobatism of the mind itself, you dream that you are dead and that people are weeping over you and so on: but the wonderful thing about it is that, even in that supposed dead-state of yours, you see and hear them weeping and so forth, thereby indicating that even after seeming death life really persists! All these illustrations go to show that immortality is an inherent attribute of the soul.

2. *The Teleological standpoint.*—Let us now remember what was pointed out a few minutes ago about fishes and their natural element (water) and apply that principle here. If to live and to die were equally inherent attributes of ourselves, i.e., if death too were quite natural to us, why should we be seeking and trying to avoid it and avert it? Nothing that is really natural to and inherent in us, do we or can we ever seek to avoid. To take another illustration, suppose you have got to wear and therefore do wear a particular dress when going to your office; well, you very soon feel tired of it and are uncomfortable all the time and actually pine for the time when you can go home and throw it all off! Why? Because it is not natural to you, but has been forcibly superimposed upon you and therefore speedily tires you out! So, you tire of a thing only if it is not natural to you: and you never tire of living on! Even when the body becomes intensely weak, senses cannot perform their functions satisfactorily and old-age and disease trouble you, the desire to live goes on! Why? Because living is natural to us and death is unnatural! if death were really an attribute of ours, let us repeat, we would never seek and endeavour to avoid it. The very fact that we desire to live, shows that life is our natural element.

Why talk of life and death? Let us think of health and disease! Why do we seek health and dislike disease? Is it not because health alone is natural and

illness is unnatural to us? Why else should we wish to cure illness? And besides, here too, we may apply the afore-described test about the question 'why'! When a man is ill or in pain, every one asks him why? That very question and the consequent need for an explanation prove that disease, pain and suffering are not normal and stand in need of explanation! But when a man is in sound health, no one asks him why? This is clear proof that good health is natural and needs no explanation! This being the case, even as regards health versus disease, much more therefore is it true in respect of life versus death, i.e., to live is normal and natural and the contrary is abnormal and unnatural. We may therefore conclude from this view-point too that the आत्मा (soul) is ETERNAL!

3. *The Mechanical Evidence.*—In the very first chapter of Professor Roscoe's Chemistry Primer, you are told that "when a candle burns nothing is lost"! On reading this, you may be tempted to retort that with your money and the candle too gone, you cannot agree with the learned Professor! But he explains and answers that, when a candle burns, all that takes place is that the hydrogen and that carbon which go to make up the candle go out into the atmosphere, mix with the oxygen thereof and become watery vapour and carbondioxide, respectively—in other words, there is no *loss* of material, but only change of place, change of shape and change of name! Similarly, when a carpenter makes a chair or a bench, he *creates* nothing, but simply brings the God-created wood from the forest (or the market), cuts it into proper pieces, puts them in proper position and gives the whole thing the desired shape; thus, here too, there is no *gain* of material, but only a change of place and of shape and consequently of name too. Now, this principle that nothing is lost or gained is described in modern Physics by means of long, big and grandiloquent phrases—'The indestructibility of matter', 'The uncreatability of matter', 'The conservation of energy' and so on. And this truth which, in the name of modern science, is taught to you in Physics, is contained in a beautiful half-śloka (stanza) of the ancient Bhagawad-Gītā where the Lord Śrī Kṛṣṇa says :—

"नासतो विद्यते भावो नाभावो विद्यते सतः ॥"

(i.e., That which was not, never comes into being: and that which is, can never cease to be).

Let us apply this mechanical principle of physical and chemical science to the question we are now discussing. When any one asks us: "Was I or was I not before I was born? And will I or will I not be after I die?", we always say to him: "Before we answer these two questions of yours, let us first ask you a preliminary question, i.e., "Do you or do you not, now exist"? Our answer to your two questions will depend on your reply to our query"! Well, nobody says or can possibly say: 'I am not existing now': and therefore we reply: "If you *are* now existing, then you surely must have been existing before too, because what did not exist cannot newly come into existence! Similarly, if you *are* now existing, then you surely must continue to exist for ever, because what *is* existing can never go

out of existence ! Of course, as in the case of the carbon and the hydrogen of the candle and wood of the chair, the table, etc., there will be changes of place, shape and name : but "*cease to exist, you never can*" ! This generally clinches the matter : and earnest inquirers are almost always satisfied by this process of मनन, that the Soul is, and must be, really Eternal ! One need not, however, study Philosophy (or even physical science) for this purpose.

4. *The Linguistic Evidence* :—A mere linguistic study of the Sanskrit Vocabulary will help one to arrive at the Truth. Our Sanskrit language is so called because in our estimation it is the only perfect tongue : and we also look upon it as the language of the Gods themselves, because no word thereof is there by mere accident or chance, but every word of it carries home to our minds and hearts a lot of philosophical and scientific truths of the sublimest character which a whole life-time of metaphysical and scientific study may after all not suffice to convince us about the truth of ! This is why we very often say that if Sanskrit were really not the language of the Gods (as we verily believe it to be) then it ought to be and that the Gods should be ashamed of themselves for preferring any other tongue to Sanskrit ! Now, let us see what the mere Sanskrit language can teach us about the Soul without any help whatsoever from Philosophy, Science or anything else in the wide world.

The question of questions is, when we speak of birth and death, what do we mean thereby ? What is birth and what is death ? The words 'birth' and 'death' are mechanically used in English to signify two particular events which frequently take place and which need an elaborate definition and explanation. But no word —in English or any other language on Earth for that matter, except the Divine Sanskrit alone—gives us any clue to the philosophy or science underlying the phenomena of birth and death.

But take the Sanskrit word for birth, i.e., जन्म. It is derived from the root "जनि प्रादुर्भावे" and simply means "coming forward and manifesting itself" ! That is, what was hidden *behind* us has now come to the front of us and become visible to us ! Another Sanskrit word for birth is उत्पत्ति (corresponding to 'origin' in English) : and this is derived from उद् up and पद् to go and merely means : "Coming up and manifesting itself" ! In other words, what was hidden *below* the surface has now come to the top and shown itself forth ! A third Sanskrit word is सृष्टि (corresponding to 'creation') in English : and this is derived from "सृज विसर्गे" and means only :—"throwing out from concealment within" ! That is, what was concealed *within* has now been thrown *out* ! Now, the psychology behind these three Sanskrit words is this :—

Our senses have been so created that they naturally start from inside and work outward : they do not tend inward. As the Kaṭhopaniṣad puts it,

"पराञ्चि खानि व्यतृणत्स्वयंभूः ॥"

According to this tendency, we can see only the things which are outside of us :

we cannot see our own eyes: and even when we seem to see them in a mirror, it is not our own eyes that we are really seeing, but only a reflection thereof! So, when our eyes cannot see even themselves, much more therefore is it impossible for them to see behind, beneath or within themselves. Therefore, we are in this difficulty that we cannot see the things concealed behind ourselves or beneath the surface or within ourselves. And when these things come forward, above the surface or outside of us respectively and present themselves to the possibility of being visualised by us, then we have the three Sanskrit words Janma, Utpatti and Sṛiṣti describing and connoting what has taken place, i.e., that nothing that was not has come into being, but only something which was unmanifested has now manifested itself! And there is no fourth word in Sanskrit to denote or justify anything to the contrary!

Now, to the other side of the picture, i.e., as regards death. The sanskrit word therefore नाश, is derived from "नश अदर्शने" and merely means "cease to manifest itself or to be seen"! Thus, it applies equally to all the three cases where a person has "died" or has gone to another country or has gone just a little out of sight (whither behind, beneath or inside)! All these four words prove that birth and death are not the beginning and the ending of a life, but only *landmarks* on its beginningless and endless route! In other words, the Sanskrit Vocabulary too teaches us that the Soul is Immortal!

KNOWLEDGE

The next point which our Śāstras deal with in connection with the nature of the Soul is चित् or ज्ञान, i.e., Illimitable and Perfect Wisdom. With our frequent, nay constant, experience of our ignorance and blunders and their disastrous consequences to us in our daily affairs, we naturally find it hard to believe this to be true. A little मनन (reflection) will prove, however, that this too is perfectly correct. But let us proceed slowly and, not worrying over limitless knowledge at the outset, first see whether it is possible to separate the "Soul" from all knowledge as such altogether? And we will realise that in some shape or another, in some degree or another and in some quantity or another, we always and invariably have something of knowledge. The question just now is not whether that knowledge if full or incomplete, correct or incorrect and so on. We shall take this up later on. But at the very outset, we see that some knowledge is always there. In this connection, we are often reminded of the humorous story of the wife who complained to her husband that there was absolutely no subject on earth on which they ever agreed and then he replied that that was wrong because there was one point on which they were in perfect agreement, i. e., that there was no subject on which they could ever possibly agree! Similarly, we may say that even when a man feels and says he knows absolutely nothing about anything, he *knows* at any rate that he knows nothing: and that too after all *is* knowledge! This shows that ज्ञान (knowledge) is the second लक्षण which can never be divorced from the soul!

This is true not merely of the waking state nor only the dreaming state but of the sleeping state too ! For there too there is consciousness ; only it is so subdued as not to be felt above the surface ! How can we be sure of this ? A simple experience will illustrate and prove it. Suppose you are sound asleep and a mosquito bites you on the sole of your foot. Although you continue to be sound asleep, your nerves of consciousness never slumber at all. In Physiology, we are told of two kinds of nerves (afferent nerves and efferent nerves) whose function it is to carry news from without (through the sensory organs) to the brain and to convey orders from within the brain to the executive organs, i. e., the arms, etc. All these nerves are at work all the time and you are yourself not conscious that these nerves are always keeping vigil and functioning properly. Well, the result is that even although the mosquito-bite on the sole of your foot has not disturbed your sleep and created a disturbance, yet news of the pain to the foot has been instantaneously communicated to your brain ; and even then, without rousing you from your sleep, without conveying a meeting of the Council or even the Working Committee and without even giving out the slightest indication to you that a problem has come up for consideration and has already been dealt with in the most business-like and practical manner, your brain issues its orders to one of your hands to rub the bitten portion and rub out its pain, and the hand obeys forthwith ! And when you wake up and see the clotted blood on a particular spot, then you *infer* that mosquito must have bitten you there and that you must have used your finger-nail on that spot ! Well, the Physiologist may seek to explain this away by speaking of it as "Reflex Action" ! But whatever name he may give to the process, the fact is undeniably there that even during deep sleep, news of pain is conveyed to the brain and the latter does all that is required to remove that pain ! This shows that even in सुषुप्ति (deep sleep), ज्ञान (knowledge) persists at all times and in some shape or quantity. In other words, ज्ञान is another *Lakṣaṇa* which is inextricably intertwined with the Soul as an integral, inherent and inseparable attribute thereof !

Now, let us delve further below the surface and ascertain whether this knowledge which we have found to be a लक्षण of the Soul is really खण्ड or अखण्ड, परिच्छिन्न or अपरिच्छिन्न. We say that we committed this mistake and that blunder and so forth : but the Vedānta Śāstras say that the soul is always चित्स्वरूप, i. e., of the nature of Perfect Illumination ! And if we analyse the facts of the situation properly, we can easily see that the knowledge within us is not limited but Absolute, Unlimited, Perfect and Complete ! For instance, if you close all the doors and windows of your room and allow only a tiny little ray of sunlight to manage with the utmost difficulty to enter by a small crevice, will you be justified in saying that that is all the sunlight in the world ? The fact is, the sunlight comes in through the limitations of that crevice : and you cannot realise the real magnitude of the sun's entire rays therefrom ! Similarly, if a huge light is within a house and only a few tiny rays thereof manage to struggle and

struggle through, people who look at it from without can have no idea of the whole light within but only of the little that they see! This is why Bhagawan (the Lord) Ādi Jagadguru Śaṅkarācārya says :—

"नानाछिद्रघटोदरस्थितमहादीपप्रभाभास्वरम्"

(i. e., Resplendent like the light of a huge lamp within the bowels of a vessel with many crevices)!

Or, take again, the instance of our ordinary electric bulbs even when the power-house is generating the maximum quantity, the light that we receive depends upon the power of the bulb that we actually use; in fact, even the colour of the light can be changed by using a coloured bulb, although electricity itself is not green, blue, red, white and so forth! Similarly, says the Vedānta, all the knowledge that we seek is already within us; only it is covered over by अज्ञान (i. e., nescience or ignorance) : and all that we have to do is to remove that crust. Says the Lord Śrī Kṛṣṇa in the Bhagawad-Gītā :—

1. "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः" ॥

(i. e., Knowledge is enveloped by ignorance; hence the follies of all creatures).

We may get enlightened on the truth of this teaching by carefully pondering over our experience of fire, electricity, sculpture, education, etc.! How do we make a fire? We do not *create* fire : it is already there in a concealed, dormant or latent state. And all that we do, whether it is by the rubbing of two अरणीs (pieces of sacrificial firewood) or by striking one stone against another or by friction of the match stick and the match box or by any other process, is simply to make the *latent* fire *manifest* itself! So also, with regard to electricity. We do not *create* it : it is already there, God-created and pervading the whole universe! And all that we do is to adopt the necessary device for making the *latent* electricity *manifest* itself. Similarly, when the sculptor makes a statue out of marble, what does he actually do? He does not take any मूर्ति (say, of Śrī Kṛṣṅa, Śrī Rāma, Śrī Śiva, Christ, etc) from outside and put it into the marble! The marble already contains within itself all the conceivable shapes in the universe : but he does not need all of them, but only one particular shape; and all that he does is to concentrate his mind on that particular मूर्ति and chisel out all the other things which hide that मूर्ति out from our gaze and thus the desired shape is not put in from outside, but *comes out from within*! This is really the only process which we can employ, i.e., not to put in from without but *draw out from within!*

Considering Education from this point of view, we may note that the very word "Education" means "*Drawing out*"; and only that process deserves to be called Education which is calculated to draw out all our innate and inherent but latent faculties and capacities to their utmost possible extent and farthest possible reaches! Any other process—i.e. the method of putting things in and cramming (or "mugging") them up—cannot be termed EDUCATION : it can only be called

INJECTION (and that too not with the doctor's fine hypodermic syringe, but with two of the bluntest and thickest weapons conceivable i.e., the fear of the cane and other such physical chastisement on the one hand and the fear of failing in Examinations—with all the mental *and* financial chastisements resulting therefrom on the other) !

And besides, even if, just for a moment and just for argument's sake, it be granted that it is *possible* to put knowledge forcibly inside, is it *worth while* ? Let us remember what has already been said about, hot water giving off all its acquired heat because the heat is not its Lakṣaṇa from within but an Upalakṣaṇa forced on it from without ! Applying the same principle, we can easily understand that if ज्ञान is not really our लक्षण from within, but is put into us from outside, it can do us no lasting good ! For, all that Education will be useful to us only if the ज्ञान "given" to us is already within us but was latent and has been made to manifest itself and function forth ! If the learning given to us is not an inherent and integral part of our very nature, then all the learning that we have thus taken in from without, will and must go off in a short time, just like the hot water giving up its heat ! This clearly shows that all knowledge is already within us ; and the real Teacher is He who devises and adopts the most efficient measures for *drawing out* all that latent knowledge and giving it scope and free play to show itself forth and benefit us all-round ! All others who masquerade under the garb and designation of 'Teachers', can only be called "cheaters" ! This is why the Lord Śrī Kṛṣṇa says in the Gītā :—

तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥

(i.e., When the clouds which were hiding the sun from our view are driven away by a joust of wind, it is not a wind-created new sun that we see, but only the same old sun whom the removal of the obstacle-interposing-clouds by the wind brings once again into view) ! In other words, Education, training and culture do not create or give any new knowledge, but only bring out the innate wisdom from within and help us to see, realise, utilise, enjoy and benefit by it ! To put it tersely but pithily, NURTURE does not—nay, cannot—*change* NATURE, but only *draws* it out and gives it full scope and free play ! All this means that आत्मा (the soul) is of the nature of अखण्ड ज्ञान (Infinite knowledge).

THE CASE OF THE FRENCH GIRL

In this connection, we may refer to the striking incident reported by the newspapers less than a year ago, wherein a French girl who knew only her mother-tongue (French) passed through a dangerous illness, remained unconscious for weeks, and was given up as lost, but somehow pulled through miraculously and was found not merely to have forgotten French altogether, but also to have suddenly developed wonderful proficiency in about a dozen languages which she had never heard before ! Well, the psychologists, philosophers and scientists were naturally astounded at this wonderful news, rushed forth to investigate the case in all its

details, were absolutely convinced that there was no fraud about it and that the whole report was historically true, accurate and correct and were driven—willy nilly—to state the only conceivable explanation of the phenomenon was that, evidently, perfect knowledge of all things (including languages) is really stored within our brains but locked in by special doors which only particular keys can possibly unlock, that by our associations and environment and training we get some of these portals opened but (owing to ignorance or non-using of the right key) we fail to open the other and that in the case of that French girl something—of which the scientists, etc., could form no idea—must have happened whereby the door for French got mechanically shut and the portals for about a dozen altogether strange languages got simultaneously thrown open !! Here then is प्रत्यक्षप्रमाण (*ocular Proof)* of the *Vedānta* doctrine that the soul has infinite and Perfect knowledge !

Teleologically too just as our very desire for continued living proves that our nature is immortality, so is our curiosity to *know* things a clear proof that knowledge (and not ignorance) is the real Nature of the Soul.

INFINITE BLISS

Having thus ascertained these two *Lakṣaṇas* of the Soul, i. e., Immortality and Infinite knowledge, let us take up the next. The Upaniṣads teach us that after सत् and चित्, आनन्द (Eternal, Pure and Perfect BLISS) is a Lakṣaṇa of the Soul. This too, we, with our constant experiences of sorrow and suffering, naturally find it difficult to believe ! But a little मनन (reflection) on the lines so far explained and illustrated will prove that here too the Vedāntic teaching is the really correct one ! In fact, it is so simple that one must really wonder at the marvellous power of माया which succeeds in blinding our intellects to such an obvious and axiomatic Truth ! Now, if a man is seen weeping, people go and ask him *why* he is weeping ? It needs an explanation. But nobody goes and asks the others why they are *not* weeping ? This proves that दुःख (sorrow) is not *natural* to us but comes to us owing to some external cause of the moment, i.e., is really not a लक्षण at all but merely an उपलक्षण of ours ! And even when the man gives out the cause of his grief (that he has lost his wife or somebody else) and he feels for the moment that the sun has set for him for ever and the world has come to an end for him ; even in such a case we see the sorrow goes on decreasing from day to day and sometimes we are astonished at the spectacle of even such a man forgetting that extremely-lamented wife or other relation altogether! Well, is not grief then just like the heat of the hot water, inasmuch as it needs an extraneous cause for coming in, but none for going out except the mechanical elapsing of time ? If so, is not grief just an उपलक्षण like that heat, of the hot water, the crow on the top, the victoria in the road and the women in the street ! This proves that sorrow is not natural to us, i.e., that उपलक्षण (happiness) alone is really our nature and, even when forcibly subdued by some external cause of grief, does

not really go out, but merely stays inside, only to re-assert itself gradually, drive out the intruder and spread itself over the surface too, once again, as ever before!

Teleologically too, we may point out that just as our very desire to live and know things proves Eternal Life and Boundless knowledge to be our Nature, so the very fact that we are all in search of Happiness, i. e., our very desire for Happiness is positive proof that joy is the Nature of our Inner self that the farther we stray away therefrom the greater is our suffering and that, just as fishes out of water struggle incessantly to get back thereto because it alone is their natural element, so too do we, when out of joy, struggle incessantly to get back thereto because (not sorrow but) joy alone is our natural element, nay—our very Nature itself! And everything that we do is with a view to attain joy! (whether we judge aright and adopt the right means therefor is, however, a different matter). Proceeding a step further in this direction and pushing this very argument farther ahead, we note that the joy that we seek is not that which is bounded by time, place or quantity, but that which is absolute, unadulterated (with sorrow) and unbounded! So, this means that Absolute, unadulterated and Boundless joy is our Nature!

INDEPENDENCE

Suppose now, we have got all these things—Immortal life, all-pervading knowledge and unbounded happiness all-round. Are we satisfied therewith? No, for, even if we live for ever, know all things and enjoy all the happiness that we desire, but get all these joys not of our own inherent and intrinsic right and at our sweet will and pleasure but merely at the mercy of some one else, then that very dependence on another is galling and irksome: and although owing to sheer inability to break our bonds, we may acquiesce in them, we do so, not willingly but helplessly! And *if possible*, would *like* to be independent altogether of any and every persen and thing in the universe! It is not only Man with his grand and boasted powers of Discrimination, but also every sentient creature in the world that has this burning desire for independence or मुमुक्षा as the Vedānta terms it! Much more therefore is it natural for us human beings to think of it by day and dream of it by night and—consciously or unconsciously—yearn for it all the time! Well, this very incessant hungering of ours after independence is proof that freedom from bondage is our Nature! This therefore, i. e., मोक्ष (Absolute emancipation from all bondage) is our fourth लक्षण of the Soul.

SUZERAINTY

But even this fourth aspiration of ours does not exhaust the list! If and when we analyse our own feelings, ambitions and actions correctly and honestly, we find that even the attainment of सत्, चित्, आनन्द and मोक्ष (i. e., Eternal Life, Boundless knowledge, Boundless Bliss and Absolute Liberty does not suffice and that there is still one thing more which we all seek! It is very peculiar—this

fifth thing that every one of us at heart really desires—and inconsistent with the fourth of our aspirations! But it is there all along and all the same and cannot be gainsaid! And what is this peculiar ambition of ours? It is this that, although on the one hand we wish to be independent, i.e., do not like to be guided by the wishes of *others*, yet on the other hand and at the same time, we also wish others to be guided by and follow *our* wishes! The most remarkable thing here is how even little children who have little knowledge and less experience of the world wish their more experienced and wiser parents to be guided by the wishes and the judgment of the little children! And there is absolutely no exception to this rule that every one, in his heart of hearts, really desires not only to live, to know, to be happy and to be independent, but also to rule over all others! To put it truthfully, it is not Rulership or sovereignty, but full-fledged SUZERAINTY over the whole universe that we would like to have, if only we could! Arguing teleologically, this proves that Suzerainship too is natural to us, i.e., is the fifth लक्षण of the Soul!

THE SUM—TOTAL OF IT ALL

By this elaborate analysis of the facts around us and the feelings within us, we have now come to the conclusion not only that these, i.e., सत्, चित्, आनन्द, मोक्ष, ईशन are the five things we are all after, but also that they are natural to us, in fact, our inherent characteristics which—like the natural coldness of the heated water—may be snubbed and subdued for a while but can never never be permanently suppressed and killed out of us! What is the real meaning, the true significance, the practical import and the ultimate implication of all these facts which our introspectional analysis of the question has led and enabled us to discover? Where did we begin from and whither have we reached? Well, we began by discussing and dissecting the facts and the feelings neither of God nor even of any superman, but only of ourselves! In fact, we have not, so far, postulated even the existence of God, but only talked all the time about the *individual* soul! And we have reached this most unexpected but, on the basis of the facts before us, irresistible conclusion that whether or not we know and believe in the existence of God and even irrespective of whether we have heard or thought about Him or not, it is just those attributes of सत्स्वरूप, चित्स्वरूप, आनन्दस्वरूप, मुक्तस्वरूप and ईश्वरस्वरूप which the scriptures of all the Religions of the world proclaim as God's, that we too have realised as our own real, natural, internal, innate and inherent attributes and that we are all—whether consciously or unconsciously—inwardly and unceasingly endeavouring, with might and main, to achieve in ourselves those very Lakṣaṇas (properties) which are associated with Almighty God Himself!

GOD AND THE INDIVIDUAL SOUL

Having thus found out the characteristics of the individual soul (to be the same as God's), let us now see what is the relationship between the two? If this

is correctly known, the question of our Soul's Evolution can be easily—nay, almost automatically—settled ; for, if the goal has been discerned, then the right path thereto can be easily fixed up. It is clear from the foregoing considerations that because we are of the nature of Divinity, i. e., नर (man) is really नारायणस्वरूप (of the Nature of God), therefore it is that having fallen far away from it, we are in sorrow and in suffering, that the lower and lower we fall, the greater and greater our griefs and sufferings become and that the only way out is to get back to our own स्वरूपभूतलक्षण as speedily as we possibly can ! For, it is from Nārāyaṇa that we have come out, by Him that we are maintained and into Him that we shall be absorbed !

UNITY VERSUS MULTIPLICITY

"Yes, but all this demonstrates merely the *similarity* of man to God (on account of the former's spiritual aspirations towards godlikeness or even godliness) and may therefore also be held to prove the truth of the doctrine underlying the Biblical narrative about God creating Man in His own image ! But how can it prove our *oneness* with Him ? Because, on the basis of the five attributes referred to and described we are justified—at the most—in assuming *Psychological similarity* ; but how can we infer *chemical identity* therefrom" ? This is the next question for us to consider. Hereon, our Śāstras tell us that there is real oneness behind all the infinite multiplicity of forms and shapes in the Universe and that there is *Absolute Identity*—not merely *chemical,* mind you, but even *mathematical*—between परमात्मा, जीवात्मा and जगत् (i. e. God, the individual soul and the universe) ! Let us try to understand this too by our usual method of मनन (meditation). And this problem too we may tackle in various ways.

THE STORY OF CREATION

First of all, let us ask ourselves, what is creation ? In respect of this subject, there is a slight difference but no contradiction between our Upaniṣads and the Bible. The latter begins the first verse of the first chapter of its first Book (viz. Genesis) thus :—

"In the beginning God created the heaven and the earth" ; and, in proceeding to describe that process, shows that God is सर्वज्ञ (omniscient), सर्वशक्ति (omnipotent) and सत्यसंकल्प (of infallible intention); because, according to the Biblical account, God said, 'Let there be light' and there was light ! But nothing is said here about the relationship between God, the creator and Light, the creation ! The Upaniṣads, however, go further and tell us the actual Saṅkalpa with which God created the universe : and this elucidates the relationship between the two. The संकल्प was :

बहु स्यां प्रजायेय (i.e.,) "I shall *become* many : I shall *manifest myself* in many forms." He did not say : "I shall *create*", but "I shall become" : and thereby He shuts out all possibility of doubt on the point. If you grant that Īśwara

(God) is सर्वज्ञ (omniscient), सर्वशक्ति and सत्यसंकल्प (of infallible will), then you must also grant *ipso facto* that all the things which we see around us are mere *manifestations* of that Supreme Soul under different limitations (उपाधिs) of bodies, senses, minds, and so on. But if you insist that these are all different from Him, then, even although you may be a lip-thiest, you are really refusing to acknowledge Him as omnipotent and of infallible will !

There is the unqualified text of the Upaniṣad that सदेव सोम्य इदमग्र आसीत् (i. e., the positive statement that God *alone* was existing) ; and, although the word एव (alone) is quite sufficient to make the point absolutely clear, yet, in order to prevent all possibility of doubts and inferential errors, that text is followed immediately by the next text नान्यत्किंचन मिषत् (i. e., the further categorical negative statement to the clear effect that nothing else and nobody else was there). And then creation began, whereby He *became* many ! This is what the Śāstras definitely say on the matter. And this means that all the things that He created are really Himself ! This is one way of arriving at the certainty of the Oneness of God, the individual Soul and the Universe.

And then, over and above this inference from God's *Saṅkalpa* of creation, there is also the clear text which—without leaving it to us to infer and argue matters over—specifically says : "सच्च त्यच्चाभवत्" (i. e., He Himself *became* the visible and the invisible Universe). And after this, there can be no getting away from the fact that *Adwaita* (Monism) alone is the real *Siddhānta* (doctrine) propounded by the Vedānta.

In the next place, the sanskrit word सृष्टि (which we have already dealt with in connection with the Eternal Existence of the Soul) is also sufficient for proving its absolute Identity with God ! सृष्टि simply means विसर्ग i. e., throwing out (or showing forth) what was inside ! And, the Vedāntic simile यथोर्णनाभः सृजते गृह्णते च (i. e., just as the worm throws out its cocoon and takes it back, so does God project the Universe from within—at creation—and take it inside again at the end) ! confirms this idea of सृष्टि as a process not of *creation* of anything *new*, but really of the *manifestation* of the *unmanifested !*

THE BIBLICAL NARRATIVE

Let us go back now to the Bible which begins with the verse : "In the beginning God created the Heaven and Earth" : an analytical study of this text will also lead us to the same conclusion as our upaniṣadic study has already led us to ! The very statement that God created the heaven and the earth means that before He brought them into existence, He alone existed and nothing else. If so, when He created them, out of what *material* did He create them ? For example, when a pot is made, there must be not merely a *potter* who makes the pot, but also the *clay*, out of which he makes it. Similarly, when a gold ornament is made, there is not only the goldsmith who makes it, but also the *gold*, out of which he makes

it. In fact, even before the potter and the goldsmith are required, the clay and the gold are first necessary ! Applying the same argument, we see that before the universe could be *created*, there must have been not merely a God to create it but also the *material* to create it out of ! Now, at the time of the creation of a pot or of a golden ornament, there were the clay and the gold respectively beforehand, the potter and the goldsmith come upon the scene and everything is plain and smooth work thereafter ! But if the time of creation—as the Vedas and the Bible agree in telling us—God alone Existed and there was *absolutely nothing else* in existence, what *could* He have created it all out of ? Suppose gold alone exists in the world and no other metal or mineral or other matter exists, you certainly will not suspect an ornament brought by a goldsmith to be anything but pure gold ? Whatever the shape or size of the ornament or vessel or other thing made by him, the material of which it is manufactured will be gold, wholly gold and nothing but gold ! So, when God alone existed and *nothing else* and He created the world, the only *thing* He created it out of must necessarily have been the only thing which then existed, i.e., Himself and no other (because there *was* really no other thing in actual existence) ! In other words, the *material* within all persons and things is God Himself and all the differences we see in the things around us are merely in size, shape, etc., i.e., only in the *manifestation* and not in the actual thing or *substance* within ! The Vedānta text :—

वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥

(i. e., Vessel, pot, etc., are merely *names* denoting differences in *manifestation*, but the *material* within is, in truth, merely the clay ; similarly, men, horses, stones, water, etc., are merely *names* indicating differences in *manifestation*, but the *material* within, in truth, is merely God) : and Veda-Vyāsa's Brahma-Sūtra clinches the matter in the aphorism :—

तदनन्यत्वमारम्भणशब्दादिभ्यः

(i.e., The identity of the universe with God is clearly taught by the आरम्भण and other texts of the Vedas). And the Bible narrative too, as we have just shown, leads us to the same conclusion. And this is Exactly the position taken by the Lord Śrī Śaṅkarācārya in His Famous couplet :—

सुवर्णाज्जायमानस्य सुवर्णत्वं हि निश्चितम् ।
ब्रह्मणो जायमानस्य ब्रह्मत्वं च विनिश्चितम् ॥

(i. e., As that which is born of gold is undoubtedly gold, so that which is born of God is incontrovertibly God) ! This alone stands to reason, viz., that what has *emanated* from God must necessarily *be* God ! And this satisfactorily explains, too, the wonderful fact (already discussed by us at great length) that our Soul too constantly hankers after the very attributes of सत्, चित्, आनन्द, मोक्ष and ईश्वरता which are God's. Being by nature Divine, is it to be wondered at that we can never be really and fully satisfied and in peace until we realise our Divinity

to Perfection all-round and that, even in the darkness of ignorance encrusting the Divine Light within us, we go on groping blindly forth towards those five attributes of our own ? It is not mere Godlikeness or godliness, be it noted, that we really seek, but absolute oneness with God. And, while other religions put it before us in a dim and faint sort of way, by saying :—

"The kingdom of God is within you,"
"Ye are gods" and so forth,

it is the unique glory of the Vedānta that it propounds this doctrine in clear and unambiguous language, sets forth before us this very goal and expounds the path thereto. How beautiful is the Upaniṣad which says :—

प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत् तन्मयो भवेत् ॥

(i. e., The Soul is the arrow and God is the target ; and just as the arrow shot out by an expert archer goes straight into and becomes one with its target, so too should the Soul go straight into and become one with God).

MONISM VERSUS ATHEISM

It is clear that as all theistic systems of thought postulate not merely the existence of God, but also the creation of the universe by Him, therefore Theism must logically and invariably lead us to Monism (or, as Lord Tennyson calls it, the Higher Pantheism of the Vedānta. But there is one ancient Religion—Jainism—and one modern fraternity—the Ārya Samāj—which try to get over this difficulty (about God and the material with which He created the world) by simply denying God's creatorship of the universe! And each does this in its own characteristic way. These too therefore we may briefly consider. As far as the merely rationalistic and moral aspects of this question are concerned, we may point out that the Jain position is much better than the Ārya Samājic.

The Jain theologians say that an omniscient and loving God *cannot* possibly have created a world to full of sin and sorrow as we actually find it to be : and therefore they deny God's creatorship. This simply shows them to have been *intellectually* cowed down by the great *Problem of Evil* which has been a bugbear to all metaphysicians : but their *motive* in denying God's creatorship of the world is one that we can appreciate, although we cannot accept the soundness of their argument ! And *ethically* too, their position is unassailable because, unlike the Ārya Samājists who profess to believe in the Vedas, the Jains are emphatic non-believers therein : and therefore they cannot be convicted to intellectual *dishonesty* in the matter, but merely of intellectual *blundering* therein ! But the Ārya Samājist is guilty of both ! for, not merely the Upaniṣads but even the मन्त्रसंहिता which he always parades his faith in (and which says : अजायमानो बहुधा विजायते, i. e., He, the birthless one, takes birth in many shapes) preach pure Monism ! And even Swāmī Dayānanda Saraswatī (the founder of the Ārya Samāj) interprets this passage in the same way !

Apart, however, from this inconsistency with the scriptures which he professes faith in, let us analyse the Ārya Samāji's *argument* from the merely rational standpoint and see what it is worth. He professes to believe in God and calls Him omniscient, omnipresent, omnipotent and so on, but, denying His creatorship of the world, declares that Nature too (with the whole universe in its womb) was co-existent all the time with God and is therefore not His creation at all and that all He does to deserve the proud title of Creater of the Universe is to re-arrange the things already in Nature so as to give it its present form, shape and name. To this, no more elaborate reply is necessary from us than that if God and Nature were two co-existing powers with their separate and independent properties, He would surely be *bound down* in His activities by the limitations inherent in those independent properties of Nature and could therefore not be truly *omnipotent* and all the rest of it and that if the kind of creatorship attributed to Him by the Āryasamāji is the whole truth of the matter, then it is on the same level with—nay, from one standpoint, even inferior to—the potter's creatorship of a pot! for God has "created" the forest: and We human beings have "created"—in the same sense—the towns. And, in this sense, like the little school girl who, in answer to the question of the Inspector of Schools as to who made her, graphically replied: "God made me this much, Sir: and I grew the rest myself," we may claim that God made all the crude and stupid things in the world and that we have made all the finer things, i. e., the cities,the palaces, the trains, the electric bulbs, the scientific inventions, all the wonders and all beauties of civilisation and are therefore the *Superior Creator* amongst the two! This is all the answer we need give to the Ārya Samāji who, with his separate God and his independent Nature, is really neither an Atheist nor a Theist! for, to an Atheist, there is no God but only Nature; and to the real Theist, as we have already seen, there is really no other Nature but only God in the manifestation! And, as a matter of fact, there is no school of philosophic thought which admits God's existence and denies His creatorship! And this is because the two go together: and once this is granted, the relentless logic of the arguments which we have already considered, drives us to the overmastering and irresistible conclusion that God created the whole universe *out of Himself*, because He alone existed before creation and therefore there was nothing else to create the world out of!

In further objection to this, some one may say—as the Dwaitis (the Realists and Dualists and Pluralists) do often say:—"Yes, but God is omniscient and omnipotent; He therefore could have made the world out of nothing"! Quite true; our question, however, is not about His knowledge or *capacity* to do things, but merely of the *material* which He has made them out of? Although the potter's knowledge, cleverness, skill and capacity are all there, yet surely they are not the *material* out of which he makes the pot? Similarly, our question is not about God's capacity but only about the *substance*; and our contention is

that as the only *material* which was then available to Him was Himself, He must have made the universe out of that only thing that then existed, i. e., Himself! The Bhagawad-Gītā śloka quoted earlier ब्रह्मार्पणं ब्रह्म हविः etc. (i.e., the presentation of the sacrificial oblation is God, the oblation itself is God, the fire that receives it is God, the presenter is God, his concentrated meditation is God and the fruit to be obtained thereby is God) puts this beyond all possibility of the least doubt!

And if one still obstinately insists that God did not create the universe out of Himself as described by the text: "यथोर्णनाभः सृजते गृह्णते च" but out of NOTHING, even then our Vedāntic position remains unaffected! Because, even then, just as the pot made out of clay is nothing but clay, even so a universe made out of nothing can only be of the nature of NOTHING! And this is only another way of stating the Vedāntic theory known as मायावाद (which we have already referred to and shall refer to again presently). And it practically means the re-proving of Adwaita by another method, because it practically means:—"God alone is, nothing else exists"! And what more can a Vedāntist desire than this volunteered argument of the Dwaiti (Realist) in favour of his own Adwaita Doctrine or Absolute Monism?

And besides, once you grant that there was a time when God alone was and nothing else existed, you are up against the stone wall of the Gītā-doctrine of "नासतो विद्यते भावः" (corresponding to the Physicist's dictum about the uncreatability and the indestructibility of matter)! What was not can never come into existence; and what was can never go out of existence! So, if God alone was, then obviously God alone is and God alone can be! In other words, put it positively that "God and the Universe are one" or describe the same thing negatively and say: "God alone is: and nothing else exists". Q. E. D.

THE FIVE BHŪTAS

To make this clearer, let us take the case of the five Bhūtas—Ākāśa, Vāyu, Agni, Jala and Pṛthivī (Ether, Air, Fire, Water and Earth—with which creation began). As God Himself made them, we are compelled to infer that He must have created them out of Himself! On the principle of the Upaniṣad that मृत्तिकेत्येव सत्यम् (i. e., the Truth is that the real material within is the clay), the Earth is only an emanation from or a manifestation of water and therefore one with it; water is similarly a mere emanation from or manifestation of Fire and therefore one with it; Fire too is only an emanation from or manifestation of and therefore one with Air; Air in its turn is only an emanation from or manifestation of and therefore one with the Ether; and finally Ether is merely an emanation from or manifestation of and hence one with God! Thus all things can be traced back to and equated, nay—identified, with God!

Now let us take the properties of matter, शब्द-स्पर्श-रूप-रस-गन्ध (i. e., sound, touch, shape, taste, and smell) and deal with them too in the same way. आकाश has only

one quality, i.e., शब्द ; वायु has two, i. e., शब्द and स्पर्श ; अग्नि has three, i. e., शब्द, स्पर्श and रूप ; जल has four, i. e., शब्द, स्पर्श, रूप and रस ; and पृथिवी has all the five, viz, शब्द, स्पर्श, रूप, रस and गन्ध. Now, let us begin our destructive process of analysis of these qualities, where they come from and so on ! Starting with पृथ्वी (Earth) we see its fifth quality, i.e., गन्ध (smell) was not in the preceding element, to wit, जल (water) and is absolutely new. But the Gitā says : "नासतो विद्यते भावः" and Physics too says :—"Nothing that was not can newly come into existence". Therefore, we knock out गन्ध (smell) either as मिथ्या (illusory) or as being already in जल (water) ; in the former case, पृथ्वी (earth) whose definitive definition is the fifth गुण (गन्ध) is itself मिथ्या (an illusion) and in the latter case, पृथ्वी and जल (having all the five qualities) become identical ! Similarly, if we take up the fourth quality रस which appears newly in जल, we follow up the same process of either eliminating it as मिथ्या or as being already in अग्नि, with the result that Earth and Water either get knocked out as illusions or identified with Fire ! Next, we take up the third quality रूप, knock it out as मिथ्या or postulate its existence in वायु too, thereby making earth, water and fire as illusory or identical with Vāyu ! Fourthly, by the same argument with the second quality स्पर्श, we either eliminate it as illusory or detect its hidden existence in आकाश, thus ruling out earth, water, fire and air as मिथ्या or as being identical with आकाश ! And finally we may deal out the same, knock down the first quality शब्द, eliminate it as illusory or as being in God already (unmanifested, of course) and thus either kill out all the five Bhūtas as illusions or as being the same as God !

The whole process just explained may be geometrically summarised thus :—

*पृथ्वी=जल ; जल=अग्नि ; अग्नि=वायु ; वायु=आकाश ; and आकाश=God ;

∴ By तदभिन्नाभिन्नस्य तदभिन्नत्वनियम (corresponding to Euclid's First Axiom that "things which are equal to the same thing are equal to one another", God = the Universe (the symbol used denoting not mere equality but absolute *identity*). Q.E.D.

GOD'S OMNIPRESENCE

Apart from the story of creation and our inference from the texts of the Upaniṣads and the Bible thereon, even God's omnipresence which *all* theists and the Ārya-Samājists too believe in, is sufficient for proving the correctness of the Adwaita Theorem (and that too in two ways). We deliberately call it a Theorem and not merely a theory, because we feel as mathematically certain of it as of the Logarithmic Theorem, the Exponential Theorem, Demoivre's Theorem or any other Theorem of Pure Mathematics or that $2+2=4$!

Now, when we say God is सर्वव्यापी and ओतप्रोत (i. e., omnipresent), all-pervading and all-permeating, what really, in the first place, is the meaning thereof ? If we will only remember the correct meanings and *implications* of the ordinary words which we so glibly dash off from our mouths from day to day and from moment to moment, we can easily realise the whole philosophy of the Vedánta at once ! Let us now take the examples of a pot, a cloth and a golden

ornament and see who or what is ओतप्रोत therein, i. e., what pervades and permeates the whole of them? Surely it is not the potter, the weaver and the goldsmith but the clay, the thread and the gold respectively that pervade and permeate the whole length, breadth, thickness, height and depth of the three things in question, i. e., the entire structure thereof! In other words, *it is not the maker but the material of which it is made which pervades and permeates a thing!* God's omnipresence in the Universe therefore indisputably proves that God is the *material* of which the world has been created! Q. E. D.

It is of course true that, as there is no one else who could have created it, therefore He is the creator too of it! This is why the Vedānta speaks of Him as the world's अभिन्ननिमित्तोपादानकारण (i. e., simultaneously its creator and the *material* of which it is created)! While thus His creatorship is perfectly true, it is not, however, in His capacity as creator, but of the *material* composing the Universe that He is all-pervading and all-permeating!

After thus understanding the implication of His omnipresence to be that He Himself is the *material* which the world is made of, the second question we have to ask ourselves on this point is, how *can* He be omnipresent? He Himself says in the Gitā :—

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ॥

(i. e., I am the Soul within every body); and all theists agree that He is omnipresent. But *can* there be two things in the same place, different from one another? Is this not physically impossible? For, according to the Laws known in Physical Science as the Principles of Extension, Impenetrability and so forth, there can be two different persons or things in different parts of the same room, but certainly not in the same infinitesimally small fraction of the same space in the same part of the same room! And if you are told that two persons simultaneously occupy the same infinitesimally small space, you will be compelled to infer that they cannot be two different persons, but two different names of the same person! If one text says that Rāma conquered Rāvaṇa and in another passage you are told that Sītāpati (Sītā's husband) conquered Rāvaṇa, will you not—even if you had never heard it before—immediately infer that Rāma himself must have been Sītā's husband? Similarly here, God's presence simultaneously with every infinitesimally small thing in the world at the very space occupied by the latter, thus proves, according to Physical Science, His oneness therewith and consequently with the whole Universe. Q. E. D.

MĀYĀ

This takes us on to the great question of मायावाद. When we say, ब्रह्म सत्यं जगन्मिथ्या (i. e., God alone is Real, everything else is unreal), what do we mean by it? Do we mean that the world which we see around us is *false?* Here there are really three categories—real, unreal and false; and, not understanding the fine distinction

between them, we generally confuse and muddle them all up! It is by misunderstanding of the Idealistic Philosopher's position that all Realists—Johnsonlike—thunder at us and seek to convict us of a terrible lack of the most rudimentary fundamentals even of the most elementary common sense! Now, the Sanskrit word मिथ्या (as applied to the world) does *not* mean False (in the sense that you are deliberately telling a *lie* and pretending to see, hear, smell, taste, touch and imagine things when you are not really doing so)! No one denies that we have a seemingly actual *experience* of the things around us: but what these things *really* are, no one can say (except through the lens or refracting medium of his own mind)! For example, let us examine any object and see what actions we can examine it by. We can see, hear, smell, touch and taste it or, without the aid of any of these five senses, merely *think* of it! Thus, six actions are possible—all of them, however, of a *subjective* nature, i. e., from within our own mind! And no evidence—coming from outside of us—can possibly help us without first going into our mind and thereby becoming *subjective*! In other words, what *seems* to be, we all see and feel and experience: but what *is* (i. e., the *noumenon*, as the philosophers call us) behind what *seems* (i. e., the *phenomenon*), no one can postulate definitely! This is what we mean by saying that the whole thing is *subjective*, not *objective*! And this is why, in his wonderful work the अद्वैतसिद्धि, the great scholar Swāmī Madhusūdana Saraswatī defines मिथ्यात्वं सत्त्वासत्त्वाभ्यामनिर्वचनीयत्वम्, i. e., as that which one can neither accept as true nor reject as false!

BIMBA-PRATIBIMBA-VĀDA

To make this clear, let us take up, for example, the relationship between an object and its reflection. When a boy looks into a mirror for the first time in his life and sees his own reflection there, he imagines that another person—just exactly like himself and with only the right and left sides transposed—is standing on the other side of the mirror at the same distance as separates him from it! He goes round to see who the other boy is; but not merely is there no other boy there, but the mirror itself has not got the thickness corresponding and equal to the distance at which he was himself standing from the mirror! This experience convinces him that the reflection is *unreal*! At the same time, it is not *false*, in the sense that there is no actual experience thereof and that a deliberate falsehood is being told! For, it was after actually *seeing* the reflection that he thought of it, honestly investigated it and found it to be unreal! Nay, when he goes again in front of the mirror, and looks into it, he is tantalised to see the same *unreal* boy staring at him again from within! What then is the true position? The reflection is real in the sense that it is the object of an actual experience, but it is not true in the sense that it has no independent existence of its own apart from the object of which it is the reflection! This is exactly what is meant by

the technical term "unreal" as we use it in Geometrical optics ! And this is exactly what मिथ्या means in the Vedanta ! In other words, if two things are so connected with each other that the very existence of the one depends on the existence of the other but not *vice versa*, then we have what is called बिम्बप्रतिबिम्ब-भाव i. e., the relationship of an object to its reflection ! The latter is dependent on, and can never exist without the object whose image it reflects : but the object is independent of and can exist without casting a reflection ! Secondly, every change in the बिम्ब necessarily produces a corresponding alteration in the प्रतिबिम्ब ; but you may shake the mirror and the Pratibimba to your heart's content without shaking the man's face in the least ! So, not merely the existence but the activities too are dependent in the one case (i. e., of the reflection) and independent in the other (i. e., of the object). Thirdly, suppose you have two mirrors on opposite sides and a man is standing between them. His reflection in the first mirror may be reflected by the second mirror, that reflection by the former and so on. One object therefore can have many reflections, but one image cannot be the reflection of several different objects ! Applying these three Laws of Reflection to the main question before us, when we speak of God as being the only Reality and all other things as being unreal, we mean that God has independent and eternal existence of His own, while they have all emanated from Him—just like the प्रतिबिम्ब from its बिम्ब—and have no independent existence apart from Him ! This is really what is meant by the word मिथ्या ! The बिम्ब and the प्रतिबिम्ब are identical because the latter has no independent Existence from the former ; and different from the standpoint that the latter is unreal but the former is real !

परिणामवाद versus बिम्ब-प्रतिबिम्बवाद and विवर्तवाद

At this juncture, one may ask : yes, but why should we not go further and, accepting परिणामवाद (as was done by Śrī Vallabhācārya), say that God is not merely *reflected* in the objects of the world (as an object is in its reflection), but actually *becomes* those things for the time being ? The answer to this question is fourfold :—

(1) The शान्तिमन्त्र at the very commencement of the upaniṣads of the Śukla Yajur-Veda (and therefore of the very first upaniṣad, i.e., Īśāvāsyopaniṣad) clearly says :—

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

[i. e., He is a perfect (or complete) whole ; these (things of the Universe) are Perfect Wholes ; these have all emanated from Him ; and, even after the emanation of all these innumerable Perfect Wholes from Him, He continues to be a Perfect Whole]. Now, Pariṇāma-Váda bases itself on the example of the clay, the thread, the wood and the gold of the crude shape not merely looking like, manifesting themselves as or being reflected in the pot, the cloth, the chair and the golden ornament of the refined shape, but actually *becoming* so for the

time being and at the same time continuing simultaneously to be the clay, the thread, the wood and the gold! Yes, but when the finished products have been manufactured out of the raw material, the original raw material is no longer left in the raw shape, but has to be found only in its new shape! The मन्त्र just cited, however, clearly says that after innumerable Perfect Wholes (in the shape of Jivas and the world) have emanated from God, He continues as a Perfect Whole! This is obviously impossible in परिणामवाद [where whatever is put into the विकृति (the finished product) is lost to the प्रकृति (the crude stock) and thus the sum-total alone is constant, but the parts are complimentary]. But here you have the seeming miracle of a box containing a million rupees from which you go on taking out a million rupees an innumerable number of times and yet the balance in the box always remains a million! This is only possible in विवर्तवाद which regards the whole thing as an illusion (like the serpent which one mistakes a rope for) or in प्रतिबिम्बवाद where even though innumerable pictures or reflections—all of them, complete wholes (whether miniature or full-size)—may be taken out, nothing is taken away from the original object! This मन्त्र—पूर्णमदः etc.—therefore clearly rules out परिणामवाद.

(2) If we say God *becomes* a particular object, its death would mean God's death! And if it be contended that inasmuch as other things remain, therefore He still lives, even then He can only be said to be partly dead and to live partly mutilated! But Adwaita is free from this defect because the death of any number of प्रतिबिम्बs involves no death to the बिम्ब!

(3) And besides, if परिणामवाद were correct and God Himself *becomes* the things of the world, then the Jagat would be सत्य! If so, why should the Vedāntas condemn नामरूपात्मकजगज्ज्ञान (belief in these things) as अज्ञान (ignorance), भ्रम (illusion), मोह (folly) and so forth and prescribe such laborious, long-drawn difficult and irksome साधनs of वर्णाश्रमधर्म (the path of works for the different castes and stages of life), उपासना (worship), श्रवण (study), मनन (investigation) and निदिध्यासन (concentrated meditation) for removing all that experience and consciousness of the world and for obtaining the unceasing vision of God alone?

(4) And fourthly, there is the clinching factor that बिम्ब-प्रतिबिम्बवाद is categorically propounded in the रासपञ्चक of श्रीमद्भागवत, with the words :—

यथार्भक-स्वप्रतिबिम्बविभ्रमः ॥

(i. e., the Lord's relationship with Cosmos is compared to a boy's playing with his own reflections)!

In passing and in answer to those who profess to be of one or other Vaiṣṇava denomination of Sanátan Dharmis and accuse the Lord Śrī Śaṅkar-ácárya of having newly manufactured the मायावाद and विवर्तवाद (the Theory of Optical illusions) from his own imagination, i. e., unsupported by the ancient Scriptures, we need only point out that this accusation is absolutely false and that the Vedas, the Bhagawad-Gitā and even the Śrīmad-Bhāgawata (which

these Vaiṣṇavas always pay lip-homage to) are all equally emphatic in proclaiming the doctrine of विवर्त in the most unmistakable terms and, in fact, were the प्रमाणs relied on by Bhagwān Śaṅkara in support of His doctrine. Thousands of texts may be cited but a few quotations will suffice :—

1. "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्" (Veda)

(Know Nature to be Illusion and the Almighty Lord as the Master thereof) !

2. "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ॥"
3. "नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥"
4. "दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥" (GĪTĀ)

[i. e., 2. Knowledge is covered over by ignorance. Hence do all creatures fall into delusion.

3. Being enveloped by my Divine माया, I am not visible to all.

4. This Divine three-qualitied māyā of mine is difficult to surmount ; but those who seek *me* alone—they transcend it.]

5. "मायां ततान जनमोहिनीम् ॥"
6. "मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥"
7. "यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ।
नश्वरं गृह्यमाणं च विद्धि मायामनोमयम् ॥"

[i. e., 5. He spread forth His māyā which deludes all.

6. *Imagining* himself and the world to have been created, he attaches himself thereto.

7. Whatever things you grasp with mind, speech, eyes, ears and other senses—Know them all to be purely mental and illusory and therefore perishable.]

What clearer texts need be quoted ? And yet, we may cite one more passage from the Śrīmad-Bhāgawata itself :—

"रज्ज्वामहेर्भोगभवाभवौ यथा"

(i. e., Just as the serpent appears in and disappears from the rope) wherein not merely is the विवर्तवाद accepted, but it is propounded by means of that very illustration which the Lord Śrī Śaṅkarācārya and other Adwaitis use in expounding this Theorem ! And, after, it needs no saying that Optical Illusions are acknowledged facts of Science and that not merely dreams and the unreal reflections in a mirror but, according to modern mathematical Astronomy, even Sunrise and Sunset are Optical Illusions ! Why then this fighting shy of मायावाद as if, even in the secular transactions of the world, the evidence of our senses is actually reliable in all respects ?

GRAMMATICAL EVIDENCE

We may refer now—partly in jest and wholly in earnest—to yet another method whereby we may come to the same conclusion about the Oneness of the Soul. And this is based on an amusing and at the same time instructive peculiarity in all the languages of the world which most people do not notice ! In your Grammar not merely of Sanskrit but of every conceivable language in the world, when you read about the personal pronouns, there is a remarkable thing with regard to the singular and the plural forms of the first, second and third persons which we would draw everybody's attention to ! What is the plural of the third person—'he', 'she' or 'it' ? It is 'they' ; and 'they' means 'he' plus 'he', 'she' plus 'she', 'it' plus 'it' or any other combination of two or more of them ! Similarly, if we take up the second person plural, 'you' means 'you' plus 'you' plus 'you' to any number of terms ! But what about the first person plural ?

It is really a false plural ! Because, when you say 'we', you mean 'I plus you' 'I plus he' 'I plus she' and so forth : but it can never be 'I plus I' ! Now, note this and meditate on what it means. A plural (in the case of every noun and of the second and third persons too) means a number of things of the same particular kind added (and spoken of) together ; but in the case of the first person alone, it is not so ; in fact, 'I' is incapable of having a *real* plural and 'we' is an awful fraud, masquerading as the plural of 'I' when it is nothing of the sort ! Now, let us remember that we have already defined "Soul" as that thing which one has in one's mind when one uses the word "I" ; and the Lord Śrī Śaṅkarācārya too in the very opening sentence—nay, the first word—of his ब्रह्मसूत्रभाष्य (commentary on the Vedānta aphorisms)—युष्मदस्मत्प्रत्ययगोचरयोः—has used this very definition of the "Soul". And the reason for this is that we are *conscious* only of that something within ourselves which is called the soul ; and, as for other things, we have no such *consciousness* but only an *inference*. In other words, the actual perceptional knowledge—or knowledge of a realisation-character—(as Cardinal Newman too, like Śrī Śaṅkara, admits) is of our individual Inner Self alone (*not* of other souls) i. e., of the First Person alone. And, as regards this First Person, we have just seen how the Grammar of every language agrees in telling us that 'we' can never be so many "I"'s or even two "I"'s put together, i. e., that "I" has, no doubt, the seeming but fraudulent plural 'we', but it can never have a real plural ! And this shows that the "Soul" (represented by the word "I") *seems* to be many but is really *one* ! Q. E. D.

Thus, Grammar too contributes its quota of evidence in helping us to equate परमात्मा, जीवात्मा and जगत् (God, the individual soul and the universe) and to realise the oneness of soul underlying all the infinite multiplicity of manifestations around us !

FUNCTIONAL IDENTITY

At this point, some one may say : "If God and we are one, how is it He and we are so dissimilar in function" ? The question is perfectly natural but arises from want of meditation and realisation that He and we are not really dissimilar, but intensely similar in function too ! If we keep in mind the previously adduced illustration about a vessel and a small crevice through which a ray of light comes forth, we can easily see that we are functioning exactly like God, but under the limitations imposed by the body, the senses, the mind and the intellect enveloping and concealing Him within us and from our gaze ! Now, let us see what we are really doing all the time.

When the sun sets, what happens to his rays which he was casting forth outside so long ? You may say that, when he goes away, he carries away his rays with him ! Yes, but this can be true only of those rays of his which are still inside ; what then happens to those rays that he has thrown out already ? Do they continue outside ? No, he takes them also, back with him ! Evidently he too works with his rays like the silkworm with its cocoon ! When we go to sleep, we too, similarly, carry inside with us the "external experiences" of the world (as we call them) ; we sometimes keep these thoughts there in a mixed up and muddled condition and we are then said to be "dreaming" ; sometimes we keep them away safe somewhere within ourselves and are then said to be in deep "slumber" ; and when we "wake" up, we come back to the worldly things and bring along with us—like the worm its cocoon or the sun his rays—the thoughts we had carried inside back with us ! What is all this that we are doing ? Is it not what Paramātmā (God) does ! Do we not, every time we go to sleep and wake up again, destroy our world (for the time being) (as He does in प्रलय or the last deluge) and re-create it (for the time being) (as He does at the time of सृष्टि or creation) ? And when we keep on awake, are we not going on with, i. e., protecting our world (even as He does between सृष्टि and प्रलय) ? When thus we go on daily performing all His three functions of creating, protecting and destroying, what more similarity in function do you need ?

Why talk of sleeping and waking ? Even while awake, you can and do perform all these three functions of God ! At times, after you have put out all the light and made your room utterly dark, and just before you go to sleep, you close even your eyes, concentrate your mind on the form of your departed father or a friend or some other person and endeavour to visualise him : and that मूर्ति presents itself before you ! If strength of संकल्प and skill in concentration are there, you create those mūrtis ! Is that not *creation* ? How else can you see in a dark room and that too, with closed eyes ?

On the other hand, even when you are awake and there is plenty of light too, by merely closing your eyes and refusing to see, you do not see ! Nay, when you are concentrating your mind on something else or your mind has wandered else-

where, although your eyes and ears are wide open, you see nothing and hear nothing ! Even if a robber comes in and purloins something invaluable of yours, you know nothing of it !

There is a beautiful śloka (verse) in श्रीकृष्णकर्णामृत which, on the one hand (from the literal and historic standpoint), merely describes a लीला (sport) of the Lord Śrī Kṛṣṇa's childhood and, on the other hand (from the allegorical point of view) teaches us this most beautiful moral, psychological and metaphysical Lesson of Lessons that we have just been dealing with. The śloka runs thus :—

मातः किं यदुनाथ देहि चषकं किं तेन पातुं पय-
स्तन्नास्त्यद्य कदाऽस्ति वा निशि निशा का वाऽन्धकारोदये ॥
आमील्याक्षियुगं निशाप्युपगता देहीति मातुर्मुहु-
र्वक्षोजांशुककर्षणोद्यतकरः कृष्णः स पुष्णातु वः ॥

The Lords' foster-mother Yaśodā used, it seems, to give him milk (to drink) at specific times every day. One day, just for the fun of it, the child Śrī Kṛṣṇa called her at an unusual hour of the day and asked for milk. She said : 'you cannot have it now'. The boy asked : 'When then can I have it' ? She replied : "At night." Śrī Kṛṣṇa again interrogated her : "And what is night" ? She replied : "When darkness comes in". But as soon as she said so, He simply closed His eyes and said : "Oh mother, darkness has come, now give me my milk" !

Thus, even though to the minds and even the eyes of so many hundreds of people around you, lots of things exist, they do not exist for you, simply because you are absent-minded (through mind-wandering or deliberating) ! What does all this show ? It only proves that it is the mind on which in reality the whole show (of this world) depends ! The sights that we see, the sounds that we hear and so forth mean nothing to us except through the medium of our mind and what it says about them (right or wrong). This is why we find, in the history of modern western philosophy too, that not merely the old whole-hogging school of Realism but even Sir William Hamilton's half-way house Yclept Transcendental Realism have been exploded for ever and beyond hope of resuscitation and the Idealistic School has come in. It was good old Bishop Berkeley of Ireland who practically set the ball of Idealistic philosophy rolling in Europe : and the greatest philosophers of modern times—including Carlyle, Emerson, Kant, Hegel, Thomas Hill Green, Prof. Deussen and others—are all Idealists to the Core ! And the great Psychologists of the New Thought movement in Europe and America today—including Ralph Waldo Trine, Marden, Dr. Sydney Flower, Ella Wheeler Wilcox, William Walker Atkinson, Professor James R Kenny etc. etc.,—are all staunch believers in and exponents of Idealism ! Of course, as we have pointed out already, they—including even that intellectual and metaphysical giant of modern Germany, to wit, Immanuel Kant—have not been able to reach out fully towards Absolute Monism like the Lord Śrī Śaṅkara ; but in view of the traditions of Realism which they inherited from centuries ago and have

had to contend and struggle against, and the fact that they are beginners on this path yet, this is not to be wondered at ; and it is fervently to be hoped that the highest philosophical thought of Europe and America will soon come into line with the full-fledged Adwaita of Bhagawān Śrī Śankara.

WHAT REALLY AILS US

And this analysis of our subject throws light not merely on our real nature and goal but leads us naturally on to and throws splendid light on our Disease and its cure too ! For, the Adwaita Siddhānta (Monistic Doctrine) tells us that the world is nothing in itself but only as we create it. It is we that make it or mar it ! The nature of the soul and the mind being understood, all we have now to do is to catch hold of the latter, clip its wing, check its way-ward and fickle tastes and tendencies, attune it to the former and turn it there towards. Says the Veda :—

"मन एव मनुष्याणां कारणं बन्ध-मोक्षयोः ॥"

(i. e., the mind is the cause of man's slavery as well as of his emancipation from bondage). For example, a king may be rolling in wealth and yet may be discontented, while a poor man may be not only contented but in positive peace, happiness and joy ? What is it that makes the difference ? It surely cannot be the external things that make the poor man happy, for he has no such wealth ! And if externals can make for happiness, why do we find people living in luxury and yet in sorrow ? The modern tendency is to create and supply lots of really unrequired things and they say, the supply creates the demand i. e. to multiply "wants" artificially ! This is not right ! Because when you multiply and increase your wants, rest assured, you divide and reduce your happiness ! What happens to a numerator when you increase the denominator ? The value of the fraction decreases ! As Carlyle beautifully points out in his "Sartor Resartus", the value of a fraction increases not so much by increasing its numerator as by decreasing its denominator. But we are going on multiplying our wants and the result is we are suffering. It is thus our own mental conceptions of the needs of life and our standard of happiness that are responsible for the trouble. Similarly, how is it that the same man who was once living quite comfortably on Rs. fifty a month, and rises to a position wherein he earns Rs. 1000 a month, retires on a pension of Rs. 500 a month and finds it difficult—nay, impossible—to live thereon in comfort and positively suffers ! It is because the mind has accustomed itself to a certain high standard and goes on pestering him therefor ? The fewer our wants, the greater our happiness. If we adopt the principle of Plain Living and High Thinking, we will be more happy. When a thing is expected and there is a disappointment, suffering ensues ; but if while hoping for the best, we are prepared for the worst, there is no disappointment and no resultant suffering. All this merely illustrates the effect of our own mind on and its responsibility for our happiness and our misery.

To take another instance. Supposing a father living in Madras has a son living in Bombay and earning Rs. 500 a month and that son dies, but the news is not communicated to the father. He goes on joyfully with the idea of his son being hale and well and wealthy : and it is only when he comes to hear of the lad's death that he begins to suffer. Or again suppose the newspapers announce that such and such a person has died and suppose the newspaper report is incorrect and the son is really alive ! You find the father suffering because he has got the idea into his head that his son is dead. So, it is not the fact of the son's death or welfare but the father's idea (right or wrong) that his boy has expired or is doing well that is really and actually responsible for his sorrow or joy.

Similarly, when a man abuses you fiercely, his mouth may ache and his body may ache (as the physical result of his mind-ache) : but surely your ear cannot—at any rate, physically—ache, in consequence of all that abuse ! and yet, why do you suffer ? Because, in all such cases, your feeling of sorrow is not the effect of the physical sounds heard by you on your ear but of what your mind has told you about the meaning and implications of his words. And a still worse kind of instance often happens when two persons are talking at a great distance from you, and you not merely do not hear them but cannot perhaps understand even a syllable of that language which they are conversing with each other in : and yet you suspect or imagine to yourself that they are perhaps saying something against you : and straightaway you begin to suffer. Thus it is not even what they were actually saying but what your own mind fancies that perhaps they were talking about you—which really causes your suffering. In fact, it is your own guilty conscience that makes you a coward and a sufferer. Similarly, a thief who sees a policeman coming behind him by the merest chance (without having any suspicion of the man being a thief) jumps to the conclusion that the policeman is coming along to arrest him, perhaps rushes on and attacks the poor unsuspecting policeman or at least tries to flee and thereby perchance excites suspicion, betrays himself and gets arrested. This too is an instance of the "guilty conscience" making cowards of us all ! The same is the case with absconders from justice whose life is one perpetual hell because of the ever-present fear of detection and to whom actual arrest often brings real, positive relief from torture ! Now, all these are things which come from within ourselves : and it is the mind that is responsible for them.

THE REAL CURE

If, on the other hand, we learn from the Vedānta what the real nature of our Ātmā (soul) is and what our लक्ष्य (goal) is, if we realise within ourselves that Divine Ānada-Swarūpa concealed within us, learn the path of correct निदिध्यासन (meditation) and seek to reach Him straight (just as an arrow reaches its mark and becomes one with it), then Boundless Joy is ours, now and here. If we go on thinking about our sorrows and magnifying them, we shall realise them all the more ; because, according to what is called भ्रमरकीटन्याय, it is an inexorable Law of

nature that what we constantly think about, that we *Realise* and *Become !* This is the practical psychology, which modern doctors apply in the sick-room ; and this is the secret of Hypnotism, and Mesmerism ! The old Paurāṇic episodes tell us that the monsters Hiraṇyākṣa, Hiraṇyakaśipu, Rāvaṇa, Kumbhakarṇa, Kaṁsa etc. saw God face to face at the time of their death ! How was this ? It was because, all along, they (अपश्यंस्तन्मयं जगत्) were always thinking about Him by day and dreaming of Him at night, although not out of Love but only out of hatred and fear. But whatever the motive was, they did go on thinking about Him and meditating on Him : and the result was, we are told, that they actually saw Him at the last moment of their lives. Of course, there was this inevitable difference that they saw Him only in the shape in which they had meditated on Him. The Bhakta (devotee) always thinks of Him as Bhagwān (the Lord), the Father, the Guru (Master) and so on and therfore eventually *sees* Him as such ; while those who think about Him as their enemy end by actually *seeing* Him *as* their enemy.

And we have already seen how even when there is the external light of the noon-day sun of mid-summer around you, you may deliberately shut your eyes and refuse to see it ; but when there is internal illumination, you can see both internally and externally, because it is, after all, the mind that does everything for you ! Get and have that mind under Your own control. Always aim at the Goal : and You will surely reach the Goal and achieve perfect success all-round.

And what and where is this grandest of all Goals, nay—our only true Goal ? As we have pointed out already, it is Absolute Oneness with God, the सर्वव्यापी (all-pervading and all-permeating) who is everywhere and therefore within ourselves too ! If thus Īśwara is both outside of us and inside us too, what then about this body of ours ? It is merely an outer Covering or rather sheath of the Soul within. If we realise this fact and (detaching ourselves from our illusions about and consequent slavery to the body, senses and mind) realise the Divine Nature of the soul within, our success is assured ! Such is our lofty goal and such the simple path thereto ! What loftier goal can we seek and what simpler means can we imagine ?

OBJECTIONS ANSWERED

At this point, you may ask :—"Yes, if we are God i.e., Sat-Cit-Ānanda Swarūpa and if death, ignorance and sorrow are only उपलक्षणs which come from extraneous causes from outside, why then should we do anything for ourselves ? Will not ignorance and unhappiness—like the heat of the hot water—gradually go on decreasing and finally leave us off altogether ?" And our answer is this :— Yes, hot water left to itself will certainly cool itself automatically down in due course ; but we never said that if it is kept on, on the fire, yet, it will cool down. No ; on the other hand, it will become hotter still. So also, if the causes that are responsible for unhappy life are kept up and continued, i. e., if the अज्ञान

(ignorance) and दुष्कर्म (sins) are to be retained, how will the resultant sorrow and suffering diminish and how can we automatically go back to our मूल स्वरूपभूतलक्षण of Ineffable and External Bliss ?

Hereon, you may ask :—"Yes ; but when God alone is Real and all else is मिथ्या, why should we distinguish between two मिथ्याs i. e., पुण्य and पाप (good and evil), to discard the latter and perform the former ?" And the answer is given by the Sanskrit maxim : "कण्टकं कण्टकेनैव गरेण च यथा गरम्" ॥ Suppose you have a thorn which has stuck into the sole of your foot and you naturally wish to remove the pain caused by that thorn, how do you remove it ? Is it not by means of a needle, pin or another thorn ? Will you say that both are thorns and one is as bad as the other ? Of course, the two are both equally thorns : but the difference between them is that one is pain-giving thorn while the other is a pain-removing thorn ! And similarly, the doctor removes one virulent poison by means of what he tells you is its "antidote", but what is really a still more virulent poison ! No doubt, both of them are poisons : but there is this vital difference between the two that the first is a life-killing poison and the antidote is the life-saving poison for you under those particular circumstances ! Exactly so here : पाप and पुण्य are no doubt both मिथ्या and equally मिथ्या ; but there is this difference between them that the former is that sort of manifestation of मिथ्या which (as the Śāstras declare, and experience shows) gives pain and causes suffering while the latter is that kind of manifestation of मिथ्या which (according to the Scriptures and experience too) gives pleasure and causes joy. If *you* have no objection to pain, *you* have no objection to sin ; but if you *want* pleasure, you must perform पुण्य. And, after all, our Śāstras do teach us that just as after the original thorn is removed by the other thorn, both the thorns are thrown away, so too, after पुण्य has done its work as the antidote to पाप, both must be thrown away :—

"उभे पुण्यपापे विधूय ॥"

The next question that may—and ought to—be asked by the inquirer, is :—"Yes, if one commits no further sin at all and thus metaphorically takes away the fire from underneath the water, should not the water now automatically cool down ? If so, is it not sufficient to say : "Sin no more !" Why should श्रवण, मनन and निदिध्यासन (study, investigation and meditation) of the true nature of the Soul and its identity with God be also enjoined as the means to Self-realisation and the Joy thereof ?" The answer to this question is twofold :—

(1). Yes, *if* the fire is removed altogether and for ever, the water *must* cool down : but the time it will take for doing so will depend not on your wishes but on the temperature which it has already been raised to ! But if you, owing to unbearable thirst, cannot bear to wait so long and must drink the water earlier, it will not do to say : "Let the water cool down of itself in due course" ; you will have to adopt *positive* methods of your own (i. e. pouring it from one vessel to another, keeping it in ice and so on) to *aid* it to cool down sooner ! Exactly so here ! We have

committed lots and lots of पाप not merely in this birth but also in millions of previous existences: and naturally lots and lots of sorrow, suffering and misery are lying to our account. Now if you are willing and prepared to bide the whole time until all these will have completely exhausted themselves and without committing further sins in the meantime, *we* have no objection. But this you feel to be impossible: and you want to get over the whole thing sooner. If *you* do not feel any pain, sorrow and suffering, *we* do not ask you to undergo any treatment. But the experience of sufferings *is* there; and so long as the experience is there, the remedy too is necessary. To vary the metaphor, if you see no objectionable reflection in the mirror, you need *not* close your eyes: but so long as you do see the प्रतिबिम्ब and so long as you do not wish to do so, you *will* have to shut your eyes. Just so here. If you *have* no sorrows and are in eternal and perennial Joy, you have already achieved, accomplished and fulfilled your purpose and reached your goal; there is no further श्रवण required for you. But *if* you suffer and *wish* to be rid of it, then, just as there is *positive* action for cooling down the hot water more speedily, so here too, you will have to perform the positive action of going through the साधन (i.e. श्रवण, मनन and other means) prescribed for speedily getting over all your accumulated पाप and expediting the advent of मोक्ष (emancipation)!

(2) And besides, what *does* the removal of the fire from beneath the heated water really mean, imply and involve? This question can be answered only by finding out what that fire in this case actually is? The Śāstras say:—अविद्या-काम-कर्मभिर्जन्म; and our experiences too teach us—that there are three things which bind us down and are responsible for our coming into these various bodies of ours, wherein under the limitations of our habitation we forget our own real self! And what are these? They are (1) Ignorance of our Infinite स्वरूप, (2) the consequent Desires for this and that petty thing and (3) the foolish Actions which we perform for realising these desires of ours! The ignorance leads to the wishes and the wishes to the actions; and to suffer the results of these deeds, we take birth in different bodies and become bondslaves thereto and to our senses, mind, intellect and the world! So, unless the root-cause of bondage (viz. ignorance) goes, our bondage can never cease! In other words, the Fire that we have to remove from the water of Blissful Self-Realisation is Ignorance: and until by श्रवण, मनन and निदिध्यासन we have actually removed that fire of Ignorance, we cannot be said to have removed the metaphorical Fire at all! This should suffice to show why श्रवण and other Sādhanas (means) are really necessary!

THE PROCEDURE

The descent of the soul from Divine Wisdom and joy to its present state of ignorance and sorrow and the process of its Evolution towards its own real स्वरूप are described with enormous wealth of detail in our Vedāntic Scriptures; and, according to the unique tendency and characteristic of all Sanskrit terminology, it is found inculcated even by the names of the twelve months of the solar year. The latter, for brevity's sake, we shall here summarise:—

1. चैत्र (corresponding to *Aries* means *variegated* and refers to the soul's संकल्प (बहु स्यां प्रजायेय) by which He manifests Himself in manifold and multifarious forms.

2. वैशाख (*Taurus*) means *further and further branching out* and refers to the continuation, elaboration and multiplication of that process of variegated manifestation!

3. ज्यैष्ठ *(Gemini)* means *eldest* and refers to the natural consequence of that multiplication as described by the śruti (द्वितीयाद्वै भयं भवति) i. e. the conflicts between one person and another for rights, privileges, prerogatives, superiority and the like!

4. आषाढ *(Cancer)* means *unbearable suffering all-round* and merely explains the natural and unavoidable result of those conflicts. When that stage is reached, Man begins to wonder why he is so unhappy and tries to find out the cause. This leads us to No. 5.

5. श्रावण *(Leo)* means *Learning* (from the Guru) and refers to the study thus commenced by us, of the Truth *behind* things.

6. भाद्रपद *(Virgo)* means *the state of happiness* (or the knowledge that leads thereto) and explains the goal we are after.

7. आश्विन *(Libra)* (from अश व्याप्तौ संघाते च) means *All-Pervading and within our Bodies*, and directs us to the realisation of the Soul as that which pervades the whole world around us and all within us too! But what about this body of ours, then?

8. कार्तिक *(Scorpio)* means the skin (or more outer shell) and, answering the question just asked, tells us that the body is the mere outer shell encasing the Soul! And the next question naturally is, "of the two i. e., the body and the soul, which shall we seek and serve"?

9. मार्गशीर्ष *(Sagittarius)* means "seek the head" and, answering the question just raised, tells us to seek and rivet our gaze on the highest i. e. God!

Thus far, the first two stages of श्रवण and मनन (Learning and Inquiring) have been described. We have learnt from the Experienced Master and not accepted blindly but by careful analytical study convinced our *intellects* of the correctness of the Doctrine and the Means explained by the Vedānta. But this cannot suffice to cure us. For, as the result not of years but of myriads of lives spent in the deluded service and worship of Realism, we find that the world forces itself upon us in spite of ourselves and our *intellectual* convictions do not immediately *alter* the actual daily life in the face of the वासना (innate tendencies) which the physiologist terms *reflex action* and the layman calls the *automatic force of habit* but which always gives us a lot of trouble! And such *reflex action* can only be overcome by constant meditation of the right path, condemning of the wrong one and correcting of ourselves when we find ourselves, in spite of

our intellectual convictions, carried away into a wrong direction by the force of the वासना generated by long continued habits to the contrary! For example, we all have our experience of a graphic illustration of this psychological truth in the way the New Year always gives us trouble. We know it has come and, in fact, have perhaps celebrated it on a fitting or even a grand scale; and yet, for some days, we go on putting down, in our correspondence, the number not of the new year but of the one that has just gone! Why? Because we have gone on doing so for nearly a whole year and, therefore, by mechanical force of habit, we repeat it for a few days; but, when we have gone on correcting ourselves, scoring out the wrong figure and putting down the right one, the old habit dies out and the new one triumphs and is stuck to (to give trouble, in its turn, next year)! This is true on the mechanical side and also on the Ethical side! Good moral habits generally do not give us any trouble: but they sometimes do so (when they have achieved their purpose and become effete and played out) while evil habits which (owing to ignorance or carelessness or bad company) we have contracted, always give trouble! And the only way to shake them off is (as in the case of the old year) to continually condemn the wrong habit and adopt the right one! This is called निदिध्यासन [or संततधाराप्रवाहरुपि ज्ञान when applied to meditation] because only a continuous and mighty Torrent of Right Thought can wash out the filth of ignorance which has got into the odd nooks, corners and crevices within our heads and hearts! Thus are the three stages complete:—(1) श्रवण by which we glean the Truth from the lips of the wise, (2) मनन by which our doubts and difficulties are removed and (3) निदिध्यासन by which the Doctrine thus rightly learnt and assimilated is actually practised in and forms the living motive-power behind, our daily life! Now,

10. पौष *(Capricorn)* means "*continual nourishing*" and inculcates this निदिध्यासन stage. When one has reached this stage, what is he to do thereafter? So long as there is life, some work or another has always to be and is necessarily done! What kind of work shall the ज्ञानी, the one who has realised his Divinity, do?

11. माघ *(Aquarius)* which means "*Sin not*", answers this question and says: "One who has realised his oneness with God shall not sin"! Yes, but can he perform पुण्य or सकामकर्म i. e., good deeds actuated by motives of self-interest, profit and so forth? And,

12. फाल्गुन (*Pisces*) means and answers:—'No, not the petty thing'. Thus, as last, we reach the final stage:—

"उभे पुण्य-पापे विधूय"

wherein we sin not, nor do we do any good deed too for self-profit. For, all actions which are performed with a view to the fruits thereof *are* petty: and those actions alone are worthy and noble which are actuated by निष्कामबुद्धि,कर्तव्यबुद्धि or ईश्वरार्पणबुद्धि (i.e. without attachment to the fruits of action, from a sense of Duty and as Service for its own sake). Thus, we have the stages or rings prescribed for us on the spi-

ritual ladder as we go on further. And, after this last stage is reached, there is nothing further to do except unflinching practice of निष्कामकर्म. This is why, after the twelfth month (फाल्गुन), the circle is complete and there is no thirteenth month !

STRENGTH—TRUE & FALSE

This is the Divine strength of सत्, चित् and आनन्द within us, which we have to realise and attain to. We *must* acquire strength all-round, for the Vedas say :—

"नायमात्मा बलहीनेन लभ्यः"

i.e., A weak man cannot attain Self-Realisation ! In the Bhagawad-Gītā, you find Arjuna in a weak frame of mind and the Lord Śrī Kṛṣṇa says to him :—

"क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप" ।
"सुख-दुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥"

(i.e., "shake off your petty weakness of heart, arise and fight. Regardless of consequence—pleasure and pain, profit and loss, victory and defeat—go forth to battle and perform thy Dharma : sin can never touch you, then." But all this strength of ours (physical, intellectual, moral and spiritual) should be utilised for doing good, never for evil. Have strength of mind to control yourself and help others: otherwise, inspite of all the physical strength imaginable, you are really weak. Remember the Gītā-teaching :—

"बलं बलवतां चाहं काम-रागविवर्जितम्"

(i.e., That strength is Divine which is free from partiality and passion) and Shakespeare's sage advice :—

"It is excellent to have a giant's strength but tyrannous to use it like a giant"; and always use your strength of body, mind, intellect, learning, riches, prestige, rulership etc., for helping and benefiting others, not for tyrannising over or oppressing them.

ŚRĪ KṚṢṆA AND ŚIŚUPĀLA

In this connection, we may learn a most instructive lesson from the poet Māgha's beautiful description of Śiśupāla's vitriolic and scurrilous personal abuse of the Lord Śrī Kṛṣṇa which the latter quietly hears. An ambassador of Śiśupāla gloats over the Lord's silence and describes it as Śiśupāla's vanquishing of Śrī Kṛṣṇa. But Sātyaki answers him and says : "What nonsense do you talk ? You see Śiśupāla thoroughly overcome by and in the grip of uncontrollable passion : and you see Śrī Kṛṣṇa overcoming and absolutely controlling Passion ! See you not then that He is your Śiśupāla's conqueror's conqueror ? How then can He have been vanquished by this petty creature" ? But when the time for Action (for the welfare of the world) comes, we see Śrī Kṛṣṇa—even then without passion or excitement but being unavoidably compelled by His Duty—destroys Śiśupāla. This is the quiet and self-controlled type of strength—moral, mental and physical—that we really need and should strive to attain.

THE RESULT

This is the frame of mind enjoined on us in our worship of God :—

"सोऽहंभावेन पूजयेत् ॥"

(i.e., Worship Him, absolutely identifying yourself with Him). Of one, who has tuned his mind to this tune, the श्रीमद्भागवत says :—

"सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥"

(i.e., He is the best devotee of God who sees God and himself in all things and sees all things in God and himself); and, in the Gītā, the Lord Himself says :—

"वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥"

(i.e., Rarest of the rare is that high-souled one who looks upon all things as वासुदेव, the all-pervading Lord). And, regarding such a person, Yama (the Lord of Death) says to his Myrmidons (the यमदूतs) :—

"सकलमिदमहं च वासुदेवः
परमपुमान् परमेश्वरः स एकः ॥
इति मतिरचला भवत्यनन्ते
हृदयगते व्रज तान्विहाय दूरात् ।"

i.e., Those whose minds are concentrated on Him with devotion dwelling in their hearts and with the firm conviction that all this world, themselves and He, the all-pervading one, are ONE; i.e., the supreme soul and supreme Lord of all—leave them at an enormous distance and flee from them (for they have transcended Death and are no longer within your jurisdiction or even mine) ! How this happy consummation is finally achieved, we shall now proceed to and consider.

THE RATIONAL OF IT

When we have reached this stage of ज्ञान (wisdom) and perform only निष्कामकर्म (unselfish action) we do things merely because it is our duty to do them, not because of any attachment to or desire for the fruits of such action. And what is the result ? The huge and vast treasures of sin and sorrow earned, accumulated and hoarded up by us in the past, drop off. No अविद्या means no काम ; no काम means no कर्म ; and no कर्म means no जन्म i.e., the whole cycle of births and deaths is transcended and मोक्ष (Emancipation) obtained.

Yes, new कर्म may not arise ; but what about past Karmas ? And the answer is given by the Vedānta Sūtra :—

"तदधिगम उत्तरपूर्वाघयोरश्लेष-विनाशौ"

(followed by the next one about पाते तु etc.), which means that the ज्ञानी's संचित (or stored up) कर्म is burnt out or destroyed ; his आगामि (i.e., new) कर्म—being निष्काम (unselfish) कर्म—falls off i.e., does not find him back to birth ; and as for the प्रारब्धकर्म (that past of the past कर्म which is responsible for and has already begun to produce its results in this birth), that too falls away, having been worked out during the present life in the enjoyment (or suffering) of its fruits ! And when this happens,

the appropriate simile therefore would be the case of a man whose bank-hoardings have perished, whose new earnings are *nil* and whose cash on hand has been spent up i. e., he has no money left ! So to the ज्ञानी whose संचित has perished, whose आगामि is *nil* and whose प्रारब्ध has been spent off has no कर्म of any sort left (to cause him to take birth again). And what happens to him ? Say the Vedas :—

"तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये ।"

(i. e., The delay in his re-union with his Divine nature is only till his प्रारब्ध too is exhausted) and that too being now accomplished,

"न तस्य प्राणा उत्क्रामन्ति"

(i. e., his breath does not go out and take him over to any other world, because he has no karma left to work out anywhere) but

"अत्र ब्रह्म समश्नुते"

(i. e., he becomes one—here—with the all-pervading Almighty God Himself) ! A worldly illustration will make this clearer. Suppose there is a convict not released but transferred from one jail to another : there is always a police escort that takes him over from the former to the latter ; but if he is released altogether, no police escort is sent with him. Similarly, when the Jīva (the individual Soul) is not released from bondage but has to go from one body-prison to another, the breath (like the police escort) accompanies him thither ; but when he is liberated altogether, the breath does not accompany and take him anywhere, because he has no particular place where to go but has become one with the Infinite Paramātmā Himself.

This is how we follow the path prescribed for us by our ancient Maharṣis (Great Seers), we go back to where we fell from i. e., God. We had dropped down to आकाश, वायु, अग्नि, जल and पृथ्वी ; and now, by following जनिविपरीतक्रम (as the great Saint Swāmī Sadāśivendra Saraswatī describes it) (i. e., in the contrary order to that of our involution), we reach back to our कैवल्य (oneness). This is how the Soul's Evolution becomes complete and we thereby fulfil the lofty purpose of human life in which the grand privilege has been vouchsafed to us to meditate about things, think them out and do the right thing. Other bodies—e. g. of birds, beasts, insects and even angels—are purely भोगक्षेत्रs i. e., therewith we can only do the things that we are bound by our previous karma to perform and reap the fruits of past (and present) actions ; but the human body is a कर्मक्षेत्र whereby we not only reap the fruits of our past and present deeds but can also perform new actions which can unlock the portals of मोक्ष—Emancipation—too for us) ! This human life of ours is therefore the greatest of all privileges to us. So, while we have our human Existence in this world, let us fix our gaze, rivet our vision and concentrate our attention on the Paramātmā (God) hidden within ourselves ! If this is done, we are on the right path already and bound to reach our Goal ! It is not correct to say that as we have certain duties to perform and

certain things to do in the ordinary affairs of life, therefore we cannot attend to these higher things because we cannot find the time to do them ! No, the Vedānta does *not* ask us to discard our duties and come over to this path ! On the contrary, it teaches us to perform our duties all the more efficiently and perfectly and, while attending thereto, to concentrate our mind—at the same time—on this side ! This is the beauty of it ! There was king Janaka who did it : He did not neglect the duties of his kingly office even in one respect ; and yet, at the same time, he had his mind concentrated on the Paramātmā. This is the way to realise our oneness with God !

THE WORLD-THEATRE

One more question may be asked : "Yes., but how is this *possible ?*" Even granting (according to the analytical and teleological arguments herein afore-adumbrated and elaborated for proving Idealism) that we are really सत्, चित् and आनन्द and that death, ignorance and sorrow are only super-imposed upon us by माया and so forth, how *can* the ज्ञानी, while actually feeling the physical pains and sufferings from which (thanks to his प्रारब्ध) even he is not exempt, still realise and *feel* the स्वरूपभूत आनन्द (the inherent Divine Bliss) within ? And this question must be answered, because on its satisfactory answer depends the doctrine of जीवन्मुक्ति (i.e., the Bliss of the Liberated Soul, while still here below) ! विदेहमुक्ति (Bliss after death) is easy enough to postulate : but Bliss here and now—in the very midst of all our pains and turmoils, trials and tribulations—is a harder nut to crack : and this therefore must be done well, the answer is given by Bhagawān Śrī Vidyāraṇya in his पञ्चदशी as follows :—

"मार्गे गन्त्रोर्द्वयोः श्रान्तौ समायामप्यदूरताम् ।
जानन् धैर्याद्द्रुतं गच्छत्यन्यस्तिष्ठति दीनधीः ॥"

i.e., of two travellers who are equally footsore and utterly done up, that one who knows that the end of the journey is near, picks up courage, endures his fatigue and pushes on (to reach home and find there a haven of rest where he can stretch his limbs, sleep out his exhaustion and recuperate) ; but the other one—not knowing the nearness of his destination and imagining that he has an infinitely long journey still before him—breaks down in despair, refuses to move further and ends in misery !

To elucidate this point more clearly, let us imagine ourselves going to see a theatrical performance where, say, the story of Bhagawān Śrī Rāma is being enacted ; and suppose we see there the spectacle of His consort Bhagawatī Sītā Devī (whom we revere and adore as the World-Mother) being threatened by the monster Rāvaṇa and weeping bitterly ! How is it we can go on quietly enjoying the scene ; and, in case the person playing the part of Rāvaṇa plays his part with expert skill, how *can* we even cry "*Encore, Encore*" (once more, once more) ? And, alongside of that picture of ourselves, consider this second picture, wherein we saw a ruffian in the streets trying to lay his defiling hands on a woman (hitherto absolutely unknown to us) with intent to outrage her modesty and wherein we rush

forthwith upon the fellow in a tremendous fury, and chastise him severely—nay, within an inch of his life ? In both cases, the evidence given by our eyes, ears and other senses is exactly the same i.e., that a ruffian is seeking to injure a helpless woman : and the only factor that may—and ordinarily must—cause a difference in the attitude of the on-looker is that Sītāji is our beloved Mother while the other woman is an utter stranger ! And yet, what a contrary result is there that we do not resent and do nothing to check, the outrage on the former, but are furious about the latter ! What is the reason for these seemingly unnatural attitudes and activities of ours ? Is it not that in the former case although all your *senses* do tell you that Rāvaṇa is threatening and Sītādevī is sobbing and so on, yet, you *know*—in your mind and in your heart—the persons before you are *not* Rāvaṇa and Sītā but so-and-so and so-and-so (who are perhaps your own maternal uncle and your younger brother respectively, the latter not being even a girl in reality) and knowing this *beforehand* you deliberately purchased a ticket for seeing the show and are actually enjoying it, whereas in the second case you *believe* the evidence of your senses and think the two persons to be a real ruffian and a real woman in deadly terror of him ! In other words, your feelings and resultant actions are dependent not on what you seem to see and hear but on whether or not you *imagine* the thing seen by you to be truly what it seems to be. Now let us apply this illustration to the case of the Realist and the Vedāntin and see what follows ! Both may—on the evidence of the physical senses—seem to see and hear the same sights and the same sounds : and yet there is this vital, radical and fundamental difference between the two that the Dwaiti (the Realist) *thinks* all his pains and sufferings to be *real* and therefore becomes a prey to dejection and despair while the Adwaiti (the *practical* Vedāntī) *knows* all his pains and sorrows to be मिथ्या (just like the Rāvaṇa and the Sītā Devī of the drama) and can therefore—in spite of the evidence of his own physical senses to the contrary—remain unperturbed, nay, positively cheerful and joyous) !

THE RĀSA-LĪLĀ

What the real position is between God and the Soul and how it all works itself out, is beautifully taught to us in the celebrated रासलीला of the Lord Śrī Kṛṣṇa, which has generally been misunderstood, misrepresented and mischievously vilified by thousands of interested or designing persons and ignorant people but is the grandest of grand expositions, in reality, of the great and eternal COSMIC DANCE which Almighty God is ever dancing with the world ! "The Song of Solomon" (of the Bible) may be described as nothing but a faint shadow of a reflection of a single small pencil of rays emanating from the mighty Sun of रासलीला (of the Śrīmad Bhāgawata) ! We need not go into a full, detailed and elaborate analysis of the रासपञ्चक but shall merely content ourselves with giving the barest gist of it here. It portrays—before our imaginations—in the most picturesque manner conceivable—the basic Truth as to how God and Cosmos carry on their interrelationship ! You have the Lord's Dance thus described :—

"अङ्गनामङ्गनामन्तरा माधवो
माधवं माधवं चान्तरेणाङ्गना ॥
इत्थमाकल्पिते मण्डले मध्यग:
संजगौ वेणुना देवकीनन्दन: ॥"

The रासमण्डल (dancing ring or circle) consists of the Lord and the innumerable Jivas (individual souls) constituting the universe (and allegorically described as Gopis, to symbolise the relationship of husband and wife that ought to be felt and realised between God and every soul) ! On each side of each girl in that circle and in the centre of the circle too, there is the Lord dancing and playing on his flute the Music of the spheres ! Well, this teaches us that while the souls—the manifestations—are infinite in number, the Lord Himself is one : and all around you (to the sides, in front and so on) you have to realise and *Visualise* Him (as the Gopis did) ! Now, the story proceeds further and narrates that while the play

"यथार्भक: स्वप्रतिबिम्बविभ्रम:"

(quoted and explained already) is going on apace, the Gopis develop अहंकार (pride, vanity and self-importance in the petty sense of the term) ! And lo ! the Lord whom they had all been singing, dancing and playing joyously with

"प्रशमाय प्रसादाय तत्रैवान्तरधीयत"

i. e., disappears suddenly and altogether ! Thereupon, cast into the deepest depths of dejection and despair, they search long and for Him in all directions but see only darkness all around ! And then, retiring from their fruitless external search for him and gradually forgetting themselves altogether in absolute self-surrender to Him, they reach the stage

"तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिका: ।"

i. e., all their thoughts are concentrated on Him, all their talk is of Him and all their actions are echoes of Him : and thus, losing even the consciousness of their separate physical identity, they become merged into and one with Him ! And then, what happens ?

"तासामाविरभूच्छौरि: स्मयमानमुखाम्बुज: ॥"

He reappears smiling, amidst them and all around them, here, there and everywhere as before and resumes His Ecstatic Song and Dance of Universal and Eternal Cosmic Joy ineffable ! The moral of the Episode is so clear, plain, simple and obvious that he who runs may read :—If and when अहंकार comes up, the Vision of God all around us disappears and sheer darkness engulfs us ; and when we cast off our petty अहंकारs and merge ourselves into Him in perfect self-surrender, we see Him everywhere around us and within ourselves and sing and dance our lives through in one continuous all-glorious Song and Dance of Ecstatic Illumination, Joy and Bliss. In other words, *Nara* (Man) has become—while still in the flesh, here below—and stays for ever, *Nārāyaṇa* (God) ! Once again, let us ask, what higher goal can there be than this of oneness with God : and what simpler path thereto than this that has been expounded by the Vedānta ?

CONCLUSION

Such then is the Vedānta and such its sublime teachings as to our Goal, the path thereto and so forth. These sublime teachings of the Vedānta were analysed and condensed (about a myriad years ago)—into the form of Sūtras or Aphorisms by Maharṣi Veda-Vyāsa ; and the Lord Bhagawān Ādi Śaṅkarācārya who incarnated about 2500 years ago to bring illumination to the ignorant minds of Kaliyuga (the present Iron Age) elucidated the meaning of Maharṣi Veda-Vyāsa's ब्रह्मसूत्रs (Vedāntic aphorisms) in his monumental भाष्य (Exposition) thereof.

THE PRESENT WORK

And now for the benefit of Earnest and inquiring soul on the path indicated hereinafore, Mahāmahopādhyāya Pandit चिरञ्जीवी Ananta-Kṛṣṇa Śāstrī of the Calcutta University (whom we may truthfully describe as having nearly reached the high-water mark of Śāstric learning at the present day in India and on whom therefore we —in the normal course of performing our Duty as an Ecclesiastical Head of Sanātan Dharmi Hinduism—have bestowed high title सर्वतन्त्रस्वतन्त्र in recognition of his Learning), has just completed his new Edition of Bhagawān Śrī Śaṅkara's immortal ब्रह्मसूत्रभाष्य along with nine commentaries (including the famous works पञ्चपादिका, विवरण, भामती and so on) some of which are entirely new to the Vedānta-studying world and each of which is a Veritable Gem of incalculable merit, while his own Sanskrit Introduction (which we have *feasted* ourselves with a minute and careful study of) is, too, a Masterpiece ! The book may therefore be aptly termed Titianic, Titianic and colossal in the magnitude of its Volume and Magnificent in the quality of its contents ! We have not the least hesitation in stating that by gathering together, collating, Editing and publishing this voluminous work, our सर्वतन्त्रस्वतन्त्र has laid the Sanskrit-knowing and Vedānta-studying world under a deep intellectual, moral and spiritual debt which it can never hope to repay !

BENEDICTIONS

We need only conclude with our choicest benedictions to and ferventest prayers for his long life and continued health, wealth, success and happiness all round (spiritual and temporal) so that he may be enabled to carry on this kind of excellent work (wherefor he possesses such high qualifications) and thereby enjoy the happy privilege of helping many an earnest Nara (नर) to learn and tread the path that leads to oneness with Nārāyaṇa (नारायण) !

शृङ्गाद्रिपीठगतमोंपदलक्षितार्थं वेदान्ततत्त्वनिरतं तपतां वरिष्ठम् ।
अन्वर्थशङ्करमहं "गुरुपादशेखरः" श्रीचन्द्रशेखरयतिं शरणं प्रपद्ये ॥



श्रीशृङ्गगिरिपीठमधिष्ठन्तः
प्रातःस्मरणीय-स्वनामधन्य-वैदिकमार्गप्रतिष्ठापक-षण्मतस्थापनाचार्य-
जगद्गुरु-श्रीशङ्करभगवत्पादाः परमहंसपरिव्राजकादि—
श्री१००८चन्द्रशेखरभारतीस्वामिपादाः

भूमिका

मातामहमहाशैलं महस्तदपितामहम् ।
कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥

सर्वाणि दर्शनानि तत्तत्प्रमाणानि प्रमेयं चासाधारणमवलम्ब्यैवात्मानं लभन्ते । चार्वाकादयो नास्तिका अपि प्रत्यक्षादिप्रमाणबलेनैव स्व-स्वसिद्धान्तान् सुसाधयन्ति ॥

तत्र च प्रत्यक्षमात्रप्रामाण्यवादिनश्चार्वाकाः । प्रत्यक्षानुमानोभयप्रामाण्यवादिनः सौगताः, वैशेषिकाश्च । प्रत्यक्षानुमान-शब्दात्मकप्रमाणत्रितयवादिनः साङ्ख्याः । प्रत्यक्षानुमानोपमानशब्दात्मक-प्रमाणचतुष्टयवादिनो नैयायिकाः । प्रत्यक्षानुमानोपमानशब्दार्थापत्तिप्रामाण्यवादिनः प्राभाकराः । प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिप्रामाण्यवादिनो भाट्टाः ॥

तत्रापि प्राभाकरा लौकिकशब्दा अनुमानंविधयैव प्रमाणम्, आगमस्तु शब्दविधया प्रमाणमिति वदन्ति । साङ्ख्य-नैयायिकास्तु वैदिकशब्दा अपि पौरुषेयत्वाल्लौकिकशब्दसदृक्षा एव, इति लौकिक-वैदिक-भेदेन शब्दद्वैविध्यं नोरीकुर्वन्ति । भाट्टास्तु तमपि विभागमूरीकुर्वन्ति ॥

सति चैवं वेदानां स्वतःप्रामाण्यवादिनो भाट्ट-प्राभाकराः । आप्तवाक्यत्वनिर्णयाधीनमेव वेदानामपि प्रामाण्यमिति परत एव प्रामाण्यमित्यन्ये । तत्रापि प्रामाण्यमप्रामाण्यमुभयमपि परतो ग्राह्यम्, प्रामाण्य-मात्रं परतो ग्राह्यम्, अप्रामाण्यमात्रं परतो ग्राह्यमित्यादयो भेदास्तत्तद्दर्शनसिद्धा बहवो वर्तन्ते, इति नायमवसरस्तत्तादृशानां भेदानां विवरीतुम् । तदुक्तम्—

प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः ।
नैयायिकास्ते परतः सौगताश्चरमं स्वतः ॥
प्रथमं परतः प्राहुः प्रामाण्यं वेदवादिनः ।
प्रमाणत्वं स्वतः प्राहुः परतश्चाप्रमाणताम् ॥

सर्वेष्वेषु तु पक्षेषु भ्रम-प्रमाविवेकः किन्निबन्धनः ? इति समीक्षायाम्—"तदभाववति तत्प्रकारकं ज्ञानं भ्रमः", "तद्वति तत्प्रकारकं ज्ञानं प्रमे"ति साधारणं प्रयोजकमिति स्पष्टमिदं शङ्करभगवत्पादा विवेचयन्ति—

"तं केचिदन्यत्रान्यधर्माध्यास इति वदन्ति, केचित्तु यत्र यदध्यासस्तस्यैव विवेकाग्रह-निबन्धनो भ्रम इति, अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते ; सर्वथा त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति । तथाच लोकेऽनुभवः—शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवत्"

इति भाषयन्तः। अत्र प्रधानमल्लनिबर्हणन्यायेनाख्यातिपक्षमन्यथाख्यातिपक्षं च निवर्हणीयं मन्यन्ते भाष्यकाराः, समर्थनीयं चानिर्वचनीयख्यातिपक्षम् ॥

"शुक्तिका हि रजतवदवभासते" इति हि निदर्शनेन भाष्यकाराः शुक्तिकाया यादृशं प्रत्यक्षत्वं तादृशमेव रजतस्यापि, नतु रजतांशेऽख्यातिवादवत् स्मरणरूपत्वम्, अन्यथाख्यातिवदलौकिकप्रत्यक्षरूपत्वं वेति सूचयन्तः प्रत्यक्षप्रयोजकविचारो वेदान्तिनामेव भ्रम-प्रमासाधारण्यासाधारण्याभ्यां सुष्ठु निर्वचनमर्हति, नान्येषामिति विशदयन्ति। अन्यथाख्यातिपक्षे हि ज्ञानलक्षणप्रत्यासत्तिसन्निकृष्टस्य रजतस्य कथं लौकिकप्रत्यक्षत्वम्? कश्च तत्प्रत्यासत्तिसन्निकृष्टचन्दनसौरभज्ञानाच्छुक्तिरजतज्ञानस्य विशेषः? कथं तु काचादिदोषाणामपि रजतज्ञाने निमित्ततयोपयोगः? कुतो वा सौरभस्य सर्वदा चन्दनसंसृष्टस्येव ज्ञानलक्षणप्रत्यासत्त्याऽपि शुक्तिकाद्यसंसृष्टस्य रजतस्य भानम्? कथमत्र संसर्गो भासते? किमसावपि वस्तुगत्या विद्यमान एव स्मर्यते? तत्रापि किं ज्ञानलक्षणा प्रत्यासत्तिः स्वीक्रियते? न वा? यदि न स्वीक्रियते, तर्हि कथमस्य भानम्? यदि वर्तते, कथमस्य भ्रमात्मकत्वम्? इत्यादयो बहव एव पर्यनुयोगा उद्गच्छन्ति। तत्र च संसर्गोऽनिर्वचनीय इत्यगत्या स्वीकर्तव्यम्। सति चैवं किं तस्योपादानम्? किञ्च निमित्तम्? इत्यादयः पर्यनुयोगाः कथञ्चन समाधेया एव नैयायिकानाम्। अत्र च भावरूपस्याज्ञानस्यावरण-विक्षेपशक्तिकस्य स्वीकारमन्तरा न निर्वाहः, अतस्तस्याश्रयविषयादिविवेचनमप्यवसरप्राप्तम्, इति भिक्षुपादप्रसारणन्यायेन संसर्गवद् रजतमप्यानिर्वचनीयमेव, इत्यनिर्वचनीयख्यातावेव पर्यवसानम्। नह्यन्यथा रजत-तत्संसर्गप्रत्यक्षानिर्वाहः। सति चैवं प्रत्यक्षप्रमात्वं शुक्तिरजतज्ञानव्यावृत्तम्, प्रत्यक्षत्वं तु तत्साधारणम्, इति विवेचनार्थमेव वेदान्तपरिभाषादिषु प्रत्यक्षपरिच्छेदस्योपक्रमः ॥

घटादिप्रत्यक्षत्वं सुखादिप्रत्यक्षत्वं च वेदान्तिनां मनइन्द्रियत्वस्वीकारेणाप्युपपद्यते। वाचस्पतिमत इव शाब्दापरोक्षास्वीकारे ब्रह्मसाक्षात्कारोऽपि मनइन्द्रियत्वेन निर्वोढुं पार्यत एव। ईश्वरस्यापि, समष्ट्यन्तःकरणरूपत्वान्मायाया घटादिज्ञानं मानसमेवेति पक्षेणेश्वरज्ञानस्यापि प्रत्यक्षत्वानिर्वाहो नैयायिकप्रक्रियादरेणापि संभवदुक्तिक एव। प्रातिभासिकशुक्तिरजताद्याकारमानसवृत्तेः कैरपि साङ्ख्यादिकैरनङ्गीकाराद् रजतज्ञानस्य रजतस्य वा प्रत्यक्षत्वव्यवहारसमर्थनमनिर्वचनीयख्यातिस्वीकारेण, रजतस्यापि प्रमातृचैतन्याध्यस्तत्वेनैव प्रत्यक्षत्वम्, नान्यथेति विवेचनमन्तरा च न संभवति, इति प्रत्यक्षपरिच्छेदस्य वेदान्तपरिभाषादिगतस्यासाधारणं प्रयोजनमनिर्वचनीयख्यातिसमर्थनमेव। अत एव वेदान्तपरिभाषायां प्रत्यक्षपरिच्छेदोऽनिर्वचनीयख्यातिसमर्थनेनोपसंह्रियते, विशेषतश्च तत्र निमित्तोपादान-प्रत्ययाकार-निवृत्ति-बाध-निवर्तक-बाधकादिविवेचनेन। कथमन्यथा प्रमाणप्रकरणे भ्रमनिरूपणस्य सविस्तरस्यात्रोपपत्तिः? एवं च "शुक्तिका हि रजतवदवभासते" इति भाष्यगतदृष्टान्तार्थनिरूपणार्थमेव वेदान्तिनां प्रत्यक्षपरिच्छेदः ॥

न केवलं प्रत्यक्षपरिच्छेदः, किन्त्वनुमानादिपरिच्छेदा अप्यनिर्वचनीयत्वसमर्थनार्था एव। अनिर्वचनीयत्वसमर्थनं हि प्रतीतिकालिकसत्त्वसमर्थनेन कालान्तरीयबाधप्रतियोगित्वसमर्थनेन च। तथाहि—रजतादीनां बाधोऽपि प्रत्यक्षः, इति न रजतादिबाधनिरूपणार्थमनुमानादिप्रमाणापेक्षा समस्ति। घटादिव्यावहारिकानिर्वचनीयत्वं बाधयोग्यत्वसमर्थनेन न प्रत्यक्षेण भवितुमर्हति, किन्तु शुक्तिरजतादिदृष्टान्तेनानुमानेनैव। अत एव तत्र तत्र शुक्तिरजतदृष्टान्तत्वानुसन्धानमुपपद्यते। शुक्तिरजतादिमिथ्यात्वस्याप्यनु-

मानिकत्वे हि परस्पराश्रयादिदोषः समापतति । व्यतिरेक्यनुमानं तु नाद्वैतिनामभिमतम्, इति "यन्नैवं तन्नैवम्" इत्यादिरूपेण व्यतिरेकदृष्टान्तनिर्देशो ह्यद्वैतिनामनुपपन्न एव ॥

तदयं निष्कर्षः—प्रपञ्चमिथ्यात्वानुमाने दृष्टान्तसमर्थनार्थं प्रत्यक्षपरिच्छेदः, दार्ष्टान्तिकेषु तेन मिथ्यात्वसमन्वयार्थमनुमानपरिच्छेद इति । स्पष्टं च परिभाषाकारा अनुमाननिरूपणस्य प्रपञ्चमिथ्यात्वनिर्णयमेव प्रयोजनं प्रतिपादयन्तीति नाधिकमत्र व्याप्रियते । नैयायिकानां व्यतिरेक्यनुमानं वेदान्तिनामर्थापत्तिप्रमाणमपि वस्तुगत्या नार्थान्तरम्, इति दृष्टार्थापत्तेरुदाहरणं शुक्तिरजतमिथ्यात्वम्, श्रुतार्थापत्तेरुदाहरणं व्यावहारिकप्रपञ्चमिथ्यात्वमिति परिभाषायामेव व्यक्तम् ॥

एतेन आगमप्रमाणप्रयोजनमपि—व्याख्यातम् ; इदं हि प्रकरणमनुमानस्य निरङ्कुशप्रवृत्त्या ब्रह्मणोऽपि मिथ्यात्वमित्याभाससाम्यशङ्कावारणार्थम् । तेन च श्रुत्येकसमधिगम्ये पारमार्थिके ब्रह्मणि न मिथ्यात्वानुमानस्यावसरो वर्तते, इति निरधिष्ठानभ्रमवादवारणम्, अधिष्ठानांशे तु न ज्ञानस्य कुत्रापि भ्रमत्वमिति विवेचनमेव च परमं प्रयोजनम् । तथाच शुक्तिरजतज्ञाने 'इयं शुक्तिः' इति बाधज्ञानेन रजतमात्रबाधवत् प्रपञ्चस्याप्यधिष्ठानरूपब्रह्मस्वरूपमात्रज्ञानाद् बाधः, सविशेषस्य त्वनाधिष्ठानस्य ब्रह्मणोऽपि बाध्यत्वमेव, इति श्रुतिमूलकं सविशेषब्रह्ममिथ्यात्वानुमानमपि नास्माकं विरुद्धम् इति नेदमागमपरिच्छेदाप्रतिपाद्यं तत्त्वम् । अत एव परिभाषायामाकाङ्क्षा-योग्यताऽऽसत्ति-तात्पर्यज्ञानरूपसहकारिकारणचतुष्टयविवेचनानन्तरं सगुणवाक्यानां न गुणेषु तात्पर्यमिति विवेचनेनोपसंहार उपपद्यते ॥

एतेन—अनुपलब्धिप्रमाणपरिच्छेदोऽपि—व्याख्यातः ; अयमपि परिच्छेदो ब्रह्मणि प्रपञ्चभेदस्य कल्पितत्वेन नाद्वैतविघात इत्युपसंहारेणैव समाप्यते । अत्र चाभावस्याधिकरणात्मत्वमिति मीमांसकमतम्, अभावस्य नाधिकरणमेव रूपम्, किंतु स्वतन्त्रं रूपान्तरं वर्तत इति मतान्तरमिति मतद्वयमपि नाद्वैतिनां विरुद्धम् । यतोऽभावत्वविशिष्टत्वरूपेण नाधिकरणरूपत्वम्, अभावत्वोपलक्षितेन रूपेण त्वधिकरणरूपत्वमेवेति न विरोधः । अत्रानुपलब्धिप्रमाणजन्यमभावज्ञानं तु प्रत्यक्षमेवेति विवेचनेन परिभाषाकारा इदमेव विवेचयन्ति—यद्रजतस्य बाधज्ञानं नाम रजताभावज्ञानम्, अथवा रजताभावत्वोपलक्षितशुक्तिज्ञानम् । आद्यं 'नेदं रजतमि'ति 'नात्र रजतमि'ति वा ज्ञानम्, द्वितीयं तु 'इयं शुक्तिरि'ति । तत्र 'इयं शुक्तिरि'त्यस्य प्रत्यक्षात्मकत्वे न कस्यापि विप्रतिपत्तिः, रजताभावज्ञानस्य त्वनुपलब्धिप्रमाणजन्यस्याप्रत्यक्षत्वात् कथं रजतमिथ्यात्वं प्रत्यक्षावसेयम् ? इति शङ्का हि नात्रावतरति, यतोऽभावज्ञानमनुपलब्धिप्रमाणजन्यमपि प्रत्यक्षमेवेति ॥

तदेवं प्रत्यक्षपरिच्छेदमारभ्यानुपलब्धिपरिच्छेदपर्यन्तेनापाततः प्रत्यक्षस्वरूपानिर्धारणमात्रेण यत्र न बाधः, तत् तत्त्वम्, यत्र तु बाधः, तत्तु न तत्त्वमिति पर्यवसानेन सर्वेषामपि वेदान्तवाक्यानाम्, किं बहुना ? सर्वेषामेव प्रमाणानामध्यारोपापवादन्यायेनाद्वितीयात्मस्वरूपाविवेचनार्थमेव प्रवृत्तिः ॥

आत्मस्वरूपं हि प्रत्यक्षादिनाऽवगम्यमानं शरीरादितादात्म्येन गृहीतं चिदाचिद्ग्रन्थिरूपमेव, नतु निष्कृष्टं चिन्मात्रस्वरूपम्, इति प्रत्यक्षगृहीतमहमर्थमेव गृहीत्वा न तत्त्वमस्यादिवाक्यानि प्रवर्तन्ते । संभावितदोषं हि वेदान्तनिरपेक्षं जीवात्मनामहमर्थज्ञानं कथं वा प्रमाणमात्मतत्त्वविनिर्णये ? सति चैवम् 'अहमिच्छामि' 'अहं जानामि'इत्यादिप्रत्यक्षेण नात्मन इच्छादिधर्मत्वमवगन्तुं पारयामः । 'लोहितः स्फटिकः' इति कुसुमधर्मोऽपि लौहित्यं स्फटिकेऽवभासते । 'अयो दहती'ति च वन्हिधर्मोऽपि दग्धृत्व-

मयसि प्रतिभासते। यत एवम्, अतः परीक्षया यदि नान्यधर्मत्वं धर्मविशेषाणामवगच्छामः, तर्हि स्वधर्मत्वम्, अन्यथा तु न स्वधर्मत्वम्। कामादिकं तु श्रुत्यादिप्रमाणपरीक्षयाऽन्तःकरणधर्म इति स्पष्टमवगम्यते, नात्मधर्मो न वाऽहमर्थधर्म इति। तथाच श्रुतिः—"कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एवे"ति। नहि यावन्मुक्ति, यावद्ब्रह्मसाक्षात्कारम्, यावत्स्वजीवनकालं वा न बाधनिश्चयः, इत्येतावता तदेव पारमार्थिकं रूपमिति कोऽपि शक्नोति वर्णयितुम्। नहि देहात्मज्ञानं जीवनपर्यन्तं न बाध्यते, इति देह एवात्मेति वैदिकः कोऽपि मन्यते॥

सति चैवमात्मनो न ज्ञानादिर्धर्म इति नियतमिदं श्रुत्यनुसारिणामनुसरणीयम्। ज्ञानरूपो ह्यात्मा, न ज्ञानधर्मा, इति हि "विज्ञानघनः" इत्यादयः श्रुतयः श्रावयन्ति। नैयायिकादिमतं हि ज्ञानधर्मत्वादात्मनोऽस्वप्रकाशत्वाद् घटादिसमानयोगक्षेमत्वेन जडत्व एव पर्यवस्येत्। यद्यपि नैयायिका ज्ञानसमवायिकारणत्व-तदभावाभ्यामात्मानं घटादितो विभिन्दन्त्यसत्कार्यवादावलम्बनेन, तथाऽपि नैतत् तार्किका अपि साङ्ख्या योगिनो वाऽनुमन्यन्ते, ये हि सत्कार्यवादमेवासत्कार्यवादनिरसनेन समादरणीयं व्यावस्थापयन्ति—

असदकरणादुपादानग्रहणात् सर्वसंभवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥

इति; न वा मीमांसकाः, येऽप्यात्मपरिणामत्वमेव ज्ञानस्येति मन्यन्ते। यद्यपि आत्मधर्मत्वांशेनास्ति सालक्षण्यं मीमांसकानां नैयायिकानां च; तथाऽपि नात्मपरिणामता ज्ञानस्य सम्भवति, यतोऽविकारोऽयमुच्यते। नचाविकारस्य परिणामो नाम॥

एवं स्थिते कस्यायं धर्मो ज्ञानं नाम? किं रूपमेतस्य? कीदृशश्चात्मा? किं स्वप्रकाशो ज्ञानस्वरूपः? उत जडः? इति विकल्पपरम्परायां सांख्या आहुः—अन्तःकरणधर्म एव ज्ञानम्, विषयाकाराकारितत्वमेवान्तःकरणस्य ज्ञानस्वरूपम्। चिच्छक्तिः स्वयंप्रकाशाऽसङ्ग एव चात्मा नाम, यः सर्वगतः, प्रतिशरीरं स्वत एव भिन्नरूप एव वरीवर्ति। नायमणुपरिमाणः, न वा मध्यमपरिमाणः। नहि चिच्छक्तिरियं सर्वशरीरव्यापिनी प्रथमपक्षे कथमपि संभवति। नवा दीपस्येव प्रभास्थानीयं संकोचविकासशीलं धर्मभूतज्ञानं नाम निरवयवस्य तस्य स्वीकारमर्हति। नहि दीपो निरवयवः, इति युक्तं प्रभाद्वारा देशान्तरगमनम्, नत्वणुपरिमाणोऽपि देशान्तरं गन्तुमीष्टे, इति कथं धर्मभूतज्ञानद्वारा सर्वशरीरव्याप्त्या सुखाद्युपलम्भः?

यद्यपि भगवद्रामानुजादयः—धर्मभूतज्ञानमिति नाममात्रम्, नेदं परमार्थतो धर्मभूतमाधाराधेयभावानिबन्धनम्, किन्तु तादात्म्यापन्नमात्मस्वरूपमेवेति वदन्ति, परन्तु नेदं धर्मभूतज्ञानं जानातिपदाभिधेयम्। जन्यं हि ज्ञानं जानातिपदाभिधेयम्, नात्मस्वरूपं धर्मभूतं ज्ञानं तेऽपि तु जन्यं मन्यन्ते, किन्तु नित्यमेव। धर्मभूतज्ञानसंकोच-विकासजन्यत्वादिना ज्ञानजन्यत्वव्यपदेशो हि न सम्भवदुक्तिकः। संकोच-विकासौ हि धर्मभूतज्ञानधर्मावेव, न तत्स्वरूपे; अन्यथा तयोरपि नित्यत्वमापद्येत। किंच धर्मोत्पत्त्या धर्म्युत्पत्तिप्रत्ययः कुत्राप्यदृष्टचरः। नहि शब्दो जन्य इत्याकाशोऽपि जन्यते। ततश्च नाणुपरिमाणतायामात्मनो ज्ञानाधारत्वम्। मध्यमपरिमाणपक्षस्तु जीवस्यैव संकोच-विकासाद्यङ्गीकारेणानित्यत्वापत्त्या नोपपन्न इति बहुसम्मतमिदम्। बादरायणसूत्रमपि "एवं चात्मा कात्स्न्यर्म्"इति

जैनमतनिरासार्थं प्रवृत्तं सर्वेऽपि भाष्यकाराः. भगवद्रामानुजादयोऽपि संकोच-विकासशालित्वे जीवानाम-नित्यतापत्तिपरतयैव व्याचक्षते । सति चैवं कथं धर्मभूतज्ञानमपि संकोच-विकासशालि च नित्यं चेति श्रीभाष्यमतं स्वाविवरणस्यैव न विरुद्धम् ?

तदेवं नात्मधर्मो ज्ञानं नाम जानातिपदबोध्यम्, किंत्वन्तःकरणधर्म एव । नच—'अहं जानामि'इति प्रत्यक्षं वस्तुसदात्मगोचरं भवितुमर्हति, किंतु चिच्छक्तिरूपस्यासङ्गस्यात्मनोऽन्तःकरणस्य चाविवेकात् "अहं जानामी"ति व्यपदेश इति साङ्ख्यादयो मन्यन्ते । अद्वैतिनामपि नात्र विप्रतिपत्तिः । चक्षुरादिप्रमाणत्वव्यपदेशोऽपि विषयदेशव्याप्यन्तःकरणवृत्तिजननेनैवेति मतद्वयसम्मतमिदम् । इयान् विशेषः—यत् साङ्ख्या वृत्तिमेव जन्यं मुख्यं च ज्ञानं मन्यन्ते, अद्वैतिनस्तु चिच्छक्तिरेव वृत्तिफलिता सती जन्यं ज्ञानम्, न केवला वृत्तिरिति । सा तु गौणमेव ज्ञानम् । ते ह्यविद्यानिरासकत्वाद् वृत्तिं ज्ञानमित्युपचरन्ति । यत्राविद्यानिरासमात्रेण वृत्तेः पर्यवसानम्, तत्र वृत्तिमात्रजनकत्वेन ब्रह्मसाक्षात्कारस्थले प्रमाणत्वव्यपदेशोऽपि नानुपपन्नोऽद्वैतमते । घटादिस्थले तु यावद् वृत्तिः, तावदेव नावरणम्, अनन्तरं पुनरप्यावरणमनुवर्तते, इति वृत्त्यवच्छिन्नत्वेनैव चैतन्यस्य प्रकाशकत्वम्, इति तदेव फलचैतन्यमिति प्रमाणजन्यमिति वा व्यपदिश्यते । सर्वथा तु नात्मधर्मो ज्ञानम्, किन्त्वन्तःकरणधर्मः । जन्यज्ञानं तु वृत्तिरेव, तस्यात्मधर्मताव्यपदेशस्त्वविवेकात् तन्निबन्धनाभेदाध्यवसायाद्वेति वस्तुस्थितिः ॥

सविवरण-तत्त्वदीपन-पञ्चपादिकाविवरणस्य (६७६) तमसंख्यपृष्ठगतान्यत्रालोचनमर्हन्ति वाक्यानि । तानि यथा—

"ननु किमिह ज्ञानमीत्युच्यते ? संवेदनमेव प्रमाणफलं विज्ञानमिति सुगत-प्रभाकर-वैशेषिक-नैयायिकाः । नच संवेदन-फल-चतुष्टयसन्निकर्षादि सामग्र्यं चान्तरेण प्रमातृव्यापारो नाम ज्ञानमस्तीति । वार्तिककारीयाणां तु प्रमातृव्यापारः संविज्जनको ज्ञानमिति । क्षपणक-लोकायतिकानां चात्मचैतन्यमेव ज्ञानम् । साङ्ख्य-वेदान्तिनां करणव्युत्पत्त्या बुद्धिवृत्तिर्ज्ञानम्, भावव्युत्पत्त्या संवेदनमिति । तत्र न तावत् स्थायिन्यात्मनि संवित्फलोदयः कर्तृव्यापारमन्तरेणोपपद्यते । ननु यतः कारणात् कर्तृव्यापारजन्म, तत एवानुभवजन्म स्यात्, आत्मनः परिस्पन्दव्यापारानुपपत्तेरिति । अयमत्र वक्तव्यः—किं लोके कर्तृव्यापारात् फलजन्म प्रत्यक्षेणावगतम् ? न वेति ? न चेत्, व्याप्तिग्रहणाभावादप्रत्यक्षत्वाच्च न सर्वत्र कर्तृव्यापारावगमः स्यात् । अवगम्यते च लोके कर्तृव्यापारः । अथ लोके फलहेतुतया प्रत्यक्षसिद्धः कर्तृव्यापारः, तर्ह्यात्मन्यपि तदनुमीयते ; व्याप्तिनियमात् । ननु न परिणामो नाम व्यापारोऽस्ति ; आरम्भाभ्युपगमादिति वैशेषिकादयः, तर्हि प्रयत्नव्यापारजन्यं फलमस्तु ; कर्तृव्यापारव्याप्तिनियमात्फलस्य । ननु मनःसंयोगादेवासमवायिकारणाद् व्यापारमन्तरेण ज्ञानमुत्पद्यते, न ; करणसंयोगव्यतिरेकेण फलजन्मनि कर्तृव्यापारदर्शनात् । अत्र सर्वसङ्करवादी विलपति—पाकादिषु फलस्य कर्तृव्यापाराधीनतादर्शनात् तत्र तथाऽवगम्यताम्, इह तु तद्दर्शनाभावान्न कर्तृव्यापारः—इति, स चानुमानप्रक्रियायामनभिज्ञ इत्युपेक्ष्यते । सुगतानामपि नित्यात्मसाधनादेव संविदां कर्तृव्यापारा-

पेक्षाऽनुमीयते । क्षपणकानामपि स्वरूपचैतन्यस्य निरुपाधिकस्य विषयावभासित्वे सर्वदा सर्वविषयावभासः स्यात् । लोकायतस्य च जन्यसंवेदनत्वात् तद्व्यापारानुमानं सर्वगतस्य निरवयवस्यात्मनो न परिस्पन्द-परिणामौ युक्तौ, सत्यम् ; अध्यास-परिनिष्पन्नान्तःकरणसम्पिण्डितस्यात्मनो ज्ञानाकारपरिणामात् । नच संवेदनाकारेण परिणामः ; तस्य नित्यसिद्धत्वात् ; अतोऽन्तःकरणपरिणामविशेषश्चैतन्यस्य विषया-वच्छेदोपाधिः करणव्युत्पत्त्या ज्ञानम्, भावव्युत्पत्त्या तु संवेदनमेवार्थप्रकाशो ज्ञातिर्ज्ञान-मित्युच्यते । तत्रार्थोपाधि, अपरोक्षसंविदवच्छेदकं ज्ञानमपरोक्षम्, इति तत्रावयवार्थ-व्युत्पादनेनापरोक्षावगमेच्छाया वाक्यार्थत्वमुक्तम्"— इति ॥

सत्यमेवमद्वैतमतज्ञानस्वरूपादिविषये साङ्ख्यादिभिः, प्रपञ्चस्वरूपविषये सौगतैश्चास्ति साम्यम्, तावताऽपि नाद्वैतिनः प्रच्छन्नसाङ्ख्याः प्रच्छन्नबौद्धा वा । यत्किञ्चित् साम्यं हि सर्वैर्मतैस्सर्वेषां मतानां समस्ति, इति कथं न वैशेषिकादयोऽपि प्रच्छन्नचार्वाकाः ? कथं वाऽहिंसादिधर्मतावादेन सर्व एव न प्रच्छन्नबौद्धाः, निरीश्वरमीमांसकाः, सेश्वरमीमांसकाः, द्वैत-विशिष्टाद्वैताद्वैतवादिनो वा ? इमान्यत्र विवरण (४००पृष्ठ) गतानि वाक्यानि—

"यत्किञ्चित्साम्येन च सिद्धान्तसाङ्कर्ये मन्त्रार्थवादेतिहास-पुराणप्रामाण्यानभ्युपगमाद् देवतास्वर्गेश्वर-मोक्षानभ्युपगमाद् मन्त्राद्यप्रामाण्याच्च लोकायत-क्षपणकांशद्वयपरिणतो वार्तिककारः । यस्तु कश्चित्—क्षपणकपादावनत-शिरोबिम्बः, तत्त्वदर्शन-तन्निष्ठ-परमहंसप्रद्वेषप्रतीव्रवायुविक्षिप्तविवेकविज्ञानलवः स्व-परपक्षगुण-दोषाविभागदूरीकृतविज्ञानो भेदाभेदाभ्यां बन्ध-मोक्षादिसङ्करमिव कुर्वन् दुर्जनरमणीयां वाचं जल्पति—सुगत-विज्ञानवादसमानोऽयं वेदान्तवाद इति, स सम्प्रदायश्रवणपरिचयशून्यतया दर्शनविवेक-मनवबुद्ध्यमानो नापवाद्यः, किन्तु शोचनीय इत्युपेक्षणीयो विद्वद्भिः" इति ॥ अन्यत्रापि—"ननु विज्ञाने प्रपञ्चस्य कल्पितत्वं तव तस्य च तुल्यम्, सत्यम् ; विज्ञाने प्रतिभास्यमानत्वं च तव तस्य च तुल्यम्, इति विज्ञानवादस्त्वदीयं दर्शनं किं न स्यात् ? सत्यपि प्रतिभास्यत्वे सत्य-मिथ्याविभागोऽस्तीति चेत्, इहापि सत्यपि मिथ्यात्वेऽर्थ-क्रियासमर्थसत्त्वासत्त्वाविभागोऽस्त्येव । कल्पितत्वे नेयं विभागसिद्धिरिति चेत्, प्रतिभास्यत्वेऽपि न सत्य-मिथ्याविभागसिद्धिः । दृश्यतेऽयं विभाग इति चेत्, तदेव विभागदर्शनं मम किं न स्यात् ? घटादेर्मिथ्यात्वमप्रसिद्धमिति चेत्, न ; प्रतिभास्यसत्यत्वस्याप्यसिद्धत्वात् । शुक्तिरजत-घटयोरर्थक्रियाभावाभावसत्त्वासत्त्वविभाग-दर्शनाच्च । दृश्यते च माया प्रीति-द्वेषादिकारणम् । श्रूयते च देवासुरसंग्रामादिषु मायाविनिर्मितशस्त्रभेदानां दाह-च्छेद-भेदादि-हेतुत्वमित्यलमतिप्रसङ्गेन ॥" इति ॥

अनेन चेदमवगच्छामः—यद् भगवत्पादाः किमपि दर्शनं स्वसिद्धान्ताविरुद्धमंशतोऽशान्तरेण स्वा-विरुद्धेनापि न तिरस्करणीयं मन्यन्ते ; यथा कुमारिलपादा अहिंसावाक्यमपि सौगतानां स्वह्रातिनिहितं

दुग्धमिवानादरणीयं मन्यन्ते, यथा वा शिवद्रोहे तात्पर्येणाघ्रातशिवनिर्माल्यां नासिकामपि स्वां केचन कर्तितुमायतन्ते, किन्तु सर्वाणि दर्शनानि कथंचनाद्वैतपर्यवसायीनि नानादरमर्हन्तीति । अत एव हि षण्मतस्थापनाचार्या भगवत्पादा गीयन्ते । अद्वैतदर्शनं हि सर्वदर्शनसारस्य तत्तादृशस्य यथासम्भवं समादरणेन सर्वाङ्गसुन्दरं वस्तुगत्या 'नेति नेति'प्रक्रिययाऽद्वैततत्त्वमवबोधयद् दर्शनान्तरखण्डनपरमपि खण्डखाद्यमिव षड्रसभरितम्, इति दर्शनान्तरसाम्यं कथमद्वैतदर्शनस्य न भूषणमेव ॥

तदिदं सिद्धम्—यदद्वैतिनां ज्ञानस्वरूपमर्थोपाधिकं वाऽपरोक्षसंविदवच्छेदकमेवापरोक्षमिति । "अविद्यानिवृत्तिपरत्वात् शास्त्रस्य" इति भाष्यमपि मनःपरिणामां वृत्तिमेवाभिप्रैति, न तु चैतन्यम्, यत्तु तस्यावभासकम् । वृत्त्यवच्छिन्नं चैतन्यं वृत्तिरेव वा खल्वज्ञानस्य विरोधि । अवच्छेदश्चात्मान्तःकरणयोस्तद्धर्माणां च विवेकाग्रहात् तन्निबन्धनपरस्परतादात्म्याध्यासाद्वेति पिष्टपेषणमिदम् ॥

इदमत्रालोचनीयम्—किमविवेकमात्रेण तद्वद् व्यवहारो भवति ? किं वाऽविवेकनिबन्धनेनाभेदाध्यवसायेनैवेति ? आद्यः पक्षः साङ्ख्यादीनाम्, द्वितीयस्तु वेदान्तिनामद्वैततत्त्वावलम्बिनाम् । तदेवं प्राधान्येन साङ्ख्यमतनिरसनेन श्रौताद्वैतमतव्यवस्थापनार्थमेव ब्रह्ममीमांसाशास्त्रं प्रवृत्तम् । अत एव तत्र तत्र विशिष्य साङ्ख्यमतनिराकरणे विशिष्टः प्रयत्नः सूत्रकाराणामुपपद्यते । अहमर्थानात्मतावादस्योभयसमानत्वेऽपि तादात्म्याध्यासनिबन्धनचिदाचिद्ग्रन्थिरूपत्वांशे तु नाविप्रतिपत्तिः । मुक्त्यवस्थायामहंभाननिषेधः साङ्ख्यानामपि साधारणः, इति श्रीभाष्यकाराणामहमर्थस्य मोक्षान्वयवादः साङ्ख्यैरेव निरस्तप्रायः । यथाच श्रीभाष्यकाराणां श्रीमाध्व-तात्पर्यचन्द्रिकाकाराणां चाहमर्थमुक्त्यनन्वयदूषणानां लेशतोऽपि नावसरः, तथा वेदान्तपरिभाषाभूमिकायाम्, अद्वैतदीपिकायां च सुष्ठु विवेचितम्, इति सिद्धमिदम्—यदात्मान्तःकरणयोः परस्पराध्यासव्यवस्थापनमन्तरा श्रौतं सौत्रं वाऽद्वैतव्यवस्थापनं नावसरं लभते । तथाचान्तःकरणादिप्रपञ्चमिथ्यात्वनिर्णयार्थैव श्रुतार्थापत्त्या श्रुतिमूलयोपपत्त्या वा सूत्रकाराणां प्रवृत्तिरिति विषयपरिच्छेदात्पूर्वमुपपद्यत उक्तविधया प्रत्यक्षादिप्रमाणनिर्धारणम्, तत एव ज्ञेयब्रह्मस्वरूपनिर्धारणं च युक्तम्, इति प्रकरणग्रन्थेषु प्रमाणपरिच्छेदानन्तरं विषय-प्रयोजनपरिच्छेदयोरुपक्षेपः ॥

तथाचाध्यासभाष्यार्थसङ्ग्रहः प्रमाणपरिच्छेदसमुदायः, ब्रह्ममीमांसाप्रथम-द्वितीयाध्यायार्थसङ्ग्रहो विषयपरिच्छेदः, तृतीय-तुरीयाध्यायार्थसङ्ग्रहः प्रयोजनपरिच्छेद इति वेदान्तपरिभाषादिः साध्यासभाष्यब्रह्ममीमांसासङ्ग्रहरूपः । वेदान्तसारादयस्त्वध्यासभाष्यांशपरिहाणेनाध्यायचतुष्टयार्थसङ्ग्रहभूताः, इति हृदयम् । यद्यपि विनाऽध्यासभाष्यमपि सूत्राणामेव तत्तत्प्रकरणगतानां विवरणेन सिध्यतीष्टम् ; तथाऽपि शिष्येषु प्रेमातिशयेन वक्ष्यमाणार्थसंकलनं परमोदारतां भाष्यकारस्यावगमयतीति शारीरकमीमांसाभाष्यवार्तिकेऽत्र स्पष्टम् ॥

अध्याससमर्थनं हि घटादीनामाधिष्ठानस्याद्वितीयत्वव्यवस्थापनेन, शुक्तिरूप्यादिस्थल इव किञ्चिद्रूपेण ज्ञातत्वस्य किञ्चिद्रूपेणाज्ञातत्वस्य च तत्र स्वीकारेण, अधिष्ठानारोप्ययोः सादृश्यज्ञानेन, भ्रमात्पूर्वमपि प्रकृतभ्रमसजातीयानुभवाङ्गीकारेण विवेकाग्रहेण च भवति । तत्र विवेकाग्रहः साङ्ख्यानामपि समानः, यतः काचादिदोषप्रयुक्तो विवेकाग्रहस्तैरपि स्वीक्रियते । अपराणि कारणानि न संभवन्ति, यतोऽद्वितीयत्वं किञ्चिद्रूपेण ज्ञातत्वादिकं च परस्परव्याहतम् । प्राथमिके चाध्यासे सजातीयानुभवाहितसंस्कारोऽसम्भवदुक्तिकः । चैतन्यस्य स्वयंप्रकाशस्य चावरणं च विरुद्धम्, निर्धर्मकत्वात्सादृश्यज्ञानस्याप्यसंभवः,

इति कथं भाष्यकाराणामध्याससमर्थनं न स्वकपोलकल्पनामात्रम् ? कथं चेदं सर्वं सूत्रारूढम् ? कुत्र वा सूत्र आवरणशक्तिमती मायाऽविद्या वा सूत्रकारेण सूत्रिता ? किं साऽनेका ? उतैका ? कश्चास्या आश्रयः ? को वा विषयः ? कथं च ज्ञानानां प्रत्यक्षत्व-परोक्षत्वविवेकः ? यतश्चैतन्यमात्राध्यस्तानां सर्वेषां प्रत्यक्षत्वस्यैव प्रसङ्गः । कश्च स्वाप्निक-जागरिकविशेषः ? किंच स्वाप्निकानामधिष्ठानम् ? किञ्च जागरिकाणाम् ? कथं च सर्वेषां ब्रह्मज्ञानबाध्यत्वाविशेषे घटादीनां व्यावहारिकत्वम्, शुक्तिरूप्यादीनां च प्रातिभासिकत्वम् ? कथं च प्रमाणाप्रमाणविभागः ? कथं च मिथ्याभूतेन शास्त्रेण सत्यब्रह्मज्ञापनम् ? कथं च वेदान्तानामप्यविद्यारूपदोषजन्यत्वेन परतोऽप्रमाणत्वात् स्वतः प्रामाण्यम् ? का च ब्रह्ममीमांसायां सगुणवाक्यविचाराणां तत्तादृशानां प्रासङ्गिकानां च विचारान्तराणां सङ्गतिः ? कथं च "नेतरोऽनुपपत्तेः" इत्यादिनिर्देशाद् जन्मादिलक्षणाम्नानाच्च सगुणमेव ब्रह्म न ब्रह्मसूत्राणामुपनिषदां च गोचरः ? कथं च कर्म-ज्ञान-भक्तीनां त्रयाणां साधनानां सार्थक्यम् ? को नाम जीवः ? कश्चेश्वरो नाम ? किञ्च ब्रह्म ? किम्—जीवेश्वरौ सादी ? उतानादी ? आद्ये कथं मुक्त्यन्वयः ? अन्त्ये कथं नित्याभ्यां ताभ्यां ब्रह्मणो न साद्वितीयत्वम् ? किंच तदतिरिक्ते ब्रह्मणि प्रमाणम् ? कथं च निर्विकल्पकं ज्ञानं प्रमा ? कथं च वेदान्तानामखण्डार्थत्वम् ? कथं च सगुण-निर्गुणवाक्यादीनां प्राबल्य-दौर्बल्यनिर्णयः ? को वा ब्रह्मविद्यायामाधिकारी ? किंच विचारप्रयोजनम् ? कथं चानादेरविद्याया नाशः ? किं मुक्तिरुत्क्रमणमपेक्षते ? का च नाम मुक्तिः ? इत्यादिविचारो हीदानीमवसरप्राप्तः ॥

(१) इदमत्र समाधानम्—अद्वितीयं चैतन्यमेवाधिष्ठानम्, अद्वितीयत्वं च ब्रह्मणः परमार्थतो द्वितीयराहित्यम्, नत्वारोपेणापि । तथाच सत्त्व-चित्त्वादय आरोपिता धर्मा ब्रह्मणि स्वीक्रियन्ते, इति चैतन्यस्याधिष्ठानस्याद्वितीयत्वं किञ्चिद्रूपेण ज्ञातत्वादिकं च न विरुद्धम् ॥

(२) अध्यासो ह्ययं प्रवाहतोऽनादिर्न सर्वात्मना सादिः, इत्यारोप्यसजातीयानुभवाहितसंस्कारोऽपि नात्र बाधितः । एतेन सादृश्यज्ञानमपि व्याख्यातम् ; कल्पितेन धर्मेण सादृश्यज्ञानसम्भवात् ॥

(३) चैतन्यं स्वप्रकाशमपि नाज्ञानेन विरुद्धम्, अन्तःकरणवृत्तेस्तदवच्छिन्नचैतन्यस्यैव चावरणविरोधित्वात्, इति प्रत्यगात्मनोऽप्यावृतत्वं न विरुद्धम् । तथाचाद्वितीयस्य चैतन्यस्य केनचिद्रूपेणावृतत्वस्य केनाचिद्रूपेणानावृतत्वस्य च सम्भवेनाधिष्ठानत्वसम्भवात् सादृश्यज्ञानसम्भवात्, पूर्वानुभवसंस्कारसम्भवाच्च नाध्यासः प्रपञ्च-तद्धर्माणां ब्रह्मणि न सम्भवदुक्तिकः ॥

(४) सम्भवति चेदमध्याससमर्थनं सूत्रारूढम् । तथाहि—"मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" इति हि सूत्रकाराः स्वाप्निकानां मायामयत्वं प्रतिपादयन्ति । एवं "वैधर्म्याच्च न स्वप्नादिवत्" इति सूत्रेण जागरिकाणां स्वाप्नवैषम्यं प्रतिपादयन्ति । अत्र मायिकत्वं प्राकृतिकत्वम्, तेन च सत्यत्वमेव स्वाप्निकानामिति यद्याशयः सूत्रकाराणाम्, तर्हि जागरिकाणामपि तादृशस्य मायिकत्वस्याविशेषात्—"वैधर्म्याच्च न स्वप्नादिवत्" इति सूत्रे वैधर्म्यानुवादोऽसङ्गत एव स्यात् । अनेन हि विज्ञायते—यत्स्वाप्निकानामिव जागरिकाणां न ज्ञानमात्रनाश्यत्वं वर्तते, न वा ज्ञानसमानकालः प्रतिभासश्चेति । सति चैवं स्वाप्निकानां प्रातिभासिकसत्त्वम्, जागरिकाणां तु प्रतिभासकालाधिककालव्यापिसत्ताकत्वमिति फलति ॥

अयं च न्यायः शुक्तिरूप्यादिष्वपि समानः, इति शुक्तिरूप्यामिथ्यात्वेऽपि सूत्रकाराणां तात्पर्यमुन्नेयम् ; सूत्राणां न्यायरूपत्वेनातिदेशयोग्यसर्वविषयत्वस्य युक्तत्वात् । शुक्तिरूप्यादिकमपि हि प्रतिभासकाल एव वर्तते, न तु कालान्तरेऽपीति शुक्तिरूप्यमिथ्यात्वं सूत्रारूढमेव । स्वाप्न-जागरिकवैलक्षण्यं तुरीयाध्याये "तन्वभावे सन्ध्यवदुपपत्तेः" "भावे जाग्रद्वत्" इति दृष्टान्तद्वयानिर्देशेनापि सूत्रकाराः सूचयन्ति, इति "मायामात्रमि"ति सूत्रस्येश्वरसृष्टत्वपरतायां तद्विरोधोऽपि श्रीभाष्यकारादीनां भवतीति व्यक्तमिदमद्वैत-मार्तण्डादौ । तदेवं मिथ्यात्वानुमानदृष्टान्तस्य सूत्रारूढत्वं सिद्धम् ॥

दार्ष्टान्तिकब्रह्मव्यतिरिक्तद्वितीयपदार्थमिथ्यात्वं तु "न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि" "भेदादिति चेन्न प्रत्येकमतद्वचनात्" "अरूपवदेव हि तत्प्रधानत्वादि"ति सूत्रजालेन ब्रह्मणोऽद्वितीयत्वप्रतिपादनात्, "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति ब्रह्मव्यतिरेकेण शुक्तिव्यतिरेकेण रूप्यस्येवाभावप्रतिपादनाच्च सूत्रकाराः सूचयन्त्येव । यथा चैतेषां सूत्राणाम्—"वाचारम्भणं विकारो नामधेयम्" इत्यादिश्रुतीनां च मृदादिदृष्टान्तेन प्रवृत्तानामप्यद्वैत एव स्वारस्यम्, तथाऽद्वैतमार्तण्डादौ व्यक्तम् । सति चैवं जागरिकाणां स्वप्नवैधर्म्यं ब्रह्मण्यभावश्च प्रतिपाद्यमानो मायिकत्वेन साम्येऽपि दोषनिवृत्तिमात्रेण विरोधिज्ञानमात्रेण वा निवृत्त्या स्वाप्निकानां मिथ्यात्वम्, जागरिकाणां तु व्यवहारकाले न तादृशमिथ्यात्वमिति वैधर्म्यमेव सूत्रकारा मन्यन्ते ॥

एतादृशमेव वैधर्म्यमभिप्रेत्य "वैधर्म्याच्च न स्वप्नादिवत्" इति सूत्रं प्रवृत्तमिति श्रुतप्रकाशिकाकारा अपि प्रकृतसूत्रे श्रीभाष्यव्याख्यावसरे वर्णयन्ति । इयान् विशेषः—कृत्वाचिन्तयेदं सूत्रमिति वदन्ति श्रुतप्रकाशिकाकाराः । वयंतु वस्तुस्थितिमनुसृत्येति वदामः । वैधर्म्यं च मायातिरिक्तनिद्रादिदोषजन्यत्वं स्वाप्निकादीनां प्रातिभासिकानाम्, जागरिकाणां तु मायैव दोषत्वेनापि हेतुरिति न मायातिरिक्तदोषजन्यत्वमिति परिभाषादौ व्यक्तम् । प्रपञ्चानादित्वं प्रवाहतः सर्वेषामेव सम्मतमिति नात्राधिकं व्याप्रियते ॥

(५) मायाविद्ययोरभेदात्तु सूत्रे मायापदं न विक्षेपशक्त्यंशमात्राभिप्रायेण । अन्यथा हि "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यादिसूत्रविरोधः । सर्वथा तु नाध्यासभाष्यमिदं सूत्रानारूढम्, इति तदावरणशक्तेरेव ब्रह्मणः सद्वितीयत्वादिकं "न स्थानतोऽपी"त्यादिसूत्रसिद्धमुपपद्यते ॥

(६) माया चेयमेकैव, न नाना ; "मायामेतां तरन्ति ते" इति श्रुतौ तर्तॄणां बहुत्वं तरणीयाया मायाया एकत्वं च कथमन्यथोपपद्येत ? "इन्द्रो मायाभिः पुरुरूप ईयते" इति तु वाक्ये परमात्मन एवैकत्वं मायाया बहुत्वं च प्रतिपादितम् । तेन परमात्मा मायागुणभेदेन ब्रह्म-विष्णु-शिवादिभावं प्राप्नोतीति बोध्यते, इति स्वतो मायाया बहुत्वे न किमपि प्रमाणमस्ति, तथाऽपि मायाभिरिति बहुवचनं मायावस्थाभेदादिकमादायैव प्रवृत्तम् । मुक्तास्त्वनेकजीववाद ईश्वरभावमेव भजन्ति, इति मायापरवशत्वनिषेधेन स्ववशंवदमायत्वबोधन एव "मायामेतां तरन्ति ते" इत्यादिवाक्यानां प्रामाण्यम् । यथाच जीवानेकतावाद एव युक्तिसहः, न तदेकत्ववादः, तथा वार्तिके स्पष्टं विवेचितम्—जीवैकत्ववादगततत्तद्वान्तरप्रक्रियाविशेषणां सिद्धान्तलेशसङ्गृहीतानां निरसनेनेति तत एवाधिकमवगन्तव्यम् ॥

(७) मायाश्रय-विषयविवेकस्तु चतुर्ग्रन्थ्यामस्मदीयायां न्यायामृताद्वैतसिद्धि-तरङ्गिणी-लघुचन्द्रिका-सङ्ग्रहेण विवेचित एव । तत्र विवरणादिमते—शुद्धं चैतन्यमेवाज्ञानस्याश्रयो विषयश्च । तदुक्तम्—

"आश्रयत्व-विषयत्वभागिनी निर्विभागचितिरेव केवला ।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः ॥"

इति संक्षेपशारीरके । भामतीमते त्वज्ञानाश्रयो जीवः, तद्विषयस्तु ब्रह्मेति निष्कर्षः । यथाच भामतीमते न जीवाश्रयत्वपक्षो विकल्पसहः, तथा वार्तिकेऽत्र स्पष्टं विवेचितम् । यतो जीवो नामान्तःकरणोपलक्षितं चैतन्यम्, अस्यैव तु चैतन्यस्याश्रयत्वं भामतीकारा मन्यन्ते । तच्च शुद्धचैतन्याश्रत्वपक्ष एव पर्यवस्यतीति ॥

अवस्थाऽज्ञानं तु तत्तज्जीवानेवाश्रित्य वर्तत इति विवरणाचार्याणामपि सम्मतम्; अन्यथा तत्त्वज्ञानेन तत्तज्जीवमात्राश्रिताविद्याविनाशाभावेन मूलाविद्यानाशे ह्येकमुक्तौ सर्वमुक्तिरापद्येत, इति मूलाविद्याया अपि जीवाश्रितत्वे न कोऽपि दोषः । मुक्तिदशायां तु जीवानेकतावादेऽन्तःकरणस्याविद्यायां लयात् तदुपलक्षितत्वव्यवहारः सम्भवत्येव । न ह्यन्तःकरणोपलक्षित्वं शुद्धत्वम् । ईश्वरभावापन्नजीवानामन्तःकरणोपलक्षितत्वसम्भवात्, इति वार्तिकोक्तदूषणानां नात्रावसरलेशोऽपि, इति न भामतीकारमतमनुपपन्नम् । अत एव घटावच्छिन्नचैतन्यगतावरणनिवृत्त्यर्थं प्रमातृचैतन्याभेदसंपादनार्थं चान्तःकरणवृत्तिनिर्गमवादो वेदान्तिनाम् । अन्यथा घटादिप्रत्यक्षत्वार्थमनावृतचैतन्याभेदो व्यर्थ एव । प्रमातृचैतन्यगतस्यैवाज्ञानस्य विषयावरकत्वं हि तेन विषयचैतन्यभेद एव सम्भवति, न तदभेदे । तस्य विषयचैतन्याभेदश्चावरणशक्तिविगम इति खलु तदाशयः । तथाच जीवाज्ञानाश्रयत्वपक्षोऽपि न दुष्टः ॥

(८) एतेन—प्रत्यक्षत्व-परोक्षत्वविवेकोऽपि—व्याख्यातः; इन्द्रियसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति हि नैयायिकादयो मन्यन्ते । तच्चान्तःकरणवृत्त्यवच्छिन्नस्यैव चैतन्यस्य प्रत्यक्षत्वे न दुष्टम्, परन्तु नेदं न दुष्टम् । यतो मायिकवृत्त्यवच्छिन्नमपि चैतन्यं प्रत्यक्षरूपं प्रमात्मकं भ्रमात्मकं च वयमनुभवामः । प्रमात्मकं मायावृत्त्यवच्छिन्नं ज्ञानमीश्वरस्य । सत्यं नैयायिका ईश्वरज्ञानं न जन्यमिति मन्यन्ते, परन्तु नेदं श्रुतिसम्मतम् । "तदैक्षत बहु स्यां प्रजायेये"ति हि श्रुतिरीश्वरस्यापि जन्यमेवेक्षणं प्रतिपादयति । नचेदमिन्द्रियसन्निकर्षजन्यम् । अत्र च प्रसङ्ग ईश्वरसर्वज्ञत्वविषये विवरण (८९९ पृष्ठ) वाक्यानि सत्यं स्मरणपथमापतन्ति ।

"कथं चेदं सर्वज्ञत्वमिति वक्तव्यम्—न तावत्प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावप्रमाणैः सर्वं वेत्ति; तेषामयुगपत्प्रवृत्तेः, सर्वस्य च प्रत्यक्षताहानात्, सत्स्वपि तेष्वस्माकं सर्वज्ञताऽभावात्, इन्द्रियाणां च देश-काल-वस्तुविप्रकृष्टार्थग्राहित्वाभावात्, संयुक्तसमवायात् संयुक्तसंयोगात्संयुक्तविशेषणतया वा सर्वार्थप्रत्यक्षत्वेऽस्माकमपि प्रसङ्गात् । मानसमपि ज्ञानमात्मनोऽन्यत्रेन्द्रियादिसापेक्षम्, इति सर्वं न मानसप्रत्ययगम्यम् । नच धर्मातिशयवशादपीन्द्रियैरयोग्यं वस्तु गृह्यते; मार्जारादिदृष्टीनामपि योग्यरूपादिष्वेवातिशयवत्त्वदर्शनात् । नच कृत्स्नपरिभावनासंस्कारजन्यं मानसं सर्वज्ञज्ञानं कृत्स्नार्थं ग्राहयति; प्रथमं कृत्स्नार्थग्रहणाभावे तत्र परिभावनाऽयोगात् तज्जन्यकृत्स्नग्राहिज्ञानायोगात्, परिभावनायाः प्रागपि कृत्स्नार्थग्रहणेऽस्माकमपि प्रसङ्गात् । अतीतानागत-वर्तमानार्थानामियत्तानवधारणाच्च सर्वग्रहणानुपपत्तिः; एतावदिदम्, नातः परमस्त्यज्ञातमित्यनवधारणात् । नच स्वरूप-

ज्ञानेनैव सर्वज्ञता ; तस्य प्रदीपप्रभावदतीतानागतार्थग्राहित्वाभावात् । तस्मान्नास्ति सर्वज्ञ इति ॥

उच्यते—सर्वस्य कर्तृत्वादेव वर्तमानस्वकार्यसर्वविषयज्ञता तावत् सिद्धा । एवं तत्तत्कालेऽतीतसर्वविषयावगमादनुभूतविषयाऽसंप्रमोषा स्मृतिः स्वमायापरिणामोपाधिरनावरणा सर्वविषया कल्प्यते । तथा सृष्टेः प्रागपि सृज्यमानपदार्थावधारणस्य कुलालादिषु दृष्टत्वाद् आगामिसर्वविषयज्ञानं स्वमायापरिणामोपाधि कल्प्यते इति युक्ता सर्वज्ञता । "यः सर्वज्ञः सर्वविदि"ति च जगत्कारणे सर्वज्ञपदप्रयोगात्सर्वज्ञानं प्रमीयते इति श्रुति-युक्तिभ्यां युक्ता सर्वज्ञता । ननु सोपाधिकधर्मत्वान्न स्वरूपलक्षणमित्युक्तम्, न ; अनेन सर्वज्ञशब्देन सर्वावभासक्षमं विज्ञप्तिमात्रमादित्यादिप्रकाशवदविषयोपाधिकं विज्ञानमेव ब्रह्मस्वरूपलक्षणं विवक्ष्यत इत्यविरोधः ।

एवं शुक्तौ रूप्यप्रत्यक्षम्, स्वाप्निकानां स्वाप्नप्रत्यक्षम्, सुषुप्तावात्मप्रत्यक्षं च न कस्यापि मतेनेन्द्रियसन्निकर्षजन्यं भवितुमर्हति । सत्यं परैः स्वाप्निकानां स्मरणमेव, न प्रत्यक्षमिति वर्णयितुं शक्यम् । आत्मप्रत्यक्षं तु सुषुप्तौ न निर्वक्तुं शक्यम् इति नेन्द्रियसन्निकर्षजन्यज्ञानत्वं प्रत्यक्षत्वप्रयोजकम्, किंतु चैतन्यत्व-विषयावच्छिन्नचैतन्याभिन्नवृत्त्यवच्छिन्नचैतन्यत्व-प्रमातृचैतन्याभिन्नविषयत्वान्यतमत्वादिकमेव प्रत्यक्षत्वप्रयोजकमिति वक्तव्यम् । यत्र विषयदेशेऽन्तःकरणं चक्षुरादिद्वारा निर्गच्छति, तत्र ज्ञानस्य प्रत्यक्षत्वम् अन्यत्र तु परोक्षत्वम् । घटादौ ज्ञानप्रत्यक्षत्वं घटदेशे वृत्तिनिर्गमाद् वर्तत एव । 'पर्वतो वन्हिमानि'त्यत्र वन्हिदेशे तु नान्तःकरणं गच्छति, इति न वन्हिज्ञानं प्रत्यक्षम् । सुखदेशेऽन्तःकरण एव तदाकारा वृत्तिरपि वर्तते इति सुखज्ञानं प्रत्यक्षम् । मायादेश एव प्रपञ्चो वृत्तिश्च भवति, इति नेश्वरज्ञानमपि परोक्षम् । रजतादिप्रातिभासिकवृत्तिरपि रजतदेश एव भवति इति रजतज्ञानमपि प्रत्यक्षम् । सुषुप्तावात्माकाराविद्यकवृत्तिरप्यात्मदेश एव भवति, इति सौषुप्तात्मानुभवोऽप्यपरोक्षः । सर्वं चेदमनात्मधर्मो वृत्तिरूपं ज्ञानमिति स्वीकार एव संभवति । आत्मधर्मत्वे तु परोक्षत्वापरोक्षत्वविवेककारणं किमपि न संभवति । विषयदेशाभिन्नदेशसमुत्पन्नेन विषयप्रत्यक्ष-परोक्षत्वादिविभजनं कथं संभवति ? कारणभेदादिति चेत् न हि भिन्नजातीयेन कारणेनैकजातीयं कार्यं नोत्पद्यते ; तृणारण्यादिसंयोगादेकस्य वन्हेरुत्पत्तिदर्शनात् । नहि शुद्धचैतन्यमिव विषयावच्छिन्नं चैतन्यमपि प्रत्यक्षमेव, इति चैतन्याध्यस्तत्वमात्रतः सर्वेषां प्रत्यक्षत्वापत्तिः । तथाच नाद्वैतमते प्रत्यक्षत्वापरोक्षत्वाविवेकः ॥

(९) अनेन च प्रसङ्गेन स्वाप्निक-जागरिकविशेषोऽपि निरूपितप्रायः । यतोऽन्तःकरणवृत्तिविषयत्वं प्रतिभासकालातिरिक्तकालेऽपि सत्त्वं च जागरिकाणाम् स्वाप्नानां त्वाविद्यकवृत्तिविषयत्वम्, प्रातिभासमात्रशरीरत्वं च ॥

(१०) अधिष्ठानं तु स्वाप्निकानां शुद्धचैतन्यमन्तःकरणावच्छिन्नचैतन्यं वा । आद्यपक्षे निद्रादिदोषसहकृताविद्याकार्यत्वं स्वाप्निकानाम्, द्वितीयमते तु तूलाविद्याकार्यत्वमिति न कोऽपि दोषः । एतेन—जागरिकाधिष्ठानमपि—व्याख्यातम् । जागरिका हि द्विविधाः—व्यावहारिकाः प्रातिभासिकाश्च । तत्र व्यावहारिकाणां शुद्धचैतन्यमेवाधिष्ठानम्, प्रातिभासिकानां तु शुद्धचैतन्यं शुक्त्याद्यवच्छिन्नचैतन्यं

वाऽधिष्ठानमिति मतभेदो वरीवर्ति । तत्र प्रथममते काचादिदोषसहकृतमूलाविद्याकार्यत्वम्, द्वितीयमते तु तूलाविद्याकार्यत्वमिति विशेषोऽनुसन्धेयः ॥

(११) व्यावहारिकत्वं नाम ब्रह्मसाक्षात्कारपूर्वक्षणेऽबाधितत्वम्, मूलाविद्याकार्यत्वं वा । प्रातिभासिकत्वं तु ब्रह्मसाक्षात्कारपूर्वक्षणबाधितत्वं तूलाविद्याकार्यत्वम्, दोषान्तरसहकृतमूलाविद्याकार्यत्वं वा। ब्रह्मप्रमाऽव्यवहितपूर्वप्रातिभासिकानां ब्रह्मसाक्षात्कारपूर्वक्षणेऽबाध्यमानानामपि तद्योग्यत्वं तूलाविद्याकार्यत्वादिरूपं विद्यत एवेति न कोऽपि दोषः । देहात्मताऽपि तु 'उष्णं जलमि'ति ज्ञानविषयौष्ण्यवद् व्यावहारिक्येव । तदेवं व्यवहारकालाबाध्यत्वेनैव व्यावहारिकत्वम्, तत्कालीनबाधविषयत्वेन तु प्रातिभासिकत्वमिति व्यावहारिक-प्रातिभासिकयोर्विभागः ॥

इदं च नैकसत्तावादे, यतो ब्रह्मव्यतिरिक्तस्य सत्तैव तत्र नोरीक्रियते। अधिष्ठानगतसत्तासंसर्गमात्रं तु स्वीक्रियते । अस्मिन् हि मते 'इदं रजतमि'त्यादावपि रजत इदमंशसंसर्ग एवाध्यस्यते, नेदंत्वमपि । बाध्यत्वं च स्वरूपतः सत्तानिषेध एव, नतु पारमार्थिकत्वमात्रनिषेधः । सत्तात्रैविध्यमते तु घटादीनां व्यावहारिकसत्ता, शुक्तिरूप्यादीनां प्रातिभासिकसत्ता, ब्रह्मणस्तु पारमार्थिकसत्तेति तत्तत्सत्ताविशिष्टत्वेन प्रतिभासिकत्वादिकम् । मिथ्यात्वं तु पारमार्थिकत्वाभाव एव ॥

(१२) अनेन च व्यवहारकालाबाधितार्थविषयकज्ञानत्वं प्रमात्वम् । तत्क्षणबाधितार्थविषयकज्ञानत्वं भ्रमत्वम्, इति तत्तज्ज्ञानजनकत्वेन प्रमाणाप्रमाणविभागोऽपि व्याख्यातः । ब्रह्मज्ञानमपि व्यवहारकालाबाधितार्थविषयकमेवेति प्रमैव, इति तज्जनकत्वेन वेदान्तानामपि प्रामाण्यमनपोढम् । घटादेरिव ब्रह्मणोऽपि व्यावहारिकत्वमेव स्यात्, नतु पारमार्थिकत्वमित्यापत्तिस्तु नात्रावतरति । नहि घटादीनां प्रमाविषयत्वं ब्रह्मसाक्षात्कारबाध्यत्वे प्रयोजकम्, किंतु ब्रह्मणि कल्पितत्वम्, नतु ब्रह्म कुत्राप्यन्यत्र स्वस्मिन् वा कल्पितम्? इति कथं घटादिसमानता? प्रमात्वं हि चैतन्यनिष्ठं चैतन्यत्वप्रयुक्तं स्वतः सिद्धम्, नतु प्रमाणतन्त्रम्, नवा बाधितविषयत्वप्रयुक्तम्, इति न चैतन्यरूपां प्रमामादाय प्रमाणाप्रमाणविभागः, किन्तु वृत्त्यवच्छिन्नचैतन्यरूपामेव । वृत्त्यवच्छिन्नं च चैतन्यं व्यावहारिकमेव, इति वृत्तिविलयनेन विलीनं स्वरूपचैतन्यमात्रं सत् स्वत एव प्रकाशमानं ब्रह्म न स्वासिध्यर्थं प्रमाणमपेक्षते । वाचस्पतिमिश्रा हि—उपहितमेव वेदान्तप्रतिपाद्यम्, शुद्धं तु स्वत एव सिध्यतीति—मन्यन्ते । व्यक्तं चैतदद्वैतासिध्यादौ । विवरणमते तु शुद्धस्य वृत्त्या भानेऽपि शब्दजन्यस्य साक्षात्कारस्य त्रिकालाबाधितविषयकस्य व्यवहारकालाबाधितविषयकत्वमपि वर्तत एव । 'इदं रजतमि'त्यादावप्यधिष्ठानांशे प्रमात्वमनुमतमेव । तथाच न केवलं प्रमाणमात्रजन्यं प्रमात्वम्, किन्त्वप्रमाणजन्यमपि प्रमाज्ञानमंशविशेषे । अनुमानप्रमाणेन पर्वतांशे प्रत्यक्षप्रमा, शब्देन प्रमातुः प्रत्यक्षप्रमा, मनसा तु सुखादीनां प्रत्यक्षप्रमा, इति हि सत्यपि प्रमासाङ्कर्ये, प्रमाणानां तु न साङ्कर्यमिति परिभाषादिषु व्यक्तम् ॥

(१३) तथाच मिथ्याभूतेनापि व्यावहारिकेण शास्त्रेण सत्यस्य ब्रह्मणो ज्ञापनं न विरुद्धम् । नहि कारणानि सर्वाणि सत्त्वेन कारणानि ; अन्यथा सत्त्वेऽपि कारणतावच्छेदके सत्त्वान्तराङ्गीकारायोगादसत एव कारणत्वमापद्येत । तदुक्तम्—

"अन्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः ।
नान्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः ॥" इति ॥

कारणत्वं हि पूर्वक्षणसम्बन्धमात्रमेव, नतु सत्त्वघटितमपि । तथाच नान्तर्भावितसत्त्वं कारणं भवति, तदुक्तम्—

"पूर्वसम्बन्धनियमे हेतुत्वे तुल्य एव नौ ।
हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ॥" इति ।

(१४) सति चैवं शास्त्रस्य कारणत्वं न मिथ्यात्वेन, सत्त्वेन वा, किन्तु स्वरूपत एव, इति मिथ्याभूतेनापि शास्त्रेण सत्यवस्तुबोधनमविरुद्धम् । मिथ्याभूतेनापि कारणेन तदधिकसत्ताकानि कार्याणि बहुशो वयं पश्यामः । यथा स्वप्ने स्वाप्निकदर्शनेन व्यवहारिकं सुखम् । अत एव स्वप्नाध्याये भाविफलप्रतिपादनं पुराणेषूपपद्यते । सत्यं ज्ञानस्यैवात्र साधनत्वम्, नतु स्वाप्निकानामर्थानामित्यस्त्यवसरः शङ्कायाः, परंतु—"अर्थेनैव विशेषो हि निराकारतया धियामि"ति न्यायाद् अर्थविशेषितस्य ज्ञानस्य कारणत्वेऽर्थस्यापि कारणत्वमर्थासिद्धमेव । व्यक्तं चेदमद्वैतसिध्यादौ । अत एवारोपितवर्णतानां रेखाणां वर्णविशेष-पदविशेषादिप्रमितिसाधनत्वं दृश्यते । आरोपितैरेव क्षुद्रवृक्षैर्दूराद् दृश्यमानैर्महतो वनस्यानुमितिप्रमा भवति, इति मिथ्याभूतेनापि शास्त्रेण सत्यब्रह्मज्ञापनं न दोषाय ॥

(१५) वस्तुतस्तु मिथ्याभूतेन शास्त्रेण सत्यार्थज्ञापनं कथम्? इत्यनेन किं विवक्षितम्? किं मिथ्यात्वनिर्णयानन्तरं शास्त्रस्य कथं ब्रह्मप्रमापकत्वम्? किं वा ततः पूर्वमिति? आद्ये तु न शास्त्रम्, न वा प्रमा, इति न चोद्यस्यैवावसरः । द्वितीये तु न मिथ्याभूतस्यार्थक्रियाकारित्वमस्माभिरपि स्वीक्रियते । नहि शास्त्रं मिथ्याभूतं तदानीम् । मिथ्यात्वं हि परमार्थतः कालत्रयेऽप्यभाव एव, न सत्त्वाभावः, इति पारमार्थिकत्वेन तदभावेऽपि स्वरूपेण यावद्बाधं विद्यमानत्वाद् न पूर्वोक्तरीत्या प्रमासाधनत्वविरोधः । सर्वथा तु यावद्दोषनिश्चयं स्वत एव प्रमाणस्य ज्ञानमात्रसाधारण्याद् वेदान्तेषु चापरोक्षसाक्षात्कारपर्यन्तमविद्यादोषत्वानिर्णयात् स्वतः प्रामाण्यं वेदान्तानां न विरुद्धम् । स्वतो ग्राह्यं प्रमात्वं न केवलं प्रमायाः, किन्तु यावद्बाधं भ्रमज्ञानस्यापि वर्तत एव । नहीदं प्रामाण्यमबाधितार्थविषयकत्वरूपम्, किन्तु मिथ्यात्वेनानिश्चीयमानार्थविषयकत्वम्, इति वेदान्तानां यावद्ब्रह्मसाक्षात्कारं मिथ्यात्वानिश्चयाद् न स्वतःप्रामाण्यव्याहतिः । भ्रमज्ञानानां स्मृत्याश्च प्रवृत्तिप्रयोजकत्वमप्येतादृशेनैव प्रामाण्येन गृहीतेन । न ह्यन्यथोत्पत्तिमात्रेण वस्तुगत्या बाधितार्थविषयकत्वस्यैव ग्रहणे प्रवर्तकत्वं भ्रान्त्यादीनामुपपद्यते, इति सर्वाणि वेदान्तवाक्यानि षड्विधतात्पर्यलिङ्गबलान्निर्विशेषे पारमार्थिके च ब्रह्मणि स्वत एव प्रमाणमिति सिद्धम् ॥

(१६) यथाच सत्यपि सगुणवाक्यानामपि बहुनां सत्त्वे, निर्गुणवाक्यानुसारेणैव वेदान्तानां नयनम्, नतु सगुणवाक्यानुसारेण, तथा "न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि"त्यत्र सूत्रकारा एव विवेचयन्ति । "अथातो ब्रह्मजिज्ञासे"ति हि ज्ञेयमेवोपक्षिप्यते ब्रह्म, यस्य ज्ञानमात्रं स्वत एव पुरुषार्थाय कल्पते, नानुष्ठानापेक्षम् । तच्च निर्गुणमेव भवितुमर्हति, नतु सगुणम् । सगुणं हि ब्रह्मोपास्यततयैव तत्र तत्र निर्दिश्यते । नान्तरेणानुष्ठानं सगुणब्रह्मणो ज्ञानमात्रं पुरुषार्थाय प्रभवति । सत्यम् "अथातो धर्मजिज्ञासा" इति सूत्रे जिज्ञासापदमनुष्ठानापेक्षया पुरुषार्थसाधनं ज्ञानं प्रतिपादयति, परन्तु गौण-मुख्ययोर्मुख्य एव कार्यसंप्रत्ययः सति सम्भवे, इति प्रकृते गौणार्थविवक्षा नोपपद्यते । "तरति शोकमात्मवित्" "ब्रह्मविदाप्नोति परम्" इत्यादिवाक्यानि च ज्ञानमात्रेण मोक्षप्रतिपादनपराण्यपि ज्ञानप्राधान्यपक्ष एव स्वरसानि, नतूपासनाप्राधान्यपक्षे ॥

निर्गुणविचारस्यैव प्रतिज्ञायामपि मानसज्ञानत्वसामान्यात् प्रसङ्गादुपासनाविशेषपराण्यपि वाक्यानि विचार्यन्ते। ब्रह्मसाक्षात्कारानन्तरमेव चैतन्यमात्रावशेषेऽपि यावत्साक्षात्कारं जीवेश्वरादिभेदस्यानुवर्तमानत्वात् कर्मवाक्यान्युपासनावाक्यानि च यथासम्भवमनुष्ठानपर्यवसायीनि व्यवस्थापनीयानि। नहि ब्रह्मसाक्षात्कारः सर्वेषां तज्जन्मन्येवेति नियमः। सत्यं केचन पुरुषधौरेया इहैव जन्मनि जातमात्रा एव विना कर्मविचारम्, विनोपासनाविचारम्, विना च तदनुष्ठानं ब्रह्मभावमर्हन्ति। न हि तानुद्दिश्य ब्रह्ममीमांसाया-मुपासनादिविचारः सप्रयोजन इति पश्यामः। उपासनामार्गनिष्ठा अपि हिरण्यगर्भलोकादिप्राप्तिद्वारा तेन सह ब्रह्मभावं प्राप्नुवानाः केचन भविष्यन्ति। नचैतत्केनापि निर्द्धारयितुं शक्यम्—यत् कुत्र जन्मनि मुक्तिः स्वस्य भविष्यति? प्रारब्धानि कर्माण्युपभुज्यैव हि मुक्तिर्नाम। सति चैवं कर्मदेवभावप्राप्त्यनन्तरम्, इन्द्रादिभावप्राप्त्यनन्तरम्, हिरण्यगर्भादिलोकप्राप्त्यनन्तरं वाऽत्रैव वा मुक्तिरिति निर्णयाभावाद् यथाशक्ति सगुणोपासनान्यनुतिष्ठन्तोऽपि ब्रह्ममीमांसायां गौणाधिकारिणो भविष्यन्ति, इति परम्परया निर्गुणभावोपयोगित्वादपि सगुणोपासनान्यपि नात्र न विचारमर्हन्ति। सगुणोपासनस्यापि विषयश्चैतन्यमेव। निर्गुणमेव चैतन्यं कल्पितैस्तत्तादृशैर्गुणैः सगुणं नाम, नतु सगुणं नाम परमार्थतो भिन्नं ब्रह्मान्तरमिति सूचनं तु निर्गुणब्रह्ममीमांसाप्रकरण एव सगुणब्रह्मविचार एव सम्भवति। नान्यत्र तु सगुणवाक्यानां प्रसङ्गलेशोऽपि। यथाहि निर्गुणे सगुणस्य पर्यवसानम्, नैवं सगुणे निर्गुणस्य, इति सगुण-निर्गुणोभयविधब्रह्मनिरूपणमपि ब्रह्ममीमांसायामेव सङ्गतम्; अन्यथा सगुणब्रह्मणोऽन्यत्र विचारे ब्रह्मान्तरशङ्का समापद्येत। *एतेन*—देवताधिकरणमपि—*व्याख्यातम्*; कर्मणा देवभावोऽपि न पर्यवसितपुरुषार्थः, यतो देवा अपि वयमिव साधकावस्थायामेव वर्तन्ते। तथाच यजनीया उपासनीयाश्च सर्वेऽधिकारिकोटिमेवार्हन्ति, न फलकोटिम्, इति सादरमेवाऽऽसत्यलोकं वैराग्यमभ्यसनीयम्। इदमेव च देवताधिकरणस्य प्रयोजनम्॥

(१७) "नेतरोऽनुपपत्तेः" इति तत्र तत्र भेदनिर्देशोऽपि न साधकावस्थायामधिकारितावस्थायां वा जीव-ब्रह्मभेदः, किंतु तुरीयावस्थायाम्, इति सूचनेनोपासनादिविधयो न ब्रह्माभिन्नं जीवमाधिकृत्य प्रवृत्ता इति सूचयति। नह्येतावता पारमार्थिकमेव भेदं सूत्रकारा मन्यन्त इति कल्पना सावसरा। *अयमाशयः*—अद्वैतिनो हि जीव-ब्रह्मणोर्विगतोपाधिकयोः शुद्धचैतन्यभावेनैवाभेदं व्यपदिशन्ति, नतु जीवत्व-ब्रह्मत्वोपाधिसम्बन्धेनापि। तदत्र सूत्रकारा यदि न कुत्रापि निर्विशेषवाक्यविचारपरे सूत्रे जीव-ब्रह्मणोर्जीवेश्वरयोरीश्वर-ब्रह्मणोर्वा भेदं व्यपदिशन्ति, कथमेतावता विरोधो निर्विशेषपरतायाम्। नहि कुत्रापि ब्रह्ममीमांसायां शुद्धचैतन्यभावेन भेदव्यपदेशो वर्तते। "भेदव्यपदेशाच" "नेतरोऽनुपपत्तेः" इत्यानन्दमयजीवतापक्षे तदीश्वरतापक्षे वा जीवत्वोपाधिविवक्षयैवानन्दमयाद् विज्ञानमयाद्वा पुच्छब्रह्मणो निर्विशेषस्यानन्दमयपदबोध्यस्य वा भेदं व्यपदिश्यमानं प्रतिपादयति। नचैतदद्वैतवादस्य विरुद्धम्॥

तदयं निष्कर्षः—सत्यं "तत्त्वमसी"ति जीव-ब्रह्मणोरभेदो बोध्यते, स च न तत्त्वंपदवाच्यार्थोपाधिना, किन्तु लक्ष्यार्थोपाधिना। सति चैवं जीव-ब्रह्मणोः सामानाधिकरण्यं जीवाभासतावादे बाधायां सामानाधिकरण्यम्, यत्र जीवस्यापि बाधः। मतान्तरे तु न स्वरूपबाधप्रयुक्तं बाधायां सामानाधिकरण्यम्, किन्त्वभेद एव। उपपादितं चैतद् वेदान्तसारे-सम्बन्धत्रयेण तत्त्वमस्यादिवाक्यानामखण्डार्थत्वम्। सम्बन्धत्रयं च सामानाधिकरण्यं च विशेषण-विशेष्यता लक्ष्य-लक्षणभावश्चेत्यादि, तत एवावगन्तव्यम्।

सति चैवं भेदव्यपदेशः, इतरव्यपदेशाधिकरणादिकं च सर्वं कथमद्वैतस्य विरोधि ? *एतेन*—"अधिकं तु भेदनिर्देशादि"ति सूत्रमपि—*व्याख्यातम्* ; अनेनापि शुद्धचैतन्यस्येश्वरस्य वा जीवत्वोपाधिना भेद एव प्रतिपाद्यते। वस्तुतस्तु निर्विशेषस्वरूपनिरूपणपरेषु "न स्थानतोऽपी"त्यादिषु "भेदादिति चेन्न, प्रत्येकमतद्वचनादि"ति भेदनिषेधमेव पश्यामः। भेदनिर्देशो भेदनिषेधश्चोभयं तु पूर्वोक्तरीत्यैव निर्वहति। यथा च "अंशो नाना व्यपदेशादन्यथाऽपि दाशकितवादित्वमधीयत एके"इत्यादिसूत्राण्यपि भेदकल्पनायामभेदपारमार्थिकतायां चानुगुणानि, तथाऽद्वैतमार्तण्डादौ व्यक्तमिति नेह प्रपञ्च्यते ॥

किञ्च भेदव्यपदेशान्यथानुपपत्त्या किं शरीर-शरीरिभावो विवक्ष्यते ? उतात्यन्तिकभेदमात्रम् ? आद्ये तु शरीर-शरीरिभावस्य भेदाभेदनिबन्धनत्वात् कथम्—"नेतरोऽनुपपत्तेः" "भेदव्यपदेशात्" इत्यादिकं शरीर-शरीरिभावस्यापि न व्याघातकम् ? उत्तरत्राभेदस्यापि "अंशो नाना व्यपदेशात्" इत्यादिषु प्रतिपादनाद् यदि तदविरोध्येव भेदोऽत्र विवक्ष्यते, तर्हि कथमद्वैतस्यापि भेदव्यपदेशमात्रं व्याघातकम् ? नहि शरीर-शरीरिभावप्रयुक्त एवाभेदो भेदाविरोधी, नतु कार्य-कारणभावप्रयुक्त इत्यत्रास्ति किमपि प्रमाणम्, उपपद्यते वा सा कल्पना। नहि मृद्घटयोरिदं-रजतयोर्वा भेदाभेदप्रयुक्तं सामानाधिकरण्यं केनापि वारयितुं शक्यते। सति चैवं "जन्माद्यस्य यतः" इति जिज्ञास्यब्रह्मणः कार्य-कारणभावेनैव लक्षितत्वात् शरीर-शरीरिभावेनालक्षितत्वात् कार्य-कारणभावप्रयुक्तावेव भेदाभेदौ सूत्रेषु निर्दिश्येते। कुत्रचन शरीर-शरीरिभावावगमस्त्वन्तर्यामिब्राह्मणादिषूपासनाविशेषं तेन रूपेण कर्तव्यमेव गमयति ॥

वस्तुतस्तु शरीर-शरीरिभावनिबन्धनमपि सामानाधिकरण्यम् "अहं स्थूलः" इत्यादिरूपं बाधायामेव ; शरीर-शरीरिभावस्यापि कल्पितत्वात्, इति शरीरात्मनोरप्यधिष्ठानाधिष्ठेयभावाख्यकार्य-कारणभावप्रयुक्तमेव सामानाधिकरण्यम्, इति शरीर-शरीरिभावप्रयुक्तं सामानाधिकरण्यमपि कथं शरीरस्थानीयानां स्थूल-सूक्ष्म-चिदाचित्प्रपञ्चानामधिष्ठानब्रह्मस्वरूपातिरिक्तस्वरूपान्तरसत्त्वे प्रमाणं भविष्यति ?

(१८) इदमत्रालोचनीयम्—"जन्माद्यस्य यतः" इति सूत्रविवक्षितः कार्य-कारणभावः कीदृशः ? किं केवलनिमित्तकारणत्वमात्रं वैशेषिक-नैयायिक-पातञ्जल-पाशुपत-श्रीमाध्वादिसम्मतम् ? उताभिन्ननिमित्तोपादानत्वरूपं शुद्धाद्वैत-द्वैताद्वैत-विशिष्टाद्वैताभिमतम् ? केवलाद्वैतव्यवस्थापितं वेति ? निमित्तकारणत्वमात्रं हि ब्रह्मणः केवलानुमानगम्यत्वपक्ष एव संभावयितुं शक्यते, नतु तस्य श्रुतितात्पर्यानुसरणे। आनुमानिकेश्वरकारणतावादस्तु वैशेषिक-नैयायिक-पातञ्जल-पाशुपतानां "पत्युरसामञ्जस्यात्" इत्यधिकरण एव निरस्तः, इति द्वैताद्वैत-विशिष्टाद्वैत-शुद्धाद्वैत-केवलाद्वैतवादिनः सर्व एव मन्यन्ते ॥

श्रीमाध्वानुयायिनस्तु "पत्युरसामञ्जस्यादि"ति परमात्मनो रुद्रत्वपक्षमेव सूत्रकारा अनेनाधिकरणेन निवारयन्ति, नतु तन्निमित्तकारणत्वमात्रवादम्, इति नोक्तमधिकरणं निमित्तकारणतामात्रपक्षविरोधि। "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति सूत्रं तु ब्रह्मणो निमित्तकारणस्यासहायत्वमेव बोधयति, नतु कारणाभेदं कार्यस्य, इति नेदमधिकरणं स्वसिद्धान्तविरोधि। "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्"इति सूत्रमपि पदसमन्वयपादगतत्वात् प्रकृतिपदस्य परमात्मनि प्रवृत्तिमेव व्यवस्थापयति, नतु परमात्मन उपादानकारणत्वं परिणामित्वरूपं विवर्तमानत्वरूपं वा। "जन्माद्यस्य यतः" इति सूत्रे

"यतः" इति पञ्चमीनिर्देशस्तु हेतावेव, नोपादानकारणत्वे हेतुत्वविशेषे। जायतेपदमात्रसमभिव्याहारे हि पञ्चमी प्रकृतित्वापरपर्यायमुपादानत्वं बोधयेत्। अत्र तु जन्मादीत्यादिपदप्रयोगान्न जन्ममात्रकारणत्वं प्रतिपाद्यते, किंतु स्थिति-लयादिकारणत्वमपि। नहि स्थितिमपेक्ष्य श्रुतावपि पञ्चमी प्रयुज्यते। "येन जातानि जीवन्ती"ति तृतीयैव खलु तत्र दृश्यते। नवा लयमपेक्ष्य; "यत्प्रयन्ती"ति द्वितीयान्तमेव हि यत्पदं तत्राम्नायते। सति चैवं कथं "जन्माद्यस्य यतः" इति न हेतुमात्र एव पञ्चमी? केवलाद्वैतिनोऽपि "यतः इति हेतुनिर्देशः" इति वदन्तोऽत्रानुगुणा एव, इति कथं ब्रह्मोपादानत्वं सूत्रारूढम्? उपादानत्वं हि ब्रह्मणो विशिष्टस्यैव वक्तव्यम्, न तु शुद्धस्य; निर्धर्मकत्वात्। तत्रच न विशेष्यांशस्य परिणामित्वम्; निरवयवत्वात्। निरवयस्यापि परिणामित्वकल्पनायां तु नोपपत्तिं पश्यामः। नहि निरुपपत्तिः श्रुतिः प्रतिज्ञामात्रेणार्थं साधयति। विशेषणपरिणामित्वेन विशेष्यस्यापि परिणामित्वव्यपदेशो नामान्तरेण ब्रह्मकेवलनिमित्तकारणतावाद एव। गौणो हि तत्कारणत्वव्यपदेशः, न मुख्यः। अत्रहि मते ब्रह्मणो नामान्तरेणाकारणत्वमेव व्यवस्थाप्यते, इति कथं जन्मादिसूत्रं ब्रह्मलक्षणपरं स्यात्? ब्रह्मविशेषणस्य प्रकृतेः खलु कारणत्वं मुख्यो धर्मः, न ब्रह्मणः। अपृथक्सिद्धत्वात् प्रकृति-ब्रह्मणोर्ब्रह्मधर्मत्वेनापि व्यपदेश इति कल्पना तु न संभवति; नहि रूप-घटयोरपृथक्सिद्धिरिति रूपत्वमपि घटे पश्यामः। न ह्यन्यधर्मोऽन्यलक्षणम्; अव्यावर्तकत्वात्। परिणामिकारणत्वं हि न ब्रह्मण्येव, किन्तु प्रकृतावपीति कथमितरभेदो नाम? ब्रह्मण एव परिणामित्वमिति द्वैताद्वैत-शुद्धाद्वैतमतयोस्तु सत्यं जगत्कारणत्वं नेतरसाधारणमिति नेतरभेदानुपपत्तिः; तथाऽपि निरवयवब्रह्मपरिणामितावादो मम माता वन्ध्येतिवादवद् व्याहतार्थ इति जानीमः। ब्रह्मविवर्तमानतावादस्तु स्वकपोलकल्पनामात्रमिति "जन्माद्यस्य यतः" इति सूत्रं ब्रह्मकेवलनिमित्तकारणतावाद एव स्वरसम्। सर्वाणि ब्रह्मसूत्राणि तदविरोधेनैव नेयानीति श्रुतीनामपि तत्रैव पर्यवसानम्। नहि वयमपि ब्रह्मानुमानादिगम्यं पाशुपतागमादिगम्यं वा वदामः, किन्तु शास्त्रयोनि। "तदैक्षत बहु स्यां प्रजायेय" इति ब्रह्मण इतरभावसंकल्पस्तु मन्त्रिणो राजभावसंकल्पवद् गौण एव, नतु मुख्यः, इति न कोऽपि विरोधः। सर्वथा तु ब्रह्मकेवलनिमित्तकारणतायामेव ब्रह्ममीमांसोपनिषदादितात्पर्यमिति केवलद्वैतवादिनो मन्यन्ते। "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति" इति केवलभेदज्ञानाद् मुक्तिप्रतिपादनमस्मिन्नेव मत उपपद्यते। न ह्यस्मिन् मते कर्मकाण्डस्योपासनाकाण्डस्य ज्ञानकाण्डस्य वा कस्यापि निरर्थकत्वम्, इति केवलद्वैतमतमेव श्रुतिसूत्राद्यनुगतम्, नापराणि मतानीति तदीयं हृदयम्॥

अन्ये तु मन्यन्ते—न सूत्रकारा ब्रह्मकेवलनिमित्तकारणतामात्रावलम्बिनः, किन्त्वभिन्ननिमित्तोपादनतामेवावलम्बन्ते। न ह्यन्यथा—'न विलक्षणत्वादस्य तथात्वं च शब्दात्" इति कार्यकारणयोर्वैलक्षण्यानुपपत्तिः प्रयुक्ता सूत्रकाराणामुपपद्यते। नहि निमित्तकारणस्य दण्डस्य, कुलालादेर्वा कार्येण सालक्षण्यं पश्यामः। सत्यं वेदाप्रामाण्यशङ्कानिरासपरमिदमधिकरणमिति केवलद्वैतिनो व्याचक्षते; परंतु नेदं विवरणं सोपपत्तिकं सप्रयोजनं वा। 'शास्त्रयोनित्वादि"ति हि वेदप्रामाण्यं स्पष्टमेवोपक्षित्वं सूत्रकारेण। "अत एव च नित्यत्वमि"ति वेदापौरुषेयत्वमेव पूर्वमेव व्यवस्थापितम्, इति कथं वेदाप्रामाण्यशङ्काया उत्थितिरपि? तदुक्तं केवलद्वैतभाष्ये देवताधिकरणे—"वाचा विरूपनित्यये"ति श्रुतेराप्त्यनिश्चयाद् नित्यत्वापेक्षत्वाच्च मूलप्रमाणस्य स्वतः प्रामाण्यसिद्धेश्च नित्यत्वाद्वेदस्ये"ति।

नाविलक्षणत्वाधिकरणेऽपि नित्यत्वेनैव वेदप्रामाण्यं व्यवस्थाप्यते, इति कथं न नविलक्षणत्वाधिकरणावैयर्थ्यं केवलद्वैतमते ? एतेन—"कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा" इत्यादिसूत्राण्यपि—व्याख्यातानि ; अत्र कृत्स्नप्रसक्त्यापादनमुपादानत्वमभिप्रेत्य, इति सर्वेऽप्यन्ये भाष्यकारा मन्यन्ते । केवलद्वैतभाष्यकारास्तु जीवकारणत्वे दोषप्रदर्शनपरतया श्रुतिमूलकत्वेन निरवयवकारणत्वव्यवस्थापनपरतयाऽमूनि व्याचक्षते । इदं च "जन्माद्यस्य यतः" "शास्त्रयोनित्वादि"त्यत एव सिद्धम्, इति व्यर्थमेवाधिकरणं तन्मते । एतेन "आत्मकृतेः परिणामात्" इत्यादिसूत्राण्यपि क्लिष्टकल्पनयैव केवलद्वैतभाष्यकारैर्योज्यमानान्यपि नितरां विरुद्धानि ब्रह्मकेवलनिमित्तकारणतावादे ? किञ्च केवलनिमित्तकारणस्य ब्रह्मणोऽनुमानेनैव साधनसंभवात् शास्त्रयोनित्वादिसूत्रमपि तन्मते व्यर्थम् । नहि फलतः कोऽपि विशेषो वैशेषिकादिमतात् केवलद्वैतमतस्य । सति चैवम्—"तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यादिसूत्राण्यपि ब्रह्मोपादानतापक्षस्यैवानुगुणानि । अनन्यत्वं हि अन्यराहित्यमेव, न सहायराहित्यम्, न वा निमित्तकारणतयाऽभिमतं ब्रह्म जीवादृष्टादिसाहाय्यमपि प्रपञ्चसृष्टौ नापेक्षते, नवा प्रकृतिं स्वाधिष्ठेयामुपादानकारणं च, इति कथमसहायत्वं ब्रह्मणः संभवति ? "प्रकृतिश्च प्रतिज्ञा-दृष्टान्तानुपरोधादि"त्यत्रत्यप्रतिज्ञा-दृष्टान्तानुपरोधः, अत्रत्यारम्भणशब्दादिश्चैक एव, इति न्यायैकत्वाद् उपादानत्वव्यवस्थापनपरतया योजनमेवाधिकरणद्वयस्यापि वक्तव्यम् । अनन्यत्वं नामाभेद एव स्वारसिकः, नतु बहुव्रीहिसमासकल्पनया क्लिष्टकल्पनम् । सत्यं प्रकृतिपदस्य ब्रह्मणि समन्वय एव "प्रकृतिश्चे"ति सूत्रतात्पर्यविषयः, सोऽपि तु प्रकृतिपदमुख्यार्थोपादानत्वादिसमन्वयं विना कथं नाम घटते ? "योनिश्च हि गीयते"इति योनित्वं ब्रह्मणो न निमित्तकारणत्वमात्रमिति गमयति ; अन्यथा प्रकृतिपदार्थस्यैव ब्रह्मणि समन्वये विवक्षिते निमित्तकारणस्यैव सतो योनित्ववर्णनमत्र नोपपद्येत । "आत्मकृतेः परिणामात्"इत्यादीन्यपि न निमित्तकारणतामात्र उपपद्यन्ते । नहि निमित्तकारणमात्मानमेव कुर्वत् सत् परिणामयति । सति चैवम्—"जन्माद्यस्य यतः" इति सूत्रे "यतः" इति पञ्चम्यपि हेतुत्वबोधिकाऽप्युपादानत्वमपि ब्रह्मणो बोधयत्येव । इदं हि सूत्रं "यतो वे"ति वाक्यमारभ्य प्रवृत्तां सर्वामपि भृगुवल्लीमत्र विषयवाक्यतया निर्दिशति । तथाच—"यतो वे"ति प्रथमवाक्येन पञ्चम्योपादानमात्रबोधनेऽपि "तदैक्षते"त्यादिवाक्यसन्दर्भेण तस्यैवेक्षणकर्तृत्वोल्लेखात् प्रकरणस्याभिन्ननिमित्तोपादानसमर्पणात् तत्तात्पर्येणैव प्रवृत्तत्वात् प्रकरणार्थसंग्रहं मनसि निधायोभयविधमपि हेतुत्वं विवक्षितम्, इत्यभिप्रायेणैव शङ्करभगवत्पादानाम्—"यत इति कारणनिर्देशः" इति भाष्यम् ॥

प्रकृतिविशिष्टमेव ब्रह्म स्थूलप्रपञ्चविशिष्टब्रह्मभावं प्राप्नोति, इति विशिष्टयोर्ब्रह्मणोरेव मुख्यः कार्य-कारणभावः, इति न पृथक्सिध्यर्हयोः प्रकृति-ब्रह्मणोः परिणामिकारणाद्यंशेऽपि भावः संभवति । नेदृशमभिन्ननिमित्तोपादानत्वं ब्रह्मण्यमुख्यम्, नवा जगत्कारणत्वस्याव्यावर्तकत्वमिति न कोऽपि दोषः । न ह्येकमप्यधिकरणं ब्रह्मनिमित्तकारणतामात्रपक्षानुगुणं वर्तते, इति सर्वसम्मतमिदम् । बहूनि हि सूत्राणि केवलद्वैतभाष्यकारैः सर्वेषामपि भाष्यकाराणामविषयाणि श्रुतिवाक्यान्यधिकृत्य प्रवृत्तानीति मन्यन्ते । बहवश्च माल्लवीयादयः श्रुतयोऽश्रुतपूर्वाः, अप्रत्यक्षाश्च सर्वेषामपि दार्शनिकानामपरेषाम्, विषयवाक्यगतपदविशेषाणां वाक्यार्थनिर्णयादौ स्वोपष्टम्भकतया तैराश्रीयन्ते, इति कथं ब्रह्मसूत्राणि केवलद्वैतपराणि ? निमित्तकारणमात्रब्रह्मपराणि वा ? किन्तु विशिष्टब्रह्माभिन्ननिमित्तोपादानतावाद एव समुचित इति श्रीविशिष्टाद्वैतमतानुयायिनः ॥

शुद्धाद्वैत-द्वैताद्वैत-केवलाद्वैतवादिनस्तु ब्रह्मणः केवलस्यैवोपादानत्वम्, नतु विशिष्टस्य । तत्रापि श्रुति-प्रामाण्याद् ब्रह्मणः परिणामित्वमिति शुद्धाद्वैतमतम्, केवलाद्वैतमतं तु विवर्तोपादानत्वमेव वस्तुगत्या, परिणामित्वं तु कृत्वाचिन्तयेति । श्रुत्यर्थसमन्वयो हि नियतकर्तव्य इति सर्वसम्मतमिदम् । यदि स निर-वयवत्वाविरोधेन विवर्तमानत्वेन निर्वहति, किमिति तर्हि लोकन्यायविरुद्धमविकारिपरिणामवादेन तत्समन्वयः कर्तव्यः ? नहि परिणामित्वेनैव कारणस्य कार्येषु समन्वयः, इति शुद्धाद्वैतिनोऽपि स्वीकर्तुमर्हन्ति । शुक्तिरूप्यादौ सत्तानुवेधो हि विनाऽपि ब्रह्मपरिणामित्वं तैरपि स्वीक्रियते । नाहि तन्मते शुक्ति-रूप्यमपि ब्रह्मोपादानकम्, किन्त्वन्तःकरणस्यैव शुक्तिरूप्यादिकं परिणामः । सति चैवम्—"तत्तु सम-न्वयादि"ति सूत्रं घटादिषु सत्तानुवेधाद् ब्रह्मपरिणामिकारणतासाधकमिति न सङ्गतमिदं योजनम् । यथा चैतन्मते तदनन्यत्वाधिकरणाद्यनौचित्यम्, तदस्वारस्यं वा, तदनुपदमेव व्यक्तीकरिष्यते ॥

अत्र च प्रसङ्गे विवरण (९०८-पृष्ठ) गतानि केवलब्रह्मपरिणामवादनिरासपराणि वाक्यानि समा-लोचनमर्हन्ति ।

> "केचित्तु—ब्रह्मैव जगदाकारेण परिणमते मृदिव घटाकारेणेति—वदन्ति, तन्न ; विवर्तकारणत्वाद् ब्रह्मणः । एकस्य तत्त्वादप्रच्युतस्यासत्यानेकरूपावभासो विवर्तः । एकस्य पूर्वरूपपरित्यागेन सत्यरूपान्तरापत्तिः परिणामः । तत्र ब्रह्म न विवर्तते, किन्तु परिणमत एवेति तैस्तत्र प्रमाणं वक्तव्यम् । सृष्टिश्रुतेः परिणमत इति चेत्, सा खलु सृष्टिश्रुतिः ज्ञानानन्द-सत्य-निरवयवापरिच्छिन्न-ब्रह्मस्वरूपस्य पूर्वसिद्धस्य परित्यागेन जड-दुःख-मिथ्या-सावयव-परिच्छिन्नकार्यापत्तिं ब्रह्मणो ब्रवीति ? आहोस्वित् पूर्वसिद्ध-रूपापरित्यागेनैव तद्विपरीतकार्यरूपापत्तिं ब्रह्मणो ब्रवीति ? इति वक्तव्यम् । तत्र पूर्वरूपपरित्यागे ब्रह्मस्वरूपोच्छेदात् कार्यमात्रमेव स्यात् । पुनः प्रलयावस्थायां ज्ञानानन्दादिरूपेण परिणमत इति चेत्, अनिर्मोक्षप्रसङ्गात् । अत्र "आत्मा महान् ध्रुवः" "न जायते चे"त्यादिश्रुतिविरोधश्च स्यात् । अथ पूर्वविपरीत-ब्रह्मस्वरूपापरित्यागेनैव कार्यरूपापत्तिं ब्रूयात् सृष्टिश्रुतिः, एवं तर्हि विवर्तं प्रतिपाद-यति ; शुक्तिकारजत-मायाव्याघ्रादिषु विवर्तस्य तल्लक्षणत्वात् । अथ सृष्टिश्रुतिः सृष्टिमात्रविषया, न पूर्वस्वरूप-परित्यागयोर्व्याप्रियत इति चेत्, तथाऽपि व्यवस्थित-ब्रह्मवाक्यैरेकत्वात् तत्स्वरूपापरित्यागेनैव कार्यरूपापत्तिं ब्रह्मणो ब्रुवाणा विवर्तमेव दर्शयतीत्यनवद्यम् ॥ योऽपि कश्चिदाह निरवयवमपि परिणमत इति । तथाहि—हेमद्रव्ये रुचकाकारेण परिणममाने तदवयवा अपि परिणमेरन् ? नवा ? इति वक्तव्यम् । यदि परिणमेरन्, तर्हि तदवयवा अपि तथा, इति निरवयवपर्यन्तः परिणामः स्यात् । अथ न परिणमेरन्, तर्ह्यवयवी न परिणमेत ; आश्रय-विकारमन्तरेणाश्रितविकारायोगात् । तस्माद् यथा संयोगोऽवयव्येकदेशसमवेतः परम्परया निरवयवपरमाणुसंयोगपुरःसरः, तथा निरवयवपरिणामपुरःसरोऽवयवि-परिणाम इति ॥
>
> स वक्तव्यः—कश्चायं परिणाम इति ? यदि तावत् स्वावयवानां पूर्वसंयोगात्

संयोगान्तरापत्त्या वाऽवयवान्तरसंयोगेन वा संमूर्च्छितावयवत्वं परिणामः, न तर्हि निरवयवे परिणामः ; स्वावयवाभावान्निरवयवस्य । नचावयवानां संयोगान्तरेण संमूर्च्छितत्वमन्तरेणावयविनः परिणामोऽवस्थान्तरं वाऽन्यथाभावो वा निरूपयितुं शक्यते । नच वस्तुनो वस्त्वन्तरसंयोगो वा परिस्पन्दो वा गुणान्तरोदयो वा परिणामः ; ब्रह्मणि तेषामभावात् । आकाशे च वस्त्वन्तरसंयोगिनि, परिस्पन्दमाने च भ्रमरे, लौहित्योदये च घटे द्रव्ये परिणामबुद्ध्यभावात् । अथ तदनुषक्तद्रव्यान्तरोत्पत्तिः परिणाम इति, तत्र किं हेमावयवानां रुचकरूपेणैव परिणामः ? किं वा द्रव्यान्तररूपेण ? न तावद् द्रव्यान्तररूपेण ; तत्र रुचकद्रव्यातिरिक्तकार्यद्रव्यादर्शनात्, नापि रुचकाकारेणैव ; तस्यावयविपरिणामत्वात्, अवयवानां च रुचकानुगमस्य रुचकानुगतावयव्यनुगमेनैवान्यथासिद्धत्वात् । नच रुचकावस्थाव्यतिरेकेण हेमावयवानामवस्थान्तराणि दृश्यन्ते, येन परिणामभेदः स्यात् । नच संयोगभेद एवावयवपरिणाम इत्युक्तम् । नचावयवि द्रव्यं विना हेमावयवा रुचकाकारेण परिणमन्त इति युक्तम् ; आरम्भवादप्रसङ्गात् । अथादृश्यमानोऽप्यवयवपरिणामोऽवयविपरिणामानुपपत्त्या कल्प्यते ; आश्रयविकारमन्तरेणाश्रितविकारानुपपत्तेः, *नैतत्सारम्*; अवयविजन्म-विनाशयोरवयवानामपि तत्तन्त्राणां जन्म-विनाशप्रसङ्गात्, अवयविगमनेऽवयवानां गमनवत् । परिणामोऽपि भविष्यतीति चेत्, न ; अवयविनि घटत्वजातिसमवायेन्यवयवानां घटत्वजातिसमवायाभावात् । *ननु* अवयवानामन्यथाभावमन्तरेण कथमवयविनोऽन्यथाभावः ? न हि द्रव्यस्यावस्थान्तरद्रव्यान्तरापत्तिवद् नैल्यं गुणान्तरमापद्यतेऽवस्थान्तरं वा। नचावयविकार्यव्यतिरेकेणावयवानां कार्यं दृश्यत इत्युक्तम् । न हि पटे कार्यान्तरावभासेऽपि तन्तवोऽतन्त्वात्मनाऽवभासन्ते । पटकार्ये तन्त्वनुगमः स्वानुगतानुगमादन्यथासिद्ध इत्युक्तम् । किंचावयविपरिणामोपाधावेवावयवपरिणामो दृष्टः, इति न निरुपाधिनिरवयवात्मपरिणामसिद्धिः ।। यत्तु निरवयवसंयोगवत्परिणाम इति, तत्रापि दृश्यमानोऽवयविसंयोगो न परमाणुसमवेतः ; तद्गतरूपादिवदप्रत्यक्षत्वप्रसङ्गात् । नाप्यवयव्येकदेशसंयोगेन निरवयवे संयोगः कल्पयितुं शक्यते ; अवयविन्येव जातिसमवायवदवयवसंयोगमन्तरेणावयविन्येव संयोगोपपत्तेः । अवयवानां संयोगानुगमस्यावयव्यनुगमेनान्यथासिद्धत्वात् । अवयवेष्वेव संयोगो नावयविनीति चेत्, न ; अवयविभ्यामसंयुक्ताभ्यां कार्यान्तरानारम्भप्रसङ्गात् । तस्मादवयविन्येव संयोगः, नावयवेषु । अवयविसमवाये संयोगस्य, कृत्स्नवृत्तिता संयोगस्य प्राप्नोतीति चेत्, तर्हि निरवयवसंयोगेऽपि कृत्स्नवृत्तेः प्रचयाभावप्रसङ्ग इति । कथं पुनर्ब्रह्मणो निरवयवत्वलाभः ? उच्यते ; अवयवावयविनोः स्वयंप्रकाशत्वे सतीतरेतराविषयत्वान्न सावयवत्वं ब्रह्मणा स्वात्मन्यनुभवितुं शक्यम् । अन्यतरस्यास्वयंप्रकाशत्वेऽन्यतरेण वेद्यत्वाद् घटात्मनोरिव नांशांशिभावसिद्धिः । श्रुतिश्च

"निष्कलं निष्क्रियं शान्तमि"ति क्रियावत्त्वशून्यतामाह । नियन्तृत्वादिक्रियाऽपि श्रूयत इति चेत्, तर्हि परस्परविरोधे सति मायया तत्त्वातत्त्वव्यवस्था कल्पनीया । "मायाभिः पुरुरूप ईयते" इति प्रवृत्तेर्मायानिबन्धनत्वश्रवणात्, चेतनस्य सुषुप्ते पुरुषार्थत्वावगमात्, ब्रह्मणः स्वतः प्रवृत्तिप्रयोजनाभावाच्च विपरीतस्वरूपापरित्यागेन विपरीतकार्यापत्तेश्च विवर्त एवेति सिद्धम्" इति ॥

"मृत्तिकेत्येव सत्यम्" इति मृत्तिकादृष्टान्तस्तु न विवर्तवादविरोधी । नहि ब्रह्मसाक्षात्कारपर्यन्तं घटादीनां विवर्तत्वं निर्धारितम्, इति व्यावहारिकेष्वपि कार्यमात्रमिथ्यात्वोपपादनार्थं न मृत्तिकोदाहरणं विहायाऽस्ति काऽपि गतिः। ब्रह्मपरिणामित्वे हि घटादीनां मृदादेश्चैकरूपमेव सत्यत्वम्, इति "मृत्तिकेत्येव सत्यमि"ति मृत्तिकामात्रसत्यत्ववर्णनं कथमुपपद्यते ? वाचारम्भणवाक्यं च मतान्तरेषु क्लिष्टकल्पनाभिरन्यथा नीयते । स्वरूपव्याक्रियैव पराक्रियेति न्यायेन तदीयां प्रक्रियामत्र निर्दिशामः ॥

"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि"ति श्रूयते ॥ वाचा=व्यवहार-व्याहारोभयार्थम्, विकारो घटादिः, नामधेयं संज्ञा च स्पृश्यते । "मृन्मयमि"ति पूर्ववाक्यादनुषज्यते । तथाच "घटादिकं मृत्तिके"त्येव सत्यम्=प्रमितामि"ति वाक्यार्थवर्णनेन—अन्ये मृद्-घटयोरिव परिणामि-परिणामयोरभेद एवोक्तश्रुत्यर्थ इति वर्णयन्ति । अत्र "मृत्तिकापदं कारणब्रह्मोपलक्षणम्, मृन्मयपदं तु कार्यसामान्योपलक्षणम्, इति जगद्-ब्रह्मणोरभेदसाधनं क्रियते, इति तदाशयोऽपि तदीये ग्रन्थे विशद एव ॥

इदमेवात्रालोचनीयम्—यद् मृद्-घटयोरिव ब्रह्म-प्रपञ्चयोरेकद्रव्यत्वं किं तन्मतम् ? उत नेति ? आद्ये ब्रह्मविकार्यत्वापत्तिः । द्वितीये तच्छरीरसूक्ष्मचिदचितोः स्थूलचिदचितोश्चैकद्रव्यत्वसाधनेन यदि तद्-द्वारैकविज्ञानेन सर्वविज्ञानं साध्यते, तर्हि न केवलं क्लिष्टकल्पना, किन्तु दृष्टान्तास्वारस्यमपि । स्वतःपरिणममानमृत्तिकादृष्टान्तेन परिणममानप्रकृतिशरीरकब्रह्मपरीक्षणे हि कथं तद्दृष्टान्तस्वारस्यम् ? अतः स्वयमनुवर्तमानब्रह्मरूपकारणसत्यत्वविवक्षायामेवोक्तवाक्यस्वारस्यमङ्गीकर्तव्यम् । सति चैवमनुवर्तमानं कारणं सत्यम्, विकारास्तु व्यावर्तमानाः सद्विलक्षणा मिथ्या, इति सन्, परमार्थः, अनुवर्तमानत्वात्, विकाराः, मिथ्या, व्यावर्तमानत्वादित्यनुमानद्वयमेवात्र विवक्ष्यते । सति चैवं वेदैकप्रमाणसिद्धोऽभेदस्तद्व्यतिरेकेणाभावरूपो निरूपितो भवति । परिणामि-परिणामयोरभेदसाधनं हि लोकसिद्धं न श्रुतितात्पर्यविषयतामर्हति । सति चैवं वाचारम्भणशब्दस्य नामधेयशब्दसमभिव्याहृतस्य मिथ्येत्यर्थ एव युक्तः । तथाच कारणव्यतिरेकेण कार्याभावसाधनेन मृत्तिकापदस्य सर्वकारणब्रह्मोपलक्षणत्वस्वीकारेण च ब्रह्मणो विवर्तोपादानत्वसाधने दृष्टान्तस्वारस्यमपि भवति ॥

अयं भावः—इदं हि वाक्यं नोपादानोपादेययोरभेदबोधनार्थं प्रवृत्तम्, किन्तूपादानमात्रसत्यत्वव्यवस्थापनद्वारा "ब्रह्मविवर्तोपादानत्वसूचनेनैकविज्ञानेन सर्वविज्ञानप्रतिष्ठापनार्थम्, इति प्रतिज्ञा-दृष्टान्तानुपरोधसाध्यमुपादानत्वं ब्रह्मण एव विवक्षितमद्वैतमत एव निर्वहतीति सिद्धम् । मतान्तरे वाचारम्भणश्रुत्यर्थे वाचापदस्य व्यवहार-व्याहारोभयपरत्वम्, "मृत्तिकेत्येव सत्यमि"त्यत्र मृण्मयपदाध्याहारः, आरम्भणपदेनालम्भनपदकल्पना, विकारमात्रस्यैव घटादिरूपस्य कारणेनाभेदसाधनस्याभीप्सितत्वात्, नामधेयप्राप्त्युपादानवैयर्थ्यम्, मृत्तिकादृष्टान्तायोग इत्यादीनि बहूनि दूषणानि । अद्वैतमते तु मृत्तिकापदस्यानुवर्तमानकारणपरत्वात् तेन च प्रातिभसिक-व्यावहारिकोभयसाधारणस्योपादानस्य विवक्षणात् प्रातिभासिकमिथ्या-

त्वस्य तदुपादानसत्यत्वस्य च लोकसिद्धत्वेनासाधनीयत्वेन व्यावहारिकमिथ्यात्वसाधनस्यैव प्रातिभासिकदृष्टान्तेन विवक्षितत्वान्मृत्तिकेतिपदोपादानसार्थक्यम्, पूर्वोक्ताध्याहारादिदोषाभावश्चेति न किञ्चिदनुपपन्नम् ॥

इदमेवाभिप्रेत्य सूत्रितम्—"तदनन्यत्वमारम्भणशब्दादिभ्यः" इति । तदनन्यत्वपदेन तदभिन्नत्वं यदि विवक्ष्यते, तर्हि तदभिन्नत्वसाधने परोक्तरीत्या "मृत्तिकेत्येव सत्यमि"त्यस्यैव वाक्यस्याध्याहारेण व्याख्यानस्योपयोगात् "आरम्भणशब्दादिभ्यः" इत्यनुपपन्नं भवति, इति तद्व्यतिरेकेणेतरशून्यत्वमित्यद्वैतिनां विवरणमेव युक्तम् । तदनन्यत्वपदेन ह्यद्वैतसम्मतार्थविवरणे हि ब्रह्मेतरमिथ्यात्वं बोध्यते, इति "आरम्भणशब्दादिभ्य इति" सौत्रहेतुस्सर्वथा सार्थकः । न विद्यतेऽन्यद् यस्य तद् अनन्यम्, अनन्यस्य भावोऽनन्यत्वम् । तस्यानन्यत्वं तदनन्यत्वमिति, स्वेतरशून्यत्वं ब्रह्मणो बोध्यते । यद्यप्यत्र साध्यपदे बहुव्रीह्यादिकल्पनेन क्लेश इव प्रतीयते ; तथाऽपि सौत्रहेतुपदसार्थक्यार्थं सोढव्य एवायमिति तत्त्वम् । तदिदं सिद्धम्—यत्—"जन्माद्यस्य यतः" इति सूत्रोपात्तं ब्रह्मोपादानत्वं भगवत्पादाभिप्रेतमेवेति ॥

अद्वैतिनोऽपि सत्यं परिणामवादं स्वीकुर्वन्ति । "भोक्त्रापत्तेरविभागश्चेत् स्याद् लोकवत्" "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा" इत्यादौ, परन्तु कृत्वाचिन्तया, न तत्परतया । व्यक्तं तदाकर एव । "परिणामात्" इति सूत्रं तु "विवर्तादित्यर्थकमि"ति वार्तिककारास्तस्मिन् सूत्रे विवेचयन्ति । निरवयवत्वाविरोधेन कार्य-कारणभावकल्पना लोकन्यायाबाधेन विवर्तवाद एव संभवति, नान्यत्र । तथाच ब्रह्मविवर्तोपादानतावादस्यैव "जन्माद्यस्य यतः" इति सूत्रारूढत्वाद् निर्विशेषब्रह्मवादे न जन्मादिसूत्राणामपि विरोधः । विवर्तोपादानता परिणममानाविद्याविषयत्वम्, इति न तद् निर्विशेषताविरोधि । अत्रेमानि (९०७ पृष्ठ) विवरणवाक्यानि—

> "त्रैविध्यमत्र सम्भवति—रज्ज्वाः संयुक्तसूत्रद्वयवन्मायाविशिष्टं ब्रह्म कारणमिति वा "देवात्मशक्तिं स्वगुणैर्निगूढामि"ति श्रुतेर्मायाशक्तिमत्कारणमिति वा, जगदुपादानमायाश्रयतया ब्रह्म कारणमिति वेति । तत्र विशिष्टपक्षे तथैव ब्रह्मत्वेनोपलक्षितस्य ज्ञानानन्दादिस्वरूपलक्षणेन मायानिष्कर्षाल्लक्षणद्वयेन विशुद्धब्रह्मसिद्धिः । उत्तरपक्षयोस्तु मायाया ब्रह्मपरतन्त्रत्वात् तत्कार्यमपि ब्रह्मपरतन्त्रं भवति ; यथांऽशुतन्त्रतन्त्वारब्धोऽपि पटोंऽशुतन्त्रः प्रतीयते । ततश्चोत्पद्यमानकार्यस्य यद् आश्रयोपाधि ज्ञानानन्दलक्षणं च, तद् ब्रह्मेति शुद्धब्रह्मलाभः" इति ॥

(१९) सति चैवं मायोपहितत्वेन तस्यैवेश्वरत्वात्तु भक्तिमार्गः, कर्ममार्गो वा नाद्वैतवादं विरुणद्धि । अद्वैतिनो हि परमार्थतया ब्रह्मनिर्विशेषतां स्वीकुर्वन्तोऽपि तस्येश्वरत्वं जीवत्वमिन्द्रादिदेवरूपत्वादिकं च न निषेधन्ति यावद्ब्रह्मसाक्षात्कारम्, इति चित्तशुद्ध्याधायकत्वेन कर्मणाम्, चित्तैकाग्र्यसाधनत्वेनोपासनानां चोपयोगं मन्यन्ते ॥

तदयं निष्कर्षः—ज्ञान-कर्मसमुच्चयवादिनः केचन, केचन कर्माङ्गज्ञानवादिनः । तत्र प्रथममतावलम्बिनो भट्टभास्करादयः । भगवद्रामानुजादयस्तु द्वितीयमतावलम्बिनः । मतद्वयेऽपि ज्ञानं चोपासनं चेत्यनर्थान्तरम् । अद्वैतिनस्तु कर्मणां चित्तशुद्धिमात्रेणोपक्षयाद् जन्मान्तरीयेणापि तत्संभव

इह तदनुपयोगाद् न कर्म ज्ञानाङ्गम्, न वोपासनाङ्गम्, किन्तु ज्ञानमात्रमेव मोक्षसाधनम्। उपासनमपि भक्त्यपरपर्यायं कर्मसमानयोगक्षेममेव, इति कर्म-ज्ञान-भक्तीनां त्रयाणामुपयोगं व्यवस्थापयन्ति। सति चैवं मतान्तरेषु मार्गद्वयमेव, नतु मार्गत्रयम्, इति काण्डत्रयविभागोऽप्यद्वैत एवोपपद्यते, न मतान्तरेषु। तत्र कर्मकाण्डेन तत्त्वंपदार्थजीवस्वरूपनिष्कर्षः, उपासनाकाण्डेन तत्पदार्थेश्वरस्वरूपनिष्कर्षः, ज्ञानकाण्डेन तु तयोः पारमार्थिकस्वरूपनिष्कर्षः, इति तत्त्वमसिमहावाक्यशेषता सर्वेषामपि वेदवाक्यानामद्वैतमत एव भवति, यतोऽध्यारोपापवादन्यायेन ब्रह्मस्वरूपबोधनार्थमेव सर्वे वेदान्ताः प्रवर्तन्ते। मतान्तरेषु तु भगवत्स्वरूपे सगुण एव सर्वेषां वेदवाक्यानां पर्यवसानात्, जीवस्वरूपमपि वेदान्तेषु ब्रह्ममीमांसायां वा न शोधनीयमवशिष्यते, इति व्यक्तमिदमन्यत्र॥

(२०) तत्र जीवो नाम निरतिशयप्रेमास्पदोऽहंप्रत्ययगोचरश्च पुत्र एव; "आत्मा वै पुत्रनामासी"ति श्रुतेरिति प्राकृता जनाः। पुत्रपरित्यागेन दह्यमानाद् गृहात् स्वशरीररक्षणार्थं बहिर्निर्गमदर्शनात्तु शरीरमेवात्मा, न पुत्र इति चार्वाकाः; "स वा एष पुरुषोऽन्नरसमयः" इति श्रुतेः। "ते ह वा प्राणा ऊचुः" इत्यादिश्रुत्यनुसारेण स्थूलशरीरनाशेऽपि स्वप्न इन्द्रियादिभिर्व्यवहारदर्शनेन चेन्द्रियाण्येवात्मेति चार्वाकैकदेशिनः। "तस्माद्वा एतस्मादन्योऽन्तर आत्मा प्राणमयः" इति श्रुतिरत्र प्रमाणम्। प्राणोऽपि क्रियाशक्तिमदन्तःकरणमेव, नतु ज्ञानशक्तिमदन्तःकरणम्; सर्वदा च संशयानः स्मरन् गर्वित एव तु सर्वोऽपि लोको दृश्यते, इति मन एवात्मेति केचन वदन्ति। एतन्मतोपष्टम्भस्तु— "अन्योऽन्तर आत्मा मनोमयः" इति श्रुतिः। एवं निश्चियात्मकबुद्धिः क्षणिकैवात्मा, तस्या एवाकारोऽर्थो नाम; स्वप्ने तथा दर्शनात्, इति विज्ञानवादावलम्बिनो विज्ञानमेवात्मेति—"अन्योऽन्तर आत्मा विज्ञानमयः, इति श्रुतिमनुसृत्य वदन्ति। "अविनाशी वाऽयमात्माऽनुच्छित्तिधर्मे"ति जीवात्मनित्यत्वावगमादुत्पत्तिविनाशशालित्वायोगादविकारि शून्यमसदेवात्मेति केचनापरे सौगता वदन्ति—"असदेवेदमग्र आसीत्" इत्यादिश्रुतेः। "असन्नेव स भवति, असद् ब्रह्मेति वेद चेत्" इति श्रुतावसद्वादनिन्दाश्रवणात् सद्रूप एवात्मा जीवः। स च "सधीः स्वप्नो भूत्वाऽनुसंचरती"त्यदिश्रुतेर्जाग्रदाद्यवस्थायामहामिति प्रतीयमानः शरीरेन्द्रिय-मनो-बुद्ध्यादिविलक्षणोऽपि ज्ञान-सुखाद्याश्रयोऽहमर्थरूपो यावन्मुक्ति सदैवाहंभावेनानुवर्तते॥

मुक्तिपूर्वक्षणपर्यन्तमहमित्यभावसः प्रतीयत इत्यत्र तु न कस्यापि विप्रतिपत्तिः; मुक्त्यनन्तरमपि तदनुवृत्तिरपेक्षितैव। अन्यथा—

"अहमर्थविनाशश्चेद् मोक्ष इत्यध्यवस्यति।
अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः॥"

स च नैयायिकाद्यभिमतः पूर्वमेवोपक्षिप्तः। सुषुप्त्यवस्थायामप्यहंभावोऽनुवर्तत एव; न ह्यन्यथा 'सुखमहमस्वाप्समि'ति जीवात्मप्रतिसन्धानं जाग्रद्दशायामुपपद्यते। स च सर्वगत इति सांख्य-वैशेषिक-नैयायिक-पातञ्जल-मीमांसकाः, मध्यमपरिमाण इति जैनाः, अणुरिति पाशुपत-पाञ्चरात्र-केवलद्वैत-शुद्धाद्वैत-विशिष्टाद्वैतादिमतानुयायिनः। द्वैताद्वैत-केवलाद्वैतानुयायिनस्तु स्वतो व्यापकः, औपाधिकस्तु मध्यमपरिमाणो जीव इति "तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्" इत्यादिसूत्रानुसारेण वर्णयन्ति। जीवात्मव्यापकतामात्रवादे—"बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः" इति श्रुतिरप्रमाणं

स्यात्, केवलमध्यपरिमाणत्वे तु "स वा एष महानज आत्मे"त्यादिश्रुतिविरोधः। जीवाणुपरिमाणतापक्षे तु सर्वगतत्वश्रुतेरुक्ताया ईश्वरविषयत्वम्, नतु जीवविषयत्वामिति विषयान्तरपरतया नयनम्। द्वैताद्वैत-केवलाद्वैतयोस्तु जीवस्य स्वाभाविकौपाधिकरूपद्वयाविषयकत्वेन श्रुतिद्वयं व्यवतिष्ठते॥

तत्र मुक्त्यवस्थायां ब्रह्मणः पृथगवस्थाय ब्रह्मानन्दानुभवितृत्वं केवलद्वैतमते, विशिष्टाद्वैतादिमते तु ब्रह्मशरीरभावेन जीवानां ब्रह्मापृथक्सिद्धतयाऽवस्थानात्। मुक्त्यवस्थायां हि जीवस्यापि सर्वगतविकासित-धर्मभूतज्ञानद्वारा व्यापकत्वमपि न विरुद्धमिति त्वन्यदेतत्। द्वैताद्वैतमते केवलाद्वैतमते चोपाधि-भूताहङ्कारविलयाद् ईश्वरभावो मुक्तौ जीवस्य। इयान् विशेषः—यत् केवलाद्वैतमतेऽनेकजीववाद एव यावत्सर्वमुक्तीश्वरभावः, पक्षान्तरे तु सर्वदा, सर्वमुक्तौ तु केवलाद्वैतमते निर्गुणब्रह्मभाव इति॥

तत्र प्रथममत ईश्वरशक्तिस्थानीया प्रकृतिः कदापि न नश्यति, द्वितीयमते तु सा नाशमर्हतीति विशेषान्त-रमप्यनुसन्धेयम्। सूक्ष्मेक्षिकया समालोचने तु जीवस्यापि ब्रह्मशक्तिरूपेण रूपान्तरं द्वैताद्वैतमते, केवलाद्वैत-मते तु कारणब्रह्मरूपत्वामिति विशेषोऽप्यनुसन्धानमर्हति॥

तदयं निष्कर्षः—केवलद्वैतमते—स्वस्वामिभावो जीव-ब्रह्मणोः, विशिष्टाद्वैतमते शेष-शेषिभावः, शरीर-शरीरिभावो वा, द्वैताद्वैतमते शक्ति-शक्तिमद्भावः, केवलाद्वैतमते तु स्वरूपाभेद इति। निर्णयस्तु जीव-स्वरूपस्य जीवत्वोपाधिनाऽहमर्थत्वमेव सर्वेषु मतेषु। जीवत्वोपाधिव्यपगमसंभवासंभवयोश्च मतान्तरैस्साकम-द्वैतमतस्य विप्रतिपात्तिः। उपाधिस्तु कारणशरीरं जीवस्य व्यष्ट्यज्ञानम्, यत्तु जाग्रदाद्यवस्थात्रयानुगतम्। सूक्ष्मरूपावस्थस्यान्तःकरणस्य मूलाविद्यावस्थाभेदत्वेन व्यष्ट्यज्ञानत्वादन्तःकरणोपाधित्वपक्षेऽपि सुषुप्त्य-वस्थायां जीवावस्थानं न विरुद्धम्। तत्र जाग्रदवस्थोपहितो विश्वः। स्वप्नावस्थोपाहितस्तैजसः। सुषुप्त्यवस्थोपाहितः प्राज्ञः। तत्र स्थूल-सूक्ष्म-कारणशरीरत्रयोपाहितो विश्वः। सूक्ष्म-कारणशरीरद्वयोपाहि-तस्तैजसः, कारणशरीरमात्रोपहितः प्राज्ञः। आद्योऽन्नमयस्वरूपः, द्वितीयस्तु प्राणमय-मनोमय-विज्ञान-मयस्वरूपः, प्राज्ञस्त्वानन्दमयः, इत्यानन्दमयस्यापि जीवत्वपक्षेण विवरणम्। अधिकं तु वेदान्त-सारादौ व्यक्तम्। इदं चाद्वैतमतानुसारेण, यत्र न केवलं जीव-ब्रह्मणोः, किन्तु जीवेश्वरयोरपि कथंचन भेदाविरोध्यभेदरूपं तादात्म्यं स्वीक्रियते। "गुणादिकं गुण्यादिना भिन्नाभिन्नं समानाधिकृतत्वात्" इत्यनुमानेन भाट्टा इवाद्वैतिनोऽपि गुण-गुण्यादाविवावयवावयविनोरपि तादात्म्यमूरीकुर्वन्ति॥

(२१) तथाच व्यष्टि-समष्ट्योरपि तादात्म्याद् व्यष्ट्युपहित-समष्ट्युपहितयोरपि तादात्म्यं वर्तत एव, इति जीवेश्वरतादात्म्यमपि न विरुद्धम्। ईश्वरो हि नाम पूर्वोक्तस्थूल-सूक्ष्म-कारणशरीराणां समष्टिरूपेणो-पहितं चैतन्यमेवेति हि केवलाद्वैतिनः। अत्र विराट्-हिरण्यगर्भान्तर्यामिभेदेनौपाधिकनामभेद ईश्वरस्यापि वर्तते। नैवं तु मतान्तरेषु। जीवेश्वरयोरौपाधिकमेव स्वरूपम्, न पारमार्थिकम्। इदंतु समानम्—यत् प्रकृतिविशिष्टं चैतन्यमेवेश्वरो नामेति, इयान् विशेषः—नेदमेव स्वरूपमीश्वरस्य, किन्तु पारमार्थिकं रूपान्तरं ब्रह्म नाम। निर्गुणं तु पारमार्थिकं जीवस्येश्वरस्य वा रूपम्। निर्गुणं तु ब्रह्म न प्रामाणिकमिति परे। प्रामाणिकमिति तु (६४१ पृष्ठे) विवरणाचार्याः। यथा—

"आनन्द एव हि ब्रह्मत्व-सर्वज्ञत्व-कारणत्वादिधर्मवत्तया निरुपाधि ब्रह्मस्वरूपं निर्णीयते। तथाहि—"यत्र नान्यत् पश्यती"त्यारभ्य "यो वै भूमा तत् सुख"मि"ति सुखस्यैव बृहत्त्वधर्मवत्तामाह। विज्ञानं तर्हि निरुपाधिकब्रह्मगुण इति चेत्, किं

विज्ञानानन्दयोः सामानाधिकरण्यं नीलोत्पलवद् गुण-गुणिभावात् ? किं वा द्रव्यं घट इतिवत्परापरसामान्यभावादिति ? न तावद् गुण-गुणिभावात् ; "साक्षी चेता केवलो निर्गुणश्चे"ति श्रुतेः, 'एकधैवानुद्रष्टव्यं नेह नानास्ती'ति च गुण-गुणिभाव-भेदप्रतिषेधात्, गुणस्य गुणिनोऽन्यत्वानन्यत्वाभ्यामनिरूपणात् ॥

अत्र सर्वसङ्करवादी न निर्गुणं द्रव्यमस्तीति जल्पति । मा भूर्न्निर्गुणं द्रव्यम्, ब्रह्म तु न द्रव्यम् ; प्रमाणाभावात् । समवायिकारणत्वाद् द्रव्यमिति चेत्, न ; आरम्भवादानभ्युपगमात् । उपादानकारणत्वाद् द्रव्यमिति चेत्, न ; गुणादीनामपि ग्रहणकर्मत्वादिधर्मोपादानत्वात् । न निर्गुणं वस्त्विति चेत्, अन्त्यगुणेष्वनेकान्तः । तस्मात्तत्त्वज्ञानप्रद्वेषमात्रमेतद्—न निर्गुणं ब्रह्मेति । तस्माद् 'द्रव्यं घटः' 'सन् घटः' इतिवत्परापरसामान्यनिबन्धनं विज्ञानमानन्दमिति सामानाधिकरण्यम् । तस्माद् विज्ञानसामान्यालम्बनमानन्दविशेषो ब्रह्मेति । तत्र सर्वज्ञाद्वितीयत्वादिधर्माणां प्रपञ्चोपाधितयाऽनिर्वचनीयत्वान्न तैर्ब्रह्म सगुणं सद्वितीयं वा भवति । विज्ञानसामान्यमपि दुःख-रागादिप्रपञ्चोपाधितयाऽनिर्वचनीयं सद् ब्रह्मणि विज्ञानशब्दप्रवृत्तिमात्रहेतुर्भवति । विज्ञानगुणत्वाभावे न विज्ञानं ब्रह्मेति चेत्, न ; विज्ञानसामान्यालम्बनस्य विज्ञानव्यवहारगोचरत्वात्, विज्ञानप्रयुक्तार्थ-क्रियाकारित्वाच्च । सामान्यस्याभासत्वात् तदालम्बनं मिथ्याज्ञानमिति चेत्, न ; मुख्यसामान्यान्तराभावात्, अस्यैव च मुख्यत्वात् । तस्माद् विज्ञानस्वभाव आनन्दो ब्रह्म इति ॥

(२२) तदिदं सिद्धम्—यत् स्वतो निर्गुणमपि प्रकृतिवशात्सगुणमिव केवलं ब्रह्म । निर्गुणपदं हि श्रुति-स्मृतीतिहास-पुराणेषु दृश्यमानमसंकोचेन विव्रियमाणमद्वैतमतमेवोपबृंहयति, इति हेयगुणराहित्यपरतया विवरणं चिन्त्यमूलमेव । श्रुत्यर्थसंग्रहरूपा भगवद्गीताऽपि "ज्ञेयं यत्तत्प्रवक्ष्यामी"त्युपक्रम्य निर्गुणपदेनैव ब्रह्मस्वरूपमुपदिशति । कथमन्यथा नोपदिशति निर्दोषमिति ? कथं च मतान्तेषु न 'निर्गुणमि'ति "नान्त-रिक्षेऽग्निश्चेतव्यः" इतिवदप्रमाणमापद्यते । भ्रान्तिप्रसक्तास्सत्त्वादिगुणा निषिध्यन्त इति तु नेयं यथार्थख्याति-रख्यातिर्वा, अनिर्वचनीयख्यातौ तु नायं पर्यनुयोगः । यतोऽविद्यावशाद् ब्रह्मणि सत्त्वादिगुणा धर्म-मात्रं वा नाप्रसक्तमेव निषिध्यन्ते ॥

(२३) अविद्या, माया, प्रकृतिरिति तु नामभेदमात्रम्, नतु भिन्नं स्वरूपम् । "अन्धेन तमसाऽऽवृताः" "मृत्युनैवेदमावृतमासीत्" "तमसा गूढमग्रे प्रकेतम्" 'माययाऽपहृतज्ञानाः' इत्यादिवचनानि हि विक्षेप-शक्तिमिवावरणशक्तिमपि तस्या वर्णयन्ति नान्यत्राद्वैतदर्शनात्स्वरसानि भवन्ति । सर्वदर्शनसम्मतमिदमविद्या-मायादिपदगम्यं स्वरूपम्, यत् "प्रकृतिं स्वामवष्टभ्य संभवाम्यात्ममायया" इत्यादौ प्रकृत्यादिपदेन व्यप-दिश्यते । अत्र "आत्ममायया प्रकृतिमवष्टभ्ये"ति प्रकृति-मायापदयोः प्रयोगादावरणशक्तिरपि तस्या गीताभिप्रेतेति जानीमः । सर्वथा तु तस्या विक्षेपशक्तौ न कस्यापि विप्रतिपत्तिः ॥

आवरणशक्तिमात्रे तु तस्याः परे विप्रतिपद्यन्ते । सति चैवं प्रकृतेरावरणशक्तिसिद्धौ निर्विशेषं ब्रह्म, इतरथा तु सविशेषमेव । यथा च मायाया आवरणशक्तिरपि प्रामाणिकी, तथा व्यक्तमन्यत्र । मायावादोऽयं

न केवलमौपनिषदः ; किन्तु सर्वदर्शनासिद्धः, इति कथं "मायावादमसच्छास्त्रमि"ति वचनं शांकरमेव दर्शनं विषयीकरोति । न हि शाङ्करं दर्शनमसच्छास्त्रम् । न हि तन्मते नामरूपे ब्रह्म वा कर्म वोपासना वा ज्ञानं वा तत्फलं वा शास्त्रं वाऽसत् । इति कथं वेदं पद्मपुराणवचनं तत्र गीतासारव्याजेनाद्वैतस्यैव व्यवस्थापनाद् अद्वैतवादं गोचरयेत् ?

मायाप्रतिबिम्बमीश्वरचैतन्यम्, अविद्याप्रतिबिम्बं जीवचैतन्यम्, बिम्बचैतन्यमीश्वरः, प्रतिबिम्बचैतन्यं तु जीवः, अथवा मायाविद्याद्युपहितत्वेनैव जीवेश्वरविवेक इत्यादयो बहवः प्रकारभेदाः सिद्धान्तलेशसंग्रहादिषु विस्तृताः । मायाविशिष्टस्यैवेश्वरत्वेऽपि मायैव परिणमते, नेश्वरः । उपाधिरेव हि माया, न विशेषणम्, इति न ब्रह्मणः परिणामित्वव्यपदेशयोग्यता केनापि रूपेणेत्यद्वैतमतम् । विशिष्टाद्वैतमतं तु मायाया विशेषणत्वाद् विशिष्टमेव परिणामितया व्यपदेशमर्हतीति । सत्यमीश्वरत्वमद्वैतमते मायाविशेषणत्वेनैव, नतु मायोपाधित्वेन, तत्साक्षित्वमेव तु मायोपाधित्वेन ; तथाऽपि कारणत्वं विवर्तोपादानत्वं नेश्वरत्वेन, किन्तु जीवेश्वरानुस्यूतचैतन्यत्वेनैवेति सिद्धान्तलेशसंग्रहादौ व्यक्तम् । सति चैवं ब्रह्मपरिणामित्वव्यपदेशोऽद्वैतमते गौण एव, नतु मुख्यो विशिष्टाद्वैतमत इव । ईश्वरस्य तस्य सर्वज्ञत्व-सर्वशक्तित्व-सत्यकामत्व-सत्यसंकल्पत्वादिगुणगणपरिच्छेदे यावदीश्वरसत्त्वमद्वैतिनोऽपि न विप्रतिपद्यन्ते । ईश्वरोऽपि जीवादिवद् ब्रह्मसाक्षात्कारपर्यन्तमनुवर्तमानत्वाद् व्यावहारिक एव । पारमार्थिकं त्रिकालाबाध्यं च सत्त्वं ब्रह्मचैतन्यस्याद्वितीयस्यैव । सति चैवं विगतान्तःकरणाद्युपाधिकं जीवत्वेश्वरत्वाद्युपाधिसम्बन्धशून्यं च सच्चिदानन्दरूपं नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावं त्रिकालाबाध्यं सर्वाधिष्ठानं च स्वरूपमात्रमेव ब्रह्म, नतु जीवः, ईश्वरो वा । ब्रह्म हि चैतन्यरूपमप्यनादिनाऽविद्यासम्बन्धेनावृतत्वात्, केनचन रूपेण प्रकाशमानत्वाच्च, कदाचन 'सन् घटः' इति सदात्मना, कदाचन 'घटो भाती'ति चिदात्मना, कदाचित्तु 'घट इष्टः' इत्यानन्दात्मना च प्रकाशते । सर्वात्मना ज्ञाने तु मुक्तिस्तस्य, खण्डात्मना ज्ञाने तु बन्धः, इति तत्त्वमस्यादिमहावाक्यैकगम्यमेव तदखण्डं स्वरूपम्, नतु प्रमाणान्तरगम्यम् ॥

(२४) न केवलमविद्यासम्बन्धेनावरणमात्रं ब्रह्मणोऽनादि, किन्तु जीवत्वेश्वरत्वादयोऽपि तस्यानादय एव ॥

तदुक्तम्— "जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा ।
अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥" इति ।

अज्ञानप्रयुक्तत्वं हि जीवत्वेश्वरत्वादेरज्ञानसमानकालीनत्वमात्रेण ब्रह्मेतरत्वसमवहितेन, नतु तदधीनोत्पत्तिकत्वेन, इति न जीवेश्वरौ सादी ; किन्तु अनादी एव ॥

(२५) अनादित्वेऽपि तयोरविद्याप्रयुक्तत्वाद् ब्रह्मसाक्षात्कारेणाविद्यानाशाधीननाशप्रतियोगित्वाद् ज्ञाननिवर्त्यावेव तौ; तत एव मिथ्याभूतावपि । न ह्यज्ञानजन्यमेव ज्ञाननाश्यमज्ञानमेव वा; किन्तु तत्प्रयुक्तमपि । 'इयं शुक्तिरि'ति साक्षात्कारो हि न केवलमविद्याजन्यं प्रातिभासिकं रजतं निवर्तयति, न वा शुक्तित्वाज्ञानम्, किन्त्वज्ञानप्रयुक्तं शुक्त्यवच्छिन्नचैतन्यस्याज्ञानस्य च सम्बन्धमपि । अधिकं लघुचन्द्रिकायां व्यक्तम् ॥

तदयं निष्कर्षः—अज्ञानमसत्त्वापादकम्, अभानापादकम्, अनानन्दतापादकं च । यत्र सत्त्वमात्रानुभवः,

तत्रासत्त्वापादकाज्ञानमात्रस्य विनाशः ; यत्र तु भातीति व्यवहारः, तत्र सत्तानुवेधोऽपि वर्तते, इत्यसत्त्वापादकस्याभानापादकस्य च द्विविधस्यापि विनाशः । त्रिविधाज्ञानस्यापि विनाशे तु न ब्रह्माधिष्ठानं विवर्तोपादानं वा भवति । सति चैवमनाद्यविद्यापरिणामस्य त्रिविधस्यापि यदा सर्वात्मना निवृत्तिः, तदैवाऽऽनन्दैकरसमद्वितीयं ब्रह्मचैतन्यम् । "आनन्दो ब्रह्मेति व्यजनात् । सैषा भार्गवी वारुणी विद्या । परमे व्योमन् प्रतिष्ठिते"ति हि सच्चिदानन्दात्मना ज्ञातमात्मानमेव ब्रह्मेति श्रावयति ॥

(२६) सति चैवमनादित्वेऽपि जीवस्य नाद्वैतविरोधः । अद्वितीयत्वं हि पारमार्थिकद्वितीयपदार्थराहित्यं द्वितीयाभावमात्रम् । सद्वितीयत्वं हि ब्रह्मणि कल्पितमेव स्वीकुर्मः । तदुक्तम्—

"अक्षमा भवतः केयं साधकत्वप्रकल्पने ।
किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम् ॥" इति

अयं भावः—अध्यारोपापवादन्यायेन ब्रह्मस्वरूपाधिगमः । तत्र सृष्ट्यादिवाक्यमध्यारोपविधया ब्रह्म प्रतिपादयति । "अथात आदेशो नेतिनेती"त्यादि तु द्वितीयनिषेधमुखेन ॥

(२७) सति चैवं निषेधमुखेन प्रवर्तमानानि "नेति नेति" इत्यादिवाक्यानि विधिमुखेन प्रवर्तमानान्यपि "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादिलक्षणवाक्यानि "तत्त्वमसी"त्यादिमहावाक्यानि च निर्विशेषे जीवेश्वरस्वरूपातिरिक्ते ब्रह्मणि प्रमाणानि । तत्र सत्यज्ञानादिपदेन ब्रह्मोपस्थितिः सत्यं पूर्वतनब्रह्मानुभवमपेक्षते । स च सुषुप्तौ वृत्त्यङ्गीकारमते सौषुप्तः । अन्यत्रासंप्रज्ञातसमाधिः, तदधीनमनुभवान्तरं वा ॥

"आत्मैकाकारतया तिरस्कृतानात्मदृष्टिं विदधीत" इत्यादिवचनानुसारिवेदान्तसाराद्यादृत आत्माकारवृत्तिरूपत्वमते सोऽसंप्रज्ञातसमाधिरूपः । असंप्रज्ञातसमाधेः सर्ववृत्तिनिग्रहरूपत्वमेव; न काऽपि तत्र वृत्तिरिति मते तज्जन्यात्मानुभवः । तस्यापि तदसाधनत्वे तु विशिष्टशक्तिज्ञानस्यैव विशेष्यमात्रतात्पर्यसहकारेण विशेष्यमात्रानुभावकत्वस्वीकारेण विनैव पदार्थोपस्थितिं सत्य-ज्ञानादिपदेन स्वरूपमात्रानुभवोऽविरुद्धः । सत्यं बोधकानि वाक्यानि शक्तिं लक्षणां वाऽपेक्षन्ते स्वघटकपदार्थस्य ; ब्रह्मणि निर्गुणेऽनिर्देश्येऽपि कथं गुणवृत्तयः श्रुतयश्चरन्ति ? कल्पितैरेव हि गुणैः श्रुतयो ब्रह्मणि चरन्ति । तदेवं निर्गुणेऽपि ब्रह्मणि जीवेश्वरातिरिक्ते प्रमाणानि विवेचितानि ॥

(२८) वाक्यानि तु सत्यमुत्सर्गतस्तात्पर्यविषयं संसर्गमेव बोधयन्ति प्रमाणानि, परं तु नायं नियमः—यत् तात्पर्यविषयः संसर्ग एव शाब्दबोधे भासत इति । तात्पर्यविषयतैव हि शाब्दबोधविषयतायां तन्त्रम्; नतु तादृशसंसर्गत्वम् ; गौरवात् । तात्पर्यविषयत्वं तु तत्त्वमस्यादिवाक्यानामुपक्रमोपसंहारादिभिरद्वितीये शुद्ध एव च चैतन्ये वर्तते; नतु सविशेषे । व्यक्तं चैतद् भाष्य-तद्वार्तिकादिषु विवरणे च । सति चैवं वेदान्तप्रमाणजन्यत्वाद् निर्विकल्पकमपि ज्ञानं प्रमैव । नैयायिका हि विशेष्यावृत्त्यप्रकारकज्ञानत्वं सविकल्पक-निर्विकल्पकज्ञानसाधारणं प्रमात्वं मन्यन्ते । मीमांसकास्तु अनधिगताबाधितार्थविषयकज्ञानत्वमेव प्रमात्वं मन्यन्ते, नतु तद्वति तत्प्रकारकज्ञानत्वम्, इति तन्मतेऽपि तदविशिष्टम् । नहि विशेष्य-विशेषणभावविषयकत्वनियतं प्रमात्वमिति तु तदाशयः । वेदान्तिनोऽपि वयमनधिगताबाधितार्थविषयकं ज्ञानमेव प्रमां मन्महे । सति चैवं निर्विकल्पकज्ञानमपि नाप्रमा भवति ब्रह्मविज्ञानम् ।

अत्र वार्तिककारा नारायणसरस्वत्यः—घटादिविषयदेशे चक्षुरिन्द्रियमात्रसम्बन्धदशायां प्रथमतो मानसी वृत्तिरुदीयमानाऽऽज्ञातज्ञानरूपा तत्तद्विशेषरूपानवगाहनाद् निर्विकल्पकं ज्ञानमिति वदन्ति । तस्य

प्रत्यक्षत्वं तु वृत्तेर्विषयदेशगमनेऽपि विषय-चक्षुरिन्द्रिय-मनसां सन्निकर्षाद् निरपोहमेव। संसर्गाविषयकं प्रकारताविशेष्यताद्यनवगाहिज्ञानं वा निर्विकल्पकमिति तु नैयायिकादयः। श्रीभाष्यकारादयस्तु प्रथमं सविशेषपिण्डग्रहणं निर्विकल्पकम्, द्वितीयतादृशपिण्डग्रहणम्—यत्र धर्मोऽनुवर्तमानतया प्रतीयते, तत्सविकल्पकमिति वदन्ति। एकव्यक्तौ तु तन्मत आकाशादावाकाशत्वानुवृत्तिज्ञानं द्वितीयपिण्डग्रहणाधीनं न भवतीति यदि निर्विकल्पकमेव, तर्हि ब्रह्मणोऽपि ज्ञानं ब्रह्मण एकत्वान्निर्विकल्पमेव तन्मतेऽपि। सत्यं वयमपि निर्विकल्पकज्ञानविषयत्वेन न ब्रह्मणो निर्विशेषत्वं वदामः, किन्तु विशेषाणां ब्रह्मणि प्रामाणिकत्वाभावेनैव॥

अद्वैतमतैकदेशिनस्तत्त्वशुद्धिकारास्तु—घटादिज्ञानं सविकल्पकमेव, ब्रह्मज्ञानमेव निर्विकल्पकमिति वदन्ति। अयं भावः—घटादिकं हि ब्रह्मण्यध्यस्ततया 'सन् घटः' इत्येव सर्वदा प्रतिभासते। यतः—"न सोऽस्ति प्रत्ययो लोके यत्र सत्ता न भासते" इत्यध्यस्ततयैव हि घटादयः स्वरूपवन्तः। ब्रह्म तु नाध्यासाधिष्ठानतयैव, किन्तु स्वप्रकाशानावृतस्वभावतयाऽपीति सद्रूपब्रह्मज्ञानमेकमेव निर्विकल्पकमिति। सर्वथा तु निर्विकल्पकज्ञानप्रमात्वे न कस्यापि विप्रतिपत्तिः। तथाच व्यवहारदशाऽबाध्यान्युपासनापराणि सविशेषपराणि च सविकल्पकं ज्ञानमेव जनयन्ति, तत्त्वमस्यादिवाक्यानि तु तात्पर्यानुसाराद् अखण्डस्वरूपमात्रावबोधादखण्डार्थानि सन्ति निर्विकल्पकमेव ज्ञानं जनयन्ति।

(२९) इदमेव तत्त्वमस्यादिवाक्यानामखण्डार्थत्वम्—पदवृत्तिस्मारितातिरिक्तागोचरप्रमाजनकानेकापर्यायशब्दत्वम्, संसर्गासङ्गियथार्थज्ञानजनकानेकापर्यायशब्दत्वं वा। तथा चोक्तम्—

"संसर्गासङ्गिसम्यग्धीहेतुता या गिरामियम्।
उक्ताऽखण्डार्थता, यद्वा तत्प्रातिपदिकार्थता॥" इति।

तत्त्वमस्यादिवाक्यानि हि तदादिपदैर्लक्षणयोपस्थितं चैतन्यस्वरूपमेव बोधयन्ति, नतु तदतिरिक्तं कमपि संसर्गम्। नच तत्रत्यानि तदादिपदानि पर्यायपदानि। एकप्रवृत्तिनिमित्तवत्त्वं हि नाम पर्यायत्वम्, नतु लक्ष्यैकार्थबोधकत्वम्? नहि गङ्गापद-तीरपदयोः पर्यायता। जीवत्वेश्वरत्वोपस्थितिपूर्वकचैतन्यस्वरूपसाक्षात्कार एव ह्यज्ञाननिवर्तकः। अज्ञानं हि जीवाश्रितं ब्रह्माश्रितं चेति द्विविधम्। आद्यं तूलाज्ञानमवस्थाज्ञानं वोच्यते, येन स्वप्नप्रपञ्चः प्रातिभासिकः प्रपञ्चो वा जन्यते। द्वितीयं तु मूलाज्ञानम्, यतः सर्वो व्यावहारिकः प्रपञ्च उदेति। द्विविधस्याप्यज्ञानस्य निवृत्तिर्हि जीवत्वोपलक्षितेश्वरत्वोपलक्षितचैतन्यसाक्षात्काराधीनैव। नहि 'चैत्रोऽस्ति घटोऽस्ति' इत्यादिवाक्यैर्लक्षणयोपस्थापितचैतन्यज्ञानं जीवाश्रितमीश्वराश्रितं चाज्ञानं निवर्तयितुमलम्। अत एव तत्त्वमस्यादिवाक्यमेवाखण्डार्थबोधकं महावाक्यम्। निर्विशेषवाक्यानि महावाक्यार्थनिरूपणपराणि। सविशेषवाक्यानि तु त्वंपदार्थस्य तत्पदार्थस्य वा निरूपणपराणि। प्रधानानुसारेण हि गुणानां नयनम्, नतु गुणानुसारेण प्रधानानाम्॥

(३०) सति चैवं सगुणवाक्यानि दुर्बलानि, निर्गुणवाक्यानि तु प्रबलानि। प्राबल्य-दौर्बल्यनिर्णयः पूर्वापरयोः पूर्वदौर्बल्येन, सावकाश-निरवकाशन्यायेन वा। परशास्त्रं बाधकमिति "विप्रतिषेधे परं कार्यमि"ति न्यायसिद्धम्। 'इदं रजतमि'त्यादि पूर्वतनं ज्ञानं 'नेदं रजतमि'ति परेण बाध्यते। क्रमिकापच्छेदद्वये पूर्वतनापच्छेदनिमित्तस्य प्रायश्चित्तस्योत्तरापच्छेदनिमित्तस्य च तस्य विरोधे

ह्युत्तरापच्छेदनिमित्तमेव प्रायश्चित्तमनुष्ठेयम् । सगुण-निर्गुणवाक्ययोरपि सगुणवाक्यप्राप्तगुणनिषेधपरत्वाद् 'नेदं रजतमि''ति ज्ञानमिव निर्गुणवाक्यमेव तु बाधकम् । अन्यथा हि निरवकाशं निर्गुणवाक्यजातमापद्येत । सगुणवाक्यं हि कल्पितगुणपरयाऽप्युपपद्यते । उपासनार्थमेव हि गुणाम्नानम्, नतु तत्त्वज्ञानार्थम् । न ह्युपासनं नाम पारमार्थिकं गुणमपेक्षते । नहि धेनुत्वं वाचि पारमार्थिकम् । निर्गुणपदस्यैव हेयगुणराहित्यपरता तु सत्यकामत्वादीनां पारमार्थिकत्वनिर्णये सत्यं संभवति । नहि सत्यकामत्वादि पारमार्थिकमिति प्रमाणसिद्धमिदम् । आम्नानं हि धर्माणां कल्पितानामपि दृश्यते मनोब्रह्मत्वादिवत् । ''नेह नानाऽस्ति किञ्चने''ति हि सर्वे एव गुणाः साकल्येन निरस्यन्ते, इति कथं केचन वर्तन्ते ब्रह्मणि गुणा इति साधुरयं वादः? यावद्व्यवहारं हि सगुणवाक्यमपि प्रमाणं निर्गुणवाक्यमपि । व्यावहारिकतत्त्वावेदकत्वेनापि हि प्रमाणता नापह्नूयते । विवेचितं चेदमधस्तादेव । वस्तुतत्त्वनिर्णयार्थं हि—''अथातो ब्रह्मजिज्ञासे''ति मीमांसाप्रतिज्ञाऽपि सूत्रकाराणाम् ॥

(३१) अत्र ह्यथशब्देनानन्तर्याभिधानमुखेन ब्रह्ममीमांसाधिकारी साधनचतुष्टयसंपन्नो विवक्ष्यत इति भगवत्पादभाष्यम्, अधिगतकर्मावबोध इति श्रीविशिष्टाद्वैतादिमतम् । प्रथममते साधनचतुष्टयसंपत्त्यानन्तर्यमथशब्दार्थः । द्वितीयमते तु कर्मविचारानन्तर्यम् । इदमेव द्वैताद्वैतमतेऽपि, द्वैतादिमते च । तत्र प्रथममते नित्यानित्यवस्तुविवेके सति ब्रह्मविचारः, ब्रह्मविचारे च नित्यानित्यवस्तुविवेकः, इत्यन्योन्याश्रयः, इति श्रीभाष्यकारादयो वदन्ति । सत्यं तृतीयाध्यायविचारेणैव नित्यानित्यवस्तुविवेकः सम्भवतीति ब्रह्ममीमांसायां चतुर्लक्षण्यामेव नित्यानित्यवस्तुविवेकादिरपि विचारितः, परन्तु न तृतीयाध्यायो ब्रह्मविचारः, किन्तु ब्रह्मज्ञानसाधनाध्यायत्वात् साधनविचारः । चतुर्थाध्यायस्तु फलाध्यायत्वात् फलविचारः, अपि च ब्रह्मविचारः ; ब्रह्मण एव फलत्वात् । नहि साधनाध्यायापेक्षा ब्रह्मविचारस्य । अन्यथा श्रीभाष्यादिमतेऽपि विचाराधिकारापेक्षितवैराग्यस्य वैराग्यपादविचाराधीनत्वात् कथं नाम नान्योन्याश्रयः ? अथशब्दार्थविवरणं हि साधनाध्यायो नाम । मूल-व्याख्यानयोश्च शेष-शेषिभावादथशब्देनैकवाक्यतापन्नस्तृतीयाध्यायः, प्रथम-द्वितीयाध्यायावेव तु मुख्यब्रह्मविचाराविति पाठक्रमादर्थक्रमस्य बलीयस्त्वाद् वस्तुगत्या न तृतीयाध्यायानन्तर्यं प्रथमाध्यायादेः, प्रथमाद्यध्यायानन्तर्यं च तृतीयाध्यायस्येति कल्पनासंभवाद् नान्योन्याश्रयशङ्काऽपि । ब्रह्मविचारो हि न नित्यानित्यवस्तुविवेकमात्राय, किन्तु तत्पूर्वकब्रह्मतत्त्वविनिर्धारणाय, इति न नित्यानित्यवस्तुविवेकेनैव गतार्थत्वाद् ब्रह्मविचारवैतथ्यम् । नित्यानित्यवस्तुविवेको नाम सामान्यतो नित्यमस्ति किञ्चन, अनित्यं तु घटादिकं कर्मकृतमविद्यकं वा सर्वमनित्यमिति निश्चयाभ्यास एव, नतु ब्रह्मैव नित्यमितरदनित्यमिति विवेकः, अस्तु वा तादृश एव सः, नैवमपि सगुण-निर्गुणवाक्यार्थनिर्णयमपि नापेक्षामहे ; येन विचारवैतथ्यमापतति । कर्मविचारस्तु न सर्वाधिकारिसाधारणः । ब्रह्मचर्यादेव सन्यस्ता अपि त्वनुपनीता वेदाध्ययन-कर्मविचारतदनुष्ठानाद्यनधिकारिणश्च देवा इव ब्रह्मविद्यायामधिकुर्वन्ति । नैतेऽपि कर्मविचारानन्तरं ब्रह्म विचारयितुमर्हन्तीति कल्पनं विकल्पसहमुपपन्नं वा । अमुमेवार्थं—''धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरि''ति भाषणेन भगवत्पादाः सूचयन्ति । अपिच कर्मविचारोऽयमधिकारप्रयोजकः को नामेति विवेचनीयम्—यदि कर्मस्वरूपविचारः, तर्हि कथमस्य ब्रह्मविचारोपयोगः ? यदि कर्मफलानित्यत्वनिर्णयः, तर्हि जैमिनीयमीमांसा नात्र कर्मविचारः । नहि तत्र कर्मफलानित्यत्व-

निर्णायकं सूत्रारूढमुत्सूत्रं वा किमप्यधिकरणमुपलभामहे। ब्रह्ममीमांसातृतीयाध्यायेन हि कर्मफलानित्यत्वमपि गत्यागतिविचारद्वाराऽवसेयम्। स तु कर्मविचारो न द्वादशलक्षणी, किन्तु चतुर्लक्ष्यण्येकदेश एव, इति कथं वा जैमिनीयकर्मविचारानन्तरमेव ब्रह्ममीमांसेति शास्त्रैक्यवादे न कर्मविचारानन्तरं ब्रह्मविचार इति। अपिच किं बादरायणः स्वयं तत्पूर्वतनाश्च ब्रह्ममीमांसाधिकारिणो वा? नवा? यद्यधिकारिणः, तर्हि कथं जैमिनीयकर्मविचारस्तेषाम्? सति चैवं न क्षोदक्षमोऽयं वादः—यत् संहतमिदं जैमिनीयेन षोडशलक्षणेन, इति साधनचतुष्टयसंपन्नाधिकारितावाद एव समादरणीयः, इत्यथशब्दार्थनिष्कर्षः।

(३२) जिज्ञासापदं तु ज्ञानस्येष्यमाणत्वप्रदर्शनमुखेन विचारसाध्यं निश्चयात्मकमपरोक्षरूपं वा ज्ञानमेव विचारप्रयोजनमिति गमयति। "अथातो धर्मजिज्ञासे"त्यत्रापि ज्ञानस्येष्यमाणत्वमस्ति सत्यमुपक्षिप्तम्। परंतु "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यनुष्ठानमेव यागस्य स्वर्गं प्रयोजयति, न ज्ञानमात्रमिति गम्यमानत्वादनुष्ठानापेक्षमेव धर्मज्ञानं पुरुषार्थाय कल्पते। ब्रह्मज्ञाने तु "ब्रह्मविदाप्नोति परम्," "तरति शोकमात्मवित्" "विद्वान्नामरूपाद्विमुक्तः" भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥" इत्यादि वचनैरनुष्ठानमनपेक्ष्यैव फलसाधनत्वमवगच्छामः। सति चैवं ब्रह्मविचारस्य मुख्यं प्रयोजनं ब्रह्मज्ञानमेव, यस्मिन् सति विनैव विलम्बं सकलबन्धनिवृत्तिर्ब्रह्मभावश्च स्वत एव सेत्स्यति। ब्रह्मभावो हि जीवस्याविद्यानिवृत्तिमात्रमपेक्षते। अविद्यानिबन्धनं हि जीवत्वम्. अविद्यानिवृत्तावुपाधिविलयाद् ब्रह्मभावं जीव आप्नोति। "ब्रह्मविदाप्नोति परमि"ति प्राप्तिरपि ब्रह्मणो नित्यप्राप्तस्याविद्यानिवृत्त्या तद्भाव एव। नाहि नित्यप्राप्तं स्वरूपमप्राप्तं सत् प्राप्यम्। "कार्यं बादरिरस्य गत्युपपत्तेः" इति ह्यर्चिरादिप्राप्यं कार्यं ब्रह्मैव, नतु परं ब्रह्मेति व्यवस्थापितं ब्रह्ममीमांसायाम्। अविद्यानिवृत्तिरेव हि मोक्षो नाम॥

(३३) अनादित्वेऽप्यविद्याया निवृत्तिस्तु न विरुद्धा। न ह्यनादिपदार्थाः सर्व एव न नश्यन्ति। प्रागभावो ह्यनादिरपि नश्यतीति नैयायिकाः। पूर्वपूर्ववासनास्तत्त्वज्ञानेन विनश्यन्तीति सौगताः। परमाणुगतं श्यामत्वं भावरूपं पाकेन विनश्यतीति तार्किकाः। अनादित्वं ह्यनुत्पत्तिमेव गमयति, नाविनाशम्। नह्युत्पन्नमेव नश्यतीति नियमः। जातस्य हि ध्रुवो मृत्युः, नतु जातस्यैव। तथाचाविद्यानिवृत्तिमात्रेण जीवस्य ब्रह्मभावाद् नोत्क्रमणादिगतिसापेक्षा ब्रह्मप्राप्तिः॥

(३४) "अत्र ब्रह्म समश्नुते" "न तस्य प्राणा उत्क्रामन्ति" इत्यादिवचनानि हि विनैवोत्क्रमणं जीवस्य मुक्तिं प्रतिपादयन्ति। नाहि हिरण्यगर्भस्य मुक्तिरप्यर्चिरादिमार्गमपेक्ष्यैव भवति; असंभवात्, नवा चन्द्रादित्यादीनाम्, इति ब्रह्मविद्याधिकारिणां सर्वेषां देवादिसाधारण्येन न मुक्तिरुत्क्रमणमपेक्षते, संभवति वा। अयमत्र निष्कर्षः—

"अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति हि वाक्यं कठवल्ल्यामिव बृहदारण्यकेऽपि—"अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति। तदप्येष श्लोको भवति—"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥" इति विदुषः प्राणोत्क्रमणनिषेधानन्तरमपि श्रूयते, इति श्रुतिद्वयैकवाक्यतैव श्रुत्यभिमतेति जानीमः। बृहदारण्यकोपनिषदि हि सकामानां प्राणोत्क्रान्तिरकामानां तदभाव इति वर्णनात् "अत्र ब्रह्म समश्नुते" इत्यस्यानुत्क्रान्तिपक्षविवरणपरतया योजनाच्चेदमपि ज्ञाप्यते—यत्

"शतं चैका च हृदयस्य नाड्यः" इति प्राणोत्क्रमणपक्ष एव, नतु पक्षान्तरे—इति। सति चैवं "शतं चैका चे"ति वाक्ये "उत्क्रमणे भवन्ती"त्यंशस्यापि सार्थक्यं भवति। अयं हि विषयः "यथाऽहिनिर्ल्वयनी वल्मीके प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायमशरीरोऽमृतः" इति सनिदर्शनमत्रोपपाद्यते, इति मुख्यं तात्पर्यमत्रावगम्यते। सकामवाक्य उत्क्रमणावधितया प्रसक्तस्यैवात्राप्युत्क्रान्त्यवधित्वमवगम्यते, इति प्रकरणादेवेदमवगम्यते। तस्य शरीरात् प्राणा नोत्क्रामन्तीत्येवार्थः स्पष्टं प्रतीयते, इति, नात्र शाखान्तरवचनेनैवार्थनिर्णयः कर्तव्यः। यत्तु शाखान्तरीयम्—"तस्मात् प्राणा नोत्क्रामन्ती"ति, तत्र परं जीवस्योत्क्रान्त्यवधित्वमप्रसक्तमिति संशयाद् निर्णयार्थमुक्तवाक्यमपेक्ष्यते॥

अयं भावः—जीवात्मनः परिच्छिन्नस्योत्क्रमणमनु प्राणादीनामुत्क्रमणम्। विदुषां तु ज्ञानेन हृदयग्रन्थि-पूर्वोत्तराघादिविनाशेन प्राप्तामृतत्वानामुपाधिकृतपरिच्छेदशून्यानां कथमुत्क्रमणं सम्भवति? सति चैवं बृहदारण्यकषष्ठाध्यायचतुर्थब्राह्मणेनैव प्रश्नोत्तररूपेण प्रवृत्तेन स्पष्टेनात्र व्यवस्था युक्ता, इति "स्पष्टो ह्येकेषामि"ति सिद्धान्तसूत्रम्, "प्रतिषेधादिति चेन्न, शारीरात्"इति पूर्वपक्षसूत्रमित्यद्वैतिनां विवरणमेव सूत्रारूढम्। अत एव बृहदारण्यकपञ्चमाध्यायद्वितीयब्राह्मणे—"यत्रायं पुरुषो म्रियते, उदस्मात् प्राणाः क्रामन्त्याहो ने"त्यार्तभागप्रश्नस्य "नेति होवाच याज्ञवल्क्यः" इत्युत्तरमुपपद्यते॥

बृहदारण्यकषष्ठाध्यायचतुर्थब्राह्मणं विद्वदविद्वद्विषयभेदेनोत्क्रान्तौ विशेषमभिधाय, "तत्रैते श्लोका भवन्ती" त्युपक्रम्यार्चिरादिमार्गं प्रतिपाद्य "तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधो जनाः" इत्यार्चिरादिमार्गपर्यन्तमधिकारिणोऽविद्वांस इति विविच्य, "आत्मानं चेद् विजानीयादयमस्मीति पूरुषः। किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्॥" इत्यादिना ज्ञानिनः कर्तव्य-प्राप्याद्यभावं बोधयति। अत एव—"अन्धं तमः प्रविशन्ति येऽविद्यामुपासते" इत्युपासकानामप्यविद्वत्त्वं प्रतिपादितमुपपद्यते। अनेन हीदं ज्ञायते—यत् सगुणोपासकपर्यन्तमेवोत्क्रान्तिः, न तदुत्तरमपीति॥

परब्रह्मप्राप्तिर्हि गतिमनपेक्ष्यैव भवति, इति "परं जैमिनिर्मुख्यत्वादि"त्यत्र मुख्यत्वहेतुमात्रनिर्देशेन ज्ञायते। अत्र "कार्यं बादरिरस्य गत्युपपत्तेः" इत्यत्र गत्युपपत्तिहेतुनिर्देशेन हि गतिवाक्येषु सर्वेषु कार्यं ब्रह्मैव विवक्ष्यत इति गम्यते, इति मुख्यत्वेऽपि ब्रह्मणो नात्र विवक्षा, इति सूत्राशयोऽवगम्यते, इति बादरिमतमेव बादरायणमतमिति विजानीमः॥

इदं हि मतद्वयसंप्रतिपन्नम्—यद् जैमिनि-बादरिपक्षीयसूत्राणां प्रतिक्षेप्य-प्रतिक्षेपकभाव इति। इदमेवात्रालोचनीयम्—किमन्वारुह्य बादरिणैव जैमिनिमतं प्रतिक्षिप्यते? उत बादरिमतं प्राप्तं जैमिनिः प्रत्याचष्ट इति। वयं तु विश्वसिमः—यद् बादरिरेव जैमिनिमतमन्वारुह्य प्रत्याख्यातीति सूत्रकारा मन्यन्त इति। अत एव गत्यनुपपत्तिमात्रं न परिहृतं सूत्रकारैः। "सामीप्यात्तु तद्व्यपदेशः" इति सूत्रं हि—"परं जैमिनिर्मुख्यत्वादि"ति शङ्कानिरासार्थमिति युक्तम्। अत्र हि लक्षणया ब्रह्मपदस्य हिरण्यगर्भपरत्वं साध्यते। लक्षणा च मुख्यार्थासंभवप्रतिसन्धानानन्तरमेवात्मानं लभते, इति मुख्यार्थविवक्षां जैमिन्यभिमतां गत्यनुपपत्त्याऽनुपपन्नां मत्वैव "सामीप्यात्तु तद्व्यपदेशः" इति सूत्रं प्रवृत्तमिति विज्ञायते। एतेन—"दर्शनाच्चे"ति सूत्रमपि पूर्वपक्षसूत्रमिति—व्याख्यातम्। न ह्यमृतत्वश्रवणं कथमिति शङ्कां विना "कार्यात्यये तदध्यक्षेणे"त्यस्य स्वरसप्रवृत्तिः संभवति। अत्र च "स्मृतेश्चे"ति स्मृतेरप्युपष्टम्भोऽत्रेति वर्णनेन हि विशदं सूत्रकाराः 'कार्यात्ययेने'त्येवं सिद्धान्तपक्षं मन्यन्ते। अनेन हि—

गतिपूर्वकममृतत्वाम्नानस्थले सर्वत्र हिरण्यगर्भप्राप्तिरेव साक्षाद्विवक्षितेति गम्यते। श्रुतिद्वयाविरोधे हि क्रमविशेषमात्रस्यैकत्र कल्पनेन वियदधिकरणन्यायेनार्थक्रमाद्वा तत्परिहार एव युक्त इति तु हृदयम्। एतेन—"नच कार्ये प्रत्यभिसन्धिः" इति सूत्रमपि पूर्वपक्षसूत्रमेवेति—व्याख्यातम्। इयं हि शङ्का—"नास्ति वचनस्यातिभारः' इति न्यायेन परिहरणीया, इति—"ब्रह्मलोकान् गमयति" इति बहुवचनघटित-ब्रह्मलोकपदान्यथानुपपत्त्या कार्यब्रह्मगतिरेवात्र विवक्षणीयेति सूत्रकाराः सूचयन्ति, इति जैमिनिमतनिरासार्थान्येव सर्वाणि बादरिगुणसूत्राणि। जैमिनिमते त्रीण्येव सूत्राणि, बादरिमते तु पञ्च सूत्राणीति प्रथमसूत्रांशस्य जैमिनिपक्षीयसूत्रैः कैरप्यप्रत्याख्यानात् सर्वेषां च जैमिनिपक्षीयसूत्रार्थानां पृथक् पृथक् सूत्रेण बादरिपक्षीयेण निरासाच्च कथं सूत्रकारा जैमिनिपक्षमेव पूर्वपक्षं निरस्यं वा न मन्यन्ते? अधिकमन्यत्र व्यक्तम्। सर्वथा तु सौत्र एव भावो न केवलम्, किन्त्वौपनिषदोऽप्यद्वैत एव सर्वाङ्गसुन्दरे। इदमेवाभिप्रेत्योक्तं न्यायरत्नावल्याम्—"अद्वैतदर्शनमेव सर्वेषु दर्शनेषु दर्शनीयतमं दर्शनीयामि"ति॥

सर्वाण्यपि दर्शनान्यद्वैतदर्शनस्य प्रायेणांशतो वेदमूलकान्युपकुर्वन्त्येव। अन्नमयादिवाक्यानि हि स्थूलारुन्धतीन्यायेनाऽद्वैत एव पर्यवस्यन्ति, इति शरीरात्मवादादयोऽपि क्त्वाचिन्तया प्रवृत्ता अद्वैतमेव तात्पर्यतो बोधयन्ति। सौगतमतमपि प्रपञ्चमिथ्यात्वनिर्णयेनाद्वैतमतं परिपोषयत्येव। मीमांसका अपि भाट्टा ज्ञानकर्मसमुच्चयावलम्बिनोऽपि वस्तुगत्या वेदान्त एव पर्यवसानेन स्वीयं दर्शनं दर्शनपदवाच्यं मन्यन्ते—

"इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या।
दृढत्वमेतद्विषयः प्रबोधः प्रयाति वेदान्तनिषेवणेन॥"

इति वदन्तः। प्रभाकरगुरवस्तु "विज्ञानरूपता तु विज्ञानस्यानाशङ्कनीया; अनाशङ्कितत्वात्। युक्तं चानाशङ्कितम्; कर्मप्रवणत्वात्। तदुक्तं भगवता—"न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्" "यत्तु ब्रह्मविदामेष निश्चयः—यदुपलभ्यते न तत्तथ्यम्, यन्नोपलभ्यते, तत्तथ्यमिति, नमस्तेभ्यः; विदुषां नोत्तरं वाच्यम्" इत्यादि वदन्तोऽद्वैतवादमेव प्रशंसन्ति। वैशेषिक-नैयायिकानामसत्कार्यवादः, सांख्यादीनां सत्कार्यवादश्चोभयं सदसद्विलक्षणत्वेनानिर्वचनीयत्वसाधानार्थमपेक्षितांशविशेषव्यवस्थापनेन सद्विवर्तवादस्याद्वैताभिमतस्य विशेषत अलङ्कारायैव। 'नहिनिन्दा'न्यायेन दर्शनान्तरेष्वविद्यावादादिनिरासा दृश्यमाना अपि न तात्पर्यतोऽद्वैतनिन्दां गोचरयन्ति॥

अद्वैतदर्शनस्य हि मूलमुपनिषद एव। उपनिदामद्वैत एव परमं स्वारस्यमित्यत्र पाश्चात्या अपि न विप्रतिपन्नाः। काशकृत्स्नौडुलोमि-बादरायणप्रभृतयो महर्षिवर्या अप्यद्वैतवादमेव विचारसहमुपनिषदर्थं मन्यन्ते। बादरायणसूत्राणामद्वैत एव तात्पर्यम्, नतु मतान्तरे, इति व्यासतात्पर्यनिर्णयादौ व्यक्तम्। गौडपादाचार्या अपि माण्डूक्योपनिषद्व्याख्याव्याजेन विशदमद्वैतमतं व्यवस्थापयन्ति। भगवत्पादास्तु भाष्यकारा अद्वैतवादस्य पितृचरणाः।

भाष्यव्याख्यानव्याजेन पद्मपादाचार्य-वाचस्पतिमिश्रप्रभृतयो बहवो व्याख्यातारोऽद्वैतमेव सुविज्ञेयमुपपादयन्ति, पञ्चपादिकाविवरणं तु विशेषतो ब्रह्मपरिणामवादादिद्वैताद्वैतादिमतान्तरनिरासपूर्वकम्।

तत्र पद्मपादाचार्याणां व्याख्या पञ्चपादिकेति विख्यातामिदम्। इयं हि चतुःसूत्रीपर्यन्तमेवोपलभ्यते। इदमत्रैतिह्यम्—पद्मपादाचार्या व्याचक्षत संपूर्णं ब्रह्मसूत्रभाष्यम्, परन्तु कैश्चित् तदीयं

पुस्तकं दग्धम्। अनन्तरं चाचार्यपादैरेवानुग्रहवरेण पुनरप्युज्जीवितं यावत् श्रुतमाचार्यपादैरिति। पञ्चपादिकेति नामापि पादपञ्चकपर्यन्तमेव तथोज्जीवितमिति कृत्वैवेति ॥

पञ्चपादिकाविवरणे पञ्चपादिकानाम्नैव ग्रन्थस्योपक्षेपात् चतुस्सूत्रीपर्यन्तमेव विवरणग्रन्थप्रवर्तनाच्च पञ्चपादिकेति चतुःसूत्र्या एव नामेति जानीमः। व्याख्या तु पद्मपादाचार्यैः संपूर्णस्यैव भाष्यस्य विरचिता, इति ग्रन्थमध्ये "एक आत्मनः शरीरे भावादि"त्यादिसूत्राणां विषयविशेषाणां विस्तृतविचारस्थानत्वेनोल्लेखादध्यवसीयते। सति चैवं चतुःसूत्र्या एव पञ्चपादिकेति नामनि निदानमिदमेव प्रतिभाति—यत् पादशब्देनावयवार्थाभिधानात् पञ्चावयवा व्याख्येति पद्मपादाचार्या मन्यन्त इति। चतुःसूत्र्याः पञ्चावयवत्वं चतुःसूत्री सर्वाऽपि शास्त्रारम्भसमर्थनरूपत्वादेकमधिकरणमिति पक्षेणोपपद्यते। शास्त्रारम्भसमर्थनं चतुस्सूत्र्याः कार्यमिति विशिष्टाद्वैतिनोऽपि मन्यन्ते, शारीरकमीमांसाभाष्यवर्तिकेऽप्यत्र योजिते समन्वयाधिकरणे (१००१ पृष्टे) व्यक्तम्। पद्मपादाचार्यविवरणाचार्यादीनां समयस्तु सर्वविदित एव। विवरणस्य तु व्याख्यानानि बहूनि सन्ति। तत्र तत्त्वदीपनं पूर्वमेव काशीतः प्रकाशितम्, यस्य कर्तारोऽखण्डानन्दसरस्वत्यः। इमे हि भाष्यव्याख्यातॄणामानन्दगिरिपादानामन्तेवासिनः, इति महामहोपाध्यायादिपूज्यश्रीकुप्पुस्वामिशास्त्रिपादानां सूचनानुसारं बडोदाप्रकाशितानन्दगिरिकृततर्कसंग्रहभूमिकातोऽवगच्छामः, तदिदमप्यत्र संस्करणे वयं योजयामः ॥

अपरा तु व्याख्या विवरणभावप्रकाशिका नृसिंहाश्रमिविरचिता, या किल नाद्यापि प्रकाशिता। ऋजुविवरणाख्यं तु विवरणव्याख्यानं सर्वज्ञविष्णुभट्टकृतमत्रैव संस्करणे योजयामः। सर्वज्ञ-विष्णुभट्टा हि सर्वतन्त्रस्वतन्त्रजनार्दनात्मजाः, इति ग्रन्थत एव जानीमः। श्रीजनार्दनाचार्याश्चेम एवाश्रमान्तरे आनन्दगिरिनामान इति तर्कसंग्रहभूमिकात एवावगच्छामः। एतेषामाचार्यास्तु स्वामीन्द्रपूर्णा इति ग्रन्थत एव प्रतीमः। सति चैवमानन्दगिरेः संन्यासाश्रमात् पूर्वमृजुविवरणं ग्रथितं विष्णुभट्टैरिति प्रतिभाति। तत्त्वदीपनकाराः—"योऽपी"ति विवरणग्रन्थः (९०९ पृष्ठ) कैश्चन प्रक्षिप्त इति मन्यत इति वर्णयन्ति, ऋजुविवरणे तस्याव्याख्यानाद् ऋजुविवरणकारा अप्युल्लिखिता भवेयुरिति प्रतिभाति। ऋजुविवरणमिदं मद्रपुरराजकीयादर्श-(*Oriental Library*) पुस्तकालयाध्यक्षाणां कृपयाऽस्माभिस्ततोऽधिगतमिति ते धन्यवादार्हाः। अस्मिन्नवसरे एतेषामेवाध्यक्षाणामनुमत्या मद्रपुरविश्वविद्यालयगवेषणाविभागाधिकृताः T. R. चिन्तामणिमहोदया अपि यैरस्माकं भाष्यभावप्रकाशिका चित्सुखाचार्याणां विलिख्य समर्पिता, तेऽपि च सादरमेव स्मर्यन्ते ॥

सत्येवास्मिन् विवरणप्रस्थाने वाचस्पतिमिश्रा भामतीनाम्ना व्याख्यानान्तरेण प्रस्थानभेदेनाद्वैतमेव स्म प्रचारयन्ति, यतो भामतीव्याख्या कल्पतरुः ॥

कल्पतरोरनन्तरमृजुप्रकाशिकाख्याऽपराऽपि व्याख्याऽऽखण्डानन्दयतिराडभिधैर्महाभागैर्भामत्या विरचिता, या हि सरलगभीरतादिगुणगणभारिता प्रत्यक्षरव्याख्या किंचिदिव न्यूनं चतुस्सूत्रीपर्यन्तमुपलब्धा मद्रपुरपुस्तकालयात् 'अडयार'स्थानगतात्, इति तदध्यक्षा अप्यस्माकमुत्तमर्णाः ॥

ऋजुप्रकाशिकाकारा आन्ध्रदेशीया नलगन्तुवंशजा इत्यादिकं ग्रन्थत एव जानीमः। एते खलु रत्नकोशस्य नृसिंहाश्रमकृते रत्नकोशप्रकाशिकाख्यां व्याख्यामेकां व्यरचयन्निति, ऋजुप्रकाशिकायां जन्माद्यधिकरणोपसंहारे 'मत्कृतरत्नकोशप्रकाशिकायामि'त्युल्लेखादधिगच्छामः। रत्नकोशप्रकाशिकायाः कर्ता कालहस्तियज्वेति 'अडयार'दर्शसूच्यां दृश्यते। श्रीकालहस्तियज्वनस्तु ऋजुप्रकाशिकाकाराणां

पितृचरणा इति तु सत्यम् । शैली तु व्याख्याया अस्या अतिसरला बालसुबोधा बह्वर्थपरिपूर्णाऽपि । अस्मिन् संस्करणे भामत्याः प्रत्यक्षरव्याख्यानापेक्षां बहूनामालोक्यैनामपि वयमत्र योजयामः ॥

ऋजुप्रकाशिकाकारा स्वस्याखण्डानन्दाभिधां संन्यासाश्रमस्वीकारनिबन्धनां सूचयन्ति । मङ्गलश्लोक-गता भावा अपि लेशतोऽपि तत्त्वदीपनगतमङ्गलश्लोकगतेभ्यो भावेभ्यो न विलक्षणाः । आचार्यचरणाः स्वीयास्तु 'श्रीबोधपृथ्वीधराः' इति तत्त्वदीपनकारैरुच्यते । ऋजुप्रकाशिकायां तु—"स्वयंप्रकाशं गुरुमानतोऽस्मि" इति । 'बोधपृथ्वीधरः' इत्यानन्दगिरेरेव नामान्तरमिति तु नेदं विप्रतिपन्नम् । सति चैवं स्वयंप्रकाशपदमपि यदि गौणाभिधानम्, तर्हि तु तत्त्वदीपनकारा एव विवरणप्रस्थानस्येव भामतीप्रस्थानस्यापि व्याख्यानं संपादयामासुरिति सुष्ठु लगति ॥

विवरण-भामत्योर्भामत्यां न विवरण इव तत्तादृश्योऽद्वैतप्रक्रियाः समालोचिताः, भामत्यास्तु प्रसन्न-गभीरायाः प्रत्यक्षरव्याख्यानमेकमपेक्ष्यत इति तु सत्यम् । "सम्यग् वाचस्पत्यस्य कुर्विति व्याख्यामि"ति प्रक्रम एव विशिष्य वाचस्पत्यस्य समुल्लेखेनापि ग्रन्थकारैरेतैरपरस्य भाष्यविवरणस्य विवरणं कृतमित्यस्ति संभावनाऽवसरः । अत्र तु चारितविमर्शका एव प्रमाणम् ॥

अस्यां च परिस्थितौ चित्सुखाचार्यैरपि भाष्यभावप्रकाशिकानाम्नी व्याख्यैका भगवत्पादभाष्यस्य व्यरचि । इयं हि व्याख्या कुत्रचन पञ्चपादिकावाक्यानि कुत्रचन भामतीवाक्यानि च तथैवोपक्षिप्य संघटिता, इति प्रस्थानद्वयेऽपि चित्सुखाचार्याः समदृष्टय इति विशदमिदमुदारमतीनामपुरोभागिनाम् । मन्यामहे तदनन्तरमेव श्रीनारायणसरस्वतीभिः 'शारीरकमीमांसाभाष्यवार्तिकामि'ति विवरणमेकं सुविस्तृतं ब्रह्म-सूत्रभाष्यस्य भगवत्पादानां समपादीति ॥

शारीरकमीमांसाभाष्यवार्तिकस्य हि कृष्णानन्दसरस्वतीकृता व्याख्याऽप्येका दरीदृश्यते । एतादृश-विरलविरलगभीरार्थ-निबन्धजातसंग्रहण-संरक्षणादिना, अस्माकं तस्यास्यादर्शरूपस्य वितरणेन च चिर-चिन्तनयिा बङ्गीयैषियाटिक्सोसाइटीसंपादकास्तत्सदस्याश्च ॥

अत्र हि वादप्रस्थानयोग्या बहव एव तत्तादृशाः प्रक्रियाविशेषाः संसूचिता वर्तन्ते, इति प्रायेण ब्रह्मानन्द-सरस्वतीनामाचार्या नारायणतीर्था एवेमे नारायणसरस्वतीनाम्नापि प्रसिद्धा इति प्रतिभाति । 'परोक्षभ्रमेऽप्य-निर्वचनीयख्यातिरेव', अथवा तु 'न परोक्षो भ्रम एव संभवति' 'स्वतःप्रामाण्यवादस्त्वनुमित्यादौ गुणनिर्णया-संभवाद् न संभवदुक्तिकः', 'चक्षुरिन्द्रियस्य प्रथमतो विषयदेशगमनेन प्रथममालोचनात्मकं ज्ञानं जायते, तदनन्तरमेव मनसो विषयदेशगमनेन विशेषावधारणं भवति', 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इत्यनेन त्रिंशन्मतानिरासेनैकत्रिंशं मतं भ्रमविषये व्यवस्थाप्यते', 'वेदान्तविचारस्तद्विजिज्ञासस्वेति वाक्येनेतिकर्तव्यतया प्रतिपाद्यते', इत्यादयो विषयाः प्रतिवाक्यं प्रतिपदं वा भाष्यार्थस्य सम्यग्निष्कर्षणेन तत्तादृशविवरणान्तरा-णामौचित्यविचारचर्चया, उक्तानुक्त-दुरुक्तचिन्तनेन च सुष्ठु विवृतं भगवत्पादीयं भाष्यमनेन यथार्थाभिधानेन वार्तिकेन ॥

अस्य च कालः १५९२ तमं क्रैस्तवं शतकमिति *Catalogus Catalogorum* इत्यत्र विवेचितमेव । माकिम्—इतः शतकादेकात् पूर्वमेव प्रादुर्भावो न्यायामृतकाराणां व्यासतीर्थानामपि, इति चित्सुखी-पञ्चपादिका-विवरण-भामती-कल्पतरुनिरसनेन स्वतन्त्रविचारावलम्बनेन प्रक्रियाविशेषाणां द्वैत-

केवलाद्वैताद्यभिमतानां खण्डन-मण्डनप्रणाल्या वादप्रस्थानमुदमिलत्। यदनन्तरं मधुसूदनसरस्वती-नामुक्तन्यायामृतानिरसनपराद्वैतसिद्धिग्रन्थ उदियाय, येनानुमीयते—विशेषत एव मतद्वयेऽपि वादप्रतिवादास्तत्र तत्र खण्डनमण्डनशैल्या प्रादुर्बभूवुः, यतस्तरङ्गिणीनाम्नी न्यायामृतव्याख्या श्रीरामतीर्थानां बहिरवततार। अयमेव समयः श्रीमदप्पय्यदीक्षितेन्द्राणामपि—ये खलु परिमलादिग्रन्थविरचनेनाद्वैत-मतावलम्बिनां चिरन्तनोत्तमर्णाः। परिमलादिसमय एव श्रीविशिष्टाद्वैतसंप्रदायानुसारिणां महाचार्यादीनामपि समयः, यदा वेदान्तपरिभाषा धर्मराजाध्वरीन्द्राणामङ्कुरयति स्म। तदेवम्—न केवलं द्वैतिभिः, किन्तु विशिष्टाद्वैतिभिरप्याक्रम्यमाणमद्वैतमतं सर्वत एवोपप्लूयमानमासीत्। तदनन्तरं तु ब्रह्मविद्याभरणादि-भाष्यप्रस्थाननिबन्धानां लघुचन्द्रिकादीनां च वादप्रस्थाननिबन्धानां गौडब्रह्मानन्दसरस्वतीप्रभृतिकर्तृकाणाम-वतारेण सर्वत एव सुरक्षितमद्वैतमतम्॥

सव्याख्यवेदान्तपरिभाषा-सिद्धान्तलेशसंग्रह-शारीरकमीमांसाभाष्य-सव्याख्य-तद्व्याख्याभामती-पञ्च-पादिकाविवरण-न्यायामृताद्वैतसिद्धि-तरङ्गिणी-लघुचन्द्रिका-न्यायरत्नावल्यादीनाम्, शारीरकमीमांसाभाष्य-वार्तिकस्य च सम्यगध्ययनेन तत्र प्रवीणतां प्राप्ताः, विश्वासिमः, सव्यसाचीवाद्वैतमतमात्मानं च सर्व एव प्रभवन्ति रक्षितुम्। श्रीद्वैतसंप्रदायानुसारिणां न्यायामृतसौगन्धादिग्रन्था न्यायभास्करादिवाद-ग्रन्थाश्च प्रक्रियाविशेषाणां सम्यग् अद्वैताभिमतानां स्फुरणे न कथमपि पुरतः स्थास्यन्ति। पञ्च-पादिका-विवरण-भामत्यादीनामन्यथाग्रहणेनैव श्रीव्यासतीर्थानां तात्पर्यचन्द्रिका, नतु वास्तवार्थग्रहणेनेति चन्द्रिकाखण्डनाद्वैतदीपिकादिपर्यालोचने विशदं भविष्यति॥

ब्रह्मसूत्राणां विशिष्टाद्वैतवाद एव स्वारस्यमिति भगवद्रामानुजादिभाष्यमपि विरोधवरूथिन्यादिषु व्यासतात्पर्यनिर्णयादौ च व्यक्तं समालोचितम्। व्यासतात्पर्यनिर्णयविमर्शरूपो महामहोपाध्यायश्रीदेशिकाचार्य-महाशयानां व्याससिद्धान्तमार्तण्डोऽपि समालोचित एवास्माभिरद्वैतमार्तण्डेऽस्मदीये॥

अद्वैताभिमतः प्रपञ्चमिथ्यात्ववादो न मतान्तराभिमतप्रपञ्चसत्त्ववादस्य विरुद्धः, मतान्तरेषु हि सत्यमहंभावाद्यनुवृत्तिरितरप्रपञ्चानुवृत्तिश्च स्वाभिमते मुक्तिक्षणेऽपि मन्यते, मतान्तराभिमता तु मुक्तिरप्यद्वैतिनां व्यवहारदशैव, इति व्यावहारिकसत्यत्ववादस्य स्वीकारादद्वैतिनाम्, कथमद्वैतिनो मतान्तरं बाधन्ते? अधिकारिभेदेन सर्वाण्यपि दर्शनानि मुक्तिसोपानविशेषाः, इति नेदं विप्रतिपन्नमद्वैतिनाम्। अद्वैतदर्शनाख्यं सोपानान्तरमेव शशशृङ्गायमाणमिति तु कल्पना रूपविशेषानिषेधः प्रज्ञाचक्षुषाम्। उदयनाचार्या हि—"किमार्द्रकवणिजो वहित्रचिन्तया" इति पुरुषधौरेयाधिकारिणमद्वैतवादं मन्यन्ते॥

भगवत्पादा मुक्ता वा? न वा? यदि मुक्ताः, न तर्हि निबन्धरचनादिसंभवः, यदि तु न मुक्ताः, तदाऽपि ननु ब्रह्मस्वरूपसाक्षात्काराद्यभावाद् नानुभूतार्थविषयमिदं भाष्यमिति सप्तमरसोपदेश इव कथमादरणीयमद्वैतदर्शनमिति शङ्का तु सर्वेष्वपि दर्शनेषु समाना, यतस्तत्रापि वैकुण्ठप्राप्त्यनन्तरं मुक्तानां न पुनरावृत्त्या स्वीयोपदेशप्रचारणं संभवदुक्तिकम्। वेदान्तवाक्यपरीक्षासिद्धार्थमेव हि सर्वेऽपि भाष्यकारा विवेचयन्ति। मननावस्थायां खलु भाष्यकारा न साक्षात्कारावस्थायामिति तु वस्तुस्थितिः॥

सत्स्वपि बहुषु प्रकाशितेष्वप्रकाशितेषु च भाष्यविवरणेषु प्रस्थानद्वयस्यापि सम्यगवगमार्थं भामती-

प्रस्थानं संग्रहतः, विवरणप्रस्थानं च संपूर्ण प्रकाशयितुकामाः सांप्रतं प्रथममिदं संस्करणं प्रियपाठकानामुपहरामः। विवरणप्रस्थानं हि लुप्तप्रायं विशेषतः प्रचारमर्हति, इति तत्त्वदीपनतोऽपि प्राचीनमृजुविवरणं नाम विवरणमपि सुमनोरममतिसरलं चात्र तत्त्वदीपनेन सार्कं योजयामः। ऋजुप्रकाशिकाख्या भामतीव्याख्या तत्त्वदीपनकारैरखण्डानन्दमुनिभिरेव संगृहीतेति संभावनामनु विवरणप्रस्थानप्रधानेऽस्मिन् संस्करणे सत्यप्यप्रकाशिते भामतीतिलकादिव्याख्यान्तरे विशिष्टं स्थानमलभत। वार्तिकविषये तु वक्तव्यं पूर्वमेव निवेदितम्। प्रदीपाख्या तु व्याख्याऽस्मदीया टिप्पणीमात्रमपि, विश्वसिमः, कथमपि प्रियपाठकानां न विरागातिशयमुत्पादयिष्यति। इमां हि व्याख्याम्—

"आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम्।
रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति" ॥
"विदितसकलवेद्यैर्न प्रशंसन्ति लोके
प्रथितमपि महद्भिः किं पुनर्मादृशेन।
इति विफलसमेऽस्मिन् वाग्व्ययेऽहं प्रवृत्तः
स्वमतिविमलतायै क्षन्तुमर्हन्ति सन्तः" ॥

इत्यादिं नीतिमेवानुसृत्योपहरामः। प्रथमभागरूपेण व्याख्योपव्याख्यारूपनवनिबन्धोपबृंहितं ब्रह्मसूत्रशाङ्करभाष्यं प्रकाश्यमानं तत्तद्व्याख्यानादिसुपरिशीलनेन नियतमद्वैतप्रक्रियासु निरातिशयं विज्ञानमुत्पादयिष्यतीति वस्तुस्थितिकथनमिदम् ॥

संस्करणेऽस्मिन् प्रथमे मुद्रणकालेऽक्षराणां भङ्गादिना मानुषसहजदृष्टिदोष-प्रमादादिना चाङ्कुरिता दोषा द्वितीयसंस्करणे संशोधयिष्यन्ते, इति सप्रश्रयमिदं प्रार्थयामः, यत् क्षमापणीया वयमेतेषां क्षुद्रापराधानामिति ॥

संस्करणेऽस्मिन् प्रथमे बहुमूल्यस्य समयस्य विनियोगेन केवलं प्रेमवशतोऽस्माकं संशोधनकार्ये सम्यगुपकृतवन्तो महामहोपाध्याय-पण्डितप्रवर-पूज्य-श्रीसीतारामशास्त्रिमहोदयाः कलकत्ताविश्वविद्यालयाध्यापका अधमर्णयन्त्यस्मानिति नेयमतिशयोक्तिः ॥

अतिकरालेऽपि काले सांप्रतमस्मत्प्रियमित्राणाम्—श्रीयुक्तामरेश्वरठाकुर-(M. A. PH. D.) महोदयानां वेदान्तशास्त्रिणां कलकत्ताविश्वविद्यालयाध्यापकानां प्रोत्साहनेन नैजेन च प्रामातिशयेन संस्कृतभाषायाः, भारतीय-प्राचीन-नवीन-प्रकाशिताप्रकाशित-काव्य-नाटकाख्यानकाख्यायिका-पुराणेतिहास-धार्मिक-सामाजिक-दार्शनिकनिबन्धानां प्रकाशनार्थं बद्धदीक्षा उत्साहमूर्तय उदारहृदयाश्च श्रीसच्चिदानन्दभट्टाचार्या मेट्रोपालिटन् पब्लिषिङ् हौसविभागाध्यक्षाः, अन्ये च सर्वे कार्यकारिण उत्तमर्णा भारतवर्षस्य, सप्रश्रयं प्रार्थयामो भगवन्तमुमारमणं रमारमणं च, जीवन्तु प्रतिक्षणं संपत्तिवर्धनेनोत्साहवर्धनेन च चिरकालमिति शिवम् ॥

इति सुधीजनविधेयः
अनन्तकृष्णशास्त्री,
महामहोपाध्यायः कलकत्ताविश्वविद्यालयाध्यापकश्च।





कामकोटिमठमास्थितो महान् ज्ञान-धर्म-तप उग्रविग्रहः ।
राजते धृतसरस्वतीपदः चन्द्रशेखर इवेन्दुशेखरः ॥

श्रीकाञ्चीकामकोटिपीठाधिष्ठान-
प्रातःस्मरणीय स्वनामधन्य वैदिकमार्गप्रतिष्ठापक-षण्मतस्थापनाचार्य-
जगद्गुरु-श्रीशङ्करभगवत्पादाः परमहंसपरिव्राजकादि—
श्री १००८ चन्द्रशेखरसरस्वतीस्वामिपादाः

ब्रह्मसूत्रशाङ्करभाष्यानुक्रमणिका

सव्याख्यभामतीविषयानुक्रमणिका

पञ्चपादिकाप्रस्थानविषयानुक्रमणिका

वार्तिकविषयानुक्रमणिका

(१) ४१४ तमे पृष्ठे 'ननु अचाक्षुषमि'ति स्थले 'चाक्षुषमि'ति पठनीयम्।

भाष्यभावप्रकाशिकाविषयानुक्रमणिका

प्रदीपविषयानुक्रमणिका

भामत्यादिव्याख्योपव्याख्योपेतब्रह्मसूत्रभाष्याध्यास-
भाष्यविषयानुक्रमणिका संपूर्णा

शुभमस्तु

ॐ

ब्रह्मसूत्रशाङ्करभाष्यम्

भामत्यादिव्याख्योपव्याख्या-नवकोपेतम्

❀सू० अथातो ब्रह्मजिज्ञासा ॥ १ ॥❀

भामती

अनिर्वाच्याविद्याद्वितयसचिवस्य प्रभवतो विवर्ता यस्यैते वियदनिलतेजोऽबवनयः ॥
यतश्चाभूद्विश्वं चरमचरमुच्चावचमिदं नमामस्तद्ब्रह्मापरिमितसुखज्ञानममृतम् ॥ १ ॥

ऋजुप्रकाशिका

विश्वं यदज्ञानविलासजातम् विज्ञानतो यद्विषयान्निवृत्तम् ॥
आनन्दरूपं हरिमद्वयं तं वेदान्तवेद्यं विधितो भजामः ॥ १ ॥
वयं विमूढा इति ये स्थितास्ते स्मयं विना यत्सविधे बुधाः स्युः ॥
न यं श्रितो बन्धमितो जनस्तं स्वयंप्रकाशं गुरुमानतोऽस्मि ॥ २ ॥
वाणीविघ्नेश्वरौ वन्दे माणिक्यगणभूषितौ ॥ वाणीप्रसिद्धये विघ्नश्रेणीनां च निवृत्तये ॥ ३ ॥
श्रीमान् श्रीनलगन्तुवंशजनितः श्रीकालहस्त्यध्वरी यज्ञाम्बा च यमात्मजं प्रसुषुवे श्रीरङ्गनाथाभिधम् ॥
सोऽयं सम्प्रति साधनोज्ज्वलमनाः प्राग्जन्मपुण्योदयात् प्राप्याखण्डयतीशतामनुभवत्यार्यादखण्डां मुदम् ॥४॥
सोऽयमखण्डो यतिराडिम्मडिजगदेकरायभूपेन । संप्रार्थितोऽस्ति सम्यग्वाचस्पत्यस्य कुर्विति व्याख्याम् ॥५॥
स कल्पकतरोरर्थमभिधाय क्वचित् क्वचित् । करोत्यखण्डयतिराट् व्याख्यां वाचस्पतेः कृतेः ॥ ६ ॥

इह खलु कश्चिद्विपश्चिदग्रगण्यो वाचस्पतिः श्रीमच्छङ्करभगवत्पादकृतं शारीरकभाष्यं व्याचिकीर्षुः स्वचिकीर्षितस्य अविघ्नपरिसमाप्त्यादिसिद्धये विषयप्रयोजनप्रदर्शनपूर्वकं शास्त्रप्रतिपाद्यं परं ब्रह्म नमस्करोति—* अनिर्वाच्येत्यादिना * ॥ केवलस्य ब्रह्मणोऽसङ्गस्य वियदादिप्रपञ्चनिर्मातृत्वायोगात्—"अनिर्वाच्याविद्याद्वितयसचिवस्ये"त्युक्तम् । *अनिर्वाच्यम् = सत्त्वासत्त्वाभ्यां निर्वक्तुमशक्यम्, अत एव सदसद्विलक्षणम्, मिथ्याभूतमिति यावत् । तच्च तत् अविद्याद्वितयं च तथोक्तम् । तद्द्वितयं सचिवम् = सहकारि यस्य तस्य । अनादिभावरूपा एका अविद्या, पूर्वपूर्वभ्रमजन्यसंस्काररूपा अपरा अविद्या ; एवंरूपेण द्वैविध्यात् तद्द्वितयसाचिव्यमुक्तम् । तत्साचिव्यं च ब्रह्मणस्तद्विषयतया, न तदाश्रयत्वेन ; जीवानामेव तदाश्रयताया वक्ष्यमाणत्वात् । *ननु*—एवमविद्याद्वितयसाचिव्ये ब्रह्मणः पारतन्त्र्यमेव स्यात्, न स्वातन्त्र्यम्, इत्यत आह—*प्रभवत इति* ॥ *प्रभवतः = समर्थस्य

भाष्यभावप्रकाशिका

यत्साक्षात्सच्चिदानन्दं प्रत्यगक्रियमद्वयम् । तन्नमामि नृसिंहस्य योगगम्यं परं पदम् ॥

भामती

निःश्वसितमस्य वेदा वीक्षितमेतस्य पञ्च भूतानि ॥ स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः ॥ २ ॥

ऋजुप्रकाशिका

स्वतन्त्रस्येत्यर्थः; स्वोपकरणभूतस्य अविद्याद्वितयस्य स्वस्वातन्त्र्याव्याघातकत्वादिति भावः। एवंविधस्य ब्रह्मणः पारमार्थिकसत्ताकत्वाद्वियदादिप्रपञ्चस्य चापारमार्थिकसत्ताकत्वाद् ब्रह्मविषमसत्ताककार्यत्वेन वियदादीनां ब्रह्मविवर्तत्वमिति भावः। न केवलं वियदादिभूतपञ्चकस्यैव ब्रह्मविवर्तत्वम्, किन्तु जीवानामपि चराचरोपाधिकानां बिम्बभूतब्रह्मप्रतिबिम्बरूपत्वात् तद्विवर्तत्वमित्याह—*यत इति *॥ अथवा*—भूतवद्भौतिकचराचरात्मकविविधप्रपञ्चस्यापि ब्रह्मविवर्तत्वमेवेत्यभिप्रेत्याह—*यत इति*॥ भौतिकप्रपञ्चस्य ब्रह्मविवर्तत्वं हिरण्यगर्भद्वारा बोध्यम्। *यतः=ब्रह्मणः सकाशात्।* उच्चावचम्=अत्यधिकम्। *चरमचरम्=चराचरात्मकम्। विश्वं चाभूत्। *तदपरिमितसुखज्ञानम् = अपरिच्छिन्नानन्दरूपज्ञानघनम्। *अमृतम्=नित्यम्, मुक्तस्वरूपमिति वा। *ब्रह्म नमामः। अत्र ब्रह्मणः स्वाभिन्नत्वेन नमस्कार्यत्वायोगात् "नमामः" इत्ययं शब्दः अनुसन्धानपरः; अनुसन्धानविषयं कुर्म इत्यर्थः। ब्रह्मणः स्वाभिन्नत्वेन अनुसन्धानं तु युज्यते इति हृदयम्। अनुसन्धानविषयस्य ब्रह्मणः लक्षणप्रमाणाभ्यां सिद्धिर्वाच्या, इति विविधवियदादिभूतभौतिकात्मकजगद्विवर्ताधिष्ठानत्वलक्षणं जगदुपादानत्वम्, सर्वज्ञत्वेन जगदुपादानगोचरज्ञानवत्त्वात् जगत्कर्तृत्वलक्षणं जगन्निमित्तत्वं चेत्यभिन्ननिमित्तोपादानत्वं ब्रह्मणः तटस्थलक्षणम्—"अनिर्वाच्ये"त्यादिना "उच्चावचमि"त्यन्तेन दर्शितम्। "अपरिमितसुखज्ञानममृतम्" इत्यनेन ब्रह्मणः स्वरूपलक्षणं च दर्शितम्। ब्रह्मणः प्रमाणान्तराविषयत्वात् वेदान्ता एव तत्र प्रमाणमिति सूचितम्। "अपरिमितसुखज्ञानं ब्रह्म" इत्यनेन अज्ञाततया विपर्ययविषयत्वात् तदेव ब्रह्म विषय इति सूचितम्, तदेव च ज्ञाततया प्रयोजनमित्यपि सूचितम्; "अज्ञातं ब्रह्म विषयो ज्ञातं ब्रह्म प्रयोजनम्"॥ इत्यभिधानात्। ब्रह्मणः सर्वज्ञत्वं जगदुपादानत्वं च दर्शितमाद्यपद्ये, तत्र सर्वज्ञत्वं कथम्? इत्याशङ्क्य ज्ञानपदेन सूचितम् ॥ १ ॥

सर्वज्ञत्वं वेदकर्तृत्व-वेदोपादानत्वादिना दर्शयति—*निःश्वसितमिति*॥ *अस्य=ब्रह्मणः। वेदाः निःश्वसितम्; "निःश्वसितमेतद्यदृग्वेदः" इत्यादिश्रुतेः। निःश्वसितवदत्यन्तमयत्नसाध्यत्वात् वेदानां निःश्वसितत्वोक्तिः। तथाच जगत्कर्तृ-जगदुपादानभूतस्य ब्रह्मणः जगदन्तःपातिवेदं प्रत्यपि कर्तृत्वमुपादानत्वं चायातम्,

भाष्यभावप्रकाशिका

ज्योतिर्यद्दक्षिणामूर्तिव्यासशङ्करशब्दितम्। ज्ञानोत्तमाख्यं तद्वन्दे सत्यानन्दपदोत्थितम् ॥
भगवत्पादपादाब्जपांसवः पान्तु सन्ततम्। अपारासार-संसार-सागरोत्तार-सेतवः ॥
संप्रदायविदामुक्ती-स्संकलय्याभिधीयते । मुनिना चित्सुखाख्येन भाष्यभावप्रकाशिका ॥

प्रदीपः

मातामहमहाशैलं महस्तदपितामहम्। कारणं जगतां वन्दे कण्ठादुपरि वारणम् ॥

"अथातो ब्रह्मजिज्ञासे"त्यादि "अनावृत्तिः शब्दात्" इत्यन्तं चतुरध्यायात्मकं ब्रह्ममीमांसाशास्त्रमिति श्रीशंकरभगवत्पादादिमतानुयायिनः। "अथातो धर्मजिज्ञासे"त्यादि विंशत्यध्यायात्मकं तदिति तु भगवद्रामानुजादिमतानुयायिनः। तत्र भास्कराचार्याः ज्ञानकर्मसमुच्चयवादिनः, भगवद्रामानुजादयः शंकरभगवत्पादाश्च ज्ञानकर्मसमुच्चयासंभववादिनः। ज्ञानकर्मसमुच्चयो नाम ज्ञानवत्कर्मणोऽपि मोक्षोपयोग इति, तदुभयसमप्राधान्यमेव। अयमेव भास्कराचार्यसिद्धान्तः। कुमारिलपादा अपि ज्ञानकर्मसमुच्चयवादिन एव। मन्यामहे—"इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या। दृढत्वमेतद्विषयश्च बोधः प्रयाति वेदान्तनिषेवणेने"ति श्लोके वेदान्तनिषेवणपदेन श्रीभास्कराचार्यमूलसिद्धान्तमेव कुमारिलपादा अभिप्रयन्तीति। अयं हि श्लोको वृत्तिकारीयात्मवादान्ते दृश्यत इति श्रीभास्कराचार्यमूलाचार्या उपवर्षाचार्या

भामती

षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि । शाश्वताय नमस्कुर्मो वेदाय च भवाय च ॥ ३ ॥
मार्तण्ड-तिलकस्वामि-महागणपतीन् वयम् । विश्ववन्द्यान्नमस्यामः सर्वसिद्धिविधायिनः ॥ ४ ॥
ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे । ज्ञानशक्त्यवताराय नमो भगवतो हरेः ॥ ५ ॥
नत्वा विशुद्धविज्ञानं शंकरं करुणानिधिम् । भाष्यं प्रसन्नगम्भीरं तत्प्रणीतं विभज्यते ॥ ६ ॥

ऋजुप्रकाशिका

इति ब्रह्मणः सर्वज्ञत्वसिद्धिः । नच—वेदोपादानत्वेन कथं सर्वज्ञतेति—वाच्यम् ; वेदस्य सकलार्थप्रकाशनशक्तिमत्त्वेन वेदगतसकलार्थप्रकाशनशक्तेः तदुपादानगततादृशशक्तिपूर्वकत्वेनोपादानभूतब्रह्मणः सकलार्थप्रकाशनशक्तिसिद्धेः सर्वज्ञत्वसिद्धिरिति भावः। *एतस्य=ब्रह्मणः । *पञ्च भूतानि वीक्षितम्=वीक्षणपूर्वकं सृष्टत्वात् वीक्षणवत् । निःश्वासाधिकप्रयत्नसाध्यत्वाच्च पञ्चभूतानां वीक्षणत्वोक्तिः । न च—भूतानां वीक्षणपूर्वकं सृष्टत्वमसिद्धमिति—वाच्यम्; "तदैक्षत बहु स्यां प्रजायेय" इत्यादिश्रुत्या भूतभौतिकप्रपञ्चमात्रस्य वीक्षणपूर्वकत्वावगमेन भूतानामपि वीक्षणपूर्वकत्वसिद्धेरिति भावः । *एतस्य=ब्रह्मणः । *चराचरम् स्मितम् = हिरण्यगर्भद्वारा सृष्टम् । चराचरात्मकं विश्वं तस्य स्मितवत्; वीक्षणाधिकप्रयत्नसाध्यत्वात् स्मितत्वोक्तिः । चेतनस्यैव सर्वज्ञत्वात् ब्रह्मणः पूर्वोक्तसर्वज्ञत्वसिध्यर्थं चेतनधर्मसुषुप्तिमत्त्वेन चेतनत्वं संभावयति—*अस्य चेति* ॥ ब्रह्मण इत्यर्थः । *अथवा—अनायासेन नामरूपात्मकप्रपञ्चसृष्टि-स्थिति-लयकर्तृत्वात् ब्रह्मात्यन्तं महिमशालि, अतस्तदेव स्तोतव्यम्, तदेव अनुसन्धेयम्, इत्यभिप्रेत्य ब्रह्म स्तौति—*निःश्वसितमस्येत्यनेन श्लोकेन* ॥ अर्थस्तु उक्तविध एव ॥ २ ॥ वेदान्तशास्त्रव्याख्यातृत्वात् स्वस्य वेदार्थस्फूर्त्यर्थं स्वोपास्येश्वरप्रसादसिध्यर्थं च यथाक्रमं वेदमीश्वरं च समानविशेषणं कृत्वा युगपन्नमस्करोति—*षड्भिरिति* ॥ षड्भिः अङ्गैः, विविधैरव्ययैरपि उपेताय शाश्वताय वेदाय च भवाय च नमस्कुर्म इति योजना। वेदस्य षडङ्गानि—शिक्षा-कल्प-व्याकरण-निरुक्त-ज्योतिश्छन्दांसि । वेदस्याव्ययाः = चादयः । एवं वेदस्य शाश्वतत्वम् । तच्च वेदस्यापौरुषेयत्ववादिमतमादाय बोध्यम् । एवं भवस्य = शङ्करस्य षडङ्गानि—"सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः । अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥" इति श्लोकोक्तानि। एवं भवस्य अव्ययाः,—"ज्ञानं विरागतैश्वर्यं तपः सत्यं क्षमा धृतिः । द्रष्टृत्वमात्मसंबोधो ह्यधिष्ठातृत्वमेव च । अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥" इति श्लोकोक्तानि । एवं शाश्वतत्वं भवस्य प्रसिद्धमेव । तथाचोक्तषडङ्गोपेतत्व-विविधाव्ययोपेतत्व-शाश्वतत्वविशेषणविशिष्टाय वेदाय च भवाय च नमस्कुर्म इति योजनीयम् ॥ ३ ॥ "आदित्यस्य सदा पूजां तिलकस्वामिनस्तथा । महागणपतेश्चैव कुर्वन् सिद्धिमवाप्नुयात् ॥" इति स्मृत्या मार्तण्ड-तिलकस्वामि-महागणपतीनां वाञ्छितसकलार्थदातृत्वेन प्रसिद्धत्वात् तेऽप्यवश्यं नमस्कार्या इति मत्वा तान् नमस्करोति—*मार्तण्डेति* ॥ तिलकप्रियः स्वामी तिलकस्वामी=स्कन्दः । यत एव विश्ववाञ्छितसिद्धिदत्वम्, अत एव विश्ववन्द्यत्वं द्रष्टव्यम् । विश्वशब्दो विश्वस्थजनमात्रलक्षकः ॥ ४ ॥ सूत्रव्याख्यानभूतभाष्यस्य व्याचिकीर्षितत्वात् सूत्रार्थस्फूर्तये सूत्रकर्तारं नमस्करोति—*ब्रह्मसूत्रकृते इति* ॥ हरेः ज्ञानशक्तेः अवतारो यस्मिन् स तथोक्तः, तस्मै वेधसे विधात्रे ईश्वराय । हरेः ज्ञानशक्त्यवतारत्वादेव ईश्वरत्वं बोध्यम् । *भगवते = "उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥" इत्युक्तलक्षणलक्षितो यः, तस्मै । *तस्मै = प्रसिद्धाय । *ब्रह्मसूत्रकृते = वेदव्यासाय नम इति योजना । व्यासस्य हरेः ज्ञानावतारत्वमुक्तम्, तत् कथम् ? इति चेत्—"द्वापरे द्वापरे चैवं व्यासरूपी महामुने । वेदमेकं सुबहुधा कुरुते जगतो हितम् ॥" इति वचनेन तस्य तदवतारत्वमवगम्यते इति द्रष्टव्यम् ॥ ५ ॥ भाष्यकर्तारं नमस्कुर्वन् तत्कृतं भाष्यं व्याख्यायत इति चिकीर्षितं प्रतिजानीते—*नत्वेति* ॥ *विशुद्धम् = निर्मलम्, निर्विचिकित्समिति

भामती

आचार्यकृतिनिवेशनमप्यवधूतं वचोऽस्मदादीनाम् । रथ्योदकमिव गङ्गाप्रवाहपातः पवित्रयति ॥ ७ ॥

अथ यदसंदिग्धमप्रयोजनं च न तत्प्रेक्षावत्प्रतिपित्सागोचरः ; यथा समनस्केन्द्रियसंनिकृष्टः

ऋजुप्रकाशिका

यावत् । तादृशं विज्ञानं यस्य स तथोक्तः, तम् । *करुणानिधिम् = दयासमुद्रम् । *शङ्करम् = शङ्कराचार्यम् । *नत्वा=नमस्कृत्य ; *तत्प्रणीतम् = तत्कृतम् । *प्रसन्नगम्भीरम् = आपाततः प्रसन्नम्, विचारणायां तु गम्भीरमित्यर्थः । तादृशं भाष्यं विभज्यते=विविच्य व्याख्यायत इत्यर्थः ॥ ६ ॥ स्वस्य व्याख्यातृत्वप्रयुक्तं गर्वं परैः शङ्क्यमानं परिहरन्नाह—*आचार्येति* ॥ रथ्योदकस्य गङ्गाप्रवाहपातो यथाऽवधूतम्=अपवित्रमपि रथ्योदकं पवित्रयति, तथा अस्मदादीनां वचसः, *आचार्यकृतिनिवेशनम्=आचार्यकृतौ भाष्ये प्रवेशनम्, अवधूतमपि अपूतमपि अपवित्रमपि अस्मदादीनां वचः पवित्रयतीत्यर्थः । "अपूतमवधूतं स्यात्" इति शब्दार्णवे । तथाच तत्कृतिव्याख्यानेन वयं कृतार्थाः स्म इति भावः ॥ ७ ॥

इह विवेकः, वैराग्यम्, शमदमादिः, मुमुक्षुत्वं चेति यत्साधनचतुष्टयम्, तद्वन्तं प्रति "अथातो ब्रह्मजिज्ञासा" इति भगवता सूत्रकारेण ब्रह्मजिज्ञासा उपदिष्टा । जिज्ञासा च अभिन्नस्यैव ब्रह्मणो वाच्या, न भिन्नस्य ; "द्वितीयाद्वै भयं भवति", "उदरमन्तरं कुरुते, अथ तस्य भयं भवति", "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिश्रुतिभिः भेदज्ञानादनर्थश्रवणेन भिन्नब्रह्मज्ञानस्य इच्छाविषयत्वायोगात् ; अतोऽभिन्नस्यैव ब्रह्मणो जिज्ञास्यत्वं मतम् ॥ *एतदत्राऽऽक्षिप्यते—इदमनुपपन्नम् ; किञ्चिज्ज्ञत्व-कर्तृत्व-भोक्तृत्वादिधर्मवता जीवेनाऽसमर्थेन सह सर्वज्ञाकर्त्रभोक्तृब्रह्मणः तद्विरुद्धत्वेनाभेदायोगात्, नच—किञ्चिज्ज्ञत्व-कर्तृत्व-भोक्तृत्व-सर्वज्ञत्वादीनामध्यस्तत्वेन वास्तवत्वाभावात् जीवब्रह्मणोरभेदो युज्यत इत्यभिन्नस्यैव ब्रह्मणः सन्दिग्धत्व-सप्रयोजनत्वाभ्यां जिज्ञास्यत्वं वाच्यमिति—वाच्यम् ; अध्यासस्यैवासंभवात्—इत्येवंरूपेणाध्यासाक्षेपपरतां "युष्मदस्मदि"त्यादिनः "तथापी"त्यतः प्राक्तनस्य भाष्यस्य दर्शयन्, "तथापी"त्यादिनः "आह कोऽयमि"त्यतः प्राक्तनस्य भाष्यस्य तदाक्षेपपरिहारपरतां दर्शयति—*अथेत्यादिना परिहरति इत्यन्तेन* ॥ *ननु*—आनन्तर्यवाची "अथ यदसंदिग्धमि"त्यत्रत्योऽथशब्दोऽनुपपन्नः ; आनन्तर्यप्रतियोगिनोऽकथनादिति—चेत्, *न* ; अत्रत्याथशब्दस्य प्रतिग्रन्थव्याख्यानारम्भपरत्वेनोपपत्तेः, आरम्भार्थत्वेनाप्यथशब्दस्य तत्र तत्र प्रयोगदर्शनात् । *ननु*—"तत् पुनर्ब्रह्म"-

भाष्यभावप्रकाशिका

नानानिबन्ध-पद-लब्धसदर्थमाना सत्संप्रदाय पदवीरनुवर्तमाना ।
वाचस्पतेरपि वचांसि विवर्तयन्ती वागीश्वरीव विदुषां कृतिरिष्टदैषा ॥

"तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम्" "अयमात्मा ब्रह्मे"त्यादिवाक्यप्रतिपन्नं जीवब्रह्मणोरेकत्वलक्षणं विषयम्, "ब्रह्मविदाप्नोति परम्," "तरति शोकमात्मविदि'त्यादि श्रुतिप्रतिपन्नं प्रयोजनं च

प्रदीपः

एवेति प्रतिभाति । आत्मवादोऽपि शाबरभाष्यगतो वृत्तिकाराणामेव, न तु शबरस्वामिनामिति व्यक्तमिदमन्यत्र । उपनिषदामर्थवादत्वोक्तिस्तु कुमारिलपादानां प्रौढिवादमात्रम्, कर्मप्रवणतानिबन्धनं वा ; यतो "न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्" । ब्रह्मज्ञानं हि भास्करमते कुमारिलमते चोपासनारूपमेव । नहि तयोः परस्परविरोधः, इति न तत्समुच्चयासंभवः । उपास्यं तु ब्रह्म कल्पितं वोत पारमार्थिकमिति त्वन्यदेतत् । सर्वथा तु ज्ञानकर्मसमुच्चयो न विरुध्यत इति तदीयो निष्कर्षः । विज्ञानभिक्षुरपि ज्ञानकर्मसमुच्चयमेवाभिप्रैतीति तदीयभाष्य एव व्यक्तम् । अयं च समुच्चयः पूर्वोत्तरमीमांसयोरेकशास्त्रतावाद एव संभवतीति विंशत्यध्यायात्मकमेव ब्रह्ममीमांसाशास्त्रमिति तदीयं हृदयम् ॥

ऋजुविवरणम्

असितजलदरूपं सच्चिदानन्दरूपं निजभुजजितराज्यं निर्जरेशेड्यपूज्यम् ॥
नतजनहितरामं संश्रये स्वात्मरामं जगदवनकृतं तं भासयन्तं नितान्तम् ॥१॥
जगन्निर्माणनिपुण मोहनिर्वाहहेतवे ॥ नमोऽनन्तसुखप्रत्यग्बोधरूपाय विष्णवे ॥२॥
यत्प्रसादसमावाप्तधीविकाससमन्वितः ॥ समर्थो वदितुं सम्यक् तां नमामि सरस्वतीम् ॥३॥
अप्रबोधान्यथाबोधविघ्नसङ्घनिपीडितः ॥ मनः करोमि विघ्नेश त्वत्पदद्वन्द्ववन्दने ॥४॥

तत्त्वदीपनम्

यद्बोधसमुद्भूतं यद्बोधात्प्रविलीयते ॥ नामरूपात्मकं विश्वं तस्मै पूर्णात्मने नमः ॥१॥
जटाजूटं बिभ्रत् क्वचिदपरभागे भृतकचः तथैकस्मिन् भागे भसितमपरत्राऽऽस्रबुसृगः ॥
फणीन्द्रं कस्मिंश्चिन्मणिगणधरोऽन्यत्र भगवान् गिरीशः श्रेयो नः प्रदिशतु शिवासिश्रितवपुः ॥२॥
दिक्कूलङ्कषकीर्तिफेनविशदप्रोद्दामविद्याजल भ्राम्यद्वाङ्मयतुङ्गभङ्गविलसत्तीर्थप्रभेदास्पदम् ॥
वादिव्रातकथाप्रसङ्गविसरत्तर्कौरसमसारोज्ज्वलं वन्दे सर्वमुनीन्द्रसेव्यमनिशं श्रीबोधपृथ्वीधरम् ॥३॥
वादिवारणसंदोह प्रभञ्जनविशारदम् । श्रीमदानन्दशैलाह्वपञ्चास्यं सततं भजे ॥ ४ ॥

वार्तिकम्

यस्मिन्न जगद् भ्रमति काशतृणं यथाब्धौ यस्माज्जगद्भवति नाशमुपैति यस्मिन् ॥
सत्यः सुखैकतनुभासुरबोधरूपो रामोऽहमेव न परः खलु मत्त आस्ते ॥ १ ॥
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ॥
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥ २ ॥
शम्भुविष्ण्ववतारौ यौ व्यासशङ्करशब्दितौ ॥ गोविन्दमाधवौ पश्चाज्ज्ञातौ भक्त्या नमामि तौ ॥ ३ ॥
तत्प्रसादलवेनैव कुर्वे वार्तिकमञ्जसा ॥ श्रीमच्छारीरके भाष्ये नारायणसरस्वती ॥ ४ ॥

वेदान्तमीमांसापृथक्कर्तव्यतासमर्थनपरमिदमादिमं सूत्रम्—"अथातो ब्रह्मजिज्ञासे"ति। तस्यानुसन्धानभाष्यम्—"युष्मदस्मदि"त्यादि—"वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्र"मित्यन्तम्। कथम्? "तद्विजिज्ञासस्व" इति श्रुत्या वेदान्तवाक्यानां हि विचारकर्तव्यतोपदिश्यते। * ननु*—एतदयुक्तम्; पदोपस्थापितपदार्थस्यैव शाब्दबोधेऽन्वयप्रतियोगित्वात्, नन्वेतदप्ययुक्तम्; "श्वेतोऽश्वो धावति" इत्यत्रोक्तनियमस्य व्यभिचारात्, तत्र हि प्रत्यक्षानुमानाभ्यामुपस्थितानामेव श्वेताश्वत्वधावनपदार्थानामन्वयप्रतियोग्यनुयोगिभावेन व्यवस्थितत्वात्, नच तत्र शाब्दत्वमसिद्धम्; प्रमाणान्तराप्रसरेण शाब्दत्वव्यवस्थितेः, आकाङ्क्षादिविशिष्टपदार्थधीजन्यज्ञानस्यैव तत्त्वात्। तस्मात्पदोपस्थितपदार्थस्यैवान्वयप्रतियोगित्वनियमोऽसिद्ध इति चेत्, न; व्यभिचारासिद्धेः, "श्वेतोऽश्वो धावति" इति बुद्धेरानुमानिकत्वात्। नच—दूरं गतस्य धावतोऽश्वस्य श्वेतपिण्डं पश्यतः खुरविक्षेपहेषाशब्दौ च शृण्वतः पुरुषस्याश्वधावद्व्यक्त्योः प्रत्येकं लिङ्गे सत्यपि विशिष्टलिङ्गाभावान्न विशिष्टधीरिति—वाच्यम्; अयं श्वेतः, धावन्नश्वो भवितुमर्हति, खुरविक्षेपशब्दवत्त्वे सति हेषाशब्दवत्त्वादिति विशिष्टलिङ्गसम्भवात्तदभावासिद्धेः। नच तत्सम्भवेऽपि पक्षे तद्ग्रहासिद्धिः; काव्यादिव मनसोपनीततद्ग्रहोपपत्तेः। तस्मात्सिद्धम्—पदोपस्थितपदार्थस्यैवान्वयप्रतियोग्यनुयोगिभावेन भानम्—इति, *अत्रोच्यते*; "यतो वा इमानि भूतानि जायन्ते" इत्यादिवाक्योक्तजगज्जन्मादिकारणं ब्रह्म तच्छब्दार्थः।

ऋजुविवरणम्

शमादिसेनां निजरूपजैत्रीं संबृह्य मोहं परिपन्थि दैत्यम् ॥
यो मुक्तिसीतां समवाप जित्वा तमिन्द्रपूर्णं प्रणतोऽस्मि रामम् ॥ ५ ॥
ज्ञानाम्बुजं धर्मपयोनिधिं यो विकासयन्नेकगवाऽनिशं तम् ॥
ब्रध्नेन्दुरूपं कृपया बिभर्त्ति तमोनिरासं प्रणतोऽस्मि विष्णुम् ॥ ६ ॥
गुरुवरकरुणाप्तं भावबोधं समीक्ष्य ग्रहणककृतिरूपं संप्रदायानुरूपम् ॥
ऋजुविवरणसंज्ञं ख्यापनार्थं परेषां विवरणगतभावं बोद्धुमेतत्करोमि ॥ ७ ॥
यथा स्थिता व्याकृतिरन्यथा च सोपस्करा भावविवेचनी च ॥
मेयोपसंहारभिदैकतादौ भावाभिधानाय तथोपपत्तेः ॥ ८ ॥
संदंशेन च रीत्या वा व्याख्यानेन विनापि यत् ॥
ज्ञायते विस्तराद्भीतो विवृणोमि विहाय तत् ॥ ९ ॥

वार्तिकम्

"विजिज्ञासस्व" इत्यत्र सोपसर्गस्य ज्ञाधातोः साक्षात्काररूपं ज्ञानम्, सनस्त्विच्छा, लोटो विधिभावने। न चैषामेकतरोऽपि पदार्थो वेदान्तवाक्यविचारः, येनोक्तवाक्यार्थः स्यादिति, *नैष दोषः* ; श्रुतोपपत्तिकलाक्षणिकपदार्थयोरपि पदोपस्थापितत्वात्, अन्यथाऽपूर्वादीनामशब्दार्थतापत्तेः, प्रकृते च वेदान्तमीमांसायाः फलतदिच्छयोरन्तर्णीतत्वात् कृतिसाध्यत्वेनान्वययोग्यत्वाच्च लक्षणया श्रुतार्थापत्त्या वोपस्थितौ वाक्यार्थान्वयित्वमित्यविरोधः॥ तत्र भावनावादे प्रत्ययेन 'भावयेदि'त्युपस्थितौ तस्याः फलकरणेतिकर्तव्यतात्मकत्र्यंशत्वात् सामान्यतस्तल्लाभेऽपि विशेषतोऽलाभात्—किम्? केन? कथम्? इति तदाकाङ्क्षायामिच्छाविषयतया प्रकृत्यर्थस्योपस्थितेः, तेनैव किमित्यंशपूरणेऽपि करणेतिकर्तव्यतांशयोः साक्षादश्रवणात्, इष्यमाणब्रह्मज्ञानस्य प्रमाणनियतत्वात्, प्रमाणान्तरासम्भवात्, "तं त्वौपनिषदं पुरुषम्" इत्यौपनिषदत्वश्रुतेश्च योग्यतया सन्निधानाच्च प्रकृत्यैवाऽजहत्स्वार्थलक्षणयाऽऽक्षेपेण वोपस्थापितेन गृहीतशक्तितात्पर्यकवेदान्तवाक्येनैव करणांशः पूर्यते, प्रकरणेन च शमदमादिना मननादिना चेतिकर्तव्यतांश इति। नच—एवं सति सन्निधानादेव वेदान्तवाक्यान्वयलाभाल्लक्षणा व्यर्थेति—वाच्यम्; वेदान्तवाक्यसन्निधानेऽपि तद्वाचकपदासन्निधेः, पदोपस्थापितपदार्थस्यैवान्वयप्रतियोगित्वाल्लक्षणावश्यकत्वात्, आक्षेपलक्षणयोस्त्वाक्षेपे श्रुतिकल्पना, लक्षणायां तु नैवमिति परं भेदः॥ इष्टसाधनताविधिवादेऽप्येवम्। तत्रापि प्रत्ययेन इष्टसाधनत्वमित्युपस्थितौ—किमिष्टम्? किं वा तत्साधनम्? इति विशेषाकाङ्क्षायां प्रकृत्याऽजहत्स्वार्थलक्षणया तदुभयाकाङ्क्षापूरणम्। लक्षणाप्रवृत्तिनिमित्तं तु "तत्सिद्धि" रित्यन्यत्। नच—एवं ज्ञानस्यापि साधनांशे प्रवेशात् मोक्षैकफलसाधकत्वेन "यजमानः प्रस्तरः" इतिवत् न किमंशप्रवेशित्वमिति—वाच्यम्; "सोमेन यजेत" इतिवत् विशिष्टविधौ पार्ष्ठिकान्वये यागवत्तत्फलत्वान्वयोपपत्तेः। *ननु*—एवमपि विचारो न लब्धः; वेदान्तवाक्यानामेव करणत्वेनान्वयात्, *नैष दोषः* ; गृहीतशक्तितात्पर्यकेति विशेषणात्तल्लब्धेः। न ह्यगृहीतशक्तितात्पर्यकाणां वेदान्तवाक्यानामुक्तज्ञानकरणत्वमस्ति, छिदाकरणत्वमिवोद्यमननिपातनरहितस्य कुठारस्य। नच विचारमन्तरेण शक्तितात्पर्यग्रहः; अतो विचारोऽपि तदन्तःपातीति श्लिष्टम्॥ *ननु*—एवं सति विचारस्यापि शाब्दज्ञानजनने पदार्थज्ञानवत् सहकारिकारणत्वं स्यात्, न चैतदिष्टम्; लोके प्रत्यक्षादिना गृहीतशक्तिकस्य शब्दश्रवणसमनन्तरं तमन्तरेणापि वाक्यार्थबोधदर्शनात्, * न * ; प्रकृतेऽपि तदसिद्धेः। विचारो हि नाम प्रमाणानुकूलयुक्त्यनुसन्धानम्। नच तत् प्रमाणशरीरे तत्कार्यजननाय प्रविशति; कुठारादिषु

पञ्चपादिकाविवरणम्

पालने विमलसत्त्ववृत्तये, जन्मकर्मणि रजोजुषे, लये ॥
तामसाय जगतः, पराकृतद्वैतजालवपुषे नमः सते ॥ १ ॥

ऋजुविवरणम्

शास्त्रारम्भेऽभिमतप्रयोजनसिद्ध्यर्थं परदेवतात्वेन प्रतिपाद्यमानं ब्रह्म आदौ नमस्करोति—*पालने विमलसत्त्ववृत्तय इति * ॥ विमलसत्त्ववद् वृत्तिर्यस्येति विग्रहः ; स्थितिहेतुत्वात् । यद्वा—सत्त्वतो वर्तनं यस्येति वृत्तिवद् वृत्तिरिति च उत्तरार्धसामर्थ्यान्निश्चीयते । इतरत्राप्येवम् । *ननु*—नमस्कारश्लोके पालनादिनिमित्तं नमस्कार्यस्य गुणावच्छेदप्रतिपादनमप्रयोजनम्, *मैवम् * ; तटस्थलक्षणप्रदर्शनार्थत्वात्, अथवा—ब्रह्मनमस्कारे सति विष्ण्वादीनामपि नमस्कारप्रदर्शनार्थम् । यद्वा—सते नम इत्युक्ते तस्य जडत्वेन प्रसिद्धत्वात् एतदपि तादृशमित्याशङ्कायां चेतनतासाधकजगत्कारणताप्रतिपादनार्थम् । यद्वा—नमस्कार्यस्य परत्वं बृहत्वं च न संभवति ; विष्ण्वादीनामपि जगत्कारणत्वेन परत्वप्रसिद्धेः, इत्याशङ्क्य तेषामपि एतदात्मत्वप्रतिपादनार्थम् । किमर्थमेतद्वक्ष्यमाणप्रदर्शनं कृतम् ? उच्यते ; आद्यत्वात् । तर्हि ब्रह्मणः सविशेषत्वं स्यात्, इत्याशङ्क्याह—* पराकृतेति * ॥ द्वैतजालमेव वपुः द्वैतजालवपुः शरीरं तत् पराकृतं तिरस्कृतं यस्मिन्निति विग्रहः । द्वैतजालस्य वा वपुः स्वरूपं पराकृतं यस्मिन्निति । अथवा—पराकृतद्वैतजालमेव वपुः स्वरूपं यस्येति विग्रहः । नमसा लक्षणत्रयलक्षितेन जीवस्यैकत्वं प्रतिपाद्यते । "णमु प्रह्वत्वे शब्दे" इत्यनुशासनात् अस्यापि तदर्थत्वात् । प्रह्वता च तदेकत्वोन्मुखीभावः ; पराकृतेति भेदनिषेधप्रतीतेः ।

तत्त्वदीपनम्

विमलमदजलौघद्योतमानोरुगण्ड-स्थलनिकटनिकुञ्जद्भ्राजमानालिमालः ॥
जयति पृथुलकण्ठाबद्धमालेन्द्रनीलावलिरिव सुरसिद्धाराधितो विघ्नराजः ॥ ५ ॥
आधारपङ्केरुहमध्य-संस्था मृणालसूत्राकृतिरप्रमेया ॥
शीर्षादिभेदस्थितसर्ववर्णा जिह्वाङ्गने नृत्यतु वागजस्रम् ॥ ६ ॥
नानाविधनिबन्धाद्यप्रसूनरसमादरात् । निबन्धमधु संगृह्य क्रियते तत्त्वदीपनम् ॥ ७ ॥

पञ्चपादिकां व्याचिख्यासुः ग्रन्थकरणयोग्यतार्थं परदेवतां प्रार्थयत आद्यश्लोकेन । "यमेवैष वृणुते तेन लभ्य" इति ईश्वराधीनत्वं विद्याया लक्ष्यते । विदुषश्च ग्रन्थकरणाधिकारात्परदेवताप्रार्थनमुचितम् । अथैषाऽक्षरयोजना—सते नम इति संबन्धः । ननु—किं नमस्कार्यं सत् ? अचेतनम् चेतनं वा, आद्ये न नमस्कार्यता ; घटादिवत् । द्वितीयेऽपि किं जीवात्मा, उत ब्रह्म ? प्रथमे किं नमस्कर्तुरनन्यत्, उतान्यत् ? नाद्यः ; नमस्कर्तृनमस्कार्यभावस्यैकस्मिन्नयोगात, द्वितीयेऽपि किं तात्त्विकमुतातात्त्विकम् ? आद्येऽद्वैतक्षतिः, अन्त्ये न सच्छब्दं स्यात्, सच्छब्दं ब्रह्मेति पक्षे तस्य पूर्णत्वान्न नमस्कर्तृनमस्कार्यता, इत्याशङ्क्य कारणत्वाक्रान्तं ब्रह्म नमस्कार्यमित्याह—*पालन इति* ॥ जगत इत्येतत्पदं पालनजन्मलयैः संबध्यते । पालने उद्देश्ये सतीत्यर्थः । *विमलम्=रजस्तमोभ्यामनभिभूतं यत्सत्त्वम्, तस्मिन् वृत्तिर्वर्तनं प्रतिबिम्बता यस्य, तद्विमलसत्त्ववृत्ति ; तस्मै । रजस्तमसोरपि भावान्न सत्त्वोपाधिकं पालयितृत्वमिति शङ्कां निराकर्तुम्—"विमले"ति विशेषणम् । रजस्तमसोरभिभूतत्वात्सत्त्वस्योद्भूतत्वात्तदुपाधेः पालनहेतुत्वमुचितमित्यर्थः । उत्तरत्राप्यभिभूतत्वं द्रष्टव्यम् । विमलं च तत्सत्त्वं चेति विमलसत्त्वम्, तस्य वृत्तिः परिणामो यस्य, तद्विमलसत्त्ववृत्ति ; तस्मै इति

वार्तिकम्

स्वकार्यजनने तददर्शनात्, किं तर्हि ? सति प्रतिबन्धे तन्निरासितया प्रमाणानुकूलं भवति, नतु तत्कार्येऽपि तस्य व्यापारः ; प्रतिबन्धाभावे सति स्वयमेव तज्जननसमर्थत्वात् प्रमाणस्य ; अन्यथा करणत्वहानेः । प्रकृते च यद्यपि तत्त्वमस्यादिवाक्यं वाक्यार्थबोधजनने स्वयमेव समर्थम् ; तथापि शक्ति-

पञ्चपादिकाविवरणम्

यस्याः प्रसादमवलम्ब्य जगद्गुरूणामप्यस्खलद्बहुगुणाः प्रसरन्ति वाचः ॥
सा वेदशास्त्रपरिनिर्मितवन्द्यदेहा भूयात्समग्रवरदैव सरस्वती नः ॥ २ ॥
विघ्नाभितापमपहृत्य मदीयकृत्यबीजं प्रवृद्धमदनुग्रहवर्षपातैः ॥
संप्रार्थितः सिततरोऽपि गणेशमेघः सिञ्चन्नभीष्टफलमङ्कुरयत्वमोघम् ॥ ३ ॥

ऋजुविवरणम्

अनन्तरमस्खलद्बहुगुणवाक्प्रसरलाभार्थं सरस्वतीं नमस्करोति—* यस्या इति * ॥ न स्खलन्त्यः अस्खलन्त्यः, बहवो गुणा यासां ता बहुगुणाः, अस्खलन्त्यश्च ता बहुगुणाश्चेति विग्रहः । यद्वा—अस्खलन्तो बहवो गुणा यासु ताः अस्खलद्बहुगुणा इति विग्रहः । कथं सरस्वतीनमस्कारेण तल्लाभ इति ? तदाह—* सा वेदशास्त्रेति* ॥ शास्त्राभिमानित्वादिति भावः । ननु गणेशस्यादौ नमस्कारः शङ्कनीयः ; अवाप्तग्रन्थकरणसामर्थ्यस्य विघ्ननिर्हरणाशङ्का यतः । अनन्तरं विघ्ननिर्हरणार्थं गणेशं नमस्करोति—* विघ्नाभितापमपहृत्येति * ॥ शारीरकसूत्रकर्तृत्वात्तद्विषयमतिविकासार्थं

तत्त्वदीपनम्

वा विग्रहः । इदमिदानीं पालयितव्यमित्येवमाकारः सत्त्वस्य परिणामभेदः कदाचिदुदेति, तस्मिन् प्रतिबिम्बितचैतन्यं पालकम्, तदभिप्रेत्य वृत्तिशब्दप्रयोग इति । तर्हि ब्रह्म पालकमस्तु, विधिरुद्रौ तु स्रष्टृसंहर्ताराविति पुराणप्रक्रियामाशङ्क्य, तयोः कार्यत्वेन निखिलसर्जनसंहरणसामर्थ्याभावादखण्डं रजस्तमोभ्यामुपहितं ब्रह्म स्रष्टृ संहर्तृ चेत्याह—*जन्मेत्यारभ्य जगत इत्यन्तेन* ॥ न च कर्मपदवैयर्थ्यम् ; जगतः सत्तासमवायसंबन्धलक्षणजन्मघटकव्यापारस्य विवक्षितत्वात, सकर्तृकत्वद्योतनार्थत्वाद्वेति द्रष्टव्यम् । न च—गुणोपहितब्रह्मकारणत्वेऽविद्योपहितस्य कारणत्वप्रतिपादकश्रुत्या विरोध इति—शङ्क्यम् ; "देवात्मशक्तिं स्वगुणैर्निगूढा"मित्यादिवाक्यादविद्यायाः सत्त्वाद्यात्मत्वप्रतिपत्तेः सत्त्वाद्युपहितस्य कारणत्वोक्त्याऽविद्यावतः कारणत्वस्य विवक्षितत्वादित्यर्थः । "सर्वकर्मे"त्यादिश्रुतेः कारणरूपं तात्त्विकमित्याशङ्क्य, तात्पर्यलिङ्गानुगृहीतनिर्विशेषवस्तुप्रतिपादकवेदवचनविरोधान्नैवमित्याह—*पराकृतेति* ॥ पराकृतं द्वैतजालं वपुर्यस्मिन् तत्, पराकृतद्वैतजालवपुः, तस्मै । अथवा पराकृतद्वैतजालं वपू रूपं यत् तत्तथोक्तम् । षष्ठी च कल्पितभेदाभिप्रायेण द्रष्टव्या ॥ १ ॥ परानुग्रहलब्धविद्यः सन् स्वविद्यां ग्रन्थरूपेण प्रसारयितुं वाग्देवतां प्रार्थयते—*यस्या इति* ॥ सा सरस्वती नः समग्रवरदैव भूयाद् इति संबन्धः । तस्याः समग्रवरदत्वं कुतः ? इत्याशङ्क्य प्रसिद्धेरित्याह—*यस्या इति* ॥ जगद्गुरूणां वाचस्पतिपुरोगाणामपि वाचो यस्याः प्रसादमवलम्ब्याऽस्खलद्बहुगुणाः प्रसरन्तीति संबन्धः । अस्खलन्तो बहवो गुणा यासु ताः, अस्खलद्बहुगुणाः, अस्खलन्त्यश्च ता बहुगुणाश्चेति वा । के ते गुणाः ?

"श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थव्यक्तिस्तथा कान्तिरुदारत्वमुदात्तता ॥"
ओजस्तथाऽन्यदौर्जित्यं प्रेयानथ सुशब्दता । प्रौढिः समाधिः सौक्ष्म्यं च गाम्भीर्यमथ विस्तरः ॥
संक्षेपः संमितत्वं च भाविकत्वं गतिस्तथा । रीतिरुक्तिस्तथा प्रीतिरिति षड्विंशतिः स्मृता ॥" इति ।

अत्र युक्तिमाह—*वेदेति* ॥ वेदाश्च शास्त्राणि चेति वेदशास्त्राणि, तैः परिनिर्मितो वन्द्यो देहो यस्याः सा तथोक्ता ॥ सरस्वत्या वागभिमानिदेवतात्वात्तासां तदधीनत्वं युक्तमित्यर्थः ॥ २ ॥ "श्रेयांसि बहुविघ्नानि भवन्ति महतामपी"ति वचनादाध्यात्मिकाद्यनेकोपद्रवप्रतिपत्तेस्तन्निरासार्थं गणेशं प्रार्थयते—*विघ्नेति* ॥ गणेशमेघो मदीयकृत्यबीजममोघं यथा स्यात्, तथाऽङ्कुरयत्वित्यन्वयः । मेघसारूप्यमाह—*विघ्नेति* ॥ प्रवृद्धमदनुग्रहवर्षपातैः विघ्नाभितापमपहृत्य मदीयकृत्यबीजं सिञ्चत्विति संबन्धः । प्रवृद्धाश्च ते मदनुग्रहाश्चेति प्रवृद्धमदनुग्रहाः, त एव वर्षाणि प्रवृद्धमदनुग्रहवर्षाणि ; तेषां पातैः । प्रसिद्धो हि मेघो वर्षपातेन तापं निरस्य बीजमङ्कुरयति, अयमप्यनुग्रहाख्यवृष्ट्याऽऽध्यात्मिकादितापनिरासेन मदीयं कृत्यबीजमङ्कुरयत्वित्यर्थः । *सिततरोऽपीति प्रसिद्धमेघादतिशयमाह । नीलनीरदो हि वृष्टिं कुर्वन् अङ्कुरयति, अयं तु सिततरोऽपीत्यतिशयः । *अभीष्टफलमिति* ॥ *अनर्थनिवृत्त्यादिफल-

भामती

स्फीतालोकमध्यवर्ती घटः, करटदन्ता वा ; तथा चेदं ब्रह्म, इति व्यापकविरुद्धोपलब्धिः। तथाहि— *बृहत्त्वाद् बृंहणत्वाद्वाऽऽत्मैव ब्रह्मेति गीयते*॥ स चायमाकीटपतङ्गेभ्य आ च देवर्षिभ्यः प्राणभृन्मात्रस्येदं-

ऋजुप्रकाशिका

त्यादिना अत्र ब्रह्मणो जिज्ञास्यत्वाऽऽक्षेपोऽनुपपन्नः ; पौनरुक्त्यादिति—चेत्, *न* ; आत्मन एव बृहत्त्वात् ब्रह्मत्वम्, तस्य ब्रह्मणोऽहंप्रत्ययेनैव सिद्धत्वात् सन्देहाभावात् वक्ष्यमाणविधया प्रयोजनाभावाच्च न जिज्ञास्यत्व-मित्याक्षेप इति जिज्ञास्यत्वाक्षेपभेदेनापौनरुक्त्यात्। *प्रतिपित्सा=जिज्ञासा। तथाच "न तत्प्रेक्षावत्प्रतिपित्सा-गोचर" इत्यस्य न तत्प्रेक्षावज्जिज्ञासागोचर इत्यर्थः। असन्दिग्धस्य प्रतिपित्सागोचरत्वाभावे दृष्टान्तमाह—*यथा समनस्केति*॥ अप्रयोजनस्य प्रतिपित्सागोचरत्वाभावे दृष्टान्तमाह—*करटेति*॥ करटदन्तविचारेण प्रयोजनाभावादिति भावः। अस्त्वसन्दिग्धाप्रयोजनयोरजिज्ञास्यत्वम्, ततः किम्? इत्यत आह—*तथाचेद-मिति*॥ इदं च ब्रह्म *तथा=असन्दिग्धमप्रयोजनं चेत्यर्थः। ततोऽपि किम्? तत्राह—*व्यापकेति*॥ जिज्ञा-स्यत्वं सन्दिग्धत्वसप्रयोजनत्वव्यापकम्, एवं सन्दिग्धत्वसप्रयोजनत्वे अपि जिज्ञास्यत्वव्यापके ; समव्याप्त्यङ्गी-कारात्। तथाच जिज्ञास्यत्वव्यापकसन्दिग्धत्वसप्रयोजनत्वविरुद्धयोः सन्दिग्धत्वाभाव-सप्रयोजनत्वाभावयोरत्र ब्रह्मण्युपलम्भात् व्यापकाभावात् व्याप्यजिज्ञास्यत्वाभाव इति भावः। तथाचेत्थमनुमानम्—मुमुक्षुणा, ब्रह्म न जिज्ञास्यम्, न विचार्यम् ; असन्दिग्धत्वात्, समनस्केन्द्रियसन्निकृष्टस्फीतालोकमध्यवर्तिघटवत् ; अप्रयोजनत्वात्, काकदन्तवदिति। अत्र ब्रह्म पक्षः, अजिज्ञास्यत्वरूपमविचार्यत्वं साध्यम्, असन्दिग्धत्वं हेतुः, तथा अप्रयोजनत्व-मपि हेतुः। आद्यहेतौ घटस्य दृष्टान्तत्वम्, द्वितीयहेतौ काकदन्तदृष्टान्तत्वं बोध्यम्। आद्यहेतुं प्रपञ्चयति—*तथाहीति*॥ *बृंहणत्वाद्वेति*॥ देहादिपरिणमयितृत्वाद्वेत्यर्थः। *आत्मैवेति*॥ "परिणामि तु देहादेः बृंहणं ब्रह्मसंज्ञकम्। आत्मैवैवंविधः प्रोक्तो भिन्नोऽहमिति निश्चितः॥" इति वचनात्। एवंविध आत्मैव ब्रह्मेत्यर्थः। तादृशस्य ब्रह्मणः सद्वितीयत्वात्, तस्य 'अहं कर्ता' 'अहं भोक्ता' 'अहं किञ्चिज्ज्ञः' इति कर्तृत्वभोक्तृ-त्वादिमत्तया निश्चितत्वात्, कर्तृत्वादेश्चाबाध्यत्वेन वास्तवत्वात्, अध्यस्तत्वाभावेन तथाविधात्माऽभिन्नब्रह्मा-भावात्, अभेदप्रतिपादकवेदान्तानामभेदोपासनापरतया स्वार्थपरत्वाभावेनोपचरितार्थत्वात् अभिन्नं ब्रह्म जिज्ञास्य-मित्ययुक्तमित्यभिसन्धिः। ईदृशाभिसन्धिं प्रपञ्चयति—*स चायमिति*॥ आत्मेत्यर्थः। *इदंकारास्पदेभ्यः=

प्रदीपः

* भगवद्रामानुजादयस्तु मन्वते—सत्यं न विरोधो ज्ञानकर्मणोः, तथापि तु न तयोः समप्राधान्यम्। शास्त्राणि मुक्तिसाधनं ब्रह्मोपासनामात्रं प्रतिपादयन्ति, नतु कर्मापि। कर्म तु चित्तशुद्धिद्वारा ब्रह्मज्ञानोपकारकमात्रं तदङ्गमेव भवितुमर्हति, नतु मोक्षसाधनमपि। उपकारकत्वं च कर्मणोऽनुष्ठानद्वारा तत्तज्जन्मन्येव संभवति, नतु जन्मान्तरीयानुष्ठानेन जन्मान्तर उपकारो भवति। तत्तज्जन्मनि कर्मानुष्ठानं च कर्मविचारं विना नोपपद्यत इति मीमांसैकत्ववाद एवेति। "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते" इति पृथक्फलनिर्देशो हि नान्यथोपपद्यते, यदि समुच्चयवाद उपनिषदां तात्पर्यम्। यद्यपि वैराग्यादिवत् कर्मणामपि ज्ञानसाधनत्वे साधनाध्याय एव पूर्वमीमांसायाः समावेशापत्तिः ; तथापि अर्थक्रमात् ब्रह्ममीमांसा-तृतीयाध्यायान्त एव योजनं वस्तुगत्याभिप्रेतमिति, नेयमापत्तिरनिष्टाऽस्माकमिति श्रुतप्रकाशिकाकारा मन्यन्ते—"जैमिनीय-पूर्वमीमांसायाः प्रतिपत्तिलक्षणसौकर्यक्रमात्तु पूर्वं निवेशः, अर्थक्रमात्तु तृतीयाध्यायचतुर्थपादेनैव सङ्गतिरि"ति वदन्तः। भास्कराचार्यमते भगवद्रामानुजाचार्यमते च—यत्र ब्रह्मोपासनमेव साक्षात्कारसमानजातीयं ब्रह्मज्ञानम्, तत्र—"आत्मा वाऽरे द्रष्टव्य" इति वाक्ये द्रष्टव्यपदं निदिध्यासितव्य इति पदार्थनिष्कर्षपरम्, नतु निदिध्यासनातिरिक्तार्थान्तरपरम्—इति॥

* शंकरभगवत्पादास्तु—ब्रह्मज्ञानं मोक्षसाधनं प्रमाण-परतन्त्रसाक्षात्काररूपमेव, नतु पुरुषतन्त्रमुपासनारूपम्। तत्र च कर्मणो न सहभावो न वोपकारकत्वमपि। अधिकारिणां चित्तशुद्ध्याधानमात्रेण कर्मणां पर्यवसानम्। जन्मान्तरीयानुष्ठानेनापि कर्म चित्तशुद्धिद्वारोपकरिष्यति। धर्मजिज्ञासायाः प्रागप्यधीतवेदान्तो ब्रह्मजिज्ञासायामधिकरोति। देवतानां स्वयंप्रतिभात-

भामती

कारास्पदेभ्यो देहेन्द्रियमनोबुद्धिविषयेभ्यो विवेकेन 'अहम्' इत्यसंदिग्धाविपर्यस्तापरोक्षानुभवसिद्धः, इति न जिज्ञासास्पदम् । नहि जातु कश्चिदत्र संदिग्धे—अहं वा, नाहं वेति । नच विपर्यस्यति—'नाहमेवे'ति । नच—'अहं कृशः''स्थूलो' 'गच्छामी'त्यादिदेहधर्मसामानाधिकरण्यदर्शनाद् देहालम्बनोऽयमहंकार इति—सांप्रतम् ; तदालम्बनत्वे हि—'योऽहं बाल्ये पितरावन्वभवम्, स एव स्थाविरे प्रनप्तॄननुभवामीति प्रतिसंधानं न भवेत् । नहि बाल्यस्थाविरयोः शरीरयोर्मनागपि प्रत्यभिज्ञानगन्धः, येनैकत्वमध्यवसीयेत ; तस्मात् येषु व्यावर्तमानेषु यदनुवर्तते, तत्तेभ्यो भिन्नम्—यथा कुसुमेभ्यः सूत्रम् । तथाच बालादिशरीरेषु व्यावर्तमानेष्वपि परस्परमहंकारास्पदमनुवर्तमानं तेभ्यो भिद्यते । अपिच स्वप्नान्ते दिव्यं शरीरभेदमास्थाय तदुचितान्भोगान्भुञ्जान एव प्रतिबुद्धय मनुष्यशरीरमात्मानं पश्यन्—नाहं देवो मनुष्य एवेति देवशरीरे बाध्यमानेऽप्यहमास्पदमबाध्यमानं शरीरात् भिन्नं प्रतिपद्यते । अपिच योगव्याघ्रः शरीरभेदेऽप्यात्मानमभिन्नमनु-

ऋजुप्रकाशिका

इदंप्रत्ययविषयेभ्यः, न त्वहंप्रत्ययविषयेभ्य इत्यर्थः । *विवेकेन = भिन्नतयेत्यर्थः । असन्दिग्धत्वाविपर्यस्तत्वे व्यतिरेकमुखेन क्रमेण दर्शयति—*नहि जात्विति* ॥ *जातु=कदाचित् । *ननु*—अहंप्रत्ययस्य 'स्थूलोऽहम्' 'कृशोऽहम्,' 'काणोऽहम्,' 'मूकोऽहम्', इति देहेन्द्रियादिसंपिण्डितविषयत्वात् देहादिभिन्नविषयत्वं कथमुक्तम् ? इत्याशङ्क्य निराकरोति—*न चाहमिति* ॥ देहधर्मेत्यत्र देहेन्द्रियादिधर्मेत्यर्थः । *देहादिधर्मः=स्थूलत्वकाणत्वादिः ॥ *सामानाधिकरण्यदर्शनादिति* ॥ अहन्त्वस्येति शेषः । *देहालम्बनः=आत्मैक्याध्यासापन्नदेहादिविषयक इत्यर्थः । *अहङ्कारः = अहंप्रत्ययः । अहंप्रत्ययस्य इन्द्रियाद्यालम्बनत्वं निराकरिष्यन् आदौ तस्य देहालम्बनत्वं निरस्यति—*तदालम्बनत्वे हीति* ॥ देहालम्बनत्व इत्यर्थः । अहंप्रत्ययस्य देहालम्बनत्वे अहमर्थविषयैक्यगोचरनिरुक्तप्रत्यभिज्ञानं बालस्थविरशरीरैक्यविषयं वाच्यम् ; नच तत् संभवति ; बालत्वस्थाविरविशिष्टशरीरयोः परिमाणभेदेनैक्यायोगात् ; तथाच तत्प्रत्यभिज्ञानं न स्यादित्यर्थः । तदेतदाह—*नहीति* ॥ तथाच अहमर्थगोचरप्रत्ययस्य देहभिन्नात्मविषयकत्वे वक्तव्य आत्मनो देहाद् भेदग्रहेण विशेषदर्शनात् न देहस्यात्मैक्याध्यास इति भावः । अहंप्रत्ययस्य देहातिरिक्तात्मविषयकत्वमुक्तमुपसंहरति—*तस्मादिति* ॥ *व्यावर्तमानेषु* ॥ अनुवर्तमानस्य व्यावर्तमानेभ्यो भिन्नत्वे दृष्टान्तमाह—*यथा कुसुमेभ्य इति* ॥ प्रकृतमाश्रित्याह—*तथाचेति* ॥ *अहङ्कारास्पदम् = अहंप्रत्ययविषयीभूतम् । *तेभ्यः=बालादिशरीरेभ्यः । बालस्थविरशरीरयोः परिमाणभेदेन भेदात् तदैक्यगोचरं न प्रत्यभिज्ञानमित्युक्तम्, संप्रति परिमाणभेदेऽपि तद्वक्तव्यम्, अतस्तदैक्यगोचरमेवोक्तप्रत्यभिज्ञानमिति मन्वानं प्रत्याह—*अपिचेति* ॥ "तदुचितानि"त्यतः प्राग् देवोऽहमिति मन्यमान इति शेषः । *मनुष्यशरीरमिति* ॥ मनुष्यः शरीरं यस्य स तथोक्तः, तमित्यर्थः । स्वाप्निकप्रत्ययस्य भ्रमत्वं मन्यमानं प्रति जाग्रत्यप्याह—*अपिच योगेति* ॥ स्वयं मनुष्यः सन् इन्द्रजालकर्तृकृतकृत्रिमव्याघ्रशरीरमभिमन्यमानो योगव्याघ्रः ।

प्रदीपः

वेदान्तानां कथमन्यथा कर्मानधिकारिणां ब्रह्मविद्यायामधिकारः ? कथं वा च ब्रह्मचर्यादेव संन्यस्तानां ब्रह्मविद्याप्रवृत्तिः सप्रयोजना ? यदि कर्मस्वरूपविचाराधिकार-तदनुष्ठानादि नियतमधिकारिधर्मः स्यात्, यदि वा पूर्वोत्तरमीमांसे अभिन्ने भवेताम्, इति ज्ञानकर्मसमुच्चयेऽपि शास्त्रभेद एव प्रामाणिकः, नतु तदेकत्वम् । "आत्मा वाऽरे द्रष्टव्य" इति द्रष्टव्यपदं फलपरं सत् निदिध्यासनस्य श्रवणस्य वा विधेयस्योद्देश्यमेवोपक्षिपति, नतु केवलानुवादरूपमिति—प्रतियन्ति ॥

* शुद्धाद्वैतमतानुयायिनो वल्लभाचार्या द्वैतसम्प्रदायाचार्या मध्वाचार्या अपि शास्त्रभेदसिद्धान्तमेवानुसरन्ति । तत्र प्रथममते भक्तिप्राधान्यस्यैव विवक्षितत्वात् कर्मज्ञानभक्तीनां सर्वेषां साधनानां पुरुषोत्तमज्ञानोत्पत्तावपेक्षणेऽपि न विशिष्टः कश्चन सम्बन्धः कर्ममात्रस्य ज्ञानेन सह वर्तते, द्वितीयमते तु सत्यमस्ति कर्मणो ज्ञानोपकारकत्वम्, तथापि शास्त्रैक्यन्तु नावश्यकमिति

भामती

भवति, इति नाहंकारालम्बनं देहः । अत एव नेन्द्रियाण्यप्यस्यालम्बनम् ; इन्द्रियभेदेऽपि—'योऽहमद्राक्षं स एवैतर्हि स्पृशामी'त्यहमालम्बनस्य प्रत्यभिज्ञानात् । विषयेभ्यस्त्वस्य विवेकः स्थवीयानेव । बुद्धिमनसोश्च करणयो'रहं कर्ते'ति कर्तृप्रतिभासप्रख्यानालम्बनत्वायोगः । कृशोऽहमन्धोऽहमित्यादयश्च प्रयोगा असत्यप्यभेदे कथञ्चित्—''मञ्चाः क्रोशन्ती''त्यादिवदौपचारिका इति युक्तमुत्पश्यामः । तस्मादिदंकारास्पदेभ्यो देहेन्द्रिय-मनोबुद्धिविषयेभ्यो व्यावृत्तः स्फुटतराहमनुभवगम्य आत्मा संशयाभावादजिज्ञास्य इति सिद्धम् ॥

ऋजुप्रकाशिका

नाहंकारालम्बनमिति ॥ आत्मैक्याध्यासापन्नो देहः अहंप्रत्ययालम्बनं नेत्यर्थः । देहात्मवादनिरासाय यथा-श्रुतार्थो वा । तथाच देहातिरिक्त एवात्माऽहंप्रत्ययविषय इति भावः ॥ अहंप्रत्ययस्य आत्मैक्याध्यासापन्नेन्द्रिया-लम्बनत्वं निराकरोति—*अत एवेति* ॥ *इन्द्रियाण्यपि=आत्मैक्याध्यासापन्नेन्द्रियाण्यपि । *अस्य=अहंप्रत्ययस्य । अनालम्बनत्वमेवाह—*इन्द्रियभेदेऽपीति* ॥ अहंप्रत्ययस्य इन्द्रियविषयकत्वेऽहमर्थगोचरस्यैकस्य ऐक्यगोचर-प्रत्यभिज्ञानस्येन्द्रियैक्यविषयकत्वं वाच्यम्, नच तत् संभवति ; चक्षुरिन्द्रिय-त्वगिन्द्रिययोर्भेदेऽपि 'योऽहमद्राक्षं सोऽहं स्पृशामी'ति प्रत्यभिज्ञानदर्शनात् । तथाच इन्द्रियातिरिक्तात्मैक्यविषयकमेवाहमर्थगोचरं तत्प्रत्यभिज्ञानम्, इतीन्द्रियातिरिक्त आत्मा अहंप्रत्ययविषय इति भावः । *अस्य=आत्मनः ॥ *विवेकः=भेदः । *स्थवीया-नेव=स्पष्ट एवेत्यर्थः । बुद्धिमनसोरहंप्रत्ययालम्बनत्वं निरस्यति—*बुद्धिमनसोश्चेति* ॥ निश्चयात्मिका=*बुद्धिः, संशयात्मकं मनः, तयोरित्यर्थः । *अहं कर्तेति* ॥ अहंप्रतीतिविषयस्य कर्तृत्वप्रतिभासः कर्तृत्वशब्द-प्रयोगश्च दृश्यते, बुद्धिमनसोश्च करणत्वात् न कर्तृत्वाश्रयाहंप्रतीतिविषयात्मत्वमित्यर्थः । *प्रख्यानम्=शब्दप्रयोगः । *ननु*—'कृशोऽहम्' 'मन्दोऽहम्' इति प्रयोगा देहेऽपि दृश्यन्ते, तथाच देहोऽप्यात्मा किं न स्यात् ? इत्या-शङ्क्य तत्प्रयोगाणामौपचारिकत्वात् तत्प्रयोगानुसारेण न तस्यात्मत्वमित्याह—*कृशोऽहमित्यादिना* ॥ *असत्यप्यभेदे=देहेऽसत्यप्यारोपितात्माभेदे । देहे वास्तवात्माभेदस्य परेणानङ्गीकारेण तस्यानाश्रितत्वादारो-पितात्माभेदेऽसत्यपीति व्याख्यातम्, लोकायतिकेन देहे वास्तवात्माभेदस्य स्वीकृतत्वे तु तन्निरासाय 'असत्यप्यात्माभेद' इति यथाश्रुतमेव साध्विति द्रष्टव्यम् ॥

वार्तिकम्

तात्पर्यसन्देहविपर्ययप्रतिबन्धाज्ज्ञातमपि तस्मात्तज्ज्ञानमजातमिव भवति ; स्वकार्याक्षमत्वात् । अतो विचारेण तदुभयप्रतिबन्धेऽपसारिते स्वयमेवाप्रतिबद्धं वेदान्तवाक्यं स्वार्थबोधं जनयति, न तदर्थ-मन्यदपेक्षते । नच—एवं प्रतिबन्धाभावद्वारा विचारापेक्षणात्तदनपेक्षत्वमसिद्धमिति—वाच्यम् ; स्वात्मनि

प्रदीपः

वस्तुस्थितिः । सर्वथा तु ब्रह्ममीमांसाशास्त्रमेव वेदान्तशास्त्रम् । तच्च सानुबन्धचतुष्टयविवेचनमारम्भणीयमुपक्षिपति—* ''अथातो ब्रह्मजिज्ञासा—'' इति ॥

* अनुबन्धो नाम * विषयः, सम्बन्धः, प्रयोजनम्, अधिकारीति विषयादिचतुष्कमिति सर्वतन्त्रसिद्धान्तः । तत्र सम्बन्धो * विषयशास्त्रयोः—प्रतिपाद्यप्रतिपादकभावः, * विषयप्रयोजनयोः—विषयज्ञानसाध्यं प्रयोजनम्, प्रयोजनसाधनं विषयज्ञानमिति ज्ञानद्वारकः साध्यसाधनभावः, * अधिकारिप्रयोजनयोः—स्वस्वामिभावः काम्यकामकभावो वा, * शास्त्र-प्रयोजनयोः—स्वजन्यज्ञानसाध्यत्वस्वजनकज्ञानजनकत्वादिरूप इति सर्वविदितत्वात् न कुत्रापि शास्त्र एव तद्विवेचनार्थ-मध्यायादिविभागा दृश्यन्ते । अधिकारिनिरूपणार्थमपि न प्रायेण शास्त्रकाराणां विशिष्य प्रवृत्तिः कुत्रापि दृश्यते—यतोऽर्थज्ञानकामोऽधिकारीति सामान्यत एव सिध्यति, यद्यधिकारिविशेषो विशिष्य न विवक्षणीयः । इयमेव हि नीतिर्न्याय-वैशेषिक-सांख्य-योगसूत्रादिष्ववलम्ब्यते । इयमेव नीतिर्ब्रह्ममीमांसाशास्त्रेऽपि समादरणीयेति शुद्धाद्वैत-द्वैतादि-

वार्तिकम

तदपेक्षणेऽपि स्वकार्ये तदनपेक्षणात्॥ *ननु*--प्रतिबन्धाभावस्य कारणत्वात् कथं कार्ये तदनपेक्षेति--चेत्, * न * ; तत्कारणत्वासिद्धेः। अन्वयव्यतिरेकसत्त्वात् कथमसिद्धिरिति चेत्, नान्वयव्यतिरेकमात्रौ कारणभावग्राहकौ ; अतिप्रसङ्गात्, किं तर्हि ? अनन्यथासिद्धौ। नचात्र तौ स्तः ; अप्रतिबद्धकराग्निसंयोगादेरेव दाहादिकं प्रति कारणत्वावगमात्, तदवच्छेदकत्वेनाप्रतिबन्धस्य तयोरन्यथासिद्धेः, तथानुभवात्। दृश्यते हि लोके तथाऽनुभवः--यद्यग्निः करो वा मणिना प्रतिबद्धः, तर्हि तेन तत्संयोगान्न दाह इति। एतेन—वैपरीत्यापादनमपि—निरस्तम् ; अनुभवविरोधात्। नहि वयं व्यसनितया निष्प्रमाणकं किञ्चिदुत्प्रेक्ष्य कार्यकारणभावं कल्पयामः, येनायमनुयोगः स्यात्, किं तर्हि ? अबाधितलोकानुभवानुसारेण। नच लोक एवमनुभवोऽस्ति--कराग्निसंयोगावच्छिन्नोऽप्रतिबन्धो हेतुरिति, किं तर्हि ? अप्रतिबद्धः कराग्निसंयोगो हेतुरिति। अपसिद्धान्तश्च। नहि स्वयं कारणत्वेनाभ्युपगतस्याकारणत्वाऽऽपादनेन परं प्रति प्रत्यवस्थानं संभवति ; अपसिद्धान्तेन निगृहीतत्वापत्तेः। प्रतिबन्द्या प्रत्यवस्थानं सम्भवतीति चेत्, न ; विषयापरिज्ञानात्। न भवता प्रतिबन्दीविषयो व्यज्ञायि। न खलु यत्र प्रतिबन्दीग्रहे स्वस्मिन्नपसिद्धान्तः प्रहरति, तत्र तद्ग्रहः संभवति ; तथा सत्यपसिद्धान्तोच्छेदापत्तेः, सर्वत्रापसिद्धान्तादोषत्वप्रसङ्गात्। कस्तर्हि प्रतिबन्दीविषयः ? उच्यते ; यदा कापिला 'अचेतनानां पृथिव्यादीनां न तदभिन्नचेतनाधिष्ठानमन्तरेण विविधविचित्राकारपरिणामः संभवति ; तथा लोकेऽदर्शनात्'--इति मीमांसकं पर्यनुयुञ्जते, तदा तान् प्रति प्रतिबन्द्या प्रत्यवस्थेयम्—एवं सति भवतां प्रधानादेरपि तथात्वप्रसङ्गः ? तत्र यदीष्टापत्तिं ते कुर्वते, तदाऽपसिद्धान्तेन निगृहीता भवन्ति ; यदि च न, तदा प्रतिबन्दीत्युभयथापाशा रज्जुः। एवमन्यत्राप्यूह्यम्। तस्मादनुभवविरोधादपसिद्धान्ताच्च न वैपरीत्येन प्रत्यवस्थानमिति। अपिच सत्यपि प्रतिबन्धे उत्तेजके च दाहोत्पत्तिर्दृष्टा ; अतोऽपि न प्रतिबन्धाभावो

प्रदीपः

सम्प्रदायानुसारिणो मन्यन्ते, ये पुनः—"अथातो ब्रह्मजिज्ञासे"ति सूत्रं विचारप्रतिज्ञामात्रपरम्, नतु विशिष्टाधिकारिनिरूपणार्थमपीति—मन्यन्ते॥ एतन्मते हि नाथशब्दो मतान्तर इवाधिकारिविशेषनिर्णयार्थः, यतो नानन्तर्यार्थकमथशब्दमेतेऽभिप्रयन्ति, किन्त्वारम्भार्थक एव—"अथ शब्दानुशासनम्", "अथ योगानुशासनमि"त्यादौ यथा। युक्तं चैतत्तन्मते--यतः तन्त्रान्तरमत्र मते न ब्रह्ममीमांसाशास्त्रमपेक्षते, पुरुषोत्तमज्ञानकामः सर्वोऽप्यधिकारीति नाधिकारिनियमनं सूत्रकारा अत्र कर्तव्यं मन्यन्त इति खलु तदाशयः। सति चैवं चतुरध्यायात्मकं ब्रह्ममीमांसाशास्त्रमिति सिद्धान्त एव स्वारस्यं तदीया आशेरते॥

विंशत्यध्यायात्मकमेव ब्रह्ममीमांसाशास्त्रमिति मन्वाना भगवद्रामानुजादिमतानुसारिणस्तु प्रतियन्ति—न हि ब्रह्मज्ञानकामः सर्वोऽपि ब्रह्ममीमांसाधिकारीति सूत्रकारहृदयम्। न हि सर्वोऽपि विचार्य ब्रह्म जानाति, इत्यधिकारिविशेषोऽवश्यमत्र नियमयितव्यः। तच्च सूत्रकारीयं सूचनमन्तरा कथमपि न संभवति। उपपादितं चैतत्—यत् अथशब्देनानन्तर्यार्थकेन सार्थकेन सूत्रकारा अधिगतकर्मावबोधमधिकारिणं सूचयन्तीति। न हि तत् निष्प्रयोजनं योगानुशासनादाविति, प्रकृतेऽपि तत्तादृशम्। न ह्यन्यथाऽथपदं सूत्रगतं स्वरसं भवति, इति पूर्वतन्त्रापेक्षमुत्तरं तन्त्रमिति सूत्रकारा मन्यन्ते। सति चैवं कर्मविचारानन्तरं ब्रह्मविचार इति नियमनात् अधिकारिविशेषः सूत्रत एव नियमितो भवति, यः खलु कृते विचारे नियतं ब्रह्मज्ञानमधिगच्छति, इति ज्ञानकर्मसमुच्चयवादिनः ज्ञानाङ्गकर्मवादिनो वाऽधिकारिनियमनमपि—"अथातो ब्रह्मजिज्ञासे"ति सूत्राधीनमेव मन्यन्ते। अयमेवास्य ब्रह्ममीमांसाशास्त्रस्य विशेषः—यत्, न केवलं विषयः प्रयोजनं वा, किन्तु अधिकार्यपि संप्रदायैकसमधिगम्य इति। न चैतत् चतुरध्यायात्मकत्वेऽवकल्पत इति शास्त्रैक्यवाद एव समुचित इति॥

* शंकरभगवत्पादमतानुयायिनस्तु—सत्यमधिकारिविशेषं सूत्रकारा एव नियच्छन्तीति योजनमेव साम्प्रतम्, तदर्थं चानन्तर्यार्थकमथपदमिति पक्ष एव च समादरणीयः, परन्तु नेदं सूत्राक्षरावगतम्—यत्. कर्मविचारानन्तर्यमेवाथशब्दार्थ इति।

पञ्चपादिकाविवरणम्

श्यामोऽपि श्रुतिकमलावबोधरागः शान्तः सन्नयति तमोविनाशमन्तः ॥
नीरूपं प्रथयति योऽपि गोसहस्रैः तं व्यासं नमत जगत्यपूर्वभानुम् ॥ ४ ॥
उद्धृत्य वेदपयसः कमलामिवाब्धेरालिङ्गिताखिलजगत्प्रभवैकमूर्त्तिम् ॥
विद्यामशेषजगतां सुखदामदाद्यस्तं शङ्करं विमलभाष्यकृतं नमामि ॥ ५ ॥
वन्दे तमात्मसम्बुद्धस्फुरद्ब्रह्मावबोधतः । अर्थतोऽपि न नाम्नैव योऽनन्यानुभवो गुरुः ॥ ६ ॥

ऋजुविवरणम्

व्यासं नमस्करोति—* श्यामोऽपीति * ॥ स्वद्वारा व्याख्येयभाष्ये मतिविकासार्थं शङ्करं नमस्करोति—* उद्धृत्येति * ॥ अखिलं जगत् प्रभवत्यस्मादिति अखिलजगत्प्रभवः, सा चासावेकमूर्तिश्चेति ; आलिङ्गिता अखिलजगत्प्रभवैकमूर्तिर्ययेति विग्रहः । आलिङ्गिता अखिलजगत्प्रभवा चासावेकमूर्तिश्चेति वा विग्रहः । कथमेतन्नमस्कारेण तत्प्राप्तिरिति ? तदाह—* विद्यामिति * ॥ प्रागुक्तस्य सर्वस्य गुरुप्रसादलभ्यत्वेन तं नमस्करोति—* वन्दे तमिति * ॥ "आत्मसंबुद्धे" त्यनेन न विद्यते अन्यस्मादनुभवो यस्यासावनन्यानुभव इति विग्रहः समर्थितः । "स्फुरद्ब्रह्मावबोधत" इत्यनेन न विद्यते अन्य-विषयः अनुभवो यस्यासावनन्यानुभव इति विग्रहः समर्थितः । तदुक्तम्—"शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।" इति । *ननु*—एकेनैव नमस्कारेण सर्वप्रयोजनसिद्धेः किं नमस्कारान्तरेण ? *मैवम्* ; सर्वसाधनसमर्थस्यापि प्रति-प्रयोगमेकैकप्रयोजनसाधनत्वमिति "योगसिद्धि"गम् । यद्यपि ब्रह्मनमस्कारेण तदात्मकदेवताः नमस्कृताः सर्वविज्ञानवत् ; तथापि तत्तत्प्रयोजनविशेषलाभार्थं तेन तेन रूपेण नमस्कारः कृतः ; सदाचारस्यापि पालनीयत्वात्, "तं यथा यथोपास्ते"

तत्त्वदीपनम्

मिति यावत् । *अमोघमिति* ॥ अविघ्नपरिसमाप्त्यादिप्रयोजनमित्यर्थः ॥ ३ ॥ व्याख्येयटीकामूलभाष्यसूत्रार्थस्फूर्त्यर्थं तत्कर्तारः समाराध्याः, तत्र प्रथमं सूत्रकृतं प्रणमति—*श्याम इति* ॥ "विज्ञानं यज्ञं तनुते" इत्यादिवचनात् करणानि कर्तॄणि च प्रतीयन्ते, तद्योगाच्च त्वंपदार्थस्य कर्तृत्वम् ; "स समानः सन्नुभौ लोकावनुसंचरति" "ध्यायतीव लेलायतीवे" ति च श्रुतेः । तस्मादन्तःकरणनमस्कर्तृत्वनिर्देशेन स्वस्य तन्निर्दिष्टं स्यात्, ततश्च 'नमते'त्युक्तिर्युक्तेत्यर्थः । व्यासस्य नमस्कार्यत्वे हेतुमाह—*जगत्यपूर्वभानुमिति*॥ अपूर्वत्वमाह—*श्याम इति*॥ प्रसिद्धस्त्वरुणः, अयं तु कृष्ण इत्यपूर्व-त्वमित्यर्थः । विधान्तरेणापूर्वत्वमाह—*श्रुतीति* ॥ श्रुतय एव कमलानि श्रुतिकमलानि, तेषामवबोधे रागो यस्य स तथा । भानुस्तु रक्तः सन् कमलविकसनहेतुः, अयं तु श्यामोऽपि श्रुतिशक्तितात्पर्यावधारणहेतुरित्यर्थः । वैधर्म्यान्तर-माह—*शान्त इति* ॥ रविरुग्रः सन् बाह्यतमसां संदोहं संदुनोति, अयं तु शान्त एवाऽज्ञानलक्षणं तमो दहतीत्यर्थः । वैधर्म्यान्तरमाह—*नीरूपमिति* ॥ प्रसिद्धस्तु किरणसहस्रैर्विशेषवन्तं प्रथयति, अयं तु पुनर्निर्विशेषं ब्रह्म उपनिषत्पद-कदम्बकैर्भासयतीत्यर्थः ॥ ४ ॥ संप्रति पुरुषोत्तमसाधर्म्यं दर्शयन् शङ्कराचार्यं प्रणमति—*उद्धृत्येति* ॥ तं शङ्करं नमा-मीति नमस्कार्यत्वमुक्तम्, तत्र हेतुमाह—*उद्धृत्येति* ॥ वेदपयसोऽब्धेर्विद्यामुद्धृत्य यः सर्वस्म प्रादात्, तं नमामीति सम्बन्धः । वेदा एव पयांसि यस्य स वेदपयाः, तस्मादित्यर्थः । अत्रोपनिषदां पयःस्थानत्वं कर्मब्रह्मविषयवेदवाक्य-समुदायस्याब्धिस्थानत्वमिति द्रष्टव्यम् । कामिवेत्यत्राह—*कमलामिति* ॥ नारायणो हि क्षीराब्धेरिन्दिरामुद्धृत्य

वार्तिकम्

हेतुरिति चेत्, न ; वैपरीत्यस्यापि सुवचत्वात्, प्रतिबन्धाभावसहकृतोत्तेजकस्यैव हेतुत्वादिति । तस्माद्य-त्किञ्चिदेतत् । अपिच पूर्ववृत्तित्वाभावादपि न प्रतिबन्धाभावस्य हेतुत्वम् । तथाहि—करानल-संयोगाग्रिमक्षणे हि मणिना दाहानुत्पादः प्रयुज्यते, न तत्पूर्वकाले ; अनादिसंयोगाभावेनैवानादिदाहा-नुत्पादप्रयुक्त्युपपत्तौ सादेर्मणेस्तत्प्रयुक्तौ प्रमाणाभावात्, असंभवाच्च । एवंच सति मणिदाहानुत्पादयोः समैव व्याप्तिर्ग्राह्या, न विषमा ; प्रमाणाभावात्, गौरवाच्च । गौरवं च न्यूनाधिकप्रवेशादित्यन्यत् । तथाच

पञ्चपादिकाविवरणम्

प्रकाशात्मा यतिः सम्यक् प्राप्तविद्याशुशुत्सया । यथाश्रुतं यथाशक्ति व्याख्यास्ये पञ्चपादिकाम् ॥७॥

विदितसकलवेद्यैर्न प्रशंसन्ति लोके ग्रथितमपि महद्भिः किं पुनर्मादृशेन ॥
इति विफलसमेऽस्मिन् वाग्व्ययेऽहं प्रवृत्तः स्वमतिविमलतायै क्षन्तुमर्हन्ति सन्तः ॥ ८ ॥

ऋजुविवरणम्

इति श्रुतेश्च । यदर्थमेतत्संपादितं तन्निर्दिशति—* प्रकाशात्मेति * ॥ ग्रन्थकरणे प्रयोजनमाह—* प्राप्तविद्येति * ॥ इदानीमात्मनः सगर्वत्वनिवृत्त्यर्थं विदुषोऽभ्यर्थयितुमाह—*विदितसकलवेद्यैरिति* ॥ यद्वा—पूर्वश्लोके "विद्याशुशुत्सये"त्युक्तत्वाद् गर्वप्रसक्त्यभावात् नायं विनयः, किन्तु ये विनयदर्शनात् कर्तुरशक्तिं मन्वते, आधिक्यं चात्मनः, तान् प्रति सोत्प्रासेनाह—* विदितसकलवेद्यैरिति * ॥ एतदुक्तं भवति—ये विद्यालेशविवशान्तःकरणाः, ते महत्प्रणीतेऽपि ग्रन्थे न प्रशंसां कुर्वते मत्सरग्रस्ततया, अतः तदप्रशंसा न दोषाय। अयमेवार्थो न प्रशंसन्तीति वदता द्योतितः ; इतरथा 'ग्रथितमपि सम्यग् न भवती'ति वक्तव्यम्, नतु "न प्रशंसन्ती"ति । *ननु*—नमस्कारकरणं प्रमाणप्रयोजनशून्यमिवाभाति । ननु सदाचारः प्रमाणम्, मैवम् ; वेदमूलत्वेन वा प्रमाणम्, स्वतो वा ? नाद्यः ; संबन्धानुपपत्त्योरभावेन मूलानवगमात् । ननु धर्मत्वेनानुष्ठीयमानो वेदं कल्पयति, मैवम् ; सिद्धे वेदमूलत्वे धर्मत्वेनानुष्ठानम्, धर्मत्वेना-

तत्त्वदीपनम्

सर्वस्मै प्रादात्, तथाऽयमपीत्यर्थः । विद्यायाः कमलासाधर्म्यमाह—*आलिङ्गितेति* ॥ अखिलस्य जगतः प्रभवो यस्मात् सोऽखिलजगत्प्रभवः, तस्यैकाऽद्वितीया मूर्त्तिरालिङ्गिता यया सा तथोक्ता ताम् । कमला खलु नारायणगात्रमेवालिङ्ग्य व्यवस्थिता, तद्वद्विद्यापि ब्रह्मैकमूर्त्तिं विषयीकृत्य व्यवस्थितेत्यर्थः । साधर्म्यान्तरमाह—*अशेषेति* ॥ कनकांशुकक्षेत्रादिसम्पादनेन कमला यथा सुखदा, तथा विद्याप्यविद्यापनयनेनाऽऽनन्दात्मानं व्यनक्तीत्यर्थः । केन द्वारेण विद्यादातृत्वमित्याशङ्क्य, भाष्यद्वारेत्याह—*विमलेति*॥ शब्दतोऽर्थतश्च निरवद्यभाष्यकर्तारमित्यक्षरार्थः ॥५॥ सम्प्रति स्वगुरुं नमस्करोति—*वन्दे इति* ॥ तस्यास्मत्तो विशेषाभावान्न नमस्कार्यत्वमित्याशङ्क्याह—*य इति* ॥ अनन्यश्चासावनुभवश्चेति विग्रहः । अनन्यानुभवत्वं डित्थादिवन्नाममात्रम्, ब्रह्मरूपतयाऽनन्यानुभवत्वमस्माकमप्यस्तीत्याशङ्क्याह—*अर्थतोऽपीति* ॥ अर्थतोऽनन्यानुभवत्वमस्माकमप्यस्तीत्युक्तम्, तत्राह—*आत्मेति* ॥ आत्मसंबुद्धतया स्वप्रकाशतया स्फुरद्यद् ब्रह्म, तद्विषयोऽवबोधो यस्य स तथोक्तः । तस्मादित्यर्थः। घटादीनामिवान्याधीनस्फुरणमित्याशङ्कां निराकर्तुम्—*आत्मसंबुद्धेति विशेषणम्*॥ आत्मा चासौ संबुद्धश्चेत्यात्मसंबुद्धः, तस्य स्फुरद्ब्रह्मत्वेनावबोधादिति वा। स्वयंप्रकाशत्वेन सदा ज्ञातः । प्रत्यग्ब्रह्मापि तादृशमिति अभेदयोग्यत्वमिति द्योतयितुं वा संबुद्धस्फुरदिति विशेषणम् । *अयमर्थः*—यद्यप्यस्माकमप्यनन्यानुभवत्वम् ; तथाप्यविद्यापिहितस्वान्ततया यथावद् ब्रह्म न गम्यते, गुरोस्तु करतलाकलितामलकवत् साक्षात्कृतब्रह्मतत्त्वतयाऽविद्यातत्कार्यनिवृत्तिरिति विशेषः ॥ ६ ॥ सम्प्रति चिकीर्षितं प्रतिजानीते—*प्रकाशात्मेति* ॥ प्रकाशात्मा यतिरहं पञ्चपादिकां व्याख्यास्ये इति सम्बन्धः । यथा ग्रामो दग्ध इत्यादिव्यपदेश एकदेशदाहेऽपि, तद्वदेकदेशस्य व्याचिख्यासितत्वेऽपि पञ्चपादिकेति व्यपदेशो घटत इत्यर्थः । व्याख्यानयोग्यतामाह—*यथेति* ॥ श्रुतमनतिक्रम्येत्यर्थः । न श्रवणमेव केवलम्, अपि तूहाद्युपेतत्वमपीत्याह—*यथाशक्तीति*॥ न ख्यात्याद्युद्देशेन व्याख्यानमित्याह—*प्राप्तेति* ॥ सम्यक् शास्त्राचार्याभ्यां प्राप्तया विद्यया असम्यक्त्वभ्रमादिकं निराकर्तुं ब्रह्मविन्निकषाश्मसु शोधनेच्छयेत्यर्थः ॥७॥ कृतमपि व्याख्यानं रागद्वेषदूषितस्वान्ता नोपाददते, ततश्च न विद्याशुद्धिरित्याशङ्क्य, किं केचिन्नोपाददते, उत सर्वेऽपि ? आद्ये न विरोध इत्याह—*विदितेति* ॥ तर्हि विफलमेतत् स्यादित्याशङ्क्याह—*इति विफलेति* ॥ इतिशब्दः प्रशंसाभावपरामर्शी, प्रशंसाभावाद्विफलसमत्वमित्यर्थः । प्रशंसाभावेऽपि मतिवैमल्यं सेत्स्यतीत्यभिसन्धिः । *ननु*—कथं तदपि सिध्येत् ? कैश्चिदनादृतत्वात्, इत्याशङ्क्येर्ष्यारहितैरादृतत्वात्सिध्यतीत्याह—*क्षन्तुमिति* ॥ निर्मत्सरत्वं सच्छब्दार्थः । एतेन—द्वितीयो विकल्पो—निरस्तः ॥ ८ ॥

पञ्चपादिकाविवरणम्

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिपालनाय चाभिलषितदेवतापूजानमस्कारः कर्तव्यः, शास्त्रार्थश्च तत्त्वंपदार्थविवेकोपायलभ्यः प्रत्यग्ब्रह्मणोरेकत्वलक्षणः सङ्क्षेपतो दर्शनीयः कृत्स्नस्य

ऋजुविवरणम्

नुष्ठाने च तत्सिद्धिरितीतरेतराश्रयप्रसङ्गात्, नापि स्वतः; षड्विधसामग्रीबहिर्भावात्। न च विघ्नोपशमः प्रयोजनम्; प्रागभावादिविकल्पासहत्वात्, तस्मान्नमस्कारो न कर्तव्य इत्याशङ्क्याह—* प्रारिप्सितस्य ग्रन्थस्येति *॥ धर्मत्वेनानुष्ठीयमानताज्ञानमुपयोगि न वेदमूलत्वेन धर्मत्वज्ञानम्। तथोपस्थिते विघ्ने नाशः, आगामिनोऽनुत्पत्तिपरिपालनं प्रयोजनमिति भावः। तर्हि श्लोककरणं व्यर्थम्; मानसेनापि तत्सिद्धेः, अथ नमस्कारस्याङ्गत्वद्योतनार्थम्, मैवम्; उत्तरश्लोकैरेव सिद्धेरुक्तत्वात् अन्यतरस्य वैयर्थ्यं दुष्परिहरम्। यद्वा—नमस्कार एव कर्तुं युक्तः, न तु तत्त्वंपदार्थनिरूपणेन तयोरेकत्वप्रतिपादनमुपयोगीत्याशङ्क्याह—*शास्त्रार्थश्चेति*॥ *ननु*—तत्प्रदर्शनमनुपयोगि; भाष्यव्याख्यानप्रवृत्तत्वात्। नच भाष्यस्य तदर्थत्वप्रदर्शनार्थम्; अध्यासादिप्रतिपादकत्वात्, अव्याख्येयत्वं च श्लोकस्य; भाष्यव्याख्यानाद्यभावात्, इत्याशङ्क्याह—*कृत्स्नस्येति*॥ *ननु*—तर्हि नमस्कारः क्रियते, शास्त्रार्थश्च प्रदर्श्यत इति वाक्य-

तत्त्वदीपनम्

"अनाद्यानन्दे"त्यत्र मङ्गलाचरणं सम्पादितम्, तदयुक्तम्; फलविधुरत्वात्, न च शिष्टाचारः प्रमाणम्; विकल्पासहत्वात्। स किं स्वतः प्रमाणम्? उत वेदमूलत्वेन? नाद्यः; प्रत्यक्षाद्यन्यतमत्वाभावात, अतिरिक्तस्य मानस्य चाप्रसिद्धेः, न द्वितीयः; तदसिद्धेः, नच शिष्टाचार एव वेदमूलताकल्पकः; किमाचारत्वाद् वेदमूलतां कल्पयति उत धर्मत्वात्? नाद्यः; निष्ठीवनादेरपि तत्कल्पकत्वप्रसक्तेः, नान्त्यः; धर्मत्वसिद्धौ वेदमूलताकल्पकत्वम्, वेदमूलत्वे च धर्मत्वमितीतरेतराश्रयत्वात्। नापि फलं पश्यामः—किं शिष्टाचारपरिपालनं फलम्? आहो विघ्ननिरासः? नाद्यः; तस्याकिंचित्करत्वात्, न द्वितीयः; उपस्थितविघ्ननिरासेप्यागामिनो निवर्तयितुमशक्यत्वादित्याशङ्क्याह—*प्रारिप्सितस्येति*॥ न तावत्प्रमाणाभावबोध्यम्; वेदमूलशिष्टाचारस्य प्रमाणत्वात्, न च तस्य वेदमूलत्वासिद्धिः; शिष्टैर्धर्मबुद्ध्याऽनुष्ठीयमानाचारस्य तत्कल्पकत्वात्, नापि शिष्टासिद्धिः; वैदिकार्थानुष्ठातॄणां शिष्टत्वादित्यभिसन्धाय 'च'शब्दप्रयोगः। नापि फलासम्भवः; अविघ्नपरिसमाप्तिप्रचयगमनशिष्टाचारपरिपालनानां फलत्वात्। न च—आगामिविघ्ननिवृत्त्यसंभवान्न विघ्नाभावः फलमिति—शङ्क्यम्; आगामिनि विघ्नेऽपि तत्प्रागभावपरिपालनस्य फलत्वात्, वर्तमाने तु तद्ध्वंस एव। तस्मात्प्रमाणफलवत्त्वान्मङ्गलाचरणमनुष्ठेयमित्यर्थः। अविघ्नपरिसमाप्तिप्रचयगमनयोर्दृष्टफलत्वसाम्यात्समस्य वचनम्, इतरस्यादृष्टफलत्वात् पृथक्कथनम्। अत एव तस्याकिंचित्करत्वं निरस्तम्। प्रमाणफलवांश्चेद्देवतागुरुनमस्कारः, तर्हि या काचिद्देवता नमस्क्रियतामिति, तत्राह—*अभिलषितेति*॥ समाराधिताया अभिलषितदेवताया एव फलहेतुत्वप्रसिद्धेस्तत्समाराधनमुचितमित्यर्थः। तथाप्य'नादी'त्यादिविशेषणवैयर्थ्यम्, तत्राह—*पूजेति*॥ गुणगणसंकीर्तनं पूजा, स्तुतौ सत्यां नृपादिषु प्रीत्युत्कर्षदृष्टेः सोचितेत्यर्थः। तथाप्यात्मब्रह्मणोरेकत्वं कस्मान्निर्दिष्टमित्याशङ्क्य विषयत्वात्तस्य निर्देश इत्याह—*शास्त्रार्थ इति*॥ तथापि ग्रन्थ एव नमस्कारः कस्मात्? इति शङ्कां निरस्यति—*शास्त्रेति*॥ प्रत्यग्ब्रह्मणोरेकत्वं चेत्, तर्हि किमिति न प्रथते? इत्याशङ्क्य पदार्थशुद्ध्यभावादप्रथनमित्याह—*तत्त्वमिति*॥ सकलशास्त्रार्थस्यैकेन पदेन प्रदर्शनमशक्यमित्याशङ्क्याह—*संक्षेपत इति*॥ शास्त्रपर्यालोचनयैव विषयसिद्धेः किमत्र तत्कथनेन? इत्याशङ्क्याह—*कृत्स्नस्येति*॥ तत्रेति*॥

वार्तिकम्

मणिदाहानुत्पादयोः समकालीनत्वे तदभावयोरपि समकालीनत्वसिद्धेः पौर्वापर्याभावात् किं कस्य कारणं स्यादिति। अत एव न्यायवार्तिक-टीकाकाराभ्यां प्रतिबन्धकाभावस्य हेतुत्वं नाङ्गीकृतम्। तथाच न्यायवार्तिकम्—"संयोगप्रतिबन्धाद् गुरुत्वस्य सापेक्षत्वमिति चेत्=अथ मन्यसे यदि गुरुत्वं संयोगेन

पञ्चपादिका

अनाद्यानन्दकूटस्थज्ञानानन्तसदात्मने ॥ अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नमः ॥ १ ॥

पञ्चपादिकाविवरणम्

भाष्यस्य तत्र तात्पर्यकथनाय, इति तदुभयं श्रुत्यर्थाभ्यां सङ्क्षेपतो दर्शयति—*अनाद्यानन्दकूटस्थज्ञानानन्त-

ऋजुविवरणम्

भेद इत्याशङ्क्याह—* श्रुत्यर्थाभ्यामिति * ॥ अथवा—शास्त्रार्थप्रदर्शनम्, भाष्यस्य तत्र तात्पर्यप्रदर्शनं चेति वाक्यभेद इत्याशङ्क्याह—*श्रुत्यर्थाभ्यामिति* ॥ कथमेकेनैव कृत्स्नशास्त्रार्थः प्रदर्श्यते ? अथवा उत्तरत्र शास्त्रार्थप्रदर्शनं दृश्यते, तस्य वैयर्थ्यमित्याशङ्क्याह—* संक्षेपत इति * ॥ अत्र अवतारितश्लोके जीवब्रह्मणोरेकत्वयोग्यतां दर्शयितुं कानिचिद्विशेषणान्युपात्तानि, तेषामेवमुपयोगः ;—ब्रह्मणे नम इत्युक्ते जीवाद्भिन्नमिति शङ्का स्यात् ; नमस्कारस्य भेदाधिष्ठानत्वात्, कैश्चिदङ्गीकृतत्वाच्च, तन्निवृत्त्यर्थमाह—* आत्मन इति* ॥ शून्य एवात्मेति शून्यवादिनः, तथा सति तादृशेनैकत्वं ब्रह्मणो न संभवतीति शङ्कां व्यावर्तयति—*सदिति* ॥ सद्रूपोऽप्यात्मा कायपरिमाण इत्यार्हताः, तथा सति तादृशेनैकत्वं ब्रह्मणो न संभवतीति शङ्का, तन्निवृत्त्यर्थम्—*अनन्तेति विशेषणम्* ॥ एवंभूतोऽपि जड इति वैशेषिकादयः, तन्निवृत्त्यर्थम् —*ज्ञानेति विशेषणम्* ॥ ज्ञानस्य जन्यताशङ्कानिवृत्त्यर्थम् आत्मनो वा परिणामिनित्यत्वशङ्कानिवृत्त्यर्थम्—*कूटस्थेति विशेषणम् ॥ एवंभूतोऽपि अनानन्द इति साङ्ख्याः, तदर्थम्—*आनन्देति विशेषणम्* ॥ सोऽप्यानन्दो मोक्षावस्थायामेवेति नैयायिकैकदेशिनः, जन्य इति च सर्वे, तन्निवृत्त्यर्थम्—*अनादीति विशेषणम्* ॥ आत्मनो वा जन्यत्वशङ्कानिवृत्त्यर्थम्—* अनादीति विशेषणम् * ॥ एवंभूतस्यापि ब्रह्मणैकत्वं न संभवति ; कर्तृत्वभोक्तृत्वप्रसिद्धेरिति, तद

तत्त्वदीपनम्

तत्त्वंपदार्थयोरैक्यलक्षण इत्यर्थः। तात्पर्यमप्युत्तरत्रैवाधिगन्तुं शक्यम्, किमत्र निर्देशेन ? इत्याशङ्क्य भाष्यस्य ब्रह्मात्मैक्यपरत्वे सिद्धे तत्प्रतिपादकशास्त्रे मुमुक्षोः प्रवृत्तिः, नेतरथेत्यभिप्रायेणोपसंहरति—*इति तदुभयमिति* ॥ इतिशब्दो हेत्वर्थः। मङ्गलाचरणं विषयप्रदर्शनं च यस्मादवश्यं भावि तस्मादित्यर्थः। *उभयमिति* ॥ शास्त्रार्थदेवतानमस्करणे। *ननु*—उभयपरत्वे वाक्यं भिद्येतेत्याशङ्क्यैकोऽर्थो मुखतोऽन्यस्त्वर्थादित्याह—*श्रुत्यर्थाभ्यामिति*॥ *ननु*—अत्र तात्पर्यस्य दर्शितत्वादुत्तरत्र तात्पर्यकथनं व्यर्थम्, नच—अत्र ब्रह्मात्मैक्ये तात्पर्यं दर्शितम्, उत्तरत्र लक्षणादाविति न वैयर्थ्यमिति—शङ्क्यम् ; पूर्वापरविरोधप्रसङ्गादित्याशङ्क्योत्तरत्र लक्षणादाववान्तरतात्पर्यं कथ्यते, अत्र ब्रह्मात्मैक्ये महातात्पर्यं कथ्यत इत्यविरोध इत्याह—*कृत्स्नस्येति* ॥ *विभज्येति* ॥ लक्षणादिपरतया अवान्तरतात्पर्यस्य दर्शनादिति यावत्। मूले—"अनाद्यानन्देत्य"स्यायमर्थः—ब्रह्म, कार्यम्, कारणत्वात्,

वार्तिकम्

प्रतिबध्यमानं न क्रियामारभते, तत्प्रतिबन्धापगमापेक्षमारभत इति, * नत्वेवम् * ; गुरुत्वं सापेक्षं क्रियाकारणमिति प्राप्तम्। एवं च शास्त्रव्याघातः। निरपेक्षं गुरुत्वं कर्मकारणमिति शास्त्रम्, न ; निरपेक्षार्थस्यान्यथा व्याख्यानात्। नायं निरपेक्षार्थः—गुरुत्वं न किञ्चिदपेक्षत इति, अपितु चरमभाविनिमित्तान्तरं नापेक्षत इति। निरपेक्षं गुरुत्वं कर्मकारणमिति नास्ति व्याघातः। तथाच शास्त्रम्—"संयोगाभावे गुरुत्वात्पतनमि"ति। तत्र टीका—*नायं निरपेक्षार्थ इति*। यद्यपि समवायिकारणं गुरुत्वमपेक्षते ; तथापि चरमभूतं निमित्तान्तरं नापेक्षत इत्यर्थः। यद्यपि प्रतिबन्धापगमो भवति चरमभावी ; तथापि न निमित्तान्तरम्। प्रतिबन्धे सति हि गुरुत्वं न करोति, कार्यं त्वौत्सर्गिकम्, न पुनः प्रतिबन्धकाभावस्यापि तत्र निमित्तभावकल्पना युक्ता ; तदन्वयव्यतिरेकस्यान्यथासिद्धेः—इति। तर्कपरिचयशून्यानामेवाधुनिकानामेतज्जल्पनम्—यत् प्रतिबन्धाभावस्य कारणत्वम्। अत एव "सामग्र्यां कार्योत्पाद-

पञ्चपादिकाविवरणम्

सदात्मने। अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नम इति* ॥ कृत्स्नस्य भाष्यस्य ब्रह्मात्मैकत्वे तात्पर्यमत्र

ऋजुविवरणम्

व्यावर्तयति—*साक्षिण इति* ॥ एवंभूतेन जीवेन ब्रह्मण एकत्वं न संभवति ; जगत्कारणत्वेन सप्रपञ्चत्वादिति, तन्निराकरोति—*अभूतद्वैतजालायेति* ॥ एतत्पदं पराकृतेत्यनेनैव व्याख्यातम्। "तत्त्वंपदार्थविवेकोपायलभ्य" इत्यनेनैतद्विशेषणसाफल्यं द्योतितम्। *ननु*—शास्त्रार्थ एवात्र प्रदर्शितः, न तु टीकाकृता तत्र तात्पर्यमुक्तमित्याशङ्क्याभिप्रायमाह—*कृत्स्नस्येति* ॥ कथमत्र श्लोके कृत्स्नस्य शास्त्रस्य भाष्यस्य तात्पर्यं प्रदर्शितमिति गम्यत इति ? तत्राह—*उत्तरत्रेति* ॥ अथवा—अनन्तरग्रन्थेऽपि विषये तात्पर्यं प्रदर्श्यते, अत्रापि तत्प्रदर्शने पौनरुक्त्यम्, यद्वा—अनन्तरग्रन्थे विषयप्रयोजने तात्पर्यं प्रदर्शितम्, अत्र तु विषयमात्रे ; अतो विरोध इत्याशङ्क्याह—*कृत्स्नस्येति* ॥ अथवा—उत्तरत्र तत्तद्ग्रन्थव्याख्या-

तत्त्वदीपनम्

मृद्वदित्यनुमानात् ब्रह्मणोऽपि कार्यतया हेयत्वम्, ततश्चानमस्कार्यत्वमित्याशङ्क्य निरस्यति—"अनादीति" ॥ किं तत् स्वतो जायते ? उत कारणान्तरात् ? नाद्यः ; व्याघातात्, न द्वितीयः ; तदनिरूपणात्, उत्पत्तिनिषेधकश्रुतिस्मृतिबाधाच्चेत्यर्थः। ज्वरभारादिनिवृत्तौ—'अहो सुखमि'ति सुखव्यपदेशात् दुःखाभाव एव सुखम्, अभावरूपत्वेऽपि तस्य ब्रह्मगुणतेति शङ्कां निराचष्टे—*आनन्देति* ॥ अभावस्य सप्रतियोगिकत्वात् सुखस्य प्रतियोगिप्रतीतिनिरपेक्षप्रतीतित्वाच्च नाभावत्वम्। "विज्ञानमानन्दं ब्रह्मे"ति ब्रह्मसामानाधिकरण्यान्न तस्य गुणत्वम् ; "एकधैवानुद्रष्टव्य"मित्येकत्वप्रतिपत्तेश्चेत्यर्थः। ब्रह्म, परिणामि, उपादानत्वात्, मृद्वदित्यनुमानात् ब्रह्म परिणामीति केचिन्मेनिरे, तान् प्रत्याह—*कूटस्थेति* ॥ विमतम्, न परिणामि, निरवयवद्रव्यत्वात्, गगनवदित्यनुमानानुगृहीतया "निष्कलं निष्क्रियं शान्त"मित्यादिश्रुत्या बाधात् पूर्वानुमानस्याऽऽभासत्वमित्यर्थः। ज्ञानगुणं ब्रह्मेति यदुक्तम्, तन्निरस्यति—*ज्ञानेति* ॥ "विज्ञानमानन्दं ब्रह्मे"ति सामानाधिकरण्याददद्वितीयत्वाच्च ज्ञानं ब्रह्मस्वभावमित्यर्थः। 'घटज्ञानं समुत्पन्नम्' 'घटज्ञानं नष्टमि'त्युत्पत्तिविनाशप्रतिपत्तेर्न ज्ञानस्य स्वरूपत्वम् ; इतरथा ब्रह्मणोऽप्यन्तवत्त्वप्रसक्तेः, तत्राह—*अनन्तेति* ॥ "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति ज्ञानस्य नित्यत्वप्रतीतेर्जन्मविनाशप्रतिभासस्यान्तःकरणवृत्तिविषयत्वात् स्वरूपत्वं युक्तमित्यर्थः। "असदेवेद"मिति श्रुतेः शून्यमेव तत्त्वमिति शङ्कां निरस्यति—*सदिति* ॥ "अस्तीत्येवोपलब्धव्यः" "सदेव सोम्येद"मित्याद्यनेकवचनविरोधादसच्छब्दोऽनभिव्यक्तनामरूपविषय इत्यर्थः। संसार्यसंसार्यादिभावेन जीवपरयोर्भेदं केचिदाचक्षते, तान् प्रत्याह—*आत्मन इति* ॥ "तत्त्वमसि" "अयमात्मा ब्रह्मे"त्यादिवचनविरोधात् विरुद्धधर्मप्रतिभासस्य च काल्पनिकभेदविषयत्वादभेद एवेत्यर्थः। "सर्वकर्मे"त्यादिवचनात् सप्रपञ्चं ब्रह्मेति पक्षं निरस्यति—*अभूतेति* ॥ निरस्तसमस्तभेदायेत्यक्षरार्थः। जडाजडयोस्तत्त्वतोऽभेदाऽनुपपत्तेर्निर्विशेषत्वप्रतिपादकास्थूलादिवचनविरोधाच्च "सर्वकर्मे"त्यादिवचनमन्यथा व्याख्येयमित्यर्थः। ब्रह्मणः प्रत्यक्त्वे नमस्कार्यत्वानुपपत्तिः ; भेदाभावात्, इत्याशङ्क्यापारमार्थिकभेदशालित्वादविरोध इति नेत्याह—*अभूतेति* ॥ आत्मव्यतिरिक्तस्य सर्वस्य दृश्यत्वादपि न तद्धर्मत्वमित्याह—*साक्षिणे इति* ॥ आद्यश्लोकेनैवापेक्षितसिद्धेः किमुत्तरश्लोकैरित्याशङ्क्याह—

वार्तिकम्

विरोधित्वं प्रतिबन्धकत्वमि"ति प्रतिबन्धकलक्षणमाचक्षते वृद्धाः, तत्कारणत्वे सामग्र्यामिति विशेषणानुपपत्तेः, सकलकारणसमवधानस्य सामग्रीत्वात्। *एतेन*—कारणीभूताभावप्रतियोगित्वं प्रतिबन्धकत्वमिति प्रतिबन्धकलक्षणम्—अपहस्तितम् ; तत्कारणत्वासिद्धेः, मणिवत् करानलसंयोगाभावस्य प्रतिबन्धकत्वापत्तेः। नच—एवमस्त्विति—वाच्यम् ; मणाविव तत्र प्रतिबन्धकव्यवहारादर्शनात्, मण्यभावत्वेन कारणतावत् तदभावाभावत्वेन संयोगादेर्भावकारणस्य कारणतापत्तेश्च। नचैतदिष्टम् ; गौरवात्,

पञ्चपादिका

नमः श्रुतिशिरःपद्मषण्डमार्तण्डमूर्तये ॥ बादरायणसंज्ञाय मुनये शमवेश्मने ॥ २ ॥
नमाम्यभोगिपरिवारसम्पदं निरस्तभूतिमनुमार्धविग्रहम् ॥
अनुग्रमुन्मृदितकाललाञ्छनं विनाविनायकमपूर्वशङ्करम् ॥ ३ ॥

पञ्चपादिकाविवरणम्

दर्शितम् ; उत्तरत्र विभज्य तात्पर्यदर्शनात् । अत्र देवतागुरुविषया पूजानमस्काराद्युपबृंहिता भक्तिर्वक्तुरुक्त-प्रयोजनसंपादिन्यपि श्रोतृणामपि विद्याङ्गभावं प्रतिपद्यत इति वाङ्मनःकायप्रणिधानैर्गुरूनभिपूजयति—*नमः श्रुतिशिरःपद्मषण्डमार्तण्डमूर्तये इत्यादिभिः श्लोकैः* ॥ यत्कार्यमुद्दिश्य मङ्गलाचरणं सम्पादितम्, तन्निर्दिशति

ऋजुविवरणम्

करणाद् अत्रापि तद्व्याख्याने अन्यतरवैयर्थ्यमित्याशङ्क्याह—*कृत्स्नस्येत्यादिना* ॥ अत्र साधारणव्याख्या । उत्तरत्र विशिष्ट-व्याख्यानम् । तात्पर्यशब्दस्त्वितरव्याख्योपलक्षणार्थः । वार्तिककारेणाप्येतदेवोक्तम्—सर्वव्याख्याप्रदर्शनावसरे—"साधारणी विशिष्टा च सूत्रव्याख्या द्विधा मता । विशिष्टा प्रतिसूत्रं या सर्वार्था त्वियमुच्यते ॥" इति ॥ अनिषिद्धेनापि नमस्कारेण अभिमतप्रयोजनसिद्धेः, उत्तरत्र श्लोककरणं व्यर्थमित्याशङ्क्याह—*अत्रेति* ॥ भोगिनः सर्पाः, न भोगिनः अभोगिनः, वीतरागा वा; त एव परिवारसंपत् । *निरस्तभूतिम् = भस्मरहितं निरस्तैश्वर्यं वा । न उमार्धविग्रहः, अनुमार्ध-विग्रहः ; तम् । यद्वा—अनुमा = अनुमानम्, तदेवार्धविग्रहो यस्येति ; भाष्ये अर्धस्य तदात्मकत्वात्, भाष्यकारस्य च तद्विग्रहत्वात् । अनुग्रम् = शान्तम् । उन्मृदितं कालरूपं लाञ्छनं यस्मिन्निति ; कण्ठे कालरहित इत्यर्थः । यद्वा—काललाञ्छन ईश्वरः ; संहारकर्तृत्वात्, असौ तद्रहितः । अथवा—काललाञ्छनम् = जन्मादि उन्मृदितं विनाशितं येन । विनायकेन विना वर्तत इति विनाविनायकः, तम् । यद्वा—विनाकृतो विनायकः बौद्धः येनासौ । यद्वा—विना संसारे नायक-

तत्त्वदीपनम्

अत्रेत्यादिना ॥ "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ" इति वाक्यात् देवताभक्तिवत् गुरुभक्तेरपि विद्याप्राप्तिं प्रत्यन्तरङ्गत्वप्रतीतेर्गुरवोऽपि पूज्या इत्याह—*गुरूनिति* ॥ नमःशब्दार्थमाह—*वाङ्मन इति* ॥ प्रह्वीभावार्थस्य नमःशब्दस्य त्रयाणामपि नमस्काराणां साधारणत्वाद्वाङ्मनःकायप्रणिधानैरित्युक्तमिति द्रष्टव्यम् । गुरवः पूज्याश्चेत्, ग्रन्थाद् बहिरेव पूज्यन्ताम् ? तत्राह—*अत्रेति* ॥ अत्रेत्यस्याभिपूजयतीत्यनेन संबन्धः । ग्रन्थ एव पूजायां हेतुमाह—*देवतेति* ॥ देवता चासौ गुरुश्चेति देवतागुरुः । दृष्टान्तार्थो वा देवताशब्दः । आदिशब्देन ध्यानं गृहीतम् । ग्रन्थाद्बहिः क्रियमाणा कर्तुरपेक्षितकरी यद्यपि ; तथापि ग्रन्थे क्रियमाणा श्रोतृणामन्यमनस्कानामपि फलदा स्यादिति मत्वा ग्रन्थे करणमित्यर्थः ।

श्लोकानामेषोऽर्थः—बदरा यस्मिन् देशे सन्ति स बादरः, स एवायनं यस्य स बादरायणः, बादरायण इति संज्ञा यस्य, स बादरायणसंज्ञः ; तस्मै = तपोनिर्धूतकल्मषायेत्यर्थः । श्रवणे पौष्कल्यमाह—*श्रुतीति* ॥ श्रुतीनां शिरांसि तान्येव पद्मानि श्रुतिशिरःपद्मानि, तेषां षण्डः समूहः, तद्विकसने पटुतरा मार्तण्डवत् मूर्तिर्यस्य स तथा । मुनय इति मननसंपत्तिमाह । श्रवणादावधिकारयोग्यतामाह—*शमेति* ॥ शमो वेश्म यस्येति शमवेश्मा, शमस्य वेश्मेति वा । भाष्यार्थप्रतिपत्त्यर्थं तत्कर्तारं नमति—*नमामीति* ॥ प्रसिद्धशङ्करविलक्षणं परमहंसपरायणं शङ्कराचार्यं नमामीत्यर्थः । वैलक्षण्यमाह—*अभोगीति* ॥ भोगिनामधेयसर्पपरिवारसंपन्नः प्रसिद्धः शंकरः सः, अयं तु निरस्त-समस्तैषणमुनिवरनिकरपरिवृत इत्यर्थः । भूतिः = भसितम्, तदनुलिप्तगात्रः सः, अयं त्वैश्वर्यलक्षणभूतिविधुर इत्यर्थः । गिरिजार्धविग्रहः सः, अयं तु न तथा भवति । स क्रूर उग्रत्वात्, अयं तु शान्त इत्याह—*अनुग्रमिति* ॥ कण्ठे कालः सः,

पञ्चपादिका

यद्वक्त्र-मानससरःप्रतिलब्धजन्म-भाष्यारविन्द-मकरन्द-रसं पिबन्ति ॥
प्रत्याशमुन्मुखविनीतविनेयभृङ्गास्तान् भाष्यवित्तकगुरून् प्रणमामि मूर्ध्ना ॥ ४ ॥

ऋजुविवरणम्

मिति । मकरन्दरसमित्येकार्थत्वेऽपि विशेषावस्थाद्योतनार्थं शब्दद्वयम् । ये पिबन्ति, तान् नमामीत्यन्वयः । यद्वा—येषां वक्त्रं यद्वक्त्रमिति यच्छब्दोपात्तानुद्दिश्य नमस्कारः । न चैकेनैव श्लोकेनालमिति युक्तं वक्तुम् ; अनुत्पत्तौ अङ्गत्वायोगात् कियतामङ्गत्वमित्यपरिज्ञानाच्च सर्वसाफल्यम् । नमस्कारानन्तरं प्रतिज्ञाकरणं किमर्थमित्याशङ्क्य, फलवद्ग्रन्थ-करणसन्निधानान्नमस्कारस्यैतदर्थत्वं द्योतयितुमित्याह—* यत्कार्यमुद्दिश्येति * ॥ *ननु*—पूर्वमेव भाष्यव्याख्यानस्य प्रक्रान्तत्वात् किं प्रतिज्ञाकरणेन ? इत्याशङ्क्याह—*तन्निर्दिशतीति* ॥ किमर्थं पूर्वं भाष्यस्य तात्पर्यप्रदर्शनं कृतम् ? उच्यते ; अकृत्वापि वाचनिकीं प्रतिज्ञां तत्तात्पर्यव्याख्यानदर्शनात् । यथास्मिन्नेव तावद्भाष्ये ग्रन्थव्याख्यानं तु प्रतिज्ञापूर्वकमिति तदर्थं प्रतिज्ञाकरणम् । भाष्यकारेणापि "यथा चायमर्थः" इत्यनेन कृता प्रतिज्ञा । अथवा—आद्यश्लोक एव प्रतिज्ञापि कृता ; अप्रतिज्ञातव्याख्यानुपपत्तेः, उत्तरत्र प्रतिज्ञाकरणं तु सर्वत्र प्रतिज्ञाकरणं व्यर्थमिति बौद्धमतनिरसन-द्वारेण प्रतिज्ञाया अङ्गत्वं द्योतयितुम् । उक्तं च पुनः प्रतिज्ञाकरणस्यैतदेव प्रयोजनम्—"तस्य निमित्तपरीष्टिः" इत्यत्र व्याख्यातृभिः—"पूर्वमेवाध्यायार्थप्रतिज्ञे"त्येवं वदद्भिः । "पदादिवृन्तभारेणे"त्यनेन पदच्छेदादिव्याख्याविषयत्वं

तत्त्वदीपनम्

अयं तु कृष्णाऽविद्यालाञ्छनरहित इत्याह—*उन्मृदितेति* ॥ विनायको गणेशः तत्सहितः सः, एष विनायकं विना वर्तत इति ; निरस्तसमस्तबौद्धसमय इत्यर्थः ॥३॥ भाष्यकर्तृत्वोपाधौ शंकराचार्ये भक्त्यतिशयद्योतनाय पुनः पूजयति—*यद्वक्त्रेति* ॥ भाष्यमेव वित्तं येषां ते भाष्यवित्तकाः, स्वार्थे कप्रत्ययः । ते च ते गुरवश्च ते, तथोक्ताः । भाष्यवित्तकानां

वार्तिकम्

प्रथमोपनतसंयोगादित्वेन कारणत्वे संभवति तदभावाभावत्वेन तत्कल्पनायां प्रमाणाभावाच्च । संयोगाभावादेः प्रतिबन्धकत्वान्यथानुपपत्त्या तथा कल्प्यत इति चेत्, न ; अन्योन्याश्रयात् :—कारणाभावस्य प्रतिबन्धकत्वे सिद्धे तदभावत्वेन कारणताकल्पनम्, तत्कल्पने च तत्प्रतिबन्धकत्वमित्यन्योन्याश्रयः । *एतेन*—प्रतिबन्धो विसामग्री तद्धेतुः प्रतिबन्धक इति—*अपास्तम्* प्रतिबन्धत्वासिद्धेः । विस्तरस्तु वेदान्तमन्दाकिन्यामद्वैता-मृतकन्दे चानुसर्तव्यः । तस्मान्न प्रतिबन्धाभावो हेतुः । तथाच तद्द्वारापि न विचारो वाक्यार्थबोधकारणम् । किं तर्हि ? विचारेण प्रतिबन्धे निवृत्ते स्वयमेवाप्रतिबद्धतयोपनतं सत् वाक्यं स्वार्थबोधं जनयति ; करणस्य चरमकारणत्वेन स्वोत्तरभाविकारणान्तरानपेक्षत्वात् । नचैवं सति पदार्थज्ञानापेक्षापि न स्यात् ; तस्य तद्व्यापारत्वेन करणशरीरप्रवेशात्, वाक्यज्ञानात्पूर्वभावित्वाच्च चरमत्वक्षतेर्वाक्यज्ञानस्य । *ननु*—एवं सति योग्यतापि न कारणं स्यात् ; तस्याः प्रतिबन्धकाभावरूपत्वात्, वाक्यार्थाबाधो हि योग्यता ; बाधश्च ग्राह्याभावनिश्चयः, स च ग्राह्यनिश्चयप्रतिबन्धक इति—चेत्, *इष्टापत्तेः* । नच—एवमयोग्यान्वयबोधः स्यादिति—वाच्यम् ; अप्रतिबद्धस्यैव कारणत्वादित्युक्तत्वात् । *ननु*—एवं सति मीमांसायाः कथमितिकर्तव्यतात्वम् ? न ह्यकारणमितिकर्तव्यता भवति, *सत्यम्* ; इतिकर्तव्यता खलु द्वेधा—स्वरूपोपकारिणी ; यथाऽवघातादिः, फलोपकारिणी च ; यथा प्रयाजादिः । प्रकृते च फलोपकारित्वाभावेऽपि स्वरूपोपकारित्वस्य विद्यमानत्वादित्युक्तत्वाददोषः । *ननु*—एवमपि तात्पर्यावधारणार्थमेव विचारोऽस्तु, न शक्त्यवधारणार्थम् ; लोकत एव तत्सिद्धेः, अन्यथा लोकवेदाधिकरणविरोधापत्तेरिति—*चेत्*,

पञ्चपादिका

पदादिवृन्तभारेण गरिमाणं बिभर्ति यत् । भाष्यं प्रसन्नगम्भीरं तद्व्याख्यां श्रद्धयाऽऽरभे ॥५॥

पञ्चपादिकाविवरणम्

पदादिवृन्तभारेणेति । *ननु*—नेदं भाष्यं व्याख्यानपदवीमुपारोढुमर्हति ; भाष्यलक्षणाभावात्, "सूत्रार्थो

तत्त्वदीपनम्

गुरव इति वा विग्रहः । पूर्वस्मिन् पक्षे नमस्कार्यत्वे ब्रह्मविद्यासंप्रदायकर्तृत्वरूपहेतुं दर्शयति—* यद्वक्त्रेति * ॥ षष्ठीसमासपक्षे भाष्यक्त्वं कुतो लब्धमित्याशङ्क्य गुरुभ्य एवेत्याह—* यद्वक्त्रेति * ॥ येषां वक्त्रं यद्वक्त्रम्, तदेव मानसाख्यं सरः, तस्मात्प्रतिलब्धं जन्मानेनेति तत्, तथोक्तम्, तच्च भाष्यारविन्दं चेति, तथा तस्य मकरन्दः, यद्वक्त्रमानससरःप्रतिलब्धजन्मभाष्यारविन्दमकरन्दः ; तस्य रसमित्यर्थः । मकरन्दः पुष्परस इति मकरन्दशब्दस्य पुष्परसे प्रसिद्धत्वात् रसशब्दोऽनर्थक इति चेत्, तद्गतविशेषावस्थाद्योतकत्वात् नानर्थक इति ब्रूमः । *प्रत्याशम्=प्रतिदिशम् । दिशं दिशं प्रति स्थित्वेत्यर्थः । उन्मुखाश्च ते विनीताश्च उन्मुखविनीताः, ते च ते विनेयाश्चेति, तथात एव भृङ्गवद् भृङ्गा इति उन्मुखविनीतविनेयभृङ्गाः । उन्मुखत्वं नामास्तिक्ययुक्तता, विनीतत्वमौद्धत्यादिराहित्यम् ॥ ४ ॥

नमस्कारानन्तरं टीकाकृतः प्रतिज्ञाकरणं व्यर्थमित्याशङ्क्य, फलवद्ग्रन्थकरणसन्निधानात् नमस्कारस्य तच्छेषत्वद्योतनार्थं प्रतिज्ञातम् ; सन्निहितप्रयोजनसंभवेऽसन्निहितफलकल्पनानुपपत्तेरित्याह—* यत्कार्यमिति * ॥ "पदादिवृन्ते"त्यस्यैषोऽर्थः—भाष्यस्य व्याख्येयत्वमाह—*गम्भीरमिति* ॥ सर्वजनवगाह्यत्वादव्याख्येयत्वम्, नेत्याह—* प्रसन्नेति * ॥ आपाततः प्रसन्नत्वम्, विचारणया तु गम्भीरत्वमित्यर्थः । गाम्भीर्यमेवाह—* पदादीति * ॥ पदच्छेद-पदार्थकथन-विग्रह-वाक्ययोजनाऽऽक्षेप-समाधानलक्षणप्रसवबन्धनरूपवृन्तभारेणेत्यर्थः ॥ ५ ॥

वार्तिकम्

सत्यं लोकत एव शक्तिग्रहः ; तथापि यत्र लोकतः शक्तिर्नावगता, यथा यूपाहवनीयादिषु यूपाहवनीयादीनाम्, तत्र वाक्यशेष-प्रसिद्धपदसमभिव्याहारादिना शक्तिर्गृह्यते, नचैतत् विचारमन्तरेण संभवति । तद्यथा—अस्मिन्नेवाधिकरणे प्रसिद्धजिज्ञासापदसमभिव्याहारबलात् ब्रह्मपदस्य लोकसिद्धजात्याद्यर्थासंभवात् तदनुकूलतया शक्तिविषयोऽपि विचार इति समञ्जसम् ; अन्यथा किमेतस्य पदस्यायमर्थः ? किं वाऽन्य इति सन्देहे तात्पर्यावधारणानुपपत्तेरिति । तस्मात् सम्यगभिहितम्—तद्विजिज्ञासस्वेति हि श्रुत्या वेदान्तवाक्यानां विचारकर्तव्यतोपदिश्यत इति ॥ तदेतन्न संभवति, *तथाहि*—

प्रयोजनाद्यसद्भावात् पूर्वतन्त्रगतत्वतः । विष्ण्वादिवाक्यवन्नात्र विधिः स्तुत्येकरूपतः ॥

प्रदीपः

ब्रह्मविचारविधीनां संग्रहात्मके हि सूत्रे तद्विध्यवगतान्येव साधनानि अथशब्देनानन्तर्यप्रतियोगितया विवक्षणमर्हन्ति, नान्यत् । नहि "श्रोतव्या"दिवाक्यशेषे तदादौ वा कर्मविचारः कुत्रापि निर्दिष्टः, साधनचतुष्टयसम्पत्तिस्तु गुणोपसंहारन्यायेन सम्यगुपक्षिप्तेति तदानन्तर्यमेवाथशब्दार्थः । तथाच सत्यपि चाधिकारिनियमेऽवश्यकर्तव्ये न पूर्वतन्त्रापेक्षामुत्तरतन्त्रस्य सूत्रकाराः सूचयन्ति । अधिकारिविशेषोऽत्रापि पक्षे संप्रदायैकसमधिगम्यः, इति न मात्रया ब्रह्ममीमांसाया महिमाऽपचिनोति । ततश्चाधिकारिविशेषं ब्रह्ममीमांसाशास्त्रे सूत्रकाराः स्पष्टं सूचयन्त्यथशब्देनेति पक्ष एव श्रेयान् । तत्र चाधिगतकर्मावबोधः कर्मफलविरक्तो नित्यामृतत्वरूपफलकामी ब्रह्ममीमांसाशास्त्राधिकारीति शास्त्रैक्यवादिनः । *शास्त्रभेदवादिनस्तु शांकराः—साधनचतुष्टयसम्पन्नो ब्रह्ममीमांसाशास्त्राधिकारीति—मन्यन्ते ॥

* विषयस्वरूपनिष्कर्षार्थन्तु ब्रह्ममीमांसाप्रथमोऽध्यायः, यत्र "जन्माद्यस्य यतः" इत्यादिना संग्रहेण विस्तरेण च ज्ञेयं ब्रह्म निष्कृष्य प्रतिपाद्यते । कारणतया लक्ष्यमाणं च ब्रह्मस्वरूपं केवलनिमित्तकारणमिति श्रीमदानन्दतीर्थादयः । अभिन्ननिमित्तोपादान-

पञ्चपादिकाविवरणम्

वर्ण्यते यत्र वाक्यैः सूत्रानुकारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरि''ति हि भाष्यलक्षणं वदन्ति। तत्र''थातो ब्रह्मजिज्ञासे''ति सूत्रेऽनुवादपरिहाराय शास्त्रे पुरुषप्रवृत्तिसिद्धये च कर्तव्येतिपदमध्या-

ऋजुविवरणम्

दर्शितम्। 'प्रसन्नगम्भीरमि'त्यनेन तात्पर्यव्याख्यानयोग्यत्वम्। अनन्तरग्रन्थस्य शङ्कामाह—*ननु नेदमिति*॥ कथं लक्षणाभाव इत्याशङ्क्यापरिज्ञाते लक्षणे तदभावावगमायोगात्स्वरूपमाह—*सूत्रार्थ इति*॥ तत्र 'वर्ण्यते यत्र किंचित्तद्भाष्यमि'त्युक्ते शब्दवर्णनस्यापि भाष्यत्वं भवेत्, तदर्थमर्थ इति विशेषणम्। 'अर्थो वर्ण्यते यत्र तद्भाष्यमि'त्युक्ते सूत्रस्यापि भाष्यत्वं स्यात्, तदर्थम्—सूत्रेति विशेषणम्। 'सूत्रार्थो वर्ण्यते यत्र तद्भाष्यमि'त्युक्ते पदवृत्तेरपि स्यात्, तदर्थम्—वाक्यैरिति। तथापि वार्तिकस्य भाष्यत्वम्, तदर्थम्—सूत्रानुकारिभिरिति पदम्। उक्तानुक्तदुरुक्तचिन्तना-राहित्यमनुकारित्वम्। अथवा—''पश्वादिभिश्चाविशेषात्'' इतिवदनुकरणम्। एतावत्यपि वृत्तिग्रन्थे अतिव्याप्तिः, तद्व्यावृत्त्यर्थम्—स्वपदानीति विशेषणम्। कथमस्य लक्षणत्वमिति ? तदाह—भाष्यविदो विदुरिति। तत्र सूत्रार्थावर्ण-नादभाष्यत्वमिति दर्शयितुं सूत्रस्वरूपं तदर्थं च प्रथमं दर्शयति—*तत्राथात इति*॥ अध्याहारे प्रयोजनमाह—*अनु-वादेति*॥ अनुवादवदनुवादः; सिद्धमात्रकीर्तनात्। किं तत्परिहारेणेति ? तदाह—*पुरुषप्रवृत्तीति*॥ प्रयोजनसमुच्चयो वा। अथवा—अनुवादो निष्प्रयोजनत्वम्। *ननु*—निष्प्रयोजनत्वपरिहाराय प्रयोजनमेव कल्प्यम्, न तु विध्यध्या-हारेण कृत्यम्; व्यधिकरणत्वप्रसङ्गादित्याशङ्क्याह—*पुरुषप्रवृत्तीति*॥ शास्त्रे प्रवृत्तिरेव प्रथमसूत्रस्य प्रयोजनम्, विध्यभावे तदभाव इति भावः। शास्त्रस्य वा निष्प्रयोजनत्वपरिहारायेति। *ननु*—विधौ सति शास्त्रे प्रवृत्तिर्भवेत्, न तु शास्त्रस्य प्रयोजनवत्त्वमिति, तदाह—*पुरुषप्रवृत्तिसिद्धय* इति॥ अप्रवृत्तप्रेरणात्मको विधिरपुरुषार्थे प्रेरयितुमशक्नुवन् प्रवृत्तिविषयस्य पुरुषार्थसाधनत्वं कल्पयति; प्रवृत्तिसिद्धये कल्पितत्वादित्यर्थः। तदुक्तम्—''विधौ हि तमतिक्रम्य स्वर्गादिः साध्यतेष्यते इति''॥ केचित्—अनु पश्चात् वाद इति मुख्यमेवानुवादमाश्रित्य ज्ञातज्ञापनपरिहारायेति—वर्ण-

तत्त्वदीपनम्

भाष्यस्य व्याख्येयत्वं प्रतिज्ञाय, तदितरव्याख्याने प्रतिज्ञाविरोधः स्यादिति शङ्कते—*ननु नेदमिति*॥ इदं भाष्यं न भवति; अतो न व्याख्यानपदवीमुपारोढुमर्हतीति योजना। भाष्यकृत्प्रणीतत्वेन भाष्यत्वं तस्य स्पष्टमित्याशङ्क्य, न तत्प्रणीतत्वमात्रेण भाष्यत्वसिद्धिः; अतिप्रसङ्गात्, अतो भाष्यलक्षणलक्षितत्वेन भाष्यत्वं वक्तव्यम्, न च तन्निरूपयितुं शक्यमित्याह—*भाष्यलक्षणेति*॥ लक्षणावगममन्तरेण तदभावावगमानुपपत्तेर्लक्षणमाह—*सूत्रार्थ इति*॥ यत्रार्थो वर्ण्यते तद्भाष्यमित्युक्ते सागरादिवर्णनस्यापि भाष्यत्वं स्यात, तद्व्यावृत्त्यर्थम्—सूत्रेति विशेषणम्। पदवृत्तिं व्यावर्तयति—*वाक्यैरिति*॥ वार्तिकव्यावृत्त्यर्थमाह—*सूत्रानुकारिभिरिति*॥ वार्तिके सूत्रप्रतिकूलवर्णन-स्यापि संभवात् व्यावृत्तिरित्यर्थः। वृत्तिं व्यावर्तयति—*स्वपदानीति*॥ अस्त्वेवं भाष्यलक्षणम्, कथं तदभावः प्रकृते ? इत्याशङ्क्य, किं सौत्रश्रौतार्थसंस्पर्शित्वेन भाष्यलक्षणाक्रान्तत्वम्, उत आर्थिकार्थसंस्पर्शित्वेन ? उभयथाप्य-संभव इति प्रतिपादयितुम्—प्रथमं साकाङ्क्षत्वेन सूत्रस्याऽऽनर्थक्यशङ्कां निरस्यति—*तत्राथात इत्यादिना*॥ तत्र= भाष्यलक्षणे एवं व्यवस्थिते इत्यर्थः। सर्वज्ञबादरायणप्रणीतत्वादानर्थक्यानुपपत्तेरध्याहारेणापि सूत्रं योजनीयमित्याह—

वार्तिकम्

यद्धि प्रयोजनवत् सविषयं संबद्धं साधिकारिकं च, तत् परीक्ष्यते लोके; यथा—धर्मप्रमाणम्, यन्नैवम्, तन्नैवम्; यथा जरद्गवादिवाक्यम्। न चात्र प्रयोजनाद्यन्यतममस्ति। तथाहि—

श्रूयमाणं नैव फलं नानुषङ्गोऽर्थवादतः। नापि प्रकल्पनं युक्तं प्रमाणासंभवो यतः॥

येन हि प्रयुज्यमानः पुरुषो ग्रहगृहीत इव दुःखात्मकेष्वपि साधनेष्वायतते, तत्प्रयोजनम्; हिताहित-

पञ्चपादिकाविवरणम्

हर्तव्यम्। तत्र जिज्ञासापदेनान्तर्णीतं विचारमुपलक्ष्यानुष्ठानयोग्यतया साधनचतुष्टयसम्पन्नस्य ब्रह्मज्ञानाय विचारः कर्तव्य इति सूत्रवाक्यस्य श्रौतोऽर्थः सम्पद्यते। अर्थादधिकारिविशेषणमोक्षसाधनं ब्रह्मज्ञानमिति

ऋजुविवरणम्

यन्ति ; आपाततो ज्ञातत्वादिति, तन्मन्दम् ; ज्ञाते वस्तुनि विध्यध्याहारेऽपि ज्ञातत्वापरिहारात्, आपाततः कर्तव्यताया विज्ञातत्वात्। उक्तं च "स्वेनैव कर्तव्यताज्ञानवत्त्वमधिकृत्य सूत्रं प्रवृत्तमि"ति—"नित्येनैवाध्ययनविधिने"त्यादिना। अतश्च मूलग्रन्थविरुद्धं तद्व्याख्यानमिति उपेक्षितम्। *ननु*—एवमपि पुरुषप्रवृत्तिर्न संभवति ; ज्ञानेच्छयोरननुष्ठेयत्वादिति, तत्राह—*तत्र जिज्ञासापदेनेति* ॥*ननु*—कथं विचारलक्षणा ? संबन्धाभावादिति, तत्राह—*अन्तर्णीतमिति* ॥ विचारसाध्यज्ञानेच्छयोर्जिज्ञासाशब्दः प्रयुक्त इति भावः। एवमपि कथं विचारस्यैव लक्षणा ? अन्येषामपि संबन्धिनां भावात्, अथवा—प्रतीतयोरविधेयत्वेऽपि विधित्वमेव न भवेत् ; अग्निना सिञ्चेदितिवत्, तथाऽविधित्वादेव न लक्षणा संभवतीत्याशङ्क्याह—*अनुष्ठानयोग्यतयेति* ॥ साध्ये प्रवृत्तो विधिस्तत्साधन एव योग्ये प्रथमं पर्यवस्यति फलभावनाप्रवृत्तविधिरिव तत्साधने, तथा विधित्वेनावधृततात्पर्ये प्रतीताविधानेऽपि तत्संबन्धिविधानं युक्तम्, "सिञ्चेदि"ति वाक्यस्य तु आनर्थक्यमेव ; तात्पर्यानवधारणात्, अगत्या लक्षणापि विधौ दृष्टा "अर्धमन्तर्वेदी"त्यत्र। अथशब्दार्थमाह—*साधनचतुष्टयेति* ॥ जिज्ञासाशब्दस्य वाचनिकार्थमाह—*ब्रह्मज्ञानायेति* ॥ *ननु*—अन्यस्यापि सूत्रार्थत्वेन प्रतिपाद्यमानत्वं दृश्यते, अतः कथमेतावानेव सूत्रार्थ इति ? तत्राह—*श्रौतार्थ इति* ॥ *ननु*—कथं ब्रह्मज्ञानस्य साध्यत्वम् ? अपुरुषार्थत्वात्, नापि पुरुषार्थसाधनत्वम् ; तत्साधनत्वे मानाभावात्, इत्येतामाशङ्कां निवर्तयितुमार्थिकार्थमाह—

तत्त्वदीपनम्

* अध्याहर्तव्यमिति * ॥ तत्रापि योग्यमेवाध्याहर्तव्यमित्याह—* कर्तव्येति * ॥ योग्यत्वमुपपादयति—* शास्त्र इति * ॥ पुरुषप्रवृत्तिरेव मा भूदित्याशङ्क्याह—* अनुवादेति * ॥ निरर्थकसिद्धबोधिवाक्यमनुवादशब्दार्थः। भावप्रधानश्चायं निर्देश इति द्रष्टव्यम्। कर्तव्यपदाध्याहारेऽप्यानर्थक्यं तदवस्थम् ; प्रकृतिप्रत्ययार्थयोर्ज्ञानेच्छयोः कर्तव्यत्वासंभवात्, इत्याशङ्क्य जिज्ञासापदेन विचारं लक्षयित्वा तस्य कर्तव्यतोच्यत इत्याह—* तत्र जिज्ञासापदेनेति * ॥ * तत्र = सूत्रे इत्यर्थः। लक्षणायां हेतुमाह—* अनुष्ठानयोग्यमिति * ॥ विचारस्यैव लक्षणायां को हेतुः ? इत्याशङ्क्य, तस्य जिज्ञासापदवाच्यसंबन्धादित्याह—* अन्तर्णीतमिति * ॥ ज्ञानेच्छयोरन्तर्मध्ये नीतमिति यावत्। परोक्षतया ज्ञातेऽपरोक्षफलज्ञानमिष्यते, संदिग्धे च निश्चयफलम्, तच्च विचाराविनाभूतमिति विचारे लक्षणेत्यर्थः। अथवा—जिज्ञासा कर्तव्या, इष्यमाणज्ञानस्य साक्षादिच्छासाध्यत्वासंभवात्तन्निर्वाहको विचार आक्षिप्यते। इच्छाया अपि साक्षात्साधनत्वेनानन्वयात्तन्निर्वाहको विचार आश्रयणीयः ; क्रियायाः कालान्तरभाविफलसाधनत्वानुपपत्त्या अपूर्वाभ्युपगमवदित्यर्थः। एवमप्यधिकारि-फलसाकाङ्क्षत्वेनानर्थक्यमित्याह—* साधनचतुष्टयेति * ॥ अथशब्दात् विशिष्टाधिकारिप्रतिपत्तेः इच्छाविषयत्वात् ब्रह्मज्ञानस्य फलत्वं चेत्यर्थः। ज्ञानस्य सुखदुःखप्राप्तिनिवृत्त्यन्यतरत्वाभावादफलत्वमित्याशङ्क्याऽऽर्थिकमाह—* अर्थादिति * ॥ *इदमत्राऽऽकूतम्*—ब्रह्मज्ञानाय विचारकर्तव्यता तावत्प्रतीयते, न च ब्रह्मज्ञानस्य स्वरूपेण

वार्तिकम्

प्राप्तिपरिहारौ च तथा। न चेष्यमाणतया श्रूयमाणं ब्रह्मज्ञानम् ; तस्य सुखदुःखाभावेतरत्वात्। नच—तन्मयत्वाभावेऽपि ब्रह्मज्ञानस्य पश्वादिवत्तत्साधनत्वादिष्यमाणत्वमविरुद्धमिति—वाच्यम् ; वैलक्षण्यात्। नहि पश्वादेः प्रत्यक्षेण सुखहेतुत्वदर्शनवत् ब्रह्मज्ञानस्य सुखदुःखाभावान्यतरहेतुत्वं कुत्रचित् दृष्टम्। *अत एव*—"ब्रह्मविदाप्नोति परम्" इत्यार्थवादिकं फलं प्रतिष्ठाफलवदनुषञ्जनीयमिति—*अपास्तम्*। अपापश्लोकवत् अनुपलब्धिविरोधात्। प्रतिष्ठायां अदृष्टफलत्वेनादर्शनोपपत्तेः—ज्योतिष्टोमादिफलवत्।

पञ्चपादिकाविवरणम्

सिध्यति, सन्निधानाच्च वेदान्तवाक्यविचारः, इति श्रुत्यर्थाभ्यां साधनचतुष्टयसम्पन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारः कर्तव्य इति सूत्रवाक्यस्य तात्पर्येण प्रतिपाद्योऽर्थोऽवगतः। तत्रेदं भाष्यं न सूत्रार्थकलामपि प्रतिपादयति, अतो न व्याख्यानार्हम्--इति, एतं शङ्कितं दोषं परिहरन् भाष्यखण्डस्य सूत्रेणार्था-

ऋजुविवरणम्

अर्थादिति॥ विशेषणमिति व्यस्ते पाठे विशेषणं मोक्षो यत इति व्याख्येयम्। यद्वा—ब्रह्मज्ञानकामेन विचारः कर्तव्यः, ज्ञानं वा कर्तव्यमित्यपि सूत्रार्थोऽस्तीत्याह—*अर्थादिति*॥ सप्रमाणं विचार्यस्वरूपमाह—*सन्निधानादिति*॥ श्रवणादिविधायकवाक्यसन्निधौ तेषां पठितत्वात् तत्सन्निधिरेवास्यापि सन्निधिः; तदितिकर्तव्यताभूतत्वात्। अथवा—"औपनिषदमि"ति विशेषणसामर्थ्याद् ब्रह्मज्ञानजननयोग्यत्वं तेषामेवेति योग्यतैव सन्निधिरभिप्रेता। एवमवयवार्थान् प्रतिपाद्य समस्तवाक्यार्थं दर्शयति—*इति श्रुत्यर्थाभ्यामिति*॥ कथं सकलस्य सूत्रार्थत्वमिति? तदाह—*तात्पर्येणेति*॥ यदर्थमयमर्थो दर्शितः, तदाह—*तत्रेदमिति*॥ एवं शङ्कामुपवर्ण्य तन्निवृत्तौ तात्पर्यमाह—*एतं शङ्कितदोषमिति*॥ *ननु*—आदौ वाचनिकार्थमनुक्त्वा किमित्याभिप्रायिकार्थकथनमिति? तत्राह—*एतं शङ्कितदोषं परिहरन्निति*॥ *ननु*—आद्यभाष्यस्यावसरप्राप्तत्वात्तस्यैव सूत्रस्पर्शो वक्तव्यः,किमन्येषां तत्प्रदर्शनेन? इत्याशङ्क्याह—*भाष्यखण्डस्येति*॥ भाष्यखण्डस्य शङ्कितं दोषं परिहरन्नित्यन्वयः। आद्यस्यावसरप्राप्तत्वेऽपि लाघवात्सर्वविषयौ

तत्त्वदीपनम्

पुमर्थता; दुःखनिवृत्तिसुखावाप्त्यन्यतरत्वाभावात्। तस्मात् फलविशेषाकाङ्क्षायामथशब्दोपात्ताधिकारिविशेषणं मोक्षः फलत्वेन संबध्यते—यथा 'स्वर्गकामो यजेते'त्यत्राधिकारिविशेषणस्य फलत्वम्, तद्वत्। * ननु *—अधिकारिविशेषणत्वेन मोक्षस्य फलत्वम्? उत काम्यत्वेन? * न तत्र प्रथमः कल्पोऽवकल्पते; जीवनगृहदाहादेरपि फलताप्रसङ्गात्, * न द्वितीयः *; "परस्त्रीकामः प्रायश्चित्तं कुर्या"दित्यत्र काम्यमानयोषित्पिण्डस्यापि फलतापातात्। तस्मादधिकारिविशेषणस्य फलत्वमसङ्गतमिति चेत्, *नैतत्*; न विशेषणत्वमात्रेण काम्यत्वमात्रेण वा मुक्तेः फलत्वम्, किं तु काम्यत्वे सत्यनिन्दितत्वेन। तस्मादधिकारिविशेषणीभूतो मोक्षः फलमिति सुष्ठूक्तमिति। विचारस्य विषयसाकाङ्क्षत्वात्तस्य चानिर्दिष्टत्वात्साकाङ्क्षत्वशङ्कां निरस्यति—* सन्निधानादिति *॥ वेदान्तवाक्यविचार इति च सिध्यतीति संबन्धः। प्रत्यक्षाद्यगोचरत्वेनोपनिषन्मात्रप्रतिपाद्यत्वात्तद्विषयो विचारः साधनमित्यर्थः। सूत्रार्थवर्णनमुपसंहरति—* इति श्रुत्यर्थाभ्यामिति *॥

फलितं दर्शयति—* तत्रेति *॥ "युष्मदित्या"दि सूत्रार्थकलामपि न प्रतिपादयति, अतो न भाष्यमिति योजना। अभाष्यत्वसमर्थनफलमाह—* अत इति *॥ इतिशब्दः पूर्वपक्षसमाप्तिद्योतनार्थः। तदुत्तरत्वेन टीकामवतारयति—* एतं शङ्कितमिति *॥ भाष्यद्वयमेव कस्मादाक्षिप्य समाधीयते? उत्तरत्राप्याक्षेपसमाध्योरविशेषादित्याशङ्क्य, सूचितविषयप्रयोजनहेत्वध्यासविषयस्य "युष्मदस्मदि"त्यादेर्भाष्यत्वसिद्धावध्यासविषयोत्तरभाष्यस्यापि भाष्यत्वं सिध्य-

वार्तिकम्

अत एव—विश्वजिन्न्यायेनादृष्टफलकल्पनमपि—*अपास्तम्*; ज्ञानस्य दृष्टफलत्वाभ्युपगमात्, तत्कल्पने प्रमाणाभावाच्च। नहि विश्वजिद्वत् ज्ञानस्यापूर्वकल्पने प्रमाणमस्ति; तद्वत् ज्ञानस्य प्रकृते फलत्वेनाविधेयत्वात्तदन्यथानुपपत्तेरभावात्। तस्मान्नास्ति किञ्चिदपि प्रयोजनम्॥ विषयाभावाच्च। तथाहि :—

न ब्रह्म विषयः सिद्धमशास्त्रत्वप्रसङ्गतः। शक्तग्रहप्रसङ्गाच्च नातो वेदान्तगोचरः॥

अत्र हि मुमुक्षोरात्मजिज्ञासोः प्रवृत्तिसिद्धये सर्ववेदान्तेष्वापाततः प्रतिपत्तेश्च ब्रह्मैव विषयो वाच्यः।

पञ्चपादिका

"युष्मदस्मत्प्रत्ययगोचरयोरि"त्याद्य"हमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः" इत्यन्तं भाष्यम्—"अस्यानर्थहेतोः प्रहाणायाऽऽत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते" इत्यनेन भाष्येण

पञ्चपादिकाविवरणम्

दुपात्तविषयप्रयोजनप्रतिपादने तात्पर्यं दर्शयति—* "युष्मदस्मत्प्रत्ययगोचरयोरि"त्याद्यह"मिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः" इत्यन्तं भाष्यम्—"अस्यानर्थहेतोः प्रहाणायाऽऽत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते" इत्यनेन भाष्येण पर्यवस्यत्, शास्त्रस्य विषयः प्रयोजनं चार्थात् प्रथमसूत्रेण सूत्रिते इति प्रतिपादय-

ऋजुविवरणम्

चोद्यपरिहारौ तयोरेकत्वाच्च कृतौ। यद्वा—समुदायतात्पर्यपुरस्सरत्वात् सर्वत्रावान्तरतात्पर्यस्येति भावः। उत्तरत्र चान्वयः—भाष्यखण्डस्य प्रतिपादने तात्पर्यमिति। *ननु*—भाष्ये विषयप्रयोजनप्रतीत्यभावात् कथं टीकाकृता तत्प्रतिपादकत्वमुच्यते ? इत्याशङ्क्याह—*तात्पर्यं दर्शयतीति*॥ तत्र पर्यवस्यत् प्रतिपादयतीति टीकाग्रन्थस्यान्वयः प्रतिभाति ; निरन्तरत्वात्—यथा षष्ठाद्यपूर्वपक्षे लिङः क्रियया। उक्तं च भट्टपादैः—"अनन्तरेण संबद्धः स्यात् परस्याप्यनन्तरः।" इति। तथा सति तस्य भाष्यस्य निरन्तरलक्षणादेरेव तेन पर्यवसानात् विषयप्रयोजनप्रतिपादकत्वम्, नान्यभाष्ययोः। अथ—इत्यन्तं प्रतिपादयतीत्यन्वयः, तथा सति "पर्यवस्यत्" इत्यस्यानन्वयः। अथोभयोः 'प्रतिपादयति'नान्वयः, वाक्यभेदः स्यात्। अथ पूर्वस्यैव प्रतिपादकत्वम्, "पर्यवस्यदि"त्यस्य"इत्यन्तमि"त्येतद्विशेषणत्वेनान्वयात् न वाक्यभेदः, तथापि प्रतिपादकत्वासंभवः। स्वतोऽसामर्थ्ये ह्यन्येन पर्यवसानात् प्रतिपादकत्वम्, नास्य तेन पर्यवस्यतोऽपि प्रतिपादकत्वं संभवति। न च लक्षणादीनामत्र ग्रहणं संभवति ; आद्यन्तप्रतीकयोरन्यतराभावात्। न वा"स्यानर्थहेतोरि"त्यस्य सर्वग्रन्थान्तत्वादन्तप्रतीकत्वेन ग्रहणं युक्तम् ; "नैसर्गिकोऽयं लोकव्यवहारः इत्यन्तमि"त्यन्तग्रहणेन तद्ग्रहणस्य निवारितत्वात्, तद्ग्रहणे हि "युष्मदस्मदित्यादि सर्वे वेदान्ता इत्यनेन पर्यवस्यदि"त्येव वक्तुं युक्तम्, नान्तग्रहणस्योपयोगः। अतोऽन्तग्रहणमादिग्रहणेनाविशेषेण सर्वग्रहणे प्राप्ते तन्निवर्तकत्वेन कृतमित्यवगम्यते। किंच—'पर्यवस्यदि'त्यस्य पर्यवसानतन्त्राकाङ्क्षस्य उपात्तेन—इत्यन्तम् इत्यनेनान्वयः ; उपात्तस्यैवोपात्तेनान्वयात्, "इत्यन्त"-मित्युपात्तस्य चान्याकाङ्क्षत्वात्, तथापि प्रतिपादकत्वासंभवाल्लक्षणादीनां वाऽव्याख्येयत्वम्, अन्तग्रहणस्य वा वैयर्थ्य-

तत्त्वदीपनम्

तीत्यभिसंधायाह—* भाष्यखण्डस्येति *॥ भाष्यद्वयस्येत्यर्थः। उत्तरभाष्यस्य एतत्समानयोगक्षेमत्वं दर्शयितुं खण्डशब्दप्रयोग इत्यर्थः। किम्—इत्यन्तं यद्भाष्यम्, तत्प्रतिपादयतीत्यन्वयः ? किं वेत्यन्तं यत्, तद्भाष्यमिति ? *नाद्यः* ; अद्यापि भाष्यत्वासिद्धेस्तत्प्रतिपादयतीत्युक्त्यनुपपत्तेः, * न द्वितीयः * ; प्रतिपादयतीत्यत्र कर्त्रभावप्रसङ्गात्। न च—इत्यन्तस्यैव ग्रन्थस्य कर्तृत्वेन संबन्ध इति—शङ्क्यम् ; तस्य विषयादिप्रतिपादकताया एवानुपलब्धेः, इति शङ्कां निरस्यति—* तत्रेति *॥ यत् इत्यन्तम्, तद्भाष्यमिति विधीयते, न च प्रतिपादयतीत्यत्र कर्त्रभावप्रसङ्ग इत्याह—* इति ग्रन्थ इति *॥ तत्र टीकायामेष ग्रन्थः प्रतिपादयतीति योजना। न च—प्रतिपादकत्वमसिद्धमिति—शङ्क्यम् ; तस्य वक्ष्यमाणत्वादित्यर्थः। अथवा—प्रतिपादयतीत्येतद्विधीयते। न च भाष्यत्वासिद्धेरननुवादः ; भाष्यशब्दस्य ग्रन्थमात्रवाचित्वादित्यर्थः। इत्यन्तं भाष्यमित्यन्तग्रहणसामर्थ्यादवधारणं प्रतीयते, तत् केनान्वेतीति विवेचनीयम्—

प्रदीपः

मिति तु द्वैताद्वैत-विशिष्टाद्वैत-शुद्धाद्वैत-केवलाद्वैतवादिनः। अभिन्ननिमित्तोपादानपदेनैकमेव ब्रह्मोपादानतया निमित्ततया च विवक्ष्यते। निमित्तकारणब्रह्मातिरिक्तमुपादानान्तरमुपादानकारणातिरिक्तमपरं निमित्तकारणं वा नास्तीति तु निष्कर्षः। एकमेव निमित्तकारणमुपादानकारणं चेत्ययन्तःकरणस्य तत्परिणामात्मकवृत्तिं प्रत्युपादानत्वस्य निमित्तत्वस्य च सांख्यैः, आत्ममनःसंयोगद्वारा

पञ्चपादिकाविवरणम्

तीति*॥ तत्र "नैसर्गिकोऽयं लोकव्यवहार" इत्यन्तं भाष्यमिति ग्रन्थः "शास्त्रस्य विषयं प्रयोजनं च प्रतिपादयती"-त्युत्तरेण सम्बध्यते। ननु—कथं भाष्यद्वयमेव विषयप्रयोजने प्रतिपादयति ? शास्त्रारम्भनिमित्तविषयप्रयोजनसिद्धि-

ऋजुविवरणम्

मित्याशङ्क्य व्याचष्टे—*तत्र नैसर्गिकोऽयमिति*॥ *ननु कथं भाष्यद्वयमिति*॥ अयमर्थः—भाष्यद्वयमेव कथं प्रतिपादयति ? अनुपयोगात्, भाष्यद्वयं विषयप्रयोजने न प्रतिपादयत्येव, कथम् ? अध्यासप्रतिपादकत्वात्, अथवा—भाष्यद्वयं विषयप्रयोजने एव कथं प्रतिपादयति ? अन्यस्यापि प्रतिपादकत्वात्, न चान्यप्रतिपादकमस्यैव प्रतिपादकं भवति। उभयप्रतिपादकत्वं च वाक्यभेदादयुक्तमित्यर्थः। अथवा—भाष्यद्वयमेव कथं प्रतिपादयति ? प्रयोजनभाष्यस्यापि विद्यमानत्वादिति। तत्र प्रथमचोद्यं परिहरति—*शास्त्रारम्भनिमित्तेति*॥ द्वितीयं परिहरति—*विषयप्रयोजनसिद्धि-

तत्त्वदीपनम्

किं भाष्यद्वयेन ? उत विषयप्रयोजनाभ्याम् ? आहोस्वित् प्रतिपादयतीत्यनेन ? त्रिधाऽपि नान्वय इत्याह—* ननु कथमिति *॥ अत्रैषाऽक्षरयोजना—भाष्यद्वयमेव कथं विषयादिकं प्रतिपादयति ? "अस्यानर्थहेतोरित्य"स्यापि तत्प्रतिपादकत्वात्, भाष्यद्वयं विषयप्रयोजने एव कथं प्रतिपादयति ? अध्यासस्यापि प्रतिपादकत्वात्, भाष्यद्वयं प्रतिपादयत्येवेति कथम् ? अध्यासस्यैव प्रतिपादकत्वात्, न ह्यन्यप्रतिपादकमन्यप्रतिपादकं भवतीति। कल्पत्रयेऽप्युक्तो दोषोऽत्र नावतरतीत्याह—* शास्त्रेति *॥ शास्त्राऽऽरम्भनिमित्ते ये विषयप्रयोजने तयोः सिद्धिहेतोरित्यर्थः। तत्रैषा योजना—भाष्यद्वयमेव विषयादिकं प्रतिपादयति, नोत्तरम्; अस्यैव हेतूत्थापकत्वात्, उत्तरस्यैतत्सिद्धविषयाद्यनुवाद-कत्वात्। तथा भाष्यद्वयं विषयप्रयोजने एव प्रतिपादयति, नाध्यासम्; लक्षणादिभाष्यसिद्धाध्यासानुवादित्वात्, तथेदं विषयप्रयोजने प्रतिपादयत्येव; हेतूत्थापकत्वादिति। हेतूत्थापकं कथं विषयप्रयोजने प्रतिपादयेत् ? न खलु कलशशब्दः

वार्तिकम्

न चैतयुक्तम्; ब्रह्मणः सिद्धत्वात्। न च सिद्धविषयत्वे वेदान्तानां शास्त्रत्वमुपपद्यते। हितशासकं हि शास्त्रम्। न चाप्रवर्तकमनिवर्तकं वा हितशासकं भवति; हिताहितप्राप्तिपरिहारयोः प्रवृत्तिनिवृत्त्य-धीनत्वात्। न च सिद्धार्थबोधात् प्रवृत्तिनिवृत्त्योरन्यतरसंभवः; 'सप्तद्वीपा वसुमती'त्यादिवाक्यश्रवणानन्तरं तददर्शनात्। तथाहुर्वृद्धाः—"प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमिति वक्ष्यते॥" इति। न च सिद्धार्थे शक्तिग्रहोऽपि संभवति; प्रवृत्तिलिङ्गकत्वात्तस्य। तस्मान्नास्ति वेदान्तानां विषयः॥ *एतेन*—संबन्धाधिकारिणोरभावोऽपि—*व्याख्यातः*; विषयप्रयोजनाधीनत्वात्तयोः। न च सतोरपि संबन्धाधिकारिणोः संभवः; सिद्धार्थतया प्रमाणान्तरगोचरत्वात्, मोक्षकामस्याभावाच्च। न ह्यद्यावत्त्वं संसारसुखं परित्यज्य मोक्षाय यतते कश्चिदिति दृष्टपूर्वः, संभवी वा। का तर्हि वेदान्तानां गतिः ? न कापि। अत एव—"वेदोपरा वेदान्ता" इति केषांचिदुद्गारः।

प्रदीपः

नैयायिकैश्चात्मनः सुखादिनिमित्तत्वस्योपादानत्वस्य च स्वीकारात् न तन्त्रान्तरविरुद्धम्। उपादानत्वं च समवायि-कारणत्वं परिणामिकारणत्वं विवर्तकारणत्वमिति तत्तन्मतानुसारेण भिन्नरूपम्। तत्र द्वैताद्वैत-शुद्धाद्वैतयोः शुद्धं ब्रह्मैव परिणमते निमित्तं चेति मन्यते, विशिष्टाद्वैतमते तु शुद्धब्रह्मपरिणामित्वे विकार्यतापत्त्या परिणममानप्रकृतिशरीरकत्वात् प्रकृतिविशिष्टं ब्रह्मैव परिणामिकारणं निमित्तकारणं च मन्यते। केवलाद्वैतमते तु प्रकृतिः परिणामिकारणम्, ब्रह्म विवर्तोपादानम्, प्रकृतिर्निमित्तकारणमात्रम्, ब्रह्म तु विवर्तोपादानं निमित्तकारणं चेति ब्रह्माविकार्यतोपपत्त्यर्थमूरीक्रियते॥

* अयमत्र निष्कर्षः—विक्षेपशक्तिमात्रं प्रकृतेरिति विशिष्टाद्वैतमतम्, ब्रह्मण एव विक्षेपशक्तिरपीति द्वैताद्वैत-शुद्धा-

पञ्चपादिकाविवरणम्

हेतोरध्यासस्योपस्थापकत्वादिति ब्रूमः ; हेतुवचनं हि प्रतिज्ञातार्थमेव साधयति ॥ तथाहि—एतत् शास्त्रम्, आरम्भणीयम्, सम्भावितविषयप्रयोजनवत्त्वात्, कृष्याद्यारम्भवत् ; शास्त्रं च, सम्भावितविषयप्रयोजनम्, अविद्यात्मकबन्धप्रत्यनीकत्वात्, जाग्रद्बोधवदिति । तदेवं शास्त्रस्यारम्भनिमित्तविषयप्रयोजनवत्त्वप्रत्यनीकस्य

ऋजुविवरणम्

हेतोरिति*॥ तृतीयं परिहरति—*हेतुवचनं हीति*॥यद्वा—लक्षणादीनामपि प्रतिपादकत्वम् ; अध्यासोपस्थापकत्वात् । यद्वा—हेतुवचनाद्धेतूपस्थितिः स्यात्, कथमध्याससाधनमित्याशङ्क्य विवृणोति—*हेतुवचनं हीति* ॥ धूमादिवचनवद् इत्यभिप्रायः । कथं विषयप्रयोजनयोः प्रतिज्ञावाक्यार्थत्वम्, विचारकर्तव्यताप्रतिपादकत्वात ? कथं वाऽध्यासस्य तद्धेतुत्वम् ? येन हेतुवचनत्वात् प्रतिज्ञातार्थसाधकत्वमिति, तदाह—*तथाहीति* ॥ बन्धप्रत्यनीकत्वं हेतुः । कथं तन्निवर्तकत्वमित्यपेक्षिते प्रमाणत्वेनाविद्यात्मकं निवर्तयतीति साध्यम् । जाग्रद्बोधो दृष्टान्तः । यद्वा—अविद्यात्मकत्वेन बन्धनिवृत्तिः साध्या स्वप्नदृष्टान्तेन । विशिष्टोऽर्थः प्रतिज्ञातः, एकदेशद्वारेण प्रतिज्ञातार्थसाधकत्वमिति भावः । भाष्यद्वयमेव कथं प्रतिपादयतीत्यस्य परिहारमाह—*तदेवमिति* ॥ प्रयोजनभाष्ये विषयप्रयोजनप्रदर्शनमात्रम्, अत्र तत्साधकहेतूपन्यास

तत्त्वदीपनम्

कालविषयो दृष्ट इति, तत्राह—*हेतुवचनमिति* ॥ एवकारः साधयतीत्यनेन संबध्यते—साधयत्येवेति । हिशब्दो दृष्टान्तार्थः, यथा धूमवत्त्वं हेतुवचनमग्निमत्त्वं साधयति, तथेत्यर्थः । अध्यासस्य विषयप्रयोजनसिद्धिहेतुत्वं विषयादेश्च शास्त्रारम्भगमकत्वमुक्तम्, तदसम्भवि ; व्याप्त्यभावात्, इत्याशङ्क्य विशेषांशे व्याप्त्यभावेऽपि सामान्योपाधौ साऽस्तीत्याह—*तथाहीति* । भागे सिद्धसाधनतां निराकर्तुमेतदिति विशेषणम् । असिद्धिं निरस्यति—*शास्त्रं चेति* ॥ बन्धप्रत्यनीकत्वमुपपादयति—*अविद्यात्मकेति* ॥ अनुमाननिगमनार्थ इतिशब्दः । परमप्रकृतमुपसंहरति—*तदेव-

वार्तिकम्

ननु—कथमेवं स्यात् ? "स्वाध्यायोऽध्येतव्यः" "तुल्यं तु सांप्रदायिकम्" इति श्रुतितात्पर्यविरोधादिति—चेत्, *एवं तर्हि* कर्तृदेवतादिप्रतिपादकत्वमेव वेदान्तानाम् । *ननु*—देवताप्रतिपादनमयुक्तम् ; उत्पत्तिशिष्टयाऽग्न्यादिदेवतयाऽवरोधात् तदाकाङ्क्षाया अभावात्, * एवं तर्हि * सप्तदशत्ववत् यत्र विश्वजिदादिषु देवता न श्रुता, तत्र भविष्यति । *ननु*—तत्राप्यतिदेशेन देवतादिप्राप्तिरस्ति, * नैष दोषः * ; प्रत्यक्षश्रुतेन शरवद् बाधो भविष्यति । *ननु*—अनारभ्याधीतत्वादेतदप्ययुक्तम्, न च पर्णत्ववद् भविष्यति ; तद्वदत्र श्रुत्यादिविनियोजकप्रमाणाभावादिति—चेत्, *तर्हि* प्रकरणगतोपासनाविधिपरा एव भवन्तु वेदान्ताः । * ननु *—एवं तर्हि तदर्थमेव विचारो युक्तः, * नेति ब्रूमः * ; पूर्वमीमांसया गतत्वात्, तस्या अपि धर्मत्वाविशेषात्, स्वाध्यायाध्ययनविधिबलादेव तद्विचारस्य प्राप्तत्वात् । क तर्हि "तद्विजिज्ञासस्व" इति विधेर्गतिः ? "विष्णुरुपांशु यष्टव्योऽजामित्वाये"त्यादिवत् विधिसरूपेणोपास्यब्रह्मस्तुतिपरत्वोपपत्तेरयमदोषः । *नन्वेवं* तर्हि उपास्यब्रह्मसिद्धेर्विषयसिद्धिः स्यात्, * नैवम् * ; समारोपेणापि योषाग्निभाववदुपासनासिद्धेस्तत्सिध्यभावात् । तस्मात् सूत्रकारो विचारशास्त्रस्य प्रयोजनाद्यनुबन्धचतुष्टयं सूचयन् पृथग् विचारकर्तव्यतां समर्थयति—"अथातो ब्रह्मजिज्ञासा" इति । तत्रानन्तर्याभि-

प्रदीपः

द्वैतमतम्, प्रकृतेर्विक्षेपशक्तिरावरणशक्तिरिति शक्तिद्वयम्, आवरणशक्तिमात्रं वा ; ब्रह्मणस्तु सद्रूपेणावृतस्य भानमात्रमिति तु केवलाद्वैतमतम् । तत्र प्रकृतिविषये धर्मिणि न कस्यापि दर्शनस्य विप्रतिपत्तिः, तस्या आवरणशक्तिमात्रं तु विप्रतिपन्नम् ।

पञ्चपादिका

पर्यवस्यत् शास्त्रस्य विषयः प्रयोजनं चार्थात् प्रथमसूत्रेण सूत्रिते इति प्रतिपादयति। एतच्च "तस्माद्

पञ्चपादिकाविवरणम्

बन्धस्याविद्यात्मकत्वं निर्दिशत् भाष्यद्वयं विषयप्रयोजने प्रतिपादयतीति ॥ ननु बन्धस्याविद्यात्मकत्वलक्षणो हेतुरसिद्धः, कथमसिद्धमसिद्धेन साध्यत इत्यत आह—*सर्वे वेदान्ता आरभ्यन्त इत्यनेन भाष्येण पर्यवस्यदिति* ॥ विषयादिसिद्धिहेतोरध्यासस्य सिद्धिहेतुभूतानि लक्षण-सम्भावना-सद्भाव-प्रमाणानि प्रतिपादयता भाष्येण सह लक्षणादिभिः स्वार्थमध्यासं साधयित्वा विषयप्रयोजने साधयतीत्यर्थः। अत एव व्यवधानाव्यवधानाभ्यां विषयादेः साधकत्वादेतदन्तमनेन पर्यवस्यदिति भाष्यस्य विभागेनोपादानं कृतम् ॥ *ननु*—तर्हि "सर्वलोकप्रत्यक्ष" इत्यनेन पर्यवस्यदिति वक्तव्यम्, *सत्यम्* ; "अस्यानर्थहेतोरि"ति भाष्यस्य विषयप्रयोजनयोर्वेदान्तवाक्यसम्बन्धकथनद्वारेण विचार-शास्त्रसम्बन्धप्रतिपादनपरत्वात् विचारशास्त्रीयविषयप्रयोजनसाधने सव्यवधानत्वसाम्येन पूर्वभाष्येण सहोपादानं कृतम् ॥ *ननु*—एवमप्यसूत्रसम्बन्धिनी विषयप्रयोजने किमिति प्रतिपाद्येते ? इत्यत आह—* विषयः प्रयोजनं चार्थात्प्रथमसूत्रेण सूत्रिते इतीति * ॥ इतिशब्दो हेतौ। यस्मात्प्रथमसूत्रेणार्थात्सूत्रिते, तस्मात्प्रतिपादयतीति ॥

ऋजुविवरणम्

इति भावः। यद्वा—तदेवमित्युपसंहारः। भाष्यद्वयमेव कथं प्रतिपादयति ? असिद्धहेतून्यासादिति चोदयति—*ननु बन्धस्येति* ॥ सिद्धस्यैव साधकत्वमित्यभिप्रायः। तदुक्तम्—असिद्धेनैकदेशेन गम्यासिद्धेर्न बोधक" इति ॥ *ननु*— कथं तेन पर्यवस्यतोऽपि प्रतिपादकत्वम् ? तस्यापि हेतुसाधकत्वाभावात्, इत्याशङ्क्य लक्षणादीनामपि एतदन्तग्रहणं कृतमित्यभिप्रायेणाह—*विषयादिसिद्धिहेतोरिति* ॥ *ननु*—लक्षणादीनामन्तग्रहणेन ग्रहणं निवारितम् ; अन्यथा तद्ग्रहणस्य वैयर्थ्यादिति यच्चोदितम्, तत् परिहरति—*अत एवेति* ॥ ननु तर्हि सर्वलोकेति ॥ अयं भावः*—तदन्तस्यैवाध्याससाधनद्वारा विषयप्रयोजनसाधकत्वात् लक्षणादीनामन्तत्वाच्च तेनैवान्तेन प्रतीकग्रहणं युक्तमिति। *सूत्रिते इति* ॥ अनेन प्रकारेण प्रतिपादयतीतीतिशब्दस्य प्रकारवचनत्वेनान्वयः प्रतिभाति, तथा सति असदनुवादो भवेत, भाष्ये तादृशोक्तेरदर्शनात्, अव्याख्येयत्वशङ्का च स्यात, तदर्थं व्याचष्टे—*इतिशब्दो हेताविति* ॥

तत्त्वदीपनम्

मिति* ॥ विशेषणासिद्धिं शङ्कते—*ननु बन्धस्येति* ॥ लक्षणादीनामत्र सत्त्वात् कथमसिद्धिरित्याह—*अत आहेति* ॥ "सर्वे वेदान्ता आरभ्यन्ते" इत्यादेरध्यासप्रतिपादकत्वात्कथं तदेकवाक्यतया 'युष्मदि'त्यादेर्विषयादिसाधकत्वमित्याशङ्क्याह—*विषयादीति* ॥ लक्षणादिभाष्येणैकवाक्यं सत् विषयादि साधयति चेत, "एतदन्तमनेने"ति विभागेनोपादानमनुपपन्नमित्याशङ्क्याह—*अत एवेति* ॥ अतःशब्दार्थमाह—*व्यवधानेति* ॥ लक्षणादिभाष्यमध्यासं प्रतिपाद्य विषयादौ पर्यवस्यति, इदं तु साक्षात, अतो विभागोपादानं युक्तमित्यर्थः। *ननु*—"अस्याऽनर्थ हेतोरि"त्यादेरध्यासासाधकत्वात् "तेन पर्यवस्यदि"त्यभिधानमयुक्तमिति चोदयति—*ननु तर्हीति ॥ शब्दतः प्रतीयमानमर्थमङ्गीकरोति—*सत्यमिति* ॥ तर्हि "अस्यानर्थ हेतोरित्यनेन पर्यवस्यदि"ति टीकाऽनुपपन्नेति, तत्राह—*अस्येति* ॥ "अस्याऽनर्थहेतोरि"ति भाष्यस्य पूर्वभाष्येण लक्षणादिभाष्येण सहोपादानं कृतमित्यन्वयः। तत्र हेतुमाह—*सव्यवधानेति* । व्यवधानेन सह वर्तत इति सव्यवधानम्, तस्य भावस्तत्त्वम्। कुत्र सव्यवधानत्वमिति वीक्षायामाह—*विचारशास्त्रीयेति*॥ "अस्यानर्थ हेतोरि"ति भाष्यस्याध्यासासाधकत्वात् कथं सव्यवधानत्वम् इति वीक्षायामाह—*विषयेति* ॥ वेदान्तानां विषयप्रयोजनसंबन्धं प्रतिपाद्य तयोस्तद्विचारशास्त्रसंबन्धप्रतिपादनात् सव्यवधानत्वमित्यर्थः।

भाष्यद्वयस्य विषयादिप्रतिपादकत्वमङ्गीकृत्य सूत्रासंगतिमाशङ्कते—*नन्वेवमपीति* ॥ असूत्रसंबन्धित्वमसिद्धमित्याह—*अत आहेति*॥ "विषयप्रयोजने सूत्रिते" इत्यनेन रूपेण युष्मदित्यादेः प्रतिपादकत्वाभावा"त्सूत्रिते" इति प्रतिपाद-

पञ्चपादिकाविवरणम्

कः पुनरस्य सूत्रस्य प्रसङ्गः ? *उच्यते* ; नित्येनैवाध्ययनविधिनाधीतस्वाध्यायो वेदान्तवाक्ये-

ऋजुविवरणम्

ननु—आद्यसूत्रे कथं विषयादिसूचनम् ? श्रोतृभिरजिज्ञासितत्वाद्विषयप्रयोजनयोः, न चाजिज्ञासितनिरूपणं युक्तम्, न चापरिज्ञाते जिज्ञासा, न च तेषां विचारात् प्राक् परिज्ञानकारणमस्ति, नापि विषयादिप्रतिपादकत्वम् ; न्यायसूत्रत्वात, नापि तदपेक्षितं न्यायसूचनम् ; तत्प्रतिपादकस्य न्यायापेक्षिणोऽनुग्राह्यस्य प्रमाणस्याभावात, नापि विचारकर्तव्यता-प्रतिपादकत्वम् ; समन्वयाद्यनिरूपणेनासंगतिप्रसङ्गाच्छास्त्रे, तस्मादाकस्मिकं सूत्रमित्येतन्मनसि निधायाह—*कः पुनरस्येति* ॥ अस्य सूत्रस्य विषयप्रयोजनसूचने कः प्रसङ्गः ? तथाऽस्य सूत्रस्य शास्त्रे प्रसङ्गः = संबंधः क इत्यर्थः । तत्र तावद्विषयादिस्वरूपमात्रपरिज्ञाने कारणमाह—*उच्यते* इत्यादिना*॥ उपक्रमसामर्थ्यात्सर्वतो विरक्तस्यात्मप्रेप्सो र्विधीयते

तत्त्वदीपनम्

यती''त्येतदनुपपन्नमित्याशङ्क्याह—*इतिशब्द इति* ॥ हेतुत्वमेवाह—*यस्मादिति* ॥ विषयादिहेत्वध्यासोपस्थापकत्वेन भाष्यस्य व्याख्येयत्वमुक्तम्, संप्रति सूत्रस्यैवासङ्गतत्वात्तन्मूलं भाष्यमव्याख्येयमित्याशयवानाह—*कः पुनरिति* ॥ *अयमर्थः*—जिज्ञासितं सूत्रणीयम्, जिज्ञासा हि ज्ञाते, ज्ञानं च शास्त्रश्रवणमन्तरेण न संभवति; पाठकादिष्वदृष्टेरित्य-संगतिः । तथा प्रसज्यतेऽनेनेति प्रसङ्गः प्रसञ्जकः, स किमस्ति ? उत न ? नाद्यः ; वेदान्तवाक्यविचारकर्तव्यतायाः प्रमाणान्तरागोचरत्वात् । श्रोतव्य इत्यादिवाक्यं प्रसञ्जकमिति वक्तव्यम् । न च तत् संभवति ; विकल्पासहत्वात् । तत्किं नित्यम् ? नैमित्तिकं वा ? प्रायश्चित्तरूपं वा ? अथ वा काम्यम् ? *नाद्यः* ; अकरणे प्रत्यवायाश्रुतेः, *न द्वितीयः* ; गृहदाहादिष्विव निमित्ताश्रवणात्, न तृतीयः* ; ''ब्रह्मचार्यवकीर्णी नैऋतं गर्दभमालभेते''तिवत् दोषसंयोगे सत्यचोदितत्वात्, *नापि चतुर्थः* ; विध्युद्देशे फलाश्रवणात्, *न चरमः* ; सूत्रस्य प्रमाणापेक्षितन्यायसूचकत्वात्, तदभावे सूत्रस्यैवासंगतेः, तस्मात्प्रसञ्जकाभावाच्चासंगतिः । तथा शास्त्रासंगतिश्च । समन्वयादिप्रतिपादकं हि शास्त्रम् । न च समन्वयाद्यन्यतममनेन प्रतिपाद्यते, इत्यादावस्य सूत्रस्य प्रसङ्गं न पश्यामः—इति । चतुर्विधाया अप्रसङ्गतेरसङ्गतिरित्याह—*उच्यत इति* ॥ असङ्गतेरप्रतिपादनात् कथं तदसङ्गतिरित्याशङ्क्याद्यासंगतिं निराचष्टे—

वार्तिकम्

धायिनाऽथशब्देन साधनचतुष्टयसंपन्नोऽधिकारी सूचितः, अतःशब्देन सम्बन्धः, ब्रह्मशब्देन प्रत्यगात्मनः सच्चिदानन्दानन्ताद्वितीयब्रह्मस्वरूपमिति विषयः, जिज्ञासापदेन च सर्वानर्थनिवृत्तिरानन्दावाप्तिश्च प्रयोजन-मिति । यथा चैतत्तथा सूत्रव्याख्यानकाल एव वक्ष्यामः । *ननु*—एतावता विचारविधेरनुकूलः को वा न्यायः सूत्रितः सूत्रकृता ? *उच्यते*—विवादगोचरापन्नो विचारः, कर्तव्यः ; अथवा शास्त्रम्, आरम्भणीयम्, संभावितविषयप्रयोजनवत्त्वात्, यदेवं तदेवम् ; यथा कृष्यादि । अयं च सौत्रो न्यायः । हेत्वसिद्धिमाशङ्क्य परिहर्तुमर्थाद्विषयप्रयोजने साधयताऽयमपि न्यायः सूत्रितः—उक्तविचारः, तत्प्रतिरूपकं शास्त्रं वा, सम्भावितविषयप्रयोजनम्, अविद्यात्मकबन्धप्रत्यनीकत्वात् ; जाग्रद्बोधवत् । स चायं न्यायः सर्वोपजीव्यो मुख्यतया शास्त्रारम्भप्रयोजकः । अस्मिन् सिद्धे सर्वं सिद्धं भवति ; सेनापतेरिव सेनायाम् । अस्य सिद्धौ यत्न आस्थेयः । तत्राशङ्क्यते—नन्वसिद्धोऽयं हेतुः ; बन्धस्याविद्यात्मकत्वासिद्ध्या विशेषणा-सिद्धेः । प्राधानिको हि बन्धो महदादिक्रमेण प्रवर्तमानः सत्य एव चिच्छायापत्त्याऽविवेकादपरिणामिन्यामपि चितिशक्तावुपचर्यते, न पुनस्तस्य तत्र संबन्धो घटते ; अविवेकात्तु व्यवहारमात्रम्—'बद्धोऽयमि'ति । जनितायां तु प्रधानेन विवेकख्यातावविवेके निवृत्तेऽतिसुकुमारत्वात् कुलवधूरिव गुणाङ्गमात्मानं पुरुषं प्रति दर्शयित्वा तत्समक्षं स्थातुमशक्नुवत् प्रधानं प्रतिनिवर्तते, न स्वकार्यविन्यासं तं प्रत्यादर्शयति । न चैतावता

पञ्चपादिकाविवरणम्

ष्वापातदर्शनेनेदमवगच्छति—"आत्मनस्तु कामाय सर्वं प्रियमि"त्युपक्रमात्सर्वतो विरक्तस्यात्मप्रेप्सोः–"आत्मनि

तत्वदीपनम्

नित्येनेति ॥ अधीतस्वाध्यायो वेदान्तवाक्येष्विदमवगच्छतीति संबन्धः । अध्ययनप्रसङ्गकमाह—*अध्ययनेति* ॥ तस्य काम्यत्वं प्रत्याह—*नित्येनेति* ॥ अर्थाद्यवबोधे सति तत्कामना, कामनायां सत्यां च ततः साङ्गाध्ययने प्रवृत्तस्यार्थावबोध इतीतरेतराश्रयत्वप्रसङ्गान्नित्यत्वमित्यर्थः ॥

अध्यापनविधिप्रयुक्तमध्ययनमिति मतं निरस्यति—*एवेति* ॥ एवकारस्य विधिना संबन्धः । नित्यानित्यसंयोगादिविरोधप्रसङ्गान्नाध्यापनविधिप्रयुक्तमध्ययनम् । एतच्च तृतीयवर्णके प्रतिपाद्यत इति नात्र विस्तार्यत इत्यर्थः । *अधीतस्वाध्याय इति* ॥ साङ्गाध्ययनवानित्यर्थः । साङ्गाध्ययनादेवावगतिजनिपक्षे शास्त्रवैयर्थ्यमिति, तत्राह—*आपातेति* । विचारं विनोत्पन्नं ज्ञानमापातदर्शनम्, तस्य चानिश्चयरूपत्वाच्छास्त्रप्रवृत्तिरित्यभिसंधिः । इदमा परामृष्टमर्थमाह—*आत्मनस्त्वित्यादिना* ॥ आत्मप्रेप्सोः श्रवणं नामाङ्गि विधीयते इति संबन्धः । चन्दन-वनितादिप्रेप्सुत्ववदात्मप्रेप्सा न कस्यापि, इत्यत्राह—*सर्वत इति* ॥ तत्र प्रमाणमाह—*आत्मन इति* ॥ पुत्रादीनां

वार्तिकम्

महदादिसर्गरूपः प्राधानिको बन्धोऽपैति ; तं प्रति तदप्रवृत्तावपि पुरुषान्तरं प्रति तत्प्रवृत्तेः । तथाच श्रुतिः—"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" इति । न च विवेकख्यात्या तन्निवृत्तिः संभवति, येनाप्यविद्यात्मकत्वं स्थाप्येत ; तेन तस्य विरोधाभावात् । नहि घटपटयोर्भेदज्ञानं घटपटौ विरुणद्धि ; तथा सति स्वोत्पत्तिरेव न स्यात्, किं तर्हि ? अविवेकमित्युक्तमेवाधस्तात् । न च विवेकज्ञानादन्यत्तत्त्वज्ञानं साङ्ख्यैरभिमतम् । न च तदभ्युपगतं विभेत्तुं शक्यते ; तेषां तत्रैवाभियुक्तत्वेन सर्वशिष्टसम्मतत्वात्, तदविरोधेनैव वेदान्तानां व्याख्येयत्वात् । अतो नाविद्यात्मको बन्धः । तथाच भवदभिमतविषयप्रयोजनयोरसिद्धिः, तदसिद्धौ च न शास्त्रारम्भसिद्धिरिति प्राप्तम्, तामिमामाशङ्कां परिहर्तुं भगवान् भाष्यकार आक्षेपसमाधानाभ्यां बन्धस्याविद्यात्मकत्वं प्रतिपाद्य शास्त्रस्य विषयप्रयोजने अनुसन्धत्ते—*युष्मदस्मदित्यादिना* ॥

प्रदीपः

तथाच यदि प्रकृतेरावरणशक्तिरप्रामाणिकी, तर्हि सद्वितीयं ब्रह्म जगत्कारणं च जिज्ञास्यं च । यदि तु प्रामाणिकी, तर्हि तु अद्वितीयं ब्रह्म जगत्कारणं च जिज्ञास्यं च । कीदृशं च ब्रह्मा"थातो ब्रह्मजिज्ञासे"त्यत्र सूत्रकाराभिमतमिति तु विवेको न द्वितीयस्य ब्रह्मणि कल्पितत्वेनाध्याससमर्थनमन्तरा संभवति । अतश्चेदमवसरप्राप्तम्—यत् प्रकृतब्रह्मपदार्थसिध्यर्थमध्यासचिन्तनं कर्तव्यम्, इति सौत्रब्रह्मपदसूचिताध्याससमर्थनार्थमध्यासभाष्यम्—* "युष्मदस्मदित्यादि" *—इति तु * विवरणानुयायिनः । एतन्मते "तद्विजिज्ञासस्व, तद् ब्रह्मे"ति वाक्यं विषयः ॥ * भामत्यनुयायिनस्तु *—"आत्मा वाऽरे द्रष्टव्य" इति आत्मन एव जिज्ञास्यत्वोपक्षेपात्, तस्य चान्तःकरणादभिन्नतया तद्भिन्नतया वा प्रतीयमानस्यासन्दिग्धत्वेना'हमि'ति निर्णीतत्वात्, जिज्ञास्य आत्मैवाप्रसिद्ध इति शङ्कायाम्—अहंप्रतीतेरव्यवस्थितशरीरादिगोचरस्याप्रमाणत्वात् अन्तःकरणाध्यासाधिष्ठानस्वरूपस्यैव वेदान्तसमधिगम्यस्यात्मनो जिज्ञास्यत्वात्, जिज्ञास्यमात्मस्वरूपमहंप्रतीत्यविषयोऽन्तःकरणाध्यासाधिष्ठानस्वरूपमेव, इति तस्य सन्दिग्धत्वाद्विचारः कर्तव्य इति मन्यन्ते ॥ * एतन्मते तु—"आत्मा वाऽरे द्रष्टव्य" इति वाक्यं विषयः । जिज्ञास्यमात्मस्वरूपमन्तःकरणाध्यासाधिष्ठानं सिद्धवत्कृत्य ब्रह्मजिज्ञासां सूत्रकाराः प्रतिजानते । प्रकृतात्मस्वरूपसिध्यर्थैवेयं भामतीमतानुसारेऽप्यध्यासचिन्ता प्रवर्तते—*युष्मदस्मत्प्रत्ययगोचरयोरिति* ॥ मतद्वयेऽपि सौत्रब्रह्मशब्दसूचितस्यार्थस्य विवेचनादध्यासभाष्यं सूत्रारूढमेव ॥

पञ्चपादिकाविवरणम्

विज्ञाते सर्वमिदं विज्ञातम्" "एतावदरे खल्वमृतत्वमि"त्युपसंहारादमृतत्वसाधनमात्मदर्शनं "द्रष्टव्य" इत्यनूद्य तादर्थ्येन मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सह श्रवणं नामाङ्गि विधीयत इति। स च—

तत्त्वदीपनम्

प्रियत्वं न स्वरूपेण, किं त्वात्मार्थत्वेन? इतरथा वैरिपुत्रादेरपि प्रियत्वप्रसङ्गात्, तस्मादात्मनि मुख्या प्रीतिः, इतरत्र त्वौपाधिकी ; तस्मात् हेयमात्मव्यतिरिक्तमिति विशिष्टाधिकारिसिद्धिरित्यर्थः। प्रयोजनमाह—*तादर्थ्येनेति* ॥ दर्शनोद्देशेनेत्यर्थः। *ननु*—"द्रष्टव्य" इति दर्शने तव्यप्रत्ययश्रवणात् दर्शनमपि विधेयमिति, तत्राह—*आत्मदर्शनमिति* ॥ प्रमाणवस्तुपरतन्त्रत्वान्नाऽऽत्मसाक्षात्कारे विधिसंभव इत्यर्थः। *ननु*—न ज्ञानस्योद्देश्यत्वम्; सुखादिरूपत्वाभावात्, इत्यत्राह—*अमृतत्वेति* ॥ तत्र प्रमाणमाह—*आत्मनि विज्ञात इति* ॥ सर्वस्यात्मोपादानत्वात्तद्व्यतिरेकेणाभावः, तत आत्मज्ञानात्सर्वज्ञानं युक्तमित्यर्थः। "एतावदि"त्यात्मज्ञानमेवामृतत्वसाधनत्वादमृतत्वमित्युपचर्यते ; लाङ्गलं जीवनमितिवत्। *खल्विति* ॥ ज्ञानस्यामृत्वसाधनत्वं प्रसिद्धमित्यर्थः। असंभावनादिप्रतिबन्धात्कथं श्रवणात्तत्त्वसाक्षात्कार इति? तत्राह—*मननेति* ॥ अद्वितीये ब्रह्मणि वेदान्तानां शक्तितात्पर्यावधारणं श्रवणम्, श्रुतस्यार्थस्योपपत्तितोऽनुसन्धानं मननम्, विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहीकरणं निदिध्यासनमिति विभागः। श्रवणोत्तरकालीनयोस्तयोः कथं श्रवणाङ्गत्वमित्याशङ्क्य, न स्वरूपोपकारितयाऽङ्गत्वं प्रोक्षणादिवत्, अपि तु प्रयाजादिवत्, इत्याह—*फलेति* ॥ श्रवणस्य यत्तत्त्वसाक्षात्काराख्यं फलम्, तत्र मननादेरप्युपकारकत्वमित्यर्थः।

वार्तिकम्

तत्रापि "युष्मदि"त्यादि "मिथ्ये"त्यन्तमध्यासाक्षेपपरम्, "इति भवितुं युक्तम् ; तथापी"त्यादि "नैसर्गिकोऽयं लोकव्यवहार" इत्यन्तं तत्समाधानपरम्। तथापि लक्षणप्रमाणाभ्यां यावन्न प्रतिपाद्यते, तावद् दर्शितमपि बन्धस्य मिथ्यात्वं कः श्रद्दधीत? नहि उद्देशमात्रेण वस्तुसिद्धिः ; त्रयाणामविनाभावेनैव वस्तुसाधकत्वात्, अन्यथाऽतिप्रसङ्गात्। तथाचोक्तं भगवता वात्स्यायनेन न्यायभाष्ये—"त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षा चे"ति। अतस्तदुभयम्—"आह कोऽयमि"त्यादिना "सर्वलोकप्रत्यक्षः" इत्यन्तेन प्रदर्श्यते। तत्रापि—"आह कोऽयमध्यासो नाम" इति लक्षणाक्षेपः, "उच्यते स्मृतिरूपः पूर्वदृष्टावभासः" इति तल्लक्षणप्रदर्शनम्। "तं केचिदि"त्यादिना "न व्यभिचरति" इत्यन्तेन तत्र वादिनामविप्रतिपत्तिप्रदर्शनम्, "तथाच" इत्यादिना "सद्वितीयवत्" इत्यन्तेन च लौकिकानाम्। "कथं पुनः" इत्यादिना "एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः" इत्यन्तेनाक्षेपसमाधानाभ्यां प्रत्यगात्मन्यनात्माध्याससंभावनम्। "तमेतमेवंलक्षणम्" इत्यादि "न सम्बध्यते" इत्यन्तं चोक्तलक्षणाध्यासस्याविद्यात्मकत्वप्रदर्शनपरम्। शिष्टं सद्भाव-प्रमाणप्रदर्शनपरम्। "अस्यानर्थहेतोः" इत्यादि "इदमादिमं सूत्रम्" इत्यन्तं च शास्त्रस्य विषयप्रयोजनपरमित्यध्यासभाष्यविभागः॥

तदिदं भाष्यं शास्त्रस्योपोद्घाततया प्रवृत्तम्। *एतेन*—सूत्रार्थवर्णनाभावात् "सूत्रार्थो वर्ण्यते यत्र वाक्यैस्सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः" इति भाष्यलक्षणाभावाच्चेदमभाष्यमिति—* अपास्तम् * ; सूत्राक्षिप्तन्यायसमर्थनपरत्वेन भाष्यत्वोपपत्तेः। न च—एवं सूत्रस्य श्रौतार्थपरित्यागेन प्रथममार्थिकार्थवर्णनमनुचितमिति—वाच्यम् ; श्रौतार्थस्य तदधीनत्वसिद्धेरुक्तत्वात् प्रथममार्थिकार्थवर्णनस्यैवोचितत्वात्। *ननु*—एवं तर्हि विषयप्रयोजनसाधकोक्तन्यायस्यात्यन्ताभ्यर्हितत्वान्मुखत एव सूत्रकारेण प्रथमं वक्तुमुचितम्। उक्तं च—"सिद्धार्थं ज्ञातसम्बन्धं

पञ्चपादिकाविवरणम्

तत्र कियद्विशेषणपर्यन्तोऽधिकारी ? को वाऽसौ वेदान्तवाक्यविचारः ? अन्यतः प्राप्तोऽप्राप्तो वा ? कथं चात्मज्ञानं मोक्षसाधनम् ? किंप्रमाणकं च तत् ? किं वा तदात्मतत्त्वम् ? किंप्रमाणकं चेति जिज्ञासते । तं च जिज्ञासुं

तत्त्वदीपनम्

यथावत् स्वाध्यायादधिकार्यादिप्रतिपत्तावपि शास्त्रप्रवृत्तिरापातदर्शनस्यानिश्चयरूपत्वादित्युक्तम्, तत्र कथमनिश्चयरूपत्वम्? तत्राह—*स च तत्रेति* ॥ *सः = आपातदर्शनवान् । * तत्र = अधिकार्याद्यनुबन्धे । इति जिज्ञासत इति सम्बन्धः । चशब्दस्य च तेनैव सम्बन्धः । न केवलमधिकार्याद्यनुबन्धं जानाति, किं तु जिज्ञासते चेत्यर्थः । इतिपदपरामृष्टं प्रकारमाह—*कियद्विशेषणेति* ॥ कियन्ति विशेषणानि पर्यन्तोऽवधिर्यस्य स तथा । किं वैराग्यमेव विशेषणम्, आहो अन्यदपि ? इति विमर्शार्थः । यदाऽन्यदपि विशेषणम्, तदा तत्र का युक्तिः ? किं च मानम् ? इति विवेचनीयमित्याह—*किंप्रमाणक इति* ॥ अधिकार्यनुबन्धजिज्ञासामभिधाय विचारविधेरव्यवहितविषयानुबन्धे तामाह—*को वाऽसाविति ॥* किं प्रयाजादिवत्सकृदनुष्ठेयः, उतावघातादिवदसकृदिति जिज्ञासत इत्यर्थः । दृष्टफलत्वेनासकृदनुष्ठेयत्वेऽपि किं प्राच्या मीमांसया गतार्थत्वमुत नेति विमर्शान्तरमाह—*अन्यत इति* ॥ साधनानुबन्धे संशयमाह—*कथं चेति* ॥

वार्तिकम्

श्रोतुं श्रोता प्रवर्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः" इति ; अन्यथा सूत्रकारस्यैतदभिमतं नवेति तात्पर्यसन्देहापत्तेः । न च—"सूत्रेष्वेव हि यद्वयक्तं तद्भाष्ये तच्च वार्तिके ॥" इति न्यायात् भाष्यवार्तिकाभ्यामेव तत्तात्पर्यावगम इति---वाच्यम् ; अनत्यन्तशुद्धान्तःकरणस्य तत्राप्यविश्वाससंभवादिति—चेत्, *सत्यम्* ; वक्ष्यति चैतदविरोधलक्षणे—"तद्गुणसारत्वात्" इति । *ननु* प्रथमतस्तद्वक्तुमुचितमित्युक्तम्, *ननु* उक्तमेवार्थादित्यप्युक्तमस्माभिः । *ननु*—मुखतो वक्तव्यमित्युक्तम्, *मैवम्* ; प्रथमं तस्य मुखतो वक्तुमशक्यत्वात्, साक्षाद्विचारविध्यपेक्षितन्यायस्यावश्यं मुखतो वक्तव्यत्वात्, न तु न्यायापेक्षितन्यायस्य ; तस्य तदभिधानापेक्षत्वात् । न च युगपदेकव्यापारेणोभयमभिधातुं शक्यते ; वाक्यभेदप्रसङ्गात् । न च—एवं भाष्यकारेणापि प्रथमं मुखतो नाभिधेयमिति—वाच्यम् ; शिष्यानुग्रहायोपोद्घातन्यायेन प्रवर्तनात्, अन्यथा पूर्वोक्ताशङ्कोन्मथितहृदयः सन् शिष्यो न प्रवर्तेत ; प्रतिपाद्यमर्थं बुद्धौ संगृह्य प्रागेव तदर्थमर्थान्तरवर्णनस्योपोद्घातत्वात् । यद्यपि सूत्रमप्युपोद्घातसङ्गत्या प्रवर्तते, शास्त्रारम्भहेतुत्वेन विषयप्रयोजनसिद्धिपरत्वात् ; तथाप्यार्थिकन्यायस्य तथात्वेऽपि श्रौतन्यायः साधनप्रक्रिययैव प्रवर्तते, नोपोद्घातप्रक्रियया ; मुखतः सूत्रकारेण विचारकर्तव्यतायाः प्रतिज्ञातत्वात्, प्रतिपाद्यमर्थं बहिः प्रतिज्ञाय तदर्थमर्थान्तरवर्णनस्य साधनप्रक्रियात्वात् । अतोऽर्थत उपोद्घातप्रक्रियया प्रवृत्तत्वेऽपि सूत्रस्य मुखतः साधनप्रक्रिययैव प्रवृत्तिः, भाष्यं तूपोद्घातप्रक्रिययैव प्रवृत्तमिति श्लिष्टम् । तत्र सांख्यः स्वमतावष्टम्भेनाध्यासाभावमुपपादयन् पूर्वपक्षयति, शिष्यो वा सिद्धान्त्यभिमतद्रष्टृदृश्यस्वरूपपर्यालोचनया तयोः परस्पराध्यासासम्भवमाशङ्कते । उभयथापि पूर्वपक्षभाष्यं व्याकरिष्यामः ॥

प्रदीपः

* अध्यासमसामान्यं कारणत्रयाधीनम्—भेदाग्रहः, सादृश्यज्ञानम्, पूर्वतनप्रमाहितसंस्कार इति । * पूर्वतनप्रमाहितसंस्कारो नाम—अध्यस्यमानाधिकसत्ताकतत्सादृश्यपदार्थज्ञानाहितसंस्कारः । इदं रजतमिति भ्रमो हि प्रातिभासिकरजतसदृशतदधिकसत्ताकव्यावहारिकरजतज्ञानिनामेव भवति । न हि यो रजतमेव न जानाति, तस्येदं रजतमिति भ्रमात्मकं

पञ्चपादिकाविवरणम्

पुरुषार्थकाममुपलभमानो भगवान् बादरायणः साधनचतुष्टयसम्पन्नस्य मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारं विदधतो विधेरपेक्षिताधिकारिविषयफलानुबन्धत्रयमागमिकमपि न्यायेन निर्णेतुं सूत्रयामास—"अथातो ब्रह्मजिज्ञासे"ति ; श्रुतिसूत्रयोरैकरूप्यावगमात् । मननिदिध्यासनयोश्च श्रवणाङ्गत्वमुत्तरत्र वक्ष्यामः ॥

ऋजुविवरणम्

इत्यवगच्छतीत्यन्वयः। अमृतत्वसाधनमात्मदर्शनमित्युपसंहारादवगच्छति, इति आत्मदर्शनानुवादेन साधनं श्रवणं विधीयत इति । विध्यर्थपर्यालोचनयाऽत्र श्रवणस्याङ्गित्वेन मननिदिध्यासनयोरङ्गत्वेन च कीर्तनं स्वदर्शनाभिप्रायेणेति केचित् । स च जिज्ञासते इत्यन्वयः। कियन्ति विशेषणानि पर्यन्तोऽवधिर्यस्यासाविति विग्रहः। बहुषु विशेषणेषु श्रूयमाणेषु कानिचिद्विशेषणानि कानिचिदङ्गानीत्यनिर्धारणात्सन्देहो भवति । कथं प्रणेतृधीस्थता विषयप्रयोजनयोरिति ? तदाह—*तं च जिज्ञासुमिति* ॥ कथमस्य तद्दर्शनसामर्थ्यमिति ? तदाह—*भगवानिति* ॥ तदपेक्षिणोऽनुग्राह्यस्य प्रमाणस्याभावादिति यत् चोदितम्, तत् परिहरति—*विदधतो विधेरिति* ॥ *ननु*—अनुबन्धत्रयस्यागमिकत्वात् किं तदर्थं सूत्रकरणेनेति ? तत्राह—*न्यायेनेति* ॥ कथं श्रवणस्य विध्यपेक्षितानुबन्धनिर्णयार्थत्वं सूत्रस्यावगम्यत इति ? तदाह—*श्रुतिसूत्रयोरिति ॥ कथं मननिदिध्यासनयोरङ्गत्वं श्रवणोपकार्यत्वात्तयोरिति ? तत्राह—*मननिदिध्यासनयो-

तत्त्वदीपनम्

किं कर्मसमुच्चितं ज्ञानं साधनम्, उतासमुच्चितं वेत्यर्थः । असमुच्चितत्वपक्षेऽपि ज्ञानं निरूपणीयमित्याह—*किंप्रमाणकमिति* ॥ व्यवहितविषयानुबन्धे— किं वा तदात्मतत्त्वमिति* ॥ आत्मतत्त्वं किं सविशेषम्, उत निर्विशेषम् ? निर्विशेषत्वे मानं वक्तव्यमित्याह—*किंप्रमाणकं वेति* ॥ परजिज्ञासायाः परं प्रत्यप्रत्यक्षत्वात् कथं तन्निरासाय शास्त्रप्रणयनम् ? तत्राह—*तं चेति* ॥ तं जिज्ञासुमुपलभमानो बादरायणोऽनुबन्धत्रयं सूत्रयामासेति सम्बन्धः । उपलम्भे हेतुमाह—*भगवानिति* ॥

"उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवान् ॥"

इति प्रसिद्धेः परजिज्ञासोपलम्भो युक्त इत्यर्थः। तत्र हेतुमाह—*बादरायण इति* ॥ काकदन्तजिज्ञासोर्वैलक्षण्यमाह—*पुरुषार्थेति* ॥ प्रसञ्जकाभावादित्युक्तं निरस्यति—*वेदान्तवाक्येति* ॥ स च विधिः काम्य इत्याह—*साधनचतुष्टयेति* ॥ यद्यपि न विध्युद्देशे फलश्रवणम्; तथाप्यार्थवादिकफलोपादानेनामृतत्वसाधनकामो वेदान्तवाक्यानि विचारयेदिति विधिः परिणमते ; यथा "प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ती"त्यत्र प्रतिष्ठाकामो रात्रिसत्रं कुर्यादिति विधिः परिणमते, तद्वदित्यर्थः । *ननु*—एतत्सूत्रं श्रवणविधिमूलमिति कथं गम्यते ? तत्राह—*श्रुतिसूत्रयोरिति* ॥ "तद्विजिज्ञासस्व" "श्रोतव्यः" इत्यादिश्रुतौ सूत्रे च विचारकर्तव्यतापरत्वस्य चाविशेषादित्यर्थः। श्रवणस्याङ्गित्वं मननादेरङ्गत्वं

वार्तिकम्

सत्यानृतमिथुनीभावरूपो हि सिद्धान्त्यभिमतोऽध्यासः । स च दृग्दृश्ययोस्तादात्म्यान्यथानुपपत्तिगम्यः; विलक्षणयोस्तयोरेकतरमिथ्यात्वमन्तरेण तादात्म्यानुपपत्तेः, उभयमिथ्यात्वे च सत्यप्रथानुपपत्तेरन्यतरमिथ्यात्वकल्पनस्यैव युक्तत्वात् । तत्रापि दृशोऽवस्थात्रयेऽप्यव्यभिचारित्वादितरसाधकत्वाच्च सत्यत्वम्, दृश्यस्य त्ववस्थात्रयव्यभिचारित्वात्तदधीनसिद्धिकत्वाच्च मिथ्यात्वमित्यध्याससिद्धिः । नचैवमस्ति ; दृग्-

प्रदीपः

रजतज्ञानमुदेति । अहमिति च यदि चैतन्येऽन्तःकरणाध्यासेन भ्रमात्मकमिदं ज्ञानम्, तर्हि अध्यस्यमानाधिकसत्ताकपारमार्थिकान्तःकरणान्तरमवश्यं ज्ञातव्यम् । सति च पारमार्थिकेऽन्तःकरणे शुद्धचैतन्यमद्वितीयं बाधितमेव, इति पूर्वतनप्रमाहितसंस्काररूपकारणाभावात् ना'हमि'ति भ्रमात्मकं ज्ञानं संभवदुक्तिकम् । तदेवं तृतीयं कारणमसंभवदुक्तिकं मनसि

भामती

अप्रयोजनत्वाच्च । तथाहि—संसारनिवृत्तिरपवर्ग इह प्रयोजनं विवक्षितम्, संसारश्चात्मयाथात्म्याननुभवनिमित्त आत्मयाथात्म्यज्ञानेन निवर्तनीयः । स चेदयमनादिरनादिनाऽऽत्मयाथात्म्यज्ञानेन सहानुवर्तते,

ऋजुप्रकाशिका

असन्दिग्धत्वप्रयुक्तमजिज्ञास्यत्वमुपसंहरति—*तस्मादिति* ॥ द्वितीयं हेतुं प्रपञ्चयति—*अप्रयोजनत्वाच्च । तथाहीत्यादिना* ॥ प्रमातृत्व-कर्तृत्व-भोक्तृत्वादिः=संसारशब्दार्थः । *आत्मयाथात्म्याननुभवनिमित्तः=आत्मतत्त्वाज्ञाननिमित्तकः ॥ निमित्तशब्द उपादानपरः । एतच्चाध्यासवादिमतानुसारेण, तन्मते भावरूपाज्ञानस्य सादिप्रपञ्चमात्रं प्रति परिणाम्युपादानतया संसारं प्रत्यप्युपादानत्वात् । अस्तु संसारस्य निरुक्ताज्ञाननिबन्धनत्वम्, तावताऽपि तस्यान्यतो निवृत्तिसंभवेन प्रयोजनलाभात् कथं प्रयोजनाभाव इति ? अत आह—*आत्मयाथात्म्यज्ञानेन निवर्तनीय इति* ॥ आत्मतत्त्वज्ञानेन निवर्तनीय इत्यर्थः । तर्हि आत्मतत्त्वज्ञानेनैव निवर्त्यताम्, तावताऽपि संसारनिवृत्तिलक्षणं प्रयोजनं लब्धमेवेत्यत आह—*स चेदयमिति* ॥ संसारश्चेदयमित्यर्थः । *अनादिरिति* ॥ संसारस्य अज्ञाननिबन्धनत्वाभिधानात् कथमनादित्वमिति न शङ्कनीयम्; प्रवाहरूपानादिताया अत्र विवक्षितत्वात्, ईदृशोऽनादिः संसार आत्मयाथात्म्यज्ञानेन सहैवानुवर्तते चेत्, कुतोऽस्य संसारस्य तद्याथात्म्यज्ञानेन निवृत्तिसंभवः ? नहि यद् येन सहैवानुवर्तते, तत् तेन निवर्त्यत इत्यर्थः । अनिवर्तने हेतुमाह—

पञ्चपादिकाविवरणम्

ननु—"श्रोतव्य" इति विधिर्मोक्षसाधनब्रह्मात्मज्ञानाय वेदान्तवाक्यविचारं साधनचतुष्टयसम्पन्नस्य विधातुं न शक्नोति; श्रवणादीनां विषयावगमं प्रत्यन्वयव्यतिरेकसिद्धसाधनत्वात्, न चावघातादिवदुभयार्थता सम्भवति; दृष्टादृष्टप्रकारद्वयसाध्यापूर्ववदिहादृष्टसाध्यस्याभावात्, आत्मावगमस्य दृष्टोपायमात्रसाध्यत्वात्—इति,

ऋजुविवरणम्

रिति* ॥ श्रवणविधेरेवाभावात् कथं तदपेक्षितमनुबन्धनिर्णयार्थत्वं सूत्रस्येति चोदयति—*नन्विति* ॥ मा भूत् प्राप्तत्वाद्विधानम्, नियमस्तु प्राप्तेऽपि दृश्यत इति, तत्राह—*न चाववातादिवदिति* ॥ तत्र नियमादृष्टसाध्यस्यापूर्वस्य तत्कल्पकस्य विद्यमानत्वान्नियमविधिराश्रितः, न चात्र नियमादृष्टसाध्यं नियमादृष्टकल्पकमस्ति; अविद्यानिवृत्तिरूपत्वात्फलस्येति भावः । आत्मज्ञानमेव तावन्मात्रेणानुत्पन्नमदृष्टकल्पकं भवत्विति, नेत्याह—*आत्मावगमस्येति* ॥ शास्त्रैकसमधिगम्यत्वसिद्धो ह्यपूर्वः, नियमादृष्टाभावे च तदसिद्धिरिति वक्तुं शक्यते; बाधकाभावात्, अत्र तु न तथा;

तत्त्वदीपनम्

चोक्तम्, तत्र वैपरीत्यं किं न स्यात् ? इत्यत आह—*मननेति* ॥ "आत्मैकत्वविद्याप्रतिपत्तये" इत्येतद्व्याख्यानसमये वक्ष्यत इत्यर्थः ॥ *ननु* श्रवणे विधेरेवासम्भवात् कथं तन्मूलं सूत्रम् ? इति चोदयति—*ननु श्रोतव्य इति* ॥ किमपूर्वविधिः, उत नियमः, आहो परिसंख्येति विकल्प्याऽऽद्यं दूषयति—*श्रवणादीनामिति* ॥ अपूर्वविधेरत्यन्ताप्राप्तविषयत्वात् श्रवणादीनां च ज्ञानसाधनत्वमन्यतः प्राप्तमिति नापूर्वविधित्वं तस्येत्यर्थः । दृष्टफलेऽप्यवहननादौ "व्रीहीनवहन्यादि"ति यथा नियमः, तद्वदत्रापीति द्वितीयं कल्पमाशङ्कयाह—*न चेति* ॥ "व्रीहीनवहन्यादि"त्यत्र दृष्टादृष्टप्रयोजनसम्भवान्नियमविधिर्युज्यते, न तथाऽत्रेत्यर्थः । चकारेणोभयार्थत्वाभावेऽपि नियमविधित्वमिति शङ्कां निरस्यति । दृष्टतण्डुलमात्रनिष्पत्तिफलस्यान्यथापि सम्भवाद्विधिवैयर्थ्यमित्यर्थः । विधिबलादत्राप्युभयार्थत्वं कल्प्यत इत्याशङ्कय, किं परमापूर्वं नियमापूर्वसाध्यम्, उताऽऽत्मबोध एव साध्यः, इति विकल्प्याद्यं प्रत्याह—*दृष्टादृष्टेति* ॥ तण्डुल-तत्समवेतादृष्टसाध्यपरमापूर्ववत् श्रवणादिष्वदृष्टसाध्यमदृष्टं न पश्याम इत्यर्थः । द्वितीयं निरस्यति—*आत्मावगमस्येति* ॥

भामती

कुतोऽस्य निवृत्तिः ? अविरोधात्, कुतश्चात्मयाथात्म्याननुभवः? न ह्यहमित्यनुभवादन्यदात्मयाथात्म्यज्ञानमस्ति।

ऋजुप्रकाशिका

अविरोधादिति ॥ *ननु* अधुना आत्मयाथात्म्यानुभव एव न ; अत इदानीन्तनः संसारो न तेन सहानुवर्तते, अतो भाविना तेन तन्निवृत्तिरस्त्येवेत्यत आह—*कुतश्चेति* ॥ अधुनेति शेषः। अधुना कुत आत्मयाथात्म्याननुभवः ?=आत्मयाथात्म्यानुभवोऽधुना संसारदशायामस्त्येवेत्यर्थः। तदस्तित्वमेव व्यतिरेकमुखेनाऽऽह—*न हीति* ॥ अहमित्यनुभव एव आत्मयाथात्म्यज्ञानमित्यर्थः। *ननु* अहमनुभवादन्यदात्मयाथात्म्यज्ञानं नास्तीत्युक्तम्, तत् कथम् ? उपनिषज्जन्यस्याऽऽत्माभिन्नब्रह्मज्ञानस्य संभवात्,

पञ्चपादिकाविवरणम्

नैतत्सारम् ; आत्मतत्त्वापरोक्षस्य सर्वादृष्टसाध्यत्वस्य वक्ष्यमाणत्वादवघातादिवदुभयार्थतया विधानोपपत्तेः। *ननु* विधिपरत्वे वेदान्तानां तन्निष्ठतया ब्रह्मस्वरूपस्यासिद्ध्यादिदोषप्रसङ्गान्नास्ति श्रवणादिविधानमिति भाष्यकारैरेव दर्शितम्, *सत्यं ज्ञानविधिस्तत्र निराकृतः*, न श्रवणादिविधिः ; तत्रोक्तदोषप्रसङ्गाभावात्।

ऋजुविवरणम्

प्रमाणज्ञानत्वादिति भावः। प्रसिद्धप्रमाणविलक्षणत्वाददृष्टसाध्यत्वम्, तस्य च प्रमाणत्वमुपपद्यते, व्यतिरेकाभावेऽपि विधानादेवादृष्टसाध्यत्वं विधानं चेत्याह—*नैतत्सारमिति* ॥ *ननु* कथं श्रवणादौ नियमः ? साधनान्तराप्राप्तेः, *मैवम्*; प्रत्यक्षादीनां प्राप्तत्वात्। *ननु* निर्विशेषात्मज्ञाने न तेषां प्राप्तिः, अतः कथं नियमः ? *मैवम्*; अपूर्वीयव्रीहिषु दलनाद्यप्राप्तावपि नियमदर्शनात्, अथ साधारणाकारेण प्राप्तिमपेक्ष्य तत्र नियमः, तदत्रापि समानम्। *अथावघाते विधिरेव, फलतो नियमव्यवहारः,* समानमत्रापीति भावः। *ननु*—विध्यङ्गीकारे भाष्यविरोधः स्यादिति चोदयति—*ननु विधिपरत्व इति* ॥ आदिशब्देन वैरूप्यादीनां ग्रहणम्। ज्ञानविध्यभिप्रायं तदिति परिहरति—*सत्यमिति ॥ *ननु*—श्रवणविधानेऽप्यसिद्ध्यादिदोषप्रसङ्गसाम्यात् कथं ज्ञानविधेरेव निराकरणमिति चोदयति—

तत्त्वदीपनम्

दृष्टसामग्र्यां सत्यामदृष्टाभावापराधेन बोधानुदयादर्शनान्न तस्यादृष्टसाध्यत्वमित्यर्थः। न च परिसङ्ख्या ; पञ्चनखापञ्चनखभक्षणयोरन्यतः प्राप्तावन्यपरिवर्जनवदात्मतत्त्वसाक्षात्कारस्योपनिषदतिरिक्तात्प्राप्त्यसम्भवादित्यर्थः। अपूर्व-परिसङ्ख्याविधिनिराकरणमस्मदिष्टमेव, नियमविधिस्तु न निह्नोतुं शक्यत इत्याह—*नैतत्सारमिति* ॥ *'अदृष्टसाध्याभावात्' इत्युक्तं निरस्यति—*आत्मतत्त्वेति* ॥ "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्" इत्यत्र वक्ष्यमाणत्वादित्यर्थः। यत्रान्वय-व्यतिरेकलभ्यं कारणत्वम्, तत्र केवलव्यतिरेकापेक्षा, इह पुन"विविदिषन्ती"त्यादिवाक्यबलाददृष्टस्य कारणताऽऽश्रीयत इति न व्यतिरेकोऽर्थ्यते। न चादृष्टस्योपयोगासम्भवः ; "तपसा कल्मषं हन्ति" "अविद्यया मृत्युं तीर्त्वे"त्यादिश्रुति-स्मृतिपर्यालोचनया परिपन्थिकल्मषनिबर्हणेनोपयोगादित्यभिसन्धिः। *ननु*—एकस्मिन्विषये द्वयोः साधनयोः पक्षप्राप्तौ नियमविधिः, यथा तण्डुलनिष्पत्तेरवहननान्नखनिर्भेदनाच्च सम्भवेऽवहन्यादिति नियम्यते, न तथाऽऽत्मज्ञाने साधनद्वयं प्राप्तमिति कथं नियम्यते ? इति—चेत्, *मैवम्*—विकल्पासहत्वात्। किमात्मज्ञानमात्रे साधनान्तरप्राप्तिः, उत निर्विशेषाऽऽत्मज्ञाने ? नाद्यः ; सविशेषात्मज्ञाने प्रत्यक्षादिप्रसरात्। द्वितीयेऽपूर्वीयेषु व्रीहिषु दलनाद्यप्राप्तावपि व्रीहिमात्रे दलनादिप्राप्तेर्नियमवन्निर्विशेषात्मज्ञाने साधनान्तराप्राप्तावप्यन्यत्र साधनान्तरप्राप्तेर्नियम इति तुल्यम्। प्रकारान्तरेण श्रवणादिविधिमाक्षिपति—*ननु विधिपरत्वे इति* ॥ उभयपरत्वे वाक्यभेदापातान्न ब्रह्मसिद्धिमिच्छता वेदान्तानां विधिपरत्वमेष्टव्यमित्यर्थः। विधेयज्ञानविशेषणतया ब्रह्मणि गुणत्वप्रसङ्ग आदिशब्दार्थः। भाष्यवचनविरोधादपि न वेदान्तेषु विधिसम्भव इत्याह—*इति भाष्यकारैरिति* ॥ "लिङादयः श्रूयमाणा अप्यनियोज्यविषयत्वात्

पञ्चपादिकाविवरणम्

कथम् ? दर्शनविधाने हि ब्रह्म कर्मतया गुणभुतं प्रसज्यते, ब्रह्मदर्शनमुद्दिश्य विचारविधाने तु स्वप्रधानफलभूतदर्शनविशेषणतया ब्रह्मापि स्वप्रधानं भवति, न तु गुणभूतमिति, वेदान्तैर्ब्रह्मणि स्वप्रधाने प्रतिपाद्यमाने तद्दर्शनाय श्रवणादिविधानं नैव विरुध्यते। *ननु* एवमप्युपक्रमोपसंहाराभ्यामेकस्मिन्नात्मप्रतिपादनपरे वाक्ये कथमवान्तरवाक्यैः श्रवणादिविधानं कल्प्यत इति ? *अवान्तरवाक्यभेदेन "विविदिषन्ती"ति यज्ञादीनां ज्ञानसंयोगविधानवत्, "उपरि हि देवेभ्य" इत्युपरिधारणविधानवत्, मलवद्वाससो व्रतकलापविधानवच्चेति

ऋजुविवरणम्

कथमिति ॥ ज्ञानविधाने हि ब्रह्मणो विधेयविशेषणत्वेन प्रतिपादनं न सम्भवतीति दर्शयति—*दर्शनविधाने हीति* ॥ *ननु*—तत्रापि विशेषणत्वेन गुणत्वं समानमिति, तत्राह—*ब्रह्मदर्शनमुद्दिश्येति* ॥ स्वशब्देन विचारोऽभिधीयते, स्वस्य प्रधानं स्वप्रधानम्, स्वप्रधानं च तत् फलभूतं च स्वप्रधानफलभूतम्, तच्च तद् दर्शनं च तद्दर्शनम्, तस्य विशेषणम्, तस्य भावो दर्शनविशेषणतेति। *फलभूतेति* ॥ विचारं प्रति प्राधान्येनान्तर्गतो हेतुः; अतो न तस्य वैयर्थ्यमाशङ्कनीयम्। *ब्रह्मापि स्वप्रधानमिति* ॥ स्वस्य विचारस्य प्रधानं स्वप्रधानमिति। *एतदुक्तं भवति*—विधेयविचारं प्रति प्रधानभूतदर्शनविशेषणत्वेन ब्रह्मणो विचारं प्रति प्राधान्यमेव, विधेयप्राधान्यस्य च प्रतिपादने न वैरूप्यमिति। यद्वा—ज्ञानमेव स्वप्रधानम्; फलत्वात्, तद्विशेषणस्य च प्राधान्यम्, विधेयस्य तु गुणत्वात् तद्विशेषणस्य गुणत्वमेव। यद्वा—स्वशब्देन ब्रह्माभिधीयते, तद् ब्रह्म प्रधानं यस्य ज्ञानस्येति विग्रहः; तज्ज्ञानत्वेन फलत्वात्, तथासति तद्विशेषणस्यार्थाज् ज्ञानं प्रत्यपि प्राधान्यमिति भावः। एवंच सति ब्रह्मप्रतिपादनं श्रवणादिविधानं चोपपद्यत इत्याह—*इति वेदान्तैरिति* ॥ *ननु*—एवमपि विधानं न संभवति; अन्यपरत्वात्, वाक्यभेदाच्चेति चोदयति—*नन्वेवमपीति* ॥ कथमन्यपरत्वमिति ? तदाह—*उपक्रमोपसंहाराभ्यामिति*। महावाक्येनान्वेतुमयोग्येऽवान्तरवाक्यभेदाश्रयणं दृष्टमिति परिहाराभिप्रायः। तत्रैकदेशीयान् प्रति दृष्टान्तमाह—*ज्ञानसंयोगविधानवदिति* ॥ *ज्ञानसंयोगः = ज्ञानार्थत्वमित्यर्थः। तस्यापि चोद्यविषयत्वं मनसि निधाय दृष्टान्तान्तरम्—*उपरिधारणविधानवदिति* ॥ "अधस्तात् समिधं धारयन्ननुद्रवेत्" इति प्रेताग्निहोत्रेऽधोधारणं विधाय तत्रैव पठितम्—"उपरि हि देवेभ्यो धारयति" इति। तत्र यथोपरिधारणमन्यप्रकरणेऽश्रुतमपि विधेयमित्युक्तम्—"विधिस्तु धारणेऽपूर्वत्वादि"ति, तद्वदित्यर्थः। तस्यापि केश्चिदनङ्गीकृतत्वात् तान् प्रति दृष्टान्तान्तरम्—*व्रतकलापविधानवदिति* ॥ दर्शपूर्णमासप्रकरणे मलवद्वाससो व्रतकलापविधानं दृश्यते—"या अभ्यङ्क्ते तस्यै दुश्चर्मे"त्यादिना, तस्य ततः प्रकरणादुत्कृष्य पुरुषार्थत्वेन विधानमुक्तम्,

तत्त्वदीपनम्

कुण्ठीभवन्ती"त्यत्रेत्यर्थः। किं विधिविशेषस्य तत्र निरासः, आहो विधिमात्रस्येति विकल्प्याऽऽद्यमङ्गीकरोति—*सत्यमिति* ॥ अङ्गीकृतमंशमाह—*ज्ञानविधिरिति* ॥ द्वितीयं दूषयति—*न श्रवणेति* ॥ सामान्यवचनं कथं विशेषविषयं व्याख्यायत इति ? तत्राह—*तत्रेति* ॥ ज्ञानविधावुक्तदोषस्य श्रवणविधौ प्रसङ्गाभावादिति हेत्वर्थः। ब्रह्मस्वरूपासिद्ध्यादिदोषप्रसङ्गोऽत्रापि तुल्य इत्याह—*कथमिति* ॥ श्रवणविधिपक्षे ब्रह्मणो गुणत्वाभावं दर्शयितुं दर्शनविधौ गुणत्वं तावदाह—*दर्शनेति* ॥ *कर्मतयेति* ॥ क्रियात्वेनेति यावत्। विधेयज्ञानस्य क्रियारूपस्य नियोगनिर्वर्तकतया विशेषणत्वात् तद्विशेषणं ब्रह्मापि विशेषणं स्यादित्यर्थः। विचारविधावपि ब्रह्मणो दर्शनं प्रति गुणत्वं तुल्यमित्यत्राह—*ब्रह्मदर्शनमिति* ॥ स्वमेव प्रधानं स्वप्रधानम्, स्वप्रधानं च तत् फलभूतं चेति स्वप्रधानफलभूतम्, तच्च दर्शनं चेति स्वप्रधानफलभूतदर्शनम्, तस्य विशेषणतयेत्यर्थः। प्राधान्यमुपपादयति—*फलभूतेति* ॥ 'धर्मज्ञानाय वेदवाक्यानि विचारयेदि"त्यत्र धर्मस्य प्राधान्यवद् ब्रह्मज्ञानाय विचारविधावपि ज्ञायमानं ब्रह्म प्रधानमिति न गुणत्वप्रसङ्ग इत्यर्थः। विधिपरत्वे स्वरूपासिद्धिप्रसङ्गमुक्तं निरस्यति—*इति वेदान्तैरिति* ॥ ब्रह्मणि महातात्पर्यम्, विधौ

पञ्चपादिकाविवरणम्

ब्रूमः। *अथवा*—"तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य" इत्यादिवाक्यं श्रवणादिविधायकमस्तु ; तस्य तत्परत्वात्, सूत्रकारेण च वक्ष्यमाणत्वात्। सर्वथा तावन्मनननिदिध्यासनाभ्यामङ्गभूताभ्यां सह श्रवणविधान-

ऋजुविवरणम्

तद्वदत्रापि विधानमिति भावः। पृथगधिकरणानङ्गीकारेऽपि न्यायाङ्गीकाराच्च। व्रतकलापस्य प्रकरणेऽन्वयासंभवादगत्या वाक्यभेदाश्रयणम्, इह तु तव्यस्यार्हार्थत्वेनाप्यन्वयसंभव इत्यपरितोषात् पक्षान्तरमाह—*अथवेति*॥ कथं तस्यापि विधायकत्वमिति ? तदाह—*तस्य तत्परत्वादिति*॥ अनारभ्याधीतत्वादिति भावः॥ *ननु*—तस्याप्यन्यपरत्वाद्वाक्य-भेदप्रसङ्गात् श्रवणप्रतीत्यभावात् कथं विधानम् ? विधायकत्वेन व्यवहारादर्शनादौत्प्रेक्षिकं तदित्याशङ्क्याह—*सूत्र-कारेणेति*॥ सर्वथेत्युपसंहारः। *अथवा*—तव्यस्य विधावपि स्मरणात् "विजिज्ञासस्वे"त्यादिषु तव्याश्रवणात् कथमपरि-तोष इति ? तत्राह—*सर्वथेति*॥ विषयव्याप्त्यर्थमथवापक्षान्तरदर्शनमिति भावः॥ तदुक्तम्—"विषयव्याप्तिरेव वेति॥

तत्त्वदीपनम्

त्ववान्तरतात्पर्यमिति न विरोध इत्यर्थः। अवान्तरवाक्यभेदेन वेदान्तानां श्रवणविधिपरत्वे "न सुरां पिबेदि"त्यादावप्य-वान्तरवाक्यभेदकल्पनया सुरापानविधि-निषेधप्रसङ्ग इत्याशयेन शङ्कते—*नन्विति*। *एवमपीति*॥ ब्रह्मणः प्राधान्येऽपीत्यर्थः। "आत्मनस्तु कामाय सर्वं प्रिय"मित्युपक्रमा"दात्मनि विज्ञाते सर्वमिदं विज्ञातं भवती"त्यात्मनोप-संहाराच्चैकं वाक्यमित्यर्थः। किं पदैकवाक्येऽवान्तरभेदेनार्थभेदप्रतिपादकत्वं निराकरोषि, उत वाक्यैकवाक्ये ? तत्राऽऽद्यमङ्गीकृत्य द्वितीयं निरस्यति—*अवान्तरवाक्यभेदेनेति*॥

एकार्थप्रतिपादकत्वेनैकवाक्यत्वाविशेषे क्वचिदवान्तरवाक्यभेदः क्व चिन्नेत्ययं विभागः कुत इति चेत्, तत्रेदं वक्तव्यम्—किमेकदेशिन एतच्चोद्यम्, उत तान्त्रिकस्य ? नाद्यः ; वाक्यैकवाक्येष्ववान्तरवाक्यभेदस्य तेनैवोर-रीकरणादित्याह—*विविदिषन्तीति*॥ *ज्ञानसंयोगः = ज्ञानार्थत्वम्*। द्वितीयेऽपि किमेतद्भाट्टस्योत गुरोः ? नाद्य इत्याह—*उपरि हि देवेभ्य इति*॥ अधोधारणेनैकवाक्यताप्रतीतावपि "उपरि हि देवेभ्य" इत्यस्यापूर्वार्थत्वेनोपरि-धारणविधिपरत्वं यथाऽवान्तरवाक्यभेदेन, तथाऽत्रापीत्यर्थः। इदमत्र विवक्षितम्—"अधस्तात्समिधं धारयन्ननुद्रवेत्" इत्यत्राधोधारणं विधाय तत्रैव श्रूयते—"उपरि हि देवेभ्यो धारयती"ति। तत्रैवं संदिह्यते—किमुपरिधारणं विधीयते, उत नेति ? तत्र न विधीयत इति तावत्प्राप्तम् ; अन्यप्रकरणत्वात, वर्तमानापदेशत्वाच्चेत्येवं प्राप्य्य राद्धान्तितम्—"विधिस्तु धारणेऽपूर्वत्वादि"ति। उपरिधारणस्यान्यतोऽप्राप्तत्वाद्विधेयत्वमेष्टव्यम्, अथापि स्यादन्यस्मादन्यत्र नीयमानं हविराच्छाद्य शिष्टैर्नीयत इति शिष्टाचारात्प्राप्तमुपरिधारणमिति, तत्रेदमभिधीयते—हविःप्रच्छादनस्यान्यतः प्राप्तत्वेऽपि स्रुग्दण्डोपरि समिधोऽप्राप्तत्वात् दण्डप्रदेशे धारणं विधीयते ; ततश्च वर्तमानापदेशत्वेनानुवादरूपत्वमधोधारणवाक्यैक-वाक्यतां च भङ्क्त्वा विधिरास्थीयत इति शेषलक्षणे स्थितम्। तथाचाऽऽत्मवाक्येऽप्यवान्तरवाक्यभेदेन श्रवणादिविधानम-विरुद्धमिति। द्वितीयं दूषयति—*मलवद्वाससा इति*॥ दर्शपूर्णमासयोः श्रूयते—"तिस्रो रात्रीर्व्रतं चरेत्। अञ्जलिना वा पिबेदि"ति। तत्र दर्शपूर्णमासैकवाक्यतायाः प्रतीयमानत्वेऽपि व्रतकलापो विधीयते, तदेकवाक्यतानुपपत्तेः, तद्व-दित्यर्थः। तथा दर्शपूर्णमासयोरेव श्रूयते—"मलवद्वाससा न संवदेदि"ति। किमयं प्रतिषेधः क्रत्वर्थः, उत पुरुषार्थ इति जिज्ञासायामपि प्रकरणात् क्रत्वर्थत्वप्राप्तौ राद्धान्तितम्—"प्रागपरोधान्मलवद्वाससः" इति। "तामपरुध्य यजेते"ति सर्वस्मात् क्रतुव्यापारान्निवृत्ततया रजस्वलया संवादप्रसक्त्यभावान्न क्रत्वर्थत्वेन प्रतिषेधः, किन्तु स्वातन्त्र्येण प्रवर्तमान-पुरुषस्य रजस्वलया संवादप्रसक्तौ सत्यां निषिध्यते पुरुषार्थतयेति। एतदभिप्रेत्य व्रतकलापविधानवच्चेति चशब्दं प्रायुङ्क्तेत्यर्थः। प्रकारान्तरेण श्रवणविधिमाह—*अथवेति*॥ पाण्डित्य-बाल्य-मुनि-शब्दैः श्रवण-मनन-निदिध्यासनानि क्रमेण निर्दिश्यन्ते, तस्याप्याऽऽत्मप्रकरणपठितस्य कथं श्रवणादिविधिपरत्वमित्याशङ्क्यापूर्वार्थत्वाद्विधिरङ्गीकर्तव्य इत्याह—*सूत्रकारेणेति*॥ "सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवदि"त्यत्र वक्ष्यमाणत्वादित्यर्थः। विधिसमर्थन-

पञ्चपादिका

ब्रह्म जिज्ञासितव्यमि''त्यादिभाष्ये स्पष्टतरम् ॥ *अत्राऽऽह*—यद्येवम्, एतावदेवास्तु भाष्यम्—

पञ्चपादिकाविवरणम्

मस्त्येव । अतस्तदपेक्षितानुबन्धत्रयनिर्णयाय सूत्रमारब्धम् । कर्तव्ये चाधिकारिणा मोक्षसाधनब्रह्मज्ञानाय वेदान्तवाक्यविचारे प्रथमसूत्रेण प्रतिपादिते, स च कर्तव्यो विचारो जन्मादिसूत्रमारभ्य प्रवर्तिष्यत इति । तत्र विध्यपेक्षितेष्वधिकारि-विषय-फलानुबन्धेषु विषयफलयोरुपपादनाय बन्धस्य मिथ्यात्वमत्र वर्ण्यत इति सूत्रसङ्गतमेवेदं भाष्यं व्याख्येयमिति ॥

ननु यद्यर्थाद्विषयप्रयोजने सूत्रिते, तर्हि भाष्यकारेण सूत्रस्य तत्र व्यापारं दर्शयित्वाऽऽक्षेपसमाधानपूर्वकं साक्षादेव प्रतिपादनीये विषयप्रयोजने ; अन्यथा सूत्रकार-भाष्यकारयोस्तत्र तात्पर्याभावप्रसङ्गादिति, तत्राह—*एतच्च तस्माद् ब्रह्म जिज्ञासितव्यमित्यादिभाष्ये स्पष्टतरमिति* ॥ भाष्यकारेणोक्तमिति प्रदर्शयिष्याम इत्यध्याहारः । प्रथमग्रन्थोक्तमेवार्थमाक्षेपसमाधानपूर्वकमतितरां स्पष्टीकर्तुं चोदयति—*अत्राह यद्येव-

ऋजुविवरणम्

असंगतिचोद्यं परिहरति—*कर्तव्ये चेति* ॥ उपोद्घातसंगतिरिति भावः । सूत्रसंगतचोद्यस्य भाष्यव्याख्यानपर्यन्तत्वात्तत्परिहारेण परिहृतमित्याह—*तत्रेति* ॥ अथवा*—अनुबन्धनिर्णयार्थत्वेऽपि सूत्रस्य भाष्यकारेणापि तदेव प्रतिपादनीयम्, नान्यत् ;अव्याख्येयत्वप्रसङ्गादित्याशङ्क्याह—*तत्रेति* । *सूत्रसंगतमिति*॥सूत्रेण संगतमित्यर्थः । सूत्रव्याख्यानरूपतया सूत्रसंगत्या शास्त्रेऽपि संगतमित्यर्थः । *अथवा—तत्रेत्युपसंहारः । भाष्यकारेण विषयादिप्रतिपादनं कर्तव्यमिति चोदिते "प्रदर्शयिष्याम" इत्युक्तम्, तदयुक्तम्, चोद्यस्यापरिहृतत्वादित्याशङ्क्य पूरयति—*भाष्यकारेणोक्तमिति* ॥ "अत्राह यद्येवमि"त्यादिग्रन्थः पुनरुक्तः ; पूर्वोक्तार्थस्यैव प्रतिपादनात् । तथाहि—पूर्वमपि भाष्यद्वयं प्रयोजनप्रतिपादकं न भवति ; अध्यासप्रतिपादकत्वादित्याशङ्क्य हेतुभूताध्यासप्रतिपादकत्वेन तत्प्रतिपादकत्वात्, उत्तरत्रापि विषयप्रयोजन-

तत्त्वदीपनम्

मुपसंहरति—*सर्वथेति* ॥ पक्षद्वयेऽपीत्यर्थः । विधिसमर्थनफलमाह—*अत इति* ॥ अस्ति श्रवणविधिः, स च संदिग्धार्थो यस्मात्, तस्मादित्यर्थः । समन्वयाद्यप्रतिपादकत्वात्सूत्रं शास्त्रासंगतम्, तस्य शास्त्रादित्वं चासंगतमिति शङ्काद्वयं निराचष्टे—*कर्तव्य इति* । चशब्दः शङ्काव्यावृत्त्यर्थः ॥ शास्त्रारम्भकर्तव्यतासिद्ध्युत्तरकालीनत्वादुत्तरविचारस्येत्याद्यत्वम् । "चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते" इत्युपोद्घातत्वेन शास्त्रसंगतिश्चेत्यर्थः । एकश्चशब्दोऽवधारणार्थः । स च प्रतिपादित इत्यनेन संबध्यते । इतिशब्दः सूत्रनिरवद्यतोपसंहारार्थः । सूत्रनिरवद्यतायां तदर्थप्रतिपादकभाष्यस्यापि निरवद्यत्वमाह—*तत्रेत्यादिना* ॥ सूत्रस्य निरवद्यत्वे सतीत्यर्थः ॥

भाष्यकारस्य व्याख्यानाचतुरतामाशङ्कते—*ननु यदीति* ॥ विषयप्रयोजने अर्थात्सूत्रिते यदि, तर्हि भाष्यकारेण विषयप्रयोजने प्रतिपादनीये इत्यन्वयः । हेतूपस्थापनेन विषयादेः प्रतिपादितत्वान्न चोद्यावसर इत्याशङ्क्याह—*आक्षेपेति* ॥ हेत्वाक्षेपसमाधानाभ्यां तथा प्रतिपादिते इत्याशङ्क्याह—*सूत्रस्येति* ॥ *व्यापारमिति* ॥ तत्प्रतिपादनसामर्थ्यमित्यर्थः । भाष्यकृत्त्वाच्च विषयादिवाचकशब्दाभ्यां ते निर्देष्टव्ये इत्याह—*साक्षादिति* ॥ प्रतिपादनमात्रमुपयुक्तम्, न तु साक्षादित्याशङ्क्याह—*अन्यथेति* ॥ अप्रतिपादनमसिद्धमित्याह—*तत्राहेति* ॥ चशब्दः शङ्काव्यावृत्त्यर्थः । *जिज्ञासितव्यमिति* ॥ अस्मात्पूर्वं यद्भाष्यं तदादिभाष्यम्, तत्रेत्यर्थः । भाष्यकारेण विषयादिकं प्रतिपाद्यमिति शङ्कायां "प्रदर्शयिष्याम" इति समाधानमनुचितमित्याशङ्क्याह—*भाष्यकारेणेति* ॥

"युष्मदस्मदि"त्यादेर्हेतूपस्थापकत्वेन भाष्यत्वसिद्धावाक्षेपानवसरमाशङ्क्याह—*प्रथमग्रन्थेति* । *ननु* "तदन्तमनेन पर्यवस्यदि"ति विभागेन भाष्यार्थः स्पष्टीकृत इत्याह—*अतितरामिति* ॥ एतद्विवृणोति—*आक्षेपेति* ॥

पञ्चपादिका

"अस्यानर्थहेतोः प्रहाणायाऽऽत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते" इति ; तत्र—"अनर्थहेतोः प्रहाणाय" इति प्रयोजननिर्देशः, "आत्मैकत्वविद्याप्रतिपत्तये" इति विषयप्रदर्शनम्, किमनेन

पञ्चपादिकाविवरणम्

मिति* ॥ *ननु* "अस्यानर्थहेतोरि"ति भाष्यवत्पूर्वभाष्यमपि विषयादिकमेव प्रतिपादयति, कुतस्तत्र पर्यनुयोग इति ? नेत्याह—*अहं मनुष्य इति देहेन्द्रियादिष्वित्यादिनेति* ॥ अत्र विचारकर्तव्यता-विषय-प्रयोजना-ध्यासानामुत्तरोत्तरेण पूर्वपूर्वस्य साध्यत्वस्य सूत्रेणैव सूचितत्वादध्याससाधनद्वारेण विषयप्रयोजने साधयित्वा

ऋजुविवरणम्

भाष्येणैवालम्, किं पूर्वेणेत्याशङ्क्य विषयादिसिद्धिहेतुभूतस्याध्यासस्य प्रतिपादकत्वेन तत्प्रतिपादकत्वस्योक्तत्वात्, यदि टीकाकृतः पूर्वं तद्धेतुप्रतिपादनं नाभिप्रेतम्, तर्हि तात्पर्यप्रतिपादनमसंबद्धं स्यात्, अव्याख्येयताशङ्कापरिहारश्च न स्यात् ; अतः संकटमित्याशङ्क्य ग्रन्थसमुदायस्य तात्पर्यमाह—*प्रथमग्रन्थोक्तमेवेति*॥ पूर्वमध्यासद्वारा प्रतिपादकत्व-माभिप्रायिकम्, तदेवेदानीं वाचनिकं करोति । *यद्वा*—हेतुभूताध्यासप्रतिपादकत्वेन तत्प्रतिपादकत्वमुक्तम्, इदानी-मध्यासस्य हेतुत्वमेव नास्ति, तेन विनापि विषयादिसिद्धेरित्याक्षिप्य तस्य विषयादिसिद्धिहेतुत्वं प्रतिपाद्यत इति भावः । लक्षणादिभाष्येऽपि पूर्वभाष्योपयोगकथनेनैवोपयोगसिद्धेरनुपन्यासः, न तु चोद्यपरिहाराविषयत्वेनेति मन्तव्यम् । *यद्वा*—"युष्मदस्मदित्यादिने"त्यादिग्रहणेन सर्वेषां ग्रहणम् । एवं ग्रन्थसमुदायस्य तात्पर्यमुक्त्वा चोद्याभिप्रायमाविष्कर्तुं पूर्वमुक्तं विषयादिसिद्धिहेतुभूताध्यासप्रतिपादकत्वेन तत्प्रतिपादकत्वं मनसि निधाय चोद्यमाक्षिपति—*नन्वस्यानर्थहेतोरिति* ॥ *भाष्यवदिति* ॥ अहेतुभूताध्यासप्रतिपादकत्वादित्यभिप्रायेण परिहारः । *ननु*—विषयप्रयोजनप्रतिपादकत्वा-भावाद्भाष्यद्वयमव्याख्येयमिति चोदिते, *"उच्यते'* इत्यारभ्याविद्याहेतुकं कर्तृत्व-भोक्तृत्वं प्रदर्शितं भवती"त्यन्तेन ग्रन्थेनानर्थनिवृत्तेरनर्थमिथ्यात्वस्य च सूत्रितत्वप्रतिपादनमसंगतम्, तथा ततः, यत् "तत्प्रतिपादनद्वारेणे"त्यारभ्य सूत्रितत्वाद्भाष्यकारेणादावध्यासः प्रतिपाद्यः ; तेन विना विषयप्रयोजनासिद्धेः, विषयप्रयोजनेन च विना शास्त्रारम्भासिद्धे-रिति तात्पर्यमुक्तम्, तदपि न युक्तम् ; न हि सूत्रितत्वमादावध्याससाधने हेतुः ; व्यभिचारित्वात्, तथा सूत्रितक्रमेण प्रतिपादकत्वाप्रदर्शनादव्याख्येयत्वं भाष्यस्यापादितम्, सूत्रे हि प्रथमं विचारकर्तव्यता प्रतीयते, तदपेक्षया विषयादि-प्रतीतिः, तत्साधकस्य ततोऽपि पश्चात्, स्वेनाप्येवमेवोक्तम्—"ब्रह्मज्ञानं हि सूत्रितमि"त्यादिना—"ब्रह्मज्ञानं ततोऽनर्थ-निवृत्तिः ततस्तन्मिथ्यात्वं प्रतीयते"इति । अतस्तद्विपरीतक्रमेण प्रतिपादकत्वप्रदर्शनादसंबद्धतेत्याशङ्क्य, समुदायस्य तात्पर्यमाह—*अत्र विचारकर्तव्यताविषयेति* ॥ *उत्तरोत्तरेणेति* स्वपाठक्रमाभिप्रायेण । तेषु प्राधान्याभिप्रायेणैव पाठः कृतः ; प्रतीतिक्रमोऽप्येतादृश एव, टीकाग्रन्थविरोधपरिहारोऽप्येवमेव । "ब्रह्मज्ञानं ही"त्यादिना प्रतीतिक्रमाभिप्रायेण पश्चात् सूचितत्वमुक्तम्,"ततः तत्प्रदर्शनद्वारेणे"त्यारभ्य वस्तुसिद्ध्यभिप्रायेणाध्यासस्य पूर्वत्वमुक्तम्, तेनैवादौ तत्साधनस्य

तत्त्वदीपनम्

हेतूपस्थापकत्वाद्युष्मदस्मदित्यादेः कथमाक्षेप इति शङ्कते—*नन्वस्यानर्थेति* ॥ हेतूपस्थापकत्वमसिद्धमित्याह—*नेत्याहेति* ॥ अध्यासं विनापि विषयादिसिद्धेर्नाध्यासस्य तद्धेतुत्वमित्यभिसन्धिः । *ननु* विचारकर्तव्यतायाः श्रौतत्वात्तत्परित्यागेन प्रथममध्यासवर्णनम्, ततो विषयादिवर्णनम्, ततो विचारकर्तव्यतानिरूपणमिति व्युत्क्रमः कस्मादिति ? अत्राह—*अत्र विचारेति* ॥ अत्र विचारकर्तव्यतादिष्विति क्रमनियमं विवक्षन्निति संबन्धः । इति-पदपरामृष्टमर्थमाह—*अध्यासेति* ॥ तत्रोपपत्तिमाह—*विचारकर्तव्यतेति* ॥ उत्तरोत्तरेणेति पाठक्रमाभिप्रायेणेति द्रष्टव्यम् । विषयप्रयोजनयोरध्यासाधीनताया वक्ष्यमाणत्वात्तदुपस्थापकस्य भाष्यत्वं युक्तमित्युक्तम्—"उच्यते" इत्यत्र,

पञ्चपादिका

"युष्मदस्मत्"इत्यादिना—"अहं मनुष्य" इति देहेन्द्रियादिष्वहंममेदमित्यभिमानात्मकस्य लोकव्यवहारस्याविद्यानिर्मितत्वप्रदर्शनपरेण भाष्येण ? * उच्यते *—ब्रह्मज्ञानं हि सूत्रितमनर्थहेतुनिबर्हणम् ।

पञ्चपादिकाविवरणम्

विचारकर्तव्यता साधनीयेति क्रमनियमं विवक्षन्नाह—*'उच्यत' इत्यारभ्य 'वक्ष्यति चैतदि'त्यतः प्राक्तनेन ग्रन्थेन*॥*ननु* ब्रह्मज्ञानप्रयोजनं विचारकर्तव्यतां सूचयता सूत्रेण कथं बन्धनिवृत्तिर्विचार-विज्ञानयोः प्रयोजनत्वेन सूत्रितेति ? तत्राह—*ब्रह्मज्ञानं हि सूत्रितमनर्थहेतुनिबर्हणमिति* ॥ विचारसाध्यज्ञानस्य प्रयोजनमाकाङ्क्षन्विचारविधिरधिकारिविशेषणं मोक्षं प्रयोजनत्वेन प्रमिमीत इत्यर्थः । *ननु* अनर्थो नरकपातादिलक्षणोऽन्य एव,

ऋजुविवरणम्

सूत्रितत्वमुक्तम् । "ब्रह्मज्ञानं ही"त्यादिना ब्रह्मज्ञानादेः सूत्रितत्वप्रतिपादनं शङ्कान्तरनिवृत्त्यर्थम् । सा चैवम्—अध्याससाधनद्वारा विषय-प्रयोजन-प्रतिपादकत्वप्रदर्शनमनुपयोगि ; अध्यासस्यासूत्रितत्वान्नायं भाष्यकारेण प्रतिपाद्यः ; तत्प्रतिपादने चाव्याख्येयत्वस्य दुष्परिहरत्वात्—इति, तां तावत्परिहरति—*ब्रह्मज्ञानं हीत्यादिना* ॥ अथवेयमपि शङ्का पूर्वचोद्यान्तर्गता । पूर्वग्रन्थे हि "किमनेन युष्मदस्मदित्यादि"ना भाष्यद्वयमाक्षिप्तम् । *तस्यायमभिप्रायः*—सूत्रितं हि भाष्यकारेण प्रतिपादनीयम्, नाध्यासः ; असूत्रितत्वादनुपयोगादिति । "प्रथमग्रन्थोक्तमि"त्यादेरयमर्थः—प्रथमग्रन्थे हि विषयप्रयोजनसिद्धिहेतुत्वादध्याससाधनद्वारेण तत्प्रतिपादकत्वमुक्तम्, इदानीमध्यासभाष्योपयोग एव नास्ति ; विषयप्रयोजनसिद्धिहेतुत्वाभावात, असूत्रितत्वादित्याक्षिप्याध्यासस्य सूत्रितत्वं विषयप्रयोजनसिद्धिहेतुत्वं चोक्त्वा भाष्यस्योपयोगित्वं स्पष्टीक्रियत इति । अनन्तरग्रन्थशङ्काऽप्येवम्, टीकाकारेण "ब्रह्मज्ञानं ही"त्यादिनाऽध्यासस्य सूत्रितत्वाद्भाष्यकारेणादावध्यासः प्रतिपाद्यः ; तेन विना विषयप्रयोजनासिद्धेः, विषयप्रयोजनेन च विना शास्त्रारम्भासिद्धेरिति तात्पर्यमुक्तम्, तदसंबद्धम् ; असूत्रितक्रमेण प्रतिपादकत्वप्रदर्शनादसंबद्धत्वप्रसङ्गादित्याशङ्क्य ग्रन्थसन्दर्भस्य तात्पर्यमाह—*विचारकर्तव्यतेति* ॥ *अत्रैवं वक्ष्यमाणार्थसंग्रहः—*शास्त्रमारम्भणीयं न वेति । नेति तावत्प्राप्तम् ; विषयप्रयोजनशून्यत्वात् । कथम् ? ब्रह्मात्मैकत्वं विषयः, न च तदुपपद्यते ; विरुद्धस्वभावत्वात्, सत्यस्य बन्धस्य ज्ञानान्निवृत्तिश्चानुपपन्ना ; अतो नारम्भणीयमिति ॥ आरम्भणीयमिति सिद्धान्तः ; विरुद्धरूपत्वस्य कल्पितत्वेन बिम्बप्रतिबिम्बयोरिवैकत्वोपपत्तेः, मिथ्यात्वेन बन्धस्य निवृत्तिश्चोपपद्यते, इति विषय-प्रयोजनसम्भवाच्छास्त्रमारम्भणीयमिति । *ननु* अयं क्रमः सूत्रित इति वक्तुं न शक्यते ; अध्यासस्यासूत्रितत्वात्, अथ बन्धनिवृत्तिप्रयोजनद्वारा सूत्रितत्वम्, न ; प्रयोजनान्तरस्यैव सूत्रितत्वात, कथं तस्यापि सूत्रितत्वमिति चोदयति—*ननु ब्रह्मज्ञानेति* ॥ सूत्रितप्रयोजनस्य साक्षादप्रयोजनत्वादित्यभिप्रायेणाह—*प्रयोजनमाकाङ्क्षन्निति* ॥ भवतु बन्धनिवृत्तिः सूत्रिता,

तत्त्वदीपनम्

तदसङ्गतम् ; इष्यमाणत्वेन ज्ञानस्य फलत्वम्, तच्च नाध्यासमपेक्षत इत्यध्यासस्यासूत्रितत्वात्तत्प्रतिपादकं भाष्यमसङ्गतमित्याशयेन शङ्कते—*ननु ब्रह्मज्ञानेति* ॥ बन्धनिवृत्तेरसूत्रितत्वमसिद्धमित्याह—*तत्राहेति* ॥ किमनर्थहेतुनिवृत्तिर्मुखतः सूत्रिता, उतार्थात् ? नाद्यः ; अनुपलम्भात, न द्वितीयः ; अनुपपत्त्यभावादित्याशङ्क्याह—*विचारेति* ॥ ब्रह्मज्ञानोद्देशेन विचारकर्तव्यता विधीयमाना ब्रह्मज्ञानस्यानर्थनिवृत्तिफलतामाक्षिपति ; स्वरूपेण तस्यापुरुषार्थत्वादित्यर्थः । अनर्थनिवृत्तेः सूत्रितत्वात्तन्मिथ्यात्वमेव वर्णनीयम्, किं तत्स्वरूपनिर्देशेन ? इत्याशङ्क्य शङ्कान्तरनिरासार्थमिति दर्शयितुं शङ्कान्तरमाह—*नन्विति* ॥ शरीराद्यभिमानपुरःसरं नरकपातादिजनितदुःखप्रमातृताया एवानर्थत्वान्नासङ्गतिरित्याह—

पञ्चपादिकाविवरणम्

शरीरादिप्रतिभासस्य च मिथ्यात्वं साध्यते, इति किं केन सङ्गतमिति ? नेत्याह॥ ॥अनर्थश्च प्रमातृताप्रमुखं कर्तृत्वभोक्तृत्वमिति॥ ॥ निवर्त्यतां तर्हि ज्ञानेन वस्तुभूतमेव प्रमातृत्वकर्तृत्वभोक्तृत्वमिति ? नेत्याह—॥तद्यदि वस्तुकृतमिति॥ ॥ ॥तथाहि॥—चित्रावयविनि नीलविशिष्टद्रव्यज्ञानं स्वविषयं वा स्वविषयसमवेतं वा रसादिकं विरोधिनं वा पीतिमादिगुणं न निवर्तयति, स्वविषयानवबोध एव केवलस्तेन निवर्त्यते। स्वाश्रयगतं वस्तु ज्ञानेन निवर्तत इति चेत्, न; घटादिज्ञानेनात्मगतधर्माधर्मादिगुणानिवृत्तेः। न चाश्रयविषयोभयसम्बन्धि वस्तु ज्ञानेन निवर्तते; आत्मनः शरीरविषयज्ञानेन देहात्मसम्बन्धाद्यनिवृत्तेरिति। ॥ननु॥ न दृष्टसामर्थ्याद्

ऋजुविवरणम्

तन्मिथ्यात्वं तु कथं सूत्रितमित्यभिप्रायेणाह—*निवर्त्यतां तर्हीति* ॥ तत्र निवृत्तिद्वारेण मिथ्यात्वमपि सूत्रितमिति वक्तुं सत्यस्य ज्ञानेनानिवर्त्यत्वं साधयति—*तद्यदि वस्तुकृतमिति*, तदसम्बद्धम्; सत्यस्यापि ज्ञानेन निवृत्तिदर्शनात्, असत्यस्यापि ज्ञानेनानिवृत्तिदर्शनादविरोधित्वमेवानिवृत्तौ प्रयोजकम्, विरोधित्वमेव तु निवृत्तावित्याशङ्क्य, सत्यत्वे विरोधप्रयोजकत्वमेव वक्तुं न शक्यत इति तात्पर्यं दर्शयति—*तथाहीत्यादिना* ॥ *ननु* उत्पन्नेन ज्ञानेन विषये किञ्चित्कर्तव्यम्, तच्च नातिशयाधानम्; अदर्शनात्, अतश्चाभिव्यक्तिलक्षणं सत्यत्वनिवृत्तिरूपमेवेत्याशङ्क्याह—*स्वविषयानवबोध एवेति* ॥ प्रागभावातिरिक्तं निवर्त्यं नास्तीति भावः। यद्वा—सत्यत्वेन ज्ञानेनानिवृत्तिः कथं साध्यते ? न हि ज्ञानेन सत्येतरस्यैव निवृत्तिर्दृष्टा, येन सत्यत्वेनानिवृत्तिरुच्येत, मिथ्यात्वं वा साध्येत। यद्वा—ज्ञानेन विषयगतस्य निवृत्तिस्त्वयाप्यङ्गीकृता कथं निराक्रियते ? इत्याशङ्क्याह—*स्वविषयानवबोध एवेति* ॥ ज्ञानस्य स्वप्रागभावनिवृत्तित्वाज् ज्ञानेन निवर्त्यत्वाभिधानादनवबोधोऽज्ञानम्, तदेव निवर्त्यत इति भावः। विधिमूलं सूत्रमित्यभि-

तत्त्वदीपनम्

नेत्याहेति ॥ अनर्थनिवृत्तेः सूत्रितत्वमङ्गीकृत्याध्याससूत्रणमाक्षिपति—*निवर्त्यतां तर्हीति* ॥ परमार्थस्य प्रपञ्चस्येश्वरज्ञाननिवर्त्यत्ववद् ब्रह्मज्ञानेनापि निवृत्तिः स्यादित्यर्थः। दृष्टान्तासम्प्रतिपत्त्योत्तरयति—*नेत्याहेति* ॥ वस्तुना परमार्थसता निष्पन्नं वस्तुकृतम्, वस्तु यथा तथा वा कृतमित्यर्थः।

ज्ञानानिवर्त्यत्वमुपपादयति—*तथाहीति* ॥ ज्ञानस्य वस्तुनिवर्तकत्वं किं दृष्टबलात्, किं वा श्रुतिबलात् ? आद्येऽपि तत्किं विषयसम्बन्धिनं निवर्तयति, उताऽऽश्रयसम्बन्धिनम्, किं वोभयसम्बन्धिनम् ? आद्येऽपीदमालोचनीयम्—किं नियन्तृत्वादिविशिष्टविषयं निवर्तकम्, उत केवलविषयम् ? तत्र नाद्यः सङ्गच्छते; व्यभिचारादित्याह—*चित्रेति* ॥ चित्राख्यरूपस्यैकत्वेन तत्र नीलरूपाद्यभावात् कथं नीलज्ञानस्य नीलाद्यनिवर्तकत्वमुदाह्रियत इति चेत्, मैवम्; चित्रावयव्यारम्भकनीलविशिष्टवस्तुज्ञानस्यानिवर्तकत्वोदाहृतेर्न विरोधः। न च तदा चित्रावयविनीति पदवैयर्थ्यं शङ्क्यम्; नीलज्ञानस्य स्वविषयनिवर्तकत्वे चित्रावयविन एवानुपपत्तिरिति प्रदर्शनार्थत्वात्। नानारूपसमाहारश्चित्रमिति व्योमशिवदृष्टिं प्रतिभासं वाऽपेक्ष्येदमुदाहरणमित्यर्थः।

केवलविषयज्ञानं तद्गतनियन्तृत्वादिनिवर्तकमित्यत्र व्यभिचारमाह—*स्वविषयसमवेतमिति* ॥ नीलज्ञानस्य न रसादिनिवर्तकत्वम्; अविरोधात्, शुद्धात्मविषयं पुनस्तद्विरोधिनं निवर्तयतीत्याशङ्क्य तत्रापि व्यभिचारमाह—*विरोधिनं चेति* ॥ विषयगतव्यवहारायोग्यत्वं यथा नीलज्ञानेन निवर्त्यते, तद्वत्। "अत्रापी"त्याशङ्क्याज्ञाननिवृत्तावयोग्यतानिवृत्तेर्न ज्ञाननिवर्त्यत्वमित्याह—*स्वविषयानवबोध एवेति* ॥ ज्ञानप्रागभावस्य वस्तुसतोऽपि ज्ञाननिवर्त्यत्वं दृष्टमित्याशङ्क्य प्रागभावनिवृत्तेर्ज्ञानमात्रत्वाभ्युपगमान्न ज्ञानेन प्रागभावस्य निवर्त्यत्वमित्याह—*केवल इति* ॥ द्वितीयं पक्षमुत्थापयति—*स्वाश्रयेति* ॥ जीवगतनियम्यत्वादिप्रपञ्चनिवृत्तौ तत्सापेक्षो नियन्तृत्वादिरपि ब्रह्मगतोऽर्थान्निवर्तत इत्यर्थः। व्यभिचारान्नायं पक्षः साधुरित्याह—*न घटादिज्ञानेनेति* ॥ तृतीयं पक्षं दूषयति—*न चाश्रयेति* ॥

कर्तृत्वादेराश्रयविषयसम्बन्धिनो ज्ञाननिवर्त्यत्वानुपपत्तिरित्यक्षरार्थः। सत्तादिरादिशब्दार्थः। श्रुतिबलाद्

भामती

नच 'अहमि'ति सर्वजनीनस्फुटतरानुभवसमर्थित आत्मा देहेन्द्रियादिव्यतिरिक्तः शक्य उपनिषदां सहस्रैर-

ऋजुप्रकाशिका

इत्यत आह--*न चाहमिति* ॥ *अन्यथयितुमिति* ॥ उपनिषदां सहस्राण्यपि भिन्नत्वेन सकललोकप्रत्यक्षसिद्ध-मात्मानं ब्रह्माभिन्नत्वेन प्रमापयितुं न शक्नुवन्ति ; प्रत्यक्षानुभवविरोधादित्यर्थः । एतदेव व्यतिरेकमुखेन

पञ्चपादिकाविवरणम्

ज्ञानाद्बन्धनिवृत्तिः, येनाविद्यात्मत्वं वर्ण्येत, किंत्वागम एव ज्ञानाद्बन्धनिवृत्तिं श्रावयति । *ननु* श्रुतोपपत्त्यर्थमेव बन्धस्याविद्यात्मत्वं वर्णनीयमेव ; यथाऽऽग्नेयादीनां षण्णां यागानामधिकारापूर्वविषयतयाऽपूर्वकरणभावे श्रुतेऽपि कालान्तरभाविप्रधानापूर्वसाधनत्वोपपत्त्यर्थं क्रमभावियागकर्मजन्यानि मध्यवर्तीन्यवान्तरापूर्वाणि

ऋजुविवरणम्

प्रायेणाह—*ननु न दृष्टसामर्थ्यादिति* ॥ श्रुतत्वमेवाश्रुतकल्पनेऽपि हेतुरिति परिहरति—*ननु श्रुतोपपत्त्यर्थमेवेति* ॥ *ननु* श्रुतोपपत्त्यर्थमश्रुतकल्पनेऽपि कारणान्तरमेव कल्प्यतामित्याशङ्क्याह—*अविद्यात्मकत्वं वर्णनीयमेवेति*॥ तेनैव श्रुतस्योपपत्तिर्नान्यथेति, तदेव वर्णनीयमेवेति । 'श्रुतोपपत्त्यर्थमेवे'त्यनेनागमापेक्षितत्वमुक्तम् । वर्णनीयमेवेत्यनेन तेन विना तदुपपन्नत्वाभावात्तेनैव च तदुपपत्तेरित्युभयनियमोऽवधारणेनोक्तः । *यथा आग्नेयादीनामिति* प्राभाकरमते दृष्टान्तः । अपूर्वकरणभावे श्रुतेऽपीत्युपादानाभिप्रायेण । *यथा वा श्रुतस्येति* भाट्टमतेन । तत्र श्रुतत्वमात्रेण

तत्त्वदीपनम्

ज्ञानस्य वस्तुनिवर्तकत्वमिति पक्षमुत्थापयति—*ननु न दृष्टेति* ॥ *येनेत्यस्यायमर्थः*—दृष्टबलाद् ज्ञानान्निवर्तते बन्ध इति पक्षे ज्ञानस्य बन्धनिवर्तकताया अदृष्टेरध्यस्तत्वं स्यादिति । "तथा विद्वान्नामरूपाद्विमुक्त" इत्यादिरागमः । वस्तुसतो ज्ञाननिवर्त्यत्वासम्भवान्मायात्मकबन्धस्य ज्ञाननिवर्त्यत्वं श्रुत्यर्थः ; इतरथा दृष्टविरोधात् श्रुतिप्रामाण्यं न स्यादिति परिहरति—*ननु श्रुतेति* ॥ श्रुतेऽप्युपपत्त्यपेक्षां दृष्टान्तेनाह—*यथेति* ॥ "आग्नेयोऽष्टाकपालः" "उपांशुयाजमन्तरा यजति" "अग्नीषोमीयमेकादशकपालमि"ति पूर्णमासत्रयम्, "आग्नेयोऽष्टाकपालः" "ऐन्द्रं दध्यैन्द्रं पय" इति दर्शत्रयमित्येतेषां षण्णां यागानामपूर्वसाधनत्वोपपत्त्यर्थमपूर्वाणि कल्प्यन्त इति सम्बन्धः ।

ननु अपूर्वसाधनत्वस्यैवाभावान्नात्रोपपत्त्यपेक्षेत्याह—*अधिकारेति* ॥ परमापूर्वविषयतयेत्यक्षरार्थः । *अयं भावः*—"स्वर्गकामो यजेते"त्यत्र लिङा लौकिककार्यव्युत्पत्त्यनुरोधेन नियोगस्तावदुपलभ्यते । नियोगश्चाधिकारिविषयावन्तरेणानुपपद्यमानोऽधिकारिविषयावाक्षिपति । तत्र कुत्र नियोग इति विषयाकाङ्क्षायां यागो विषयत्वेन सम्बध्यते, यागे नियोग इति, तदिदमुक्तम्—*अधिकारापूर्वेति* ॥ नियोगप्रतीत्युपयोगित्वं विषयशब्दार्थः । यागविषयो नियोगः साध्यतया प्रतीयमानः साक्षात् कृत्यसाध्यत्वात् स्वस्य कृतिसाध्यत्वनिर्वाहार्थं विषयतयाऽन्वितानां तेषामेव करणत्वमाक्षिपति । तदेतदुक्तम्—*अपूर्वकरणेति* ॥ नियोगनिष्पत्त्यनुबन्धित्वं करणशब्दार्थः । तदिदमुक्तं शालिकायाम् :—

"कृतितत्साध्यमध्यस्थो यागादिर्विषयो मतः । कार्ये संघटिताकारे करणत्वेन संमतः ॥" इति ॥

यागानामेव परमापूर्वकरणत्वात् किमवान्तरापूर्वैः ? इत्याशङ्क्य किमेकैकयागनिष्पत्त्यनन्तरमपूर्वजनिः, उत सर्वनिष्पत्त्यनन्तरमिति विकल्प्याऽऽद्यं दूषयति—*कालान्तरेति* ॥ "दर्शपूर्णमासाभ्यामि"ति तृतीयया समुच्चितानां करणताप्रतीतेर्नाद्यः पक्षः साधुरित्यर्थः । द्वितीयं दूषयति—*क्रमभावीति* ॥ देवतोद्देशेन द्रव्यत्यागलक्षणानां यागानां सकृदनुष्ठानं न संभवतीत्यर्थः । क्रमेणोत्पन्नास्त एव मिलिताः कार्यहेतव इत्याशङ्क्य, क्षणिकत्वान्मेलनमेवानुपपन्न-

भामती

प्यन्यथयितुम् ; अनुभवविरोधात् । न ह्यागमाः सहस्रमपि घटं पटयितुमीशते॥ तस्मादनुभवविरोधादुपचरि-

ऋजुप्रकाशिका

द्रढयति—*न ह्यागमा इति* ॥ तथाच नोपनिषज्जन्यब्रह्माभिन्नाऽऽत्मज्ञानसंभव इति भावः । तर्हि, अभेदप्रतिपादकोपनिषदां का गतिः ? इत्याशङ्क्य 'नाहं ब्रह्म' 'अहं कर्ता' 'अहं भोक्ता' 'अहं किञ्चिज्ज्ञः' इत्येवंरूपेण ब्रह्मभिन्नतया कर्तृत्व-भोक्तृत्वादिमत्तया चाऽऽत्मनः प्रत्यक्षानुभवसिद्धत्वात् तदनुभवविरोधेनोपचरितार्थत्वमेवोपनिषदामित्युपसंहारव्याजेनाह—*तस्मादिति* ॥ किञ्च न ब्रह्मण आत्माभेदस्तदा स्यात्, यद्यहंकारातिरिक्त

पञ्चपादिका

अनर्थश्च प्रमातृताप्रमुखं कर्तृत्व-भोक्तृत्वम् । तद्यदि वस्तुकृतम्, न ज्ञानेन निबर्हणीयम् ; यतो

पञ्चपादिकाविवरणम्

कल्प्यन्ते, यथा वा श्रुतस्यैव स्वर्गसाधनत्वस्योपपत्तयेऽपूर्वं कल्प्यते, तद्वत् । *ननु* तत्र क्षणिकानां कर्मणां कालान्तरवर्तिफलसाधनत्वाभावव्याप्तिनियमाल्लोके, वेदेऽपि स्वर्गापूर्वसिद्धैव मध्येऽपूर्वाणि कल्प्यन्ते श्रुतोपपत्तय इति, तर्हीहापि व्याप्तिनियतिरस्तीत्याह—*यतो ज्ञानमज्ञानस्यैव निवर्तकमिति* ॥ अतः सूत्रस्यैव

ऋजुविवरणम्

नाश्रुतकल्पनम्, किन्तु प्रमाणान्तरविरोधपरिहारायेत्याह—*ननु तत्र क्षणिकानामिति* ॥ इहापि प्रमाणविरोधपरिहारायाध्यासवर्णनमिति दर्शयितुं तेन विनाऽनुपपद्यमानप्रमाणस्वरूपे तात्पर्यमाह—*तर्हीहापीति* ॥ ज्ञानस्याज्ञाननिवर्तकत्वेऽपि न ज्ञानत्वप्रयुक्ता निवृत्तिरिति भावः । यद्यपि तेन विनाऽनुपपत्तिः ; तथापि भाष्यकारेण तत् प्रतिपाद्यमिति कथं सिद्धम् ? इत्याशङ्क्याह—*अतः सूत्रस्यैवेति* ॥ आदौ आर्थिकार्थकथन उपोद्घातत्वं हेतुरुक्तः, कथं

तत्त्वदीपनम्

मित्यभिसन्धिनोक्तम्—*कर्मेति* ॥ अपूर्वाणामपि यागवत् क्रमभावित्वात् संभूय हेतुत्वमनुपपन्नमित्याशङ्क्योक्तम्—*मध्यवर्तीनीति* ॥ यागप्रधानापूर्वयोर्मध्ये स्थितानीत्यर्थः । न चैतावता यागकरणताभङ्गः ; तेषामेव सूक्ष्मरूपत्वादपूर्वाणामित्याह—*अवान्तरेति* ॥ परमापूर्वमपेक्ष्यावान्तरेति विशेषणम् ॥

ननु अवान्तरापूर्वैः फलसिद्धेः किमन्तर्गडुना परमापूर्वेण ? न च—प्रत्ययबलात्तत्प्रत्ययान्न तन्निराकरणमिति—शङ्क्यम्, तस्य प्रत्ययार्थत्वासिद्धेरिति मन्वानं प्रति दृष्टान्तान्तरमाह—*यथेति* ॥ यागगतस्येत्यनुषङ्गः । एषा भाट्टप्रक्रिया—'यजेते'त्युक्ते शाब्दभावनाभाव्यत्वेन पुंस्प्रवृत्तिलक्षणाऽऽर्थभावना प्रतीयते । सा च भाव्य-करणेतिकर्तव्यतारूपमंशत्रयमपेक्षते । तत्र यद्यप्येकपदोपात्तत्वेन यागस्य भाव्यत्वं प्रतीयते ; तथापि क्लेशात्मकत्वेन तस्य भाव्यत्वासंभवाद्भिन्नपदोपात्तः स्वर्गो भाव्यत्वेन संबध्यते, यागः करणत्वेन, प्रयाजादिरितिकर्तव्यतात्वेन, यागस्य क्षणभङ्गुरस्य समयान्तरभाविफलसाधनतानुपपत्तेः श्रुतकरणत्वनिर्वाहायापूर्वं कल्प्यते यथा, तथा श्रुतबन्धध्वंसनिर्वाहार्थं बन्धस्य मिथ्यात्वं कल्पनीयमिति । दृष्टान्तो विषम इति शङ्कते—*ननु तत्रेति* ॥ स्वर्गापूर्वेति* । भाट्टमते स्वर्गसिद्ध्यर्थमपूर्वकल्पनम्, गुरुमते परमापूर्वसिद्ध्यर्थमिति विभागः । "सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहती"त्यादिवचनात् सत्यदुरितस्य सेतुदर्शनेन ध्वंसवत् सत्यबन्धस्य ब्रह्मज्ञानान्निवृत्तिसंभवाद् वैषम्यमित्यर्थः ॥

साम्येन समाधत्ते—*तर्हीहापीति* ॥ सेतुसाक्षात्कारमात्राद् दुरितनिवृत्तिर्न स्मृत्यर्थः, सेतुस्थानां म्लेच्छानामपि दुरितनिवृत्त्याऽक्षयफलभागित्वप्रसक्तेः, किन्तु दूरदेशगत-च्छत्रपादुकाविधुरत्व-स्वकृतोद्घोषणादि-नियमकलापयुक्तस्य सेतुदेशप्राप्त्या कल्मषनिवृत्तिः । तस्माद् दृष्टान्तासिद्धेर्बन्धवैतथ्यमास्थेयं ज्ञाननिवर्त्यत्वसिद्ध्य इति भावः । तात्पर्य-

पञ्चपादिका

ज्ञानमज्ञानस्यैव निवर्तकम्। तद्यदि कर्तृत्व-भोक्तृत्वमज्ञानहेतुकं स्यात्, ततो ब्रह्मज्ञानमनर्थहेतु-निबर्हणमुच्यमानमुपपद्येत। तेन सूत्रकारेणैव ब्रह्मज्ञानमनर्थहेतुनिबर्हणं सूचयताऽविद्याहेतुकं कर्तृत्व-भोक्तृत्वं प्रदर्शितं भवति। अतस्तत्प्रदर्शनद्वारेण सूत्रार्थोपपत्त्युपयोगितया सकलतन्त्रोपोद्घातः

पञ्चपादिकाविवरणम्

बन्धस्याविद्यात्मकत्वे व्यापारात्सूत्रार्थविचारकर्तव्यतोपपत्त्यर्थप्रयोजनसाधनायाध्यासो वर्णनीय इत्याह—*तद्यदीत्यादिना सूत्रार्थोपपत्त्युपयोगितयेत्यन्तेन ग्रन्थेन* ॥ *ननु* सूत्रेण प्रथमप्रतिपन्नं प्रतिपाद्यमर्थमुल्लङ्घ्य किमिति चरमप्रतिपन्नमार्थिकार्थमेव भाष्यकारः प्रथमं वर्णयतीति ? तत्राह—*सकलतन्त्रोपोद्घात इति* ॥ प्रतिपाद्यमर्थं बुद्धौ संगृह्य प्रागेव तदर्थमर्थान्तरवर्णनमुपोद्घातः। प्रतिपाद्यं बहिरेव प्रतिज्ञाय पश्चात्तत्सिद्धि-

ऋजुविवरणम्

तस्य हेतुत्वम्? न ह्युपोद्धातत्व-प्रतिपादनयोर्भेदोऽस्ति; उभयत्र प्रतिपाद्यार्थसाधनाविशेषात्, अतो नाप्रसिद्धमार्गा-श्रयणं युक्तमित्याशङ्क्य, तयोर्लक्षणमाह—*प्रतिपाद्यमर्थमिति* ॥ तत्र वर्णनमुपोद्घात इत्युक्ते प्रतिपाद्यार्थवर्णन-मप्युपोद्घातः स्यात्, तदर्थम्—*अर्थान्तरवर्णनमिति* ॥ तथापि सर्वार्थान्तरवर्णनानामुपोद्घातत्वं स्यात्, तदर्थमाह—*तदर्थमिति* ॥ तथापि प्रतिज्ञायार्थं तत्र हेतूपन्यासेऽपि तत् स्यात्, तदर्थमाह—*प्रागेवेति* ॥ प्रागेव प्रतिपादि-तस्य प्रसङ्गादुत्तरत्रोपयोगेऽप्युपोद्घातत्वं स्यात्, तदर्थमाह—*प्रतिपाद्यमर्थं बुद्धौ संगृह्येति* ॥ तथापि प्रतिपाद्यमर्थं बुद्धौ संगृह्य वर्णनमुपोद्घात इत्युक्ते प्रतिज्ञातार्थे हेतूपवर्णनस्याप्युपोद्धातत्वं स्यात्, तदर्थमाह—*प्रागेवेति* ॥ तथा-प्यनुपयोग्यर्थवर्णनस्योपोद्धातत्वं स्यात्, तद्व्यावृत्त्यर्थम्—*तदर्थमिति* ॥ प्रागेव तदेकदेशवर्णनस्याप्युपोद्धातत्वं स्यात्, तदर्थम्—*अर्थान्तरेति* ॥ यद्वा—प्रागनुपयोग्यर्थकथनव्यवच्छेदार्थम्—*तदर्थमर्थान्तरविशेषणम्* ॥ प्रति-

तत्त्वदीपनम्

स्मरणं सत्यं विषं नाशयति यथा, यथा वा विषयदोषदर्शनं सत्यरागस्य निवर्तकम्, तद्वद् ज्ञानात् सत्यबन्धध्वंस इति शङ्कां निराकर्तुम्—*अज्ञानस्यैवेत्युक्तम्* ॥ न तावत्तार्क्ष्यस्मरणमात्रस्य सत्यविषशमयितृत्वम्, किन्तु ध्यान-मन्त्रप्रयोगादि-क्रियायाः; इतरथाऽतिप्रसक्तेः। न च विषयदोषदर्शनं रागनिवर्तकम्; रागविरुद्धचेतोवृत्त्युदयाद्रागनिवृत्तेरित्यर्थः ॥

"तद्यदी"त्यादिग्रन्थं फलितपरतया व्याकरोति—*अत इति* ॥ सूत्रार्थश्चासौ विचारकर्तव्यता चेति तथा, तस्या उपपत्तिर्याभ्यां ते सूत्रार्थविचारकर्तव्यतोपपत्तिनी, ते चार्थप्रयोजने चेति तथोक्ते, तयोः साधनायेति विग्रहः। प्रत्यग्-ब्रह्मैक्यमर्थशब्दार्थः। सूत्रार्थोपपत्त्युपयोगितयेत्यस्यायमर्थः—विचारकर्तव्यतारूपस्य सूत्रार्थस्योपपत्तिर्याभ्यां विषयप्रयो-जनाभ्यां ते सूत्रार्थोपपत्तिनी, तदुपयोगितया बन्धस्याविद्यात्मकत्वप्रदर्शनद्वारेणाध्यासो वर्णनीयः—इति। मिथ्यात्व-सूत्रगमङ्गीकृत्य प्रथमप्रतिपादने को हेतुरिति शङ्कते—*ननु सूत्रेणेति* ॥ "विषं भुङ्क्वे'त्यादिवाक्यात् प्रथमप्रतिपन्न-स्याप्यनुपादेयत्वम्, तद्वन्नेत्याह—*प्रतिपाद्यमिति*। एकेनोभयोरप्रतिपत्तेः कथं चरमेत्युक्तम्? तत्राह—*आर्थिकेति* ॥ प्रयोजनविवक्षया प्रथमप्रतिपादनमित्याह—*तत्राहेति*॥ अध्यासभाष्यस्याऽध्यासबाधः प्रयोजनम्, तच्चोपोद्धातो हेतुरिति योजना। उपोद्घातप्रतिपादनयोर्भेदाभावान्नोपोद्धात इति विशेषणम्, तत्राह—*प्रतिपाद्यमिति* ॥ शब्दवर्णनं व्यावर्तयति—*अर्थमिति* ॥ प्रतिज्ञातवर्णनं व्यावर्तयितुम्—*अर्थान्तरेति* ॥ असंबद्धार्थवर्णनव्यावृत्त्यर्थम्—*तदर्थ-मिति*॥ तदुपयोगितयेत्यर्थः। 'अग्निमान् अयमि'ति प्रतिज्ञाय धूमवत्त्वादित्यर्थान्तरवर्णनं व्यावर्तयितुम्—*प्रतिपाद्यमर्थं बुद्धौ संगृह्येत्युक्तम्*। तावत्युक्ते बुद्धौ संगृह्य पश्चात्प्रतिज्ञाय यद्वर्णनं तस्योपोद्धातत्वं व्यावर्तयितुम्—*प्रागेवेति* ॥ शब्दप्रयोगात्प्रागेवेत्यर्थः।

प्रतिपादनस्वरूपमाह—*प्रतिपाद्यमिति* ॥ प्रतिपाद्यं प्रतिज्ञाय हेतुवर्णनमित्युक्ते, उपोद्धातेऽपि प्रसङ्गः, तदर्थम्—

पञ्चपादिका

प्रयोजनमस्य भाष्यस्य ॥ तथा चास्य शास्त्रस्यैदम्पर्यम्—सुखैकतान-सदात्मक-कूटस्थ-चैतन्यैकरसता संसारित्वाभिमतस्यात्मनः पारमार्थिकं स्वरूपमिति—वेदान्ताः पर्यवस्यन्तीति, प्रतिपादितम्। तच्चाहं

पञ्चपादिकाविवरणम्

हेतूपवर्णनं प्रतिपादनमिति विभागः। *तन्त्रमिति* तन्त्रार्थो ब्रह्मात्मैकत्वमुच्यते। *ननु* भवतु प्रयोजनसिद्धिहेतुरध्यासः, कथं तन्त्रार्थसिद्धिहेतुः? इत्याशङ्क्य तत्कथनाय तन्त्रार्थं प्रथमं कथयति—*तथा चास्य शास्त्रस्येति*॥ ऐदम्पर्यं प्रतिपादितमित्युत्तरेण सम्बन्धः। तदेवैदम्पर्यं दर्शयति—*सुखैकतानेत्यादिना*॥*अयमर्थः*—ब्रह्मात्मैकत्वे

ऋजुविवरणम्

पाद्यमर्थं बुद्धौ संगृह्य प्रागेवार्थान्तरवर्णनमुपोद्‌घात इत्युक्ते स्वतन्त्रानेकार्थान्मनसि निधायैकस्य प्रतिपादनमप्युपोद्‌घातः स्यात, तन्निवृत्त्यर्थम्—*तदर्थमित्येवमूह्यम्*॥ *ननु* तन्त्रस्याप्रतिपाद्यत्वात्कथं तदुपोद्‌घातत्वं टीकाकारेणोक्तमित्याशङ्क्य व्याचष्टे—*तन्त्रमिति तन्त्रार्थ इति* ॥ *ननु* तथाचेत्यनन्तरग्रन्थेन तन्त्रार्थनिरूपणमसङ्गतम्; अध्यासस्य तन्त्रोपोद्घातत्वनिरूपणस्याप्रस्तुतत्वादित्याशङ्क्यानन्तरग्रन्थस्यासङ्गतिं परिहरति—*ननु भवत्विति* ॥ 'कथं तन्त्रार्थसिद्धिहेतुरि'त्यस्यायमभिप्रायः—किं तदुत्पत्तौ हेतुत्वम्, ज्ञप्तौ वा? नोत्पत्तौ; अनन्यत्वात्, नापि ज्ञप्तौ; शास्त्रैकसमधिगम्यत्वादिति ॥ वेदान्ताः पर्यवस्यन्तीति प्रतिपादितमित्यन्वयेऽङ्गीकृते शास्त्रस्यैदम्पर्यमित्यस्यानन्वयः स्यात, तथा—सुखैकतानेत्यादिना निरूपितं संसारित्वाभिमतस्यात्मनः पारमार्थिकं स्वरूपमिति शास्त्रस्यैदम्पर्यं प्रतिपादितमित्यन्वयः प्रतिभाति; ऐदम्पर्यमित्यस्येदंशब्दार्थनिरूपणसापेक्षत्वात्। इदंपरस्य भाव ऐदम्पर्यमिति विग्रहः। सुखैकतानेत्यस्य चेदंशब्दार्थनिरूपकत्वात, इत्यन्तत्वेन सापेक्षत्वाच्च, तथा सति वेदान्ता इत्यस्यान्वयः। अथ—इत्यन्तस्योभयत्रान्वयः, स्वरूपमिति शास्त्रस्यैदम्पर्यं प्रतिपादितम्, तथा स्वरूपमिति वेदान्ताः पर्यवस्यन्तीति च, तथा सति पौनरुक्त्यम्, एतत्परिहर्तुं व्याचष्टे—*ऐदम्पर्यं प्रतिपादितमित्युत्तरेणेति* ॥ उत्तरस्योपयोगमाह—*तदेवैदम्पर्यमिति* ॥ सुखैकतानेत्यादिविशेषणोपयोगस्तु एवमित्याह—

"अनर्थतत्संगमसत्पराक्त्वं विकारजाड्यं च तथैषु भेदम्। उद्धर्तुमेतानि विशेषणानि तैरेव तत्सिद्धिरितीरितानि॥"

अनेकाकारजाड्यं च चैतन्ये च विकारिताम्। उन्मूल्य चासदात्मत्वं तद्दुःखमसुखं श्रितम्॥
अन्योन्यव्यभिचारेण पदानामेतदेव हि। प्रयोजनमखण्डं हि न्यायविद्भिरुदीरितम्॥
सदादेरुपसंहारः पञ्चकस्य निरूपितः। रसभेदनिरासो वाऽस्थूलादीनुपलक्षयेत्॥

एवंभूतस्वरूपप्रदर्शनं वक्ष्यमाणप्रत्यक्षविरोधस्फुटीकरणार्थम्। उक्तं च—"तन्त्रार्थमि"त्यनेन वेदान्ता इत्यस्यानन्वयमपौनरुक्त्यं च परिहरति—*अयमर्थ इति* ॥ सुखैकतानेत्यादि वेदान्ताः पर्यवस्यन्तीत्येवमन्तमैदम्पर्यं शास्त्रविशेषकम्, पूर्वभागः ऐदम्पर्यविशेषकः। वेदान्ता इति शास्त्रविशेषक इत्यर्थः। *ननु* प्रतिपाद्यते इति वक्तव्ये

तत्त्वदीपनम्

बहिरेवेति ॥ अवयवविपर्यासेनाप्राप्तकालतां व्यावर्तयति—*पश्चादिति* ॥ असंबद्धहेतुव्यावृत्त्यर्थम्—*तत्सिद्धीति* ॥ अध्यासस्य विषयफलसिद्धिहेतोः कथं तन्त्रशब्दवाच्यशास्त्रोपोद्घातत्वम्? इत्यत्राह—*तन्त्रेति* ॥ तन्त्र्यते प्रतिपाद्यते इति ब्रह्मात्मैक्यं तन्त्रमित्युच्यते, धातूनामनेकार्थत्वात्, "तन्त्रि कुटुम्बधारणे"ति धातोः प्रतिपादनार्थत्वादित्यर्थः। ब्रह्मणोऽनादित्वात्स्वप्रकाशत्वाच्च नाध्यासस्य तद्धेतुत्वमिति शङ्कते—*ननु भवत्विति* ॥ शास्त्रार्थप्रतिपत्तिप्रतिबन्धनिवृत्तावध्यासवर्णनोपयोग इति समाधिग्रन्थार्थः। *तथाचेति* ॥ यथाऽध्यासस्य तन्त्रार्थे हेतुत्वं तेन प्रकारेणेत्यर्थः। ऐदम्पर्यस्य शब्दधर्मत्वात्कथं चैतन्यैकरसतेति सामानाधिकरण्यम्? इत्याशङ्क्याह—*ऐदम्पर्यमिति* ॥ पौनरुक्त्यं निरस्यति—*तदेवेति* ॥ तात्पर्यस्य प्रतिपाद्यमानत्वात्प्रतिपादितमिति कथमुक्तमित्यत्राह—*अयमर्थ इति* ॥

पञ्चपादिका

कर्ता सुखी दुःखीति प्रत्यक्षाभिमतेनाबाधितकल्पेनावभासेन विरुध्यते। अतस्तद्विरोधपरिहारार्थं ब्रह्मस्वरूपविपरीतरूपमविद्यानिर्मितमात्मन इति यावन्न प्रतिपाद्यते, तावद् जरद्गवादिवाक्यवदनर्थकं प्रतिभाति ; अतस्तन्निवृत्त्यर्थमविद्याविलसितमब्रह्मस्वरूपत्वमात्मन इति प्रतिपादयितव्यम्। वक्ष्यति

पञ्चपादिकाविवरणम्

वेदान्ताः पर्यवस्यन्तीति यदिदं वेदान्तशास्त्रस्यैदम्पर्यम्, तत् सूत्रभाष्याभ्यां प्रतिपादितमिति। तन्त्रार्थं प्रदर्श्य तस्याध्याससिद्ध्यधीनतयाऽध्यासस्य प्रथमवर्णनीयतां दर्शयति—*तच्चाहं कर्ता सुखी दुःखीति*॥ *ननु* शास्त्रमेव प्रत्यक्षाभिमतमपि बन्धमाभासीकृत्य ब्रह्मात्मैकत्वं प्रतिपादयिष्यति, किं पृथगध्यासवर्णनेनेति ? तत्राह—*तावज्जरद्गवादिवाक्यवदिति*॥ *ननु* शास्त्रार्थसिद्धिरध्यासपराधीना चेत्, स एव तर्ह्यध्यासः सूत्रकारेण मुखतो वर्णनीयः ; तस्य प्राधान्यात्, अन्यथा तत्रातात्पर्यप्रसङ्गादिति, तत्राह—*वक्ष्यति चैतदिति*॥ तर्ह्युपोद्घा-

ऋजुविवरणम्

किं प्रतिपादितमित्युक्तमित्याशङ्क्य पूरयति—*सूत्रभाष्याभ्यामिति*॥ *ननु* प्रदर्शिते तन्त्रार्थेऽध्यासस्य हेतुत्वे वक्तव्ये "तच्चाहं कर्ते" त्यनेन तस्य प्रत्यक्षविरोधप्रतिपादनं क्रियते, तदसंगतम् ; तथा "तच्चाहमि"त्यत्र तच्छब्देनैदम्पर्यं निर्दिश्य तस्य प्रत्यक्षविरोधप्रतिपादनं क्रियत इत्यपि प्रतिभाति, तदपि निष्प्रयोजनमनुपपन्नं च ; प्रत्यक्षस्यैकत्व-शास्त्रैदम्पर्यनिषेधकत्वाभावादित्याशङ्क्य व्याचष्टे—*तन्त्रार्थमिति*॥ अर्थं विरोधप्रतिपादनं हेतुत्वप्रदर्शनार्थम्, ऐदम्पर्यविरोधप्रतिपादनं च प्रतीतिद्वारेणेति प्रदर्शनार्थम्। प्रत्यक्षस्य विरुद्धैकदेशग्राहकत्वेन विरोध इति भावः। *ननु* प्रतीतावप्यध्यासवर्णनस्य कथमुपयोगः ? इति चोदयति—*ननु शास्त्रमेवेति*॥ प्रतिबन्धनिरसनेनोपयोग इति परिहाराभिप्रायः। "जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मद्रकाणि" इति जरद्गवादिवाक्यानां सूत्रकारेणाप्रतिपादितत्वादध्यासस्यैवंभूतत्वं निश्चेतुं न शक्यत इति चोदयति—*ननु शास्त्रार्थसिद्धिरिति*॥ यद्येवमित्यनेन तस्यैव सूत्रस्य प्राथम्यमस्तीति चोदितमिव प्रतिभाति, तदसम्बद्धमित्याशङ्क्याभिप्रायमाह—*तर्ह्युपोद्घातत्वादिति*॥ *एत-

तत्त्वदीपनम्

तन्त्रार्थे निर्दिष्टे तस्याध्यासाधीनत्वं निर्देष्टव्यम्, न तु विरोधप्रदर्शनमुचितमित्याशङ्क्य, तदप्यध्यासोपयोगितयेत्याह—*तन्त्रार्थमिति*॥ शास्त्रविरोधात् सुखाद्यवभासस्याप्रामाण्यमित्याशङ्क्योक्तम्—*प्रत्यक्षेति*॥ टीकायाम् ज्येष्ठत्वात्तस्य प्राबल्यमित्यर्थः। नाहं दुःखीत्यादिविरुद्धप्रत्यक्षविरोधादितरस्याऽऽभासत्वमाशङ्क्य तस्यासंप्रतिपत्तेर्नैतदित्याह—*अबाधितकल्पेनेति*॥ विषयादेरध्यासाधीनत्वेऽपि तद्वर्णनमनर्थकम् ; शास्त्रोत्थबोधादध्यासस्य निवृत्त्या विषयादिसिद्धेः, समारोपितरजतादेरध्यस्ततावोधं विनाऽप्यधिष्ठानसाक्षात्कारान्निवृत्तिरित्याशयवानाह—*ननु शास्त्रमिति*॥ लोकावलोकितपदार्थशक्तियोग्यतानुसारेण पदानामर्थबोधकत्वम्। नच बन्धवैतथ्यबोधं विना प्रत्यग्ब्रह्मणोरेकत्वयोग्यताऽधिगन्तुं शक्या ; तस्मान्मिथ्यात्ववर्णनमुचितमित्यभिप्रायेणाह—*तत्राहेति*॥

"जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मद्रकाणि।
तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रुमायां लशुनस्य कोऽर्घः॥"

इति, जरद्गवादिवाक्यशब्देन गृह्यते। "शङ्खः कदल्यां कदली च भेर्यां भेरी महत्याऽऽविरभूद्विमाने"इत्यादिरादिशब्दार्थः। विशान्तरेणाध्यासस्यासूत्रार्थतां शङ्कते—*ननु शास्त्रेति*॥ तस्य वर्णनमेवोपयोगि, न तु मुखत इत्याशङ्क्याह—*अन्यथेति*॥ "मुखतो वर्णनीय" इत्यत्र किं साक्षाद्वर्णनेन भवितव्यमिति विवक्षितम्, उताऽऽदाविति विकल्प्याऽऽद्यं प्रत्याह—*तत्राहेति*॥ द्वितीयमुत्थापयति—*तर्ह्युपोद्घातत्वादिति*॥ समन्वयाभावे विरोधशङ्कातन्निरासयोर्निर्विषयत्वमुक्तम्, तदनुपपन्नम् ; सत्यत्ववादिनं प्रति मिथ्यात्वसाधनसंभवादित्याशङ्क्य, न परपक्षप्रतिक्षेपमात्राभिप्रायेण

पञ्चपादिका

चैतदविरोधलक्षणे जीवप्रक्रियायां सूत्रकारः—"तद्गुणसारत्वादि"त्यादिना ॥ यद्येवम्, एतदेव प्रथममस्तु, मैवम् ; अर्थविशेषोपपत्तेः । अर्थविशेषे हि समन्वये प्रदर्शिते तद्विरोधाशङ्कायां तन्निराकरणमुपपद्यते, अप्रदर्शिते पुनः समन्वयविशेषे, तद्विरोधाशङ्का तन्निराकरणञ्च निर्विषयं स्यात् । भाष्यकारस्तु तत्सिद्धमेवादिसूत्रेण सामर्थ्यबलेन सूचितं सुखप्रतिपत्त्यर्थं वर्णयतीति न दोषः ॥ *ननु च*—ग्रन्थकरणादिकार्यारम्भे कार्यानुरूपमिष्टदेवतापूजानमस्कारेण बुद्धिसन्निधापिताथवृद्ध्यादिशब्दैर्दध्यादिदर्शनेन वा कृतमङ्गलाः शिष्टाः प्रवर्तन्ते । शिष्टाचारश्च नः प्रमाणम् । प्रसिद्धं च मङ्गलाचरणस्य

पञ्चपादिकाविवरणम्

तत्वात्प्रथममेवाध्यासविषयं सूत्रं प्रणेतव्यमिति चोदयति—*यद्येवमिति* ॥ अर्थनिर्णयप्रधानत्वाद्वादकथालक्षणायां प्रतिपादनप्रक्रियायां प्रवृत्तः सूत्रकारो नोपोद्घातप्रक्रियायामिति परिहरति—*मैवमर्थविशेषोपपत्तेरिति* ॥ तर्हि भाष्यकारेणापि यथासूत्रक्रममेव प्रवर्तितव्यम्, न तु सूत्रक्रममतिलङ्घ्येति ? तत्राह—*भाष्यकारस्त्विति* ॥ *सुखप्रतिपत्त्यर्थम्=प्रवृत्त्यङ्गभावायेत्यर्थः । *एवमपि* न व्याख्येयमिदं भाष्यम् ; शास्त्रादौ मङ्गलाचरणाभावात्, विघ्नोपसंसृष्टतया शास्त्रार्थेऽप्रतिपत्त्यन्यथाप्रतिपत्ति-विप्रतिपत्तिसम्भवात्, शिष्टाचारपरिपालनहीनतया चानाप्तप्रणीतत्वप्रसङ्गादिति चोदयति— *ननु ग्रन्थकरणादिकार्यारम्भ इति* ॥ *ननु* शिष्टानां निष्ठीवनादिप्रवृत्तिः किमन्येनानुसरणीयेति ? नेत्याह—*शिष्टाचारश्च नः प्रमाणमिति* ॥ *आचारः=धर्म इत्येवानुष्ठीयमानं

ऋजुविवरणम्

देव = अध्यासविषयमेवेत्यर्थः । *"अर्थविशेषोपपत्तेरि"ति* ॥ तत्रैवाध्यासप्रतिपादने हेतुरुक्तः । तत्रार्थविशेषस्यादावप्युपपत्तेरहेतुरयम् ; अर्थविशेषनिरूपणात्प्रागपि तन्निराकरणोपपत्तेरित्याशङ्क्याभिप्रायमाह—*अर्थनिर्णयप्रधानत्वादिति* ॥ भाष्यत्वादेवेत्यभिप्रायेण चोदयति—*तर्हीति* ॥ *ननु* कथमादावार्थिकार्थस्य प्रतिपादने सुखप्रतिपत्तिरित्युक्तम् ? इत्याशङ्क्याह—*प्रवृत्त्यङ्गभावायेति*॥ *ननु* च 'ग्रन्थकरणादी'त्यसङ्गतम् ; शिष्टप्रवृत्त्यनुवादमात्रप्रतीतेर्भाष्यस्य व्याख्येयत्वम्, अनन्तरं च तद्व्याख्यानं कर्तव्यम्, तदभावादित्याशङ्क्यानन्तरग्रन्थस्य सङ्गतिमाह—*एवमपीति* ॥ *ननु* मङ्गलाचरणे सति ग्रन्थपरिसमाप्तिः, प्रचयगमनं च, इह तु तेन विनाऽपि तद्दर्शनात् किं मङ्गलाचरणेन ? कथं चाव्याख्येयत्वम् ? इत्याशङ्क्याह—*विघ्नोपसंसृष्टतयेति* ॥ कथमप्रतिपत्तिसम्भवः ? अधिगततत्त्वा हि परप्रतिपत्त्यर्थं ग्रन्थकरणे प्रवर्तन्त इत्याशङ्क्याह—*शिष्टाचारेति* ॥ यथादृष्टार्थवादित्वलक्षणं चाप्तत्वं प्रतिबध्यत इति भावः । *ननु* शिष्टैरशास्त्रमूलमप्यनुष्ठीयते, कथं तैरनुष्ठितत्वेन नमस्कारस्यान्यैरनुष्ठेयत्वं निश्चीयते ? इति चोदयति—*ननु शिष्टानामिति* ॥ शिष्टा अननुष्ठेयमप्यनुतिष्ठन्ति, कथं तदनुष्ठितत्वेनान्येषामप्यनुष्ठेयत्वं निश्चीयत इति चोदिते 'शिष्टाचारः प्रमाणमि"ति परिहारः, सोऽनुपपन्नः ; न ह्यनेन शिष्टैरनुष्ठितपदार्थेषु,एवंभूतस्य सर्वैरनुष्ठेयत्वम्, एवंभूतस्य नेति प्रयोजकनिरूपणं कृतम्, असङ्गतश्च ;

तत्वदीपनम्

सूत्रकृतः प्रवृत्तिः, किन्तु तत्त्वनिर्णयाभिप्रायेणेत्याह—*अर्थनिर्णयेति* ॥ अर्थनिर्णयः प्रधानमुद्देश्यं यस्यासावर्थनिर्णयप्रधानः, तस्य भावस्तत्त्वम् ; तस्मादित्यर्थः । अर्थविशेषे समन्वये दर्शिते सति प्रत्यक्षादिविरोधशङ्कायां मिथ्यात्वप्रतिपादनेन तन्निराकरणोपपत्तिरिति टीकार्थः ॥ संप्रति सूत्राननुसारित्वं भाष्यकृतः शङ्कते—*तर्हीति* ॥ प्रयोजनवशादतिलङ्घनमित्याह—*तत्राहेति* ॥ सुखप्रतिपत्तिर्वा कस्मादित्याशङ्क्याह—*सुखप्रतिपत्त्यर्थमिति* ॥ "युष्मदि"त्यादेरुक्तविधया भाष्यत्वसिद्धौ किं मङ्गलाचरणाऽऽक्षेपसमाधानाभ्याम् ? इत्याशङ्क्य,तयोरप्यव्याख्येयत्वव्याख्येयत्वयोः पर्यवसानात्ते उक्ते इत्याह—*एवमपीति* ॥ मङ्गलाचरणं वा कस्मादित्याशङ्क्याह—*विघ्नेति* ॥ इतोऽपि मङ्गलाचरणं कार्यमित्याह—*शिष्टाचारेति* ॥ शिष्टाचारो नानुष्ठेयः ; अतिप्रसङ्गादिति शङ्कते—*ननु शिष्टानामिति* ॥ किं शिष्टानामाचार-

पञ्चपादिका

विघ्नोपशमनं प्रयोजनम्। महति च निःश्रेयसप्रयोजने ग्रन्थमारभमाणस्य विघ्नबाहुल्यं सम्भाव्यते। प्रसिद्धश्च "श्रेयांसि बहुविघ्नानी"ति। विज्ञायते च—"तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युरि"ति। येषां च यद् न प्रियम्, ते तद् विघ्नन्तीति प्रसिद्धं लोके। तत्कथमुल्लङ्घ्य शिष्टाचारमकृतमङ्गल एव

पञ्चपादिकाविवरणम्

कर्म। *प्रमाणम्=कर्तव्यमित्यर्थः। *ननु* प्रयोजनाभावात् किं मङ्गलाचरणेनेति? नेत्याह—*प्रसिद्धं च मङ्गलाचरणस्येति* ॥ *ननु* अत्र विघ्न एव नास्ति; अल्पारम्भत्वादिति? नेत्याह *महति चेति* ॥ *ननु* सम्भावनामात्रान्न प्रवृत्तिर्विघ्नशान्तये, किन्तु निश्चयादित्यत्राह—*प्रसिद्धं चेति* ॥ *ननु* लोकप्रसिद्धिर्निर्मूला न विघ्ननिश्चयहेतुः, इत्यत आह—*विज्ञायते चेति* ॥ उपसंहरति—*तत्कथमिति* ॥ "सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्। येषां हृदिस्थो भगवान्मङ्गलायतनं हरिः"इति स्मृतेः शिष्टाचारप्रतिपालनाय विघ्नोपशान्तये च विशिष्टदेवतातत्त्वानुस्मरणलक्षणं मङ्गलाचरणं कृतमित्याह—*अत्रोच्यत इति* ॥ किं तत्र प्रमाणमिति?

ऋजुविवरणम्

आचारप्रामाण्यविवादाभावात्, अनुपपन्नश्च; शिष्टाचारप्रामाण्यस्य व्यभिचारादित्याशङ्क्याभिप्रायमाह—*आचारो धर्म इत्येवेति* ॥ आचर्यत इत्याचार इति कर्मव्युत्पत्तिः प्रदर्शिता, प्रमीयते कर्तव्यतयेति चात्राचरणमाचार इति भावव्युत्पत्त्याऽऽचारप्रामाण्यमप्युक्तमेव प्रतीयते; तथापि चोद्यस्य कर्मप्रधानत्वादेवं व्याख्या कृता, नत्वनभिप्रेतत्वेनेति मन्तव्यम्। धर्मत्वेन यदनुतिष्ठन्ति, तदन्यैरनुष्ठेयमिति प्रयोजकमुक्तम्। अत्र मङ्गलाचरणाभावादव्याख्येयत्वमिति चोदिते, 'अत्रोच्यते' इत्युपक्रम्य प्रतीकग्रहणेन भाष्यव्याख्यानं कृतम्; तदसङ्गतम्, न च तावन्मात्रेणैव परिहारः, तत्र कस्याप्यर्थस्यानुक्तत्वादित्याशङ्क्याभिप्रायमाह—*सर्वदेति* ॥ भाष्यप्रतीकग्रहणस्यासङ्गतिं परिहरति—*किं तत्रेति* ॥ साकाङ्क्षत्वात्-प्रकृतचोद्यस्यापरिहाराच्च पूरयति—*प्रमाणमिति*॥ प्रकृतोपयोगनिरपेक्षप्रतिज्ञावाचनिकत्वासम्भवेन पक्षान्तरम्—*मङ्गलाचरणमिति वेति* ॥ भाष्ये चादौ युष्मच्छब्दप्रयोगात्तत्परत्वमेवेत्यभिप्रायेण चोदयति—*कथमिदमिति* ॥ *सर्वोप-

तत्त्वदीपनम्

मात्रस्यानुष्ठेयत्वम्, उत तदविरुद्धस्य? तत्राऽऽद्यस्त्वङ्गीक्रियते, द्वितीयस्त्वसंगत इत्याह—*नेत्याहेति* ॥ अतिप्रसङ्गस्य कः समाधिरित्याशङ्क्य, आचारं विशिनष्टि—*आचार इति* ॥ धर्मबुद्ध्याऽनुष्ठीयमानस्य शिष्टाचारस्यानुसरणीयत्वम्, निष्ठीवनादेश्चानीदृक्त्वादननुष्ठेयत्वम्। नच तस्य प्रमाणत्वाभावः; मूलश्रुतिस्मृत्यनुमापकत्वात्। तथाचोक्तम्—"आचाराच्च स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पन"मिति। प्रामाण्यप्रतिपादनफलमाह—*कर्तव्यमिति*। मङ्गलाचरणेनापि क्वचिदपरिसमाप्तिदर्शनात् क्वचिन्मङ्गलाचरणमन्तरेणापि परिसमाप्तिदृष्टेस्तदप्रयोजकमिति शङ्कते—*ननु प्रयोजनेति* ॥ यत्रापरिसमाप्तिः, तत्र प्रतिबन्धबाहुल्यम्, यत्र मङ्गलाचरणं विनापि परिसमाप्तिः, तत्र ग्रन्थाद्बहिर्मङ्गलाचरणं कृतमिति निश्चीयत इत्याशयेनाह—*नेत्याहेति* ॥ मङ्गलाचरणस्यान्यत्र फलवत्त्वेऽपि नात्रानुष्ठेयत्वम्; फलासंभवादिति शङ्कते—*नन्वत्रेति* ॥ ग्रन्थकरणस्य ख्यात्यादितुच्छफलकत्वान्न विघ्नसंभव इत्यर्थः। मननं ब्रह्मज्ञानसाधनत्वेन प्रसिद्धम्; तथा चैहिकादिसकलभोगव्यावृत्तचेतस्कस्य ग्रन्थकरणं मननम्। तत्र च विघ्नः संभावित इत्यभिप्रायेणाह—*नेत्याहेति* ॥ प्रवृत्तेर्निश्चयपूर्वकत्वादत्र विघ्नानिश्चयान्न तन्निबर्हणार्था प्रवृत्तिरिति शङ्कते—*ननु संभावनेति* ॥ कृष्यादाविव संभावनयाऽपि प्रवृत्तिः स्यादित्याशङ्क्य, दृष्टादृष्टफलत्वेन वैषम्यान्नैतदित्याह—*किन्त्विति* ॥ लोकप्रसिद्धेर्देहात्मप्रसिद्धिवन्निर्मूलत्वान्न निश्चयत्वमिति शङ्कते—*ननु लोकेति* ॥ निर्मूलत्वमसिद्धमित्याह—*अत आहेति* ॥ ब्रह्मज्ञाने सति देवपशुत्वं निवर्तते यस्मात्, तस्मादेषां देवानां न प्रियमित्यर्थः। "अत्रोच्यत"इत्यत्र मङ्गलाचरणस्यासमर्थनात् प्रश्नाननुसारित्वं प्रतिवचनस्येत्याशङ्क्याह—*सर्वदेति* ॥ परात्मगततत्त्वानुस्मरणस्याप्रत्यक्षत्वान्मानान्तराभावाच्च कृतमङ्गलत्वमसिद्धमित्याह—*किं तत्रेति* ॥ प्रमाणाभावोऽसिद्ध इत्याह—*अत आहेति* ॥

पञ्चपादिका

विस्रब्धं भाष्यकारः प्रववृते ? *अत्रोच्यते* :—"युष्मदस्मदि"त्यादि "तद्धर्माणामपि सुतरामितरेतर-भावानुपपत्तिरि"त्यन्तमेव भाष्यम्। अस्य चायमर्थः—सर्वोपप्लवरहितो विज्ञानघनः प्रत्यगर्थ इति। तत्कथञ्चन परमार्थत एवम्भूते वस्तुनि रूपान्तरवदवभासो मिथ्येति कथयितुम्। तदन्यपरादेव भाष्यवाक्यान्निरस्तसमस्तोपप्लवं चैतन्यैकतानमात्मानं प्रतिपद्यमानस्य कुतो विघ्नोपप्लवसम्भवः? तस्मादग्रणीः शिष्टाचारपरिपालने भगवान् भाष्यकारः॥

पञ्चपादिकाविवरणम्

अत आह—*युष्मदस्मदित्यादीति*॥ इत्यन्तमेव भाष्यं प्रमाणमित्यर्थः, मङ्गलाचरणमिति वा। कथमिदं विशिष्टदेवतानुस्मरणं गमयतीति? तत्राह—*अस्य चायमर्थ इति*॥ *ननु* नेह विशुद्धात्मतत्त्वदेवताऽनुस्मर्यते, किन्त्वध्यासाभावो वर्ण्यत इति; *सत्यम्* तादर्थ्येन तत्त्वमप्यनुस्मर्यत इत्याह—*तत्कथंचनेति*॥ *ननु* अन्यपरत्वाद्देवतानुस्मृतिरविवक्षिता न कार्यकरीति, नेत्याह—*तदन्यपरादेवेति*॥ अन्यार्थमपि देवतानुस्मरणं स्वभावादेव विघ्नोपप्लवं धक्ष्यति, धूमार्थ इव वह्निस्तृणादिकमित्यभिप्रायः। व्याख्येयत्वं प्रतिपादितमुपसंहरति—*तस्मादिति*॥ अन्यार्थप्रवृत्तेन "युष्मदस्मदि"त्यादिपदद्वयमर्थाद्व्याख्यातम्॥

ऋजुविवरणम्

प्लवेति*॥ युष्मदित्यस्य व्याख्या—*विज्ञानघन इति*॥ अनेनास्मदिति व्याख्यातम्। अतद्व्यावृत्त्यैव तन्निरूपणमिति दर्शयितुं युष्मच्छब्दप्रयोग इति परिहाराभिप्रायः। अव्याख्येयत्वेनोपक्रमस्याग्रणीत्वेनोपसंहारोऽसम्बद्धः, इत्याशङ्कयावतारयति—*व्याख्येयत्वं प्रतिपादितमिति*॥ कथं टीकाकारेण किञ्चिद्विहाय प्रतीकग्रहणं कृतमित्याशङ्क्याभिप्रायमाह—*अन्यार्थप्रवृत्तेनेति*॥

तत्त्वदीपनम्

टीकायां भाष्यत्वमेव समर्थ्यते, न प्रमाणमित्याशङ्क्यापेक्षितं पूरयति—*इत्यन्तमिति*॥ 'युष्मदि'त्यादिभाष्यं मङ्गलाचरणे प्रमाणमित्युक्तम्, संप्रति वृद्ध्यादिशब्दोच्चारणवत्स्वयमेव मङ्गलाचरणमित्याह—*मङ्गलाचरणं वेति*॥ प्रमाणत्वमाक्षिपति—*कथमिति*॥ तत्त्वानुस्मरणं किं पदार्थः? उत वाक्यार्थः? नाऽऽद्यः; तद्वाचकपदश्रवणाभावात्, नान्त्यः; संसृष्टपदार्थानामेव वाक्यार्थत्वादित्यभिसन्धिः। उच्चारणानुपपत्त्या भाष्यं मङ्गलाचरणगमकमित्याह—*तत्राहेति*॥ देवतानुस्मरणमङ्गीकृत्य तस्य मङ्गलाचरणपरत्वाभावान्न विघ्ननिवर्तकत्वमिति गूढाभिसन्धिः शङ्कते—*ननु नेहेति*॥ *अनुस्मर्यत इति*॥ अत्र स्वातन्त्र्येणेति शेषः। यथाश्रुतमादाय समाधत्ते—*सत्यमिति*॥ *तत्कथंचनेत्यस्यैषोऽर्थः*—परमार्थत एवंभूते निरस्तसमस्तोपप्लवे तद्विपरीतरूपप्रतिभासः कथंचन मिथ्येति कथयितुं तद्भाष्यमिति संबन्धः। *कथंचनेति*। स्वरूपेण संसृष्टरूपेण च मिथ्येत्यर्थः। कथंचन मिथ्येति वा संबन्धः। चशब्दाद्रूपान्तरं च मिथ्येत्यर्थः। गूढाभिसन्धिं विवृणोति—*नन्वन्यपरत्वादिति*॥ अन्यपरस्यापि विघ्ननिवर्तकत्वं स्यादित्याह—*नेत्याहेति*॥ तस्मात् परमार्थभूताद् वस्तुनोऽन्योऽध्यासाभावः, तदन्यस्तत्परादिति टीकार्थः। अन्यपरस्य कथमन्यार्थत्वम्? अन्यत्र तथाऽदृष्टेरित्याशङ्क्याह—*अन्यार्थमिति*॥ न चात्र प्रमाणाभावः;

"हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः। अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः।"

इति स्मरणादित्यर्थः। व्याख्येयत्वस्यानुपसंहरणे को हेतुः? इत्याशङ्क्य, हेतूपसंहरणाद्धेतुमदुपसंहरणं विवक्षितमित्याह—*व्याख्येयत्वमिति*॥ "युष्मदि"त्यादि कस्मादुपेक्षितं टीकाकृता? तत्राह—*अन्यार्थेति*॥ मङ्गलाचरणसमर्थनप्रवृत्तेनेति यावत्। *पदद्वयमिति*॥ "युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोरिति" प्रत्यगभिधायकशब्दव्याख्यानेऽपि, इतरस्याव्याख्यातत्वात् कथं 'युष्मदि'त्यादि व्याख्यातमित्युक्तम्? तत्राह—*अर्थादिति*॥ "सर्वोपप्लवरहित" इत्युक्त्या तत्प्रतियोगिविषयत्वेनेतरदपि व्याख्यातमित्यर्थः॥

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतर-

भामती

तार्था एवोपनिषद इति युक्तमुत्पश्याम इत्याशयवानाशङ्क्य परिहरति—*युष्मदस्मत्प्रत्ययगोचरयोरिति* ॥

ऋजुप्रकाशिका

आत्मा स्यात्। नच—अहंकारातिरिक्त एवात्मा, स एव ब्रह्माभिन्न इति—वाच्यम्; तर्हि ब्रह्माभिन्नस्य आत्मनः कर्तृत्व-भोक्तृत्वाद्ययोगेन 'अहं कर्ता' 'अहं भोक्ता' इत्यादिनाऽऽत्मनि कर्तृत्वादिप्रतिभासो न स्यात्। नच—आत्मनोऽहंकारतादात्म्याध्यासेनात्मन्यहंकारगतकर्तृत्व-भोक्तृत्वादिकमध्यस्ततया प्रतीयते, अहंकारे च आत्मगतचित्त्वादिकं तथा प्रतीयते, न वास्तवं कर्तृत्वादिकमात्मन्यस्तीति—वाच्यम्; अहंकारात्मनोः परस्परं विरुद्धधर्मवत्त्वेन परस्परतादात्म्याध्यासासंभवात् तदुभयगतानां धर्माणामपीतरेतरयोरन्योन्यस्मिन्नध्यासासंभवात्, इत्यध्यासाक्षेपशङ्कापरत्वेन *युष्मदस्मदित्यादिभाष्यम्*, तत्परिहारत्वेन *तथापीत्यादिभाष्यं चावतारयति—*इत्याशयवानाशङ्क्य परिहरतीति* ॥ "युक्तमुत्पश्याम" इत्यभिधानाद् युष्मदित्यादेः

पञ्चपादिका

विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायामिति ॥ कोऽयं

पञ्चपादिकाविवरणम्

उत्तरपदं व्याख्यातुं भाष्यमाददाति—*विषयविषयिणोरित्यादिना* ॥ तत्र द्विविधो विरोधः, द्विविधा

ऋजुविवरणम्

युष्मदस्मदित्यात्मानात्मनिर्देश आत्मनः स्वरूपेण जिज्ञास्यत्वं निषेद्धुं जडस्याध्यस्तत्वनिषेधार्थं च। तत्राजिज्ञास्यत्वे प्रत्ययगोचरयोरिति हेतुः; असन्देहादित्यर्थः। अभेदयोग्ये वस्तुन्यध्यासः, तदत्र नास्तीत्याह—*विषयविषयिणोरिति* ॥ यद्वा—विशेष्यसमर्थकत्वेन व्याख्येयं 'विषय' इत्यादि प्रतीकं पर्यालोच्य, 'गोचरयोरि'त्यन्तमेव पदद्वयं कथञ्चिदर्थद्वयाभिप्रायेण। यद्वा—उत्तरत्र द्वितीयपदव्याख्यानाभावात्पदद्वयमित्यनेन तस्यापि ग्रहणम्। *ननु* 'विषयविषयिणोरि'त्यस्यापि व्याख्यातत्वे तेन प्रतीकग्रहणं यत् कृतम्, तन्न युक्तमित्याशङ्क्याभिप्रायमाह—*उत्तरपदमिति* ॥ नच—उत्तरपदस्यापि व्याख्यातत्वात्पुनः प्रतीकग्रहणमयुक्तमिति—*वाच्यम्*; पदव्याख्यानार्थत्वादिति 'पद'ग्रहणेन द्योतितम्। नच—तमःशब्देनैव प्रतीकग्रहणं कर्तव्यमिति—युक्तम्; आदावनुचितशब्दत्वादिति भावः ॥ यद्यप्यादत्ते इति प्रयोक्तव्यम्; आत्मनेपदित्वाद्धातोः,तथापि—"आङो दोऽनास्यविहरणे" इत्यास्यविहरणविवक्षायां परस्मैपदित्वस्याप्यङ्गीकारादत्रापि भाष्ये ग्रहणार्थमास्यविहरणं करोतीत्यर्थः। *ननु* "कोऽयं विरोध"इति प्रश्नो नोपपद्यते; अनेकप्रकाराभावाद्विरोधस्य, तथा

तत्त्वदीपनम्

उत्तरपदम्—*तमःप्रकाशवद्विरुद्धस्वभावयोरिति* ॥ यदीदं व्याचिख्यासितम्, तर्हि "विषयविषयिणोरि"ति कस्मादुपात्तमिति चेत; आत्मानात्मनोः सहावस्थानस्योपलभ्यमानत्वात्तादात्म्यायोग्यत्वं विरोध इति प्रतिपादयितुमिति ब्रूमः। *व्याख्यातमिति* ॥ सर्वोपप्लवरहित इत्यत्रेत्यर्थः। *आददातीति* ॥ आङ्पूर्वाद्नास्यविहरणे वर्तमानाद्ददातेरात्मनेपदं भवतीत्येवमर्थात्—'आङो दोऽनास्यविहरणे" इति सूत्रादादत्त इति प्रयोगेण भाव्यमिति चेत्, नैतदस्ति; ङिद्विशिष्टस्याऽऽकारस्य ग्रहणमङिद्विशिष्टादाकारादुत्तरस्य ददातेरात्मनेपदनियमाभावज्ञापनाय। अत्र च ङिद्विशिष्टस्याऽऽकारस्याग्रहणाद् "भिक्षामाददाती"तिवदाददातीति प्रयोगः साधुरिति द्रष्टव्यम।

प्रदीपः

निधाय, प्रथमकारणाभावादपि नाध्यासः संभवतीति सूचयन् विशेषिते आत्मान्तःकरणे निर्दिशति—*युष्मदस्मत्प्रत्यय-

भामती

अत्र च "युष्मदस्मदि"त्यादि"मिथ्या भवितुं युक्तमि"त्यन्तः शङ्काग्रन्थः । 'तथापी'त्यादिः परिहारग्रन्थः । 'तथापी'त्यभिधानाच्छङ्कायां यद्यपीति पठितव्यम् । "इदमस्मत्प्रत्ययगोचरयोरि"ति वक्तव्ये युष्मद्ग्रहण-

ऋजुप्रकाशिका

सिद्धान्तशङ्कात्वभ्रमं वारयति––*अत्र चेति* । 'तथापी'त्यभिधानात् 'तथापी'त्यस्य परिहारग्रन्थत्वमित्याह––*तथापीत्यादिरिति* ॥ *ननु* शङ्कासूचकपदाभावाद् "युष्मदस्मदि"त्यादेः शङ्कात्वं न स्फुरति, अतस्तत्स्फोरणायाह–*तथापीत्यभिधानादिति* ॥ परिहारग्रन्थ इति शेषः । *शङ्कायाम्="युष्मदस्मदि"त्यादिशङ्कायाम् । *यद्यपीति पठितव्यमिति* ॥ "युष्मदस्मदि"त्यतः प्रागिति शेषः । भाष्ये—*युष्मदिति* । *युष्मत्प्रत्ययगोचरः=अहंकारदेहादिः, *अस्मत्प्रत्ययगोचरः=आत्मा, तयोरित्यर्थः । *ननु* अहंकारदेहादेरिदमर्थत्वेन युष्मदर्थत्वाभावादभिमुखपुरुषवाचियुष्मच्छब्दः कथमहंकारदेहादौ प्रयुक्त इति? अत आह *इदमस्मदिति* ॥ युष्मदस्मद्ग्रहणे यथाऽत्यन्तभेदः स्फुरति, न तथा 'इदमस्मत्प्रत्ययगोचरयोः'

तत्त्वदीपनम्

साङ्गाध्ययनानन्तरं "श्रोतव्य" इत्यादिवाक्यादात्मतत्त्वसाक्षात्काराय विचारकर्तव्यताप्रतिपत्तौ संदेहे च तद्व्युदासार्थमथात इति प्रवृत्तम् । तत्रायं विचारः कर्तव्य उत नेति विषयादिसंभवासंभवाभ्यां संदेहे, नेति तावत् प्राप्तम् ; विषयाद्यसंभवात । नच—प्रत्यग्ब्रह्मैक्यानर्थनिवृत्त्यादेः शास्त्रात्प्रतिपत्तेरसंभवोऽसिद्ध इति—शङ्क्यम् ; कर्तृत्वादिबन्धस्य परमार्थत्वेन तदनुपपत्तेः । नच—परमार्थत्वमसिद्धमध्यस्तत्वादिति—वाच्यम् ; पूर्वानुभवसंस्कार-सादृश्यविवेकाग्रहरूपाध्यासव्यापकाभावेनाध्यासानुपपत्तेरिति प्रतिपादयितुं युष्मदस्मदित्यादिकमवतारयामास । तत्र परमार्थस्थल ऐक्यतादात्म्याभावेन तदनुभवसंस्काराभावं दर्शयितुमैक्यायोग्यत्वमाह—*युष्मदस्मदिति* ॥ युष्मच्चास्मच युष्मदस्मदी, तावेव प्रत्ययौ गोचरौ चेति युष्मदस्मत्प्रत्ययगोचरौ, तयोरिति विग्रहः । "प्रत्ययोत्तरपदयोश्चे"ति सूत्रेण युष्मदस्मदोर्मपर्यन्तस्य त्व-मादेशविधानात् 'त्वन्मत्प्रत्ययगोचरयोरि'ति निर्देशेन भवितव्यम् ; त्वत्पुत्रो मत्पुत्र इति यथेति चेत्, नैतदस्ति ; "त्व-मावेकवचने" इत्येकवचनाधिकारात्, युष्मदस्मदोश्चैकार्थवाचित्वस्याविवक्षितत्वात्, अस्मदर्थेऽप्यौपाधिकभेदस्य विद्यमानत्वात् त्व-मादेशौ न भवत इति द्रष्टव्यम् । परागूरूपोऽहंकारो युष्मदर्थः, प्रत्यक्चैतन्यमस्मदर्थः, इति स्वभावतो विरोधो दर्शितः । प्रतीतिरूपः प्रत्यक्, प्रतीतिविषय इतर इति प्रतीतितो विरोधः । अहंकारादिप्रविलापनेन—'अहं ब्रह्मे'ति व्यवह्रियते प्रत्यक्, अद्वैतानन्दप्रच्छादनेन कर्त्रादिरूपेण व्यवह्रियत इतर इति व्यवहारतो विरोधः ॥

तादात्म्यायोग्यत्वमाह—*विषयविषयिणोरिति* ॥ तदेतदभिप्रेत्योक्तम्—*सर्वोपप्लवरहितो विज्ञानघनः

वार्तिकम्

दृश्ययोस्तादात्म्यासिद्धेस्तदन्यथानुपपत्तेरभावात् । * कथं * पुनस्तयोस्तादात्म्यासिद्धिरिति चेत्, तत्राह—* "युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरिति * ॥ यद्यपि युष्मच्छब्दः स्वबोध्यपुरोवस्थितचेतने दृष्टः ; तथापि प्रकृते तदर्थासम्भवात्, 'युषि हिंसायामि'ति स्मरणात्, "युष्यसिभ्यां मदिक्"

भाष्यभावप्रकाशिका

प्रथमसूत्रेण शास्त्रारम्भसिद्धयेऽर्थात् सूचयितुं प्रतिपादयितुं च तत्प्रत्यनीकस्य बन्धस्याध्यासात्मकत्वं लक्षण-सम्भावना-सद्भाव-प्रमाणैः सिषाधयिषुः प्रथमं तावदध्यासमाक्षिप्य "युष्मदस्मदि"त्यादिना "मिथ्येति

भामती

मत्यन्तभेदोपलक्षणार्थम् ; यथा ह्यहंकारप्रतियोगी त्वंकारः, नैवमिदंकारः ; 'एते वयम्' 'इमे वयमास्महे' इति

ऋजुप्रकाशिका

इत्यत्र ; त्वंकारस्याहंकारप्रतियोगित्ववद् इदंकारस्याहंकारप्रतियोगित्वाभावाद् 'एते वयम्' 'इमे वयम्' इति सामानाधिकरण्यप्रयोगवत्, 'त्वमहमि'ति सामानाधिकरण्यप्रयोगादर्शनादित्याशयवानाह—*यथा ह्यहंकार इत्यादिना* ॥ *ननु* तर्हि "युष्मदस्मत्प्रत्ययगोचरयोरि"त्यत्रापि नात्यन्तभेदप्रतीतिः ; त्वमहमिति सामानाधिकरण्यप्रत्ययस्यापि क्वचिद्दर्शनेन त्वंकाराहंकारयोरपि प्रतियोग्यनुयोगिभावायोगात् । नच—'त्वमहमि'ति सामानाधिकरण्यं गौणम्, अतस्तन्नात्यन्तभेदतिरोधायकमिति—वाच्यम् ; तर्हि 'इदमस्मत्प्रत्ययगोचरयोः' इत्येवोच्यताम्, तत्रापि प्रत्यक्पराग्भावेनात्यन्तभेदप्रतीतिसंभवात् । नच—'त्वमहमि'ति त्वंकाराहंकारसामानाधिकरण्यवद् 'एते वयम्' 'इमे वयम्' इतीदंकाराहंकारसामानाधिकरण्यस्यापि गौणत्वेनात्यन्तभेदाव्याघातकत्वमिति —वाच्यम् ; 'एते वयम्' 'अमी वयम्' 'अयमहमस्मि' 'अमी दाराः' 'कन्येयं कुलजीवितम्' इत्यादिनेदंकार-

पञ्चपादिकाविवरणम्

चेतरेतरभावानुपपत्तिः ; कथम् ? द्वयोः पदार्थयोरेकदेशकालावस्थानसामर्थ्याभावः पदार्थधर्मो विरोधः ;

ऋजुविवरणम्

"कोऽयं विरोध" इत्यादिप्रश्नानन्तरं तन्निरूपणं तत्कार्यनिरूपणं च युक्तम्, किं विरोधान्तरादिनिराकरणेन ? अथ तन्निराकरणेन विना नाभिलषितविरोधादिसिद्धिः, तर्हि विरोधान्तरादिनिराकरणेनापि भवितव्यमित्याशङ्क्याह— *तत्र द्विविध इति* ॥ *ननु* कथं विरोधद्वैविध्यम् ? न तावद् व्यक्त्यभिप्रायेण ; आनन्त्यात्, नाप्यवान्तरजात्यभिप्रायेण ; तदयोगात्, नापि निरूपकाभिप्रायेण ; निरूपकान्तराणामपि सम्भवात्, तथा तयोः परस्परं पदार्थाच्च भेदानिरूपणाद्धर्मिसाम्ये हेत्वव्यतिरेकोऽपि स्यादित्याक्षिपति—*कथमिति* ॥ तत्र निरूपकद्वैविध्याद् द्वैविध्यमितरेषां चात्रैवान्तर्भाव इत्यभिप्रायेणाह—*द्वयोरित्यादिना* ॥ विरोधस्य हेतुत्वयोग्यतां दर्शयति—*पदार्थधर्म इति* ॥ इतरेतरभावानुपपत्तेर्विरोधहेतुना साध्यत्वं निरूपकभेदाद् भेदं च दर्शयति—*तन्निमित्त इति* ॥ *ननु* विरोधविषयप्रश्नोत्तरानन्तरमितरेतराभावविषयप्रश्नोत्तरेण भवितव्यम्, किं युगपत् ? इत्याशङ्क्य, विरोधप्रश्नस्य तावत्पर्यन्तस्यैव फलवत्त्वेन तदन्त-

तत्त्वदीपनम्

प्रत्यगर्थ इतीति* ॥ "कोऽयं विरोधः ? इत्यत्र किंशब्दः प्रश्नार्थः, आक्षेपार्थो वा ? नाऽऽद्यः ; विरोधशब्दस्य प्रसिद्धार्थत्वात् ; नान्त्यः ; चिदचितोर्विरोधस्य प्रसिद्धत्वादेव, ततश्चायं ग्रन्थोऽसङ्गत इत्याशङ्क्य, विरोधशब्दस्यानेकार्थत्वाद् व्यक्तिविशेषजिज्ञासया प्रश्नो घटत इत्याह—* तत्रेति * ॥ लोक इति यावत् । तादात्म्यलक्षणेतरेतरभावानुपपत्तेरुच्यमानत्वात्तद्योग्यत्वं विरोध इति निश्चीयत इत्याशङ्क्य सापि संदिग्धेत्याह—*द्विविधेति* ॥ इतरस्मिन् सतीतरस्य भावः सहावस्थानम्, इतरस्येतरभावस्तादात्म्यम्, इतरेतरभावभेदात्तदनुपपत्तेर्भेद इति द्रष्टव्यम् । प्रश्नपूर्वकं द्वैविध्यं दर्शयति— *कथमित्यादिना* ॥ सामर्थ्याभावे को हेतुरिति न द्रष्टव्यम् ; स्वभावत्वादित्याह—*पदार्थेति* ॥ प्रश्नोत्तरं विहाय

वार्तिकम्

इति स्मरणाच्च हिंसाकर्मणो मदिक्प्रत्ययान्तस्य युष्मदिति रूपनिष्पत्तेर्योगेन हिंस्यमानं पराग्वस्तु युष्मदित्युच्यते । तथाच श्रुतिः—"पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन्" इति । पराचा विषयस्य भोग्यत्वेन हिंस्यता । अत एव तद्भोग्यत्वप्रदर्शनार्थं युष्मदस्मत्प्रत्ययगोचरत्वमभिहितम् । *अस्मत्प्रत्ययः=अहमिति प्रतीतिः, अन्तःकरणं वा । अहमोऽन्तःकरणस्य प्रत्ययाः, कामादयो वा ; तेषां

भामती

बहुलं प्रयोगदर्शनादिति ॥ चित्स्वभाव आत्मा विषयी, जडस्वभावा बुद्धीन्द्रियदेहादयो विषयाः । एते हि

ऋजुप्रकाशिका

सामानाधिकरण्यप्रयोगबाहुल्येन तत्सामानाधिकरण्ये गौणत्वं स्फुटम्, इति तत्सामानाधिकरण्यमत्यन्तभेदतिरोधायकमेव, तदिदमाह—*बहुलं प्रयोगदर्शनादिति* ॥ 'त्वमहमि'ति सामानाधिकरण्यप्रयोगस्य विरलत्वेन तत्सामानाधिकरण्ये गौणत्वं न स्फुटम्, इति तत्सामानाधिकरण्यं नात्यन्तभेदतिरोधायकम् । तथाचात्यन्तभेदप्रतीतये *''युष्मदस्मत्प्रत्ययगोचरयोः''* इत्येव वक्तुमुचितम् । नच—'एते वयम्' इत्यादिसामानाधिकरण्ये 'त्वम् अहम्' इति सामानाधिकरण्ये च गौणत्वाविशेषे प्रयोगबाहुल्याबाहुल्याभ्यां गौणत्वस्य कथमस्फुटत्वस्फुटत्वे इति—वाच्यम् ; 'शुक्लो घटः' इत्यादौ शुक्लवति लक्षणा, चक्रवाके रथाङ्गपदप्रयोगे रथाङ्गपदस्य चक्रवाके लक्षणा स्वीकृता, एवं लक्षणायामुभयत्र समानायामपि शुक्लवति शुक्लपदलक्षणाया निरूढत्वम्, चक्रवाके रथाङ्गपदलक्षणायाः सांप्रतिकत्वं च यथाक्रमं यथा प्रयोगबाहुल्याबाहुल्याभ्यां स्वीकृतम्, तथा क्वचिद् गौणत्वेऽस्फुटत्वम्, क्वचिद् गौणत्वे स्फुटत्वञ्च यथाक्रमं प्रयोगबाहुल्याबाहुल्याभ्यां स्वीकृतमित्यदोषात् । भाष्ये—विषयविषयिणोरिति* ॥ अत्रापि तयोर्भेदस्फोरणायार्थमाह—*चित्स्वभाव इति* ॥ 'बुद्धीन्द्रिये'त्यतः' प्राग् अहंकारेति शेषः । तं विषिण्वन्तीति विषयाः इति विषयशब्दव्युत्पत्तिः । कं विषिण्वन्ति ? इत्यपेक्षायां

पञ्चपादिका

विरोधः ? कीदृशो वा इतरेतरभावोऽभिप्रेतः ? यस्यानुपपत्तेः—'तमःप्रकाशवदि'ति निदर्शनम् । यदि

पञ्चपादिकाविवरणम्

तन्निमित्तोऽवस्थानलक्षणकार्याभाव इतरेतरभावानुपपत्तिरित्येकः स्कन्धः । अपरस्तु पदार्थयोरितरेतरात्मतासामर्थ्याभावः पदार्थधर्मो विरोधः ; तन्निमित्त इतरेतरात्मतालक्षणकार्याभावानुपपत्तिरित्यतो द्वैविध्यात्पृच्छति—*कोऽयं विरोध इत्यादिना* ॥ तत्र प्रथमं पक्षं दूषयति—*यदि तावदित्यादिना सहावस्थानमुक्तमित्यन्तेन ग्रन्थेन* ॥ तत्र तमःप्रकाशशब्दाभ्यां छायाऽऽतप-शीतोष्ण-ग्रहणमङ्गीकृत्य

ऋजुविवरणम्

स्यैव विकल्पैककोटित्वमित्यभिप्रायेणाह—*इत्येकः स्कन्ध इति* ॥ यद्वा—''कोऽयं विरोध''इति प्रश्नः, आक्षेपो वा? नाऽऽद्यः ; स्वरूपनिरूपणादर्शनादन्यनिराकरणस्यासङ्गतत्वप्रसङ्गात्, नाप्याक्षेपः ; तत्रापि स्वरूपनिरूपणं विहायान्यनिराकरणं न संगच्छते । *ननु*तद् विशेषनिराकरणमाक्षेपनिर्वाहार्थम्, *मैवम्* ;'यदी'ति पक्षपरिग्रह इतरनिराकरणाप्रतीतेः, स्वरूपनिरूपणमप्ययुक्तम् ; आक्षेपासमाप्तेः, न चानन्तरग्रन्थेऽपि तन्निराकरणमिति युक्तम् ; ग्रन्थानार्जवात्, परिहारान्तरादर्शनात्, न चान्यतरपक्षदूषणार्थमेव प्रश्नः ; अगृहीते विशेषे तस्याप्ययुक्तत्वात्, नापि द्वैधं विरोधे ; एवमितरेतरभावेऽपि, तस्माद्युक्त इत्याशङ्क्याह—*द्विविध इति* ॥ द्वैधं कथञ्चिद्विरोधे भवतु, नेतरेतरभावे ; तादात्म्यरूपत्वात्तस्य । न हि विरोधभेदाद् भेदः, तेन विरोधानुयायित्वमिव कृत्वा विकल्पो न युक्तः । स्वभावत्वं च भाष्यकारेणोक्तम्, तत् कथं द्वैधम् ?

तत्त्वदीपनम्

पक्षान्तरनिरसनमयुक्तमित्याशङ्क्योत्तरं पक्षं कक्षीकर्तुमाद्यं प्रतिक्षिपतीत्याह—*तत्र प्रथममिति* ॥ सहानवस्थानं लक्षणं गमकं यस्यायोग्यतालक्षणविरोधस्य स तथा । तमःप्रकाशयोरेवोदाहृतत्वात्तत्रैव सहानवस्थानप्रदर्शनमुचितम्, न तु छायादिष्वित्याशङ्क्य, तमःप्रकाशनिदर्शने दूषिते, यदि लक्षणया लक्षितलक्षणया वा छायाऽऽतपादिनिदर्शनमादद्यात्, तदा तत्रापि दोषतुल्यतोच्यत इत्याशयवानाह—*तत्रेत्यादिना* ॥ पूर्वस्यापि सिद्धान्तत्वात्—'उच्यत'इति सिद्धान्तोप-

पञ्चपादिका

तावत् सहानवस्थानलक्षणो विरोधः, ततः प्रकाशभावे तमसो भावानुपपत्तिः, तदसत्; दृश्यते हि मन्दप्रदीपे वेश्मन्यस्पष्टं रूपदर्शनम्, इतरत्र च स्पष्टम्। तेन ज्ञायते मन्दप्रदीपे वेश्मनि तमसोऽपीषदनुवृत्तिरिति; तथा छायायामप्यौष्ण्यं तारतम्येनोपलभ्यमानमातपस्यापि तत्रावस्थानं सूचयति। एतेन शीतोष्णयोरपि युगपदुपलब्धेः सहावस्थानमुक्तं वेदितव्यम्। *उच्यते*—परस्परानात्मतालक्षणो विरोधः, न जातिव्यक्त्योरिव परमार्थतः परस्परसम्भेदः सम्भवतीत्यर्थः; तेन इतरेतरभावस्य इतरेतरसम्भेदा-

पञ्चपादिकाविवरणम्

तत्रापि सहावस्थानमुक्तं वेदितव्यम्। इदानीं द्वितीयं पक्षमवलम्बते—*उच्यते परस्परात्मतालक्षणो विरोध इत्यादिना*॥ *ननु* तमो नामाऽऽलोकाभावमात्रमिति केचित्, रूपदर्शनाभावमात्रमित्यन्ये, तत्कथं दृग्दृश्ययोर्भावरूपयोरिदं दृष्टान्तत्वेनाद्रियत इति? उच्यते—उपचयापचयाद्यवस्थाभेद-

ऋजुविवरणम्

कथं च विरोधस्य हेतुत्वम्? इतरेतरभावस्य वा साध्यत्वम्? सम्बन्धाभावादित्याक्षिपति—*कथमिति*॥ *एतदुक्तं भवति—नायं परप्रश्नः, अपितु स्वयमेव भाष्यं व्याख्यातुं प्रश्नपूर्वकमनभिप्रेतपक्षनिराकरणेन स्वपक्षप्रदर्शनं करोतीति। द्वितीयं भेदं निरूपकभेदेन भिन्नं तत्कार्यं च दर्शयति—*अपरस्त्विति*॥ 'यस्यानुपपत्तेरि'त्यनेन विरोधादि निरूपणीयम्; इतरथाऽसिद्धिसाध्यसाधनविकल्पत्वप्रसङ्गादित्युक्तम्। भाष्यानुक्तेष्वपि किमिति सहावस्थानमुक्तम्? इत्याशङ्क्याह—*तत्र तम इति*॥ इतरेतरयोर्भाव इति सहावस्थानमपि प्रतीयत इति व्याख्यातम्। अत एव द्वितीयपक्षस्वीकारः, न तु विकल्पितपक्षान्तर्गतत्वेन दूष्यत्वशङ्केति दर्शयितुं तत्रैव चर्चां कर्तुमवतारयति—*इदानीमिति*॥ सोपाधिकत्वमपि शङ्कितुं शक्यत इत्यभिप्रायेण चोदयति—*ननु तम इति*॥ न तावद्रूपदर्शनाभाव इत्याह—*उपचयापचयेति*॥ द्रव्याभावस्य

तत्त्वदीपनम्

क्रमोऽयुक्त इत्याशङ्क्य, सहानवस्थानलक्षणविरोधे दूषिते, 'कोऽसौ विरोधः?' इति शङ्कायां परस्परानात्मतालक्षणो विरोधो विवक्षित इत्याह—*इदानीमिति*॥ तादात्म्ययोग्यताऽभावेऽपि 'इदं रूप्यमि'त्यादौ तादात्म्यदृष्टेर्नायं हेतुः साधुरित्याशङ्क्योक्तं टीकायाम्—*न जातिव्यक्त्योरिति*॥

आत्मानात्मानौ, न वस्तुत इतरेतरभूतौ, इतरेतरभावायोग्यत्वात्; तमःप्रकाशवदित्युक्तम्। तत्र साध्याभावेऽपि साधनं किं न स्यात्? नच तदा तमःप्रकाशयोरपीतरेतरभावप्रसङ्गः; तयोर्भावाभावरूपतया तदनुपपत्तेरित्यप्रयोजकत्वम्, भावाभावात्मतालक्षणमुपाधिं वा शङ्कते—*ननु तमो नामेति*॥ विवादाध्यासित आलोकाभावः, तमःशब्दवाच्यः, इतरेतराभावव्यतिरिक्तत्वे सति आलोकाभावत्वात्; व्यतिरेकेणाऽऽलोकवदित्याद्यनुमानैरालोकाभावत्वमास्थिषत कणभुगादयः; इतरे त्वन्वयव्यतिरेकाभ्यां रूपदर्शनाभावस्तम इति मेनिरे; उभयत्र साधारणं दूषणमाह—*उच्यत इति*॥ तमः, नाभावः, धर्मिप्रतियोगिप्रतीतिनिरपेक्षत्वात्; कुम्भवत्, इत्यनुमानेन 'तमालदलश्यामलं तमः' इत्यनुभवानुगृहीतेन विरोध इतरस्यानुत्थितेर्नाभावत्वमित्यर्थः। हेत्वन्तरेण पराहतिमाह—*उपचयेति*॥ तमः, नाभावः, अवस्थावत्त्वात्, रूपवत्त्वाच्च; केशवत्। न चासिद्धिर्हेतोरित्याह—*उपलभ्यमानमिति*॥ यः पुनर्मन्यते तमःप्रतीतिर्भ्रमः—इति। तथाहि—निमीलिताक्षस्योपलभ्यमानं तमः किं बाह्यम्? उताऽऽन्तरम्? नाऽऽद्यः; बहुलालोकवितते देशे तदसंभवात्; न द्वितीयः; बहिःप्रसरणशीलानां नयनरश्मीनामान्तरतमोग्राहकत्वाभावात्, अन्यथा नयनान्तस्थाञ्जनग्रहणप्रसङ्ग इति, तं प्रत्याह—*बहुलेति*॥ निमीलितनयनस्यान्धकारोपलब्धिस्तद्गोलकान्तरवर्तितमोदर्शनमित्यन्वयः। आन्तरस्य तमसो दर्शनम्, न बाह्यस्येत्यत्र हेतुमाह—*आलोकेति*॥

पञ्चपादिकाविवरणम्

विशेषविशिष्टरूपवत्तया चोपलभ्यमानं तमः कथं द्रवीमभावविधामासीदेत्? बहुलालोकविततेऽपि देशे निमीलितनयनस्य गोलकान्तरवर्तितमोदर्शनमन्धकारोपलब्धिः पिहितकर्णपुटस्याऽऽन्तरशब्दोपलब्धिवन्न विरु-

ऋजुविवरणम्

प्रतियोगिनिमित्तमुपचितत्वादि सम्भवतीति तन्निराकरणे हेत्वन्तरमाह—*विशिष्टरूपवत्तयेति* ॥ नच—विशिष्टरूपवत्तयेत्यनेनैवालमिति—युक्तम्; अभावेऽपि रूपारोपेण रूपवत्त्वनिरूपणात्तन्निराकरणार्थमुपचयापचयेति हेतोः साफल्यात्। यद्वा—उपचयापचयेत्यादिना भावत्वनिरासः, विशिष्टरूपवत्तयेत्यनेन द्रव्यत्वसाधनम्, न त्वाद्येनैव द्रव्यत्वसिद्धिः; सुखादावप्युपचयादिदर्शनात्। *ननु* विरोधिद्रव्याक्रान्तो बाह्यदेशः, न तत्र द्रव्यत्वे सति तमसः स्थितिः सम्भवति; नाप्यन्तः; मूर्तद्रव्यावष्टब्धत्वात, देहगतस्य मूर्तद्रव्यव्यवहितत्वात, उभयत्रापि ग्राहकेन्द्रियव्यापाराभावोऽविशिष्टः; निमीलितनयनत्वात, अथापि तमोदर्शनाद् दृश्यादर्शनमात्रमारोपितप्रतीतिमात्रं वा न द्रव्यत्वसाधकमित्याशङ्क्याह—*बहुलालोकेति* ॥ नालोकतमसोः सहस्थितिरुक्ता; तत्कथमालोकवितते देशे प्रतीतिमात्रेण द्रव्यत्वं निराक्रियते? इत्याशङ्क्य शङ्काबीजमाह—*बहुलालोकेति* ॥ "गोलकान्तर्वर्ती"त्यनेन देशभेदेन तमसः स्थितिरुक्ता। "निमीलितनयनस्ये"त्यनेन तत्रालोकवितत्यभाव उक्तः, बहिरिन्द्रियव्यापाराभावो वाऽङ्गीकृतः। "तमोदर्शनमि"त्यनेन दृश्यादर्शनमिति पक्षनिरासः। "अन्धकारोपलब्धिरि"त्यनेन भावरूपद्रव्यप्रमितिरुक्ता। मतद्वयनिरासद्योतनाय पदद्वयम्। *ननु* इन्द्रिय-

तत्त्वदीपनम्

मन्दप्रभप्रदीपे मन्दिरे तयोः सहावस्थानं दृष्टमिति कथमालोकवितते देशे तमसोऽसंभव इत्याशङ्क्याह—*बहुलेति* ।

उपलम्भकाभावान्नाऽऽन्तरस्यापि तमस उपलम्भ इत्युक्तं निरस्यति—*न विरुध्यत इति* ॥ तत्र दृष्टान्तः—पिहितकर्णेति* ॥ पिहितकर्णपुटस्यापि श्रोत्रादेवान्तरशब्दोपलब्धिवदन्तर्मुखैर्लोचनरश्मिभिरान्तरं तमो गृह्यते। न चातिप्रसङ्गः; आन्तरतमोग्राहकत्वस्याञ्जनग्राहकत्वाव्याप्तत्वात्प्रशिथिलमूलतया तर्काऽऽभासत्वात्। विमतम्, स्वगताञ्जनग्राहि, तत्संयुक्तत्वात, यद् येन संयुक्तम्, तत् तद्ग्राहि; यथा संतमसजलादिसंयुक्तं लोचनमिति विवक्षितत्वान्नोक्तदोषावसर इति चेत, तत्र संयोगित्वमात्रं ग्राहकत्वप्रयोजकत्वेन विवक्षितम्, उत योग्यतावत्त्वविशेषितम्? आद्ये गगनदिगादीनपि गृह्णीयात, द्वितीयेऽसिद्धिः; न चोद्भूतरूपत्वेन तत्सिद्धिरिति शङ्क्यम्; तत्त्वेऽप्यतिसामीप्येन तद्ग्राह्यत्वानुपपत्तेः, नच प्रकृतेऽप्येतत्समानम्; कार्यदृष्ट्यदृष्टिभ्यां विशेषात्। उद्भूतस्पर्शस्यापि धूमस्य लोचनदेशे त्वग्ग्राह्यत्वेऽप्यन्य-

वार्तिकम्

गोचरः, अस्मत्प्रत्ययगोचरः=चिदात्मा। यद्यपि सांख्यमते वेदान्तिमते च नाहंप्रतीतेरन्तःकरणस्य कामादीनां वाऽऽत्मा साक्षाद् विषयः; तथाप्यचेतनस्यापि बुद्ध्यादेरतिस्वच्छस्य स्फटिकमणेर्लोहितावभासवत् चिदाभासग्राहितया भोक्तृत्वाद्याकारेण भासनाद् लौहित्येन तदुपधानानुमानवत् तेन चिदात्मनोऽनुमानात् प्रतिपत्त्यनुबन्धिविषयत्वाभावेऽपि व्यापारानुबन्धिविषयत्वमस्त्येव; यथा धूमज्ञानस्य विषयो वह्निरिति सांख्या मन्यन्ते ॥ वृद्धास्तु निर्विकल्पस्यापि चिदात्मनोऽन्तःकरणाद्यध्याससम्बन्धात् तत्र तत्र सविकल्पतयोपलम्भादाकाशस्थितस्येव तेजसोऽङ्गुल्यादिसम्बन्धाद् राहोरिव चन्द्रमस्सम्बन्धात् तद्विषय-

प्रदीपः

गोचरयोर्विषयविषयिणोरिति* ॥ * विषयः=पराक्, इदंप्रतीतियोग्यं दृश्यम्; शरीरान्तःकरणादि। *विषयि=दृग्रूपं स्वयंप्रकाशमानं स्वव्यवहारे स्वेतरानपेक्षं शुद्धचैतन्यस्वरूपम्; प्रत्यक्चैतन्यमिति यावत्। वृत्त्यभिव्यक्तचैतन्यभास्यत्वयोग्यत्वं

पञ्चपादिकाविवरणम्

ध्यते। आलोकविनाशितस्य च तमसः पुनर्मूलकारणादेव झटिति महाविद्युदादिजन्मवज्जन्म सिद्ध्यति। *ननु* रूपवतो द्रव्यस्य स्पर्शवत्त्वनियमात्तद्रहितं तमः कथं रूपवद् द्रव्यमवगम्येत ? *नैष दोषः* ; वायोरन्यत्र

ऋजुविवरणम्

स्याऽऽन्तरवस्तुग्राहकत्वं न संभवति ; बाह्यवृत्तित्वादित्याशङ्क्याह—*पिहितकर्णपुटस्येति* ॥ *ननु* द्रव्यत्वे सति आलोकेन निवृत्तस्याऽऽलोकापाये कथं तदैवोत्पत्तिः ? तादृक्कारणाभावात्, अन्यत्र तथोत्पत्त्यदर्शनादित्याशङ्क्याह—*आलोकविनाशितस्येति* ॥ *ननु* तमसः स्पर्शवत्त्वमङ्गीक्रियते वा ? न वा ? न चेत्, रूपवत्त्वेन व्याप्तं स्पर्शवत्त्वं निवर्तमानं स्वाविनाभूतं रूपवत्त्वं निवर्तयति, तेन रूपवत्त्वमसिद्धमिति चोदयति—*ननु रूपवत इति* ॥ अङ्गीकरणे प्रतीतिः स्यादिति भावः। तत्र तज्जातीये दर्शनाभावे सहकारितर्काभावे चान्यत्र साहचर्यमात्रेणानुमाने केवलप्रतीतिनियमे वा व्याप्तिरेव न निर्वहतीत्यत्र दृष्टान्तमाह—*वायोरन्यत्रेति* ॥ *तद्वद्दर्शननियमादेवेति* ॥ दर्शनान्नियमो दर्शननियमः। अथवा—दर्शनस्य नियमो दर्शननियमः, दर्शननियमादेवेति। अनेन तावन्मात्रस्य व्याप्तिबाधकत्वम्, न तु व्यापकनिवृत्तिन्यायेनेति दर्शितम्। *एतदुक्तं भवति—वायोः स्पर्शवत्त्वेनैव प्रतीतिनियमाद्रूपवत्त्वाभावः, तद्वदत्रापि रूपवत्त्वेनैव प्रतीतेः स्पर्शवत्त्वस्य कदाचिदप्यप्रतीतेस्तदभावो निश्चीयत इति। न केवलं

तत्त्वदीपनम्

त्रातथात्वाद् नित्यानुभवप्रसादाद्वाऽऽन्तरं तमः सिद्ध्यतीत्यर्थः। *ननु* तमः किमनादि, उत सादि ? नाऽऽद्यः ; आलोकध्वंसे तदुत्पत्त्यनुभवात्। नेतरः ; किं चतुर्विधाः परमाणवः कारणम् ? उतान्यत् ? नाऽऽद्यः ; तेषां खण्डावयविपरम्परया महाद्रव्यारम्भकत्वात्। नच तदुपपद्यते ; आलोकापगमसमसमयमेवोत्पत्तेः। न द्वितीयः ; प्रमाणाभावादित्याशङ्क्य, तस्योत्पत्तिस्तावदुपेया, पूर्वस्य ध्वस्तत्वादित्याह—*आलोकेति* ॥

आलोकनाशितस्य प्राचीनस्य तमसो यन्मूलकारणम्, तस्मादेव तज्जातीयस्य जन्म सिद्ध्यतीति योजना। विद्युदादि हि विलम्बमन्तरेण यथा परमाणुभिरारभ्यते, तथा तमोऽपीत्यभिप्रेत्य "झटिति महाविद्युदादी"त्युक्तम्। वस्तुतस्तु—अस्मन्मते संतमसस्य न परमाणुकारणकत्वम्, किंत्वविद्यैव चिदधिष्ठिता तमोरूपेण विवर्तत इत्याह—*मूलकारणादिति* ॥ न च प्रमाणाभावचोद्यम् ; "सदेव सौम्येदमग्र आसी"दित्यादिवाक्याद् ब्रह्मणोऽद्वितीयताप्रतीतेरित्यविद्याविवर्तताया एव तस्याऽऽश्रयणीयत्वादित्यर्थः ॥

एवं निष्पत्तिप्रतीतिकारणसंभवात् तमःप्रतीतिर्न भ्रम इत्यभ्यधायि, संप्रति रूपवत्त्वहेतोरसिद्धिमाशङ्कते—*ननु रूपवत इति* ॥ रूपवत्त्वस्य स्पर्शवत्त्वं व्यापकम्, तद्व्यावृत्तौ रूपवत्त्वमपि व्यावर्तते। तथाच प्रयोगः—तमः, नीरूपम्, स्पर्शविधुरत्वात् ; गगनवदिति। विपक्षे बाधकाभावादप्रयोजको हेतुरित्याह—*नैष दोष इति* ॥ रूपवत्त्वे स्पर्शविधुरत्वभङ्गो बाधक इत्याशङ्कां प्रतिबन्द्या परिहरति—*वायोरिति* ॥ *अयमर्थः*—यत् स्पर्शवत्, तद् रूपवदिति व्याप्तेर्यथा वायौ भङ्गः, तद्वद् यद्रूपवत् तत् स्पर्शवदिति व्याप्तेस्तमसि भङ्गः। न च प्रमाणाभावः ; 'तमालमाला-

प्रदीपः

विषयत्वम्, स्वप्रकाशत्वं विषयित्वम्। चैतन्यातिरिक्तं सर्वं वृत्त्यभिव्यक्तचैतन्यभास्यत्वयोग्यम्। प्रातिभासिकमपि प्रमाणजन्येदमाकारवृत्त्यभिव्यक्तचैतन्यभास्यत्वाद् विषय एव। चैतन्यं तु न फलव्याप्यम्, किन्तु स्वयंप्रकाशमिति न दोषः। तथाच 'विषयविषयिणोरिति' पदेनात्मान्तःकरणयोः स्वरूपतो भेदः प्रतिपादितः॥ स्वरूपतो भिन्नयोरप्यात्मान्तःकरणयोर्भेदाग्रहाद् नाध्यासो विरुद्ध इति शङ्कावारणार्थम्— * युष्मदस्मत्प्रत्ययगोचरयोरिति * विशेषणम्॥ युष्मच्छब्देन युष्मच्छब्दजन्यो विवक्ष्यते, अस्मच्छब्देनास्मच्छब्दजन्यो विवक्ष्यते। युष्मच्च अस्मच्च युष्मदस्मदी, तौ प्रत्ययौ युष्मदस्मत्प्रत्ययाविति विग्रहः। युष्मत्प्रत्ययो हि पुरोऽवस्थितविषयः। यद्यपि त्वंशब्दप्रयोगेणापि सम्बोध्योऽहमित्येव प्रत्येति, न तु

पञ्चपादिकाविवरणम्

स्पर्शवद्द्रव्यस्य रूपवत्त्वनियमेऽपि रूपरहितस्य स्पर्शवतो वायोरभ्युपगमात्, तद्वद्दर्शननियमादेव स्पर्शहीनस्य रूपवत्तमसः सिद्धेः। धूमस्य च रूपवतश्चक्षुःप्रदेशादन्यत्र स्पर्शानुपलब्धिः, तद्वत्सर्वस्पर्शहीनं तमः किं न स्यात्? सवितृकिरणविततेऽपि देशे प्रदीपालोकजन्मविनाशयोः प्रागभाव-प्रध्वंसाभावेतरेतराभावेषु तमोबुद्ध्यदर्शनान्नालोकाभावमात्रं तमः। सर्वालोकाभावश्चेत्, सर्वालोकासन्निधाने तर्हि न निवर्तेत। बहुलान्धकार-

ऋजुविवरणम्

वायावेव दर्शनबलाद् व्याप्तिभङ्गः, अन्यत्रापीत्याह—*धूमस्य चेति* ॥ *एतदुक्तं भवति*—योग्यस्पर्शस्य सर्वत्र स्पर्शेन ग्रहणे स्थिते दर्शनान्नियमः; यथा धूमे, एवं तमस्यपि भावधीः। अथवा—तत्र रूपवत्त्वाभावेऽपि स्पर्शवत्त्वमभ्युपगम्यते; स्पर्शवत एव द्रव्यारम्भकत्वनियमात्, रूपवत्त्वविरोधात्, अत्र तु कथं व्याप्तिबाध इत्याशङ्क्याह—*दर्शननियमादेवेति* ॥ नियमान्तरं नास्ति, तावन्मात्रमेव समर्थमित्यर्थः। कथं दर्शनमात्रेण व्याप्तिभङ्गः? अन्यत्रादर्शनादित्याशङ्क्याह—*धूमस्य चेति* ॥ अत्र 'तमः सर्वस्पर्शहीनमि'ति विशेषणसामर्थ्यादेकदेशेन धूमस्य स्पर्शवत्त्वप्रतीतिः; सामर्थ्यात्, तथा सतीतरत्र रूपवत्त्वेऽपि स्पर्शवत्त्वाभाववदिति प्रतिभाति; तदितरांशस्यापि नयनदेशागमने स्पर्शदर्शनादुपेक्षणीयम्। अथवा—स्पर्शवत्त्वमङ्गीक्रियते। तर्हि प्रतीतिरपि स्यादिति चेत्, न; विद्यमानस्याप्रतीतिसंभवादिति सदृष्टान्तमाह—*धूमस्य चेति* ॥ सामान्येनाभावत्वं निराकृत्येदानीं विपक्षे बाधकतर्कोऽप्यस्तीति दर्शयितुं विशेषतो निराकरोति—*सवितृकिरणवितत इति*॥ *अथवा*—व्याप्तिभङ्गाश्रयणाद् वरमभावत्वमेवाश्रितम्; प्रतीतिमात्रस्यान्यथाकरणात्, अत्र तूत्पत्त्यादिकल्पनागौरवादित्याशङ्क्यालोकाभावत्वं तावद् दूषयति—*नालोकाभावमात्रमिति* ॥ तत्रालोकाभावः—एकालोकाभावः? सर्वालोकाभावो वा? तथा तेषां प्रागभावः? प्रध्वंसाभावः? इतरेतराभावो वेति विकल्प्य पक्षद्वये दूषणमाह—*सवितृकिरणेति* ॥ तृतीयं दूषयति—*सर्वालोकाभाव इति* ॥ रूपदर्शनाभाव इति पक्षेऽप्येक-सर्व-रूपदर्शनाभावमात्रपक्षांस्तथा तेष्वेव प्रागभावादिविकल्पान्मनसि निधायाह—*बहुलेति* ॥

तत्त्वदीपनम्

'श्यामलं तमः' इत्युपलम्भादिति। यद् रूपवत्, तत् चक्षुःप्रदेशादन्यत्रोपलभ्यमानस्पर्शवदिति नियमस्य धूमे भङ्गवत् स्पर्शवत्त्वनियमस्य तमसि व्यभिचार इत्याह—*धूमस्येति* ॥ तस्यानुपलभ्यमानस्पर्शत्वाद् दृष्टान्तो विषम इत्यत्राह—*तद्वदिति* ॥ सर्वसाम्यस्यानपेक्षितत्वाद् रूपवत्तमः स्पर्शमात्रहीनं स्यादित्यर्थः। यद्वा—न केवलं हेतोरप्रयोजकता, असिद्धता चेत्याह—*धूमस्य चेति* ॥ नच—स्पर्शवत्त्वे तदुपलम्भापत्तिरित्यपि—शङ्क्यम्; स्पर्शवत्त्वेऽपि धूमस्य लोचनदेशादन्यत्र स्पर्शानुपलब्धिवत् क्वचिदप्यनुपलभ्यमानस्पर्शं तमः किं न स्यादित्यर्थः। *सर्वत्र स्पर्शहीनमिति* ॥ सर्वत्रोपलभ्यमानस्पर्शशून्यमित्यर्थः।

किंचाभावस्तम इति वदन् वादी प्रष्टव्यः—किं तमः एकैकाऽऽलोकाभावः, उत सर्वाऽऽलोकाभावः? आद्येऽपि किं प्रागभावः? उत प्रध्वंसाभावः? आहोस्विदितरेतराभाव इति? विकल्पत्रयमप्यसंभवीत्याह—*सवितृकिरणेति* ॥ जन्मविनाशयोरिति सतिसप्तमी। प्रदीपजन्मनः प्राक् प्रागभावः, जन्मनीतरेतराभावः, नाशोत्तरकालं प्रध्वंसाभावस्तत्रास्ति; तथापि सावित्रालोकव्याप्ते देशे तमो नोपलभ्यते; इतरथा तत्रापि तदुपलम्भः स्यात्। प्रागभावाद्यवस्थासु तमोबुद्ध्यभावो विरोध्यालोकसन्निधिनिबन्धन इति वदता विरोध्यभावसहितप्रागभावादेस्तमोबुद्ध्यालम्बनत्वमिति वक्तव्यम्, नच तदुपपद्यते; विरोध्यभावगिरा प्रागभावोक्तौ प्रध्वंसेऽनुपपत्तेः, प्रध्वंसोक्तावितरत्रानुपपत्तेः, इतरेतराभावोक्त्यां वाऽऽलोकभावेऽपि तद्भावात्तमोबुद्धिरनिवार्येत्यर्थः। द्वितीयमनूद्य दूषयति—*सर्वेति* ॥ किमस्य सर्वेषामालोकानां सन्निधानं निवर्तकम्, उत एकैकस्य? आद्ये सकलालोकोदयमन्तरेण तन्निवृत्तिर्न भवेत्। द्वितीयेऽप्येकैकस्य सकलाऽऽलोकाभावनिवर्तकत्वाभावात् तमोबुद्धिः स्यात्। नच—एकैकाऽऽलोकप्रादुर्भावे तदभावस्य व्यावृत्तेर्न तमोबुद्धिप्रसक्तिरिति—शङ्क्यम्; प्रागभावादिविकल्पदूषणयोरत्रापि तुल्यत्वादिति हृदयम्।

भामती

चिदात्मानं विषिण्वन्ति, अवबध्नन्ति, स्वेन रूपेण निरूपणीयं कुर्वन्तीति यावत्। परस्परानध्यासहेताव-

ऋजुप्रकाशिका

चिदात्मानमित्याह—*एते हि चिदात्मानमिति* ॥ 'विषिण्वन्ती'त्येतद्विवृणोति—*अवबध्नन्तीति*। *ननु* अहंकारबुद्धीन्द्रियादयो न चिदात्मानमवबध्नन्ति, आत्मनो निरवयवत्वेन बन्धुमशक्यत्वादित्यत आह—*स्वेन रूपेणेति* ॥ *ननु* "स्वेन रूपेण निरूपणीयं कुर्वन्ती"त्यस्य स्वेन रूपेणावभासयन्तीत्यर्थे, आगत एव परस्पर-

वार्तिकम्

त्वमुपचरन्ति। तथाच वसिष्ठः—"अदृश्यो दृश्यते राहुर्गृहीतेनेन्दुना यथा। तथाऽनुभवमात्रात्मा दृश्येनात्माऽवलोक्यते"—इति। वक्ष्यति चैतद् भगवान् भाष्यकारः—"न तावदयमेकान्तेनाविषयः; अस्मत्प्रत्ययविषयत्वात्"—इति। तेनायमात्मा शुद्धचिद्घनोऽस्मत्प्रत्ययविषय इत्युच्यते। युष्मच्चास्मच्च युष्मदस्मदी, तयोः प्रत्ययौ युष्मदस्मत्प्रत्ययौ, तद्गोचरौ च तौ, युष्मदस्मत्प्रत्ययगोचरौ ; तयोरित्यर्थः। *ननु* एवं तर्हि भोग्यभोक्त्रोरित्येव वाच्यम्, किं युष्मदस्मत्प्रत्ययगोचरयोरिति ? क्लिष्टश्च, *नैष दोषः* ; यद्यपि सांख्यमते शुद्धस्याप्यात्मनः पारमार्थिकं भोक्तृत्वमस्ति ; बुद्धौ चिच्छायापत्तेर्भोगत्वात्, तस्याश्च तन्मते सत्यत्वात्, तथापि वेदान्तिमते तदभावाद् अन्यतरासिद्धो हेतुः स्यात्। तथाच विरोधासिद्धेर्न तादात्म्यानुपपत्तिः सिद्ध्येदिति, उभयसंप्रतिपन्नरूपेण विरोधप्रतिपादनार्थम्—युष्मत्प्रत्ययगोचरत्वेन सकलभोग्यानुगमार्थं च *"युष्मदस्मत्प्रत्ययगोचरयोरि"त्युक्तम्*। यद्वा—सांख्यशिष्ययोस्तन्त्रेण पूर्वपक्षित्वात् तन्त्रेण स्वपरमताभिधानार्थं तथोक्तमित्यदोषः। * विषयविषयिणोरिति * ॥ दृग्दृश्ययोरित्यर्थः। विशेष्यपदमेतत्। पूर्वोत्तरे तूपपादकोपपाद्यपरे विशेषणपदे इति ध्येयम्। नच—पूर्वोत्तरपदयोः परस्परव्याहतार्थत्वात् प्रतिज्ञाविरोधो नाम निग्रहस्थानम्, पूर्वपदेन विपरीतविषयविषयित्वबोधनादिति—वाच्यम् ; उपचारेणैव चिदात्मनो जडविषयत्वाभिधानादित्युक्तत्वात्, परमार्थतो जडविषयस्यैव विषयत्वादित्यविरोधः। *विरुद्धेति* ॥ विरुद्धः स्वभावः=स्वरूपं ययोस्तौ, विरुद्धस्वभावौ ; तयोरित्यर्थः। तत्र

भाष्यभावप्रकाशिका

भवितुं युक्तमि"त्यन्तेन भाष्येणार्थाच्च "सुतरामितरेतरभावानुपपत्तिरि"त्यन्तेन तत्त्वानुसरणलक्षणं मङ्गलाचरणं सम्पादयति। 'इदमस्मत्प्रत्ययगोचरयोरि'ति वक्तव्ये युष्मद्ग्रहणमत्यन्तभेदोपलक्षणार्थम्। त्वङ्कारवदिदंकारस्याहंकारप्रतियोगित्वाभानात्, 'एते वयम्', 'इमे वयम्' इति प्रयोगदर्शनात्। युष्मच्चास्मच्च युष्मदस्मदी। युष्मच्छब्देन जडस्वभावा बुद्धीन्द्रियदेहा उच्यन्ते। अस्मच्छब्देन तत्साक्षी चिद्रूप आत्मा ; तयोः प्रत्ययौ। मनइन्द्रियादिव्यवधानेनात्मनः प्रतीतिः युष्मत्प्रत्ययः, अस्मत्प्रत्ययः स्वाहङ्कारः, तयोर्गोचरयोः = युष्मदस्मत्प्रत्ययगोचरयोः। तदनेन प्रत्ययतो विरोधो दर्शितः। स्वरूपतो विरोधमाह—*विषयविषयिणोरिति* ॥ अत एव * विरुद्धस्वभावयोः=तादात्म्यायोग्ययोरिति यावत्।

प्रदीपः

त्वमिति ; तथापि सम्बोध्यातिरिक्ता नाहमिति जानन्ति, किन्त्वयमितीति, प्रमाणजन्यवृत्त्यभिव्यक्तचैतन्यभास्यत्वादन्तःकरणमपि दृश्यमेवानुमीयते। इदमेवाभिप्रेत्य सिद्धान्तबिन्दौ—'अन्तःकरणस्य प्रतिभासतोऽहंप्रत्ययविषयत्वम्, चिद्भास्यत्वेन तु लक्षणेन युष्मत्प्रत्ययविषयत्वमि'ति वर्णितम्। सति चैवं प्रतीतितोऽपि भेद आत्मान्तःकरणयोर्वर्तत इति साधनाद् भेदाग्रहरूपप्रथम-

भामती

त्यन्तवैलक्षण्ये दृष्टान्तः—*तमःप्रकाशवदिति* ॥ न हि जातु कश्चित् समुदाचरद्वृत्तिनी प्रकाशतमसी परस्परात्मतया प्रतिपत्तुमर्हति, तदिदमुक्तम्—*इतरेतरभावानुपपत्ताविति* ॥ *इतरेतरभावः=इतरेतरत्वम्,

ऋजुप्रकाशिका

तादात्म्याध्यास इति, अत आह—*भाष्ये—तमःप्रकाशवदिति* ॥ तमःप्रकाशवद् विरुद्धस्वभावत्वं निवर्त्य-निवर्तकभावत्वं वा, सहानवस्थायित्वं वा ? नोभयमपि ; दार्ष्टान्तिके तदभावात्, विषयविषयिणोः परस्परं निवर्त्यनिवर्तकभावाभावात्, काले तयोः सहावस्थानाच ; तथाच दृष्टान्त-दार्ष्टान्तिकभावायोग इत्याशङ्क्य, परस्परविलक्षणत्वमेव विरुद्धस्वभावत्वम् ; तावतैव परस्परतादात्म्याध्यासायोगसंभवात्, तथाचात्यन्त-विलक्षणत्वस्य दृष्टान्त-दार्ष्टान्तिकयोः समानत्वात् तद्वैलक्षण्यमात्र एव 'तमःप्रकाशवदि'ति दृष्टान्त इत्याह—*परस्परेति* ॥ *ननु* स्वरूपतोऽत्यन्तवैलक्षण्यं न परस्परतादात्म्यानध्यासहेतुः, सत्यपि प्रकाश-तमसोरत्यन्त-वैलक्षण्य उलूकादीनां प्रकाशे तमस्तादात्म्याध्यासदर्शनाद् इत्याशङ्क्य, परस्परानात्मत्वेनावभासमानत्वलक्षणं वैलक्षण्यं परस्परतादात्म्यानध्यासहेतुत्वेन विवक्षितम्, उलूकादीनां तु तमः-प्रकाशयोः परस्परभेदाग्रहात् तदुभयता-दात्म्यारोप इत्यभिप्रेत्याह *न हीति* ॥ *समुदाचरन्त्यौ भेदेन प्रतिभासमाने वृत्ती वर्तने ययोः ते, तथोक्ते ; ते च ते प्रकाशतमसी च, ते इत्यर्थः। दृष्टान्ते स्वोक्तमर्थं दार्ष्टान्तिकेऽपि सिद्धवत् कुर्वन् भाष्यारूढं करोति—*तदिदमुक्तमिति* ॥*"इतरेतरभावानुपपत्तावि"त्यत्र* इतरस्य धर्मिण इतरत्र धर्मिणि भावो वर्तनम्,

पञ्चपादिकाविवरणम्

संवृतापवरकान्तरवस्थितस्यापि बहीरूपदर्शनेन सहापवरकान्तस्तमोदर्शनान्न रूपदर्शनाभावमात्रं तम इत्यलमतिप्रसङ्गेन।

तत्त्वदीपनम्

रूपदर्शनाभावस्तम इत्यत्रापि किमेकैकस्य रूपस्य दर्शनाभावः, उत सर्वस्य ? आद्येऽपि किं रूपदर्शनमात्राभावः, उत यत्र तमोबुद्धिस्तत्रत्यरूपदर्शनाभाव इति विकल्प्याद्यं प्रत्याह—*बहुलान्धकारेति* ॥ द्वितीयोऽपि प्रागभावादिविकल्पेन दूष्यः। सर्वरूपदर्शनाभावस्तम इति पक्षे सर्वरूपदर्शनमन्तरेण तमो न निवर्तेतेत्यर्थः।

तथा आलोकसंसर्गाभावस्तम इत्यत्रापि किं संसर्गप्रागभावः ? उत तत्प्रध्वंसः ? आहोस्वित् तदितरेतराभावः ? आद्ये प्रध्वंसे तमोबुद्धिर्न स्यात्, द्वितीये प्रागभावे, तृतीयेऽप्यालोकव्याप्तेऽपि देशे तमोबुद्धिः स्यात्। नच—भावरूपतमोवादिनाऽपि तद्व्यञ्जकत्वेनाऽऽलोकाभावः समाश्रितः, तस्यैव तमोबुद्धिगोचरत्वमिति—शङ्क्यम् ; इतरेतराभावव्यतिरिक्ताऽऽलोकाभावस्य व्यञ्जकत्वमाश्रीयते, नच स त्वयेष्टव्यः ; इतरेतराभावस्येतरेतराभावानिरूपणात्। नच—तमसो रूपिद्रव्यत्व आलोकसहितचक्षुर्ग्राह्यत्वप्रसङ्ग इति—वाच्यम्. रूपवदभावस्याऽऽलोकसहितचक्षुर्ग्राह्यत्वनियमेऽप्यालोकाभावस्य केवलचक्षुर्ग्राह्यत्वनियमवदत्रापि तदुपपत्तेरिति। एतत्सर्वं मनसि निधायोपसंहरति—अलमतिप्रसङ्गेनेति ॥

वार्तिकम्

दृष्टान्तः—*तमःप्रकाशवदिति *॥ अत्र तु विरोधः परस्परतादात्म्यायोग्यता ग्राह्या, न सहावस्थानायोग्यता ; दृष्टान्त-दार्ष्टान्तिकयोरुभयोरपि सहावस्थानदर्शनात्। तथाच तत्प्रयुक्तपरस्परतादात्म्यानुप-

प्रदीपः

कारणासंभवो "युष्मदि"त्यनेन सूचितः। तथाच—* युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोः=भिन्नतया गृह्यमाणयोरात्मान्तःकरणयोस्तादात्म्याध्यासासंभवे धर्माणामपि तादात्म्याध्यासासंभव इति भाष्ययोजना ॥ न केवलं प्रथमं तृतीयं च

पञ्चपादिका

त्मकत्वस्यानुपपत्तिः। कथम्? स्वतस्तावद्विषयिणश्चिदेकरसत्वान्न युष्मदंशसम्भवः, अपरिणामित्वान्निरञ्जनत्वाच्च न परतः, विषयस्यापि न स्वतश्चित्सम्भवः, समत्वाद् विषयत्वहानेः; न परतः; चितेर-

पञ्चपादिकाविवरणम्

ननु दृग्दृश्ययोरितरेतराभावानुपपत्तिस्तयोर्विभ्रमनिमित्तं तादात्म्यावभासं न निरुणद्धि, शुक्तिका-रजतयोरपि हि तादात्म्यहीनयोरेव विभ्रमनिमित्तमैकाधिकरण्यमवभासते, तद्वदिहापि स्यादिति चोदयति—*कथमिति* ॥ सत्यम्; इदमंशमात्रस्याधिष्ठानस्य रजतस्य चाध्यस्यमानस्य क्वचित्तादात्म्यमस्त्येव, ततश्चाधिष्ठानसामान्यांशस्याध्यस्यमानविशेषांशस्य च क्वचित्सामान्यविशेषभावेन वा गुणगुणिभावेन वा समानाधिकृतस्यान्यत्रान्यतरांशवतः पदार्थस्य दर्शनादन्यतरांशाध्यासो विभ्रमो दृष्टः, तद्वदिहाधिष्ठानस्य चितोऽध्यस्यमानस्य चानात्मनो नास्तीत्याह—*स्वतस्तावद्विषयिणश्चिदेकरसत्वान्न युष्मदंशसम्भव इत्यादिना* ॥

ऋजुविवरणम्

ननु इतरेतरभावानुपपत्तौ सहेतुकायां साधितायां कथमित्याक्षेपोऽनुपपन्न इत्याशङ्क्याभिप्रायमाह—*ननु दृग्दृश्ययोरिति* ॥ *ननु* तादात्म्याभावेनाध्यासो निराकर्तुं न शक्यत इति चोदिते, स्वत इत्यादिग्रन्थैः चिज्जडतादात्म्यनिराकरणं व्यर्थमित्याशङ्क्य समुदायतात्पर्यमाह—*सत्यमित्यादिना* ॥ यद्यपि विशेषयोस्तादात्म्यं नास्ति; तथापि कथञ्चिदस्तीत्यङ्गीकरोति—*सत्यमिति*। नच—"स्वतस्तावद्वि"त्यादिना चिदेकरसत्वादिहेतुसमुदायेन तादात्म्यनिराकरणे भाष्याननुसारः, तत्र विरोधेन तन्निराकरणादिति—वाच्यम्; विरोधस्यैव तैस्साध्यमानत्वात्। *ननु* स्वतो विषयिणश्चिदेकरसत्वाद्युष्मदंशसंभव उत्पत्तिर्नास्तीत्युक्तमिव प्रतिभाति, तथा परतोऽपि संभवो नास्ति; स्वस्यापरिणामित्वादिति; एवं च सति व्यधिकरणो हेतुः। नहि स्वस्य चिदेकरसत्वमपरिणामित्वं वा प्रपञ्चोत्पत्तिं निरुणद्धि। *यद्वा*—स्वत इत्यनेन = स्वतः = स्वस्माद्विषयिणः, युष्मदंशसंभवः = उत्पत्तिर्नास्तीत्यन्वयः, स्वतस्तदाकारत्वं वा नास्तीति; पूर्वस्मिन् व्यधिकरणत्वम्, उत्तरस्मिन् परस्परव्याहतिः। विषयोऽस्यास्तीति

तत्त्वदीपनम्

विरुद्धस्वभावत्वेनेतरेतरभावे प्रतिक्षिप्ते, कथमिति चोद्यस्यानुपपत्तिरित्याशङ्क्य पारमार्थिकतादात्म्याभावेऽपि तद्भ्रमः स्यादिति तात्पर्यमाह—*ननु दृग्दृश्ययोरिति* ॥ अनुपपत्तिरित्यत्र परमार्थत इति द्रष्टव्यम्। विभ्रमो निमित्तं यस्य स तथा, तमित्यर्थः। न च विभ्रमावभासयोरेकत्वान्निमित्तनैमित्तिकताऽनुपपन्ना; पूर्वभ्रमस्योत्तरभ्रमनिमित्ततया विवक्षितत्वेनानुपपत्त्यभावादित्यर्थः। *ननु* स्वाभाविकतादात्म्याभावेऽपि तादात्म्यभ्रमः स्यादिति चोदिते, आत्मनोऽनात्मांशत्वनिराकरणमसंगतमित्याशङ्क्याधिष्ठानाध्यस्यमानयोः किं विशेषरूपेणाऽन्यत्र तादात्म्याभावः, उत सामान्यरूपेणेति विकल्प्याद्यमङ्गीकरोति—*सत्यमिति* ॥ न द्वितीय इत्याह—*—*इदमंशमात्रस्येति* ॥ इदंरूप्ययोः सामान्यविशेषादिभावेन क्वचित्तादात्म्यवतोरेव तादात्म्यभ्रमो दृष्टः, नेह प्रकृते तादृशमपि तादात्म्यं समस्तीत्यर्थः।

किं युष्मदंशस्य स्वस्मान्न संभवः, विषयिणश्चिदेकरसत्वादित्यर्थः, उत विषयिणः सकाशान्न संभव इति। आद्ये

भाष्यभावप्रकाशिका

न तु सहानवस्थानयोग्ययोरिति भावः। "तमःप्रकाशवदिति"निदर्शनमेवंविरोधाभिप्रायम्; मन्दप्रभे मन्दिरे तयोस्सहोपलम्भात्। एतेनाभावत्वमपि तमसो निराकृतं वेदितव्यम्। इदमाह—*इतरेतरभावानुपपत्तौ सिद्धायामिति* ॥ तादात्म्यलक्षणकार्यस्यानुपपत्तौ सिद्धायामित्यर्थः ॥

पञ्चपादिकाविवरणम्

अयमाशयः :—द्रष्टुरचिदंशः स्वाभाविको वा स्यादागन्तुको वेति। न स्वाभाविक इत्याह—*स्वत इति* ॥ चेत्यं हि जडं चैतन्यस्य कर्मकारकतयाऽवभासते। तत्कथमेकस्यां क्रियायां कर्तुर्विपरीतस्थानगतं कर्मकारकमात्मा स्यादित्यभिप्रायः। आगन्तुकश्चेत्, सहेतुरहेतुर्वा। निर्हेतुश्चेत्, तत्राह—*अपरिणामित्वादिति* ॥ न हि निरवयवं वस्तु स्वतः सावयवाकारेण परिणममानं दृष्टमित्यभिप्रायः। न सहेतुरित्याह—*निरञ्जनत्वादिति* ॥ न हि निरवयवमाकाशं हेतूपरागात्परिणममानं दृष्टमित्यर्थः। तर्ह्यनात्मैवाधिष्ठानमात्मांशात्मकं क्वचिद् दृष्टमिति,

ऋजुविवरणम्

विषयीति तादात्म्यप्रतीतेः। टीकायाम्—*अपरिणामित्वादिति* आगन्तुका सहेतुकोत्पत्तिर्निरस्यते। एवं व्यधिकरणत्वं प्रकृततादात्म्यानिराकरणादप्रयोजनं चेत्याशङ्क्याह—*अयमाशय इति* ॥ द्रष्टुरचिदिति विकल्पव्याजेन विषयिण इति व्याख्यातम्। *स्वाभाविकेत्यनेन स्वत इति व्याख्यातम्। *ननु* चैतन्यस्य जडात्मत्वनिराकरणे कथं चिदेकरसत्वं हेतुः? असिद्धिप्रसङ्गात्; अथवैकरसस्यैवाकारान्तरासंभवादहेतुः, नच 'द्रष्टुरि'त्येवान्तर्गर्भितो हेतुः; द्रष्टुरेव युष्मदंशसंभवाद्विरोधाभावात्, अतः स्वरूपपरत्वेन निराकरणे हेत्वभावान्न प्रतिज्ञातार्थसिद्धिरित्याशङ्क्याभिप्रायमाह—*चेत्यं हीति* ॥ अंशभेदेनाविरोधशङ्का निरंशत्वेन सुपरिहृतत्वान्न कृता। अन्यत्र टीकाकारेणाप्येवमेवोक्तम्—"तत्कथमेकस्य निरवयवस्य विरुद्धांशद्वयसन्निवेशः"—इति। आगन्तुकत्वे निराकर्तव्ये "न परतः" इति निराकरणमसङ्गतम्; विकल्पितपक्षत्वाभावात्, तथा स्वतोऽपरिणामिनोऽपि परतः परिणामदर्शनादनैकान्तिको हेतुः। अथ परतः परिणामो न संभवति निरञ्जनत्वादिति व्याख्यायेत, तथा सति निर्हेतुकपरिणामस्य शेषाभ्यनुज्ञान्यायेनाङ्गीकार इति शङ्कानिराकरणाय विकल्प्यावतारयति—*आगन्तुकश्चेदिति* ॥ *'अपरिणामित्वादिति'* परिणामरहितत्वे विवक्षिते हेतोरसिद्धिः स्यात्; परिणामायोगात्, इत्यभिप्रायमाह—*न हि निरवयवमिति* ॥ 'निरञ्जनत्वादि'त्युक्तमयुक्तम्; निरवयवस्यापि हेतुसंसर्गात्परिणामाङ्गीकारप्रसङ्गात्, तथाच तस्यासिद्धत्वमित्याशङ्क्य परिणामित्वापादकहेतुसंसर्गायोगादित्यभिप्रायेण व्याचष्टे—*न हि निरवयवमिति* ॥ विषयस्येत्यनेन विषयस्य चिदात्मकत्वनिराकरणं व्यर्थम्; अधि-

तत्त्वदीपनम्

व्यधिकरणता, द्वितीये त्वसिद्धिरित्याशङ्क्याह—*अयमाशय इति* ॥ अवयवश आशयोऽभिधीयत इत्यर्थः। हेत्वसिद्धिं निरस्यति—*चेत्यं हीति* ॥ कर्मकारकतया भासने हेतुमाह—*जडमिति* ॥ फलितमाह—*तत्कथमिति* ॥ कर्मत्वेऽप्यात्मत्वं किं न स्यादित्यत आह—*कर्तुरिति* ॥ क्रियां प्रति गुणभूतः कर्ता, तस्य विपरीततया प्रधानतया स्थानमवस्थानं; तद् गतं प्राप्तं येन तत्तथोक्तम्। गुणत्वप्राधान्ययोः कथमेकत्र विरोधः? गन्तुर्विदिकर्मत्वदृष्टेः, इत्याशङ्क्याह—*एकस्यामिति* ॥ द्वितीयमनुवदति—*आगन्तुक इति* ॥ सोऽपि विकल्पासह इत्याह—*सहेतुरिति* ॥ आत्मनोऽनात्माकारपरिणामे किमन्यो हेतुरस्त्युत नेति विकल्पार्थः ॥

आत्मनोऽपरिणामित्वम् "आत्मकृतेः परिणामादि"ति सूत्रेण "सच्च त्यच्चाभवदि"त्यादिश्रुत्या च विरुद्धमित्याशङ्क्य, निरवयवस्याविद्यां विना तत्त्वतः परिणामानुपपत्तिरित्याशयमाह—*न हि निरवयवमिति* ॥ आद्यं दूषयति—*न सहेतुरिति* ॥ असिद्धिं निरस्यति—*नहीति* ॥ चेतनस्यानात्मांशत्वाभावेऽप्यनात्मनश्चैतन्यांशत्वं स्यादिति शङ्कते—*तर्ह्यनात्मेति* ॥ *क्वचिद् दृष्टमिति* । "अहमुपलभ" इत्युपलब्ध्याश्रयत्वमहंकारस्य दृष्टमित्यर्थः। चैतन्यांशत्वं किं स्वभावः, उताऽऽगन्तुकम्? इति विकल्प्याद्यं प्रत्याह—*नेत्याहेति* ॥ समयोरप्यात्मनोर्विषय-विषयित्ववद्

प्रदीपः

कारणं नात्रावसरति, किन्तु द्वितीयमपीति सूचयन् विशेषणान्तरमाह—* तमःप्रकाशवद्विरुद्धस्वभावयोरिति * ॥ अनेन च सादृश्यज्ञानासंभव उपक्षिप्यते। न हि शुक्तिकायामिवेङ्गालेऽपि रजतज्ञानमुदेतीति. सादृश्यज्ञानमवश्यमध्यासकारणमिति स्वीकर्तव्यमिति, प्रकृते तदभावान्नात्मन्यन्तःकरणाध्यास इति भावः ॥ * इतरेतरभावानुपपत्तौ=तादात्म्यप्रतीत्यनुपपत्तौ ॥

भामती

तादात्म्यमिति यावत् ; तस्यानुपपत्ताविति ॥ स्यादेतत्—मा भूद्धर्मिणोः परस्परभावः, तद्धर्माणां तु जाड्य-चैतन्य-नित्यत्वानित्यत्वादीनामितरेतराध्यासो भविष्यति; दृश्यते हि धर्मिणोर्विवेकग्रहणेऽपि तद्धर्माणामध्यासः, यथा कुसुमाद् भेदेन गृह्यमाणेऽपि स्फटिकमणावतिस्वच्छतया जपाकुसुमप्रतिबिम्बोद्ग्राहिणि—'अरुणः

ऋजुप्रकाशिका

इतरेतरभावः, तदनुपपत्तावित्यर्थे क्रियमाणे धर्मिणोस्तादात्म्याध्यासमङ्गीकृत्य संसर्गाध्यासनिषेध उक्तः स्यात् ; तथाच सिद्धसाधनं स्यात् ; सिद्धान्तिना तादात्म्याध्यासाङ्गीकारात्, धर्मिणोः संसर्गाध्यासनिषेधाङ्गीकाराच, अतोऽर्थमाह—*इतरेतरभाव इतरेतरत्वम्, तादात्म्यमिति यावदिति* ॥ *तस्यानुपपत्तावितीति* ॥ *इतरेतर-तादात्म्यस्य प्रतीत्यनुपपत्तौ सिद्धायाम्, तादात्म्यस्याध्यासानुपपत्तौ सिद्धायामिति निर्गलितार्थः । तथाच इत्थमनुमानम्—युष्मदस्मत्प्रत्ययगोचरत्वेन विषय-विषयित्वेन चोक्तावनात्मात्मानौ, नेतरेतरतादात्म्यप्रतीत्यापन्नौ, इतरेतरानात्मत्वेन प्रतिभासमानत्वात् ; तमः-प्रकाशवदिति । नेतरेतरतादात्म्यापन्नावित्येव साध्ये क्रियमाणे सिद्धसाधनं स्यात्, अतः प्रतीत्यापन्नावित्येतत्पर्यन्तधावनम् । उक्तयोर्धर्मिणोस्तादात्म्याध्यासानुपपत्तिमङ्गीकृत्य धर्माणामध्यासं शङ्कते—*स्यादेतदिति* ॥ *परस्परभाव इति* । परस्परतादात्म्यप्रतीतिलक्षणोऽध्यास इत्यर्थः । *जाड्यम्=अनात्मभूतविषयधर्मः । *चैतन्यम्=विषयिभूतस्यात्मनो धर्मः । एवमनित्यत्वमनात्मभूत-विषयधर्मः, नित्यत्वं विषयिभूतस्याऽऽत्मनो धर्मः । एतदादीनां धर्माणामितरेतरत्राध्यासो भविष्यति=अनात्म-गतानामात्मन्यात्मगतानामनात्मन्यध्यासो भविष्यतीत्यर्थः । *ननु* धर्मिणोरितरेतरतादात्म्याध्यासा-भावे धर्माणामितरेतराध्यासः क्व दृष्ट इति ? अत आह—*दृश्यते हीति* ॥ अत्र स्फटिके जपाकुसुमगतलौहित्य-धर्माध्यासेऽपि जपाकुसुमे स्फटिकधर्मारोपो नास्तीति, 'धर्माणामितरेतराध्यासो दृश्यते ही'त्ययुक्तमित्यभिप्रेत्याह—

पञ्चपादिकाविवरणम्

नेत्याह—*विषयस्यापीति* समत्वादिति* ॥ *अयमर्थः—यथा द्रष्टुर्द्रष्ट्रन्तरं न प्रत्यक्षगोचरः, अनुमेयमेव तत्, एवं विषयोऽपि स्यादिति । परतोऽपि नानात्मनश्चिदाकारपरिणामः ; जडोपादानस्यापि कार्यस्य जडत्वात्, तर्ह्यात्मचैतन्यमेवानात्मा स्वांशत्वेन स्वीकरोतीति चेत्, तत्राह—* चितेरप्रतिसंक्रमत्वादिति * । तस्मात्-क्वचिदपि तादात्म्यादर्शनादन्यत्रान्यतरांशदर्शनेनान्यतरांशाध्यासो नोपपद्यत इति ।

तत्त्वदीपनम्

आत्मानात्मनोरपि किं न स्यादित्याशङ्कायामाह—*अयमर्थ इति* ॥ प्रत्यग्विषयत्वस्य निषिध्यमानत्वान्न व्यभि-चार इत्यर्थः । द्वितीयेऽपीदं निरूपणीयम्—किमनात्मा स्वतश्चिदाकारेण परिणमते, उतान्यतः ? नाद्यः ; सदा तत्परि-णामप्रसङ्गादिति मत्वा द्वितीयं प्रत्याह—*परतोऽपीति* ॥ विमतः, जडः, जडोपादानत्वात् ; संमतवदित्यर्थः ॥

मुखसन्निधानाद्दर्पणस्य तदाकारत्ववदनात्मनोऽपि चित्सन्निधानाच्चिच्छायता स्यादिति चोदयति—*तर्ह्यात्मेति* । अनात्मनश्चिच्छायता चिदाकारपरिणामः, उत चैतन्यस्य तत्र संक्रमणम् ? नाद्यः ; पूर्वरूपे स्थिते नष्टे वाऽन्यस्यान्य-भावासंभवात्, अन्त्येऽपि संक्रमणं किं तात्त्विकम्, उतातात्त्विकम् ? न प्रथमः ; निष्क्रियत्वात्पूर्णत्वाच्च । न द्वितीयः ; क्व चित्तात्त्विकांशांशिताभावे तत्कल्पनाया एवासंभवादित्यभिप्रेत्याह—*तत्राहेति* ॥ टीकायामपेक्षितं पूरयति—*तस्मादिति* ॥

भाष्यभावप्रकाशिका

ननु—मा भूत् धर्मिणोरितरेतरभावः, तद्धर्माणां तु जाड्य-चैतन्य-नित्यत्वानित्यत्वादीनामितरेतरा-

भावानुपपत्तौ सिद्धायाम्, तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः, इत्यतोऽ-

भामती

स्फटिकः' इत्यारुण्यविभ्रम इति, अत उक्तम्—*तद्धर्माणामपीति*॥ इतरेतरत्र धर्मिणि धर्माणां भावो विनिमयः,

ऋजुप्रकाशिका

इत्यत उक्तमिति। *विनिमयो* व्यत्यासः, इतरेतरत्र धर्मिणि इतरेतरधर्माध्यास इति यावत्; तस्यानुपपत्तिरित्यर्थः। *ननु* उभयत्र धर्मिण्युभयगतधर्माध्यासादर्शनेन तदुपपत्तावप्यन्यतरत्र स्फटिकेऽन्यतरजपाकुसुमगतधर्माध्यासदर्शनेन तद्वत् स्यादित्यत आह—*अयमभिसन्धिरिति* ॥ धर्मिणोरन्यतरत्रान्यतरस्य

पञ्चपादिका

प्रतिसङ्क्रमत्वात्। *तद्धर्माणामपि सुतरामिति* ॥ एवं स्थिते स्वाश्रयमतिरिच्य धर्माणामन्यत्र भावानुपपत्तिः सुप्रसिद्धेति दर्शयति। इतिशब्दो हेत्वर्थः। यस्मादेवमुक्तेन न्यायेनेतरेतरभाव-

पञ्चपादिकाविवरणम्

तद्धर्म्माणामपि सुतरामित्यारभ्याभाव एवाध्यासस्य युक्त इत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः।

वार्तिकम्

पत्तिः सिद्धा भवति। *ननु*—धर्मिणोर्जपाकुसुमेन्द्रनीलमण्योरितरेतरभावाभावेऽपि तद्धर्मयोर्नील-लौहित्ययोः परस्परविनिमयो दृष्टः, तद्वद् दृग्दृश्ययोरितरेतरभावाभावेऽपि तद्धर्माणां चैतन्यादिकर्तृत्वादीनां विनिमयसंभवात् तद्द्वारा तयोरप्यध्याससिद्धिर्भविष्यतीति, नेत्याह—* तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरिति *॥ इतरेतरस्मिन् भावो विनिमयः, तदनुपपत्तिरित्यर्थः। इतरेतरयोर्भावो धर्मः, धर्मप्रधानो निर्देशः; इतरेतरधर्मानुपपत्तिरिति वार्थः। धर्मिणं विहाय धर्माणां स्वातन्त्र्येण गमनानुपपत्तेः; अन्यथा च धर्मत्वहानेर्न तद्विनिमयः संभावयितुमपि शक्यः, किं पुनः प्रमापयितुमित्यभिप्रेत्योक्तम्—*सुतरामिति *॥ अपिशब्दो धर्म्यपेक्षया। योऽपि जपा-नीलमणिधर्मयोर्नील-लौहित्ययोः परस्परविनिमय उक्तः, सोऽप्यसिद्धः; न हि तत्रापि धर्मविनिमयोऽस्ति; उक्तविरोधात्; किं तर्हि? तत्प्रभयोर्नील-लोहित-द्रव्ययोस्तत्र गत्वा मिश्रणात् तदविवेकाद् रञ्जितपटवत् तद्व्यवहारमात्रं भवतीति न किञ्चिदनुपपन्नम्॥

भाष्यभावप्रकाशिका

रोपः स्यादिति, तत्राह—*तद्धर्माणामिति* ॥ पूर्वोदितविरोधभावादतिविरोधभावाद्धर्मिणमतिक्रम्य धर्माणामन्यत्र गमनासंभवाच्च—*सुतरामित्युक्तम्* ॥ इति शब्दो हेत्वर्थः। अध्यासव्यापकभेदाग्रहविरुद्ध-भेदग्रहस्येह संभवाद् अध्यासव्यापकभेदाग्रहं व्यावर्तयन् भेदग्रहस्तद्व्याप्यमध्यासमपि निवर्तयति यस्मादित्यर्थः। अथवा—कचित् सामान्यविशेषाध्यासेनाप्रमिततादात्म्ययोरन्यत्रान्यतरांशदर्शनादन्यतरांशाध्यारोपो दृष्टः, प्रकृते तु चिदचितोस्सामान्यविशेषात्मनाऽनाकलिततादात्म्ययोरारोपो न संभवति यस्मादित्यर्थः। तस्मादात्मन्यनात्मारोपो न युक्त इत्याह—*अत इति* ॥ आत्मन्यधिष्ठानेऽनात्मारोपो

प्रदीपः

ननु—धर्मिणोस्तादात्म्याध्यासाभावेऽपि धर्माणां परस्पराध्यासः कथं न संभवति? न हि धर्माध्यासो यत्र यत्र, तत्र तत्र धर्म्यध्यास इति नियमः; विनापि लोहितपुष्पाध्यासं स्फटिके लौहित्याध्यासदर्शनात्, इत्यत आह—* तद्धर्माणामपि

भामती

तस्यानुपपत्तिः ॥ अयमभिसन्धिः—रूपवद् द्रव्यमतिस्वच्छतया रूपवतो द्रव्यान्तरस्य तद्विवेकेन गृह्यमाणस्यापि छायां गृह्णीयात्, चिदात्मा त्वरूपो विषयी न विषयच्छायामुद्ग्राहयितुमर्हति। यथाहुः—"शब्द-गन्ध-रसानां च कीदृशी प्रतिबिम्बता" इति। तदिह पारिशेष्याद्विषयविषयिणोरन्योन्यात्मसंभेदेनैव तद्धर्माणामपि परस्परसंभेदेन विनिमयात्मना भवितव्यम्, तौ चेद्धर्मिणावत्यन्तविवेकेन गृह्यमाणावसंभिन्ने, असंभिन्नास्तयोर्धर्माः ; स्वाश्रयाभ्यां व्यवधानेन दूरापेतत्वात्, तदिदमुक्तम्—*सुतरामिति* ॥ *तद्विपर्ययेणेति* ॥

ऋजुप्रकाशिका

प्रतिबिम्बभावो वा, धर्मिणोः परस्परतादात्म्याध्यासो वा धर्माध्यासे निमित्तत्वेन वक्तव्यः ; तत्र आत्मानात्मनोर्धर्माध्यास आद्योक्तं निमित्तं न लभ्यत इत्यभिप्रेत्याह—*रूपवद्धि द्रव्यमिति* ॥ यद्यद् रूपवद् द्रव्यं स्वच्छम्, तद् रूपवद्द्रव्यस्य प्रतिबिम्बग्राहीति व्याप्तेरित्यर्थः। नच—नीरूपस्याकाशस्य जले प्रतिबिम्बभावदर्शनेनास्या व्याप्तेर्व्यभिचार इति—वाच्यम् ; स्वगतसूर्यकिरणप्रतिबिम्बद्वाराऽऽकाशस्य जले प्रतिबिम्बत्वभ्रम इत्युक्तव्याप्तेर्व्यभिचाराभावात्। यद्यपि नीरूपस्यापि रूपस्य प्रतिबिम्बोऽस्त्येव ; तथाऽपि द्रव्यस्य प्रतिबिम्बो रूपवत एवेति नियम इति भावः। प्रतिबिम्बः छायाशब्दार्थः। अस्तूक्तव्याप्तिः, प्रकृते किमायातमिति? अत आह—*चिदात्मा त्विति। न विषयच्छायामुद्ग्राहयितुमर्हतीति* ॥ न विषये प्रतिबिम्बितुमर्हतीत्यर्थः। एवं विषयोऽपि न चिदात्मनि प्रतिबिम्बितुमर्हतीत्यूहनीयम्। नीरूपस्य प्रतिबिम्बाभावे संमतिमाह—*यथाहुरिति* ॥ द्वितीयं परिशेषयति—तदिहेति* ॥ "विषयविषयिणोरि"त्यनन्तरं धर्मिणोरिति शेषः। *अन्योन्यसम्भेदेनैव*=अन्योन्यतादात्म्याध्यासेनैव। तद्धर्माणामपि *विनिमयात्मना=व्यत्यासात्मना, *परस्परसंभेदेनैव*=परस्परतादात्म्याध्यासेनैव, *भाव्यम्=अन्यतरधर्मिणि अन्यतरधर्माध्यासेन भाव्यमित्यर्थः। अस्त्वेवम्, तावता किमायातमिति? अत आह—*तौ चेदिति*। आत्मान्तःकरणे विषय-विषयिणौ चेद्धर्मिणावित्यर्थः। *असंभिन्नौ=तादात्म्याध्यासानापन्नौ। *असंभिन्नाः=व्यत्यासेन परस्पराध्यासानापन्नाः। तत्र हेतुमाह—*स्वाश्रयाभ्यां व्यवधानेनेति* ॥ धर्मिणोः परस्परभिन्नत्वज्ञानप्रयुक्तेनान्यधर्मिण्यन्यधर्मानाश्रयत्वज्ञानेनेत्यर्थः। अध्यासानुपपत्ति-

वार्तिकम्

तेनैवं वाक्यार्थयोजना कर्तव्या—विषय-विषयिणोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः। *कुतस्तयोरितरेतरभावानुपपत्तिरिति* ? तत्राह—*तमःप्रकाशवद्विरुद्धस्वभावयोरिति*। तदपि कुतः ?—*युष्मदस्मत्प्रत्ययगोचरयोरिति* ॥ तेनैवं प्रयोक्तव्यम्—विवादगोचरतापन्ना धर्माः, नेतरेतरविनिमयभाजः, इतरेतरभावानापन्नधर्मत्वात् ; घटपटत्वादिवदिति। नचासिद्धिः ; दृग्दृश्यौ, न परस्परात्मानौ, विरुद्धस्वभावत्वात् ; तमःप्रकाशवत्। नचायमपि हेतुः साध्यसमत्वादसिद्धः ; तथाहि—तौ, विरुद्धस्वभावौ, युष्मदस्मत्प्रत्ययगोचरत्वात्, मार्जारमूषकवदिति। न हि भोक्तभोग्ययोरविरुद्धस्वभावतयैकता भवति ; तथा सति भोक्तृभोग्याविभागापत्तेः, भोग्यस्यापि भोक्तृत्वापत्तेश्च। तथाच सर्वलोकव्यवहारोच्छेद इति विपक्षबाधकस्तर्कः। इयमेवाशङ्का—"भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्" इत्यस्मिन्नधिकरणे भविष्यति ; परंतु तत्र सर्वस्य जगतश्चेतनकारणाक्षेपकतया मुखतः सूत्रकारेणोपात्ता, अत्र तु भाष्यकारेणाध्यासाक्षेपकतयेति न पौनरुक्त्यम् ॥

प्रदीपः

सुतरामितरेतरभावानुपपत्तिरिति* ॥ अध्यासो द्विविधः—सोपाधिको निरुपाधिकश्च। सोपाधिकोऽपि प्रतिबिम्बाध्यासरूपो धर्माध्यासरूपश्चेति। यत्रोपाधिबिम्बयोः पृथग्देशोपलम्भस्तत्रैव प्रतिबिम्बाध्यासः ; यथा लोहितस्फटिकयोः,

वार्तिकम्

ननु—मध्यमानुमाने भावाभावत्वमुपाधिर्भविष्यति ; सर्वत्र पक्षेतरस्मिन् साध्यव्यापकत्वात्, पक्षे च साधनाव्यापकत्वात्। नच—व्यतिरेकासिद्धिः, घटपटयोः परस्परभावाभावरूपत्वाभावेऽपि परस्परतादात्म्याभावादिति—वाच्यम् ; तयोः परस्परमन्योन्याभावरूपत्वेन भावाभावरूपत्वात्तदभावासिद्धेः। तथाचोक्तम्—"भावान्तरमभावो हि कयाचित्तु व्यपेक्षया"—इति। नच—एवं दृग्दृश्ययोरपि परस्परमन्योन्याभावरूपत्वात् साधनव्यापकतेति—वाच्यम् ; "तदनन्यत्वमारम्भणशब्दादिभ्यः" इत्यत्र तयोरभेदस्य वक्ष्यमाणत्वात् परस्परमन्योन्याभावत्वासिद्धेः। नच—एवमपि साध्याव्यापकत्वम्, तमसो भावरूपत्वादिति—वाच्यम् ; तस्य भावरूपत्वासिद्धेः, आलोकाभावस्यैव तमस्त्वात्, गतिरूपवत्तया तदुपलब्धेस्तु देशान्तरसन्निध्यसन्निध्यालोकरूपविरोधित्वसादृश्याभ्यां तदारोपेणाप्युपपत्तेरतिरिक्तद्रव्यकल्पने प्रमाणाभावात्, देशान्तरसन्निध्यसन्निधिभ्याम्=पुनः प्रतियोग्यसन्निधिसन्निधिभ्यामित्यन्यदेतत्। भावत्वेऽपि परस्परमन्योन्याभावरूपत्वाच्च। तस्मात् तमसोऽभावरूपत्वात्, भावाभावत्वोपाधेः साध्याव्यापकत्वाभावाद् नोक्तहेतुस्साधुरिति—चेत्, *न* ; क्रियागुणवत्तया तमसः प्रतीतेरभावत्वासिद्धेः। नच—आलोकाभावे तमसि तदारोपात् तद्वत्तया प्रतीतिरुपपद्यत इति—वाच्यम् ; बाधाभावात्। बाधे हि सत्यारोपः कल्प्यते ; अन्यथाऽतिप्रसङ्गात्, सर्वत्रानाश्वासापत्तेः, आरोपाभावाच्च। तथाहि—गृहीते खल्वालोकाभावे धर्मिणि तदारोपो वाच्यः ; धर्मिज्ञानस्यारोपहेतुत्वात्। न चैवं द्वितीयमारोपितक्रियागुणवदभावज्ञानं चक्षुषा तव मते संभवति ; तत्सहकारिण्या योग्यानुपलब्धेरभावात्, प्रतियोगि-तद्व्याप्येतरयावत्तद्ग्राहकस्यानुपलब्धियोग्यतात्वात्, ग्राह्याभावनिश्चयाभावस्यापि प्रतियोगिग्राहकत्वेन तदन्तर्भावात्, प्रकृते चारोपकाले धर्मिज्ञानसत्त्वेन ग्राह्याभावनिश्चयसत्त्वात् तदभावाभावेन योग्यताया अभावात्। अपिच यद्यालोकाभावत्वं तमस्त्वम्, तर्हि तद्ग्रहे विशेषदर्शनसत्त्वाद् न द्रव्यधर्मारोपस्तत्र संभवति ; तस्यारोपविरोधित्वात्, तद्ग्रहे तु धर्मितावच्छेदकतयेदन्त्ववत्तमस्त्वस्याभानापत्तेः। स्वतो गतिमत्त्वेऽश्वादिवदन्यानुविधायिगमनानुपपत्तिरिति चेत्, मणिप्रभावत्तदुपपत्तेः। यदि ब्रूषे तमः स्वत एव चेद् गमनक्रियावत्, किमिति तर्हि आवारकद्रव्यादिगमनमनुविधत्ते, स्वत एवाश्वादिवत्तद्गमनोपपत्तेः ? नैष दोषः ; स्वतो गतिमत्त्वेऽपि मणिप्रभायास्तेजोद्रव्यस्य गमने स्वाश्रयमणिगमनानुविधानवत्तदुपपत्तेरिति। *एतेन*—रूपदर्शनाभावस्तम इति मतम्—*अपास्तम्* ; बहिस्तमोदर्शनाभावप्रसङ्गात्, रूपदर्शनकालेऽपि तमउपलब्धिप्रसङ्गाच्च, तदधिकरणस्यात्मनस्तज्ज्ञानस्य वा रूपदर्शनस्य तदभावस्य च तत्काले सत्त्वात्, विषयज्ञानमन्तरेणात्मनि ज्ञानान्तरस्यामभ्युपगमात्तदाश्रयतयैवात्मनो भानाङ्गीकारात्, केवलाधिकरणाभावत्वकल्पनस्यायुक्तत्वात्, कैवल्यानिरूपणात्, धर्मिस्वरूपमात्रत्वे तस्य पूर्वदोषानिस्तारात्, तदतिरिक्तत्वे चातिरिक्ताभावाभ्युपगमप्रसङ्गात्, नाममात्रभेदात्,

प्रदीपः

चैतन्यान्तःकरणे तु भिन्ने अपि न पृथग्देशयोर्विविच्य गृह्येते। "युष्मदस्मत्प्रत्ययगोचरयोरि"त्यनेनापि भेदप्रतीतियोग्यत्वमेव वर्णितम्, न तु पृथग्देश उपलभ्यमानत्वमपीति न पूर्वोक्तदोषः॥ * धर्मप्रतिबिम्बोऽपि धर्मिप्रतिबिम्बमपेक्षत एव। न हि धर्मिणोः संसर्गं विना धर्माणां विनिमयः संभवति। असङ्गत्वात्त्वात्मनो नान्तःकरणेन संसर्गः। तथाच नीरूपस्य नीरूपेऽपि प्रतिबिम्बसंभव इति पक्षेऽपि नात्र धर्मिप्रतिबिम्बं विना धर्ममात्रप्रतिबिम्बतासम्भवः॥ * सोपाधिकाध्यासोऽपरोऽपि धर्ममात्रस्य दोषवशने धर्म्यध्यासं विना न संभवति। अयो दहतीत्यादौ वह्नितादात्म्यमपि दोषवशेनावश्यमेव स्वीकर्तव्यम्। तथाचात्र यदि न धर्म्यध्यासः, तर्हि कथं धर्माध्याससंभवः ? निरुपाधिकाध्यासेऽपीयमेव गतिः। तथाच धर्म्यध्यासव्याप्यत्वाद्धर्माध्यासस्य व्यापकधर्म्यध्यासासम्भवे धर्माध्यासोऽसंभवदुक्तिक एवेति, अहंप्रतीतिर्न भ्रमात्मिकेति, अहंप्रतीतिविषयस्यैवात्मत्वात्

स्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां

ऋजुप्रकाशिका

रुक्ता, तामुपसंहरति—*भाष्ये—अस्मत्प्रत्ययेति* ॥ भाष्ये—"अतोऽस्मदि"त्यतः पूर्वं विद्यमान 'इति'शब्दो हेत्वर्थः। यत उक्तविधया अध्यासानुपपत्तिः, अत इत्यर्थः। अथवा—अतस्मिन् तत्प्रतीतित्वमध्यासत्वमित्यध्यासलक्षणं वाच्यम् ; तल्लक्षणम्—'अहं मनुष्यः' इत्यध्यासे लक्ष्यभूते नास्तीत्युक्तम्—*"युष्मदस्मदि"त्यादिना तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यन्तेन* ॥ अधुना लक्ष्यभूतस्याध्यासस्यैवाभाव इत्याह—*भाष्ये—इत्यतोऽस्मत्प्रत्ययगोचर इति* ॥ *वस्तुतस्तु*—*"अतोऽस्मत्प्रत्ययगोचर"* इत्यादिभाष्यस्य

पञ्चपादिका

सम्भवः, अतः। *अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके इति* ॥ अस्मत्प्रत्यये योऽनिदमंश-

पञ्चपादिकाविवरणम्

ननु अहङ्कारादिषु शरीरान्तेष्वहमित्येव प्रत्ययः, न त्विदमिति कथमेषां युष्मत्प्रत्ययगोचरत्वमिति ? तत्राह—

ऋजुविवरणम्

ष्ठानस्यान्यात्मत्वं निराकर्तव्यम्, अधिष्ठानत्वं चात्मन एव, तस्य चान्यात्मत्वं निरस्तम्, अतः किमनेन ? इत्याशङ्क्याऽनात्माऽधिष्ठानत्वेन शङ्कां दर्शयति—*तर्ह्यनात्मैवेति* ॥ समत्वेऽपि विषयत्वं दृश्यते, अतो नायं हेतुरित्याशङ्क्य व्याचष्टे—*समत्वादिति* ॥ *अयमर्थ इति*॥ 'तद्बलनिर्भासिततये'त्यनेन मनुष्याभिमानस्य युष्मदर्थत्वसाधनं किमर्थम् ? न हि युष्मदर्थस्य चैतन्येऽध्यस्तत्वनिराकरणे तत्साधनं सङ्गच्छते ; नाप्येतेषां युष्मदर्थत्वशङ्काकारणमप्यस्तीत्याशङ्क्यावतारयति—*नन्वहंकारादिष्विति* ॥ अथवा—अहंकारादेरध्यस्तत्वमनन्तरग्रन्थे वक्ष्यति, अत्र युष्मत्प्रत्ययगोचरस्याध्यस्तत्वं निराक्रियते ; अतश्चोद्यपरिहारयोर्भिन्नविषयत्वादसंबद्धं भाष्यम्। नच तेषामेवात्र युष्मच्छब्देन ग्रहणादेकविषयत्वम् ; तेषां युष्मदर्थत्वासंभवादिति शङ्कां बीजप्रदर्शनेन दर्शयित्वा, तां निवर्तयतीत्याह—*नन्वहंकारादिष्विति* ॥

तत्त्वदीपनम्

आत्मा, न मुख्यप्रत्यक्त्वादिभाक्, अहमिति प्रतिभासमानत्वात् ; अहङ्कारवदित्याशङ्क्य, प्रतीतिकर्मत्वं हेतुः ? उत प्रतीतिरूपत्वम् ? आद्येऽसिद्धिरित्याह—*अस्मत्प्रत्यय इति* ॥ (टीकायाम्) अस्मच्चासौ प्रत्ययश्चेत्यस्मत्प्रत्ययोऽन्तःकरणम्, अहंप्रत्ययो वा ; तत्रेदमंशत्वं कर्मत्वं न विद्यत इति यावत्। तत्र हेतुः—*चिदिति* ॥ द्वितीये साधनवैकल्यमिति ॥ अहंकारादेरहमित्येव प्रतीयमानत्वान्न युष्मदर्थत्वमिति, न तदध्यस्तताक्षेप इति चोदयति—*नन्वहंकारादिष्विति* ॥

वार्तिकम्

तथाचापसिद्धान्त इति—*अपास्तम्* ; विस्तरस्तु वेदान्तमन्दाकिन्यामद्वैतामृतकन्दे चानुसन्धेयः। सर्वथापि भावरूपं तमः। नच—भावरूपत्वेऽपि परस्पराभावरूपत्वाद् भावाभावत्वसिद्धिरिति—वाच्यम् ; भावस्याभावत्वाभ्युपगमे सर्वशून्यतावादप्रसङ्गात्। अतः साध्याव्यापकत्वान्न भावाभावत्वमुपाधिरिति ॥ एवं सति विषयविषयिणोस्तादात्म्यासिद्धौ तदन्यथानुपपत्तिगम्यः सत्यानृतमिथुनीकरणरूपः

भाष्यभावप्रकाशिका

न संभवति चेत्, अस्तु, तर्ह्यनात्मन्येवात्मारोप इति, तत्राह—*तद्विपर्ययेणेति* ॥ *तद्धर्माणां चेति* ॥ विषयानुभव-नित्यत्वाऽऽनन्दादीनामन्तःकरणप्रत्ययेन परतन्त्रतयाऽवभासमानत्वादुपचाराद्धर्मत्व-

चाध्यासः,तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम्;

भामती

विषयविपर्ययेणेत्यर्थः ॥ मिथ्याशब्दोऽपह्नववचनः । एतदुक्तं भवति—अध्यसो भेदाग्रहेण व्याप्तः,

ऋजुप्रकाशिका

पूर्वोक्तविधयाऽध्यासाभावोपसंहारत्वमेव सम्यक् । तद्विपर्ययेणेत्यस्य विवरणम्—*विषयविपर्ययेणेति* ॥ *विषयः=अचेतनः । *तद्विपर्ययः=चैतन्यम्, तेन ; इत्थंभावे तृतीया, चैतन्यरूपेण स्थितस्य विषयिण इत्यर्थः । *अपह्नववचन इति* ॥ तथाचाभाव एवाध्यासस्य युक्त इत्यर्थः । *तदयं निर्गलितार्थः*—चिदात्मके विषयिणि देहेन्द्रिय-मनो-बुद्ध्याद्यात्मकविषयतादात्म्याध्यासो नास्ति, अत एवोक्ते विषयिण्युक्तविषयधर्माध्यासोऽपि नास्ति ; एवं विषये = देहेन्द्रिय-मनो-बुद्ध्यादौ विषये चिदात्मतादात्म्याध्यासो नास्ति, अत एवोक्ते विषय उक्त-विषयिधर्माध्यासोऽपि नास्तीति ॥ अध्यासो नास्तीत्युक्तम्, तत्र हेतुं स्फोरयति—*एतदुक्तं भवतीति* ॥ *भेदाग्रहेण व्याप्त इति* ॥ यद्विषयकोऽध्यासः, तद्विषयको भेदाग्रह इति व्याप्तिरस्तीत्यर्थः । ततः किम् ? तत्राह—*तद्विरुद्ध इति* ॥ *इह=चिदात्मनि । पूर्वोक्तविधया देहेन्द्रिय-मनो-बुद्ध्यादिविषयप्रतियोगिकभेदग्रहोऽ-

पञ्चपादिका

श्चिदेकरसः, तस्मिंस्तद्बलनिर्भासिततया लक्षणतो युष्मदर्थस्य मनुष्याभिमानस्य सम्भेद इवावभासः, स एवाध्यासः । *तद्धर्माणां चेति* ॥ यद्यपि विषयाध्यासे तद्धर्माणामप्यर्थसिद्धोऽध्यासः ; तथापि विनापि विषयाध्यासेन तद्धर्माध्यासो बाधिर्यादिषु श्रोत्रादिधर्मेषु विद्यत इति पृथग्धर्मग्रहणम् ।

पञ्चपादिकाविवरणम्

* तद्बलनिर्भासिततयेति * ॥ तस्यास्मत्प्रत्ययगोचरस्य चैतन्यस्य बलेन निर्भास्यत्वादहङ्कारादेः प्रतिभासतो

ऋजुविवरणम्

अहङ्कारादिवन्मनुष्याभिमानग्रहणमुपलक्षणमिति दर्शितवान् । तच्छब्देनास्मत्प्रत्ययः परामृश्यते ; अवभासकत्वेन प्रकृतत्वात्, तथा सति तदवभास्यचैतन्यवद् न युष्मदर्थता, ततो विरुद्धो हेतुः, अंशेऽसिद्धश्चेति शङ्कां निराकरोति—*तस्यास्मत्-

तत्वदीपनम्

शरीरादौ यद्यपि न स्वरूपेणाहंप्रत्ययः ; तथापि मनुष्यत्वकाणत्वादिविशिष्टे स समस्तीत्यर्थः । "तद्बलनिर्भासिततये"त्यत्र तच्छब्देनास्मत्प्रत्ययो निर्दिश्यत इति शङ्का स्यात्, तथाचास्मत्प्रत्ययभास्यचैतन्यवन्नाहंकारादेर्युष्मदर्थत्वमित्याशङ्क्याह—*तस्येति* ॥ अस्मत्प्रत्ययस्य विशेषणत्वेनोपात्तत्वात् चितेश्च प्राधान्यात्तस्या एव परामर्श इत्यर्थः ।

अहमिति प्रतीयमानस्य कथं युष्मदर्थत्वम् ? तत्राह—*अहंकारादेरिति* ॥ तद्बलनिर्भासिततयैव युष्मदर्थत्व-

वार्तिकम्

सिद्धान्त्यभिमतोऽध्यासो न सिद्ध्यतीति फलितमाह—*इत्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः, तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति ॥

भाष्यभावप्रकाशिका

व्यपदेशमभ्युपगम्य तद्धर्माणामित्युक्तम् । आत्मधर्मत्वाभिमतानामनुभवादीनां चिद्रूपात्ततो भेदाभावान्न

भामती

तद्विरुद्धश्चेहास्ति भेदग्रहः, सोऽग्रहं निवर्तयंस्तद्व्याप्तमध्यासमपि निवर्तयति । मिथ्येति भवितुं युक्तं यद्यपि ;

ऋजुप्रकाशिका

स्तीत्यर्थः । ततः किम् ? तत्राह—*स इति*॥ भेदग्रह इत्यर्थः । *अग्रहम्=भेदाग्रहम् । *अध्यासमपि निवर्तयतीति* ॥ भेदाग्रहस्याध्यासव्यापकत्वाद् व्यापकीभूतभेदाग्रहाभावे व्याप्यभूताध्यासस्याप्यभाव इत्यर्थः । यद्यपि वस्तुतोऽहंकारातिरिक्त आत्मन्यहंकाराद् भेदाग्रहादात्मन्यहंकारतादात्म्याध्यासो युक्तः, अत एव—अहंकारादिगतकर्तृत्वादिधर्माध्यासोऽप्यात्मनि सुतरां युक्तः ; तथाप्यहंकारातिरिक्तात्मनि प्रमाणं नास्ति। यद्यस्ति, तदा वक्तव्यम् ---किं प्रत्यक्षं प्रमाणम् ? अनुमानम् ? आगमो वा ? नाद्यः; 'अहमि'त्यात्मनोऽहंकारात्मतयैवानुभवात्, न द्वितीयः ; तद्व्याप्तिलिङ्गाभावात्, *न तृतीयः ;* आगमस्य सत्त्वेऽप्यात्मनोऽहंकारात्मत्वानुभवविरोधेन तस्योपचरितार्थत्वकल्पनाया एवोचितत्वादित्यभिसन्धिः । *यद्यपीति पदं "युष्मदस्मदि"त्यादिशङ्काग्रन्थे योजितम्, तत्

पञ्चपादिका

तद्विपर्ययेण विषयिणस्तद्धर्माणाञ्चेति ॥ चैतन्यस्य तद्धर्माणां चेत्यर्थः । *ननु* विषयिणश्चिदेकरसस्य कुतो धर्माः ? ये विषयेऽध्यस्येरन् , *उच्यते* ; आनन्दो विषयानुभवो नित्यत्वमिति सन्ति धर्माः, अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्त इति न दोषः ।

अध्यासो नाम—अतद्रूपे तद्रूपावभासः, स मिथ्येति भवितुं युक्तमिति । मिथ्याशब्दो द्व्यर्थः—

पञ्चपादिकाविवरणम्

युष्मदर्थत्वाभावेऽप्यपरोक्षतयावभास्यत्वेन लक्षणेन युष्मदर्थभावो युज्यत इत्यर्थः । *अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्त इति* ॥ अन्तःकरणवृत्त्युपाधौ नानेवावभासन्त इत्यर्थः । भूयोऽवयवसामान्यसादृश्या-

ऋजुविवरणम्

प्रत्ययगोचरस्येति* ॥ किं तल्लक्षणमिति ? तदाह—*अपरोक्षतयेति* ॥ *'चैतन्यादि'ति* चैतन्यावभास्यत्वं प्रतीयते ; तथा सति युष्मदर्थत्वम् । *यद्वा*—कथमपृथग्भूतानां पृथग्भूतत्वेनावभासः ? इत्याशङ्क्याभिप्रायमाह—*अन्तःकरणेति* ॥ *ननु* मा भूत्तादात्म्यम्, तथाप्यध्यासः संभवत्येव ; तादात्म्यहीनयोरेवाध्यासदर्शनात् शङ्खपीतिमादौ, शुक्तिरजतयोरपि न तादात्म्यम्, इदन्त्वस्य पुरोदेशत्वातिरेकेणानिरूपणात्, तेन तादात्म्याभावेऽपि नाध्यासो निराकर्तुं शक्यते । सामग्र्यभावेन हि कार्यं निराक्रियेत, न तादात्म्यस्य सामग्र्यामन्तर्भावः ; व्यभिचारात्, अतो यद्यप्येवमित्यङ्गीकारो न युक्त इत्याशङ्क्याभिप्रायमाह—*भूयोऽवयवसामान्येति* ॥ *ननु* भूयोऽवयवसामान्याद्य-

तत्त्वदीपनम्

सिद्धेः किं 'लक्षगत' इत्यनेन ? इत्याशङ्क्य व्याख्यानव्याख्येयरूपत्वान्न वैयर्थ्यमित्याह—*अवभास्यत्वेन लक्षणेनेति* ॥ तसिप्रत्ययस्तृतीयार्थे । आनन्दादीनां स्वरूपत्वान्न तद्धर्मत्वमिति शङ्कानिरासार्थमपृथक्त्वेऽपीत्युक्तम्, तदनुपपन्नम् ? अपृथग्भूतानां पृथग्भावासंभवादित्याशङ्क्योपाधिसंबन्धादविरोधमाह—*अन्तःकरणेति* ॥ निर्गुणत्वान्निरवयवत्वाच्च नात्मानात्मनोः सादृश्यम् , नापि विवेकाग्रहः ; प्रत्यक्पराग्भावादिविधया व्यावृत्त्युपलम्भात्, ततश्चाध्यासव्यापकाभावेन व्याप्याभावादसंभावितविषयफलत्वात् शास्त्रानारम्भ इति पूर्वपक्षः ।

अध्यासासंभवेन विषयाद्यसंभावनया आरम्भ आक्षिप्तेऽध्यासासंभवाङ्गीकारेण समाधानमभ्यधायि, तदयुक्तम् ; अध्यासासंभवे विषयाद्यनुपपत्तेरित्याशङ्क्य, अध्यासासंभवाङ्गीकारे तात्पर्यमाह—*भूयोऽवयवेति* ॥ भूयसामवयवानां सामान्यं समानता, सैव सादृश्यम्, तस्याभावादध्यासासंभवं प्राप्तमङ्गीकरोतीत्यन्वयः ।

पञ्चपादिका

अपह्नववचनोऽनिर्वचनीयतावचनश्च । अत्र*---अयमपह्नववचनः । *मिथ्येति भवितुं युक्तम् = अभाव

पञ्चपादिकाविवरणम्

भावात्, आत्मनि कर्तृत्वादेरहङ्काराद्युपाधिनिमित्तभ्रमत्वेऽपि शरीराद्यध्यासस्य सोपाधिकभ्रमत्वाभावात् ।

ऋजुविवरणम्

भावेऽपि मुखादौ द्वित्वाद्यध्यासो दृश्यते, तद्वदिहाप्युपाधिना स्यादित्याशङ्क्याह—*आत्मनि कर्तृत्वादेरिति* ॥

तत्त्वदीपनम्

ननु न सादृश्यमध्यासव्यापकम्; लोहितादिभ्रमे व्यभिचारात्, ततश्च सादृश्याभावेनाध्यासासंभवाङ्गीकरणमसङ्गतमित्याशङ्क्य, किं सादृश्ये सोपाधिकभ्रमव्यापकत्वं निषिध्यते, उत निरुपाधिकभ्रमव्यापकत्वम्? नाद्यः; अङ्गीकृतेरित्यभिप्रेत्य द्वितीयं दूषयति—*आत्मनि कर्तृत्वादेरिति* ॥ 'इदं रजतमि'त्यादिनिरुपाधिकभ्रमं प्रति सादृश्यस्य व्यापकतादृष्टेः शरीराद्यध्यासस्य च निरुपाधिकभ्रमत्वात् सादृश्यं वक्तव्यम्, तच्च न संभवति; अतोऽध्यासासंभवाङ्गीकरणमुचितमित्यर्थः ।

वार्तिकम्

इतिशब्दः प्रकृतपरामर्शी । तेनैवमन्वयः—यत एवमुक्तप्रकारेण विषयविषयिणोरितरेतरतादात्म्यानुपपत्तिः, तदन्यथानुपपत्तिगम्यश्च सत्यानृतमिथुनात्मकोऽध्यासो नास्तीत्यर्थः; मिथ्याशब्दस्यापह्नवेऽपि प्रयोगदर्शनात्—'मिथ्यावचनो देवदत्तः' इति । कस्य कुत्राध्यास इति? अत आह—*अस्मत्प्रत्ययगोचर इति* ॥ *विषयिणि=धर्मिणि; अधिष्ठाने । विषयित्वे हेतुः—*चिदात्मके* ॥ चिदात्मकत्वे हेतुः—*अस्मत्प्रत्ययगोचरे* ॥ भोक्तरीत्यर्थः, तत्साक्षिणीति वार्थः । *विषयस्य=जडवर्गस्यान्तःकरणादेर्धर्मस्य च । जडत्वे हेतुः—*युष्मत्प्रत्ययगोचरस्य* ॥ युष्मत्प्रत्ययो भोगः, तद्विषयस्य; भोग्यस्येत्यर्थः । *तद्धर्माणां च=जडान्तःकरणादिधर्माणामपि; काम-सुख-दुःख-काणत्व-मनुष्यत्वादीनां स्वरूपतोऽध्यासः; भ्रमे भासमानवैशिष्ट्यप्रतियोगिनो रजतवन्मिथ्यात्वात्, तदनुयोगिनश्च शुक्तिवत् सत्यत्वात् । परस्परं सत्यानृतमिथुनीभावं दर्शयितुमाह—*तद्विपर्ययेणेति* ॥ इत्थंभावे तृतीया । पूर्वोक्ताधाराधेयभाववैपरीत्येनेत्यर्थः । तेन चैतन्यस्य जडाधारतयाऽऽरोपेऽपि न तद्विशेषणत्वम्, येन भ्रमे भासमानवैशिष्ट्यप्रतियोगित्वेन जडवत्तस्यापि स्वरूपत आरोपान्मिथ्यात्वं स्यात्, किं तर्हि? दर्पणे मुखवत्संसर्गत एव तदारोपाद् दर्पणस्थत्वस्येव मुखस्य जडवस्तुच्छत्वस्यापि, चैतन्यस्यैव विशेष्य-

भाष्यभावप्रकाशिका

जडे बुद्ध्यादावध्यासः; तुल्यत्वादित्यर्थः ॥ अध्यासो नाम—अन्यस्मिन्नन्यरूपताधीः । मिथ्येत्यविद्यमानतोच्यते; नास्त्येवाध्यास इत्यर्थः । अर्थाध्यासो ज्ञानाध्यासश्चेत्यध्यासयोर्नास्तित्वं वक्तुं द्विविधाध्यासवचनम् । आक्षेपमुपसंहरति---*इति भवितुमिति* ॥

प्रदीपः

तस्य च ब्रह्मरूपत्वे विचारवैयर्थ्यमिति निष्कर्षः ॥ सामान्यतो धर्म्यध्यासासंभवं धर्माध्यासासंभवं च भेदप्रतीतियोग्यत्वेनाधिष्ठानारोप्ययोर्विरुद्धस्वभावत्वेन धर्म्यध्यासाभावेन च निरूप्य लक्ष्यविशेषयोस्तत्समन्वयार्थम्—* अस्मत्प्रत्ययगोचरे *इत्यादि भाष्यम् ॥ *अस्मत्प्रत्ययगोचरे=वृत्तिमात्रव्याप्ये । * चिदात्मनि=चैतन्ये । * युष्मत्प्रत्ययगोचरस्य=दृश्यस्य । * विषयस्य=

भामती

तथापीति योजना ॥ इदमत्राकूतम्—भवेदेतदेवम्—यदि 'अहमि'त्यनुभव आत्मतत्त्वं प्रकाशेत, न त्वेतदस्ति। तथाहि—समस्तोपाध्यनवच्छिन्नानन्तानन्दचैतन्यैकरसमुदासीनमेकमद्वितीयमात्मतत्त्वं श्रुति-स्मृतीतिहास-पुराणेषु गीयते। नचैतान्युपक्रमपरामर्शोपसंहारैः क्रियासमभिहारेणेद्दगात्मतत्त्वमभिदधति तत्पराणि सन्ति शक्यानि शक्रेणाप्युपचरितार्थानि कर्तुम्। अभ्यासेन हि भूयस्त्वमर्थस्य भवति; यथा—'अहो दर्शनीया, अहो दर्शनीया सुन्दरी'ति, न न्यूनत्वम्; अपि प्रागेवोपचरितत्वमिति। अहमनुभवस्तु प्रादेशिकमनेकविध-शोक-दुःखाद्युपप्लुतमात्मानमादर्शयन् कथमात्मतत्त्वगोचरः? कथं वाऽनुपप्लवः? नच—ज्येष्ठप्रमाणप्रत्यक्ष-

ऋजुप्रकाशिका

'तथापी'त्यनेन योजयति। *मिथ्येति भवितुं युक्तं यद्यपीति॥ तथापीति योजनेति*॥ "युष्मदस्मदि"त्यादिभाष्येण "तथापी"त्यतः प्राक्तनेनाध्यासाभावहेतुभेदग्रहस्य सत्त्वाद् अध्यासाभाव एवेत्युक्तम्, तत्र "तथापी"त्यादिपरिहारभाष्येणाध्यासाभावहेतुत्वेनोक्तो भेदग्रह एवासिद्ध इति सूचितम्, तद्विवृणोति—*इदमत्राकूतमिति*॥ समस्तोपाध्यनवच्छिन्नानन्तानन्दैकरसमुदासीनमेकमद्वितीयमात्मतत्त्वं श्रुति-स्मृतीतिहास-पुराणेषु यथा गीयते, तथा तादृशमात्मतत्त्वं यद्यहमनुभवे प्रकाशितम्, तदाऽहमनुभवे प्रकाशमानस्योक्तविधया देहादिभ्यो भिन्नत्वेनावगमादध्यासाभाव इत्येतद् भवेत्, न त्वेतदस्तीति योजना। *ननु* श्रुति-स्मृतीतिहास-पुराणादिवाक्यान्यनुभवविरोधादुपचरितार्थानीत्युक्तम्, तत्राह—*नचैतानीति*॥ *एतानि=श्रुत्यादिवाक्यानि। *परामर्शः=मध्ये निर्देशः, *क्रियासमभिहारः=पौनःपुन्यम्। तथाचोपक्रमोपसंहाराभ्यासादिलिङ्गैर्निरुक्ताद्वितीयात्मतत्त्वे निश्चिततात्पर्यकाणि तादृशात्मतत्त्वप्रतिपादकानि च सन्ति श्रुत्यादिवाक्यानि शक्रेणाप्युपचरितार्थानि कर्तुं न शक्यानीति योजना। *तात्पर्यलिङ्गमध्यप्रविष्टाभ्यासो नाम=निरुक्ताद्वितीयात्मतत्त्वप्रतिपादकतया श्रुतिवाक्यावृत्तिः। तादृशाभ्यासेन किम्? इत्यत आह—*अभ्यासेन हि भूयस्त्वमिति*॥ *भूयस्त्वम्=आधिक्यम्। अभ्यासादर्थस्य भूयस्त्वे दृष्टान्तमाह—*यथा अहो दर्शनीया अहो दर्शनीया सुन्दरीति*॥ *दर्शनीया=प्रेक्षणीया। 'दर्शनीये'त्यभ्यासेन सुन्दर्या भूयस्त्वम्=आधिक्यं प्रमीयते। आधिक्यमेव न न्यूनत्वमित्याह—*न न्यूनत्वमिति*॥ यत एव प्रतिपादितार्थस्याऽऽधिक्यम्, न न्यूनत्वम्; अत एव तत्प्रतिपादकवाक्यस्योपचरितार्थत्वमपि नेत्याह—*अपि प्रागेवोपचरितार्थत्वमिति*॥ न न्यूनत्वमित्यत्र विद्यमाननञ उपचरितार्थत्वमित्यत्राप्यन्वयः; उपचरितार्थत्वमपि प्रागेव नेत्यर्थः। श्रुत्यादिषु यादृशमात्मतत्त्वं गीयते, तादृशमात्मतत्त्वमहमनुभवे न प्रकाशितमित्युक्तं प्रपञ्चयति—*अहमनुभवस्त्विति*॥ *ननु* अहमनुभवस्यानुपप्लवत्वात् तद्गोचरार्थस्याप्यनुपप्लुतत्वमित्याशङ्क्याह—*कथं चानुपप्लव इति*॥ *उपप्लवः=विपर्यासः कथम्? तच्छून्योऽहमनुभव इत्यर्थः। अपरिच्छिन्नमात्मानं परिच्छिन्नत्वेन विषयीकुर्वन्नहमनुभवो विपर्यासवानेवेति भावः। "कथमात्मतत्त्वगोचरः" इत्यनेनाद्वितीयात्मतत्त्वस्य निरुक्तस्याज्ञातत्वमुक्तम्, तथाचाज्ञातस्य श्रुतिप्रमेयत्वादज्ञातार्थबोधकत्वेन श्रुतीनां प्रामाण्यम्; अत एव नोपचरितार्थमपीति स्थितम्। तत्राहमनुभवस्य प्रत्यक्षत्वात् प्रत्यक्षस्य च ज्येष्ठत्वाद् ज्येष्ठप्रमाणविरोधेनोपक्रमादिलिङ्गोहिततत्तात्पर्यकश्रुतीनामेवाप्रामाण्यम्, उपचरितार्थत्वं च, इत्याशङ्क्य निराकरोति—*नचेति*॥ *आम्नायस्य=श्रुतिसमूहस्य। *तदपेक्षस्य=

प्रदीपः

अन्तःकरणस्य। *अध्यासः=आरोपः। * मिथ्या=असंभवदुक्तिक इति पदार्थनिष्कर्षः। उत्तरत्र तथापीत्यभिसम्बन्धाद् भवतीति पूरणीयम्। तथाच—"युष्मदस्मदोरि"त्यादि—"युक्तमि"त्यन्तं शङ्काभाष्यम्, तथापीत्यादि परिहारभाष्यमिति निष्कर्षः॥

* अयमाशयः *—सादृश्यज्ञानं भ्रमसामान्यं प्रति न कारणम्; विनापि सादृश्यं केतकीगन्धे सर्पगन्धं हि भ्रान्त्या जानीमः। *वस्तुतस्तु* विशेषदर्शनप्रतिबध्येष्वेवाध्यासेषु सादृश्यज्ञानं कारणमिति वक्तुमुचितम्, नान्यत्र;

भामती

विरोधादाम्नायस्यैव तदपेक्षस्याप्रामाण्यमुपचरितार्थत्वं चेति—युक्तम् ; तस्यापौरुषेयतया निरस्तसमस्तदोषाशङ्कस्य,बोधकतया स्वतःसिद्धप्रमाणभावस्य स्वकार्ये प्रमितावनपेक्षत्वात् । प्रमितावनपेक्षत्वेऽप्युत्पत्तौ प्रत्यक्षापेक्षत्वात्तद्विरोधादनुत्पत्तिलक्षणमप्रामाण्यमिति चेत्, न ; उत्पादकाप्रतिद्वन्द्वित्वात् । न ह्यागमज्ञानं सांव्यवहारिकं प्रत्यक्षस्य प्रामाण्यमुपहन्ति, येन कारणाभावान्न भवेत्, अपितु तात्त्विकम् । (१) न च तत् तस्योत्पा-

ऋजुप्रकाशिका

प्रत्यक्षापेक्षस्य । प्रत्यक्षस्य पूर्वोत्पत्तिमत्त्वेन ज्येष्ठतयोपजीव्यत्वेऽपि "पौर्वापर्ये पूर्वदौर्बल्यमि"ति न्यायेन प्रत्यक्षस्यैव दौर्बल्यम् ; अत आगमविरोधेनानधिगतार्थकत्वाभावादप्रामाण्यम् । नच—आगमस्य प्रत्यक्षसापेक्षत्वादागमस्यैव सापेक्षत्वलक्षणमप्रामाण्यमिति—वाच्यम् ; आगमस्य किं प्रत्यक्षसापेक्षत्वं स्वजन्यज्ञानप्रमितित्वाय ? स्वप्रामाण्यायेति यावत्, किं वा स्वेन प्रमित्युत्पत्तये तत्सापेक्षत्वम् ? आद्येऽपि किं स्वाप्रामाण्यशङ्कानिरासाय तदपेक्षा ? किं वा स्वविषयसंवादाय ? आद्याद्यं निरस्यति—*तस्येति* ॥ आगमस्येत्यर्थः । अपौरुषेयतया नित्यनिर्दोषत्वेनैव प्रामाण्याद् न तत्राप्रामाण्यशङ्का, येन तदप्रामाण्यप्रयोजकतच्छङ्कानिरासाय तदपेक्षा स्यादिति भावः । आद्यद्वितीयं निरस्यति—*बोधकतयेति* ॥ अज्ञातार्थबोधकत्वेन स्वतःसिद्धप्रमाणभावत्वात् स्वविषये स्वप्रामाण्यसंवादापेक्षा नास्तीति भावः । *स्वकार्ये प्रमितौ* ॥ भावप्रधानो निर्देशः, स्वकार्ये प्रमितित्वे । *अनपेक्षत्वात्=स्वप्रामाण्यायानपेक्षत्वादिति यावत् । द्वितीयं शङ्कते—*प्रमितावनपेक्षत्वेऽपीति* ॥ प्रमितत्वेऽनपेक्षत्वेऽपि=स्वप्रामाण्यायानपेक्षत्वेऽपीत्यर्थः । *उत्पत्तौ=स्वेन प्रमित्युत्पत्तौ । *तद्विरोधात्=प्रत्यक्षविरोधात् । *अनुत्पत्तिलक्षणमिति* ॥ प्रत्यक्षविरोधेन स्वप्रामाण्यव्याघातात् स्वस्य प्रमानुत्पादकत्वेनानुत्पादकत्वलक्षणमप्रामाण्यमागमस्येति शङ्कार्थं परिहरति—*उत्पादकेति* ॥ प्रत्यक्षस्य प्रमोत्पादकागमापरिपन्थित्वादित्यर्थः । यदि तथाप्यागमस्य प्रत्यक्षेण विरोधः, तदा वक्तव्यम्—किं प्रत्यक्षगतव्यावहारिकप्रामाण्येन तस्य विरोधः ? तद्गततत्त्वावेदकत्वलक्षणप्रामाण्येन वा ? नाद्य इत्याह—*न हीति* ॥ प्रत्यक्षस्य सांव्यवहारिकं प्रामाण्यमागमज्ञानं नोपहन्ति*=आगमेन जनिष्यमाणं प्रमारूपं ज्ञानं न विघटयति ; प्रमारूपज्ञानोत्पादप्रयोजकागमगतप्रामाण्यविघातकं न भवतीत्यर्थः ; अप्रतिहतप्रामाण्यकारणाभावादित्यर्थः । किं तर्हि तद्विघातकम् ? तत्राह—*अपितु तात्त्विकमिति* ॥ तात्त्विकं प्रामाण्यं तदुपघातकमित्यर्थः । तर्हि प्रत्यक्षगतं तात्त्विकप्रामाण्यमेव तद्विघातकमस्तु, इति द्वितीयमाशङ्क्य निराकरोति—*नच (१)तात्त्विकमिति ॥ प्रत्यक्षस्य सांव्यवहारिकप्रमाणत्वेन तत्र तात्त्विकप्रामाण्याभावात्, आम्नायस्यैव तत्त्वावेदकप्रमाणत्वादिति भावः । *ननु* यत् तत्त्वप्रतिपत्तिजनकम्, तदेव तत्त्वावेदकप्रमाणम् ; प्रत्यक्षमपि तथेति तदपि तत्त्वावेदकप्रमाणमेवेत्यत आह—*नच तत्तस्योत्पादकमिति* ॥ तदित्यनन्तरमेवकारोऽध्याहर्तव्यः ।

प्रदीपः

तत्र च प्रतिबन्धकाभावविधया विशेषदर्शनसामग्र्यभावस्यापि कारणत्वावश्यकत्वात् तेनैव निर्वाहे व्यर्थं सादृश्यज्ञानस्यापि कारणत्वकल्पनम्, इङ्गालादौ तु नीलत्वादिविशेषदर्शनसामग्रीसत्त्वाद् न रजताद्यध्यासः । इदमेव सादृश्यज्ञानाकारणत्ववादं भाष्यकारसूचितमादाय * कवितार्किकनृसिंहभट्टोपाध्यायमतं प्रवृत्तम्—यद्, भ्रमज्ञाने नाधिष्ठानज्ञानविधया सादृश्यज्ञानं कारणमिति । तथाच विसदृशेऽपि भ्रमो विशेषदर्शनाभावे संभवतीति, चैतन्यस्यावृतत्वेन विशेषदर्शनस्यात्राप्यभावात्

भाष्यभावप्रकाशिका

'युक्तमि'ति वक्तव्ये "इति भवितुमि"त्याक्षेपस्य संभावनैव मूलम्, नात्र मानमिति दर्शयितुमुक्तम् ॥ तदेवं प्रमातृत्वादिबन्धस्य वस्तुतया विषयाद्यभावादनारम्भ्यमिदं शास्त्रमित्याक्षेप्तु-

(१) ऋजुप्रकाशिकादृष्ट्या—नच तात्त्विकं प्रत्यक्षस्य प्रामाण्यमिति वाक्यान्तरमपि भामत्यामस्तीत्यनुमीयते ।

भामती

दकम् ; अतात्त्विकप्रमाणभावेभ्योऽपि सांव्यवहारिकप्रमाणेभ्यस्तत्त्वप्रतिपत्तिजननात् । तथाच वर्णे ह्रस्वत्व-दीर्घत्वादयोऽन्यधर्माः, अपि समारोपितास्तत्त्वप्रतिपत्तिहेतवः ; न हि लौकिका नाग इति वा नग इति वा पदात् कुञ्जरं तरुं वा प्रतिपद्यमाना भवन्ति भ्रान्ताः । न चानन्यपरं वाक्यं स्वार्थ उपचरितार्थं युक्तम् ; उक्तं हि—"न विधौ परः शब्दार्थः" इति । ज्येष्ठत्वं चानपेक्षितस्य बाध्यत्वे हेतुः, न बाधकत्वे ; रजतज्ञानस्य ज्यायसः शुक्तिज्ञानेन कनीयसा बाधदर्शनात्, तदनपबाधने तदपबाधात्मनस्तस्योत्पत्तेरनुपपत्तेः । दर्शितं च तात्त्विकप्रमाणभावस्यानपेक्षितत्वम् । तथाच पारमर्षं सूत्रम्—"पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्"

ऋजुप्रकाशिका

*तदेव=तत्त्वावेदकप्रमाणमेव । *तस्य=तत्त्वप्रत्ययस्य, उत्पादकं नेत्यर्थः । कुत इत्यत आह—*अतात्त्विकप्रमाणभावेभ्योऽपि सांव्यवहारिकप्रमाणेभ्यस्तत्त्वप्रतिपत्तिजननादिति* ॥ सांव्यवहारिकप्रमाणानि=लौकिकप्रमाणानि, प्रत्यक्षानुमानोपमानानि लौकिकवाक्यानि च ; तेभ्य इत्यर्थः । "तत्त्वप्रतिपत्तिजननादि"त्यस्याभ्रान्तिप्रतिपत्तिजननादित्यर्थः । न हि प्रत्यक्षानुमानोपमानप्रमाणेभ्यो जायमानं ज्ञानं भ्रान्तिरूपम्, किंतु प्रत्यक्षादिप्रमाणाभासेभ्य एव जायमानं ज्ञानं भ्रान्तिरूपमिति भावः ॥ तर्हि लौकिकशब्दजन्यं ज्ञानमपि किमभ्रान्तिरूपम् ? अभ्रान्तिरूपमेवेत्याह—*न हि लौकिका इति* ॥ *प्रतिपद्यमाना इति* । जानन्त इत्यर्थः । तथाच कालत्रयाबाध्यब्रह्मतत्त्वबोधकमेव प्रमाणं तत्त्वावेदकप्रमाणम्, तच्च श्रुत्यादिरूपमेवेति,तत्प्रामाण्यं प्रत्यक्षादिना केनापि न बाध्यत इति सिद्धम् । श्रुत्यादेरप्रामाण्यं निरस्योपचरितार्थत्वं निरस्यति—*नचेति* ॥ नच पूर्वमेव तत्पराण्युपचरितार्थानि कर्तुं शक्रेणापि न शक्यानी'ति तत्परत्वमनुपचरितार्थत्वं चोक्तम्, अधुनाऽपि तत्परत्वमनुपचरितार्थत्वं चोच्यत इति पौनरुक्त्यम् ; पूर्वमध्यासप्रयोजकभेदाग्रहसिद्ध्यर्थमुक्तम्, अधुनोपजीव्यप्रमाणविरोधपरिहारायोक्तमिति न दोष इति द्रष्टव्यम् । तथाच यत्परः शब्दः, स एव मुख्यतः प्रतीयमानः शब्दार्थः, नोपचरितार्थः । इदं तु शबरस्वामिनाऽप्युक्तमित्याह—*उक्तं हि न विधौ परः शब्दार्थ इति* ॥ *विधौ=विधायकवाक्ये, *परः=लक्षणया गौण्या वा प्रतीयमानोऽर्थः,शब्दार्थो न भवति, किन्तु यस्तात्पर्यविषयभूतोऽर्थः, स एव शब्दार्थ इत्यर्थः । एवं वेदान्तश्रुत्यादीनामप्यपरिच्छिन्नाद्वितीयसच्चिदानन्दब्रह्मण्युपक्रमादिषड्विधलिङ्गोपाधिकतात्पर्यकत्वात् तादृशं ब्रह्मैव वेदान्तश्रुत्यर्थः । अहमनुभवस्तु तादृशमर्थं न विषयीकरोति, येनाहमनुभवगोचरस्य देहादिभ्यः पूर्वोक्तरीत्या भेदग्रहादध्यासो नास्तीत्युच्येतेति भावः । यत्तूक्तं प्रत्यक्षस्य ज्येष्ठत्वेन आम्नायापेक्षितस्याम्नायबाधकत्वमिति, तत्र वक्तव्यम्—किं ज्येष्ठत्वमुपजीव्यत्वम् ? मुख्यत्वमात्रं वा ? तत्राऽऽद्यमुपजीव्यत्वं निराकृतमेव । अत एव प्रत्यक्षमाम्नायेनानपेक्षितं स्थितम् । एवं च सति द्वितीयं दूषयति—*ज्येष्ठत्वं चेति । मुख्यत्वरूपं ज्येष्ठत्वं चेत्यर्थ । "अनपेक्षितस्ये"त्यनन्तरं स्वस्य प्रत्यक्षस्येति शेषः । पूर्वोत्पन्नमात्रस्य बाध्यत्वमुक्तम्, तद्दर्शयति—*रजतज्ञानस्येति* ॥ भ्रमरूपज्ञानस्येत्यर्थः । *ज्यायसः=पूर्वोत्पन्नत्वमात्रेण ज्येष्ठस्य । *कनीयसा=अनन्तरोत्पन्नत्वेन कनीयसा । तद्बाधकत्वेनैवोत्पन्नतया तदबाधकत्वे तस्योत्पत्तिरेव नेत्याह—*तदनपबाधन इति* ॥ *ननु* ज्येष्ठमपि प्रत्यक्षं बाध्यं चेत्, तात्त्विकप्रमाणभावेनाम्नायेन प्रत्यक्षमपेक्षितं न भवेदिति पूर्वावमर्शेन शङ्कमानं प्रत्याह—*दर्शितं च तात्त्विकप्रमाणभावस्यानपेक्षत्वमिति* ॥ तथाचाम्नायस्यानपेक्षप्रमाणत्वे प्रत्यक्षस्य तदनपेक्षितत्वमिष्टमिति भावः । पूर्वस्य बाध्यत्वे पारमर्षं सूत्रमपि प्रमाणयति—*तथाचेति* ॥ *पौर्वापर्य इति*॥ *षष्ठे स्थितम्*—अग्निष्टोमे—अन्योन्यं सम्बन्ध्य यज्ञशालातो

प्रदीपः

विनापि सादृश्यज्ञानमहमिति भ्रमनिर्वाहः । "दृश्यते तु" इति नविलक्षणत्वाधिकरणसिद्धान्तसूत्रं तद्भाष्यमपि च सादृश्यज्ञानं सादृश्यमपि वा नोपादानोपादेयभावप्रयोजकमिति बोधयद् अस्मानुकूलम् । यदि तु "दृश्यते तु" इति

भामती

इति। तथा—"पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत् ॥" इति। अपिच येऽप्यहंकारास्पदमात्मानमास्थिषत, तैरप्यस्य न तात्त्विकत्वमभ्युपेतव्यम्; 'अहमिहैवास्मि सदने जानानः' इति सर्वव्यापिनः प्रादेशिकत्वेन ग्रहात्, उच्चतरगिरिशिखरवर्तिषु महातरुषु भूमिष्ठस्य दूर्वाप्रवालनिर्भासप्रत्ययवत्। नच—इदं देहस्य प्रादेशिकत्वमनुभूयते, न त्वात्मन इति—सांप्रतम्; न हि तदा, एवं भवति—'अहम्' इति; गौणत्वे वा न—'जानानः' इति; अपिच परशब्दः परत्र लक्ष्य-

ऋजुप्रकाशिका

निर्यातानामृत्विजां विच्छेदनिमित्तकं प्रायश्चित्तं श्रूयते----"यदि उद्गाताऽपच्छिन्द्याददक्षिणेन यजेत, यदि प्रतिहर्ता सर्वस्वदक्षिणेनेति"। तत्रोद्गातृप्रतिहर्त्रोः क्रमेण विच्छेदेऽदक्षिणत्व-सर्वस्वदक्षिणत्वयोर्विरुद्धयोः प्रायश्चित्त-भूतयोः प्राप्तौ,विरुद्धयोः समुच्चित्यानुष्ठानायोगादन्यतरस्यानुष्ठेयत्वे---किं पूर्वमदक्षिणं प्रायश्चित्तभूतं तत् कर्मानुष्ठेयम्? उत सर्वस्वदक्षिणं प्रायश्चित्तभूतं तत् कर्मानुष्ठेयम्? इति विशये, अनन्तरं प्रतिहर्तृविच्छेदेऽप्युद्गातृविच्छेदकाले प्रतिहर्तृविच्छेदाभावेनानुपसञ्जातविरोधित्वात् पूर्वप्राप्तत्वाददक्षिणत्वेनैव कर्मानुष्ठेयमिति पूर्वपक्षे प्राप्ते, राद्धान्तः;—निमित्तभूतयोर्विच्छेदयोः पौर्वापर्ये सति पूर्वस्य नैमित्तिकस्यादक्षिणत्वस्य दौर्बल्यम्, उत्तरस्य निर-पेक्षस्य सर्वस्वदक्षिणत्वस्य पूर्वबाधकत्वेनैवोदितत्वात् पूर्वोदयकाल उत्तरस्याप्राप्तत्वेन पूर्वेण बाधायोगात् सर्वस्व-दक्षिणत्वेनैव तत् कर्मानुष्ठेयमित्यदक्षिणत्वस्य बाधः। उक्तं हि—"पूर्वं परमजातत्वादबाधित्वैव जायते। परस्या-नन्यथोत्पादान्न त्वबाधेन संभवः॥" इति॥ *प्रकृतिवदिति*॥ प्रकृतौ "कुशमयं बर्हिस्तृणाति" इत्युप-देशतः कुशमयबर्हिर्भिरास्तरणं प्राप्तम्, विकृतावपि "प्रकृतिवद्विकृतिः कर्तव्या" इत्यतिदेशतः कुशमयबर्हिर्भि-रास्तरणं प्रसक्तम्, पृथग्विकृतौ श्रूयते----"शरमयं बर्हिस्तृणाति" इति। तत्र विकृतौ किं कुशमयानां बर्हिषामा-स्तरणं शरमयानां वेति विशयेऽतिदेशतः प्राप्तत्वात् कुशमयानामेव विकृतावास्तरणमिति पूर्वपक्षे, राद्धान्तः—कुशानां प्रकृतौ क्लृप्तोपकारत्वात् शराणां चोपकारस्य कल्प्यत्वात्, कुशानां प्रकृतौ सावकाशत्वात् शराणामन्यत्र निरवकाशत्वात्—"सावकाशनिरवकाशयोर्निरवकाशं बलीयः" इति न्यायाद् निरपेक्षैरास्तीर्यमाणैः शरैश्चरम-भाविभिरपि पूर्वतनाः कुशा एवानास्तरणवन्तः सन्तो बाध्यन्ते; तद्वदिति। पूर्वापरभावमापन्नयोः परस्पर-निरपेक्षयोर्मध्ये परस्य बलीयस्त्वं पूर्वस्य बाध्यत्वं चोक्तम्, तत्रैवाभियुक्तोक्त्यन्तरमाह---*पूर्वात्परबलीयस्त्वमिति*॥ इयता प्रबन्धेन श्रुत्यादिगम्याद्वितीयपूर्वोक्तात्मतत्त्वस्याहंप्रत्ययविषयस्य देहेन्द्रियादिभ्यो भेदग्रहेऽप्युक्तात्म-तत्त्वस्य तेभ्यो भेदाग्रहादध्याससंभव उक्तः, प्रतिवादिनिरूपितात्मनोऽनवभासादपि तमाह----*अपिचेति*॥ *अहंकारास्पदम्=अहंप्रत्ययविषयीभूतम्। *अस्य=आत्मनः। सर्वगतत्वमाश्रित्याह---*अहमिहेति*॥ "सर्व-व्यापिन" इत्यनन्तरं आत्मन इति शेषः। अधिकपरिमाणवतोऽल्पपरिमाणवत्त्वेन ग्रहणे दृष्टान्तमाह---*उच्चतरेति*॥*ननु* 'अहमिहैवे'तिप्रत्ययस्य देहप्रादेशिकत्वविषयकत्वमेव,न त्वात्मप्रादेशिकत्वविषयकत्वमित्या-शङ्क्य निराकरोति----*नचेदमिति*॥ निराकरणमेवाह----*न हि तदैवमिति*॥ तदा देहप्रादेशिकत्वविषयक-प्रत्ययदशायां अहमि'त्येवंरूपेण प्रतीतिर्न भवतीत्यर्थः। तव मतेऽहंप्रत्ययस्य देहादिविविक्तात्मविषयकत्वेन देहप्रादेशिकत्वाविषयकत्वादिति भावः। *ननु* "'अहमिहैवे"त्यत्र अहंशब्दो देहे गौणत्वेनोच्यत इत्यत आह—

प्रदीपः

सूत्रभाष्ये केनचन धर्मेण सादृश्यं ब्रह्मप्रपञ्चयोरपि वर्तत एवेति वर्णनात् सादृश्यज्ञानकारणतापक्षोऽपि भाष्यारूढ इति मन्यते, तर्हि त्वात्मान्तःकरणयोरपि जडत्व-चित्त्वादिना विरुद्धस्वभावयोरपि सत्त्वादिना सदृशयोरध्याससंभवो न विरुद्धः। इममेव भाष्यसूचितं भावं गृहीत्वा भ्रमस्थलेऽधिष्ठानज्ञानं कारणमिति पक्षान्तरम्—सिद्धान्तलेशसंग्रहे संगृहीतम्। सर्वथा

भामती

माणगुणयोगेन वर्तत इति यत्र प्रयोक्तृप्रतिपत्त्रोः संप्रतिपत्तिः स गौणः। स च भेदप्रत्ययपुरःसरः, तद्यथा---नैयमिकाग्निहोत्रवचनोऽग्निहोत्रशब्दः प्रकरणान्तरावधृतभेदे कौण्डपायिनामयनगते कर्मणि "मास-

ऋजुप्रकाशिका

गौणत्वे इति। भवतीत्यनुषङ्गः। तथाच तथात्वे जानान इति न भवतीत्यर्थः। उपचरितात्मभावस्य देहस्य ज्ञातृत्वायोगादिति भावः। नच---जानान इति शब्दोऽपि देहे गौण इति---वाच्यम्; वक्तुः स्वज्ञान-प्रकाशनपरे वाक्येऽज्ञातरि देहे जानान इति गौणप्रयोगायोगात्। *ननु*---अहंप्रत्ययविषयः आत्मैव, तत्र देहगतं प्रादेशिकत्वमुपचर्यत इहैवेतीति---चेत्, *तर्हि* देहप्रादेशिकत्वप्रत्यायक इहैवेतिशब्द आत्मनि, देहेऽहंशब्दश्च गौणो वाच्यः, गौणत्वे च देहात्मनोर्भेदो ग्रहीतव्यः। नच स गृह्यत इत्याह---*अपिचेति*॥ *परशब्दः* = परप्रत्यायकशब्दः। *परत्र* = अन्यत्र। *लक्ष्यमाणगुणयोगेन* = मुख्यार्थे लक्ष्यमाणो दृश्यमानो यो गुणो धर्मः, तद्योगेनेत्यर्थः। गौणत्वं द्विविधम्---साम्प्रतिकं निरूढं चेति। तत्र माणवके सिंहशब्दस्य गौणत्वं साम्प्रतिकम्; सार्षपरसादौ तैलशब्दगौणत्वं निरूढम्। एवं द्वैविध्ये स्थिते गौणवादी प्रष्टव्यः—किं देहादावहंशब्दस्य गौणत्वं सिंहे माणवकशब्दगौणत्ववत् साम्प्रतिकम्? किं वा सार्षपरसादौ तैलशब्दगौणत्ववद् निरूढम्? नाद्य इत्याह---*परेति*॥ परशब्द इत्यादेरर्थ उक्त एव। *नैयमिकेति*॥ प्रमाण-लक्षणे स्थितम्---"तत्प्रख्यं चान्यशास्त्रम्"। "अग्निहोत्रं जुहोति" इति श्रूयते। तत्र संशयः---किम् अग्निहोत्रशब्दो-ऽग्निदेवतागुणविधिः, उत कर्मनामेति? तत्र अग्नये होत्रं हविरस्मिन्निति समासान्तरवर्तिन्या चतुर्थ्या अग्नेर्होमे देवतात्वप्रतीतेर्हूयमानहविष्कं यद्धोमाख्यं कर्म तदग्निदेवताकमित्यग्निदेवतागुणविविधिरिति प्राप्ते, राद्धान्तः;---"यदग्नये च प्रजापतये च सायं जुहोति" इति शास्त्रादग्नेर्देवतात्वप्रख्यापनादग्नेर्देवतात्वस्य प्राप्तत्वात् प्राप्ते च विधिवैयर्थ्यात् कर्मनामैवाग्निहोत्रशब्दः। नच समासान्तर्वर्तिचतुर्थीबलादग्निदेवतागुणविधि-रित्युक्तमिति---वाच्यम्; अग्नेर्यजमानहविर्विकारत्वासंभवात्। "कुण्डलाय हिरण्यम्" "यूपाय दारु" इत्यादौ तादर्थ्यचतुर्थ्यां सत्यां कुण्डलादेर्विकारत्वं हिरण्यादेः प्रकृतित्वं च दृष्टम्, तद्वत् तादर्थ्ये प्रकृतिविकारयोरभावेन चतुर्थीसमासासंभवात्। एवं नित्याग्निहोत्रवाचिनोऽग्निहोत्रशब्दस्य गुणयोगादन्यत्र कर्मणि वृत्तिं वक्तुं मुख्यार्थाद् नित्याग्निहोत्राद् गृहीतभेदं तत् कर्माह---*प्रकरणान्तरेति*॥ भेदलक्षणे स्थितम्---"प्रकरणान्तरे प्रयोजनान्यत्वम्"। कुण्डपायिनामयने---"मासमग्निहोत्रं जुहोति" इति श्रूयते। तत्र संशयः---तत्र किं नित्याग्निहोत्रे मासगुणो विधीयते, उत मासगुणविशिष्टं कर्मान्तरमिति। तत्र सत्यपि प्रकरणभेदे, अग्निहोत्रनाम्ना नित्याग्निहोत्रस्य बुद्धौ सन्निधापनात् तत्समभिव्याहृतस्य 'जुहोती'त्याख्यातस्य तत्सन्निधापितार्थपरत्वाद् नित्याग्निहोत्रानुवादेन मासलक्षण-गुणो विधीयत इति प्राप्ते, राद्धान्तः;—किम्---अग्निहोत्रनाम्ना नित्यप्रसिद्धाग्निहोत्रानुवादेन मासगुणविधानम्, किं वा 'जुहोती'त्याख्यातेन प्रसिद्धाग्निहोत्रमनूद्य मासगुणविधानम्? न द्वितीयः; जुहोतीत्याख्यातस्य साध्यावस्थ-कर्मबोधकत्वेन सन्निहितार्थकतया सिद्ध-व्यवहित-प्रसिद्धाग्निहोत्रपरामर्शित्वायोगात्, नाद्यः; अग्निहोत्रनाम्नो धातुसमानाधिकृतस्य धात्वर्थबोधकत्वेन सन्निहितपरामर्शितया पृथग्व्यवहितार्थबोधकत्वायोगात्, मासस्य कालरूपतया पुरुषानिष्पाद्यत्वेनानुपादेयतया विधातुमशक्यत्वाच्च। नच—मासानुवादेन नित्याग्निहोत्रविधि-रिति—वाच्यम्; नित्याग्निहोत्रस्य "यावज्जीवमग्निहोत्रं जुहोति" इत्यनेनैव हि विहिततया विहितस्य पुनर्विधानायोगात्, जुहोतिना वा अग्निहोत्रनाम्ना वाऽसन्निहितनित्याग्निहोत्रपरामर्शासंभवस्योक्तत्वाच्च। तस्मात् प्रकरणान्तरत्वात्, अत एव पूर्वकर्मासन्निधानाच्चेदमपरं मासगुणविशिष्टकर्मान्तरम्। अत एव प्रयो-जनान्यत्वम् = विधेयभावनान्यत्वम्। *ननु* अग्निहोत्रशब्दस्य कुण्डपायिनामयने कर्मणि गौणप्रयोगे किं प्रयोजनम्? किं नित्याग्निहोत्रेण सह क्रियात्वादिसादृश्यबोधः प्रयोजनम्? किं वा अन्यत्? नाद्यः,

भामती

मग्निहोत्रं जुहोति'' इत्यत्र साध्यसादृश्येन गौणः, माणवके चानुभवसिद्धभेदे सिंहात्सिंहशब्दः । नत्वहंकारस्य मुख्योऽर्थो निर्लुठितगर्भतया देहादिभ्यो भिन्नोऽनुभूयते, येन परशब्दः शरीरादौ गौणो भवेत् । नच—अत्यन्तनिरूढतया गौणेऽपि न गौणत्वाभिमानः, सार्षपादिषु तैलशब्दवदिति—वेदितव्यम् ; तत्रापि स्नेहात्तिलभवाद्भेदे सिद्ध एव सार्षपादीनां तैलशब्दवाच्यत्वाभिमानः, न त्वर्थयोस्तैलसार्षपयोरभेदाध्यवसायः । तत्सिद्धम्—गौणत्वमुभयदर्शिनो गौणमुख्यविवेकविज्ञानेन व्याप्तम् । तदिह व्यापकं विवेकज्ञानं निवर्तमानं गौणतामपि निवर्तयतीति । नच—बाल-स्थविर-शरीरभेदेऽपि 'सोऽहमि'त्येकस्यात्मनः प्रति-

ऋजुप्रकाशिका

सादृश्यबोधस्याकिञ्चित्करतया स्वयमप्रयोजनत्वेन व्यर्थत्वात्, नान्त्यः ; अन्यस्यापरिज्ञानात्, इत्यत आह—*साध्येति* ॥ साध्ये = कुण्डपायिनामयने कर्मणि = सादृश्येन = नित्याग्निहोत्रसादृश्येन प्रयुज्यमानोऽग्निहोत्रशब्दो गौण इत्यर्थः । तस्य नित्याग्निहोत्रद्रव्याणां धर्मदेवतादीनामतिदेशः प्रयोजनमित्यभिसन्धिः । सप्तमे स्थितम्—"उक्तं क्रियाभिधानं तच्छ्रुतावन्यत्र विधिप्रदेशः स्यात्" । "मासमग्निहोत्रं जुहोति" इत्यत्रान्या चिन्ता—किमग्निहोत्रशब्दः कुण्डपायिनामयने कर्मणि नित्याग्निहोत्रधर्मानतिदिशेद्वा ? न वेति ? यद्यत्राग्निहोत्रशब्दो गौणो भवेत्, तदा परं नित्याग्निहोत्रधर्मानतिदिशेत्, गौण एव न भवति ; अग्निहोत्रशब्दस्य जुहोतिना सामानाधिकरण्यस्यात्रापि तुल्यत्वेन नामधेयतया गौणत्वस्य वक्तुमशक्यत्वात्, अग्निदेवताविधानार्थत्वाद्वा गौणत्वायोगात्, अतोऽग्निहोत्रशब्दः कुण्डपायिनामयने न नित्याग्निहोत्रधर्मानतिदिशतीति प्राप्ते, राद्धान्तः ;—न तावद् अग्निदेवताविधानार्थोऽत्राग्निहोत्रशब्दः ; "यदग्नये च प्रजापतये च सायं जुहोति" इत्यादिनाऽग्नेर्देवतात्वस्य विहिततया विहिते पुनर्विधानायोगात्, पूर्वोक्तविधया चतुर्थीसमासबलादपि नाग्निदेवताविधिः ; चतुर्थीसमासासम्भवस्योक्तत्वात्, तस्मात् सिद्धे कर्मभेद उभयत्र प्रयुक्तस्यैकस्याग्निहोत्रशब्दस्यानेकार्थताया अन्याय्यत्वादयमग्निहोत्रशब्दो नित्याग्निहोत्रेऽग्निहोत्रनामपदप्रवृत्तिनिमित्तस्याग्निदेवतासम्बन्धस्य सत्त्वात् तत्र मुख्यः, कुण्डपायिनामयने तु मुख्यनित्याग्निहोत्रसादृश्यमवलम्ब्य प्रवर्तमानोऽयमग्निहोत्रशब्दो गौणः । मुख्यसादृश्यं च कर्तव्यार्थबोधकाख्यातसमभिव्याहृतनाम्ना बोध्यत्वम् । अतोऽग्निहोत्रवद् जुहोतीति साध्यत्वेन तद्विधेयमिति, तत्सिद्धयर्थं नित्याग्निग्नोत्रधर्मानतिदिशेदेवायमग्निहोत्रशब्दः । सूत्रार्थस्त्वयम्—क्रियाया नित्याग्निहत्रस्याभिधानं नामधेयम् अग्निहोत्रपदमुक्तं तत्प्रख्याधिकरणे, तस्यान्यत्र श्रवणे विधिप्रदेशः विधेयधर्मातिदेशः स्यादिति । वेदे गौणप्रयोगमभिधाय लोकेऽप्याह—*माणवके चेति* । सिंहादनुभवसिद्धभेदेऽन्यत्र माणवके मुख्यार्थभूतसिंहनिष्ठक्रौर्यादिगुणयोगात् सिंहशब्दश्च गौण इत्यर्थः । गौणप्रयोगस्थले भेदग्रहो दर्शितः । प्रकृते देहादावहंशब्दस्य गौणत्वे भेदग्रहोऽवश्यं वक्तव्यः, स नास्तीत्याह—*न त्विति* ॥ *अहङ्कारस्य मुख्यार्थः = अहंपदस्य मुख्यार्थः । *निर्लुठितः = निष्कृष्य लुठितः, प्रतिभासितः, *गर्भः = असाधारणाकारो यस्य तथा । तत्र यो नामानुभूयतेऽहङ्कारात्मवादिनस्तव मते, स देहेन्द्रिय-मनो-बुद्धयहंकारेभ्यो भिन्नतया नानुभूयते । अहङ्कारादपि भिन्नतयाऽनुभवे वादिविवादो न स्यादित्यर्थः । *परशब्दः = अहंशब्दः । सांप्रतिकं गौणत्वं द्वितीयं निराकरोति—*नचात्यन्तेति* ॥ गौणत्वेऽपीत्यनन्तरं देहादावहंशब्दे इति शेषः । न चेत्येतद्वेदितव्यमित्यनेन सम्बध्यते । *तत्रापि = गौणत्वनिरूढतास्थलेऽपीत्यर्थः । *निरूढत्वं नाम = प्रयोगप्राचुर्याद् मुख्यवद् भानम् । निरूढेऽपि गौणप्रयोगे नार्थयोस्तादात्म्यं प्रतीयते, प्रकृते तु प्रतीयत इति वैषम्यमित्यर्थः । तस्माद् गौणमुख्ययोर्देहात्मनोर्भेदज्ञानं गौणत्वव्यापकीभूतं निवर्तमानं गौणतामपि निवर्तयतीत्येतत् सिद्धमित्यर्थः । अभिज्ञारूपाहंप्रत्ययाद् देहात्मभेदासिद्धावपि प्रत्यभिज्ञारूपात् तत्सिद्धिमाशङ्कय निराकरोति—*नच बालस्थविरेति* ॥ निराकरणप्रकारमेवाह—*परीक्षकाणामिति* ॥ तर्ह्यस्तु परीक्षकाणामेव देहादावहं-

भामती

संधानाद् देहादिभ्यो भेदेनास्त्यात्मानुभव इति—वाच्यम् ; परीक्षकाणां खल्वियं कथा, न लौकिकानाम्। परीक्षका अपि हि व्यवहारसमये न लोकसामान्यमतिवर्तन्ते ; वक्ष्यत्यनन्तरमेव हि भगवान्भाष्यकारः—"पश्वादिभिश्चाविशेषात्" इति। बाह्या अप्याहुः—"शास्त्रचिन्तकाः खल्वेवं विवेचयन्ति, न प्रतिपत्तारः" इति। तदिह पारिशेष्याच्चिदात्मगोचरमहंकारम्—'अहमिहास्मि सदने' इति प्रयुञ्जानो लौकिकः शरीराद्यभेदग्रहादात्मनः प्रादेशिकत्वमभिमन्यते, नभस इव घट-मणिक-मल्लिकाद्युपाध्यवच्छेदादिति युक्तमुत्पश्यामः। नच—अहंकारप्रामाण्याय देहादिवदात्माऽपि प्रादेशिक इति—युक्तम् ; तदा खल्वयमणुपरिमाणो वा स्यात् ? देहपरिमाणो वा ? अणुपरिमाणत्वे, 'स्थूलोऽहं' 'दीर्घ' इति च न स्यात्, देहपरिमाणत्वे तु सावयवतया देहवदनित्यत्वप्रसङ्गः। किंचास्मिन्पक्षेऽवयवसमुदायो वा चेतयेत्, प्रत्येकं वाऽवयवाः ? प्रत्येकं चेतनत्वपक्षे, बहूनां चेतनानां स्वतन्त्राणामेकवाक्यताऽभावादपर्यायं विरुद्धदिक्क्रियतया शरीरमुन्मथ्येत, अक्रियं वा प्रसज्येत। समुदायचैतन्ययोगे, वृक्ण एकस्मिन्नवयवे चिदात्मनोऽप्यवयवो वृक्णः, इति न चेतयेत्। नच—बहूनामवयवानामविनाभावनियमो दृष्टः ; यदैवावयवो विशीर्णस्तदा तदभावे न चेतयेत्। विज्ञानालम्बनत्वेऽप्यहंप्रत्ययस्य भ्रान्तत्वं तदवस्थमेव ; तस्य स्थिरवस्तुनिर्भासत्वादस्थिरत्वाच्च विज्ञानानाम्। एतेन—'स्थूलोऽहम्' 'अन्धोऽहम्' 'गच्छामी'त्यादयोऽप्यध्यासतया

ऋजुप्रकाशिका

शब्दो गौणः, तत्राह—*परीक्षका अपीति*॥ यद्यप्यस्ति परीक्षकाणां यौक्तिकं भेदज्ञानम् ; तथापि तेन नापरोक्षाभेदभ्रम उच्छिद्यत इति भावः। "लोकसामान्यं नातिवर्तन्ते परीक्षकाः"इत्यत्र भाष्यकारोक्तिं प्रमाणयति—*वक्ष्यतीति*॥ प्रायेणाभेदभ्रम एव, न भेदप्रत्यय इत्यत्र बाह्यवचनमपि संवादयति—*बाह्या अपीति*॥ शास्त्रचिन्तका अपि लोकतोऽपि प्रतिपत्तार एवेति भावः। उपसंहरति—*तदिहेति*॥ प्रादेशिकत्वभ्रमे दृष्टान्तमाह—*नभस इवेति*॥ *ननु* आत्मनः सर्वगतत्वे खलु देहतादात्म्यभ्रमादात्मनि प्रादेशिकत्वप्रत्ययो भ्रमः स्यात्, न चात्मा सर्वगतः, किंतु प्रादेशिक एव ; अतो न प्रादेशिकत्वप्रत्यय आत्मनि भ्रम इत्याशङ्क्य निराकरोति—*नचेति*॥ *अहंकारप्रामाण्याय = अहमिहैवेति प्रत्ययप्रामाण्याय। आत्मनः प्रादेशिकत्वेऽणुपरिमाणवत्त्वं वा, देहपरिमाणवत्त्वं वा वक्तव्यं स्यादित्याह—*तदा खल्विति*॥ अस्तु अणुपरिमाणवत्त्वम्, तत्राह—*अणुपरिमाणत्व इति*॥ देहपरिमाणवत्त्वपक्षं दूषयति—*देहपरिमाणत्वेत्विति*। देहपरिमाणत्वपक्षे वक्तव्यम्—किमवयवारब्ध आत्मा ? उत अवयवसमुदायः ? आद्यं दूषयति—*अनित्यत्वप्रसङ्ग इति*॥ जन्यस्यानित्यत्वनियमादिति भावः। अवयवसमुदायस्याऽऽत्मत्वपक्षेऽपि किमवयवसमुदायस्य चैतन्यम्, तदवयवानां प्रत्येकं चैतन्यं वेति, दूषयितुं विकल्पयति—*अवयवसमुदायो वेत्यादिना*॥ द्वितीयं दूषयति—*प्रत्येकं चैतन्यपक्ष इति*॥ विरुद्धक्रियाभावेन शरीरोन्मथनम्, तत्राह—*अक्रियं वेति*। आद्येऽपि किमनेकावयवसंश्लेषलक्षणसमुदायापत्तिः शरीरोपाधिकी, ? स्वत एव वा ? काकतालीया वा ? तत्राद्यं दूषयति—*समुदायचैतन्ययोग इति*॥ *वृक्णे = भिन्ने। द्वितीयं दूषयति—*न च बहूनामिति*। तृतीयं दूषयति—*य एवेति*॥ काकतालन्यायेन यादृच्छिकावयवसंश्लेषवद्यादृच्छिकविश्लेषोऽपि तन्न्यायेन भवेदिति स्वस्थानामेवाकस्मादचैतन्यापत्तिरित्यर्थः। *ननु* विज्ञानस्यैवाहंप्रत्ययालम्बनत्वाद् अहंप्रत्ययस्य भ्रमत्वमिति क्षणिकवादिमतमाशङ्क्याह—*विज्ञानालम्बनत्वेऽपीति*॥ विज्ञानमालम्बनं यस्य स तथोक्तः ; तत्त्वेऽपीत्यर्थः। भ्रान्तत्वे हेतुमाह—*तस्येति*॥ अहंप्रत्ययस्येत्यर्थः। योऽहं पूर्वं स्थितः, स एवाहमधुनाऽप्यस्मीति पूर्वोत्तरकालावच्छिन्नस्थिरवस्तुन एवाहंप्रत्ययविषयत्वादित्यर्थः।

तथाऽप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्यन्तविवि-

भामती

व्याख्याताः । तदेवमुक्तक्रमेणाहंप्रत्यये पूतिकूष्माण्डीकृते भगवती श्रुतिरप्रत्यूहं कर्तृत्व-भोक्तृत्व-सुख-दुःख-शोकाद्यात्मत्वमहमनुभवप्रसञ्जितमात्मनो निषेद्धुमर्हतीतीति ॥ तदेवं सर्वप्रवादि श्रुति-स्मृतीतिहास-पुराणप्रथितमिथ्याभावस्याहंप्रत्ययस्य स्वरूप-निमित्त-फलैरुपव्याख्यानम्—*अन्योन्यस्मिन्नित्यादि* ॥ अत्र चान्योन्यस्मिन्धर्मिणि=आत्मशरीरादौ अन्योन्यात्मकताम्, अध्यस्य अहमिदम्=शरीरादीति । इदमिति च

ऋजुप्रकाशिका

अस्तु तथापि विज्ञानानामेवाहंप्रत्ययविषयत्वमित्यत आह---*स्थिरत्वाच्चेति* ॥ तन्मते विज्ञानानां क्षणिकत्वादित्यर्थः । यत् पूर्वं गौणवादिना मुख्य-गौण-वस्तुभेदग्रहमुपपाद्य "कृशोऽहं मन्दोऽहम्" इत्यादिप्रत्ययानां गौणत्वमुक्तम्, तदप्युक्तविधया भेदाग्रहे सति निरस्तमित्याह---*एतेनेति* ॥ भ्रमो ह्यध्यासशब्दार्थः । एवं पूर्वोत्तरग्रन्थेषु सर्वत्र भ्रम एवाऽध्यासशब्दार्थो द्रष्टव्यः । भ्रमस्य तन्मतेऽध्यासत्वेन व्यवहारादध्यासतयेत्युक्तम् । एवमहंप्रत्ययस्य देहाहंकाराद्यविविक्तात्मविषयस्य भ्रमत्वेन तद्विषयाहंकारगतकर्तृत्वादेरात्मनि स्वाश्रयाहंकारतादात्म्याध्यासेनाध्यस्ततया कर्तृत्वादेरवास्तवत्वादकर्तृभोक्तृ-शोकादिविधुराशनायाद्यतीताद्वितीयात्मतत्त्वं वेदान्तशास्त्रप्रतिपाद्यमित्याशयेन तच्छास्त्रविषयसिद्धिमुक्त्वा प्रयोजनसिद्धिमप्याह---*तदेवमुक्तेति* ॥ पूति=दुर्गन्धि, कूष्माण्डफलमिव कृतः, पूतिकूष्माण्डीकृतः ; तस्मिन् सतीत्यर्थः । एवमुक्तविधया तात्पर्यं वर्णयित्वा---*अन्योन्यस्मिन्नित्यादिभाष्यं* पदशो योजयति---*तदेवं सर्वप्रवादीति* ॥ स्वरूप-निमित्त-फलैरित्युक्तम्, तत्र स्वरूप-निमित्त-फलानि कथ्यन्ते । *स्वरूपम् = अन्योन्यात्मकत्वाध्यासोऽन्योन्यधर्माध्यासश्च । *निमित्तम् = इतरेतराविवेकः । *फलम् = व्यवहारः । भाष्ये अन्योन्यस्मिन्नित्युक्तम्, तद्विवृणोति---*अन्योन्यस्मिन् धर्मिण्यात्म-

वार्तिकम्

त्वेनानुयोगितया सत्यत्वोपपत्तेर्न काचिदनुपपत्तिः । एवंच सति सत्यानृतरूपत्वमध्यासस्य सिद्धं भवति ; अन्यथोभयोरपि स्वरूपतोऽध्यासेन मिथ्यात्वात्तदसिद्धिः स्यादिति । *ननु*—आभासवादमाश्रित्योभयोरपि मिथ्यात्वाभिधाने न कश्चिद्दोषः । न च—एवं सत्यानृतात्मकतानुपपत्तिरध्यासस्येति—वाच्यम् ; रजतेदमंशयोरज्ञातशुक्तेरिवाऽऽवृतशुद्धचैतन्यस्यैवाधिष्ठानत्वात्तदुपपत्तेरिति—चेत्, *सत्यम्* ; वादान्तराभिप्रायमेतत् । इत्थंभावमेवाभिनीय दर्शयति—*विषयिणस्तद्धर्माणां च विषयेऽध्यास इति* ॥ यद्यपि चिदेकरसे न सन्ति धर्माः ; तथापि सत्यज्ञानानन्तत्वादयः स्वरूपधर्मा विकल्पिताः सन्त्येवेत्यदोषः । अत एव स्वरूपसंसर्गाध्यासप्रकारभेदाद् द्विरध्यासशब्द एकस्मिन्नप्यध्यासे प्रयुक्तः । तस्माद्विषयविषयिणोस्तादात्म्यानुपपत्तेरध्यासो नास्तीति प्राप्तम् ॥

एवं प्राप्ते परिहारमाह—*इति भवितुं युक्तम् ; तथाऽप्यन्योऽन्यस्मिन्नन्योन्यात्मकतामन्योन्य-

भाष्यभावप्रकाशिका

र्विवक्षितम् । अत्र यद्यपीति पठितव्यम् । तेन यद्यपि भवितुं युक्तमिति योजना । अध्यासस्य नास्तित्वमयुक्तत्वाद्, अभानाद्वेतिविकल्प्याद्यमङ्गीकरोति--*तथापीति* ॥

प्रदीपः

तु सादृश्यज्ञानाभावाद् नात्मान्तःकरणयोरध्याससंभव इति शङ्का निरवसरैवेति द्वितीयकारणाभावशङ्कां सुसमाधां मत्वा भेदाग्रहाद् नाध्यास इति शङ्कावारणार्थमाह---* अन्योन्यस्मिन्निति--लोकव्यवहार इति च* ॥ अत्यन्तविविक्तयोर्धर्मधर्मिणो-

भामती

वस्तुनः, न प्रतीतितः। लोकव्यवहारः=लोकानां व्यवहारः, स चायमहमिति व्यपदेशः। इतिशब्द-

ऋजुप्रकाशिका

शरीरादाविति* ॥ अहंकारादिरादिशब्दार्थः। *अन्योन्यात्मकतामध्यस्य=अन्योन्यतादात्म्यमध्यस्य। भाष्ये--*अग्रे अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः इत्युक्तम्*, तत्र अहमिदमिति व्यवहारं पृथक्कृत्य तं व्यवहारं तादात्म्याध्यासफलत्वेन योजयति--*अहमिदं शरीरादीति* ॥

ननु अहमिदं शरीरमिति प्रतीतौ सत्यां खलु तथा व्यवहारः, न तथा प्रतीयते ; तथाच अहमिदमिति भाष्योक्तमयुक्तमित्यत आह--*इदमिति च वस्तुतो न प्रतीतित इति* ॥ अहमिति प्रतीताविदमित्यप्रतीतेऽपि शरीरेऽवास्तवत्वमनात्मत्वमस्तीतीदंशब्दप्रयोग इति भावः। भाष्ये लोकव्यवहार इत्युक्तम्, तत्र समासान्तरभ्रमं वारयति--*लोकव्यवहार इति* ॥ अभिज्ञा, अभिवदनमुपादानम्, अर्थक्रिया चेति चत्वारो व्यवहाराः, तन्मध्येऽभिवदनमेवात्र व्यवहारत्वेन विवक्षितमित्याह--*स चाहमिति व्यपदेश इति* ॥ भाष्ये 'अहमिदं ममेदमिती'त्यत्र इतिशब्दोऽहमिदमिति ममेदमिति इत्युभयत्रान्वितोऽस्ति, तत्र 'अहमिदमि'त्यनेनान्वितेनेतिशब्देन सूचितमर्थमाह--*इतिशब्दसूचितश्चेति* ॥ प्रमाय प्रमाणेनेत्यत्र प्रमाणेन प्रमायेति

वार्तिकम्

धर्मांश्चाध्यस्येतरेतराविवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोर्मिथ्याऽज्ञाननिमित्तः सत्यानृते मिथुनीकृत्या'हमिदम्' 'ममेदमि'ति नैसर्गिकोऽयं लोकव्यवहार इति* ॥' केचित्तु "इति भवितुं युक्तम्" इति ग्रन्थं पूर्वपक्षग्रन्थे योजयन्ति ; तन्न साध्विति प्रतिभाति ; "अध्यासो मिथ्या" इत्येतावतैव वाक्यपरिसमाप्तेर्निराकाङ्क्षत्वात्, कथञ्चिदुत्थाप्याकाङ्क्षयाऽध्यासो मिथ्येति भवितुं युक्तमित्यन्वयस्य कर्तुं शक्यत्वेऽपि 'इति'शब्दव्यवायाद् भिन्नवाक्यत्वप्रतीतेः, भिन्नलिङ्गयोः सामानाधिकरण्यानुपपत्तेः, सिद्धान्ते तु "तथापी"ति शब्दार्थस्य किञ्चिदभ्युपगतार्थसाकाङ्क्षत्वेन "सत्यमेवम्" इत्यादिपदवत् तत्प्रतिपादकत्वेनान्वयोपपत्तेरतिसमञ्जसम्। तत्र यत्तदोर्नित्यसम्बन्धाद् "इति भवितुं युक्तम्" इत्यतः प्राग् यद्यपीत्यध्याहार्यम्। इतिशब्दः प्रकृततादात्म्यानुपपत्तिपरामर्शितयैवंकारार्थः।—यद्यप्येवं भवितुं युक्तम् ; तथापि नैसर्गिकोऽयं लोकव्यवहार इति सम्बन्धः॥ अयमत्राशयः—किं विषयविषयिणोरुक्तविरोधात् पारमार्थिकं तादात्म्यं नोपपद्यत इत्युच्यते ? किं वाऽऽध्यासिकम् ? *तत्राद्ये पक्षे निरनुयोज्यानुयोगो नाम निग्रहस्थानमावहतीत्याह—*यद्यपीति* ॥ *भवितुं युक्तमिति* ॥ न ह्यस्माभिस्तयोः पारमार्थिकं तादात्म्यमभ्युपगम्यते, न वा तदन्यथानुपपत्तिगम्याध्यासस्य सत्यानृतात्मकता ; विरोधात्, न ह्यात्मन्यनात्मनस्तादात्म्यं पारमार्थिकं सत् स्वस्य सत्यानृतात्मकत्वमावहति ; पारमार्थिकत्वविरोधात्। अतो यद्यपि पारमार्थिकं तादात्म्यं तयोर्नोपपद्यत इत्येवं युक्तम्, किन्तु निरनुयोज्यानुयोगमात्रमेतदित्यर्थः। * द्वितीयेऽपि किं तत्र युक्तिसहमित्युच्यते ? किं वा नास्त्येव तदिति ? तत्राद्यस्त्वनुगुण एव तस्याध्यासिकत्व इत्याह—

भाष्यभावप्रकाशिका

पूर्वोक्तरीत्या युक्तिशून्यत्वमध्यासस्याङ्गीकृत्य, प्रतिभासमानत्वादपलापायोगादहं 'मनुष्य' इति प्रत्ययस्य देहव्यतिरिक्तात्मवादिमतेऽध्यासमन्तरेणोपपादनासम्भवाच्च तदनुरूपं कारणमेव कल्प्यमित्यभिसन्धायाऽध्यासं प्रतिजानीते--*तथापीत्यादिना लोकव्यवहार इत्यन्तेन भाष्येण* ॥

पञ्चपादिकाविवरणम्

द्रष्टर्यहङ्कारादिशरीरान्तपदार्थाध्यासस्य सम्भवं प्रातमङ्गीकरोति—* यद्यप्येवमिति * ॥ निरुपाधिकभ्रम-कार्यदर्शनमेव गुणावयवसामान्याभावेऽपि केतकीगन्धसदृशस्सर्पगन्ध इतिवत् सादृश्यं वा शङ्खपीतिमादाविव कारणान्तरं वा कल्पयतीत्याह—* "तथापी"त्यादिना "एवमध्यासस्यापी"त्यभिप्राय इत्यन्तेन ग्रन्थेन * ॥

ऋजुविवरणम्

'तथापी'त्यादिनाध्याससद्भाव उपालम्भार्हो न भवतीत्युक्तम्, तद्युक्तम् ; सामग्र्यभावेन ह्युपालम्भः कृतः, नच तन्निरूपणेन विनोक्तिमात्रेणानुपालम्भः सिध्यतीत्याशङ्क्याभिप्रायमाह—*निरुपाधिकभ्रमेति*॥ सोपाधिकेतूपधिमात्रो-

वार्तिकम्

यद्यपीति । भवितुं युक्तमिति ॥ तन्त्रेणैव पक्षयोरुत्तरम् । अलङ्कारोऽयमध्यासस्य, यद्युक्तिं न सहते ; अनिर्वचनीयस्वरूपत्वात्, अन्यथा निर्वचनीयतया सत्यत्वापत्तेरध्यासत्वव्याघातात् । अतो विषयविषयिणोराध्यासिकं तादात्म्यं न युक्तिसहमिति यदुच्यते, तदपि भवितुं युक्तम् ; तस्य तन्मात्रशरीरत्वादित्यर्थः । *द्वितीयेऽपि किं प्रमाणाभावात्तन्नास्तित्वमवधार्यते ? किं वा फलाभावात् ? आहोस्वित् कारणाभावात् ? कारणाभावेऽपि किमुपादानकारणाभावात् ? किं वा निमित्तकारणाभावादिति ? मैवम् ; अध्यासे प्रमाणादिचतुष्टयस्य विद्यमानत्वादित्यभिप्रेत्याध्यासोपपादकप्रमाणादिचतुष्टयं दर्शयन् तत्स्वरूपमाह—*तथापीत्यादिना* ॥ तत्र "न्योऽन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य" इत्यध्यासस्वरूपमाह । "इतरेतराविवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोरि"ति तु तदुपादाननिमित्ते । "नैसर्गिकोऽयं लोकव्यवहारः" इति तत्प्रमाणफले । "मिथ्याऽज्ञाननिमित्तः" इत्यादिना च तदुपादानमिति विभागः । *ननु*—एवं तर्हि अत्रैवाध्यासप्रमाणस्य प्रदर्शितत्वादग्रे तत्सद्भावप्रमाणं न वाच्यम्, *नैष दोषः* ; अत्र व्यवहारान्यथानुपपत्तिः प्रमाणत्वेन निर्दिश्यते, तत्र तु प्रत्यक्षमिति, प्रमाणभेदात्तत्प्रदर्शनोपपत्तेः । *ननु*—नैवमपि तदुपपत्तिः ; तत्रापि प्रमातृत्वादिव्यवहारान्यथानुपपत्तेस्तत्प्रमाणत्वेनोपन्यस्तत्वादिति—चेत्, *सत्यम्*; परं त्वत्र साक्षादध्यासजन्य 'मम'व्यवहारः प्रमाणत्वेन निर्दिश्यते, तत्र तु तन्नान्तरीयकप्रमातृत्वादिव्यवहार इति भेदः । यद्वा—अत्रापि "नैसर्गिकोऽयं लोकव्यवहारः" इति प्रत्यक्षं व्यवहारमुपन्यस्यताऽर्थात् प्रत्यक्षप्रमाणस्याप्युपन्यस्तत्वात् संक्षेपेणात्रोक्तप्रमाणस्यैव तत्रोपपत्त्या विस्तरेण प्रतिपादनमिति सर्वं सुस्थम् ॥

अत्र व्यवहारशब्देन—अभिज्ञावदनार्थक्रियोपादानेषु चतुर्षु व्यवहारेष्वभिज्ञावदने गृह्येते ; योग्यत्वात्, तत्राप्युभयव्यवहारः शिष्यं प्रत्येव प्रमाणीक्रियते, वादिनं प्रति त्वभिवदनमात्रम् ; अख्यातिवादिना तत्र ख्यातेरनङ्गीकारात् । अत्र *व्यवहरणम्=व्यवहारः, व्यवहृतिर्वा व्यवहारः । व्यवहारान्तरहेतुत्वात् प्रथमा व्युत्पत्तिः, द्वितीया च स्वयं फलरूपत्वादिति ध्येयम् । *लोकनम्=लोकः । लोकश्चासौ व्यवहारश्चेति

भाष्यभावप्रकाशिका

द्वितीयं प्रत्याह*—अयमिति* ॥ मनुष्योऽहमिति प्रतीतेरध्यासस्वरूपापलापायोगाद् अस्यान्यदेहादिव्यतिरिक्तात्मवादे प्रमात्वाभावात्तदनुरूपं कारणं कल्प्यमिति भावः । अपरोक्षमध्यासं द्वेधा विभजन्विशेष्यं निर्दिशति—*लोकव्यवहार इति ॥ लोक्यते मनुष्योऽहमिति ज्ञायत इति ज्ञानोपसर्जनोऽर्थाध्यसः, लोकविषयो व्यवहार इत्यर्थोपसर्जनज्ञानाध्यासतोक्ता । कोऽयमध्यासः ? यो विषयादिसिद्धिहेतुरित्याशङ्क्य तल्लक्षणमाह—* अन्योन्यस्मिन्नित्यादिना धर्मधर्मिणोरित्यन्तेन ॥ अन्योन्यस्मिन्नन्योन्यात्मकता तद्धर्मा-

भामती

सूचितश्च शरीराद्यनुकूलं प्रतिकूलं च प्रमेयजातं प्रमाय प्रमाणेन तदुपादानपरिवर्जनादिः । अन्योन्यधर्मांश्चाध्यस्य अन्योन्यस्मिन्धर्मिणि देहादिधर्माञ्जन्म-मरण-जरा-व्याध्यादीनात्मनि धर्मिणिं अध्यस्तदेहादिभावे समारोप्य, तथा चैतन्यादीनात्मधर्मान्देहादावध्यस्तात्मभावे समारोप्य-ममेदं जरा-मरण-पुत्र-पशु-स्वाम्या-

ऋजुप्रकाशिका

व्यत्यासेनान्वयः । *तदुपादानेति* ॥ शरीराद्यनुकूलोपादान-शरीरप्रतिकूलपरिवर्जनादिरित्यर्थः । भाष्ये—अन्योन्यधर्मांश्चाध्यस्येत्युक्तम्, तद्विवृणोति—*अन्योन्यधर्मांश्चाध्यस्य* *अन्योन्यस्मिन् धर्मिणीत्यादिना* ॥ देहादीत्यत्र 'अहंकार' आदिशब्दार्थः । व्याध्यादीनित्यत्र कर्तृत्वादिरादिशब्दार्थः । धर्मिणोः परस्परतादात्म्याध्यासाभावप्रयुक्तधर्माध्यासाभावं परिहरन् धर्मितादात्म्याध्यासमुक्तं स्फोरयति—*अध्यस्तदेहादिभाव-इति* ॥ अहंकार आदिशब्दार्थः । आत्मनि धर्मिणि देहाहंकारादिगतधर्माध्यासमभिधाय देहादौ धर्मिणि आत्मगतधर्माध्यासमाह—*तथा चैतन्यादीनिति*॥ यद्यपि चैतन्यं आत्मस्वरूपमेव, न तद्धर्मः ; तथापि धर्मधर्मिभावकल्पनया तथोक्तम् । देहादावित्यत्र, अहंकार आदिशब्दार्थः । अत्रापि देहादावात्मधर्माध्यासो धर्मितादात्म्याध्यासपूर्वकः, तदर्थमाह—*अध्यस्तात्मभाव इति*॥ धर्मितादात्म्याध्यासफलम्—'अहमिदमि'ति व्यवहारमभिधाय धर्माध्यासफलीभूतं व्यवहारमाह—*ममेदं जन्ममरणेत्यादिना* ॥ अत्रापि व्यवहार-

वार्तिकम्

लोकव्यवहारः, प्रत्यक्षव्यवहार इत्यर्थः । लोक इति वा व्यवहारो लोकव्यवहारः, 'मनुष्योऽहम्' 'देवोऽहम्' इत्यादिर्हि भवति व्यवहारः । लोकानां व्यवहारो लोकव्यवहार इति वा । सर्वो हि लोको देह-कलत्रादिष्वहंममेत्यभिमत्य व्यवहरति । तेन 'इदं शरीरम्' 'इदं कलत्रादी'तीदङ्कारास्पदत्वेन प्रत्यक्षेणानुभूयमानेष्वनात्मस्वनात्मधर्मेषु च देह-कलत्रादिषु योऽयमहं ममेत्यात्मतया, तद्धर्मतया च लोकव्यवहारः, स सत्यानृते मिथुनीकृत्य भवति, नान्यथा ; तादृशस्वप्नव्यवहारवत् ; निर्विषयव्यवहारानुपपत्तेः । *ननु*—निर्विषयोऽपि व्यवहारो दृष्टः ; यथा"राहोः शिरः" "शशविषाणमि"ति ; तथाऽऽह च भगवान् पतञ्जलिः—"शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः"—इति, *सत्यम्* ; परन्तु अत्र प्रत्यक्षव्यवहारः पक्षीकृतः, न व्यवहारमात्रम् । *अत एव भगवता भाष्यकारेण—"अयम्" इति व्यवहारो विशेषितः । प्रत्यक्षेण हि तादात्म्यं तत्सम्बन्धं चानुभूय 'अहम्' 'ममेति' चाभिलपति । नत्वायं निर्विषयो वक्तं शक्यः ; अतिप्रसङ्गात् । विषयाध्यक्षतैव व्यवहारस्य प्रत्यक्षताऽभिमता, न स्वरूपाध्यक्षता ; अतिप्रसङ्गात्, प्रत्यक्षपरोक्षव्यवहारविभागानुपपत्तेश्च, सर्वत्राभिज्ञावदनयोः स्वरूपतोऽप्रत्यक्षत्वात् । अस्तु तर्हि 'सिंहो देवदत्तः' इतिवद् गौणोऽयं व्यवहार इति, नेत्याह—* नैसर्गिक इति* ॥

भाष्यभावप्रकाशिका

ध्यासलक्षणस्सत्यात्मासत्यान्तःकरणादिमिथुनीकरणीभूतो लोकव्यवहारस्तथापि वर्णित इति योजना । तत्रान्योन्यस्मिन्निति परस्पराधिष्ठानत्वमन्योन्यात्मकतामिति परस्परमध्यस्तता च कथ्यते । तत्रान्यस्मिन्नन्यावभास इत्युक्ते प्रतिमायां देवतादृष्टिरपि भ्रान्तिः स्यात्, ततो विशिनष्टि अन्योन्यस्मिन्निति ॥

तत्र देवतादृष्टिमात्रमारोप्यम्, न प्रतिमादृष्टिः ; "ब्रह्मदृष्टिरुत्कर्षादि"ति न्यायात् । पटे तन्तवः, स च तन्तुष्विति लोकवादिदृष्ट्या तन्तुपटयोरन्योन्याधारत्वधियोरध्यासत्वप्राप्तावुक्तम्—*अन्योन्यात्मकतामिति*।

भामती

दीति व्यवहारो व्यपदेशः, इतिशब्दसूचितश्च तदनुरूपः प्रवृत्त्यादिः। अत्र चाध्यास-व्यवहारक्रियाभ्यां

ऋजुप्रकाशिका

शब्दार्थो व्यपदेश इत्याह—*व्यपदेश इति* ॥ अहमिदमित्यन्वितेतिशब्दसूचितमर्थं पूर्वमभिधाय ममेदमित्यन्वितेतिशब्दसूचितमर्थमाह—*इतिशब्दसूचितश्चेति* ॥ *ननु* "भुक्त्वा व्रजति" इत्यत्र क्त्वाप्रत्ययो भोजनव्रजनक्रिययोरेककर्तृयुक्तः, अत्राध्यासव्यवहारयोरेककर्तृकत्वानभिधानादध्यस्य व्यवहार इति क्त्वाप्रत्ययोपेतप्रयोगोऽनुपपन्न इत्याशङ्क्याह—*अत्र चाध्यासव्यवहारक्रियाभ्यामिति* ॥ अध्यासश्च व्यवहारलक्षणक्रिया च ते, तथोक्ते; ताभ्यामित्यर्थः। व्यवहारक्रियया कश्चित् व्यवहारकर्ता आक्षिप्तः, तस्यैवाध्यासकर्तृत्वादध्यस्य

वार्तिकम्

सिंहाद् गृहीतभेदे हि देवदत्ते शौर्यादिगुणयोगात् कदाचित् केनचित् सिंहशब्दः प्रयुज्यते, न त्वगृहीतभेदे सर्वदा सर्वलोकेन; तथा सति मुख्यत्वप्रसङ्गात्, गौणत्वव्याघातापत्तेश्च। यत्रापि सार्षपादौ सर्वदा सर्वजनीनस्तैलशब्दप्रयोगः, तत्रापि तिलविकारगृहीतभेद एव तस्मिन् भवति तत्प्रयोगः; अन्यथा गौणत्वव्याघातादित्युक्तत्वात्, रूपगन्धादिभेदेन तयोः प्रत्यक्षेणैव भेदाध्यवसानात्, सर्वदा सर्वजनीनत्वं तु तत्प्रयोगस्य गुणिनि शुक्लादिशब्दवद् निरूढत्वात्। निरुढता त्वनादिवृद्धप्रयोगादित्यन्यदेतत्। नच—एवं शक्तिरेवास्तु, किं लक्षणयेति—वाच्यम्; लक्षणया तत्प्रयोगे संभवति शक्तिकल्पने प्रमाणाभावात्, नानार्थकल्पनस्यान्याय्यत्वात्, अगत्या हि गवादिशब्दे तत्कल्पनात्, प्रकृते च लक्षणयाऽपि तत्प्रयोगोपपत्त्यावगतेरभावात्, गुणद्वाराऽभिधेयाविनाभावस्य विद्यमानत्वेन लक्षणासंभवात्। *ननु*—"सोमेन यजेत" इतिवद् मत्वर्थलक्षणया शुक्लादिशब्दो गुणिनि वर्तताम्? किमिति तर्हि मत्वर्थीयोऽच्प्रत्ययः? "मतुब्लोपो वा द्रष्टव्य" इति कात्यायनानुशासनं भवति' न हि लक्षणायां तदनुशासनमुपपद्यते, *नैष दोषः*; संभवाभिप्रायत्वात्तस्य। संभवति हि शुक्लादिशब्दस्य गुणिन्यन्येनापि प्रकारेण साधुत्वमित्येवमनुशास्ति भगवान् कात्यायनः, न लक्षणापक्षं निवारयति; लक्षणयाऽपि तत्र तत्साधुत्वोपपत्तेः। अस्तु वा शुक्लादिशब्दो गुणिनि यथा तथा, तैलशब्दस्तु सार्षपादिषु निरूढलक्षणयैवेत्यविवादम्। नचैवं देहादिभ्य आत्मभेदः प्रत्यक्षेणाध्यवसीयते; अनादिसर्वजनप्रत्यक्षाभेदव्यवहारविरोधात्, अख्यातिवादिभिरपि सांख्यैर्दृश्यविशिष्टव्यवहारस्याङ्गीकरणात्। नच विरुद्धयोर्विषयविषयिणोरभेदव्यवहारः सत्यानृतमिथुनीकरणं विना, नवा सत्यानृतमिथुनीकरणं तयोः परस्पराध्यासं विनेति, तदिदमुक्तम्—*"अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्य सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार" इति* ॥

ममेति व्यवहारसिद्ध्यर्थम्—*अन्योन्यधर्मांश्चाध्यस्येत्युक्तम्*। *यद्वा*—अन्योन्यस्मिन्नन्योन्यात्मकतामन्यो-

प्रदीपः

रितरेतराविवेकेन 'अहमि'ति अन्योन्यस्मिन्नन्योन्यात्मकताम्, ममेदमिति अन्योन्यधर्मांश्चाध्यस्य, सत्यानृते मिथुनीकृत्य, मिथ्याऽज्ञाननिमित्तोऽयं लोकव्यवहारो नैसर्गिक इति योजना *। अत्र अन्योन्यस्मिन् अन्योन्यात्मकताध्यासस्योदाहरणम् * अहमिति * ॥ अन्योन्यधर्मांश्चाध्यस्येत्यस्योदाहरणम् *ममेदमिति* ॥ अहमिदमिति भाष्ये इदं शब्दप्रयोगस्तु अहमध्यासेऽन्तःकरणांशोऽपि प्रतीयत इति सूचनेन इदं रजतमित्यादाविव भ्रमज्ञानस्य द्व्यंशघटितत्वं यदपेक्षितम्, तदबाधनिरूपणार्थम्। कुत्रचनांशद्वयं स्पष्टम्, कुत्रचनैकः स्पष्टोऽपरोऽस्पष्टः; यथा अयो दहतीत्यादौ वह्न्यंशोऽस्पष्ट इति, अहमध्यासोऽपि न बाधित इति, इदंपदेन सूच्यते। लोकव्यवहार इत्यस्य प्राणिमात्रस्य व्यवहार इत्यर्थः तथाच व्यवहारकर्तैवाध्यासस्य मिथुनीकरणस्य च

भामती

यः कर्तोन्नीतः स समान इति समानकर्तृकत्वेनाध्यस्य व्यवहार इत्युपपन्नम् ; पूर्वकालत्वसूचितमध्यासस्य व्यवहारकारणत्वं सूचयति—मिथ्याज्ञाननिमित्तो व्यवहारः । मिथ्याज्ञानम् = अध्यासः, तन्निमित्तः ।

ऋजुप्रकाशिका

व्यवहार इति क्त्वाप्रत्ययोपेतः प्रयोग उपपन्न इत्यर्थः । *पूर्वकालेति* ॥ 'अध्यस्य व्यवहारः' इत्यत्र अध्यासस्य व्यवहारपूर्वकालीनत्वमुक्तं तत्सूचितमित्यर्थः । भाष्ये—उत्तरत्र विद्यमानं व्यवहारपदमाकृष्य तत्रैव भाष्ये पूर्वत्र स्थितेन मिथ्याज्ञाननिमित्त इत्यनेन संयोजयति—*मिथ्याज्ञाननिमित्तो व्यवहार इति* ॥ *ननु* एतावता व्यवहारस्य मिथ्याज्ञाननिमित्तकत्वोक्तावप्यध्यासनिमित्तकत्वं नोक्तमेवेत्यत आह—*मिथ्याज्ञानमध्यास इति* । *तन्निमित्त इति* ॥ स मिथ्याज्ञानलक्षणोऽध्यासो निमित्तं यस्य सः, तन्निमित्त इत्यर्थः ।

ऋजुविवरणम्

पपन्ने न कारणान्तरकल्पकत्वम्, तदर्थमाह—*निरुपाधिकेति* ॥ निरुपाधिकस्यापि कार्यमात्रस्य नाभिमत-

तत्त्वदीपनम्

साहश्यज्ञानस्य निरुपाधिकभ्रमव्यापकत्वे नाहंकारादेरात्मन्यध्यस्तत्वं सिद्ध्यति, साहश्याभावादित्याशङ्क्य, भूयोऽवयवसामान्यसाहश्याभावेऽपि कार्यानुपपत्त्या साहश्यान्तरं कल्प्यत इत्याह—*निरुपाधिकेति* ॥ केतकी-सर्पगन्धयोर्निर्गुणत्वान्निरवयवत्वाच्च गुणावयवसामान्याभावेऽपि केतकीगन्धसदृशः सर्पगन्ध इत्यनुभवाद्यथा साहश्यान्तर-मास्थितम्, तथाऽत्रापीत्यर्थः ।

निरुपाधिकभ्रमेऽपि न साहश्यानुगतिरित्याह—*शङ्खपीतिमादाविति* ॥ 'पयस्तिक्तमि'त्यादिभ्रम आदिशब्दार्थः । कारणान्तरमित्यज्ञानलक्षणमित्यर्थः । युष्मदित्यादिना किमध्यासस्य सत्त्वमपलप्यते ? उत प्रतीतिः ? इति विकल्प्याऽऽद्यं तथापीत्यङ्गीचकार, द्वितीयेऽपि किं कारणस्याऽपलापो विवक्षितः ? उत प्रतीतेः ? आद्येऽपि किं निमित्तस्य ? उतोपादा-नस्य ? न तावदाद्यः ; संस्कारस्य निमित्तत्वात्, प्रमाणानुभवसंस्काराभावेन विपरीतकार्याभावादर्शनादेवानुभव-संस्कार एव प्रयोजकः, स प्रकृतेऽपि सुसंपादः । न चेतरेतराश्रयत्वम् ; पूर्वानुभवसंस्कारस्योत्तरोत्तरभ्रमप्रयोजकत्वादित्यभि-

भाष्यभावप्रकाशिका

'पटः शुक्लः' 'शुक्लः पटः' इति प्रमाव्यावृत्त्यर्थम्—इतरेतराविवेकेनेति । इत्थंभावे तृतीया ; भेदाग्रहेण, एकतापत्त्या वेत्यर्थः । अनेनाध्यासस्य स्वरूपं निमित्तं च कथ्यते । यथावभासं पारमार्थिकं किं न स्यात् ?

वार्तिकम्

न्यधर्मांश्चाध्यस्य 'अहमिदम' 'ममेदमि'ति यन्मिथ्याज्ञानम्,तन्निमित्तो योऽयं प्रत्यक्षसिद्धो नवविधो नैसर्गिकः प्रमातृत्वादिरूपो लोकव्यवहारः, स सत्यानृते मिथुनीकृत्य भवतीति भाष्ययोजना ; "देहेन्द्रियादिष्वहंममाभि-मानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः" इति भाष्यप्रवृत्त्यनुसारात् । *ननु* अनात्मन्यात्म-व्यवहारस्तद्धर्मेष्वात्मधर्मव्यवहारश्चेतरेतराविवेकादेव सत्यानृतमिथुनीकरणमन्तरेण सेत्स्यतीत्युक्तत्वाद् न तदन्यथानुपपत्त्या सत्यानृतमिथुनीकरणरूपाध्याससिद्धिरिति, नेत्याह—*मिथ्याऽज्ञाननिमित्त इति* ॥

प्रदीपः

कर्तेति—'अध्यस्य' 'मिथुनीकृत्य चे'ति समानकर्तृकत्वाद् ल्यबुपपत्तिः । यद्यपि अध्यासो मिथुनीकरणं चैकम् ; तथापि प्रथमं सामान्यरूपेण, द्वितीयन्तु विशेषरूपेणेति न दोषः । * अयमिति * "अहमिति ममेदमित्यस्य परामर्शः । अत्र "अहमि"-त्याद्यध्यासपूर्वको'ऽहमि'त्याद्यध्यास इति वर्णनेन भ्रमान्तराक्रमान्तरमिति सूचनेन भ्रमज्ञानकारणं संस्कारमात्रमप्राप्य विशिष्टमिति

क्तयोर्धर्मधर्मिणोर्मिथ्याऽज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदम्' 'ममेद-मि'ति नैसर्गिकोऽयं लोकव्यवहारः।

भामती

तद्भावाभावानुविधानाद् व्यवहारभावाभावयोरित्यर्थः। तदेवमध्यासस्वरूपं फलं च व्यवहारमुक्त्वा तस्य निमित्तमाह—*इतरेतराविवेकेन* ॥ विवेकाग्रहणेनेत्यर्थः। अथाविवेक एव कस्मान्न भवति ? तथाच नाध्यासः, इत्यत आह—अत्यन्तविविक्तयोर्धर्मधर्मिणोः। परमार्थतो धर्मिणोरतादात्म्यं विवेकः,

ऋजुप्रकाशिका

तन्निमित्तत्वमेव व्यनक्ति—*तद्भावाभावेति* ॥ मिथ्याज्ञानलक्षणाध्यासभावाभावानुविधानादित्यर्थः। *ननु* —व्यवहारस्याध्यासाद् भेदे पूर्वापरभावेन व्यवहाराध्यासयोः कार्यकारणभावः स्यात्। नच भेदोऽस्ति। तथाहि—उपक्रमे *नैसर्गिकोऽयं लोकव्यवहारः* इत्युक्त्वा *एवमनादिरनन्तः* इत्याद्युपसंहारभाष्ये नैसर्गिकोऽध्यास इत्यभिधानेन नैसर्गिकत्वविशिष्टाध्यासत्वप्रतीतेरध्यासव्यवहारयोरेकत्वेन पूर्वापरभावायोगाद् न कार्यकारणभाव इति—चेत्, *न* ; कार्यभूतव्यवहारनैसर्गिकत्वेन तत्कारणीभूताध्यासस्यापि नैसर्गिकत्वमर्थसिद्धमिति, नैसर्गिकत्वविशिष्टकारणीभूताध्यासोपसंहारपरत्वादुपसंहारस्य विरोधाभावात्। न हि व्यवहारेऽध्यासे च नैसर्गिकत्वविशेषणं दत्तमित्येतावता तयोरभेद इति भावः। *ननु*—"अध्यस्य व्यवहारः" इत्यनेनैवाध्यासव्यवहारयोः कार्यकारणभावस्योक्ततया 'मिथ्याज्ञाननिमित्तो व्यवहारः' इत्यनेन व्यवहारस्य मिथ्याज्ञानलक्षणाध्यासकारणकत्वकथनं पुनरुक्तमिति—चेत् ; "सुप्तोत्थितः" इत्यादौ सुप्तेः पूर्वकालीनत्वेऽप्युत्थानाकारणत्ववद् "अध्यस्य व्यवहारः" इत्यत्राप्यध्यासस्य पूर्वकालीनत्वेऽपि व्यवहाराकारणत्वमेवेत्याशङ्कायां तन्निराकरणायाऽध्यासस्य व्यवहारकारणत्वस्पष्टीकरणार्थत्वेन 'मिथ्याज्ञाननिमित्तो व्यवहारः' इत्यस्य पुनरुक्तिदोषाभावादिति द्रष्टव्यम्। व्यवहारं फलत्वेन प्रदर्श्य तस्य कारणमध्यास इत्युक्तम्, अध्यासस्य च किं कारणमिति विवक्षायां तत्कारणमाहेत्याह—*तदेवमिति*। *तस्य=अध्यासस्य*। जातिव्यक्त्योरिवेतरेतरतादात्म्यम्, इतरेतराविवेक इति भ्रमः स्यात्, तद्वारणायार्थमाह—*विवेकाग्रहणेनेत्यर्थ इति* ॥ भेदाग्रहणेनेत्यर्थः। तथाच इतरेतराविवेकेनाध्यस्य=भेदाग्रहादध्यस्येति योजनीयम्। इतरेतराविवेको नाम = जातिव्यक्त्योरिवेतरेतरतादात्म्यमेवास्तु, तथाचाध्यासाभाव एवास्त्विति चोदयति—*अथेति* ॥ *अविवेकः = तादात्म्यम्*। वस्तुतोऽत्यन्तविविक्तयोस्तादात्म्यमयुक्तमित्याह—*अत आहेति* ॥ अत्यन्तविविक्तयोरित्युक्तम्, तत्र विवेकशब्दार्थ-

वार्तिकम्

अयमभिप्रायः—यो यो व्यवहारः, स सर्वोऽपि समानविषयकज्ञानपूर्वको दृष्टः, अयमपि व्यवहारत्वात् तथा मान्यः ; अन्यथाऽतिप्रसङ्गापत्तेः। विषयविषयिणोस्तादात्म्यव्यवहारस्तादात्म्यज्ञाननिमित्त एव सन् भवितुमर्हति। नच तद् ज्ञानं सत्यम् ; अतस्मिंस्तद्बुद्धिरूपत्वात्। नच विषयमिथ्यात्वमन्तरेण ज्ञानस्य मिथ्यात्वमुपपद्यते ; स्वरूपतस्तद्बाधादर्शनात्। नहि 'नेदं मम ज्ञानम्', 'नाभूद्वा मम ज्ञानमि'ति बाधं कश्चिदपि प्रत्येति, किन्तु 'नेदं रजतम्', 'नाहं मनुष्यः', 'मिथ्यैवैतावन्तं कालं रजतं मनुष्यत्वं चाभादि'ति ॥

भाष्यभावप्रकाशिका

इत्यत आह—*अत्यन्तविविक्तयोर्धर्मधर्मिणोरिति* ॥ धर्मिणोरतादात्म्यं विवेकः, धर्माणां चासङ्कीर्णता ॥ स्वरूपविवेकतिरस्कारेण भेदधीरध्यासः, नैवं शुक्लपटादिधीरित्यर्थः। स एवायमयमेव

भामती

धर्माणां चासंकीर्णता विवेकः। स्यादेतत्—विविक्तयोर्वस्तुसतोर्भेदाग्रहनिबन्धनस्तादात्म्यविभ्रमो युज्यते, शुक्तेरिव रजताद्भेदाग्रहे रजततादात्म्यविभ्रमः, इह तु परमार्थसतश्चिदात्मनो न भिन्नं देहाद्यस्ति वस्तुसत्; तत्कुतश्चिदात्मनो भेदाग्रहः? कुतश्च तादात्म्यविभ्रमः? इत्यत आह—सत्यानृते मिथुनीकृत्य। विवेकाग्रहादध्यस्येति योजना। सत्यं चिदात्मा, अनृतं बुद्धीन्द्रियदेहादि, ते द्वे धर्मिणी मिथुनीकृत्य युगलीकृत्येत्यर्थः। नच संवृतिपरमार्थसतोः पारमार्थिकं मिथुनमस्तीत्यभूततद्भावार्थस्य च्वेः प्रयोगः। एतदुक्तं भवति—अप्रतीतस्यारोपायोगादारोप्यस्य प्रतीतिरुपयुज्यते, न वस्तुसत्तेति।

ऋजुप्रकाशिका

माह—*परमार्थत इति* ॥ धर्मिणोर्विवेकशब्दार्थमभिधाय धर्माणां विवेकशब्दार्थमाह—*धर्माणां चेति* ॥ तथाच तादृशयोरपि धार्मिणोस्तादृशानामपि धर्माणां भेदाग्रहादध्यासः स्वीकार्य एवेति भावः। प्रकृते चिदचितोस्तादात्म्याध्यासमाक्षिपति—*स्यादेतदिति* ॥ *वस्तुसतोः* = परमार्थसतोः। दृष्टान्तमाह—*शुक्तिरिवेति* ॥ रजतं परमार्थसदिति तस्याभिप्रायः। *ननु* परमार्थसतोर्भेदाग्रहात् तादात्म्यारोपसत्त्वे कथं तदाक्षेपः? इत्याशङ्क्यान्यत्र सत्त्वेऽपि प्रकृते नेत्याह—*इह त्विति* ॥ परमार्थसतोरेव भेदाग्रहात् तादात्म्यारोप इति न नियमः; परमार्थापरमार्थयोरपि मिथुनीकरणेन तद्भेदाग्रहात् तादात्म्यभ्रमसंभवात्, नच शुक्तिरजतं दृष्टान्तः; शुक्तिरजतस्यापरमार्थत्वात्, इत्याशयवानाह—*अत आहेति* ॥ "सत्यानृते मिथुनीकृत्य अहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः" इति भाष्योक्त्या व्यवहारस्य मिथुनीकरणानन्तरभावित्वप्रतीतेर्मिथुनीकरणस्य व्यवहारहेतुत्वशङ्का स्यात्, तद्वारणाय तद्भाष्यं योजयति—*सत्यानृते मिथुनीकृत्य विवेकाग्रहादध्यस्येति योजनेति* ॥ विवेकाग्रहात् = मिथुनीकरणात्, भेदाग्रहः, ततोऽध्यास इत्यर्थः। सत्यानृतशब्दयोरर्थमाह—*सत्यं चिदात्मेति* ॥ अहङ्कार आदिशब्दार्थः। *ननु* मिथुनीकृत्येत्यस्य युगलीकृत्येत्यर्थ उक्तः, तदनुपपन्नम्; युगलस्य स्वतः सिद्धत्वेन तत्करणायोगादिति—चेत्, *न*; अध्यस्यतया बुद्धौ सन्निधापनस्यैव युगलीकरणशब्दार्थत्वेन तदुपपत्तेः। *ननु* "सत्यानृते मिथुनीकृत्ये"ति किमर्थमुक्तम्? मिथुनं कृत्वेत्येवोच्यतामित्यत आह—*नच संवृतीति* ॥ अनृतं संवृतिशब्दार्थः। पारमार्थिकापारमार्थिकयोरर्थयोः पारमार्थिकं मिथुनं न भवति, किं त्वपारमार्थिकमिवेत्यभूततद्भावार्थस्य च्वेः प्रयोगः; "अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः" इति सूत्रादित्यर्थः। *ननु* सत्यासत्ययोर्मिथुनीकरणेन तद्भेदाग्रहात् सत्यासत्यतादात्म्यारोप उक्तः, तदनुपपन्नम्; असत्यस्य आरोपायोगात्, अन्यथा नरशृङ्गादेरपि तथा स्यात्, इत्यत आह—*एतदुक्तं भवतीति*। *नच वस्तुसत्तेति*। *वस्तुसत्ता=वस्तुनः पारमार्थिकता, आरोपे नोपयुज्यत

वार्तिकम्

एतेन—अतस्मिंस्तद्बुद्धित्वमेव ज्ञानस्य मिथ्यात्वम्, तच्च व्यधिकरणधर्मावच्छिन्नविशेष्यकज्ञानत्वमिति—*अपास्तम्*; 'नेदं रजतमि'त्यादिस्वरूपबाधानुपपत्तेः, 'नात्र रजतम्' इति संसर्गबाधप्रतीत्यापत्तेश्च। नचैवं दृश्यते, तस्मान्न तथा कल्पनमुचितम्। कथं च व्यधिकरणेन धर्मेण विशेष्योऽवच्छिद्यताम्? न ह्यन्यधर्मेणान्योऽवच्छिद्यते; अतिप्रसङ्गापत्तेः, सर्वपदार्थसाङ्कर्यापत्तेश्च। *ननु*—नान्यधर्मेणान्योऽवच्छिद्यत इति ब्रूमः, किन्तु ज्ञानमेव तथाविधं दोषादुत्पद्यत इति—चेत्, *न*; किं निर्विषयकं ज्ञानमभ्युपगतं भवता? तथाच शून्यवादिनं प्रति दत्तो हस्तः स्यात्। दोषजन्यं तथेति चेत्, न; साधनाव्यापकत्वात्। न हि शून्यवादिनं प्रत्यदोषजन्यं ज्ञानं दर्शयितुं शक्यते; सर्वज्ञानस्य तन्मते दोषजन्यत्वात्, बाधितं तथेति चेत्, न; तं प्रत्यबाधितज्ञानस्यापि प्रदर्शयितुमशक्यत्वात्, शून्यज्ञानमबाधितमिति चेत्, न;

भामती

स्यादेतत्—आरोप्यस्य प्रतीतौ सत्यां पूर्वदृष्टस्य समारोपः, समारोपनिबन्धना च प्रतीतिरिति दुर्वारं

ऋजुप्रकाशिका

इत्यर्थः। नच—असत्यस्यारोपे नरशृङ्गादेरपि तथा स्यादित्युक्तमिति—वाच्यम्; अत्रानृतासत्यादिशब्देन नरशृङ्गादिवद् अलीकं नोच्यते, किंतु सदसद्विलक्षणमित्यदोषात्। प्रतीतस्यारोपे दोषमाशङ्कते—*स्यादेतदिति* ॥ द्वयोः परस्परापेक्षत्वे ह्यन्योन्याश्रयः, नचात्र तथा; आरोपपारम्पर्येण परस्परानपेक्षत्वादित्याशय-

पञ्चपादिका

एवाध्यासस्य युक्त इत्यर्थः। यद्यप्येवम्; तथापि *नैसर्गिकः = प्रत्यक्चैतन्यसत्तामात्रानुबन्धी। *अयम् =

पञ्चपादिकाविवरणम्

नैसर्गिकशब्दार्थमाह—*प्रत्यक्चैतन्यसत्तामात्रानुबन्धीति* ॥ कथम्? आत्मनि कर्तृत्व-भोक्तृत्वदोषसंयोग एवाध्यासः। तत्र भोक्तृत्वाध्यासः कर्तृत्वाध्यासमपेक्षते; अकर्तुर्भोगाभावात्, कर्तृत्वं च राग-द्वेषसंयोगाध्यासमपेक्षते; तद्रहितस्य कर्तृत्वाभावात्, दोषसंयोगश्च भोक्तृत्वमपेक्षते; अनुपभुक्तेऽतज्जातीये वा रागाद्यनुपपत्तेः, एवं बीजाङ्कुरवद्धेतुपरम्परयाऽनादित्वादध्यासस्य नैसर्गिकत्वमिति। लोकव्यवहारशब्दोऽध्यासाभिधायीति

ऋजुविवरणम्

कारणकल्पकत्वम्, तदर्थम्—*भ्रमरूपेति* ॥ *ननु* 'नैसर्गिके'त्यनेनैवास्मदर्थवदनुपालम्भः सिद्ध्यतीति, किं "प्रत्यक्चैतन्यसत्तामात्रानुबन्धी"त्यनेन? अर्थभेदाभावात्, इत्याशङ्क्याभिप्रायमाह—*नैसर्गिकशब्दार्थमिति* ॥ तात्पर्यपरत्वाद् ग्रन्थस्य। व्याख्याने च व्याख्येयस्येत्यन्तत्वं प्रायेण दृश्यते, तदभावान्न स्पष्टं व्याख्यानमिति—*शब्दार्थमाहेत्युक्तम्* ॥ कार्यस्य नैसर्गिकत्वं विरुद्धमिति चोदयति—*कथमिति* ॥ तथापीत्यस्मिन् ग्रन्थेऽध्यासात्मको लोकव्यवहार इति व्याख्यानं कृतम्, अतः—*"लोक इति मनुष्योऽहमि"ति* ग्रन्थः पुनरुक्त इत्याशङ्क्याभिप्रायमाह—*लोकव्यवहार-

तत्त्वदीपनम्

सन्धायोक्तम्—*नैसर्गिक इति; तदनुपपन्नम्; नैसर्गिकत्वे चैतन्यवत्स्वभावत्वेनोच्छेद्यतासंभवाद् इत्याशङ्क्य, नैसर्गिकपदेनानादित्वं विवक्षितं न स्वभावत्वमित्याशयवानाह—*नैसर्गिकेति* ॥

प्रतीचो जडतां व्यावर्तयति—*चैतन्येति* ॥ तस्य तुच्छतां व्यावर्तयति—*सत्तेति* ॥ कार्योपहितसत्तानुबन्धित्वं व्यावर्तयति—*मात्रेति* ॥ साक्षिस्वरूपमनुसृत्यानवच्छिन्नाऽऽनन्दादिस्वरूपं सदा तिरस्कृत्य व्यवस्थितमित्याह—*अनुबन्धीति* ॥ द्वितीये बहुवक्तव्यत्वसद्भावात् प्रथमं पक्षान्तरं निरस्यति—*अयमिति* ॥ (टीकायाम्) अध्यास आक्षिप्तः, लोकव्यवहारश्च समाधीयते, इति वैयधिकरण्यशङ्कां निरस्यति—*युष्मदस्मदोरिति* ॥ अनादेः कथं कार्यत्वमिति शङ्कते—*कथमिति* ॥ प्रवाहरूपेणानादित्वं न स्वरूपेणेत्यविरोधं दर्शयितुमध्यासस्वरूपमाह—*आत्मनीति* ॥ अध्यस्यत इति कर्मपरोऽध्यासशब्दः। ततः किम्? इत्यत आह—*तत्रेत्यादिना* ॥ अनुपभुक्ते रागो नोत्पद्यत इति वदता भुक्तविषयो राग इत्युक्तं स्यात्, नच तत्संभवति; भुक्ते रागाभावादित्याशङ्क्याह—*अतज्जातीय इति* ॥ उपभुक्तासजातीय इत्यर्थः। भोक्तृत्वं च कर्तृत्वाद्यध्यासमपेक्षत इत्यनादित्वं सिद्धमित्याह—*एवमिति* ॥ कर्तृत्वादीनामन्यतमव्यासकालत्वं कार्यानादित्वम्। सुषुप्तादावपि तत्संस्कारसंभवादनादित्वं युक्तमित्यर्थः। अध्यासात्मको लोकव्यवहार इत्यत्र लोकव्यवहारस्याध्यासात्मकत्वं सिद्धमिति पुनस्तत्कथनं व्यर्थमित्याशङ्क्याध्यास-लोकव्यवहारयोर्भिन्नत्वात् कथं सामानाधिकरण्यम्? इति शङ्कानिरसनपुरःसरं तदेव स्पष्टीक्रियत इत्याह—*लोकव्यवहार इति* ॥ लोक्यत इति

पञ्चपादिका

युष्मदस्मदोरितरेतराध्यासात्मकः *अहमिदं ममेदमिति लोकव्यवहारः* । तेन यथाऽस्मदर्थस्य सद्भावो नोपालम्भमर्हति, एवमध्यासस्यापीत्यभिप्रायः । लोक इति = मनुष्योऽहमित्यभिमन्यमानः प्राणिनिकाय उच्यते । व्यवहरणं व्यवहारः, लोक इति व्यवहारो लोकव्यवहारः ; मनुष्योऽहमित्यभिमान इत्यर्थः । सत्यानृते मिथुनीकृत्येति ॥ *सत्यम् = अनिदम्, चैतन्यम् । अनृतं युष्मदर्थः ; स्वरूपतोऽप्यध्यस्त-

पञ्चपादिकाविवरणम्

दर्शयति—*लोक इति मनुष्योऽहमित्यादिना* ॥ व्यवहारः—अभिज्ञाऽभिवदनमुपादानमर्थक्रियेति चतुर्विधः । अतो मनुष्योऽहमिति ज्ञानाभिधाने व्यवहारशब्दमर्हत इति भावः ।

अन्यस्यान्यात्मनाऽवभासोऽविद्येत्युक्ते 'शुक्लः पट' इत्यादिप्रत्ययानामविद्यात्वप्रसङ्गो मा भूदिति सत्यस्य वस्तुनो मिथ्यावस्तुसम्भेदावभासोऽविद्येति स्वसिद्धान्तमङ्गीकृत्य "सत्यानृते मिथुनीकृत्ये"त्युक्तम्, तद् व्याचष्टे—*सत्यमनिदं चैतन्यमित्यादिना* । *ननु* क्त्वाप्रत्ययोपादानादर्थतः क्रियाभेदः पूर्वापरभावश्चाङ्गीकर्तव्यः,

ऋजुविवरणम्

शब्द इति* ॥ कथं व्यवहारोऽभिमान इति व्याख्यानं युज्यते ? व्यवहारशब्दस्य हानोपादानयोः प्रसिद्धत्वात्, इत्याशङ्क्याभिप्रायमाह—*व्यवहारः—अभिज्ञेति* ॥ "सत्यानृते मिथुनीकृत्ये"ति भाष्यमसंबद्धम् ; न ह्यनेन रूपेणाध्यासो नैसर्गिकः प्रतीयते ; तादात्म्यप्रतीतेः, अनुपयुक्तं च ; अध्यासस्य नैसर्गिकत्वप्रदर्शनमुपयुज्यते, नतु सत्यत्व-मिथ्यात्वप्रदर्शनम्, व्यर्थविशेषणञ्च ; व्यावर्त्याभावात्, असिद्धं च ; सत्यत्वमिथ्यात्वं न सिद्धवत्कीर्तितुं युक्तम्, "अतः सत्यमनिदं चैतन्यमि"ति व्याख्यानमप्यसंबद्धम् ; सत्यत्व-मिथ्यात्वासिद्धेः, इत्याशङ्क्याभिप्रायमाह—*अन्यस्यान्यात्मनेति* ॥ *अर्थत इति* ॥ वाच्यस्वरूपपर्यालोचनया, न तु प्रातीतिकः, परोपाधिको वेत्यर्थः । भवतु तावन्मात्रोपसंहारः ; तथाऽप्युपक्रमे पदसामर्थ्यादर्थभेदे निश्चिते तदेकदेशोपसंहार इति निश्चीयते ; उपक्रमानुरोधित्वादुप-

तत्त्वदीपनम्

लोकः ; लोकशब्दस्य कर्मपरत्वात् । तत्साहचर्याद् व्यवहारास्पदस्यापि तादृक्त्वशङ्कां निरस्यति—*व्यवहरणमिति* ॥ उभयोः कर्मपरत्वे पौनरुक्त्यात्, पूर्वत्र कर्मव्युत्पत्त्या ज्ञानोपसर्जनार्थाध्यासो निर्दिष्टः, उत्तरत्रार्थोपसर्जनज्ञानाध्यास इत्यर्थः ।

अनेकधा समाससंभवाद् विवक्षितं समासं दर्शयति—*लोक इतीति* ॥ अर्थक्रियापरत्वं व्यावर्तयति—*मनुष्य इति* ॥ व्यवहारशब्दस्य हानोपादानयोः प्रसिद्धत्वात्कथमभिमानवाचकत्वेन व्याख्यानम्? इत्याशङ्क्याह—*व्यवहारोऽभिज्ञेति* ॥ अभिमानपदं चोपलक्षणमित्याह—*ज्ञानेति* ॥ अध्यासस्वरूपाद्यप्रदर्शकत्वात् "सत्यानृते" इति भाष्यं तद्व्याख्यानं चासंगतमित्याशङ्क्य, तद्व्यावर्त्यां शङ्कामाह—*अन्यस्येति* ॥ सत्यानृतविभागस्यासिद्धत्वात् "सत्यानृते मिथुनीकृत्ये"ति कथमुक्तम् ? इत्याशङ्क्याह—*स्वसिद्धान्तमिति* ॥ सत्यानृतपदयोर्वचनपरत्वं व्यावर्तयति—*सत्यमित्यादिना* ॥ कालत्रयबाधाभावोपलक्षितं वस्तु सत्यम्, तस्य ज्ञानकर्मत्वनिराचिकीर्षया—"अनिदमि"त्युक्तम्, तत्र हेतुमाह—*चैतन्यमिति* ॥ उभयोरध्यस्तत्वे कथं "सत्यानृतविभाग" इत्याशङ्क्य, एकस्य संसृष्टरूपेणाध्यस्तत्वम्, इतरस्य स्वरूपेणापीति युक्तो विभाग इत्याह—*स्वरूपत इति* ॥

अध्यासो मिथुनीकरणात्मको लोकव्यवहार इत्युक्तम्, तदाक्षिपति—*ननु क्त्वाप्रत्ययेति* ॥ प्रातीतिकक्रियाभेदादिव्यावृत्त्यर्थमर्थत इति विशेषणम् । "समानकर्तृकयोः पूर्वकाले" इत्यनेन सूत्रेण, एककर्तृकयोः पूर्वापरीभावेन स्थितयोः क्रिययोः पूर्वकाले धात्वर्थे क्त्वाप्रत्ययस्य विहितत्वात् क्रियाभेदादिरेष्टव्य इत्यर्थः । व्यवहारः क्रियत इति

पञ्चपादिका

स्वरूपत्वात्। 'अध्यस्य' 'मिथुनीकृत्ये'ति च क्त्वाप्रत्ययो न पूर्वकालत्वमन्यत्वं च लोकव्यवहारादङ्गीकृत्य प्रयुक्तः; भुक्त्वा व्रजतीतिवत् क्रियान्तरानुपादानात्, अध्यस्य नैसर्गिकोऽयं लोकव्यवहार इति स्वरूपमात्रपर्यवसानात्, उपसंहारे च—"एवमयमनादिरनन्तो नैसर्गिकोऽध्यासः" इति तावन्मात्रोप-

पञ्चपादिकाविवरणम्

तत्कथमध्यास-मिथुनीकरण-लोकव्यवहाराणामेकार्थत्वमिति ? नेत्याह—*अध्यस्य मिथुनीकृत्येत्यादिना* ॥ *ननु* किमिति स्वरूपमात्रपर्यवसानम् ? क्रियाभेद एव क्त्वाप्रत्ययसामर्थ्यादुपादीयतामिति, नेत्याह—*उपसंहारे चेति* ॥ नहि पदमात्रवैयर्थ्यभयाद्वाक्यार्थो नैसर्गिकत्वगुणविशिष्टो विशेष्यपदार्थोऽध्यास उपक्रमोपसंहारयोर्भेत्तुं युक्त इत्यभिप्रायः। किं तर्हि क्त्वाप्रत्ययावलम्बनमिति ? प्रतिपत्तितः क्रियाभेदपूर्वापरी-

ऋजुविवरणम्

संहारस्य, इत्याशङ्क्याह—*नहि पदेति* ॥ *ननु* पदानुरोधादनेकपदसमभिव्याहारस्यान्यथाकरणं दृश्यत इत्याशङ्क्याह—*मात्रवैयर्थ्यभयादिति* ॥ उपसर्जनरूपार्थप्रतिपादकत्वादित्यर्थः। अथवा—मात्रग्रहणेन प्रत्ययविवक्षा; ल्यप्प्रत्ययस्यैव भेदप्रापकत्वात्। *ननु* प्रत्ययनिमित्तत्वेऽपि भेदस्य पदार्थत्वमेव; प्रत्यययुक्तस्यैव तत्सन्निधौ प्रकृतिभागस्यैव वाचकत्वात्, अतश्च पदार्थत्वाविशेषादध्यास-मिथुनीकरण-लोकव्यवहाराणां भेदेन भवितव्यमित्याशङ्क्याह—*वाक्यार्थ इति* ॥ अथवा—प्रत्ययार्थस्यैव कृदादिषु प्राधान्यात् प्रत्ययानुरोधेन प्रातिपदिकस्यान्यथाकरणं युक्तम्; सप्रयोजनत्वात्, प्राधान्यञ्च तस्यैवेत्याशङ्क्याह—*वाक्यार्थ इति* ॥ वाक्यार्थप्रतीतिनिमित्तत्वात्पदस्य, न तस्य तद्बाधकत्वमिति भावः। *ननु* अध्यासस्य क्रियाभेदपूर्वापरीभावस्य च पदार्थत्वाविशेषे कथमेकस्यैवाध्यासस्य वाक्यार्थत्वमिति ? तदाह—*नैसर्गिकत्वगुणेति* ॥ *ननु* गुणविशिष्टत्वमितरपदार्थेष्वपि समानमिति, तत्राह—*विशेष्यपदार्थ इति* ॥ यद्वा—कथमेकोऽध्यासो वाक्यार्थ इति निश्चेतुं शक्यते ? पदार्थनिश्चयाधीनत्वाद्वाक्यार्थस्य तद्विमर्शसमय एव भेदोऽपि प्रतीयते; अतश्चोभयोः पदार्थत्वसाम्यात् कथमन्यतरबाधः ? इत्याशङ्क्य प्रकारान्तरेण प्राबल्यमाह—*नैसर्गिकत्वगुणविशिष्ट इति* ॥ अनेकपदार्थान्वयानुरोधादिति भावः। *ननु* तत्राप्यनेकपदार्थान्वयोऽस्त्येवेत्याशङ्क्याह—*विशेष्यपदार्थ इति* ॥ अध्यासस्यैवेतरविशेषणेनान्वयः, स्वयं चानन्याकाङ्क्षः; ल्यबर्थेऽन्यविशेषणान्वयेऽपि तस्यान्याकाङ्क्षत्वादिति भावः। *प्रतिपत्तित इति* ॥ न वस्तुत इत्यर्थः। *ननु*

तत्त्वदीपनम्

क्रियान्तरमध्याह्रियत इत्याशङ्क्य—किं 'लोकव्यवहारः' इत्येतद्बलादध्याहारः, उत—'अध्यस्ये'त्येतद्बलादिति विकल्प्याद्यस्योत्तरमुक्तम्—अध्यस्य नैसर्गिक इति* ॥ (टीकायाम्) द्वितीयमुत्थापयति—*ननु किमितीति* ॥ उपसंहारविरोधाच्चैवमित्याह—*नेत्याहेति* ॥ उपक्रमानुरोधेनोपसंहारनयनं किं न स्यादिति ? तत्राह—*न हि पदमात्रेति* ॥ क्त्वाप्रत्ययवैयर्थ्यभयाद्विशेष्यप्रधानपदार्थोऽध्यासो भेत्तुं नहि युज्यत इत्यन्वयः। प्राधान्यमुपपादयति—*वाक्यार्थ इति* ॥ वाक्यार्थमेवाह—*उपक्रमेऽपीति* ॥ प्रतीयमान इति शेषः। "अध्यासो मिथ्ये"त्युपक्रमे—"एवमयमनादिरि"त्युपसंहारे च प्रतीयमानतया वाक्यार्थत्वम्; येनोपक्रम्यते, येन चोपसंह्रियते, स वाक्यार्थ इति न्यायात्। ततश्च प्राधान्यमित्यर्थः।

वार्तिकम्

तत्रापि विषयतो बाधाभावेऽपि स्वरूपतो बाधस्य तेनाङ्गीकारात्, शून्यव्यतिरिक्तपदार्थस्यासत्त्वात्, त्वया शून्यज्ञानस्य बाधानभ्युपगमाच्च, उभयसंप्रतिपन्नस्यैव दृष्टान्तत्वात् परं प्रति तदुपन्यासस्य कर्तुम-

पञ्चपादिका

संहारात्। अतश्चैतन्यं पुरुषस्य स्वरूपमितिवद् व्यपदेशमात्रं द्रष्टव्यम्। *मिथ्याज्ञाननिमित्त इति* ॥

पञ्चपादिकाविवरणम्

भावावित्याह—*अतश्चैतन्यं पुरुषस्य स्वरूपमितिवद् व्यपदेशमात्रम्* ॥ उपचारमात्रमित्यर्थः। कथम्? एकोऽप्यध्यासोऽन्योन्यात्मता-सत्यानृते-अहमिदं ममेदमिति च विशेषणभेदाद्विशिष्टः परोपाधौ भिद्यते; विशिष्टार्थप्रत्ययाश्च क्रमेण वक्तुर्भवन्तीति, प्रतिपत्तितः पूर्वापरीभावं विशेषणभेदाच्च विशिष्टक्रियाभेदं चाङ्गी-

ऋजुविवरणम्

प्रातीतिके क्रियाभेदे पूर्वापरभावे च कथं व्यपदेशमात्रमित्युक्तमित्याशङ्क्याह—*उपचारमात्रमिति* ॥ अन्यगतस्यान्यत्रारोपणम्, अन्यगतप्रयोजकेन चान्यत्र वस्तुन्यविद्यमानेन व्यवहारोपचारः, न तु निरालम्बनत्वमिति भावः। *ननु* एकत्वे प्रतीतेरपि भेदो न संभवति; विषयनिमित्तत्वाद्द भेदस्य, इत्याक्षिपति—*कथमिति* ॥ तत्रार्थस्य स्वत एकत्वेऽपि व्यपदेशमात्रोपयोगि भेदकं दर्शयति—*एकोऽपीति* ॥ एकोऽप्यध्यासो विशेषणभेदाद्भिद्यत इत्यन्वयः। *ननु* अन्योन्यात्मतारूपविशेषणस्य सत्यानृतत्वादिविशेषणस्य च भेदेऽप्येकस्याध्यासस्य कथं भेदः? नहि दण्ड-कुण्डलभेदे देवदत्तभेद इत्याशङ्क्याह—*विशिष्टेति* ॥ एवमपि वैशिष्ट्यमेव भिन्नं भवेत्, न तु विशिष्टस्य स्वरूपस्य भेद इत्याशङ्क्याह—*परोपाधाविति* ॥ स्वरूपेऽपि तदुपाधिको भेदो भवेदित्यर्थः। यद्वा—एवं तर्हि अर्थस्यैव विशिष्टरूपस्य सर्वत्र भेदान्न स्वरूपमात्रपर्यवसानम्, प्रत्ययस्य भिन्नलक्षणलक्ष्यस्यैवेत्याशङ्क्याह—*परोपाधाविति* ॥ स्वरूपभूतानामेवान्योन्यात्मताप्रमुखानां विशेषणत्वेन प्रतीतिमात्रम्, घटादिस्वरूपस्यैव स्वरूपत्वेन भेदत्वेन पटाद्यैक्यविरोधित्वेन वा व्यपदेशवदध्यासस्यापि तत्तत्प्रतीतितस्तत्तदाकारत्वं व्यपदिश्यते, लक्षणे तु स्वतो भिन्नस्यैव पदार्थस्य तथा व्यवहाराय समानासमानजातीयेभ्यो व्यावृत्तिप्रतीतिसिद्धये वा लक्षणकथनमिति न परोपाधिकत्वमिति भावः। अथवा—कथमेकस्य भेदः? विरोधात्, इत्याशङ्क्याह—*परोपाधाविति* ॥ प्रत्ययोपाधावित्यर्थः। *ननु* प्रत्ययोपाधिकोऽपि भेदो न संभवति; विषयसापेक्षत्वात्, इत्याशङ्क्याह—*विशिष्टेति* ॥ *ननु* एकस्य कथं विशिष्टरूपेणापि भेदः? इत्याशङ्क्याह—*विशेषणभेदादिति* ॥ तमेव विशिनष्टि—*अन्योन्यात्मतेत्यादिना* ॥ यद्वा—परोपाधाविति = विशिष्टत्वोपाधावित्यर्थः। वैशिष्ट्यभेदश्च विशेषणभेदादिति। यद्वा—अन्योन्यात्मत्वादिरूपेण विशिष्टस्यैव रूपभेदप्रतीतेः कथं प्रातीतिकालम्बनत्वमुच्येत? इत्याक्षिपति—*कथमिति* ॥ एकस्यैवाध्यासस्य विशेषणभेदनिबन्धनवैशिष्ट्योपाधिको भेदः, न तु स्वरूपभेदोऽस्ति। विशेषणभेदो हि वैशिष्ट्यभेदापादकः, नतु स्वरूपभेदहेतुः; दण्ड-कुण्डलभेद इव देवदत्तस्वरूपस्य। स्वरूपभेदश्च ल्यप्प्रत्ययेनापेक्षितः, तदभावाच्चौपचारिकत्वमिति परिहाराभिप्रायः। *ननु* भवत्वेवं भेदः, तथापि कथं पूर्वापरीभाव इति? तदाह—*विशिष्टार्थप्रत्ययाश्चेति* ॥ किमिति मिथ्याज्ञानपदं व्याख्यायते? प्रसिद्धार्थत्वात्,

तत्त्वदीपनम्

नैसर्गिकगुणविशिष्टत्वेनोत्तरत्रोक्तस्याऽप्यध्यासस्य प्रत्यभिज्ञानाच्च लोकव्यवहारोऽध्यास इत्याह—*नैसर्गिकेति*॥ अध्यास-लोकव्यवहारशब्दयोरेकार्थत्वे क्त्वाप्रत्ययस्यानालम्बनता स्यादिति चोदयति—*किं तर्हीति* ॥ मुख्यालम्बनाभावेऽप्युपचरितमालम्बनमस्तीत्याह—*प्रतिपत्तित इति* ॥ "व्यपदेशमात्रमि"त्युक्ते निरालम्बनत्वमेवोक्तं स्यादिति, तत्राह—*उपचारेति* ॥ अन्यगतस्यान्यत्राऽऽरोपणमुपचार इति। एकस्मिन्नध्यासे प्रातीतिकक्रियाभेदपूर्वापरीभावो न घटेत इति चोदयति—*कथमिति* ॥ स्वरूपेणैक्येऽपि विशेषणभेदात्तदुपपत्तिरित्याह—*एकोऽपीति* ॥

ननु—विशेषणभेदादध्यासो भिद्यत इति कथम्? न खलु दण्ड-कमण्डलुभेदाच्चैत्रो भिद्यत इत्याशङ्क्य, स्वरूपभेदाभावेऽपि विशिष्टभेद इत्याह—*विशिष्ट इति* ॥ तथापि वैशिष्ट्यभेदः, न तु विशिष्टस्वरूपस्येत्याशङ्क्याह

पञ्चपादिका

मिथ्या च तदज्ञानं च मिथ्याऽज्ञानम् । मिथ्येत्यनिर्वचनीयतोच्यते । अज्ञानमिति च जडात्मिकाऽविद्याशक्तिर्ज्ञानपर्युदासेनोच्यते । *तन्निमित्तः = तदुपादान इत्यर्थः ।

पञ्चपादिकाविवरणम्

कृत्य क्त्वाप्रत्यय इति । तत्राज्ञानमित्युक्ते ज्ञानाभावमात्रमुक्तं स्यात्, मिथ्येत्युक्ते भ्रान्तिज्ञानमिति स्यात्, तदुभयव्यावृत्त्यर्थं निरुच्य पदार्थौ दर्शयति—*मिथ्या च तदज्ञानं चेत्यादिना* ॥

ऋजुविवरणम्

इत्याशङ्क्य तत्र समुदायप्रसिद्धया भ्रान्तिज्ञानमेव प्रतीयते, अवयवप्रसिद्धया द्वन्द्वसमासेनार्थान्तरम्, तत्र चान्यतरवैयर्थ्यशङ्का स्यात्, तद्व्युदासायेत्याह—*तत्राज्ञानमित्युक्त इति ॥ *ननु* कथमस्योपादानत्वमुच्यते ? प्रमाणाभावात्, निमित्तशब्दविरोधाच्च, तथाच सति—"अज्ञानमि'ति जडात्मिकाऽविद्याशक्ति"रिति, तथा "तन्निमित्तः = तदुपादानः" इति च व्याख्यानमसंबद्धमित्येकदेशिमतं मनसि निधाय चोदयति—*ननु कथं मिथ्येति* ॥ सति शुक्त्यज्ञाने रजतज्ञान-

तत्त्वदीपनम्

परोपाधाविति ॥ परोपाधावध्यासो भिद्यते गगनवदित्यर्थः । तथाऽपि कथं पूर्वापरीभावः ? इत्याशङ्क्याह—*विशिष्टेति* ॥ तत्तद्विशेषणविशिष्टार्थं ज्ञात्वा तत्तद्वाचकशब्दरचनं क्रमेण भवतीति प्रतिपत्तितः पौर्वापर्यम् । अध्यास-

वार्तिकम्

शक्यत्वात् । तस्मात् कुत्रचिदसद्व्याप्त्यभ्युपगमे लब्धावसरः शून्यवादी तद्द्वारा जित्वा भवन्तं स्वदीक्षां ग्राहयेदेव । तथा चोक्तम्—"प्रसरं न लभन्ते हि यावत् क्वचन मर्कटाः । नाभिद्रवन्ति ते तावत्पिशाचा वा स्वगोचरे ॥"—इति । तस्मादेवं स्वप्नेऽपि न वाच्यम्, ततो निस्तारमाकाङ्क्षता । *ननु*—न वयमसद्विषयत्वं ज्ञानस्याभ्युपगच्छामः, किं तर्हि ? स धर्मो देशान्तरे वर्तत इति चेत्, *वर्ततां नाम* ; किमायातं पुरोवर्तिनः ? पुरोवर्तिनि तु बन्ध्यायां पुत्र इवासन्नेव सः । न हि देशान्तरवर्तितया स धर्मो ज्ञानेन गृह्यते । यदि गृहीतः, न पुरोवर्तिनि पुरुषः प्रवर्तेत ; इष्टतावच्छेदकावच्छिन्नप्रवृत्तिविषयकज्ञानस्य प्रवर्तकत्वात् । इदंसामानाधिकरण्यं च न गृह्येत । किं तर्हि ? इदंत्वसामानाधिकरण्येन पुरोवर्तिनि स धर्मो गृह्यते । नच पुरोवर्तिनि स सन् बन्ध्यायामिव पुत्र इत्युक्तमेव । अन्यत्र स्थितस्यैव धर्मस्य संसर्गः पुरोवर्तिन्यारोप्यत इति चेत्, सत्यम् ; संसर्ग एव तर्ह्यसन् स्यात्, तत्र च दत्तमुत्तरम् । संसर्गोऽपि देशान्तरे सन्निति चेत्, सत्यं निर्लज्जतया भवान् जल्पति । किमागतं ज्ञानविषयतया भासमानस्य पुरोवर्तिसंयोगस्य ? तस्यापि धर्मवत् पुरोवर्तिन्यसत्त्वादेव भानानुपपत्तेः । कथं चान्यत्र सतोर्धर्म-तत्संसर्गयोः पुरोवर्तिसत्त्वं स्यात् ? विरोधात् । *पटवदविरोध इति चेत्,= यथा हि पटस्य तन्त्वन्तरे विद्यमानस्यापि तन्त्वन्तरे वृत्तिरविरुद्धा ; एवं तयोरपि देशान्तरवर्तिनोः पुरोवर्तिनि वृत्तिरविरुद्धा भविष्यतीति चेत्, *न* ; तद्वदबाधापत्तेः = यथा हि पटस्तन्त्वन्तरे न बाध्यते; एवं रजतमपि

प्रदीपः

सूच्यते । अनेन च—'इदं रजतमि'त्यादाविव आरोप्यसजातीय-तदधिकसत्ताक-पदार्थज्ञानजन्यसंस्कारः कारणमिति नियमात् पारमर्थिकान्तःकरणान्तरापत्त्याऽद्वैतहानिरिति शङ्कापि—परास्ता * ; आरोप्यसजातीय-तदन्यूनसत्ताक-पदार्थज्ञानजन्यसंस्कारः कारणमित्येव हि नियमः । इदं रजतमित्यादावपि व्यावहारिकं रजतं प्रातिभासिकरजतान्यूनसत्ताकमिति न दोषः ।

पञ्चपादिकाविवरणम्

ननु कथं मिथ्याऽज्ञानमध्यासस्योपादानम्? *तस्मिन्सत्यध्यासस्योदयादसति चानुदयादिति ब्रूमः*। *ननु* अध्यासस्य प्रतिबन्धकं तत्त्वज्ञानं तदभावश्चाज्ञानमिति प्रतिबन्धकाभावविषयतयाऽज्ञानस्याध्यासेनान्वय-व्यतिरेकावन्यथासिद्धौ, *नैतत्सारम्*; पुष्कलकारणे हि सति कार्योत्पादविरोधि प्रतिबन्धकम्। नचाध्यास-

ऋजुविवरणम्

मुत्पद्यते, तदभावे नोत्पद्यते; एवमात्माज्ञाने सत्यहङ्कारादिरुत्पद्यते, तदभावे नोत्पद्यत इत्यन्वयव्यतिरेकौ प्रमाण-मित्याह—*तस्मिन् सतीति*॥ भावरूपत्वमपि तत एव सिद्ध्यतीत्यभिप्रायः। *नन्वध्यासस्येति*॥ अनन्यथा-सिद्धावन्वयव्यतिरेकावुपादानत्वं गमयतः; अत्रान्यथासिद्धत्वान्नोपादानत्वमज्ञानस्य, तदभावे च न भावत्वमिति भावः। *तथापि विरोधीति*॥ मा भूत्प्रतिबन्धकाभावत्वमज्ञानस्य, विरोधिसंसर्गाभावो भविष्यति, ज्ञानस्या-ध्यासविरोधित्वात्तदभावस्यान्वयव्यतिरेकौ स्तः, जलाभावस्येवाग्निकार्य इति भावः। *न कार्यस्येति*॥ अयमभि-

तत्त्वदीपनम्

स्याज्ञानोपादानत्वप्रदिदर्शयिषया "मिथ्याऽज्ञाननिमित्तः" इत्युक्तम्, तत्र भ्रान्तिज्ञाननिरासार्थं मिथ्या च तदज्ञानं चेति विग्रहमकरोत्, तत्र विशेषणवैयर्थ्यशङ्कां परिहरति—*तत्रेति*॥ नच—अभाव-भ्रान्तिज्ञानयोरन्यतरस्य कारणत्वं किं न स्यादिति—शङ्क्यम्; अभाव-भ्रान्तिज्ञानयोः समवायिकारणतायाः क्वचिदप्यदर्शनादित्यर्थः। मिथ्याऽज्ञान-शबलेश्वरस्याधिष्ठातृत्वं संस्कारद्वारेणैवाज्ञानस्य निमित्तत्वं चेति दर्शयितुं भाष्ये निमित्तपदोपादानमिति द्रष्टव्यम्। अज्ञानमिति नञाऽभावत्वं प्रतीयते, तत् कथमनिर्वचनीयत्वम्? इति शङ्कायामुक्तम्—*ज्ञानमिति*॥ अज्ञानपर्युदासे-नोच्यत इति*॥ (टीकायाम्) ज्ञानान्यत्वे हेतुमाह—*जडात्मिकेति*॥ ज्ञानविरुद्धत्वादज्ञानमित्याह—*अविद्येति*॥ आत्मकारणत्वोपपिपादयिषया शक्तिरित्याह—*शक्तिरिति*॥

मानाभावान्न मिथ्याऽज्ञानस्याप्युपादानत्वमिति शङ्कते—*ननु कथमिति*॥ मिथ्याऽज्ञाननिमित्तत्वे न ताव-त्प्रत्यक्षं मानम्; अननुभवात्, नाप्यनुमानम्; व्याप्त्यसंप्रतिपत्तेः, नाप्यागमः; व्युत्थितं प्रति तदुपन्यासस्यानुचित-त्वात्। नाप्यर्थापत्तिः; मिथ्याऽज्ञाननिमित्तत्वमन्तरेणानुपपद्यमानत्वस्याभावादित्यर्थः॥

'शुक्त्यज्ञाने रजतभ्रमोदयः, इतरथा ने'त्यन्वय-व्यतिरेकाभ्यां तस्य रजतभ्रमोपादानत्वं सिद्धम्; तद्दृष्टान्तेनाऽ-हंकाराद्यध्यासस्याऽप्यज्ञाननिमित्तत्वं निश्चीयते—विमतः, अज्ञानोपादानः, अध्यासत्वात्, संमतवदित्यभिसन्धायाह—*तस्मिन् सतीति*॥

अज्ञानान्वयव्यतिरेकावन्यथासिद्धौ, ततश्च दृष्टान्तस्य साध्यवैकल्यमिति चोदयति—*नन्विति*॥ अन्वय-व्यतिरेकौ प्रतिबन्धकाभावविषयतयाऽन्यथासिद्धावित्यन्वयः। किं तत्प्रतिबन्धकम्? कश्च तदभाव इत्याकाङ्क्षायामाह—*अध्यासस्येति*॥ प्रतिबन्धकमिति*॥ उत्पत्तिविरोधीत्यर्थः। प्रतिबन्धकलक्षणविधुरत्वान्न ज्ञानस्य प्रतिबन्धकत्व-मित्याह—*नैतत्सारमिति*॥ प्रतिबन्धकलक्षणाभावं दर्शयितुं तल्लक्षणमाह—*पुष्कलेति*॥ विरोधि प्रतिबन्धक-मित्युक्ते पूर्वज्ञानविरोध्युत्तरज्ञानेऽतिव्याप्तिः, तदर्थम्—*कार्योत्पादेति*॥ सामग्र्यभावं व्यावर्तयितुम्—*पुष्कलेति*॥ पुष्कलकारणे सति विरोधि प्रतिबन्धकमित्युक्ते, पूर्वज्ञाननिवृत्तिपुष्कलकारणोत्तरज्ञानेऽतिव्याप्तिः, तदर्थम्—*कार्येति*॥ फलितमाह—*न चेति*॥ दोषस्याध्यासपुष्कलकारणान्तर्भावात्तस्मिन् सति तत्त्वज्ञानं नोत्पद्यते; निर्दुष्टेन्द्रियार्थ-संप्रयोगलक्षणकारणाभावादित्यर्थः।

वार्तिकम्

पुरोवर्तिनि न बाध्येत, बाध्यते च तत्। तस्मान्न तत्र तत्कल्पनमुचितम्। एतेन—दुग्धस्येव दधि शुक्तेः परिणामो रजतमिति पक्षो—निरस्तः; बाधानुपपत्तेः, उत्तरकालं दुग्धभाववत् शुक्तिभावानुपपत्तेश्च।

पञ्चपादिकाविवरणम्

पुष्कलकारणे सति तत्त्वज्ञानोदयः। तस्मान्नाज्ञानान्वय-व्यतिरेकौ प्रतिबन्धकाभावविषयौ। तथापि विरोधिसंसर्गाभाव इति चेत्, न; कार्यस्य कारणापेक्षा हि प्रथममुत्पद्यते, न विरोधिसंसर्गाभावापेक्षा। तस्मात् प्रथमापेक्षितकारणक्लृप्तिमेवान्वयव्यतिरेकौ न्यायसहितौ कुर्वाते। *ननु* क्लृप्तं विषयेन्द्रियादिदोषः कारणमिति,सत्यम्; निमित्तं तु तत्, उपादानापेक्षायामज्ञानमनुप्रविशति; सर्वं च कार्यम्, सोपादानम्, भावकार्यत्वात्,

ऋजुविवरणम्

सन्धिः*—अज्ञानं नाम प्रतीयते। अन्वयव्यतिरेकौ च तस्य स्तः। तौ किं विरोधिसंसर्गाभावविषयौ, उत कारणविषयाविति विशये कार्यापेक्षया निर्णयः; निर्णायकान्तराभावात्, कार्यं च कारणमेवापेक्षत इति कारणत्वमेव तस्येति भावः। न्यायोऽपि कार्यापेक्ष एव। *ननु क्लृप्तं विषयेन्द्रियेति*॥ कार्यापेक्षायाः क्लृप्तकारणान्तरेणापसारितत्वान्न तदपेक्षयाऽन्वयव्यतिरेकयोः कारणविषयत्वमिति भावः। *ननु* उपादानापेक्षैव नास्ति; निमित्तमात्रादपि कार्यसम्भवात्, अतस्तदपेक्षया नाज्ञानस्य निवेश इत्याशङ्क्याह—*सर्वं च कार्यमिति। *ननु* क्षणिकद्रव्यगता क्रिया गुणादि चोपादानशून्यमेवोत्पद्यते; अनुत्पन्नस्योपादानत्वायोगात्, उत्पन्नस्योपादानत्वे क्षणं निर्गुणत्वप्रसङ्गात, निराश्रयोत्पत्तिप्रसङ्गाच्च, यद्वा—स्थायिद्रव्यस्य नोत्पन्नस्योपादानत्वम्; धर्मशून्यावस्थासद्भावे प्रमाणाभावात, सहोत्पत्तौ चासत्त्वेनोपादानत्वायोगान्निरुपादानमेवोत्पद्यत इति, कार्यत्वमनैकान्तिकमित्याशङ्क्याह—

तत्त्वदीपनम्

तत्त्वावबोधस्याध्यासाप्रतिबन्धकत्वेऽपि तन्निवर्तकतया विरोधित्वात्तदभावविषयतयाऽन्यथासिद्धावन्वयव्यतिरेकाविति चोदयति—*तथापीति*॥ संसर्गाभाव इत्यत्राऽज्ञानमिति शेषः। अपेक्षितानपेक्षितविषयत्वसंदेहेऽनपेक्षितविधेरपेक्षितप्रतिपादनमेवोचितमित्याह—*न कार्यस्येति*॥ न विरोधीत्यस्यायमर्थः—उत्पत्तेरूर्ध्वं निवर्तकाभावापेक्षोपलभ्यते, न प्रागिति। *न्यायसहिताविति*॥ अपेक्षितानपेक्षितविधानयोरपेक्षितविधानं बलवदिति न्यायः। हेत्वपेक्षाया अन्यत एवोपशान्तत्वादन्वय-व्यतिरेकौ विरोध्यभावविषयाविति शङ्कते—*ननु क्लृप्तमिति*॥ *विषयदोषः=सादृश्यम्। *इन्द्रियदोषः=काचादिः। *प्रमातृदोषः=रागादिः। दोषस्य किं निमित्ततया क्लृप्तिः, उत उपादानतया? आद्यस्त्वङ्गीक्रियत इत्याह—*सत्यमिति*॥ द्वितीये दूषणमाह—*उपादानेति*॥ उपादानान्तरस्यानिरूपणादज्ञानमुपादानत्वेनोररीकरणीयमित्यभिसन्धिः।

वार्तिकम्

कुण्डलभावापगमे पुनः सुवर्णभाववत तदुपपत्तिरिति चेत्, न; कुण्डलापगमहेतुकारुकर्मादिवद्रजतापगमहेतोरदर्शनात। दोषापगम एव रजतापगमहेतुरिति चेत, न; अन्यत्र वणिग्वीथ्यादौ तथात्वादर्शनात्। वणिगवीथीस्थरजतोत्पत्तौ दोषो न निमित्तम्, अतस्तदपगमो न तत्र हेतुः, शुक्तिरजते च तन्निमित्तमिति युक्तं तदपगमस्य तत्र निमित्तत्वमिति चेत्, न; शुक्तिरजतस्य सत्यत्वेन दोषनिमित्तत्वानुपपत्तेः, तथात्वे वा वणिगवीथीस्थरजतस्यापि तन्निमित्तकत्वापत्तेः, सत्यरजतत्वाविशेषात्। तत्त्वाविशेषेऽपि तार्णत्वादिवदवान्तरजातिविशेष उपपत्स्यत इति चेत्, न; तार्णत्वादिवद् वणिग्वीथीस्थरजते जात्यन्तरादर्शनात्, निमित्तापाये नैमित्तिकापायादर्शनाच्च। सूर्यकिरणनिमित्तापाये नैमित्तिककमलमृदुलविकारापायो दृष्ट इति चेत, न; असिद्धेः, तत्र सूर्यकिरणप्रतिबन्धापाये सति पार्थिवाऽऽप्यावयवेषु मुकुलीभावारम्भात्, विरोधिपरिणामान्तरेणैव क्लृप्तकारणेन तन्नाशोपपत्तेरुक्तकल्पने प्रमाणाभावात्। अत एव चिरकालीनस्य तदारम्भकपार्थिवाऽऽप्यावयवापाये मुकुलीभावानारम्भात् सूर्यकिरणापायेऽपि न विकासापत्तिः; अन्यथा तदनुपपत्तेः। *एतेन*—हस्तसंयोगापायात् कटप्रसरणापाय इत्यपि—*व्याख्यातम्*;

पञ्चपादिकाविवरणम्

घटादिवदित्यनुमानात्, क्रिया-गुणादेरपि साश्रयस्यैवोत्पत्तेरुत्पद्यमानाश्रयस्यैवोपादानत्वात् । *ननु* आत्माऽन्तःकरणं वा भ्रान्तिज्ञानोपादानं भविष्यति ? *न* ; आत्मनोऽपरिणामित्वात् ; अन्तःकरणस्य चेन्द्रियसंयोगादि-

तत्त्वदीपनम्

ननु कार्यस्योपादानापेक्षाऽसिद्धा, प्रध्वंसे व्यभिचारादिति शङ्कामपवदति—*सर्वं चेति* ॥ विमतम्, सोपादानम्, भावत्वे सति कार्यत्वात्, घटवत् ; इत्यनुमानात् कार्यस्य उपादानापेक्षायामिति संबन्धः । उपादानं विनोत्पद्यमानक्रियादौ व्यभिचारित्वं हेतोः । न चाश्रयस्यैवोपादानत्वम् ; तयोः सहोत्पद्यमानतयोपादानोपादेयत्वाऽनुपपत्तेरित्याशङ्क्याह—*क्रियागुणेति* ॥ क्रियादिविशेषितत्वमादिशब्दार्थः । उत्पद्यमानस्य क्रियादेर्य आश्रयस्तस्यैत्यर्थः । नच—सहोत्पन्नत्वात्तस्योपादानत्वमनुपपन्नमिति—शङ्क्यम् ; क्षणमात्रमगुणं तिष्ठत्युत्पन्नमित्यङ्गीकारात् ।

वार्तिकम्

तत्रापि हस्तसंयोगरूपप्रतिबन्धापाये स्थितिस्थापकसंस्कारेण वेष्टनारम्भाद् विरोधिपरिणामेनैव प्रसरणनाशात् । अपेक्षाबुद्धिनाशाद् द्वित्वादिनाशो दृष्ट इति चेत्, न ; तस्यापि वैशेषिकप्रक्रियामात्रत्वात्, द्वित्वादेरेकत्ववद् व्यङ्ग्यभावित्वात्, अपेक्षाबुद्धेस्तु व्यञ्जकत्वेऽपि तद्जनकत्वादित्यास्ताम् । सर्वथापि न निमित्तनाशान्नैमित्तिकनाश इति स्थितम् । तस्मान्न शुक्तिपरिणामो रजतमिति । तथाच देशान्तरस्थितेन धर्मेण पुरोवर्त्यवच्छेदानुपपत्तेरसत्ख्यातिमनभ्युपगच्छताऽन्यथाख्यातिवादिना पुरोवर्तिनि रजतस्यापि सिद्ध्यर्थमवश्यं मिथ्या रजतमभ्युपगन्तव्यम् । *ननु* नाभ्युपगन्तव्यम् , देशान्तरस्थितधर्मेणाप्यवच्छेदोपपत्तेः, काकादिषु तथात्वदर्शनात्,—दृश्यते हि काकादिभिर्देशान्तरवर्तिभिरपि गृहादीनामवच्छेदकत्वम्, तद्वत् प्रकृतेऽप्यविरोध इति—चेत्, *न* ; काकादीनामुपलक्षणत्वेनावच्छेदकत्वासिद्धेः । लक्षणं ह्येवावच्छेदकम् ; असाधारणधर्मत्वात्, नान्यत् ; अतिप्रसङ्गात्, अतः काकादीनामुत्तृणत्वाद्यसाधारणधर्मपरिचायकत्वेनोपलक्षणत्वेऽपि व्यङ्ग्यवन्न वाक्यार्थप्रतियोगित्वम् ; तीरवत्तदुपलक्षितोत्तृणत्वादेरेव तथात्वात्, तस्य च तत्र विद्यमानत्वात् । एवं सर्वत्रोपलक्षणस्थले तदुपलक्षितलक्षणधर्म एवावच्छेदक इत्यूह्यम्, तद्यथा "जटाभिस्तापस" इति जटाभिस्तपस्वित्वं लक्ष्यते ; धूमेनेव वह्नेस्तपःप्रयुक्तत्वाज्जटानाम् । तपस्वित्वं तु लक्षणत्वाद् भवति तपस्विनामवच्छेदकम् । कथं तर्हि जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणम्—"जन्माद्यस्य यतः" इति ? नैष दोषः ; मायाशबलितस्यैव भवति तल्लक्षणम् ; तत्र विद्यमानत्वात्, शुद्धस्य तूपलक्षणमेव, न लक्षणम् ; तत्र तस्याभावात् । अत एव तटस्थलक्षणमेतदित्याहुर्वृद्धाः । कथमस्य शुद्धोपलक्षणत्वम् ? उच्यते ; जगत्कारणत्वेन चिह्नेन सत्य-ज्ञानानन्तादिरूपं ब्रह्मस्वरूपं लक्ष्यते, प्रतिबिम्बेनेव बिम्बम्, तेन च शुद्धं ब्रह्मेति । अत एव— "ब्रह्मविदाप्नोति परम्" इति ज्ञेयत्वेन शुद्धं ब्रह्माभिधाय किंलक्षणं तद्ब्रह्मेत्यपेक्षायाम्—"सत्यं ज्ञानमनन्तं ब्रह्म" इति मन्त्रेण तत्प्रदर्श्य कथं तत्सत्यत्वादीत्यपेक्षायाम्—"तस्माद्वा एतस्मादात्मन आकाशः

प्रदीपः

तथाच व्यावहारिकप्रमाणां सर्वेषां सफलप्रवृत्तिजनकत्वमपि व्याख्यातम् ॥ *वस्तुतस्तु*—भ्रमज्ञानं प्रति प्रमाजनितसंस्कारः कारणमिति नायं नियमोऽस्माभिरपि नोरीक्रियते । अहंज्ञानं हि ब्रह्मसाक्षात्कारपर्यन्तमबाधात् प्रमैवास्माभिर्मन्यते । तदुक्तम्—"देहात्मप्रत्ययो यद्वत्प्रमाणत्वेन कल्पितः" इति । सति चैवमहंज्ञानात्पूर्वतनादहंज्ञानान्तरमिति निर्वाहाद् न कोऽपि

पञ्चपादिकाविवरणम्

सापेक्षत्वात् *न* ; मिथ्यार्थे च प्रत्ययमात्रविपरिवर्तिनि तदयोगात्, अधिष्ठानज्ञानेनान्यथासिद्धत्वाच्च तदन्वय-व्यतिरेकयोः, अन्तःकरणस्य जडत्वादज्ञातृत्वात्, आत्मनोऽभ्रान्तत्वप्रसङ्गाच्च । तस्मान्मिथ्यार्थ-तज्ज्ञानात्मकं मिथ्या-

ऋजुविवरणम्

क्रियागुणादेरपीति । अन्तःकरणस्य चेति ॥ बाह्यविषय एवं तर्हीन्द्रियसंयोगसहकृतमेवान्तःकरणं भवत्विति, नेत्याह—*मिथ्यार्थे चेति* ॥ *ननु* इन्द्रियान्वय-व्यतिरेकानुविधायित्वं मिथ्याज्ञानस्य दृश्यते, तत् कथ-मिन्द्रियव्यापारासंभव इति ? तत्राह—*अधिष्ठानज्ञानेनेति* ॥ तत्र मिथ्यार्थेऽन्तःकरणस्येन्द्रियसापेक्षत्वमपि नास्ति, तेन विना स्वप्नज्ञानदर्शनात्, इत्याशङ्क्याभ्युपगम्य दूषणमाह—*अन्तःकरणस्येति* ॥ अन्तःकरणस्य ज्ञानाकारपरिणामेऽपि न तेन विषयव्यवहारः ; ज्ञातृत्वशून्यत्वादिति भावः । मा भूदन्तःकरणस्य ज्ञातृत्वम्, आत्मनस्तु स्यादिति,*अथवा*—ज्ञातृत्वं ज्ञानकर्तृत्वम्, तच्चान्तःकरणस्यास्त्येवेत्याशङ्क्याह—*आत्मन इति* ॥ आश्रयत्वाभावादिति भावः । *तस्मा-दिति* पारिशेष्यान्मिथ्याऽज्ञानमेवाध्यासोपादानमित्युपसंहरति । *ननु* अर्थ-ज्ञानयोः परस्परोपादानत्वं भवतु, किम-ज्ञानेनेत्याशङ्क्याह—*मिथ्यार्थतज्ज्ञानात्मकमिति* ॥ अर्थ-ज्ञानयोः सहभावित्वान्न परस्परोपादानत्वम् ; अर्थ-ज्ञाना-त्मकत्वादेव, संस्काराद्युपादानत्वायोगाच्च । यद्वा—'मिथ्यार्थ' इत्यनेन शुक्तिकादिख्यात्यन्तरोक्तकारणव्यवच्छेदः, *मिथ्या-भूतमि*त्यनेन स्वाभिप्रेतस्वरूपमिथ्यात्वप्रदर्शनम्, तेनोपादानान्तरेण भवितव्यमिति भावः । *यद्वा—"मिथ्यार्थ-तज्ज्ञानात्मकमि"त्यनेनोभयात्मके तत एव स्वरूपतो मिथ्याभूते तद्रूपपरिणामे शक्तकारणेन भवितव्यमित्युक्तम् । *"ननु क्लृप्तमि"त्यादिना* शङ्किताधिष्ठानज्ञानाभावादीनामसंभवप्रदर्शनाय तर्ह्युपादाननिरपेक्षं तदस्त्वित्याशङ्क्याह—

तत्त्वदीपनम्

सहोत्पन्नत्वासिद्धेरित्यर्थः । अथवोत्पद्यमानस्य घटादेर्य आश्रयस्तस्य मृदादेरुपादानत्वम् । नच—मृदादेरुपादानत्वं उत्पद्यमानाश्रयतयोपलम्भो न स्यादिति—शङ्क्यम् ; उपादानोपादेययोरव्यतिरेकादित्यर्थः ॥

कार्यस्य सोपादानत्वनियममङ्गीकृत्याज्ञानस्योपादानत्वमाक्षिपति—*नन्विति* ॥ भावरूपस्याज्ञानस्याऽ-प्रसिद्धस्योपादानत्वकल्पनाद् वरं प्रसिद्धस्यात्मादेरेवोपादानत्वकल्पनमित्यर्थः । आत्मादेरुपादानत्वानुपपत्तेरुपादाना-न्तरं कल्प्यमित्याह—*नेति* ॥ यथाऽऽत्मा सुखादेरुपादानम्, तथा भ्रान्तेरपि स्यादित्याशङ्क्याह—— *आत्मन इति* ॥ किं केवलस्योपादानत्वम्, उताविद्योपहितस्य ? नाद्यः ; निरवयवद्रव्यत्वेन परिणामायोग्यत्वात् । द्वितीये मदिष्टसिद्धिः । निदर्शनमप्यसंमतमित्यर्थः ; उक्तदोषाभावात् । अन्तःकरणमुपादानं स्यादित्याशङ्क्य,किमिन्द्रियसंयोगमन-पेक्ष्य ? उताऽपेक्ष्य ? नाद्य इत्याह—*अन्तःकरणस्येति* ॥ 'परतन्त्रं बहिर्मनः' इत्यभ्युपगमादिन्द्रियसंयोगानपेक्षि-तत्वमनुचितमित्यर्थः । द्वितीयं दूषयति—*मिथ्येति* ॥ प्रत्यये सत्येव विपरिवर्तते तिष्ठति तथोक्तम्, तस्मिन्नित्यर्थः । प्रतिभासमात्रशरीरस्य समारोपितस्य प्रतिभासात्प्रागसत्त्वादिन्द्रियसंयोगायोग इत्यर्थः ॥

मिथ्याज्ञानस्यानिन्द्रियजन्यत्वे इन्द्रियान्वयव्यतिरेकानुविधानविरोधमाशङ्क्याह—*अधिष्ठानेति* ॥ अधि-ष्ठानसामान्यबोधमन्तरेण भ्रमानुपपत्तेस्तद्विषयत्वेनान्यथासिद्धिरित्यर्थः । इतश्चान्तःकरणं नोपादानमित्याह—*अन्तःकरणस्येति* ॥ ज्ञानस्यान्तःकरणपरिणामित्वेन तदाधारत्वं वक्तव्यम् । नच तत्संभवति । तथाहि— किं केवलस्यान्तःकरणस्याधारत्वम् ? उत चिदध्यस्तस्य ? नाद्यः ; जडत्वात्, द्वितीये चिदध्यासस्तादात्म्यस्फुरणम्, तादात्म्यं

वार्तिकम्

सम्भूतः" इत्यादिना तदवधारयामास भगवती श्रुतिः । तस्मान्न कुत्रचिदप्यन्यत्र विद्यमानस्य धर्मस्या-वच्छेदकत्वम् । तथाच न देशान्तरवर्तिनोऽत्यन्तासतो वा रजतस्य पुरोवर्त्यवच्छेदकत्वम् । *घटत्व-वद्व्विषयतीति चेत्, न ; आरोपितस्य तद्भावात्* । अथ मन्यसे यथा घटो देशान्तरवर्त्यपि स्वात्यन्ता-

पञ्चपादिकाविवरणम्

भूतमध्यासमुपादानकारणसापेक्षं प्रत्यनाश्रयस्थानतया काचादिनिमित्तकारणेषु भिद्यमानेषु मिथ्याभूतस्यैव सर्वकार्यस्वभावानुकूलस्य सर्वत्रानुगमादज्ञानस्यात्माश्रयतया भ्रान्तिज्ञानाश्रयकोटिनिक्षिप्तत्वाच्च मिथ्याऽज्ञानमेवाध्या-

ऋजुविवरणम्

उपादानकारणसापेक्षमिति ॥ कादाचित्कत्वादिति भावः। काचादीनां निमित्तत्वम्, नोपादानत्वमित्युक्तम्, न हेतुर्निदर्शितः, अत उपसंहारे दर्शयतीति न दोषः। तर्हि काचादीनामुपादानत्वमस्तु, कथं निमित्तत्वमेवेति ? नेत्याह—*अनाश्रयस्थानेति* ॥ न विद्यत आश्रयतया स्थानं स्थितिर्येषाम्, तान्यनाश्रयस्थानानि ; तेषां भावस्तत्ता, अनाश्रयस्थानता, तयाऽनाश्रयस्थानतयेति। *यद्वा*-न विद्यत आश्रये स्थानं येषाम्, तानि अनाश्रयस्थानानीति विग्रहः। आश्रयतयाऽध्यासाश्रयगतत्वेन वाऽप्रतिभासादित्यर्थः। *ननु* अन्वयव्यतिरेकाभ्यामुपादानत्वं निश्चीयत इति, नेत्याह—*निमित्तकारणेष्विति* ॥ अन्यथासिद्धावन्वयव्यतिरेकाविति भावः। *ननु* अभ्यर्हितत्वादुपादानविषयाविति, नेत्याह—*भिद्यमानेष्विति* ॥ अनेकत्वेनानियतत्वादतदात्मकत्वेन वा नोपादानत्वमिति भावः। *ननु* भिन्नानामेव काचादीनां कस्यचित्कस्मिंश्चित्कार्य उपादानत्वं भवतु, क्लृप्तत्वात्, अन्यस्य चाक्लृप्तत्वादित्याशङ्क्याह—*मिथ्याभूतस्यैवेति* ॥ काचादीनामनुगमाभावादिति भावः। *अथवा*—अज्ञानस्याप्युपादानत्वं कथं कल्प्यते, कल्पकाभावादिति ? तत्राह—*मिथ्याभूतस्यैवेति* ॥ मिथ्याभूतस्यैवेति वक्तुं न शक्यते ; अन्येषामप्यनुगमदर्शनादित्याशङ्क्याह—*स्वभावानुकूलस्येति*॥ तर्हि आत्मनोऽभ्रान्तत्वम्, भ्रान्त्याश्रयत्वाभावादिति, तत्राह—*अज्ञानस्यात्माश्रयतयेति* ॥ *ननु* इदमिति पुरोवर्तित्वेन रजतं प्रतीयते, तत्कथमात्माश्रयाज्ञानोपादानत्वमिति ? तत्राह—*आत्माश्रयस्यैवेति* ॥ "कथं पुनरि"त्यनेन नैसर्गिकत्वं नैमित्तिकत्वं च विरुद्धमिति कथमाक्षिप्यते ? प्रवाहरूपेण

तत्त्वदीपनम्

च गगनप्रसूनायमानमिति कथमपरोक्षप्रथामियादित्यर्थः। इतोऽपि न केवलस्योपादानत्वमित्याह—*आत्मन इति* ॥ अज्ञान-भ्रम-सम्यग्ज्ञानानामेकाश्रयत्वं नियतम्। तत्र भ्रान्तेरन्तःकरणाश्रयत्व आत्मनि तदभावात्सम्यग्बोधत्वं बन्धनिवृत्त्योरपि तदाश्रयत्वं न स्यादिति नित्यमुक्तत्वमापतेदित्यर्थः ॥

आत्माऽन्तःकरणयोरनुपादानत्वसाधनफलमाह—*तस्मादिति* ॥ तस्मान्मिथ्याऽज्ञानमेवाध्यासोपादानमिति संबन्धः। दोषान्वयव्यतिरेकाभ्यां दोषस्यैवोपादानत्वं किं न स्यात् ? इत्याशङ्क्याऽन्यथासिद्धिमाह—*काचादीति* ॥ बहिरङ्गनिमित्तविषयत्वकल्पनाद् वरं तस्यान्तरङ्गोपादानविषयत्वकल्पनमित्याशङ्क्याह—*अध्यासं प्रत्यनाश्रयस्थानतयेति* ॥ आश्रयतया स्थानं स्थितिर्न येषां तान्यनाश्रयस्थानानि, तेषां भावस्तत्ता, तयेति यावत्। दोषाश्रयत्वेनाध्यासस्यानुपलम्भान्न दोषोपादानत्वमित्यर्थः ॥

अज्ञानस्य मिथ्याज्ञानाश्रयत्वेनानुपलम्भेऽप्युपादानत्ववत् काचादेरपि तथात्वमित्याशङ्क्यायोग्यत्वान्नेत्याह—*मिथ्याभूतमिति* ॥ दोषस्य सत्यत्वादध्यासस्य च तद्वैपरीत्यान्न तयोरुपादानोपादेयतेत्यर्थः। मिथ्यात्वे हेतुमाह—*मिथ्यार्थेति* ॥ अर्थस्य मिथ्यात्वात्तज्ज्ञानमपि मिथ्येत्यर्थः। उपादानस्यावश्यंभावित्वमुक्तं स्मारयति—*उपादानेति* ॥ अथवा—मिथ्यात्वेऽपि सत्योपादानत्वं किं न स्यात् ? इत्याशङ्क्याह—*उपादानेति* ॥ उपादानस्य सत्यत्वे तत्कार्यस्यापि सत्यत्वं स्यात् ; तयोरभेदादित्यर्थः। इतोऽपि तेषामनुपादानत्वमित्याह—*भिद्यमानेष्विति* ॥ व्यावृत्तेषु ; अननुगतेष्विति यावत्। काच-कामलादिदोषाणां परस्परव्यभिचारित्वात् कार्येऽननुगतत्वाच्च नोपादानत्वमित्यर्थः। अज्ञानकारणवादे नोक्तदोषानुपपत्तिरित्याह—*मिथ्याभूतस्येति* ॥ सत्यत्वे ज्ञाननिवर्त्यत्वं न स्यादित्येवकारार्थः। ततश्च तस्योपादानत्वमुचितमित्याह—*सर्वकार्येति* ॥ सर्वभ्रमानुसारित्वादपि तदेवोपादानमित्याह—*सर्वत्रेति* ॥ अज्ञानम्, न भ्रान्त्युपादानम्, तदनाश्रयत्वात् ; काचादिवद् इत्याशङ्क्याह—*अज्ञानस्येति* ॥

पञ्चपादिकाविवरणम्

सोपादानम्, नात्मान्तःकरण-काचादि-दोषा इति सूक्तम् ॥ आत्माश्रयाध्यासस्य शुक्तिकासंसर्गो विभ्रम इति

ऋजुविवरणम्

नैसर्गिकस्योक्तत्वादित्याशङ्क्याह—*एकस्यैवेति ॥ प्रवाहरूपेण नैसर्गिकत्वं बहूनामेव भवेत्, नैकैकस्येति भावः।

तत्त्वदीपनम्

कथं तर्ह्यात्माश्रयतया स्फुरणमित्याशङ्क्याज्ञानस्यात्मन्यध्यस्तत्वात्तज्जन्यस्यापि तन्निष्ठतया स्फुरणं संगतमित्याह—*आत्माश्रयतयेति* ॥ एवकारव्यावर्त्यार्थमाह—*नात्मेति* ॥ ज्ञानाध्यासस्यात्माश्रयत्वेऽपि कथमर्थाध्यास-

वार्तिकम्

भावं प्रतियोगितयाऽवच्छिनत्ति—भूतले घटो नास्तीति, यथा चात्यन्तमसन् स एव स्वध्वंस-प्रागभावौ—घटो ध्वस्तः, घटो भविष्यतीति ; एवं रजतमपि तादृशं पुरोवर्तिनमवच्छिन्द्यादिति चेत्, नैष दोषः ; आरोपितघटस्यैवाभावप्रतियोगित्वात्—यद्यत्र घटः स्यादिति प्रसङ्गेन भासमानस्यैव घटस्याभावप्रतियोगित्वं न देशान्तरवर्तिनः, तत्रैव ह्यसतोऽत्यन्ताभावग्रहे व्यभिचारात्, प्रसङ्गस्याभावाध्यक्षहेतुत्वापत्तेश्च। नच तदित्थम् ; तथा सति प्रतियोगितद्व्याप्यवत्तदुपलम्भकस्याप्यनपेक्षापत्तेः, प्रसङ्गार्थत्वात्तस्य तदर्थतयैवानुपलब्धियोग्यताघटकत्वात्। अत एव नात्यन्तासतः प्रतियोगित्वम् ; तस्यापरोक्षप्रसङ्गविषयत्वानुपपत्तेः। एतेन—अन्योन्याभावोऽपि—व्याख्यातः ; तस्याप्यारोपिततादात्म्यप्रतियोगित्वात्। अत एव भगवानपि वासुदेवः स्वभक्ताय किरीटिन एवमर्थं जगाद—"नासतो विद्यते भावो नाभावो विद्यते सतः। उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः"। इति। *एतेन*—सर्वत्राभावज्ञाने न प्रतियोग्यारोपः कारणम्, किं तर्हि ? ज्ञानमात्रम् ; विनश्यदवस्थघटप्रमानन्तरक्षणे तद्ध्वंसाध्यक्षे व्यभिचारादिति—*अपास्तम्* ; तत्र ग्राह्याभावप्रमायाः प्रतिबन्धकत्वेन तज्जनकत्वासिद्धेरततदनन्तरक्षणोत्पन्नध्वंसाध्यक्षस्यैवासिद्धेः। *ननु*—एवं तर्हि आरोपितस्यैव सर्वत्र निषेधप्रतियोगित्वादविनाश्येव जगदवतिष्ठेत ; तथा चापसिद्धान्त इति—*चेत्*, कोऽभिप्रायः ? किं निर्भेदं विनाशाद्यप्रतियोगि घटादि जगत्स्वरूपमविनाश्यवतिष्ठेतेत्यनिष्टमापाद्यते? किं वा भेदविनाशादिप्रतियोगितया प्रतीयमानम् ? नाद्यः ; इष्टप्रसञ्जकत्वात्। न हीष्टप्रसञ्जकस्तर्को विपक्षं बाधते ; तर्काभासत्वात्। तथा चोक्तम्—"तत्रानुकूलत्वमिथोविरोधौ द्वौ मूलशैथिल्यमतस्तृतीयम्। विपर्ययापर्यवसानमिष्टप्रसञ्जनं द्वे इति तर्कदोषाः"। इति। न चास्माकमेतदनिष्टम्। तथाच श्रुतिः—"आत्मैवेदं सर्वम्", "ब्रह्मैवेदं सर्वम्", "सर्वं खल्विदं ब्रह्म तज्जलान्", "ब्रह्म तं परादात् योऽन्यत्रात्मनो ब्रह्म वेद, क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद", "मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन", "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति", "उदरमन्तरं कुरुते अथ

प्रदीपः

दोषः। * अहमित्यध्यास * इति तु परमार्थगत्या, न तु व्यवहारदृष्ट्येति न विरोधः। प्रातिभासिकानां तूलाविद्याकार्यत्वपक्ष एव खलु स्वसजातीय-स्वाधिकसत्ताक-पदार्थज्ञानजन्यसंस्कारः कारणमिति कल्पना संभवति। तत्र च नायं नियमो व्यावहारिकभ्रमसाधारणोऽपि कल्पयितुं शक्यः, अनुगमस्तु पूर्वोक्तरीत्या स्वान्यूनसत्ताकत्वनिवेशेनापि संभवति। प्रातिभासिकानामपि मूलाविद्याकार्यत्वमिति पक्षे तु नोक्तायाः शङ्काया अवसरलेशोऽपि। तथाच * तृतीयकारणाभावान्नाध्यास इति शङ्काया अपि नावसर इति सूचनार्थमेव—*"अहम्" "ममेदमि"त्यध्यस्य—अयम्='अहं ममेदमि'ति व्यवहार इति पुनरुक्ति-

पञ्चपादिकाविवरणम्

वक्ष्यते। एकस्यैवाध्यासस्य नैसर्गिकत्वं नैमित्तिकत्वं च विरुद्धमिति चोदयति—*कथं पुनरिति*। तत्र प्रथमं तावदध्यासप्रवाहजन्मनोपादानकारणरूपेण नैसर्गिकत्वं कार्यव्यक्तिरूपेण नैमित्तिकत्वमित्यविरोधं

ऋजुविवरणम्

अध्यासस्य नैसर्गिकत्वं नैमित्तिकत्वं चोक्तम्, लोकव्यवहारशब्दश्च तत्परत्वेन व्याख्यातः, अतोऽध्यास एव न विवक्षित इत्याशङ्क्याह—*अध्यासस्येति*॥ कथमित्यस्याक्षेपार्थत्वं दर्शयति—*विरुद्धमितीति*॥ एतदुक्तं भवति—पूर्वं कार्यस्य कादाचित्कस्वभावस्य कथं नैसर्गिकत्वमिति पृष्टे, प्रवाहरूपेणेति परिहार उक्तः; इदानीमेकव्यक्तौ विरुद्धधर्म-समावेशासम्भवेन चोद्यमिति भेदः। अतः प्रकारान्तरमपि परिहारे वक्ष्यामः। *अवश्यमेषेत्यनेन* अविद्यासाधनं कृतम्, तदसंगतम्; प्रकृतचोद्यपरिहारस्य प्रस्तुतत्वादित्याशङ्क्याभिप्रायमाह—*तत्र प्रथममिति*॥ अनेकाश्रयप्रवाह-स्यैकाश्रयत्वमप्यस्तीति तेन रूपेण चोद्यस्य परिहृतप्रायत्वं मनसि निधायाह—*अध्यासप्रवाहजन्मनेति*॥ पूर्वम-विच्छेदेन वर्तमानकार्यपरम्पराऽपलापो न शक्यः कर्तुमित्युक्तम्, न तु व्यतिरिक्तप्रवाहो निरूपितः, तेन न विरोधः। *प्रवाहः*—परम्परा, तस्या जन्म यस्य संस्कारस्य, प्रवाहस्य वा जन्म यस्मादिति संस्कारो विवक्षितः, तेन विनोपादान-रूपेण स्थित्ययोगात्। *यद्वा*—न कारणरूपेण नैसर्गिकत्वमुक्तं सम्भवतीत्याशङ्क्याह—*अध्यासप्रवाहजन्मनेति*॥ अध्यास एव प्रवाहः, अध्यासप्रवाहः; तस्य जन्म येन, तदध्यासप्रवाहजन्मेति। अनादिपरम्पराकारणस्य न्यायतोऽ-नादित्वात्तद्रूपेण नैसर्गिकत्वसम्भवप्रदर्शनार्थं प्रवाहजन्मनेत्युक्तम्। *यद्वा*—प्रवाहस्य प्रवाहिव्यतिरेकेणानिर्वाहाद् न तेन रूपेण नैसर्गिकत्वम्। *यद्वा—*अध्यासस्य प्रवाहोऽध्यासप्रवाहः, तस्य जन्म येन, तदध्यासप्रवाहजन्मेति प्रवाहस्य व्यतिरेकेऽपि प्रवाहिजन्मनैव जन्यत्वान्न तेन जन्यरूपेण नैसर्गिकत्वमिति। *यद्वा*—प्रवाहरूपेणापि नित्यत्वमनुगतोपादानमन्तरेण न निर्वहति; तेन विना निमित्तनैमित्तिकभावमात्रेण प्रवाहानुपपत्तेर्वैजात्यात्। *यद्वा*—पूर्वं प्रवाहरूपेण नैसर्गिकत्वमुक्तम्, इदानीमुपादानरूपेणेति परिहारभेदादपौनरुक्त्यम्। टीकाकारेण वा पूर्वं न चोद्य-परिहारौ कृताविति। *ननु*अवश्यमभ्युपगन्तव्येत्युक्ते कथमज्ञानसिद्धिः? प्रमाणानुपन्यासात्, नच—"अन्यथा मिथ्यार्थावभासानुपपत्तेरि"त्यनेन प्रमाणमुक्तम्, अतस्तच्छेषोऽयं ग्रन्थः प्रतिज्ञामात्रसमर्पणेनेति—युक्तं वक्तुम्;

तत्त्वदीपनम्

मस्य तदाश्रयत्वम्? इदं रूप्यमिति बहिरुपलम्भादित्याशङ्क्य, शुक्तीदमंशावच्छिन्नचैतन्यमोहकार्यत्वात्समारोपितस्य शुक्त्याद्याश्रयतया विभ्रमत्वादित्याह—*आत्माश्रयेति*॥ (टीकायां) "को वा ब्रूते नास्तीरि"त्यत्र वक्ष्यत इत्यर्थः॥

कथं पुनरित्यत्र कथंशब्दस्याक्षेपार्थतामाह—*एकस्यैवेति*॥ नच—प्रवाहरूपेणानादित्वस्याभिहितत्वान्न विरोधोक्तिरिति—शङ्क्यम्; वक्ष्यमाणार्थमाकृष्य नैसर्गिकपदव्याख्यानोपयोगितया विवरणकार आह स्मेत्यपौन-रुक्त्यादित्यर्थः॥

विरोधे चोदिते तन्निरस्याविद्यासाधनमसंगतमित्याशङ्क्य, किं निमित्ताधीनाभिव्यक्तिकत्वं नैमित्तिकत्व-मित्यङ्गीकृत्य विरोधं चोदयसि? उत प्रागसतो निमित्ताधीनसत्तावत्त्वमिति विकल्प्य, आद्ये न विरोध इत्याशयं स्पष्टयति—*तत्रेति*॥ विरोधे चोद्य इति यावत्। *कारणरूपेण*॥ कारणस्य यद् रूपं स्वभावस्तदात्मनेत्यर्थः। कारणरूपेण कथं नैसर्गिकत्वम्? तदात्मताया एवासिद्धेरित्याशङ्क्याह—*अध्यासेति*॥ अध्यासस्य प्रवाहेण जन्म यस्मात्,तत् तथानिर्दिष्टमध्यासस्य प्रवाहरूपेण जन्म, अध्यासप्रवाहजन्म; तेन हेतुनेति विग्रहो वा। अध्यासस्योपादाना-

वार्तिकम्

तस्य भयं भवति", "यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति, यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्", "यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्व-

पञ्चपादिका

कथं पुनर्नैमित्तिकव्यवहारस्य नैसर्गिकत्वम्? अत्रोच्यते; अवश्यमेषाऽविद्याशक्तिर्बाह्या-

पञ्चपादिकाविवरणम्

दर्शयितुमात्मनि भावरूपमज्ञानं साधयति—*अवश्यमेषाऽविद्याशक्तिरिति* ॥ 'अवश्यमि'ति, 'एषेति' च प्रमाणद्वयवत्तामाह । प्रत्यक्षं तावत्; 'अहमज्ञः' 'मामन्यं च न जानामी'त्यपरोक्षावभासदर्शनात् ।*ननु* ज्ञाना-

ऋजुविवरणम्

अवश्यपदवैयर्थ्यात् । अवश्यपदं ह्युक्तप्रमाणादधिकं द्योतयति; अन्यथा ह्यावश्यकत्वाभावादित्याशङ्क्याह—*अवश्य-मिति । प्रमाणद्वयवत्तामिति* ॥ शब्दार्थापत्त्योः स्वयमेव वक्ष्यमाणत्वादुपमानाभावयोरयोग्यत्वाच्चेति भावः । तत्र ज्येष्ठत्वात् प्रत्यक्षं तावदाह—*प्रत्यक्षं तावदिति* ॥ "अहमज्ञ"इत्यात्माश्रयत्वे प्रमाणम् । तावन्मात्रेणात्मविषयत्वा-सिद्धेरात्मविषयत्वे प्रमाणमाह—*मामिति* ॥ कर्मत्वनिर्देशाद्विषयत्वं प्रतीयत इत्यर्थः । विषयस्यापि केवलविषयत्वे

तत्त्वदीपनम्

त्मतासिद्धेः, तस्माज्जन्माऽनुपपत्तस्तदात्मत्वमित्यर्थः । प्रवाहरूपेणापि अनादित्वं घटयितुं शक्यत इत्याशयेनोक्तम्—*प्रवाहेति*॥ "अन्यथा मिथ्यार्थावभासानुपपत्तेरि"त्यत्र हेतोर्वक्ष्यमाणत्वाद्"अवश्यमेषे"ति पदद्वयवैयर्थ्यमाशङ्क्याह—*अवश्यमिति* ॥ प्रमाणान्तरस्याभिधीयमानत्वान्न वैयर्थ्यम्, तत्रावश्यमिति पदादनुमानं सूचितम् । एषेति प्रत्यक्ष-मिति प्रमाणद्वयवत्त्वमाहेत्यर्थः ।

वार्तिकम्

मनुपश्यतः",—इत्यादिः । स्मृतिरपि—"वासुदेवः सर्वमिति स महात्मा सुदुर्लभः" । "चिदिहाऽस्तीह चिन्मात्रमिदं चिन्मयमेव च" । "चित् त्वं चिदहमेते च लोकाश्चिदिति संग्रहः" ॥ "किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् । आत्मना पूरितं विश्वं महो कल्पाम्बुना यथा" ॥ "एकं समस्तं यदिहास्ति किञ्चित् तदच्युतो नास्ति परं ततोऽन्यत् । सोऽहं स च त्वं स च सर्वमेतत्तदात्मरूपं त्यज भेदमोहम्" ॥ "श्वेतनीलादिभेदेन यथैकं दृश्यते नभः । भ्रान्तदृष्टिभिरात्माऽपि तथैकः सन् पृथक् पृथक्" ॥—इत्यादिः । नापि द्वितीयः; तस्यारोपितत्वाङ्गीकारेण विनाशितयाऽवस्थानानुपपत्तेः । *ननु*—एवं तर्हि शुक्तौ 'नेदं रजतम्' इति बाधप्रतीतेः 'घटो ध्वस्तः' 'घटो भविष्यति' 'घटः पटो न' इत्यादिप्रतीतेश्च कोऽपि विशेषो न स्यात्; आरोपितनिषेधप्रतियोगित्वाविशेषादिति—*चेत्*, सत्यम्; को वा ब्रूते तथात्वेन तयोर्विशेषोऽस्तीति तत्त्वज्ञो मन्दबुद्धेरन्यः? *ननु*—एवं तर्हि 'नेदं रजतम्' इत्यत्रेव 'भूतले घटो नास्ती'त्यादावपि बाधबुद्धिः स्यादिति—चेत्, *नैष दोषः*; यथोत्पत्त्यव्यवहित-

प्रदीपः

रिति भावः । *नन्वेवमपि*—अहमिति प्रथमाध्यासे का गतिरिति शङ्कायामाह—* नैसर्गिक इति * ॥ अनादिरहमध्यासः । भेदाग्रहरूपकारणाभावान्नाध्यास इति शङ्कावारणार्थम्—*इतरेतराविवेकेनेति* ॥ *ननु* "युष्मदस्मत्प्रत्ययगोचरयोरि"त्यनेन विशेषणेन पूर्वं भेदग्रहस्य साधनात् कथमत्र भेदाग्रह इति शङ्कावारणार्थमाह—*अत्यन्तविविक्तयोरिति* । दृश्यत्वेन लक्षणेन भेदः केवलमनुमीयते, न प्रत्यक्षीक्रियते । अपरोक्षश्चाहमिति भ्रमः परोक्षेण विवेकज्ञानेन न विरुद्धः । तथाचानुमानादिना विविक्ततया गृह्यमाणयोरप्यात्मान्तःकरणयोरपरोक्षविवेकग्रहाभावात्—प्रथमकारणमपि न निरवसरमिति भावः ॥ अन्योन्य-स्मिन्नन्योन्यात्मकता नाम=अधिष्ठान आरोप्यम्, आरोप्ये चाधिष्ठानसंसर्गमात्रमिति निष्कर्षः, अन्यथाऽधिष्ठानस्याप्यारोप्ये

भामती

परस्पराश्रयत्वमिति ? अत आह—*नैसर्गिक इति* ॥ स्वाभाविकोऽनादिरयं व्यवहारः । व्यवहारानादितया तत्कारणस्याध्यासस्यानादितोक्ता ; ततश्च पूर्वपूर्वमिथ्याज्ञानोपदर्शितस्य बुद्धीन्द्रिय-शरीरादेरुत्तरोत्तराध्यासोपयोग इत्यनादित्वाद्बीजाङ्कुरवन्न परस्पराश्रयत्वमित्यर्थः ॥

ऋजुप्रकाशिका

वानाह—*अत आहेति* ॥ नैसर्गिकशब्दार्थमाह—*स्वाभाविक इति* ॥ *ननु*—प्रतीतिपुरस्कारेणाऽन्योन्याश्रये शङ्किते प्रतीत्यनादितयैव स परिहर्तव्यः, न व्यवहारानादितया, अतोऽसङ्गतिरित्यत आह—*व्यवहारानादितयेति* ॥ फलितमाह—*ततश्चेति* ॥ मिथ्याज्ञानशब्दो भ्रमपरः । तथाच पूर्वपूर्वभ्रमजन्यसंस्काराद् उत्तरोत्तरभ्रम इत्यनादित्वान्न परस्पराश्रयत्वमिति भावः । *ननु*—अनादित्वमुक्तमयुक्तम् ; तथाहि—अत्रोत्तरोत्तरभ्रमस्य पूर्वपूर्वमिथ्याज्ञान-तत्संस्कारयोश्चानादित्वमुक्तम्, तत्र वक्तव्यम्—किं मिथ्याज्ञान-तत्संस्कारव्यक्त्योरनादित्वम् ? तज्जात्योर्वा ? नाद्यः ; तयोरुत्पत्तिमत्त्वेनानादित्वायोगात्, न द्वितीयः ; ययोर्निमित्तनैमित्तिकभावः, तयोरनादित्वं प्रकृतमन्योन्याश्रयपरिहाराय, जात्योर्निमित्तनैमित्तिकभावाभावेन तदनादित्वस्याप्रकृतत्वादिति—चेत्, *न* ; अत्र कार्याणां मिथ्याज्ञान-तत्संस्कारव्यक्तीनामनादित्वमुच्यते, कार्यानादित्वं च न प्रागभावाप्रतियोगित्वलक्षणमनुत्पत्तिमत्त्वम्, किंतु तद्व्यक्तीनां मध्य एकया विना यदनादिकालस्यावर्तनम्, तदेव कार्यानादित्वम् ; प्रवाहानादित्वमिति यावत्, तदिहास्त्येव । तदुक्तम्—"तदाकृत्युपरक्तानां व्यक्तीनामेकया विना । अनादिकालावृत्तिर्या सा कार्यानादिता मता ॥" इति ॥

पञ्चपादिकाविवरणम्

भावविषयोऽयमवभासः, *न* ; अपरोक्षावभासत्वादहं सुखीतिवत्, अभावस्य च षष्ठप्रमाणगोचरत्वात्, प्रत्यक्षाभाववादिनोऽपि नात्मनि विज्ञानाभावावगमः सम्भवति ; 'मयि ज्ञानं नास्ती'तिप्रतिपत्तावात्मनि धर्मिणि प्रतियोगिनि चार्थेऽवगते तत्र ज्ञानासद्भावाद् ज्ञानाभावप्रतिपत्त्ययोगात्, अनवगतेऽपि धर्म्यादौ सुतरामभावानवगमात्,

ऋजुविवरणम्

भङ्ग्यन्तरेण विषयत्वे च प्रमाणमाह—*अन्यं चेति । *ननु ज्ञानाभावेति* ॥ धर्मिप्रतियोगिसापेक्षत्वादिति भावः । 'अहं सुखी'त्यस्याप्यपरोक्षत्वम् ; अहंसामानाधिकरण्यादिति भावः । भवत्वपरोक्षोऽप्यभावावभास इति, नेत्याह—*अभावस्येति* ॥ भवतु षष्ठप्रमाणत्वपक्षेऽनवभासः, इन्द्रियान्वय-व्यतिरेकाभ्यां प्रत्यक्षत्वमपि वदन्ति, तत्र कथम् ? इत्याशङ्क्याह—*प्रत्यक्षाभाववादिनोऽपीति* ॥ तत्रापि धर्मिप्रतियोगिज्ञानमस्ति वा ? न वा ? प्रथमपक्षे दूषणमाह—*मयि ज्ञानमिति* ॥ द्वितीयपक्षे दूषणमाह—*अनवगतेऽपीति* ॥ *ननु* ज्ञानमपि ज्ञाते विषयेऽनुभूयते ? अज्ञाते वा ? न ज्ञाते ;

तत्त्वदीपनम्

प्रत्यक्षस्य ज्यैष्ठ्यात्प्रथमं तदाह—*प्रत्यक्षमिति* ॥ 'अहमज्ञ' इत्यज्ञानाश्रयत्वेन 'मामन्यं च न जानामी' त्यात्मानात्मकर्मकाऽबोधाश्रयत्वेनात्मन्यपरोक्षप्रतीतिदर्शनादज्ञानस्य सत्त्वमनात्मनस्त्वज्ञानकर्मत्वमनुभवमवलम्ब्योक्तम्, न वस्तुत इत्यर्थः । प्रत्यक्षस्याभावविषयत्वेनाप्युपपत्तेर्न भावरूपाविद्यासिद्धिरित्याह—*ननु ज्ञानेति* ॥ विमतः, नाभावविषयः, अपरोक्षत्वात्, अहं दुःखीति प्रत्ययवदित्यनुमानविरोधान्नाभावविषयत्वं तस्येत्याह—*नापरोक्षेति* ॥ विपक्षे बाधकाभावादप्रयोजकत्वमित्याशङ्क्य, किमेतत् षष्ठप्रमाणवादिनाम् ? उत प्रत्यक्षाभाववादिनाम् ? तत्राद्यं दूषयति—*अभावस्येति* ॥ योग्यत्वे सत्यनुपलब्ध्याख्यषष्ठप्रमाणविषयत्वेनाभावस्य पारोक्ष्यम्, ततश्चाभावप्रत्ययस्यापरोक्षत्वभङ्गो बाध इत्यर्थः । द्वितीयं प्रत्याह—*प्रत्यक्षेति* ॥ कथमसंभव इति शङ्कायाम्—किं धर्मिप्रतियोगिनावनुभूय ज्ञानाभाव-

पञ्चपादिकाविवरणम्

षष्ठप्रमाणगोचरे फललिङ्गाभावानुमेयेऽपि ज्ञानाभावे, आत्मादाववगतेऽनवगतेऽप्यात्मनि ज्ञानाभावप्रतिपत्त्ययोगात् । इह च "त्वदुक्तमर्थं सङ्ख्यां वा शास्त्रार्थं वा न जानामी"ति विषयव्यावृत्तमज्ञानमनुभूय तच्छ्रवणादौ

ऋजुविवरणम्

विरोधात्, नाज्ञाते ; ममात्राज्ञानमिति व्यावृत्तावगमायोगात् । अतश्चाहमज्ञ इति प्रतीतिरेव नास्ति, कथं तत्सिद्धिरित्याशङ्क्याह—*इह च त्वदुक्तमर्थमिति* ॥ अत्र लौकिक-तार्किक-मीमांसकान् प्रति यथासंख्येनासाधारणमुदाहरणत्रयम् । *यद्वा*—वस्तुमात्र-धर्म-वस्तुविशेषव्यावृत्तावुदाहरणत्रयम् । *यद्वा*—साधारणासाधारणरूपेण गृहीते वस्तुनि प्रामाणिकबोधोत्पत्तेः प्राग् नाज्ञाननिवृत्तिरिति दर्शनार्थं शास्त्रार्थं वेत्युक्तम् । प्रतीतिस्तावदस्ति, तदन्यथानुपपत्त्या च कारणं कल्पनीयम्, न तु कारणाभावेन तदपलापो युज्यत इति भावः । तत्रेयं प्रतीतिराश्रयविषयप्रतीतिसापेक्षा

तत्त्वदीपनम्

मनुभवसि ? उताननुभूयेति विकल्प्याऽऽद्यं प्रत्याह—*मयीति* ॥ द्वितीयं दूषयति—*अनवगत इति* ॥ धर्म्यादिप्रतिपत्तौ ज्ञानाभावोऽनुभूयते, न धर्म्याद्यप्रतिपत्तावित्यर्थः । धर्म्यादिप्रतिपत्तेरभावप्रतिपत्तिकारणत्वात्तदभावे कार्याभाव इति किमु वक्तव्यमित्यभिप्रेत्य—*सुतरामिति* ।। धर्मिप्रतियोगिप्रतिपत्त्यप्रतिपत्त्योरित्युक्तं दोषं षष्ठप्रमाणवादिमतेऽतिदिशति—*षष्ठप्रमाणेति* ॥ मतान्तरेऽप्येतत्तुल्यमित्याह—*फलेति* ॥ अर्थेन सहानुभूयमानत्वादप्यज्ञानं न ज्ञानाभाव इत्याह—*इहेति* ॥ लोके 'त्वदुक्तमर्थं न जानामी' त्यज्ञानमनुभूय प्रवर्तत इति सम्बन्धः ।

अर्थे विज्ञातेऽपि तद्गतसंख्याज्ञानाऽभावाभिप्रायेण व्यपदेशसंभव इत्याशङ्क्य निदर्शनान्तरमाह—*संख्यामिति* ॥ संख्यायां संख्यान्तराभावात्संख्यां न जानामीत्युक्तेः संख्याज्ञानाभावविषयत्वं विरुद्धमित्यर्थः ! तत्रापि परोक्षतया ज्ञातेऽपरोक्षज्ञानाभावाभिप्रायेण व्यपदेशोपपत्तिमाशङ्क्य, नित्यपरोक्षापूर्वादौ व्यपदेशस्यापरोक्षज्ञानाभावाभिप्रायत्वानुपपत्तेर्मैवमित्याह—*शास्त्रेति*॥ जानन्नेव न जानामीति ब्रूते परपरीक्षार्थम्, न त्वज्ञानसंभवात्, इत्याशङ्क्य, श्रवणगुरुशुश्रूषाद्यनुपपत्त्या तत्राज्ञानं कल्प्यत इत्याह—*तच्छ्रवणादाविति* ॥ अर्थज्ञान-तदभावयोर्यथा न समकालत्वम्,

वार्तिकम्

क्षणे ध्वस्ते घटे न ध्वस्त इति व्यवहारो जायते, किन्त्वनुत्पन्न इति, तत् कस्य हेतोः ? सूक्ष्मकालभेदानाकलनेनोत्पन्नानुत्पन्नयोर्विवेकाग्रहात्, तद्वदारोपाव्यवहितोत्तरक्षणेऽभावग्रहात् सूक्ष्मकालभेदानाकलनेनारोपितानारोपितयोर्भेदाग्रहाद् नारोपिताभावनिश्चयत्वग्रहः ; आरोपिताभावनिश्चयत्वेन हि गृहीतस्यैवाभावनिश्चयस्य बाधत्वप्रसिद्धेः । शुक्तिरजतादिस्थले तु भ्रमस्यानेककालानुवृत्तेः प्रवृत्तिविसंवादादिनाऽऽरोपितत्वे गृहीते सति 'नेदं रजतम्' इति प्रतीतेरारोपिताभावनिश्चयत्वग्रहाद् भवति बाधत्वप्रसिद्धिरित्यनवद्यम् । *एतेन*—'नेदं रजतम्' इति प्रतीतेर्बाधत्वनिश्चये सति 'इदं रजतम्' इति प्रतीतेरारोपत्वनिश्चयः, निश्चिते च तस्या आरोपत्वे तद्बाधत्वनिश्चयः, इत्यन्योन्याश्रयोऽपि—*अपास्तः* ; प्रवृत्तिविसंवादादिनैव तन्निश्चयात्, तथाचोक्तम्—"तस्माद्बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता" । इति । अपरोक्षभ्रमेऽपरोक्षाधिष्ठाननिश्चयस्यैव विरोधित्वात् ; दिङ्मोहादौ तथा दर्शनात् । न 'नेदं रजतमि'त्यभावज्ञानम् ; तस्य परोक्षत्वात्, अभावस्याप्रत्यक्षत्वात् । यथा चाभावस्याप्रत्यक्षत्वम्, तथा वक्ष्यते । उक्तं चाद्वैतामृतकन्दे वेदान्तमन्दाकिन्यां च । तस्य बाधिताध्यक्षनान्तरीय-

प्रदीपः

कल्पितत्वे शून्यवादापत्तिः, अधिष्ठानस्यापि मिथ्यात्वापत्तिश्चेति सूचयन्नाह—*सत्यानृते मिथुनीकृत्येति* । अनेनाधिष्ठानस्य सर्वदा सत्यत्ववर्णनेनारोप्येऽधिष्ठानस्य स्वरूपतो नाध्यास इति सूच्यते । तथाचान्योन्याध्यासेऽप्यधिष्ठानाज्ञानमेव कारणम्,

पञ्चपादिकाविवरणम्

प्रवर्तते। भावरूपाज्ञानप्रत्यक्षवादे तु सत्याश्रयप्रतियोगिज्ञाने ज्ञानाभावस्येव भावान्तरस्यापि नानुपपत्ति- र्नियन्तुं शक्यते। नचाश्रयप्रतियोगिज्ञानभूतमपि साक्षिचैतन्यं भावान्तरस्याज्ञानस्य निवर्तकम्; तस्याज्ञान- विषयप्रतिभासत्वात्। नहि स्वज्ञानेनैव स्वयं निवर्तते। *ननु* अज्ञानस्य व्यावर्तको विषयः कथं साक्षिचैतन्येनावभास्यते? प्रमाणायत्तत्वाद्विषयसिद्धेरिति, *उच्यते*; सर्वं वस्तु ज्ञाततया वाऽज्ञात- तया वा साक्षिचैतन्यस्य विषय एव। तत्र ज्ञाततया विषयः प्रमाणव्यवधानमपेक्षते, अन्यस्तु सामान्याकारेण

ऋजुविवरणम्

यथा नाभावं गमयति, एवमज्ञानमपि; आश्रयप्रतियोगिज्ञाने तस्य स्थित्ययोगादिति, तत्राह—*भावरूपाज्ञानेति* ॥ भावान्तरत्वमन्तर्गर्भितहेतुः। *ननु* भावान्तरत्वेऽपि समानाश्रय-विषयज्ञानाज्ञानयोर्विरोधोऽङ्गीक्रियते; तत् कथम- ज्ञानस्यानिवृत्तिः? इत्याशङ्क्याह—*नचाश्रयप्रतियोगीति* ॥ साक्षित्वेनाज्ञानविषयत्वादिति भावः। *ननु*अज्ञानाव- भासकत्वेऽपि विरोधप्रयोजकस्य विद्यमानत्वान्निवृत्त्याऽपि भवितव्यमित्याशङ्क्याह—*नहि स्वज्ञानेनेति* ॥ विषय- विषयस्यैव प्रमाणस्य निवर्तकत्वमिति भावः; विषयसंसृष्टस्यैव ग्राहकत्वात्साक्षिचैतन्यस्य च तदभावादिति चोदयति—*नन्वज्ञानस्येति* ॥ अज्ञानद्वारा सम्बन्धसद्भावादिति परिहरति—*उच्यते सर्वमिति* ॥ तर्हि प्रमाण- व्यापारवैयर्थ्यम्, ज्ञानाज्ञानविषयभेदाभावः, अन्वय-व्यतिरेकविरोधश्चेत्याशङ्क्याह—*तत्र ज्ञाततयेति* ॥ *ननु*

तत्त्वदीपनम्

तद्वत्तदज्ञानतज्ज्ञानयोरपि; एतदज्ञानम्, नैतज्ज्ञानसमकालीनम्, एतदज्ञानत्वात्, एतज्ज्ञानाभाववदित्याशङ्क्याप्रयोजकत्वेन परिहरति—*भावरूपाज्ञानेति* ॥ भावाभावयोः खल्वेककालत्वं विरुद्धम्, न तु भावयोः; न हि घटभावे पटभावा- नुपपत्तिरित्यर्थः। एतदज्ञानम्, नैतज्ज्ञानसमकालीनम्, एतज्ज्ञाननिवर्त्यत्वाद्, एतज्ज्ञानप्रागभाववदित्याशङ्क्य, किं ज्ञानशब्देन वृत्तिर्विवक्ष्यते, उत साक्षी? नाद्यः; सिद्धसाध्यत्वादित्यभिप्रेत्य द्वितीयेऽसिद्धिमाह—*नचेति* ॥ विमतम्, नाधिष्ठाननिवर्तकम्, तत्स्फोरकत्वात्, यद् यत्स्फोरकं न तत् तन्निवर्तकम्; यथा घटज्ञानमित्यर्थः। विपक्षे बाधकमाह—*न हीति* ॥ घटज्ञानेन घटस्यापि निवृत्तिप्रसङ्गादित्यर्थः। असिद्धो हेतुरिति शङ्कते—*नन्विति* ॥ किं साक्षिचैतन्यं घटविशेषिताज्ञानं भासयति? उत केवलम्? नाद्यः; विषयस्य प्रमाणगम्यत्वनियमात, अन्यथा प्रमाणवैयर्थ्यात्। नेतरः; अज्ञानमित्यप्रतीतेरित्यर्थः।

केवलस्य साक्षिवेद्यत्वाभावेऽपि विशिष्टस्य साक्षिवेद्यत्वादज्ञानस्फोरकत्वं सिद्धमित्याह—*उच्यत इति* ॥ न

वार्तिकम्

त्वाद् बाध्यत्वप्रसिद्धिः। तथाच तत्पूर्वमबाधिताध्यस्तादिवेदं रजतमिति प्रतीतेरारोपत्वनिश्चयादुपपद्यते 'नेदं रजतमि'ति प्रतीतेरारोपिताभावनिश्चयत्वप्रतीतिरिति। यद्यपि शुक्तावपि निषेधप्रतियोगि तदव्यवहितपूर्वक्षणवर्त्यारोपशरीरत्वाद् 'भूतले घटो नास्ति' इत्यादिनिषेधप्रतियोग्यविशिष्टम्; तथापि तज्जातीयतत्पूर्ववर्त्यारोपसन्तानस्यापि तत्प्रतियोगित्वाद् अत्र च तदभावादारोपितत्वविशेषग्रहाग्रहभेदोप- पत्तिः॥ *ननु*—अत्र दोषाभावात् कथमारोपः स्यादिति—चेत्, *न*; रागस्यैव दोषत्वात् तदभावा- सिद्धेः। *ननु*—ज्ञानं नेच्छातन्त्रम्; वस्तुतन्त्रत्वात्, अनिच्छतोऽपि दुर्गन्धदर्शनादिति—चेत्, *सत्यम्*; वस्तुज्ञानस्यैव तथात्वात्, न भ्रमज्ञानस्य; अन्यथा रजतभ्रमे रागहेतुत्वापत्तेः, तर्कज्ञानानुप- पत्तेश्च, तस्याहार्यारोपरूपत्वात्। कथं तर्हि योषिदग्निभावदृष्टेर्मानसक्रियात्वं वक्ष्यति भाष्यकारः? नैष दोषः; अधिष्ठानापरोक्ष्यादपरोक्षैच्छिकभ्रमानुपपत्तेरुक्तत्वाभिधानात्, भावनासिद्ध्युत्तरकालं

पञ्चपादिकाविवरणम्

विशेषाकारेण वाऽज्ञानव्यावर्तकतया सदा भासत इत्युपपत्तिसहितमज्ञानप्रत्यक्षं भावरूपमेवात्मन्यज्ञानं गमयतीति सिद्धम् ॥

अनुमानमपि—विवादगोचरापन्नं प्रमाणज्ञानम्, स्वप्रागभावव्यतिरिक्त-स्वविषयावरण-स्वनिवर्त्य-

ऋजुविवरणम्

ज्ञानावभासस्य प्रमाणसामग्रीजन्यत्वाभावात्कथं साधकत्वमित्याशङ्क्याह—*इत्युपपत्तिसहितमिति* ॥ यद्वा—भवेदियं प्रतीतिरज्ञानविषया तत्साधिका, न तु तया भावरूपत्वसिद्धिः ; तद्रूपाप्रतीतेः, अप्रतीतस्य चाकारस्य सिद्ध्यभावात्, इत्यत्राह—*इत्युपपत्तिसहितमिति* ॥ अनुमानविशेषणोपयोगस्त्वेवम् :—विवादगोचरापन्नं प्रमाणज्ञानं धर्मि, यत्किंचित्पूर्वकमित्युक्ते, ज्ञानमेव स्वाकारेण जनकं स्वसंवित्तिरूपेण जन्यफलमिति बौद्धाः सर्वे, तत्र सिद्धसाध्यतापरिहारार्थम्

तत्त्वदीपनम्

च प्रमाणवैयर्थ्यमपीत्याह—*तत्र ज्ञाततयेति* ॥ प्रमाणानां ज्ञातताजनकत्वाद् न वैयर्थ्यमित्यर्थः। नच—केवलस्य साक्षिवेद्यत्वाभावे विशिष्टस्यापि न साक्षिवेद्यत्वमिति—वाच्यम् ; केवलपरमाणोर्मानसप्रत्यक्षत्वाभावेऽपि 'परमाणुमहं न जानामि' इति ज्ञानविशेषणतया प्रत्यक्षविषयत्वोपगमादित्यर्थः। ज्ञातताविशिष्टस्य प्रमाणव्यवधानेन चिद्भास्यत्वे विषयत्वाविशेषादज्ञातताविशिष्टस्यापि सव्यवधानत्वमित्याशङ्कयाह—*अन्यस्त्विति* ॥ अज्ञाततायाअनादित्वान्न तज्जनने प्रमाणापेक्षा, नापि तद्बोधने ; विरोधात्, तस्मात्साक्षात्साक्षिवेद्यत्वमित्यर्थः। अज्ञानस्य प्रत्यक्षतां निगमयति—*इतीति* ॥ धर्मिप्रतियोगिप्रतिपत्त्यप्रतिपत्त्योर्न ज्ञानाभावप्रतिपत्तिरित्युपपत्तिशब्दार्थः ॥

वार्तिकम्

तत्साक्षात्कारस्य ज्ञानत्वमिव। नच—सर्वपरोक्ष आकाशे 'नीलं नभः' इत्यपरोक्षभ्रमो न स्यादिति—वाच्यम् ; तस्यापि साक्षिभास्यत्वाङ्गीकारात् परोक्षत्वासिद्धेः। तस्मादारोपितस्यैव तत्र विद्यमानस्य सर्वत्राभावप्रतियोगित्वान्न देशान्तरवर्तिनः प्रतियोगितयाऽभावावच्छेदकत्वम्। तथाच कुत्रापि देशान्तरवर्तिनो धर्मस्य देशान्तरवर्त्यवच्छेदकत्वादर्शनाद् न देशान्तरवर्तिरजतत्वादेः पुरोवर्त्यवच्छेदकत्वमिति ॥ सन्निकर्षाभावादपि न देशान्तरस्थं रजतं चक्षुर्ग्रहीतुं शक्नोति ; इन्द्रियाणां सन्निकृष्टग्राहित्वनियमात्। नच दूरव्यवहितेन चक्षुषः सन्निकर्षोऽस्ति ; दूरत्वादेरेव तत्प्रतिबन्धस्य सत्त्वात्। तत्सत्त्वेऽप्यञ्जनादिवदुत्तेजकदोषसत्त्वात्तदुपपत्तिरिति—चेत्, न ; तथा सति दोषस्य हेतुत्वापत्तेरुत्तेजकस्याहेतुत्वात् ; सन्निकर्षाहेतुत्वेऽपि भ्रमहेतुत्वमविरुद्धमिति—चेत्, सत्यम् ; तथापि न देशान्तरस्थरजतग्रहोपपत्तिः ; तन्मध्यवर्तिभूधरादिग्रहप्रसङ्गात्। सादृश्य-रागावपि विषयान्तःकरणदोषौ तत्सहकारिणाविति—चेत्, तथापि स्फटिक-हीरकाद्यनेकस्य तत्सदृशस्य रागविषयस्य ग्रहः स्यात्, युगपदनेकविषयरागस्याक्ष्णि दर्शनात्। पुरोवर्तिन एकत्वादेकमेव गृह्णातीति चेत्, न ; तथापि न नियमेन रजतं गृह्णीयात्, कदाचित्तत्र रङ्गादिभ्रमस्यापि दर्शनाद् न नियमेन रजतं गृह्णातीति चेत्, सत्यम् ; तथापि पुरोवर्ति न गृह्णीयादेव। दोषाद्देशान्तरस्थं गृह्णच्चक्षुः पुरोवर्त्यभेदेनैव गृह्णातीति चेत्, न ; व्यञ्जकस्य कारकत्वप्रसङ्गात्, अन्यथा पुरोवर्तिनि तदभेदस्यासत्त्वात् तद्ग्रहानुपपत्तेः। *न तदभेदं जनयति ; येन कारकत्वप्रसङ्गः स्यात्, किं तर्हि ? अन्यत्र सन्तमन्यथा ग्राहयतीति—चेत्, *न ; अन्यथाविषयमन्तरेण तद्ग्राहकत्वानुपपत्तेः, तदभ्युपगमे च तत्त्वतोऽन्यथाभावस्य शुक्तेर्निराकृतत्वादतत्त्वतोऽन्यथाभावो वाच्यः ; तथाचानिर्वचनीयख्यातिप्रसङ्गः। तस्मादसदेतत्—यद् देशान्तरस्थं रजतं दोषाद् गृह्यत इति ॥ *ननु एवं तर्हि माऽस्तु

पञ्चपादिकाविवरणम्

स्वदेशगत वस्त्वन्तरपूर्वकं भवितुमर्हति, अप्रकाशितार्थप्रकाशकत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रभाव-

ऋजुविवरणम्

स्वव्यतिरिक्तेति विशेषणम्। तथापि प्रागभावे सिद्धसाध्यता, तद्व्यावृत्त्यर्थम्—*प्रागभावव्यतिरिक्तेति विशेषणम्*। *यद्वा*—प्रागभावव्युदासार्थम्—*स्वप्रागभावव्यतिरिक्तेति* विशेषणम्। एवमपि विषये करणे च सिद्धसाध्यता स्यात्, तदर्थम्—*स्वविषयावरणेति*विशेषणम्। तथापि भ्रान्तिसंस्कारे तमसि वा सिद्धसाध्यता स्यात्, तन्निवृत्त्यर्थम्—*स्वनिवर्त्येति* विशेषणम्। तथापि रजतमर्थगतमिति केचित्, तत्र सिद्धसाध्यता, अज्ञाते वान्तःकरणगते, तत्परिहाराय *स्वदेशगतेति*॥ तथापि बौद्धकल्पितवासनायां सिद्धसाध्यता, तदर्थम्— *वस्त्विति*॥ तथापि मिथ्याज्ञाने तदेव,तदर्थम्— *अन्तरेति* ॥ *यद्वा*—मिथ्याज्ञानव्यवच्छेदार्थम्—*वस्त्वन्तरेति*विशेषणम्। तथा प्रतिलोमतो विशेषणोपयोगः कथ्यते—प्रमाणज्ञानं यत्किञ्चित्पूर्वकमित्युक्ते शून्ये सिद्धसाध्यता, तद्व्यावृत्त्यर्थम् *वस्तुपूर्वकमिति* विशेषणम्। तथापि जनि-धारावाहिकयोस्तत्परिहारार्थम्—*अन्तरेति* ॥ जनेर्जायमानादन्यत्वायोगाद् ज्ञानस्यान्यत्वेऽपि विजातीयविवक्षा। *यद्वा*—मिथ्याज्ञानव्यवच्छेदः—*वस्त्वन्तरेति* ॥ वस्त्वन्तरपूर्वकमित्युक्ते, इन्द्रियार्थसंयोगे, तदर्थम्—*स्वदेशगतेति* विशेषणम्। स्वदेशगतवस्त्वन्तरपूर्वकमित्युक्ते, आत्ममनःसंयोगे, तदर्थम्—*स्वनिवर्त्येति* ॥ एतावत्यपि धर्माधर्मयोः, तदर्थम् *स्वविषयावरणेति *विशेषणम्। एवमपि प्रागभावे सिद्धसाध्यता, तदर्थं *स्वप्रागभावव्यतिरिक्तेति* विशेषणम्। अत्र संग्रहश्लोकाः :—

स्वप्रागभावो विषयस्तमश्च मनस्तमो वासनमन्यथाधीः।
जनिस्तु शून्यं करणं मनोऽन्यद्धर्मः पुराभाव इमे विवर्त्याः॥
स्वाकारः प्रागभावश्च करणं संस्कृतिस्तथा। रजतं भ्रान्तिरूपा धीर्निरस्यास्त्वनुलोमतः॥
पूर्वज्ञानं तथा शून्यं करणं बाह्यमान्तरम्। अधर्मः प्रागभावश्च निरस्याः प्रतिलोमतः॥ इति

तत्त्वदीपनम्

अवश्यपदसूचितमनुमानमाह—*अनुमानमपीति* ॥ साध्यविशेषोपादानेन सिद्धस्य धर्मिविशेषस्य स्पष्टीकरणार्थं प्रमाणज्ञानमित्युक्तं द्रष्टव्यम्। वस्तुपूर्वकमित्युक्तौ, आत्मवस्तुपूर्वकतयाऽर्थान्तरत्वम्, तदर्थम्—*वस्त्वन्तरेति* ॥ चक्षुरादिव्यावृत्त्यर्थम्—*स्वदेशगतेति* ॥ अदृष्टादिकं व्यावर्तयति—*स्वनिवर्त्येति* ॥ उत्तरज्ञाननिवर्त्यपूर्वज्ञानव्यावृत्त्यर्थम्—*स्वविषयावरणेति* ॥ प्रागभावव्यावृत्त्यर्थम्—*स्वप्रागभावेति* ॥ स्वप्रागभावव्यतिरिक्तपूर्वकमित्युक्तौ, विषयेणार्थान्तरता, तदर्थम्—*स्वविषयावरणेति* ॥ स्वविषयावरकान्धकारव्यावृत्त्यर्थम्—*स्वनिवर्त्येति* ॥ विषयगताज्ञातताव्यावृत्त्यर्थम्—*स्वदेशगतेति* ॥ मिथ्याज्ञानं व्यावर्तयति—*वस्त्वन्तरेति* ॥ धारा-

वार्तिकम्

देशान्तरस्थरजतेन लौकिकः सन्निधिः, अलौकिकस्तु संस्कारो ज्ञानं वा सन्निधिर्भविष्यतीति चेत्, न; लौकिकाद् 'इदं रजतमि'ति ज्ञानाद् भ्रमज्ञानस्य विशेषानुपलब्धेस्तत्कल्पनानुपपत्तेः, सामग्रीवैषम्ये कार्यवैषम्यस्यावश्यकत्वात्। नच तद्वैषम्यमपि सामग्रीवैषम्यात्कल्पनीयम्; अन्योन्याश्रयापत्तेः—सामग्रीवैषम्ये कार्यवैषम्यसिद्धिः, कार्यवैषम्यसिद्धौ च सामग्रीवैषम्यसिद्धिरिति। रजतांशे ज्ञानस्य वैषम्ये सत्यपि लौकिकेदमंशज्ञानाभेदात्तन्नोपलक्ष्यत इति—चेत्, न; अलौकिकरजतांशज्ञानाभेदादिदमंशेऽपि कथं नालौकिकत्वोपलब्धिः स्यात्? विनिगमककारणाभावात्। अस्ति च विनिगमककारणम्—यद् ज्ञानस्य विशेष्यांशपक्षपातः; तत्र तस्य निराकाङ्क्षत्वात्, आविद्यकत्वपक्षेऽपि सामग्रीवैषम्यसत्त्वात् कथमवैषम्यानुभव इति चेत्, न; अविद्याया अघटितघटनापटीयस्त्वात्तदुपपत्तेः, स्वप्नेन्द्रजाल-गन्धर्वनगरादिषु मायिकेषु

पञ्चपादिका

ध्यात्मिकेषु वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिन्यभ्युपगन्तव्या ; अन्यथा मिथ्यार्थावभासानुपपत्तेः ।

पञ्चपादिकाविवरणम्

दिति । ततश्च ज्ञानेन समानाश्रयविषयं भावरूपमज्ञानं सिद्धम् । *शक्तिरित्यात्मपरतन्त्रतयाऽऽत्मनः सर्वकार्योपादानत्वस्य निर्वोढृत्वमाह । *तत्स्वरूपमात्मतत्त्वम्, तत्सत्तामात्रानुबन्धिनीत्यर्थः । *किंच* अर्थापत्तिरपि भावरूपाज्ञानसद्भावे प्रमाणमित्याह—*अन्यथा मिथ्यार्थावभासानुपपत्तेरिति* ॥ विशुद्धब्रह्मात्मनि शुक्तिकायां

ऋजुविवरणम्

अप्रकाशितार्थप्रकाशकत्वादिति हेतुः । तत्र प्रकाशकत्वादित्युक्ते, विपक्षे स्मृत्यादौ हेतोर्वृत्तेरनैकान्तिकता, तदर्थम्—*अप्रकाशितार्थप्रकाशकत्वादिति* विशेषणम् । *यद्वा*—अप्रकाशितार्थप्रकाशकत्वादिति हेतुः । तत्र प्रकाशकत्वादित्युक्ते विपक्षे चैतन्ये वृत्तिः ; तदर्थमर्थेति विशेषणम् । अर्थप्रकाशकत्वादित्युक्ते स्मृत्यादौ, तदर्थम्—*अप्रकाशितेति* । नचात्र हेतुदृष्टान्तयोरेकप्रकाशरूपानन्वयः शङ्कनीयः ; तमोविरोध्याकारः प्रकाशशब्दवाच्यः, तेनाकारेणैक्यमुभयत्रास्तीति । प्रदीपप्रभावदिति दृष्टान्तः । उभयविकलो दृष्टान्तः, तद्व्यावृत्त्यर्थम्—*प्रथमोत्पन्नेति* । तथापि सौरालोकविततेऽपि देशे प्रथमोत्पन्नप्रदीपप्रभायामुभयविकलत्वम्, तदर्थम्—*अन्धकार इति* ॥ *ननु* अज्ञानसाधनमुपक्रम्य निवर्त्यविशेषसाधनेन किं प्रकृतानुपयोगेन ? *यद्वा*—साक्षादज्ञानसाधने संभवति किं प्रणाड्या तत्साधनेन ? वैयर्थ्यं चानुमानस्य ; प्रत्यक्षेणैव तत्सिद्धेरित्याशङ्क्याह—*ततश्चेति* ॥ *ननु* आत्मन एवोत्तरत्रोपादानत्वं वक्ष्यते, अतस्तद्विरोधः ; अथवा—अविद्याशक्तिरित्यसंबद्धम् ; ज्ञानसाधनस्य प्रस्तुतत्वात्, शक्तित्वनिरूपणस्याप्रस्तुतत्वाच्चेत्याशङ्क्याह—*शक्तिरित्यात्मेति*॥ तत्स्वरूपशब्देन सन्निहितत्वाद् बाह्याध्यात्मिकवस्तुपरामर्शेन भवितव्यम्; तथासति कथं तत्स्वरूपसत्तामात्रानुबन्धिनोऽज्ञानस्य तदुपादानत्वम् ? विरोधात्, अत उपादानं निरूपयितुं प्रक्रम्य कार्यस्वरूपसत्तामात्रानुबन्धित्वप्रतिपादनात्परस्परव्याहतो ग्रन्थः, इत्याशङ्क्य व्याचष्टे—*तत्स्वरूपमात्मतत्त्वमिति ॥ यदि-"अवश्यमि"त्यनेन प्रमाणद्वयवत्त्वमुक्तम्, कथमनन्तरग्रन्थेन हेतुरुच्यते ? वैयर्थ्यात्, अतः पूर्वग्रन्थे प्रतिज्ञा, उत्तरग्रन्थे हेतुरित्येकग्रन्थत्वप्रतीतेर्नैवं व्याख्यानं युज्यते, इत्याशङ्क्यावतारयति—*किञ्चार्थापत्तिर-

तत्त्वदीपनम्

बाह्यिकद्वितीयादिज्ञाने व्यभिचारव्यावृत्त्यर्थम्—*अप्रकाशितेति* ॥ *अर्थपदं तु* स्पष्टीकरणार्थम् । मध्यवर्तिप्रदीपप्रभायां साध्यसाधनवैधुर्यपरिहाराय—*प्रथमेति* विशेषणम् । सवितृकिरणव्याप्तप्रदेशस्थप्रदीपप्रभाव्यावृत्त्यर्थम्—*अन्धकार इति* ॥ किमनात्मज्ञानं धर्मि ? उत आत्मज्ञानं धर्मि ? नाद्यः ; अनात्मावरकस्याज्ञानस्यानङ्गीकारात् तत्साधने बाधापातात्, न द्वितीयः ; अनात्मज्ञाने व्यभिचारात् ।

अप्रकाशितार्थप्रकाशकत्वं च—किमप्रकाशितार्थप्रकाशकर्तृत्वम् ? उत करणत्वम् ? नाद्यः ; असिद्धेः, साधनवैकल्यप्रसङ्गात् । न द्वितीयः ; अत एव । ततो यत्किंचिदेतदिति केचित् । प्रतिपन्नस्यात्मज्ञानस्यानात्मज्ञानस्य च धर्मित्वमिति ब्रूमः । नच बाधापत्तिः ; घटाद्यवच्छिन्नचैतन्यं प्रत्यक्षादिविषयत्वेनोपेयते, तच्चाज्ञानावृतमिति कथं बाधः ? नच हेतोर्दुर्निरूपत्वम् ; प्रकाशशब्देन तज्जन्यो व्यवहारो लक्ष्यते ; ततश्चाप्रकाशितव्यवहारहेतुत्वं हेत्वर्थः । तस्य चोभयत्रानुगतत्वान्नासिद्ध्यादिरिति । अनुमाननिगमनार्थ इतिशब्दः ॥ प्रमेयमुपसंहरति । *ततश्चेति* ॥ अविद्यायाः शक्तिमत्त्वात्कथं शक्तिरित्यभिहितमिति ? तत्राह—*शक्तिरिति* । आत्मकारणत्वनिर्वोढृत्वादात्मपरतन्त्रत्वाच्च शक्तिमत्यामपि शक्तिशब्द उपचरित इत्यर्थः । बाह्यघटादेर्विषयत्वमाध्यात्मिकाहंकारस्य चाश्रयत्वमनुभवमाश्रित्योक्तम्—*बाह्याध्यात्मिकेष्विति* ॥ *वस्तुतस्तु* (टीकायाम्) "अविद्या तत्स्वरूपानुबन्धिनी"त्युक्तम्, तदनुपपन्नम्; अनात्मतन्त्रत्वे तदुपादानत्वविरोधात्, इत्याशङ्क्य टीकार्थं स्पष्टयति—तत्स्वरूपमिति* ॥ *तेषाम्-अनात्मवस्तूनां स्वरूपमात्मतत्त्वम् ; अधिष्ठानत्वादारोपितसर्पादे रज्जुरिवेत्यर्थः । अनात्मविशिष्टा-

पञ्चपादिकाविवरणम्

चाहङ्कार-रजताध्यासस्यार्थज्ञानात्मकस्य मिथ्याभूतस्य मिथ्याभूतमेव किंचिदुपादानमन्वेषणीयम् ; सत्योपादानत्वे कार्यस्य कारणस्वभावतयाऽध्यासस्यापि सत्यत्वप्रसङ्गात्, तस्यापि मिथ्योपादानस्य सादित्वे तथाविधोपादानान्तरकल्पनाप्रसङ्गादनाद्येव तन्मिथ्योपादानमिति कल्पनीयम् । यच्चानादि स्वयं मिथ्या मिथ्योपादानमात्मसम्बन्धि च तदज्ञानमिति, मिथ्याध्यास एव तथाविधाज्ञानोपादानं कारणमन्तरेणानुपपद्यमानस्तत् कल्पयतीत्युक्तम् ।

ऋजुविवरणम्

पीति* ॥ *ननु* अर्थस्य मिथ्यात्वे सिद्धे तेन मिथ्योपादानकल्पना स्यात्, तदेवासिद्धं कथं मिथ्योपादानकल्पकम् ? इत्याशङ्क्याभिप्रायमाह—*विशुद्धब्रह्मात्मनीति*॥ विशुद्धत्वादेव न तत्र बन्धसत्यतेत्यर्थः । *ब्रह्मात्मनी*-त्यनेनात्मगतत्वेन तत्कल्पने प्रमाणमुक्तम् ; कार्यस्यातदाश्रयाज्ञानकल्पकायोगात्, तथापि कथमुपादानान्तरकल्पना ? अर्थज्ञानयोः परस्परोपादानत्वेनार्थापत्तेरुपक्षीणत्वात् । *अथवा*—संस्कारादप्युत्पत्तिसंभवादधिष्ठानज्ञानाभावेन वोत्पत्तिसंभवादिति परपक्षान्मनसि निधायाह—*अर्थज्ञानात्मकस्येति* ॥ परम्परसहभावेन नोपादानत्वं संभवति ; अर्थज्ञानात्मकत्वादेव न संस्काराभावयोस्तत्रोपादानत्वं संभवतीति भावः । *अथवा*—"मिथ्यार्थावभासानुपपत्तेरि"त्युक्तम् ; नह्यज्ञानेन विनाऽवभासानुपपत्तिः ; अवभासकारणमात्रापेक्षत्वादवभासस्य, नित्यचैतन्येनावभाससंभवान्न तदपेक्षाऽपि, अतोऽयुक्तोऽयं ग्रन्थः, इत्याशङ्क्य व्याचष्टे—*अर्थज्ञानात्मकस्येति* ॥ मिथ्यार्थस्य तदवभासस्य चानुपपत्तेरिति व्याख्यातम् । अर्थज्ञानात्मकत्वेऽपि नाभिमतोपादानकल्पकत्वम्, तदर्थम्—*मिथ्याभूतस्येति* ॥ तथाऽपि कथं भवदभिमताज्ञानसिद्धिः ? विशुद्धत्वेनात्मन उपादानत्वाभावेऽप्यन्यस्य सत्यस्योपादानत्वसंभवेनार्थापत्तेरुपक्षीणत्वादिति, तत्राह —*सत्योपादानेति* ॥ अनेन कार्यस्य मिथ्यात्वं व्यापकविशेषाभावश्च दर्शितः । तथाऽपि मिथ्याभूतमेव किञ्चिद्भवेत्, नाज्ञानम्, तेन विनाऽनुपपत्त्यभावादित्याशङ्क्याह—*यच्चानादीति*॥ यच्चानादि तदज्ञानमित्युक्ते, आत्मादीनामज्ञानत्वं स्यात्, तदर्थमाह—स्वयं मिथ्येति* ॥ एवमप्यज्ञानात्मसंबन्धे निमित्तमात्रत्वेन पराभ्युपगतेऽमिथ्याभूतेऽपि स्यात्, तदर्थमाह—*मिथ्योपादानमिति* ॥ एवमपि स्वातन्त्र्यशङ्का स्यात्, तथा सति आत्मोपादानत्वविरोधः, निरधिष्ठानस्योपादानत्वासंभवः, कार्यस्यात्मगतत्वानुपपत्तिश्च, तदर्थमाह—*आत्मसंबन्धीति* ॥ संज्ञामात्रभेद इति भावः । टीकाकृता बाह्यस्याज्ञानविषयत्वं दर्शितम्, तदाक्षेप्तुं विषयलक्षणमाह—*ननु येन यस्येति* ॥ *ननु* केनचिदति-

तत्त्वदीपनम्

त्मपारतन्त्र्यं व्यावर्तयितुं—*सत्तामात्रेत्युक्तम्* ॥ प्रत्यक्षानुमानाभ्यामविद्यासिद्धेस्तत्र हेत्वाकाङ्क्षाऽभावादन्यथेति ग्रन्थानुपपत्तिरित्याशङ्क्य, प्रमाणान्तरपरतया व्याचष्टे—*किं चेति* ॥ मिथ्यार्थतदवभासयोरनुपपत्तेरिति टीकार्थः ।

अहंकारादि-तदवभासयोर्मिथ्यात्वासिद्धेः कथं तदनुपपत्त्याऽज्ञानसिद्धिरित्याशङ्क्य तात्पर्यमाह—*विशुद्धेति* ॥ ज्ञानस्यैवाध्यासः, नार्थस्येति मतं निरस्यति—*अर्थज्ञानेति* ॥ निरालम्बनज्ञानायोगादर्थोऽप्यध्यस्त इत्यर्थः । समीचीनज्ञानवद्यथार्थत्वान्नाध्यासत्वमित्याशङ्क्याह—*मिथ्याभूतस्येति* ॥ आत्मनि शुक्तौ च प्रतीयमानस्यार्थस्य सत्यत्वाऽनुपपत्तेः कल्पितत्वेन तज्ज्ञानमपि मिथ्येत्यर्थः । मिथ्यार्थावभासानुपपत्त्या मिथ्याभूतमुपादानमेष्टव्यमित्युक्तम्, तत्रान्यथोपपत्तिं निरस्यति—*सत्योपादानत्व इति* ॥ मृज्जन्यस्य घटस्य मृदात्मतावत् सत्योपादानस्य सत्यत्वं स्यादित्यर्थः । किं तदुपादानं सादि ? उतानादि ? नाद्यः ; अनवस्थानात्, न द्वितीयः ; तत्र प्रमाणाभावादित्याशङ्क्य, कल्पनालाघवादनाद्येव तदित्याह—*तस्यापीति* ॥ तथापि कथमज्ञानसिद्धिः ? इत्याशङ्क्याह—*यच्चेति* ॥ आत्मव्यावृत्त्यर्थम्—*मिथ्येति* ॥ संसृष्टरूपेण तस्यापि मिथ्यात्वम्, तदर्थम्—*स्वयमिति* । प्रागभावं व्यावर्तयितुं—*मिथ्योपादानमिति* विशेषणम् । अनादि भावरूपं ज्ञानापनोद्यमज्ञानमित्युक्तं भवति । स्वातन्त्र्यं व्यावर्तयति—*आत्मेति* ॥ अर्थापत्तिं निगमयति—*इतीति* ॥ इतिशब्दोऽन्यथोपपत्त्यभावपरामर्शार्थः । "इत्युक्तमि"त्यत्र मिथ्यार्थावभासानुपपत्तेरित्यत्रेति शेषः ।

पञ्चपादिकाविवरणम्

ननु येन यस्यातिशय उत्पद्यते, स तस्य विषयः, नचाज्ञानेनानात्मन्यावरणातिशयजन्म ; प्रमाणाभावात्, अर्थानुपपत्तेश्च। न तावदवगते नीलार्थे तत्रावरणकृत्यमवगन्तुं शक्यते, अनवगते तु नतराम्। *ननु* अवगते सति पूर्वमावृतमित्यवगम्यताम्, *न* ; धारावाहिकविज्ञानगम्येऽर्थे पूर्वमवगतस्यापि पश्चादवगमदर्शनात्। *ननु* इदानीमेवावगतत्वं पूर्वमनवगतिं साधयति, *न* ; पूर्वावगतिमविज्ञायेदानीमेवावगतमित्यवधारणायोगात्। *ननु* पूर्वापरप्रत्यभिज्ञायां मध्येऽनवगतिरवगम्यत इति, *न प्रत्यभिज्ञानुपपत्तिर्मध्येऽनवगतिं साधयति* ; धारावाहिकेऽप्यात्मनि सदाऽवगते तद्दर्शनात्, मध्ये ज्ञानस्मृत्यभावादवगतिरवगम्यत इति चेत्, न ; अवगतेऽपि

ऋजुविवरणम्

शयेन तद्विषयत्वव्यपदेशो घटते, अथवा—सावरणत्वेनैवाज्ञानस्य साधितत्वादावरणमेवातिशय इत्याशङ्क्याह—*नचाज्ञानेनेति* ॥ अर्थानुपपत्तेश्चेत्यनेनावरणस्य प्रयोजनमपि नास्तीत्युक्तम्, तत्र हेतोरसिद्धतामाशङ्क्य साधयति—*न तावदिति* ॥ विरोधादिति भावः। *नतरामिति* ॥ अस्यावरणमित्यवगमायोगादिति भावः। *नन्ववगते सतीति* ॥ इदानीमवगतिव्यवहारोऽनुपपत्त्या पूर्वानवगतिमवगमयतीति भावः। *ननु* अवगतेः प्रत्यभिज्ञोत्पद्यमानाऽनवगतिं साधयतीति चोदयति—*ननु पूर्वापरेति। मध्ये ज्ञानस्मृतीति* ॥ विषयाभिज्ञाप्रत्यभिज्ञयोर्मध्ये ज्ञानस्मृत्यभावात्तदभावः, तदभावे च तद्व्याप्तावरणनिश्चय इति। *ननु* विषयसंबन्धिज्ञानं प्रतीयते—'त्वदुक्तमर्थं न जानामी'ति,

तत्त्वदीपनम्

"बाह्याऽऽध्यात्मिकेष्वि"त्यत्रानात्मनोऽविद्याविषयत्वमुक्तम्. तदाक्षिपति—*नन्वित्यादिना* ॥ विषयत्वाभावं दर्शयितुं विषयलक्षणमाह—*येनेति* ॥ अज्ञानजनिताऽऽवरणातिशयशालित्वादनात्मनो विषयत्वमित्याशङ्क्याह—*नचेति* ॥ *अर्थानुपपत्तेः = प्रयोजनानुपपत्तेरित्यर्थः। आद्यं संग्रहवाक्यं विवृणोति—*न तावदित्यारभ्य नच स्वयमित्यतः* प्राक्तनग्रन्थेन। आवरणे किं प्रत्यक्षं मानम्? उतानुमानम्? आहो अनुपपत्तिः? आद्येऽपि किमनात्मन्यधिगत आवरणमधिगम्यते, अथवाऽनुपलब्धे? इति विकल्प्याऽऽद्यं प्रत्याह—*न तावदिति*। नीलावगमविरोधात्तत्राऽऽवरणं दुरधिगममित्यर्थः। द्वितीयं प्रत्याह—*अनवगत इति* ॥ नीलप्रतिपत्तिं विना तत्राऽऽवरणं नानुभूयत इत्यर्थः। अशक्यश्चानुभव इत्याह—*नतरामिति* ॥ द्वितीयमुत्थापयति—*नन्ववगत इति* ॥ विमतम्, पूर्वमावृतम्, इदानीमवगतत्वात्, संमतवदित्यनुमानादावरणसिद्धिरित्यर्थः। किमिदानीमवगतत्वमात्रं हेतुः? उत इदानीमेवावगतत्वम्? नाद्य इत्याह—*न धारावाहिकेति* ॥ धारावाहिकज्ञानगस्य इदानीमवगतत्वमस्ति, न पूर्वमावृतत्वमिति तत्र व्यभिचारः। नच—तत्राप्युत्तरकालवैशिष्ट्यस्य प्रागज्ञातत्वान्न व्यभिचार इति—शङ्क्यम्; विशेषणभूतार्थे व्यभिचारादित्यर्थः। द्वितीयमुत्थापयति—*नन्विदानीमेवेति* ॥ असिद्धो हेतुरित्याह—*न पूर्वेति* ॥ इदानीमेवावगतत्वे सिद्धे प्रागनधिगतत्वं सिद्ध्यति, तत्सिद्धाविदानीमेवावगतत्वसिद्धिरितीतरेतराश्रयाद्धेत्वसिद्धिरित्यर्थः। तृतीयमनुवदति—*ननु पूर्वापरेति* ॥ पूर्वापरकालसंबन्धविषयिणी तावत्प्रत्यभिज्ञा दृष्टा, सा च मध्येऽनवगतिमन्तरेण नोपपद्यते ; अन्यथा तत्रापि प्रत्यभिज्ञा स्यादित्यर्थः। अन्यथोपपत्त्या परिहरति—*न प्रत्यभिज्ञेति* ॥ धारावाहिकज्ञानगम्य आत्मनि पूर्वापरसम्बन्धिविषये प्रत्यभिज्ञादर्शनात् सदावगत आत्मन्यपीति योजना।

अर्थापत्त्यन्तरमुद्भावयति—*मध्य इति* ॥ ज्ञानजन्या स्मृतिर्ज्ञानस्मृतिस्तस्या अभावादिति विग्रहः। पूर्वोत्तरकालयोरनुभूतस्य स्मरणान्मध्यवर्तिनश्चास्मरणान्मध्येऽनवगतिः, अन्यथा तत्रापि स्मरणं स्यादित्यर्थः। अनवगत्यभावेऽपि स्मृत्यभावसंभवशङ्कां व्यावर्तयितुं—*ज्ञानेति विशेषणम्* ॥ अवगत्यङ्गीकृतौ तद्विनाशे संस्कारस्यावश्यंभावात्तन्मूला स्मृतिः स्यात्, नच सेत्यनवगतिरित्यर्थः। अस्मरणमन्यथोपपन्नमित्याह—*नावगत इति* ॥ पथि पतितोपलब्धतृणादिवदस्मरणसंभव इत्यर्थः। अनुभूयमानमावरणं कथं युक्तितो निरस्यत इति शङ्कते—*तथापीति* ॥

पञ्चपादिकाविवरणम्

स्मृतिनियमाभावात्। तथाऽपि विषयानवगतिः प्रतीयत इति चेत्, सत्यं विषयैः सह साक्षिचैतन्येऽज्ञानाध्यासात्प्रतिभासः, नचाध्यस्तस्यावरणमस्ति ; द्विचन्द्रादिवत्प्रमाणगम्यत्वाभावात्। तस्मान्नास्त्यनात्मन्यावरणे प्रमाणम्। नच स्वयमेव प्रकाशहीनस्य जडस्यावरणार्थोऽपि सम्भवति। तस्मादतिशयाभावान्ना-

ऋजुविवरणम्

संबन्धश्चाकारकत्वेन, अतः प्रतीतिः कथमपह्नूयते युक्त्या? इति चोदयति—*तथापि विषयेति* ॥ अज्ञानविषययोस्संबन्धः प्रतीयते, स तु कार्यकारणलक्षण इत्याह—*सत्यं विषयैरिति*॥ अयं भावः*—परमार्थघटादीनां केवलसाक्षिवेद्यत्वं नास्ति ; संबन्धाभावात्, अतोऽज्ञानव्यावर्तकतया गृह्यमाणोऽज्ञानेन साक्षिचैतन्ये कल्पितः प्रतीयत इति। *ननु* अज्ञात एवेदानीं ज्ञात इति प्रमीयमाणेनैकतया प्रत्यभिज्ञायते, तत्कथं कल्पितत्वमिति ? रजतप्रत्यभिज्ञावदिति वदामः। *यद्वा*—परमार्थवस्तुन्यज्ञानव्यावर्तकाकारः कल्पितः प्रतीयते ; स्वरूपस्य साक्षिसंबन्धाभावात्, कल्पिताकारस्य तदात्मत्वात् प्रत्यभिज्ञाऽपि कथंचिद् घटते। *अथवा*—परमार्थमेव कल्पितसंबन्धात्प्रतीयते ; मुख्यसंबन्धाभावात्। भवतु कल्पितेऽप्यावरणमिति ? नेत्याह—*नचाध्यस्तस्येति* ॥ अयं भावः*—प्रमाणगम्यं हि वस्तु परमार्थत्वादप्रतीयमानमपि तिष्ठति, तदा कथंचिदावरणं कल्प्येताऽपि, साक्षिवेद्यस्य तु प्रतिभासमात्रविपरिवर्तित्वात् तस्य पूर्वोत्तरकालमनवस्थितस्यावरणयोगात् तदानीं प्रतीयमानत्वादेव नावरणम्। यदा परमार्थमेव कल्पितसंबन्धात्प्रतीयते, तदाऽपीयं प्रतीतिरप्रमाणभूता कथमावरणं गमयेत्? कथमप्रमाणत्वम्? प्रमाणसामग्रीबहिर्भावात्। *नच स्वयमेवेति* ॥ प्रकाशप्रसक्तौ सत्यां तत्प्रतिबन्धकावरणम्, तदत्र न संभवतीति भावः। यदि प्रतिबन्धो नास्ति, कथं तद्विषयत्वव्यपदेशः ?

तत्त्वदीपनम्

प्रतीतिमङ्गीकरोति—*सत्यमिति* ॥ तर्हि प्रतीत्यनुसारेण प्रत्येतव्यमप्याश्रीयतामित्याशङ्क्याह—*विषयैरिति* ॥ अर्थप्रतिपत्त्यप्रतिपत्त्योः प्रमाणेनानवगतेः प्रतिपत्तुमयोग्यत्वात्साक्षिणा स्वाध्यस्तानवगतिरनुभूयत इति न त्वदिष्टसिद्धिः। नच घटोऽज्ञात इत्यनुभवाऽनुपपत्तिः, लौहित्यमुखयोः स्फटिकाचलप्रतिबिम्बितयोः परस्परसंबन्धो यथा भासते 'लोहितं मुखमि'ति, तथाऽज्ञानानात्मनोरात्मन्यध्यासात् परस्परसंबन्धप्रतिभासोपपत्तिरित्यर्थः। मानत आवरणाप्रतिपत्तावपि साक्षितस्तत्प्रतिपत्तिसंभवादर्थोऽनवगत इति प्रतिपत्तेर्मुख्यत्वमित्याशङ्क्याह—*नचाध्यस्तस्येति* ॥

आवरणभङ्गमन्तरेणार्थप्रतिपत्त्ययोगात्तद्भङ्गो वक्तव्यः, स च किं प्रमाणात्? उत साक्षिणः ? नाद्य इत्याह—*द्विचन्द्रादिवदिति* ॥ न द्वितीयः ; साक्ष्यधीनसिद्धितया तन्निवर्त्यत्वायोगादित्यर्थः। मानासंभवसमर्थनमुपसंहरति— *तस्मादिति* ॥ अर्थानुपपत्तेरित्येतत्प्रपञ्चयति—*नचेति* ॥ निष्पादितक्रिये कर्मण्यविशेषाऽऽधायिनः साधनस्य साधनन्यायातिपातन्यायादावृतरूपेऽनात्मन्यज्ञानमावरणलक्षणमतिशयं कथमादध्यादित्यभिप्रायः ॥

विषयलक्षणविधुरतामुपपाद्याविषयत्वमुपसंहरति—*तस्मादिति*॥ विमतम्, नाज्ञानविषयः, तज्जनितातिशया-

भाष्यभावप्रकाशिका

स इत्यैक्यप्रमां प्रत्याह—*विविक्तयोर्धर्मधर्मिणोरिति* ॥ औपाधिकभेदाभासतिरस्कारेण प्रत्यभिज्ञायामैक्यं प्रमीयते ; विविक्तयोर्धर्मिणोर्विवेकं तिरस्कृत्यैक्यधीर्भ्रान्तिरित्यर्थः। प्रत्यभिज्ञानेऽपि कालद्वयवैशिष्ट्यादस्ति विविक्ततेति, विविक्तपदस्यातद्व्यावर्तकत्वमाशङ्क्याह—*अत्यन्तेति* ॥

आत्मनो बुद्ध्यादेः स्वच्छत्वादिना साम्यादत्यन्तविवेकासिद्धिमाशङ्क्य जडत्वाजडत्वयोरत्यन्तविवेकाद्धर्मिणोऽपि तदसिद्धिरित्याह—*अत्यन्तविविक्तयोर्धर्मधर्मिणोरिति* ॥ उक्तरूपयोर्धर्मधर्मिणोरन्योन्यस्मिन्नन्योन्यात्मतारूप इतरेतराविवेकात्मकोऽध्यास इति समुदायार्थः ॥

पञ्चपादिका

सा च न जडेषु वस्तुषु तत्स्वरूपावभासं प्रतिबध्नाति ; प्रमाणवैकल्यादेव तदग्रहणसिद्धेः, रजतप्रति-

पञ्चपादिकाविवरणम्

ज्ञानविषयोऽनात्मेति, तत्राह—*सा च न जडेषु वस्तुषु तत्स्वरूपावभासं प्रतिबध्नातीति* ॥ किंत्वन्यदेवाना-त्मन्यतिशयकार्यं कृत्वा तद्विषयमज्ञानमिति वक्ष्यत इत्यभिप्रायः । तत्र हेतुः—*प्रमाणवैकल्यादेवेति* ॥ अथवा चैतन्यप्रकाशेन जडानां नित्यवदन्वयान्नित्यवत्प्रकाशे प्राप्ते, सम्भवत्येवानात्मस्वावरणकृत्यमित्याशङ्क्याह—*प्रमाणवैकल्यादेवेति* ॥ अनात्मप्रमाणस्य चैतन्यस्य वैकल्यादावरणादेव विषयानवगतिसिद्धेर्न विषये पृथगावरणं कल्पनीयमित्यर्थः । इतश्च नानात्मन्यावरणमित्याह—*रजतप्रतिभासादिति* ॥ यद्यात्माश्रय-

ऋजुविवरणम्

इत्याशङ्क्याभिप्रायमाह—*किन्त्वन्यदेवेति* ॥ "तत्र हेतुरि"ति स्पष्टोऽप्यवतारितस्तस्यार्थान्तरं दर्शयितुम् । *प्रमाण-वैकल्यादिति* ॥ चैतन्यस्यानुदयादित्यर्थः । कथमस्मिन् पक्षे प्रमाणवैकल्यमुच्यते ? जन्यप्रमाणस्याभासकत्वेन चोदितत्वात् तस्य च वैकल्यायोगादित्याशङ्क्य व्याचष्टे—*अनात्मप्रमाणस्येति* ॥ *ननु* एवं परस्परव्याहतिः स्यात् ; पूर्वग्रन्थे ह्यावरणं नास्तीत्युक्तम्, अत्र तदङ्गीकृतम् ; प्रमाणप्रतिबन्धाङ्गीकारात्तस्यैव चावरणत्वादित्या-शङ्क्याह—*न विषये पृथगावरणमिति* ॥ स्वरूपप्रतिबन्धः पूर्वं निराकृतः, न प्रमाणप्रतिबन्धः, इदानीं प्रमाण-प्रतिबन्धोऽङ्गीकृत इति न विरोधः ।

एतेन चानुमानेऽपि यदुक्तं दूषणं परैः । प्रमाणमात्रपक्षत्वं ब्रह्मज्ञानस्य वेष्यते ॥
पूर्वस्मिन् बाधितार्थत्वं साधारण्यं तथोत्तरे । प्रमाणाऽऽवरणेनैव प्रमेयोऽप्यावृतो यतः ॥
तेनात्रोभयपक्षत्वे न कार्या दूषणे मतिः । संभावनैव हेतोर्नो दृष्टिसृष्टिसमाश्रया ॥ इति ।

"रजतप्रतिभासादि"त्यनेन किं साध्यते ? न तावद्विषय आवरणनिराकरणम् ; साधकहेतूपन्यासाभावात् । नहि रजतप्रतिभासात्प्रागूर्ध्वमप्यविद्यायां स्थितायां मध्येऽवभासोऽनावरणं साधयति ; भिन्नकालत्वेनाविरोधात् । नाप्यर्था-

तत्त्वदीपनम्

नाधारत्वात् ; व्यतिरेकेणाऽऽत्मवदित्युक्ते सिद्धसाधनमेतदित्याह—*तत्राहेति* ॥ तच्च तत् स्वरूपं चेति तत्स्वरूपम्, तस्यावभासस्तथोक्तस्तमिति विग्रहः । अज्ञानात्मकं यत्स्वरूपमनात्मवस्तु तस्यावभासमविद्या न प्रतिबध्नाति । तत्र हेतुमाह—*जडेष्विति* ॥ अचिद्रूपत्वेन तत्र प्रकाशाप्रसक्तेर्न तत्प्रतिबन्ध इत्यर्थः । चशब्दोऽवधारणार्थः—नैव प्रतिबध्नातीति । कथं तर्ह्यनात्मविषयत्वं निर्दिष्टमिति शङ्कते—*किंत्विति* ॥ आवरणानाधानेऽप्यज्ञा-नस्य विक्षेपहेतुत्वादनात्मविषयत्वं युक्तमित्याह—*अन्यदेवेति* ॥ रूपान्तरावभासहेतुरित्यत्र वक्ष्यत इत्यर्थः । अनात्मनः स्वत आवृतस्वरूपत्वे संप्रत्यज्ञात इति व्यवहारानुपपत्तेरज्ञातत्वमन्यनिमित्तं वक्तव्यमित्याशङ्क्यान्यथोप-पत्तेर्मैवमित्याह—*तत्रेति* ॥ अनात्मविषयान्तःकरणपरिणामानुदयलक्षणवैकल्यादित्यर्थः । शङ्कान्तरनिरासपरो वाऽयं ग्रन्थ इत्याह—*अथवेति* ॥ किं तच्छङ्कान्तरम् ? तत्राह—*चैतन्येति* ॥ स्वतः प्रकाशाप्रसक्तावपि नित्यचैतन्यसान्निध्यात् प्रकाशप्रतिबन्धलक्षणकृत्यसंभवात्कथं नाज्ञानविषयत्वमित्यर्थः ॥

"प्रमाणवैकल्यादि"त्यत्र प्रमाणशब्देन किं वृत्तिज्ञानं विवक्षितम् ? उतात्मस्वरूपम् ? आद्ये प्रश्नप्रतिवचनयोर्व्य-धिकरणता, द्वितीये तस्यानित्यत्वेन वैकल्यादित्यसंगतमित्याशङ्क्याह—*अनात्मेति* ॥ *प्रमाणस्य = साधकस्येति यावत् । चैतन्यस्य नित्यत्वेन वैकल्यानुपपत्तिमुक्तां धुनीते—*आवरणादिति* ॥ अनावृतचैतन्यस्य विषयसाधक-त्वात्तदावरणाद्विषयानवगत्युपपत्तेर्न पृथगावरणकल्पनमित्यर्थः ॥

टीकागतचशब्दार्थमाह—*इतश्चेति* ॥ आत्मावरकाज्ञाने सत्यपि तत्प्रतिपत्तिवदनात्मावरकाज्ञानमिति मतेऽपि

पञ्चपादिका

भासात् प्रागूर्ध्वं च सत्यामपि तस्यां स्वरूपग्रहणदर्शनात्, अतस्तत्र रूपान्तरावभासहेतुरेव केवलम्।

पञ्चपादिकाविवरणम्

मज्ञानमनात्मावरणं स्यात्, तदा, आवरणविनाशमन्तरेण विषयावभासायोगाद्विषयज्ञानेनात्माज्ञानं निवर्तेत। अतः सत्यामेवात्मन्यविद्यायां त्रिष्वपि कालेषु विषयस्वरूपप्रतिभासदर्शनान्नानात्मावरणमज्ञानमिति भावः।

ऋजुविवरणम्

न्तरम्, तस्याः प्रतीतेरसङ्गतत्वप्रसङ्गाच्च, अतो व्यर्थेत्याशङ्क्याह—*इतश्च नानात्मनीति॥ *ननु*नानेनावरणं निराक्रियते; नहि रजतप्रतिभासात्प्रागूर्ध्वमज्ञानस्थितिमात्रं विषयावभासविरोधि, येन तद्दर्शनादनावरणं निश्चीयते, तथा प्रागूर्ध्वग्रहण-मप्यप्रयोजकम्; प्रागूर्ध्वं विरोधितमसा छन्ने घटे मध्येऽवभासदर्शनात, किमुताविरोधिनोऽज्ञानस्य? यत्र क्वापि स्थितौ प्रतीतिः संभवेदिति कथंचिदेवं वक्तुं युक्तम्; "सत्यामपि तस्यामि"ति स्थितिमात्रेणैव कथंचिद्विरोधस्य शङ्कितुं शक्यत्वात्, तथा "सत्यामपि तस्यामि"ति किमुच्यत इति न ज्ञायते। न तावदात्मनि सत्यामिति विवक्षितम्; व्यधिकरणत्वापत्तेः, न ह्यन्यत्र स्थितौ रजतावभासोऽनावरणसाधकः। नापि रजते सत्यामपीति विवक्षितम्; प्रागूर्ध्वं तत्र स्थितायामप्यविद्यायां मध्येऽवभाससंभवादनावरणासाधकत्वात्। "स्वरूपग्रहणदर्शनादि"ति च न ज्ञायते—किमत्र स्वरूपं विवक्षितमिति? अतो नानावरणगमकः, इत्याशङ्क्याभिप्रायमाह—*यद्यात्माश्रयमित्यतः सत्यामित्यन्तेन*॥ पदव्याख्या *सत्यामपीति*॥ सत्यामेवात्मनीति। *तस्यामिति* व्याचष्टे—*अविद्यायामिति*॥ प्रागूर्ध्वग्रहणमुपलक्षणमिति दर्शयति—*त्रिष्वपि कालेष्विति॥ "स्वरूपग्रहणे"ति व्याचष्टे—*विषयस्वरूपेति॥

तत्त्वदीपनम्

तत्प्रतीतिः किं न स्यात्? इत्याशङ्क्याऽस्मन्मते यदावृतं यत्र प्रतिभाति, तत् तत्रावृतमिति युज्यते, त्वन्मते तु न तथा; अनात्मप्रथायामप्यज्ञानस्य तदावरकत्वादित्याह—*यद्यात्मेति*॥ अस्त्वज्ञाननिवृत्तिः, को दोष इति चेत्? तत्र वक्तव्यम्—किमनात्मावरकमज्ञानमेकम्? उत नानेति? तत्राद्यं दूषयति—*अतः सत्यामेवेति*॥ त्रिष्वपि कालेष्वात्मन्यविद्यायां सत्यामेव विषयप्रतिभासदर्शनान्नाज्ञाननिवृत्तिर्युक्तेति योजना। रजतप्रतिभासात् प्राक्कारणत्वेन तत्समये तत्स्थितिहेतुत्वेनोत्तरत्र विपर्ययान्तरजनकत्वेनेति त्रिकालवर्तित्वमविद्याया इति न विषयज्ञाना-

वार्तिकम्

तथात्वोपलब्धेः। अनिर्वचनीयपक्षाङ्गीकारे चास्मन्मतप्रवेशः; तस्मान्नास्मन्मतसाम्येन प्रत्यवस्थानं निर्वचना-भिमानिनस्तवोचितमिति। अथ—यथा 'सुरभि चन्दनम्' इति चाक्षुषविशिष्टज्ञाने सौरभेण न चक्षुषः संयुक्त-समवायः सन्निकर्षः; अयोग्यत्वात्, तेन तस्य तद्ग्रहानुपपत्तेः, योग्यत्वे वा तेन रसादिग्रहस्यापि प्रसङ्गात्, अतो लौकिकसन्निकर्षाभावाद् ज्ञानं सन्निधिर्वाच्यः; तथाच तत्र सौरभांशेऽलौकिकत्वेऽपि चन्दनांशे लौकिक-त्वात् तदभेदस्तद्देशेऽपीति लौकिकवद् भासते, एवं प्रकृतेऽपि भविष्यतीति—चेत्, *न*; दृष्टान्तासिद्धेः। *तथाहि*—किं घ्राणचक्षुर्भ्यां संयुक्ते सुरभिचन्दने 'सुरभि चन्दनम्' इति चाक्षुषज्ञाने सौरभांशे ज्ञान-प्रत्यासत्तिरङ्गीक्रियते? किं वा चक्षुर्मात्रसंयुक्ते? नाद्यः; उभयेन्द्रियसन्निकर्षाभ्यां विशिष्टैकज्ञानसंभवात्। नच—एकज्ञानस्योभयेन्द्रियजन्यत्वे चाक्षुषत्वघ्रातित्वाभ्यां जातिसाङ्कर्यं स्यादिति—वाच्यम्; तयोरुपा-धित्वेन भूतत्व-मूर्तत्ववत् साङ्कर्यस्यादोषत्वात्, अनुपाधित्वेऽपि यद् यदिन्द्रियसन्निकृष्टविशेष्यकं ज्ञानम्, यदिन्द्रियविशेष्यसन्निकर्षजन्यं वा तत्तदिन्द्रियप्रयुक्तजातिमदिति नियमादेकजातस्यैवोपपत्तेस्तत्साङ्क-र्याभावात। तेन यदा 'सुरभि चन्दनम्' इति ज्ञानमुत्पद्यते, तदा चाक्षुषमेव तत्; विशेष्यचन्दन-चक्षुः

पञ्चपादिकाविवरणम्

ननु—शुक्तिकाविषयमज्ञानमन्यदेव, तज्ज्ञानात्तन्निवर्तते, अन्यच्चात्मविषयमज्ञानमात्मनि दृश्यमानमिति, *तन्न*; आत्माश्रयमात्मविषयं चाज्ञानमन्तरेणानात्मसु प्रतिविषयं भावरूपाज्ञानसद्भावे प्रमाणाभावात्, विषयाग्रहणस्य प्रमाणवैकल्यादप्युपपत्तेः। *किं च तर्ह्यतिशयमज्ञानजन्यमाश्रित्य बाह्याध्यात्मिकेषु वस्तुष्वनात्मविषयमज्ञानं दर्शितमिति? तदाह—*अतस्तत्र रूपान्तरावभासहेतुरेव केवलमिति* ॥

तत्त्वदीपनम्

न्निवृत्तिर्युक्तेत्यर्थः। अत इत्येतन्नानात्मावरणमित्यनेन संबध्यते। द्वितीयमनुवदति—*ननु शुक्तिकेति* ॥ अन्यदेवेत्यत्रान्यदेवेति वीप्सा द्रष्टव्या। अतश्च ज्ञानेनाऽऽवरणभङ्गे विषयप्रतिभासः, अविद्यान्तरात्तु विपर्ययान्तरोदयश्चाऽविरुद्ध इत्यर्थः। नचाऽऽवरणनिवृत्तौ शुक्तिप्रतिपत्तिवदात्मतत्त्वप्रतिपत्तिरपि स्यादित्यपि शङ्क्यमित्याह—*अन्यच्चेति* ॥ कल्पनागौरवप्रसङ्गान्नेयं कल्पना शोभां बिभर्तीत्याह—*तन्नेति* ॥ विषयाग्रहणव्यवहारानुपपत्त्या तत्राप्यावरणकल्पनमित्याशङ्क्याह—*विषयेति* ॥ वृत्त्यनुदयाच्चैतन्याऽऽवरणाच्च विषयाग्रहणोपपत्तिरित्यर्थः ॥

अनात्मनोऽज्ञानविषयत्वं निराकुर्वतः पूर्वापरपराहतिः स्यादिति शङ्कते—*किं च तर्हीति* ॥ अज्ञानस्य तत्रातिशयान्तरजनकत्वात्तद्विषयत्वाभिधानं युक्तमित्याह—*तदाहेति* ॥ शुक्त्यज्ञानस्य तदनाच्छादकत्वेऽपि कथं रूपान्तरावभासजनकत्वमिति चेत्, तत्र वक्तव्यम्—किमनाच्छादकत्वाद्विपर्ययजनकत्वाभावः साध्यते? आहो विपर्ययहेतुत्वं तदाच्छादकत्वमिति, तत्राऽऽद्यं निराकरोति—*हेतुरेवेति* ॥ शुक्त्यज्ञानस्य तदनाच्छादकत्वेऽपि विपर्ययहेतुत्वं घटते, शुक्त्यवच्छिन्नचैतन्यस्याऽऽवरकत्वाच्छुक्त्यवच्छिन्नचैतन्यविषयप्रमाणोदयेनाऽऽवरणे निवृत्ते विपर्ययनिवृत्तिप्रसिद्धेः। अतस्तदावरणेन विपर्ययजनकत्वं युक्तमित्यर्थः। विमतम्, शुक्त्याच्छादकम्, तत्र विक्षेपहेतुत्वात्; यो यत्र विक्षेपहेतुः, स तदाच्छादकः, यथा चैतन्यस्येत्याशङ्क्य परिहरति—*केवलमिति* ॥ आच्छादकत्वाभावेऽप्युक्तविधया विपर्ययजनकत्वोपपत्तेरप्रयोजको हेतुरित्यर्थः ॥

वार्तिकम्

सन्निकर्षजन्यत्वात्, यदा तु चन्दने सौरभमिति, तदा घ्रातिरेव; विशेष्यसौरभ-घ्राणेन्द्रियसन्निकर्षजन्यत्वात्। एतेन—'मधुरो गुडः' 'गुडे माधुर्यम्' इत्यादिप्रत्यया अपि—व्याख्याताः॥ उक्तक्रमेण तेषां त्वाचत्व-रासनत्वादिसंभवात्। द्वितीयेऽपि तस्मिँश्चन्दनखण्डे पूर्वं चन्दनमुपलब्धम्? न वा? तत्राद्ये 'तदेवेदं सुरभि चन्दनमि'ति प्रत्यभिज्ञैव तत्र जायते; तथानुभवात्, न 'सुरभि चन्दनम्' इत्यभिज्ञा; तथानुभवाभावात्, न द्वितीयः; तत्र सौरभस्यानुपलब्धेश्चन्दनत्वचाक्षुषत्वानुपपत्तेः। नहि चन्दनत्वमाकृतिव्यङ्ग्यम्, किं तर्हि? ब्राह्मणत्वादिवद् यस्मिन् घ्राणसंयुक्त ईदृक् सौरभमुपलभ्यते, तत्तद्योग्यचन्दनमित्युपदेशव्यङ्ग्यम्। नच 'तद्योग्यम्' इत्युपदेशविशेषणं सौरभोपलम्भमात्रम्, न तत् प्रमामात्रम्; असौरभे चन्दने सौरभभ्रान्त्या चन्दनत्व-चाक्षुषत्वाव्याप्तेः। एवं च सति यत्राचन्दने तादृशसौरभ-

भाष्यभावप्रकाशिका

"अन्योन्यधर्मांश्चे"ति पृथग् धर्माध्यासकथनं विनाऽपि धर्म्यध्यासं केवलं धर्माणामपि—'अन्धोऽहमि'त्यादौ धर्माध्यासप्राधान्यसूचनार्थम्। * ननु * इतरेतराविवेकार्थं द्वयोः स्वरूपतिरस्कारे कथमन्योन्यस्मिन्निति लक्षणांशसिद्धिः? तत्सिद्धये द्वयोः स्वरूपस्थितौ कथमविवेकेनोपपत्तिः? अत आह—*सत्येति* ॥ सत्यमनिदं चैतन्यम्; संसृष्टरूपेणाध्यस्तत्वेऽपि स्वरूपेणानध्यस्तत्वात्। अनृतमहङ्कारादि; स्वरूपतोऽप्यध्यस्तत्वात्। तदुभयमिथुनीकरणरूपोऽध्यास इति यावत्। असत्य-

पञ्चपादिकाविवरणम्

ननु अत्राप्यनुपपत्तिः समाना,कथम् ? शुक्तिकाज्ञानं हि रूपान्तरावभासं निवर्तयत्तदुपादानमज्ञानमपि निवर्तयतीति ते मतम् ,तत्र कथं शुक्तिकाज्ञानात्सहाज्ञानेनाध्यासे निवर्त्यमाने पुनरात्मन्यज्ञानं दृश्यते ? अतः प्रतिविषयमज्ञानभेदः, अध्यासस्याज्ञानानुपादानत्वं वा, उपादाननिवृत्तिमन्तरेणाध्यासनिवृत्तिर्वा समाश्रयणीयेति, *उच्यते* ; अस्मिन्पक्षे शुक्तिकादिज्ञानेन रजताद्यध्यासानां स्वकारणे प्रविलयमात्रं क्रियते,मुसलप्रहारेणेव घटस्य । अथवा—मूलाज्ञानस्यैवावस्थाभेदा रजताद्युपादानानि शुक्तिकादिज्ञानैस्सहाध्यासेन निवर्तन्त इति कल्प्यताम् ।

ऋजुविवरणम्

नन्वत्रापीति ॥ आत्माश्रयाज्ञानमेकमेव, तच्च जडे विक्षेपमात्रं करोति, नावरणमित्यस्मिन्नपि पक्ष आत्मन्यज्ञानदर्शनानुपपत्तिस्तुल्यैव ; विक्षेपनिवर्तनेन तदुपादानस्याज्ञानस्य निवृत्तेरिति भावः । *ननु* विक्षेपपक्षे विषयज्ञानेन तद्गतरूपान्तरं निवर्त्यते, नत्वज्ञानम् ; तस्यावारकत्वाभावेनाविरोधात्, अतः कथमात्मन्यज्ञानदर्शनानुपपत्तिः ? इत्याक्षिपति—*कथमिति* ॥ यद्यप्यावारकत्वं नास्ति ; तथाऽपि भ्रान्तिनिवर्तकस्य तदुपादाननिवृत्त्या निवर्तकत्वमिति परिहरति—*शुक्तिकाज्ञानं हीति* ॥ कथं प्रतिविषयमज्ञानकल्पना ? आत्माज्ञानव्यतिरेकेण प्रतिविषयं भेदे प्रमाणाभावादिति, तत्राह—*अध्यासस्येति* । *ननु*अज्ञानानुपादानत्वमपि न संभवति ; स्वतः शुद्धचैतन्ये बन्धसंबन्धायोगात्, ज्ञाननिवर्त्यत्वायोगाच्चेत्याशङ्क्याह—*उपादाननिवृत्तिमन्तरेणेति* ॥ अस्मिन्न पक्ष इति* ॥ एकमेवाज्ञानमित्यभ्युपगम इत्यर्थः । *ननु* ज्ञानस्याज्ञानेन सह विरोधो दृष्टः ; न तत्कार्येण, अतः कथं तन्मात्रनिवृत्तिः? इत्यपरितोषात् पक्षान्तरमाह—*अथवा मूलाज्ञानस्यैवेति* । *ननु* आत्माज्ञानव्यतिरेकेणाज्ञानान्तरसद्भावे प्रमाणं नास्तीत्युक्तमित्याशङ्क्याह—*अवस्थाभेदा इति* ॥ *ननु* अवस्थभेदाभ्युपगमे तस्य शुक्तिज्ञानेन निवृत्तावनन्तरं भ्रान्तिर्न स्यात्, *मैवम्* ; अवस्थाऽऽनन्त्यात् । *ननु* समानाश्रयसमानविषयत्वेन विरोधसाम्यादेकेन ज्ञानेन सर्वावस्थानिवृत्तिः स्यात्, *मैवम्* ; अवस्थायौगपद्याभावात् । *ननु* तर्हि

तत्त्वदीपनम्

आत्माऽऽवरकमज्ञानमनात्मनि विक्षेपं जनयतीत्युक्तम्, तदाक्षिपति—*नन्वत्रापीति* ॥ अनात्मावरकत्वानङ्गीकारात् कथमनुपपत्तिसाम्यमिति शङ्कते—*कथमिति* ॥ पूर्वोक्तानुपपत्त्यभावेऽप्यनुपपत्त्यन्तरं दर्शयितुमद्वैतमतं दर्शयति—*शुक्तिकाज्ञानमिति* ॥ अस्तु को दोष इति ? तत्राह—*तत्रेति* ॥ अज्ञानस्यानुभूयमानत्वात कथं तत्प्रतिक्षेप इत्याशङ्क्याह—*अथेति* ॥ एकाज्ञानवादे तन्निवृत्तावज्ञानान्तराननुभवप्रसङ्गोऽतःशब्दार्थः । कल्पनागौरवप्रसङ्गान्न भेदकल्पनेत्याशङ्क्याह—*अध्यासस्येति* ॥ मिथ्याभूतस्य तस्योपादानतानुपपत्तेर्नायं पक्षः साधुरित्याशङ्क्याह—*उपादानेति* ॥ ज्ञानेनाज्ञाननिवृत्त्यनिवृत्त्योरपि नानुपपत्तिरित्याह—*उच्यत इति । अनिवृत्तौ तावद्दोषाभावमाह—*अस्मिन्पक्ष इति* ॥

तर्हि सविलासाज्ञाननिवृत्तेर्बाधकत्वं कथं घटते ? इत्याशङ्क्य पक्षान्तरमाह—*अथवेति* ॥ "मायां तु प्रकृतिं विद्यादि"त्यादिवाक्यात् कल्पनालाघवानुगृहीतान्मूलाज्ञानमेकमेष्टव्यम्, तस्य चानन्ता अवस्थाः कल्प्यन्ते व्यवहारनिर्वाहाय । तत्र च कारणत्रितयानुरोधेन काचिदवस्था रजताद्याकारेण विवर्तते, तस्यां चाधिष्ठानतत्त्वसाक्षात्कारान्निवृत्तायां विपर्यासनिवृत्तिरिति न किंचनावद्यमिति द्रष्टव्यम् ॥

भाष्यभावप्रकाशिका

सर्पस्य सत्यरज्ज्वां तन्मात्रतया निमज्जनवदसत्याहङ्कारादेः सत्यचिन्मात्रतया निमज्जनादेकत्वधीः ; सत्यासत्ययोरात्मानात्मनोस्तर्कतो विविच्यमानत्वादन्योन्यस्मिन्निति लक्षणांशः संभवतीति भावः ।

पञ्चपादिकाविवरणम्

कथं पुनर्लोके सहाज्ञानेनाध्यासस्य तत्त्वज्ञानान्निवृत्तेरप्रतिपत्तौ ब्रह्मज्ञानात्सहाज्ञानेनाध्यासस्य निवृत्तिर्दृष्टद्वारेण कल्प्यत इति ? नैष दोषः ; तत्त्वावभासविरोधिनोऽग्रहण-मिथ्याज्ञानादेस्तत्त्वज्ञानेन निवृत्तिदर्शनादिहापि तत्त्वावभासविरोधितयैव भावरूपाज्ञानादेः कल्प्यमानत्वात् तस्य ब्रह्मज्ञानान्निवृत्तेरुपपत्तेः । नचावरणपक्षोक्तदोष-

ऋजुविवरणम्

कथमवस्थान्तरमुच्यते ? पूर्वावस्था हि यावद्बाधमनुवर्तमाना विरोधिबाधकज्ञानेन निवर्तमाना संस्कारमुत्पाद्य निवर्तते, तत्संस्कारसहकृतमज्ञानमवस्थान्तरमुत्पादयति, तच्च यावद्बाधमनुवर्तते इत्यानन्त्यात्, अथवा मुक्ताज्ञानस्य तत्तद्व्यावृत्तता तत्तदज्ञानमित्युच्यते, तद्रूपस्यैव विक्षेपजनकत्वात् ; सा च तज्ज्ञानेन निवर्तमाना संस्कारमुत्पाद्य निवर्तते, संस्कारश्चाज्ञानस्य पुनस्तद्व्यावृत्ततां करोति, एवमुत्तरोत्तरभ्रमसिद्धिः । केचित्—अज्ञानवदवस्थानामनादित्वम्—आहुः, तदसत् ; तथासत्येकेन तत्त्वज्ञानेन सर्वावस्थानिवृत्तिः स्यात् ; एकविषयत्वात् । *ननु*—अनादित्वे विषयस्य युगपत्सर्वावस्थाविषयत्वं नास्तीति, किंचैकैकक्षणवच्छिन्नस्यैकैकावस्थाविषयत्वं कल्प्यते ; तावतैव कार्यसिद्धेः, तथासति यद्यत्क्षणवच्छिन्नविषयमज्ञानम्, तत्तत्क्षणवच्छिन्नविषयज्ञानेन निवर्तते ; अतो न सर्वनिवृत्तिः, *मैवम्* ; यत्क्षणे ज्ञानं नास्ति, तत्क्षणवच्छिन्नविषयाज्ञानकल्पना सर्वथा निष्प्रयोजनैव ; तथा बाधकज्ञानेन रजतोपादानाज्ञानानिवृत्तिप्रसङ्गः ; भिन्नविषयत्वात्तयोः । विस्तरभयादपरं नोक्तम् । रजताध्यासमात्रनिवृत्तिपक्षे चोदयति—*कथं पुनर्लोके इति ॥ दृष्टद्वारेणेति* ॥ *अयमर्थः*—शास्त्रतोऽज्ञानस्य बन्धनिवर्तकत्वेऽवगते विज्ञानमज्ञानस्यैव निवर्तकमिति व्याप्तिबलादज्ञानहेतुकत्वं कर्तृत्वादेर्निवृत्तिसिद्ध्यर्थमङ्गीकृतम्, यदा तु कार्यमात्रस्यैव लोके निवृत्तिः, तदा ब्रह्मज्ञानादपि कार्यमात्रनिवृत्तिर्भवेत्, न कारणनिवृत्तिः ; तस्या लोकेऽदर्शनात्, लोकव्याप्तिमूलत्वात् तस्येति ॥ *ननु* जडे विक्षेपोऽपि कथमङ्गीक्रियते ? आवरणपक्षदूषणसाम्यात् । *तथाहि*—ज्ञाते विषये विक्षेपो निश्चीयते ? अज्ञाते वा ? न ज्ञाते विक्षेपः ; निवृत्तेः नाज्ञाते ; 'अत्र विक्षेपः' इत्यवगमायोगादित्याशङ्क्याह—*नचावरणपक्षोक्तेति* ॥ रजतस्वरूपभ्रान्तिज्ञानमिदमाकाराति-

तत्त्वदीपनम्

उपादाननिवृत्तिमन्तरेणोपादेयनिवृत्तिपक्षेऽनिर्मोक्षप्रसङ्ग इति चोदयति—*कथं पुनरिति* ॥ नच—ज्ञानादज्ञाननिवृत्त्यदृष्टावपि "तरत्यविद्यां विततम्" इत्यादिवाक्याद् ज्ञानादज्ञाननिवृत्तिरिति—वाच्यम् ; शास्त्रस्यापि दृष्टानुसारेणाज्ञाननिवृत्तिबोधकतानभ्युपगमादित्यभिप्रायेणाह—*दृष्टद्वारेणेति* ॥ ज्ञानस्य विरोधिनिवर्तकतया लोके दृष्टत्वादज्ञानस्यापि ज्ञानविरुद्धत्वात्तन्निवर्त्यता घटत इत्याह—*नैष इति* ॥ नीलार्थप्रतिपत्त्यप्रतिपत्त्योस्तत्रावरणस्य दुरधिगमत्ववद् विक्षेपस्यापि दुरधिगमत्वम् ; अधिष्ठाने प्रतिपन्ने विपर्ययस्यैवाभावात्, अनधिगते न तत्र विक्षेपाधिगतिरित्याशङ्क्याह—*नचाऽऽवरणेति* ॥ अधिष्ठानसामान्याऽऽकारसंवलिततया रूपान्तरं भ्रान्त्याऽधिगम्यते, तद्विशेषबोधस्य भ्रमविरोधित्वादिति कुत आवरणपक्षोक्तदोषप्रसङ्ग इत्यर्थः ॥

वार्तिकम्

भ्रान्त्या चन्द्रतत्त्वभ्रान्तिः, तत्रोक्तोपदेशस्यातिव्याप्तिः स्यात् ; अतस्तन्मा भूदिति तद्योग्यमिति विशेषणस्य

भाष्यभावप्रकाशिका

किं पुनरध्यासस्य कारणमित्याशङ्क्य—निमित्तमात्रम्, उपादानम्, निमित्तविशेषो वा पृच्छ्यत इति विकल्प्याद्यौ प्रत्याह—*मिथ्येति* ॥ *मिथ्याऽज्ञानमिति* कर्मधारयसमासः । मिथ्या च तदज्ञानम्, तन्निमित्तमुपादानं यस्येति विग्रहः । तत्र मिथ्येत्युक्ते भ्रान्तिज्ञानमिति शङ्का स्यात्,

पञ्चपादिकाविवरणम

प्रसङ्गः ; विषयव्यावृत्तरूपान्तरस्य भ्रान्तिज्ञानेनावगमात् । *ननु* एवमप्यात्मन्यप्यज्ञाननिमित्तमावरणकृत्यं नास्ति, कथम् ? न तावदावरणं प्रकाशविलोपः ; स्वरूपस्यानपायात्, नापि सत एव प्रकाशस्य कार्यप्रतिबन्धः ; ज्ञानस्य विषयावभासात्मनोदितस्य स्वकार्ये प्रतिबन्धप्रतीक्षयोरभावात्, तस्माद् नैवात्मन्यपि भावरूपमज्ञानम् ;

ऋजुविवरणम्

रिक्तं प्रतीयते, विक्षेपरूपं तु बाधकज्ञाने प्रतीयत इति भावः । यद्यपि जडे विक्षेप एव नावरणम्, तत्र च दूषणाभावः, विषयत्वव्यपदेशोऽपि घटते ; तथाच सति आत्मन्यपि नावरणमिति चोदयति—*नन्वेवमपीति* ॥ अज्ञानं निमित्तं यस्याऽऽवरणस्य तदज्ञाननिमित्तम् । यद्वा—अज्ञाने निमित्तम्, अज्ञाननिमित्तम्, आवरणमेव कृत्यम्, आवरणकृत्यम् । *अयमर्थः* —आत्मन्यावरणाभावे विक्षेपाभावः, विक्षेपाभावे चाज्ञानाभावः, अज्ञानाभावे च विषये विक्षेपोऽपि न स्यादिति ॥ *ननु* जडे प्रकाशप्रसक्त्यभावाच्चैतन्यप्रतिबन्धाच्चाप्रतिभाससंभवान्नावरणम्, आत्मनि तु चिद्रूपत्वेन सर्वदा प्रकाशप्रसक्तावनवभासनिमित्तमावरणं संभवत्येवेत्याक्षिपति—*कथमिति* । *प्रतीक्षेति* ॥ *अयमर्थः*—उत्पन्नस्य कार्योत्पादनसमर्थस्याऽप्यन्यापक्षया कार्यकरत्वं प्रतीक्षा । सा न ज्ञाने संभवतीति ॥ *तस्माद् नैवात्मन्यपीति* ॥ आवरणेना-

तत्त्वदीपनम्

अनात्मवदात्मनोऽज्ञानविषयत्वानुपपत्तिस्तज्जनितातिशयानिरूपणादिति शङ्कते—*नन्वेवमिति* । अज्ञानैक्येऽपीत्यर्थः । अनात्माऽऽवरणं विना तत्र विक्षेपसंभवेऽपीति वा । अज्ञानं निमित्तं यस्य तदज्ञाननिमित्तम् । आवरणं च तत्कृत्यं चेत्यावरणकृत्यम् । *ननु* आत्मनि प्रकाशाप्रसक्त्याऽऽवरणानुपपत्तावप्यात्मनि स्फुरद्रूप आवरणं संभवतीति चोदयति—*कथमिति* ॥ तत्र वक्तव्यम्—किमावरणं प्रकाशनाशः ? उत तत्कार्यप्रतिबन्धः ? इति । तत्राऽऽद्यं दूषयति—*न तावदिति* ॥ "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति स्वरूपानपायप्रतिपत्तेः स्वरूपविनाश आत्मनोऽपि विनाशप्रसङ्गाच्च नाऽऽद्यः पक्षो युक्त इत्यर्थः । द्वितीयं निरस्यति—*नापीति* ॥ विषयस्य स्फुरणं कार्यम्, विषयावभासात्मनोत्पन्नत्वान्न तत्प्रतिबन्धुं शक्यत इत्यर्थः । नयनादिकारकाणां सहकारिप्रतीक्षया कार्यकरत्ववद् ज्ञानस्यापि कार्यजनने कारकत्वात्सहकार्यपेक्षा, ततश्च प्रतिबन्धसम्भव इति शङ्कां व्यावर्तयति—*प्रतीक्षेति* ॥ ज्ञानस्य कारकत्वे सहकार्यपेक्षा, तदेवासिद्धम्, कार्यं कुर्वाणं कारकमित्युच्यते, न चेदमर्थाश्रयमतिशयमादधाति ; प्रध्वस्तादिषु तदसम्भवादित्यर्थः । आवरणासम्भवफलमाह—*तस्मादिति* ॥

वार्तिकम्

वृत्तिलाभात् । कथं वा गन्धादेश्चाक्षुषत्वमङ्गीकुर्वता भवता स दोषः परिहरणीयः ? सन्निकर्षे लौकिकालौकिकत्वकल्पनापातात् । परिहारे च संयुक्तसमवाय एव तादृशविशेषकल्पनस्योचितत्वात्, तत्कल्पनमन्तरेणापि स्वतन्त्रपरतन्त्रग्राह्यत्वेन स्व-पर-विषयभेदात्तद्भेदोपपत्तेश्च । अपि च यदि ज्ञानप्रत्यासत्तिरङ्गीक्रियते, किमिति दीर्घशष्कुलीभोजनस्थले शतपत्रभेदनवदनुभवविरुद्धानि क्रमिकाणि पञ्च ज्ञानानि कल्प्यन्ते ? एकेनैव त्वगिन्द्रियेण रसनेन्द्रियेण वा लौकिकालौकिकसन्निधानाद् विशिष्टपञ्चविषयकैकज्ञानसंभवात् ।

भाष्यभावप्रकाशिका

तन्निवृत्तये—अज्ञानमित्युक्तम् । अज्ञानमात्रग्रहणे च ज्ञानाभाव इति शङ्क्येत, अतो मिथ्येति विशेषणम् । अतोऽनिर्वचनीयतया भावलक्षणमनादि सिद्धं ज्ञाननिवर्त्यमज्ञानमिति दर्शितम् । *तन्निमित्तः=तदुपादान इत्यर्थः । अन्यस्यान्यात्मना प्रतीतिरध्यास इत्युक्ते नीलमुत्पलमित्यादिगुण-

पञ्चपादिका

प्रत्यगात्मनि तु चितिस्वभावत्वात्स्वयम्प्रकाशमाने ब्रह्मस्वरूपानवभासस्यानन्यनिमित्तत्वात् तद्गतनिसर्ग-

पञ्चपादिकाविवरणम्

अनुपयोगादिति, तत्राह—*"प्रत्यगात्मनि तु चितिस्वभावत्वात्स्वयंप्रकाशमाने" इत्यादिना "तस्यानवभासः" इत्यन्तेन ग्रन्थेन* ॥ अयमर्थः—'अस्ति, प्रकाशते' इत्याद्यभिज्ञादिव्यवहारं प्रति पुष्कलकारणे सति—'नास्ति न प्रकाशते चे'ति योऽयमात्मतत्त्वालम्बनो व्यवहारः, स भावरूपेण केनचिदात्मन्यावरणमन्तरेण नोपपद्यते ;

ऋजुविवरणम्

ज्ञाननिश्चयः, तदभावे नेति। *ननु*आवरणमज्ञानं साधितम्, कथमाक्षेपः? *उच्यते* ; नार्थापत्त्या तत्सिद्धिः ; उपादानोपक्षयात्, नानुमानेन ; आवरणानिरूपणेनाप्रसिद्धविशेषणत्वात्, प्रत्यक्षेणावरणासिद्धेरुक्तत्वात्। एवं चाज्ञानो-पादानत्वमनुपपन्नं व्यर्थं च, तदेतदाह—*अनुपयोगादिति* ॥ *ननु* "प्रत्यगात्मनी"त्ययं ग्रन्थो नावरणं गमयति। *तथाहि*—चिद्रूपत्वेन स्वयंप्रकाशत्वसाधनं नावरण उपयुज्यते। न हि स्वयंप्रकाशे प्रतिबन्धादेवानवभास इति नियमः ; व्यभिचारात्, नाप्यनन्यनिमित्तत्वम् ; असिद्धत्वात्, इतरेतराश्रयप्रसङ्गाच्च—अनन्यनिमित्तत्वे सिद्धे प्रतिबन्धसिद्धिः, प्रतिबन्धे सिद्धेऽनन्यनिमित्तत्वसिद्धिरिति। नापि स्वयंप्रकाशत्वेनानन्यनिमित्तत्वसिद्धिः ; तत्रापि व्यभिचारात्, पुरुषान्तरसंवेदनादावनवभासस्य च सामान्येन कारणकल्पकस्य व्यापकविशेषाभावसहकृतस्यैवार्थविशेषसाधकत्वात्। तस्मात् प्रमाणानुपन्यासात् स्वरूपानिरूपणाच्च नावरणसिद्धिरनेनेत्याशङ्क्याह—*अयमर्थ इति* ॥ *नास्ति न प्रकाशते चेति योऽयमात्मतत्वावलम्बनो व्यवहार इति* अर्थापत्तौ सामान्यव्याप्तिप्रदर्शनम्, अनुमाने च धर्मिनिर्देशः, भावरूपेणेत्यनेनार्थापत्तौ तेन विनानुपपत्तिप्रदर्शनम्, अनुमाने च साध्यनिर्देशः। "आवरणातिशय-मन्तरेणे"त्युक्तेरभावादेरप्यावरणत्वादन्यथोपपत्तिस्सिद्धसाध्यता च स्यात्, तत्परिहारार्थम्—"भावरूपेणे"ति। "अस्ति प्रकाशते—इत्याद्यभिज्ञादिव्यवहारं प्रति पुष्कलकारणे सति 'नास्ति' 'न प्रकाशते चे'ति योऽयमात्म-तत्त्वावलम्बनो व्यवहारः" इत्यनेनैवार्थापत्तौ व्यापकविशेषाभावप्रदर्शनम्, अनुमाने च हेतुनिर्देशः। "सति पुष्कलकारणे" इत्यादिनाऽन्यथोपपत्तिः परिहृता, अनुमाने च व्यतिरेकव्याप्तिरुक्ता। सत्यपि पुष्कलकारणे यद्यावरणेन विना "न प्रकाशते" इति व्यवहारो भवेत्, तथाच सति नायं व्यवहार आवरणसाधकः स्यात् ; तेन विनाप्युपपत्तेः, व्यतिरेकव्याप्तिश्च न सिद्ध्येत्। तदुक्तं भवति—यो भावरूपावरणातिशयनिमित्तो न भवति, नासौ सति पुष्कलकारणे "नास्ति न प्रकाशत इति व्यवहारः ; यथा सन्निहिते घटे प्रकाशत इति व्यवहार इति। अनुमानं वेति विषयव्याप्त्यर्थं पक्षान्तरप्रदर्शनम्, नापरितोषात्। तदुक्तम्—"सर्वव्याख्याविकल्पानान्त्विदमिष्टं प्रयोजनम्। पूर्वत्रापरितोषो वा विषयव्याप्तिरेव वा" ॥ इति। इदानीमवान्तरपदानुपयोगं परिहरति। तत्र व्यापकविशेषाभावहेत्वोः सिद्ध्यर्थं स्वयंप्रकाशत्व-

तत्त्वदीपनम्

ननु प्रत्यक्षादिनाऽज्ञानमसाधि, अतः कथमाक्षेप इति? तत्राह—*अनुपयोगादिति* ॥ नाज्ञानमदृष्टार्थम्, किंत्वावरणार्थम्, तच्चोक्तविधया दुर्निरूपमिति, कथमज्ञानसिद्धिरित्यर्थः। आवरणाभावे नित्यमुक्तत्वप्रसङ्गात् तदेष्टव्यमिति समाधत्ते—*तत्राहेति* ॥ आवरणदुर्निरूपत्वे चोदिते तत्प्रतिसमाधेयम्, नच प्रतिसमाधीयते, नचानवभासस्याऽऽवरणकल्पकत्वम् ; पुरुषान्तरसंवेदने व्यभिचारात्, 'प्रत्यगात्मनी'ति विशेषणकृत्यं च न पश्याम इत्याशङ्क्य तात्पर्यमाह—*अयमर्थ इति* ॥ 'नास्ति' न प्रकाशते चे'ति योऽयमात्मालम्बनो व्यवहारः, स आत्मन्यावर-णमन्तरेण नोपपद्यत इति सम्बन्धः। नचैवंविधो व्यवहारोऽस्ति ; अहमिति सत्तास्फूर्तिदर्शनादित्याशङ्क्य कर्त्राद्यात्मक-व्यवहारेऽप्यशनायाद्यतीतात्मनि नैवंविधो व्यवहार इत्याह—*आत्मतत्त्वेति* ॥ आवरणमन्तरेणापि पुरुषान्तर-संवेदनवत् तथा व्यवहारोपपत्तिरित्याशङ्क्याह—*अस्ति प्रकाशत इति*। अभावस्याऽऽवारकत्वं व्यावर्तयितुम्—*भाव-

भामती

स्यादेतत्—अद्धा पूर्वप्रतीतिमात्रमुपयुज्यत आरोपे, न तु प्रतीयमानस्य परमार्थसत्ता ; प्रतीतिरेव

ऋजुप्रकाशिका

इदं तु कार्यानादित्वं संस्कार-मिथ्याज्ञानयोर्निमित्तनैमित्तिकयोः, भ्रमोपादानानादित्वं तु देवताधिकरणे वक्ष्यत इति द्रष्टव्यम्। "सत्यानृते मिथुनीकृत्य" इत्यादिना आरोप्यस्यापरमार्थसत्त्वमारोप उपयुज्यत इत्युक्तम्, प्रतीतस्यैवारोपादारोप्यस्य प्रतीतिर्वक्तव्या, आरोप्यस्यासत्त्वे प्रतीतिरेव तस्यायुक्ता, प्रतीतिसत्त्वे चापरमार्थसत्त्वमेवायुक्तम् ; प्रतिभासमानस्यैव परमार्थसत्त्वात्, अत आरोप्यस्यासत्यत्वे प्रतीत्यभावेनारोपलक्षणोऽध्यास एवानुपपन्न इति,—'अध्यासो *नामे'त्यस्य भाष्यस्यावतारयति—*स्यादेतदिति* ॥ सदसद्विलक्षणमसत्यमित्यजानतोऽलीकमेवासत्यमिति च जानतोऽयमाक्षेपः ॥

नच—'युष्मदस्मदि'त्यादिनाऽध्यासस्याक्षिप्तत्वादत्रापि तदाक्षेपे पौनरुक्त्यमिति—वाच्यम् ; तत्र भेदाग्रहादाक्षेपः, अत्र त्वन्यथेति भेदात्। परमार्थसत्तेत्यनन्तरमुपयुज्यत इति शेषः। प्रतीयमानस्यापरमार्थसत्त्वैवोपयुज्यताम्, तत्राह—*प्रतीतिरेवेति* ॥ अपरोक्षेति शेषः। असतः प्रतीतिमात्रनिषेधेऽसत्त्ववादेऽसत्प्रतीतिर्न स्यात्, नचेष्टापत्तिः ; "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि" इत्यङ्गी-

पञ्चपादिकाविवरणम्

सति पुष्कलकारणेऽसति चावरणे, सन्निहिते घटे 'प्रकाशते' इत्यादिव्यवहारदर्शनात्, अतो "नास्ति ब्रह्म, न

तत्त्वदीपनम्

रूपेणेत्युक्तम्* ॥ आवरणाभावेऽप्येवंविधो व्यवहारः किं न स्यात्? इत्याशङ्क्याह—*सति पुष्कलकारण इत्यादिना* ॥ सन्निहितेऽप्यर्थे कुड्यादिनाऽऽवृते 'प्रकाशते' इति व्यवहाराभावः, तदर्थम्—*असति चेति* ॥ एवमपीन्द्रियसंयोगाद्यभावे नैतादृशो व्यवहारः, तदर्थमाह—*सति पुष्कलेति* ॥ इन्द्रियसंयोगमात्रं पुष्कलकारणशब्दार्थः। मा भूत् तर्हि व्यवहार इत्याशङ्क्य तस्योपलभ्यमानत्वादावरणं कल्प्यमित्याह—*अत इति* ॥ अनुमानं वेत्यस्यायमर्थः—विमतो व्यवहारः, भावरूपाज्ञानप्रयुक्तावरणनिमित्तः, 'अस्ति प्रकाशते' इति व्यवहारपुष्कलकारणे सति तद्विपरीतव्यवहारत्वात् ; यन्नैवं न तदेवम्, यथा 'अस्ति प्रकाशते घटः' इति व्यवहार इति ॥

वार्तिकम्

दीयमानत्वात्। नच—पूर्वमगृहीतसौरभे घ्राणासंयुक्ते चन्दनखण्डे चन्दनत्वं चक्षुषा ग्रहीतुं शक्यते ; उक्तोपदेशशून्यस्य तद्व्यञ्जिकायास्तादृशसौरभोपलब्धेरभावात्। अत एव—तत्र ज्ञानप्रत्यासत्त्या सौरभोपलब्धिरपि—अपास्ता ; पूर्वं तत्र घ्रातेरभावात्। तादृशसौरभघ्रातिमात्रं प्रत्यासत्तिः, नतु तत्तद्घ्रातिरिति चेत्, न ; अतिप्रसङ्गात्। यत्र कुत्रापि गृहीतसौरभस्यालोचितमात्रे चन्दनखण्डे 'सुरभि चन्दनमि'त्यनुभवः स्यात्, न चैवमस्ति ; तथानुभवाभावात्। यत्र तथा फलमुपलभ्यते, तत्रैव तादृशप्रत्यासत्तिः कल्प्यते, न सर्वत्रेति चेत्, एवं तर्हि नीलो घट इति चाक्षुषविशिष्टानुभवदर्शनात् किमिति तत्रापि न चाक्षुषी ज्ञानप्रत्यासत्तिरुपकल्प्यते। तत्रास्ति चक्षुषा संयुक्तसमवायरूपप्रत्यासत्तिः, अतो न तत्कल्पनमिति चेत्, स किं सौरभेण चक्षुषो दण्डवारितो भवता? तत्र तत्सत्त्वेऽप्ययोग्यत्वाद् न तेन तद्ग्रह इति चेत्, कोऽभिप्रायः? किं चक्षुष एव तद्ग्राहकत्वायोग्यत्वमुच्यते, किं वा संयुक्तसमवायस्य? नाद्यः ; तथासति ज्ञानप्रत्यासत्त्याऽपि न तस्य तद्ग्राहकत्वं स्यात्। नहि सेचनायोग्यो वह्निः केनाप्युपायेन तद्योग्यो भवति। नापि द्वितीयः ; अयोग्यतायाः फलाभावोन्नेयत्वात्, प्रकृते च फलस्य सत्त्वात्, फलसत्त्वेऽपि तस्यान्यथात्वकल्पने रूपग्रहणेऽपि तथा कल्पनप्रसङ्गस्योक्तत्वात्। *ननु*—गन्धादेश्चाक्षुषत्व एकेन्द्रिय-

भामती

त्वत्यन्तासतो गगनकमलिनीकल्पस्य देहेन्द्रियादेर्नोपपद्यते। प्रकाशमानत्वमेव हि चिदात्मनोऽपि सत्त्वम्, न तु तदतिरिक्तं सत्तासामान्यसमवायः, अर्थक्रियाकारिता वा; द्वैतापत्तेः। सत्तायाश्चार्थक्रिया-कारितायाश्च सत्तान्तरार्थक्रियाकारितान्तरकल्पनेऽनवस्थापातात् प्रकाशमानतैव हि सत्ताऽभ्युपेतव्या।

ऋजुप्रकाशिका

कारादिति द्रष्टव्यम्। *ननु*—शशशृङ्गादिवद् नात्यन्तासद्देहादिः, किन्तु सदसद्विलक्षणोऽनिर्वाच्यः; तथाच प्रतीतिसंभवः, इत्यत आह—*प्रकाशमानत्वमिति*॥ तथाच प्रतीयमानत्वे देहादेस्सत्त्वमेव स्यात्, न सदसद्विलक्षणत्वमिति भावः। *ननु*—न प्रकाशमानत्वं सत्त्वम्, किन्तु तदतिरिक्तसत्तासामान्यसमवायो वा, अर्थक्रियाकारित्वं वा तत्, इत्यत आह—*नत्विति*॥ तदतिरिक्तसत्ताऽर्थक्रियाकारित्वयोरभ्युपगमे बाधकमाह—*द्वैतेति*॥ तत्रेष्टापत्तिमाशङ्क्याह—*सत्तायाश्चेति*॥ अतिरिक्तसत्ताभ्युपगम उक्तबाधकात् प्रकाशमानतैव सत्ताऽभ्युपेतव्येत्याह—*प्रकाशमानतैव हीति*॥ फलितमाह—*तथाचेति*॥ तर्हि नर-

पञ्चपादिकाविवरणम्

प्रकाशते चे'ति व्यवहारोऽन्यथानुपपत्त्या भावरूपमज्ञानं गमयतीत्यर्थापत्तिरनुमानं वा समुदायार्थः। तत्सिद्ध्यर्थ-मात्मनि 'प्रकाशते' इत्यादिव्यवहारं प्रति पुष्कलकारणतां दर्शयति—*चितिस्वभावत्वादिति*॥ किं तर्ह्यावरण-मिति? तत्राह—*ब्रह्मस्वरूपानवभासस्येति*॥ 'नास्ति न प्रकाशते' इति व्यवहारालम्बनयोग्यत्वस्य व्यवहारकार्य-

ऋजुविवरणम्

साधनमित्याह—*तत्सिद्ध्यर्थमिति*॥ "अनवभासस्ये"त्यनेन कारणान्तरसापेक्षत्वाद् यदस्य कारणं तदावरणमित्युक्तम्। तत्र सत्यनवभासे तन्निमित्तमावरणमित्युच्येत, स एव स्वरूपतो निरूपयितुं न शक्यते, प्रमाणं च नास्ति, पौष्कल्य-

तत्त्वदीपनम्

एवं तात्पर्यमभिधायाक्षरार्थं दर्शयति—*तत्सिद्ध्यर्थमित्यादिना प्रत्यक्चितीत्यन्तेन ग्रन्थेन*॥ विशेषण-वैयर्थ्यमित्युक्तम्, तन्निरस्यति—*तत्सिद्ध्यर्थमिति*॥ अर्थापत्त्यनुमाने तच्छब्दार्थः। जडे वस्तुन्यनवभासोऽ-ग्रहणनिमित्तः, न तथाऽऽत्मनि; स्वप्रकाशत्वादित्यर्थः। आवरणं दुर्निरूपमित्युक्तमनुवदति—*किं तर्हीति*॥ अनवभास एव दुर्निरूप इति, तत्राह—*नास्तीति*॥ योग्यतायाः कल्पकमाह—*व्यवहारेति*॥ अनात्मनि

वार्तिकम्

परिशेषः स्यादिति—*चेत्, अस्तु नाम, का ते हानिः स्यात्? कल्पनालाघवं च भवति। अत एव एकमेव त्वगिन्द्रियमिति सांख्यैकदेशिनो मन्यन्ते; एकस्यैव त्वगिन्द्रियस्य तत्तदधिष्ठानभेदेन तत्तद्विषयविषयक-वृत्तिलाभात्। कथं वा गन्धादेश्चाक्षुषत्वमङ्गीकुर्वता भवता स दोषः परिहरणीयः? सन्निकर्षे लौकिका-लौकिकत्वकल्पनापातात्। परिहारे च संयुक्तसमवाय एव तादृशविशेषकल्पनस्योचितत्वात्, तत्कल्प-नमन्तरेणापि स्वतन्त्रपरतन्त्र-ग्राह्यत्वेन स्व-पर-विषयभेदात्तद्भेदोपपत्तेश्च। अपि च यदि ज्ञानप्रत्यासत्तिरङ्गी-क्रियते, किमिति दीर्घशष्कुलीभोजनस्थले शतपत्रभेदनवदनुभवविरुद्धानि क्रमिकाणि पञ्च ज्ञानानि कल्प्यन्ते? एकेनैव त्वगिन्द्रियेण रसनेन्द्रियेण वा लौकिकालौकिकसन्निधानाद् विशिष्टपञ्चविषयकैकज्ञानसम्भवात्। लौकिकानुभवविशिष्टतयाऽनुभवस्तु सौरभांशेऽपि तुल्यः; अन्यत्राभिनिवेशात्। तस्मात् स्वसिद्धान्त-भङ्गभीत्योक्तदोषभीत्या च न ज्ञानप्रत्यासत्तिरङ्गीकर्तुं युक्ता। अपि च कथं वा ज्ञानं चक्षुषो विषयेण

भामती

तथाच देहादयः, प्रकाशमानत्वान्नासन्तः, असत्त्वे वा न प्रकाशमानाः ; तत्कथं सत्यानृतयोर्मिथुनीभावः ? तदभावे वा कस्य कुतो भेदाग्रहः ? तदसंभवे कुतोऽध्यासः ? इत्याशयवान्—आह आक्षेप्ता—कोऽयमध्यासो नाम ?। क इत्याक्षेपः । समाधाता——लोकसिद्धमध्यासलक्षणमाचक्षाण एवाक्षेपं प्रतिक्षिपति—

ऋजुप्रकाशिका

शृङ्गादिवदसत्त्वमेवास्तु देहादीनामित्यत आह—*असत्त्वे वेति* ॥ तथाच प्रकाशमानत्वात् सन्त एव देहादय इति भावः । सत्त्वमस्तु, ततोऽपि किम् ? तत्राह—*तत्कथमिति* ॥ मिथुनीभावाभावोऽप्यस्तु, ततोऽपि किम् ? तत्राह—*तदभावे वेति* ॥ भेदाग्रहासंभवे किमित्यत आह—*तदसंभव इति* ॥ "कोऽयमध्यासो नामे"त्यत्र किंशब्द आक्षेपार्थः, न प्रश्नार्थ इत्याह—*क इत्याक्षेप इति* ॥ आक्षेपस्य दर्शितत्वादिति भावः ॥

अत्र "युष्मदस्मत्प्रत्ययगोचरयोः" इत्यारभ्य—"आह कोऽयमि"त्यतः प्राक्तनस्य भाष्यस्य सङ्क्षेपतस्तात्पर्यं कथ्यते*—भगवता बादरायणेन साधनचतुष्टयसम्पन्नं प्रति "अथाऽतो ब्रह्मजिज्ञासा" इति सूत्रेण मोक्षसाधनीभूतब्रह्मज्ञानफलकब्रह्मविचारकर्तव्यताप्रयोजकत्वेन ब्रह्मणो जिज्ञास्यत्वे उपदिष्टे, तत्र "द्वितीयाद्वै भयं भवति" इत्यादिबहुश्रुतिभ्यः सद्वितीयब्रह्मज्ञानादनर्थश्रवणेन सद्वितीयब्रह्मणोऽजिज्ञास्यत्वे स्थिते, तत्राद्वितीयत्वमभेदः, किमपेक्षया चाभेद इति वीक्षायामात्मनः सकाशाद् ब्रह्मणोऽभेद इति स्थिते,—तत्राऽऽत्मा देह इति कश्चित्, प्राण आत्मेत्यन्यः, इन्द्रियाण्यात्मेत्यपरे, बुद्धिरात्मेति केचित्, संशयात्मकं मनः, निश्चयात्मिका बुद्धिरिति मनसोऽवान्तरभेद एव बुद्धिः, देह-प्राणेन्द्रिय-मनो-बुद्धयतिरिक्तोऽहंप्रतीतिविषयोऽहंकार एव आत्मेति नैयायिकादय इत्येवं स्थिते,—देहात्मवाद्यभिमतस्य देहस्वरूपस्यात्मनः "स्थूलोऽहम्, कृशोऽहम्," इत्यादिप्रतीत्या स्थूलत्व-कृशत्वविशिष्टतयाऽनुभवाभिमताद् देहरूपात्मनोऽहंप्रतीतिविषयात् सकाशादस्थूलाकृशादिस्वरूपस्य ब्रह्मणोऽभेदायोगः ; एवं प्राणस्यानित्यत्वेन क्षुत्पिपासाविशिष्टत्वेन च क्षुत्पिपासारहितस्य नित्यब्रह्मणस्तदभेदायोगः ; एवं—"काणोऽहम्, बधिरोऽहम्" इत्यादिप्रतीत्या काणत्व-बधिरत्व-मूकत्वादिधर्मवत्तयाऽहंप्रतीतिविषयादिन्द्रियस्वरूपादात्मनः सकाशात् तद्विपरीतब्रह्मणोऽभेदायोगः ; एवं मनसो विकारित्वात् शोकहर्षादिमत्त्वाद्

वार्तिकम्

सन्निकर्षः स्यात् ? सम्बन्धाभावात् । चक्षुस्संयुक्तमनस्संयुक्तात्मसमवेतज्ञानेन विषयविषयिभावसम्बन्धादस्ति परम्परासम्बन्ध इति चेत्, न ; अतिप्रसङ्गात्, इच्छादेरपि सन्निधित्वकल्पनाप्रसङ्गात्, तुल्ययोगक्षेमत्वात् । इच्छादेः साक्षात् सविषयकत्वाभावाद् ज्ञानद्वारमेव तद् वाच्यम्, तथाच तदेव सन्निधिः, नेच्छादिरिति चेत्, एवं तर्हि संस्कारः स्मृतिर्वाऽपि सन्निधिर्न स्यादित्यास्ताम् ॥ एतेन—सामान्यप्रत्यासत्तिरपि—अपास्ता ; अतिप्रसङ्गात्, सर्वसर्वज्ञतापत्तेश्च । नच तत्कल्पने प्रमाणमप्यस्ति । तथाहि—'अयं घटः' 'इदं द्रव्यम्' इत्यादिप्रत्यक्षप्रतीतौ पुरोवर्ति सामान्यविशेषात्मकं वस्तु भासते, न देशान्तरकालान्तरव्यवहितघटादिव्यक्त्यन्तरमपि, येन तद्भानार्थं चक्षुषः सन्निकर्षान्तराभावात् सामान्यं

भाष्यभावप्रकाशिका

गुणितादात्म्यप्रत्ययादीनामध्यासात्मकता मा भूदिति विशिनष्टि—*सत्यानृते इति* ॥ सत्यमनिदं चैतन्यम्, अनृतमनात्मा ; स्वरूपतोऽध्यस्तत्वात्, आत्मा तु संसृष्टरूपेणैवाध्यस्तो न स्वरूपेणेति सत्यम् ॥

एतदेवाज्ञानं संस्कार-काल-कर्मादिरूपेण परिणतमध्यासनिमित्तमिति वक्तुं निमित्तग्रहणम् ।

ऋजुप्रकाशिका

बुद्धेश्चानित्यत्वाद् मनसो बुद्धेश्च सकाशादविकारि-नित्य-शोकहर्षादिशून्य-ब्रह्मणोऽभेदायोगः ; एवं देहेन्द्रिय-मनो-बुद्ध्यतिरिक्तस्याहंप्रतीतिविषयस्याहङ्कारस्यात्मनः—"अहं कर्ता,अहं भोक्ता" इति कर्तृत्व-भोक्तृत्वाश्रयतया प्रतीयमानत्वात् तदाश्रयाद् नैयायिकाद्यभिमतादात्मनः सकाशादकर्त्रभोक्तृब्रह्मणोऽभेदायोगः ; एवं ब्रह्मणस्तत्तदभिमतात्माभेदायोग इत्याशङ्किते, वस्तुतो देह-प्राणेन्द्रिय-मनो-बुद्ध्यहङ्कारातिरिक्त आत्मनि देह-प्राणेन्द्रिय-मनोबुद्ध्यहङ्कार-तादात्म्याध्यासेन *देहधर्माणाम्* स्थूलत्व-कृशत्वादीनाम्, *प्राणधर्माणाम्* क्षुत्पिपासादीनाम्, *इन्द्रियधर्माणाम्* *काणत्व-बधिरत्वादीनाम्, *मनो-बुद्धिधर्माणाम्* शोकहर्षादीनाम्, *अहङ्कारधर्माणाम* कर्तृत्व-भोक्तृत्वादीनां च सर्वेषामात्मन्यध्यस्तत्वेन च वास्तवत्वायोगाद् देह-प्राणेन्द्रिय-मनोबुद्ध्यहङ्कारातिरिक्तान्निर्धर्मकादात्मनः सकाशाद् निर्धर्मकब्रह्मणोऽभेदो युज्यत एव। ब्रह्मणि सर्वज्ञत्वादिधर्माणां कल्पितत्वेन वास्तवत्वाभावाद् ब्रह्मणो निर्धर्मकत्वम्। एवमात्माभिन्ने सति ब्रह्मणि तस्य जिज्ञास्यत्वे स्थिते , केनचिदाक्षिप्तम्—आत्मनि देह-प्राणेन्द्रिय-मनो-बुद्ध्यहङ्कार-तादात्म्याध्यासे तद्धर्माध्यासे च सति खलु, वस्तुतो देहाद्यतिरिक्तादात्मनः सकाशाद् ब्रह्मणोऽभेदः

वार्तिकम्

प्रत्यासत्तिः कल्प्येत ; प्रत्यक्षस्य सम्बद्धवर्तमानमात्रविषयकत्वात्। तथाचोक्तं वृद्धैः—"सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना"। इति। *ननु* अलौकिकप्रत्यक्षविषयं तत्, सत्यम् ; अलौकिकं त्वन्विष्यमाणमद्यापि नोपलभ्यते ; फलैकान्नेयत्वात्, फलं तु न दृश्यत इत्युक्तम् ; अन्यथाऽन्योन्याश्रयापत्तेः—सामान्यप्रत्यासत्तिकल्पनायां प्रत्यक्षस्य देशकालान्तरव्यवहितविषयकत्वकल्पनम्, तत्कल्पने च सामान्यप्रत्यासत्तिकल्पनमिति। नच—सामान्यस्य बहुत्वादिवद् यावदाश्रयभानमन्तरेण भानं न संभवति, येन प्रत्यक्षे सामान्यभावान्यथानुपपत्तौ तद्भावसिद्धेर्नान्योन्याश्रय इति—वाच्यम् ; सामान्यस्य प्रत्येकपरिसमाप्यवृत्तित्वेन यावदाश्रयभाननियतभानाभावात्। *ननु*—सामान्यप्रत्यासत्त्यनङ्गीकारे व्याप्तिग्रहः कथं प्रत्यक्षेण स्यात्? यावद्धमव्यक्तीनामसन्निकृष्टत्वादिति—चेत्, *न* ; वह्निसामान्यनिरूपितव्याप्तेर्धूमसामान्य एव ग्रहात्, तयोश्च धूमवह्निसामान्ययोस्संयुक्ततादात्म्येन संयुक्तसमवायेन वा यथामतं प्रत्यक्षत्वात्। न हि धूमव्यक्तिषु तद्ग्रहः, अननुगमात्, तदनुगमार्थं व्याप्यता-

भाष्यभावप्रकाशिका

निमित्तविशेषप्रश्नं प्रतिवक्ति—*नैसर्गिक इति*॥ प्रत्यक्चैतन्यसत्तामात्रानुबन्धी ; प्रवाहरूपेणानादिरिति यावत्॥

नच—प्रवाहस्य प्रवाहिव्यतिरेकेणासत्त्वात् प्रवाहिव्यक्तीनां च सादित्वात् कुतो नैसर्गिकत्वमिति—वाच्यम् ; प्रवाहिव्यक्तीनाम् अन्यतमव्यक्त्या विना पूर्वकालानवस्थानं कार्येष्वनादित्वमित्यभ्युपगमात। यद्वा—कारणरूपेणास्यानादित्वम्, कार्यात्मना नैमित्तिकत्वमित्युभयमविरुद्धम्॥ "अध्यस्य मिथुनीकृत्ये"ति क्त्वाप्रत्ययो नाध्यासस्य पूर्वकालत्वमन्यत्वं च लोकव्यवहारादङ्गीकृत्य प्रयुक्तः ; लोकव्यवहारस्याध्यासात्मकतया क्रियान्तरत्वाभावात्, अतो वस्तुतोऽपौर्वापर्येऽपि विशेषणभेदेन कल्पितभेदं वस्तु तत्प्रतिपत्तिक्रमेण पौर्वापर्यं तदालम्बनमनुभवं च द्रढयितुमध्यासमभिनयेन दर्शयति—*अहमिति*॥

प्रदीपः

मत्वारोप्याज्ञानमप्यपरं स्वीक्रियते ; अज्ञानस्य चैतन्यमात्रगोचरत्वात्। भ्रमस्थलेऽधिष्ठानज्ञानकारणत्वमते तदकारणत्वमते

ऋजुप्रकाशिका

स्यात् ? देहादितादात्म्याध्यास एवाऽऽत्मनि न संभवति ; आत्मनो देह-प्राणेन्द्रिय-मनो-बुद्ध्यहङ्कारेभ्यः पूर्वोक्तविधया भेदग्रहेण तत्तादात्म्याध्यासायोगात् । नच—आत्मनो देह-प्राणेन्द्रिय-मनो-बुद्धिभ्यो भेदग्रहणेऽप्यहङ्काराद् भेदो न गृहीत इत्यहङ्कारतादात्म्याध्यास आत्मनि युज्यत इति—वाच्यम् ; त्वन्मतेऽहंप्रत्ययविषयस्यैवात्मनोऽहङ्कारत्वेन तस्य दुःखित्वेनाप्रेमास्पदत्वरूपविरुद्धधर्माश्रयत्वेनैकस्य विरुद्धधर्मद्वयानाश्रयतयाऽहंप्रत्ययविषयस्येदमनिदमात्मकत्वेनेदमात्मकादहङ्कारादनिदमात्मकस्यात्मनो भिन्नत्वेन ग्रहणादहङ्कारादात्मनो भेदग्रहलाभेनात्मनोऽहङ्कारतादात्म्याध्यासासंभवः, अत एव तद्धर्माध्यासासंभवश्चेत्ययं "युष्मदस्मदि"त्यादेः "तथापी"त्यतः प्राक्तनस्य भाष्यस्याभिप्रायः ॥ देहेन्द्रियाहंकारादिभ्य आत्मनो यौक्तिकभेदग्रहेऽपि पण्डित-पामर-साधारण्येन देहेन्द्रियाहङ्कारादिभ्यो भिन्नतया विविच्यात्मनोऽग्रहेण भेदाग्रहात् तादात्म्याध्याससंभवः । अत एव च तद्धर्माध्याससंभव इत्ययं "तथापीत्यादेः" "आह कोऽयमध्यासो नामे"त्यतः प्राक्तनस्य भाष्यस्याभिप्रायः । "आह कोऽयं" भाष्यस्य त्वभिप्रायो विशद एव ।

वार्तिकम्

वच्छेदकाङ्गीकारे च तदेव व्याप्यमस्तु ; लाघवात् । तस्माद्यत्किञ्चिदेतत् । *एतेन*—कार्यकारणभावोऽपि—*व्याख्यातः ; तत्सामान्ययोरेव तत्त्वात् । नच—तयोरुभयोरपि नित्यत्वात् कथं कार्यकारणभाव इति—वाच्यम् ; न ह्यस्माभिराकृतिमन्तरेण सामान्यं वस्त्वन्तरमभ्युपगम्यते । नचाकृतेरपि पूर्वमसत्युत्पत्तिरभ्युपगम्यते, किन्त्वभिव्यक्तिमात्रं करणेन क्रियत इत्यविरोधलक्षणे वक्ष्यामः । तस्मान्नास्त्यलौकिकप्रत्यासत्तिः कुत्रापि । तथाच 'सुरभि चन्दनम्' इति यत्र विशिष्टबुद्धिरुत्पद्यते, तत्र पूर्वोक्तरीत्या घ्राण-चक्षुषोः सन्निकर्षाभ्यामेव तदुत्पत्तिः, न तु सौरभांशे ज्ञानप्रत्यासत्तिकल्पने प्रमाणमस्ति । *ननु* न घ्राणचक्षुषी, संभूयैकज्ञानजनके, परस्परनिरपेक्षज्ञानकारणत्वात्, चक्षुःश्रोत्रवदित्यनुमानविरुद्धमुक्तकल्पनमिति—चेत्, *न* ; अयं घटपदवाच्य इत्यङ्गुलीशब्दाभ्यां निर्दिष्टे चक्षुःश्रोत्राभ्यां वाचकानुविष्टवाच्यप्रत्यक्षदर्शनाद् दृष्टान्तस्य साध्यविकलत्वात् । एवं त्वक्श्रोत्रादिदृष्टांशेऽपि परं प्रति साध्यवैकल्यम ; तत्र स्पर्शशब्दवाच्योऽयं गुण इत्यादिप्रत्यक्षस्य दर्शयितुं शक्यत्वात् । तस्माद् दृष्टान्तासिद्धेर्न रजतांशे ज्ञानं

भाष्यभावप्रकाशिका

तत्र 'अहमि'ति कार्याध्यासेष्वाद्योऽध्यासः । तस्याध्यासत्वं चिदचिदात्मकतया युक्तत्वम् । 'इदमि'ति च भोक्तुर्भोगसाधनं कार्यकरणसंघातः कथ्यते । 'ममेदमि'त्यहंकर्त्रा स्वत्वेन तस्य संबन्धः । तयोश्च 'इदं ममेदमि'ति दृष्टयोरध्यस्तत्वमध्यस्तभोक्तृशेषत्वात् स्वप्नादावध्यस्तराजोपकरणवत् । तदेवं पूर्वभाष्योक्तरीत्या युक्तिशून्योऽप्यत्यन्तविविक्तयोरित्यादिना लक्षितः सत्यानृतमिथुनीकरणत्वरूपेण संभावितोऽध्यासो विशिष्टकारणप्रसूतो नैसर्गिकत्वादागन्तुकदोषानपेक्षोऽहमिदमित्यादिप्रकारैर्निरूपितः ॥

अयमित्यनुभवसिद्धतामाह । लोक्यत इति लोकः, प्राणिसमूहः । व्यवहरणं व्यवहारः । अभिज्ञाभिवदने लोकव्यवहारः । लोकव्यवहारो मनुष्योऽहमिति शब्दसञ्जल्पितोऽभिज्ञानमित्यर्थः ।

प्रदीपः

चाधिष्ठानाज्ञानवशात् सर्वेषां भ्रमकाले समुद्भव इति स्वीकाराद् नारोप्ये चैतन्यसंसर्गाध्यासार्थमज्ञानान्तरमन्यद्वा स्वीकर्तव्यमिति सूचयन्नाह—*मिथ्याज्ञाननिमित्त इति* ॥ मिथ्याभूतं यदनिर्वचनीयमज्ञानम्, यद्वशान्मिथ्याभूतं शरीरादिकं विक्षिप्यते,

वार्तिकम्

प्रत्यासत्तिः प्रमाणवती। अस्मन्मते च यथा रजताध्यक्षम्, तथा लक्षणभाष्ये वक्ष्यामः॥ तस्मात्सन्निकर्षाभावाद् देशान्तरीयरजतभानानुपपत्तेर्नान्यथाख्यातिः संभवति॥

अस्तु तर्हि बुद्धिरेव रजतम्; संप्रयोगमन्तरेणापरोक्षत्वात्, उभयांशबाधकल्पनागौरवाच्च, लाघवादिदमंशरूपबहिष्ठत्वबाधकल्पनस्यैव युक्तत्वात्। ज्ञान-ज्ञेययोस्सहोपलम्भनियमादपि न रजतं बुद्ध्यतिरिक्तम्। तथाचोक्तम्—"सहोपलम्भनियमादभेदो नीलतद्धियोः॥" इति। तथाच बुद्ध्यतिरिक्तरजताभावात् तस्याश्च सत्यत्वान्न विषयमिथ्यात्वेन ज्ञानस्य मिथ्यात्वमिति—चेत्, *न*; रजतस्य संविद्रूपत्वासिद्धेः। नच—संप्रयोगमन्तरेणापरोक्षत्वादिति हेतोस्तत्सिद्धिरिति—वाच्यम्; अन्यतरासिद्धत्वेन तस्यासाधकत्वात्, संप्रयोगः, संस्कारो दोषश्चेति कारणत्रितयजन्यत्वस्य तद्बुद्धेः परैरभ्युपगमात्। *ननु*—अधिष्ठानसंप्रयोगे सत्यपि परमते रजते नास्तीन्द्रियसंप्रयोग इति—चेत्, *न*; अन्यथाख्यातिवादिमते रजतेन लौकिकसन्निकर्षाभावेऽप्यलौकिकसन्निकर्षस्य विद्यमानत्वाद् "लौकिकसंप्रयोगमन्तरेणे"ति विशेषहेतोर्व्यर्थविशेषणत्वात्, सुरभि चन्दनमित्यादौ व्यभिचाराच्च, दृष्टान्तस्य साधनविकलत्वाच्च, संविदोऽपि त्वन्मते मानसत्वात्संप्रयोगमन्तरेणापरोक्षत्वाभावात्। वेदान्तिमते नास्ति रजते संप्रयोगः, नापि साधनविकलो दृष्टान्त इति चेत्, सत्यम्; किं तावता? तथाऽप्यधिष्ठानसंप्रयोगजन्यज्ञानविषयत्वाद्रजतस्य वेदान्तिनं प्रत्यपि 'संप्रयोगमन्तरेणापरोक्षत्वात्' इत्ययं हेतुरसिद्ध एव। अथ 'स्वेन संप्रयोगमन्तरेण' इति हेतुर्विशेषणीयः; तथाऽपि व्याप्तिग्रहानुपयोगाद् व्यर्थविशेषणता; अस्ति च स्वेनापि संप्रयोगोऽधिष्ठानाभिन्नत्वाद्रजतस्य। तस्मान्नायं हेतूरजतस्य ज्ञानाभेदसाधकः। यस्तु ज्ञान-ज्ञेययोरभेदे सहोपलम्भनियमो हेतुरुक्तः, सोऽपि विकल्पासहत्वादयुक्तः। यदि सहितयो-

भाष्यभावप्रकाशिका

अथवा—लोकानां व्यवहारो लोकव्यवहारः। स चायमहमिति व्यपदेशः, इतिशब्दसूचितश्च तदनुरूपः प्रवृत्त्यादिः। अस्मिन्पक्षेऽध्यासव्यवहारक्रिययोरेककर्तृत्वादध्यस्य व्यवहार इति, अध्यासस्य व्यवहारात् पूर्वकालत्वमङ्गीकृत्याध्यस्य लोकव्यवहार इत्युक्तम्। अध्यासस्वरूपं कथ्यते—*अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येति*॥ तस्य निमित्तमुच्यते—*इतरेतराविवेकेनेति*॥ चिद्रूपेण विवेकेऽपि तस्य नित्य-शुद्ध-बुद्ध-मुक्तानन्दस्वरूपेणानवभासनादध्यास इति भावः। 'अहमिदं' 'ममेदमि'त्यादिना चाध्यासस्य कार्यमभिधीयते। 'अहमिदमि'त्यत्रेदं शरीराद्यहमित्येकोऽध्यासः। इदमिति च वस्तुतो न प्रतीतितः; तथा भानाभावात्। अध्यस्येति पूर्वकालत्वसूचितमध्यासस्य व्यवहारकारणत्वं दर्शयति—*मिथ्येति*॥ *मिथ्याज्ञानम्*अध्यासस्तन्निमित्त इत्यर्थः॥

प्रदीपः

तेनैवारोप्येऽप्यधिष्ठानतादात्म्याध्यासनिर्वाह इति भावना। अत्र मिथ्याज्ञानस्य निमित्तत्वसूचनेनान्तःकरणांशोऽविद्यावस्थाविशेष एव, न तत्परिणामविशेष इति, अन्तःकरणावच्छिन्नोऽपि जीवोऽनादिरिति पक्षः सूच्यते। अथवा—भामतीमतरीत्याऽविद्यायाः सर्वत्र निमित्तकारणत्वमेव, नतु परिणामिकारणत्वमिति पक्षः सूच्यते। विवरणमतेऽपि त्वज्ञानस्य परिणामिकारणत्वेऽपि दोषविधया निमित्तकारणत्वस्यापि स्वीकारान्नाज्ञाननिमित्तत्वोक्तिविरोधः।

*वयं तु प्रतीमः—अज्ञाननिमित्तमात्रत्वपक्ष एव सूत्रभाष्याद्यनुगुणः; अन्यथा प्रपञ्चगतजाड्यादिधर्मस्याज्ञानपरिणामत्वप्रयुक्तत्वसंभवाद् ब्रह्मणश्चिद्रूपस्यापि विवर्तकारणतासंभवाद् "न विलक्षणत्वा"द्यधिकरणशङ्काद्यनुत्थितिः; ब्रह्मण एव परिणामिकारणत्वमिति कृत्वाचिन्तयोक्ताधिकरणादिप्रवृत्तौ तु नाविद्यापरिणामत्वपक्षस्योत्थितिलेशोऽपीति॥

वार्तिकम्

नियमेनोपलम्भ इत्युच्यते, तदा विरुद्धः ; सहितयोरिति द्वित्वस्य भेदनियतत्वात्, परं प्रत्यसिद्धेश्च, ज्ञान-ज्ञेययोस्तथानभ्युपगमात्, चक्षुषोपलम्भे विषयालोकयोस्तथात्वेन व्यभिचाराच्च। अथैकोपलम्भ-विषयत्वनियमादिति हेत्वर्थः, सोऽप्यसिद्धः ; ज्ञानस्य स्वप्रकाशत्वेनाविषयत्वात्, दृष्टान्तस्य साध्यविकलत्वाच्च। नहि रूप-रूपिणोरत्यन्तमभेदोऽस्माभिरङ्गीक्रियते। अपिच यदि रजतं बुद्धिरूपत्वेन सत्यं स्यात्, 'नेदं रजतमि'ति तद्बाधो न स्यात्। नच—लाघवादिदमंशस्यैव बाधो न रजतांशस्यापीति—वाच्यम् ; वैपरीत्यस्यैव दर्शनात् ; अन्यथा 'नेदं रजतम्' इति बाधानन्तरं किमिदमित्याकाङ्क्षानुपपत्तेः, 'इयं शुक्तिः' इति ज्ञानानुपपत्तेश्च ; इदंत्वस्य बाधात्। किञ्चेदंत्वं संविदो भिन्नमभिन्नं वा? आद्ये किम्—सत् ? असद्वा ? पराभ्युपगतानिर्वचनीयं वा ? नाद्यः ; बाधानुपपत्तेः, अपसिद्धान्तापत्तेश्च ; संविदमन्तरेण सतोऽनभ्युपगमात्। न द्वितीयः ; अपरोक्षत्वानुपपत्तेः। नापि तृतीयः ; अनभ्युपगमात्। नापि द्वितीयः ; बाधानुपपत्तेः, संविदभिन्नत्वेन रजतवत्सत्यत्वात्। तस्मान्न रजतं बुद्धेराकारः। किं तर्हि ? प्रतिपन्नोपाधावत्यन्ताभाव-प्रतियोगित्वादनिर्वचनीयमिति विषयमिथ्यात्वादुपपन्नं ज्ञानस्य मिथ्यात्वमिति ॥

ननु—भवेदेतद्विषयमिथ्यात्वकल्पनम्, यदि ज्ञानमिथ्यात्वं भवेत्, न चैतदस्ति ; तन्मिथ्यात्वे प्रमाणाभावात्। नच—विसंवादिविशिष्टव्यवहार एव तत्र प्रमाणमिति—वाच्यम् ; स्वरूपतो विषयतश्चागृहीतसंसर्गज्ञानद्वयादेव तद्व्यवहारोपपत्तेरनुपपत्तेरभावेन तत्प्रमाणत्वासिद्धेः। तथाहि—पुरोवर्तिनि दुष्टेन्द्रियसंप्रयोगाद् दोषेणैवोपप्लुतशुक्तित्वादिविशेषविषयमिदमिति ज्ञानमुत्पद्यते। उत्पन्ने च तस्मिन् सादृश्यदोषोपहततत्ताविषयं रजतमिति स्मरणमुत्पद्यते। तयोश्च निरन्तरोत्पन्नत्वाद् दोषोपहतविशेष-विषयत्वाच्च स्वरूपतो विषयतश्च विवेककारणाभावेनैकत्वमिति मानसाभिमानात् ताभ्यामिदं रजतमिति विशिष्टाभिलापादिव्यवहारो जायते ; "तद्धेतोरेवे"ति न्यायात्। त्वयापि हि भ्रमं प्रत्यधिष्ठानज्ञानस्य कारणत्वाङ्गीकारात् तत्त्वेनेदं ज्ञानं पूर्वमभ्युपगन्तव्यम्, विशिष्टज्ञानस्य विशेषणज्ञानपूर्वकत्वेनारोप्यरजत-

भाष्यभावप्रकाशिका

ननु एवं शरीरादेरवस्तुत्वात् कुतश्चितो भेदाग्रहः ? कुतश्चाध्यास इति ? तत्राह—*सत्यानृते इति* ॥ *मिथुनीकृत्य = युगलीकृत्य। अप्रतीतस्याध्यासायोगादारोप्यस्य प्रतीतिरुपयुज्यते, न वस्तुसत्तेति भावः। परमार्थसतोऽपारमर्थिकेन परमार्थतो मिथुनीभावादभूतभावार्थस्येह प्रयोगः। *ननु* प्रतीतस्यारोपः, समारोपे च प्रतीतिरिति परस्पराश्रयत्वमित्याशङ्क्याह—*नैसर्गिक इति* ॥ अनादिरित्यर्थः। व्यवहारस्यानादित्वकथनात् कारणस्याध्यासस्यानादितोक्ता। ततश्च पूर्वपूर्वाध्यासोपदर्शितस्य देहादेरुत्तरोत्तराध्यासहेतुत्वान्न परस्पराश्रयतेत्यर्थः। अत्र च प्रवाहरूपेण नैसर्गिकत्वम्, कार्यव्यक्तिरूपेण च नैमित्तिकत्वमित्यविरोधः ॥

प्रदीपः

ननु—धर्म्यध्यासे धर्माध्यासस्यार्थसिद्धत्वाद् व्यर्थं धर्मीणां पृथगध्याससमर्थनमिति—चेत्, *अत्र रत्नप्रभाकाराः—अन्धत्वादीनामिन्द्रियधर्माणां धर्म्यध्यासस्यास्फुटत्वेऽपि अन्धोऽहमिति स्फुटाध्यास इति ज्ञापनार्थत्वान्न दोष इति समादधते। अत्र धर्म्यध्यासः परोक्षः, धर्माध्यासस्तु प्रत्यक्ष इति सूचनेनापरोक्षधर्माध्यासोऽपरोक्षधर्म्यध्यासव्यापक इति नियमविशेषस्तु न संमत इति सूच्यते। सति चैवमहमध्यासेऽपि धर्म्यध्यासस्यापरोक्षत्वसमर्थनेनान्तःकरणानिन्द्रियत्वपक्षः सूच्यत इति पञ्चपादिका-विवरणानुयायी पन्थाः। *भामत्यनुयायी तु मार्गः*—अन्तःकरणमपीन्द्रियमेव ; धर्माध्याससामान्यव्याप्यो धर्म्यध्यास इति

वार्तिकम्

स्मरणम्, असंसर्गाग्रहश्च ; तद्ग्रहस्य विशिष्टज्ञानोत्पत्तौ प्रतिबन्धकत्वात्। तथाच "तद्धेतोरेवास्तु हेतुत्वम्, मध्ये किं तेन" इति न्यायात् तेनैव प्रवृत्त्यादिव्यवहारसिद्धौ न तदर्थं विशिष्टज्ञानकल्पने प्रमाणमस्ति। *ननु* संवादिप्रवृत्तिस्थले विशिष्टज्ञानं प्रवर्तकं दृष्टम्, तदेवात्रापि प्रवर्तकं युक्तम् ; प्रवृत्तेः समानविषयकज्ञान-पूर्वकत्वनियमात्, लाघवानुमानभ्यां च प्रवृत्तित्वेन कार्यतायां समानविषयकविशिष्टज्ञानत्वेन कारणताग्रहे लाघवं भवति, अनुगमश्च ; प्रवृत्तिमात्रत्वेन हेतुत्वग्रहात्, संवादिप्रवृत्तित्वेन कार्यतायां तत्त्वेन विसंवादिप्रवृत्तित्वेन कार्यतायामगृहीतसंसर्गकज्ञानद्वयत्वेन च हेतुताग्रहे गौरवात्, कार्यताकोटौ कारणताकोटौ चाधिकस्य निवेशेऽननुगमाच्च, सामान्यतः कार्यतावच्छेदकस्य कारणतावच्छेदकस्य चैकस्याभावात्। *वह्निवद्भविष्यतीति—चेत्, न ; तत्रापि सामान्यतोऽनुगमस्य सत्त्वात्। *अथ* मन्यसे यथा वह्नित्वेन कार्यतायां सामन्यतः तृणारण्यादिषु कारणतावच्छेदकाभावेऽपि तार्णाऽऽरण्यादिवह्नित्वेन कार्यतायां तृणत्वारणित्वादिना कारणता गृह्यते, गौरवाननुगमौ च न दोषौ ; प्रामाणिकत्वात्, तद्वत्प्रकृतेऽपि भविष्यतीति, *तन्न* ; तत्रापि वह्नित्वेन कार्यतायामिन्धनत्वेन सामान्यतः कारणताग्रहात्, "यद्विशेषयोः कार्यकारणभावग्रहस्तत्सामान्ययोरपी"ति नियमभावात्। तस्मादुक्तदोषाद् विसंवादिप्रवृत्तावपि विशिष्टज्ञानं न्याय्यमिति चेत्, न ; इदंरजतज्ञानत्वेन सामान्यतः प्रवर्तकत्वाद्भेदस्य सत्त्वादननुगमाभावात्, 'इदं रजतम्' इति विशिष्टज्ञानत्वापेक्षया तत्त्वस्य लघुत्वाच्च। नच—एवमिदंरजतज्ञानयोर्भेदे गृहीतेऽपि तत्त्वेन प्रवर्तकत्वं स्यादिति—वाच्यम् ; भेदाग्रहस्यापि प्रवृत्तिहेतुत्वात् तदभावे तत्प्रवर्तकत्वानुपपत्तेः, कार्यस्य सामग्र्यधीनत्वात्, विशिष्टज्ञाने सत्यपि भेदग्रहे प्रवृत्त्यदर्शनात्। *ननु* कराणैकरूप्ये कथं प्रवृत्त्ययाथार्थ्ययाथार्थ्याभ्यां भेदः स्यात्? नैष दोषः ; सदसत्त्वाभ्यामसंसर्गस्य विशेषितत्वात् कारणैकरूपणासिद्धेः—सदसंसर्गाग्रहाद्विसंवादिनी प्रवृत्तिः, असदसंसर्गाग्रहात्तु संवादिनी प्रवृत्तिरिति तयोः कारणभेदः। तस्माद् भ्रमस्थले प्रवृत्तेरयाथार्थ्येऽपि न ज्ञानस्यायाथार्थ्यम् ; उक्तप्रकारेण सत्यविषयकत्वात्। नच—एवं 'नेदं रजतम्' इति बाधानुपपत्तिः ; नहि 'नेदं रजतम्' इति पुरोवर्तिनि रजतं रजतज्ञानं च बाध्यते, किं तर्हि? इदंरजतयोस्तज्ज्ञानयोश्च भेदं बोधयता तेन पुरोवर्तिनि रजतार्थिप्रवृत्तिर्बाध्यते। तत्र यत्र प्रवृत्त्युत्तरकालं भेदग्रहः, तत्र सदसंसर्गाग्रहजन्यत्वविचारणेन प्रवृत्तेरयाथार्थ्यावधारणमेव बाधः, यत्र तु प्रवृत्तेः पूर्वमेव भेदग्रहः, तत्र कारणाभावेन प्रवृत्त्यभाव एव बाध इत्यनवद्यम्। प्रयोगश्च—विवादगोचरापन्नं रजतज्ञानम्, यथार्थम्, धीत्वात्, संप्रतिपन्नरजतधीवदिति ; अन्यथा धियोऽविश्वसनीयत्वेन तदधीनसर्वपुरुषार्थानुकुलसंसारमात्रोच्छेदप्रसङ्गः। तथाचोक्तम्—"अहो बत महानेष प्रमादो धीमतामपि। ज्ञानस्य व्यभि-

प्रदीपः

नायमेव नियमः, किन्तु अपरोक्षधर्म्यध्यासव्याप्योऽपरोक्षधर्माध्यास इति नियमोऽपि स्वीक्रियते। "अन्धोऽहमि"त्यादिधर्म्यंशेऽप्यपरोक्षाध्यास एवेत्यादि न्यायरत्नावल्यां विस्तृतम्। तथाचैतन्मतरीत्या धर्मीध्याससमर्थनं स्फुटप्रतीत्यर्थम्। अथवा----धर्मीध्यासस्यैव दुःखनिदानत्वात् तदुपयोगितयैव धर्म्यध्याससमर्थनाद् न दोष इत्याद्यन्यत्र व्यक्तम्। अत्र "अहमिदम्" इतीदंशब्दप्रयोगेणान्तःकरणस्यापि स्फुटत्वमुपन्यस्तमितीन्द्रियमात्रं प्रत्यक्षमिति वान्तःकरणमनिन्द्रियमिति वा स्वीकर्तव्यम्। तत्र प्रथमः पक्षो भामतीकाराणाम्, द्वितीयस्तु विवरणाचार्याणामिति पक्षद्वयमपि न भाष्यानारूढम्॥

ननु--सर्वं ज्ञानं प्रमा, न तु भ्रमात्मकं ज्ञानमेकमपि, "इदं रजतमि"ति तु ज्ञानद्वयमेव। एकम्—इदमित्यनुभवात्मकम्, अपरम्--रजतमिति प्रमुष्टतत्ताकस्मरणमात्रम्। ज्ञानद्वयमपीदं "इदं रजतमि"ति प्रमासजातीयाकारत्वाद् भिन्नतयाऽगृह्यमाणं

पञ्चपादिका

सिद्धाविद्याशक्तिप्रतिबन्धादेव तस्यानवभासः। अतः सा प्रत्यक्चिति ब्रह्मस्वरूपावभासं प्रति-

पञ्चपादिकाविवरणम्

दर्शनादेव कल्प्यमानस्येत्यर्थः। नचाधिष्ठानप्रतिबन्धमन्तरेण तत्र विपर्ययकार्यमुपपद्यते। अविद्यासम्बन्धत्वादेवावरणस्यानिरूपिताकारता च युक्तेति भावः। *ननु* प्रमाणवैकल्यादेवात्राप्यग्रहणमिति, नेत्याह—*अनन्यनिमित्तत्वादिति* ॥ अतोऽनवभासात्पुष्कलकारणे सति परिशेषादिदमायातमित्याह—*तद्गतनिसर्गसिद्धाविद्याशक्तिप्रतिबन्धादेव तस्यानवभास इति* ॥ मूर्तद्रव्यान्तरस्यासम्भवादिति भावः। अतः कार्यदर्शनोन्नेयमावरणकृत्यं विपर्ययं चात्मनि कुर्वाणमज्ञानं भावरूपमेवोभयकारणत्वान्यथानुपपत्त्या कल्प्यत इत्याह—*अतः सा प्रत्यक्चितीति* ॥

ऋजुविवरणम्

मात्रं च नावरणसाधकमित्याशङ्क्याभिप्रायमाह—*नास्ति न प्रकाशत इतीति* ॥ यद्वा—"स्वरूपानवभासस्ये"त्यनेनानवभासस्यावरणत्वमुक्तम्। सिद्धे ह्यस्तित्वे तस्यावरणत्वं निरूप्येत, तदस्तित्वमेव कथम्? इत्याशङ्क्याभिप्राय उक्तः—*नास्ति न प्रकाशत इतीति* ॥ *ननु*—व्यवहारदर्शनाद्धेतुः कल्पितः, कथं तस्यावरणत्वमिति? तदाह—*नचाधिष्ठानेति* ॥ यद्वा—तत्रापि विक्षेपमात्रमेवाङ्गीक्रियताम्, तावतैव विपरीतव्यवहारस्याप्युपपत्तेः, इत्याशङ्क्याह—*नचाधिष्ठनेति* ॥ *ननु*—व्यवहारदर्शनात् कल्पितयोग्यत्वस्य कथमावरणत्वम्? आवरणस्य निरूपणासहत्वेन तत्स्वरूपे पृष्टे योग्यतारूपत्वे तद्धेतुत्वे वा निरूपणासहत्वस्य तदवस्थत्वात्, प्रमाणविषयस्य चानिरूपितत्वायोगादित्याशङ्कयाभिप्रायमाह—*अविद्यासंबन्धत्वादेवेति* ॥ *ननु प्रमाणवैकल्यादेवेति* ॥ पुरुषान्तरसंवेदनवदिति चोद्याभिप्रायः। अन्यत्वाभावादिति परिहाराभिप्रायः। *ननु* एवमप्यज्ञानमेव कस्मात् प्रतिबन्धकं भवेत्? इत्याशङ्कयावतारयति—*अतोऽनवभासादिति* ॥ तथाऽपि पारिशेष्यमसिद्धम्, लोकप्रसिद्धद्रव्यान्तरमेव कस्मान्न भवतीत्याशङ्कयाभिप्रायमाह—*मूर्तद्रव्यान्तरस्येति*। एवमपि कथं परिशेषः? अभावादेरपि संभवादित्याशङ्कानिवृत्तौ तात्पर्यमाह—*अतः कार्यदर्शनो-

तत्त्वदीपनम्

प्रतिबन्धमन्तरेण विक्षेपवदात्मनि विक्षेपोऽस्तु, किं प्रतिबन्धेनेत्याशङ्कयानवच्छिन्नसंविद्रूपाऽऽनन्दात्मनि प्रतिबन्धं विना विक्षेप एव नोल्लसति। अन्यत्र स्वत एव प्रतिबद्धत्वान्न प्रतिबन्धापेक्षेत्याह—*नचेति* ॥

आत्मा स्फुरद्रूप आवृत इत्येतद्विरुद्धमित्याशङ्क्य, किमावरणप्रतीतिर्निरस्यते? उत यौक्तिकत्वम्? नान्त्यः; अङ्गीकृतेः, इत्याह—*अविद्येति* ॥ चशब्देनाप्रतीतिपक्षं निरस्यति। अहमज्ञो मामन्यं च न जानामीत्यावरणानुभवान्न तन्निरास इत्यर्थः। स्वयंप्रकाशेऽपि पुरुषान्तरसंवेदने यथाऽग्रहणम्, तद्वदत्रापीत्याह—*ननु प्रमाणेति* ॥ तत्र भिन्नत्वात् प्रमाणवैकल्यादग्रहणं युक्तम्, अत्र तु ब्रह्मणः प्रत्यक्त्वान्मैवमित्याह—*नेत्याहेति* ॥ अज्ञानादन्यद् निमित्तं यस्य न विद्यते तदनन्यनिमित्तम्, तस्य भावस्तत्त्वम्; तस्मादित्यर्थः। हेत्वसिद्धिमुक्तां निरस्यति—*अत इति* ॥ निमित्तान्तरदुर्निरूपत्वमतःशब्दार्थः। कुड्यादेरपि व्यवधायकत्वदर्शनात् कथमज्ञानमेव व्यवधायकम्? तत्राह—*मूर्तेति* ॥ ब्रह्मणः प्रत्यक्स्वरूपत्वान्न मूर्तद्रव्यं तद्व्यवधायकमित्यर्थः ॥

तथाऽपि कथं भावरूपाज्ञानसिद्धिरित्याशङ्कयाह—*अत इति* ॥ भावरूपेणेत्यत्र तात्पर्यार्थः कथितः, अत्र

वार्तिकम्

चारित्वे विश्वासः किन्निबन्धनः" ॥ इतीति पूर्वपक्षसंक्षेपः। *अत्रोच्यते*; ज्ञानद्वयात्प्रवृत्त्यसिद्धिः; अतिप्रसङ्गात्। अगृहीतभेदाद् ज्ञानद्वयात् प्रवृत्तिः, अतो नातिप्रसङ्ग इति चेत्, न; भेदाग्रहस्य प्रवृत्त्यहेतुत्वात्,

पञ्चपादिका

बध्नाति, अहङ्कारायतद्रूपप्रतिभासनिमित्तं च भवति, सुषुप्तादौ चाहङ्कारादिविक्षेपसंस्कारमात्रशेषं स्थित्वा

पञ्चपादिकाविवरणम्

ननु अग्रहण-मिथ्याज्ञान-तत्संस्कारेभ्योऽन्यदज्ञानं नाम न पश्यामः, त एव च जीवस्य स्वयंप्रकाशमानमपि ब्रह्मस्वरूपावभासं प्रतिबध्नन्तीति, नेत्याह—*सुषुप्तादौ चेति* ॥ तत्राप्यविद्याशक्तिः संस्कारमात्रशेषं तिष्ठतीति

ऋजुविवरणम्

ज्ञेयमिति* ॥ *नन्वग्रहणेति* ॥ अयं भावः—विक्षेपकार्यस्यादर्शनादिति मा भूद् विक्षेपः, आवरणादज्ञानं निश्चीयत इति चेत्, न ; अन्यथासिद्धत्वादित्याह—*त एव जीवस्येति* ॥ संस्कारमात्रमेव शेषो यस्याज्ञानस्य, तदज्ञानं संस्कारमात्रशेषमिति व्युत्पत्त्या ज्ञानाभावः प्रतीयते, तन्निवृत्त्यर्थमाह—*तत्राप्यविद्याशक्तिरिति* ॥ विक्षेपस्य संस्कारो विक्षेपसंस्कारः, विक्षेपसंस्कारमात्रं शेषो यस्मिन् अज्ञान इति व्युत्पत्तिः प्रदर्शिता । मात्रग्रहणेन विक्षेपस्यैव संस्काररूपेणावस्थानम्, आवरणे तु स्वेन रूपेणावस्थानमिति विभागः प्रदर्शितः । *संस्कारमात्रशेषम् = विक्षेपसंस्कारयुक्त-

तत्त्वदीपनम्

स्वक्षरार्थ इत्यपौनरुक्त्यम् । अज्ञानशब्दार्थपर्यालोचनयाऽग्रहणाद्येवाज्ञानमिति शङ्कते—*नन्वग्रहणेति* ॥ अज्ञानमित्यत्र नञः किमभावोऽर्थः ? उत तद्विरोधी ? आहो तदन्यः ? आद्ये ग्रहणाभावः स्यादित्याह—*अग्रहणेति* ॥ द्वितीये ग्रहणनिवर्त्यभ्रान्तिज्ञानमेव स्यादित्याह—*मिथ्याज्ञानेति* ॥ तृतीये संस्कारः स्यादित्याह—*तत्संस्कारेति* ॥ आवरणानुपपत्त्या ग्रहणादिविलक्षणं ग्रहणनिवर्त्यमज्ञानमित्याशङ्क्यान्यथोपपत्तिमाह—*त एवेति* ॥ विक्षेपहेतुत्वमपि तेषामेवेति चशब्दार्थः । अज्ञानशब्दस्यान्यथा व्युत्पत्तेर्मैवमित्याह—*नेत्याहेति* ॥ संस्कारमात्रमेव शेषो यस्याज्ञानस्य तत्संस्कारमात्रशेषमिति ज्ञानाभावः प्रतीयत इत्याह—*तत्रापीति* ॥ अहंकारादिविक्षेपस्य विपरीतरूपस्य संस्कारमात्रस्य शेषो यस्मिन् तत्तथोक्तम्, शेषशब्दो भावप्रधानः । तच्छेषत्वं यथा स्यात्तथा सुषुप्त्यादौ स्थित्वा जागरादौ कर्मवशाद्विक्षेपरूपेण प्रादुर्भवति, ततश्चानवभासविक्षेपहेत्वज्ञानमेष्टव्यम् ; इतरथा संस्कारमात्राद्विक्षेपप्रादुर्भावासम्भवात् सुषुप्त्यादौ मुक्त्यापत्तेश्चेति टीकार्थः ॥

वार्तिकम्

प्रतिबन्धकाभावस्य हेतुत्वनिराकरणात् । कथं वा तव मते भेदाग्रहोऽपि ? स्वरूपभेदस्य स्वप्रकाशयोर्ज्ञानयोः स्वयमेव ग्रहात्, स्वरूपातिरिक्तभेदस्याख्यातिवादिभिरनङ्गीकारात्, अङ्गीकारे वा तस्यापि स्वप्रकाशाभ्यां ज्ञानाभ्यां स्वयमेव ग्रहात्, ज्ञानान्तरेण तद्ग्रहे च धर्मिप्रतियोगिग्रहमन्तरेण तद्ग्रहासंभवाद् ज्ञानस्वप्रकाशत्वहानेः । यदि ब्रूयात्—ग्रहण-स्मरणज्ञानयोर्विवेककारणस्य विशेषविषयत्वस्य दोषेणापहाराद् न भेदग्रहः—इति, को हेतुः ? किं ते विशेषविषयत्वरहिते ज्ञाने एव न भवतः ? न वा स्वप्रकाशः ? येन भेदग्रहो न स्यात् । कथं वा विशेषविषयत्वं भेदग्रहकारणम् ? तथा सति प्रत्यभिज्ञाभ्रमस्थले 'तदेव रजतम्' इति तत्ताया ग्रहाद् भेदग्रहप्रसङ्गः । यदि ब्रूषे—तत्र स्मृतेर्विशेषविषयत्वे सत्यपि ग्रहस्य तथात्वाभावान्न भेदग्रह इति, सत्यं ग्रहणं विशेषविषयत्वाभावाद् न स्वात्मानं स्मृतेर्विविञ्च्यात्, स्मृतिस्तु तस्मादात्मानं विविञ्च्यादेव ; विशेषविषयत्वात्, अथ दोषेण तयोर्विशेषविषयत्वापहाराद् भेदविषयत्वमप्यपहृतमिति न तयोर्भेदग्रह इति चेत्, न ; तथा सति स्वयमेव ते न स्याताम् ; स्वस्यैव स्वभेदग्रहत्वात् । अथ ज्ञानयोर्विवेककारणे सत्यप्यर्थयोस्तदभावात् तदविवेकेनैव

पञ्चपादिकाविवरणम्

न संस्कारादय एवाज्ञानमित्यर्थः । कथम् ? न तावत्सुषुप्तादौ स्वयंप्रकाशब्रह्मस्वरूपानवभासः पुरुषान्तरसंवेदनवद् द्रष्टुर्भिन्नत्वादिति शक्यं वक्तुम् ; एकत्वश्रुतेः, नापि मिथ्याज्ञानप्रतिबन्धात् ; तत्र तस्याभावात्, नापि तत्संस्कारप्रतिबन्धात् ; भ्रान्तिसंस्काराणां तत्त्वावभासप्रतिबन्धकत्वाभावात्, सत्स्वपि रजतभ्रमसंस्कारेषु शुक्तिकावबोधदर्शनात्, नाप्यग्रहणप्रतिबन्धात् ; स्वरूपग्रहणस्य नित्यत्वात् स्वयंप्रकाशमाने संवेदने तद्विषयकादाचित्काग्रहणस्याप्रतिबन्धकत्वात्, नापि कर्मणां स्वरूपावभासविरोधिता ; सर्वदाऽणुमात्रस्यापि चैतन्यस्यानवभासप्रसङ्गात्, अज्ञानेऽपि तुल्यमिति चेत्, न ; तस्य स्वविषयचैतन्यावभासं प्रत्यप्रतिबन्धकत्वात्, नचाज्ञानस्येव कर्मणां नित्यवत्साक्षिचैतन्येनावभास्यता, येन तदवभासकतया साक्षिचैतन्यमप्रतिबद्धं प्रकाशेत ।

ऋजुविवरणम्

मित्यर्थः ॥ कथं वा संस्कारादीनामज्ञानत्वाभावः ? कथं वा स्वरूपानवभासेनाज्ञानकल्पनम् ? अन्यथासिद्धेरित्याक्षिपति—*कथमिति* ॥ अनन्यथासिद्धानवभाससामर्थ्यादज्ञानं कल्प्यत इति निदर्शयितुमन्यथासिद्धिं निराकुर्वन् वाचः क्रमवर्तित्वात् स्थूलत्वाच्च भेदस्य तमेवादौ निराकरोति—*न तावदिति* ॥ *तत्र तस्याभावादिति* ॥ बोधप्रत्यस्तमयरूपत्वात्सुषुप्तेरित्यर्थः ॥ "नापि तत्संस्कारप्रतिबन्धादि"त्यनेन संस्कारस्य कथं प्रतिबन्धकत्वं निराक्रियते ? संस्कारादप्यग्रहणानुवृत्तेर्वक्ष्यमाणत्वात्, *नैष दोषः* ; अज्ञानसंस्कारस्य तदुपपत्तेर्ज्ञानसंस्कारस्य न तथेति वैषम्यम् । अथवा—तत्र संस्कारशब्दोऽविद्यालेशपर इत्यनवद्यः । *ननु*—संस्कारस्याप्रतिबन्धकत्वे निश्चिते संस्कारत्वादिहाप्रतिबन्धकत्वम्, तदेव सन्दिग्धम् ; प्रतिबन्धसमये संस्कारस्यापि संभवादित्याशङ्क्याह—*सत्स्वपि रजतेति* ॥ "अग्रहणमि"ति स्वरूपग्रहणाभावः ? कदाचिद् ग्रहणाभावो वा ? इति विकल्प्य प्रथमपक्षं दूषयति—*स्वरूपग्रहणस्येति* ॥ न द्वितीय इत्याह—*स्वयंप्रकाशमान इति* ॥ तद्विषयाग्रहणे विद्यमानेऽपि स्वरूपग्रहणप्रयुक्तव्यवहारदर्शनादिति भावः । तर्हि कर्मणां प्रतिबन्धकत्वमस्त्वित्याशङ्क्याह—*नापि कर्मणामिति* । *ननु* अज्ञानस्येव कर्मणामपि स्वाभासप्रतिबन्धकत्वं नास्ति, अतः कथं सर्वानवभास इति ? तत्राह—*नचाज्ञानस्येवेति* ॥ *ननु* सर्वस्य साक्षिवेद्यत्वात्

तत्त्वदीपनम्

सुषुप्त्यादावज्ञानस्य कल्पकाभावात्कथं तत्रावस्थानमिति टीकार्थानभिज्ञः शङ्कते—*कथमिति* ॥ ब्रह्मानवभासानुपपत्त्या तत्राज्ञानसिद्धिः । नचान्यथासिद्धिः । तथाहि—किं भिन्नत्वादनवभासः ? उत मिथ्याज्ञानात् ? आहो तत्संस्कारात्? अथवाऽग्रहणात्? किं वा कर्मणः? उतान्यस्मात् ? इति विकल्प्याद्यं निरस्यति—*न तावदिति*॥ नच—अनन्यनिमित्तत्वादित्यत्रास्य कल्पस्य निरस्तत्वात् पुनस्तन्निरसनमनुपपन्नमिति—शङ्क्यम् ; मतभेदेन पुनर्निराससम्भवादित्यर्थः । द्वितीयं दूषयति—*नापीति* ॥ सुषुप्तेः सर्वकार्यप्रविलयरूपत्वात्तत्र मिथ्याज्ञानाभाव इत्यर्थः । तृतीयं दूषयति—*नापि तत्संस्कारेति* ॥ प्रतिबन्धकत्वाभावे हेतुमाह—*सत्स्वपीति* ॥ विमतः, न तत्त्वावभासप्रतिबन्धकः, संस्कारत्वात् ; रजतभ्रमसंस्कारवदित्यर्थः । चतुर्थं दूषयति—*नाप्यग्रहणेति* ॥ किमग्रहणं स्वरूपग्रहणस्याभावः ? उत आगन्तुकस्य ? नाद्य इत्याह—*स्वरूपेति* ॥ स्वरूप इति हेतुगर्भविशेषणम् । द्वितीयं प्रत्याह—*स्वयंप्रकाशमान इति* ॥ कादाचित्कग्रहणाभावेऽप्यात्मनः स्फुरणान्न तस्य प्रतिबन्धकत्वमित्यर्थः । पञ्चमं निरस्यति—*नापीति* ॥

अनवच्छिन्नाऽऽनन्दात्मचैतन्यस्यानवभासप्रसञ्जनमिष्टमिति शङ्कां निरस्यति—*अणुमात्रस्येति* ॥ अज्ञानप्रतिबन्धे सत्यपि यथा चिन्मात्रावभासस्तव, तथा कर्मप्रतिबन्धपक्षेऽपीत्याशयेन शङ्कते—*अज्ञानेऽपीति* ॥ वैषम्यान्नैतदित्याह—*न तस्येति* ॥ अज्ञानस्य चित्प्रतिभास्यत्वान्न चित्प्रतिबन्धकत्वमित्यर्थः । स्वं विषयो यस्य चैतन्यावभासस्य स तथोक्तः । कर्मणामपि चिद्भास्यत्वान्न चित्प्रतिबन्धकत्वमित्याशङ्क्य, किमेतत्त्वन्मतमाश्रित्यो-

पञ्चपादिकाविवरणम्

नच कर्माणि स्वाश्रयावभासविरोधीनीति प्रमाणमस्ति। संस्कारत्वाच्च कर्मणां भ्रान्तिसंस्कारवदप्रतिबन्धकता। तस्मात् सुषुप्तादौ स्वरूपानवभासव्यवहारोऽग्रहण-मिथ्याज्ञान-तत्संस्कार-कर्मभ्योऽन्यदेव किंचित्प्रतिबन्धकमज्ञानं कल्पयतीत्यर्थः। *ननु* द्रव्यान्तरमेव प्रतिबन्धकं कल्प्यताम्, किमज्ञानकल्पनयेति, नैतत्; ब्रह्मज्ञानात्प्रतिबन्धनिवृत्तिमन्तरेण स्वविषयावभासायोगात्, ज्ञाननिवर्त्यस्य चाज्ञानत्वात्॥

ऋजुविवरणम्

कर्मणामपि साक्षिवेद्यत्वम्, तथाच सति किञ्चित्प्रकाशते, किंचित्प्रतिबध्यते, इत्याशङ्क्याह—*नच कर्माणीति*॥ कर्मणां निश्चिते प्रतिबन्धकत्वे कथंचिदेवं कल्प्येत, तदेवासिद्धमिति भावः। *ननु* अनवभासे किञ्चित्कारणं कल्पनीयम्, तत्र कर्मणां सर्वकारणत्वात्तेषामेव कारणत्वम्; क्लृप्तत्वादित्याशङ्क्याह—*संस्कारत्वादिति*॥ स्वपक्ष-

तत्त्वदीपनम्

च्यते? उत मन्मतमिति विकल्प्याऽऽद्यं प्रत्याह—*न चाज्ञानस्येति*॥ फलोदयानुपपत्तिगम्यत्वात्कर्मणामित्यर्थः। द्वितीयं प्रत्याह—*नचेति*॥ न केवलं प्रतिबन्धकत्वे मानाभावः, अस्ति वैपरीत्ये मानमित्याह—*संस्कारत्वादिति*॥ विमतानि, न प्रतिबन्धकानि, संस्कारत्वात्; भ्रान्तिसंस्कारवत्। नचासिद्धिः; कर्मशब्देन यागादिसूक्ष्मरूपाभिधानादित्यर्थः। प्रतिबन्धकान्तरस्य चानिरूपणादनादिभावरूपाज्ञानमेष्टव्यमित्याह—*तस्मादिति*॥ अखण्डतमोगुणस्य तत्प्रतिबन्धकत्वान्न परिशेषादज्ञानसिद्धिरिति शङ्कते—*ननु द्रव्यान्तरमिति*॥ प्रमाणाभावान्नैवमित्याशङ्क्य, "ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत"त्युभयसिद्धस्य तमसः प्रतिबन्धकत्वसम्भवान्नाज्ञानकल्पनमित्याह—*किमज्ञानेति*॥ विकल्पासहत्वान्नैवमित्याह—*नैतदिति*॥ द्रव्यान्तरं नित्यम्? अनित्यं वा? नाद्य इत्याह—*ब्रह्मेति*॥ कुम्भप्रतिपत्तिप्रतिबन्धकसंतमसध्वंसे कुम्भोपलम्भवत् प्रतिबन्धकभङ्गे ब्रह्मप्रतिपत्तिर्वक्तव्या, नच नित्यत्वे तद्भङ्गः सुकर इत्यर्थः। द्वितीयेऽपि तत्किं कर्मणा निवर्त्यते? उत ज्ञानेनेति? नाद्यः; मानाभावात्, अयुक्तेश्चेत्यभिप्रेत्य द्वितीयं दूषयति—*ज्ञानेति*॥

वार्तिकम्

ज्ञानयोरप्यविवेक इति चेत्, न; एकस्मिन्नपि घटादावविविक्तेऽर्थे विविक्तानेकज्ञानदर्शनात्, अनेकस्मिन्नपि विविक्तेऽर्थेऽविविक्तसमूहालम्बनज्ञानदर्शनाच्च। नार्थाविवेकेन ज्ञानाविवेकः संभवति; उभयतो व्यभिचारात्। कथं वाऽर्थयोरप्यविवेकस्तव मते संभवति? ग्रहण-स्मरणाभ्यां तयोः स्वरूपग्रहात्। स्वरूपग्रहेऽपि विशेषो न गृहीत इति चेत्, मा गृह्यताम्; किं तावता? स्वरूपभेदस्य तु गृहीतत्वाद्विवेकावश्यंभावात्। न हि स्वरूपातिरिक्तो वैधर्म्यं भेदस्त्वयाऽङ्गीक्रियते, येन तदग्रहादविवेकः स्यात्। तदङ्गीकारेऽपि न भवत उक्तदोषान्निस्तारं पश्यामः; स्मृतिविषयाद्रजताद्वैधर्म्यस्यापि पुरोदेशवर्तित्वरूपेदंत्वस्य शुक्तौ ग्रहात्। न हि स्मृते कदापि पुरोदेशवर्तित्वं गृहीतं भवति; स्मृतित्वभङ्गापत्तेः। स्मृत्या रजते तदग्रहेऽपि प्रत्यक्षेण तद्विषये तस्मिन् तद्ग्रहादिदंत्वस्य तत्रापि सत्त्वेन न तद्विधर्मतेति चेत्, न; शुक्तिगतेदंत्वाद् रजतगतेदंत्वस्य भिन्नत्वात् तद्विधर्मत्वोपपत्तेः। न हि पुरोवर्तित्वमनुगतमेकमस्ति, येन तत्साधर्म्यं स्यात्; शुक्ति-रजतयोः पुरोदेशसंयोगयोर्भिन्नत्वात्। संयोगयोरस्ति संयोगत्वेन साधर्म्यमिति चेत्, किमागतं शुक्ति-रजतयोः? परम्परासम्बन्धाया जातेरेवोपाधित्वादस्ति तथाऽपि परम्परया साधर्म्यमिति चेत्, एवं तर्हि सर्ववैधर्म्योच्छेदप्रसङ्गः; परम्परया सर्वस्य सर्वसाधर्म्यकल्पनासंभवात्। अथ इदंत्वयोर्भिन्नत्वेऽपि सादृश्यादविवेक इति चेत्, न, सादृश्यस्याविवेकाहेतुत्वात्।

पञ्चपादिकाविवरणम्

अत्र कश्चित्—भेदाभेदाभ्यां सर्वसंकरवादी वेदान्तार्थगहनसम्प्रदायहीनो दुर्ज्जनरमणीयां वाचं जल्पति—न किलाग्रहण-मिथ्याज्ञान-तत्संस्कारेभ्योऽन्यत् सकलसंसारबीजभूतमवस्थात्रयेऽप्यनपाय्याऽऽसंसारविमोक्षाद्दण्डायमान-

ऋजुविवरणम्

साधनं कृत्वा परपक्षं दूषयितुमाह—*अत्र कश्चिदिति* ॥ वेदान्तार्थश्चासौ गहनश्चेति वेदान्तार्थगहनः, तत्र संप्रदायहीनः। अथवा—वेदान्तार्थे गहनः संप्रदायहीनः, गहनश्चासौ संप्रदायहीनश्चेति विग्रहः। सम्यक् संप्रदायशून्य]

तत्त्वदीपनम्

तत्र स्वपक्षं प्रसाध्य परपक्षं प्रतिक्षेप्तुं तमुत्थापयति—*अत्रेति* ॥ भाट्टमताद्विशेषमाह—*सर्वेति* ॥ पञ्चस्थलेष्वेव भेदाभेदौ भाट्टमते, अस्य तु सर्वत्रेति विशेषः। जल्पने हेतुमाह—*वेदान्तार्थेति* ॥ वेदान्तव्याख्यातृत्वात्तस्यापि संप्रदायवित्त्वम्, तत्राह—*गहनेति* ॥ वेदान्तार्थश्चासौ गहनश्चेति वेदान्तार्थगहनः, तत्र संप्रदायहीन इत्यर्थः। वेदान्तार्थे गहनो यः संप्रदायस्तद्धीन इति वा विग्रहः। तर्हि तज्जल्पननिरासप्रयासो मुधा, तत्राह—*दुर्जनेति* ॥ *दुर्जनाः = श्रौत-स्मार्तमार्गाननुसारिणः। जल्पनमाह—*न किलेति* ॥ संसारकार्यानुपपत्त्याऽज्ञानं कल्प्यते, इत्याशङ्क्य परमार्थत्वान्न तस्याज्ञानकार्यत्वमित्याह—*सकलेति* ॥ "सता सोम्य तदा सम्पन्नो भवति" इत्यादिवाक्यात् सुषुप्तौ ब्रह्मभावप्रतिपत्तेर्नाज्ञानलक्षणं प्रतिबन्धकमस्ति, ततश्च न तस्य संसारहेतुत्वमित्याह—*अवस्थात्रयेऽपीति* ॥ "एतं ब्रह्मलोकं न विदन्ति" "सति संपद्य न विदु"रिति चाज्ञानस्थितिप्रतिपत्तेर्वचनान्तरस्य च विक्षेपाभावाभिप्रायत्वादज्ञानस्य कथं संसारहेतुत्वाभाव इत्याशङ्क्याह—*आसंसारेति*॥ संसारविमोक्षात् प्रागविच्छिन्नम्, उत्तरकाले च विच्छिन्नमज्ञानं नेत्यर्थः। चित्प्रकाशस्याविरोधित्वाद् जडप्रकाशस्य च सुतरामविरोधित्वान्नाज्ञाननिवृत्तिसम्भव इत्यर्थः ॥

वार्तिकम्

तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वस्य सादृश्यत्वात्, प्रत्युत सादृश्यग्रहे विवेकस्यैव संभवात्। अन्यथा गो-गवययोः सादृश्यग्रहेणाविवेकादुपमानोच्छेदापत्तेः। तवापि मते सादृश्यस्याविवेकाहेतुत्वे कथं भ्रमहेतुत्वमिति चेत्, न ; संस्कारोद्बोधद्वारैव तस्य तथात्वकल्पनात्, नाविवेकद्वारा ; अविद्याया एव तद्द्वारत्वात्। अधिष्ठानावृतिमन्तरेणान्याविवेकस्य भ्रमहेतोरनभ्युपगमात्, पराभ्युपगतविवेकाग्रहस्य प्रतिबन्धकाभावत्वेन कारणत्वानुपपत्तेरित्युक्तत्वाच्च। *एतेन*—शुक्तिरजतारम्भकशुक्ल-भास्वरद्रव्ययोः सादृश्यादविवेकः—*प्रत्याख्यातः* ॥ तस्मान्न शुक्तिरजतेदमंशयोरविवेकात्तयोरविवेकः। किञ्च कथं वेदंरजतविषये ग्रहण-स्मरणे प्रवर्तके भवतः ? न तावत् प्रत्येकम् ; अतिप्रसङ्गात्, अनिष्टेऽपीदमिति ज्ञानदर्शनात्, अतीतेऽपि रजते रजतमिति ज्ञानभावाच्च। नापि मिलिते ; युगपद् ज्ञानद्वयासंभवेन तयोर्मेलनासंभवात्, परमते मनसः क्रमकारिकारणत्वात्। निरन्तरोत्पन्नयोस्तयोर्विनश्यदवस्थयोः प्रवर्तकत्वमिति चेत्, न ; घट इति पट इति च तादृशघटपटज्ञानयोरप्येकतरस्मिन् प्रवर्तकत्वप्रसङ्गात्, सादृश्यज्ञानादिना व्यवधानेन तयोर्निरन्तरोत्पन्नत्वासंभवाच्च। अस्तु वा निरन्तरोत्पत्तिः ; तथापि तादृशयोर्ज्ञानयोः कुत्रापि प्रवर्तकत्वादर्शनान्न तत्कल्पने प्रमाणमस्ति। दृष्टं सुरभि चन्दनमित्यत्रेति चेत्, न ; तत्रापि ज्ञानैक्यस्य प्रदर्शितत्वात् ॥

एतेन—प्रत्यभिज्ञाया ग्रहण-स्मरणरूपज्ञानद्वयात्मत्वम्—*प्रत्युक्तम्* ; तथा सति ग्रहण-स्मरणाभ्यां परस्परविषयानाकलनाद् न तया स्थायित्वसिद्धिः। *तद्विषयस्सन्नेवेति चेत्, न ; तत्र वस्तुतो विद्यमानविषयत्वेऽपि तेन स्वविषयविद्यमानत्वस्याग्रहात्। न हि स्मरणं स्वविषयविद्यमानतां गृह्णाति ;

पञ्चपादिकाविवरणम्

मज्ञानं नामास्ति, किन्तु भ्रान्तिज्ञानमग्रहणं वाऽज्ञानम्—इति, *अयं प्रष्टव्यः*—केयं भ्रान्तिरिति ? अहंकारादिशरीरपर्यन्तेऽनात्मन्यात्मबुद्धिरिति चेत्, अहो विस्मरणशीलता सर्वत्र सङ्कीर्णचेतसः। खण्डो गौरित्यादिभेदाभेदप्रत्ययं प्रमाणमुपपादयन् 'अहं मनुष्यः' इति प्रत्ययं भेदाभेदविषयं किमित्युपेक्षसे ? 'नाहं मनुष्यो ब्रह्मास्मी'ति प्रत्ययसामर्थ्यादिति चेत्, तन्न ; 'नायं खण्डो गौः ; किंतु मुण्डो गौरि'ति प्रत्ययेऽपि खण्ड-मुण्डाभ्यां गोत्वस्याभेदवत् शरीर-ब्रह्मभ्यां जीवस्याभेदप्रत्ययस्यापि प्रामाण्योपपत्तेः। इदं रजतवद् भ्रान्तिरिति चेत्, न ; खण्डो गौरित्यत्रापि तथात्वप्रसङ्गात्, 'नायं खण्डो गौः, किंतु मुण्डः' इति व्यक्त्यन्तरे खण्डस्य गोत्वोपाधौ निषेधप्रत्ययसामर्थ्यात् तत्र व्यवहारानुच्छेदात् प्रामाण्यमिति चेत्, तत्—'अहं मनुष्यः' इत्यत्रापि तुल्यम् ;

ऋजुविवरणम्

इत्यर्थः। *इदं रजतवद्भ्रान्तिरिति* ॥ *अयं भावः*—प्रतिपन्नोपाधौ निषेधाद्रजतमिथ्यात्ववज्जीवोपाधावेव निषेधान्मिथ्यात्वम्, खण्डे तु व्यक्त्युपाधौ निषेधादभ्रान्तित्वमिति। *ननु* खण्डे व्यक्त्यन्तरे निषेधादर्शनादभ्रान्तत्वमुक्तमित्याशङ्क्याह—*गोत्वोपाधाविति* ॥ व्यक्त्यन्तरावच्छिन्नगोत्वोपाधौ निषेधो न व्यक्तौ ; मुण्डव्यक्तौ खण्डत्व-

तत्त्वदीपनम्

किं तर्ह्यनवभासनिमित्तमिति शङ्कते—*किंत्विति* ॥ अग्रहणाद्येवानवभासनिमित्तमित्याह—*भ्रान्तीति* ॥ चशब्दात्संस्कारस्याज्ञानत्वमुक्तम्। भ्रान्तेरज्ञानत्वे निरस्तेऽर्थात्तत्संस्कारस्याज्ञानत्वं निरस्तं स्यात्, अग्रहणं त्वयोग्यतया प्रतिषिद्धमित्यभिप्रेत्य भ्रान्तिं निरस्यति—*अयं प्रष्टव्य इति* ॥ भिन्नाभिन्नविषयत्वेन सर्वप्रत्यययाथार्थ्यान्न भ्रान्तिसिद्धिरिति किंशब्दार्थः ॥

प्रश्नं मत्वोत्तरमाह—*अहंकारेति* ॥ सिद्धान्ती सोपहासमाशयमाविष्करोति—*अहो इति* ॥ विस्मरणशीलत्वमाह—*खण्ड इति* ॥ विमतम्, प्रमाणम्, भिन्नाभिन्नविषयत्वात् ; खण्डो गौरिति प्रत्ययवदित्यर्थः। विमतम्, अप्रमाणम्, निषिध्यमानविषयत्वात् ; इदं रजतमिति प्रत्ययवदित्यनुमानविरोधं शङ्कते—*नाहमिति* ॥ निषिध्यमानविषयत्वमात्रं हेतुः ? उत प्रतिपन्नोपाधौ निषिध्यमानविषयत्वम् ? नाद्यः ; व्यभिचारादित्याह—*तन्न, नायमिति* ॥ द्वितीयमनुवदति—*इदंरजतवदिति* ॥ इदमि प्रतिपन्नं रजतं तत्रैव निषिध्यते—नेदं रजतमिति यथा, तथाऽऽत्मनि प्रतिपन्नं मनुष्यत्वं तस्मिन्निषिध्यत इति तस्य भ्रान्तित्वम्। 'खण्डो गौरि'त्यस्य तु तद्वैपरीत्यान्न भ्रान्तित्वमित्यर्थः। एषोऽपि हेतुस्तत्र व्यभिचरतीत्याह—*न ; खण्डो गौरिति* ॥ गोत्वोपाधौ प्रतिपन्नस्य खण्डस्य न तत्र निषेधः, किंतु मुण्ड इति न तत्र व्यभिचार इत्याशङ्क्याह—*नायं खण्ड इति* ॥ किं खण्डस्य केवलमुण्डे निषेधः ? उत गोत्वोपहिते ? नाद्यः ; अप्रसक्तेः, 'इह भूतले घटो ने'त्यन्यत्र भूतलसंसृष्टतया प्रतिपन्नस्य स्मर्यमाणस्यान्यत्र निषेधो दृष्टः, नच खण्डः कदाचिदपि मुण्डे प्रसक्त इति कथं निषिद्ध्यते ? द्वितीये गोत्वोपहिते मुण्डे खण्डस्य निषेधसमये विशेषणीभूतगोत्वे निषेधः समाश्रितः स्यात्, यथेदमि प्रतिपन्नमिदंत्वोपहितशुक्तिव्यक्तौ निषिध्यते, तद्वत्। तथाच प्रतिपन्नोपाधौ निषिध्यमानविषयखण्डज्ञाने व्यभिचार इत्यर्थः। गोत्वमुपाधिर्यस्य व्यक्त्यन्तरस्य तद्गोत्वोपाधि, तस्मिन्निति विग्रहः। गोत्वमेवोपाधिर्गोत्वोपाधिस्तस्मिन्निति वा। अनुच्छिन्नव्यवहारत्वमुपाधिरिति चोदयति—*तत्रेति* ॥ नायं खण्डो गौरिति निषेधप्रत्ययोत्तरकालमपि खण्डे गोव्यवहारो लक्ष्यते। नच तथा ब्रह्मसाक्षात्कारादूर्ध्वं मनुष्यत्वव्यवहार इत्यर्थः। साधनव्यापकत्वान्नायमुपाधिः साधुरित्याह—*तदहमिति* ॥ साक्षात्कारोत्तरकालमपि प्रारब्धकर्मानुरोधादहं मनुष्य इति व्यवहारदृष्टेः साधनव्यापकत्वेन प्रामाण्यं स्यादित्यर्थः ॥

वार्तिकम्

तत्र तस्यौदासीन्यात्, अन्यथा स्मृतेः प्रत्यक्षतापत्तेः, रजतादिविषयत्वानुपपत्तेश्च। *एतेन*—अयमिति विद्यमानविषयकानुभवसमानविषयत्वात् स्मृतेरर्थात्तद्विषयविद्यमानत्वसिद्धिरिति—*अपा-

पञ्चपादिकाविवरणम्

मोक्षावस्थायामपि सर्वात्मत्वात् तव सर्वशरीरेन्द्रियाद्यभिमानव्यवहारानुच्छेदात् । जातिव्यक्ति-गुणगुणि-कार्यकारण-

तत्त्वदीपनम्

प्रारब्धकर्मसमाप्तेरूर्ध्वं व्यवहारस्योच्छेदान्न साधनव्यापकत्वमित्याशङ्क्याह—*मोक्षेति* ॥ "तत् केन कं पश्येत्" इति मुक्तौ सकलव्यवहारोच्छेदप्रतिपत्तेः कथमनुच्छेदः ? इत्याशङ्क्यास्मन्मते सर्वस्याबोधविलासत्वात्तद्ध्वंसे ध्वंसः, तव तु समस्तस्य परमार्थत्वादनुच्छेद इत्याशयेनाह—*तवेति* ॥ भिन्नाभिन्नविषयत्वमसिद्धमिति शङ्कते *जातिव्यक्तीति* ॥

वार्तिकम्

स्तम्* ; स्वप्रकाशयोर्ज्ञानयोः परस्परं स्वेन ज्ञानान्तरेण वा समानविषयत्वग्रहासंभवादर्थात् तद्ग्रहासिद्धेः । तस्मात् स्थायित्वमभ्युपगच्छता पूर्वानुभवसंस्कारेन्द्रियाभ्यामुभयकालानुयायिविषयकमेकमेव 'सोऽयम्' इति ज्ञानं जायत इत्यकामेनाप्यभ्युपगन्तव्यम् ॥ अस्त्वेवमनात्मनि ; तद्व्यतिरेकेणानात्मनः स्थायित्वासिद्धेः, नात्मनि तु तदभ्युपगन्तव्यम् । तद्व्यतिरेकेणापि ग्रहण-स्मरणाभ्यामेव तत्स्थायित्वसिद्धेः । तथाहि—स्मरणविषयपूर्वानुभवाश्रयतयाऽऽत्मनः सिद्धः पूर्वकालसम्बन्धः, स्मरणाश्रयतया चैतत्कालसम्बन्ध इत्युभयकालसम्बन्धाद् आत्मनः स्थायित्वसिद्धिरिति चेत्, न ; स्मरणस्य पूर्वानुभवविषयविषयकत्वनियमात्, पूर्वानुभवस्य तु स्वाविषयकत्वेन स्मृतिविषयत्वानुपपत्तेः । *ननु* पूर्वानुभवस्य स्वाविषयकत्वेऽपि स्वप्रकाशतया तत्र भानात् पूर्वानुभवे भासमानत्वस्यैव स्मृतिविषयत्वे प्रयोजकत्वात्, न तद्विषयतया भासमानत्वस्य ; गौरवात्, अतोऽस्ति तद्वीजपूर्वानुभवस्यापि स्मृतिविषयत्वमिति चेत्, न ; तथा सत्यात्मनोऽपि स्मृतिविषयत्वप्रसङ्गः ; तस्याप्याश्रयतया पूर्वानुभवे भासनात् । न चैतदिष्टम् ; अपसिद्धान्तापत्तेः, आत्मनो ज्ञानविषयत्वानङ्गीकाराद् अनात्मज्ञानाश्रयतयैव तज्ज्ञानाङ्गीकारात् । अपिच विद्यमानं हि स्वप्रकाशं ज्ञानमाश्रयतयाऽऽत्मानं भासयति, नाविद्यमानम् ; तस्यास्वप्रकाशत्वेन स्मृतिविषयत्वानुपपत्तेः । तथाच विद्यमानस्य पूर्वानुभवस्य स्मृतिविषयत्वेऽपि न स्वाश्रयतया स्वकालसम्बन्ध्यात्मभासकत्वं स्मृतिकालेऽस्ति । एवं च सति नानात्मस्मृत्याश्रयतयाऽऽत्मन उभयकालसम्बन्धसिद्धिः । अन्यदृष्टस्यान्येनास्मरणात् तदन्यथानुपपत्त्या तयोरेककर्तृकत्वसिद्धेस्तत्सिद्धिरिति, चेत्, सत्यं सिद्ध्यति तदर्थापत्त्या ; किमागतं प्रत्यक्षेण तत्स्थायित्वानुभवस्य ? अनुभूयते च प्रत्यक्षेण स्थायित्वम्—'योऽहं ह्यो रूपमद्राक्षम्, सोऽहमद्य स्मरामी'ति । तस्मादात्मनो ग्रहण-स्मरणाभ्यां प्रत्यक्षस्थायित्वव्यवहारसमर्थनार्थं प्रवृत्तस्य तवार्थापत्तिं प्रदर्शयतो लज्जैव दूरं गता, यतोऽर्थान्तरं नाम निग्रहस्थानं पश्यन्नपि न गणयसि । तस्माद् न कुत्रापि ग्रहण-स्मरणाभ्यां विशिष्टव्यवहारोऽस्तीति सिद्धम् । एवं च सति ज्ञानप्रमाणत्वकल्पनं निर्मूलमेव । अपिच कुत्रचिद् ज्ञानद्वयं प्रवर्तकम्, कुत्रचिदेकमित्यननुगमः । इदंरजतज्ञानत्वेनानुगमान्नैवमिति चेत्, न ; अतिप्रसङ्गात्, 'नेदं रजतम्' इति ज्ञानस्यापि प्रवृत्तिहेतुत्वापत्तेः, तत्रापीदंरजतविषयकज्ञानस्य विद्यमानत्वात् । भेदग्रहस्तु तत्र प्रतिबन्धक इति चेत्, सत्यं प्रतिबन्धसत्त्वे कार्यं न जनयेत्, वनस्थदण्ड इव घटम्, तज्जननयोग्यता तु दण्डस्येव तस्यापि स्यादेव ; हेतुतावच्छेदकस्य गृहीतत्वात् । नचैवं सति तस्य प्रवृत्तिविरोधित्वेन तद्धेतुत्वं स्वतोऽपायि ; अनङ्गीकारात्, प्रवृत्तिबाधकत्वाभ्युपगमाच्च, अपिच कथमेकस्यैव 'नेदं रजतमि'ति ज्ञानस्य प्रतिबध्यप्रतिबन्धकभावः स्यात् ? तद्भावस्य

पञ्चपादिकाविवरणम्

विशिष्टस्वरूपांशांशि-सबन्धा यत्र विद्यन्ते, तत्र भेदाभेदौ, न शरीरात्मनोः; तेषामभावादिति चेत्, तर्हि शरीर-शरीरिसम्बन्धोऽपि गुणगुण्यादिवद् भेदनिमित्तं किं न स्यात्? अन्यथा सर्वसङ्करवादितया क्षपणकशिष्यता चिरकालसमुपार्जिता बाध्येत। अस्ति च चेतनस्वरूप-शरीरयोः कार्यकारणभावः; चेतनस्वरूपांशस्य ब्रह्मत्वात्, अतो न ते भ्रान्तिरस्ति॥

ऋजुविवरणम्

प्रतीत्यभावात्, तदुपाधिनिषेधायोगादित्यर्थः। *तर्हि शरीरशरीरीति*॥ अयं भावः*—सामानाधिकरण्याद् गुण-गुण्यादिषु पञ्चसु तादात्म्यं निश्चीयते, तदत्राप्यस्तीति शरीरशरीरित्वनिमित्तं तादात्म्यमभ्युपगन्तव्यमिति। *ननु* अन्यथासिद्ध्यप्रतिपत्त्या गुण-गुण्यादिषु तादात्म्यमङ्गीकृतम्, अत्र तु तेन विनापि कथंचित्प्रतीतिघटनान्न तदभ्युपगम्यत इत्याशङ्क्याह—*सर्वसंकरेति*॥ क्षपणकाः सर्वत्र तादात्म्यं वदन्ति। तदनुसारिणापि तथैवाभ्युपगन्तव्यमिति भावः। *ननु*न्यायसहकृतप्रतीतिबलात्तादात्म्यं निश्चीयते, सा च पञ्चस्वेव, नेतरत्र; नियामकाभावेनातिप्रसङ्गादित्याशङ्क्याह—*अस्ति चेति*॥

तत्त्वदीपनम्

अत्यन्तभेदेऽत्यन्ताभेदे च जाति-व्यक्त्यादिभावस्यासंभवाद् भेदाभेदावित्यर्थः। "तेषामभावादि"त्यस्यैषोऽर्थः—न तावच्छरीरात्मनोर्जाति-व्यक्तिता, उभयोर्द्रव्यत्वात्, अत एव न गुण-गुणिभावः; नापि कार्य-कारणता? शरीरस्य भौतिकत्वात्, नापि विशिष्टस्वरूपता; दण्डवैशिष्ट्यस्य चैत्रतन्त्रतावत् शरीरस्यात्मातन्त्रत्वात्, नचांशांशिता; आत्मनो निरवयवद्रव्यत्वादिति। किं तेषां मिलितानां प्रयोजकत्वम्? उत प्रत्येकम्? नाद्यः; मेलनस्य क्वचिदप्यभावादिति चेतसि निधाय चरमं निरस्यति—*तर्हि शरीरेति*॥ नच प्रयोजकगौरवप्रसङ्गः; त्वयापि तत्स्यैष्टव्यत्वादित्यर्थः। शरीरात्मनोर्भेदाभेदानङ्गीकारे राद्धान्तविरोधोऽपीत्याह—*अन्यथेति*॥ जातिव्यक्त्यादीनामन्यतमस्य प्रयोजकत्वमित्यभिनिवेशश्चेत्सोऽपि सुसंपाद इत्याह—*अस्ति चेति*॥ सकलस्य ब्रह्मकार्यत्वान्न जीवकार्यतेत्याशङ्क्य, जीवस्य तदभेदाद् जीवकार्यत्वमप्यस्तीत्याह—*चेतनेति*॥ असिद्ध्यादिदोषवैधुर्यादनुमानं निरवद्यमित्युपसंहरति—*अत इति*॥ अथवा—असिद्ध्यादिदोषवैधुर्यालोचनयाऽपि भ्रान्तित्वं प्रतिक्षिपति—*अत इति*॥

वार्तिकम्

भिन्नाश्रयत्वात्। यदि स्यात्, ततो निवृत्तिरपि न स्यात्, प्रवर्तकांशेन निवर्तकांशस्यापि प्रकरणसमवत् प्रतिबन्धसंभवात्, विनिगमकहेत्वभावात्। अथैतद्दोषजिहीर्षया स्वाभावाविषयकेदंरजतज्ञानत्वेन प्रवर्तकत्वं वाच्यम्; तथाच सति गौरवम्। अपिच प्रवृत्तिविशेष्य इष्टतावच्छेदकवैशिष्ट्यावगाहि ज्ञानं प्रवर्तकम्, नान्यत्; अतिप्रसङ्गादिति सर्वेषामभ्युपगमः। तथाच "यत्सामान्ययोः कार्यकारणभावग्रहः, तद्विशेषयोरपि तथा" इति न्यायाद् इदमि रजतत्ववैशिष्ट्यावगाहि ज्ञानं तदर्थप्रवृत्तौ कारणं युक्तम्; अनुगमात्, न तद्वैशिष्ट्यज्ञानद्वयम्; उक्तन्यायविरोधात्, उक्ताननुगमगौरवाभ्यां च। *एतेन*—'तद्धेतोरेवे'ति न्यायात् पराभ्युपगत 'विशिष्ट' इति ज्ञानहेतोर्ज्ञानद्वयादेव विशिष्टव्यवहारसिद्धेर्न तत्कल्पनं युक्तम्, प्रमाणाभावादिति—*अपास्तम्*; तत्कल्पनामन्तरेण विशिष्टव्यवहारस्यैवासिद्धेः। नचाधिष्ठानज्ञानवदारोप्यज्ञानमपि भ्रमहेतुरित्यङ्गीकृतमस्माभिः, येनोक्तन्यायानवतारोऽपि संभवति; तत्संस्कारहेतुत्वस्यैव वक्ष्यमाणत्वात्, विशेषणज्ञानस्य विशिष्टव्यवहाराहेतुत्वात्, उभयभानसामग्रीत एव तत्सिद्धेः; "तद्धेतोरि"ति न्यायस्य निरङ्कुशतया तत्रैव प्रवृत्तेः। अपिच त्वयापि विशिष्टप्रवृत्ति-

पञ्चपादिकाविवरणम्

किंच भ्रान्तिज्ञानमन्तःकरणपरिणामश्चेत्, तदाऽऽत्माश्रयाऽविद्या न स्यात्, अन्तःकरणपरिणाम एवात्मन्यध्यस्त इति चेत्, तथाऽप्यन्यथाख्यातिवादिनः संसर्गस्य शून्यत्वादात्माविद्यासम्बन्धो न स्यात्। न चात्मपरिणामो भ्रान्तिः; अपरिणामित्वात्। नच ज्ञानगुणस्य द्रव्यस्य पुनर्ज्ञानगुणान्तराकारेण परिणामः सम्भवति; अवान्तरजातीयस्यैकस्मिन् द्रव्ये गुणद्वयस्य युगपत्समवायायोगात्, नहि पटे शौक्ल्यं युगपत्स-

ऋजुविवरणम्

ननु मुख्यकार्यकारणभावे सत्येव तादात्म्यम्, नान्यत्र; अतिप्रसङ्गात्, अतश्च भ्रान्तिरेवेत्याशङ्क्याभ्युपगम्य दूषणमाह—*किञ्च भ्रान्तिज्ञानमिति*॥ कथमपरिणामित्वमित्याशङ्क्याह—*नच ज्ञानगुणस्येति*॥ कथमयोग

तत्त्वदीपनम्

'अहं मनुष्यः' इत्यादिप्रत्ययानां याथार्थ्यान्न भ्रान्तित्वमित्यवोचत्, संप्रति समवायिकारणपर्यालोचनयाऽपि भ्रान्तित्वं प्रतिक्षिप्यत इत्याह—*किंचेति*॥ किं भ्रान्तिरन्तःकरणपरिणामः? आहो आत्मपरिणामः? इति विकल्प्याद्यमनूद्य दूषयति—*भ्रान्तिज्ञानमित्यादिना*॥ मृज्जस्य घटस्य तन्त्वनाश्रयत्ववदात्माश्रयत्वमज्ञानस्यान्तःकरणपरिणामत्वे न स्यादित्यर्थः। जपाकुसुमलौहित्यस्य स्फटिकेषु स्फुरणवदात्मन्यज्ञानप्रतिभाससंभव इति शङ्कते—*अन्तःकरणेति*॥

भेदाभेदमतेऽध्यास एव न संभवतीत्यभ्यधायि, संप्रति तमङ्गीकृत्योत्तरमाह—*तथापीति*॥ भ्रान्तेरात्मसंबन्धः सन्? असन् वा? न तावत्सत्त्वमित्याह—*अन्यथाख्यातीति*॥ नाप्यसत्त्वम्; परोक्षप्रत्ययानुपपत्तेरित्यर्थः। द्वितीयं प्रत्याह—*नचेति*॥ निरवयवद्रव्यत्वेन परिणामायोग्यत्वादिति हेत्वर्थः। परिणामत्वमङ्गीकृत्य ज्ञानान्तराकारेण परिणामोऽयुक्त इत्याह—*न चेति*॥ सुप्तोत्थितस्य 'न किंचिदवेदिषमि'ति परामर्शाद् ज्ञानमुन्नेयम्, तच्च नित्यम्; करणविरमेऽपि भावात्, तथा चैकज्ञानाश्रयस्य ज्ञानान्तराऽऽकारेण न परिणतिरित्यर्थः। त्वन्मते ज्ञानस्य गुणत्वम्? उत द्रव्यत्वम्? नाद्य इत्याह—*ज्ञानगुणस्येति*॥ नित्यज्ञानगुणस्येत्यर्थः। प्रतिज्ञातेऽर्थे हेतुमाह—*एकस्मिन्निति*॥ एकद्रव्याश्रितरूपरसाख्यगुणद्वयव्यावृत्त्यर्थमवान्तरेति विशेषणम्। कटकाधारहेम्नस्तदैव रुचकाकारानाधारत्ववन्नित्यज्ञानाश्रयस्य ज्ञानान्तराश्रयत्वानुपपत्तेर्द्रव्यत्वपक्षोऽपि दुर्युक्तिक इत्यर्थः। भ्रान्ति-

वार्तिकम्

हेतुत्वसिद्ध्यर्थं ज्ञानयोरसंसर्गाग्रहाद् मानस एकत्वाभिमानोऽङ्गीक्रियते। सोऽयं भवतो बकबन्धनप्रयासः। अतो वरं सर्वजनीनप्रतीतिसिद्धमर्थयोरिवैकं ज्ञानमभ्युपगम्यताम्, किं कुसृष्ट्या? न हि रजत इव शुक्तावपि 'इदं रजतमि'ति प्रतीतौ लौकिकाः परीक्षकाश्च कंचिदपि विशेषं प्रतियन्ति, स्वभावं प्रच्छादयतो भवतो मन्दबुद्धेरन्ये। नच—व्यवहार एव तथा न ज्ञानमिति—वाच्यम्; व्यवहारस्यापि व्यवहर्तव्यज्ञानपूर्वकत्वात्ताद्दृग्ज्ञानमन्तरेणासिद्धेः। अविवेकश्च न व्यवहारः। नचाविवेकोऽपि संभवति, इत्युक्तमेवाधस्तात्। अपिच स्मरणाद्विविच्य स्वसाक्षिकमेव 'इदं रजतमि'त्यनुभवो भासते, तत्कुतो रजतस्मरणप्रसङ्गः? दोषेण स्मरणाभिमानप्रमोषाद् ग्रहणेनाविवेकात् स्मरणमेव तथा भासत इति चेत्, न; विकल्पासहत्वेन स्मरणाभिमानप्रमोषासिद्धेः। *तथाहि*—कस्तावत् स्मरणाभिमानो नाम? किं स्मृतिरेव? किं वा तद्गतो विशेषः? तद्ग्राह्यगतो वा? तत्फलगतो वा? आहो स्वित् स्मरामीति तद्विषयाभिमानो वा? नाद्यः; तथाऽऽत्मनि स्मृतेरेवानुत्पत्ते रजतावभासो न स्यात्। द्वितीयेऽपि स किं पूर्वानुभवविषयत्वम्? तद्देशकालविषयत्वं वा? स इत्याकारो वा? नाद्यः; स्मृतेः पूर्वानुभवविषय-

पञ्चपादिकाविवरणम्

मवैति। तस्मादनादिसिद्धमिथ्याज्ञानानभ्युपगमे न काचित्सर्वसङ्करवादिनोऽविद्या सम्भवति। अनादिमिथ्याज्ञानसम्बन्धोऽप्यात्मन्यज्ञानवत्काल्पनिकत्वादाकाशकार्ष्ण्यवदात्मनः कूटस्थतां न विहन्तीत्यलमतिप्रसङ्गेन। अत्र च प्रत्यक्षानुमानार्थापत्तयोऽनादिभावरूपाज्ञाने प्रमाणत्वेनोपन्यस्ताः। तत्रैवंभूतेन कारणरूपेण कार्य-

ऋजुविवरणम्

इत्याशङ्क्यादर्शनादित्यभिप्रायेणाह—*नहि पट इति* ॥ *ननु*आत्मनो मिथ्याज्ञानसंबन्धोऽङ्गीकर्तुं न शक्यते; कूटस्थत्वात्, तत्संबन्धे च विकारित्वप्रसङ्गादित्याशङ्क्याह—*अनादिमिथ्याज्ञानेति* ॥

*ननु*उपरिष्टादप्यज्ञानसाधनं क्रियते, अतः पौनरुक्त्यमित्याशङ्क्याह—*अत्र चेति* ॥ अज्ञानस्वरूपसाधनमत्र क्रियते, तत्र त्वधिष्ठानदृष्टप्रमाणविभागाभावाद् दोषत्रयाभावान्नाध्यास इत्याक्षिप्ते, अज्ञानस्यैव प्रमाणादिदोषत्वं तद्विभागहेतुत्वं चोपपद्यत इत्युक्तम्—"उच्यते, विद्यत एवे"त्यादिना। अत्राज्ञानरूपेण नैसर्गिकत्वमित्युपसंहर्तुमज्ञानसद्भाव उक्तं प्रमाणं व्यवहितत्वात्परामृशति—*अत्र चेति* ॥ यद्वाऽर्थापत्त्यनुमानप्रत्यक्षाणामसाधारणविषयभेदमाह—*अत्र च प्रत्यक्षेति* ॥ अत्र टीकाकारेणाविरोधेनोपसंहारः कृतः; सोऽनुपपन्नः; अज्ञानसाधनमात्रेण विरोधस्यापरिहृत-

तत्वदीपनम्

ज्ञानासंभवेऽपि संस्कारोऽग्रहणं वा किं न स्यादिति शङ्कामुपसंहारव्याजेन निरस्यति—*तस्मादिति* ॥ मिथ्याज्ञानाभावान्न तत्संस्कारसंभवः, नाप्यग्रहणम्; ग्रहणस्य स्वभावतया तदभावासंभवादित्यर्थः ॥

कूटस्थेऽज्ञानसंबन्धासंभवमाशङ्क्याह—*अनादीति* ॥ अथवा—आत्मन्यज्ञानाभ्युपगमे ज्ञानेन निरासो वक्तव्यः, नच स सम्भवति; धर्मान्यथात्वे आम्रफलवद्धर्मिण्यन्यथात्वप्रसक्तेः, इत्याशङ्क्य धर्मस्य समारोपितत्वान्मैवमिति परिहरति—*अनादीति* ॥ इष्टानिष्टसाधनज्ञानपूर्विके प्रवृत्तिनिवृत्ती, ते च न सर्वसंकरमते संभवतः; संकीर्णत्वात्सर्वस्येत्यादिदोषग्रहग्रस्तत्वाज्जीवनमपि दुर्लभमित्यभिप्रेत्योपसंहरति—*अलमतिप्रसङ्गेनेति* ॥ अज्ञानस्योत्तरत्रापि साध्यमानत्वात्पौनरुक्त्यमित्याशङ्क्य परिहरति—*अत्रेति* ॥ उत्तरत्र प्रमाणान्तरस्योच्यमानत्वान्न पौनरुक्त्यमित्यर्थः। प्रागसतो निमित्ताधीनसत्ताकत्वं नैमित्तिकत्वमिति द्वितीयं कल्पं निराकुर्वन्नज्ञानसाधनफलमाह—*तत्रैवंभूतेनेति* ॥ टीकायामतःशब्दो मिथ्याज्ञाननिमित्त इत्यनेन संबध्यते, कार्यस्य सुषुप्त्यादौ कारणात्मनाऽवस्थितस्य पुनः समयान्तरेऽभिव्यक्तिरतःशब्दार्थः ॥

वार्तिकम्

विषयकत्वनियमेन पूर्वानुभवविषयत्वासिद्धेरुक्तत्वात्। *एतेन*—तद्ग्राह्य-फलगतौ विशेषौ—*निरस्तौ*; अनुभवग्राह्य-फलयोरेव तद्ग्राह्यफलत्वात्। नापि द्वितीय-तृतीयौ; प्रत्यभिज्ञाभ्रमे तद्रूपयोः सत्त्वेऽपि विवेकाभावदर्शनात्। नापि पञ्चमः; उक्ताभिमानस्य ग्रहण-ग्रहीतृ-ग्राह्येभ्यः स्मरण-स्मर्तृ-स्मार्य-विवेकाधीनत्वेन तदधीनविवेकासिद्धेः, तद्विवेकमन्तरेण तत्र स्मरामीत्यभिमानानुवेधानुपपत्तेः। तस्मान्न त्वदभिप्रेतस्मरणाभिमानं पश्यामः, यत्प्रमोषादविवेकेन 'स्मरणस्य' ग्रहणवदवभासनमिति। *एतेन*—दोषेण तत्ताप्रमोषो भवतीत्यपि—*प्रत्याख्यातम्*; सत्यपि दोषे प्रत्यभिज्ञाभ्रमस्थले तददर्शनात्, असत्यपि च दोषे पदजन्यपदार्थस्मृतौ तद्दर्शनात्। *ननु*—एवं तर्हि स्मृतेरत्रैव यावदनुभूतविषयत्वनियमो भज्येत, शक्तिग्रहरूपपूर्वानुभवविषयतद्देश-काल-तच्छक्तीनां पदार्थस्मरणेनाविषयीकरणात्, विषयीकरणे वा तेषामपि पदार्थत्वप्रसङ्गात्। नच—अनुभूतविषयत्वमेव स्मृतेर्नियम्यते, न यावदनुभूतविषयत्वमिति—वाच्यम्; तथा सति विनिगमककारणाभावाद् न्यूनविषयत्ववदधिकविषयत्वस्यापि सम्भवादुक्त-

पञ्चपादिका

पुनरुद्भवति, इत्यतो नैसर्गिकोऽप्यहङ्कार-ममकारात्मको मनुष्याद्यभिमानो लोकव्यवहारो मिथ्याऽज्ञान-निमित्त उच्यते, न पुनरागन्तुकत्वेन ; तेन नैसर्गिकत्वं नैमित्तिकत्वेन न विरुध्यते ॥

"अन्योन्यधर्मांश्चे"ति पृथग्धर्मग्रहणं धर्ममात्रस्यापि कस्यचिदध्यास इति दर्शयितुम् । *इतरेतराविवेकेनेति* ॥ एकतापत्त्यैवेत्यर्थः । कस्य धर्मिणः कथं कुत्र चाध्यासः ? धर्ममात्रस्य वा क्वाध्यासः ? इति भाष्यकारः स्वयमेव वक्ष्यति । "अहमिदं ममेदमि"त्यध्यासस्य स्वरूपं दर्शयति । अहमिति

पञ्चपादिकाविवरणम्

रूपेण च नैमित्तिकत्व-नैसर्गिकत्वे न विरुद्धे इत्युपसंहरति—*अतो नैसर्गिकोऽप्यहङ्कार इति* ॥ *"अन्योन्य-धर्मांश्चे"त्यादिरध्यासस्वरूपं दर्शयतीत्यन्तो ग्रन्थः स्पष्टार्थः* ॥

वार्तिकम्

नियमस्यैवासिद्धेरिति—चेत्, *न* ; पदार्थस्मृतेः शक्तिग्रहमूलघटमात्रानुभवस्यैव मूलत्वात् तन्नियम-सिद्धेः । नच—एवं रजतस्मरणमपि देश-कालादिरहितरजतमात्रानुभवमूलमस्तु, तथाच तस्य स्मृतित्वेऽपि न तत्तोल्लेख इति—वाच्यम् ; त्वया तस्य तथात्वानङ्गीकारात्, अङ्गीकारे वा पदार्थ-स्मृतिवदेव दोषाप्रतिबद्धस्मरणाभिमानत्वाद् दोषकल्पने प्रमाणाभावाच्च विवेकग्रहः स्यादिति । 'नेदं रजतमि'ति बाधानुपपत्तेरपि नाख्यातिवादः साधुः ; तेनेदमि रजताभावावगाहनात्, प्रसक्तस्यैव प्रति-षेधात् । नचाख्यादिवादे तत्प्रसक्तिः संभवति ; अविवेकमात्रस्य तेनाङ्गीकारात् । *ननु*—उक्तम्—'नेदं रजतमि'ति प्रतियोगिसमानाधिकरणाभावप्रत्ययश्चेद् 'घटः पटो ने'तिवदिदं-रजतयोरन्योन्याभाव एव तद्विषयः, न तस्मिंस्तदत्यन्ताभाव इति—चेत्, *सत्यम्* ; अस्तु नामैवम् ; तथाऽपि तादात्म्येन प्रसक्तस्यैवा-न्योन्याभावप्रतियोगित्वात् तत्प्रसक्तिः स्यादेव । न ह्यन्योन्याभावस्य तत्प्रतीतिविषयत्वाभ्युपगमेऽस्माकं काचि-द्धानिरस्ति, किन्त्वनुगुण एव ; रजततादात्म्यारोपस्यैव तत्राङ्गीकारात् । नचान्यत्रेवात्राप्याहार्यतस्तत्प्र-सक्तिः, तथा सति तद्वदेव तत्प्रतीतेर्बाधत्वप्रसिद्ध्यनुपपत्तेः । नचाहार्यारोपोऽपि त्वयाऽङ्गीक्रियते ; तथा सति तद्वदेवान्यत्रापि तत्प्रसङ्गादख्यातिवादहानापत्तेः, नचात्यन्ताभावान्योन्याभावयोराजानतो भेदोऽप्यस्ति । *तथाहि*—यदा हि तादात्म्यमवच्छेदकीकृत्य स्वसमानाधिकरणतया घटात्यन्ताभावः पटे गृह्यते—'घटः पटो ने'ति, तदाऽन्योन्याभाव इति व्यपदिश्यते । अन्योन्यभावः परस्परतादात्म्यम् ; तदत्यन्ताभाव इति यावत् । नच—एवमन्योन्यात्यन्ताभाव इति व्यपदेशः स्यात्, नान्योन्याभाव इति—वाच्यम् ; अभावान्तरस्य तादात्म्यप्रतियोगिकस्यासंभवादत्यन्तेतिविशेषणकृत्याभावात्तथा व्यपदेशासिद्धेः । स यदाऽन्यसंसर्ग-मवच्छेदकीकृत्य प्रतियोगितावच्छेदकव्यधिकरणतया गृह्यते—'पटे घटो नास्ति' 'पटे घटतादात्म्यं नास्ती'ति वा, तदाऽत्यन्ताभावव्यपदेशं स एव लभते ; तत्रात्यन्तपदस्य प्राक्कालाद्यवच्छिन्नप्रागभावादिवारकत्वेन सार्थकत्वात्, कालत्रयानवच्छिन्नत्वस्यात्यन्तपदार्थत्वात्, तस्य चोभयत्र तुल्यत्वात् । अतस्तयोर्व्यपदेश-भेदमात्रम्, न स्वरूपभेद इति युक्तमुत्पश्यामः । *ननु*—अन्योन्याभावात्यन्ताभावयोरभेदे कारणेऽपि कार्यात्यन्ताभावः स्यात् ; तत्र कार्यान्योन्याभावस्य विद्यमानत्वादिति—चेत्, *न* ; कार्यकारणयोस्तादा-त्म्यादन्योन्याभावासिद्धेः । न हि ययोस्तादात्म्यम्, तयोस्तदत्यन्ताभावरूपान्योन्याभावः संभवति ; व्याघातात् । यदि भवता कारणयोरन्योन्याभावोऽङ्गीक्रियते, स्वीक्रियतां तर्हि तत्र तदत्यन्ताभावोऽपि ;

पञ्चपादिका

तावत्प्रथमोऽध्यासः । *ननु* अहमिति निरंशचैतन्यमात्रं प्रतिभासते, नांशान्तरमध्यस्तं वा,

पञ्चपादिकाविवरणम्

निष्कलङ्कचैतन्यैकताने निरंशानन्दैकरसेऽज्ञानादिसाक्षिण्यनादिसिद्धेऽप्यज्ञानाध्यासे, कादाचित्कमध्यासमाश्रि-

ऋजुविवरणम्

त्यादित्याशङ्क्य, तन्निवृत्तौ तात्पर्यमाह—*तत्रैवंभूतेनेति* ॥ कथम्—'अहमि'त्यध्यासस्वरूपप्रदर्शनम् ? अहंकारादीना-मप्यनध्यस्तत्वस्योक्तत्वादित्याशङ्क्याऽऽत्मसामानाधिकरण्यप्रतीत्या तदात्मत्वं प्रतीयते ; तच्चाध्यस्तमिति वक्तुं सत्यतः तदात्मतां निराकरोति—*निष्कलङ्केत्यादिना* ॥ आत्मनस्तद्रूपता स्वाभाविकी स्यात्? आगन्तुकी वा ? आगन्तुकत्वेऽपि सहेतुका वा ? निर्हेतुका वेति विकल्पे स्वाभाविकत्वं न संभवतीत्याह—*चैतन्यैकतानेति* ॥ द्वितीयं दूषयति—*निष्कलङ्केति* ॥ तृतीयं निराकरोति—*निरंशेति* ॥ न हि निरवयवं स्वतः परिणमत इत्यर्थः । *ननु* चैतन्यैक-तानेऽप्यानन्दरूपत्ववत्प्रपञ्चस्वरूपताऽपीत्याशङ्क्याह—*आनन्दैकरस इति* ॥ आत्मनि प्रपञ्च एव मा भूदित्याशङ्क्याह—*अज्ञानादीति* ॥ प्रतीयते प्रपञ्चः, परमार्थत्वं च न संभवतीति ; मिथ्येत्यर्थः । अथवा—चैतन्यैकतानेऽप्यानन्दै-करसत्ववत्प्रपञ्चैकरसत्वमपि स्यादिति, नेत्याह—*अज्ञानादीति* ॥ तर्ह्यहमध्यासस्य प्राथम्योक्तेरज्ञानस्यानध्य-स्तत्वमित्याशङ्क्याह—*अनादिसिद्धेऽपीति* ॥ कथमनादिसिद्धेऽप्यध्यासान्तरेऽहमध्यासस्य प्राथम्यमित्याशङ्क्याह—*कादाचित्कमिति* ॥ *अत्र संग्रहः*—

सिद्धे हि सर्वस्य मृषात्वरूपे युज्येत वक्तुं प्रथमत्वमत्र । तदात्मकत्वप्रतिभासनेन सत्यं तदेवेति निवारणाय ॥
स्वाभाविकं तस्य तदात्मकत्वमागन्तुकत्वेऽपि सहेतुकं वा । निर्हेतुकं वेति विकल्पमध्यमन्निष्कलङ्केति निराकरोति ॥
आद्यस्य पक्षस्य निवारणाय चिदेकतानत्वमनंशता तु । तृतीयपक्षस्य निवारणार्थमानन्दसाम्येन तदात्मकत्वम् ॥
आनन्दैकरसत्वेन निवार्य पुनरेव हि । प्रपञ्चैकरसत्वं तत्साक्षित्वेन निरस्यते ॥
अज्ञानमेवं न भवेदनादि नाध्यस्तरूपं यदि वा भवेत्तत् । प्राथम्यहानिर्यदि वाहमः स्यात्त्रेधेति शङ्कोत्तरभागवार्या ॥

अथवा—अहमध्यसस्य प्राथम्यप्रतीतेरज्ञानमनध्यस्तमेव भवत्वित्याशङ्क्याज्ञानेन विनाऽध्यासान्तरासंभवात् तदध्यासोऽङ्गीकर्तव्य इति प्रतिपाद्यते । कथमसंभवः ? उच्यते ; अध्यासे सर्वत्र दोषः, अधिष्ठानविशेषाप्रतिभासः, अधिष्ठानस्य द्व्याकारत्वमित्याद्यपेक्षितम्, तदत्र न संभवतीत्याह—*निष्कलङ्केत्यादिना* ॥ निष्कलङ्केति दोषाभाव उक्तः । "चैतन्यैकताने"त्यनेनाप्रतिपत्त्यभावः । "निरंशे"त्यनेनाधिष्ठानसामान्यविशेषद्रष्ट्रादिविभागाभावः । *ननु* आनन्दाकारोऽप्रतीयमानोऽस्त्येव, ततो द्व्याकारत्वमपि संभाव्यते, किमज्ञानेन ? इत्याशङ्क्याह—*आनन्दैक-रसेति* ॥ अज्ञानाभावे तदप्रतीतिरपि न संभवेदिति भावः । *ननु*एवमपि कारणान्तरमेव सिद्ध्येत्, नाज्ञानमे-वेत्याशङ्क्याह—*अज्ञानादिसाक्षिणीति* ॥ अज्ञानं च तदादि च कारणं चेत्यज्ञानादि, तस्य साक्षिणीति ; अज्ञानाव-भासक इत्यर्थः । तर्ह्यज्ञानमनध्यस्तमेष्टव्यम्, प्राथम्यं वाऽहमध्यासस्य हेयम् ; परस्परविरोधात्, इत्याशङ्क्याह—

तत्त्वदीपनम्

अनवभासहेत्वज्ञानाध्यासस्य प्राथम्यादहंकाराध्यासस्य कथं प्राथम्यमुक्तमित्याशङ्क्याह—*निष्कलङ्के-त्यादिना* ॥ अज्ञानाध्यासेऽनादिसिद्धेऽपि कादाचित्कमध्यासमाश्रित्य प्राथम्यमाहेति संबन्धः । अनवभास-स्याऽऽगन्तुककलङ्कनिमित्तत्वं निराकर्तुमाद्यं विशेषणम् । अवभासहेत्वभावादनवभासं व्यावर्तयितुम्—*चैतन्येति* ॥ निरंशेंऽशस्य दुःखरागादेः स्वतोऽसंभवात्तद्धेतुत्वेनाप्यज्ञानाध्यास आश्रयणीय इत्याह—*निरंशेति* ॥ बोधैकस्वरूपेऽ-ज्ञानादेः स्वतोऽसंभवादध्यस्तत्वं वक्तव्यमित्याह—*अज्ञानादीति* ॥ संशयादिरादिशब्दार्थः ॥

पञ्चपादिका

यथाऽध्यस्तांशान्तर्भावः, तथा दर्शयिष्यामः । *ननु* 'इदमि'त्यहङ्कर्तुर्भोगसाधनं कार्यकरणसङ्घातोऽ-

पञ्चपादिकाविवरणम्

त्याह—*अहमिति तावत्प्रथमोऽध्यास इति* ॥ *ननु* 'इदं रजतमि'तिवदध्यासे द्वैरूप्य'मह'मित्यत्रापि वक्तव्यम्, 'अहमि'ति चैकरूपेणावभासते, अतो नाध्यास इति चोदयति—*नन्वहमिति निरंशचैतन्यमात्रमिति* ॥ यथा

तत्त्वदीपनम्

अहमित्यत्र ग्रन्थे अंशान्तराभावमाशङ्क्यांशान्तरं समर्थितम्, तदसंगतम्; पूर्वपक्षसिद्धान्तानुपयोगादित्या-शङ्क्यांशान्तरनिरसनमध्यासाभावोपयोगीत्याह—*नन्विदं रजतमिति* ॥ अंशान्तरसिद्धावध्याससिद्धिरिति सिद्धा-

वार्तिकम्

उक्तन्यायस्यैवात्यन्ताभावरूपत्वात्। नचैतावताऽस्माकं किंचिदनिष्टं प्रसञ्जितं भवति; कार्यमिथ्या-त्वस्याभ्युपगमात्, प्रतिपन्नोपाधावत्यन्ताभावप्रतियोगित्वस्यैव मिथ्यात्वात्। नच तार्किकमतेऽपि काचिदनुपपत्तिरस्ति; तैरपि संयोगादि-तदत्यन्ताभावयोरेकाधिकरणत्वाङ्गीकारात्। अवच्छेदकभेदेन तदङ्गीकरणमविरुद्धमिति चेत्, न; अवच्छेदकभेदेऽप्यधिकरणाभिन्नत्वाद्विरोधावश्यंभावात्। *ननु*—एकाधिकरणत्वमात्रं न तयोर्विरुद्धम्; कपिसंयोग-तदभावयोरेकस्मिन्नेव वृक्षे युगपदनुभवात्, विरोधो हि नाम क संप्रत्ययः? यन्न प्रमाणेनाधिगम्यते, अधिगम्यते च तयोरेकत्रावस्थितिरबाधितप्रत्यक्षानुभवेन; अतो न तद्विरुद्धम्। किं तर्हि? एकावच्छेदेन तद्विरुद्ध्यते; अप्रतीतेः। न ह्यग्रावच्छेदेन मूला-वच्छेदेन वा संयोगतदभावौ युगपदेकस्मिन् वृक्षेऽनुभूयेते—'अग्रे मूले वा वृक्षः कपिसंयोगी भवति न भवति चेति, अपि त्वग्रे वृक्षः कपिसंयोगी, मूले न' इति। *एतेन*—विरुद्धाविरुद्धत्वे शीतोष्णत्वे इवैकत्र विरुद्धे इति—*अपास्तम्*; प्रमाणेन तयोरव्याप्यवृत्तित्वबोधनात्। अवच्छेदकभेदेन देशभेदादिति चेत्, न; अवच्छेदकभेदेऽपि देशभेदस्य वक्तुमशक्यत्वात्। यद्यग्रादिदेशे वृक्ष एकदेशेन वर्तेत, देशान्तराभावेऽपि वा संयोगादिवद् व्यासज्य, तत एवमवकल्प्येत। न चैवमस्ति; देशानवस्थानात्, संयोगादिवदेवैकदेशग्रहेणावयव्यध्यक्षानुपपत्तेश्च। न हि व्यासज्यवृत्ति संयोगादि यावदाश्रयग्रहमन्तरेण गृह्यते; अपसिद्धान्तापत्तेश्च। न हि तार्किकैरवयवेष्वेकदेशेनावयविनो वृत्तिरभ्युपगम्यते, किं तर्हि? व्यक्तिषु घटत्वादिवत् कार्त्स्न्येन। तथाच तदवच्छिन्ने कृत्स्ने वृक्षे संयोगस्य तदभावस्य च वर्तनाद-व्याप्यवृत्तित्वम्; अवच्छेदकभेदेन देशभेदकल्पनानुपपत्तेः। अपि चैकदेशावच्छिन्ने घटे संयोगो भवन् तदेकदेशे भवति? कृत्स्ने वा? नाद्यः; तत्संयोगस्य देशनिष्ठत्वेनावयविन्यभावात्; अन्यथैकदेशे संयोग इत्येव न स्यात्? देशदेशिनोरत्यन्तभेदाभ्युपगमात्, न द्वितीयः; तथासति कृत्स्नवृत्तित्वेना-व्याप्यवृत्तित्वानुपपत्तेः। अपि च निरवयवे ह्याकाशे देशाभावात् कथं संयोगस्याव्याप्यवृत्तित्वं भवद्भिः स्थापनीयम्? समवायदेशाभावेऽपि संयोगदेश आकाशादेरप्यस्तीति चेत्, न; अन्योन्याश्रयापत्तेः—संयोगस्याव्याप्यवृत्तित्वसिद्धौ तत्प्रतियोगिनो भूधरादेरव्याप्यवृत्तित्वेनाकाशदेशत्वम्, सिद्धे च तस्याकाशदेशत्वे तदवच्छेदेन संयोगस्याव्याप्यवृत्तित्वमिति। अपिचाकाशसंयोगो भूधरादिदेशेषु विद्यमानस्तान् व्याप्य वर्तते? अव्याप्य वा? नाद्यः; आकाशेऽपि तस्य व्याप्यवृत्तित्वप्रसङ्गात्। न चैक एव संयोगिनि व्याप्य वर्ततेऽन्यस्मिन्न व्याप्येति कुत्रचिद् दृष्टम्, नवाऽभ्युपगम्यते भवता व्याप्यवृत्तित्वेन; अव्याप्यवृत्तित्वस्वभावहानप्रसङ्गात्, तत्स्वभावत्वस्य संयोगेऽप्यङ्गीकारात्। नच—संयोगस्योभया-

पञ्चपादिकाविवरणम्

द्वैरूप्येणाध्याससम्भवः,तथा वक्ष्यत इत्याह—*यथाध्यस्तांशान्तर्भाव इति*॥ *ननु* अन्तःकरणेन्द्रियाणामात्मनः पृथक्सत्त्वोपलब्ध्यभावादध्यस्ततयैव सिद्धेरात्मतत्त्वावबोधेन च स्वरूपतो विलयश्रवणात्स्वरूपेण संसृष्टरूपेण चात्मन्यध्यस्ततया सिद्धिस्तु, शरीरं पुनरिन्द्रियैरिदंबुद्धिगृहीतत्वात्केवलसाक्षिवेद्यत्वाभावादुत्क्रान्तेऽप्यात्मनि

ऋजुविवरणम्

अनादिसिद्धेऽपीत्यादिना ॥ "यथाऽध्यस्तांशान्तर्भावः" इत्यनेनाध्यस्तांशान्तर्भावो वक्ष्यत इत्येतावन्मात्रमुक्तम् । तत्र चोद्यबीजनिराकरणस्यास्पष्टत्वात् स्पष्टीकरोति—*यथा द्वैरूप्येणेति* ॥ *ननु* इदमित्यनेन शरीरेन्द्रिययोरप्यध्यस्तत्वं न संभवतीति चोदितम्, तदयुक्तम् ; अन्तःकरणन्यायेन तयोरप्यध्यस्तत्वसिद्धेः, पृथक् चोद्यानुपपत्तेरित्याशङ्क्यान्तः-करणेन्द्रिययोरेव समानन्यायेन मिथ्यात्वम्, न शरीरस्य ; चोद्यमपि तद्विषयमेवेत्यभिप्रायं दर्शयति—*अन्तःकरणे-न्द्रियाणामिति* ॥ *पृथक्सत्त्वोपलब्ध्यभावादिति* ॥ इदन्तयाऽऽत्मनोऽन्यतया पृथक्सत्त्वप्रतीतिर्नास्ति, तेनात्मन्यध्य-स्ततेति । *ननु* पृथक् सत्त्वाभावे तदसत्त्वमेव भवेत्, न त्वात्मन्यध्यस्ततेति, तत्राह—*अध्यस्ततयैवेति* ॥ *अथवा*—पृथक्सत्त्वोपलब्ध्यभावादित्यसिद्धो हेतुः ; 'मे मनः' 'ममेन्द्रियाणी'ति प्रतीतिदर्शनादित्याशङ्क्याह—*अध्यस्ततयैव सिद्धेरिति* ॥ साऽपि प्रतीतिराध्यासिकी, न प्रमाणभूतेति भावः । *ननु* सिद्धे मिथ्यात्वे साक्षिमात्रवेद्यतया तदध्यस्तत्वम्, तदभावे चानुमानागम्यत्वेन नाध्यस्तप्रतीतिविषयत्वं वक्तुं शक्यत इत्याशङ्क्याह—*आत्मतत्त्वावबोधेनेति* ॥ *अथवा*—पृथक्प्रतीत्यभावात्तदात्मकत्वेन प्रतीतेः संबन्धाध्यासो भवतु, स्वरूपं त्वनध्य-स्तमेव, यथाऽऽत्मनः केवलस्योपलब्ध्यभावादुपाधिसंसृष्टतयैव प्रतीतेरसंबन्धाध्यासोऽङ्गीकृतः, तद्वदित्याशङ्क्याह—*आत्मतत्त्वावबोधेनेति* ॥ "कार्यकरणसंघात"इत्यनेन शरीरमेव विवक्षितं द्योतयति—*शरीरं पुनरिति* ॥ *ननु* इदंबुद्धिगृहीतत्वं रजतेन्द्रियादिष्वप्यस्ति, नाप्यनध्यस्तत्वम् ; अतः शरीरस्यापि कथमनेनाध्यस्तत्वनिराकरण-मित्याशङ्क्याह—*केवलसाक्षिवेद्येति* ॥ *ननु* नायं सिद्धान्तिनः सिद्धो हेतुः ; केवलसाक्षिवेद्यत्वस्याप्यङ्गी-कारात्, तथा सिद्धे सत्यत्वे केवलसाक्षिवेद्यत्वाभावः, तदभावे तु सत्यत्वसिद्धिरित्याशङ्क्याह—*उत्क्रान्तेऽपीति* ॥ यदि शरीरं साक्षिण्यध्यस्तं भवेत्, तर्हि तदात्मोत्क्रान्तौ तेन सह गच्छेत्, प्रलीनं वा भवेत्, नतु तदुपलभ्येतेति भावः । *ननु* साक्षिणः सर्वगतस्योत्क्रान्तिर्न संभवति, स्वप्नवद्भ्रमनभ्रममात्रत्वात्, अतश्चाव्यतिरेकादात्मन्यध्यस्त-मिति ; अथवा—तदज्ञानपरिकल्पितमन्यदेवेति वक्तुं शक्यते ; तथा सति पृथगुपलब्धिस्सिद्धेयदित्याशङ्क्य साधयति—

तत्त्वदीपनम्

न्तप्रयोजनमाह—*यथेति* ॥ वक्ष्यत इति* ॥ अहंकारटीकायामित्यर्थः । अहंकाराध्यासमाश्रित्य शरीराध्यास आक्षिप्तः—"नन्विदमि"त्यत्र, स नोपपद्यते ; तस्य जडत्वेनाहंकारसमानयोगक्षेमत्वादित्याशङ्क्य तात्पर्यमाह—*न त्वन्तःकरणेति* ॥ न केवलं पृथगुपलब्ध्यभावः, अपि त्वभेदेनेत्याह—*अध्यस्ततयेति* ॥ अधिष्ठानतत्त्वबोधापोद्य-त्वादप्यध्यस्तत्वं युक्तमित्याह—*आत्मतत्त्वेति* ॥ "न तस्य प्राणा उत्क्रामन्ती" त्यादिषु लयश्रवणादित्यर्थः । ततो वैलक्षण्यमाह—*शरीरं पुनरिति* ॥ अध्यस्यमानमधिष्ठानसमानरूपाधिकृततयोपलभ्यते, इदं त्वन्यथेत्याह—*इद-मिति* ॥ आरोपितस्य केवलसाक्षिवेद्यत्वं दृष्टम्, तच्च नेत्याह—*केवलेति* ॥ तत्र हेतुमाह—*इन्द्रियैरिति* ॥ इदम्यारोपितं रूप्यं न ततोऽन्यत्रोपलभ्यते, इदं त्वन्यथेत्याह—*उत्क्रान्त इति* ॥

वार्तिकम्

श्रितत्वविशेष एकस्मिन् पक्षपातो युक्तः ; येन तमाश्रित्याव्याप्यवृत्तिस्वभावत्वं स्यात् , अन्यमाश्रित्य तु व्याप्यवृत्तित्वमिति—वाच्यम् ; तादृशपक्षपाते प्रमाणाभावात्, विपरीतप्रसङ्गस्योक्तत्वाच्च । न द्वितीयः ; आकाशाव्यापकत्वप्रसङ्गात् ; सर्वमूर्तसंयोगित्वस्य विभुत्वेनाभ्युपगमाद् मूर्तैकदेशवृत्तिसंयोगाधार-

पञ्चपादिका

वभासते, ममेदमिति चाहङ्कर्त्रा स्वत्वेन तस्य सम्बन्धः, तत्र न किञ्चिदध्यस्तमिव दृश्यते, *उच्यते* ; यदैवाहङ्कर्ताऽध्यासात्मकः, तदैव तदुपकरणस्यापि तदात्मकत्वसिद्धिः । न हि स्वप्नावाप्तराज्याभिषेकस्य राज्ञो राज्योपकरणं परमार्थसद्भवति,एवम हङ्कर्तृत्वप्रमुखः क्रिया-कारक-फलात्मको लोकव्यवहारोऽध्यस्तो

पञ्चपादिकाविवरणम्

पृथगुपलब्धेर्भूतेषु लयश्रवणाच्च नाध्यस्ततया सिद्धमिति चोदयति—*नन्विदमित्यहंकर्तुरिति* ॥ शरीर-व्यतिरिक्तं ममबुद्धिगृहीतं सुतरामनध्यस्तमित्याह—*ममेदमिति चेति* ॥ शरीरादिपदार्थस्वरूपस्य मिथ्या-कल्पितकर्तृ-भोक्तृ-प्रमातृ-दोषसंयुक्तात्मार्थतयैव कार्यतया भोग्यतया प्रमेयतया द्वेष्यतया च तादर्थ्येनैव सृष्टत्वात्स्व-रूपेणापि मिथ्यात्वं स्वप्नदृष्टान्तेनानुमातुं शक्यत इत्याह–*उच्यते यदैवाहं कर्तेत्यादिना* ॥ दार्ष्टान्तिकं दर्शयति—*एवमहंकर्तृत्वप्रमुख इति* ॥

ऋजुविवरणम्

भूतेषु लयेति ॥ अध्यस्तस्याज्ञानोपादानत्वेन तत्रैव लयो भवेत्, न भूतेष्विति भावः। *ननु* कथमहं कर्तुरुपकरणत्वेन कल्पितत्वसिद्धिः ? व्यभिचारात्, न ह्यन्तःकरणोपकरणत्वमेषां प्रसिद्धम्, तदेवात्र संनिहितत्वात् तच्छब्देन प्रतीयते ; अथवाऽहंकर्तु रेवाध्यस्तत्वमसिद्धम् ; तस्यात्मरूपत्वात्, नापि तदुपकरणत्वमेषाम् ; अनपेक्षितत्वात्, अनिरूपितत्वाच्च । "तदात्मकत्वसिद्धिरि"ति साध्यनिर्देशश्चायुक्तः ; सिद्धसाध्यत्वादिदूषणप्रसङ्गात्। साध्यविकलश्च दृष्टान्तः ; तादात्म्याभावात्, "तदात्मकत्वमि"त्यनेन सन्निहिताध्यासात्मकत्वनिर्देशेऽपि तदुपकरणत्वादिसंबन्धो मिथ्या भवेत्, न स्वरूपमिति । "नहि स्वप्नावाप्ते"त्यादिकीर्तनमपि न युज्यते ; तत्कथं तदुपकरणत्वेनाभिमतमिथ्यात्वसिद्धिरित्या-

तत्त्वदीपनम्

किंच शरीरस्याऽऽत्मन्यध्यस्तत्वे तत्रैव लयः स्याद् रशनापरिकल्पितसर्पादिवत्, नान्यत्र, अन्यत्र च लयः श्रूयते —"पृथिवीं शरीरम्" इत्यत्र, अतोऽपि नाध्यास इत्याह—*भूतेष्विति* ॥ अध्यस्तताप्रतीत्यभावेऽपि कल्पितोपकरण-त्वाच्छरीरादेः कल्पितत्वमुक्तम् , तदचारु ; कल्पितोपकरणत्वस्यासिद्धेरित्याशङ्क्याह—*शरीरादीति* ॥ शरीरादि-पदार्थस्वरूपस्य तादर्थ्येन सृष्टत्वात् स्वरूपेणापि मिथ्यात्वमनुमातुं शक्यत इति संबन्धः । *तादर्थ्येन = आत्मार्थत्वेने-त्यर्थः । आत्मन आप्तकामत्वात्कथं शरीरादेस्तदुपकरणत्वम् ? तथा कल्पितोपकरणत्वं चोपेक्षितं स्यादित्या-शङ्क्य तादर्थ्येनेत्येतद्विवृणोति—*मिथ्येति* ॥ मिथ्या चासौ कल्पितश्चेति मिथ्याकल्पितः, स च कर्ता च भोक्ता च प्रमाता च दोषसंयुक्तश्चात्मा चेति तथोक्तः । ज्ञानबाध्यत्वं मिथ्याशब्दार्थः । समारोपितत्वं कल्पितपदार्थः ॥

शरीरादेरात्मार्थत्वं प्रपञ्चयति—*कार्यतयेति* ॥ कार्यतादीनां कर्त्रादिभिर्यथाक्रममनुषङ्गः । विमतम्, कल्पितम्, कल्पितोपकरणत्वात् ; स्वप्नाप्तच्छत्रादिवदित्यर्थः । छत्रादेरेव कल्पितत्वं नोपक्रियमाणस्येति दृष्टान्तवैषम्यमाशङ्क्य दृष्टान्तान्तरमुक्तं टीकायामिति द्रष्टव्यम । ऐन्द्रियकत्वादेः स्वाप्नवदुपपत्तिः । "पृथिवीं शरीरम्' इत्यत्र शरीरस्य

वार्तिकम्

त्वेन तथात्वानुपपत्तेः । अपिच कथं वा संयोगि द्रव्यमाकाशस्य देशः स्यात् ? न हि कुण्डे बदरवदुपर्यधोभावेनाकाशस्य तत्र वृत्तिः संभवति ; विभुत्वहानिप्रसङ्गात् । कल्पिता देशा भविष्यन्तीति चेत्, न ; तथा सति तद्वृत्तित्वेन संयोगादेरपि कल्पितत्वप्रसङ्गः । *एतेन*— आत्मगुणा अपि पराभ्युपगताः सुख-दुःखादयः—*प्रत्याख्याताः* द्रष्टव्याः ; समानन्यायत्वात् ।

पञ्चपादिका

नित्य-शुद्ध-बुद्ध-मुक्तस्वभाव आत्मनि। अतस्तादृग्ब्रह्मात्मानुभवपर्यन्ताद् ज्ञानादनर्थहेतोरध्यासस्य निवृत्तिरुपपद्यते, इति तदर्थविषयवेदान्तमीमांसारम्भ उपपद्यते।

पञ्चपादिकाविवरणम्

द्रष्टरि दृश्यावभासस्याविद्याध्यासत्वे शास्त्रीयविषय-प्रयोजनसिद्धिः फलिष्यतीत्याह--*अतस्तादृग्ब्रह्मात्मानुभवपर्यन्तादिति* ॥ तादृग्ब्रह्मात्मानुभवो बन्धनिवृत्तिश्चोपपद्यत इत्यर्थः। विषय-प्रयोजनसिद्धौ किमायातमिति ? शास्त्रारम्भकर्तव्यता सिद्धेत्याह---*तदर्थविषयवेदान्तमीमांसारम्भ इति* ॥ *ते एव = ब्रह्मात्मानुभव-बन्धनिवृत्ती, अर्थः = प्रयोजनं विषयश्च यस्य वेदान्तमीमांसारम्भस्येति विग्रहः। "सर्वलोकप्रत्यक्षः" इत्यन्तस्योत्तरभाष्यस्य तात्पर्यमाह---*आह कोऽयमिति*। इदानीं विभज्यावान्तरतात्पर्यं कथयति—*तत्रापीति* ॥

ऋजुविवरणम्

शङ्क्यावतारयति—*शरीरादिपदार्थेति* ॥ 'नित्यशुद्धे'त्यादिविशेषणोपादानं स्वतः परतो वा संबन्धासंभवप्रदर्शनार्थम्, तादृशाधिष्ठानज्ञानस्य विरोधिविषयत्वेन बाधकत्वप्रदर्शनार्थं च। *ननु* "ब्रह्मात्मानुभवपर्यन्तादि"त्यनेन प्रयोजनमात्रमेव निर्दिष्टम्, न तु विषय इत्याशङ्क्य, व्यावर्तकत्वेनापि तन्निर्देशादिति व्याचष्टे—*तादृग्ब्रह्मात्मानुभवेति* ॥ स एवार्थो विषयो यस्येति विग्रहशङ्का स्यात, तथा सति प्रयोजनाभावाद् न वेदान्तारम्भोपपत्तिरिति, तदर्थं व्याचष्टे—*ते एव ब्रह्मात्मानुभवेति* ॥

तत्त्वदीपनम्

भूतेषु नाऽऽत्यन्तिको लयो निर्दिष्टः ; तथाऽऽत्मोत्क्रान्तावपि शरीरोपलम्भो युक्तः ; चिदधिष्ठानस्य तत्रापि भावादित्यर्थः। प्रयोजनस्यैवोपसंहरणादविवक्षितत्वं विषयस्येत्याशङ्क्योपलक्षणपरतया व्याचष्टे—*तादृगिति* ॥ नित्यशुद्धादिलक्षणं वस्तु तादृक्पदार्थः। स चासावर्थश्चेति तदर्थः। स विषयो यस्यासौ तदर्थविषय इति विग्रहः। शङ्कां व्यावर्तयति—*ते एवेति* ॥ ब्रह्मात्मा चासावनुभवश्चेति तथोक्तः। अर्थशब्दस्य विषयवाचित्वं व्यावर्तयति —*अर्थ इति* ॥

वार्तिकम्

अपिच माऽऽस्तां तदग्रावच्छेदेन वृक्षे कपिसंयोगस्य समवायसम्बन्धेनात्यन्ताभावः; संयोगेन त्वस्त्येव ; न हि संयोगः संयोगसम्बन्धेन कालत्रयेऽपि तत्रास्ति। नच—अत्र प्रतियोगिन ऐक्येऽभावभेदोऽस्ति, येन संयोगेन तदत्यन्ताभावे सत्यपि समवायेन न तदभावः स्यादिति—*वाच्यम् ; * न हि 'भूतले घटो-नास्ती'ति युगपत् संयोग-समवायाभ्यां भूतले घटात्यन्ताभावप्रतीतौ तद्भेद उत्प्रेक्षितुमपि शक्यते, किं पुनः प्रत्येतुम् ? नच—नैवं ताभ्यां युगपत् प्रतीतिरस्तीति—वाच्यम् ; अनुभवविरोधात्। प्रतियोगि-तदवच्छेदकयोरभेदे तदत्यन्ताभावभेदकल्पने प्रमाणाभावाच्च, स्वरूपेण संसर्गमात्रस्यैव तदवच्छेदकत्व-दर्शनात् संयोगत्वादेस्तत्राभानात्। नच—संयोगसंयोगस्य कुत्रचिदप्रसिद्धेर्न तेन तदत्यन्ताभावोऽस्तीति—वाच्यम् ; आकाशसमवायस्य कुत्रचिदप्रसिद्धावपि तेन तदत्यन्ताभावस्य केवलान्वयिनोऽङ्गीकारात्, तद्वत्संयोगेन संयोगात्यन्ताभावस्याविरुद्धत्वात्। संयोगिनां घटादिद्रव्याणां च स्वसमवायिकारणे संयोगेनात्यन्ताभावस्य सर्वसिद्धत्वात्, संसर्गभेदेऽप्यत्यन्ताभावाभेदादित्युक्तत्वात्। *एतेन*—प्रागभाववति कथमत्यन्ताभावः ? तयोस्सादेश्यविरोधादिति—*अपास्तम्* ; तयोरप्यभेदात्। एक

पञ्चपादिका

"आह कोऽयमध्यासो नामे"त्याद्यारभ्य अध्याससिद्धिपरं भाष्यम्। तत्रापि "कथं पुनरविद्या-वद्विषयाणी"त्यतः प्रागध्यासस्वरूप-तत्सम्भावनाय, तदादि तत्सद्भावनिर्णयार्थमिति विभागः। *यद्येवं* तत्स्वरूप-तत्सम्भावनोपन्यासः पृथक् कर्तव्यः; न ह्यनिर्ज्ञातरूपमसम्भाव्यमानं च निर्णीयते चेति,

पञ्चपादिकाविवरणम्

लक्षण-सम्भावनापरभाष्यमाक्षिपति---*यद्येवमिति*॥ किमिति लक्षणसम्भावने नापेक्ष्येते इति? तत्राह—*न ह्यनिर्ज्ञातरूपमिति*॥ प्रमाणमेव हि प्रमेयमन्यस्यान्यात्मनावभासमध्यासं व्यवस्थापयत् स्वदेश-

ऋजुविवरणम्

उत्तरावध्यनिर्देशात कियत्तत्प्रतिपादकमिति न ज्ञायते, तदर्थमाह—*सर्वलोकेति*॥ "अध्याससिद्धिपरमि"त्यनेन तात्पर्यमुक्तम्, अवान्तरव्याख्यानं तु तत्र तत्र भविष्यति। अतः—"तत्रापि"इति पुनरुक्तमित्याशङ्क्याह—*इदानीं विभज्येति*॥ "न ह्यनिर्ज्ञातरूपमि"त्यनेन लक्षण-संभावनयोरभावे न मानं निर्णायकमित्युक्तमिव प्रतिभाति, अनिर्ज्ञात-रूपस्यासंभावितस्य च निर्णयो नास्तीत्युक्तत्वात, तथा सति हेतुसाध्ययोः परस्परविरोधः, तदर्थं व्याचष्टे—*प्रमाण-मेवेति*॥ अध्यक्षानुभवनिर्णये विशेषतो दुःसंपादमित्यन्वयः प्रतिभाति, तथा सति दूरतोऽध्यक्षदृष्टे तदपेक्षा

तत्त्वदीपनम्

शास्त्रारम्भस्य सिद्धत्वादक्षरव्याख्यानमेव क्रियताम्—अथशब्द आनन्तर्यार्थ इत्यादि, किम्—आहेत्यादिना—इति-शङ्कानिवृत्त्यर्थमाह—*कोऽयमित्यादीत्युक्तम्*॥ तत्राऽऽदिशब्देन—"अस्यानर्थहेतोरि"त्येतदप्युपात्तमिति शङ्कां निवारयितु-माह—*सर्वलोकेति*॥ "आह कोऽयमि"त्यादेरध्यासपरत्व एकेन भाष्येणाध्याससिद्धेः किं बहुभिरित्याशङ्क्याध्या-सलक्षणादिपरत्वान्न वैयर्थ्यमित्युक्तं 'तत्रापी"त्यत्र, तदनुपपन्नम्; अध्यासपरत्वं लक्षणादिपरत्वं चैकम्? उत नाना? प्रथम उत्तरवैयर्थ्यम्, द्वितीये पक्षे परस्परपराहतिः; एकस्योभयपरत्वानुपपत्तेरित्याशङ्क्याह—*इदानीमिति*॥ लक्षणादिनाऽध्यासस्य प्रतिपिपादयिषितत्वाल्लक्षणादाववान्तरतात्पर्यम्, अध्यासे महातात्पर्यमिति न व्याहतिरित्यर्थः। "कथं पुनः प्रत्यगात्मनी"त्यतः प्राक्तनं स्वरूपम्, तदारभ्य संभावनापरमिति टीकार्थः। अन्यतःसिद्धाध्यासोप-स्थापकत्वेऽपि यथा "तथाऽपी"त्यादिभाष्यस्यार्थवत्त्वम्, तद्वल्लक्षणादिभाष्यस्यापीत्याशङ्क्याह—*लक्षणेति*॥ तथाऽपी-त्यादेरध्यासानुवादेन विषयादिपरत्वादर्थवत्त्वम्, न तथाऽस्य; लक्षणादिपरत्वात्; नच तद्युज्यते; अन्यत एव लक्षणादिसिद्धेरित्यर्थः। प्रमाणभाष्यस्यासंभावितासंकीर्णबुद्धिजनकत्वाभावान्न लक्षणादि व्यर्थमिति चोदयति—*किमिति*॥ अर्थासंभावनादिबुद्धिजननाद्वयर्थ्यमित्याह—*तत्राहेति*॥

अनिर्ज्ञातस्यासंभावितस्य च निर्णयोऽनुपपन्न इति वदता लक्षणसंभावने अपेक्षिते इत्युक्तं स्यात्, तथाच विरोधः, इत्याशङ्क्य लक्षणादेरनपेक्षितत्वं न ब्रूमः, किंतु प्रमाणबलादेव तत्सिद्धिरित्याह—*प्रमाणमिति*॥ "यत्र त्वस्य

वार्तिकम्

एव ह्यत्यन्ताभावो यदा प्रतियोगिप्राक्काले प्राक्कालीनत्वसंसर्गेण गृह्यते, तदा तदवच्छिन्नप्रतियोगित्वात् प्राग-भाव इति व्यपदेशं लभते, यदा विद्यमानकाले प्रतियोगितादात्म्यसंसर्गेण, तदाऽन्योन्याभाव इति व्यपदेशम्, तदुत्तरकाले चेत्, तदुत्तरकालीनत्वसंसर्गेण विद्यमानः, प्रध्वंस इति व्यपदेशमिति नास्त्यभावभेदः। अत एवाभावस्य स्वतो निर्विशेषत्वमाहुर्वृद्धाः; अन्यथोभयोरपि सविशेषत्वाविशेषाद् भावाभावपरि-भाषामात्रापत्तेः। एवं घट-पटादिप्रतियोगिभेदेऽपि नाभावो भिद्यत इत्यूह्यम्॥

पञ्चपादिका

दुःसम्पादं विशेषतोऽध्यक्षानुभवनिर्णये, *उच्यते* ; न देहेन्द्रियादिष्वहं-ममाभिमानवत एव प्रमातृत्व-

पञ्चपादिकाविवरणम्

कालोपाधौ सम्भावितरूपं सर्वतो व्यावृत्तासाधारणरूपञ्च व्यवस्थापयति, किं पृथग्लक्षण-सम्भावनोपन्यासेनेत्यर्थः । *ननु* अनुमानादिप्रमाणनिर्ज्ञातेषु वस्तुमात्रेषु विशेषलक्षण-सम्भावने पृथगपेक्ष्येते, इत्यत आह—*दुःसंपाद-मिति*॥*विशेषत इति*॥ असाधारणाकारेण ; व्यावृत्ततयेत्यर्थः । तत्र द्रष्टुरन्यस्य दृश्येनान्यात्मनावभासो विद्यत

ऋजुविवरणम्

न स्यात्, तदर्थं व्याचष्टे—*असाधारणाकारेणेति* ॥ "उच्यते" इत्यनेन प्रमाणाभावे मिथ्यात्वसिद्धिर्नास्तीत्युक्तम्, तदयुक्तम् ; प्रमाणोक्तौ तदसिद्धययोगात्, इत्याशङ्क्य व्याचष्टे—*तत्र द्रष्टुरिति* *न तस्याविद्येति*॥ तत्राविद्योपादानत्वे

तत्त्वदीपनम्

सर्वमात्मैवाऽभूत्तत्केन कं पश्येत्"इति व्यावृत्तिसंभावनयोर्निराकरणात्कथं संभावनादीत्याशङ्क्याह—*स्वदेशेति* ॥ यद्यप्यात्मसाक्षात्कारादूर्ध्वं सर्वस्यासंभावितत्वादि ; तथापि व्यवहारावस्थायां संभावितत्वादि घटत इत्यर्थः । प्रमाणसिद्धेऽपि संभावनादेः पृथगपेक्षादर्शनाल्लक्षणादिकमर्थवदिति शङ्कते—*ननु अनुमानादीति* ॥ प्रत्यक्षकार्य-लिङ्गेन कारणमात्रप्रतिपत्तौ तद्विशेषब्रह्मपरमाण्वादिषु यथा लक्षणादिकमर्थ्यमानं दृष्टमित्यर्थः ।

ननु प्रत्यक्षदृष्टेऽपि धरित्र्यादौ लक्षणाद्यपेक्षादर्शनादध्यक्षानुभवनिर्णये विशेषतो दुःसंपादमिति कथमुक्तम् ? तत्राह—*विशेषत इति* ॥ सामान्यतोदृष्टे लक्षणाद्यपेक्षायामप्यसाधारणाऽऽकारेण व्यावृत्ततया दृष्टौ नान्यापेक्षेत्यर्थः । प्रमाणभाष्येणाहंममाभिमान एव सिद्धयति, नाध्यास इति कथम् ? तयोरैक्यादित्याशङ्क्य समुदायतात्पर्यमाह—*तत्रेति* ॥ *तत्र* = प्रमाणभाष्ये । ज्ञानापनोद्यत्वमविद्यात्वम्, प्रतिभासमात्रशरीरत्वं भ्रान्तिता, सत्यानृतमिथुनी-करणात्मकत्वमध्यासत्वम्, सदसद्विलक्षणत्वं मिथ्यात्वम् ॥

वार्तिकम्

ननु एवं तर्हि अभावाद्वैताभ्युपगमात् शून्यवादप्रसङ्गो भवेत्, *भवेदयमभावाद्वैताभ्युपगमे दोषः* ; यद्यस्माभिस्तत्प्रतियोगिनो भावा अनिर्वचनीया नाभ्युपगम्येरन्, न वा न तदधिष्ठानं सद्रूपं ब्रह्माभ्युपगम्येत, न चैतदस्ति ; अभावस्य साधिष्ठानत्व-सप्रतियोगिकत्वनियमेन तदुभयाभ्युपगमात् । नच—तावताऽभावे-नैव ब्रह्मणः सद्वितीयत्वं स्यादिति—वाच्यम् ; अविद्यावरणशक्तेरेवाभावत्वेनाभ्युपगमात्, तस्याश्चा-निर्वचनीयत्वेन सद्वितीयत्वाविरोधात् । अत एव "विद्यमानस्य सतः प्रतिबन्धकान्तररहितस्य प्रका-शार्हस्य 'अस्ति' 'प्रकाशते' इति व्यवहारयोग्यस्य 'नास्ति' 'न प्रकाशते' इति व्यवहारासाधारणकारण-मावरणमाहुर्वृद्धाः । तेनाज्ञाता चितिरेव सर्वकारणं सत् सर्वत्रानुगततया तत्तदभावबुद्ध्यालम्बनत्वेन प्रतीयत इति समञ्जसम् । विरोधोऽपि तस्य भावैस्सहोपपद्यते ; अभिव्यक्त्यनभिव्यक्त्योर्युगपदेकेन रूपेणैकत्र विरोधात्, अनभिव्यक्त्यवस्थाया एवाभावत्वात् । अत एवोपादानकारणमेव प्रागवस्थापन्नं प्रागभाव इति वदन्ति वृद्धाः । तान्त्रिका अपि कैवल्यावस्थापरिणामं प्रलयमाहुः । श्रुतिरपि—"असदेवेदमग्र आसीत्" इत्यादिः, तामेव कार्याभावरूपाव्यक्तावस्थामाह । *ननु* एवं सत्यव्यक्तावस्थायाः सर्वोपादानत्वात् कार्येणाविरोधः स्यादिति—*चेत्*, न ; अवस्थाया निमित्तत्वेऽप्युपादानत्वाभावात्, विरोध्यवस्थान्तरेण तद्विरोधोपपत्तेः, अवस्थावत एवोपादानत्वात्, तस्य च सतः कार्यकालेऽपि सत्यस्य

पञ्चपादिका

प्रदर्शनमात्रेण तस्याध्यासात्मकता सिद्धयति ; तत्कस्य हेतोः ? लोके शुक्तिरजत-द्विचन्द्रादिवदध्यासा-

पञ्चपादिकाविवरणम्

इत्येतावति प्रमाणं वक्ष्यते, न तस्याविद्याभ्रान्त्यध्यासमिथ्यात्वे, अतस्तत्प्रमाणेन न सिद्धयतीति परिहरति— उच्यते—*न देहेन्द्रियादिष्वित्यादिना* ॥

ननु अन्यस्यान्यात्मनावभासप्रमाणेनैव तन्मिथ्यात्वमपि सिद्धयति, प्रमेयैक्यादिति चोदयति—*तत्कस्य हेतोरिति* ॥ नानुभवादेवेति परिहरति—*लोक इति* ॥ *ननु* प्रमाणे सति किमित्यनुभवाभावः ?

तत्त्वदीपनम्

सिद्धान्त्याशयमजानानश्चोदयति—*नन्वन्यस्येति* ॥ "निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमि"ति कात्यायन-स्मरणात् *कस्य हेतोरिति* कस्माद्धेतोरित्यर्थः । गूढाभिसन्धिरेव परिहरति—*नानुभवादेवेति* ॥ प्रमाणे सत्यपि अनुभवो नेति व्याहतमिति चोदयति—*ननु प्रमाण इति* ॥ मिथ्यात्वविषयं प्रमाणमेव नेति स्वाशयमाविष्करोति—*प्रमाणेति* ॥ बाधे सत्यध्यासानुभवो भवतीति कथम् ? तस्याध्यासनिवर्तकत्वादित्याशङ्क्याह—*बाधा-

वार्तिकम्

प्रदर्शितत्वात्, बाल्य-यौवनयोरिव व्यक्ताव्यक्तावस्थयोर्विरोधे सत्यपि तद्धतोरेकत्वेनाविरोधोपपत्तेः । *अयमत्र संक्षेपः*—

भावाभावौ पदार्थौ द्वौ लोकविज्ञानगोचरौ । तत्र भावो भवत्यात्माऽभावसंसर्गवर्जितः ॥
सर्वेषां नो निरातङ्कमिदं सर्वमि'ति श्रुतेः । अभावः खल्वविधा स्यात् तदावरणरूपिका ॥
"तम आसीदिदं सर्वम्" "असदेवे"ति च श्रुतेः । नित्यं भावं समाश्रित्य लब्धात्मा देश-कालतः ॥
चिच्छिद्यानात्मतां नीत्वा संजगाम प्रपञ्चताम् ।

सर्वथाऽपि नास्त्यन्योन्याभावात्यन्ताभावयोर्भेदः । 'तथाच नेदं रजतम्' इति प्रतीतेरस्ति रजतप्रतीति-बाधकत्वमिति । अस्तु वाऽत्यन्ताभावान्योन्याभावयोर्भेदः परमते ; तथाऽपि तैरण्यकार्य-कारणादन्योन्या-भावस्य तदत्यन्ताभावनियतत्वाभ्युपगमाद् 'नेदं रजतम्' इत्यन्योन्याभावे सति तन्नियततया तदत्यन्ता-भावबोधाद् बाधावश्यंभावात् । सर्वथाऽपि बाधप्रत्ययस्य सर्वानुभवसिद्धत्वात् तदन्यथानुपपत्त्याऽपि 'इदं रजतम्' इति मिथ्याप्रत्ययोऽभ्युपगन्तव्यः । *एतेन*—विवादाध्यासिताः सर्वे प्रत्ययाः, यथार्थाः, प्रत्ययत्वात् ; प्रमितिवदित्यनुमानमपि—*अपास्तम्* ; बाधानुभवविरोधेन कालात्ययापदिष्टत्वात्, अबाधितविषयत्वस्याविसंवादिप्रवृत्तिजनकत्वस्य चोपाधित्वाच्च । नच सर्वत्र प्रमाणार्थेऽविश्वासप्रसङ्गः ; स्वतः प्रामाण्यग्रहेण विश्वासोपपत्तेः ; अन्यथा तवापि मते किं संवादिप्रवृत्तिजनकमिदमेकं ज्ञानम् ? किं वा विसंवादिप्रवृत्तिजनकमगृहीतसंसर्गं ज्ञानद्वयम् ? इत्यविश्वासात् प्रवृत्त्यनुपपत्तिरित्यलमतिविस्तरेण । तस्मादस्ति मिथ्याज्ञानम् । तथाच सम्यगुपसंहृतम्—"विषयमिथ्यात्वादुपपन्नं ज्ञानस्य मिथ्यात्वमि"ति । तेनैवं लक्षण-प्रमाणाभ्यां सत्यानृतात्मकेऽध्यासे निरूपिते तदुपादान-निमित्तयोर्जिज्ञासायामाह—*इतरेतरा-विवेकेनात्यन्तविविक्तयोर्धर्मधर्मिणोरिति* । *अत्यन्तविविक्तयोः=ज्ञानत्वाज्ञानत्वाभ्यां सत्यानृतत्वाभ्यां च ; *धर्म-धर्मिणोः=परमात्माविद्याशक्त्योः ; *इतरेतराविवेकेन=तादात्म्येन ; अध्यस्येति योजना । तथाच परमात्माविद्याशक्त्योरनाद्यध्यास एवाहंकाराद्यध्यासस्योपादानम्, निमित्तं च पूर्वपूर्व-तदध्यास-संस्काररूपत्वेनेत्युक्तं भवति । "धर्म-धर्मिणोरि"त्यनेन प्रधानवादो निराकृतः ; धर्मस्य स्वातन्त्र्यानुपपत्तेः ।

वार्तिकम्

"अत्यन्तविविक्तयोरि"त्यनेन पारमार्थिकधर्मधर्मित्वं निराकृतम्; अत्यन्तविविक्तयोर्गवाश्वयोरिव पारमार्थिकधर्मधर्मित्वानुपपत्तेः ॥

तेनेदमपि सूचितं भवति :—आत्माज्ञानयोर्धर्म-धर्मिभावेनैव तादात्म्याध्यासः, न परस्परात्मत्वरूपेणेति। नच—एतावताऽऽत्मन्यज्ञानस्य संसर्गाध्यासमात्रम्, न स्वरूपतोऽध्यास इति—वाच्यम्; संसर्गाध्यासेऽपि कामादिवत्स्वरूपाध्यासाविरोधात्, भ्रमे भासमानवैशिष्ट्यप्रतियोगिनो मिथ्यात्वस्य साधितत्वात्, परस्परैक्याध्यासे च 'अहमज्ञः' इत्याश्रयाश्रयिभावेन प्रतीत्यनुपपत्तेः, शक्ति-शक्तिमद्व्यवहारभेदानुपपत्तेश्च। नचैवमात्मन आनन्दादिस्वरूपप्रथाप्रसङ्गः; "आनन्दभुक् चेतोमुखः" इत्यादिश्रुतेस्तत्प्रथाया इष्टत्वात्, निर्विशेषतत्स्वरूपप्रथायास्तु तयैवावृतत्वादनुपपत्तेः ॥

एतेन—शुद्धचिन्मात्रस्याविद्याविषयत्ववत्तदाश्रयत्वमपि—*व्याख्यातम्*; धर्मतया तत्रैवाविद्याया अध्यासात्। नच—क्रियाज्ञानयोराश्रयविषयभेददर्शनात् कथमविद्यायास्तदभेद इति—वाच्यम्; न ह्येकत्र यद् दृष्टम्, तेनान्यत्रापि भवितव्यमिति नियमोऽस्ति। तथा सति शुक्लायां गवि शुक्लरूपस्य दर्शनात् कृष्णायामपि तत्कल्पनप्रसङ्गः। *यदि ब्रूयात्*—न वयमाश्रय-विषयभावौ भिन्नयोरेकत्र दृष्टावित्यन्यत्रापि तौ तथा कल्पयामः, येनोक्तातिप्रसङ्ग आपाद्येत; किं तर्हि? भिन्नयोरेव तौ क्रियादौ दृष्टावित्याश्रय-विषयभावयोर्भेदनियतत्वादविद्यायामपि भिन्नाभ्यामाश्रय-विषयाभ्यां भवितव्यम्; अत एव तयोर्भेदनियतत्वदर्शनात्—'जीवाश्रया ब्रह्मपरा ह्यविद्या तत्त्वविन्मते'ति—*केचिदाहुरिति*, तन्न; आश्रय-विषयभावयोर्भेदनियतत्वासिद्धेः, तमसि व्यभिचारात्। दृष्टं हि तमः स्वाश्रयमेवापवरकं विषयीकृत्यावृणोतीति। अपिच तमस्त्वादेवाविद्याया बाह्यतमोवदभिन्नाश्रय-विषयत्वं सिद्ध्यति। नचाविद्यायास्तमस्त्वमसिद्धम्; "तमसा गूढम्" "तम आसीत्" इत्यादिश्रुतेः सर्गाद्यकालीनमूलकारणभूतायामविद्यायां तमःशब्दप्रयोगात् तस्यास्तत्त्वसिद्धेः, प्रकाशाऽऽवारकस्यैव तमःशब्दप्रवृत्तिनिमित्तत्वात्, तस्य चाविद्यायामपि भावात्। *एतेन*—जीव-ब्रह्मविभागकल्पनातद्भेदसमर्थनमपि—*प्रत्याख्यातम्*; स्वरूपतो जीव-ब्रह्मणोर्भेदासिद्धेश्च। अविद्याश्रयत्व-विषयत्वोपाधिभेदेन तत्कल्पनायां चान्योन्याश्रयापत्तेः—सिद्धे हि जीव-ब्रह्मणोर्भेदे तदाश्रय-विषयभावसिद्धिः, तस्यां च जीव-ब्रह्मभेदसिद्धिरिति। अनादित्वान्नायं दोष इति चेत्, न; निष्प्रमाणत्वेनान्धपरम्पराप्रसङ्गात् ॥

अपिच कोऽयं जीवो नाम भवदभिमतः? यदाश्रयाऽविद्या कल्प्यते, न तावच्चिन्मात्रम्; अनभ्युपगमात्, अभ्युपगमे वा विवादाभावादस्मदभिमतसिद्धिः। नाप्यविद्याश्रयः; आत्माश्रयापत्तेः—अविद्याविशिष्टस्याविद्याश्रयत्वेनांशतोऽविद्यायामविद्यावर्तनात्। 'अविद्याश्रयः' इत्यनेनाविद्योपलक्षितस्तदाधारमात्रमुच्यते; तथाच नात्माश्रय इति चेत्, न; तथा सति तदुपलक्षितचैतन्यस्य तदाश्रय-विषयसाधारण्यात् तद्भेदानुपपत्तेरस्मदिष्टसिद्धेः। न ह्यविद्यामनन्तर्भाव्य तदुपलक्षितचिन्मात्रमाश्रय-

प्रदीपः

रजतार्थिनामिदंकाराभिमुखीं प्रवृत्तिं जनयति, "इदं रजतमि"ति प्रमावत्; अतोऽध्यास एवाप्रसिद्ध इति, कथमहमित्यध्याससंभवः? इत्यध्याससामान्याक्षेपमुखेनाह—*आह कोऽयमिति*। अध्यास इति कोऽयं पदार्थ इति योजना। किंशब्द आक्षेपार्थः। अध्यासो न संभवतीत्याक्षेपतात्पर्यम् ॥ यद्वा *ननु* 'इदं रजतमि'ति ज्ञानानन्तरं रजतार्थिनामिदंकाराभिमुखप्रवृत्तिनिर्वाहो हि सत्यस्थलीयेदंरजतमितिज्ञानवद् इदंपदार्थस्य रजततादात्म्यप्रतीतिं विना न संभवति; ज्ञानद्वयत्वे हि रजतस्मरणाद् आपणाभिमुख्येव प्रवृत्तिः स्यात्। "नेदं रजतमि"ति बाधज्ञानमपि रजतस्य बाधं गोचरयद् ज्ञानद्वयत्वपक्षे

पञ्चपादिका

नुभवाभावात्। बाधे हि सति स भवति, नेह स विद्यते। तस्मादध्यासस्य लक्षणमभिधाय तल्लक्षणव्याप्तस्य सद्भावः कथनीयः॥

पञ्चपादिकाविवरणम्

प्रमाणभेदादित्याह—*बाधे सतीति* ॥ बाधानुपपत्तिर्मिथ्यात्वे प्रमाणम्; प्रत्यक्षानुमानव्यवहारानुपपत्त्यागमा आत्मन्यनात्मावभासे प्रमाणमिति भावः। *ननु* इहापि बाधनिमित्तमितरेतरविवेकमन्तरेणान्यस्यान्यात्मनाऽवभासोऽयमित्यवगन्तुं न शक्यते; अन्यथा स्वस्यैव स्वेनात्मनावभासः किं न स्यादिति? नेत्याह—*नेह स विद्यत इति* ॥ यौक्तिकज्ञानादिना परोक्षविवेकमाश्रित्य परस्परात्मनाऽवभासनिश्चयः। अपरोक्षबाधस्य भ्रान्तिप्रतिभासोच्छेदिनोऽभावान्न स्पष्टो मिथ्यात्वाध्यवसाय इति भावः। अतोऽविद्यात्वस्पष्टीकरणाय लक्षण-

ऋजुविवरणम्

कारणत्रयजन्यत्वे सत्य-मिथ्यासंभेदत्वे ज्ञाननिवर्त्यत्वे च प्रमाणं नोच्यत इत्यर्थः। *ननु* प्रमाणे सत्यनुभवेन भवितव्यमिति चोदिते, "बाधे ही"ति परिहारो व्यधिकरणः; प्रकृतं विहायान्यस्योक्तत्वात्, केन मिथ्यात्वानुभवो भवतीत्यपृष्टत्वाच्चेत्याशङ्क्यावतारयति—*प्रमाणभेदादिति* ॥

प्रमाणभेदादित्यस्यायमभिप्रायः—एकस्मिन्नपि वस्तुन्युभयथाऽनुभवे प्रमाणभेदापेक्षा दृष्टा, स्वरूप-घटयोरिति। *ननु* "बाधे ही"ति कथमुक्तम्, नहि बाधो मिथ्यात्वानुभवहेतुः, किन्तु निवर्तक एव, निवृत्तिर्वा; अथवा—बाधान्मिथ्यात्वानुभव उक्तः; नत्वन्यस्यान्यात्मत्वे तन्मिथ्यात्वे च प्रमाणभेद उक्तः; अतस्तत्र दर्शनमनेन न क्रियते, इत्यसंबद्धमुक्तमित्याशङ्क्याभिप्रायमाह—*बाधानुपपत्तिरिति* ॥ *ननु* बाधपुरस्सरेणैव प्रमाणप्रवृत्त्या भवितव्यम्, तथाच सति लक्षणादिवैयर्थ्यं तदवस्थमेवेत्यभिप्रायेण चोदयति—*नन्विहापीति*॥ "नेह स विद्यते" इत्यनेन न बाधो निषेध्यः; बाधाभावेऽन्यस्यान्यात्मनाऽवभासोऽपि न सिद्ध्यतीत्युक्तत्वात्, नापि मिथ्यात्वानुभवबाधे सति, मिथ्यात्वस्य सिद्धत्वात्, अतः सङ्कटमित्याशङ्क्याभिप्रायमाह—*यौक्तिकज्ञानादिनेति*॥ तर्हि मिथ्यात्वस्यापि सिद्धत्वाल्लक्षणादिवैयर्थ्यं तदवस्थमित्याशङ्क्याह—अपरोक्षबाधस्येति* ॥ "लक्षणमेवे"त्यनेन प्रमाणमात्रेण नालमित्युक्तम्, *यद्वा*—लक्षणं वक्तव्यमेवेत्यर्थः।

तत्त्वदीपनम्

नुपपत्तिरिति* ॥ सत्यत्व आत्मवद् बाधानुपपत्तेर्न मिथ्यात्वमित्यर्थः। 'अहं मनुष्यः' इत्यादिप्रत्यक्षं प्रत्यक्षशब्दार्थः। विवादाध्यासितो व्यवहारः, अध्यासनिबन्धनः, व्यवहारत्वात्; पश्चादिव्यवहारवदित्यनुमानम् = अनुमानशब्दार्थः। प्रमातृत्वादिव्यवहारो व्यवहारशब्दार्थः। "अष्टवर्षं ब्राह्मणमुपनयीत" इत्यादिरागमः॥

आत्मन्यनात्मावभासिप्रमाणस्य बाधपुरस्कारेण प्रवृत्तत्वान्न प्रमाणान्तरापेक्षा मिथ्यात्व इति चोदयति—*नन्विहापीति* ॥ अन्यस्यान्यात्मताप्रतिपत्तौ विवेकप्रतिपत्तिर्नापेक्ष्यते; अनुपयोगाद् इत्याशङ्क्योपयोगमाह—*अन्यथेति* ॥ 'बाधाभाव इतरेतरविवेकाप्रतिपत्तेरितरेतराऽवभास एव न सिद्ध्येत्' इत्युक्तम्, तस्य कः समाधिः? इत्याशङ्क्याह—*यौक्तिकेति* ॥ नच–एतावतैव मिथ्यात्वसिद्धेः प्रमाणान्तरं व्यर्थमित्यपि–शङ्क्यम्; अपरोक्षभ्रमस्यापरोक्षप्रत्ययं विनाऽनिवृत्तिरित्याशयेनाह—*अपरोक्षबाधस्येति* ॥ बाधकप्रत्ययं विना मिथ्यात्वासिद्धिश्चेत्, स एव सम्पाद्यताम्; किं लक्षणेनेत्याशङ्क्याह—*अत इति* ॥ लक्षणमेव वक्तव्यमित्यस्यायमर्थः—न प्रमाण-

वार्तिकम्

विषयत्वयोर्भिन्नाधिकरणत्वसिद्धये भेत्तुं शक्यते; तद्भेदकोपाधेरभावात्। तदुपलक्षितत्वानुपलक्षितत्वे एव स्तस्तद्भेदकोपाधी इति चेत्, न; एवं हि सत्यविद्योपलक्षितत्वविशिष्टोऽविद्याश्रय इत्युक्तं भवति।

पञ्चपादिका

ननु एवमपि तल्लक्षणस्य वस्तुनः सद्भावमात्रमिह कथनीयम्; न हि यत्र यस्य सद्भावः प्रमाणतः प्रतिपन्नः, तत्रैव तस्यासम्भावनाशङ्का, येन तद्विनिवृत्तये तत्सम्भावनाऽपरा कथ्येत;

पञ्चपादिकाविवरणम्

मेव वक्तव्यमित्याह--*तस्मादध्यासस्येति* ॥ तर्हि लक्षण-प्रमाणाभ्यामेव वस्तुनिर्णयसिद्धेः प्रमाणेनैवासम्भावनानिराकरणात् सम्भावना पृथग् न वक्तव्येति चोदयति--*नन्वेवमपीति* ॥ सत्यपि प्रमाणसामर्थ्ये प्रत्यक्षाव-

तत्त्वदीपनम्

मात्रेणालम्, किं तु लक्षणेनापि भवितव्यमिति। प्रसिद्धाध्यासलक्षणेऽभिहिते तल्लक्षणव्याप्तत्वादहंममाभिमानोऽप्यध्यास इति सेत्स्यति, ततश्च बाधकप्रत्यय इति तदुपयोगितया लक्षणं कथ्यत इत्यर्थः ॥

लक्षणमङ्गीकृत्य संभावनामाक्षिपति—*तर्हि लक्षणेति* ॥ संभावनां विना निर्णयासिद्धेः साऽपि वक्तव्येति शङ्कायामाह—*प्रमाणेनेति* ॥ प्रामाणिकस्याप्यसंभावनयाऽपोद्यत्वमुक्तं टीकायाम्, तत् कथम्? असंभावितत्वे प्रामाणिकत्वानुपपत्तेः, प्रामाणिकत्वे वाऽसंभावितत्वाभावादित्याशङ्क्य द्वयमप्यनुभूयत इति परिहरति—*सत्यपीति* ॥ नीरन्ध्रसवितरि निर्दुष्टकरणस्य कथं सुषिरप्रतिभासः? इत्याशङ्क्यादृष्टवशादित्याह—*औत्पातिक

वार्तिकम्

तदुपलक्षितत्वोपलक्षितत्वस्य तदभ्युपगम उपलक्षणानवस्थानात्, तथाच पूर्ववदात्माश्रयः; अविद्योपलक्षितशरीरेऽविद्याया विशेषणतया प्रवेशात्, तत्रापि तस्या उपलक्षणत्वे पूर्ववदुपलक्षणानवस्थानात्, अविद्योपलक्षितत्वाभावप्रसङ्गाच्च। *ननु* एवं तर्ह्यन्तःकरणविशिष्ट एव जीवोऽस्तु, तदाश्रयाऽविद्या भविष्यति। नच—सुषुप्तिकालेऽन्तःकरणाभावेन तदभावप्रसङ्ग इति—वाच्यम्; तत्र संस्काररूपेण तस्य विद्यमानत्वात्तदभावासिद्धेरिति—*चेत्*, न; अन्तःकरण-तत्संस्कारयोरविद्याकार्यत्वेन तदात्मलाभाधीनत्वात्स्वाश्रयलाभमन्तरेणाविद्याया आत्मलाभासंभवात्, शक्तित्वाद् मिथ्यावस्तुनोऽधिष्ठानसत्तयैव सत्तावत्त्वाच्चान्योन्याश्रयापत्तेः। नच—एवं बीजाङ्कुरवदनादित्वान्नान्योन्याश्रय इति—वाच्यम्; वैषम्यात्। न हि यदेव बीजमङ्कुरं जनयति, स एवाङ्कुरस्तस्य बीजस्य कारणं दृष्टम्, येनान्योन्याश्रयः स्यात्। किं तर्हि? अङ्कुरान्तरम्, तस्य च बीजान्तरमित्यनादित्वान्नान्योन्याश्रयः; नाप्यनवस्था दोषः; दृष्टत्वेन प्रामाणिकानवस्थाया अदोषत्वात्। इह चान्तःकरण-तत्संस्कारप्रवाहः सर्वोऽपि मूलाविद्याकार्यः, अतस्तदात्मलाभाधीनात्मलाभत्वात् कथं नान्योन्याश्रयः? कार्याधीनकारणसत्तानुपपत्तेश्च, कारणत्वव्याघातात्, अनन्यथासिद्धनियतपूर्वसत्त्वस्यैव तत्त्वात्। अनवस्थादोषश्च स्यात्; बीजाङ्कुरवदत्र तथात्वादृष्टत्वेन प्रमाणाभावात् ॥ 'अहमज्ञः' इति प्रत्यक्षेणान्तःकरणविशिष्टेऽविद्याप्रतीतेः कथमत्र तथात्वादर्शनमिति *चेत्*, न; तथा सति 'मनुष्योऽहं न जानामि' इत्यादिप्रतीतेरपि दर्शनादन्तःकरणविशिष्टस्येव मनुष्यदेहादिविशिष्टस्याप्यज्ञानाश्रयत्वप्रसङ्गात्। नच—एवमस्तु; अन्तःकरणवद्देहादेरपि प्रमातृकोटिप्रवेशात् प्रमातुर्जीवस्यैव ज्ञानाश्रयत्वाभ्युपगमात् सुषुप्तेऽन्तःकरणसंस्कारवद्देहस्य तदाश्रयसंस्कारस्य वा विद्यमानत्वात् तद्विशिष्टस्याविद्याश्रयत्वाविरोधादिति—वाच्यम्; देवादिभानकाले मनुष्यत्वाद्यवच्छेदाभावेनाज्ञानाश्रयत्वानुपपत्तेः। नच—देहत्वादिकमेव तदवच्छेदकम्, न मनुष्यत्वादि; तथाच देहत्वादेर्देवदेहादावपि सत्त्वेनानुगमाद् नाननुगमात्तदाश्रयत्वानुपपत्तिरिति—वाच्यम्; देहत्वादेस्तत्प्रतीतावभासनादवच्छेदकत्वानुपपत्तेः। यो हि धर्मो यत्प्रतीतौ विशेषणतयोपलक्षणतया वा भासते,

पञ्चपादिका

*सत्यमेवम् :—विषयविशेषस्तु प्रयत्नेनान्विच्छद्भिरप्यनुपलभ्यमानकारणदोषे विज्ञानेऽवभासमानोऽपि पूर्वप्रवृत्तेन सकललोकव्यापिना निश्चितेन प्रमाणेनासम्भाव्यमानतयाऽपोद्यमानो दृश्यते। तद्यथौत्पातिकः सवितरि सुषिः, यथा वा माहेन्द्रजालकुशलेन प्रासादादेर्निगरणम्. एवमविषयेऽसङ्गे

पञ्चपादिकाविवरणम्

भासनमप्यसम्भाव्यमानतया निराकृतमनुभूयत इत्यनुभवमेवावलम्ब्य परिहरति---*सत्यमेवमिति ॥ औत्पातिक इति* ॥ अदृष्टव्यतिरिक्तकारणशून्य इत्यर्थः ॥

ननु प्रमाणेनैव क्वचिदसम्भावना तिरस्क्रियते, यथाऽऽकाशगमने पक्षिणाम् ; क्वचिदसम्भावनया प्रतिभासोऽपरोक्षोऽपि निरस्यते, यथा सवितृसुष्यादौ ; तत्रात्मन्यनात्मावभासः कं पक्षमवलम्बतामित्यसम्भावनापक्षमेवेति विशेषं दर्शयति---*एवमविषयेऽसङ्ग इति* ॥ अधिष्ठानस्याध्यस्यमानेन सहैकज्ञानविषयत्वं

ऋजुविवरणम्

ननु—नौत्पातिकत्वं सुषेः ; अनिष्टद्योतकाभिधायित्वात्, उत्पातशब्दस्यानिष्टाभिधानेऽपि न तद्धितसंभवः। नच

तत्त्वदीपनम्

इति* ॥ भविष्यदनिष्टमुत्पातस्तत्सूचक औत्पातिक इत्यर्थः। असंभावनया प्रामाणिकस्याप्यपवादवत् प्रमाणेनासंभावनाऽप्यपोद्यमाना दृष्टा, तद्वत्किं न स्यात् ? इति चोदयति—*ननु प्रमाणेनेति* ॥ असंभावनाबाहुल्यादसंभावनया प्रामाणिकस्याप्यपवादो युक्त इत्याह—*असंभावनेति* ॥

अविषय इत्यत्र विषयशून्यत्वमुच्यते ? विषयत्वराहित्यं वा ? नाद्यः ; शब्दादेर्भावात्, नेतरः ; अस्मत्प्रत्ययविषयत्वादित्यत्राह—*अधिष्ठानस्येति* ॥ अविद्यादिसङ्गित्वादसङ्गित्वमसिद्धमित्याशङ्क्याह—*द्रष्टृव्यतिरिक्तस्येति* ॥ अध्यासनिमित्तस्यानन्दादेः स्वरूपस्य गुणस्य चाङ्गीकृतेः "केन चिदि"त्याद्यनुपपन्नमित्याशङ्क्याह—*अधिष्ठानेति* ॥

वार्तिकम्

स एव तदवच्छेदको भवति, नान्यः ; अतिप्रसङ्गात्। नच देहत्वमज्ञानाश्रयविशेषणतयोपलक्षणतया वा केनचित् कदाचिदप्यनुभूयते—'देहोऽज्ञः' 'देहोऽहमज्ञ'इति वा ; न वा प्रमाणान्तरात् प्रमीयते, येन तदवच्छेदकत्वं स्यात्। किं तर्हि ? 'मनुष्योऽहमज्ञः' 'देवोऽहं न जानामि' इत्येवं मनुष्यत्वादेस्तद्विशेषणतया तदुपलक्षणतया वा प्रतीतिरस्ति। तच्चाननुगतमेवेत्यवोचाम। अस्तु वा देहत्वमवच्छेदकम् ; तथाऽपि देहाध्यासस्याविद्यात्मलाभाधीनत्वान्न पूर्वोक्तदोषनिस्तारः। *अथ* मास्तु मनुष्यदेहादेरविद्याश्रयकोटौ प्रवेशः ; अननुगमात्, सामानाधिकरण्यप्रतीतिस्तु तदाश्रये देहादेरध्यासादिति—चेत्, एवं तर्ह्यन्तःकरण-तत्सामानाधिकरण्यप्रतीतेरपि तुल्ययोगक्षेमता ; देहादिवदविद्याश्रय एवान्तःकरणाध्यासात्। अन्तःकरणविशिष्टाश्रयत्वे चाविद्याया दोष उक्त एव। तस्मान्नान्तःकरणविशिष्टाश्रयाऽविद्या, किं तर्हि ? शुद्धचिन्मात्राश्रयेति सिद्धम्। कथं तर्हि जीवेश्वरविभागसिद्धिः ? नैवम् ; "तत्त्वमसि" "अहं ब्रह्मास्मि" इत्यादितदभेदप्रतिपादकश्रुतिशतविरोधेन तद्विभागासिद्धेः। श्रुतिविरोधात् पारमार्थिकतद्विभागाभावेऽपि व्यवहारदर्शनात् काल्पनिकस्तद्विभागोऽस्त्येवेति चेत्, सत्यम् ; तत्र काऽनुपपत्तिः ? एकस्मिन्नपि शुद्धचिदात्मन्यविद्याश्रयत्वविषयत्व-कृताज्ञत्व-सर्वज्ञत्वधर्मभेदात् तद्विभागव्यवहारोपपत्तेः। *ननु* तदाश्रय-विषययोश्चिन्मात्रत्वाविशेषात् कथं तद्धर्मव्यवस्थेति—चेत्, *नैष दोषः* ; मुख-सूर्यादिबिम्ब-प्रतिबिम्बयोर्मुख-सूर्यादिमात्रकत्वाविशेषेऽप्यवदातत्व-श्यामत्व-कम्पाकम्पादिधर्मव्यवस्थावत्तयोरेकत्वेऽ-

पञ्चपादिका

केनचिदपि गुणादिनाऽध्यासहेतुना रहिते निष्कलङ्कचैतन्यतयाऽन्यगतस्याप्यध्यासस्यापनोदनसमर्थेऽ-

पञ्चपादिकाविवरणम्

वक्तव्यम्, तदभावान्नाध्याससम्भव इत्याह--*अविषय इति* ॥ द्रष्टृव्यतिरिक्तस्य कृत्स्नस्य कार्यकारणसंघातस्याध्यासात्मकत्वेन द्रष्टर्येव काचादिवद्दोषानुषङ्गो वक्तव्यः, तदभावान्नाध्याससम्भव इत्याह--*असङ्ग इति* ॥ अधिष्ठानस्याध्यस्यमानेन गुणावयवसादृश्यं वक्तव्यम्, तदभावान्नाध्याससम्भव इत्याह—*केनचिदपि

तत्त्वदीपनम्

चैतन्यस्याधिष्ठानत्वान्न तन्मात्रज्ञानमारोपविरोधि, इदमाकारज्ञानवदित्यत आह—*अधिष्ठानेति* ॥ सामान्यविशेषभावेन भेदात्सामान्यज्ञानमविरोधि, विशेषज्ञानं तु विरोधि, न तथाऽत्र, सामान्यादिभेदाभावादित्यर्थः। अविषयादि-

वार्तिकम्

ष्यज्ञत्व-सर्वज्ञत्वादिधर्मव्यवस्थोपपत्तेः। *एतेन*—एकाविद्यापक्षे कथं बन्ध-मोक्षव्यवस्था स्यादित्यपि—*अपास्तम्* ; शुद्धचिदेकरसेऽज्ञदृष्ट्या जीवेश्वरविभागवद्बद्ध-मुक्तविभागोपपत्तेः। *ननु* एकाविद्यैकजीवपक्षे शुकस्य मोक्षश्रवणात् तत्तत्त्वज्ञानेन सविलासाविद्याविनाशादिदानीं संसारोपलम्भो न स्यात्। *एतेन*—एतावता कालेन कोऽपि न मुक्त इति—*अपास्तम्* ; शुकादिमुक्तिप्रतिपादकश्रुति-स्मृतिविरोधात्, अन्यथैतावता कालेन चेद्वेदान्तश्रवणादिना कस्यचिदपि विज्ञानं नोत्पन्नम्, उत्पन्नाद्वा तस्मान्न मोक्षः प्राप्तः, तर्ह्यस्माकमिदानीन्तनानां पूर्वतनापेक्षयाऽल्पमेधसां तेन विज्ञानमुत्पत्स्यते, उत्पन्नाद्वा तस्माद्व मोक्षो भविष्यतीति का प्रत्याशेत्यनध्यवसायात् श्रवणादौ कोऽपि न प्रवर्तेतेति—चेत्, *न* ; दत्तोत्तरत्वात्। उक्तं हि—"शुद्धचिदेकरसेऽज्ञदृष्ट्या जीवेश्वरविभागवद् बद्ध-मुक्तव्यवस्थोपपत्तेरि"ति। *तथाहि*--किं विद्वद्दृष्ट्या बद्ध-मुक्तव्यवस्था प्रतिपाद्यते ? अविद्वद्दृष्ट्या वा ? नाद्यः; तद्दृष्ट्या तदभावात्। "यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः" ॥ "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदि"त्यादिश्रुतेः। अपिच यद्दृष्ट्या जगदेव कालत्रये नास्ति, तत्र दूरत एव बन्ध-मोक्षव्यवस्थेति। द्वितीये तु न काचिदनुपपत्तिः। यथा हि स्वप्नेऽज्ञ एकोऽपि सन् 'शुको मुक्तः' 'विष्णुशर्मा बद्धः' 'अयं मे पितेयं मे माता' 'अयमहं जितामित्रो मृतां भार्यां शोचामी'ति बहुविधं द्वैतं कल्पयित्वा व्यवहरति ; तथा जागरेऽपि तादृशं बहुविधं द्वैतं कल्पयित्वा व्यवहरतीति न काचिदनुपपत्तिरस्ति। न हि बन्ध-मोक्षादिकल्पना पारमार्थिकी ; "ब्रह्म तं परादात् योऽन्यत्रात्मनो ब्रह्म वेद" "सर्वं तं परादात् योऽन्यत्रात्मनः सर्वं वेद"। "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिश्रुतिशतविरोधात्। भगवानपि वासुदेव इममर्थमाह—"*बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः। गुणस्य मायामूलत्वाद्व न मे मोक्षो न बन्धनम्" इति* ॥ *एतेन*—एकस्य मुक्तौ द्वितीयस्याज्ञानस्यैवाभावात् कस्य दृष्ट्या तत्कल्पना स्यादिति—*अपास्तम्* ॥ परमार्थदृष्ट्यैकमुक्तेरेवाभावात्। *एतेन*—अनध्यवसायोऽपि—निरस्तः ; अज्ञस्य बद्ध-मुक्तादिभेदेन नानात्वदर्शेर्विद्यमानत्वेनानध्यवसायानुत्पत्तेः, कर्मकाण्डवन्मोक्षशास्त्रस्य कल्पनाविषयत्वेऽप्यविद्यादशायां प्रामाण्योपपत्तेः, विद्यादशायां तु तद्वदेव तत्प्रामाण्यानभ्युपगमात्। अत एव भगवान् भाष्यकारो मोक्षशास्त्रस्याप्यविद्यावद्विषयत्वं वक्ष्यति। तस्मादुक्तप्रकारेणैकाविद्यापक्षे बन्ध-मोक्षव्यवस्थोपपत्तेर्न तदर्थं निष्प्रामाणिक्यनेकाविद्याकल्पना युक्ता ॥

पञ्चपादिका

ध्यासावगमोऽविभाव्यमानकारणदोषो विभ्रम इत्याशङ्क्येत, तन्मा शङ्कीति, सद्भावातिरेकेण सम्भवोऽपि पृथक् कथनीयः ; *तदुच्यते* ; "आह कोऽयमध्यासो नामे"ति किंवृत्तस्य प्रश्न आक्षेपे च

पञ्चपादिकाविवरणम्

गुणादिनेति* ॥ अधिष्ठानयाथात्म्यावभासोऽध्यासविरोधी, तद्भावाच्च नाध्याससम्भव इत्याह—*निष्कलङ्क-चैतन्यतयेति* ॥

ननु आत्मन्यविषयादिरूपेऽनवगते नासम्भावनाबुद्धिः, अवगते तु नाध्यास एव तिष्ठति, कुतोऽसम्भावनाबुद्धिरिति, *नैतत्सारम्* ; आत्मन्यविषयादिरूपे परोक्षावभासोऽसम्भावनाबुद्धिहेतुः, अपरोक्षावभासोऽध्यासस्य निवर्त्तक इत्युक्तत्वात्। उपसंहरति—*तन्मा शङ्कीति*—*तदुच्यते* ॥ तत्=त्रितयं लक्षणं सम्भावना प्रमाणं क्रमेणोच्यत इत्यर्थः। अनन्तरभाष्यस्य तात्पर्यमाह—*आह कोऽयमिति* ॥

ऋजुविवरणम्

निर्निमित्तत्वम्; विरोधात्, नाप्यदृष्टजन्यत्वम्; दोषजन्यत्वेनैव मिथ्यात्वप्रसङ्गात्, कारणानुपलम्भेऽप्यौत्पातिकत्वाङ्गीकारात्, अतो दोषजन्यतया विषयापह्नवः, न त्वसंभावनामात्रेणेत्याशङ्क्य व्याचष्टे—*औत्पातिक इति* ॥ *अदृष्टेति* ॥ सिद्धे मिथ्यात्वेऽदृष्टसिद्धिः, न तु पूर्वमिति भावः। "तदुच्यते" इत्यत्र तच्छब्देन प्रकृतसंभावनानिर्देशशङ्का स्यात्; सन्निहितत्वात्, तथा सत्यनन्तरं लक्षणप्रदर्शनमसम्बद्धम्, तदिति तृतीयलिङ्गनिर्देशोऽप्ययुक्तः स्यात्, तां व्यावर्तयति—*तत्त्रितयमिति* ॥ त्रितयमुच्यत इति प्रतिज्ञायानन्तरमेकमेव वक्तुमनुचितम्, लक्षणनिरूपणे

तत्त्वदीपनम्

रूपात्मन्यनधिगतेऽसंभावनाबुद्धिः? उताधिगते? इति विकल्प्योभयथाऽप्यसंभव इत्याह—*नन्वात्मनीति* ॥ द्वितीयं पक्षमादायोत्तरयति—*नैतत्सारमिति* ॥

अधिगतेऽध्यास एव न तिष्ठतीति यदुक्तम्, तदेव विवेचनीयम्—अविषयादिरूपात्मनि किं परोक्षतया प्रतिपन्नेऽध्यासनिवृत्तिः? उतापरोक्षतया? इति विकल्प्य, आद्ये नानुपपत्तिरित्याह—*आत्मनीति* ॥ परोक्षतयाऽवभासस्याध्यासाविरोधित्वान्नाध्यासनिवर्तकत्वम्, ततश्चासंभावनाबुद्धिः स्यादित्यर्थः। द्वितीयस्त्वङ्गीक्रियत इत्याह—*अपरोक्षेति* ॥ *उक्तत्वादिति* ॥ "यतो ज्ञानमज्ञानस्यैव निवर्तकमि"त्यत्रेत्यर्थः। संभवस्य प्रकृतत्वात्तच्छब्देन संभवपरामर्शः शङ्क्येत, न च संभवति; तच्छब्दस्य नपुंसकत्वात्, इत्याशङ्क्य परिहरति—*तत् त्रितयमिति*॥ लक्षणादीनामन्यतमस्यापि वैयर्थ्याभावात्तल्लक्षणादित्रितयमप्युच्यत इत्यर्थः। "स्मृतिरूपः" इत्यत्र लक्षणमेवोच्यते, नेतरे इत्याशङ्क्याह—*क्रमेणेति*॥ किंशब्दस्याक्षेपे प्रश्ने च प्रयुज्यमानत्वात्स किमर्थ इति न ज्ञायते, तत्राह—*किंवृत्तस्येति* ॥ किंशब्दादुपरि वृत्तः किंवृत्तः, तस्येति यावत्। उभयत्र प्रयोगेऽप्येकस्मिन् वाक्ये नैकस्य शब्दस्योभयार्थत्वम्, यथा गोशब्दस्याऽनेकत्र प्रयोगेऽप्येकस्मिन् प्रयोग ऐकार्थ्यनियमः, तद्वदित्याशङ्क्याह—*उभयस्येति* ॥ 'अध्यासः' इत्युक्ते सामान्यज्ञानात्प्रश्नः, 'आत्मनी'त्युक्ते विशेषज्ञानादाक्षेप इत्यर्थः। तन्त्र्यते व्युत्पाद्यतेऽनेनेति तन्त्रशब्दः शास्त्रवाची?

वार्तिकम्

"इन्द्रो मायाभिः पुरुरूप ईयते" इति मायाबहुत्वश्रुतेर्न निष्प्रामाणिकी तत्कल्पनेति चेत्, न; मायाकार्येन्द्रियवृत्तीनामेव मायाभिरित्यनेनाभिधानात्, "युक्ता ह्यस्य हरयः शता दश" इति वाक्यशेषे तत्परत्वाध्यवसानात्, लोकेऽपि मायाकार्य इन्द्रजालादौ मायाशब्दप्रयोगदर्शनात्, स्मृतावपि "*माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद*"॥ इत्यादौ तत्र तत्प्रयोगात्, एकाविद्याप्रतिपादकश्रुति-स्मृतिविरोधाच्च। श्रुतिस्तावत्—"अजामेकां लोहित-शुक्ल-कृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः।" "मायां तु प्रकृतिं विद्यादि"त्यादिः। स्मृतिश्च—

वार्तिकम्

"दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते"॥ इत्यादिः। न हि प्रतिजीवं मायाभेदे "अजो ह्येको जुषमाणोऽनुशेते। जहात्येनां भुक्तभोगामजोऽन्यः" "मायामेतां तरन्ति ते" इत्येकस्या मायाया अनेकजीवसम्बन्धित्वमुपपद्यते। मायाया ईश्वरशक्तित्वादीश्वरैक्येन तदैक्येऽपि प्रतिजीवमस्त्यविद्याभेद इति चेत्, न; प्रतिजीवं कार्याविद्याभेदापत्त्यामिष्टापत्तेः, अनाद्यविद्यायास्तु मायैक्येन भेदानुपपत्तेः। नच तस्या मायैक्यासिद्धिः; "तरत्यविद्यां विततां हृदि यस्मिन् निवेशिते। योगी मायाममेयाय तस्मै योगात्मने नमः"॥ इति मायाऽविद्ययोः सामानाधिकरण्यश्रवणादैक्यसिद्धेः। नच—एवं सति मायाऽविद्याशब्दयोः पर्यायत्वात् कथं सामानाधिकरण्यमिति—वाच्यम्; स्वाश्रयव्यामोहकत्वाव्यामोहकत्वप्रवृत्तिनिमित्तभेदेन पर्यायत्वासिद्धेः। अपिच यदि मायाऽविद्ययोर्भेदः, तर्हि तव मते "मायाभिः" इति बहुवचनानुपपत्तिः; ईश्वराश्रितमायाया एकत्वात्, तदन्युपगमे चाविद्याभेदेन जीवभेदवन्मायाभेदेनेश्वरभेदप्रसङ्गात्। तस्माद् वृत्तिभेदेन कार्यभेदेन वा बहुवचनं समर्थनीयम्। तथाच "मायाभि"रिति बहुत्वश्रवणादविद्याबहुत्वं साधु समर्थितं स्यात्। *ननु* मायाऽविद्ययोरभेदे कथमीश्वराश्रिता माया स्यात्? ईश्वरस्याविद्यावत्त्वे चानीश्वरत्वप्रसङ्गात्, तदाश्रयत्वविषयत्वकृतजीवेश्वरविभागव्यवहारानुपपत्तेश्चेति—*चेत्*, न; सिद्धान्तापरिज्ञानविजृम्भितत्वादुक्ताशङ्कायाः। कथम्? इत्थम्; तमस्त्वादेवाश्रय-विषयभेदोऽविद्याया नास्तीत्युक्तम्, तन्न विस्मर्तव्यम्। एवंच सति य एवाश्रयश्चिन्मात्रः, स एव विषय इति स्थितम्। तत्र न तावदविद्यामायेतिनामनी तस्याः स्वरूपप्रयुक्ते भवतः। किं तर्हि? स्वाश्रयव्यामोहाव्यामोहकर्तृत्वप्रयुक्ते। तत्कर्तृत्वाकर्तृत्वे च गुणभेदात्; त्रिगुणात्मकत्वादविद्यायाः। तथा सत्त्वांशप्राधान्ये सैव मायेत्युच्यते; सत्त्वस्य प्रकाशरूपत्वेन स्वाश्रयानावारकत्वात्। अतस्तदाश्रयोऽनावृतचिन्मात्रः। स च गुणोपाधितः सर्वज्ञत्वादिगुणयोगादीश्वर इति गीयते, तद्विषयश्च जीव इति; स्वगुणीभूतरजस्तमोंऽशेन तदाश्रयचिन्मात्रस्य जीवरूपस्याऽऽवृत्याऽऽकाशादिरूपेण विक्षेपणात्; "स इह प्रविष्टः" "हन्तानेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी"त्यादिश्रुतेः। सैव यदा रजस्तमआधिक्यात् स्वाश्रयस्वरूपमावृत्य व्यामोहयन्त्यविद्याख्यां लभते, जीवाश्रितेश्वरविषया भवति; मुग्धचैतन्यस्य जीवत्वात्। *तत्रायमर्थसंक्षेपः*—

भिन्ना यद्यपि नाविद्या मायातो वस्तुतः क्वचित्। तथाऽपि गुणवैषम्यात् तयोर्नाम विकल्प्यते॥
सत्त्वात्मिका तु मायाख्यां लभते कार्यगौरवात्। स्वाश्रयामोहहेतुत्वात् सार्वज्ञ्यादिगुणार्पणात्॥
स्वाश्रये सैव तमसा रजसा च स्वमाश्रये। मोहयन्ती त्वसार्वज्ञ्यदुःखित्वादिगुणार्पणात्॥
अविद्याख्यां च लभते नातो भेदस्तयोः क्वचित्। मायाऽविद्याविभागेन शिरोराहुविभागवत्॥
विषयाश्रययोस्तस्या भवेद् भेदविकल्पनम्। परमार्थतस्तु नैवास्ति भेदश्चिन्मात्रतः स्वतः॥
जीवाश्रया ब्रह्मपदा त्वविद्या तत्त्वविन्मता। ब्रह्माश्रया जीवपदा माया सैव प्रकीर्तिता॥

प्रदीपः

न समञ्जसम्; अतो नाख्यातिवादोऽयं विकल्पसह इति चेत्, भवतु नाम नाख्यातिवादः संभवदुक्तिक इति, न तु तावता सत्यानृतमिथुनीकरणरूपोऽध्यासः संभवति; देशान्तरीयरजतस्य ज्ञानलक्षणप्रत्यासत्त्या सन्निकृष्टस्य संसर्गाध्यासमात्रं भ्रमे कल्प्यत इत्यङ्गीकारादन्यथाख्यातिवाद एव श्रेयान्। अस्मिन् हि पक्षे "नेदं रजतमि"ति रजतसंसर्ग एव बाध्यते, न रजतमिति, नेदंकाराभिमुखप्रवृत्त्यनुपपत्तिः, न वा "नेदं रजतमि"ति बाधानुपपत्तिः। अङ्गीकृतं ह्यनिर्वचनीयख्यातिवादिभिरपि चैतन्यस्यान्तःकरणे संसर्गाध्यासमात्रेणापि परस्पराध्यासव्यवहार इति। तथाच पुरोऽवस्थितेदंपदार्थसंसर्गमात्रं रजते यथा कल्प्यते,

वार्तिकम्

तस्मान्नेशस्याविद्यावत्त्वेनानीशतापत्तिः, नापि जीवेश्वरविभागव्यवहारानुपपत्तिः। तथाच प्रतिजीवं मायाया अभेदेऽप्यविद्याभेदोऽस्तीत्यपेशलं वचः। *ननु*—तत्रापि मते "अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः।" "मायामेतां तरन्ति ते" इति श्रुतिस्मृती विरुद्ध्येयाते; अनेकजीवानङ्गीकरणादिति—*चेत्*, न; अविद्ययैवाविद्वद्दृष्ट्या तद्भेदकल्पनस्योक्तत्वात्। यथा ह्यविद्याया विषय एक एवेश्वरः सन् भूत-भौतिकनानाजडप्रपञ्चाकारेणाविद्वद्दृष्ट्या विकल्प्यते, तथैक एव तदाश्रयो जीवः सन्नविदुषा नानाचेतनाकारेण विकल्प्यते। तथाच श्रुतिः—"विज्ञानं चाविज्ञानं च सत्यं चानृतं च सत्यमभवत्" इत्यदोषः। *ननु* नानाविद्यापक्षेऽप्यविद्वद्दृष्ट्यैव कल्पिता जीवभेदाः; अत एकाविद्यापक्षे न ततः कश्चिदपि विशेष इति—*चेत्*, न; अविशेषासिद्धेः, एकाविद्यापक्ष एकस्यैवाविदुषो जीवस्य तद्भेदकल्पकत्वात्, नानाविद्यापक्षे त्वविद्वांसो बहव इत्यस्ति पक्षयोर्महान् विशेष इति। नच—एवं सति कोऽसावज्ञ इत्यनिर्धारणात् श्रवणादावप्रवृत्तिरिति—*वाच्यम्*, अज्ञानस्य स्वसाक्षिकत्वेन तदनवधारणासिद्धेः।

अपिच बन्ध-मोक्षादिव्यवस्थोपपत्त्यर्थं हि त्वया नानाऽविद्या कल्प्यते। नच तत्कल्पनेऽपि तदुपपत्तिरस्ति; वैपरीत्यात्। *तथाहि*—शुकाविद्ययाऽयं विद्यमानाकाशादिप्रपञ्च आरब्धो वा? न वा? तत्राद्ये तद्विद्यया तस्य सविलासाविद्या निवृत्ता? न वा? न चेत्, कथं तस्य मोक्षः? बन्धस्य विद्यमानत्वात्। विनिवृत्ता चेत्, कथमन्येषामिदानीं प्रपञ्चोपलब्धिः स्यात्? नच—अयं प्रपञ्चस्तं प्रति निवृत्तोऽपि माऽस्मदादीन् प्रति निवृत्तदिति—वाच्यम्; भाव-निवृत्त्योः पुरुषानपेक्षवस्तुधर्मत्वात्। न हि घटो ध्वस्तः कंचित् प्रत्यध्वस्तो भवति, नापि विद्यमानः कंचित्प्रत्यविद्यमानो भवतीति लोके दृष्टम्। नच—अविद्यानिवृत्तावपि प्रपञ्चो न निवर्तत इति—वाच्यम्; उपादाननिवृत्तौ कार्यनिवृत्तेरावश्यकत्वात्। नच—तन्निवृत्तावपि खण्डपटवदवशिष्टाभिरविद्याभिः पुनरारब्धः प्रपञ्चो भविष्यतीति—वाच्यम्; खण्डपटवदेव जगद्वैलक्षण्यप्रसङ्गात्, प्रतिसर्गं च श्रुति-स्मृतिभ्यां तदैकरूपतावधारणात्। *ननु* यः प्रपञ्चस्तदविद्यारब्धः, स तु निवृत्त एव, अयं च दृश्यमानः प्रपञ्चो बद्धजीवान्तराविद्यारब्धः; प्रतिजीवं प्रपञ्चभेदात्, अतो विद्यमानप्रपञ्चस्य तदविद्यानारब्धत्वान्नोक्तदोष इति—चेत्, न; प्रतिजीवमाकाशादिप्रपञ्चभेदकल्पने प्रमाणाभावात्, सर्वोपनिषत्स्वाकाशादिक्रमेणैकस्यैव प्रपञ्चस्योत्पत्तिश्रवणात् तद्व्याकोपापत्तेश्च। अत एव पुराणेषु कुत्रचिदनेकब्रह्माण्डश्रवणं तदर्थवादत्वेन, कल्पभेदाभिप्रायेण, दृष्टिसृष्टिवादाभिप्रायेण वा नेयम्; अन्यथा सर्वोपनिषद्व्याकोपापत्तेः।

अपिच यदि प्रपञ्चभेदः स्यात्, शुकाविद्यारब्धप्रपञ्चस्येदानीमसत्त्वाद् न तत्र कोऽपि बद्धोऽस्ति, अस्मदारब्धविद्यमानप्रपञ्चे तु न कोऽपि मुक्तोऽस्तीति बन्ध-मोक्षव्यवस्था भवता साधु समर्थिता

प्रदीपः

एवं ज्ञानलक्षणप्रत्यासत्तिसन्निकृष्टरजतसंसर्गमात्रमेवेदंपदार्थेऽपि स्वीक्रियताम्, किमिति मिथ्यारजतान्तरकल्पनम्? अन्यथाख्यातिवादिनां वाऽऽक्षेपमनुवदति—*आह कोऽयमध्यासो नामेति*॥ *अयमध्यासः=सत्यानृतमिथुनीकरणरूपः। को नाम? किमाक्षेपे। एतादृशोऽध्यासो न संभवति। सत्यं भ्रमज्ञानं प्रमातिरिक्तं वर्तते---"इदं रजतमि"त्यादिरूपम्, परन्तु नात्र सत्यानृतमिथुनीकरणमिति भावः। असत्ख्यातिवाद आत्मख्यातिवादो वा लोकवेदविरुद्धत्वाद् नाशङ्कामप्यर्हतीति तु हृदयम्। अथवेमावपि वादावन्यथाख्यातिवादस्यैवावान्तरभेदाविति न दोषः। आक्षेपद्वयमपि समाधत्ते---*स्मृतिरूपः परत्र पूर्वदृष्टाव-

वार्तिकम्

स्यात्। न हि विद्यमानानादिभवे कश्चिदपि मुक्तोऽस्ति, यदि मुक्तोऽस्ति, तर्हि न प्रपञ्चभेदः। तत्र चोक्तो दोषः। नच प्रपञ्चान्तरवर्ती जीवोऽस्मद्दृष्टिपथमवतरितुं योग्यो भवति ; अस्मदविद्याश्रय-विषय-कोटावप्रवेशात्, स्वाविद्याश्रय-विषयकोटिप्रविष्टस्यैव स्वदृश्यत्वात्, तत्कार्यजडाजडप्रपञ्चयोरपि तदाश्रय-विषयकोटिप्रविष्टत्वादित्युक्तत्वात्, तत्कोटिप्रवेशाभ्युपगमे च जीवान्तरस्य स एवैकाविद्यैकजीववादी नामान्तरेण भवताऽभ्युपगतः स्यात्। अपिच स च मुक्तो जीवो बद्धजीवेश्वराभ्यां भिन्नतयाऽवतिष्ठते ? अभिन्नतया वा ? नोभयथाऽपि मोक्ष उपपद्यते। भिन्नतयाऽवस्थानेऽद्वैतभावाभावादमोक्षः ; तद्भावस्यैव मोक्षत्वात्। द्वितीये तु नियन्तृ-नियम्यभावापन्नाभ्यां जीवेशाभ्यां भेदाद् हिरण्यगर्भभावापत्तिवत् पुनः संसार एव, न कैवल्यम्। *ननु* यथा जीवेश्वरयोः स्वरूपत एकत्वेऽपि न परस्परधर्मसङ्करः ; तत् कस्य हेतोः ? तयोरुपाधिभेदस्योक्तत्वात्, तद्वद् बद्ध-मुक्तजीवयोर्बद्धत्व-मुक्तत्वोपाधिभेदाद् धर्मासाङ्कर्यं भविष्यतीति—चेत्, न ; मुक्तमापादयतस्तन्मुक्तत्वस्याद्याप्यसिद्धत्वादुपाधिभेदासिद्धेः। अपिच 'तत्त्वमसी'त्यादिवाक्याज्जायमानमभेदज्ञानमीश्वरगतनियन्तृत्वसर्वज्ञत्वाद्यौपाधिकधर्मं निवर्तयति ? न वा ? न चेत्, जीवगतकर्तृत्वादिकमपि न निवर्तयेत् ; अविशेषात्। निवर्तयतीति चेत्, एवं तर्हि कथमन्यं प्रति तदीशितृत्वं स्यात् ? प्रतिजीवं भेदकल्पने चेश्वरभेदप्रसङ्गः। तदप्रसक्तौ च शुद्धाशुद्धयोरभेदज्ञानानुपपत्तिरित्यास्ताम्। सर्वथाऽपि नास्त्यविद्याया नानात्वकल्पने मानमुपपत्तिर्वेत्ये-कैवाविद्या, तदुपाधिकश्चैक एव जीव इति सिद्धम्॥

सा चानाद्या ; अनाद्यहङ्कारादिकार्यप्रवाहहेतुत्वात्, स्वतन्त्रचिदुपाधित्वाच्च। स्वातन्त्र्यं च चिदन्यानधीनत्वम् ; अहङ्कारादेश्चिदुपाधित्वेऽपि तदुपाधित्वस्याविद्याधीनतया चिदन्यानधीनत्वाभावात्। नच—चिदिति विशेषणं व्यर्थम् ; अन्यानधीनत्वमित्यनेनैवाहङ्कारादेर्वारणादिति—वाच्यम् ; तद्वारणेऽप्यसंभव-वारणार्थत्वात् सार्थकत्वोपपत्तेः ; अन्यथाऽविद्यायाश्चिदधीनात्मलाभेन तदुपाधित्वादन्यानधीनत्वाभावेनासंभवापत्तेः॥

सोऽयमनादित्वसाधनाय प्रयुक्तो व्यतिरेकी हेतुरविद्याया लक्षणं भवति। मिथ्यात्वं च दृश्यत्व-जडत्व-परार्थत्वादिभ्यः शुक्तिरजतादिवत्। यथा चैतेषां मिथ्यात्वगमकत्वम्, तथा प्रतिपादितमस्माभिरद्वैतामृतकन्द इति नात्र प्रपञ्च्यते। मिथ्याज्ञानोपादानत्वादप्यविद्याया मिथ्यात्वम् ; कार्यस्योपादानानुसारित्वात्, मिथ्याभूतमिथ्याज्ञानस्य सत्योपादानत्वानुपपत्तेः। यथाच मिथ्याज्ञानस्य मिथ्यात्वमविद्योपादानत्वं च, तथा सर्वमावेदितम्। इदमपि व्यतिरेकित्वादविद्याया लक्षणं वेदितव्यम्॥

एतेन अभाववैलक्षण्यमप्यविद्यायाः सिद्धं भवति ; अभावस्योपादानत्वानुपपत्तेः। *ननु*—अविद्या प्रमाणसिद्धा ? न वा ? न चेत् ; आश्रयासिद्धिरनादित्वादिसाधकानामुक्तहेतूनाम्। अथ प्रमाणसिद्धा, तर्हि प्रमाणसिद्धस्य सत्यत्वेन धर्मिग्राहकप्रमाणविरोधात् कालात्ययापदिष्टता तस्मिन् मिथ्यात्व-

प्रदीपः

भास इति* ॥ स्मृतिरूपः=स्मृतिसदृशः, न तु स्मृतिरेवांशतोऽपीत्यख्यातिवादनिरासः। *परत्र=अधिष्ठाने। *पूर्वदृष्टावभासः=पूर्वदर्शनजन्यसंस्कारोद्बोधितस्यैवाभासः, न तु पूर्वदृष्टसंसर्गमात्रस्यावभासः। अनेन चान्यथाख्यातिवादो निरस्यते। अन्यथाख्यातिवादे रजतज्ञानमलौकिकप्रत्यक्षमेव, न लौकिकप्रत्यक्षमित्यापद्येत। नचेदं कोऽप्यलौकिकं प्रत्यक्षमनुभवति। लौकिकप्रत्यक्षता तु विनेन्द्रियसम्प्रयोगं न संभवतीत्यनिर्वचनीयं रजतं तत्रोत्पद्यते। अनिर्वचनीयन्तु चक्षुःसम्प्रयुक्तेद-माकारवृत्त्यभिव्यक्तसाक्षिचैतन्याध्यस्तत्वात्साक्षिभास्यं प्रत्यक्षतामर्हतीत्यनिर्वचनीयख्यातिरेव युक्ता, नान्यथाख्यातिरिति

वार्तिकम्

साधकहेतोरिति—*चेत्,* न ; तमस आलोकग्राह्यत्ववत्तद्विरोधित्वादविद्यायाः प्रमाणाग्राह्यत्वेऽपि सर्वजनीननित्यानुभवसिद्धत्वादाश्रयासिद्ध्यभावात्। नच प्रमाणसिद्धस्यैव धर्मित्वमिति नियमोऽस्ति ; मिथ्याज्ञानविषयस्यापि शुक्तिरजतादेर्धर्मित्वदर्शनात्, उभयवादिसंप्रतिपन्नतयोपस्थितिविषयस्यैव धर्मित्वोपपत्तेः। नच—अविद्यायास्सर्वजनीननित्यानुभवसिद्धत्वमसिद्धम् ; तथा सति प्रमाणप्रवृत्त्यनुपपत्तेः। सर्वो लोकः—'अहमज्ञः' 'घटं पटं च न जानामि' इति स्वाश्रयां तत्तद्विषयविषयामज्ञाततामनुभूय तत्तद्विषयज्ञानार्थं तत्तद्योग्यप्रमाणं व्यापारयति ; अनधिगतार्थविषयत्वात् प्रमाणानाम्। अधिगते तु फलाभावात् तद्व्यापारणानुपपत्तेः। न हि छिन्ने वृक्षे व्याप्रियमाणोऽपि कुठारश्छिदान्तरं साधयति ; एकावच्छेदेनैकस्मिन् विषये युगपत्फलद्वयासंभवात्। नच तामभावयत् करणं भवति ; करणस्य फलनियतत्वात्। अतो द्वैधीभावाभावमनुभूय कुठारव्यापारणवदज्ञाततामनुभूयैव प्रमाता प्रमाणं व्यापारयतीति सिद्धम्। नच तदनुभवः प्रमाणेन भवितुमर्हति ; अन्योन्याश्रयात्—प्रमाणप्रवृत्तावज्ञातताऽनुभवः, अज्ञाततानुभवे च प्रमाणप्रवृत्तिरित्यन्योन्याश्रयः। प्रमाणान्तरेण तु तदज्ञातताऽनुभवे तस्यापि तदनुभवपूर्वकप्रवृत्तेश्चक्रकाद्यापत्तेः, तत्तत्प्रमाणेनैव विषयवेदनात् पूर्वप्रमाणलोपापत्तेश्च। अभ्युपेत्यैतदुक्तम्। वस्तुतस्तु—प्रमाणफलेनाज्ञाततया विरोधाद् न तद्विषयिणी प्रमाणप्रवृत्तिः संभवति। न ह्यालोकफलेन विरुद्धं तमस्तद्विषयो भवति ; विषयविषयिभावस्याविरोधनिरूप्यत्वात्॥

ननु अवघात-पेषणादीनां व्रीहिविरोधित्वात् कथं तद्विषयतेति—*चेत्*, *न* ; तदवयवानामेव तत्फलाधारत्वेन तद्विषयत्वात् तेषां व्रीहिविषयत्वासिद्धेः। अत एव—"व्रीहीनवहन्ती"त्यादौ व्रीहिशब्देन प्रकृतापूर्वसाधनीभूतं द्रव्यं लक्ष्यते" इत्यभिहितं पूर्वकाण्डे। तस्मात् प्रमाणप्रवृत्तेः पूर्वमज्ञाततानुभवस्य सर्वसिद्धत्वात् तस्यैवं प्रमाणजन्यत्वासंभवेन नित्यत्वसिद्धेः सिद्धमविद्याया नित्यानुभवसिद्धत्वमिति॥

एतेन—ज्ञानप्रागभाव एवाज्ञातता, न भवदभिमताऽविद्येति—*परास्तम्*, यद्यस्मदभिमतोऽभावोऽज्ञाततोच्यते, तर्हि नामान्तरमात्रमेतत् ; "नेत्यनृतमि"ति श्रुतेः, *"भावाभावौ पदार्थौ द्वौ लोकविज्ञानगोचरौ* ॥" इत्यादिवचनेनाभावमात्रस्याविद्यात्वप्रापणात्। अथ वाद्यभिमताभावोऽज्ञाततेत्युच्यते, तत्र तस्य तन्मते प्रमाणैकवेद्यत्वात् प्रमाणप्रवृत्तेः पूर्वं प्रमाणाव्यापारात् तज्ज्ञानानुपपत्तेः ; अन्यथाऽन्योन्याश्रयादित्युक्तत्वात्। *ननु* मन इन्द्रियं योग्यानुपलब्धिसहकारेण 'घटं न जानामी'ति तदज्ञाततां ग्रहीष्यति ; पश्चात्तद्विषयचक्षुरादिव्यापारसंभवात् कुतोऽन्योन्याश्रयः ? इति—*चेत्*, *न* ; एवमप्यनवस्थाया आवश्यकत्वात्—अज्ञातताग्रहणार्थं मनोव्यापारणाय तदज्ञातताग्रहोऽपेक्ष्यते, पुनस्तदज्ञाततायहार्थमपि तदज्ञातताग्रह इत्यनवस्था। नचान्योन्याश्रयोऽपि परिहृतो भवति ; अज्ञातताग्रहे मनोव्यापारः, मनोव्यापारे चाज्ञातताग्रह इत्यन्योन्याश्रयस्यावश्यकत्वात्। नच मनसाऽभावग्रहोऽपि संभवति ;

प्रदीपः

भावः। अनिर्वचनीयख्यातौ परस्पराध्यासस्वीकारेऽपि परत्रेतिसप्तमीप्रयोगादधिष्ठानं सर्वदाऽधिष्ठानमेव, नाऽऽरोप्यमिति सूत्रनद्वाराऽधिष्ठानवैषम्यस्यारोप्ये ज्ञापनेन सत्यानृतमिथुनीकरणमेवाध्यास इति सूच्यते। यद्यप्यनिर्वचनीयख्यातिवादे न पूर्वदृष्टं भासते ; किन्तु तत्सजातीयमेव ; तथाऽपि प्रातिभासिक-व्यावहारिक-साधारणरजतत्वमेकमिति सिद्धान्ताद् न पूर्वदृष्टपदानुपपत्तिः। अथवा—व्यावहारिकरजततादात्म्यापन्नमेव प्रातिभासिकमिदंपदार्थेऽध्यस्यत इति प्राचीनाचार्यसिद्धान्तविरोधः। आक्षेपसमाधानार्थतया योजनावसरे "स्मृतिरूपः" इति . वाक्ये 'अध्यासः' इत्यनुषञ्जनीयम्। तथाचाध्यासः

वार्तिकम्

सन्निकर्षाभावात्। नच—संयुक्तविशेषणताख्यः सन्निकर्षोऽस्तीति—वाच्यम्; विशेषणताया अतिप्रसञ्जकत्वेन सन्निकर्षत्वानुपपत्तेः; अन्यथा रूपादीनामपि तेन सम्बन्धेन ग्रहोपपत्तेः संयुक्तसमवायादिकल्पनावैयर्थ्यापत्तेः।

ननु एवमपि रूपत्वादिग्रहे संयुक्तसमवेतविशेषणत्वादिसम्बन्धे वक्तव्ये तद्घटकतया संयुक्तसमवायादेः सम्बन्धत्वमङ्गीकर्तव्यम्; असम्बद्धस्य परम्परासम्बन्धघटकत्वायोगात्, अन्यथा परम्परासम्बन्धत्वानुपपत्तेः। तथाच रूपत्वादौ संयुक्तसमवेतविशेषणत्वरूपपरम्परासम्बन्धसिद्ध्यर्थमवश्यं रूपादौ संयुक्तसमवायोऽभ्युपगन्तव्यः, न संयुक्तविशेषणत्वम्; तस्योक्तसम्बन्धाघटकत्वात्। एवं च सति रूपादिषु संयुक्तसमवाये सिद्धे रूपत्वादिष्वपि संयुक्तसमवेतसमवाय एव सम्बन्धोऽस्तु; सत्त्वात्, न विशेषणतात्वरूपसम्बन्धविशेषकल्पनमुचितम्; अतो नातिप्रसङ्ग इति—चेत्, *न*; अभावत्वादाविव रूपत्वादावपि संयुक्तविशेषणविशेषणत्वस्य सत्त्वात् तेनैवान्यत्र क्लृप्तेन तद्ग्रहोपपत्तौ संयुक्तसमवेतविशेषणताऽकल्पनाद् न तद्घटकतया रूपादौ संयुक्तसमवायप्रसक्तिः; अतिप्रसङ्गावश्यकत्वात्। नच संयुक्तसमवायाभ्युपगमे विरोधः; तेषां विशेषणताघटकत्वेनैवाङ्गीकारात् केन सम्बन्धेन विशेषणतेति प्रश्ने संयुक्तसमवायादिनेति तत्प्रदर्शनार्थत्वात्; अतो नोक्तदोष इति—चेत्, न; एवमपि नाभाव इन्द्रियसम्बद्धविशेषणतासम्बन्धो भवेत्, भावाभावयोः सम्बन्धानिरूपणादसम्बद्धस्य विशेषणत्वायोगात्। न ह्यसम्बद्धयोर्विशेष्य-विशेषणभावः प्रमाणगोचरः, संभवी वा; तथा सति हिमवद्विन्ध्ययोरपि विशेषणविशेष्यभावप्रसङ्गात्॥

अथ भावाभावयोः सम्बन्धान्तराभावेऽपि स्वरूपसम्बन्धसत्त्वादुपपन्नो विशेषणविशेष्यभाव इति—चेत्, *न*; स्वरूपस्यातिप्रसञ्जकत्वेन सम्बन्धत्वानुपपत्तेः, हिमवद्विन्ध्ययोरपि स्वरूपाविशेषात्॥ यत्र यत्र विशिष्टप्रतीतिर्दृश्यते तत्रैव स्वरूपस्य सम्बन्धत्वं कल्प्यते; फलबलकल्प्यत्वात्, हिमवद्विन्ध्ययोस्तु परस्परवैशिष्ट्यबोधाभावाद् न तत्कल्पनम्। अत एव सम्बन्धान्तरमन्तरेण विशिष्टधीजनकसम्बन्धत्वं स्वरूपसम्बन्धनिर्वचनमाहुर्वृद्धा इति चेत्, एवं तर्हि शुक्तौ 'इदं रजतमि'ति विशिष्टप्रतीतिदर्शनात् तत्र तत्कल्पनं स्यात्। नच—एवमस्त्विति—वाच्यम्; तथा सत्यभावप्रतीतिवत्तत्प्रतीतेर्बाधो न स्यात्। नच—एवं सम्बन्धान्तरेणैव तत्र विशिष्टप्रतीतिर्बाध्यते, न स्वरूपसम्बन्धेनेति—वाच्यम्; तथा सति भ्रम-प्रमाविभागो न स्यात्, प्रमायामपि विद्यमानसम्बन्धात् सम्बन्धान्तरेण बाधासंभवात्। *अथ*—शुक्तौ रजतस्य स्वरूपसम्बन्धसत्त्वेऽपि तादात्म्यसम्बन्धाभावात् तेन चेदं रजतमिति प्रतीतौ 'नेदं रजतमि'ति बाधो

भाष्यभावप्रकाशिका

प्रतिभास्यत्वेन प्रत्यक्षत्वाद् ज्ञेयाध्यासो ज्ञानाध्यासश्च न शक्योऽपह्नोतुमित्यसत्यत्वाद् बन्धस्य विषयादिसंभवादारभ्यमिदं शास्त्रमित्यभिसन्धिः॥ शास्त्रारम्भहेतुविषयादिसाधकमध्यासमाक्षेपसमाधिभ्यां संक्षिप्य तमेव लक्षण-संभावना-सद्भाव-प्रमाणैः स्फुटीकर्तुं चोदयति—*आहेति*॥

प्रदीपः

स्मृतिरूपः पूर्वदृष्टावभासरूपः सर्वत्र दृश्यते। स चानिर्वचनीयख्यातिवाद एव संभवति, नाख्यातिवादे; न चान्यथाख्यातिवादे वेति निष्कृष्टं योजनम्॥

वार्तिकम्

युज्यते, प्रमायां तु येन सम्बन्धेन प्रसक्तम्, तेन विद्यमानत्वाद् न बाधप्रतीतिरिति—चेत्, *न* ; तादात्म्यस्य स्वरूपाव्यतिरेकात्, व्यतिरेकेऽपि 'कुण्डे बदरमि'तिवद् 'भूतले घटो नास्ती'ति युतसिद्धयोर्भूतल-घटाभावयोराधाराधेयभावप्रतीतेः स्वरूपसम्बन्धविषयत्वव्याख्यानवत् 'शुक्ताविदं रजतमि'ति तादात्म्यप्रतीतेस्तथा व्याख्यातुं शक्यत्वात्। बाधदर्शनान्नैवं व्याख्यायत इति चेत्, एवं तर्हि शुक्ति-रजतप्रतीतिर्मैवं व्याख्यायि, देहात्मप्रतीतिस्तु तथा व्याख्यायताम् ; तत्र बाधादर्शनात्। अविदुषां तत्र बाधाभावेऽपि पण्डितरूपाणामस्ति बाध इति चेत्, किमत्र तेषां बाधकारणम्? भवत्कल्पितं स्वरूप-सम्बन्धं किं ते न पश्यन्ति? तद्दर्शनेऽपि सम्बन्धान्तरादर्शनात् तत्र तेषां बाधोदय इति चेत्, तत्किमभावबुद्धौ तेषां संयोगादिसम्बन्धान्तरदर्शनमस्ति, येन तत्र बाधोदयो न स्यात्। तस्मात् स्वरूपसम्बन्ध-कल्पनं न युक्तियुक्तं पश्यामः ॥

तथाच सम्बन्धाभावान्नाभावस्य विशेषणत्वमुपपद्यते ; अतो नेन्द्रियस्याभावेन सम्बन्धुं विशेषण-तासन्निकर्षकल्पनं घटते। न केवलं सन्निकर्षाभावादेवाभावो नाध्यक्षगोचरः, अहेतुत्वादपि स तथेत्यव-गन्तव्यम् ; जन्याध्यक्षस्य विषयजन्यत्वनियमात्—प्रागभावे सति कार्यमुत्पद्यते, असति च नेति ; अन्यथा जातजनिप्रसङ्गापत्तेरिति तर्कसहितान्वय-व्यतिरेकाभ्यामभावहेतुत्वावगमात् कथमेवमिति चेत्, न ; व्यतिरेकासिद्धेः। सत्स्वेव हि प्रागभावेतरसकलहेतुषु तद्व्यतिरेको ग्राह्यः ; अन्यथा तद्व्यति-रेकादेव कार्यव्यतिरेकसिद्धौ प्रागभावव्यतिरेकग्रहानुपपत्तेः। तत्र च हेतुत्वविशिष्टानामेव हेतुत्वं वाच्यम्, न तदुपलक्षितानाम् ; विशिष्टहेतुत्वे संभवति तदुपलक्षणकल्पनाया अन्याय्यत्वात्। नच—एवं विशिष्टस्य हेतुत्वे हेतुत्वस्यापि हेतुत्वप्रसङ्गोऽस्ति बाधक इति—वाच्यम् ; हेतुत्वविशिष्टस्यैव हेतुत्वाभ्युपगमात्, हेतुत्वे हेतुत्ववैशिष्ट्याभावात्तत्प्रसङ्गानुपपत्तेः ॥

तथाच हेतुत्वस्यानन्यथासिद्धनियतपूर्ववर्तित्वरूपत्वेन प्राक्कालघटितत्वात् प्रागभावकालावच्छिन्न-कालस्यैव प्राक्कालत्वात् प्रागभावे तदभावेन तदितरसकलहेतूनामेवाभावात् कार्यव्यतिरेकसिद्धौ प्रागभाव-व्यतिरेकग्रहसिद्धेः। *एतेन*—जातजनिप्रसङ्गोऽपि—*अपास्तः* ; तदितरहेतूनामेवाभावात् तत्प्रसङ्गा-सिद्धेः। नच—एवं कालोऽपि न हेतुः ; हेतुत्वकोटौ प्रवेशादिति—वाच्यम् ; तत्कोटौ प्रवेशेऽपि 'इहेदानीं घट उत्पत्स्यते' 'इहेदानीं घट उत्पद्यते' इत्यादिप्रत्यक्षेण तद्धेतुत्वावगमात्, प्रागभावस्य तथात्वावगमप्रमाणाभावात्। *ननु*—घटः, स्वप्रागभावजन्यः, तन्नाशत्वात् ; यो यन्नाशो भवति, स तज्जन्यः, यथा घटनाशो घटजन्य इत्यनुमानमेवास्ति तस्य कारणत्वावेदकमिति—*चेत्*, न ; व्यभिचारात। घटनाशो हि घटप्रागभावस्यापि नाश इत्यस्ति भवतामभ्युपगमः ; अन्यथा घटप्राग-

भाष्यभावप्रकाशिका

शास्त्रस्य तत्त्वनिर्णयार्थतयाऽनुवादत्वात् तत्र गुरुशिष्ययोरधिकारात् पुरस्थितमिव शिष्यं गृहीत्वा परोक्तिरिति। "आह कोऽयमि"त्यारभ्य "कथं पुनः प्रत्यगात्मनी"त्यतः प्रागध्यासस्वरूपलक्षणपरं भाष्यम् ; तस्मादारभ्य "तमेतमविद्याख्यमि"त्यतः प्राक्तनं तत्संभावनाय ; एतदादि सर्वलोकप्रत्यक्ष

प्रदीपः

ननु अनिर्वचनीयख्यातिवाद एव यद्यभिमन्यते, तर्हि निरूप्यतां किंलक्षणकोऽयमध्यास इति लक्षणप्रतिपादनपरो वाऽयं ग्रन्थः—*आह कोऽयमध्यासो नामेति*। किंशब्दोऽत्र प्रश्नाभिप्रायः। कीदृशोऽयमनिर्वचनीयख्यात्यभिमतोऽ-

पञ्चपादिका

प्रयोगदर्शनादुभयस्य चेह सम्भवात् तन्त्रेण वाक्यमुच्चरितम्। तत्रापि प्रथमं प्रश्नस्य प्रतिवचनं स्वरूप-

पञ्चपादिकाविवरणम्

तन्त्रेणेति। युगपदर्थद्वयविवक्षयेत्यर्थः। *उभयस्य चेह सम्भवादिति*। लक्षणप्रश्नस्य सम्भावनाक्षेपस्य

ऋजुविवरणम्

तु को विशेषः? अविशेषेण प्रतिज्ञातत्वादित्याशङ्क्याह—*क्रमेणेति*॥ *ननु*एकशेषादौ पदे तन्त्रोच्चारणं दृश्यते, न वाक्ये इत्याशङ्क्य व्याचष्टे—*युगपदर्थद्वयेति*॥ अथवा तन्त्रेणेत्ययुक्तम्; वाक्यस्य तन्त्रता नामार्थद्वयसाधारण्यम्, "साधारणं भवेत् तन्त्रमि"त्युक्तत्वात्, नच सकृदुच्चरितस्य वाक्यस्यार्थद्वयं संभवति विना वाक्यभेदेन, आवृत्त्यङ्गीकारे च न तन्त्रता। "पृष्टमिति मत्वा प्रत्युक्त"मित्याद्यभिप्रायवर्णनं चायुक्तं स्यात्, अतो न वाक्ये तन्त्रता, नोच्चारणे; वाक्यभेदापत्तेः, तेन न तन्त्रतेत्याशङ्क्य व्याचष्टे—*तन्त्रेणेति युगपदिति*॥ "उभयस्य चेहे"त्यत्र सन्निहितत्वाद् लक्षणस्येहशब्देन निर्देशशङ्का स्यात्, तथा सति लक्षणविषय एव सम्भवोऽपि स्यात्, नाध्यासविषयः, तन्निवृत्त्यर्थम्, अथवा—किंविषयः प्रश्नः? किंविषयश्चाक्षेप इति न ज्ञायते, तदर्थमाह—*लक्षणप्रश्नस्येति*॥ प्रमाणैस्तर्केण च

तत्त्वदीपनम्

किं वा तन्त्र्यत इत्यर्थवाची? आद्ये तन्त्रशब्दस्य व्यर्थता, द्वितीयेऽसंभवः; अर्थेन वाक्योच्चारणायोगात्, इत्याशङ्क्याह—*तन्त्रेणेति*॥ आग्नेयाद्यनेकोपकारकत्वेन सकृत्प्रयाजाद्यनुष्ठानवत् प्रश्नाक्षेपार्थद्वयविवक्षया सकृदुच्चारणमित्यर्थः। प्रश्नाक्षेपयोर्विषयं दर्शयति—*लक्षणेति*॥ प्रश्नोत्तरस्योच्यमानत्वात् प्रश्नार्थः किंशब्द इति शङ्कते—*उभयमत्रेति*॥ अत्रोभयं विवक्षितं चेत्, प्रतिवचनसमये संभावना किं न प्रदर्श्यत इति संबन्धः॥

वार्तिकम्

भावनाशस्य घटस्य नाशे तत्प्रागभावस्य पुनरुन्मज्जनप्रसङ्गः। एवं च सति घटनाशस्य घटप्रागभावनाशत्वेऽपि तज्जन्यत्वाभावादित्यस्ति हेतोर्व्यभिचारः। नच—तत्राप्यस्ति तज्जन्यत्वमिति—वाच्यम्; तत्पूर्वकाले तदभावात्तज्जन्यत्वानुपपत्तेः। नच—घट एव तद्व्यापार इति—वाच्यम्; स्वनाशव्यापारत्वस्य कुत्राप्यदर्शनात्। ज्ञानादेः संस्कारजनने स्वनाशो व्यापारो दृष्ट इति चेत्, न; संस्कारस्यैव तन्नाशकत्वात्। तज्जनने नाशव्यापारत्वासिद्धेः, अन्योन्याश्रयाच्च—प्रागभावस्य जनकत्वसिद्धौ घटनाशजनने तत्प्रागभावस्य घटव्यापारत्वेन व्यभिचाराभावादुक्तानुमानसिद्धिः, तत्सिद्धौ च प्रागभावस्य जनकत्वसिद्धिरिति, व्यापारद्वारा नाशजनकत्वादर्शनाच्च; अन्यथा घटादेरपि स्वध्वंसजनने व्यापारकल्पनापत्तेः। *एतेन*—न पक्षे पक्षसमे वा व्यभिचारोद्भावनं युक्तमिति—*अपास्तम्*; तत्र बाधादेव तत्साधनानुपपत्तेर्व्यभिचारावश्यकत्वात्। *एतेन* "भावो यथा तथाऽभावः कारणं कार्यवन्मतः" इति—*अपास्तम्*; कार्यत्वं विना चेत् प्रध्वंसाभावस्यात्मलाभादिवदात्मलाभः स्यात्, न कल्पयेदेव तत्कार्यत्वमपि। नचैवमस्ति; तस्यानादित्वे भावकार्यासत्त्वापत्तेः। नचैवं कारणत्वं विना काचिदनुपपत्तिरस्ति, येन तदपि कार्यत्ववदभावस्य कल्प्येत। नच कार्यत्वमेव कारणत्वगमकम्; चरमध्वंसे व्यभिचारात्; अन्यथा चरमत्वव्याहतेः। अभ्युपेत्य च प्रध्वंसकार्यत्वमेवमुक्तम्, न त्वस्माभिर्निरन्वयकार्यप्रध्वंसोऽभ्युपगम्यते; कार्यस्य कारणात्मनाऽवस्थानस्यैव तत्त्वात्। योऽपि ब्रह्मात्मैक्यविज्ञानात् सविलासा-

पञ्चपादिका

माख्याय पुनस्तस्यैव सम्भवमाक्षिप्य प्रतिविधत्ते। तत्रैवम्भूते विषये श्रोतॄणां सुखप्रबोधार्थं व्याचक्षाणाः प्रतिवादिनं तत्रस्थमिव समुत्थाप्य तेनाक्षिप्तमनेन पृष्टमिति मत्वा प्रत्युक्तम्, पुनरसौ स्वाभिप्रायं विवृणोतीति आक्षेपमवतार्य प्रतिविधानं प्रतिपद्यते। सर्वत्रैवंविधे ग्रन्थसन्निवेशे एष एव व्याख्याप्रकारः ॥

पञ्चपादिकाविवरणम्

च सम्भवादित्यर्थः। उभयमत्रैव विवक्षितं चेत्सम्भावनैव प्रथमं किन्न प्रदर्श्यत इत्यत्राह—*तत्रापीति* ॥ स्वरूपमाख्यायेति प्राथम्ये हेतुः।

ननु आहेति परोक्तिकथनं किमर्थमिति? अर्थनिर्णयप्रधानत्वाद्वादकथाशास्त्रम्। तत्र "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः" इति वादिप्रतिवादिभ्यां गुरुशिष्याभ्यां वा पक्षप्रतिपक्षपरिग्रहेण क्रियमाणार्थनिर्णयावसाना वादकथाऽत्र प्रवृत्तेति दर्शयितुं परोक्तिकथनमित्याह—

ऋजुविवरणम्

साधनं स्वपक्षस्योपालम्भः परपक्षस्येति *सिद्धान्ताविरुद्ध* इति विशेषणम्। "तेनाक्षिप्तमनेन पृष्टमिति मत्वे"त्यत्रोभयस्य

तत्त्वदीपनम्

"न तावदयमेकान्तेनाविषय" इत्यत्र संभावना प्रादर्शीत्याशङ्क्याह—*प्रथममिति* ॥ प्रथमदर्शने हेतुर्नोक्त इत्याशङ्क्याह—*स्वरूपमिति* ॥ परोक्तेः प्रयोजनं पृच्छति—*नन्वाहेति* ॥ वादकथात्वद्योतनार्थं परोक्तिरिति वक्तुं शास्त्रस्य वादरूपतामाह—*वादेति* ॥ तत्र हेतुमाह—*अर्थनिर्णयेति* ॥ अर्थनिर्णयः प्रधानमुद्देश्यं यस्य तदर्थनिर्णयप्रधानम्, तस्य भावस्तत्त्वम्; तस्मादित्यर्थः। अर्थनिर्णयपरत्वमात्रेण कथं वादत्वमिति शङ्कायां तत्स्वरूपमाह—*तत्रेति* ॥ कथा त्रिविधा—वादो जल्पो वितण्डा चेति; तासां कथानां मध्ये वादः प्रदर्श्यते। पक्षश्च प्रतिपक्षश्चेति पक्ष-प्रतिपक्षौ, तयोः परिग्रहो यस्मिन्नसौ तथोक्तः। तावत्युक्ते जल्प-वितण्डयोः प्रसङ्गः, तदर्थं—*प्रमाणतर्केति* ॥ प्रमाणं च तर्कश्चेति प्रमाण-तर्कौ, ताभ्यामेव स्वपक्षस्थापनं परपक्षोपालम्भश्च यस्मिन् स तथा निर्दिष्टः। जल्प-वितण्डयोस्तु छल-जाति-निग्रहैरपि साधनोपालम्भः, अत्र तु न तथेत्यर्थः।

सिद्धान्ताविरुद्धः इत्युक्त्याऽपसिद्धान्तनिग्रहप्रवेशमाह। *पञ्चावयवेति* विशेषणेन न्यूनाधिकोक्त्याऽसिद्धादिहेत्वाभासानां प्रवेशः सूचितः। यद्वा—स्वमतसाधन-परकीयसाधनदूषण-स्वपरसाधनदूषणसमर्थनापशब्दादिशब्ददोषलक्षणैः पञ्चभिरवयवैर्युक्त इत्यर्थः। भवत्वेवं वादस्वरूपम्, प्रकृते तु किमायातम्? इति वीक्षायामाह—*वादीति* ॥ *एवंभूत इति* ॥ दुरधिगमवस्तुविषय इत्यर्थः। स्वरूपविषयत्वेन प्रश्नोत्तरस्य प्राथम्यं चेत्, तर्ह्यनवसरदुःस्थोऽयमाक्षेप इति कस्मान्नोक्तम्? इत्याशङ्क्य, एवं कथने श्रोतुः कुण्ठितमतितया प्रतिवचनार्थप्रतिपत्तिर्न स्यादित्यभिप्रायेणैवं

वार्तिकम्

विद्याध्वंसः, सोऽपि नाऽऽत्मस्वरूपाद् अधिष्ठानतत्त्वज्ञानाद्वा व्यतिरिच्यते। तस्मात्—"भावो यथा तथाऽभावः" इत्यादेरसत्प्रलापमात्रत्वाद् नाभावस्य हेतुत्वमस्त्विति। अतोऽहेतुत्वादप्यभावो नाध्यक्षगोचर इति ॥

नच—'भूतले घटो नास्तीत्याद्यभावप्रतीतेः प्रत्यक्षत्वस्यानुभवसिद्धत्वात् कथमेवमिति—वाच्यम्; तत्प्रतीतेरनुपलब्धित्वेन प्रत्यक्षत्वानुभवस्य भ्रान्तत्वात्। *ननु* सतोरेवालोक-चक्षुषो 'भूतले घटो नास्ती'ति प्रतीतिर्जायते, नासतोः; अन्धकारे निमीलिताक्षान्धयोर्वा तत्प्रतीत्यदर्शनात्। तथाचान्वयव्यतिरेकाभ्यां चक्षुषस्तद्धेतुत्वसिद्धावन्यत्र क्लृप्तकारणभावत्वात्तस्यैव कारणत्वं युक्तम्, नानुपलब्धेः;

वार्तिकम्

प्रमाणान्तरकल्पनागौरवादिति—*चेत*, न; प्रतियोगिग्राहकेन्द्रियजन्यधर्मिज्ञानस्यैवानुपलब्ध्याऽभावज्ञानहेतुत्वात् तद्धर्मिज्ञानहेतुत्वेन चक्षुरालोकान्वय-व्यतिरेकयोरन्यथासिद्धेस्तयोरभावज्ञानाहेतुत्वात्, अनुपलब्धेरेव तत्कारणत्वात्, प्रामाणिकगौरवस्येष्टत्वात्, अन्यथाऽनुमानादेरपि प्रत्यक्षेऽन्तर्भावप्रसङ्गाच्च चार्वाकशिष्यतापत्तिः। घटवति भूतले घटाभावभ्रमे कारणान्तराप्रसरेणानुपलब्धेरेव कारणत्वकल्पनादन्यत्रापि तत्कारणत्वोपपत्तेः॥

नच—धर्मिज्ञानस्य प्रतियोगिग्राहकेन्द्रियजन्यत्वनियमोऽसिद्धः, 'वायौ रूपं नास्ती'त्यादौ व्यभिचारादिति—वाच्यम्; उक्तनियमादेव तदानुपलब्धत्वासिद्धेः, अन्यथान्योन्याश्रयात्—धर्मिज्ञानस्य प्रतियोगिग्राहकेन्द्रियजन्यत्वनियमासिद्धौ 'वायौ रूपं नास्ती'त्यादिप्रतीतेरानुपलब्धत्वसिद्धिः, तत्सिद्धौ चोक्तनियमासिद्धिरिति॥ *ननु*—यत्र यदापादयितुं शक्यते, तत्र तदभावस्तदनुपलब्धिगोचर इति नियमसत्त्वात्—'यदि स्तम्भः पिशाचः स्यात्, तर्ह्युपलभ्येते'ति स्तम्भपिशाचत्ववद् यदि वायौ रूपं स्यात्, तर्ह्युपलभ्येतेति वायावुपलब्धिगोचरतयाऽऽपादनस्य कर्तुं शक्यत्वात् कथं तत्र तदभावो नानुपलब्धः स्यादिति—*चेत्*, न; दृष्टान्त-दार्ष्टान्तिकयोरुभयोरप्यापादनासिद्धेः। *तथाहि*—दृष्टान्ते तावद् यदि स्तम्भः पिशाचः स्यात्, तर्ह्युपलभ्येतेत्यापादनं न कर्तुं शक्यते; पिशाचभावापन्नस्य स्तम्भस्यातीन्द्रियत्वेनोपलम्भायोग्यत्वात्—'नोपलभ्येत' इति वैपरीत्यापादनस्यैव संभवात्, यथाऽऽरोपमेवाभावप्रतीतौ प्रतियोगिनो भानात् प्रकारान्तरेणापादनस्य 'स्तम्भः पिशाचो ने'ति प्रतीतावहेतुत्वादनुपपत्तेः। दार्ष्टान्तिकेऽपि यदि वायौ रूपं स्यात्, तर्ह्युपलभ्येतेत्यापादनं न शक्यते कर्तुम्; रूपवतोऽपि चक्षुरादेरनुपलम्भेन व्यभिचारात्। न चोद्भूतमिति व्याप्यं विशेषणीयम्; तथाऽप्युद्भूतरूपवति परमाण्वादौ व्यभिचारात्। नच—महतीत्यपि धर्मि विशेषणीयमिति—वाच्यम्; तथाऽपि मध्यन्दिनवर्तिनि नक्षत्रादौ व्यभिचारात्। अनभिभूतमिति पुनर्व्याप्यं विशेषणीयमिति चेत्, न; तादृशारोपस्य वायौ रूपं नास्तीति प्रतीत्यहेतुत्वात्, यथाऽऽरोपमेवाभावप्रतीतौ प्रतियोगिनो भानमित्युक्तत्वात्, धर्मिण्युपलभ्यत्वे सति तद्योग्ये प्रतियोग्यनुपलम्भस्यैवानुपलब्धित्वाद् वायौ तदभावाद्रूपाभावाध्यक्षत्वानुपपत्तेः। *एतेन*—अनुपलब्धेः करणत्वे कथं नाभावो हेतुरिति—*अपास्तम्*; धर्मिज्ञानस्य प्रसङ्गस्य चानुपलब्धिलक्षणापेक्षस्य भावत्वात्, रूपस्यैवाऽनुपलब्धत्वादुपलम्भाभावस्य प्रतिबन्धकाभावत्वेनान्यथासिद्धेः। *एतेन*—श्रोत्रे शब्दाभावाध्यक्षताऽपि *प्रत्युक्ता*; तस्मान्नाभावोऽध्यक्षगोचरः। किं तर्हि? आनुपलब्ध एवेति स्थितम्। तथाच 'न जानामी'त्यपरोक्षानुभववशात् सिद्धा तदतिरिक्ताऽविद्या। सेयमुक्तविधा सर्वाध्यासोपादानं तत्संस्काररूपेण निमित्तमिति सिद्धः प्रमाण-फल-निमित्तोपादानैरध्यास इति॥

निरूपितस्तावत् संक्षेपतः प्रमाण-फल-साधनैस्सत्यानृतात्मकोऽध्यासः। अथेदानीम्—"आह कोऽयम्" इत्यादिभाष्येण पूर्वपक्षसमाधानाभ्यां स एव विस्तरेण प्रपञ्च्यमानः स्थूणानिखननन्यायेन दृढीक्रियते। प्रयोजनं च विनेयस्य तत्तच्छङ्काशूकनिवृत्त्या श्रद्धोत्पादः। श्रद्धा चानुकूलमतेर्ज्ञानमित्याह भगवानाम्नायः—'श्रद्धत्स्व सौम्ये'ति, तथा 'श्रद्धावित्त' इति श्रुतेः। न हि संक्षेपतः प्रथमं तावद्वस्तुनः

भाष्यभावप्रकाशिका

इत्यन्तं तत्संभवनिर्णयायेति विभागः। समाधानभाष्येऽध्यासलक्षणनिर्देशेऽपि प्रसिद्धाध्यासलक्षणे निर्णीते प्रागुक्तलक्षणस्य तद्विशेषतया सिद्धिरिति मत्वा प्रसिद्धाध्यासं पृच्छति—*कोऽयमिति*॥

वार्तिकम्

सोपकरणस्याप्रदर्शनेन तदनुपस्थितौ तस्मिन् तदुपकरणे वा शिष्यस्य शङ्कोदयो भवति ; धर्मिज्ञानसाध्यत्वात्तस्य। नच तदुदयमन्तरेण निराकाङ्क्षं प्रति तन्निरासपूर्वकं विस्तरेण तद्वस्तूपवर्णनं भवति। नच शङ्कानिरासमन्तरेण श्रद्धोत्पादः, न वा तदुत्पादमन्तरेण शतश उपदिष्टमपि वस्तुतत्त्वमध्यवसातुमर्हति ; "श्रद्धत्स्व सौम्य" इत्युदाहृतश्रुति-स्मृतिभ्यां श्रद्धायाः शमादिवत्तदङ्गत्वावगमात्। अतः संक्षेपत उक्त्वा विस्तरेण तत्प्रतिपादनं कर्तव्यमिति ॥

तत्र चोद्यते—

सत्यानृतात्मकत्वं यत् कृतमध्यासलक्षणम्। ज्ञानाध्यासे तदव्याप्तेर्मिथ्यातादात्म्यहानतः ॥

सत्यानृतात्मकत्वरूपमध्यासस्वरूपं निरूपयता भवताऽर्थात्तदेवाध्यासस्य स्वरूपलक्षणमित्यभिहितं भवति। नचैतद्युक्तम् ; ज्ञानाध्यासेऽव्याप्तेः। न ह्यारोपितरजतज्ञानस्य साक्षिणः सत्यानृतात्मकत्वमस्ति ; तस्य सत्यैकरूपत्वात्। नच—मिथ्याविषयेणैव तत्तादात्म्यमिति—वाच्यम् ; विषय-विषयिभावानुभवविरोधात्। *ननु* विषय-विषयिणोरेवान्तःकरणात्मनो'रहमि'ति परस्परतादात्म्याध्यासो वर्णितः, *सत्यमेवम्* ; तत्र तथाऽस्तु ; परस्परविषय-विषयिभावविनिमयानुभवादन्तःकरणस्य चैतन्यविषयत्वं तत्स्पष्टीकरणार्थत्वेन विषयित्वं च, एवं चैतन्यस्यापि विषयत्वं विषयित्वं चेति विनिमयः। *एतेन* — बुद्धिवृत्तीनामपि तत्प्रतिफलितानुभवेन सह विनिमयो—*व्याख्यातः* ; तयोरपि परस्परैक्यस्य सर्वानुभवसिद्धत्वात्। अत एव बुद्धिवृत्तय एव क्षणिका आत्मान इति बौद्धा भ्रान्ता बभूवुः। नचैवं रजततदनुभवयोः परस्परतादात्म्यानुभवोऽस्ति ; 'रजतं जानामी'ति विषय-विषयित्वेनैव परस्परविविक्ततया तयोरनुभवात्, पुरोवर्तिनैव रजततादात्म्यानुभवात् ; अन्यथाऽऽत्मख्यात्यापत्तेः। *ननु* विषयेण तादात्म्याननुभवेऽपि रजतज्ञानस्येदमाकारान्तःकरणवृत्त्या सह तदनुभवात् तयोरेव तादात्म्याध्यासोऽस्तु। तथाच शुक्तिरजतयोर्विशिष्टैकज्ञानविषयत्वेन परस्परतादात्म्याध्यासोऽपि सिद्ध्यति ; अन्यथा भिन्नज्ञानविषयत्वादख्यातिवादवत् तदनुपपत्तेरिति—चेत्, *सत्यम्* ; तथाऽपि न सत्यानृतात्मकत्वं रजतज्ञानस्य सिद्ध्यति ; प्रमाणजनितेदमाकारान्तःकरणवृत्तेर्व्यावहारिकत्वात्, तद्विषयतयाऽधिष्ठानवद् रजतस्य सत्यत्वापत्तेश्च। *एतेन*—अर्थमिथ्यात्वेनैव ज्ञाने मिथ्यात्वव्यवहारोपपत्तौ न तत्स्वरूपमिथ्यात्वकल्पनं युक्तमिति—*अपास्तम्* ; तथाहि—

यथा ज्ञेयस्य सत्यत्वे नानृतं ज्ञानमिष्यते। तथा ज्ञानस्य सत्यत्वे नानृतं ज्ञेयमिष्यताम् ॥
परस्परानृतत्वेन परस्परानृतत्वतः। अतो द्वयानृतत्वं हि वक्तव्यं भ्रान्तिरूपकम् ॥

तथाचोक्तं वृद्धैः—"ज्ञानोपसर्जनोऽर्थोऽर्थोपसर्जनं वा ज्ञानमध्यस्यते"इति। बाधप्रत्ययोऽप्युभयानृतत्वमनुकूलयति ; अन्यथा तदनुपपत्तेः। तथाहि—बाधो हि नाम पूर्वप्रत्ययस्य प्रत्ययान्तरेण मिथ्यात्वाध्यवसानम्। तद्यथा—बर्हिर्निषिद्धच शराणाम्, सर्वस्वदक्षिणादिप्रत्ययानामदक्षिणादिप्रत्ययैर्मिथ्येत्यध्यवसानं वा बाध इत्युच्यते। "शरमयं बर्हिर्भवती"ति शरादिप्रत्ययास्तु बाधका इति, तद्वद् 'इदं रजतमि'ति प्रत्ययस्ये'यं शुक्तिरेव न रजतमि'ति प्रत्ययेन 'मिथ्यैवैतावन्तं कालं रजतमभात्' 'मिथ्यैव रजतमिति ज्ञानमभूत्' इति मिथ्यात्वाध्यवसानं बाध इत्युच्यते, शुक्तिप्रत्ययस्य बाधकत्वमिति। तच्च मिथ्यात्वाध्यवसानं विषय-विषयिणोः प्रदर्शितानुभवरीत्या मुख्यमेव ; अतः कस्य मिथ्यात्वेन कस्य मिथ्यात्वमिति विनिगन्तुमशक्तेरुभयमिथ्यात्वमेव बाधप्रतीतिर्गोचरयति ; अन्यथा तत्प्रतीतिबाधापत्तेः। तस्मादु-

वार्तिकम्

भयाध्यासो वाच्यः। नच ज्ञानाध्यास उक्तलक्षणमस्ति ; आरोपितरजतादिज्ञानस्य साक्षिचैतन्यरूपत्वेन सत्यैकरूपत्वादनृतांशाभावात्। अतस्तत्राव्याप्तं सत्यानृतात्मकत्वरूपमध्यासलक्षणमित्यभिप्रेत्याक्षिपति—*आह कोऽयमध्यासो नामेति* ॥ *यद्वा*—पूर्वोक्तरीत्या लक्षणस्य ज्ञानाध्यासेऽसम्भवं मन्वानः पृच्छति—*आह कोऽयमिति* ॥

अत्र केचित् किंवृत्तस्याक्षेपार्थत्वं प्रश्नार्थत्वं च तन्त्रेण व्याचक्षते। तन्न बुद्ध्यामहे। तथाहि—यदि तावद् यथा दर्श-पूर्णमासौ सकृदनुष्ठितौ निमित्तार्थत्वं कामार्थत्वं च प्रतिपद्येते ; यथा वा प्रयाजादीनि तदङ्गानि सकृदनुष्ठितान्याग्नेयादित्रयार्थत्वं प्रतिपद्यन्ते ; तद्वत् सकृदुच्चरितः किंवृत्त उभयार्थमभिधत्त इत्युच्यते, तन्न ; "सकृदुच्चरितः शब्दः सकृदर्थं बोधयति" इति न्यायबाधापत्तेः। *अथ* उभयार्थाभिधानसामर्थ्ये सत्यपि सैन्धवादिशब्दवदुभयार्थत्वात् किंवृत्तः सकृदुच्चरित उभयार्थमभिधत्त इति नोच्यते, उक्तन्यायविरोधात्, किं तर्हि ? श्रुत्यर्थाभ्यामुभयार्थत्वं तस्योच्यत इति, तदपि न ; आक्षेप-प्रश्नयोः परस्पराविनाभावाभावेनार्थापत्त्यसंभवात्। *एतेन*—श्रुति-लक्षणाभ्यां तदुभयोपस्थापकत्वमिति—*अपास्तम्* ; परस्पराविनाभावाभावात्, अभिधेयाविनाभूत एव लक्षणाप्रवृत्तेः। तथाचोक्तम्—*"अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते*। *लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणते"ति* ॥ अभिधेये लक्षणावृत्त्यनुपपत्तेश्च ॥ *छत्रिवद् भविष्यतीति चेत्*=*अथ मन्यसे यथा छत्रिशब्दोऽच्छत्रिणीव च्छत्रिण्यपि स्वाभिधेये लक्षणया वर्तते—'छत्रिणो गच्छन्ती"त्यत्र ; तद्वदत्रापि भविष्यतीति चेत्, न ; तद्वल्लक्षणाप्रवृत्तिनिमित्तान्तराभावात्। तत्र ह्यभिधेयाविनाभूतैकसार्थवाहित्वरूपमस्ति छत्र्यच्छत्रिसाधारणं लक्षणायाः प्रवृत्तिनिमित्तमभिधेयतावच्छेदकच्छत्रित्वातिरिक्तम्। नचैवमाक्षेपप्रश्नोभयानुगत एको धर्मोऽस्ति लक्ष्यतावच्छेदकः, येन तद्योगादभिधेयेऽपि लक्षणा स्यात्, अविनाभावस्तु तयोर्नास्त्येवेत्युक्तम्—न ह्याक्षेपमन्तरेण प्रश्नो नास्ति, न वा प्रश्नमन्तरेणाक्षेप इति। विनेय-प्रज्ञाभिमानिनोराक्षेप-प्रश्नावन्तरेण प्रश्नाक्षेपयोर्दर्शनात्। अस्तु वाऽविनाभावः ; तथाऽपि श्रुति-लक्षणाभ्यामुभयोपस्थापनमिति गतम् ; लक्षणयैव छत्रिन्यायेन तदुभयोपस्थापनसंभवात्, युगपद्वृत्तिद्वयविरोधात्। लक्षणाया असंभवस्तूक्त एव ; उच्चारणतन्त्रताविवक्षायां तु वाक्यभेदप्रसङ्गः। तस्मादाक्षेप-प्रश्नयोरन्यतर एवात्र किंवृत्तस्यार्थः। तत्राप्याक्षेपार्थमेवाभिप्रेत्य भाष्यकारेण किंवृत्तः प्रयुक्त इत्यध्यवसीयते ; संभावनाभाष्ये हि किंवृत्तस्याक्षेपार्थत्वनिश्चयात् तत्र प्रश्नासंभवात्, "विशये प्रायदर्शनात्" इत्युक्तत्वात्, सत्यानृतात्मकत्वरूपाध्यासत्वलक्षणस्याभिहितत्वात्, प्रश्नानुपपत्तेश्च, प्रश्नस्याज्ञातविषयत्वनियमात्। "आह" इति परोक्तिर्विचारशास्त्रस्य वादकथाप्रतिरूपकत्वसूचनार्था, शास्त्रस्य तदेकरूप्येण तत्त्वनिर्णयहेतुत्वात् ॥ *तथाहि*—"प्रमाण -तर्कसाधनोपालम्भः पञ्चावयवोपपन्नः सिद्धान्ताविरुद्धः पक्ष-प्रतिपक्षपरिग्रहो वादः" इति हि वादलक्षणमक्षपादीयम्। नच विचारशास्त्रमुक्तलक्षणादेकेनापि रूपेण हीयते ; सर्वलक्षणस्य तत्र वर्तनादिति। 'इति' शब्दः प्रकृतपरामर्शी 'आहे'त्यनेन सम्बध्यते। इत्येवमेवाह प्रतिवादी शिष्यो वा। किमाह—"कोऽयमध्यासो नामे"ति। योऽयं त्वया सत्यानृतात्मकोऽध्यास उक्तः, स कः ? न सं-

भाष्यभावप्रकाशिका

किंशब्दस्याक्षेपेऽपि संभवादत्र सोऽपि विवक्ष्यते। आत्मन्यध्यस्तोऽनात्मेति विशेषोक्तेरसदृशयोरधिष्ठानाधिष्ठेयत्वायोगाद् असंभावनया विशेषाक्षेपात् प्रश्नाक्षेपयोर्भिन्नार्थत्वादुपपत्तिरिति भावः। अध्यास-

***आह*—कोऽयमध्यासो नामेति? *उच्यते*—स्मृतिरूपः परत्र पूर्वदृष्टावभासः।**

भामती

उच्यते ; स्मृतिरूपः परत्र पूर्वदृष्टावभासः ॥ अवसन्नोऽवमतो वा भासोऽवभासः। प्रत्ययान्तरबाध-

ऋजुप्रकाशिका

ननु—"आह कोऽयमध्यासो नामे"त्यनेन भाष्येणात्मन्यध्यास आक्षिप्ते, "उच्यते" इत्यादिभाष्येणाक्षेपः प्रतिक्षेप्तव्यो न प्रतिक्षिप्यते, किन्त्वध्याससामान्यलक्षणमेवोच्यते, इदमयुक्तमित्याशङ्क्याह—*लोकसिद्धमिति* ॥ अध्याससामान्यलक्षणस्थेन दृष्टग्रहणेनासत्यस्याप्यनिर्वचनीयस्यापरोक्षप्रतीत्यभिधानात्, तेनासत्यस्य परोक्ष-प्रतीतिरेव नोपपद्यते, अपरोक्षतया प्रतीतिमात्रं सत्त्वम्, अतोऽनृताभावात् सत्यानृतमिथुनीकरणाभावेन तद्भेदा-ग्रहाभावादध्यासो न संभवतीत्यध्यासाक्षेपो भविष्यत्येवेति भावः। अवभासपदस्यावयवार्थमादाय संक्षिप्तम-ध्यासलक्षणमाह—*अवसन्न इति* ॥ भावप्रत्ययः। प्रत्ययस्यावसन्नत्वम्—अवसादो वा, अवमानो वा द्वेधाऽपि घटत इत्याह—*प्रत्ययान्तरेति* ॥ अधिष्ठानतत्त्वसाक्षात्कारेण निवृत्तिरवसादः, यौक्तिकज्ञानेन

पञ्चपादिका

*स्मृतिरूपः परत्र पूर्वदृष्टावभासः" इति प्रश्नवाक्यस्थितमध्यासमुद्दिश्य लक्षणमभिधीयते। तत्र

पञ्चपादिकाविवरणम्

तत्रैवम्भूते विषय इत्यादिना ॥ तेनाक्षिप्तमाक्षेपरूपमप्यभिप्रायमनेन पृष्टमेवेति मत्वा प्रत्युक्तं पुनरसावाक्षेप-

ऋजुविवरणम्

विवक्षितत्वादाक्षिप्तमिति न युक्तं वक्तुमित्याशङ्क्य पूरयति—*आक्षिप्तमपीति। *ननु* पृष्टमिति मत्वेत्यत्रापि तावन्मात्रं स्वरूपनिरूपणे कारणं न भवति ; आक्षेपस्यापि विद्यमानत्वादित्याशङ्क्य पूरयति—*पृष्टमेवेति*॥ आक्षिप्त-मसौ पृष्टमिति कथं मनुते इत्याशङ्क्याह—*आक्षेपरूपमप्यभिप्रायमिति*॥ *ननु*—असंज्ञायां कर्मकारके घञादीनां

तत्त्वदीपनम्

प्रतिवचनमित्युक्तम्। तेनाक्षिप्तमित्यनेन तत्राक्षेपप्रश्नयोरुभयोरपि कृतत्वात्—"आक्षिप्तं पृष्टमिति मत्वा" इत्येतद्-युक्तमित्याशङ्क्याध्याहारेण टीकां व्याकरोति—*तेनेति* ॥ आक्षिप्तमपि पृष्टमेवेति मत्वा प्रत्युक्तमित्यन्वयः। आक्षेप-स्यापि विद्यमानत्वात्कथं पृष्टमेवेति मननमित्याशङ्क्याह—*आक्षेपरूपमिति* अभिप्रायमजानतेवेत्यध्याहारः। श्रोतर्यनवबोधारोपणे तस्यानुचितकारित्वबुद्ध्या प्रतिवचनाप्रतिपत्तेरात्मन्यनवबोधारोपणमित्यर्थः। प्रश्नस्यापि

वार्तिकम्

भवतीत्यर्थः ; कुतः ? उक्ताव्याप्तिदोषादित्याशयः॥ तमिमं शङ्कितमव्याप्तिदोषं परिहर्तुं पूर्वोक्तमेवाध्यास-लक्षणं भङ्ग्यन्तरेण व्याचष्टे—*उच्यते स्मृतिरूपः परत्र पूर्वदृष्टावभास इति* ॥ तेनास्य पूर्वोक्तलक्षण-व्याख्यानरूपत्वात् शङ्कितदोषपरिहारार्थत्वेन लक्षणभागस्यैवात्र व्याख्यातत्वाद् न लक्ष्यपदाभावेन

भाष्यभावप्रकाशिका

साधारणस्वरूपधीहेतुत्वेन लक्षणस्याभ्यर्हितत्वादाक्षेपमुपेक्ष्य प्रश्नमेवेति मत्वाऽऽह—*उच्यत इति* ॥

अत्र विशेष्यतया प्रश्नवाक्यस्थाध्यासपदानुषङ्गान्न साकाङ्क्षत्वम्। परत्रेत्युक्ते परस्येत्यार्थिकम्।

पञ्चपादिका

परत्रेत्युक्तेऽर्थात्परस्यावभासमानता सिद्धा। तस्य विशेषणं स्मृतिरूपत्वम्। स्मर्यत इति स्मृतिः; असंज्ञायामप्यकर्तरि कारके घञादीनां प्रयोगदर्शनात्। स्मर्यमाणरूपमिव रूपमस्य, न पुनः स्मर्यत एव;

पञ्चपादिकाविवरणम्

रूपेण विवृणोतीत्याक्षेपमवतार्येति व्याख्येयम्। ननु शास्त्रेषु जल्प-वितण्डाभिप्रायेणाऽपि परोक्तिरस्तीति, नेत्याह--*सर्वत्रैवंविध इति* ॥

ननु लक्षणवाक्ये लक्ष्याभिधायिनः पदस्याभावात्साकाङ्क्षं वचनमनर्थकमित्याशङ्क्य वाक्यं पूरयति--*प्रश्नवाक्यस्थितमिति* ॥ *ननु* परस्य परात्मनाऽवभासोऽध्यास इति वक्ष्यति, तत्र कथमेकेनैव परशब्देन लक्षणं पूर्यत इत्यत्राह--*तत्र परत्रेत्युक्त इति* ॥ उत्तरो ग्रन्थः स्पष्टार्थः। *ननु* घञादीनां भावे विधानात् कथं कर्मपरतया स्मृतिशब्दो व्युत्पाद्यत इति तत्राह--*असंज्ञायामपीति* ॥ कर्तृव्यतिरिक्तकारकेषु

ऋजुविवरणम्

कथं प्रयोगः? "अकर्तरि चे"ति चशब्दात् कथंचित् कर्तरि प्रयोगो भवेत्, भावे च प्रयोग उक्तः, तत्समुच्चयप्रतीतिर्वैत्या-

तत्त्वदीपनम्

स्वाभिप्रायत्वात्कथं स्वाभिप्रायं विवृणोतीत्युक्तमित्याशङ्क्याह--*पुनरसाविति* ॥ यद्यप्याक्षेपः प्रश्नश्चाभिप्रेतः पुरा, तथाऽपि प्रश्नप्रतिवचनानन्तरमाक्षेपोत्थानमित्यर्थः। परोक्तेर्वादकथात्वद्योतनार्थत्वमिति कथं नियमः? अन्यत्रापि परोक्तेः संभवादिति चोदयति--*ननु शास्त्रेष्विति* ॥ अर्थनिर्णयपरे ग्रन्थे परोक्तेरेतदेव फलमित्याह--*नेत्याहेति* ॥

अध्यासस्वरूपे पृष्टे "*स्मृतिरूपः परत्र पूर्वदृष्टावभासः*" इति तत्स्वरूपकथनमित्यधिगन्तुं शक्यते, ततश्च प्रश्नवाक्येति टीकावैयर्थ्यमाशङ्क्याह--*ननु लक्षणेति* ॥ आकाङ्क्षाद्यनुसारेण पदानामन्विताभिधायित्वादध्यास-पदाभावे साकाङ्क्षत्वेनाऽऽनर्थक्यात्पूर्ववाक्यपदाध्याहारेणान्विताभिधानं ग्राह्यमित्यर्थः। अव्याप्त्यादिदोषाभावादा-र्थिकमपि विशेषणं कस्मादुपादीयते? ततः--"तत्रे"ति टीकानुपपत्तिमाशङ्क्याह--*ननु परस्येति* ॥

व्याकरणविरोधान्न स्मृतिशब्दस्य कर्मपरतेति शङ्कते--*ननु घञादीनामिति* ॥ "भावे" इति सूत्रेण भावे घञादिविधानात्-"अकर्तरि च कारके" इत्यनेन कर्मादौ घञादिविधानेऽप्यकर्तरि च कारके संज्ञायामित्यत्र कर्तृव्यतिरिक्त-कारके संज्ञायां घञादिप्रत्ययस्य विहितत्वात् स्मृतिशब्दस्य न योगवृत्त्या कर्मपरत्वमित्यर्थः। कर्मणि भावे वा विशेषेण घञादयो वृद्धैः प्रयुज्यन्ते, 'को भवता दायो दत्तः' 'को भवता लाभो लब्धः' तथा 'पाकस्त्यागो राग' इति। व्याकरणस्य वृद्धप्रयोगमूलत्वात्स्मृतिशब्दस्य कर्मपरत्वं युक्तमिति समाधत्ते--*तत्राहेति* ॥ सूत्रस्य तर्हि का गतिः? इत्याशङ्क्याह--*कर्तृव्यतिरिक्तेति* ॥ भावेऽकर्तरि च कारके संज्ञायामिति सूत्रद्वयमधिकृत्य "स्त्रियां क्तिन्नि"ति

वार्तिकम्

न्यूनता, न वा विश्वजिद्रात्रिसत्रयोरिवाध्याहारानुषङ्गान्यतरकल्पनेन क्लिष्टतादोषोऽप्यस्तीति समञ्जसम्; स्वातन्त्र्येण लक्षणान्तरप्रणयने चोक्तदोषापत्तेः, हेत्वन्तरं नाम निग्रहस्थानापत्तेश्च। अत एवाग्रे--"अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम" इति सत्यानृतात्मकत्वरूपाध्यासलक्षणमेव भगवान् भाष्यकारः परा-मृशति, नोक्तलक्षणम्। यद्येतल्लक्षणान्तरं स्यात्--"स्मृतिरूपः परत्र पूर्वदृष्टावभास इत्यवोचाम' इत्येव

प्रदीपः

ध्यास इति। प्रश्नं समाधत्ते--*स्मृतिरूपः परत्र पूर्वदृष्टावभास इति* ॥ *स्मृतिरूपः=अविद्यमानविषयकः। *परत्र= अधिष्ठाने। *पूर्वदृष्टावभासः= पूर्वदृष्टसजातीयप्रतीतिः। अधिष्ठानेऽविद्यमानः पूर्वदृष्टसजातीयश्च योऽर्थः, तद्विषयक-

पञ्चपादिकाविवरणम्

संज्ञायामिवाऽसंज्ञायामपि प्रयोगो भवति—"अकर्त्तरि च कारके संज्ञायामि"ति सूत्रादित्यर्थः।

ननु स्मर्यते चेद्रूपशब्दः किमर्थ इति ? अस्मर्यमाणे वस्तुन्युपमासमासार्थ इत्याह—*स्मर्यमाणरूपमिवेति ॥ *ननु* किमुपमासमासेन ? स्मर्यते एव 'इदं रजतमि'ति, नेत्याह—*न पुनः स्मर्यत एवेति ॥ *ननु* चक्षुरादिप्रमाणाभावात्परिशेषात्स्मृतिरिति, नेत्याह—*स्पष्टं पुरोऽवस्थितत्वावभासनादिति*॥ यथाऽन्यत्र 'इदं रजतमयं घट' इत्यादावितरेतरसंसृष्टौ सामान्यविशेषावपरोक्षाववभासेते, तथेहापि प्रतिभासः। नहि परमार्थेदंरजतसंवेदनाकारावभासन्यूनतामन्तरेण संसर्गसंविदंशाभावः शक्यते वक्तुम्।

अर्थाभावे कथमपरोक्षा संविदिति चेत्, न; यथासंविदवभासाधीनत्वादर्थसत्तानिश्चयस्य। नह्यर्थसत्ता-

ऋजुविवरणम्

शङ्क्य व्याचष्टे—*कर्तृव्यतिरिक्तेति* ॥ कथं पुरोऽवस्थितत्वेनावभासो निश्चीयते, इत्याशङ्क्याह—*यथान्यत्रेदं रजतमिति* ॥ *ननु* परमार्थेदंरजतादौ संसर्गसंवित्त्याऽपरोक्षत्वं निश्चीयते, अत्र संसर्गसंवेदनाभावात् कथमपरोक्षत्वमित्याशङ्क्याह—*नहि परमार्थेदंरजतमिति* ॥ *ननु*—सत्यर्थे संवेदनमुत्पद्यते, ततस्तदधीनत्वमपि संविद इत्या-

तत्त्वदीपनम्

सूत्रेण भावे कर्तृव्यतिरिक्ते च कारके संज्ञायामिवाकर्तरि चेति चशब्दात् संज्ञायामिवासंज्ञायामपि घञादिर्विधीयत इति न सूत्रविरोध इत्यर्थः ॥

स्मृतिरूप इत्यत्र रूपशब्दस्य वैयर्थ्यं शङ्कते—*ननु स्मर्यत इति* ॥ किंशब्दः प्रश्नार्थः ? आक्षेपार्थो वा ? आद्यं प्रत्याह—*अस्मर्यमाण इति* ॥ अस्मर्यमाणरजतादौ स्मर्यमाणेन योपमा, तत्समासार्थ इत्यर्थः। द्वितीयमनुवदति—*ननु किमुपमेति* ॥ संस्कारोत्थबोधविषयत्वादिति शेषः। किं संस्कारोत्थबोधविषयत्वमात्रं हेतुः ? उत संस्कारमात्रजबोधविषयत्वम् ? आद्ये प्रत्यभिज्ञाविषयेण व्यभिचार इत्यभिप्रायेण दूषयति—*नेत्याहेति* ॥ द्वितीयमुत्थापयति—*ननु चक्षुरादीति* ॥ अनुभवविरोधेनोत्तरयति—*नेत्याहेति* ॥

"पुरोऽवस्थितत्वावभासनादि"त्यसंबद्धम्; इदमो गृह्यमाणत्वात्, रजतस्य च स्मर्यमाणत्वादित्याशङ्क्याह—*यथेति* ॥ सम्यक्स्थले 'इदं रजतमि'ति सामान्य-विशेषयोः संसृष्टयोरपरोक्षतया स्फुरणवद् भ्रान्तावप्युभयोरपरोक्षतया स्फुरणात्तद्विरुद्धं समारोपितस्य स्मर्यमाणत्ववचनमित्यर्थः। अपरोक्षसामान्याविवेकाद्रजतेऽपरोक्षव्यवहारः, न संसर्गसंविदस्तीत्याशङ्क्य, प्रतिभासकृतवैलक्षण्यमाश्रित्य संसर्गसंविद् निह्नूयते ? अथवाऽर्थाभावात् ? इति विकल्प्य प्रतिभासवैलक्षण्यमसिद्धमित्याह—*नहीति* ॥ द्वितीयमनुवदति—*अर्थाभाव इति* ॥ भविष्यदादिज्ञानमर्थाभावेऽप्यस्ति, तदर्थमाह—*अपरोक्षेति* ॥

किमेतद् व्युत्थितस्य चोद्यम् ? आहो विनेयस्य ? इति विकल्प्याऽऽद्यं दूषयति—*न यथेति* ॥ संविदमनतिक्रम्य वर्तमानोऽवभासो यथासंविदवभासः; तदधीनत्वादिति विग्रहः। अर्थसत्ता कुत इति पृष्टे तदनुभवादिति वक्तव्यम्, ततश्चार्थसंविदि सत्यामर्थो नेत्यतिसाहसमित्यर्थः। निरालम्बनज्ञानायोगादर्थाधीनः संविन्निश्चय इत्याशङ्क्य, किं संविन्निश्चयात्पूर्वमर्थसत्तानिश्चयेन भवितव्यमिति ब्रूषे ? किं वाऽर्थसत्तया भवितव्यम् ? इति विकल्प्याऽऽद्यं दूषयति—*नहीति* ॥ अर्थसत्तायां निश्चितायां संवित्सत्तानिश्चय इति पक्षेऽर्थसत्तानिश्चय एव न सिद्ध्येदिति हिशब्दार्थः। कुत इति चेत्, तत्र वक्तव्यम्—किमर्थसत्तानिश्चयः स्वतः ? आहो स्वविषयसंविद्बलात् ? नाद्यः; जडत्वादित्यभिप्रेत्य द्वितीयं प्रत्याह—*अर्थसत्तेति* ॥ स्वविषयसंविन्निश्चयोऽपि स्वतः ? किं वाऽर्थनिश्चयाधीनः ? आद्येऽस्मदभिहित-

वार्तिकम्

परामृशेत्, तस्मादपि नैतल्लक्षणान्तरमिति मन्तव्यम्। योऽयं भवताऽस्मदध्यासलक्षणेऽव्याप्तिदोषः परिचोदितः, तत्र समाधानमुच्यते मयेत्यर्थः। ज्ञानाध्यासेऽपि सत्यानृतात्मकत्वस्य विद्यमानत्वाद्

पञ्चपादिकाविवरणम्

निश्चयाधीनः संवित्सत्तानिश्चयः; अर्थसत्तानिश्चयस्यापि निश्चयान्तराधीनत्वप्रसङ्गात्। *ननु* 'नेदं रजतमि'त्युत्तरसंवेदनादर्थाभावोऽपि निश्चितः, न; तत्रापि पूर्वसंवेदनेन सद्भावविषयेण विरोधात्। इदंरजताभावसंवेदनानामविवेककल्पनयोत्तरज्ञानेऽपि संसर्गसंविदभावः किं न स्यात्? व्यवहारसंवादज्ञानादुत्तरज्ञाने संसर्गसंवित्सद्भावश्चेत्, न; अर्थक्रियासंवादज्ञानादर्थसंवित्सद्भावनिश्चय इति वदतः संवित्प्रत्यक्षत्ववादहानात्; अर्थक्रियासंविदोऽपि संविदन्तराधीनसद्भावनिश्चयप्रसङ्गात्।

ननु सम्प्रतिपन्नोऽर्थाभावः, न; यथाप्रतिभासमेव मिथ्यारजतस्योत्तरज्ञानेन निरसनयोग्यस्योपगमात्,

ऋजुविवरणम्

शङ्क्याह—*नह्यर्थसत्तानिश्चयाधीन इति*॥ प्रतीतौ विपरीत एव क्रम इत्यर्थः। *ननु* इदमित्यत्राविवेकादेव संसर्गव्यवहारो भवति, अतः कथं तेनोत्तरस्य विरोधः? इत्याशङ्क्याह—*इदंरजताभावेति*॥ मा भूत्संविदः प्रत्यक्षत्वम्, अर्थक्रियाधीन एव निश्चयो भवतु, इति चेत्, अथवा—कथं प्रत्यक्षत्वहानिः? विप्रतिपन्नं प्रति साधनादिति, तत्राह—*अर्थक्रियासंविद इति*॥ ज्ञानस्यैव निश्चायकत्वम्। तथाच सति ज्ञापकपरम्परायामेवोपक्षीणत्वमिति भावः। *ननु संप्रतिपन्न इति*॥ अयं भावः*—रजतकारणाभावाद् बाधाद्वा तदभाव इति। *ननु*—प्रतिभासाद् रजताङ्गीकारे कथं तत्प्रयुक्तकार्याभाव इति? तत्राह—*मिथ्यारजतस्येति*॥ कथं तन्मिथ्यात्वमिति? तदाह—*उत्तरज्ञानेनेति*॥ अथवा—रजताङ्गीकारे कथं बाधकज्ञानोत्पत्तिः? उत्तरत्र रजताप्रतिपत्तिश्चेति? तत्राह—*उत्तरज्ञानेनेति*॥ कथं निरसनयोग्यतेति? तत्राह—*मिथ्यारजतस्येति*॥ भवतु निवृत्तिलक्षणो बाधः;

तत्त्वदीपनम्

सिद्धिः। द्वितीयेऽर्थनिश्चयस्यापि स्वतोऽनुपपत्तेस्तद्विषयसंविदन्तरादिति वक्तव्यम्, ततश्च पूर्वार्थनिश्चयाधीन उत्तरोत्तरसंविन्निश्चयो न सिद्ध्येदित्यर्थः॥

अर्थनिश्चयाधीनः संविन्निश्चय इति पक्षं निराकृत्यार्थसत्ताधीनः संविन्निश्चय इति पक्षमुत्थापयति—*ननु नेदमिति*॥ पुरोवर्तिनि रजतस्य निषिध्यमानत्वात्तदसत्त्वम्, तदसत्त्वे च संविदसिद्धिरित्यर्थः। विपरीतं किं न स्यात्? इत्याह—*न तत्रेति*॥ उत्तरसंवेदन इत्यर्थः। प्रथमोत्पन्नतयाऽसंजातविरोधित्वेन प्राबल्यमाह—*पूर्वेति*॥ निरपेक्षतया प्राबल्यमाह—*सद्भावेति*॥ 'नेदं रजतमि'ति संसर्गः संवेद्यत इत्याशङ्क्य, यथेदंरूप्ययोः संसर्गसंविदमन्तरेणाविवेकात्संसर्गव्यवहारः, तद्वदत्रापीत्याह—*इदंरजतेति*॥ इदं च रजतं चाभावश्चेतीदंरजताभावाः, तेषां संवेदनानि तथोक्तानि, तेषामिति विग्रहः। व्यवहारविसंवादादिदंरजतयोः संसर्गसंविदभावनिश्चयः, उत्तरज्ञाने तु तद्वैपरीत्यान्नैवमिति चोदयति—*व्यवहारेति*॥ रजताभावज्ञानप्रयुक्तो व्यवहारो व्यवहारशब्दार्थः। संसर्गज्ञानं संवादज्ञानाधीनमिति वदतः सिद्धान्तक्षतिरित्याह—*नार्थक्रियेति*॥ स्वसमवेतं ज्ञानं स्वस्य स्वयं प्रकाशकमिति पक्षस्यार्थक्रियासंवादलिङ्गेन संसर्गसंवित्सत्त्वानुमितौ विरोधः स्यादित्यर्थः॥

संविदोऽनुमेयत्वमङ्गीकुर्वाणं प्रत्याह—*अर्थक्रियेति*॥ संवित्सत्त्वमर्थक्रियासंविदधीनम्, तत्सत्ता कुतः? इति पृष्टे संविदन्तरादिति वक्तव्यम्, संवित्सत्ता च संविदन्तरादिति पूर्वासिद्धावुत्तरोत्तरासिद्धेर्न व्यवहारादिसिद्धिरिति स्वत एव संविन्निश्चय इति वक्तव्यम्, तथाच तद्बलादर्थसत्त्वं वक्तव्यमिति नार्थाभावसिद्धिरित्यर्थः। व्युत्थितचोद्यं निराकृत्य द्वितीयमुत्थापयति—*ननु संप्रतिपन्न इति*॥ तत्रेति शेषः। किं प्रतिभाससमयेऽर्थाऽभावसंप्रतिपत्तिः? उत कालान्तरे? नाद्य इत्याह—*न यथेति*॥ यथाप्रतिभासं रजतस्योपगमादित्यन्वयः। रजतस्य सत्त्वे कथं ज्ञानं निरस्यते? इत्याशङ्क्याह—*उत्तरेति*॥ निरसनयोग्यत्वमाह—*मिथ्येति*॥ परमार्थसद्वैलक्षण्यं मिथ्याशब्दार्थः। द्वितीयस्त्वङ्गीक्रियत इत्याह—*एवेति*॥

पञ्चपादिका

स्पष्टं पुरोऽवस्थितत्वावभासनात्। पूर्वदृष्टावभास इत्युपपत्तिः स्मृतिरूपत्वे। न हि पूर्वमदृष्टरजतस्य

पञ्चपादिकाविवरणम्

लौकिकपरमार्थदृष्टरजतप्रतियोगिकाभावविषयत्वाद्रजते त्रैकाल्याभावज्ञानस्येति संविद्द्वयानुरोधेन व्यवस्थासिद्धे-रन्यतरसंविदपह्नवायोगात्, तथाचोभयसंविद्विषयानुभवो 'नास्त्यत्र रजतम्' 'मिथ्यैव रजतमभादि'ति। *ननु* अपरोक्षशुक्तिकाज्ञानाविवेकाद्रजतमपरोक्षतया प्रतिभासत इति, नेत्याह—*स्पष्टमिति*॥ केयं स्पष्टता नाम?

ऋजुविवरणम्

त्रैकालिकनिषेधस्तु कथमिति? तत्राह—*लौकिकपरमार्थेति*॥ बाधकज्ञानस्य रूपद्वयम्—बाधकत्वं निषेधकत्वं च। तत्र बाधः कार्यतया भवति, निषेधस्तु विषयः। तत्र बाधसाध्यस्य निवृत्तिरूपस्य न तज्ज्ञानविषयत्वमिति। *ननु*—अविशेषेण ज्ञानोत्पत्तौ कथं प्रतीतस्य बाध्यत्वम्, अन्यस्य निषेध्यत्वमिति भेदसिद्धिरिति? तत्राह—*संविद्द्वयानुरोधेनेति*॥ *ननु*—अप्रतीतस्य निषेधासंभवात्प्रतीतस्य च पुरोदेशे विद्यमानत्वाद् न निषेधः; अतो निषेधसंविदभावः, संसर्गसंविदभावो वा वक्तव्य इत्याशङ्क्याह—*अन्यतरसंविदिति*॥ प्रसक्तस्यैव निषेध्यत्वम्, न प्रतीतस्य; भूतलसंसर्गनिषेधाङ्गीकारात्, भ्रान्तप्रतीतिरेव सत्यप्रसक्तिरपीति भावः। *ननु*—भूतलसंसर्ग-प्रतीत्यभावेऽपि स्वरूपेण प्रतीतघटनिषेधदर्शनात् कथं प्रसक्तेरेव निषेधप्रयोजकत्वम्? अतोऽन्यतराभाव इत्याशङ्क्याह—*तथाचोभयसंविदिति*॥ अन्यथासिद्धसंविद्बलात् प्रसक्तनिषेधोऽपि निश्चीयत इति भावः। अथवा—'इदं रजतम्' 'नेदं रजतम्' इत्यविशेषेणैव प्रतीतिद्वयोत्पत्तौ भिन्नविषयत्वं कथं निश्चीयते? निश्चायकप्रमाणाभावादिति, तत्राह—*तथाचोभयसंविदिति*॥ *ननु*—पुरोऽवस्थितत्वेनावभासव्यतिरेकेण न स्पष्टता प्रसिद्धा, यद्बलादपरोक्षत्वनिश्चय इति चोदयति—*केयमिति*॥ *ननु*—विवेकाग्रहादपि सा संभवतीत्याशङ्क्याह—*अन्यथेति*॥ पूर्वं परामर्श-

तत्त्वदीपनम्

प्रतिभाससमकालीनोऽर्थ उपगतश्चेत्, कथं तर्हि कालत्रयसंबन्धिसत्तानिषेधः? इत्याशङ्क्याह—*लौकिकेति*॥ परमार्थरजतस्यात्राप्रसक्तेः कथं तन्निषेधः? इत्याशङ्क्याह—*दृष्टेति*॥ रजताभासप्रसक्त्या परमार्थरजतस्यापि बुद्धिस्थत्वादत्र प्रतिषेधः, सामान्योपाधौ प्रसक्तस्य घटस्य निषेधवदित्यर्थः। उक्तव्यवस्थायाः किं कल्पकम्? इत्याशङ्क्य, संविद्द्वयमेव कल्पकमित्याह—*संविद्द्वयेति*॥ इतीत्यस्य व्यवस्थासिद्धेरित्यनेन संबन्धः। संविद्-द्वयानुपपत्तिर्व्यवस्थाकल्पिकेत्यर्थः। अनयोः प्रत्यययोरेका संवित् त्यज्यताम्, तथाच नालौकिककल्पनेत्याशङ्क्याह—*अन्यतरेति*॥ अपह्नवायोगे हेतुमाह—*तथाचेति*॥ यथाऽन्यतरसंविदपह्नवायोगः; तथोभयसंविदनुभवस्ततो नान्यतरापलाप इत्यर्थः। 'नात्र रजतमि'ति कालत्रयासत्त्वं प्रतीयते, 'मिथ्यैव रजतमभादि'ति भ्रान्तौ सत्त्वम्, तत-श्चोभयसंविदनुरोधेन कालत्रयनिषेधस्य लौकिकविषयत्वम्—'सदिदं रजतमि'त्यनुभवस्य मायाविवर्तरूप्यविषयत्व-मित्यर्थः॥

पुरोवर्तित्वावभासनमन्यथोपपन्नमिति चोदयति—*नन्वपरोक्षेति*॥ "अविवेकादि"त्यत्र रजतस्मरणस्येति द्रष्टव्यम्। निरस्तमपि चोद्यं टीकारूढं कर्तुं पुनरुपस्थापितमिति द्रष्टव्यम्। अनुभवविरोधान्नैवमित्याह—*नेत्याहेति*॥ पुरोऽवस्थितत्वावभासनातिरिक्तं स्पष्टशब्दार्थं न विद्मः, तथाच पौनरुक्त्यमित्यभिप्रायेणाह—*केय-

वार्तिकम्

नाव्याप्तिदोषोऽस्तीत्याशयः। कथमिति चेत्, तत्राह—यतः स्मृतिरूपः परत्र पूर्वदृष्टावभासः 'सत्यानृते

पञ्चपादिका

शुक्तिसम्प्रयोगे रजतमवभासते। यतोऽर्थात्तद्विषयस्यावभासस्यापीदमेव लक्षणमुक्तं भवति। कथम्? तदुच्यते—स्मृते रूपमिव रूपमस्य, न पुनः स्मृतिरेव; पूर्वप्रमाणविषयविशेषस्य तथानव-

पञ्चपादिकाविवरणम्

विवेकज्ञानसमयेऽपि—'एतावन्तं कालमिदं रजतमित्यभादि'ति संसृष्टावभासत्वेन प्रत्यभिज्ञायोग्यता; अन्यथा 'तद्रजतमेतावन्तं कालमितो विविक्तमि'ति प्रतीयात्, अथवा—तज्ज्ञानात्तत्र प्रवृत्तिरिति पदार्थांशज्ञान-तत्प्रवृत्त्यो-र्नियमात्, इहापि संसर्गप्रवृत्तिनिमित्तता संसर्गज्ञानस्य स्पष्टतेति। "*पूर्वदृष्टावभासः" इति स्पष्टार्थः॥

यदा ज्ञानविशिष्टोऽर्थ एवाध्यासः, तदा स्मर्यमाणसदृशोऽन्यात्मनाऽवभासमानोऽन्योऽर्थोऽध्यास इत्येवंलक्षणपरतया वाक्यं योजितम्। यदा पुनरर्थविशिष्टं ज्ञानमेवाध्यासः, तदा स्मृतिसमानोऽन्यस्यान्या-

ऋजुविवरणम्

सामर्थ्यादर्थस्य स्पष्टतोक्ता, इदानीं ज्ञानस्यैव तस्मिन्नेव ज्ञाने स्पष्टतामाह—*अन्यथेति*॥ *ननु*—न परामर्शोऽनुभवसाधकः; अनुभवे सन्दिग्धे तस्यासंसर्गाग्रहनिबन्धनत्वोपपत्तेः; तेन न स्पष्टतेत्याशङ्क्याह—*अथवेति*॥ गृहीतपदार्थासंसर्गाग्रहात् प्रवृत्तिरित्येतन्निराकरोति—*पदार्थांशज्ञानतत्प्रवृत्त्योरिति*॥ यदंशे ज्ञानम्, तदंश एव प्रवर्तते, न त्वन्याकारज्ञानादंशान्तरे प्रवर्तत इति नियमो दृश्यत इति भावः। यदि लक्षणवाक्यं कर्मव्युत्पत्त्या योज्यते, तर्हि ज्ञानाध्यासे लक्षणान्तरं वक्तव्यम्, अनध्यस्तत्वं वाऽङ्गीकर्तव्यमित्याशङ्क्य परिहृतम्—"यतोऽर्थादि"ति, तदयुक्तम्; अव्यापकत्वप्रसङ्गात्, अर्थज्ञानयोः परस्परनिरपेक्षयोरध्यासलक्षणस्यैव वक्तुमशक्यत्वेनानध्यस्तत्वप्रसङ्गात्, अर्थज्ञानात्मकत्वाच्चाध्यासस्य सहितस्यैव लक्षणोक्तौ पुनर्लक्षणप्रदर्शने पौनरुक्त्यमित्याशङ्क्याभिप्रायमाह—*यदा ज्ञानविशिष्टोऽर्थ

तत्त्वदीपनम्

मिति। भ्रान्तिसमये पुरोदेशसंसृष्टतया रजतस्य स्फुरणं पुरोऽवस्थितत्वावभासनं बाधकज्ञानोत्तरकालमिदमा संसृष्टतयाऽनुसन्धीयमानत्वं स्पष्टशब्दार्थ इति विभागमभिप्रेत्याह—*विवेकेति*॥ बाधकज्ञानोत्तरकालं संसृष्टतया प्रत्यभिज्ञायमानत्वमात्रात् कथं प्राक्संसृष्टतया प्रतिभासः? इत्याशङ्क्याह—*अन्यथेति*॥ अनुभूतविषयत्वात्परामर्शस्य संसर्गस्य चाननुभूतत्वाद् न तद्विषयपरामर्शसंभव इत्यर्थः। स्पष्टशब्दस्यार्थान्तरमाह—*अथवेति*॥ संसर्गज्ञानस्य संसर्गप्रवृत्तिनिमित्तता स्पष्टतेति कुतः? अग्रहादपि संसर्गप्रवृत्तिसंभवात्, इत्याशङ्क्याह—*पदार्थेति*॥ नियममेवाह—*तज्ज्ञानादिति*॥ यो यत्र प्रवर्तते, असौ तज्ज्ञानादिति प्रसिद्धम्, रजतार्थी चेदमि प्रवर्तते, तस्मात्पुरोवर्ति द्रव्यं रजततया ज्ञात्वा प्रवर्तत इत्यवश्याऽऽश्रयणीयमित्यर्थः॥

"पूर्वदृष्टावभास इत्यादेरयमर्थः—रजतस्य पुरोवर्तितया भासमानत्वे कथं स्मर्यमाणसरूपत्वम्? इत्याशङ्क्याह—*पूर्वदृष्टेति*॥ शुक्त्यविद्यया तत्र झटिति प्रादुर्भवतः कथं पूर्वदृष्टत्वं घटते? इत्याशङ्क्य, पूर्वदृष्टसदृश इत्येवंपरतया व्याकरोति—*नहीति*॥ स्मर्यमाणसदृशोऽन्यस्यान्यात्मनाऽवभासमानोऽध्यास इत्येवंलक्षणस्वीकारे ज्ञानस्याऽध्यासत्वमुपेक्षितं स्यादित्याशङ्क्य, ज्ञानाध्यासपरत्वेन लक्षणं व्याचख्यौ, तदनुपपन्नम्; ज्ञानार्थयोरन्यतरस्याध्यासत्व इतरस्याप्यध्यासत्वं सेत्स्यति, किं पृथग्लक्षणोपन्यासेन? इत्याशङ्क्याह—*यदेति*॥ यद्यप्यर्थज्ञानाध्यासयोरन्यतरनिर्देशेऽन्यतरसिद्धिः; तथाऽप्यर्थाध्यासलक्षणस्य ज्ञानाध्यासेऽसंभवेनाव्याप्तिः स्यात्, तदर्थं पृथग् निर्देष्टव्यमित्यर्थः।

वार्तिकम्

मिथुनीकृत्ये'त्यनेनाभिधीयत इति लक्षणवाक्ययोजना॥ संप्रति पदानि विभज्य तदर्थः कथ्यते।

पञ्चपादिका

भासकत्वात् । कथं पुनः स्मृतिरूपत्वम् ? पूर्वप्रमाणद्वारसमुत्थत्वात् । नह्यसम्प्रयुक्तावभासिनः पूर्वप्रवृत्ततद्विषयप्रमाणद्वारसमुत्थत्वमन्तरेण समुद्भवः सम्भवति ॥

*अपर आह—*ननु* अन्यसम्प्रयुक्ते चक्षुष्यन्यविषयज्ञानं स्मृतिरेव, प्रमोषस्तु स्मरणाभि-

पञ्चपादिकाविवरणम्

त्मनाऽवभासोऽध्यास इत्येवंलक्षणपरतयाऽपि तदेव वाक्यं योजयितुं शक्यत इत्याह—*यतोऽर्थादिति* । *अर्थात्= वाक्यसामर्थ्यादित्यर्थः । *कथमित्यादिः स्पष्टार्थः* । *ननु* न स्मृतिश्चेद् भ्रान्तिः, प्रत्यक्षज्ञानवद् न पूर्वानुभवजन्यत्वमित्याशङ्क्य, सम्प्रयोगमात्रजन्यज्ञानादन्येषां सर्वेषामविशिष्टं पूर्वप्रमाणजन्यत्वम् ; अन्वय-व्यतिरेकसामर्थ्यात् , इत्याह—*नह्यसम्प्रयुक्तावभासिन इति* ॥

ऋजुविवरणम्

एवेति* ॥ *ननु* वाक्यभेदस्यावश्यंभावित्वाद् लक्षणान्तरमेव किं नोक्तम् ? इत्याशङ्क्याह—*योजयितुमिति* ॥ तथाऽपि लाघवादिति भावः । अर्थादित्यनेन धर्म-शेषलक्षणोक्तावधर्म-शेषिलक्षणप्रसिद्धिवदभिप्रेतत्वशङ्का स्यात्, न त्विह तथा भवति ; तत्र प्रतियोगित्वरूपेणार्थात् सिद्धिः, नेह तथा प्रतियोगित्वरूपत्वम्, इत्याशङ्क्य व्याचष्टे—*वाक्य-सामर्थ्यादिति* ॥ अथवा—अर्थादिति कथमुक्तम् ? न ह्यत्रानुपपद्यमानं किञ्चिदस्तीत्याशङ्क्य व्याचष्टे—*अर्थादिति* ॥ वाक्येति* ॥ वाक्यस्य समर्थत्वादिति । "न ह्यसंप्रयुक्ते"त्यनेन संस्कारजन्यत्वसाधनं कृतम्, तद् व्यर्थम् ; संस्कारा-जन्यत्वशङ्काकरणाभावात्, नाप्यसंयुक्तावभासत्वेन संस्कारजन्यत्वम् ; प्रमाणाभावात्, संयोगासंयोगजन्यत्वस्य व्यभिचारेण तदसाधकत्वात्, इत्याशङ्क्यावतारयति—*ननु न स्मृतिश्चेदिति* ॥ "संप्रयोगमात्रे"त्यनेन स्मृतिव्यति-रिक्तत्वस्य सोपाधिकत्वमुक्तम् । *ननु*—संप्रयोगमात्रजन्यत्वमुपाधिर्न संभवति ; सपक्षव्यापकत्वाभावादित्या-शङ्क्याह—*अन्येषामिति* ॥

रूपशब्दमुपश्रुत्य गुरुमार्गविरोधिनम् । समर्थयन् तदेवादौ तन्मतं प्राह संगतम् ॥
भ्रान्तिरूपेऽथवा पूर्वं विवादे धीपथं गते । तद्रूपं रूप्यते पश्चात्तद्विशेषनिरूपणात् ॥

"नन्वन्यसंप्रयुक्ते चक्षुष्यन्यविषयं ज्ञानं स्मृतिरि"त्युक्तम्, तदयुक्तम् ; अनुमानादीनामपि स्मृतित्वप्रसङ्गात्,

तत्त्वदीपनम्

तर्हि लक्षणान्तरमेव कथ्यताम्, कस्मादेतदेव तत्र योज्यते ? इत्याशङ्क्य लाघवादित्याह—*तदेवेति* ॥ अवभासस्याऽ-पीदमेव लक्षणमित्यर्थादुक्तं भवति यतः, अतो न ज्ञानाध्यासस्योपेक्षितत्वमिति योजना । "अर्थादि"त्यत्र कस्यानुप-पत्तिरिति न ज्ञायते, अत्राह—*वाक्येति* ॥ कथमित्यादेरयमर्थः—अर्थाध्यासलक्षणं कथं ज्ञानाध्यासलक्षणं स्यात् ? न ह्यन्यलक्षणमन्यलक्षणं भवति ? इति चोदयति—*कथमिति* ॥ अन्यलक्षणमन्यलक्षणमिति न ब्रूमः, अपितु अन्यलक्षणवाक्यमन्यलक्षणपरतयाऽपि योजयितुं शक्यत इत्याह—*तदुच्यत इति* ॥ योजनामेवाह—*स्मृतेरिति* ॥ स्मरणं स्मृतिः, तस्या रूपमिव रूपमस्येति । स्मृतिरूपत्वं कस्मात् ? संस्कारजन्यत्वेन स्मृतित्वमेव किं न स्यात् ? इत्याशङ्क्य व्यभिचारान्नेत्याह—*न पुनरिति* ॥

संस्कारमात्रजन्यत्वेन स्मृतित्वशङ्कां निरस्यति—*पूर्वेति* ॥ स्मृतिजनकसंस्कारस्य यन्मूलम्, तत्पूर्वशब्दे-नोच्यते । पूर्वं च तत् प्रमाणं चेति पूर्वप्रमाणम्, तस्य योऽयं विषयविशेषः, तस्य पूर्वानुभवसंभिन्नतयाऽनवभासकत्वा-दित्यर्थः । पूर्वानुभवसंभिन्नतयाऽनवभासकस्य स्मृतिरूपत्वमप्यनुपपन्नं प्रत्यक्षवदिति चोदयति—*कथमिति* ॥ वैधर्म्येणोत्तरयति—*पूर्वेति* ॥ प्राक् प्रवृत्तं प्रमाणं द्वारं मूलं यस्य संस्कारस्य, स तथोक्तः ; तस्मात् समुत्पन्नत्वादित्यर्थः । अस्मृतित्वे संस्कारजन्यत्वमप्यनुपपन्नमिति चोदयति—*नन्विति* ॥ विमतम्, न संस्कारजन्यम्, अस्मृतित्वात्; प्रत्यक्ष-वदित्यर्थः । अनुमानादौ व्यभिचारान्नायं हेतुः साधुरित्याह—*संप्रयोगेति* ॥ प्रत्यभिज्ञायां सङ्संस्काराजन्यत्वप्रस

पञ्चपादिका

मानस्य । इन्द्रियादीनां ज्ञानकारणानां केनचिदेव दोषविशेषेण कस्यचिदेवार्थविशेषस्य स्मृतिसमुद्बोधः

पञ्चपादिकाविवरणम्

ननु संस्कारजन्यत्वमुपगतं चेत्, अन्यसम्प्रयुक्ते चक्षुषि यदनन्तरमन्यविषयं ज्ञानमुत्पद्यते, सा स्मृतिरेव, तद्व्यवधानेन तु यज्ज्ञानमुत्पद्यते, तदनुमानादि प्रमाणमिति, प्रमाण-स्मृतिद्वैराश्यमेव विज्ञानस्य, न तृतीयं मिथ्याज्ञानं नामास्तीत्यख्यातिवादी प्रत्यवतिष्ठत इत्याह—*अपर आहेत्यादिना* ॥ *ननु* स्मृतिश्चेद्रवादिस्मृतिवत्स्वार्थं गृह्यमाणाद्विविच्य स्मरामीति दर्शयेदित्यत आह—*प्रमोपस्त्विति* ॥ *ननु* *शुक्तिकासम्प्रयोगे रजतं किमिति स्मर्यते? सादृश्यादिति चेत्, अतिसादृश्याच्छुक्तिकान्तरमेव स्मर्यतामिति, नेत्याह—*इन्द्रियादीनामिति* ॥ *ननु* मा भूत् स्मृतेः प्रमोषात्स्वार्थविवेचकता, ग्रहणं तु स्वार्थं

ऋजुविवरणम्

स्मृतित्वस्य च निरस्तत्वात्, इत्याशङ्क्य पूर्वसंस्कारजन्यत्वेन स्मृतिरूपत्वमुक्तम्, तत्र साक्षात्तज्जन्यत्वं व्यवधानेन वेति विकल्प्याऽऽद्ये न तत्प्राप्तिरित्याह—*यदनन्तरमिति* ॥ द्वितीयेऽपि न स्मृतिरूपत्वमित्याह—*तद्व्यवधानेनेति* ॥ *ननु* भवतु नामान्यत्रैवम्, प्रकृते तु न स्मृतिः; अपरोक्षावभासित्वात्, मन्दप्रयोजनं च चोद्यम्, 'अहं मनुष्यः' इत्यादौ वक्तव्यं हि विधान्तरम्, तेन न्यायेनान्यत्रापि भ्रान्तिसम्भवादित्याशङ्क्याह—*प्रमाणस्मृतीति* ॥ संस्कारजन्यं ज्ञानं द्विविधमेव । अथवा—ज्ञाने द्वैराश्यमेवेत्यर्थः ॥

चोद्ये सिद्धान्तविरोधं दर्शयितुमवधारणार्थमाह—*न तृतीयमिति* ॥ कथं प्रवृत्तिरिति चोदिते "तेने"त्यनेन

तत्त्वदीपनम्

परास्यति—*मात्रेति* ॥ व्याप्त्यादिसंस्कारे सत्यनुमानादिज्ञानम्, अन्यथा नेत्येवंलक्षणावन्वय-व्यतिरेकौ । चक्षुष्यन्य-संप्रयुक्ते यदन्यविषयं ज्ञानमुत्पद्यते, सा स्मृतिरिति, कथमनुमानादौ व्यभिचारः? इत्याशङ्क्याभिप्रायं विवृणोति—*ननु संस्कारेति* ॥ अधिष्ठानज्ञानं व्यावर्तयितुमन्यविषयत्वमित्युक्तम् । अनुमानं व्यावर्तयति—*अनन्तरमिति* ॥ संस्कारजन्यत्वस्य त्वयाऽप्याश्रितत्वात्तेनैव भ्रान्त्युत्पत्तेर्न कारणान्तरं मृग्यमित्यभिप्रेत्याह—*संस्कारेति* ॥ अनन्तरपदव्यावर्त्यमाह—*तद्व्यवधानेनेति* ॥ व्याप्तिस्मृतिव्यवधानेनेति यावत् । फलितमाह—*इतीति* ॥ संस्कारोत्थज्ञानस्य प्रमाणस्मृतिरूपत्वेन द्वैराश्यमित्यर्थः ।

संस्कारोत्थज्ञानं द्विविधमेवेति कथं नियमः? अयथार्थप्रत्यक्षस्यापि संभवादित्याशङ्क्याह—*न तृतीयमिति* ॥ ज्ञानत्वम्, यथार्थमात्रवृत्ति, ज्ञानमात्रवृत्तित्वात्, प्रमात्ववदित्यर्थः । अथवा अयथार्थप्रत्ययप्रसिद्धेः कथं तदपलापः? इत्याशङ्क्याह—*प्रमाणेति* ॥ तत्सद्भावे प्रमाणाभावात् प्रसिद्धेरन्यथाऽप्युपपत्तेर्नैतदित्यर्थः । एवकारव्यावर्त्य-माह—*न तृतीयमिति* ॥ विमतम्, स्मृतिः, संस्कारमात्रजत्वात्; संमतवदित्यनुमानं विवक्षितम् । तत्र विपक्षे बाधकतर्कपराहतिं शङ्कते—*ननु स्मृतिरिति* ॥ अपुनरुक्तशब्दद्वयस्मृतिहेतुत्वेन रजतं विविक्तं प्रतीयत एवेत्या-शङ्क्याह—*स्मरामीति* ॥ अप्रमुषितस्मरणाभिमानस्यास्मरणस्य विवेचकत्वम्, अस्य च तद्वैपरीत्यान्नैवमित्याह—*अत आहेति* ॥ संस्कारस्य सदा भावात् सदा स्मरणं स्यादिति शङ्कते—*ननु शुक्तिकेति* ॥ शुक्तिकासंप्रयोगे रजतं किमिति स्मर्यते? संप्रयोगात्पूर्वोत्तरकालयोरस्मरणं कस्मादिति योजना ॥

सादृश्यसंदर्शनसमुद्बुद्धसंस्कारस्य पूर्वोत्तरक्षणयोरभावादस्मरणमिति शङ्कते—*सादृश्यादिति* ॥ तथाऽपि रजतं कस्मात्स्मर्यते? अन्यदेव कस्मान्न स्मर्यते? इत्याह—*अतिसादृश्यादिति* ॥ रागादीनामपि संस्कारोद्बोधक-कोट्यन्तर्भावान्नातिप्रसङ्ग इत्याह—*नेत्याहेति* ॥ स्मर्यतेऽनेनेति स्मृतिः संस्कारः, तस्य समुद्बोध इति यावत् । समुद्बोधस्याऽऽगन्तुकत्वे हेतुमाह—*इन्द्रियादीनामिति* ॥ आदिशब्देन विषय-प्रमातारौ गृह्येते । राग-सादृश्य-काचादि-

पञ्चपादिका

क्रियते। सम्प्रयुक्तस्य च दोषेण विशेषप्रतिभासहेतुत्वं करणस्य विहन्यते। तेन दर्शनस्मरणयोर्निरन्तरोत्पन्नयोः करणदोषादेव विवेकानवधारणाद् दूरस्थयोरिव वनस्पत्योरनुत्पन्न एवैकत्वावभास

पञ्चपादिकाविवरणम्

स्मर्यमाणाद्विवेचयेदिति, नेत्याह—*सम्प्रयुक्तस्य चेति* ॥ *ननु* स्मृति-ग्रहणयोर्यौगपद्याभावात्क्रमवर्तित्वे पूर्वज्ञानं व्यवधानान्न प्रवृत्तिहेतुः, नच सामान्यमात्रज्ञानाद्विशेषमात्रज्ञानाद्वा प्रवृत्तिरित्यत आह—*तेन दर्शनस्मरणयोर्निरन्तरोत्पन्नयोरिति* ॥ निरन्तरोत्पत्तिरेव प्रवृत्तिहेतुरित्यर्थः। *ननु* 'इदं रजतमित्यभादि'ति संसर्गप्रत्ययः प्रत्यभिज्ञायत इति, नेत्याह—*अनुत्पन्न एवैकत्वावभास इति* ॥

ऋजुविवरणम्

निरन्तरोत्पन्नत्वेन दोषाद्विवेकानवधारणेनैकत्वाभिमानस्य भ्रमत्वनिरूपणं कृतम्, तदसङ्गतम्; चोद्यस्यापरिहृतत्वात्, तथा—"उत्पन्नभ्रमः" इति वदता ज्ञानविषयभ्रमस्यैव प्रवृत्तिहेतुत्वमुक्तमिव प्रतिभाति, तदप्यसङ्गतम्; क्लृप्तसंसर्गज्ञानहानायोगात्, इष्टविघाताच्च, इत्याशङ्क्य व्याचष्टे—*निरन्तरोत्पत्तिरेवेति*॥ *नन्विदंरजतमितीति* ॥ अयं भावः*—

तत्त्वदीपनम्

दोषशब्दार्थः। स्मरणस्याविवेचकत्वेऽपि पुरोवर्तिद्रव्यसंयुक्तेन्द्रियेण विशेषांशस्फुरणसंभवान्नाविवेक इति चोदयति—*ननु मा भूदिति* ॥ विशेषांशे प्रतिबन्धसंभवान्नयनस्य न तद्भासकत्वमित्याह—*नेत्याहेति* ॥ विवादाध्यासिता प्रवृत्तिः, पुरोवर्तिरजतज्ञानपूर्विका, रजतेच्छाऽधीनपुरोवर्तिप्रवृत्तित्वात्; सम्यग्रजतप्रवृत्तिवत्, इत्यनुमानादयथार्थप्रत्ययसिद्धिरिति शङ्कते—*नन्विति* ॥ विपक्षे बाधकाभावादप्रयोजकत्वमाशङ्क्य किं ज्ञानद्वयं प्रवर्तकम्? उत प्रत्येकम्? आद्येऽपि किं संभूयोत्पन्नं प्रवर्तकम्; उत क्रमेण? इति विकल्प्याऽऽद्यं निरस्यति—*स्मृति-ग्रहणयोरिति* ॥ मनसः क्रमकारित्वनियमादुत्पन्नयोश्च स्मृति-ग्रहणयोः क्षणिकत्वान्न यौगपद्यमित्यर्थः ॥

क्रमपक्षं निरस्यति—*क्रमवर्तित्व इति* ॥ इदमाकारज्ञानस्य रजतज्ञानव्यवहितत्वान्न प्रवृत्तिहेतुत्वम्; अव्यवहितपूर्वक्षणवर्तिनो हेतुत्वनियमादित्यर्थः। द्वितीयेऽपि किम् इदंज्ञानं प्रवर्तकम्? उत रजतज्ञानम्? नोभयथाऽपीत्याह—*नचेति* ॥ इदमाकारज्ञानाद् रजतार्थिनो न शुक्तौ प्रवृत्तिः; लोष्टादावपि तत्प्रसक्तेः, नापि रजतमात्रज्ञानात्; देशान्तरेऽपि प्रवृत्तिप्रसङ्गात्। तस्मात् संसर्गज्ञानाऽभावे प्रवृत्त्यसंभवस्य बाधकत्वात्तदाश्रयणीयमिति चोद्यार्थः। संसर्गज्ञानाभावेन प्रवृत्त्यसंभवे चोदिते प्रवर्तकं किंचिद् वक्तव्यम्, नच तदुच्यत इत्यसंगतिमाशङ्क्य "निरन्तरोत्पन्नयोरि"त्यनेन प्रवर्तकमुक्तमित्याह—*निरन्तरेति* ॥ *अन्तरम्* = व्यवधानम्, तद्रहिततयोत्पत्तिर्यस्य बोधस्यासौ निरन्तरोत्पन्नः, तयोरित्यर्थः। इदंज्ञानादव्यवधानोत्पन्नं रूप्यज्ञानं प्रवर्तकमिति यावत् ॥

संसर्गप्रत्यये प्रत्यभिज्ञा प्रमाणम्, तद्विरुद्धो हेतुरिति चोदयति—*नन्विति* ॥ प्रत्यभिज्ञानमन्यथाऽपि घटत इति परिहरति—*नेत्याहेति* ॥ एकत्वज्ञानाभावेऽप्येकत्वज्ञानं जातमित्यविवेकाद् व्यवहार इत्यर्थः। संस्कारमात्रजन्यत्वहेतोरर्भकतिक्तस्मृतावसिद्धिः शङ्किता, साऽनुपपन्ना; इह जन्मन्यनुभवाभावेऽपि जन्मान्तरे तिक्तरसस्या-

वार्तिकम्

परत्र = शुक्तिकादौ। *पूर्वदृष्टस्य* = रजतादेः। *अवभासः* = आभास इति यावत्। अवभासाभासपदयोर्लोके समानार्थत्वेन प्रयोगदर्शनात्, तद्यथा 'स्फटिक-दर्पणादौ लौहित्यमुखाद्याभासः'

प्रदीपः

ज्ञानम्। अधिष्ठानविषमसत्ताकारोऽप्यज्ञानत्वमध्यासत्वमनिर्वचनीयख्यात्यभिमतमिति भावः। अधिष्ठानसमसत्ताकारोप्यज्ञानत्वं

पञ्चपादिका

उत्पन्नभ्रमः । *ननु* अनास्वादिततिक्तरसस्यापि बालकस्य पित्तदोषान्मधुरे तिक्तावभासः कथं स्मरणं स्यात् ? *उच्यते* ;—जन्मान्तरानुभूतत्वात्, अन्यथाऽननुभूतत्वाविशेषेऽत्यन्तमसन्नेव कश्चित्सप्तमो रसः किमिति नावभासेत ? तस्मात्पित्तमेव मधुराग्रहणे तिक्तस्मृतौ तत्प्रमोषे च हेतुः ; कार्यगम्यत्वाद्धेतुभावस्य । *एतेन*—अन्यसम्प्रयोगेऽन्यविषयस्य ज्ञानस्य स्मृतित्व-तत्प्रमोषौ सर्वत्र—*व्याख्यातौ द्रष्टव्यौ ॥

पञ्चपादिकाविवरणम्

"जन्मान्तरानुभूतं न स्मर्यते" इति भाष्यवचनादस्मर्यमाणत्वाच्च बालस्य तिक्तस्मृतिः कथमिति चोदयति—*नन्वनास्वादिततिक्तरसस्येति* ॥ जन्मान्तरानुभूततिक्तस्मृतिः कल्प्यत इत्याह—*उच्यत इति* ॥ जन्मान्तरानुभवस्योपकारितामाह—*अन्यथाऽननुभूतत्वेति* ॥ किमिति तर्हि जन्मान्तरानुभूतं किञ्चिदेव स्मर्यते ? न सर्वमिति ? दोषबलादित्याह—*तस्मात् पित्तमेवेति* ॥ किमिति तर्हि दोष एव जन्मान्तरानुभूतं सर्वं न स्मारयति ? इत्यत आह—*कार्यगम्यत्वादिति* ॥ *ननु* अतत्त्वे तत्त्वज्ञानमिति शास्त्रकारेणैव दर्शितः संसर्गभ्रम इति, नेत्याह—*एतेनान्यसम्प्रयोग इति* ॥ वक्तव्ये च पूर्ववादिनाऽप्यविवेके संसर्गज्ञानकल्पनागौरवादख्यातिरेव युक्तेति भावः ॥

उच्यते ;—केयमख्यातिरिति ? न तावत् ख्यात्यभावमात्रम्; अनभ्युपगमात्, अतिप्रसङ्गाच्च । अन्यार्थि-

ऋजुविवरणम्

निरन्तरोत्पत्तिमात्रं न प्रवृत्तिहेतुः संसर्गज्ञानादिति ॥ *ननु* सर्वत्र संसर्गज्ञानस्य प्रवर्तकत्वं व्याप्तम्, कथं तेन विनाऽविवेकमात्रात्प्रवृत्तिरङ्गीक्रियते ? व्याप्तिविरोधादित्याशङ्क्याभिप्रायमाह—*वक्तव्ये चेति* ॥ *न तावदिति* ॥ ख्याते-

तत्त्वदीपनम्

नुभूतत्वेन हेतोः संभवात् ; इत्याशङ्क्याह—*जन्मान्तरेति* ॥ जन्मान्तरेऽनुभवसंभवेऽपि जन्म-मरण-व्यवहितत्वान्न तस्य स्मृतिजनकत्वमिति शबरस्वामिवचनादित्यर्थः । न केवलमाप्तवचनादेव जन्मान्तरानुभूतस्मृत्यभावः, किं त्वनुभवादपीत्याह—*अस्मर्यमाणत्वादिति* ॥

इह जन्मन्यनुभवाभावेऽपि जन्मान्तरानुभूतत्वात्तिक्तस्मरणमित्युक्तम्, तन्न संगच्छते ; आप्तवचनविरोधात्, कल्पकवैधुर्याच्चेत्याशङ्क्य, न तावदाप्तवचनविरोधः ; तस्य प्रायिकाभिप्रायत्वादिति सिद्धान्तयति—*जन्मान्तरेति* ॥ आस्वाद्य थूत्कृत्य गुडादेस्त्यागदर्शनं तिक्तस्मृतेः कल्पकमित्यर्थः । अननुभवशङ्काऽनुत्थितेरन्यथेत्याद्ययुक्तमित्याशङ्क्य, जन्मादिव्यवहितत्वाद् जन्मान्तरानुभवस्यानुपकारकत्वमुक्तं निरस्यत इत्याशयमाह—*जन्मेति । अन्यथेति* ॥ जन्मान्तरीयस्यानुभवस्यानुपकारकत्व इत्यर्थः । *अननुभूतत्वाविशेष इति* ॥ अनुभूतत्वं नास्ति यस्य, तदननुभूतत्वम् ; तस्मादननुभूतत्वाद् अनुपकारकत्वेन विशेषाभावसाम्य इत्यर्थः । तत्र षड्रसातिरिक्ते रसत्वानुभवः स्यादित्यतिप्रसङ्गः । अननुभूतस्मरणपक्षेऽतिप्रसङ्गवदनुभूतस्मरणेऽप्यतिप्रसङ्गः सम इत्याह—*किमितीति* ॥ नियामकाऽभावोऽसिद्ध इत्याह—*दोषेति* ॥ दोषात्स्मरणमित्यत्राप्यतिप्रसङ्गः सम इत्याह—*किमितीति* ॥ तिक्तस्मरणकार्यलिङ्गेन दोषस्य तिक्तस्मारकत्वमेव कल्प्यत इत्याह—*अत आहेति* ॥ अयथार्थज्ञानाश्रयणे सिद्धान्तक्षतिरिति शङ्कते—*नन्वतत्त्व इति* ॥ *शास्त्रकारेणेति* ॥ सांख्येनेत्यर्थः । अयथार्थज्ञानाभावेऽपि तद्व्यवहाराभिप्रायं तद् वचनमित्याह—*नेत्याहेति* ॥ कल्पनागौरवादप्ययथार्थज्ञानं नोपेयमित्याह—*वक्तव्य इति* ॥ प्रत्यययाथार्थ्यं भ्रान्त्यनुपपत्तिर्बाधिकेत्याह—*उच्यत इति* ॥

पञ्चपादिकाविवरणम्

नोऽन्यत्र प्रवृत्तिहेतुर्ज्ञानमिति चेत्, यत्र तर्हि न प्रवृत्तिर्झटिति, बाधश्च, तत्र कथं भ्रान्तिः ? अथाविविक्तानेकपदार्थज्ञानम्, तर्हि 'इदमि'ति 'रजतमि'ति चापुनरुक्तशब्दद्वयस्मृतिहेतुतया विविक्तावभासनान्न तस्य सामान्य-विशेषयोरविवेकभ्रमः सम्भवति। नच भेदावमर्शेनैकत्वज्ञानमनभ्युपगच्छतः सामान्यविशेषयोरविवेकः सम्भवति ; विविक्ताकारद्वयावभासनात्। इतरेतराभाव-भेद-द्वित्वादिसङ्ख्याविशिष्टज्ञानं विवेक इति चेत्, 'गामानय दण्डेने'ति गो-दण्डयोस्तत्कारकत्वयोश्चाविवेकभ्रमः स्यात्। तत्राप्यानुषङ्गिकभेदादिज्ञानमस्तीति चेत्, 'इदमि'ति 'रजतमि'ति चेहाप्यपुनरुक्तशब्दानुषक्ताकारद्वयावभासे द्वित्वाद्यवभासो विद्यत एव ; अन्यथा सामान्याकाराद् विशेषाकारस्य विवेकानवभासाद् 'इदमि'त्येव स्यात्, 'रजतमि'त्येव वा स्यात्, न—'इदं रजतमि'ति। *किञ्च* प्रतीयमानाकारयोर्नाविवेकः ; अपुनरुक्तप्रतिभासात्। अप्रतीयमानाकाराविवेको न भ्रमः ; अतिप्रसङ्गात्। तस्मान्नाविवेको भ्रमः॥

ऋजुविवरणम्

विद्यमानत्वादतिप्रसङ्गादिति भावः। *अथाविविक्तानेकेति*॥ अत्र विवेकशब्दस्य स्वरूपभूतभेदग्रहवाचित्वमङ्गीकृत्य तद्राहित्यमविवेक इत्युच्यते ? तद्विपरीताभेदाग्रहो वा ? किं वा विवेकशब्दस्य भ्रमविरोधिरूपान्तरवैशिष्ट्यग्रहवाचित्वमङ्गीकृत्य तद्राहित्यमविवेक इति ? न तावत्प्रथम इत्याह—*तर्हीदमितीति*॥ सामान्यविशेषग्रहणम्—अन्यत्र कथंचिदपुनरुक्तशब्दस्मरणाभावेनाविवेकः शङ्क्येतेति दर्शयितुम्। न द्वितीय इत्याह—*नच भेदावमर्शेनेति*॥ यद्वाऽविवेकस्त्वयाऽप्यङ्गीक्रियते, स कथमपुनरुक्तशब्दस्मृत्या निराक्रियत इत्याशङ्क्याह—*नच भेदावमर्शेनेति*॥ तिरस्कारेण, पर्यालोचनेन वेत्यर्थः। मम संसर्गाध्यासो भेदानवगमनिमित्त इति भावः। *इदानीं तृतीयं पक्षमवलम्बते—*इतरेतराभावेति*॥ *ननु* संसर्गवादिनाऽप्यविवेकोऽङ्गीक्रियते, तद्धेतुकश्च संसर्गाध्यास इति वक्तव्यम्, तथा सति लाघवात्तेनैवालमित्याशङ्क्याह—*किंच प्रतीयमानयोरिति*॥ ननु* असंसर्गाग्रहोऽविवेकः ; असंसर्गग्रहणस्य

तत्त्वदीपनम्

अख्यातिर्भ्रम इत्युक्तम्, तत्राह—*केयमिति*॥ किं ख्यात्यभावोऽख्यातिः ? किं वा तदन्यः ? उत तद्विरुद्धः ? इति किंशब्दार्थः। आद्यं प्रत्याह—*न तावदिति*॥ कतिपयख्यात्यभावस्य भ्रमत्वेऽतिप्रसक्तिः, सकलख्यात्यभावपक्षे सुषुप्त्यादावपि भ्रमत्वप्रसङ्ग इत्यर्थः। द्वितीयेऽपि किमयथार्थव्यवहारहेतुर्ज्ञानमख्यातिः ? उताविविक्तानेकपदार्थज्ञानमख्यातिः ? इति विकल्प्याऽऽद्यमुत्थापयति—*अन्यार्थिन इति*॥ अव्याप्त्या दूषयति—*यत्रेति*॥ वीतरागादीनां व्यवहाराभावान्न तद्धेतुर्ज्ञानमस्तीत्यर्थः। रागिणामपि प्रवृत्तिमन्तरेण बाधकसंदर्शनान्न तद्धेतुर्ज्ञानमस्तीत्याह—*झटितीति*॥ द्वितीयमुत्थापयति—*अथाविविक्तेति*॥ ज्ञानमात्रस्य भ्रमत्वं निराकर्तुम्—*अविविक्तेति* विशेषणम्। तावत्युक्ते वस्तुमात्रज्ञानेऽतिप्रसक्तिः, तदर्थम्—*"अनेके"ति*॥

अविविक्तत्वं किं भेदेनास्फुरितत्वम् ? उतैक्यम् ? इति विकल्प्य, आद्येऽव्याप्तिमाह—*तर्हीति*॥ द्वितीयं दूषयति—*नचेति*॥ अनभ्युपगमे हेतुमभिधत्ते—*भेदेति*॥ *अवमर्शेन = ज्ञानेनेत्यर्थः। किंच किं भेदः पदार्थस्वभावः ? उत धर्मः ? नाद्य इत्याह—*विविक्तेति*॥ पदार्थप्रतिपत्त्या भेदोऽपि प्रतिपन्न इति, नाविवेक इत्यर्थः। द्वितीयमुत्थापयति—*इतरेतरेति*॥ वैधर्म्यादिर्भेदशब्दार्थः। *तद्रहितता*॥ अविविक्ततेति शेषः। अतिव्याप्तिनैतत्साध्वित्याह—*गामानयेति*॥ कर्म-करणभावेन विवेकप्रतिपत्तेः कथमविवेकः ? इत्याशङ्क्याह—*तत्कारकत्वयोरिति*॥ गो-दण्डगतकर्म-करण-कारकत्वयोरित्यर्थः। तत्र लक्षणा-प्रवृत्तेः कथमतिव्याप्तिः ? इति शङ्कते—*तत्राऽपीति*॥ कर्म-करणप्रतिपादकविभक्तिद्वयबलाद् भेदः प्रतीयत इत्यर्थः। साम्येन समाधत्ते—*इदमितीति*॥ एतदेव व्यतिरेकमुखेनाह—*अन्यथेति*॥

पञ्चपादिकाविवरणम्

किञ्च 'खण्डो गौ'रित्यादिप्रत्ययाश्चाविविक्तानेकपदार्थविषया विभ्रमाः प्रसज्येरन्। नच ग्रहण-स्मरणाविवेक एव भ्रमः; 'अहं मनुष्यः' इति गृह्यमाणाविवेकस्य भ्रमत्वात्। सामान्य-विशेषादौ संसर्गज्ञानमेवास्तीति

ऋजुविवरणम्

विवेकरूपत्वात्, स चाविवेकः प्रतीयमानेदंरजतयोरेवास्तीति भ्रमत्वमित्याशङ्क्यातिप्रसङ्गमाह—*किंच खण्डो गौरित्यादीति* ॥ न विविक्ता अविविक्ताः, विवेकः असंसर्गग्रहो येषां ते विविक्ताः, ते च तेऽनेकपदार्थाश्चेति विग्रहः। ग्रहण-स्मरणत्वे सत्यसंसर्गग्रहराहित्यमविवेकप्रयोजकमित्याशङ्क्याह—*नच ग्रहण-स्मरणाविवेकेति*॥ *ननु* असंसर्गग्रह एव विवेको न भवति, किन्तु संसर्गग्रहो विवेकः, स इहास्तीति कथं भ्रमत्वम्? इत्यभिप्रायेण चोदयति—*सामान्यविशेषादाविति* ॥ तर्हि संसर्गग्रहलक्षणविवेकस्यासंसर्गाग्रहलक्षणाविवेकस्य च विद्यमानत्वाद् वैरूप्यमिति परिहरति—

तत्त्वदीपनम्

विवेकाप्रतिपत्तावपि तस्य विद्यमानत्वादिदं रजतमिति प्रतिभाससंभव इत्याशङ्क्याह—*नेदमिति* ॥ इदमाकाराद् रजतस्य व्यावृत्ततापतिपत्तौ विलक्षणशब्दानुविद्धतया तयोः स्फुरणं न स्यादित्यर्थः। किं भासमानयोरविवेकः? उताभासमानयोः? नाद्य इत्याह—*किंच प्रतीयमानेति* ॥ अपुनरुक्तप्रतिभासादिति* ॥ अपुनरुक्तशब्दद्वयाद्विवेकस्य प्रतिभासादित्यर्थः। द्वितीयं प्रत्याह—*अप्रतीयमानेति* ॥ सुषुप्तादावपि प्रसङ्गादित्यर्थः। सामान्यतः प्रतिपन्नयोर्विशेषतश्चाप्रतिपन्नयोर्विवेकाग्रहणं भ्रम इत्याशङ्क्याभावानङ्गीकारादग्रहणमेव न संभवतीत्याह—*तस्मादिति* ॥ ख्यातिविरुद्धाऽख्यातिरिति पक्ष उत्तरज्ञानस्य पूर्वज्ञानविरोधित्वाद् भ्रमत्वप्रसक्तिः, तथा ज्ञानप्रागभावस्यापीत्यर्थः ॥

किंचाविविक्तानेकपदार्थज्ञानमात्रं भ्रमः? आहो ग्रहणस्मरणात्मकम्? किं वा संसर्गज्ञानासहकृतत्वविशेषितम्? अथवा बाधकज्ञानविषयीकृतत्वात्यन्ताभावानधिकरणत्वविशेषितम्? इति विकल्प्याऽऽद्यमतिव्याप्त्या निरस्यति—*किं च खण्ड इति* ॥ द्वितीयमव्याप्त्या दूषयति—*नच ग्रहणेति* ॥ गृह्यमाणयोरविवेको गृह्यमाणाविवेकः, तस्येत्यर्थः। तृतीयमुत्थापयति—*सामान्येति* ॥ सम्यक्स्थले संसर्गज्ञानसंभवात्तद्रहिततविशेषितं लक्षणं न वर्तते, ततः कथमतिव्याप्तिरित्यर्थः ॥

भाष्यभावप्रकाशिका

परत्र परस्यावभास इत्येव लक्षणम्। तदुपपादकं स्मृतिरूपत्वम्। तत्साधनार्थं पूर्वदृष्टावभासपदम्। *पूर्वदृष्टः = पूर्वदृष्टसदृश इत्यर्थः। अध्यासद्वयेऽपि परत्रेति सामान्यतो धीयोग्यमधिष्ठानमुक्तम्। अर्थपक्षेऽवभास्यत इत्यवभासः। परश्चासाववभासश्चेति परावभासः। तथा ज्ञानपक्षेऽवभासनमवभासः, परस्यावभासः परावभास इति समासः ॥

एतावत्युक्ते घटात्परस्य पटस्यावभासः, स चावभास्यमानोऽध्यासः स्यात्, तन्निवृत्तये परत्रेति ॥ नचैवमपि खण्डो गौरित्यादावध्यासः स्यात्; परत्रेत्यारोप्यात्यन्ताभावतोऽभिधानात्, खण्डगवादीनां तादात्म्यसंसर्गाशून्यत्वाभावात्। दोष-संस्कार-संप्रयोगोत्थत्वादित्थमवभासः संभवतीति वक्तुं स्मृतिरूप इत्युक्तम्। स्मर्यत इति स्मृतिः स्मर्यमाणोऽर्थः। "भावे" "अकर्तरि च कारकेऽसंज्ञायाम्" इति सूत्रद्वयमधिकृत्य "स्त्रियां क्तिन्" इति सूत्रेण भावे कर्तृव्यतिरिक्ते कर्मादौ च कारके संज्ञायामसंज्ञायां च क्तिन्विधानाद् "अकर्तरि चे"ति चकारस्य संज्ञाव्यभिचारित्वाङ्गीकारात्। स्मर्यमाणस्य रूपमिव रूपमस्येति स्मृतिरूपः, न तु स्मर्यत एव स्पष्टम्;

भामती

श्चास्यावसादोऽवमानो वा। एतावता मिथ्याज्ञानमित्युक्तं भवति। तस्येदमुपव्याख्यानम्—'पूर्वदृष्टे'-त्यादि। पूर्वदृष्टस्यावभासः पूर्वदृष्टावभासः। मिथ्याप्रत्ययश्चारोपविषय आरोपणीयस्य मिथुनमन्तरेण न भवतीति पूर्वदृष्टग्रहणेनानृतमारोपणीयमुपस्थापयति। तस्य च दृष्टत्वमात्रमुपयुज्यते, न वस्तुसत्तेति दृष्टग्रहणम्। तथापि वर्तमानं दृष्टं दर्शनं नारोपोपयोगीति पूर्वेत्युक्तम्। तत्र पूर्वदृष्टं स्वरूपेण सदप्यारोपणीयतयाऽनिर्वाच्यमित्यनृतम्। आरोपविषयं सत्यमाह—*परत्रेति* ॥ *परत्र = शुक्तिकादौ परमार्थसति। तदनेन सत्यानृतमिथुनमुक्तम् ॥

स्यादेतत्—परत्र पूर्वदृष्टावभास इत्यलक्षणम्; अतिव्यापकत्वात्, अस्ति हि स्वस्तिमत्यां गवि पूर्वदृष्टस्य गोत्वस्य परत्र कालाक्ष्यामवभासः, अस्ति च पाटलिपुत्रे पूर्वदृष्टस्य देवदत्तस्य

ऋजुप्रकाशिका

तिरस्कारोऽवमान इत्यवसादावमानयोर्भेदः। एवं चावभास इत्यनेन निष्कृष्टमर्थमाह—*एतावतेति* ॥ अवभासपदस्य रूढमर्थमादाय विस्तृतं लक्षणमाह—*तस्येति* ॥ संक्षेपोक्ताध्यासलक्षणलक्षितस्येदं विस्तृतं लक्षणमित्यर्थः। 'पूर्वदृष्टावभासः' इत्यत्राभिमतां व्युत्पत्तिं दर्शयति—*पूर्वदृष्टस्येति* ॥ मिथ्याप्रत्ययोऽध्यासो वाच्यः, तस्याधिष्ठानारोपणीयोभयसापेक्षत्वात् तदुभयमध्येऽधिष्ठानं परत्रपदेन लब्धमिति पूर्वदृष्टपदेनाऽऽरोपणीयमुपस्थापयति भाष्यकृदित्याह—*मिथ्याप्रत्ययश्चेत्यादिना* ॥ *अधिष्ठानम्=आरोपविषयशब्दार्थः। उपस्थापयतीत्यनन्तरं भाष्यकृदिति शेषः। *तस्येति* ॥ आरोपणीयस्येत्यर्थः। पूर्वपदस्य प्रयोजनमाह—*तथापीति* ॥ दृष्टत्वमात्रोपयोगेऽपीत्यर्थः। 'स्वरूपेण सदपी'त्यपिशब्देन स्वरूपेणासत्त्वमपि मरुमरीच्युदकग्रन्थे वक्ष्याम इति सूचितम्। मिथ्याप्रत्ययस्यारोपणीयसापेक्षत्वे सति, अधिष्ठानं सत्यमाहेत्याह—*आरोपविषयमिति* ॥ अधिष्ठानमित्यर्थः। मिथ्याप्रत्ययस्य सत्यासत्योभयसापेक्षत्वं लब्धमाह—*तदनेनेति* ॥ यस्मात् कारणात् पूर्वदृष्टपदेनानृतमुपस्थापितम्, परत्रेत्यनेन च सत्यमधिष्ठानमुपस्थापितम्, *तत्=तस्मात् कारणात्, *अनेन=परत्र पूर्वदृष्टावभास इत्यनेन, सत्यानृतमिथुनीकरणमुक्तमित्यर्थः। स्मृतिरूपपदविनाकृतं परत्र पूर्वदृष्टावभास इत्येतद् न लक्षणम्; अतिव्याप्तेरिति चोदयति—*स्यादेतदिति* ॥ कस्याश्चन गोव्यक्तेः स्वस्तिमतीति संज्ञा, कस्याश्चिद् गोव्यक्तेः कालाक्षीति। एवं च 'इयं गौः' इति स्वस्तिमत्यां यत् पूर्वदृष्टं गोत्वं तत् परत्र कालाक्ष्यां गव्यवभासते—इयं गौरिति, सोऽवभासः समीचीनः; तदवभासस्य परत्र पूर्वदृष्टावभासत्वादतिव्याप्तिरित्यर्थः। स्थलान्तरेऽप्यतिव्याप्तिमाह—*अस्ति च पाटलीपुत्र इति*॥ कस्यचिद् ग्रामविशेषस्य पाटलीपुत्र इति संज्ञा। कस्याश्चिन्नगर्या माहिष्मतीति। एवं च पाटलीपुत्रे पूर्वत्र दृष्टो देवदत्तो माहिष्मत्यामवभासते—'स एवायं देवदत्तः' इति, सोऽवभासः समीचीनः; तदवभासस्यापि परत्र पूर्वदृष्टावभासत्वादतिव्याप्तिरित्यर्थः। *ननु* अवमतो भासोऽवभास इति व्युत्पत्त्या मिथ्याज्ञानस्यैवावभासत्वादवभासपदेनैव

वार्तिकम्

इत्यप्यनिर्वचनीलौहित्यादिपदार्थो लोके व्यपदिश्यते—'लौहित्यमुखाद्यवभासः' इत्यपि लौहित्यावभासो मुखावभासः'इति। तेन पूर्वदृष्टसजातीयं रजतादि पूर्वदृष्टावभासपदेनोच्यते। तस्य विशेषणम्—"स्मृतिरूपः"इति। स्मृतिरिति संस्कारजन्यत्वसादृश्यादनिर्वचनीयरजताद्याकाराविद्यावृत्तिरुपात्तेति ब्रूमः, तत्र तत्र वृद्धैः सुरेश्वरादिभिर्गुणयोगेन भ्रान्तौ स्मृतिशब्दस्य प्रयुक्तत्वात्, पुराणेऽपि—"किमप्यपस्मृतिरि"ति तत्रापस्मृतिशब्दस्य प्रयोगदर्शनात्, स्वयमेव भाष्यकारोऽत्रैवाग्रे विज्ञानवादनिराकरणे

भामती

परत्र माहिष्मत्यामवभासः समीचीनः। अवभासपदं च समीचीनेऽपि प्रत्यये प्रसिद्धम्; यथा नीलस्यावभासः पीतस्यावभास इति, अत आह—*स्मृतिरूप इति* ॥ स्मृते रूपमिव रूपमस्येति स्मृतिरूपः। असंनिहितविषयत्वं च स्मृतिरूपत्वम्। संनिहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः। नाप्यव्याप्तिः; स्वप्नज्ञानस्यापि स्मृतिविभ्रमरूपस्यैवंरूपत्वात्। तत्रापि हि स्मर्यमाणे

ऋजुप्रकाशिका

निरुक्तस्थलद्वयातिव्याप्तिनिरासात् कथमवभासपदसहितलक्षणस्यातिव्याप्तिरुक्ता? इत्यत आह—*अवभासपदं चेति* ॥ संक्षिप्तलक्षणेऽवभासपदस्य व्युत्पत्त्या मिथ्याज्ञानपरत्वेऽपि विस्तृतलक्षणे रूढ्यर्थपरिग्रहेणैवावभासपदोपादानादवभासपदस्य समीचीनप्रत्ययेऽपि रूढत्वादवभासपदेन न तन्निरास इत्यतिव्याप्तिरेवेत्यर्थः। समीचीनप्रत्ययेऽवभासपदस्य रूढिमेवोदाहरणनिष्ठां कृत्वा दर्शयति—*यथा नीलस्येत्यादिना* ॥ स्मृतिरूपपदेनोक्तस्थलद्वयातिव्याप्तिनिरासाद् नोक्तदोष इत्याह—*अत आहेति* ॥ स्मृतिरूप इत्यत्र व्युत्पत्त्यन्तरभ्रमं वारयन्नाह—*स्मृते रूपमिवेति* ॥ *ननु* स्मृते रूपमिव रूपमस्येति स्मृतिरूप इत्यनेन स्मृतिसादृश्यं दर्शितम्, तच्च प्रत्ययत्वेन वा संस्कारजत्वेन वोक्तस्थलद्वयेऽस्तीति स्मृतिरूपपदेन कथमतिव्याप्तिनिरासः? इत्यत आह—*असन्निहितेति* ॥ एवं च ईदृशस्मृतिरूपत्वस्य पूर्वोक्तस्थलद्वयेऽभावाद् नातिव्याप्तिरित्याह—*सन्निहितविषयं चेति* ॥ प्रत्यभिज्ञानपदमितरप्रत्ययस्याप्युपलक्षणम्। *समीचीनमिति* स्वरूपकथनम्। एवं चासन्निहितत्वे सति परत्र पूर्वदृष्टावभासत्वमध्यासलक्षणं स्थितम्। अत्र यथार्थस्मृतावतिव्याप्तिवारणाय परत्रेति पदम्। *ननु*—पूर्वलक्षणस्यायथार्थे स्मृतिविभ्रमरूपे स्वप्नेऽव्याप्तिः, स्वप्नस्य परत्र पूर्वदृष्टावभासत्वेऽप्यसन्निहितविषयकत्वाभावात्, इत्यत आह—*नाप्यव्याप्तिरिति* ॥ *एवंरूपत्वादिति* ॥ असन्निहितविषयकत्वे सति परत्र पूर्वदृष्टावभासत्वादित्यर्थः। *ननु* स्वप्ने पित्रादेः पुरतोऽनुभूयमानत्वेन तस्य सन्निहितविषयकत्वेन तत्राव्याप्तिपरिहारः कथम्? इत्यत आह—*तत्रापि स्मर्यमाण इति* ॥ अनुभूयमाने पित्रादौ यत्सन्निहितत्वं पूर्वदृष्टं तदिह स्वप्नेऽपि स्मर्यमाणे पित्रादावारोप्यत इति, असन्निहितविषयकत्वमेव स्वप्नस्येत्यर्थः। नच—पुरतोऽनुभूयते स्वप्ने पित्रादिरिति—वाच्यम्; अनुभूयमानत्वस्यापि पूर्वदृष्टस्य तत्राऽऽरोपादिति भावः। *ननु*—निरुक्तलक्षणे स्मृतिरूपपदं व्यर्थम्, नच—उक्तप्रत्यभिज्ञादौ समीचीनावभासरूपेऽतिव्याप्तिनिरासाय स्मृतिरूपपदमित्युक्तमिति—वाच्यम्; "पूर्वदृष्टमनृतमारोपणीयम्" इत्युक्ततयोक्तप्रत्यभिज्ञानविषयस्याऽऽरोपणीयस्याभावेन पूर्वदृष्टपदेनैव तद्वारणादिति—चेत्, *न*; स्मृतिरूपपदाभिधीयमानासन्निधानसिद्धवत्कारेणानृतमारोपणीयमित्यभिधानम्, नतु पूर्वदृष्टपदसामर्थ्येनेत्यदोषात्। *ननु*—इदं लक्षणं शुक्तिकादौ रजतादिभ्रमेऽध्यासरूपेऽव्याप्तम्, रजतादिभ्रमस्य शुक्तिकादौ विद्यमानापारमार्थिकरजतविषयकत्वेनासन्निहितविषयकत्वाभावादिति—चेत्, *न*; आरोप्यस्य पुरोवर्तिनि परमार्थतोऽसत्त्वस्यैवासन्निहित-

वार्तिकम्

जाग्रत्स्वप्नप्रत्ययोर्वैलक्षण्यप्रदर्शनाय स्वप्नभ्रान्तौ स्मृतिशब्दं प्रयोक्ष्यति—"अपिच स्मृतिरेव" इति। तेन स्मृत्याऽविद्यावृत्त्या रूप्यते निरूप्यते विषयीक्रियत इति यावत्, य एवं स स्मृतिरूप इत्यर्थः। अवभास इत्येतावत्युक्ते शून्यमेव निरधिष्ठानं रजतादिरूपेण भासत इति शून्यवादी मन्यते, तत्र मा भूदतिव्याप्तिरिति परत्रेत्युक्तम्, सत्य इत्यर्थः; मिथ्यावस्त्वपेक्षया सत्यस्य परत्वात् निरधिष्ठानभ्रमादर्शनात् सत्त्वेनापरोक्षतया च प्रथानुपपत्तेश्च सत्याधिष्ठानं वाच्यमित्यभिप्रायः। 'परत्रावभासः' इत्युक्तेऽन्तरेव ज्ञाने बहिष्ट्वारोप इति मन्यते, तत्र मा भूदतिव्याप्तिरिति पूर्वदृष्टेत्युक्तम्। बहिष्ट्वस्य तुच्छत्वाभ्युपगमाद्

भामती

पित्रादौ निद्रोपप्लववशादसंनिधानापरामर्शे, तत्र तत्र पूर्वदृष्टस्यैव संनिहितदेशकालत्वस्य समारोपः। एवं पीतः शङ्खस्तिक्तो गुड इत्यत्राप्येतल्लक्षणं योजनीयम्। तथाहि—बहिर्विनिर्गच्छदत्यच्छनयनरश्मिसंपृक्तपित्तद्रव्यवर्तिनीं पीततां पित्तरहितामनुभवन्, शङ्खं च दोषाच्छादितशुक्लिमानमनुभवन्, पीततायाश्च शङ्खासंबन्धमननुभवन्, असंबन्धाग्रहणसारूप्येण 'पीतं तपनीयपिण्डम्' पीतं बिल्वफलमि'त्यादौ पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशङ्खयोरारोप्याह—पीतः शङ्ख इति। *एतेन*—तिक्तो गुड इति प्रत्ययो—*व्याख्यातः*। एवं विज्ञातृपुरुषाभिमुखेष्वादर्शोदकादिषु स्वच्छेषु चाक्षुषं तेजो लग्नमपि बलीयसा सौरेण तेजसा प्रतिस्रोतः प्रवर्तितं मुखसंयुक्तं मुखं ग्राहयद् दोषवशात्तद्देशतामनभिमुखतां च तस्याग्राहयत् पूर्वदृष्टाभिमुखादर्शोदकदेशतामाभिमुख्यं च मुखस्यारोपयतीति प्रतिबिम्बविभ्रमोऽपि लक्षितो भवति। *एतेन*—द्विचन्द्र-दिङ्मोहालातचक्र-गन्धर्वनगर-वंशोरगादि-विभ्रमेष्वपि यथासंभवं लक्षणम्—

ऋजुप्रकाशिका

पदेन विवक्षितत्वेनादोषात्। *एतेन—सत्ख्यात्यसत्ख्याती अपि—निरस्ते*; समारोप्यस्य पुरोवर्तिनि शुक्त्यादौ परमार्थतोऽसत्त्वेन सद्विषयकज्ञानस्यैव सत्ख्यातित्वात्, असतो नरशृङ्गकल्पस्यापरोक्षतयाऽवभासमानत्वायोगात्, रजतस्य च शुक्त्यादावपरोक्षतया भानात्। यद्यपि—लक्षणे पूर्वदृष्टपदं व्यर्थम्; असन्निहिततया परत्रावभासमानस्य पूर्वदृष्टताया अर्थसिद्धत्वादिति मतम्; तथापि पूर्वदृष्टग्रहणं परत्र प्रतिभासमानस्यासन्निहितस्य पूर्वप्रमितत्ववारणायेति बोध्यम्। "पीतः शङ्खः" इत्यादिषु गृह्यमाणारोपेषु पूर्वदृष्टत्वघटितलक्षणाभावमाशङ्क्य तत्रापीदं लक्षणं योजनीयमित्याह—*एवं पीतः शङ्ख इत्यादिना*॥ *असम्बन्धाग्रहणसारूप्येणेति*॥ पीतत्व-तपनीययोः संसर्गग्रहेऽप्यसंसर्गो न गृह्यते, एवं पीतत्व-शङ्खयोर्विद्यमानोऽप्यसंसर्गो न गृह्यत इत्यसंबन्धाग्रहणसारूप्यमित्यर्थः। *पूर्वदृष्टमिति*॥ पीतत्व-तपनीयपिण्डयोः सामानाधिकरण्यं पूर्वदृष्टम्, एवं पूर्वदृष्टं सामानाधिकरण्यं शङ्ख-पीतत्वयोरारोप्य "पीतः शङ्खः" इति भ्रमो जायत इत्यत्रापि पूर्वदृष्टत्वघटितं लक्षणमस्तीति योजनीयमित्यर्थः। एवं "पीतः शङ्खः" इति प्रत्यये उक्तलक्षणवत्तया व्याख्याते, एतत्समानोऽन्योऽपि प्रत्ययो लक्षणवत्तया व्याख्यात इत्याह—*एतेनेति*॥ आदर्शोदकादिषु समारोप्यस्य ग्रीवास्थस्य स्वमुखस्य स्वचक्षुषा पूर्वं दृष्टत्वाभावात् तत्प्रतिबिम्बादिभ्रमे उक्तलक्षणस्याव्याप्तिरित्याशङ्क्याह—*एवमिति*॥ *चाक्षुषं तेजः*=चक्षुःसंबन्धि तेजः, चक्षुरवयवात्मकं तेज इति यावत्। *मुखसंयुक्तम्*=स्वमुखसंयुक्तं सत् स्वमुखं ग्राहयदित्यर्थः। *तस्य=मुखस्य*। पूर्वदृष्टयोरभिमुखादर्शोदकयोर्देश एव देशो यस्य तत्, तथोक्तम्, तस्य भावः, तत्ता, तां तयोराभिमुख्यं चेत्यर्थः। *लक्षितो भवतीति*॥ उक्तलक्षणयुक्तो भवतीत्यर्थः। पुनरपि भ्रमान्तराणि प्रदर्श्य तेष्वप्युक्तं लक्षणं योजनीयमित्याह—*एतेनेति*॥ द्वन्द्वेषु पूर्वदृष्टस्य द्वित्वस्य चन्द्रे आरोपः; दिग्भ्रमो दिङ्मोहशब्दार्थः; प्राच्यादिषु पूर्वदृष्टस्य प्राच्यत्वादेः प्रतीच्यादिष्वारोपः; शीघ्रभ्रमितालातज्वालासु पूर्वदृष्टचक्राकारताया आरोपः; आकाशे पूर्वदृष्टस्य नगरस्यारोपः; नगरे च गान्धर्वत्वस्यारोपः; मण्डूकवसाक्तलोचनग्राह्यवंशेषु पूर्वदृष्टोरगत्वादेरारोपः; एवमुक्त-

भाष्यभावप्रकाशिका

पुरोऽवस्थितत्वेन भावात्। ज्ञानपक्षे स्मरणं स्मृतिः; भावे क्तिन्विधानात्। स्मृते रूपमिव रूपमस्येति स्मृतिरूपः, न पुनः स्मृतिरेव; अनुभूतस्य तथाऽनवभासकत्वात्। स्मृतिरूपता त्वसन्निहितविषयत्वात्, दोषादित्रयोत्थत्वात्, तादृग्धीविषयत्वाद्वा। अदृष्टरजतस्य रजतभ्रमादृष्टेः,

भामती

योजनीयम् । *एतदुक्तं भवति*—न प्रकाशमानतामात्रं सत्त्वम्, येन देहेन्द्रियादेः प्रकाशमानतया सद्भावो भवेत्। नहि सर्पादिभावेन रज्ज्वादयो वा स्फटिकादयो वा रक्तादिगुणयोगिनो न भासन्ते, भासमाना वा भवन्ति तदात्मानस्तद्धर्माणो वा। तथा सति मरुषु मरीचिनिचयमुच्चावचम्—'उच्चलत्तुङ्गतरङ्गभङ्गमालेयमभ्यर्णमवतीर्णा मन्दाकिनी' इत्यभिसंधाय, अप्रवृत्तस्तत्तोयमापीयापि पिपासामुपशमयेत् ? तस्मादकामेनाऽऽप्यारोपितस्य प्रकाशमानस्यापि न वस्तुसत्त्वमभ्युपगमनीयम्। नच—मरीचिरूपेण सलिलमवस्तुसत्, स्वरूपेण तु परमार्थसदेव, देहेन्द्रियादयस्तु स्वरूपेणाप्यसन्त इत्यनुभवागोचरत्वात् कथमारोप्यन्त इति—सांप्रतम्; यतो यद्यसन्तः, नानुभवगोचराः। कथं तर्हि मरीच्यादीनामसतां तोयतयाऽनुभवगोचरत्वम् ? नच स्वरूपसत्त्वेन तोयात्मनाऽपि सन्तो भवन्ति। *यद्युच्येत* नाभावो नाम भावादन्यः कश्चिदस्ति, अपितु भाव एव भावान्तरात्मनाऽभावः, स्वरूपेण तु भावः, *यथाहुः*—

ऋजुप्रकाशिका

भ्रमेषु पूर्वदृष्टत्वघटितमुक्तं लक्षणम् *एतेन=पूर्वोक्तप्रकारेण, अस्तीति योजनीयमित्यर्थः। यत्तूक्तम्—"आह कोऽयमध्यासो नामे"त्यध्यासांक्षेपस्थले प्रकाशमानत्वमेव सत्त्वमिति, तद्विघटयति—*एतदुक्तं भवतीत्यादिना* ॥ *सद्भावो भवेत्=सत्त्वं भवेदित्यर्थः। प्रकाशमानतामात्रेण सत्त्वं नेत्येतद्व्यतिरेकमुखेणाह—*नहीति* ॥ रज्ज्वादयः सर्पादिभावेन, स्फटिकादयश्चारुण्यादियोगिनो भासन्त एवेत्येवं योजना ; "द्वौ नञौ प्रकृतमर्थं गमयतः" इति न्यायादिति भावः। *भासमाना वा इति* ॥ सर्पादिरूपेण भासमाना रज्ज्वादयो वस्तुतः सर्पात्मका न भवन्ति=वस्तुतः सर्पधर्मवन्तोऽपि न भवन्तीत्यर्थः। तथाच भासमानतामात्रेण न वस्तुसत्त्वमिति भावः। भासमानतामात्रेण यदि वस्तुसत्त्वम्, तर्हि सर्वत्र यद्यत् यद्यदात्मना भासते, तस्य तस्य तत्तदात्मकतायाः परमार्थतः सत्त्वं वाच्यम्; अस्त्विति चेत्, तथात्वे बाधकमाह—*तथा सतीति* ॥ *मरुषु=मरुभूमिषु, *मरीचिनिचयम्=सूर्यकिरणसमूहम्, *उच्चावचम्=वाचामगोचरम्, अत्यधिकमित्यर्थः ; तं *मन्दाकिनीत्यभिसन्धायेति सम्बन्धः। मन्दाकिनीं विशिनष्टि—*उच्चलदिति* ॥ उच्चलतां तुङ्गतरङ्गाणां *भङ्गाः=छेदाः, तेषां *माला=परम्परा यस्याः सा तथोक्ता। *अभ्यर्णमवतीर्णा=समीपमागता। *पिपासामुपशमयेदिति* ॥ सत्यतोयस्य पिपासोपशमकत्वाद् मरीचिनिचयस्य मन्दाकिनीतोयात्मकतायास्त्वया सत्त्वादिना सत्यत्वाङ्गीकारादिति भावः। उपसंहरति—*तस्मादिति* ॥ देहेन्द्रियादीनां मरीचिसलिलापेक्षया वैषम्यमाशङ्क्य निराकरोति—*नच मरीचिरूपेणेति* ॥ *स्वरूपेण=सलिलस्वरूपेण। वैषम्यमेव स्फोरयति—*देहेन्द्रियादयस्त्विति* ॥ *इतीति* हेतौ। यतः स्वरूपेणाप्यसन्तः, अत इत्यर्थः। नचेत्येतत् 'साम्प्रतम्' इत्यनेन सम्बध्यते। शङ्कामपनयति—*यत इति* ॥ यतो ब्रवीषि, अतस्त्वदुक्तं न साम्प्रतमित्यर्थः। सद्विलक्षणस्यानिर्वचनीयस्याऽसतोऽनुभवगोचरत्वसंभवादिति भावः। असतोऽनुभवगोचरत्वसंभवमेवाह—*कथं तर्हीति* ॥ असतोऽनुभवगोचरत्वानङ्गीकारे तोयाद्यात्मतयाऽसतां मरीच्यादीनां तोयाद्यात्मतयाऽनुभवगोचरत्वं कथम् ? अनुभवगोचरत्वं न स्यात्, विद्यते चानुभवगोचरत्वमित्यर्थः। *ननु* मरीच्यादीनां स्वरूपेण सत्त्वात् कथमसत्त्वमिति शङ्कायामाह—*नचेति* ॥ एतद् भवन्तीत्यनेन सम्बध्यते। तथाच मरीच्यादीनां तोयाद्यात्मतयाऽसतामनिर्वचनीयानां तदात्मतयाऽनुभवोऽस्तीति दृढमित्यर्थः। *ननु* मरीच्यादेस्तोयाद्यात्मनाऽसत्त्वं नाम तोयात्मनाऽभावः ; तथाच भाव एव भावान्तरात्मनाऽभावः, स्वरूपेण तु भाव इत्युभयविधस्यापि तस्य भावत्वेन भावव्यतिरेकेणाभावान्तरस्याभावेन सद्रूपत्वादनुभवगोचरत्वं युक्तम्, देहादिप्रपञ्चस्य त्वसत्त्वात् कथमनुभवगोचरत्वम् ? कथं वा तस्य चिदात्मन्यारोपः ? इति पुनः सत्ख्यातिवादी शङ्कते—*यद्युच्येते-

भामती

"भावान्तरमभावो हि कयाचित्तु व्यपेक्षया॥" इति, ततश्च भावात्मनोपाख्येयतयाऽस्य युज्येतानुभवगोचरतां। प्रपञ्चस्य पुनरत्यन्तासतो निरस्तसमस्तसामर्थस्य निस्तत्त्वस्य कुतोऽनुभवविषयभावः? कुतो वा चिदात्मन्यारोपः? नच—विषयस्य समस्तसामर्थ्यस्य विरहेऽपि ज्ञानमेव तत्तादृशं स्वप्रत्ययसामर्थ्यासादितादृष्टान्तसिद्धस्वभावभेदमुपजातमसतः प्रकाशनम्; तस्मादसत्प्रकाशनशक्तिरेवास्याविद्येति—सांप्रतम्; यतो येयमसत्प्रकाशनशक्तिर्विज्ञानस्य, किं पुनरस्याः शक्यम्? असदिति चेत्, किमेतत् तत्कार्यम्? आहोस्विदस्या ज्ञाप्यम्? न तावत् कार्यम्; असतस्तत्त्वानुपपत्तेः, नापि ज्ञाप्यम्; ज्ञानान्तरानुपलब्धेः, अनवस्थापाताच्च।

ऋजुप्रकाशिका

त्यादिना* ॥ *अस्य=भावस्य। *प्रपञ्चस्य=देहादिप्रपञ्चस्य। अनिर्वचनीयस्यैव तस्यानुभवागोचरत्वाय प्रद्वेषी सन् अत्यन्तासत्त्वमाह—*अत्यन्तासत इति* ॥ *निरस्तेति* ॥ अर्थक्रियाकारित्व-सत्तासम्बन्धशून्यस्येत्यर्थः। *ननु*—देहादेरसतो विषयस्य समस्तसामर्थ्याभावेन स्वयं ज्ञानविषयभावे सामर्थ्याभावेऽपि ज्ञानं स्वप्रत्ययसामर्थ्यादसद्विषयकभानरूपं भविष्यतीति शून्यमतं स एव सत्ख्यातिवाद्याशङ्क्य निराकरोति—*नचेति* ॥ *स्वप्रत्ययः=स्वसमानाकारप्रत्ययः, *अदृष्टान्तसिद्धस्वभावभेदमसतः प्रकाशनमुपजातमित्यन्वयः*। नच—तन्मते ज्ञानस्यापि स्वरूपतोऽसत्त्वात् कथं ज्ञानेनासतः प्रकाशसंभव इति—वाच्यम्; ज्ञानस्यापि पूर्वज्ञानाधीनं सत्त्वं न स्वत इत्यसत्त्वाव्याघातात्। *ननु* तन्मतेऽविद्यैवासत्प्रकाशनम्; तथाच ज्ञानमसत्प्रकाशनं भवेदित्यत आह—*तस्मादिति ॥ *अस्य=ज्ञानस्य। तथाच तन्मतेऽसत्प्रकाशनशक्तिरेवाऽविद्याऽसत्प्रकाशनमिति भावः। *नचेत्येतत् 'साम्प्रतम्' इत्यनेन सम्बध्यते। शून्यमतनिरसनमाह—*यत इति* ॥ *यतः=कारणात्। *विज्ञानस्य येयमसत्प्रकाशनशक्तिरिति* ॥ यतो न संभवति; अतस्तन्मतं पूर्वोक्तं न सांप्रतमित्यध्याहारेण योजनीयम्। सा शक्तिः कुतो न संभवतीत्याशङ्क्य शक्याभावान्न संभवतीत्याह—*किं पुनरिति* ॥ अस्याः शक्तेः किं पुनः शक्यम्? न किञ्चिदपीत्यर्थः। शक्तेः शक्यं शङ्कते—*असदिति* ॥ तद् दूषयितुं विकल्पयति—*किमिति* ॥ *एतत्=असत्। शक्तिः=तच्छब्दार्थः। *अस्याः=शक्तेः। आद्यं दूषयति—*न तावदिति* ॥ *तत्त्वानुपपत्तेः=कार्यत्वानुपपत्तेः। द्वितीयं दूषयति—*नापीति* ॥ किं शक्त्याश्रयज्ञानादतिरिक्तज्ञानेन ज्ञाप्यम्? तेनैव वा? आद्यं दूषयति—

भाष्यभावप्रकाशिका

तत्संस्काराभावाच्च संस्कारद्वारा स्मृतिरूपतोपयोगि पूर्वदृष्टत्वम्। स्मृतिरूपशब्देन दोष-संप्रयोग-संस्कारलक्षणकारणत्रितयजन्यत्वमुच्यत इत्याचार्याः। अवभासनमवभासः। तदेवं स्मृतिरूपः परत्र परावभास इत्येव लक्षणम्, अन्यदुक्तरीत्या तच्छेषमिति स्थितम्। परात्मनावभास इत्युक्ते घटात्परस्य पटस्य स्वात्मनाऽवभासोऽप्यध्यासः स्यात्; तद्व्यावृत्तये स्मृतिरूप इति विशेषणम्। कारणत्रितयजन्यज्ञानविषयत्वलक्षणं स्मृतिरूपत्वम्। अधिष्ठानांशस्याप्यधिष्ठानाध्यस्यमानविषयस्य ज्ञानस्याङ्गत्वाङ्गीकाराय तद् विशिनष्टि—*परत्रेत्यादिना* ॥ ज्ञानाध्यासपक्षेऽपि स्मृतिरूपत्वमधिष्ठानज्ञानस्याप्यस्ति; अधिष्ठानाध्यस्यमानविषयज्ञानस्यैकत्वाङ्गीकारात्, अत उक्तम्—*परत्रेत्यादि* ॥ अथवा—परत्र परात्मनावभास इत्येतावदेव लक्षणम्। *ननु* एवं सति शुक्लः पट इत्यादिप्रत्ययानामध्यासात्मकता स्यात्? *मैवम्*; परत्रेतिशब्देनारोप्यमाणात्यन्ताभावाधिकरणस्य निर्देशाच्छौक्ल्य-पटयोश्च संसर्गशून्यताभावात्, स्मृतिरूपग्रहणं तु परत्र परात्मनावभासोपपादनाय, कारणविशेषजन्यत्वादित्थंभावस्संभवतीति। नच स्मृतिरूपत्वं लक्षणान्तर्गतम्; तेन कारणत्रितयजन्यत्वविवक्षायामधिष्ठानज्ञानस्य संप्रयोगमात्र-

भामती

विज्ञानस्वरूपमेवासतः प्रकाश इति चेत्, कः पुनरेष सदसतोः संबन्धः ? असदधीननिरूपणत्वं सतो ज्ञानस्यासता संबन्ध इति चेत्, अहो बतायमतिनिर्वृतः प्रत्ययतपस्वी !!! यदस्यासत्यपि निरूपणमायतते, नच प्रत्ययस्तत्राधत्ते किंचित्; असत आधारत्वायोगात्। असदन्तरेण प्रत्ययो न प्रथत इति प्रत्ययस्यैवैष स्वभावः, न त्वसदधीनमस्य किंचिदिति चेत्, अहो बतास्यासत्पक्षपातः !!! यदयमतदुत्पत्तिरतदात्मा च तदविनाभावनियतः प्रत्यय इति। तस्मादत्यन्तासन्तः शरीरेन्द्रियादयो निस्तत्त्वा नानुभवविषया भवितुमर्हन्तीति, *अत्र ब्रूमः*—निस्तत्त्वं चेत् नानुभवगोचरः, तत् किमिदानीं मरीचयोऽपि तोयात्मना सतत्त्वाः ? यदनुभवगोचराः स्युः, न सतत्त्वाः ; तदात्मना मरीचीनामसत्त्वात्। द्विविधं च वस्तूनां तत्त्वम्—सत्त्वमसत्त्वं च। तत्र पूर्वं स्वतः, परं तु परतः। यथाहुः—'स्वरूप-पररूपाभ्यां नित्यं सदसदात्मके। वस्तुनी, ज्ञायते किंचिद्रूपं कैश्चित्कदाचन॥' इति। तत् किं मरीचिषु तोयनिर्भास-

ऋजुप्रकाशिका

ज्ञानान्तरेति॥ ज्ञानान्तरानुपलब्धिलक्षणमेकं दूषणमभिधाय दूषणान्तरमाह—*अनवस्थेति*॥ ज्ञानान्तरोपलब्धावपि तस्यापि ज्ञाप्यतया तज्ज्ञापकज्ञानान्तरापेक्षायां तत्र तत्राप्येवमित्यनवस्थापात इत्यर्थः। द्वितीयं शङ्कते—*विज्ञानेति*॥ विज्ञानस्य प्रत्ययरूपस्यासत्प्रकाशनत्वेऽसत्प्रत्यययोः सम्बन्धो वक्तव्यः ; स क इत्याक्षिपति—*कः पुनरिति*॥ प्रत्ययः सच्छब्दार्थः। *कः सम्बन्धः ? = न कश्चिदपीत्यर्थः। यदि सम्बन्धः, तदा वक्तव्यम्—किमसदधीननिरूपणत्वं सतो ज्ञानस्यासता संबन्धः ? अविनाभावो वा ? तत्राद्यं शङ्कते—*असदधीनेति*॥ उपहासेन दूषयति—*बतेति*॥ *यदस्येति*॥ *अस्य=प्रत्ययस्येत्यर्थः। अस्त्वित्यत आह—*असत इति*॥ सति हि कस्मिंश्चित् कस्यचिदुपकारो भवति, प्रत्ययस्य निरूपणं त्वसत्यप्यायतते, नोपकारिण्यसति प्रत्युपकारं कश्चित् करोति। अतोऽतितपस्वी प्रत्यय इत्युपहासः। सदसतोरविनाभावसम्बन्धं शङ्कते—*असदन्तरेणेति*॥ अमुमपि पक्षमुपहासेनैव दूषयति—*अहो बतेति*॥ *अयम्=प्रत्ययः, *अतदुत्पत्तिः=तस्मादसतः सकाशाद् उत्पत्तिर्यस्य स, तदुत्पत्तिः, स न भवतीत्यतदुत्पत्तिः। *स=सन्। *अतदात्मा च = असत्तादात्म्यविहीनश्च सन्। *तदविनाभावनियतः=असदविनाभावनियत इति यत् तद् *अहो बत=अत्याश्चर्यमित्युपहासः। उपसंहरति—*तस्मादिति*॥ तथाचेत्थमनुमानं सूचितम्—देहादि, सत्, भासमानत्वात्, आत्मवदिति। एवं पूर्ववादिना सदेव भासत इत्युक्ते सिद्धान्त्याह—*अत्र ब्रूम इति*॥ सदेवानुभवगोचरः, न निस्तत्त्वमनुभवगोचरः, नचेत्तोयात्मना भासमानमरीचयस्तोयात्मना सतत्त्वाः स्युः, इत्याशयेनाह—*निस्तत्त्वं चेदिति*॥ सतत्त्वाः किम् ?=सतत्त्वा न भवन्त्येव। तथापि मरीचयस्तोयात्मना सतत्त्वाः स्युरित्यर्थः। तत्र हेतुमाह—*यदनुभवेति*॥ *यत् = यस्मात् कारणाद् मरीचयस्तोयात्मनाऽनुभवगोचराः स्युः, तस्मात् कारणादित्यर्थः। पूर्ववाद्याह—*न सतत्त्वा इति*॥ मरीचयस्तोयात्मना सतत्त्वा न भवन्त्येवेत्यर्थः। तत्र हेतुमाह—*तदात्मनेति*॥ तोयात्मनेत्यर्थः। तोयात्मना मरीचीनामसत्त्वस्यास्मन्मतेऽपीष्टत्वादित्यर्थः॥ *ननु* मरीचयस्तोयात्मना भासन्ते ? न वा ? नान्त्यः ; अनुभवविरोधात्, आद्ये तोयात्मनाऽसत्त्वेन त्वया स्वीकृतानां मरीचीनां तथा भानाभ्युपगमेऽसत्ख्यात्यापत्तिरिति सिद्धान्तिनः शङ्कायामाह पूर्ववादी—*द्विविधमिति*॥ पूर्वं सत्त्वं स्वतः, वस्तु स्वस्वरूपेण सत्त्वमापन्नमित्यर्थः। *परं त्विति*॥ असत्त्वं त्वित्यर्थः। *परत इति*॥ वस्तु त्वन्यवस्त्वात्मनाऽसत्त्वमापन्नमित्यर्थः। तत्र सम्मतिमाह—*यथाहुरिति*॥ *वस्तुनी स्वरूपपररूपाभ्यां नित्यं सदसदात्मके भवतः ; एवं स्थिते किञ्चिद्रूपं कदाचित् कैश्चिज् ज्ञायते, कदाचिद् न ज्ञायत इत्यर्थः। तथाच भाव-

भामती

प्रत्ययस्तत्त्वगोचरः ? तथाच समीचीनः, इति न भ्रान्तो नापि बाध्येत। अद्धा न बाध्येत, यदि मरीचीनतोयात्मतत्त्वानतोयात्मना गृह्णीयात्, तोयात्मना तु गृह्णन्कथमभ्रान्तः? कथं वाऽबाध्यः ? हन्त !! तोयाभावात्मनां मरीचीनां तोयभावात्मत्वं तावन्न सत्; तेषां तोयाभावादभेदेन तोयभावात्मतानुपपत्तेः, नाप्यसत्; वस्त्वन्तरमेव हि वस्त्वन्तरस्यासत्त्वमास्थीयते—"भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात्" इति वदद्भिः। नचारोपितं रूपं वस्त्वन्तरम्। तद्धि मरीचयो वा भवेत्? गङ्गादिगतं तोयं वा? पूर्वस्मिन्कल्पे 'मरीचयः' इति प्रत्ययः स्यान्न 'तोयमि'ति। उत्तरस्मिंस्तु 'गङ्गायां तोयमि'ति स्यात्, न पुनरि'हे'ति। देशभेदास्मरणे 'तोयमि'ति स्यान्न पुनरि'हे'ति। नच—इदमत्यन्तमसन्निरस्तसमस्तस्वरूपमलीकमेवास्त्विति—सांप्रतम्; तस्यानुभवगोचरत्वानुपपत्तेरित्युक्तमधस्तात्। तस्मान्न सत्; नाप्यसत्, नापि सदसत्; परस्परविरोधात्, इत्यनिर्वाच्यमेवारोपणीयं मरीचिषु तोयमास्थेयम्, तदनेन क्रमेणा-

ऋजुप्रकाशिका

एव भावान्तरात्मनाऽभावः, स्वरूपेण तु भाव इत्युभयविधस्यापि भावत्वात् सत्त्वात् तद्भानेऽपि नासत्ख्यात्यापत्तिरिति भावः। सिद्धान्त्याह—*तत्किमिति* ॥ तत्किं तत्त्वगोचरः? = तत्त्वगोचर एव स्याद् मरीचिषु तोयनिर्भासप्रत्यय इत्यर्थः। मरीचीनां तोयात्मनाऽसत्त्वस्य त्वया मरीचिस्वरूपत्वास्वीकारादिति भावः। किमतः ? अत आह—*तथाचेति* ॥ न भ्रान्तः। ततः किमित्यत आह—*नापि बाध्येतेति* ॥ तथाच भ्रमप्रसिद्धिश्च न स्यादिति भावः। पूर्ववाद्याह—*अद्धेति* ॥ 'बाध्येत' इत्यनन्तरं न भ्रान्तश्चेति शेषः। अतोयात्मना सतत्त्वान् मरीचीन् यदि अतोयात्मना गृह्णीयात् प्रत्ययः, तदा परं न बाध्येत, न भ्रान्तश्च स्यात्, *अद्धा=बाढम्। मरीचीन् तोयात्मना गृह्णन् प्रत्ययः कथमभ्रान्तः = कथं चाबाध्य इत्यर्थः। तोयाभावात्मकेषु मरीचिषु तोयात्मकत्वं भ्रमविषयीकृतं चेत्युक्तं त्वया, तत् तोयात्मकत्वं सद्वा ? असद्वा ? सदसदात्मकं वा ? अनिर्वचनीयं वा ? नाद्य इत्याह—*हन्तेति* ॥ *तेषाम्=मरीचीनाम्। *अभेदेनेति* ॥ तोयानां मरीच्यभावादभेदस्य, मरीचीनां तोयाभावादभेदस्य च त्वया स्वीकृतत्वादिति भावः। द्वितीयं दूषयति—*नाप्यसदिति* ॥ यद्यसत्, तदा वक्तव्यम्—मरीचीनां तोयात्मत्वमसदित्युच्यमानं किं मरीचिस्वरूपमेवेत्युच्यते ? किं वा वस्त्वन्तरमिति ? अथवा—तुच्छमिति ? नाद्य इत्याह—*वस्त्वन्तरमेव हीति* ॥ वस्त्वन्तरस्य मरीच्यादिलक्षणं वस्त्वन्तरमेवेत्यास्थीयते भावान्तरमभाव इति वदद्भिर्भवद्भिः; तथाच मरीच्यादेस्तोयाद्यात्मत्वं मरीच्यादिस्वरूपमेवेति तन्नासदिति भावः। द्वितीयं निरस्यति—*न चारोपितमिति* ॥ मरीचिषु तोयनिर्भासप्रत्यये भ्रमरूपे मरीचयस्तोयं चेति द्वे एव वस्तुनी भासेते, न वस्त्वन्तरम्; अतो वस्त्वन्तराभावात् तद्वस्त्वन्तरं किमिति वीक्षायां मरीचयो वा गङ्गागतं तोयं वा तद्वस्त्वन्तरमिति वाच्यम्, तदुभयं न संभवतीति दूषयति—*पूर्वस्मिन्नित्यादिना* ॥ तुच्छपक्षं तृतीयमनूद्य निरस्यति—*नचेदमित्यादिना* ॥ *तस्य = अलीकस्य, अत्यन्ततुच्छस्यापरोक्षानुभवगोचरत्वानुपपत्तेरुक्तत्वादित्यर्थः। सत्पक्षमसत्पक्षं च निरस्तमुपसंहरन् सदसदात्मकपक्षं तृतीयं निरस्यति—*तस्मादित्यादिना* ॥ स्वाभिमतमनिर्वचनीयपक्षं चतुर्थं परिशेषयति—*इत्यनिर्वचनीयमेवेति* ॥ मरीचिषु तोयमनिर्वचनीयमित्येतच्छुक्तिरज्ज्वादौ रज्जुसर्पादिकमनिर्वचनीयमित्यस्याप्युपलक्षणम्। अनिर्वचनीयतोयादेरपि

भाष्यभावप्रकाशिका

जन्यतया पदान्तरव्यावर्त्त्याभावापातात्। नचाधिष्ठानारोप्यविषयं ज्ञानमेकमेव; एकत्वलक्षणैकत्वस्य वृत्तिभेदेन तत्रासंभवात्। अथ स्मृतिशब्देन संस्कारजन्यत्वमात्रस्यैव विवक्षितत्वात् प्रत्यभिज्ञाया अपि

भामती

ध्यस्तं तोयं परमार्थतोयमिव, अत एव पूर्वदृष्टमिवं, तत्त्वतस्तु न तोयं नच पूर्वदृष्टम्, किंत्वनृतमनिर्वाच्यम्। एवञ्च देहेन्द्रियादिप्रपञ्चोऽप्यनिर्वाच्यः, अपूर्वोऽपि पूर्वमिथ्याप्रत्ययोपदर्शित इव परत्र चिदात्मन्यध्यस्यत इति उपपन्नम्; अध्यासलक्षणयोगात्। देहेन्द्रियादिप्रपञ्चबाधनं चोपपादयिष्यते। चिदात्मा तु श्रुतिस्मृतीतिहासपुराणगोचरस्तन्मूलतदविरुद्धन्यायनिर्णीतशुद्धबुद्धमुक्तस्वभावः सत्त्वेनैव निर्वाच्यः। अबाधिता स्वयंप्रकाशतैवास्य सत्ता, सा च स्वरूपमेव चिदात्मनः, नतु तदतिरिक्तं सत्तासामान्यसमवायोऽर्थक्रियाकारिता वेति सर्वमवदातम्। स चायमेवंलक्षणकोऽध्यासोऽनिर्वचनीयः

ऋजुप्रकाशिका

भानप्रतिपादनात् सदेव प्रकाशत इति नियमोऽपि निरस्तः। *ननु* एवमनिर्वचनीयतोयादेर्मरीच्यादिष्वभिनवोत्पन्नस्य प्रातिभासिकत्वेन प्रतिभासमात्रकालवृत्तितया तत्पूर्वमभावेन पूर्वदृष्टत्वाभावात् पूर्वदृष्टत्वघटितं लक्षणं तत्राव्याप्तमित्यत आह—*तदनेन क्रमेणेति* ॥ *परमार्थमिव = वस्तुतो न परमार्थमिति यावत्। *अत एवेति* ॥ यत एव वस्त्वर्थतो न परमार्थम्, अत एव पूर्वदृष्टमिव = वस्तुतो न पूर्वदृष्टमित्यर्थः। लक्षणे प्रयुक्तं पूर्वदृष्टपदं पूर्वदृष्टसजातीयतामात्रेण बोध्यम्। अत एव पूर्वदृष्टमिति न वस्तुतः पूर्वदृष्टमित्यर्थः। तथाच तोयत्वादिनां साजात्यस्याभिनवोत्पन्नानिर्वचनीयादावपि सत्त्वाद् नाव्याप्तिरित्यभिसन्धिः। मरीचितोयादावनिर्वचनीयत्वे सिद्धे तन्न्यायं देहादावप्यतिदिशति—*एवमिति* ॥ *अपूर्वोऽपि = वस्तुसत्त्वेन न पूर्वदृष्टोऽपि। एवं च देहादि, सत्, भासमानत्वात्, आत्मवदित्यनुमानस्य निरुक्तानिर्वचनीयतोयादौ व्यभिचार इति भावः। *अध्यस्यत इत्युपपन्नमित्यत्र हेतुमाह—*अध्यासलक्षणयोगादिति* ॥ *ननु* देहादिप्रपञ्चस्याध्यस्तत्वे बाध्यत्वं वाच्यम्, तत् कथम्? इत्यत आह—*देहेन्द्रियादीति* ॥ तथाचोपपादयिष्यमाणत्वाद् नात्रोपपादनीयमिति भावः। एवं च देहेन्द्रियाहङ्कारादेरात्मन्यध्यस्तत्वे तद्धर्माणामप्यध्यस्तत्वेन वास्तवत्वाभावाद् निर्धर्मकात्मनो ब्रह्माभिन्नत्वयोग्यताऽस्तीति सूचयन् देहादितो वैलक्षण्यमाह—*चिदात्मेत्यादि* ॥ तस्य सत्ता किं स्वरूपात्मिका? अतिरिक्ता वा? इति विकल्प्याऽऽद्यमङ्गीकरोति—*सा चेति* ॥ द्वितीयं दूषयति—*नत्विति* ॥ तथाच नाद्वैतहानिरिति भावः। *भाष्ये*—"तं केचिदि"त्यादिनाऽध्यासलक्षणे मतान्तरोपन्यासः कृतः, स किं मतिसंवादाय? दूषणाय वा? *नाद्यः*, परीक्षकाणां विप्रतिपत्तिदर्शनेन मतिसंवादायोगात्; *न द्वितीयः, तत्र दूषणानभिधानात्; तथाचायुक्तोऽयं भाष्यग्रन्थ इत्याशङ्क्य मतिसंवादार्थमेव स इत्याह—

भाष्यभावप्रकाशिका

संस्कारजन्याया भ्रमत्वप्रसक्तौ तद्व्यावृत्तये पदान्तरमिति मतम्, तदपि न समञ्जसम्; 'स एवायं शुक्लः पटः' इत्यादि प्रत्यभिज्ञाया अपि भ्रमत्वप्रसङ्गात्। एवं च "अन्यस्यान्यात्मतावभासतां न व्यभिचरति" "अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचामे"ति च परामर्शेऽध्यासे वादिविप्रतिपत्तेरुक्तं तल्लक्षणं कथमित्याशङ्क्याधिष्ठानारोप्यदेशकालविशेषेष्वेव विवादेऽपि परत्र परात्मनावभास इति लक्षणे संवादात्,

प्रदीपः

त्वन्यथाख्यातिवादसाधारणम्, अतोऽधिष्ठानविषमसत्ताकेत्यारोप्यविशेषणम्। "इदं रजतमि"त्यत्र तूलाविद्यापक्ष इदमवच्छिन्नचैतन्यगतव्यावहारिकसत्तान्यूनसत्ताकत्वात् प्रातिभासिकस्य रजतस्य लक्षणसमन्वयः। "सन् घटः" इत्यादावपि अधिष्ठानशुद्धचैतन्यगतपारमार्थिकसत्तान्यूनसत्ताकत्वाद् व्यावहारिकस्य घटादेर्लक्षणसमन्वयः। "अहं ब्रह्मासी"त्यखण्डाकारज्ञाने तु नाधिष्ठानारोप्यभावप्रतीतिरिति नातिव्याप्तिः॥ यानन्यथाख्यात्यख्यात्यनिर्वचनीयख्यातिवादानवलम्ब्याऽ-

पञ्चपादिकाविवरणम्

चेत्, तथाऽप्यविविक्तानेकपदार्थज्ञानाद् भ्रमत्वमपि स्यात्। नच तत्र संसर्गप्रत्ययोऽपि ; ऐक्यस्य तदालम्बनस्याभावात्। गुण-गुण्यादिसम्बन्ध एवालम्बनमिति चेत्, न ; प्रत्यभिज्ञाया ऐक्यालम्बनत्वात्। इहापि साहश्यसम्बन्ध एवेदं रजतमिति संसर्गप्रत्ययालम्बनं स्यात्। अस्ति च सामान्य-विशेषादीनामिदं-रजतयोरिव

ऋजुविवरणम्

तथाऽप्यविविक्तेति ॥ *ननु* संसर्गग्रहरहितत्वे सत्यसंसर्गाग्रहो विवेकः, स इदं-रजतयोरेव, न सामान्य-विशेषयोरित्याशङ्क्य, तथा सति व्यर्थविशेषणत्वम् ; व्यावर्त्याभावादित्याह—*नच तत्रेति* ॥ यद्वा—पूर्वमभ्युपगम्य संसर्गग्रहमसंसर्गाग्रहलक्षणो विवेक उक्तः, इदानीं संसर्गग्रहलक्षणोऽपि विवेको नास्ति ; अतः संसर्गाग्रहलक्षणोऽप्यविवेको नास्तीत्याह—*नच तत्र संसर्गेति*॥ *ननु* प्रत्यभिज्ञायामैक्यालम्बनत्वं प्रतीतिबलादङ्गीकृतम्, तथा प्रतीतिबलाद् गुण-गुण्यादिसंबन्धोऽप्यालम्बनम्, इदं-रजतयोस्तु तदभावान्न संसर्गग्रह इत्याशङ्क्यात्रापि कथंचित्सालम्बनत्वं दर्शयति *इहापि च साहश्येति* ॥ *ननु*—अबाधितप्रत्ययात्संसर्गे निश्चिते संसर्गविशेषनिरूपणा युक्ता, इयन्तु बाधिता प्रतीतिः संसर्गमेव कथं गमयेदित्याशङ्क्य भवन्मते विवेकप्रत्ययो बाधः ; स सामान्य-विशेषयोरविशिष्ट इति तत्रापि संसर्गो न स्यादित्याह—*अस्ति च सामान्य-विशेषेति* ॥ *ननु*—सामान्यविशेषादौ विवेकप्रत्ययसाम्येऽपि संसर्गप्रतीतिदर्शनात् संसर्गप्रत्ययस्य सालम्बनत्वम्, इह तु संसर्गविवेकप्रतीत्योरसहभावाद्विरोधान्न संसर्गप्रत्ययः सालम्बनः,

तत्वदीपनम्

सामान्य-विशेषादौ वैधर्म्यमात्रं तेनोक्तमिति मत्वा लक्षणस्यातिव्याप्तिस्तदवस्थेत्याह—*तथापीऽति* ॥ न वैधर्म्यमात्रम्, किंतु संसर्गज्ञानरहितत्वविशेषिताविविक्तज्ञानं भ्रम इति नातिव्याप्तिरित्याशङ्क्य, विशिष्टलक्षणस्यापि तत्र वृत्तेरतिव्याप्तिरित्याह—*नच तत्रेति* ॥ संसर्गप्रत्ययस्य किमैक्यमालम्बनम् ? उत गुण-गुण्यादिसम्बन्धः ? किं वोभयम् ? नाद्यः ; अत्यन्तभेदवादित्वादित्याह—*ऐक्यस्येति* ॥ द्वितीयमुत्थापयति—*गुणगुणीति* ॥ जाति-व्यक्त्यादिरादिशब्दार्थः। गुण-गुण्यादिसम्बन्धस्य नाऽऽलम्बनत्वनियमः ; व्यभिचारादित्याह—*न प्रत्यभिज्ञाया इति* ॥ तृतीये गुण-गुण्यादिसंबन्धाः किं मिलिता आलम्बनम् ? उत प्रत्येकम् ? नाद्यः ; मेलनस्य क्वचिदप्यभावात्, द्वितीये गुण-गुण्यादिवत् साहश्यसम्बन्धोऽप्यालम्बनं स्यादित्याह—*इहेति* ॥ ततश्च लक्षणासंभव इत्यभिप्रायः। चतुर्थं प्रत्याह—*अस्ति चेति* ॥ अख्यातिमते विवेकज्ञानं बाधकम्, ततश्च बाधकज्ञानविषयीकृतत्वात्यन्ताभावाऽनधिकरणत्वमपि तत्रास्तीत्यतिव्याप्तिरित्यर्थः ॥

वार्तिकम्

विज्ञानातिरिक्तबहिःपदार्थानभ्युपगमाच्च न पूर्वदृष्टजातीयत्वमस्तीत्यभिप्रायः। नच पूर्वपदवैयर्थ्यम् ; तदन्तरेणातिव्याप्त्यपरिहारात्। विज्ञानवादिभिरपि स्वप्रकाशतया दृष्टस्य ज्ञानस्यावभासत्वेन बहिष्ट्वाङ्गीकारात्, पूर्वपदोपादाने च तज्ज्ञानव्यक्तेः पूर्वदृष्टत्वाभावान्नायं दोषः। यद्यपि तैरपि तत्सन्ताने रजतज्ञानोत्पादे पूर्वदृष्टरजतज्ञानान्तरं वासनात्वेनाङ्गीक्रियते ; तथापि न तदाभासत्वेन बहिष्ट्वमङ्गीक्रियते, किन्तु विद्यमानज्ञानाभासत्वेनेति नातिव्याप्तिः ; तन्मतस्यानुभवविरुद्धत्वेनापास्तत्वादित्याशयः। "परत्र पूर्वदृष्टावभासः" इत्युक्ते ज्ञानाध्यासेऽव्याप्तिः स्यात्, तन्मा भूदिति—"स्मृतिरूपः" इति। 'स्मृतिरूपः' इत्युक्ते पुनः शून्यवादिमतेऽतिव्याप्तिरित्यत उक्तम्—*परत्रेति*॥ 'परत्र स्मृतिरूपः' इत्युक्ते तद्भासकसान्निध्यतिव्याप्तिः ; तस्यापि तथा निरूपणात्, अत उक्तम्—*पूर्वदृष्टावभास इति*॥ 'स्मृतिरूपः परत्र पूर्वदृष्टः' इत्युक्तेऽन्यथाख्यातावख्यातौ चातिव्याप्तिः स्यात् ; परत्र पूर्वदृष्टस्य देशान्तरीयस्य भ्रान्त्या निरूप्यमाणस्या-

पञ्चपादिकाविवरणम्

विवेकप्रत्ययः ; 'घटस्य शौक्ल्यमि'ति विवेकाभ्युपगमात् । *किञ्च* ग्रहणमेव स्मर्यमाणात्स्वार्थं किं न विविञ्च्यात् ? विशेषदर्शनाभावादिति चेत्, यदि गृहीतमात्रस्य रजताद् भेदोऽस्ति, तदा भेदापेक्षितो विशेषो धर्म्याकारः प्रतियोग्याकारो वा नान्य इति, गृहीत एव भेदाकारो विविक्तः प्रतीयेत । अथ धर्मि-प्रतियोग्याकारे गृहितेऽपीतरेतरापेक्षया तृतीयमेव ज्ञानं भेदं ग्राहयतीति, तर्हि सर्वपदार्थज्ञानानां भेदग्रहणात्प्रागविवक्तत्वाद् भ्रमत्वप्रसङ्गः । अथ न गृहीतमात्रस्य रजताद् भेदः, तर्ह्यैक्यमेवेति संसर्गज्ञानस्य सालम्बनतासिद्धिः ॥

ऋजुविवरणम्

किन्तु अविवेकमात्रमित्याशङ्क्याविवेकोऽपि न संभवतीत्याह—*किंच ग्रहणमेवेति* ॥ यद्वा—सादृश्यालम्बनत्वेन संसर्गज्ञानस्य सालम्बनत्वं वक्तुं न शक्यते; सादृश्ये विद्यमानेऽपि क्वचित्सामानाधिकरण्यादर्शनात्, अतो मुख्यालम्बनाभावान्न संसर्गग्रहः, तथा विवेकग्रहोऽपि नास्ति; कारणाभावात् ।*ननु* अपुनरुक्तशब्दस्मृत्या विवेकग्रहोऽस्तीत्युक्तम्, मैवम् ; इदं-रजतेतरसर्वपदार्थाग्रहात्तद्व्यावृत्तिप्रतीत्यभावेऽपीतरसर्वशब्दविलक्षणेदं-रजतशब्दस्मरणवदिदं-रजतयोः परस्परभेदाग्रहेऽपि तद्वाचकशब्दस्मरणोपपत्तेः । *ननु*—भेदस्य स्वरूपत्वात्स्वरूपग्रहे भेदो गृहीत एव, *मैवम्* ; स्वरूपस्य भेदत्वेऽपि स्वरूप-भेदग्रहशब्दयोरपुनरुक्तत्वेन स्वरूपस्य भेदाकारेण प्रतीतौ सामग्र्यन्तराङ्गीकारात्, तदभावे भेदरूपेण प्रतीत्यभावेन भेदकार्यकरत्वाभावात्स्वरूपाकारेण वाचकशब्दस्मारकत्वात्, अतो भेदग्रहहेत्वभावान्मुख्यसंसर्गाभावादविवेकमात्रमेवेत्याशङ्क्याह—*किंच ग्रहणमेवेति* ॥ स्मृतेः परोक्षार्थग्राहकत्वेन केवलाया अपि विवेचकत्वसंभव इत्यभिप्रायेणाह—

तत्त्वदीपनम्

ग्रहण-स्मरणाविवेको भ्रम इत्यत्र दोषान्तरं समुच्चिनोति—*किंचेति* ॥ विमतम्, स्मर्यमाणात् स्वार्थं विविञ्च्यात्, ग्रहणत्वात्; संमतवत्, इत्युक्ते विशेषविषयत्वात्तत्र विवेचकत्वम्, नचैतद्विशेषविषयमित्याह—*विशेषेति*॥ विशेषो नाम भेदः?उत शुक्तित्वादिः? आद्येऽपि स किमिदं-रजतयोरस्ति?उत न? इति विकल्प्याऽऽद्यमनुवदति—*यदीति*॥ तत्रापि किं धर्मि-प्रतियोगिज्ञानमेव भेदज्ञानम् ? आहोस्विदन्यत् ? इति विकल्प्याऽऽद्यं दूषयति—*तदेति*॥ धर्मि-प्रतियोगिज्ञानस्य भेदज्ञानत्वाद्धर्मि-प्रतियोगिनोश्च ज्ञातत्वाद् भेदोऽपि प्रथेतेत्यर्थः । द्वितीयमनुवदति—*अथेति* ॥ तृतीयज्ञानस्य भेदज्ञानत्वे तदुदयात्प्राक् सर्वं ज्ञानं भ्रमः स्यादित्याह—*तर्हीति* ॥ भेदाभावमुत्थापयति—*अथ न गृहीतेति* ॥ अस्मिन् पक्षे न भ्रमः सिद्ध्यतीत्याह—*तर्ह्यैक्यमेवेति* ॥ परस्परप्रतिस्पर्द्धिनोरितरनिषेधेऽन्यतरविधिनान्तरीयकत्वाङ्गीकारादैक्यसिद्धिरित्यर्थः । द्वितीये धर्मविशिष्टज्ञानं विवेचकम् । तथाच धर्मज्ञानस्य विवेचकत्वं न स्यात् । स्वरूपभेदमात्रेण विवेचकत्वे सर्वत्रापि तथात्वं स्यादिति द्रष्टव्यम् । ग्रहणपर्यालोचनयाऽविवेकं निरस्य, स्मृति-

वार्तिकम्

न्यथाख्यातिवादिभिरङ्गीकारात्, अख्यातिवादिभिरपि भ्रान्तिरूपव्यवहारेण तन्निरूप्यमाणत्वस्याङ्गीकारात्, अत उक्तम्—*अवभास इति* ॥ तदुभयमतासंभवस्य पूर्वमेवोक्तत्वादित्याशयः । "स्मृतिरूपः परत्रावभासः" इत्युक्ते सौत्रान्तिकमते स्वलक्षणे विकल्पशब्दितसामान्यादावतिव्याप्तिः, अत उक्तम्—*पूर्वदृष्टेति* ॥ तैः सामान्यादेः पूर्वदृष्टस्याभासत्वानङ्गीकरणात् तत्र नातिव्याप्तिः ; सामान्यादेरनाभासत्वात् तद्विषयविकल्पप्रत्ययस्याबाधितत्वेनाभ्रान्तिरूपत्वात्, अग्रे तन्मतस्याविरोधलक्षणे निराकरिष्यमाणत्वादित्याशयः । किं बहुना ?

त्रिंशत्कोटीर्व्युदस्यैकत्रिंशकोटीं स्वलक्षणाम् । जग्राह भगवान् भाष्यकारो वेदस्य सम्मताम् ॥

पञ्चभिः पदैर्व्यावर्त्य त्रिंशत्कोटीर्हित्वा तत्संग्राह्यामेकत्रिंशत्तमां कोटीं वेदतदनुयायिस्मृत्येकसम्मतां स्वकीयाध्यासलक्षणत्वेन भाष्यकारो गृहीतवान् । कथमिति चेत्, तदुच्यते—पञ्चभिः

पञ्चपादिका

उच्यते ;—कोऽयं स्मरणाभिमानो नाम? न तावद् ज्ञानानुविद्धतया ग्रहणम् । न ह्यतिवृत्तस्य

पञ्चपादिकाविवरणम्

किञ्च स्मृतिर्वा गवयादिस्मृतिवद्गृह्यमाणात्स्वार्थे किमिति न विविञ्च्यात्? स्मरणाभिमानप्रमोषादिति चेत्, तत्राह—*कोऽयं स्मरणाभिमान इति* ॥ न तावत् स्मृतिरेव ; तस्याः प्रमोषे ज्ञानस्यैवाभावप्रसङ्गात्, स्मृतेरन्यश्चेत्, कथमन्यस्य प्रमोषे परिपूर्णमुत्पन्नं ज्ञानं स्वकार्यमर्थविवेकं न कुर्यात्? नचान्यः स्मरणाभिमानो दृश्यत इति भावः । *ननु* पूर्वानुभव-तद्देश-कालानामन्यतमेन 'सः' इत्याकारेण वा स्मर्यमाणस्य सम्भेदः स्मरणाभिमान इति, नेत्याह—*न तावज्ज्ञानानुविद्धतया ग्रहणमिति* ॥ 'सोऽयमि'ति प्रत्यभिज्ञाभ्रमे हि सर्वेषामेवैषां 'सः' इत्याकारस्य पूर्वानुभव-देश-कालानां च स्मरामीतिपर्यन्तानां सम्भेदावगमेऽपि गृह्यमाणेनाविवेकदर्शनादिति भावः । नच पूर्वानुभवसम्भेदः स्मर्यमाणे सम्भवतीत्याह—*न ह्यतिवृत्तस्येति* ॥ अर्थस्मृति-

ऋजुविवरणम्

किंच स्मृतिर्वेति ॥ *ननु* स्मृतिस्वरूपतदन्यव्यतिरेकेण धर्मादिकः स्मरणाभिमान इति, नेत्याह—*नचान्य इति* ॥ ज्ञानानुविद्धत्वमात्रमेवाशङ्क्य परिहृतं टीकाकारेण, तदभिप्रायत्वेन देशादीनामपि शङ्कान्तर्भावः कृतः, तस्याऽऽभिप्रायिकमेव परिहारमाह—*सोऽयमिति* ॥ *प्रत्यभिज्ञाभ्रमे इति*॥ कथमतिवृत्तस्य विषयीकृतत्वाभाव इत्याशङ्क्य साधयति—*अर्थस्मृतिसंस्कारस्येति* ॥ मा भूत् पूर्वविज्ञानेन विषयीकृतत्वम् ; स्वप्रकाशत्वेनावभासनात्,

तत्त्वदीपनम्

पर्यालोचनयाऽपि निरस्यति—*किंच स्मृतिर्वेति* ॥ अप्रमुषितस्मरणाभिमानस्य, विवेकत्वादत्र च तद्वैपरीत्यान्नैवमिति शङ्कते—*स्मरणाभिमानेति* ॥

स्मरणाभिमानः किं स्मृतेरनन्यः? उतान्यः? आहो अन्यानन्यः? आद्येऽपि किं स्मरणाभिमानस्य स्मृतावन्तर्भावः? आहो स्मृतेः स्मरणाभिमाने? तत्राद्ये स्मृतौ स्थितायां स्मरणाभिमानस्य कथं प्रमोष इत्यत्राह—*न तावत्स्मृतिरेवेति* ॥ स्मरणाभिमानान्तर्भावे तत्प्रमोषे स्मृतेरपि प्रमोषाद्रजतप्रतिभास एव न स्यादित्याह—*तस्या इति* ॥ द्वितीयमनूद्य दूषयति—*स्मृतेरिति* ॥ स्मरणाभिमानलक्षणसहकारिणः प्रमुष्टत्वात्कथं विवेचकत्वमित्याशङ्क्योत्पत्त्या ज्ञानस्य कार्यजनने नान्यापेक्षेत्याह—*परिपूर्णमिति* ॥ तृतीयस्त्वप्रसिद्धत्वाद् दूरापास्त इत्याह—*नचेति* ॥ *अन्य इति* ॥ उक्तपक्षविलक्षण इत्यर्थः ॥

किंच स्मरणाभिमानशब्देन किं स्मार्यगतो धर्मविशेषः कथ्यते स्मरणेनाभिमन्यत इति व्युत्पत्त्या? उत स्मरणनिष्ठो धर्मः? किं वा 'स्मरामी'ति ज्ञानं स्मरणाभिमानः? इति विकल्प्याऽऽद्यमुत्थापयति—*ननु पूर्वेति* ॥ *ननु* अनुभवानुविद्धत्वं निराक्रियते, न देशादिसंभेदः ; नच—'ज्ञानानुविद्धतया' इत्यत्र ज्ञप्तिर्ज्ञानमिति व्युत्पत्त्याऽनुभवो गृह्यते, ज्ञायतेऽस्मिन्निति व्युत्पत्त्या देशकालयोर्ग्रहणम्, तथाच सर्वस्य निरासंभव इति—वाच्यम् ; तत्र हेत्वनुपन्यासादित्याशङ्क्य तात्पर्यमाह—*सोऽयमिति* ॥ सर्वेषामेवैषामाकारस्य 'सः' इत्यस्य संभेदावगमे पूर्वानुभवदेश-कालानामन्यतमेन संभेदावगमेऽपीति योजना ॥

"न ह्यतिवृत्तस्य" इत्यत्रानुभवासंभेदमात्रस्योच्यमानत्वात्प्रागपि तस्यैव विवक्षेत्यादौ पूर्वानुभवसंभेदस्य स्मरणाभिमानत्वेऽधिकदोषमाह—* नचेति* ॥ हिशब्दसूचितां युक्तिमाह—*अर्थस्मृतीति* ॥ अर्थ-स्मृतिकारण-

वार्तिकम्

पदैः प्रत्येकं संगृहीतानि पञ्च लक्षणानि—स्मृतिरूपः, परत्र, पूर्वः, दृष्टः, अवभासश्चेति पञ्च ।

पञ्चपादिका

ज्ञानस्य ग्राह्यविशेषणतया विषयभावः। तस्माच्छुद्धमेवार्थं स्मृतिरवभासयति, न ज्ञानानुविद्धम्।

पञ्चपादिकाविवरणम्

संस्कारस्य जनकं यत् पूर्वविज्ञानम्, तत् स्वयंग्राह्यविशेषणतया स्वेनैव न विषयीक्रियते; अर्थमात्रविषयत्वात्पूर्वज्ञानस्य। नच पूर्वज्ञानेनाविषयीकृते विषये तत्संस्कारजन्या स्मृतिः समुत्पद्यते। तस्मादर्थमात्रविषयज्ञानजन्या स्मृतिरर्थमात्रमेव विषयीकरोति, न पूर्वज्ञानेनाविषयीकृतं ज्ञानमपि; अन्यथा नीलज्ञानात् पीतेऽपि स्मृतिः स्यात्॥

ननु स्मर्यमाणे पूर्वानुभवसम्भेदः स्वानुभवसिद्धः, *सत्यम्*; यत् पूर्वानुभवसमयेऽर्थावभासलिङ्गजन्यमर्थज्ञानसद्भावविषयमनुमानज्ञानमुत्पन्नम्, तदनुमानज्ञानसंस्कारजनिता स्मृतिरनुभवसम्भिन्नमर्थं गमयति, मूलज्ञानेनाप्यर्थज्ञानविषयेण विशिष्टार्थविषयीकरणात्, यस्मादर्थस्मृतिसमनन्तरमनुभवविशिष्टार्थस्मृत्यन्तरजननादर्थस्मृतिरेवानुभवसम्भिन्नेति विभ्रमः, तस्माच्छुद्धमेवार्थमित्युपसंहरति—*शुद्धमिति*॥ पूर्वज्ञानेन यावन्मात्रं वस्तुमात्रं वा ज्ञानसम्भिन्नं वा वस्तु विषयीकृतं तावन्मात्रमेवावभासयति, न स्वमूलज्ञानसम्भिन्नमित्यर्थः॥

ऋजुविवरणम्

स्मृतिविषयत्वं तु कस्मान्न भवतीत्याशङ्क्यानुभवविषय एव स्मृतिज्ञानमुत्पद्यते, नान्यत्र; सामग्र्यभावात्, इत्याह *नच पूर्वज्ञानेनेति*॥ यस्मान्न संस्कारस्य केवलानुभवजन्यस्य विशिष्टविषयस्मृत्युत्पादनसामर्थ्यम्, तेन तज्जन्यज्ञानमपि न विशिष्टविषयमित्याह—*तस्मादर्थमात्रेति*॥ *ननु* 'ज्ञातो घटः' इत्यनुभवविशिष्टार्थस्मरणं दृश्यते, कथं संस्कारस्य विशिष्टविषयस्मृत्युत्पादनसामर्थ्याभावः? तज्जन्यज्ञानस्य वा विशिष्टविषयत्वाभावः? इति चोदयति—*ननु स्मर्यमाण इति*॥ *ननु*—विशिष्टविषयस्मरणाङ्गीकारे यत्—"शुद्धमेवार्थमि"त्युपसंहृतम्, तदसमञ्जसं स्यादित्याशङ्क्याह—*यस्मादर्थमात्रस्मृतीति*॥ एवमप्यर्थस्मृतेश्शुद्धविषयत्वमिति वक्तव्यम्; नत्वविशेषेण शुद्धमेवार्थं स्मृतिरवभासयतीति वक्तुं युज्यत इत्याशङ्क्य व्याचष्टे—*शुद्धमिति*॥ *पूर्वज्ञानेनेति*॥ *ननु*—"पदात्पदार्थस्मृतावि"ति कथमुक्तम्? नहि पदस्य पदार्थबोधकत्वं सिद्धम्; न पितस्य स्मृतिरूपत्वम्, तत् कथं सिद्धवद्-

तत्त्वदीपनम्

संस्कारस्येत्यर्थः। किमर्थज्ञानं स्वेन विषयीक्रियते? उत ज्ञानान्तरेण? नाद्य इत्याह—*स्वेनेति*॥ कर्म-कर्तृविरोधान्न स्वविषयत्वमित्यर्थः। *न द्वितीयः*; स्वसत्तायां स्वप्रकाशं ज्ञानमित्यभ्युपगमविरोधादिति द्रष्टव्यम्। मा भूत्तर्हि विषयत्वं पूर्वज्ञानस्येत्यत्राह—* नहि पूर्वेति*॥ अनुभव-स्मरणयोरेकविषयत्वनियमादित्यर्थः। यस्मादर्थानुभवमात्रजनितसंस्कारस्य न विशिष्टस्मृत्युत्पादनसामर्थ्यम्, तस्मात्तज्जनितस्मरणमप्यर्थमात्रविषयमित्युपसंहरति—*तस्मादिति*॥ अर्थज्ञानस्य विषयत्वाभावेऽपि स्वप्रकाशतया स्फुरितत्वात् स्मरणविषयत्वं किं न स्यादित्यत आह—*न पूर्वेति*॥ तदेव व्यतिरेकमुखेनाह—*अन्यथेति*॥ पूर्वानुभवाविषयोऽप्यनुभवसंस्कारजस्मरणेन विषयीक्रियते चेत्, तदा नीलज्ञानात् पीतस्मरणमपि जायेतेत्यर्थः। 'ज्ञातो घटः' इत्यनुभवविशिष्टार्थस्मरणस्यानुभूयमानत्वात्कथं तदपन्हवः? इति शङ्कते—*ननु स्मर्यमाण इति*॥ उक्तमङ्गीकरोति—*सत्यमिति*॥

कथं तर्ह्यनुभवसंभिन्नविषयत्वं स्मरणस्य प्रतिषिध्यते? इत्यत्राह—*यत्पूर्वेति*॥ अर्थावभासशब्देनार्थनिष्ठं प्राकट्यमुच्यते। तस्य कार्यत्वे कारणापेक्षायामात्माश्रयं ज्ञानं कारणत्वेनानुमीयत इत्यर्थः। अर्थस्मृतेः केवलार्थानुभवमूलत्वान्नानुभवसंभिन्नविषयत्वमिति द्रष्टव्यम्। कथं तर्ह्यर्थस्मृतिरनुभवसंभिन्नविषयेत्यभिधानम्? इत्याशङ्क्याह—*यस्मादिति*॥ कस्याश्चित् स्मृतेरनुभवसंभिन्नविषयत्वे शुद्धमेवेत्यभिधानं कथम्? इत्याशङ्क्याह—पूर्वेति*॥ यावन्मात्रमित्येतद्विवृणोति—*वस्तुमात्रं वेति*॥ स्मृतेरनुभवसंभिन्नविषयत्वे विवादो न स्यादित्यत आह—*न स्वमूलेति*॥ अर्थमात्रज्ञानसंस्कारोत्थस्मरणस्य केवलविषयत्वम्, इतरस्य विशिष्टविषयत्वम्। तत्रार्थ-

पञ्चपादिका

तथाच पदात्पदार्थस्मृतौ न दृष्टो ज्ञानसम्भेदः ; ज्ञानस्यापि शब्दार्थत्वप्रसङ्गात् । तथेष्टभूभागविषया

पञ्चपादिकाविवरणम्

ननु अर्थस्मृतिर्वा ज्ञानसम्भिन्नविषयं स्मृत्यन्तरं वेत्यत्र को विवेक इति ? तत्रोदाहरणमाह— *तथाच पदात्पदार्थस्मृताविति* ॥ वाक्यार्थप्रत्ययविवक्षया यावदन्त्यपदोच्चारणपरिसमाप्तिस्तावत् क्रमेणोच्चार्यमाणेषु पदेष्वेकैकस्मात्पदादेकैकार्थविषयाणि ज्ञानान्युत्पद्यन्ते ; ताश्च सम्बन्धिशब्ददर्शनात् सम्बन्ध्यन्तरार्थविषयाः स्मृतय इत्यभिहितान्वयवादिनामन्विताभिधानवादिनां च संमतम् । *ननु*—कोऽसौ शब्दस्यार्थेन सम्बन्धः ?

ऋजुविवरणम्

दृष्टान्तत्वेनोपादीयते ? सर्वपदानां हि संभूय वाक्यार्थे प्रमितिहेतुत्वम्, न तु पदार्थ इत्याशङ्कयाह—*वाक्यार्थेति* ॥ *ननु कोऽसौ शब्दस्येति* ॥ सम्बन्धः स्मृतिजनकत्वम् । स चात्र स्वभावकार्यादिर्निरूपयितुं न शक्यते,

तत्त्वदीपनम्

स्मृतेरर्थमात्रविषयत्वे युक्त्यन्तरं दर्शयितुमाकाङ्क्षामुद्भावयति—*नन्वर्थेति* ॥ अर्थमात्रज्ञानसंस्कारजः प्रत्ययोऽर्थ-स्मृतिशब्दार्थः, अनुमानसंस्कारजः प्रत्ययः स्मृत्यन्तरमिति विवेकः ॥

स्मृतिमात्रस्य ज्ञानसंभिन्नमात्रविषयत्वे पदात्पदार्थस्मृतौ व्यभिचारः ; तस्मान्न स्मरणमात्रस्यायं स्वभाव इत्याह—*तत्रोदाहरणमिति* ॥ वाक्यार्थप्रत्यायनाय प्रयुक्तपदवृन्दात्पदार्थबोधः कस्मादाधीयते ? आहितो वा कस्मात्स्मृतिः ? इत्याशङ्क्याह—*वाक्यार्थेति* ॥ वाक्यार्थप्रत्ययोद्देशेन पदानि तावत्प्रयुज्यन्ते, तेषां च पदानां सकृदुच्चारणासंभवात् क्रमेणोच्चारणम्, तेभ्यश्च क्रमेणोच्चार्यमाणेभ्यो गृहीतसंगतिकेभ्यः पदार्थबोधा आधीयन्ते वाक्यार्थप्रत्ययौपयिकत्वेन ; यथा काष्ठैः पाके साध्ये तदर्थं ज्वाला निर्वर्त्यन्ते तथेत्यर्थः । पदार्थानां च संगतिग्रहणसमये मानान्तरसिद्धत्वात् तज्ज्ञानस्य स्मरणत्वमित्याह—*ताश्चेति* ॥ संस्काराणां सदा भावात्सततं स्मृत्युदयः स्यादित्याशङ्क्याह—*संबन्धीति* ॥ उद्बुद्धसंस्कारस्य स्मृतिहेतुत्वात् तस्य च संबन्धिशब्ददर्शनतन्त्रत्वान्नातिप्रसङ्ग इत्यर्थः ॥

पदाभिहितानां पदार्थानामेवान्वयबोधकत्वमिति ये ब्रुवते, ते ह्यभिहितान्वयवादिनः, योग्येतरसंसृष्टस्वार्थमभिदधति पदान्येवेति य आचक्षते, ते त्वन्विताभिधानवादिनः । विमता स्मृतिः, न स्वबीजज्ञानसंभिन्नार्थविषया, अर्थस्मृतित्वात् ; पदार्थस्मृतिवदित्युक्तं भवतीत्यर्थः ॥

संबन्धिशब्ददर्शनात्संबन्ध्यन्तरस्मरणं जायत इत्युक्तम्, तदनुपपन्नम्, शब्दार्थयोः संबन्धानिरूपणादिति बौद्धः शङ्कते—*ननु कोऽसाविति* ॥ शब्दार्थयोः किं स्वभावः संबन्धः ? उत कार्य-कारणतालक्षणः ? किं वाऽनुपलब्धिः ? आहो देशनियमः ? किं वा कालनियमः ? उत संयोगादिः ? न तावद् वृक्षत्व-शिंशपात्वयोरिव स्वभावसंबन्धः ; एकव्यक्तिसमवायाभावात्, न द्वितीयः ; शब्दस्यार्थकार्यत्वे मानाभावात्, नापि तृतीयः ; अभावो ह्यनुपलब्ध्या मीयते, अर्थस्य च भावरूपत्वात् शब्दार्थयोरनुपलब्धिसंबन्धानुपपत्तेः, नापि चतुर्थः ; यस्मिन् स्निग्धच्छाया तस्मिन् शैत्यमितिवदेकदेशत्वाभावात्, नापि कृत्तिकोदये रोहिण्यासत्तिवत् कालनियमः ; भिन्नकालत्वात्, नापि संयोगः ; शब्दस्य गुणत्वात् ; द्रव्यत्वेऽपि नार्थेन संयोगः ; गुणादीनां शब्दस्य च तदनुपपत्तेः । एवं संबन्धान्तराभावोऽप्यूह्यः । तस्माच्छब्दार्थयोः संबन्धाभावान्न संबन्ध्यन्तरज्ञानस्य स्मरणत्वमुचितमित्यर्थः ॥

वार्तिकम्

द्वाभ्यां द्वाभ्यां च पदाभ्यां दश लक्षणानि । तथाहि—एकैकं पदं ध्रुवं कृत्वा द्वितीयेन पदेन संयोजनीयम्

पञ्चपादिकाविवरणम्

यतः शब्दस्य दर्शनादर्थे स्मृतिरुत्पद्येत, अर्थबुद्धिजननसामर्थ्यलक्षण इति चेत्, किं स्मृतिजननसामर्थ्यलक्षणः ? अन्यो वा ? नचान्यः ; पदानां पदार्थांशेषु स्मृतिव्यतिरिक्तकार्यान्तराभावात्, नच स्मृतिजननसामर्थ्यसम्बन्धादेव स्मृतिजन्म ; अन्यत्र सादृश्यादिसम्बन्धान्तरे सत्यन्यतरदर्शनेऽन्यतरस्मिन् स्मृतिदर्शनात्। तस्मान्न शब्दादर्थे स्मृतिरिति, *उच्यते* ;—सम्बन्धज्ञानसंस्कारः शब्ददर्शनं

ऋजुविवरणम्

अतो न स्मृतिरिति भावः। *नच स्मृतिजननसामर्थ्यसम्बन्धादेवेति* ॥ अयमर्थः—स्मृतिजननसामर्थ्यात्स्मृतिजन्म न भवति ; आत्माश्रयादिदोषप्रसङ्गात्। कथम् ? तस्य स्मृतिजनकत्व-सामर्थ्ययोर्भेदोऽङ्गीक्रियते वा ? न वा ? नचेत्कथं जनकत्वमिति पृष्टे 'सामर्थ्यादि'ति वक्तव्यम्। सामर्थ्यं च जनकत्वमेवेति जनकत्वाज्जनकत्वमित्यात्माश्रयत्वं स्यात्, भेदे तु जनकत्वेन सामर्थ्यम्, सामर्थ्याज्जनकत्वमितीतरेतराश्रयत्वम्। अथ स्मृतिरूपकार्यदर्शनाज्जनकत्वम्, अतो नेतरेतराश्रयत्वम्, तर्हि स्मृतिरूपकार्यदर्शनाज्जनकत्वज्ञानम्, जनकत्वज्ञानेन सामर्थ्यज्ञानम्, सामर्थ्यज्ञानाच्च स्मृतिरूपकार्यमिति चक्रकम् ; ज्ञातसामर्थ्यस्यैव कार्यकरत्वात्। अथ मध्यमवृद्धप्रवृत्त्या प्रवृत्तिहेतुज्ञानमनुमाय शब्दानन्तर्यात्तज्जनकत्वं शब्दस्य निश्चित्य पश्चात्सामर्थ्यनिश्चयः, तथा सति तादृशशब्ददर्शनात्तस्यार्थस्मृत्युत्पत्तेर्न चक्रकम् ; तथाऽपि स्मृतिजननसामर्थ्यात्स्मृत्युत्पत्तिरिति न शक्यते वक्तुम्। बालेन सामर्थ्यमेव निश्चीयते, न स्मृतिजननरूपं यतः। अर्थज्ञानसामर्थ्यनिश्चयेऽपि फलतः स्मृतिजननसामर्थ्यं तदित्युच्यते, तथापि उत्तरत्र काले न शब्दमात्रदर्शनात् स्मृतिः ; विस्मृतसंबन्धस्यादर्शनात्, किन्तु संबन्धितया ज्ञायमानशब्ददर्शनात्, अस्त्विति चेत्, न ; अर्थस्य संबन्धविशेषणत्वेन ज्ञायमानत्वात्। अथ संबन्धज्ञानसंस्कारसहितशब्ददर्शनात्स्मृतिः, तथापि स्मृतिजननसामर्थ्यमात्रादेव स्मृतिजन्म न संभवतीत्याह—*सादृश्यादिसंबन्धान्तरे सतीति* ॥ सादृश्यमादिर्यस्य संबन्धस्य, स सादृश्यादिः। *एतदुक्तं भवति*—सादृश्यादिहेतुकाः संबन्धाः सादृश्यादय एव वा स्मृत्युत्पादनियामकाः, न तु सामर्थ्यमात्रात्स्मृत्युत्पत्तिरिति। एतत्परिहरति—*उच्यत इत्यादिना* ॥ यत्तूक्तं सादृश्यादिसंबन्धे सत्येव स्मृतिरिति, तत्र किं

तत्त्वदीपनम्

संबन्धान्तराभावेऽपि शक्तिः संबन्ध इति चोदयति—*अर्थबुद्धीति* ॥ शब्दबुद्ध्योर्जन्य-जनकत्वं संबन्धः, अर्थबुद्ध्योस्तु विषय-विषयितेति शक्तिः संबन्ध इत्यर्थः। बुद्धिशब्दस्य स्मृत्यनुभवसाधारणतया विकल्पाऽसहत्वान्नैतदित्याह—*किं स्मृतीति* ॥ *अन्य इति* ॥ अनुभवजननसामर्थ्यलक्षण इत्यर्थः। बुद्धिस्थत्वात् सिद्धान्त्यनङ्गीकृतत्वाच्च प्रथमं द्वितीयं दूषयति—*नचेति* ॥ पदार्थानां प्रमाणान्तरसिद्धत्वात् पदानां स्मारकत्वमेवेत्यर्थः। पदमात्रस्य स्मारकत्वं भवतां संमतं चेति चशब्दार्थः। संसृष्टपदार्थविशेषस्य मानान्तरागोचरत्वात्कथं पदानां तत्स्मारकत्वमित्याशङ्क्याह—*पदार्थांशेष्विति* ॥ संसृष्टपदार्थेष्वनुभवजनकत्वेऽपि केवलेषु स्मारकत्वमित्यर्थः। आद्यं निरस्यति—*नच स्मृतीति* ॥ ज्ञातस्य संबन्धस्य स्मृतिजनकत्वम् ? उताज्ञातस्य ? नाद्यः ; कार्यलिङ्गगम्यं हि सामर्थ्यम्, ततः स्मृतौ जातायां तया सामर्थ्यं ज्ञायते, ततस्तस्मिन् ज्ञाते स्मृतिजन्मेतीतरेतराश्रयात्। स्मृत्यन्तरप्रतिपन्नात् सामर्थ्यात् स्मृतिजन्माङ्गीकारेऽनवस्थापत्तेः ; *न द्वितीयः* ; अव्युत्पन्नानामपि शब्दश्रवणेऽर्थप्रतिपत्तिप्रसक्तेः। तस्माद् न स्मृतिजननसामर्थ्यलक्षणः संबन्धः साधीयानित्यर्थः ॥

तत्रैव दूषणान्तरमाह—*अन्यत्रेति* ॥ चैत्र-मैत्रयोरन्यतरदर्शनेनान्यतरस्मरणं सादृश्यादिसंबन्धे सति दृष्टम्, इह च सादृश्यादेरभावान्न स्मरणमुपपद्यत इत्यर्थः। विरोधकार्यकारणभावादिरादिशब्दार्थः। पूर्वपक्षमुपसंहरति—*तस्मादिति* ॥ संबन्धाभावाच्छब्दानामर्थबोधकतानुपपत्तेर्विवक्षाबोधकत्वं विवक्षितम् ? उतार्थबोधकत्वाऽभावमात्रम् ? आद्यस्तावन्नोपपद्यत इत्याह—*उच्यत इति* ॥

पञ्चपादिकाविवरणम्

चात्र स्मृतिहेतुः, नार्थेन सम्बन्धविशिष्टशब्दज्ञानम् ; येन विशिष्टे स्मृतिसामर्थ्यव्यवस्थापनाद्विशेषणीभूतं सम्बन्धान्तरमिष्येत, सम्बन्धविशिष्टान्यतरदर्शनाचान्यतरस्मृतौ सम्बन्धविशेषणत्वेनान्यतरस्यापि स्मृतिविषयस्य प्रागेव बुद्धता स्यात्, सादृश्यादिमूलसम्बन्धानां बुद्धिसामर्थ्यलक्षणत्वाभावात्सामर्थ्यसम्बन्धादर्थान्तरत्वं

ऋजुविवरणम्

सादृश्यादीनां बुद्धिसामर्थ्यरूपत्वमुच्यते ? उत सामर्थ्यस्य व्यवस्थापकत्वम् ? किंवा ज्ञापकत्वमिति ? न तावत्प्रथमः कल्प इत्याह—*सादृश्यादिमूलेति* ॥ सादृश्यादयश्च ते मूलसंबन्धाश्च सादृश्यादिमूलसंबन्धाः, बुद्धिसामर्थ्यलक्षणत्वाभावात्स्वरूपत्वाभाव इति ; सादृश्यविरोधादीनां व्यभिचरितत्वादित्यर्थः। द्वितीयस्यापीदमेवोत्तरम्, तत्र सामर्थ्यं लक्ष्यते व्यवस्थाप्यते यैरिति व्युत्पत्त्या लक्षणत्वं निराक्रियते ; व्यवस्थापकेऽपि हि लक्षणशब्दो दर्शितः—"धूमो लक्षणमग्नेरिति वदन्ती"ति। नियतत्वमेव हेतुः। अत एव न तृतीयोऽपि ; लक्षणत्वाभावात्, ज्ञापकत्वाभावादित्यर्थः ; व्यभिचरितत्वान्न तेषां ज्ञापकत्वं युक्तम् ; कार्यस्यैवाव्यभिचरितस्य तदाश्रयणं युक्तमिति भावः। एवं च सति स्मृतिजननसामर्थ्यात्स्मृतिर्न भवतीति यदुक्तम्, तत् परिहृतमित्याह—*बुद्धिसामर्थ्येति* ॥ कथं ज्ञानस्य शब्दार्थत्वम् ? आनु-

तत्त्वदीपनम्

किं विवक्षामात्रं शब्दार्थः ? आहो अर्थव्यावृत्तिविवक्षा ? नाद्यः ; शब्दश्रवणानन्तरमर्थे व्यवहारानुपपत्तेः ; द्वितीये प्रमाणान्तरादर्थासिद्धेः शब्दस्य तत्र प्रामाण्यमास्थेयमित्यभिसन्धिः। द्वितीयं प्रत्याह—*संबन्धेति* ॥ शब्दार्थयोः स्मृतिजननसामर्थ्यं संबन्धः, स च ज्ञात एवार्थबोधकः। न चेतरेतराश्रयत्वादिदोषः ; संबन्धज्ञानोत्थस्य संस्कारस्यानवगतस्यैवार्थबोधकताऽभ्युपगमादित्यर्थः। नच संस्कारस्य सदा भावात्सदा स्मरणप्रसङ्गः ; शब्ददर्शनोद्बुद्धसंस्कारस्य स्मृतिहेतुत्वाभ्युपगमादित्याह—*शब्देति* ॥ अर्थेन संबन्धविशिष्टशब्दज्ञानस्यैव स्मृतिहेतुत्वं किं न स्यादित्यत आह—*नार्थेनेति* ॥ विपक्षे दूषणमाह—*येनेति* ॥ अर्थसंबन्धविशिष्टशब्दज्ञानस्य स्मृतिजननसामर्थ्ये तदतिरिक्तः संबन्ध आस्थेयः, स च न निरूपयितुं शक्यत इत्यर्थः। न केवलं संबन्धान्तरप्रसक्तिः, अपि तु शब्दवैयर्थ्यं चेत्याह—*संबन्धविशिष्टेति* ॥ अन्यतरस्यापीत्यर्थस्येत्यर्थः। *प्रागेवेति* ॥ शब्दजन्यस्मरणात्प्रागित्यर्थः। अर्थसंबन्धविशिष्टशब्दज्ञानस्य स्मारकत्वे विशेषणीभूतार्थस्याप्यधिगतत्वाच्छब्दवैयर्थ्यमित्यर्थः ॥

यत्तूक्तं संबन्धिदर्शनस्य संबन्ध्यन्तरस्मारकत्वे सादृश्यादिसंबन्धान्तरं दृष्टमिति, तत्र वक्तव्यम्—एकत्र सामर्थ्यसंबन्धस्य संबन्धान्तरनिरपेक्षस्य स्मारकत्व इतरत्रापि तथात्वं स्यादिति विवक्षितम् ? उतान्यत्र सामर्थ्यस्य सादृश्यादिसंबन्धसापेक्षत्ववत् सादृश्यापेक्षत्वं साध्यते ? आहोस्विन्मूलसंबन्धाभावात्सामर्थ्याद् बुद्ध्यनुत्पत्तिः ? इति। तत्र प्रथम-द्वितीयौ दूषयति—*सादृश्येत्यादिना*—बुद्धिसामर्थ्यसंबन्धादित्यतः प्राक्तनेन। अत्रैषाऽक्षर-

वार्तिकम्

—स्मृतिरूपः परत्र, स्मृतिरूपः पूर्वः, स्मृतिरूपो दृष्टः, स्मृतिरूपोऽवभासः ; परत्र पूर्वः, परत्र दृष्टः, परत्रावभासः ; एवं पूर्वः दृष्टः, पूर्वावभासः, दृष्टावभास इति दश ॥ तथा द्वे द्वे पदे ध्रुवे कृत्वैकैकेन पदेन संयोजनीये—स्मृतिरूपः परत्र पूर्वः, स्मृतिरूपः परत्र दृष्टः, स्मृतिरूपः परत्रावभासः, स्मृतिरूपः पूर्वदृष्टः, स्मृतिरूपः पूर्वावभासः, स्मृतिरूपो दृष्टावभासः, परत्र पूर्वदृष्टः, परत्र पूर्वावभासः, परत्र दृष्टावभासः, पूर्वदृष्टावभास इति त्रिभिस्त्रिभिः पदैर्दश लक्षणानि ॥ तथा त्रीणि त्रीणि पदानि ध्रुवाणि कृत्वा एकैकेन पदेन संयोजनीयानि—स्मृतिरूपः परत्र पूर्वदृष्टः, स्मृतिरूपः परत्र पूर्वावभासः, स्मृतिरूपः परत्र दृष्टावभासः, स्मृतिरूपः पूर्वदृष्टावभासः, परत्र पूर्वदृष्टावभास इति चतुर्भिश्चतुर्भिः पञ्च लक्षणानि ॥ तान्येतान्येक-द्वि-त्रि-चतुःपदैः संगृहीतानि मिलित्वा त्रिंशल्लक्षणानि भवन्ति। एतेषां तु यथासंभवमव्याप्त्यतिव्याप्त्यसंभवै-

पञ्चपादिका

स्मृतिः—'स सेव्यः' इति ग्राह्यमात्रस्था, न ज्ञानपरामर्शिनी ।' *अपिच* भूयस्यो ज्ञानपरामर्शशून्या

पञ्चपादिकाविवरणम्

न विरुद्धयते । बुद्धिसामर्थ्यसम्बन्धाद् बुद्धिर्नोत्पद्यत इति च स्ववचनविरोधः । तस्मात्पदेभ्यः पदार्थमात्रेषु बुद्धिसामर्थ्यसम्बन्धात् स्मृतय इति सिद्धम् । कुतः पुनस्तत्र ज्ञानसम्भेदाभाव इति ? तत्राह—*ज्ञानस्यापीति* ॥ शब्दसामर्थ्यविषयतया सम्बन्धित्वेन स्मृतिविषयत्वे ज्ञानस्यापि शब्दार्थत्वप्रसङ्गादिति । *तथेष्टभूभागविषयेत्यादिः स्पष्टार्थः* ॥ *ननु* स्मृतिज्ञानस्य त्रिकोणत्वादिवत्स्वगतः

ऋजुविवरणम्

षङ्गिकार्थे व्यभिचारादित्याशङ्क्य व्याचष्टे—*शब्दसामर्थ्यविषयतयेति* ॥ स्वगतो विशेष इत्यत्र योऽयं स्वगतो विशेषो जात्यादिः स किं स्वाभाविकः, स्वेन च गृह्यते ? उतान्यनिमित्तोऽन्येन च गृह्यते ? इति । तत्र प्रथमपक्षनिराकरण-

तत्त्वदीपनम्

योजना—सादृश्यादिलक्षणमूलसंबन्धानां स्मृतिजननसामर्थ्यसंबन्धादर्थान्तरत्वं यद् दृष्टं तन्न विरुद्ध्यत इति संबन्धः । सादृश्यादिमूलसंबन्धानां स्मारकत्वं तावदन्वय-व्यतिरेकसिद्धम्, नच सामर्थ्यरूपत्वं तेषाम्; व्यतिरेकस्याप्यनुभूयमानत्वात्, तस्मादाद्यपक्षानुपपत्तिरित्यर्थः । द्वितीयकल्पासंभवमुपपादयति—*बुद्धिसामर्थ्येति* ॥ बुद्धिसामर्थ्यलक्षणत्वाभावात् सादृश्यादिमूलसंबन्धानां सामर्थ्यसंबन्धादर्थान्तरत्वमिति संबन्धः । अर्थान्तरत्वमसंकीर्णत्वं शब्दसामर्थ्येन सहानवस्थितत्वं बुद्धिसामर्थ्यं लक्षणं गमकं येषां ते बुद्धिसामर्थ्यलक्षणाः, तेषां भावस्तत्त्वम्; तदभावादित्यक्षरार्थः । यद्यपि सादृश्यादिसम्बन्धेऽन्यतरस्मरणं दृष्टम्; तथापि प्रकृते संबन्धान्तरं नोपपद्यते; तदसंभवात्, कल्पनागौरवाच्चेत्यर्थः । तृतीयं प्रत्याह—*बुद्धिसामर्थ्यसंबन्धादिति* ॥ शब्दानां बुद्धिसामर्थ्यमङ्गीकृत्य सामर्थ्याद् बुद्ध्यनुत्पत्तिं ब्रवीषि ? उत सामर्थ्यमेव नेतीति ? तत्राऽऽद्ये जननी वन्ध्येतिवत् स्ववचनव्याघातः । न द्वितीयः; शब्दान्वय-व्यतिरेकाभ्यां शब्दस्य बुद्धिजननसामर्थ्योपलम्भविरोधादित्यर्थः । शब्दार्थयोः संबन्धसिद्धौ संबन्धिदर्शनात्संबन्ध्यन्तरस्मरणं यदुक्तं तद् युक्तमित्युपसंहरति—*तस्मादिति* ॥

पदार्थस्मृतिवदितरस्मृतेरपि न ज्ञानसंभिन्नविषयत्वमित्युक्तम्, तत्र दृष्टान्तासंप्रतिपत्तिं शङ्कते—*कुतः पुनरिति* ॥ शब्दस्य शक्तिभेदकल्पनाप्रसङ्गादर्थमात्रविषयत्वं युक्तमित्याह—*तत्राहेति* ॥ शब्दप्रतिपन्नत्वमात्रेण कथं ज्ञानस्य शब्दार्थत्वम् ? आनुषङ्गिकार्थे व्यभिचारादित्याशङ्क्याह—*शब्दसामर्थ्येति* ॥ स्मार्यगतो धर्मः स्मरणाभिमान इति पक्षं निराकृत्य स्मरणगतो धर्मः स्मरणाभिमान इति पक्षमुपक्षिपति—*ननु स्मृतीति* ॥ किं प्रत्यक्षः स विशेषः ? उतानुमेयः ? इति विकल्प्याऽऽद्यं निरस्यति—*नेत्याहेति* ॥ *अन्यद्वेति* ॥ वाशब्द इवार्थः ।

वार्तिकम्

दुष्टत्वात् हित्वैतानि, पञ्चभिः पदैरुक्तदोषरहितमेकत्रिंशत्तमं स्वाभिमताध्यासलक्षणं संगृहीतं भवति, तेषु च व्यावर्त्येषु केषुचिद्वादिभिर्लक्षणत्वेन स्वीकृतेषु दूषणान्युद्भावितान्येव पदकृत्यकाले । अवशिष्टेष्वपि स्वबुद्ध्या दूषणान्युद्भाव्यानि । ग्रन्थविस्तरभिया त्वत्र न लिख्यन्ते । तस्मात्—"स्मृतिरूपः परत्र पूर्वदृष्टावभासः" इत्येवंरूपस्यैव सत्यानृतमिथुनशब्दार्थत्वेनाभिप्रेतत्वात् स्मृतिरूपपदेन तत्र ज्ञानाध्यासग्रहाद् नाव्याप्तमध्यासलक्षणमित्याशयः । अत्र तु "स्मृतिरूपः" इत्यनेनाध्यासं विशेषयता भगवता भाष्यकारेण ज्ञानोपसर्जनार्थाध्यासो मुखत एव दर्शितः । तेनाध्यासस्य प्रातीतिकत्वमपि सिद्धं भवति, ज्ञानसहोत्पन्नस्यैव प्रातीतिकत्वात्, सहोत्पन्नत्वमन्तरेण प्रकृते ज्ञानज्ञेययोर्वैशिष्ट्यान्तरानिरूपणात्,

पञ्चपादिका

एव स्मृतयः। नापि स्वगतो ज्ञानस्य स्मरणाभिमानो नाम रूपभेदोऽवभासते। नहि नित्यानुमेयं ज्ञानमन्यद्वा वस्तु स्वत एव रूपसम्भिन्नं गृह्यते। अत एवोक्तम्—"अनाकारामेव बुद्धिमनुमिमीमहे" इति। *अनाकाराम् = अनिरूपिताकारविशेषाम्; अनिर्दिष्टस्वलक्षणामित्यर्थः। अतो न स्वतः स्मरणाभिमानात्मकता। नापि ग्राह्यविशेषनिमित्तः स्मरणाभिमानः; प्रमाणग्राह्यस्यैवाविकलावधिकस्य गृह्यमाणत्वात्, नापि फलविशेषनिमित्तः; प्रमाणफलविषयमात्रावच्छिन्नफलत्वात्। यः पुनः क्वचित्कदाचिदनुभूतचरे 'स्मरामि' इत्यनुवेधः, स वाचकशब्दसंयोजनानिमित्तः—यथा साम्नादिमदाकृतौ

पञ्चपादिकाविवरणम्

कश्चिद्विशेषो दृश्यते, स स्मरणाभिमान इति, नेत्याह—*नापि स्वगतो ज्ञानस्येति* ॥ *ननु* नित्यानुमेयेऽपि लिङ्गविशेषाद्धेतुविशेषानुमानं युक्तमिति, *कोऽसौ लिङ्गविशेषः* ? न तावद् ग्राह्यविशेष इत्याह—*नापि ग्राह्यविशेषनिमित्त इति* ॥ अस्तु तर्हि फलविशेषो लिङ्गविशेष इति, नेत्याह—*नापि फलविशेषनिमित्त इति* ॥ *ननु* स्मरामीत्यनुभवः स्मरणाभिमान इत्यत आह—*यः पुनः क्वचित्कदाचिदिति* ॥

ऋजुविवरणम्

परत्वेन नापि स्वगत इति ग्रन्थमवतारयति—*नेत्याहेति* ॥ द्वितीयपक्षमनुवदति—*ननु नित्यानुमेयेऽपीति* ॥ *वाचकसंयोजनानिमित्त इति* ॥ वाचकस्य संयोजना वाचकशब्दसञ्जल्पः; तन्निमित्तत्वं स्मरामीत्यनुभवस्य स्मरणाभिमानत्वनिराकरणहेतुत्वेनोक्तम्, कथमिदं स्मरणाभिमानत्वं निराकरोतीत्याशङ्क्य, स्मरणमभिमन्यते येन, यद्वा—स्मरणमेवाभिमननमभिमान इत्युभयथाऽपि स्मरामीत्यनुभवस्य स्मरणाभिमानत्वं नास्तीत्याह—*यदि स्मृति-

तत्त्वदीपनम्

नित्यानुमेयं स्वगतरूपविधुरं चेत्यत्र शबरस्वामिवचनमुदाहरति—*अत एवेति* ॥ (मूले) अनाकारामित्युक्ते बुद्धेर्निःस्वरूपता स्यात्, तदर्थमाह—*अनिरूपितेति* ॥ *ननु* घटज्ञानं पटज्ञानमित्याकारविशेषो निरूपित इत्यत्राह—*अनिर्दिष्टेति* ॥ न निर्दिष्टं स्वाभाविकं लक्षणं यस्याः सा तथोक्ता, तामित्यर्थः। द्वितीयमुत्थापयति—*ननु नित्येति* ॥ सुरभिधूमविशेषस्यागरुजदहनानुमापकत्ववद् व्याप्यविशेषस्य व्यापकविशेषानुमापकत्वमित्यर्थः ॥

लिङ्गविशेषमेव तर्हि निरूपयेत्याह—*कोऽसाविति* ॥ किं ग्राह्यविशेषो लिङ्गम् ? उत फलविशेषः ? इति किंशब्दार्थः। आद्यं दूषयति—*न तावदिति* ॥ प्रमाणग्राह्यमेव स्मृत्या गृह्यत इति कथं नियमः ? अभिज्ञायामयमिति प्रतिभानात्, स्मृतौ च स इतीति शङ्कायामुक्तं टीकाकृता—*अविकलेति* ॥ देश-कालयोः क्वचित्परोक्षतया क्वचिदपरोक्षतया परं प्रतिभासः, न प्रमेयभेद इत्यर्थः। द्वितीयमुत्थापयति—*अस्त्विति* ॥ फलविशेष एवासिद्ध इत्याह—*नेत्याहेति* ॥ विषयभेदनिमित्तः फलविशेषः। नच प्रमाण-स्मृतिफलयोर्विषयभेदोऽस्तीत्यर्थः ॥

स्मरामीति ज्ञानं स्मरणाभिमान इति कल्पमुत्थापयति—*नन्विति* ॥ व्यभिचारान्नास्यापि विवेचकत्वमित्याह—*आहेति* ॥ मूलग्रन्थस्यैषाऽक्षरयोजना—यः स्मरामीत्यनुवेधः, स क्वचिद् विषयादोषेण भवति, न सर्वत्रेत्यर्थः। तत्रैव हेत्वन्तरमाह—*वाचकेति* ॥ स्मरामीत्यनुभवस्य वाचकशब्दसंभिन्नत्वनिमित्तत्वमात्रमत्र प्रतिभाति, न तु तस्याविवेचकत्वे हेतुरुक्तः, तत्राह—*यदि स्मृतीति* ॥ प्रागेवेत्यत्र स्मरामीत्यनुभवादिति शेषः।

वार्तिकम्

विषय-विषयिभावसम्बन्धस्य च प्रातीतिकाप्रातीतिकसाधारण्यात्। *ननु*—साक्षिचैतन्यस्योपाधिभूतं

पञ्चपादिका

गौरित्यभिमानः । तस्मात्पूर्वप्रमाणसंस्कारसमुत्थतया तद्विषयावभासित्वमात्रं स्मृतेः, न पुनः प्रतीतितोऽ-

पञ्चपादिकाविवरणम्

यदि स्मृति-स्मार्य-स्मर्तृ-विषयशब्दत्रयानुपक्तोऽनुभवविशेषः, तत् स्मरामीति, यदि वा त्रितयविषयमनुमान-ज्ञानान्तरमेतत्, उभयथाऽपि ग्रहणादित्रितयात् स्मरणादित्रितयस्य प्रागेव भेदावगममन्तरेण ग्रहणादित्रितय-शब्दव्यतिरिक्तस्मरणादिशब्दानुस्मरणं ग्रहणानुमानव्यतिरेकेण स्मरणानुमानं च न सम्भवति ; विशिष्टाभिधेयाव-गमनिमित्तत्वाद् विशिष्टशब्दानुस्मरणस्य, विशिष्टावगमानुमानस्य चेति प्रागेव स्मरामीत्यनुभवाद् ग्रहण-स्मरणयो-र्भेदो वक्तव्य इति भावः । *ननु* स्मृत्यनुभवयोरर्थमात्रविषयत्वे को भेद इत्यत आह--*तस्मादिति* ॥ कारणविशेषादेवेत्यर्थः ॥

ऋजुविवरणम्

स्मार्येति* ॥ "किंत्वध्यासः" इत्युपसंहारो न युक्तः ; अध्यासस्याद्याप्यसिद्धत्वात्, प्रमाणस्मृतिद्वैराश्यस्योक्तत्वा-दित्याशङ्क्य, तत्र जाग्रति ग्रहणयोर्ग्रहणस्मरणयोः स्मरणयोर्वाऽविवेकः, एवं तत्तदर्थाविवेकोऽपीति वक्तुं शक्यत्वात्तद्वानेन

तत्त्वदीपनम्

असंभवे हेतुमाह—*विशिष्टेति* ॥ ग्रहणादेर्भेदमनधिगम्य ग्रहणादिवाचकशब्दं विहाय स्मरणादिवाचकशब्द-प्रयोगासंभवात्प्रागेव भेदः प्रतिपत्तव्यः, तथाच न स्मरणाभिमानस्य विवेचकत्वमित्यर्थः ॥

स्मृत्यनुभवयोर्भेदप्रसिद्ध्या ग्राह्यविशेष आस्थेय इति शङ्कते—*ननु स्मृतीति* ॥ प्रसिद्धिरन्यथोपपन्नेत्याह—*अत आहेति* ॥ संस्कारसमुत्थत्वं कथं भेदकम्? तस्य स्मृतिप्रमाणसाधारणत्वादित्याशङ्क्याह—*कारणेति* ॥ स्मृतेः संस्कारमात्रं कारणम्, ग्रहणस्य तु संप्रयोगादीत्यर्थः । स्मृत्यनुभवयोरर्थैक्येऽपि हेतुभेदाद् भेद इत्युक्तं प्रतिबन्द्या

वार्तिकम्

रजताकाराविद्यावृत्तिरूपं ज्ञानं स्वविषयेण सहोत्पद्यत इति चेत्, हन्त तर्हि प्रत्यक्षं न स्यात्, प्रत्यक्षस्य विषयजन्यत्वनियमात्, पूर्वभाविन एव कारणत्वादिति—चेत्, *न* ; ईश्वराध्यक्षे व्यभिचारात्, जन्याध्यक्षेऽयं नियम इति चेत्, न ; तथाऽपि योगिनोऽध्यक्षे व्यभिचारध्रौव्यात् । नहि योगिनोऽतीता-नागतादिविषयमध्यक्षं विषयजन्यम् ; तत्पूर्वकाले विषयाभावात् । लौकिकाध्यक्ष इति चेत्, न ; तार्किकैरपि रजतांशे तदध्यक्षस्य लौकिकत्वानङ्गीकारात्, अधिष्ठानांशे चास्माभिरपि तदध्यक्षस्यार्थजन्यत्वाभ्युप-गमात् । तार्किकमते ज्ञानप्रत्यासत्तेरङ्गीकारात् तदंशेऽप्यर्थजन्यत्वमेवेति चेत्, न ; तत्प्रत्यासत्तित्वा-सिद्धेरुक्तत्वात्, सिद्धावपि न तयाऽर्थजत्वसिद्धिः ; अतिप्रसङ्गात्, स्मृत्यादेरपि संस्कारादिप्रत्या-सत्याऽर्थजत्वापत्तेरध्यक्षत्वप्रसङ्गात् । तस्माद्यत्किञ्चिदेतत् ॥ *वस्तुतस्तु*—ज्ञानाकरणकज्ञानस्य प्रत्यक्ष-त्वात् तस्य चाविद्यावृत्तावपि भावान्न काचिदनुपपत्तिः । यदि चेन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षमित्या-ग्रहः, अस्तु नाम ; तथाऽप्यविद्यावृत्तौ तदभावेऽप्यपरोक्षत्वमस्त्येव । नच प्रत्यक्षत्वपरोक्षत्वयोरेकत्वम् ; अपरोक्षत्वस्येश्वरज्ञानेऽपि भावादुक्तप्रत्यक्षत्वस्य तत्राभावाद् व्याप्यव्यापकभावेनैकत्वानुपपत्तेः । तस्माद-विद्यावृत्तेरर्थसहोत्पन्नत्वेऽपि नापरोक्षत्वविरोधः ; अपरोक्षसाक्षिचैतन्योपाधितया बुद्धिवृत्तिवद-परोक्षत्वोपपत्तेरिति । अत एव ज्ञानज्ञेययोः सहोत्पन्नत्वमेवापरोक्षत्वभ्रमस्य कार्यतावच्छेदकमिति वदन्ति ; ततोऽन्यस्य लघुनोऽनुगतस्यासंभवात् । नच—क्षणिकात्मविशेषगुणे सुखदुःखादौ व्यभिचारः ; अप्रतीते तस्मिन् प्रमाणाभावेनाफलत्वप्रसङ्गेन च ज्ञानसहोत्पत्तेरवश्यमभ्युपगन्तव्यत्वादिति—वाच्यम् ;

पञ्चपादिका

र्थतो वाऽधिकोंऽशोऽस्ति, यस्य दोषनिमित्तः प्रमोषः परिकल्प्येत। नचेह पूर्वप्रमाणविषया-

पञ्चपादिकाविवरणम्

कथं वा तव स्मृतेर्ज्ञानानुमानस्य चार्थविशिष्टज्ञानविषयत्वे समाने विभागावगमः? कारणभेदादिति चेत्, इहापि तत् समानम्। 'सः' इत्याकारेण स्मृतिर्ज्ञानानुमानाद् भिद्यत इति चेत्, कोऽयं 'सः' इत्याकारः? परोक्षदेशकालविशिष्टतेति चेत्, अनुमानादिष्वपि प्रसङ्गः। पूर्वानुभवसंभिन्नतेति चेत्, ज्ञानानुमाने पौरुषेयवाक्यजन्यज्ञाने च प्रसङ्गः। तस्मात्संस्कारजन्यत्वं 'सः' इत्याकार इति। अस्तु तर्हीहापि तथाविधैव स्मृतिरिति, नेत्याह—*नचेहेति* ॥ न स्वप्नेऽहं नीलमिति गृह्यमाणाविवेकः, स्मर्यमाणानामन्योन्या-

ऋजुविवरणम्

स्वप्नमाश्रित्य द्वैराश्यभङ्गं दर्शयति—*नच स्वप्न इति* ॥ गृह्यमाणेनात्मना नाविवेकः; अहं नीलमिति प्रतीति-प्रसङ्गात्, तददर्शनादित्यर्थः। असंभवादेव ग्रहणयोरविवेको नाशङ्कितः ॥

*भट्टपादमुखैरन्यैराश्रितत्वेन दूष्यते। प्रसिद्धो विदुषां न्यायो बलाबलविभेदतः ॥

तत्त्वदीपनम्

द्रढयति—*कथं वेति* ॥ स्मृति-ज्ञानानुमानयोः किं विषयभेदाद्भेदः? आहो कारणभेदाद् भेदः? किं वा 'सः' इत्याऽऽकारभावाभावाभ्याम्? इति विकल्प्याऽऽद्यं दूषयति—*अर्थविशिष्टेति* ॥ द्वितीयमुत्थापयति—*कारणेति* ॥ साम्येन समाधत्ते—*इहापीति* ॥ तृतीयमुत्थापयति—*'सः' इति* ॥ 'सः' इत्याकार एव दुर्निरूप इत्याह—*कोऽयमिति* ॥ किं परोक्षदेशकालविशिष्टविषयत्वं 'सः' इत्याकारः? आहो पूर्वानुभवसंवलितत्वम्? उत संस्कार-जत्वम्? इति किंशब्दार्थः। आद्यमुत्थापयति—*परोक्षेति* ॥ परोक्षदेशकालविशिष्टविषयत्वस्यानुमानादावपि संभवात्तत्रापि प्रसङ्ग इत्याह—*अनुमानादिष्विति* ॥ द्वितीयमनुवदति—*पूर्वानुभवेति* ॥

किमनुभवमात्रसंभिन्नविषयत्वं स्मरणभेदकम्? उत स्वजनकज्ञानसंभिन्नविषयत्वम्? इति विकल्प्याऽऽद्यं प्रत्याह—*ज्ञानानुमान इति* ॥ द्वितीयं प्रत्याह—*पौरुषेयेति* ॥ नद्यास्तीरे प्रसूनानि सन्तीत्यादिवाक्यान्नदीतीरप्रसून-विषयज्ञानसत्ता बोध्यते, ततश्च स्वजनकज्ञानसंभिन्नविषयत्वस्य तत्रापि भावान्न भेद इत्यर्थः। तस्मात् तृतीयपक्षः परिशिष्यत इत्याह—*तस्मादिति* ॥ संस्कारमात्रजन्यत्वमेव तर्हि स्मृतेर्भेदकमिति शङ्कते—*अस्तु तर्हीति* ॥ संस्कारमात्रजन्यत्वमसिद्धमित्याह—*नेत्याहेति* ॥ किं च स्वप्ने किं गृह्यमाणयोरविवेको भ्रमः? उत गृह्यमाण-स्मर्यमाणयोः? आहो स्मर्यमाणयोः? इति विकल्प्य प्रथम-द्वितीयौ निरस्यति—*नचेति* ॥ आत्मव्यतिरिक्तस्य नीला-देरगृह्यमाणत्वान्न गृह्यमाणयोरविवेकः; नापि द्वितीयः, 'अहं नीलम्' इति प्रतिभासप्रसङ्गात्, गृह्यमाणाविवेकादा-परोक्ष्ये स्मर्यमाणाविवेकाद् गृह्यमाणस्य पारोक्ष्यं किं न स्यादित्यर्थः। तृतीयं दूषयति—*स्मर्यमाणानामिति* ॥

वार्तिकम्

तस्य लक्ष्यत्वेन व्यभिचाराभावात्। नचैवं शुक्तिरजतादिवत्सुखादीनां बाधप्रसङ्गः; आत्मदर्शिनां तद्ग्रहस्येष्टत्वात्, प्रातीतिकसत्त्वानां भ्रमाणामज्ञस्यापि बाधो दृष्टः; अतोऽनात्मदर्शिनामपि तद्बाधः स्यादिति चेत्, न; प्रातीतिकरजतादिवदप्रातीतिकसुखादेरनुपलम्भेन देहात्मभाववत् तद्दशायां तद्बाधानुपपत्तेः। अत एव स्वप्नादुत्थितस्य स्वप्नदृष्टपदार्थान्तरबाधेऽपि न स्वाप्निकसुखदुःखादीनां बाधः; नहि स्वप्ने सुखादिकं मम न जातमिति कश्चिदपि प्रत्येति। न चैतावता तेषामकल्पितत्वम्; तादृशहस्त्यादिविषयस्य तत्रासंभवेन तज्जन्यसुखादेरप्यसंभवात् ॥

पञ्चपादिका

वभासित्वमस्ति ; पुरोऽवस्थितार्थप्रतिभासनादित्युक्तम् । अतो नान्यसम्प्रयोगेऽन्यविषयज्ञानं स्मृतिः, किन्त्वध्यासः ॥

पञ्चपादिकाविवरणम्

विवेके परोक्षमेव सर्वमवभासते ; अतो न प्रमाणस्मृतिद्वैराश्यमेव ज्ञानस्य, किन्तु तृतीयं भ्रान्तिज्ञानमपीत्युपसंहरति—*अतो नान्यसंप्रयोग इति* ॥ न चेत् स्मृतिः, किं तर्हीदं रजतमिति ? *ननु*—अन्यथाख्यातिरेषा । तथाहि—शुक्तिकासंप्रयोगे दोषोपहतमिन्द्रियं देशान्तरादिगतं रजतमभिगृह्णाति । तच्च स्वदेशाद्यवस्थितं दोषोपहतेन्द्रियेण गृह्यमाणं शुक्तिकात्मना गृह्यते । *ननु* अननुभूतमपि यत्किञ्चिदपि दोषोपहितमिन्द्रियं किमिति न गृह्णाति ? सादृश्यादिदोषसामर्थ्यादिति वदामः । तस्माद्ग्रहणात्मकमन्यथाज्ञानम्—इति ॥

ऋजुविवरणम्

इत्यभिप्रायेणाह—*नन्वन्यथाख्यातिरेषेति* ॥ *ननु* इन्द्रियस्य संसृष्टग्राहकत्वात्कथं रजतस्य ग्रहणमित्याशङ्क्याह—*तथाहि शुक्तिकेति* ॥ तर्हि देशान्तरसंबन्धित्वेनैव ग्रहणं भवेत्, तथा सति कथं पुरोवर्तिनि प्रवृत्तिविशिष्टज्ञानं चेत्याशङ्क्याह—*तच्च दोषोपहतेन्द्रियेणेति* ॥ *कुतो वैपरीत्यमिति* ॥ रजतस्याकारव्यावर्तकत्वदर्शनात्पुरोवर्तिनि च प्रवृत्तिदर्शनादिति भावः । आकारव्यावर्तकत्व-प्रवृत्तिविषयत्वयोर्दर्शनात्कथमननुरूपत्वम् ? इत्याशङ्क्याभिप्रायमाह

तत्त्वदीपनम्

गुरुमतनिराकरणमुपसंहरति—*अतो न प्रमाणेति* ॥ संस्कारमात्रजन्यत्वेन स्मृतित्वाभावे रजतप्रतिभासस्य गतिर्वक्तव्येत्याह—*न चेदिति* ॥ देशान्तरस्थरूप्यस्य पुरोवर्त्यात्मना प्रतीतिर्भ्रान्तिः ? उत धीरूपस्य ? आहो अनिर्वाच्यस्य ? इति किंशब्दार्थः । आद्यमवलम्बते—*नन्वन्यथेति* ॥

किं देशान्तरवृत्ति रूप्यं लोचनेनालोक्यते ? उत मनसा ? नाद्यः ; इन्द्रियस्य व्यवहितसन्निकर्षाभावात् । नान्त्यः ; मनसोऽसहायस्य बहिरप्रवृत्तेः, तस्मात् कथमन्यथाख्यातिरित्याशङ्क्याह—*तथाहीति* ॥ किं केवलस्य लोचनस्य व्यवहितग्राहित्वं निरस्यते ? उत दोषसध्रीचीनस्य ? आद्यस्त्वङ्गीक्रियते, द्वितीयस्तु नोपपद्यते ; केवलस्य जाठरानलस्य बहुतराहारदग्धत्वाभावेऽपि भस्मकदोषदूषितस्यानेकाहारदग्धत्ववत् केवललोचनस्य व्यवहिताग्राहित्वेऽपि दुष्टस्य ग्राहकत्वमविरुद्धमित्यर्थः । तर्हि देशान्तरे रूप्यमिति प्रतीयादित्याशङ्क्याह—*तच्चेति* ॥ दुष्टेन्द्रियेण व्यवहितग्रहणेऽननुभूतस्यापि ग्रहणं स्यादिति शङ्कते—*नन्वननुभूतमिति* ॥

संस्कारस्यापि सहकारित्वान्नादृष्टग्रहणमित्याशङ्क्य, दृष्टदृष्टावपि यस्य कस्य चिद् ग्रहणं स्यादित्याह—*यत्किंचिदिति* ॥ साधर्म्यस्यापि सहकारित्वान्नातिप्रसङ्ग इत्याह—*साधर्म्येति* ॥ आदिपदेन वैसादृश्यस्याप्यन्यस्य ग्रहणं वारयति । राग आदिशब्दार्थः । पूर्वपक्षमुपसंहरति—*तस्मादिति* ॥ ग्रहणात्मकं यज्ज्ञानं तदन्यथा ज्ञानम्, नानिर्वचनीयादिख्यातिः, तत्र प्रमाणाभावादिति योजना । विवादपदम्, रजतधीपदम्, रजतव्यवहारपदत्वात्संमतवदित्यर्थः । समारोपितस्यान्यत्र सत्त्वे मानाभावान्न तदपि साध्वित्याह—*उच्यत इति* ॥ सितभास्वरद्रव्यस्य रजतधीपदत्वं मायावादिभिरप्यङ्गीकृतमिति नान्यत्र सत्त्वसिद्धिरित्यर्थः ॥

वार्तिकम्

ननु—स्वप्ने न सुखाद्यध्यासः संभवति ; तदधिष्ठानानिरूपणात्, आत्मनोऽधिष्ठानत्वे त्वहं सुखमित्येव प्रतीतिः स्यात्, न त्वहं सुखीति । किं तर्हि ? सुखादिस्मृतावनुभवत्वमात्रारोप इति—चेत्, *न* ; जाग्रद्वत्स्वप्नेऽप्यात्मन एव तदारोपाधिष्ठानत्वात् । न चैवमहं सुखमिति प्रसङ्गः ; जाग्रतीव स्वप्नेऽपि धर्मत्वेन तदध्यासाद् इदंत्व-रजतत्वयोरिवाहंत्व-सुखत्वयोः सामानाधिकरण्यानुपपत्तेः ।

पञ्चपादिका

ननु एवं सति वैपरीत्यमापद्यते, रजतमवभासते शुक्तिरालम्बनमिति, नैतत् संविदनुसारिणामनुरूपम्। *ननु* शुक्तेः स्वरूपेणाप्यवभासने संवित्प्रयुक्तव्यवहारयोग्यत्वमेवालम्बनार्थः, सैवेदानीं

पञ्चपादिकाविवरणम्

उच्यते;—केयमन्यथाख्यातिः? अन्याकारं ज्ञानमन्यालम्बनं वा? वस्तुनो वस्त्वन्तरात्मना भासो वा? अन्यथा परिणते वस्तुनि ज्ञानं वा? न तावत्प्रथमः कल्प इत्याह—*नन्वेवं सति वैपरीत्यमिति* ॥ कुतो वैपरीत्यम्? इत्यत आह—*नैतत्संविदनुसारिणामिति* ॥ सर्वत्र यदाकारं संवेदनम्, तदालम्बनमिति नियमे रजताकारसंवेदनविरुद्धं शुक्तिकालम्बनत्वमित्यर्थः। *ननु* न संविदाकारताऽऽलम्बनता सर्वत्र, किन्तु संवित्प्रयुक्तव्यवहारविषयतेति चोदयति—*ननु शुक्तेः स्वरूपेणापीति* ॥

इदं तावदयुक्तम्; नहि व्याघ्र-सर्पादिज्ञानाद्दण्डादिष्वादीयमानेषु व्याघ्रादिज्ञानस्य दण्डाद्यालम्बनम्, नच द्रव्य-गुणादिज्ञानप्रयुक्तया द्रव्य-गुणादिष्वादीयमानेषु द्रव्यादीनामन्योन्यज्ञानालम्बनत्वं प्रसिद्धम्; तस्मात् तदाकार एवालम्बनमिति, नान्याकारं ज्ञानमन्यालम्बनमन्यथाख्यातिरिति बहिरेवोपसंहर्त्तव्यम्। अस्तु तर्हि वस्तुनो वस्त्वन्तरात्मनाऽवभास इति, तत्राह—*अथ तथारूपावभासनमिति* ॥ न तावदत्यन्तभेदवादिनां

ऋजुविवरणम्

—*सर्वत्र यदाकारमिति* ॥ *ननु* व्याघ्रज्ञानाद्विरोधिदण्डबुद्धिर्भवति, तदनन्तरं दण्डे प्रवृत्तिः; अतः कथं संवित्प्रयुक्तव्यवहारभाक्त्वस्य विषयत्वेन व्यभिचारः? इत्याशङ्क्यान्यदुदाहरति—*नच द्रव्यगुणादीति* ॥ ज्ञाने स्वतः पारमार्थिकत्वादिविकल्पानुपपत्तेर्विषयाभिप्रायं कृत्वाऽऽह—*न तावदत्यन्तेति* ॥ भवतु शून्यस्य संसर्गस्य ख्यानम्, ततः

तत्त्वदीपनम्

अन्यथाख्यातिशब्दार्थोऽपि दुर्निरूप इत्याह—*केयमिति*॥ किंशब्दसूचितान् विकल्पानाह—*अन्याकारमिति* ॥ ज्ञानान्यथात्वाभिप्रायेण प्रथमः कल्पः, द्वितीयस्तु स्फुरणान्यथात्वाभिप्रायेण; तृतीयस्तु विषयान्यथात्वाभिप्रायेण। रजतस्य ज्ञानव्यावर्तकत्वमिदमो विषयत्वं चानुभूयते, अतः कुतो वैपरीत्यमित्याह—*कुत इति* ॥ अन्याकारज्ञानस्यान्यालम्बनताया अनुभवपराहतत्वाद्वैपरीत्यमित्याह—*अत आहेति* ॥ अननुरूपत्वमेवाह—*सर्वत्रेति* ॥

किम्—आकारार्पकत्वमालम्बनत्वम्? उत संवित्प्रयुक्तव्यवहारविषयत्वम्? आहो संविज्जनितातिशयाश्रयत्वम्? अथवा भासमानत्वम्? नाद्यः; शुक्ते रजताकारार्पकत्वाभावात्। शुक्तिः, न रजतज्ञानालम्बनम्, तदाकारानर्पकत्वात्; घटादिवदित्यर्थः। द्वितीयमुत्थापयति—*ननु न संविदिति* ॥ संवित्प्रयुक्तव्यवहारविषयत्वेनालम्बनत्वे चोद्ये तदनिराकृत्य पक्षान्तरनिरसनमसङ्गतमेवेत्याशङ्क्यातिफल्गुत्वात्तदुपेक्षितमित्याह—*इदं तावदिति* ॥ कथं फल्गुत्वमिति चेत् तत्र वक्तव्यम्—किं व्यवधानेन संवित्प्रयुक्तव्यवहारविषयत्वम्? उताव्यवधानेन? नाद्यः; व्यभिचारादित्याह—*न हीति* ॥ द्वितीयं प्रत्याह—*नचेति* ॥ द्रव्यार्थिना यदा तदादीयते, तदा द्रव्यज्ञानप्रयुक्तव्यवहारविषयत्वं गुणादेर्दृष्टम्, द्रव्यस्य च गुणज्ञानप्रयुक्तव्यवहारविषयत्वम्, नचेतरेतरज्ञानालम्बनत्वं द्रव्यादीनाम्; अप्रसिद्धेरित्यर्थः। *न तृतीयः*; प्रध्वस्तादेरविषयत्वप्रसङ्गात्, *नापि चतुर्थः*; भासमानत्वं भानकर्मत्वम्? उत तत्प्रयुक्तव्यवहारविषयत्वम्? *नाद्यः*; भविष्यदादेरविषयतापत्तेः, *न द्वितीयः*; नान्तरीयकतया व्यवहारविषयस्य कलधौतमलादेरपि कलधौतज्ञानविषयत्वापत्तेः। तस्मात् तदाकारार्पकस्य विषयत्वं वक्तव्यम्, तच्च नात्रेति शुक्तेरनालम्बनत्वमित्यभिप्रायेणोपसंहरति—*तस्मात्तदाकार इति* ॥ पक्षान्तरमनुवदति—*अस्तु तर्हीति* ॥ विकल्पासहत्वान्नायमपि पक्षः शोभन इत्याह—*तत्राहेति* ॥ पारमार्थिकत्वेऽपीदमालोचनीयम्—किं सामान्यविशेषादेरत्यन्तभेदः?

पञ्चपादिका

रजतव्यवहारयोग्या प्रतिभासते, तत्र किमित्यालम्बनं न स्यात्? अथ तथारूपावभासनं शुक्तेः पारमार्थिकम्? उताहो न? यदि पारमार्थिकम्, नेदं रजतमिति बाधो न स्यात्; नेयं शुक्तिरिति यथा। भवति च बाधः। तस्मान्नैष पक्षः प्रमाणवान्। *अथ* शुक्तेरेव दोषनिमित्तो रजतरूपः परिणाम

पञ्चपादिकाविवरणम्

संसर्गः परमार्थः, ततश्चानिर्वचनीयानभ्युपगमाच्छून्य एव संसर्गः प्रकाशेत। एवं 'खण्डो गौरि'त्यादिसंसर्गप्रत्ययाः सर्व एव विभ्रमाः प्रसज्येरन्निति, बहिरेवैकः पक्षः प्रतिवक्तव्यः॥

अथ भेदाभेदवादी संसर्गसत्यतां ब्रूयात्, तत्राह—*यदि पारमार्थिकमिति*॥ 'खण्डो गौरि'त्यादिवत्सर्वस्य भेदाभेदान्न क्वचिदपि भ्रान्ति-बाधौ, सर्वत्र वा तौ स्यातामित्यर्थः। अस्तु तर्ह्यन्यथापरिणते वस्तुनि ख्यातिरन्यथाख्यातिरिति, तत्राह—*अथ शुक्तेरेवेति*॥ *शुक्तेः परिणामनिराकरणग्रन्थः स्पष्टार्थः*॥

ऋजुविवरणम्

किमित्याशङ्क्याह—*एवं खण्डो गौरित्यादीति*॥ सामानाधिकरण्यस्य तादात्म्यालम्बनत्वात्तस्य चात्राभावादिति भावः। *ननु* तादात्म्यस्य प्रतिभासमानतया सत्त्वम्, न स्वरूपेण; अतः कथमबाधः? इत्याशङ्क्याभिप्रायमाह—*खण्डो गौरित्यादिवदिति*॥ *ननु* अन्यथाख्यातौ बहिष्ठस्यैवावभासः, नान्तरस्य; ज्ञानजन्यत्वे चान्तरता; अतो

तत्त्वदीपनम्

उत भेदाभेदौ? नाद्य इत्याह—*न तावदिति*॥ अत्यन्तभेदवादिनामिति हेतुगर्भविशेषणम्। अस्तु तर्हि अपरमार्थत्वमित्याशङ्क्याह—*ततश्चेति*॥ संसर्गः शून्य एव प्रकाशेतेति संबन्धः॥

शून्य एव चेति कथम्? अनिर्वचनीयस्यापि संभवादित्याशङ्क्याह—*अनिर्वचनीयेति*॥ नच शून्यस्यापरोक्षप्रथोपपद्यत इत्यभिसन्धिः। न केवलम्—'इदं रजतमि'त्यादिप्रत्ययानामेवासत्संसर्गविषयत्वम्, किंतु 'खण्डो गौरि'त्यादीनां प्रत्ययानामपीत्याह—*एवमिति*॥ नच—'खण्डो गौरि'त्यादिप्रत्ययानां न तादात्म्यमालम्बनम्, किं तु समवायः, स च सन्निति न विभ्रमत्वप्रसङ्ग इति—शङ्क्यम्; समवायस्येहप्रत्ययहेतुत्वात्तादात्म्यप्रत्ययासंभवादित्यर्थः। द्वितीयमनुवदति—*अथेति*॥ बाधकप्रत्ययविरोधान्न तस्य सत्यत्वमित्याह—*तत्राहेति*॥ न केवलं तादात्म्यस्याबाध्यत्वप्रसङ्गः, किं तु भ्रान्त्यादिव्यवस्था च न स्यादित्याह—*खण्डो गौरिति*॥ भिन्नाभिन्नविषयत्वेन सर्वप्रत्यययाथार्थ्यादित्यर्थः। भ्रान्ति-बाधयोः प्रसिद्धत्वात्तन्निरसनमशक्यमित्याशङ्क्याह—*सर्वत्र वेति*॥ नियामकाभावादित्यर्थः॥

संसर्गस्याऽसत्त्वेऽप्यपरोक्षप्रथा संभवतीति द्वितीयपक्षमुपेक्ष्य पक्षान्तरमुत्थापयति—*अस्तु तर्हीति*॥ न तावदित्यादेरित्थं वा योजना—विषयबाधाबाधौ विना न स्वतस्तौ स्तो ज्ञान इति विकल्पानुपपत्तिरित्याशङ्क्य, तादात्म्यस्यापरमार्थत्वात्तद्व्यावृत्तबोधस्यापि तथात्वं तद्वैपरीत्याद्वैपरीत्यमिति विकल्पोपपत्तिरित्यभिसंधाय टीकाकृतोपेक्षितम्। द्वितीयं पक्षं प्रतिक्षेप्तुमनुवदति—*न तावदिति*॥ विषयसत्यत्वेन ज्ञानसत्यत्वमित्याद्यमनुवदति—*अथेति*॥ *अथेत्यादेरयमर्थः—सदा परिणामप्रसङ्गं व्यावर्तयति—*दोषेति*॥ परिणामित्वे बाध्यत्वं न स्यादित्याह—*एत-

वार्तिकम्

नचानुभवविरोधेन स्मृतिविपर्यासकल्पना युक्ता; नच संभवत्यपि। नहि स्मृतेरज्ञातसत्त्वमस्ति, येन तत्रानुभवत्वारोपः; स्वप्रकाशत्वात्। अस्वप्रकाशत्वेऽपि तस्याः प्रातीतिकत्व-क्षणिकत्वाभ्यामधिष्ठानत्वानुपपत्तेः। तस्मादपि नानुभवत्वारोपः। *ननु*—एवमपि आत्मनि न स्वप्ने सुखाद्यारोपः

पञ्चपादिकाविवरणम्

"अथ पुनर्दुष्टकारणजन्यायाः प्रतीतेरि"त्यादिनाऽन्यथाख्यातावेव परिणामप्रकारभेदो निराक्रियते, ख्यात्यन्तरनिराकरणं वा ; कथम् ? *अत्राहात्मख्यातिवादी*—बुद्धेरेव रजताकारो न बहिरिति, कुतः ? संप्रयोगव्यतिरेकेणापरोक्षत्वाद् बुद्धिवत्, कथं विज्ञानस्य रजताकारः प्राप्तः ? संस्कारसामर्थ्यादिति वदामः । *तथाहि*—यस्यां ज्ञानसन्ततौ यदा कदाचित्पूर्वं रजतज्ञानमुत्पन्नम् तदेव संस्कार उच्यते । नच विज्ञानजन्योऽन्येषामिव स्थायी क्षणिको वाऽन्यः कश्चिदस्य संस्कारो विद्यते ; विज्ञानमात्रवादात् । स चानेक-

ऋजुविवरणम्

नान्यथाख्यातिनिराकरणमित्याशङ्क्याह—*ख्यात्यन्तरनिराकरणं वेति* ॥ यद्वा—अन्यथाख्यातौ स्वप्न आन्तरस्य ख्यानादात्मख्यातिपक्षस्य पृथङ्निराकरणाभावाद्विषयव्याप्तिन्यायेन तत्परत्वं दर्शयति—*ख्यात्यन्तरनिराकरणं वेति* ॥ कथं ख्यात्यन्तरनिराकरणम् ? न हि ज्ञानादुत्पत्तिः ख्यात्यन्तर इत्याक्षिपति—*कथमिति* ॥ विज्ञानमात्रवादिनः कथं रजताकारत्वमिति पृच्छति—*कथमिति* ॥ कथं विज्ञानवादिनः संस्कार इत्याशङ्क्याह—*तथाहि यस्यामिति* ॥ कथं व्यवहितस्य तादृक्कार्यकरत्वमिति ? तदाह—*स चानेकज्ञानेति* ॥ तत्राव्यवहितस्यांङ्कुरादेरेव कारणत्वम्,

तत्त्वदीपनम्

दिति* ॥ दध्याकारपरिणामोदयानन्तरं तद्विरुद्धक्षीराकारानुपलम्भान्न दध्नो बाधः, इह तु रूप्यविरुद्धशुक्त्याकारोपलम्भाद् बाध इत्याशङ्क्य, परिणामपक्षे विरुद्धाकारोपलम्भोऽपि न स्यादित्याह—*नापीति* ॥ अपरिणामित्वे हेत्वन्तरं समुच्चिनोति—*किंचेति* ॥ कुविन्दापायेऽपि पटस्थितिवत्, दोषनिमित्तत्वे तदभावेऽपि रूप्योपलम्भः स्यादित्यर्थः । निमित्तापाये नैमित्तिकापायस्यापि दृष्टत्वान्मैवमिति शङ्कते—*नन्विति* ॥ तत्राप्यवस्थान्तरोत्पत्त्या पूर्वावस्थाविनाशः, न निमित्तापायमात्रेणेति वक्ष्यति । अङ्गीकृत्य दूषणान्तरमाह—*न तथा सतीति* ॥ "अथ पुनरि"त्यादिना ज्ञानाद्रजतोत्पत्तिमाशङ्क्य निराचकार, तदनुपपन्नम् ; अन्यथाख्यातिवादिना ज्ञानाद्रजतोत्पत्त्यनुपगमादित्याशङ्क्याह—*अथेति* ॥ रूप्याकारेण शुक्तेः परिणत्यसंभवेऽपि दुष्टकारणजरजतसंविदेव रजताऽऽकारेण परिणमत इत्यन्यथाख्यात्येकदेशिनो मन्वते, तन्मतनिरसनार्थोऽयमुपक्रम इत्यविरोधः ॥

"अथ पुनरित्या"देस्तात्पर्यान्तरमाह—*ख्यात्यन्तरेति* ॥ अन्यथाख्यात्यतिरिक्तकेवलख्यातेर्याथार्थ्यान्न भ्रमत्वमिति चोदयति—*कथमिति* ॥ बुद्धिस्थस्य रूप्यस्य बहिर्वत्प्रतिभासाद् भ्रान्तित्वं युक्तमित्याह—*अत्राहेति* ॥ आत्मख्यातिवादीति* ॥ आत्मशब्देन बुद्धिरभिधीयते, तद्रूपस्य रूप्यस्येदन्तया ख्यातिरिति यो ब्रूते, स तथोक्तः । एवकारस्यायोगव्यवच्छेदकत्वशङ्कां निरस्यति—*न बहिरिति* ॥ बाधविरोधादित्यर्थः । प्रमाणाभावान्न रूप्यस्य बुद्ध्याकारतेति शङ्कते—*कुत इति* ॥ मानाभावोऽसिद्ध इत्याह—*संप्रयोगेति* ॥ विमतम्, धीरूपम्, संप्रयोगजज्ञानाविषयत्वे सत्यपरोक्षव्यवहारविषयत्वात् ; संविद्वदित्यनुमानम् । नित्यानुमेयव्यावृत्त्यर्थम्—*अपरोक्षत्वादिति* ॥ घटादिव्युदासार्थम्—*संप्रयोगेति* ॥ विपक्षे बाधकतर्केण पराहतिं शङ्कते—*कथमिति* ॥

ज्ञानस्य रजताकारत्वं स्वाभाविकम् ? उतान्यनिमित्तम् ? नाद्यः ; विज्ञानमात्रवादित्वात्, अत एव न द्वितीयोऽपीति किंशब्दार्थः । अन्यनिमित्तो रूप्याकार इति समाधत्ते—*संस्कारेति* ॥ विज्ञानातिरिक्तसंस्कारस्यानङ्गीकारात् कथं तत्परिप्रापितत्वं रजताकारस्येत्याशङ्क्याह—*तथेति* ॥ ज्ञानजन्यसंस्कारस्य कथं ज्ञानत्वमित्याशङ्क्याह—*नच विज्ञानेति* ॥ ज्ञानातिरिक्तः संस्कारः किं वेद्यः ? उत न ? *नाद्यः* ; तयोः संबन्धानिरूपणात्, *न द्वितीयः* ; व्यवहारगोचरत्वानुपपत्तेः, ततश्च ज्ञानमात्रत्वं संस्कारस्येत्यर्थः । तस्य विजातीयानेकक्षणव्यवहितस्य कथं कारणत्वमित्याशङ्क्याह—*स चेति* ॥ शालिबीजस्याङ्कुरपत्रकाण्डादिव्यवधानेऽपि सजातीयबीजजनकत्ववद् व्यवहितस्यापि ज्ञानस्य जनकत्वं युक्तमित्यर्थः । तत्रापि न बीजस्य बीजान्तरजनकत्वम्, किं तु बीजारम्भका

पञ्चपादिका

उच्यते, *एतदप्यसारम्* ; न हि क्षीरपरिणामे दधनि 'नेदं दधि' इति बाधो दृष्टः ; नापि क्षीरमिदमिति प्रतीतिः, इह तु तदुभयं दृश्यते। किञ्च रजतरूपेण चेत्परिणता शुक्तिः, क्षीरमिव दधिरूपेण, तदा दोषापगमेऽपि तथैवावतिष्ठेत। *ननु* कमलमुकुलविकासपरिणामहेतोः सावित्रस्य तेजसः स्थितिहेतुत्वमपि दृष्टम्, तदपगमे पुनर्मुकुलीभावदर्शनात्, तथेहापि स्यात्, *न* ; तथा सति तद्वदेव पूर्वावस्थापरिणामबुद्धिः स्यात्, न बाधप्रतीतिः स्यात्। *अथ पुनः* दुष्टकारणजन्यायाः प्रतीतेरेव

पञ्चपादिकाविवरणम्

ज्ञानव्यवहितोऽपि कदाचित्सजातीयं रजतज्ञानान्तरमुत्पादयति, शालिबीजमिवानेकाङ्कुरादिकार्यव्यवधानेन पुनः सजातीयबीजान्तरनिमित्तमिति। *अथवा*—तज्जन्यज्ञानसन्तान एव संस्कारः, स च तथाविधज्ञानान्तरादित्यनादिवासनाप्रापितं रजतं बुद्ध्याकारो बहिर्वदवभासत इति ॥

स वक्तव्यः :—किं तद्रजतं जायते ? न वेति ? न चेत्, जायमानस्वरूपं न स्यादाकाशवत्। जायते चेत् न ; अर्थादर्थान्तराभावात्, अथ ज्ञानादेव दुष्टकारणजन्याद्रजतोत्पाद इति, तदाह—*अथ पुनर्दुष्ट-

ऋजुविवरणम्

न व्यवहितस्य बीजादेरित्याशङ्क्य पक्षान्तरमाह—*अथवा—तज्जन्यज्ञानेति* ॥ दुष्टकारणजन्यज्ञानस्य रजतोत्पादनेनोपक्षीणत्वाद्रजताप्रतीतिरित्युक्तम्, तदनुपपन्नम् ; पूर्वोत्पन्नविषयत्वस्य वक्तुं शक्यत्वाद् नाप्रतीतिः। यद्वा—यदाकारत्वेनोत्पत्तिः ; तदवभास्यत्वसंभवः। "यस्याः प्रतीतेरि"त्यनेन भिन्नकालत्वेन तद्विषयत्वं निरस्तम्, तदयुक्तम् ; भिन्नकालस्यालम्बनत्वविरोधित्वाभावात्। "पूर्वोत्तरभावेने"ति साध्याविशिष्टश्च हेतुः। "तदुत्पाद"इत्यनेन तस्माद्रजतादुत्पाद इति प्रतिभाति, तत्र तज्जन्यस्य तद्विषयत्वनिषेधे बाधितविषयमनुमानम् ; भिन्नकालत्वेऽपि ग्राह्यग्राहकभावसंभवात्। तदुक्तम्—"भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः। हेतुत्वमेव युक्तिः स्याद् ज्ञानाकारार्प-

तत्त्वदीपनम्

येऽवयवा अङ्कुरादिष्वनुगताः, त एव बीजान्तरमारभन्त इति न व्यवहितस्य कारणत्वमित्याशङ्क्याह—*अथवेति* ॥ रजतबोधस्तच्छब्दार्थः। प्राक्तनज्ञानस्यापि कथं रजताकारत्वम् ? तत्प्रापकाभावादित्याशङ्क्याह—*स चेति* ॥ तच्छब्देन पूर्वज्ञानगतरजताकारः परामृश्यते। धीरूपत्वेन परमार्थत्वाद् भ्रान्तिबाधासंभव इत्याशङ्क्यान्यथा प्रतीतेस्तत्संभव इत्याह—*बहिर्वदिति* ॥

एवमात्मख्यातिं प्रदर्श्य तद्दूषणार्थमुपक्रमते—*स वक्तव्य इति* ॥ यद्रूप्यं बहिर्भाति, तत् संप्रतिपन्नरूप्यवद् उत्पद्यते ? उत विलक्षणत्वाद् नेति विकल्पार्थः। अनुत्पत्तिपक्षं निरस्यति - *चेदिति* ॥ नित्यत्वानित्यत्वलक्षणविरुद्धधर्माधिकरणत्वान्न तयोरभेद इत्यर्थः। आद्यमनुवदति—*जायते चेदिति* ॥ तत्र वक्तव्यम्—किं तत् स्वतो जायते ? उतान्यस्मात ? नाद्यः ; एकस्मिन् जन्य-जनकतानुपपत्तेः। द्वितीयेऽपि किमर्थात् ? उत ज्ञानात् ? नाद्य इत्याह—*न, अर्थादिति* ॥ ज्ञानव्यतिरिक्तस्यार्थस्याभावादित्यर्थः। द्वितीयमनुवदति—*अथेति* ॥ ज्ञानमात्रस्य रजतजनकत्वं निरस्यति—*दुष्टेति* ॥ एतदपीत्यादिटीकाया अयमर्थः—ज्ञानादर्थोत्पत्तेः क्वचिदप्यदर्शनान्नैतद्युक्तमिति दूषयति—*एतदपीति* ॥ ज्ञानमात्रस्य जनकत्वाभावेऽपि दुष्टकारणजन्यज्ञानस्यार्थोत्पादकत्वं युक्त-

वार्तिकम्

संभवति ; विषयारोपासंभवात्। नहि स्रगादिविषयाध्यासमन्तरा तज्जन्यविशिष्टसुखाद्यारोपः संभवति। नच स्रगादिविषयाध्यासस्तत्र संभवति ; अधिष्ठानाभावादेव। नच—आत्मैवाधिष्ठानमिति—वाच्यम् ;

पञ्चपादिका

रजतोत्पाद इति मन्येत, *एतदपि न सम्यगिव* ; कथम् ? यस्याः प्रतीतेस्तदुत्पादस्तस्यास्तावन्न तदालम्बनत्वम् ; पूर्वोत्तरभावेन भिन्नकालत्वात्, न प्रतीत्यन्तरस्य ; पुरुषान्तरप्रतीतेरपि तत्प्रसङ्गात् । *ननु* किमिति पुरुषान्तरप्रतीतेरपि तत्प्रसङ्गः ? दुष्टसामग्रीजन्मनो हि प्रतीतेस्तदालम्बनम्, *मैवम्* ;

पञ्चपादिकाविवरणम्

कारणजन्यायाः प्रतीतेरेव रजतोत्पाद इतीति* ॥ जनकप्रतीते रजतात्पूर्वकालत्वादतद्विषयत्वात्प्रतीत्यन्तरस्यादुष्टकारणस्य तद्विषयत्वे सर्वप्रतीतिविषयत्वप्रसङ्गात्, दुष्टकारणप्रतीतेश्च रजतजन्यतया तदालम्बनत्वे रजतस्यार्थ-

ऋजुविवरणम्

णक्षमम् ॥" इति । अतो रजतजन्यज्ञानस्य भिन्नकालस्यापि तद्विषयत्वान्नाप्रतीतिः । "न प्रतीत्यन्तरस्ये"-त्यनेन सर्वप्रतीतिविषयत्वापादनं कृतम्, तन्न युक्तम् ; व्यभिचारात्, तथा—"अनुत्पन्नसममेवे"त्युक्तम्, तदप्यनुपपन्नम् ; अप्रतीतिमुपपाद्यानुक्तानुत्पत्त्युपसंहारायोगात्, इत्याशङ्क्याभिप्रायमाह—*जनकप्रतीतेरिति* ॥ स्मृतिप्रमोष-

तत्त्वदीपनम्

मित्याह—*कथमिति* ॥ ज्ञानादर्थसंभवेऽपि तत्प्रतीतिः कथमिति विवेचनीयम्, यथा—प्रतीत्या स्वयमजनितया किं विषयीक्रियते ? उताऽन्यथा ? इति विकल्प्य प्रथमं प्रत्याह—*यस्या इति* ॥ भिन्नकालत्वेन विषय-विषयिभाव-निरसनमनुपपन्नम् ; भविष्यदादेरपि ज्ञानेन विषयीकरणादित्याशङ्क्याह—*जनकेति* ॥ जनकज्ञानसमये रजताभावात् तत्समये च ज्ञानाभावात्तत्रापरोक्षप्रथा न स्यात्, इतरस्यार्थस्य ज्ञानसमसमयत्वाभावेऽपि तद्भास्यत्वं घटते ; अनुमानज्ञानस्यावर्तमानबोधनसमर्थत्वादित्यर्थः । द्वितीयेऽपि किमदुष्टकरणजन्यया प्रतीत्या विषयीक्रियते ? उत दुष्टकरणजन्यया ? इति विकल्प्याऽऽद्यं दूषयति—*प्रतीत्यन्तरस्येति* ॥ द्वितीयेऽपीदं विवेचनीयम् :—किं तां प्रति रजतस्य जनकत्वम् ? उत नेति ? तत्राऽऽद्यं प्रत्याह—*दुष्टेति* ॥ यदर्थक्रियाकारि तत्सदित्यभ्युपगमाद् रजतस्यापि जनकत्वे

वार्तिकम्

'अहं स्रक्' 'अहं घटः' इत्येवं प्रतीत्यापत्तेः । नच—सुखादिवद् धर्मतयैव तत्र तदध्यास इति—वाच्यम् ; तद्धर्मतया स्वातन्त्र्येण 'अयं घटः' 'इयं स्रगि'ति प्रतीतिदर्शनात् । नच स्वप्नवहनाडीमध्ये स्वप्नं पश्यन् तत्तत्पदार्थयोग्यं देशं पश्यति, येन तदधिष्ठानं स्यात् ; अतः स्मृतिकल्पनैव युक्तेति—*चेत्*, न ; आत्मन एव तत्तद्देशविशिष्टपदार्थाध्यासाधिष्ठानत्वात् । नचैवं तेषु तेषु पदार्थेष्वहमुल्लेखप्रसङ्गः ; निष्कृष्टाहंकारस्य साक्षिमात्रस्याधिष्ठानत्वात् । न चैवं—साक्षिणस्तदविद्यायाश्च सर्वसाधारण्यात्सर्वेषां तत्तत्स्वप्नानुभवप्रसङ्ग इति—वाच्यम् ; शुक्तिरजतवद् यद्दोषसंस्काराभ्यां तदुत्पत्तिः, तेनैव तदनुभवात् सर्वसाधारण्यानुपपत्तेः । यथा हि जागरे शुक्तिरजतादिभ्रमे शुक्ति-तदवच्छिन्नसाक्षि-तदविद्यानां साधारण्येऽपि धर्मिज्ञानारोप्यसंस्कार-करणादिदोषाणामसाधारण्यान्न सर्वेषां तद्ग्रहः, एवं स्वप्नेऽप्यविद्यासाक्षिणोः साधारण्येऽपि निद्रादिदोषारोप्यसंस्कारयोरसाधारण्यान्न सर्वेषां तद्ग्रह इति । *ननु*—साक्षि-स्वप्नपदार्थयोर्विषय-विषयिभावेन प्रतीयमानयोः पृथगुपलम्भात् कथं तस्य तदधिष्ठानत्वमिति—चेत्, *नैष दोषः* ; एकस्यापि साक्षिणो वृत्ति-तद्विषययोरवच्छेदकयोर्भेदेन भेदात् तदुभयरूपतोपपत्तेः । नच—साक्षिणोऽज्ञातत्वाभावात् कथमधिष्ठानत्वमिति—वाच्यम् ; तस्यैव सर्वत्राज्ञातत्वात्, तत्सम्बन्धादेवान्येषामज्ञातत्वात् । तस्मादधिष्ठानसत्त्वादुपपन्नः स्वप्नाध्यासः ॥

पञ्चपादिका

प्रतीत्यन्तरस्यापि तद्विधस्य रजतान्तरोत्पादनेनैवोपयुक्तत्वात् प्रथमप्रत्ययवत्। अतोऽनुत्पन्नसममेव स्यात्। तदेवं पारिशेष्यात्स्मृतिप्रमोष एवावतिष्ठेत॥

ननु स्मृतेः प्रमोषो न सम्भवतीत्युक्तम्, तथाच तन्त्रान्तरीया आहुः—"अनुभूतविषया-सम्प्रमोषा स्मृतिरि"ति। का तर्हि गतिः शुक्तिसम्प्रयोगे रजतावभासस्य? *उच्यते*;—नेन्द्रियजज्ञानात्संस्कारजं स्मरणं पृथगेव स्मरणाभिमानशून्यं समुत्पन्नम्, किन्तु एकमेव संस्कारसहिता-

पञ्चपादिकाविवरणम्

क्रियावत्तया सत्त्वप्रसङ्गात्, अतज्जन्यत्वे तद्विषयत्वाभावादप्रतीतमेव रजतं स्यादिति भावः। अन्यथाख्यातिं निराकृत्याख्यातिवादी स्वपक्षमुपसंहरति—*तदेवं पारिशेष्यादिति* ॥ अख्यातिदूषणमप्युक्तमनुस्मारयति—*ननु स्मृतेरिति* ॥

ननु न स्मृतिर्नापि ग्रहणं चेत्, अलौकिकमिदं ज्ञानं कथमिति चोदयति—*का तर्हि गतिरिति*। किं सामग्रयम्? तत्राह—*नेन्द्रियजज्ञानादित्यादिना*॥ *ननु* इन्द्रिय-संस्कारौ चेत्सामग्री, सम्यग्ज्ञानमेवेदं स्यात्,

ऋजुविवरणम्

स्यापि निराकृतत्वात् स्मृतिप्रमोष एवावशिष्यत इत्युपसंहारो न युक्तः; सिद्धान्तवादिनाऽनङ्गीकृतत्वाच्चेत्या-शङ्क्याभिप्रायमाह—*अन्यथाख्यातिमिति*॥ *अख्यातिदूषणमपीति*॥ ख्यात्यन्तरस्यापि विद्यमानत्वान्न पारिशेष्य-संभव इति भावः। "का तर्हि"ति न युक्तम्; प्रसिद्धज्ञानप्रकारोपपत्तेः, इत्याशङ्क्यावतारयति—*ननु न स्मृतिरिति* ॥ "नेन्द्रियजज्ञानादि"त्यनेन संस्कारसहितेन्द्रियेणैकमेव ज्ञानमुत्पद्यत इत्युक्तम्। "कथमेतदि"त्यनेन तदेवैकत्वमाक्षिप्तमिति प्रतिभाति; सन्निहितत्वात्, तथा सत्युत्तरग्रन्थासामञ्जस्यम्; उत्तरग्रन्थे हि दोषजन्यत्वमुक्तम्, न तु तदेकत्वम्। प्रकृतासंगतं च; सामग्र्यनिरूपणात्, पुनरुक्तं च "सा चैकमि"त्यनेन; तेनार्थान्तरमाह—*नन्विन्द्रियसंस्काराविति* ॥ *उच्यते कारणदोष इति* ॥ अनेन शक्तिनिरोधद्वारा संस्कारोद्बोधकत्वं दोषस्योक्तम्,

तत्त्वदीपनम्

सत्त्वं स्यादित्यर्थः। द्वितीयं दूषयति—*अतज्जन्यत्व इति* ॥ जन्य-जनकत्वाभावेऽपि संबन्धान्तरात्तत्प्रतीति-माशङ्क्याह—*एवेति* ॥ संबन्धान्तरानिरूपणान्नैवमित्यर्थः॥

"स्मृतिप्रमोष एवे"त्युपसंहारोऽनुपपन्नः; स्मृति-तत्प्रमोषयोर्मायावादिनाऽनभ्युपगमादित्याशङ्क्याह—*अन्यथेति* ॥ पुनरुक्तिं परिहरति—*अख्यातीति* ॥ प्रत्ययान्तरसमानयोगक्षेमत्वात् प्रश्नानवसर इत्याशङ्क्य तद्वैलक्षण्यमाह—*नन्विति* ॥ किं करणव्युत्पत्त्या सामग्री पृच्छ्यते? उत भावव्युत्पत्त्या ज्ञानम्? आहो कर्मव्युत्पत्त्या विषयः? इति विकल्पार्थः। *उच्यत इत्यादेरयमर्थः—गत्यन्तरानिरूपणात्स्मृतित्वं सिषाधयिषितम्? उत प्रश्नमात्रम्? नाद्य इत्याह—*नेन्द्रियेति* ॥ द्वितीयमुत्थापयति—*किं त्विति* ॥ प्रश्नस्य किं सामग्री विषयः? उत ज्ञानम्? अथवा विषयः? नाद्य इत्याह—*एकमिति* ॥ सामग्रीं दर्शयितुमेकमिति विशेषणम्। यथार्थज्ञानसामग्रीप्रसूतत्वे भ्रान्तित्वं हीयेतेति शङ्कते—*नन्विन्द्रियेति* ॥ विमतम्, यथार्थम्, सम्यग्ज्ञानसामग्रीप्रसूतत्वात्; ग्रहणवदित्युक्तेऽसिद्धो हेतु-रित्याह—*दोषेति* ॥ लोचनस्य पुरोवर्तिसंप्रयोगे शुक्त्यग्राहित्वं कथमिति शङ्कां निराकर्तुं कार्यविशेष इत्युक्तम्।

वार्तिकम्

वस्तुतस्तु—अहंकारविशिष्टस्यापि प्रमातुरधिष्ठानत्वे स्वप्नाध्यासस्य न कश्चिद्दोषः। नच सर्वत्रा-हमुल्लेखप्रसङ्गः; शुक्तित्वादिवद् विशेषांशस्याविद्यावृतत्वेन तदनुल्लेखात्, इदंत्वस्यैवेदं रजतमितिव-

पञ्चपादिका

दिन्द्रियात्। कथमेतत्? *उच्यते* ;—कारणदोषः कार्यविशेषे तस्य शक्तिं निरुन्धन्नेव संस्कारविशेषमप्युद्बोधयति ; कार्यगम्यत्वात्कारणदोषशक्तेः, अतः संस्कारदुष्टकारणसंवलितैका सामग्री। सा

पञ्चपादिकाविवरणम्

स्मृति-ग्रहणवदिति चोदयति—*कथमेतदिति* ॥ दोषसहकृतत्वात् तृतीयमिदं सामग्र्यमित्याह—*उच्यते कारणदोष इति* ॥ *ननु* दोषः प्राप्तकार्यस्य प्रतिबन्धकः, नाधिक्ये हेतुरिति, तत्राह—*कार्यगम्यत्वा-

ऋजुविवरणम्

तदसंगतम् ; पूर्वचोद्यस्यापरिहृतत्वात्, इत्याशङ्क्याभिप्रायमाह—*दोषसहकृतत्वादिति* ॥ भवतु कार्यगम्यत्वं दोषशक्तेः ; तथाऽपि कथमुत्पादकत्वम्? इतरेतराश्रयप्रसङ्गात्—सिद्धे हि भ्रान्तिज्ञाने दोषस्य जनकत्वनिश्चयः ; जनकत्वे च निश्चिते भ्रान्तिज्ञानसिद्धिः—इत्याशङ्क्याभिप्रायमाह—*नचानादेः कार्यानुदयस्येति* ॥ कार्यमप्यनेन व्याख्यातम्। संस्कारोद्बोधेन चरितार्थस्य ज्ञानसाधकत्वकल्पकाभावादिति चोदयति—*ननु दोष इति* ॥ भ्रान्तिरूपकार्यान्यथानुप-

तत्त्वदीपनम्

बहुविषयसंस्कारसंभवेऽपि रूप्यसंस्कारस्यैव कथं कार्यकरत्वमिति शङ्कायां तदुद्बोधकसंभवादित्याह—*संस्कारविशेषमिति* ॥ दोषस्य ज्ञानसामग्र्यन्तर्भावमाक्षिपति—*नन्विति* ॥ प्रतिबन्धकत्वं विपरीतकार्यजनकत्वं च किं न स्यादित्याशङ्क्याह—*नाधिक्य इति* ॥ तैलकलुषितशालिबीजस्य शाल्यङ्कुराजनकत्वमेव दृष्टम्, न यवाङ्कुरजनकत्वमित्यर्थः। विपरीतकार्यस्य दर्शनाद्दोषस्य तद्धेतुत्वमपि कल्प्यत इत्यत आह—*तत्राहेति* ॥

दोषस्य विपरीतकार्यकारितायाः क्वचिदप्यनुपलम्भादग्रहण उपयोगः, कार्यदर्शनं त्वन्यथाऽपि घटत इत्याशङ्क्याह—

वार्तिकम्

दधिष्ठानतावच्छेदकतया प्रकृते भावात्। नच—एवमहं देवोऽहं व्याघ्र इत्यत्राप्यहमुल्लेखो न स्यादिति—वाच्यम् ; तादृशाध्यासेऽहंत्वस्यैव धर्मितावच्छेदकत्वात्, मनुष्यादिविशेषस्यैव तत्राविद्यावृतत्वात्। नच—एवं प्रमातुरधिष्ठानत्वाविशेषेण विनिगमकाभावाद् घटादिष्वपि कदाचिदहमुल्लेखः स्यादिति—वाच्यम् ; भ्रमे स्वतुल्यानुभवसंस्कारस्यापि हेतुत्वात् तत्र तदभावाद् विनिगमककारणसत्त्वेनाहमुल्लेखानुपपत्तेः। न ह्यस्मिन् जन्मनि जन्मान्तरे वा 'घटोऽहम्' इति केनचिदनुभूतमस्ति, येन स्वतुल्यानुभवसंस्कारात्स्वप्ने तथाऽनुभवः स्यात्। नचैवं स्वप्नादिशरीरेऽपि तादृशानुभवो नास्ति ; अस्मिन् जन्मनि तदभावेऽपि जन्मान्तरेऽनादिसंसारे तद्भावानुभवात् तत्संस्कारोपपत्तेः। नच—अहंकाराध्यासस्य प्रातीतिकत्वात् प्रातीतिकस्याज्ञातत्वानुपपत्तेः कथमधिष्ठानत्वमिति—वाच्यम् ; प्रातीतिकस्यापि स्थायित्वभ्रान्त्याऽज्ञातत्वसिद्धावधिष्ठानत्वोपपत्तेः, शुक्तिरजतादौ तथा दर्शनात्। यथा हि शुक्तौ रजतमिति भ्रमादूर्ध्वं तां गोपायति, कालान्तरे च 'तदेवेदं रजतम्' इति तदेव प्रत्यभिजानाति। स्मरति च—'एतावन्तं कालमिदमज्ञातमासीत्' इति। कदाचिच्च तत्रैवेदं रङ्गमिति भ्राम्यति। ततः 'इदं रजतम्, न रङ्गम्' इति तदेवाधिष्ठानमवबुद्ध्य तद्बाधते। नच—शुक्तिरेव रङ्गभ्रमस्याधिष्ठानमिति—वाच्यम् ; परम्परया शुक्तेरधिष्ठानत्वेऽपि साक्षाद्रजतस्यैवाधिष्ठानत्वात् ; अन्यथा रजतसाक्षात्कारात् तद्बाधो न स्यात्। नच—मिथ्यारजतस्य तस्य कथमधिष्ठानत्वमिति—वाच्यम् ; मिथ्यात्वेऽपि सत्याधिष्ठानाभिन्नत्वेन तदवधारणात् सत्यबुद्ध्या तदधिष्ठानत्वोपपत्तेः, अन्यथा शुक्तेरप्यधिष्ठानत्वं कथं ज्ञातं स्यात्?

पञ्चपादिका

चैकमेव ज्ञानमेकफलं जनयति । तस्य च दोषोत्थापितसंस्कारविशेषसहितसामग्रीसमुत्पन्नज्ञानस्योचित-

पञ्चपादिकाविवरणम्

दिति* ॥ नचानादेः कार्यानुदयस्य हेतुर्दोषः ; कृत्याभावात्, किन्तु व्याध्यादिवद्विपर्ययकार्यहेतुर्दोष इति । *ननु* दोषः संस्कारोद्बोधकृच्चेत्, न सामग्र्यामन्तर्भवतीति न तृतीयमिदं सामग्र्यमिति, तत्राह—*अतः संस्कार-दुष्टकारणसंवलितेति* ॥ अथ ज्ञानस्यैक्यं चोद्यते, तत्राह—*सा चैकमेव ज्ञानमिति* ॥

तत्त्वदीपनम्

नचानादेरिति ॥ अग्रहणं ग्रहणप्रागभावः, तस्य चानादित्वान्न दोषसाध्यतेत्यर्थः । किं तर्हि दोषकृत्यमिति पृच्छति—*किंत्विति* ॥ अन्यथाबोध इत्याह—*विपर्ययेति* ॥ यत्तूक्तं दोषस्य न विपरीतकार्यकरत्वमिति, तत्र किं दोषस्य विपरीतकार्यकरत्वाभावः क्काचित्कः ? उत सार्वत्रिकः ? इति विकल्प्याऽऽद्यमङ्गीकृत्य द्वितीयं दूषयति—*व्याध्यादिवदिति* ॥ भस्मकलक्षणव्याधेर्बह्वन्नदाहकत्वं दावाग्न्युपहतवेत्रबीजस्य कदल्यङ्कुरजनकत्वं चोपलब्धम्, ततश्च काचादेरपि विपर्ययहेतुत्वं युज्यत इत्यर्थः ॥

प्रकारान्तरेण दोषस्य सामग्र्यन्तर्भावमाक्षिपति—*ननु दोष इति* ॥ दोषान्वय-व्यतिरेकयोः संस्कारोद्बोधविषय-तयाऽन्यथासिद्धेर्न दोषस्य विपर्ययहेतुत्वमित्यर्थः । उद्बोधकत्वं बोधजनकत्वं च किं न स्यात् ? इत्याशङ्क्याह—*न तृतीयमिति* ॥ उभयहेतुत्वे प्रमाणाभावादित्यर्थः । विपर्ययानुपपत्त्या दोषस्य तद्धेतुत्वम् । नच संस्कारोद्बोध-कत्वेनान्यथासिद्धिः ; संस्कारोद्बोधस्य दोषावान्तरव्यापारतया तत्करणत्वाविघातित्वात्, इत्याशयेनाह—*तत्राहेति* ॥ *संवलिता = संवलनलक्षणा सामग्री । प्रश्नोत्तरमभिधाय ज्ञानप्रश्नोत्तरं दर्शयितुं प्रश्नमाह—*अथेति* ॥ किमेतज्ज्ञान-मेकम् ? उत नानेति प्रश्नार्थः । ज्ञानैक्याभिधानं सिद्धान्तविरुद्धमिति चोदयति—*नन्विति* ॥ विरोधं दर्शयितुं सिद्धान्तमाह—*इदमेति* ॥

वार्तिकम्

ब्रह्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वात्, व्यावहारिक-प्रातीतिकपरिभाषाया अधिष्ठानानधिष्ठानत्वा-प्रयोजकत्वात्, प्रातीतिकरजतेऽपि व्यवहारस्य प्रदर्शितत्वात् । तस्मात्तत्तद्भावापन्नं ब्रह्मैव सत्यमविद्यया सर्वभ्रमाधिष्ठानमिति वाच्यम्—आकाशभावापन्नमिव वायोरधिष्ठानम् । तच्च शुक्तिभावापन्नस्येव रजत-भावापन्नस्याप्यविशिष्टम् ; अन्यथा तद्बोधाद्बाधानुपपत्तेरुक्तत्वात् । नच—एवमुक्तप्रकारेण प्रातीतिक-स्यैव सर्वत्राज्ञातत्वोपपत्तेर्न ब्रह्मव्यतिरिक्तमज्ञातसद्वस्त्वस्तीति—वाच्यम् ; इष्टापत्तेः । तथाच वसिष्ठः—"अविद्यायोनयो भावास्सर्वे भो बुद्बुदा इव । क्षणमुद्भूय गच्छन्ति ज्ञानैकजलधौ लयम् ॥" इति । बाल-बोधनार्थमेव तत्प्रक्रियारक्षणात्, सत्तावदज्ञातसत्त्वस्यापि तत्र प्रातीतिकत्वात् । तस्माद् यथा प्रातीतिकस्य रजतस्य रङ्गं प्रत्यधिष्ठानत्वम्, एवं प्रातीतिकस्याप्यहङ्कारस्य स्वप्नभ्रमाधिष्ठानत्वमविरुद्धम् ; अन्यथा जागरेऽपि तस्मिन् देहाद्यध्यासो न स्यात् । नच—आत्मन्येव केवले देहाद्यध्यासो नाहङ्कार-विशिष्ट इति—वाच्यम् ; तथा सति 'अहं मनुष्यः' इति तत्राहंत्वप्रतीत्यनुपपत्तेः । तस्मात् स्वप्नभ्रमस्य प्रमात्रधिष्ठानत्वेऽपि न कश्चिद्दोषः । नचैवं तत्प्रामाण्यप्रसङ्गः ; प्रमातुः शुक्त्यादिवद् विषयभावेन विवर्तनात् प्रमातृत्वाभावेन स्वप्नभ्रमस्य प्रामाण्यानुपपत्तेः । अपि चास्त्यन्तःकरणचतुष्टयम्—मनो बुद्धिरहङ्कारश्चित्तं चेति ; एकस्याप्यन्तःकरणस्यार्थक्रियाभेदेन चतुर्धा विभागात्, अनुभवभेदाच्च—'स्मराम्य-हम्, मनो मेऽन्यत्र गतम्, चित्तं विशकलितम्, बुद्धिर्मे प्रनष्टा च' इति ॥

तत्र यद्ययमाग्रहो नाहमि घटादिस्वप्नप्रपञ्चाध्यासः ; 'घटमहं जानामी'ति तदनुभवे ज्ञातृ-ज्ञेय-ज्ञानानां

पञ्चपादिकाविवरणम्

ननु इदमा संप्रयोगादन्तःकरणपरिणामज्ञानमेकमुत्पद्यते, न तद् रजतं तत्संसर्गं वा विषयीकर्तुमीष्टे ; मिथ्यावस्तुनि देशान्तरादिगते वा संप्रयोगानुपपत्तेः, चक्षुरुन्मीलनान्वय-व्यतिरेकयोरधिष्ठानज्ञानोपक्षयादन्यथा-सिद्धेः, नापि संस्काराद्रजतांशावगमः ; स्मृत्यनभ्युपगमात्, नापि दोषः स्वयमेव कस्यचिद् ज्ञानस्य हेतुर्दृष्टः ; ज्ञानकारणानामेव कार्यविशेषनिमित्तत्वात्। अतो न रजत-तत्सम्भिन्नशुक्तिविषयमेकं ज्ञानं समस्ति, किं त्वविद्यैव बाह्यदोषनिमित्तकारणापेक्षया रजताकारेण साक्षिचैतन्यस्य रजतावच्छेदज्ञानाभासाकारेण च परिणम-

ऋजुविवरणम्

पत्त्या ज्ञानहेतुत्वमपीति परिहाराभिप्रायः। अन्वय-व्यतिरेकाभ्यामैन्द्रियकत्वं निश्चीयत इत्याशङ्क्याह—*चक्षुरुन्मील-नेति* ॥ तर्हि संस्कार एव कारणमित्याशङ्क्याह—*नापि संस्कारादिति* ॥ तर्हि दोषादेव प्रतीतिरित्याशङ्क्याह—*नापि दोष इति* ॥ *"किन्त्वविद्यैवे"ति* ॥

तत्त्वदीपनम्

संप्रयोगसमुत्थज्ञानस्य रजत-तत्संसर्गविषयत्वाद् ज्ञानैक्यमाशङ्क्य, किं तद् इदंमात्रसंप्रयोगजम्, ? उत रजतादि-संप्रयोगजमपीति विकल्प्याऽऽद्यं प्रत्याह—*न तद्रजतमिति* ॥ सकलविषयत्वप्रसङ्गादित्यर्थः। द्वितीयं प्रत्याह—*मिथ्येति* ॥ मिथ्यावस्तुनः प्रतिभासमात्रशरीरत्वात् प्रतिभासात् प्रागिन्द्रियसंयोगायोगात्, देशान्तरस्थस्य तु व्यवहितत्वादित्यर्थः। इन्द्रियान्वय-व्यतिरेकाभ्यामैन्द्रियकत्वं रजतादेरनुभूयत इत्याशङ्क्याह—*चक्षुरुन्मील-नेति* ॥ रूप्यज्ञानहेत्वधिष्ठानज्ञानविषयत्वेनान्यथासिद्धिरित्यर्थः। रजतज्ञानमनैन्द्रियकं चेत्, कीदृशं तर्हीदमित्या-शङ्क्याविद्यापरिणामत्वं दर्शयितुं कारणान्तरं प्रतिषेधति—*नापीति* ॥ *स्मृत्यनभ्युपगमादिति* ॥ स्मृतित्वानभ्यु-पगमादित्यर्थः। दोषस्य हेतुत्वमाशङ्क्य निरस्यति—*नापीति* ॥ ज्ञानमात्रजनकत्वेन संमतेन्द्रियादेर्विशेषज्ञान-जनकत्वदर्शनाद् दोषस्य चातथात्वान्न तज्जनकत्वमित्यर्थः ॥

चक्षुर्दोषयोः प्रत्येकं भ्रान्त्यजनकत्वेऽपि मिलितयोर्जनकत्वं किं न स्यात्? इत्यत आह—*अत इति* ॥ दुष्टं चक्षुर्देशान्तरवर्त्यपि रूप्यं गृह्णीयाच्चेत्, तर्ह्यन्तरालवर्तिनां सर्वेषां ग्रहणप्रसङ्ग इत्यर्थः। भ्रान्त्यभावाद् 'इदं रजतमि'ति व्यवहार एव विलयमियादिति शङ्कते—*किंत्विति* ॥ रूप्य-तज्ज्ञानयोरविद्याधीनोद्भवत्वाद् व्यवहारसंभव इत्याह—*अविद्येति* ॥ सदा परिणामप्रसङ्गं व्यावर्तयति—*बाह्येति* ॥ दुष्टलोचनपुरोवर्तिद्रव्यसंयोगादिदंमात्र-विषयं ज्ञानमुत्पद्यते, तदा चेदमाकारावच्छिन्नचैतन्याविद्याक्षोभः संजायते, सा च क्षुब्धा सदृशसंदर्शनरागसमुद्बुद्ध-संस्कारसध्रीचीना रूप्याकारेण परिणमत इत्यर्थः। रूप्यज्ञानाभासमन्तरेण रूप्यव्यवहारासंभवाद् दोषोद्बुद्धरजत-

वार्तिकम्

त्रयाणामपि पार्थक्येनावभासनात्, यद्यपि च तत्र घटादिवदहंभावोऽपि कल्पित एव, स्वप्नदेहस्य कल्पित-त्वात्, देहाहंभावमात्रेण तज्ज्ञातृत्वानुपपत्तेः ; तथापि मास्तु नामाहङ्कारः स्वप्नाधिष्ठानम्, तुष्यतु च भवान्, मनस्तु तदधिष्ठानं भविष्यति। मनो हि चक्षुरादिद्वाराभावात् करणभावान्निवृत्त्य साक्षिचैतन्य-विषयभावमापन्नं सत् स्वावच्छिन्नसाक्ष्यविद्यया निद्रादिदोष-तत्तत्संस्कारैश्च तत्तद्भावेन शुक्तिरिव रजतरूपेण विवर्तते। तदविद्या च बुद्धिभावापन्नैव, न तदनापन्ना। एवंच सति बुद्धेरेवावस्थान्तरमिति समर्थितं भवति ; अन्यथा तत्प्रसिद्धिबाधापत्तेः, "सधीः स्वप्नो भूत्वा" "ध्यायतीव लेलायतीव" इत्यादि-श्रुतिबाधापत्तेश्च। न च—एवं बुद्धिवृत्तित्वे बाधो न स्यादिति—वाच्यम् ; तत्कालं तदबाधस्येष्टत्वात्। जाग्रति च योग्यानुपलब्ध्या बहिः स्वप्नदृष्टविषयाभावनिश्चयेन तद्बाधोपपत्तेः। बुद्धिवृत्तित्वाविशेषेऽपि सुखादीनां बहिरयोग्यत्वाद् योग्यानुपलब्धेरभावेन तया तेषां बाधानुपपत्तेः। परोक्षवृत्तीनां च विषय-

पञ्चपादिकाविवरणम्

माना स्वकार्येण सह साक्षिचैतन्यस्य विषयभावं प्रतिपद्यत इति ते मतम्, तत्र कथमेकज्ञानत्वमिति ? तत्राह—*एकफलमिति* ॥ विषयावच्छिन्नं हि फलमवभासते, न ज्ञानावच्छिन्नम् । विषयश्च सत्यमिथ्या-

ऋजुविवरणम्

अत्रेयं संप्रदायवित्प्रदर्शितदर्शनस्थितिः—प्रथमं दोषसहितेन्द्रियेणेदंमात्रविषयं ज्ञानमुत्पद्यते । तच्चान्तः-करण-वृत्ति-विषयेष्वेकतया चैतन्यमभिव्यनक्ति । तत्र दुष्टकारणजन्यवृत्त्या चैतन्यस्थाऽविद्या संक्षुभिता रूप्यसंस्कारवशादिदमंशावच्छिन्नचैतन्यस्था रूप्याकारेण विवर्तते । रूप्यज्ञानसंस्कारवशाद् वृत्त्यवच्छिन्नचैतन्यस्था रूप्यज्ञानाभासाकारेण परिणमते । दुष्टकारणजनितवृत्त्युपरमे तदभिव्यक्तचैतन्योपरमाच्चैतन्याधिष्ठानं रजतं स्वोपादाने लीयते, तादृशज्ञानान्तरे पुनरुत्पद्यत इति । *ननु* आभासरजते मुख्यजात्यनङ्गीकाराद्रूप्यशब्दस्य पुनर्व्युत्पत्त्या भवितव्यम्, *नैवम्* ; रूप्यविषयशब्दसंजल्पितज्ञानजन्यसंस्कारस्य कार्यद्वयम्—ज्ञानोत्पादकत्वं शब्दस्मारकत्वं च । तत्र ज्ञानोत्पादकांशस्य दोषस्पृष्टत्वात् सत्यरजतं विहाय रजताभास-तज्ज्ञानोत्पत्तौ हेतुर्भवति ; शब्दस्मारकांशे तु दोषास्पृष्टत्वात्सत्यरूप्यवाचकशब्दं ज्ञानाभासविषये प्रयोजयतीति न व्युत्पत्त्यपेक्षा । *रजतावच्छेदेति* ॥ *अयमर्थः*—अवच्छेद एव ज्ञानाभासः, तदाकारेणेति, यद्वाऽवच्छेदनिमित्तज्ञानाभासाकारेणेति । कथमेकफलत्वेन ज्ञानैकत्वम् ? ज्ञानभेदे तत्फलभेदादित्याशङ्क्याभिप्रायमाह—*विषयावच्छिन्नं हीति* ॥ *ननु* इदमो रजतस्य च विषयस्य भेदात्कथं विषयतोऽप्येकत्वमित्याशङ्क्याह—*विषयश्चेति* ॥ यद्यपि वृत्तिभेदः, विषयाकारोऽपि कथंचिद्भिद्यते ; तथाऽपि पूर्वाभिव्यक्तस्यैवाभिव्यञ्जकान्तरनैरपेक्ष्येण विशिष्टविषयावच्छेदान्न फलभेदः ; अभिव्यञ्जकभेदे हि फलभेदो भवेत्, मिथ्यारजत-तज्ज्ञानयोश्च नाभिव्यञ्जकत्वमिति भावः । मिथ्याऽऽलम्बनं विषयो यस्य तत् । मिथ्येति ज्ञानमिथ्यात्वमुक्तमिव

तत्त्वदीपनम्

ज्ञानसंस्कारसहायेदमाकारवृत्तिप्रतिबिम्बितचैतन्यस्थाऽविद्या ज्ञानाभासाकारेण परिणमत इत्याह—साक्षीति* ॥ चैतन्यस्य रजतावच्छेदो रजतसंबन्धस्तद्धेतुर्वा ज्ञानाभासः, तदाकारेणेत्यर्थः । तस्य चाचेतनत्वेन स्वविषयव्यवहारजनकत्वानुपपत्तेः सविलासाविद्या साक्षिविषयतां भजत इत्याह—*स्वकार्येणेति* ॥ ज्ञानभेदात् तदवच्छिन्नं फलमपि भिद्यत इति कथमेकफलत्वम् ? तत्राह—*विषयेति* ॥ घटस्फुरणं पटस्फुरणमिति विषयव्यावृत्ततया स्फुरणमुपलभ्यते, न ज्ञानविशिष्टतयेत्यर्थः । विषयस्यापि सत्यानृतरूपेण भिन्नत्वात् कथं तदवच्छिन्नफलैक्यमित्याशङ्क्याह—*विषयश्चेति* ॥

वार्तिकम्

सम्बन्धाभावादेवाबाधः ; विषयसहोत्पन्नत्वस्यैव जन्यापरोक्षभ्रमावच्छेदकत्वादित्युक्तत्वात् । नच—एवं जाग्रत्कालीनशुक्तिरजतादिभ्रमोऽपि बुद्धिभावापन्नाविद्यापरिणामः स्यात् ; तथाच न तदुपादानतयाऽनाद्यविद्यासिद्धिरिति—वाच्यम् ; शुक्तीदमंशेन बुद्धेः सम्बन्धे सत्यपि तद्विशेषांशेन सम्बन्धाभावात्, भावे वा दोषेणोपघातात् तद्विषयभ्रमजनकत्वानुपपत्तेः । नच बुद्धेस्तद्विषयत्वे तत्र भ्रमोत्पत्तिरपि संभवति ; तथा सति तस्या एव विशेषदर्शनत्वेन तद्विरोधित्वात्, तज्जनकत्वस्य तु तद्दशायां सत्त्वात् । अतः शुक्तिभासकसाक्षिचैतन्याऽऽवारकाज्ञानस्यैव रजतभ्रमोपादानत्वम्, न तद्भासकबुद्धेरिति युक्तमुत्पश्यामः । *ननु*—एवं सति बुद्धिनिष्ठतया रजतभ्रमो न प्रतीयेत, प्रतीयते च तन्निष्ठतया—'अहं रजतं जानामी'ति—चेत्, *नैष दोषः*; बुद्धिवृत्त्यवच्छिन्नशुक्तिविषयकाज्ञानसाक्षिचैतन्यनिष्ठत्वेन तद्भ्रमस्य बुद्ध्याश्रयतया प्रतीत्युपपत्तेः । अत एव न तस्य सर्वसंवेद्यतापत्तिरपि । नच—एवं स्वप्नभ्रमेऽप्ययं दोषः ; बुद्धेर्मनोग्राहकत्वेन तदावारकत्वानुपपत्तेरिति—वाच्यम् ; बुद्धेरात्मनि वृत्तिविशेषेण तद्ग्राहकत्वसिद्धेः,

पञ्चपादिका

मेव शुक्तिगतमिथ्यारजतमालम्बनमवभासते। तेन मिथ्यालम्बनं ज्ञानं मिथ्याज्ञानम्, न स्वतो ज्ञानस्य

पञ्चपादिकाविवरणम्

वस्तुनोरन्योन्यात्मतयैकतामापन्नः, तेनैकविषयावच्छिन्नफलैकत्वोपाधौ सत्यमिथ्याज्ञानद्वयमप्येकमित्युपचर्यत इति भावः। अथ विषयः कथमिति? तदाह—*तस्य चेति* ॥ कुतो रजतस्य मिथ्यात्वम्? इत्यत आह—*तेन मिथ्यालम्बनमिति* ॥ भावाभावज्ञानयोर्मिथ्यात्वप्रसिद्ध्यभावादिदं ज्ञानसमवायिमिथ्यात्वमनिर्वचनीयार्थतामेव गमयतीत्यर्थः ॥

संप्रयुक्तेऽर्थे संप्रयोगो निरपेक्षो ज्ञानकारणम्, संस्कारश्च पूर्वानुभूतस्मृतौ निरपेक्षः; ततश्च निरपेक्षकारणद्वय-

ऋजुविवरणम्

प्रतिभाति; तथा सति व्यधिकरणत्वम्, अर्थमिथ्यात्वस्य पृष्टत्वात्। इतरेतराश्रयश्च—ज्ञानमिथ्यात्वेनार्थमिथ्यात्वम्, अर्थमिथ्यात्वेन ज्ञानमिथ्यात्वम्—इत्याशङ्क्य व्याचष्टे—*भावाभावेति* ॥ मिथ्यात्वस्यालम्बनमाश्रयो यत्तन्मिथ्येति विग्रहं दर्शितवान् "अनिर्वचनीयार्थतामि"त्यनेन। *अथवा*—ज्ञानमिथ्यात्वेऽपि कथमर्थमिथ्यात्वम्? प्रमाणानुपन्यासात्, यद्वा—एवमपि कथं तदभिमतमिथ्यात्वम्? इत्याशङ्क्यार्थापत्तिमुक्तां दर्शयति—*भावाभावेति* ॥ यद्वा—मिथ्याऽऽलम्बनं मिथ्याविषयमित्येतन्मिथ्याज्ञानमिति प्रसिद्ध्या सिद्ध्यतीत्युक्तम्। *ननु*—ग्रहणाद्भिन्ना स्मृतिर्न संभवतीत्युक्तम्, कथं पुनः प्रत्यवस्थानम्? इत्याशङ्क्याह—*निरपेक्षकारणेति* ॥

तत्त्वदीपनम्

ततश्चौपचारिकमेकत्वमित्याह—*तेनेति* ॥ किं विषयः पृच्छ्यत इति तृतीयं कल्पमनुवदति—*अथ विषय इति* ॥

मिथ्या रजतमालम्बनमित्याह—*तदाहेति* ॥ मिथ्यारजतं कथमालम्बनम्? तन्मिथ्यात्वासिद्धेरिति शङ्कते—*कुत इति* ॥ मिथ्यालम्बनमित्यत्र मिथ्यावस्तुविषयं ज्ञानं मिथ्याज्ञानमित्युक्तमयुक्तम्, मिथ्यात्वासिद्धेरपरिहितत्वादित्याशङ्क्याह—*भावेति* ॥ न सज्ज्ञानं भ्रमः, आत्मज्ञाने व्यभिचारात्; नाप्यसज्ज्ञानम्, तुच्छज्ञाने व्यभिचारात्; तेन रजतज्ञानमिथ्यात्वप्रसिद्ध्यनुपपत्त्या रजतस्य मिथ्यात्वमुपेयमित्यर्थः। रजतज्ञानस्येति पाठस्यायमर्थः—नेदं ज्ञानमिति बाधानुपपत्तेः कथं दुष्टकारणजन्यत्वं तस्येत्याशयवान् शङ्कते—*कुत इति* ॥ अर्थमिथ्यात्वे तदालम्बनबोधस्य बाध्यत्वसिद्धिः, तदेव कुतः? इत्यत आह—*भावेति* ॥ टीकायां ज्ञानैक्यं तात्पर्यग्रहसंप्रयुक्तमिति नोपपद्यत इत्युक्तम्, तदिष्टमेव; अन्तःकरणाविद्यापरिणामलक्षणज्ञानद्वयाङ्गीकारादित्याशङ्क्य तात्पर्यमाह—*संप्रयुक्त इति* ॥ धूमसंयोगस्य बह्निबोधनेन निरपेक्षत्वम्, तदर्थमाह—*संप्रयुक्त इति* ॥ संस्कारस्याप्यनुमित्यादिजनने सापेक्षत्वम्, तदर्थमाह—*पूर्वेति* ॥ फलितमाह—*ततश्चेति* ॥ ग्रहण-स्मरणरूपेण भिद्यत इत्यर्थः ॥

वार्तिकम्

साक्षात् साक्षिणैव तद्ग्रहात्। नच—एवं मनसोऽज्ञानत्वं न स्यादिति—वाच्यम्; अज्ञानसाक्षिसम्बन्धकालं तदुपपत्तेः। नच—एवं बुद्धि-मनसोरभेदाद् ज्ञाप्य-ज्ञापकभाववदावरणीयावारकभावोऽपि न संभवतीति—वाच्यम्; स्वतो जडत्वेनांशभेदात्तदुपपत्तेः। नच—एवमंशभेदेन ज्ञाप्य-ज्ञापकभावोऽपि स्यादिति—वाच्यम्; इष्टापत्तेः, ज्ञाप्य-ज्ञापकभावस्यैव शुक्तिरजतभ्रम इव तयोरावरणीयाऽऽवारकभावत्वात्। यथाहि—शुक्तौ रजतभ्रान्तिः शुक्तिविषया सती प्रमाणमात्रविषयां तां स्वरूपेण ज्ञापयितुमशक्नुवानाऽन्यथा-स्वयोग्यमिथ्यारजतात्मना ज्ञापयन्ती तदावारिका भवति, तद्वद् बुद्धिरपि मनोविषया सती साक्षिमात्रभास्यं मनोऽयोग्यत्वात् स्वरूपेण ग्रहीतुमशक्नुवानाऽन्यथा स्वयोग्यविषयाकारेण परिणममाना तथा

पञ्चपादिका

मिथ्यात्वमस्ति, बाधाभावात्। भिन्नजातीयज्ञानहेतुसामग्र्योः कथमेकज्ञानोत्पादनमिति चेत्, नैष

पञ्चपादिकाविवरणम्

जन्यत्वाद् ज्ञानद्वयमेव निरन्तरोत्पन्नमित्यख्यातिवादी चोदयति—*भिन्नजातीयज्ञानेति* ॥ ज्ञानभेदे हि निरन्तरोत्पत्तावपि न प्रवृत्तिकार्योदयः सम्भवति ; तत्र यथा वर्णज्ञानेषु क्रमवर्तिषु ज्ञानकार्योदयान्यथानुपपत्त्या पूर्व-पूर्ववर्णसंस्कारसहितमन्त्यवर्णज्ञानमेव हेतुत्वेन कल्प्यते कारणयौगपद्याय, तथा प्रवृत्तिकार्यानुपपत्तिरेव ज्ञानैक्यं कल्पयति, किं कारणभेदेनेति परिहरति—*नैष दोष इति* ॥ *ननु* कारणभेदात्कार्यभेदोऽप्यनु-

ऋजुविवरणम्

कथं प्रवृत्तिरित्याशङ्क्याह—*निरन्तरोत्पन्नमिति* ॥ *ननु*—सर्वैरपि संभूय भ्रान्तिजनकत्वमङ्गीक्रियते, कथमाक्षेप इत्याशङ्क्याह—*अख्यातिवादीति* ॥ अत्र कार्यमेव निरपेक्षकारणप्राप्तं ज्ञानभेदं निराकर्तुं समर्थमिति वदितुं तस्यानन्यथासिद्धिं दर्शयति—*ज्ञानभेदे हीति* ॥ *ननु*—कारणनैरन्तर्येऽपि कार्यान्यथानुपपत्त्या कारणयौगपद्याश्रयणं क दृष्टमित्याशङ्क्य, दृष्टान्तमाह—*तद्यथेति* ॥ अथवा—कारणभेदाद् ज्ञानभेदे कार्यान्यथानुपपत्त्या च ज्ञानैक्ये प्राप्ते कार्यं विहाय यत्र कारणशक्तिर्विज्ञायते, तत्र कारणानुरोधित्वात्कार्यस्य दौर्बल्यम्, अथवा—विरुद्धाव्यभिचारित्वेन सन्देह एव स्यादित्याशङ्क्य कार्यस्यैव प्राबल्यं दृष्टान्तेन साधयति—*तद्यथा वर्णज्ञानेष्विति* ॥ *ननु*—लिङ्गदर्शन-

तत्त्वदीपनम्

ज्ञानभेदे प्रवृत्त्यनुपपत्तिशङ्कां निरस्यति—*निरन्तरेति* ॥ निरन्तरोत्पन्नज्ञानाभ्यां विशिष्टप्रवृत्तिसिद्धेः किं ज्ञानैक्यकल्पनया ? इत्याशङ्क्य विशिष्टप्रवृत्त्यनुपपत्त्या एकं ज्ञानमाश्रयणीयमित्याह—*ज्ञानभेद इति* ॥ संसृष्टव्यवहारस्य संसर्गज्ञानपुरःसरत्वदर्शनात् पूर्वज्ञानस्य चोत्तरज्ञानव्यवहितत्वात् प्रवृत्तिजनकत्वासंभवादेकं ज्ञानमास्थेयम्। यद्यपि रजतज्ञानस्य प्रवृत्तिं प्रत्यव्यवहितत्वम् ; तथाऽपि न तस्य प्रवर्तकत्वम् ; संसर्गज्ञानस्य प्रवर्तकत्वेनान्यत्र क्लृप्ततया प्रयोजकद्वैविध्यापातादित्यर्थः। निरन्तरोत्पत्तावपि कारणयौगपद्याभावे कार्याभाव इत्यत्र दृष्टान्तमाह—*तत्र यथेति* ॥ एकैकस्माद्वर्णाद् नार्थबोधो दृष्टः ; नापि मिलितात् ; तदसंभवात्, मिलितस्याप्यनुपलब्धस्य बोधकत्वे सदोपलम्भापातादुपलब्धानां बोधकत्वं वक्तव्यम्, नच तदुपपद्यते ; क्रमेणोच्चार्यमाणानां क्रमेण प्रतीतेः, तस्मादेकैकवर्णानुभवसंस्कारसहितान्त्यवर्णोपलम्भस्य हेतुत्वम् ; अन्यथा पदार्थबोधानुपपत्तेरित्यर्थः ॥

कारणभेदस्य कार्यभेदव्यापकत्वात्कथं ज्ञानैक्यम् ? इति चोदयति—*ननु कारणेति* ॥ भिन्नकार्यजनकयोरपि संस्कारसंप्रयोगयोर्दोषसंनिधानात् कार्यान्तरजनकत्वम्, स्वरूपेण वेत्राङ्कुरजनकस्यापि वेत्रबीजस्य सहकार्यनुरोधेन कदल्यङ्कुरजन-

वार्तिकम्

ज्ञापयन्ती तद्दावारिका भवेदित्यविरोधः। *ननु* एवं तर्हि स्वप्नविषयवद् जाग्रद्विषया अपि बुद्धिविकारा भवेयुः ; अविशेषेणावस्थान्तरस्य बुद्धिधर्मत्वात्। नचैवं सति व्यवहारलोपप्रसङ्गः ; स्वप्नव्यवहारवज्जाग्रद्व्यवहारस्याप्युपपत्तेः, इन्द्रियादिद्वारा कल्पनाया अपि तद्वदेवोपपत्तेः, बाधाबाधव्यवहारस्यापि तदवस्थायामिवात्राप्यविशेषात्, स्वप्नेऽपि स्वप्नबाधस्य दर्शनादिति—चेत्, *नैष दोषः ; दृष्टिसृष्टिवाद* एतस्य पक्षस्येष्टत्वात्। तथाचोक्तं वसिष्ठेन—"द्वैतं यथा नास्ति चिदात्मजीवयोस्तथैव भेदोऽस्ति न चित्तजीवयोः। यथैव भेदोऽस्ति न चित्तजीवयोस्तथैव भेदोऽस्ति न चित्तसर्गयोः॥" इति ॥

यद्वा—मनोऽवच्छिन्नसाक्षिचैतन्यस्थमूलाविद्यापरिणामोऽस्तु स्वप्नप्रपञ्चः। नचैवं तस्य बुद्ध्यवस्थात्वविरोधः ; जगतो ब्रह्मजत्ववत् तद्विवर्तत्वेन तदुपपत्तेरिति। सर्वथाऽप्यधिष्ठानसत्त्वादुपपन्नः स्वप्नाध्यासः। तथाच तत्र नाव्याप्तमध्यासलक्षणमिति ॥

पञ्चपादिका

दोषः ; दृश्यते हि लिङ्गज्ञान-संस्कारयोः सम्भूय लिङ्गिज्ञानोत्पादनम्, प्रत्यभिज्ञानोत्पादनञ्चाक्ष-संस्का-

पञ्चपादिकाविवरणम्

मीयत इति, नेत्युदाहरणमाह——*दृश्यते हीति* ॥ *ननु* तत्रापि कारणभेदाद् ज्ञानभेद इति, नेत्याह—

तत्त्वदीपनम्

कत्वदर्शनात्। नच—सापेक्षस्य दोषस्य निरपेक्षसंस्कार-संप्रयोगाभ्यां सहैककार्यकरत्वमयुक्तमित्यपि—वाच्यम् ; व्याप्तिसंस्कारसापेक्षलिङ्गदर्शनस्य स्मृतौ निरपेक्षस्य संस्कारस्य चैकलिङ्गिबोधजनकत्वदर्शनादित्याशयवानाह—*नेत्युदाहरणमिति* ॥ संस्कारानपेक्षस्य लिङ्गज्ञानस्य लिङ्ग्यबोधकत्वेऽपि व्यवहृत्यादिजनकत्वं तावदस्ति, तथाच निरपेक्षतया विलक्षणक्रियाजनकयोरप्येकत्र समावेशो दृष्ट इति वाऽर्थः। किंच संस्कार-संप्रयोगयोरन्योन्यनिरपेक्षतया कार्यजनन-समर्थयोरपि प्रत्यभिज्ञानजनकत्वं दृष्टम्, तद्वत्तयोः संभूय भ्रमजनकत्वं किं न स्यात्? इत्यभिसंधायोक्तम्—*प्रत्यभिज्ञानोत्पादनमिति* ॥ तत्र दृष्टान्तासंप्रतिपत्तिं शङ्कते—*ननु तत्रापीति* ॥ अनुमिति-प्रत्यभिज्ञानयोरित्यर्थः ॥

वार्तिकम्

ननु भवतु नाम स्वमभ्रमव्याप्तिरध्यासलक्षणस्य ; तथापि गृह्यमाणारोपे पूर्वदृष्टावभासत्वाभावादव्याप्तमिदं लक्षणमिति—चेत्, न ; गृह्यमाणारोपासिद्धेः। न ह्यन्यथाख्यातिवादवदस्मन्मतेऽपि गृह्यमाणस्य सत्यस्य देहादेरात्मन्यारोपोऽङ्गीक्रियते, किं तर्हि ? शुक्तिरजतवदारोपित एवात्मनि स गृह्यते, भवति च पूर्वदृष्टस्यावभासः ; पूर्व-पूर्वदेहादिभ्रमसंस्कारस्योत्तरोत्तरतद्भ्रमहेतुत्वाभ्युपगमात्। नच—एवं पूर्वदृष्टदेहादेरप्याभासत्वात् कथं तदवभासत्वमेतस्येति—वाच्यम् ; प्रतिबिम्बाभासस्यापि प्रतिबिम्बाभासान्तरदर्शनात् तत्प्रमितत्वस्याप्रयोजकत्वात्, लाघवादनुगमाच्च ज्ञातत्वस्यैव प्रयोजकत्वात्। अत एव भगवता भाष्यकारेण—"पूर्वदृष्टावभासः" इत्युक्तम्, ननु 'पूर्वप्रमितावभासः' इति। *एतेन*—स्मर्यमाणारोपोऽपि —*प्रत्याख्यातः* ; अन्यथाख्यात्यनभ्युपगमात्, तद्वादस्य निराकृतत्वाच्च, गृह्यमाणतयैव रजतारोपात्, ज्ञानज्ञेययोः सहोत्पन्नत्वस्य प्रदर्शितत्वात् ॥

नच—ज्ञानमेवाविद्यात उत्पद्यते ; लाघवात्, नार्थोऽपि ; कल्पनागौरवात्, तथाच स्मर्यमाण एव तद्विषयतयाऽवभासिष्यत इति—वाच्यम् ; अर्थापरोक्षावभासानुपपत्तेरुक्तत्वात् तदनुपपत्तेः। ज्ञानमेव रजताकारमपरोक्षसाक्षिचैतन्यविषयतयाऽस्त्विति चेत्, न ; तथा सति बहीरजतावभासानुपपत्तेः, विज्ञानवाद-प्रसङ्गाच्च, तद्वादस्य च निराकृतत्वात्। शुक्त्यवलम्बनत्वाद् बहिरवभासोपपत्तिः, विज्ञानवादप्रसङ्ग इति चेत्, न ; अन्याकारज्ञानस्यान्यालम्बनार्थत्वात्, तत्प्रयुक्तव्यवहारविषयत्वमेव तदालम्बनत्वम् ; अनतिप्रसङ्गात्, अनुगमाच्चेति चेत्, न ; सर्प-चोरादिज्ञानस्य दण्डाद्यालम्बनत्वप्रसङ्गात्, दण्डादेस्तत्प्रयुक्त-दानादिव्यवहारविषयत्वात्, साक्षात्तत्प्रयुक्तव्यवहारविषयत्वं विवक्षितमिति चेत्, तथापि द्रव्य-गुणादि-जन्यान्यतरज्ञानप्रयुक्तव्यवहारविषयत्वस्यान्यतरस्मिन् भावादतिप्रसङ्गस्यावश्यकत्वात्। तस्मान्न ज्ञान-मात्रारोपः, नवा तद्विषयतया स्मर्यमाणारोपः, किं तर्हि ? तद्विषयतयाऽर्थोऽप्यपूर्व एवोत्पद्यत इति पूर्व-मेवाभिहितम् ॥

अर्थमात्रोत्पत्तिरपि पूर्वमेव निरस्ता ; वृत्त्यनुत्पत्तौ चार्थेन साक्षिचैतन्यस्य सम्बन्धाभावात् तद्भावानुपपत्तेः। साक्षिण्येव रजताध्यासादस्ति सम्बन्ध इति चेत्, तथाप्यज्ञाते शुक्त्यवच्छिन्ने साक्षिणि

पञ्चपादिका

रयोः । उभयत्रापि स्मृतिगर्भमेकमेव प्रमाणज्ञानम्; संस्कारानुद्बोधे तदभावात् । तस्माल्लिङ्गदर्शनमेव सम्बन्धज्ञानसंस्कारमुद्बोध्य तत्सहितं लिङ्गिज्ञानं जनयतीति वक्तव्यम् । अयमेव च न्यायः प्रत्यभि-

पञ्चपादिकाविवरणम्

उभयत्रापीति ॥ *ननु* लिङ्गदर्शनं व्याप्तिस्मृतिश्च लिङ्गिज्ञानकारणम्, न संस्कार इति, नेत्याह— *संस्कारानुद्बोध इति* ॥ ज्ञानद्वयायौगपद्याभावादित्यर्थः । *तस्मादिति:* ॥ उपसंहरति ॥ *ननु* प्रत्यभिज्ञायां संप्रयोगः पूर्वानुभूतस्मृतिश्च कारणम्, ज्ञानद्वययौगपद्यप्रसङ्गाभावान्न संस्कार इति, तत्राह---*अयमेव

ऋजुविवरणम्

व्याप्तिस्मरणयोः कथमभिज्ञानोत्पादकत्वमिति चोदिते, संस्कारानुद्बोधे स्मरणाभावादनुभवाभावाच्चेति परिहारोऽनुपपन्नः; स्मरणहेतुत्वस्यानिराकृतत्वात्, संस्कारहेतुत्वस्य चानुक्तत्वादित्याशङ्क्य व्याचष्टे—*ज्ञानद्वयेति* ॥ "अयमेव च न्यायः" इति कथमतिदेशः कृतः ? अर्थस्मरणयोर्जनकत्वे पूर्वोक्तज्ञानद्वययौगपद्यदूषणाभावात्, "ज्ञानद्वये प्रमाणं नास्ती"त्यप्य-

तत्त्वदीपनम्

किमनुमिति-प्रत्यभिज्ञाप्रमाणवादिन एतच्चोद्यम्? उतेतरस्य? नाद्य इत्याह—*नेत्याहेति* ॥ स्मृतिवदनयोरपि परोक्षविषयत्वात्स्मृतिगर्भत्वमुक्तम्, तच्च संस्कारहेतुत्वोपपादनार्थमिति द्रष्टव्यम् । लिङ्गदर्शनमात्रस्यानुमितिहेतुत्वेऽगृहीतव्याप्तेरप्यनुमितिः स्यात्, नच तथा लक्ष्यते; तस्माद्व्याप्तिसंस्कारसहितलिङ्गदर्शने लिङ्गिज्ञानजनकत्वं वक्तव्यम् । तथा प्रत्यभिज्ञानमप्युभाभ्यां जायते; संस्कारमात्रस्य स्मृतिजनकत्वात्, संप्रयोगमात्रस्य चाभिज्ञानजनकत्वात् । नच—तत्र ज्ञानभेद इष्ट एवेत्यपि—शङ्क्यम्; किं तद्देश-कालसंबन्धस्यैतद्देशादिसंपृक्तत्वं स्मृत्या गृह्यते ? उत ग्रहणेन ? नाद्यः; एतद्देश-कालसंसर्गस्याननुभूतत्वेन स्मर्यमाणत्वासंभवात्, न द्वितीयः; प्रत्यक्षस्य वर्तमानमात्रग्राहित्वेन पूर्वदेशादिसंसर्गविषयत्वासंभवात् । तस्मात् पूर्वानुभवसंस्कार-संप्रयोगाभ्यामेकं ज्ञानं जायत इत्युररीकरणीयम् । नापि द्वितीयः कल्पः; अनुमानप्रामाण्यानङ्गीकृताविष्टसाधनतानुमानपुरःसरं भोजनादौ प्रवृत्त्यनुपपत्तेः । प्रत्यभिज्ञाया अप्रामाण्ये स्थायित्वासिद्धेः । नच—भावानां क्षणिकत्वात् स्थायित्वासिद्धिरिष्टेत्यपि—शङ्क्यम्; क्षणिकत्वस्योत्तरत्र निरसिष्यमाणत्वादिति । लिङ्गदर्शन-संस्कारयोर्लिङ्गिबोधजनकत्वमुक्तमाक्षिपति— *ननु लिङ्गेति* ॥ संस्कारस्याप्यन्वय-व्यतिरेकवत्त्वाल्लिङ्गिबोधकत्वमेष्टव्यमित्याशङ्क्य, व्याप्तिस्मारकत्वेनान्यथासिद्धिमभिप्रेत्याह—*न संस्कार इति* ॥

उद्बुद्धसंस्काराभावे स्मृत्यनुदयाद् उद्बुद्धसंस्कारस्तावदुपेयः, तावता च लिङ्गिबोधसंभवात् किमन्तर्गडुना स्मरणेनेत्याह—*नेत्याहेति* ॥ उद्बुद्धसंस्काराभावे स्मृतेरभावादित्येतत्स्पष्टमिति मत्वाऽर्थान्तरमाह—*ज्ञानद्वयेति* ॥ लिङ्गदर्शनस्य संस्कारोद्बोधकतयाऽन्यथासिद्धत्वात्संस्कार एव लिङ्गिबोधकः, तत उपसंहरणमनुपपन्नमित्याशङ्क्य, संस्कारस्यानुभूतमात्रविषयत्वेनानधिगतविषयत्वासंभवात्संस्कारसहितलिङ्गदर्शनं बोधकमित्यभिप्रायेणाह—*तस्मादिति* ॥

अक्ष-संस्कारयोः प्रत्यभिज्ञाजनकत्वमुक्तमाक्षिपति—*ननु प्रत्यभिज्ञायामिति* ॥ स्मृतेरनुमित्यहेतुत्ववत् प्रत्य-

वार्तिकम्

तदध्यासात् शुक्तिवदेवाज्ञाततया रजतभानं स्यात्, न ज्ञाततया; तज्ज्ञानकारणज्ञानाभावात्, तदभावेऽपि ज्ञाततया भाने शुक्त्यादेरपि तथात्वप्रसङ्गः । अतः साक्षिण्यध्यस्तत्वाविशेषेऽपि ज्ञानाज्ञानविशेषणकृत एव तयोर्भेदः, न स्वरूपकृत इत्यास्ताम् । विस्तरस्त्वद्वैतामृतकन्देऽनुसर्तव्यः । तस्मात् सर्वत्रार्थविशिष्टज्ञानस्य ज्ञानविशिष्टार्थस्य वाऽध्यासाद् गृह्यमाण-स्मर्यमाणारोपकृतविशेषाभावादुपपन्नम्—"स्मृतिरूपः परत्र पूर्वदृष्टावभासः" इत्यध्यासलक्षणम् ॥

पञ्चपादिका

ज्ञानेऽपि। न पुनर्ज्ञानद्वये प्रमाणमस्ति। तथा भिन्नजातीयज्ञानहेतुभ्यो नीलादिभ्य एकं चित्रज्ञानं निदर्शनीयम्। तत्र लैङ्गिकज्ञान-प्रत्यभिज्ञा-चित्रज्ञानानामदुष्टकारणारब्धत्वाद् यथार्थमेवावभासः,

पञ्चपादिकाविवरणम्

न्याय इति* ॥ ज्ञानाद् ज्ञानान्तरोत्पत्तौ व्याप्त्याद्यभावात्संस्कार एव कारणमित्यर्थः। *ननु* प्रमाणान्तरेष्वयं निरपेक्षकारणसमाहारः, नाभिज्ञाप्रत्यक्षे ; अभिज्ञाप्रत्यक्षं च रजतज्ञानमिति, तत्राह---*तथा भिन्नजातीयज्ञानहेतुभ्य इति* ॥ *ननु* यत्र संस्कारः प्रमाणकारणेन संबध्यते, तत्र स्मृतिगर्भप्रमाणज्ञानमेव दृष्टम्, न तथेदं रजतज्ञानमिति, तत्राह---*तत्र लैङ्गिकज्ञानेत्यादिना* ॥

ऋजुविवरणम्

युक्तम् ; निरपेक्षकारणसमाहारानुपपत्तेरेव स्मरणरूपत्वात्कार्यकल्पकत्वादित्याशङ्क्य व्याचष्टे—*ज्ञानाद् ज्ञानान्तरोत्पत्ताविति* ॥ पूर्ववदेवात्रापि स्मरणस्याहेतुत्वमेवातिदिष्टं ज्ञानद्वयाभावेऽपीति भावः। *ननु*—संस्कार-प्रमाकरणयोः संभूय जनकत्वं प्रमाणज्ञान एव दृष्टम्, इदं तु दोषजन्यत्वेनाप्रमाणमित्युक्तम्, अतः कथं संभूय कारणत्वमित्याह—*ननु यत्र संस्कार इति* ॥ न प्रमाणत्वमुभयजन्यत्वप्रयोजकम् ; व्यभिचारात्, नापि प्रमाण एवोभयजन्यत्वनियमः ; एकस्यासामर्थ्यप्रयुक्तत्वादुभयजन्यत्वस्य। यद्वा—दोषाजन्यत्वप्रयुक्तं प्रमाणत्वम्, नतूभयजन्यत्वप्रयुक्तम् ; दोषाजन्यत्वस्यैव प्रामाण्येनान्वयव्यतिरेकादिति परिहाराभिप्रायः। *ननु*—परैरपि प्रमाणज्ञानविषयविलक्षण-

तत्त्वदीपनम्

भिज्ञाऽहेतुत्वमपीत्याशङ्क्य वैषम्यमाह—*ज्ञानद्वयेति* ॥ ज्ञानद्वययौगपद्यप्रसङ्गाभावात्स्मृतेः कारणत्वमुक्तम्, तत्र कथं न्यायसाम्यम्? इत्याशङ्क्याह—*ज्ञानादिति* ॥ लिङ्गज्ञानं लिङ्गाविनाभूतलिङ्गिज्ञानजनकं दृष्टम्, शब्दज्ञानस्य चार्थज्ञानजननशक्तिसंबन्धमाश्रित्य बोधकत्वम्, प्रकृते तु स्मृतेः प्रत्यभिज्ञानस्य च न कश्चन संबन्धोऽस्तीति संस्कारस्य कारणत्वमित्यर्थः। *टीकाया एषोऽर्थः*—उद्बुद्धसंस्कारस्यावश्योपेयत्वान्न मध्ये स्मृतिकल्पनमित्युक्तं न्यायं परामृशति—*अयमिति* ॥ एवकारव्यावर्त्यमाह—*न पुनरिति* ॥ संस्कारोद्बोधानन्तरं प्रत्यभिज्ञोत्पत्तौ द्वितीयं स्मृतिकल्पकं न पश्याम इत्यर्थः। दृष्टान्तो विषम इति चोदयति—*ननु प्रमाणान्तरेष्विति* ॥ अभिज्ञाप्रत्यक्षातिरिक्तेष्वित्यर्थः। अभिज्ञाशब्देन एकदेश-कालावच्छिन्नार्थविषयं ज्ञानमुच्यते। अभिज्ञायामपि निरपेक्षहेत्वोः समाहारो दृष्ट इत्याह—*तत्राहेति*॥ विमतम्, न संस्कारसहितप्रमाकरणजन्यं प्रमाणत्वानधिकरणत्वात् ; घटादिवदिति शङ्कते—*ननु यत्रेति* ॥ दोषासहकृतप्रमाकरणजन्यत्वादनुमानादेः प्रामाण्यं घटते, भ्रान्तेश्च तद्वैपरीत्यान्नैवमित्याह—*तत्राहेति* ॥

वार्तिकम्

ननु—तथापि नोपपन्नम् ; परोक्षभ्रमाव्यापनात्, तत्रार्थोत्पादाभावात्, तदुत्पादे चापरोक्षत्वप्रसङ्गेन परोक्षत्वानुपपत्तेरिति—चेत्, *न* ; परोक्षभ्रमासिद्धेः ॥ *ननु*—कथमसिद्धिः? दृश्यते हि धूलीपटलादौ धूमभ्रमाद् वह्न्यनुमाभ्रम इति—चेत्, *न* ; तदनुमाभ्रान्तित्वदर्शनस्यापि भ्रान्तित्वात्, लिङ्गदर्शनभ्रान्तित्वदर्शनेन तद्भ्रान्तिभ्रमत्वसिद्धेः। *तथाहि*—लिङ्गदर्शनमात्रं ह्यनुमितौ कारणम्, न तत्प्रमा ; गौरवात्, तदभावे कार्यानुदयदर्शनात्। सामान्यतो लिङ्गदर्शनमात्रस्य तत्कारणत्वेऽपि विशेषतस्तत्तत्प्रमायां तत्तत्प्रमा तत्तद्भ्रमे च तत्तद्भ्रमः कारणमिति चेत्, न ; धूलीपटले धूमभ्रमादपि वह्निमति वह्निप्रमितेः तार्किकैरप्यङ्गीकारात्, तत्र प्रवृत्तिविसंवादाभावेन तद्बाधानुदयात्। *ननु*—

पञ्चपादिका

इह तु कारणदोषादतथाभूतार्थावभास इति विशेषः। एवञ्च सति नानुभवविरोधः ; प्रतिभासमानस्य

पञ्चपादिकाविवरणम्

किञ्च ज्ञानद्वयपक्षेऽख्यातावपरोक्षावभासिनः स्मर्यमाणत्वे, सर्वत्र प्रतिपन्नोपाधौ विषयसत्त्वाभावेऽन्यथाख्यातौ प्रतिपन्नस्य संसर्गस्य शून्यत्वे पुरोदेशप्रतिपन्नस्य रजतस्य देशान्तरसत्त्वे च, आत्मख्यातौ बहिरवभासस्यान्तरत्वे चानुभवविरोधः स्यात्, न तथाऽस्मत्पक्ष इत्याह----*एवं च सति नानुभवविरोध इति* ॥ *ननु* तवाप्यस्ति प्रतिपन्नस्यानिर्वचनीयत्वेऽनुभवविरोधः समानः, *तन्न* ; इदन्तासंसर्गवद्रजतस्य शुक्तिकासत्तासंसर्गोऽयमवभासते, न रजतस्यापरसत्त्वम्। *अथवा*----त्रिविधं सत्त्वम्—परमार्थसत्त्वं ब्रह्मणः, अर्थक्रियासामर्थ्यसत्त्वं मायोपाधिकमाकाशादेः, अविद्योपाधिकसत्त्वं रजतादेरिति परमार्थसत्त्वापेक्षयाऽनिर्वचनीयमिति, नानुभवविरोधः ; यथानुभवमर्थसत्त्वाभ्युपगमात् ॥

ऋजुविवरणम्

विषयत्वं भ्रान्तेरङ्गीक्रियते, तावता च मिथ्यात्वप्रसिद्धिर्घटते ; अतो न मिथ्यात्वप्रसिद्ध्याऽनिर्वचनीयार्थत्वमित्याशङ्क्याभ्युचयमाह—*किञ्च ज्ञानद्वयपक्ष इति* ॥ *ननु* अपरोक्षशुक्त्यविवेकाद् रजतेऽपरोक्षव्यवहारः, एवंच

तत्त्वदीपनम्

"एवं च सती"त्यत्र स्वमतेऽनुभवाविरोधमभिदधता मतान्तरेष्वनुभवविरोधो ध्वनितः, तमाह—*किं चेति* ॥ इदं-रजततादात्म्यविषयमेकं ज्ञानमनुभूयते, तद् ज्ञानभेदवादिनो विरुध्यत इत्याह—*ज्ञानद्वयेति* ॥ रूप्यज्ञानस्य स्मृतित्वेऽपरोक्षप्रत्ययोऽपि विरुध्यत इत्याह—*अपरोक्षेति* ॥ अन्यथाख्यातावनुभवविरोधमाह—*सर्वत्रेति* ॥ प्रतिपन्नस्योपाधिरवच्छेदकोऽधिष्ठानम् ; तस्मिन्निति यावत्। आरोपितं विषयशब्दार्थः। इदमि समारोपितस्य रूप्यस्य कालत्रयेऽपि सत्त्वाऽभावे सदिदं रूप्यमित्यनुभवः पीडयेतेत्यर्थः। तादात्म्यासत्त्वे तदनुभवोऽपि कुप्येतेत्याह—*प्रतिपन्नस्येति* ॥ देशान्तरसत्त्वकल्पनायामिदन्तानुभवविरोधमाह—*पुरोदेशेति* ॥ विज्ञानवादिमतेऽनुभवविरोधमाह—*आत्मख्याताविति* ॥ बहिरवभासो यस्य स बहिरवभासस्तस्येत्यर्थः। अनुभवविरोधशङ्कायां तन्निरसनमुचितम्, सैव नेत्याशङ्क्यानुभवविरोधशङ्कामाह—*ननु तवापीति* ॥ रजतसत्त्वेनानुभवोऽसिद्ध इत्याह—*तत्रेति* ॥ अनिदमो रजतस्येदन्तासंसर्गवत् सद्विलक्षणस्याप्यन्यसत्तासंबन्धात्सदनुभवो न विरुध्यत इत्यर्थः। ननु रूप्यस्य स्वाभाविकं सत्त्वं किं न स्यात्, इत्याशङ्क्य बाधविरोधान्नैवमित्याह—*न रजतस्येति* ॥

***ननु* तव सत्तासंसर्गः किं सन्? उतासन्? किं वोभयविलक्षणः? आद्ये बाधविरोधः, द्वितीयेऽनुभवविरोधः, तृतीये 'सदिदं रजतमि'त्यनुभवो विरुध्येतेत्याशङ्क्य पक्षान्तरं कक्षीकरोति—*अथवेति* ॥ त्रैविध्यमेवाह—*परमार्थेति* ॥ परमार्थसत्त्वं नाम कालत्रयबाधाभावोपलक्षितस्वरूपम्। मायाशब्देन व्यावहारिकत्वसंपादनपटीयस्यविद्योच्यते। अविद्याशब्देन प्रातिभासिकत्वनिर्वाहकमज्ञानं कथ्यते। इतेस्त्रिविधं सत्त्वमित्यनेन सम्बन्धः। भवत्वेवं त्रैविध्यम्, तथाऽपि कथमनुभवविरोधनिराकृतिः? इत्याशङ्क्याह—*परमार्थेति* ॥ सद्वैलक्षण्ये कथमनुभवः? इत्या-**

वार्तिकम्

माऽस्तु लिङ्गदर्शनस्यावैशिष्ट्याद् अनुमितिभ्रम-प्रमयोर्भेदः, गुण-दोषजन्यत्वेन तु तयोर्भेदो भविष्यतीति—चेत्, *न* ; अनुमितौ दोषानिरूपणात्, लिङ्गभ्रमस्य भ्रम-प्रमासाधारणत्वस्य दर्शितत्वात्, दोषान्तरस्यानुपलम्भेन वक्तुमशक्यत्वात्, स्वतःप्रामाण्याभ्युपगमेन प्रमितेरपि गुणजन्यत्वासिद्धेः, तार्किकैरपि टीकाकारादिभिरनुमितेः स्वतःप्रामाण्याभ्युपगमात्। यस्तु तार्किकापसदः स्वसिद्धान्तानभिज्ञः परतः

पञ्चपादिका

रजतस्यैवावलम्बनत्वात्, अतो मायामयं रजतम्। अथ पुनः पारमार्थिकं स्यात्, सर्वैरेव गृह्येत;

पञ्चपादिकाविवरणम्

यस्माद् भ्रान्तित्वव्यवहारः सदसज्ज्ञानयोरनुपपन्नः, यतश्च पक्षान्तरेष्वनुभवविरोधः, यतश्च ज्ञानद्वय-पारोक्ष्य-स्मृतित्व-स्मरणाभिमानप्रमोष-तद्धेत्वविवेक-तन्निमित्तप्रवृत्तयो जन्मान्तरानुभूतस्मृतिश्चेत्यप्रतिपन्नमपूर्वं बहु कल्पनीयमख्यातौ, अन्यथाख्यातौ चान्यत्र प्रतिपन्नस्यान्यत्र सत्त्वम्, इन्द्रियस्य च जन्मान्तरानुभूतदेशकाल-व्यवहितार्थग्राहित्वम्, दोषस्य च तथाविधादृष्टसामर्थ्यम्, संसर्गस्य च शून्यस्य प्रत्यक्षतेति प्रमाणविरुद्धं बहु कल्पनीयम्, अतः सर्वदोषपरिहाराय यथा प्रतिपन्नस्य मिथ्यात्वं नामैकः स्वभावो "नास्त्यत्र रजतम्, मिथ्यैव रजतमभादि"त्यनुभवसिद्धः समाश्रयणीयः, अविद्योपादानकल्पनायाश्चान्वय-व्यतिरेकसिद्धत्वादित्याह—*अतो

ऋजुविवरणम्

पक्षान्तरेष्वपि कथंचिदनुभवविरोधपरिहारसंभवाद् न सत्तात्रैविध्यादिकल्पनागौरवाश्रयणं युक्तमित्याशङ्क्याह—*यस्माद्भ्रान्तित्वव्यवहार इति* ॥ बाधकज्ञानविषयत्वेनैव मिथ्यात्वं प्रतीयत इत्यभिप्रायमाह—*नास्त्यत्रेति* ॥ ज्ञाननिवर्त्यत्वं मिथ्यात्वमिति भावः। *ननु*—बाधाधीननिवृत्तेः कथं बाधविषयत्वम्? इत्याशङ्क्य पक्षान्तरमाह—*मिथ्यारजतमिति* ॥ बाधाभिव्यक्तविषयस्थचैतन्येन तत्संसृष्टनिवृत्तिः प्रतीयत इति भावः। *ननु* बाधकज्ञाने तत्फले वा मिथ्यात्वं प्रतीयत इति कथं गम्यते? इत्याशङ्क्याह—*मिथ्यैव रजतमभादिति* ॥ उत्तरपरामर्शसामर्थ्यात् पूर्वं प्रतीतिः कल्प्यत इति भावः। यद्वा—नास्तीति सत्यत्वनिषेधः, निषेधाद् निवृत्ति-प्रदर्शनम्, द्वितीये मिथ्यात्वानुभवप्रदर्शनम्, तृतीये तूभयास्तित्वद्योतकः परामर्श इति विवेकः। *ननु* मिथ्यात्वेनोप-संहर्तव्यम्, न मायामयत्वेनेत्याशङ्क्याभिप्रायमाह—*अविद्योपादानेति* ॥ अविद्यैव रजतरूपेण परिणमत इति

तत्त्वदीपनम्

शङ्क्याह—*यथेति* ॥ अतःशब्दापेक्षितं हेतुं दर्शयति—*यस्मादिति* ॥ ज्ञानद्वयं च पारोक्ष्यं च स्मृतित्वं च स्मरणाभिमानप्रमोषश्च तद्धेत्वविवेकश्च तन्निमित्तप्रवृत्तिश्चेति तथोक्ताः। अर्भकभ्रमसिद्ध्यर्थं जन्मान्तरानुभूतस्मरणं च कल्प्यमित्याह—*जन्मान्तरेति* ॥ *अप्रतिपन्नमिति* ॥ लोकाप्रसिद्धमित्यर्थः। *अपूर्वमिति* ॥ प्रमाणाऽनधिगतमित्यर्थः। अन्यथाख्यातौ च बहु कल्प्यमित्यन्वयः। बहुकल्पनामेवाह—*अन्यत्रेति* ॥ केवलेन्द्रियस्य व्यवहिताग्राहित्वेऽपि दोषसहकृतस्य तत्स्यादित्याशङ्क्याह—*दोषस्य चेति* ॥ देशादिव्यवहितविषयत्वं तथाविध-शब्दार्थः। एकः स्वभाव आश्रयणीय इति बहुकल्पनां निवारयति। अप्रतिपन्नकल्पनां निषेधति—*नास्तीत्यादिना* ॥ *अत्रायं विभागः*—नास्तीति रजतस्य सद्वैलक्षण्याभिधानम्, मिथ्येति ज्ञाननिवर्त्यत्वं कथ्यते। मिथ्यैवेति ज्ञानमिथ्यात्वमनुभूयत इत्यर्थः। अविद्योपादानत्वमप्रतिपन्नं त्वया कल्प्यमित्याशङ्क्याह—*अविद्येति* ॥ समारोपितानिर्वचनीय-

वार्तिकम्

प्रामाण्याभिनिवेशादनुमितिप्रमाया गुणजन्यतां मन्यते, स प्रष्टव्यः—को वा गुणोऽत्र त्वयाऽभिमत इति? स यदि ब्रूयात्—बोध्यसत्त्वमेवात्र गुण इति, तन्न; अतीतानागतानुमितेरप्रमात्वप्रसङ्गात्। *ननु*—अतीतानागतरूपेणैव तत्र तत्र बोध्यमनुमीयते, अस्ति च तेन रूपेण तत्सत्त्वमिति—चेत्, *न*; अतीतानागतत्वाभ्यां सत्त्वस्य सहभावविरोधात्। तेन रूपेण बोध्यस्यासिद्धेः, सिद्धौ वा सत्कार्यवादा-पत्तेः ॥

लिङ्गाभावाच्च=न ह्यतीताद्याकारेण बह्न्यनुमितौ लिङ्गमस्ति। धूमस्तज्ज्ञानं वा लिङ्गमिति

पञ्चपादिकाविवरणम्

मायामयमिति* ॥ सत्यस्य वस्तुनो मिथ्यावस्तुसंभेदोऽवभासमानो माया मिथ्याऽनिर्वचनीयख्यातिः ; अध्यास एवायमित्यर्थः ॥

ऋजुविवरणम्

स्वदर्शनं प्रदर्श्य रजतमिथ्यात्वं च प्रसाध्येदानीमविद्योपादानत्वे प्रमाणमुक्तमित्यर्थः । *अथवा*—मिथ्यात्व एव युक्त्यन्तरमनेनोच्यत इत्याह—*अविद्योपादानेति* ॥ *अथवा*—सिद्धे मायाकार्यत्वे मायामयत्वेनोपसंहारो युक्तः, नतु तत्सिद्धम् ; प्रमाणाभावात्, रजतादीनामविद्यामयत्वमुक्तं पूर्वम्, तद्विरोधश्चेत्याशङ्क्याभिप्रायमाह—*अविद्योपादानेति* ॥ *ननु*—कोऽयमध्यास इत्युपक्रम्य "स्मृतिरूपः" इति लक्षणमुक्त्वा ख्यात्यन्तरनिराकरणेनाध्यासः साधनीयः, न त्वनिर्वचनीयत्वमिथ्यात्वसाधनं युक्तम्, मायामयत्वोपसंहारश्च ; परस्परमसंबद्धत्वप्रसङ्गादित्याशङ्क्याभिप्रायमाह—*सत्यस्य वस्तुन इति* ॥ परस्पराभेदाद् विशिष्टाध्यासस्य विवक्षितत्वादेवमुक्तमित्यर्थः । *अथवा*—हेतुपरम्पराऽभिप्रायेणैवमुक्तम्—मायामयत्वं मिथ्यात्वहेतुः, मिथ्यात्वं चानिर्वचनीयख्यातित्वे, तेन चाध्याससिद्धिरिति । *अथवा*—अध्यासत्वेनानिर्वचनीयत्वं निरूपितं ख्यात्यन्तरनिराकरणेन, अनिर्वचनीयत्वं च मिथ्यात्वेन, मिथ्यात्वं

तत्त्वदीपनम्

तायाः प्रक्रान्तत्वान्मायात्मत्वोपसंहरणमनुपपन्नमित्याशङ्क्याह—*सत्यस्येति* ॥ मायामिथ्यादिशब्दानां पर्यायत्वान्न विरोध इत्यर्थः ॥

वार्तिकम्

चेत्, न ; विद्यमानवह्निकालेऽपि तयोः सत्त्वेन व्यभिचारित्वादतीतत्वाकारेण तत्साधकत्वानुपपत्तेः । अस्तु तर्ह्यतीतधूमस्तल्लिङ्गमिति चेत्, न ; धूमेऽतीतेऽप्यङ्गारावस्थवह्निदर्शनात्, अतिचिरेति विशेषणदानेऽपि ज्वालामुख्यादौ व्यभिचारावश्यकत्वात्, तत्रेन्धनापगमेन चिरकालातीतधूमे सत्यपि सर्वदा वह्निसत्त्वेन तदतीतत्वाभावात् । एवमनागताकारेण वह्न्यनुमानमपि प्रत्याख्येयम् ; धूमेन तस्यानुमातुमशक्यत्वात् । तत्सामग्र्यैवानागतरूपेण तमनुमापयतीति चेत्, न ; कार्यकालेऽपि सामग्रीसत्त्वेन तस्यास्तद्व्यभिचारित्वात् । प्रागभावाभावाद् न तत्काले सामग्रीति चेत्, न ; पराभिमतप्रागभावाहेतुत्वस्य पूर्वमेव प्रदर्शितत्वात् । किमिति तर्हि सामग्रीसत्त्वात् पुनः कार्यं नोत्पद्यते ? इति चेत्, न ; उत्पत्तेरेव पुनरुत्पत्तिप्रतिबन्धकत्वात्, एकत्रोत्पत्तिद्वयविरोधस्य दृष्टत्वात्, तस्य भावाभावयोरिव शीतोष्णयोरिव च स्वाभाविकत्वेन कारणान्वेषणानुपपत्तेः । *एतेन*—वर्तमानत्वाकारेणापि वह्न्यनुमानम्—*प्रत्युक्तम्* । धूमे सत्यपि वह्न्यभावदर्शनात्, अनवच्छिन्नमूलाभ्रंलिहादिविशेषणविशिष्टो धूमो वह्नेर्लिङ्गमभ्युपगम्यते, न धूममात्रमिति चेत्, न ; दग्धार्द्रेन्धने वह्नौ जलेनोद्वापितेऽपि तादृशधूमदर्शनात् । तस्माद् बोध्यसत्त्वव्यभिचारात् 'पर्वतो वह्निमान्' इत्याद्यनुमितिर्न वह्नेर्वर्तमानत्वाद्यवगाहते ; तस्य प्रत्यक्षमात्रविषयत्वात्, कालानुमाने व्यभिचाराच्च, काले कालवैशिष्ट्यानङ्गीकारात्, असंभवाच्च । न ह्यतीतकालोऽतीतः ; वर्तमानत्वप्रसङ्गात् । अत एव न वर्तमानः ; विरोधात्, नानागतः ; वर्तमानत्वप्रसङ्गादेव । एवं कालान्तरे विरोधो योज्यः । किं तर्हि ? स्मृतिवद् विधिवाक्यवच्च कालमनपेक्ष्यैव पक्षतावच्छेदकेन सामानाधिकरण्यमात्रमवगाहते । नच—उक्तानुमितेर्वर्तमानकालाविषयत्वे 'वह्निमानि'ति तन्मूलकाभिलापे मतुपोऽनुपपत्तिः, तस्य वर्तमानसम्बन्धवाचित्वादिति—वाच्यम् ; मतुपो विद्यमानत्वाविद्यमानत्वौदासीन्येन सम्बन्धमात्रवाचित्वाद् वर्तमानसम्बन्धवाचित्वासिद्धेः ; अन्यथा "काकवद् देवदत्तस्य

पञ्चपादिकाविवरणम्

अत्र केचिदाहुः—अतोऽविद्यामयमिति वक्तव्यम्, न मायामयमिति ; विभ्रमाणां तत्त्वज्ञाननिराकार्यतयाऽविद्यात्मकत्वात्, मायाऽविद्ययोर्भेदात्। *तथाहि*—माया स्वाश्रयमव्यामोहयन्ती कर्तुरिच्छामनुवर्तते, न तथाऽविद्या। प्रसिद्धश्च मायाऽविद्ययोर्भेदो लौकिकानाम्। नहि मायाविनिर्मितहस्त्यश्व-रथादावविद्याशब्दं प्रयुञ्जत इति ॥

उच्यते ;—लक्षणभेदात्, लोकव्यवहारसामर्थ्याद्वा तयोर्भेदः कथ्यते। न तावल्लक्षणभेदात् ; अनिर्वच-

ऋजुविवरणम्

चाविद्यामयत्वेनेति मनसि निधायैवं निरूपणं कृतमिति भावः। कुतो रजतादेरविद्यामयत्वव्यपदेशः? इत्याशङ्क्याह—*विभ्रमाणामिति* ॥ *ननु* अविद्याया एव मायात्वव्यपदेशात् तन्मयत्वमित्याशङ्क्याह—*मायाविद्ययोरिति* ॥ मिथ्यात्वसाम्यादौपचारिको व्यपदेश इति भावः। कथमौपचारिकत्वं व्यपदेशभेदस्य? इत्याशङ्क्य मुख्यभेदं साधयति—*तथाहीति*॥ *ननु* कारणभेदादेकस्यापि व्यामोहाव्यामोहहेतुत्वमुपपद्यते, कथमनेन भेद इत्याशङ्क्य प्रमाणमाह—*प्रसिद्धश्चेति* ॥ *ननु*—इयमविद्या, नेयमविद्येति लोको न व्यपदिशति, कथं लोकप्रसिद्धो भेदः? इत्याशङ्क्य विशिनष्टि—*नहि मायाविनिर्मितेति* ॥ *अथवा*—तत्त्वज्ञाननिराकरणयोग्यत्वं मायामयेऽपि दृश्यते, कथं तेनाविद्यामयत्वव्यपदेशः साध्यते? इत्याशङ्क्य, प्रकारान्तरेण तथैव व्यपदेशं साधयति—*मायाविद्ययोरिति* ॥ *अयमर्थः*—मन्त्रौषधादिसत्यवस्त्वेव माया, अनिर्वचनीया त्वविद्येति। कथं मन्त्राद्येव माया,नानिर्वचनीया? इत्याशङ्क्याविद्यातो विलक्षणत्वादित्याह—*तथाहि मायेति*॥ ननु*—विलक्षणत्वमेकस्मिन्नप्युपपद्यते ; सामग्रीभेदात्, अतः कथमनेन भेदः? इत्याशङ्क्याह—*प्रसिद्धश्चेति* ॥ प्रसिद्धिमेव विशिनष्टि—*नहि मायेति* ॥ कार्येऽप्यस्थितप्रयोगदर्शनात् कारणभेदो निश्चीयते ; तथा मन्त्रौषधादिप्रयोक्तारमेव मायाविनं वदन्तीति भावः। *अथवा*—"मायाविद्ययोर्भेदादि"त्यविद्यामयत्वव्यपदेशे हेतावुक्ते, कथं तयोर्भेदः? इत्याशङ्क्य, विलक्षणकार्यत्वं भेदकं दर्शयति—*विभ्रमाणामिति* ॥ कथं तत्त्वज्ञाननिराकार्यत्वेन कार्यस्य वैलक्षण्यम्? उभयत्र साम्यात्, इत्याशङ्क्य प्रकारान्तरेण तद्भेदं दर्शयति—*तथाहीति* ॥ लक्षणतो भेदमुक्त्वा प्रमाणतो भेदं दर्शयति—*प्रसिद्धश्चेति* ॥ प्रसिद्धिमेव विशिनष्टि—*नहि-

तत्त्वदीपनम्

रजतस्य मायामयत्वमुपश्रुत्य तदसहमाना एकदेशिनः प्रत्यवतिष्ठन्ते—*अत्र केचिदिति* ॥ अविद्यामयत्वोक्तौ हेतुमाह—*विभ्रमाणामिति* ॥ मायाऽविद्ययोरभेदादविद्यामयत्वमेवोक्तमित्याशङ्क्याह—*मायेति* ॥ भेदासिद्धिं मन्वानं प्रत्याह—*तथाहीति* ॥ मायायाः स्वाश्रयाव्यामोहकत्वं कर्तुरिच्छानुविधायित्वं च, अविद्यायास्तद्वैपरीत्यमित्यर्थः। न केवलं लक्षणभेदाद् भेदः, किंतु प्रसिद्धितोऽपीत्याह—*प्रसिद्धश्चेति* ॥ प्रसिद्ध्यसिद्धिं मन्वानं प्रत्याह—*नहीति* ॥ मायाऽविद्ययोरभेदान्मायामयत्वाभिधानं युक्तमित्याह—*उच्यत इति* ॥

अभेदं साधयितुं तदुक्तमनुवदति—*लक्षणेति* ॥ स्वरूपलक्षणं तावदविशिष्टमित्याह—*अनिर्वचनीयेति* ॥ अनिर्वचनीयतया लक्षणस्याविशेषादिति संबन्धः। स्वरूपतया गमकं स्वरूपलक्षणम्। तच्चैकं मायाऽविद्ययो-

वार्तिकम्

गृहम्" "जटावान् तापसः" इत्यादिप्रसिद्धप्रयोगलोपापत्तेः ॥ तस्मात्स्वविषयसत्त्वमस्तु, अथवा मास्तु, न तत्रानुमितिः प्रत्यक्षवदिष्टे ; किं तर्हि? स्मृतिवदेव तत्सत्त्वासत्त्वोदासीना स्वसामग्रीतो जायमाना स्वविषयमुपस्थापयति। यथा हि 'स घटः' इत्यादिस्मृतिर्न घटादेः सत्त्वं गोचरयति, न वाऽसत्त्वम् ; किं तर्हि? तदुदासीना पूर्वानुभवविषयं घटमात्रं गोचरयति ; तद्वत्। नचैतावताऽप्रामाण्यप्रसङ्गः ; स्मृति-

पञ्चपादिकाविवरणम्

नीयतया तत्त्वावभासप्रतिबन्धविपर्ययावभासलक्षणस्याविशेषात्। *ननु* मन्त्रौषधादिसत्यवस्त्वेव माया, नानिर्वचनीया, *न* ; परिदृश्यमानमिथ्यावस्तुन्येव मायाशब्दप्रयोगात्, पार्श्वस्थस्य मन्त्रौषधाद्यपरिज्ञानात्, तत्र मायाशब्दप्रयोगाभावाच्च, मन्त्रादेश्च काचादिवन्निमित्तकारणत्वाद् अध्यासोपादानाविद्याक्लृप्तिवत्कादाचित्कमायोपादानानिर्वचनीयानादिवस्तुकल्पना। तत्र च ''मायां तु प्रकृतिमि''ति श्रुतौ प्रकृतौ मायाशब्दप्रयोगात् प्रकृतिभूतयोर्मायाविद्ययोस्तद्विकारयोश्चाध्यासमाययोर्लक्षणाभेदादेकत्वमवगम्यते ॥

ननु स्वाश्रयव्यामोहाव्यमोहहेतुत्वाभ्यां लक्षणभेदो दर्शितः,यद्याश्रयो द्रष्टा, व्यामुह्यत्येव पार्श्वस्थो मायां

ऋजुविवरणम्

मायाविनिर्मितेति* ॥ कथं लक्षणतो विशेषः ? इत्यभिप्रायेण चोदयति—*ननु मन्त्रौषधादीति* ॥ मिथ्यावस्तुन्येव मायाशब्दप्रयोगो न मन्त्रादाविति कथं गम्यत इति ? तदाह—*पार्श्वस्थस्येति* ॥ *ननु* मन्त्रादेरप्यनुमानादिना ज्ञातत्वात् तत्रापि प्रयोग इत्याशङ्क्याह—*तत्र मायाशब्देति* ॥ एवमपि कार्यमात्रस्यैव मायात्वाद्रजतादेश्च तदात्मकत्वाभावाद् व्यपदेशानुपपत्तिस्तदवस्थैवेत्याशङ्क्याह—*मन्त्रादेश्चेति* ॥ *अथवा*—एवं सति कारणभूतमायाऽविद्ययोनैक्यमुपपद्यते, मन्त्रौषधादिरूपत्वात्, इत्याशङ्क्याह—*मन्त्रादेरिति* ॥ *ननु* मन्त्रादेरन्वय-व्यतिरेकाभ्यां हेतुत्वाद् न कारणान्तरं कल्पयितुं शक्यत इत्याशङ्क्याह—*काचादिवदिति* ॥ मन्त्रादिगतत्वेनाप्रतीतेरित्यर्थः। तथापि कल्प्यमानं सादि वस्त्वेव भवेदित्याशङ्क्याह—*अविद्याक्लृप्तिवदिति* ॥ तथापि तस्य मायात्वे प्रमाणाभावान्न मायाविद्ययोरैक्यमित्याशङ्क्याह—*तत्र च मायान्त्विति* ॥ अनेन पूर्वोक्तस्तत्त्वतो भेदादिति हेतुर्निरस्तः।

तत्त्वदीपनम्

रित्यर्थः। धर्मिसमकालं स्थित्वा धर्मतया गमकं विशेषणलक्षणम्, तदपि तुल्यमित्याह—*तत्त्वावभासेति* ॥ कदाचिद्भावमात्रेण लक्षकमुपलक्षणम्, तत्तुल्यमित्याह—*विपर्ययेति* ॥ मायायाः स्वरूपलक्षणस्याव्याप्तिं शङ्कते—*ननु मन्त्रेति* ॥ सत्यमेव मायापदवाच्यं कस्मान्नेतरदित्याशङ्क्याह—*नानिर्वचनीयेति* ॥ मण्यादिसत्यवस्तुयुक्ते मायाविशब्दप्रयोगादित्यर्थः। 'माया मया दृश्यत' इति दृश्यमानकरि-नर-तुरगादिषु मायाशब्दः प्रयुज्यते, तानि च सद्विलक्षणानीत्यनिर्वचनीयत्वं मायायामविशिष्टमित्याह—*न परिदृश्यमानेति* ॥ परिदृश्यमानत्वं मण्यादावपि तुल्यमित्याशङ्क्याह—*पार्श्वस्थस्येति* ॥

मन्त्रादेः प्रत्यक्षदृश्यत्वाभावेऽपि कार्येण तदनुमाय तत्र मायाशब्दं प्रयुङ्क्त इत्याशङ्क्याह—*तत्र मायेति* ॥ केवलमण्यादौ मायाशब्दप्रयोगो नोपलभ्यते, किंतु कार्याकारेण परिणते, ततश्च कार्यस्यैव मायाशब्दवाच्यत्वात्तद्योगान्मण्यादियुक्ते तत्प्रयोग इत्यर्थः। मन्त्रादेर्मायाकारणत्वे कथमविद्यायास्तत्कारणत्वम्, इत्याशङ्क्य, मन्त्रादेः किं निमित्तत्वम् ? उतोपादानत्वम् ? आद्ये न विरोध इत्याह—*मन्त्रादेरिति* ॥ द्वितीयं प्रत्याह—*अध्यासेति* ॥ मायात्मकहस्त्यश्वादेरनिर्वचनीयत्वादनिर्वचनीयमज्ञानमुपादानम्, अन्यस्य परमार्थत्वात्तदनुपपत्तिरित्यभिप्रायेणोक्तम्—*अनिर्वचनीयेति* ॥ कार्यत्वाच्च मन्त्रादेर्नोपादानत्वम्, अपि त्वनाद्यज्ञानस्येत्याह—*अनादीति* ॥

अनादेर्मायोपादानत्वेऽपि कथं मायाशब्दवाच्यत्वम् ? कार्यस्यैव मायाशब्दवाच्यत्वादित्याशङ्क्याह—*तत्र चेति* ॥ जगत्प्रकृतौ श्रुत्या मायाशब्दस्य प्रयुक्तत्वात्तस्या एव रजतादिभ्रमोपादानत्वसंभव उपादानान्तरपरिकल्पनमयुक्तम् ; ततश्चाविद्याया मायाशब्दत्वमित्यर्थः। पृथिव्यादीनां द्रव्यत्वसाधर्म्येऽपि यथान्तरालिको भेदस्तद्वन्मायाऽविद्ययोरपीति शङ्कते—*ननु स्वाऽऽश्रयेति* ॥ आश्रयशब्देन किं द्रष्टोच्यते ? उत कर्ता ? इति विकल्प्याऽऽद्यं प्रत्याह—

वार्तिकम्

वदेव तद्याथार्थ्योपपत्तेः, यथार्थानुभवस्यैव प्रमात्वात्। अत एव परोक्षज्ञानमन्तर्धीसमुल्लासं वर्णयन्ति वृद्धाः। इयमेवान्तर्धीसमुल्लासता, यद्विषयसत्त्वासत्त्वमनपेक्ष्यैव स्वसामग्रीतोऽन्तरेव तदाकारभजनम्।

पञ्चपादिकाविवरणम्

पश्यन् ; अथ कर्ता, न तस्य मायावित्वाद्व्यामोहाभावः, किन्तु बाधनिश्चयप्रतीकारज्ञानाभ्याम् ; अन्यथा पार्श्वस्थवत्कर्ताऽपि व्यामुह्येदेव । अथेच्छया कर्तुं शक्यते माया, न तथाऽविद्येति, न तदपि ; मन्त्रौषधादौ निमित्तकारणे कर्तुः स्वातन्त्र्यान्न मायायाम्, अविद्यायामपि अङ्गुल्यवष्टम्भादिना द्विचन्द्रकेशोण्डूकादिभ्रमा मन्त्रौषधादिनिषेवणात्स्वप्नभ्रमास्तत्त्वज्ञानेऽप्यनुवृत्तप्रतिभासाश्च कर्तुरिच्छया निष्पाद्यन्ते ॥

तत्त्वदीपनम्

यदीति ॥ द्वितीयमनुवदति—*अथेति* ॥ कर्तुर्मण्यादिना व्यामोहाभावे न मायावित्वं प्रयोजकम्, मायिनोऽपि दाशरथेर्मोहश्रवणादित्याह—*न तस्येति* ॥ किं तर्हि ? अव्यामोहप्रयोजकमित्याह—*किंत्विति* ॥ प्रतीयमानस्याऽऽभासत्वनिश्चयः प्रयोजक इत्याह—*बाधनिश्चयेति* ॥ "मनुष्योऽयं न व्याघ्रः" इति निश्चयेऽपि मोहसंदर्शनादाभासत्वज्ञानं न प्रयोजकमित्याशङ्क्याह—*प्रतीकारेति* ॥ स्वात्मानं प्रति मण्यादेर्व्यामोहहेतुमायाक्षोभणशक्तिप्रतिबन्धज्ञानान्न मायाविनो व्यामोहः, इतरेषां च तद्वैपरीत्याद् व्यामोह इत्यर्थः । उक्तमर्थं व्यतिरेकमुखेनाह—*अन्यथेति* ॥

मायाऽविद्ययोर्भेदकान्तरं शङ्कते—*अथेच्छयेति* ॥ विकल्पासहत्वान्नैतदपि निरूपणपथमवतरतीत्याह—*न तदपीति* ॥ किं मन्त्राणामिच्छाऽधीनत्वमुच्यते ? आहो तत्कार्यस्य ? इति विकल्प्याऽऽद्यमङ्गीकरोति—*मन्त्रेति*॥ द्वितीयं प्रत्याह—*न मायायामिति* ॥ मन्त्रादिक्षोभणे संजाते न मायाप्रसरनिरोधः शक्य इत्यर्थः । मायायां निमित्तकारणे स्वातन्त्र्यम्, इतरत्र न निमित्तेऽपीति वषम्यमित्याशङ्क्य किं सोपाधिकभ्रमनिमित्ते न स्वातन्त्र्यम् ? उत निरुपाधिकभ्रमनिमित्ते ? इति विकल्प्याऽऽद्यं प्रत्याह—*अविद्यायामपीति* ॥ हस्तेन नयनसंमार्जनं केशोण्डूकादिभ्रमनिमित्तमादिशब्दार्थः । द्वितीयं प्रत्याह—*मन्त्रेति* ॥ मण्यादिकार्यं तत्त्वज्ञानोत्तरकालमप्यनुवर्तते, इतरत्र न तथेत्याशङ्क्याह—*तत्त्वेति* ॥ प्रतिबिम्बादिभ्रमा इति शेषः ॥

प्रसिद्धश्च मायाऽविद्ययोर्भेद इति यदुक्तम्, तत्रेदं विवेचनीयम्—किं प्रसिद्धिशब्देन वैदिकी प्रसिद्धिर्गृह्यते ?

वार्तिकम्

अत एवानुमित्यादिज्ञाने सत्यपि तेन तदर्थप्रवृत्तावपि यावत्प्रत्यक्षगोचरं न तद्विषयं पश्यन्ति, न तावत्तस्य तद्दिदृक्षानिवृत्तिर्दृश्यते ; अन्यथा तेनैव तत्सत्त्वबोधादज्ञातांशाभावात् तद्दिदृक्षानुपपत्तेः । बहिरूपादेरनपेक्षत्वेन तस्यास्तद्विषयत्ववर्णनानुपपत्तेः । नच—अनुमिते बहिः स्वविषयसत्त्वाविषयत्वे कथं ततस्तत्प्रवृत्तिः स्यादिति—वाच्यम् ; कृष्यादाविव तत्संशयादपि प्रवृत्त्युपपत्तेः, अनभ्यासदशापन्ने ज्ञाने प्रामाण्यसंशयाहितविषयसंदेहादपि भवद्भिः प्रवृत्त्यभ्युपगमात् । अपिच बोध्यसत्त्वपदेन किमुच्यते—न तावत्तद्गतसत्तासामान्यम् ; अतिप्रसङ्गात्, सामान्याद्यनुमाने तदभावादप्रामाण्यापत्तेः, नापि स्वरूपसत्त्वम् ; तथा सति तज्जन्यतयाऽनुमितेः प्रत्यक्षत्वापत्तेः, अर्थजन्यज्ञानस्यैव प्रत्यक्षत्वात्, नापि वर्तमानकालसम्बन्धः ; तद्विषयत्वस्यानुमितेर्निरस्तत्वात्, सत्त्वान्तरस्य चासम्भवात्, तस्मान्न बोध्यसत्त्वरूपगुणजन्यानुमितिप्रमा, किन्तु स्वत एव तत्प्रामाण्योपपत्तिरित्युक्तमेव । तस्मान्नास्त्यनुमितिभ्रमः, किन्तु तल्लिङ्गदर्शनगतभ्रान्तित्वमेव तदन्वयव्यतिरेकाभ्यां तत्र संचार्य लोके भ्रान्ताऽनुमितिरिति व्यवहारः ॥

अत एव धूलीपटले धूमभ्रमाद् वह्निमनुमाय प्रवृत्तस्य तद्विसंवादे धूमज्ञानं मे भ्रान्तमभूदित्येव परामर्शो जायते, न त्वनुमितिर्मे भ्रान्ताऽभूदिति । अतस्तद्भ्रान्तेरभावादेव भगवानक्षपादोऽप्यनुमानप्रमाणलक्षणे—"तत्पूर्वकं त्रिविधमनुमानं पूर्ववत् शेषवत् सामान्यतोदृष्टं च" इत्यत्र तद् भ्रमव्यावृत्त्यर्थं न दत्तवान् । तद्भाष्यवार्तिके च तथैवाविशेषेण प्रवृत्तेः । नच—प्रमाऽप्रमासाधारणमेतल्लक्षणप्रणयनं सूत्रकारस्येति—

पञ्चपादिकाविवरणम्

नच शास्त्रव्यवहारान्मायाऽविद्याभेदः; "तस्याभिध्यानाद्योजनात्तत्त्वभावाद् भूयश्चान्ते विश्वमायानिवृत्ति-रि"त्यादिश्रुतौ सम्यग्ज्ञाननिवर्त्याविद्यायां मायाशब्दप्रयोगात्, "तरत्यविद्यां विततां हृदि यस्मिन् निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः"। इत्यादिस्मृता मायाऽविद्ययोः सामानाधिकरण्येन तत्त्वज्ञानेन कर्तव्य-त्वाभिधानात्, "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादि"ति सूत्रे सूत्रकारेण स्वप्ने मायाशब्दप्रयोगात्, भाष्यकारेण चाविद्या मायाऽविद्यात्मिका मायाशक्तिरिति तत्र तत्र निर्देशात्, टीकाकारेण "चाविद्या मायाऽक्षरम्"

ऋजुविवरणम्

यत्तूक्तम्—"प्रसिद्धश्चे"ति, तत्र किं शास्त्रप्रसिद्धिर्विवक्षिता? उताभिज्ञप्रसिद्धिरिति? न तावच्छास्त्रप्रसिद्धिरित्याह—*नच शास्त्रेति*॥ *अथवा*—पूर्वं मिथ्यात्वमङ्गीकृत्यैव व्यपदेशभेदाद्भेद उक्तः, तं विकल्प्य परिहरति—*नच शास्त्रेति*॥ *ननु* श्रुतावविद्यैव निवर्त्यत्वेनोक्तेति कथं गम्यते? एकत्वासिद्धेरित्याशङ्क्यैकत्वेन तस्यैव निवर्त्यत्वे प्रमाणान्तरमाह—*तरत्यविद्यामिति*॥ नाप्यभियुक्तप्रयोगादित्याह—*मायामात्रमित्यादिना*॥ कार्ये कारणे च सह व्यतिषिक्तप्रयोगं दर्शयितुमनेकप्रयोगप्रदर्शनम्, दार्ढ्यार्थं च; एकप्रयोगे तूपचारादिकल्पनायाः संभवादिति।

तत्त्वदीपनम्

उत स्मार्तप्रसिद्धिः? आहोऽभियुक्तप्रसिद्धिरिति? तत्राऽऽद्यस्तावदयुक्त इत्याह—*नचेति*॥ "तस्याभिध्यानादित्या"दे-रयमर्थः।—तस्य *ब्रह्मणः = अभिमुखेन प्रत्यक्तया ध्यानम्, अनात्मप्रत्ययनिरासेनाऽहं ब्रह्मेति प्रत्ययः = युज्यतेऽ-नेनेति प्रत्यग्ब्रह्मैक्यसाक्षात्कारे योजनात्प्रतीचो ब्रह्मत्वेनैवावस्थानं तत्त्वभावः*, अभिध्यानेन परमार्थसत्त्वसंपादिका माया निवर्त्यते। भूयो योजनेनाऽर्थक्रियासामर्थ्यसत्त्वकल्पिकाया मायाया निवृत्तिः। *अन्ते = प्रारब्ध-कर्मणामुपभोगेन प्रक्षये विदेहकैवल्यम्। ततश्च सुखाद्यात्मकप्रपञ्चप्रतिभाससंपादिका निवर्तत इति विश्वमायानिवृत्ति-रिति। ज्ञाननिवर्त्यमज्ञानं प्रसिद्धम्, मायाऽपि ज्ञाननिवर्त्येति तयोरैक्यमित्याह—*सम्यग्ज्ञानेति*॥ द्वितीयं प्रत्याह—*तरतीति*॥ *यस्मिन् = परमात्मनि नित्य-नैमित्तिककर्मप्रक्षालितपापमले चित्तेऽभिव्यक्ते सति *योगी = मायां तरति तस्मै इति संबन्धः। मायायास्तर्तव्यत्वे हेतुमाह—*अविद्यामिति*॥ विद्याऽविद्ययोर्निवर्त्यनिवर्तक-भावः प्रसिद्ध इत्यर्थः। सुषुप्तावविद्याया अपुरुषार्थत्वादर्शनान्न तन्निवृत्तिरीप्सितेत्याशङ्क्याह—*विततामिति*॥ कार्याकारेण परिणतामिति यावत्। उपादानानिवृत्तौ कार्यस्यात्यन्तानिवृत्तेरविद्यानिवृत्तिरपि काङ्क्षितेत्यर्थः। वेद्यत्वं व्यावर्तयति—*अमेयायेति*॥ तत्र हेतुः—*विद्यात्मन इति*॥ तृतीयं प्रत्याह—*मायामात्रमिति*॥ "अथ रथान् रथयोगान्" इत्यादिवाक्यात् स्वप्नसृष्टेः परमार्थत्वशङ्कां तुशब्देन निराकरोति। अत्र हेतुः—*कार्त्स्न्येनेति*॥ कार्त्स्न्यं नाम = परमार्थवस्तूचितदेशादिसंपत्तिः। तेनानभिव्यक्तं स्वरूपं यस्य तत्तथोक्तम्। परमार्थवस्तूचितदेश-दार्वाद्यभावेऽप्यभिव्यक्तत्वाद् न परमार्थसत्त्वं स्वप्नप्रपञ्चस्येत्यर्थः। का तत्र गतिरित्याशङ्क्याह—*मायेति*॥

मूलभावाभिज्ञो भाष्यकारोऽपि मायाऽविद्ययोरभेदमभाषतेत्याह—*भाष्यकारेणेति*॥ भाष्यव्याख्याता

वार्तिकम्

वाच्यम्; "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी"ति प्रमाणविभाग-तत्सामान्यलक्षणानन्तरं प्रमाणविशेष-लक्षणावधारणार्थतया प्रवृत्तत्वात्तत्सूत्रस्य साधारण्यानुपपत्तेः। यत्तु टीकाकारोऽस्मिन् सूत्रे—"अतिव्याप्ति-वारणार्थं प्रमाणाधिकाराद् विभागसूत्रात् प्रमाणसामान्यलक्षणमनुवर्तते" इत्युक्तवान्, तदसत्; तथा सति प्रत्यक्षलक्षणेऽप्यधिकारात्तदनुवृत्तेर्विशेषणं सूत्रकारेण न देयं स्यात्, दीयते च तत् प्रत्यक्षसूत्रे; "अव्यभिचारी"ति विशेषणात्। तथाच प्रत्यक्षसूत्रम्—"इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभि-

पञ्चपादिका

यतो न हि पारमार्थिकं रजतं कारणदोषं स्वज्ञानोत्पत्तावपेक्षते । यद्यपेक्षेत, तदा तदभावे न तत्र ज्ञानोत्पत्तिः ; आलोकाभाव इव रूपे । मायामात्रत्वे तु मन्त्राद्युपहतचक्षुष इव दोषोपहतज्ञानकरणा

पञ्चपादिकाविवरणम्

इत्युक्तत्वात् ; ब्रह्मसिद्धिकारेण च---"एवमेवेयमविद्या माया मिथ्याप्रत्ययः" इत्युक्तत्वात् । तस्माल्लक्षणैक्याद् वृद्धव्यवहारे चैकत्वावगमादेकस्मिन्नपि वस्तुनि विक्षेपप्राधान्येन माया, आच्छादनप्राधान्येनाविद्येति व्यवहारभेदः । इच्छाधीनत्व-तद्वैपरीत्येन वा व्यवहारभेद इति युक्तम्—*मायामयमिति* ॥

अस्तु तर्हि प्रतिपन्नोपाधावेव यथाप्रतिपत्ति परमार्थत्त्वम् ; कल्पनागौरवादिदोषपरिहारादिति, नेत्याह—*अथ पुनरिति* ॥ *ननु* कारणदोषवतामेव तद् दृश्यमिति, नेत्याह—*यतो नहीति* ॥ *तदभावे न तत्रेति* ॥ सर्वत्र परमार्थरजत इत्यर्थः । आत्माश्रयाविद्यात्मकत्वेऽपि सर्वैरेव गृह्येतेति, नेत्याह—*मायामात्रत्व इति* ॥ प्रसिद्धमायावदिति भावः । इदमाकारावच्छिन्नसाक्षिचैतन्यसमाश्रितस्य रजतस्य शुक्तिका-

ऋजुविवरणम्

ननु—व्यवस्थितप्रयोगोऽपि दर्शित इत्याशङ्क्याह—*एकस्मिन्नपीति* ॥ "तदभावे न तदि"ति प्रकृतरजतं प्रतीयते ; तथा सति दोषाभावे तदप्रतीत्यङ्गीकारादिदूषणं स्यादित्याशङ्क्य व्याचष्टे—*सर्वत्र परमार्थेति* ॥ तत्रेत्यर्थतोऽनुवादः । तथैव पाठ इति केचित् । *आत्माश्रयेति* ॥ उत्पन्नत्वेन साधारणत्वादिति भावः । "उपहतचक्षुष इवे"त्ययुक्तम् ; संप्रतिपन्नदृष्टान्तानभिधानात्, अतो न व्यवस्थितग्रहणम् ; सर्वत्र विवादादित्याशङ्क्याभिप्रायमाह—*प्रसिद्धमायेति* ॥ *ननु* कथं तद्दृष्टान्तबलेनाप्रतीतिसाधनम् ? तस्या अप्यन्यथासिद्धेः, कारणाभावादप्रतीतेः, बाह्याधिष्ठानगतत्वाभावाच्च । इह शुक्तिगतत्वात्तद्गतशौक्ल्यादिवत्प्रतीतिः स्यादित्याशङ्क्य पुनरभिप्रायान्तरमाह--*इदमाकारावच्छिन्नेति* ॥ *ननु* पूर्वमपि मिथ्यात्वमनुभवेन साधितम्, किं पुनर्मिथ्यात्व-

तत्त्वदीपनम्

टीकाकारोऽप्येवमेवेत्याह—*टीकाकारेणेति* ॥ सकलतन्त्राभिज्ञो मण्डनमिश्रोऽपि तथाऽऽहेत्याह—*ब्रह्मसिद्धीति* ॥ मायाऽविद्ययोर्भेदाभावसमर्थनमुपसंहरति—*तस्मादिति* ॥ तत्पदपरामृष्टं हेतुं व्यनक्ति—*लक्षणेति* ॥ मायाऽविद्ययोरैक्ये सहप्रयोगानुपपत्तेस्तयोर्भेदः, तयोरैक्य इन्द्रजालादौ मायात्वव्यवहारः, इतरत्र तदभावश्च कथम् ? इत्याशङ्क्याह—*एकस्मिन्नपीति* ॥ भेदकान्तरमाह—*इच्छाधीनेति* ॥ अविद्याया इच्छाऽनधीनत्वेन मायात्वाभावादिति द्रष्टव्यम् ॥

प्रतीत्यनुरोधेन भ्रान्तिविषयस्य परमार्थसत्त्वमेष्टव्यमिति दिगम्बरः शङ्कते—*अस्तु तर्हीति* ॥ उपपत्तितोऽप्येवमित्याह—*कल्पनेति* ॥ सत्तात्रैविध्यकल्पनं कल्पनाशब्दार्थः । विमतम्, न परमार्थम्, परमार्थत्वेऽनेकग्राह्यत्वप्रसङ्गात् ; संप्रतिपन्नवदित्याह—*नेत्याहेति* ॥ परमार्थत्वेऽपि न सर्वग्राह्यत्वम् ; दोषलक्षणसहकारिणः सर्वत्राभावात्, इति चोदयति—*ननु कारणेति* ॥ परमार्थत्वे दुष्टकारणग्राह्यत्वनियम एवानुपपन्न इत्याह—*नेत्याहेति*॥ "न तत्रे"त्यत्र तच्छब्देन दोषाभावेऽपरमार्थरूप्यज्ञानाभावोऽभिधीयत इति शङ्का स्यात्, ततश्च सिद्धसाध्यत्वमित्याशङ्क्य तच्छब्दार्थमाह—*सर्वेति* ॥ मायात्मकत्वेऽपि सर्वग्राह्यत्वप्रसङ्गः सम इति चोदयति—*आत्मेति* ॥ इदमंशावच्छिन्नचैतन्यतन्त्राविद्यया पुरोवर्तिनि रूप्यस्योत्पन्नत्वात्सर्वग्राह्यत्वप्रसङ्ग इत्यर्थः । वैषम्येणोत्तरमाह—*नेति* ॥ दोषोपहतज्ञानकारणत्वे दृष्टान्तमाह—*मन्त्राद्युपहतचक्षुष इति* (मूले) ॥ उपहतकरणानामेव दर्शनमित्यत्र दृष्टान्तमाह—*प्रसिद्धेति* ॥ उक्तार्थे युक्तिमाह—*इदमाकारेति* ॥ स्वाश्रितसुखादेरनन्यवेद्यत्ववदिदमाकारावच्छिन्नसाक्ष्यविद्याश्रितत्वान्नान्यस्य ग्रहणप्रसङ्ग इति भावः ॥

पञ्चपादिका

एव पश्यन्तीति युक्तम् । किञ्च नेदं रजतमिति बाधोऽपि मायामयत्वमेव सूचयति । कथम् ?

पञ्चपादिकाविवरणम्

संभेदोऽप्यविद्यात्मक इति, सुखादिवदनन्यवेद्यत्वमिति भावः । ज्ञानस्यैव भ्रान्तित्वप्रसिद्ध्यनुपपत्तिः कल्पनालाघवानुभवाभ्यामनुगृहीता मिथ्यार्थज्ञानतां गमयतीत्युक्तम्, इदानीं बाधकप्रत्यक्षं स्वयमेव रजतस्य मिथ्यात्वं प्रतिपादयतीत्याह—*किञ्च नेदं रजतमिति* ॥

ननु प्रतिपन्नोपाधौ रजतादेरभावं बाधो बोधयति, न तस्य मिथ्यात्वमिति चोदयति—*कथमिति* ॥ प्रतिपन्नोपाधावभावप्रतियोगित्वमेव मिथ्यात्वं नाम । तच्च बाधकज्ञाने रजतं प्रतिपन्नोपाधावभावप्रतियोगि-

ऋजुविवरणम्

साधनेनेत्याशङ्क्याह—*ज्ञानस्यैवेति* ॥ इदानीं साक्षादर्थे प्रमाणं वक्ष्यत इत्यर्थः । *ननु*—ज्ञानगतप्रसिद्ध्याऽपि मिथ्यात्वसिद्धौ किमर्थं प्रमाणान्तरेणेत्याशङ्क्याह—*अनुपपत्तिरिति* ॥ *ननु* अनुपपत्तेरपि प्रमाणत्वाविशेषाद् न प्रमाणान्तरकथनेऽनुपपत्तिरूपत्वं हेतुरित्याशङ्क्याह—*कल्पनालाघवेति* ॥ अनुगृहीतैव साधिका ; अन्यथाऽप्युपपत्त्यादिसंभवादिति भावः । *ननु* अत्रापि—"सूचयती"ति वदता तथाविधमेव प्रमाणं प्रदर्शितम्, अतः पौनरुक्त्यं वैयर्थ्यं वा ; अस्यापि तथाविधत्वात्, बाधानुपपत्तेर्मिथ्यात्वे प्रमाणत्वात्, अतः पूर्वप्रमाणादविशेष इत्याशङ्क्याह—*बाधकप्रत्यक्षमिति* ॥ तस्यापि पूर्वप्रमाणादविशेष इति यदुक्तम्, तत् परिहरति—*स्वयमेवेति* ॥ बाधकज्ञानं त्रैकालिकाभावग्राहकमभावविषयत्वाद्बाधः स्यात्, नतु मिथ्यात्वम् ; अविषयत्वात्, नचैतदेव मिथ्यात्वम् ; संयोगादेः प्रतिपन्नोपाधावभावप्रतियोगित्वेऽपि मिथ्यात्वाभावादित्यभिप्रायेण चोदयति—*प्रतिपन्नोपाधाविति* ॥ "तेन हि तस्ये"त्यत्र "निरुपाख्यत्वापादनपूर्वकमि"त्ययमंशो व्यर्थ इवाऽऽभाति ; मिथ्यात्वस्याभावप्रतियोगित्वासाधकत्वात्, प्रत्युत भेद एव प्रतीयते, तथा सति मिथ्यात्वज्ञापनासंभवस्तदवस्थ एव ; तत्स्वरूपानिरूपणात्, "ज्ञाप्यते"इति चायुक्तम् ; प्रत्यक्षत्वाभावप्रसङ्गादित्याशङ्क्याह—*प्रतिपन्नोपाधाविति* ॥ *अयं भावः*—संयोगादेः प्रतिपन्नोपाधावभावप्रतियोगित्वमेव नास्ति ; कालाद्युपाधिभेदादिति । परमार्थतस्तु तयोरपि मिथ्यात्वमेव, प्रतीतस्य तु सत्यत्वे तस्य कालत्रयेऽपि सत्यत्वनिषेधो न घटत इति । *ननु* प्रतिपन्नोपाधावभावप्रतियोगि वस्तु प्रतीयते, नतु प्रतियोगित्वम्, तत्कथं बाधान्मिथ्यात्वप्रतीतिः ? इत्याशङ्क्याह—*तच्च बाधकेति* ॥ *यद्वा*—ज्ञानाधीननिवृत्तिप्रतियोगित्वं कथं तस्मिन्नेव प्रतीयते ? इत्याशङ्क्य, तत्र प्रमाणं प्रदर्श्यत इति तात्पर्यमाह—*तच्च बाधकज्ञान इति* ॥ *ननु* एवमपि प्रतियोगित्वमेव बाधकज्ञानस्य विषयो भवेत्, नतु मिथ्यात्वं साक्षादित्याशङ्क्याह—*प्रतिपन्नो-

तत्त्वदीपनम्

बाधकप्रत्ययभिन्नस्य मायामयत्वसाधकतयाऽनुक्तत्वात् "किंचेदित्यु"क्तिरयुक्तेत्याशङ्क्य तात्पर्यमाह—*ज्ञानस्येति*॥ *कल्पनालाघवानुभवाभ्यामिति* ॥ मायावादे मिथ्यात्वमात्रसमाश्रयणलाघवम्, अनुभवाविरोधश्च, इतरत्र गौरवानुभवविरोधौ स्यातामिति यावत् । बाधकप्रत्ययोऽन्यविषय इति चोदयति—*ननु प्रतिपन्नेति* ॥ प्रतिपन्नोपाधावभावप्रतियोगित्वस्य मिथ्याशब्दार्थत्वात् कथं मिथ्यात्वासिद्धिः ? इत्याशङ्क्याह—*न तस्येति* ॥ संयोगादेः स्वात्यन्ताभावसादेश्यधर्माधिकरणत्वाभ्युपगमात्प्रतिपन्नोपाधावभावप्रतियोगित्वं तत्रापि विद्यत इत्यतिव्याप्तिरित्यर्थः । संयोगादेर्न स्वसत्तासादेश्यम् ; भावाभावयोरेकदैकत्र सत्त्वविरोधात् ; ततश्च मिथ्यात्वलक्षणं नाद्यमित्याशयवानाह—*प्रतिपन्नेति* ॥

तत्र किं प्रमाणमिति विवक्षायामाह—*तच्चेति* ॥ तच्च प्रत्यक्षमित्यन्वयः । प्रत्यक्षत्वमेवाह—*बाधकेति* ॥ नेदं रजतमित्यनेनैव मिथ्यात्वसिद्धेः—"मिथ्यैवे"त्येतदनर्थकमित्याशङ्क्य तात्पर्यमाह—*बाधकज्ञान

पञ्चपादिका

तेन हि तस्य निरुपाख्यतापादनपूर्वकं मिथ्यात्वं ज्ञाप्यते "नेदं रजतं मिथ्यैवाभासिष्ट"ति । नच तत् केनचिद्रूपेण रूपवत्त्वेऽवकल्पते ; सम्प्रयुक्तशुक्तिवन्निरस्यमानविषयज्ञानवच्च ॥

पञ्चपादिकाविवरणम्

तयाऽवभासत इति प्रत्यक्षमित्याह—*तेन हि तस्येति* । बाधकज्ञानसिद्धस्य प्रतिपन्नोपाधावभावप्रतियोगित्वलक्षणस्य मिथ्यात्वस्य पुनः स्वशब्देन परामर्शाच्च बाधविषयो मिथ्यात्वमित्याह—*नेदं रजतं मिथ्यैवेति* ॥ *ननु* देशकालान्तरबुद्धिषु सत्त्वादपि रजतस्यैवं बाधः संपत्स्यत इति, नेत्याह—*नच तत्केनचिद्रूपेणेति* ॥ नेदं रजतम्, किन्तु तद्रजतं बुद्धिर्वेति स्यात्परामर्शः, न मिथ्यैवेति ; स्मृतिग्रहणाविवेकत्वाद्गवयादाविवेत्यभिप्रायः ॥

ऋजुविवरणम्

पाधाविति* ॥ *ननु* प्रतिपन्नस्यैवाभावप्रतियोगित्वं प्रतीयत इति कथं गम्यते ? इत्याशङ्क्य, परामर्शसामर्थ्यादपि प्रत्यक्षत्वं निश्चीयत इति तात्पर्यमाह—*प्रतिपन्नोपाधाविति* ॥ *अथवा*—प्रतिपन्नोपाधावभावप्रतियोगित्वमेव मिथ्यात्वमिति कथं गम्यते ? येन तस्यैव मिथ्यात्वग्राहकत्वमुच्यते, इत्याशङ्क्याह—*प्रतिपन्नोपाधाविति* ॥ *यद्वा*—अभावप्रतियोगित्वलक्षणमेव मिथ्यात्वम् । *ननु* यदि तेनैव मिथ्यात्वं प्रतीयते, किमर्थं तर्हि 'मिथ्यैवाभासिष्टे'ति प्रमाणान्तरमुदाहृतम् ? तस्य बाधकत्वाभावात्, तद्विषयत्वनिरूपणस्य प्रक्रान्तत्वादित्याशङ्क्याह—*प्रतिपन्नोपाधाविति* ॥ प्रतियोगित्वलक्षणमेव मिथ्यात्वम्, तस्य च पूर्वं प्रतीतिरित्यस्मिन्नर्थे परामर्शोऽयमुदाहृतः, नतु प्रमाणान्तरमिति भावः । *ननु* देशान्तरसंबन्धिनि घटादावेतद्देशमात्रनिराकरणं दृश्यत इत्याशङ्क्याभिप्रायमाह—*स्मृतिग्रहणेति* ॥ *ननु*—बाधस्याभावेन बाधकानिरूपणात् कथं तेन मिथ्यात्वम् ? इति

तत्त्वदीपनम्

इति* ॥ बाधकप्रत्ययोऽन्यथासिद्ध इति चोदयति—*ननु देशेति* ॥ सत्त्वे बाध्यत्वमेव न स्यादित्याह—*नेत्याहेति* ॥ नैयायिकं प्रति शुक्तिकावदिति, ज्ञानवदिति बौद्धं प्रति दृष्टान्त इति द्रष्टव्यम् । अन्यत्र सतोऽपि घटस्य निषिद्ध्यमानत्ववन्निषेध इति शङ्कां निरस्यति- *नेदमिति* ॥ इदं-रजतयोरविविक्ततया प्रतिपन्नत्वादविवेकस्य च मिथ्यात्वपरामर्शो युक्त इत्याशङ्क्याह—*न मिथ्यैवेति* ॥ स्मृति-ग्रहणयोस्तत्तद्विवेकाभावस्य च सत्त्वान्न मिथ्याभूतं पश्याम इत्यर्थः । अविवेकोऽप्यनुपपन्न इत्याह—*गवयेति* ॥ गृह्यमाण-स्मर्यमाणगो-गवययोरिव विवेकः स्यादित्यर्थः ॥

वार्तिकम्

चारि व्यवसायात्मकं प्रत्यक्षम्"—इति । तस्मादपव्याख्यानमेतत् । यदपि निबन्धकारो मेने—"तत्पूर्वकमि"ति तच्छब्देन पूर्वलक्षितप्रत्यक्षप्रमाणमात्रपरामर्शात् तज्जन्यानुमानस्य प्रामाण्यध्रौव्यादुपपन्नमनुमानप्रमाणलक्षण"मिति, तदप्यसत् ; लिङ्गभ्रमादप्यनुमितिप्रमाया जन्यत्वस्य दर्शितत्वात् तत्राव्याप्तेः । तस्माद्यथा जल्पलक्षणे "यथोक्तोपपन्नः" इति विशेषणगृहीतनियमांशस्यात्रासंभवात् "छल-जाती"त्यादिना विशेषणेनानियमस्य गृहीतत्वाद् नियमानियमयोरेकत्र विरोधाद् नियमांशं परित्यज्यैव यथोक्तविशिष्टं वादलक्षणमतिदिश्यते ; अविरोधात्, तद्वदत्रापि नियमानियमयोरेकत्र विरोधाद् "अव्यभिचारी"ति विशेषणजन्यनियमांशपरित्यागेन प्रत्यक्षमात्रं तच्छब्देन परामृश्यत इति युक्तमुत्पश्यामः ; अन्यथा पूर्वोक्तदोषानिस्तारात् । तस्मादनुमानलक्षणे तदाभासवारणार्थं विशेषणमप्रयच्छतो भगवतः सूत्रकार-

पञ्चपादिकाविवरणम्

ननु—कोऽयं बाधो नाम ? अन्यार्थिनोऽन्यत्र प्रवृत्तिनिरोधः ! तर्हि यत्र रजतादौ परिव्राजकादेः प्रवृत्तेरेवानुदयः, तत्र बाधप्रसिद्धिर्न स्यात् ; प्रसिद्धश्च तत्रापि बाधः। न प्रवृत्तिविच्छेदो बाधः ; किन्तु प्रवृत्तियोग्यताविच्छेदश्चेत्, न ; पुनरपि तत्रैव रजताविवेकादन्यदा प्रवृत्तिदर्शनाद् योग्यताऽविच्छेदात्, उदकज्ञानाच्च प्रवर्तमानस्य सर्पचोरादिदर्शनेन प्रवृत्तिनिरोधे सर्पादिज्ञानादुदकज्ञानस्य बाधप्रसिद्धिः स्यात्। अविविक्ततया प्रतिपन्नस्य विवेको बाध इति चेत्, न ; सर्वपदार्थेषु प्रथममविविक्ततया प्रतिपन्नेषु पश्चादितरेतरा-

ऋजुविवरणम्

चोदयति—*ननु* *कोऽयमिति* ॥ स्वयमेवाख्यातिवादिसिद्धं फलापहारं तावदाशङ्कते—*अन्यार्थिन इति* ॥ मा भूत् तत्र बाध इति, तत्राह—*प्रसिद्धश्चेति* ॥ *ननु* प्रवृत्तिविच्छेदाद् योग्यताविच्छेदो निश्चीयते, उत्तरोत्तरप्रवृत्तिस्तु योग्यतान्तरनिबन्धनेत्याशङ्क्य, विच्छेदस्यान्यथासिद्धिमाह—*उदकज्ञानाच्चेति* ॥ अन्यथाख्यातिपक्षमाशङ्कते—

तत्त्वदीपनम्

बाध्यत्वं मिथ्यात्वमित्याकर्ण्य वैतण्डिकः प्रत्यवतिष्ठते—*ननु कोऽयमिति* ॥ किमन्यार्थिनोऽन्यत्र प्रवृत्तिनिरोधो बाधः ? उत तद्योग्यताविच्छेदः ? आहो विवेकज्ञानम् ? किं वेतरेतराभावबोधः ? उत प्रतिपन्नोपाधावभावप्रतियोगित्वबोधनम् ? अथवाऽज्ञाननिवृत्तिः ? इति किंशब्दार्थः। आद्यमनूद्याव्याप्त्या दूषयति—*अन्यार्थिन इत्यादिना* ॥ द्वितीयमनुवदति—*न प्रवृत्तीति* ॥ बाधकज्ञानेन योग्यताया उन्मृदितत्वात्समयान्तरे पुरोवर्तिनि प्रवृत्तिर्न स्यादिति दूषयति—*न पुनरिति* ॥ योग्यतान्तरस्य पुनस्तत्रोत्पन्नत्वात् प्रवृत्तिर्घटत इत्याशङ्क्य, तस्य यावद्द्रव्यभावित्वाद् विच्छेद एवानुपपन्न इत्याह—*योग्यतेति* ॥ नच योग्यताप्रतिबन्धो बाधः ; विवेकज्ञानसमयेऽविवेकहेत्वभावेन फलाभावोपपत्तौ प्रतिबन्धककल्पनानवकल्पनादित्यर्थः ॥

प्रवृत्तिनिरोधो बाध इत्यत्र सिंहावलोकनन्यायेन दूषणान्तरं समुच्चिनोति—*उदकज्ञानादिति* ॥ अन्यत्रेति शेषः। तृतीयमुत्थापयति—*अविविक्ततयेति* ॥ विवेकमात्रस्य बाधकत्वं निराकर्तुम्—*अविविक्तेति* विशेषणम् ॥

वार्तिकम्

स्याभिप्राय उन्नीयते—नास्त्यनुमानाभास इति॥ *समाख्याविरोधश्च=अनुमानम्, अनुमितिरिति फल-करणयोस्सामान्यसमाख्ये यौगिक्यौ भवतः। ते च तद्भ्रान्तित्वे विरुद्ध्येयाताम्। तत्र भ्रान्तिबुद्धिकरणज्ञानस्य भ्रान्तित्वादित्यवोचाम ; लिङ्गज्ञानस्य स्वतो भ्रान्तित्वेऽपि करणत्वाविरोधात् प्रमाणत्वोपपत्तेः, यत्रापि लिङ्गं परोक्षम्, तत्रापि परम्परया प्रत्यक्षपूर्वकत्वमस्त्येवेति, परम्पराक्रमेण तद्भ्रान्तित्वोपसंक्रमसंभवात्। *एतेन*—शाब्दभ्रमोऽपि—*प्रत्याख्यातः* ; शब्दस्य स्वतः प्रमाणत्वाद् वक्तुस्तन्मूलस्यैव तत्र संचारात्। अत एव "नदीतीरे पनसफलानि सन्ती"ति वाक्यात् प्रवृत्तस्य तद्विसंवादे 'भ्रान्तोऽयं वक्ते'त्यध्यवसानम्, न त्वहं भ्रान्त इति ; यदा कदाचिच्च तद्बुद्धेर्वक्तुर्भ्रमसंचारादेवेत्युक्तम्। यत्रापि प्रतारकं वाक्यम्, तत्रापि प्रतारकस्य वाक्यरचनामूलमाहार्यभ्रमोऽस्त्येव, तात्पर्यभ्रमे तु श्रोतुरेव भ्रमस्तत्रानुसंचार्यत इति। एवमन्यत्राप्यूह्यम्। तस्मान्नास्ति परोक्षभ्रमः। तथाच नाव्याप्तमध्यासलक्षणमिति ॥

अस्तु वा परोक्षभ्रमः, तथापि नाव्याप्तिः ; तत्राऽप्यर्थेन सहोत्पन्नत्वस्य विद्यमानत्वात् तत्रोक्तलक्षणस्य संभवात्। कथम् ? इत्थम्—त्रिविधो हि भ्रमः—ज्ञानविशिष्टः, अज्ञानविशिष्टः, ज्ञानाज्ञानविशिष्टश्चेति। तत्र ज्ञानविशिष्टः—शुक्तिरजतादिभ्रमः ; स्वाकाराविद्यावृत्त्या सहोत्पन्नत्वात्। अज्ञानविशिष्टस्त्वाकाशादिव्यावहारिकप्रपञ्चाध्यासः ; अज्ञानविशिष्टतयोत्पन्नत्वात्। *ननु*—अज्ञानमनादि,

पञ्चपादिकाविवरणम्

पेक्षया भेदज्ञानं सर्वत्र बाधः स्यात्। नच पदार्थज्ञानमेव भेदज्ञानम्; गृहीतमात्रस्य सति भेदेऽविवेकाभावप्रसङ्गादित्युक्तम्। अन्यात्मना प्रतिपन्नस्येतरेतराभावप्रतिपत्तिर्बाध इति चेत्, शुक्लो घट इति प्रतिपद्य घटस्य शौक्ल्यं न द्रव्यम्, गुण इति ज्ञानं सर्वत्र बाधः स्यात्, न तथा प्रसिद्धिरस्ति; समानौ च सर्वत्र भेदाभेदावित्यैक्यं प्रतिपद्य भेदप्रतिपत्तिः सर्वत्र बाधः स्यात्। नच ज्ञानस्य प्रध्वंसो बाधः; स्वयं क्षणिकत्वात्, अर्थस्य च संविद्विषयस्यान्यस्य वा ज्ञानेन प्रध्वंसायोगात्, बाधस्य च लोकप्रसिद्धत्वात्। तस्मान्न बाधं पश्यामः॥ *उच्यते*;—अज्ञानस्य स्वकार्येण वर्तमानेन प्रविलीनेन वा सह ज्ञानेन निवृत्तिर्बाधः, तथाविधानवबोधनिवृत्तौ बाधप्रसिद्धेरिति॥

ऋजुविवरणम्

अन्यात्मकतयेति॥ अत्यन्तभेदवादे दूषणमाह—*शुक्लो घट इतीति*॥ अत्रापि सामानाधिकरण्यादभेदप्रतीतिरिति भावः। भेदाभेदपक्षे दूषणमाह—*समानौ चेति*॥ तत्र निवृत्तिर्बाध इत्युक्ते घटादिनिवृत्तेरपि बाधत्वं स्यात्; तन्निवृत्त्यर्थमाह—*ज्ञानेनेति*॥ प्रागभाव-पूर्वज्ञानयोर्ज्ञानेन निवृत्तावपि न बाधप्रसिद्धिः, तदर्थमाह—*अज्ञानस्येति*॥ सर्वप्रमाणेष्वज्ञाननिवृत्तावपि बाधप्रसिद्ध्यभावात्तन्निवृत्त्यर्थमाह—*स्वकार्येणेति*॥ अज्ञानस्य कार्यद्वयम्। तत्र वर्तमानेन सह निवृत्तौ लक्षणे प्रातिभासिकस्य कालान्तरे स्थित्यभावादुत्तरत्र नेदमिति ज्ञानस्य बाधकत्वं न स्यात्; प्रसिद्धश्च बाधः, प्रलीनसाहित्ये च विवक्षिते वर्तमानसहिते बाधबुद्धिर्न स्यात्, उभयसाहित्यस्य चाभावात्, अतः प्रयोजकं विविच्य दर्शयति—*वर्तमानेनेत्यादिना*॥ कथमस्यैव बाधत्वमिति? तदाह—*तथाविधेति*॥

तत्त्वदीपनम्

विवेकेनागृहीतत्वमविविक्तम्? उताभेदेन बुद्धत्वम्? आद्येऽपि किं पदार्थज्ञानातिरिक्तं विवेकग्रहणम्? उत पदार्थज्ञानमेव? इति विकल्प्य प्रथमं प्रत्याह—*सर्वेति*॥ पदार्थज्ञानसमये तयोर्भेदस्यागृहीतत्वाद् यदितरेतरापेक्षया भेदज्ञानम्, असौ बाध आपद्येत, न च तथा प्रसिद्धिरस्तीत्यर्थः। पदार्थप्रतिपत्तिरेव भेदप्रतिपत्तिरिति कल्पं निरस्यति—*नचेति*॥ भेद इत्यत्र प्रतिपन्न इति पदमध्याहर्तव्यम्। अविविक्तत्वमभेदेन प्रतिपन्नत्वमिति यो द्वितीयः कल्पः, यश्चेतरेतराभावप्रत्ययो बाध इति, तदुभयमुत्थापयति—*अन्यात्मनेति*॥ अतिव्याप्त्या दूषयति—*शुक्ल इति*॥

दिगम्बरमते सर्वस्य भिन्नाभिन्नत्वादभेदप्रतिपत्त्युत्तरकालं यदिदं भेदज्ञानम्, तदपि बाधकं स्यादिति न भ्रान्त्यादिव्यवस्थेत्याह—*समानाविति*॥ पञ्चमेऽपीदं विवेचनीयम्—किं ज्ञानमात्रस्याभावप्रतियोगित्वं बाधः? उत ज्ञेयभेदस्येति? तत्राऽऽद्यं दूषयति—*नचेति*॥ द्वितीयं दूषयति—*अर्थेति*॥ किमर्थस्य प्रतिपन्नस्य बाधः? उताप्रतिपन्नस्य? प्रतिपन्नत्वेऽपि किं तद्विषयेण बाधः? उताऽन्यविषयेण? आद्ये संवादेन पूर्वज्ञानप्रामाण्यमेव दृढीकृतं स्यात्, द्वितीये भिन्नगोचरत्वाज्ज्ञानयोर्बाध्य-बाधकतेत्यभिप्रेत्याह—*संविद्विषयस्येति*॥ अप्रतिपन्नत्वेन तस्याप्रसक्तेर्न निषेध इत्याह—*अन्यस्येति*॥ वाशब्दश्चार्थः। मा भूत् तर्हि बाध इत्याह—*बाधस्येति*॥ अज्ञाननिवृत्तेर्बाधत्वेऽज्ञाननिवर्तकसकलज्ञानानां बाधकत्व प्रसक्तिरित्यभिप्रायेणोपसंहरति—*तस्मादिति*॥

अज्ञाननिवृत्तिर्बाध इति मतान्तरमादाय सिद्धान्तयति—*उच्यत इति*॥ घटादिज्ञानमपि बाधः स्यादिति यदुक्तम्, तत्राह—*स्वकार्येणेति*॥ किं वार्तमानिककार्यसहिताज्ञानस्य निवृत्तिर्बाधः? उत प्रविलीनकार्यसहिताज्ञानस्य? नाऽऽद्यः; विपर्ययोत्पत्त्यनन्तरकालं मनसो विषयान्तरसंचारे समयान्तरे च शुक्तिलोचनसंप्रयोगजाधिष्ठानज्ञानेनाज्ञाननिवृत्तौ वार्तमानिककार्यध्वंसाभावेनाव्याप्तेः, न द्वितीयः; कार्यसहिताज्ञाननिवृत्तौ तदभावात्, इत्याशङ्क्य कार्याऽऽकारेण परिणताज्ञाननिवृत्तिर्बाध इत्यनुगतं लक्षणमुभयत्राप्यस्तीत्याह—*वर्तमानेनेति*॥ तत्र प्रमाणमाह—*तथाविधेति*॥ अतो बाध्यत्वं मिथ्यात्वमित्युक्तं साधूक्तमित्युपसंहरति—*इतीति*॥

पञ्चपादिका

ननु न व्यापकमिदं लक्षणम् ; स्वप्नशोकादावसम्भवात्, न हि स्वप्नशोकादौ केनचित्सम्प्रयोगोऽस्ति, येन परत्र परावभासः स्यात् । अत एव वासनातिरिक्तकारणाभावात् स्मृतिरेव, न स्मृतिरूपता, *अत्रोच्यते* न तावत् स्मृतित्वमस्ति ; अपरोक्षार्थावभासनात् । *ननु* स्मृतिरूपत्वमपि नास्ति ;

पञ्चपादिकाविवरणम्

स्मृतिरूपशब्देन कारणत्रितयजन्यत्वमुक्तम् । तत्र कारणत्रितयजन्योऽन्यस्यान्यात्मनाऽवभासो लक्षणम्, तदिदं लक्ष्यं न व्याप्नोतीति चोदयति—*ननु न व्यापकमिति* ॥ कथं लक्षणांशस्याभाव इति ? तत्राह—*नहि स्वप्नशोकादाविति* ॥ संप्रयोगस्य कारणांशस्याधिष्ठानांशस्य चाभावादित्यर्थः । कस्तर्हि स्वप्न इति ? तदाह,—*अत एवेति* ॥ तत्र वासनाजन्यस्मृतिमात्रत्वे भ्रान्तिप्रसिद्धिर्गवयादिस्मृतिवन्न स्यादिति परिहरति—*न तावत्स्मृतित्वमिति* ॥ *ननु* कारणत्रितयाभावान्न ज्ञानान्तरमपीत्याह—*ननु स्मृतिरूपत्वमपि नेति* ॥

ऋजुविवरणम्

ननु—निरूपिते सकललक्षणे कृत्स्नैकदेशाभावेनाव्याप्तिः शङ्कितुं शक्यते ; नात्र तत्सकलज्ञानम्, कथमव्याप्तिः ? यद्वा—स्मृतिरूपत्वस्य परत्र परावभासत्वस्य च संभवात्कथमव्याप्तिरुच्यते ? इत्याशङ्क्य तत्प्रदर्शनपूर्वकमवतारयति—*स्मृतिरूपशब्देनेति* ॥ *ननु*—न संप्रयोगः परत्र परावभासे कारणम्, अतः कथं तदभावेन परत्र परावभासो निराक्रियते "नहि स्वप्नशोकादावि"त्यनेन ? इत्याशङ्क्य व्याचष्टे—*संप्रयोगस्येति* ॥ लक्षणमुपपादयितुमुपक्रम्य

तत्त्वदीपनम्

संप्रयोगाभावेन कथं लक्षणाव्याप्तिः शङ्क्यते ? संप्रयोगस्य लक्षणान्तर्भावादित्याशङ्क्याह—*स्मृतिरूपेति* ॥ स्मृते रूपमिव रूपमस्येति स्मृत्या साम्यं वैषम्यं च लक्ष्यते । तत्र स्मृत्या साम्यार्थं संस्कारजन्यत्वं सिद्ध्यति, वैषम्यार्थं संप्रयोगजन्यत्वम् । उभयजनितज्ञानस्यासम्यग्ज्ञानत्वार्थं दोषोऽपि कारणकोटौ निवेशितः, इति कारणत्रितयजन्यत्वं सिद्धमित्यर्थः । कारणत्रितयजन्यत्वं तटस्थलक्षणं तच्छब्दार्थः । इयरत् स्वरूपलक्षणमिदंशब्दार्थः । नच "शुक्लः पटः" इत्यादिप्रत्ययेषु स्वरूपलक्षणातिव्याप्तिः ; वस्तुत आरोप्यप्रतियोगिकात्यन्ताभाववतोऽन्यात्मताप्रतिपत्तेः स्वरूपलक्षणत्वेन विवक्षितत्वात् । सर्वमेतत् स्वरूपलक्षणमिति केचित् । "स्वप्नशोकादावि"त्यत्र शोकशब्देन शोकोद्भूतभ्रमस्य निर्देशः । आदिशब्देन संतोषप्रकर्षजभ्रमस्य । लक्ष्य-लक्षणयोरविनाभावात् । लक्ष्ये सति लक्षणं नेति व्याहतमिति चोदयति—*कथमिति* ॥ लक्षणत्वे सिद्ध एतत् स्यात्, तदेवासिद्धमित्यभिप्रेत्याह—*तत्राहेति* ॥ संस्कारवत्संप्रयोगस्य कारणान्तर्भावः, इतरथाऽऽपरोक्ष्यानुपपत्तेरिति वा शङ्कते—*कथमिति* ॥ बाह्येन्द्रियस्य तदोपरमादान्तरस्य च केवलस्य बहिरप्रवृत्तेर्न संप्रयोगजत्वसिद्धिरित्याह—*तत्राहेति* ॥

टीकायां तटस्थलक्षणनिरसनेन कथं स्वरूपलक्षणनिरासः ? इत्याशङ्क्याह—*संप्रयोगस्येति* ॥ संप्रयोगस्याध्यासं प्रति कारणत्वात्तदभावे तदभाव इत्यर्थः । किंच किं स्वप्नभ्रमस्याऽऽत्माऽधिष्ठानम् ? उतानात्मा ? नाऽऽद्यः ; विच्छिन्नतयाऽनात्मनः स्फुरणात्, न द्वितीयः ; अनात्मन आरोपकोटौ प्रक्षेपादधिष्ठानत्वानुपपत्तेरित्याह—*अधिष्ठानेति* ॥ कार्यापलापानुपपत्त्या कारणादिकं किंचित्तु कल्प्यमिति चोदयति—*कस्तर्हीति* ॥ कार्यमन्यथासिद्धमित्याह—*तदाहेति* ॥ अपरोक्षप्रत्ययविरोधाद्रजतज्ञानं न स्मृतिरिति शङ्कायामुक्तम्—*न स्मृतिरूपत्वमिति* ॥ अपरोक्षात्माऽविवेकात्तथात्वव्यवहार इत्यर्थः ॥

अपरोक्षप्रतिभासनमाश्रित्य रजतज्ञानस्य स्मृतित्वनिराकरणमनुपपन्नम् ; प्रतिभासस्य भ्रान्त्याऽपि संभवात्, इत्याशङ्क्य, त्वन्मते सैवानुपपन्नेत्याह—*तत्र वासनेति* ॥ दोषसहकृतवासनाजन्यत्वाद् भ्रान्तित्वं घटत इत्याशङ्क्याह—*गवयादीति* ॥ स्मृतित्वे दीपजन्यत्वमेवानुपपन्नमित्यभिप्रायः ॥

पञ्चपादिका

पूर्वप्रमाणसंस्कारमात्रजन्यत्वात्, *अत्रोच्यते* ; उक्तमेतत्पूर्वप्रमाणविषयावभासित्वमात्रं स्मृतेः स्वरूप-

पञ्चपादिकाविवरणम्

कारणत्रितयजन्यत्वमन्यस्यान्यात्मनाऽवभासं च सम्पादयामीत्याह --*अत्रोच्यत इति* ॥ सम्प्रयोगा-

ऋजुविवरणम्

स्मृतिस्वरूपं कीर्तितम्—"उक्तमेतदि"त्यनेन, तदसंगतमित्याशङ्क्य व्याचष्टे—*संप्रयोगाभावादिति* ॥ "तदिह निद्रादि-दोषोपप्लुतं मनः"इत्यनेन मनसः कारणत्वमुक्तम्, तत्र मनसः संकल्पविकल्पात्मकत्वेन ज्ञानसाधनत्वाभावात्कथं कारण-

तत्त्वदीपनम्

रजतज्ञानस्य स्मृतित्ववत्तद्विलक्षणत्वमप्यनुपपन्नम् ; संस्कारमात्रजन्यत्वादित्युक्तम्, तन्नोपपद्यते ; दोषस्य सामग्र्यन्तर्भावाद्धेत्वसिद्धेरित्याशङ्क्याह—*ननु कारणत्रितयेति* ॥ न तावत्तदा संप्रयोगः, चक्षुष उपसंहृतत्वात्, देशाद्यन्तरितस्य संप्रयोगायोग्यत्वाच्च ; नापि दोषसंभवः । चक्षुष उपसंहृतत्वात्, तद्गतदोषानुपपत्तेः । नापि विषय-दोषः ; स किं ज्ञायमानतया हेतुः ? उताज्ञायमानतया ? तत्र चक्षुषा तावन्न ज्ञायमानत्वम् ; तस्योपसंहृतत्वात् । नापि मनसा ; केवलस्य मनसो बहिरप्रसरात् । न द्वितीयः ; जाग्रदवस्थायामवगतस्य विषयदोषस्य हेतुत्वदर्शनात् । नापि प्रमातृदोषः ; निद्रादोषोपहततया रागाद्यसंभवादित्यर्थः । ज्ञानान्तरासिद्धौ न तत्र लक्षणसाधनमुचितमित्याशङ्क्य, प्रमाणस्मृतिविलक्षणत्वात्स्वप्नादिज्ञानस्याध्यासत्वम्, ततश्चोभयमपि लक्षणं संपादयितुं शक्यमित्याह—*कारण-त्रितयेति* ॥ लक्षणासिद्धिशङ्कायां तदुपपादनमुचितम्, न स्मृतिरूपकीर्तनमित्याशङ्क्य तात्पर्यमाह—*संप्रयोगेति* ॥

वार्तिकम्

तेन सह कथमाकाशादेरुत्पत्तिरिति—चेत्, *नैष दोषः* ; स्वत उत्पत्त्यभावेऽपि विशिष्टाकारेण वृत्त्य-वच्छेदेन चैतन्योत्पत्तिवत् कर्णशष्कुल्यवच्छेदेनाकाशोत्पत्तिवच्च तदुत्पत्तिसंभवात् । *एतेन*—आकाशादेरज्ञातप्रपञ्चस्य स्मृतिरूपत्वम्—*व्याख्यातम्* ; विशिष्टाकारेण तद्भ्रमस्य संस्कारजन्यत्वाद् ज्ञाततायाः स्मृतिसादृश्येन स्मृतित्वोपपत्तेः । नच—अज्ञाततया ज्ञानत्वाभावेन स्मृतित्वासिद्धिरिति—वाच्यम् ; यो हि चैतन्यस्य साक्षादभिव्यञ्जकोपाधिः, स तदुपाधित्वादेव ज्ञानमित्यवधार्यते ; तद्यथा बुद्धिवृत्त्यविद्यावृत्त्योर्भवति तदुपचारः ; अस्ति चाज्ञाततया अपि साक्षाच्चिदुपाधित्वम् ; 'जानामी'तिवद् 'घटं न जानामी'ति तद्विषयतया घटादेरपरोक्षत्वदर्शनात् । तस्मात्साक्षाच्चिदुपाधित्वाद् भवत्यज्ञातताऽपि ज्ञानम् । अतश्चाकाशादेः स्थायित्वसिद्धिः ; अज्ञाततारूपतत्प्रतीतेः स्थायित्वात् । नचैवं प्रलयकालेऽपि तदज्ञाततायाः सत्त्वाद् आकाशादिसद्भावप्रसङ्गः ; कारणरूपेण तत्सद्भावस्य तत्कालेऽपीष्टत्वात्, क्षणिक-स्यापि शुक्तिरजतस्य बाधपर्यन्तावस्थानवत् तस्याप्यधिष्ठानज्ञानपर्यन्तावस्थानस्याङ्गीकारात् । अज्ञातता-रूपतत्प्रतीतिसत्त्वादिदानीमिव तत्कालेऽपि व्यक्ततया तदवस्थानप्रसङ्गः । न हि शुक्तौ रजतमित्यपरोक्ष-प्रतीतिकाले रजतमव्यक्तं भवतीति चेत्, *न* ; जीवादृष्टोपरमे नभआदेर्व्यक्तीभावोपरमेण तद्विशिष्टा-ज्ञाततया अभ्युपरमात् तत्काले तत्सत्त्वासिद्धेः । नच—एवमाकाशादिविज्ञानेन तदज्ञाततया विनाशाद् आकाशादिनाशप्रसङ्ग इति—वाच्यम् ; इदंज्ञानेन शुक्त्यज्ञानवत् सामान्यमात्रविषयकपरोक्षज्ञानेन तदज्ञाततानाशानुपपत्तेः, तस्यास्ततस्सामान्यविषयादपसारेऽपि तद्विशेषविषयतयाऽवस्थानात् । *ननु*—प्रत्यक्षस्य विशेषविषयत्वाद् वियदादेः शुक्त्यादेश्चाज्ञाततानाशान्नाशः स्यादिति—चेत्, *न* ; तस्याप्य-

पञ्चपादिका

मिति। तदिह निद्रादिदोषोपप्लुतं मनोऽदृष्टादिसमुद्बोधितसंस्कारविशेषं सहकार्यनुरूपं मिथ्यार्थविषयं ज्ञानमुत्पादयति। तस्य च तदवच्छिन्नापरोक्षचैतन्यस्थाविद्याशक्तिरालम्बनतया विवर्तते। *ननु* एवं

पञ्चपादिकाविवरणम्

भावादपरोक्षावभासित्वाद् ग्रहण-स्मृतिमात्रत्वे प्रत्युक्ते, तृतीयमिदं विज्ञानं स्वयमेवोक्ताध्यासलक्षणं गमयितुं समर्थमिति वदितुं प्रकारान्तरं पर्युदस्यति--*उक्तमेतदिति* ॥ स्वप्नप्रपञ्चविपरीतप्रमात्रादिविज्ञानसाधनस्यान्तःकरणस्य निद्रादिदोषपूर्वानुभवसंस्कारसहितस्य संप्रतिपन्नकारणत्रितयत्वाद् युक्तं स्मृतिरूपं भ्रान्तिज्ञानमित्याह---*तदिह निद्रादिदोषोपप्लुतमिति* ॥

कथं परत्र परावभास इति ? तदाह—*तस्य चेति* ॥ निद्रादिदोषसंस्कारोपप्लुतेनान्तःकरणेन मिथ्याध्यासनिमित्तकारणेनावच्छिन्नचैतन्यस्थाऽविद्याशक्तिः पुष्कलनिमित्तकारणसंसर्गादध्यासं प्रति पुष्कलकारणतामापद्यमाना मिथ्यार्थालम्बनाकारेण विवर्तत इति, चैतन्यमेव स्वाविद्यया विवर्तते। अतः सत्यस्य वस्तुनो

ऋजुविवरणम्

अयान्तःपातित्वमिति ? तदाह—*प्रमात्रादीति* ॥ "तस्ये"ति ज्ञानपरामर्शात् तच्छब्देनापि ज्ञानपरामर्शो भवेद्, नच तद्युक्तम्; अध्यासकारणावच्छिन्नचैतन्यस्थाविद्याशक्तेः परिणामस्योक्तत्वात्, न तु ज्ञानस्य कारणत्वम्। नचाविद्याशक्तिर्विवर्तते; निमित्तकारणसंसर्गाभावात्, तथा "सैवालम्बनतया विवर्तते" इत्यप्यनुपपन्नम्, लक्षणव्याप्तिश्च न स्यादित्याशङ्क्याभिप्रायमाह-*निद्रादिदोषेति* ॥ "आलम्बनतये"ति व्याचष्टे—*मिथ्यार्थालम्बनाकारेणेति* ॥ तथाऽविद्याविवर्तत्वपक्षे लक्षणाव्याप्तिरिति यच्चोदितम्, तत्परिहरति—*चैतन्यमेवेति* ॥ *ननु*—जागरणे बाह्य-

तत्त्वदीपनम्

ग्रहणत्व-स्मृतित्वप्रत्युक्तौ क्रमेण हेतुद्वयं द्रष्टव्यम्। जागरे बाह्येन्द्रियसंप्रयोगस्यापरोक्षाऽऽरोपजनकत्वम्, स्वप्ने त्वन्यथेति वैषम्यमाशङ्क्यारोप्यविपरीताऽऽकारबोधजनकं नयनं दुष्टं सदारोपगमकं जागरणे दृष्टम्, तच्च स्वप्नेऽपि संपादयितुं शक्यमित्याह—*स्वप्नप्रपञ्चेति* ॥ प्रसिद्धदोषाभावेऽप्यन्यो दोषोऽस्तीत्याह—*निद्रेति* ॥ वातादिरादिशब्दार्थः *तदिहेत्यस्यायमर्थः :—*तत्=तत्र; अयथाव्यवहारहेतुज्ञानस्य ग्रहण-स्मृतिविलक्षणत्वे इत्यर्थः। *इहेति* ॥ जाग्रद्भोगप्रदकर्मोपरमे स्वप्नोपस्थापककर्माभिव्यक्तौ चेत्यर्थः। सकलसंस्कारसद्भावे कथं कदाचित् कस्यचिद्भानम्? इत्यत आह—*अदृष्टेति* ॥ तटस्थलक्षणसिद्धावपि न स्वरूपलक्षणं सिद्ध्यति; आत्मन्यनात्मनि वाऽऽरोपाऽसंभवात्, इत्युक्तं स्मारयति—*कथमिति* ॥ अनात्मनोऽनधिष्ठानत्वेऽप्यात्मनोऽधिष्ठानत्वं घटयितुं शक्यत इत्याह—*तदाहेति* ॥ "तदवच्छिन्नेत्य"त्र तत्पदेन ज्ञानं गृह्यते; तस्य प्रकृतत्वात्, इति शङ्कां निराकर्तुमाह—*अन्तःकरणेनेति* ॥ अन्तःकरणसंप्रयोगस्य स्वप्नहेतुत्वे जाग्रत्यपि तत्प्रसङ्गः, तदर्थमाह—*निद्रादीति* ॥

अन्तःकरणस्योपादानत्वं व्यावर्तयति—*मिथ्येति* ॥ नयनसंप्रयुक्तेदंशवन्मनसा संयुक्तमधिष्ठानमित्याह—*अवच्छिन्नेति* ॥ चैतन्यस्यासङ्गाद्वितीयस्याधिष्ठानत्वमप्यनुपपन्नमित्याशङ्क्य, न साक्षादधिष्ठानत्वम्, अपि त्वविद्याद्वारेणेत्याह—*अविद्येति* ॥ अविद्याशक्तेः सदातनत्वेन सदा कार्यजनकत्वं स्यादित्याशङ्क्य विशिष्टान्तःकरणसंयोगस्याविद्याक्षोभकत्वात् तस्य चाऽऽगन्तुकत्वान्नैवमित्याह—*पुष्कलनिमित्तेति* ॥ इतिशब्दोऽक्षरार्थकथनपरिसमाप्तिद्योतनार्थः। अविद्याशक्तिर्मिथ्यार्थाऽऽकारेण विवर्तते चेत्, सत्यानृतमिथुनीकरणरूपत्वमध्यासस्योक्तं कुप्येतेत्यत्राह—*चैतन्यमिति* ॥ अन्यथाऽन्यथा विवर्तमानाऽज्ञानसत्तास्फूर्तिप्रदत्वाच्चैतन्यमेव तथा तथा विवर्तत इत्युक्तं स्यात्। अतश्चोक्ताध्याससिद्धिरित्यर्थः ॥

जागरणे बाह्याधिष्ठानमुपलब्धम्, तद्वत्स्वप्नेऽपि बाह्याधिष्ठानं वक्तव्यम्, नच तन्निरूपयितुं शक्यत इति कथं

पञ्चपादिकाविवरणम्

मिथ्यावस्तुसंभेदावभासलक्षणः परत्र परावभासो विद्यत इति भावः। तथा जागरणेऽपि बाह्याधिष्ठानांशसंसृष्टान्तःकरणावच्छिन्नतया बाह्याधिष्ठानांशसंसृष्टचैतन्यस्थाविद्याशक्तिर्बाह्याधिष्ठानसंसृष्टरजताद्याकारेण विवर्तत इति, शुक्तिकाद्यवच्छिन्नं चैतन्यं रजताद्यालम्बनमिति बाह्यालम्बनं रजतादि कथ्यते। सर्वत्र तु चैतन्यमेव साक्षाद्वाऽन्यावच्छिन्नतया वा विभ्रमालम्बनमिति, युक्तः—'परत्र परावभासः' इत्यर्थः॥

आकाशवत्सर्वविषयोपरक्ततया सर्वत्रावभासमानमात्मानमनादृत्याहमित्येवावच्छिन्नमात्मानमुपादाय चोद-

ऋजुविवरणम्

स्यैवाधिष्ठानत्वं दृष्टम्, तथा स्वप्नेऽपि वक्तव्यम्, तत्र च तदभावात्कथं परत्र परावभासः? इत्याशङ्क्याभिप्रायान्तरमाह—*तथा जागरणेऽपीति*॥ तथेति पूर्वप्रकारातिदेशः। जागरणेऽपि चैतन्यमेवालम्बनमित्यर्थः, कथं न साक्षात्त्वमिति? तदाह—*चैतन्यं रजताद्यालम्बनमिति*॥ कथं तर्हीदं रजतमिति प्रतीतिरिति? तदाह—*शुक्तिकाद्यवच्छिन्नमिति*॥ कथं चैतन्यस्य तदवच्छेद इति? तदाह—*बाह्याधिष्ठानेति*॥ तर्हि शुक्त्यादिविशेषात्मताप्रतीतिरपि कस्मान्न भवति? इत्याशङ्क्याह—*अंशसंसृष्टेति*॥ *ननु—* तदेव न कारणम्, किंत्वविद्याऽपि; सा चात्माऽऽश्रया तदाश्रयरजताकारेण कस्मान्न विवर्तत इति? तत्राह—*बाह्याधिष्ठानांशेति*॥ पूर्ववदेव वांशविवक्षा। भवत्वन्तःकरणद्वारेणाविद्याशक्तेर्विषयसबन्धः; तथापि कथं रजतस्य पुरोवर्त्यात्मना प्रतीतिरिति? तत्राह—*बाह्याधिष्ठानसंसृष्टेति*॥ इतिशब्दः प्रकारवचनः, हेत्वर्थो वा। *अथवा*—शुक्त्यवच्छेदे चैतन्यस्योक्तेऽनन्तरमेव शङ्का—चैतन्यस्य तदवच्छेदेऽपि कथं रजतस्य पुरोवर्त्यात्मना प्रतीतिरिति? तदाह—*बाह्याधिष्ठानसंसृष्टेति*॥ आत्माश्रयाऽविद्या कथं तत्संसृष्टरजताकारेण विवर्तत इति? तत्राह—*बाह्याधिष्ठानांशेति*॥ चैतन्यस्यापि कथं तदवच्छेद इति? तदाह—*बाह्याधिष्ठानांशेति*॥ *अथवा*—"तस्य चे"तीमं ग्रन्थं प्राचीनशङ्कापरिहारत्वेन योजयति—*तथा जागरणेऽपीति*॥ "तस्य चे"त्यस्य व्याख्या—*तथा जागरणेऽपीति*॥ जागरणेऽपि यद् ज्ञानम्, तस्यापीत्यर्थः। "तदवच्छिन्ने"ति व्याचष्टे—*बाह्याधिष्ठानांशेति*॥ "अपरोक्षे"त्यादि व्याचष्टे—*बाह्याधिष्ठानांशेति*॥ "आलम्बनतये"त्यस्य व्याख्या—*संसृष्टरजतेति*॥ "शुक्तिकाद्यवच्छिन्नमि"त्यादिना समस्तवाक्यार्थमाह। *ननु* स्वप्ने चैतन्यमधिष्ठानमुक्तम्, तत्र कथं "नन्वेवं सत्यन्तरेव"इति चोद्यम्? इत्याशङ्क्य तद्बीजं दर्शयति—*आकाशवदिति*॥ अन्तरेवेति शरीरगतत्वम्? आत्मगतत्वं वा? उभयथाऽपि न

तत्त्वदीपनम्

परत्र परावभासः? तत्राह—*तथेति*॥ यथा स्वप्ने चैतन्यमधिष्ठानम्, तथा जागरणेऽपि शुक्तिकाद्यवच्छिन्नचैतन्यं रजताद्यालम्बनमिति बाह्याऽऽलम्बनं रजतादि कथ्यत इत्यन्वयः। कथं चैतन्यस्य स्वच्छस्यास्वच्छशुक्तिकाद्यवच्छेदः? इत्याशङ्क्याह—*बाह्याधिष्ठानांशेति*॥ इन्द्रियस्य बाह्यसंप्रयोगे तद्द्वाराऽन्तःकरणं बाह्याऽऽकारेण विपरिणमते, तस्मिंश्चान्तःकरणे स्वच्छे चैतन्यस्य प्रतिबिम्बोदयो भवति; ततश्चान्तःकरणद्वारा विषयसंसर्गोऽपीत्यर्थः। "अवच्छिन्नतये"त्येतच्छुक्तिकाद्यवच्छिन्नमित्यनेन संबध्यते॥

चैतन्यस्याधिष्ठानसंसृष्टत्वं चोपपादयति—*बाह्येति*॥ रजतादेरविद्याविवर्तत्वाभ्युपगमाच्चैतन्यालम्बनत्वं कथम्? इत्याशङ्क्य विवर्तमानाधिष्ठानत्वाच्चैतन्यस्याधिष्ठानत्वं युक्तमित्याह—*चैतन्यस्थाऽविद्याशक्तिरिति*॥ रजतस्य चिदविद्यापरिणामत्वे परिणामस्य परिणामितन्त्रतया न—'इदमि'ति प्रतिभासो युक्त इत्याशङ्क्याह—*बाह्याऽधिष्ठानसंसृष्टरजतेति*॥ तत्र हेतुमाह—*बाह्याधिष्ठानसंसृष्टेति*॥ क्वचिदवच्छिन्नं चैतन्यमधिष्ठानम्, क्वचिदनवच्छिन्नं चैतन्यमित्यनुगतप्रयोजकाभावमाशङ्क्य, सर्वत्र चित्त्वमधिष्ठानत्वप्रयोजकमित्याह—*सर्वत्र त्विति*॥

चैतन्यस्य सकलविभ्रमाधिष्ठानत्वेऽन्तरेवाऽऽरोपितप्रतिभासः स्यादित्युक्तम्, तदनुपपन्नम्; चैतन्यस्य सकलविषयव्यापित्वात् इत्याशङ्क्य, सिद्धान्त्यभिप्रायमजानानस्येदं चोद्यमित्याह—*आकाशवदिति*॥ किं शरीरगततया प्रतिभास आपाद्यते? उताऽऽत्मगततया? नाद्यः; अप्रसक्तेः, द्वितीये त्विष्टापत्तिरित्याशङ्क्याह—*आत्मैवेति*॥

पञ्चपादिका

सत्यन्तरेव स्वप्नार्थप्रतिभासः स्यात् ? को वा ब्रूते नान्तरिति ? *ननु* विच्छिन्नदेशोऽनुभूयते स्वप्नेऽपि जागरण इव, न तदन्तरनुभवाश्रयत्वे स्वप्नार्थस्योपपद्यते, *ननु* देशोऽपि तादृश एव,

पञ्चपादिकाविवरणम्

यति—*नन्वेवं सत्यन्तरेवेति* ॥ आत्मैवाधिष्ठानं चेत्, इदं रजतमितिवदहं नीलमित्येव स्वप्नप्रपञ्चो भायादित्यर्थः । निष्कृष्टाहङ्कारं चैतन्यमात्रमात्मानमादाय चेत्यस्य च चित्सामानाधिकरण्यावभासं सर्वत्राङ्गीकृत्य परिहरति—*को वा ब्रूत इति* ॥ पुनरप्यहङ्कारावच्छिन्नमात्मानमादाय चोदयति—*ननु विच्छिन्नदेश इति* ॥ इदमिति पृथक्तयेत्यर्थः । पृथक्त्वावभासोऽप्यन्तरेवेत्याह—*ननु देशोऽपीति* ॥

ऋजुविवरणम्

विरोधः ; अङ्गीकारात्, सिद्धान्ताविरोधि च चोद्यमित्याशङ्क्याभिप्रायमाह—*आत्मैवाधिष्ठानं चेदिति* ॥ अहमवच्छिन्नत्वं प्रक्रमाद् लब्धम् । *ननु* उक्ताभिप्रायेण चोद्ये "को वा ब्रूते" 'इति तदङ्गीकरणमनुपपन्नमित्याशङ्क्याभिप्रायमाह—*निष्कृष्टाहंकारमिति* ॥ अन्तःशब्दस्यान्यथा व्याकृतत्वादत्रापि तदर्थत्वशङ्कानिवृत्त्यर्थमन्यथा व्याचष्टे—*चेत्यस्येति* ॥ उक्तादूर्ध्वं चोद्यमनुपपन्नमिति मत्वा तदभिप्रायमाह—*पुनरपीति* ॥ विच्छिन्नश्चासौ देशश्चेति विग्रहः प्रतिभाति ; तथा सति विच्छिन्नदेशानुभवादर्थस्यान्तरनुभवाश्रयत्वं नोपपद्यत इति व्यधिकरणो हेतुरित्याशङ्क्य व्याचष्टे—*इदमिति* ॥ पृथक्तयेत्यनेन विच्छिन्नो देशो यस्यार्थस्येति विग्रहो दर्शितः । "देशोऽपि तादृशः"इत्यनेनार्थसादृश्यं दर्शितम् । तत्र पूर्वग्रन्थे इदमिति प्रतीत्याऽर्थस्यान्तरनुभवाश्रयत्वं नोपपद्यत इति चोदिते "तादृशः"इत्यनेन संनिधानाद् बाह्यत्वमुक्तमिव प्रतिभाति ; तथा सति तादृशत्वमिष्टविघातकं स्यात् ; बाह्यदेशसंबन्धेनार्थस्यापि बहिष्ठोपपत्तेः,इत्याशङ्क्य तद्व्याख्यानेनावतारयति—*पृथक्त्वावभास इति* ॥ अवभासमानं पृथक्त्वमान्तरमेवेत्यर्थः । अर्थगतत्वेन प्रतीयमानमिदन्त्वं

तत्त्वदीपनम्

परिच्छिन्नस्याऽऽत्मनोऽधिष्ठानत्वादहं नीलमिति प्रतिभासः स्यादित्यर्थः । परिच्छिन्नाऽऽत्मगततया प्रतिभास आपादित इष्टापत्त्योत्तरमयुक्तमित्याशङ्क्याह—*निष्कृष्टाहंकारमिति* ॥ निष्कृष्टः पृथक्कृतोऽहंकारो यस्मात्तत्तथोक्तम् । अनवच्छिन्नाऽऽत्मगततयाऽपि प्रतिभासाभावमाशङ्क्य, 'घटः स्फुरति' 'पटः स्फुरती'ति चित्समानाधिकरणतया प्रतीतिरस्तीत्याह—*चेत्यस्येति* ॥ चित्समानाधिकरणतया सर्वप्रतिभास उक्ते विच्छिन्नदेशस्य तथा स्फुरणाभिधानमयुक्तमित्याशङ्क्याह—*पुनरपीति* ॥ विच्छिन्नश्चासौ देशश्चेति कर्मधारयसमासशङ्का स्यात्, ततश्चाऽर्थस्यान्तरनुभवाश्रयत्वं नोपपद्यत इति व्यधिकरणमित्याशङ्क्य, विच्छिन्नो देशो यस्येति बहुव्रीहिर्विवक्षित इत्याशयवानाह—*इदमिति* ॥

देशोऽपि तादृश इत्यत्रार्थस्यान्तःस्थतयाऽप्रतिभासवद् देशस्यापि तथात्वमुच्यत इत्याशङ्का स्यात्, तथा च बाह्यदेशसंबन्धितयाऽर्थस्याऽपि बहिष्ठत्वात् सिद्धान्तविरोधः । तथाच कुतस्तत्संबन्धादित्येतच्च विरुद्धयेतेत्याशङ्क्याह—*पृथक्तेति* ॥ तादृक्शब्देन नार्थसादृश्यं विवक्षितम्, किं त्वन्तःस्थत्वमित्यर्थः । मेर्वादिदेशस्य

वार्तिकम्

शेषविशेषविषयत्वासिद्धेः । नहि घटादिगता यावन्तो विशेषास्ते सर्वेऽपि तदध्यक्षेणास्मदादिभिर्गृह्यन्ते, येन तद्गताज्ञाततया अपसाराद् घटादिनाशः स्यात् । किं बहुना ? घटाद्यधिष्ठानमात्मतत्त्वमेव तेन न विषयीकृतम्—"पराञ्चि खानि व्यतृणत्स्वयम्भूस्तस्मात् पराङ् पश्यति नान्तरात्मन्" इति श्रुतेः । परमात्मविशेषविज्ञानेनैव सर्वविशेषविषयकाज्ञाननिवृत्तिः ; तथाच श्रुतिः—"येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि"ति, "कस्मिन्नु खलु विज्ञाते सर्वमिदं विज्ञातं भवति" इति च ॥ कथं तर्हि

पञ्चपादिका

कुतस्तत्सम्बन्धाद्विच्छेदोऽवभासते ? अयमपि तर्ह्यपरो दोषः, नैष दोषः ; जागरणेऽपि प्रमाणज्ञानादन्यदन्तरपरोक्षानुभवान्न विषयस्थाऽपरोक्षता भिद्यते ; एकरूपप्रकाशनात् । अतोऽन्तरपरोक्षानुभवावगुण्ठित एव जागरणेऽप्यर्थोऽनुभूयते ; अन्यथा जडस्य प्रकाशानुपपत्तेः । यथा तमसाऽवगुण्ठितो

पञ्चपादिकाविवरणम्

अनवच्छिन्नचैतन्यसंसृष्टतयैव भेदावभासोऽपीति भावः । पुनरप्यहङ्कारावच्छिन्नमादायाहं भेद इत्यपि प्रतीयादित्याह—*अयमपीति* ॥ निगूढाभिसन्धिरेव पूर्वमुत्तरमुक्त्वा, इदानीं सर्वतो विप्रसृतचैतन्यं सर्वात्मना प्रकाशमानमात्मानं स्पष्टीकुर्वन्नाह—*नैष दोषो जागरणेऽपीति* ॥ प्रातिभासिकभेदमन्तरेण प्रमाणतो न भिद्यत इत्यर्थः । *ननु* अहमवच्छिन्नचैतन्यान्येव विषयगतचैतन्यानि किं न स्युः ? इत्यत आह—*अन्यथा

ऋजुविवरणम्

कथमान्तरमुच्यते ? इत्याशङ्क्य व्याचष्टे—*अनवच्छिन्नेति* ॥ "अहं भेद इत्यपि प्रतीयादि"ति चोदितेऽनन्तरं चैतन्यैकत्वप्रतिपादनं कृतम्,"नैष दोषो जागरणेऽपी"त्यादिना, तदसङ्गतम् ; नचाधिष्ठानचैतन्यनिरूपणं क्रियते ; पूर्वनिरूपितत्वेन पौनरुक्त्यात्, इत्याशङ्क्य साभिप्रायमवतारयति—*निगूढाभिसन्धिरिति* ॥ "प्रमाणज्ञानादि"त्यस्यानन्तरेण पदेन सामानाधिकरण्यशङ्का स्यात् ; तत्समानविभक्तित्वात्, तथा सति व्यर्थविशेषणत्वम्, अनुपपन्नं त्वनभिहितस्य प्रमाणत्वमित्याशङ्क्य "अन्तरपरोक्षानुभवादि"त्यवधौ पञ्चमी, इयं तु हेतौ, ल्यब्लोपे वेत्यभिप्रायेण प्रतीतिनिर्वाहपूर्वकं व्याचष्टे—*प्रातिभासिकमिति* ॥ *अथवा*—कथमेकरूपप्रकाशनेन भेदो निराक्रियते ? प्रमाणान्तरनुभव-विषयस्थचैतन्यानां भेदस्याऽपि प्रतीयमानत्वात्, इत्याशङ्क्य व्याचष्टे—*प्रातिभासिकमिति* ॥ अस्मिन् पक्षे सामानाधिकरण्येऽपि न विरोधः ; ऐक्यस्य विवक्षितत्वात् । "अन्यथा जडस्ये"त्ययुक्तम् ; नहि जडत्वमन्तरपरोक्षानुभवसापेक्षत्वे हेतुः, प्रकाशसंसर्गापेक्षत्वाज्जडावभासस्य । "प्रकाशानुपपत्तेरि"त्यप्ययुक्तम् ; स्वगतचैतन्येन चिद्रूपत्वेन वा प्रकाशोपपत्तेरित्याशङ्क्य

तत्त्वदीपनम्

व्यवहितस्य कथमन्तःस्थत्वम् ? इत्याशङ्क्याह—*अनवच्छिन्नेति* ॥ भेदशब्देन देशो विवक्षितो भिद्यत इति । अनवच्छिन्नचैतन्यसंसृष्टतया देशावभासस्योक्तत्वात्कथं दोषाऽऽपत्तिः ? इत्याशङ्क्याह—*पुनरपीति* ॥ "को वे"त्यादिनाऽनवच्छिन्नचैतन्यात्मताया उक्तत्वात्पौनरुक्त्यमित्याशङ्क्याह—*निगूढेति* ॥ अनवच्छिन्नं चैतन्यमधिष्ठानमित्यभिसन्धिः । पराक्चित्तस्य वादिनः स्वाशयानवबोधप्रतिपत्ताविल्याह—*इदानीमिति* ॥ व्याप्तावपि न निखिलाधिष्ठानत्वम् ; तदनुविद्धतया प्रतीतेरित्याशङ्क्याह—*सर्वेति* ॥

विषयस्थापरोक्षतायाः प्रत्यगनुभवाद्भेदाभावेऽनुभवविरोधः स्यात् । नच—"प्रमाणज्ञानादि"त्यत्र वस्तुतो भेदस्य निरास इति—शङ्क्यम् ; किं तयोः पञ्चम्योः सामानाधिकरण्यम् ? उत वैयधिकरण्यम् ? आद्ये न त्वदिष्टसिद्धिः ; द्वितीये ज्ञानप्रतियोगिको भेदो निषिद्धः स्यादित्याशङ्क्य प्रामाणिको भेदो निराक्रियते, न काल्पनिक इत्याह—*प्रातिभासिकेति*॥ 'जाग्रद्‌बुद्धः' इतिवत् पञ्चम्या निमित्तार्थत्वात्प्रमाणज्ञाननिमित्तो न भेदः परमार्थ एवेति शङ्क्यते—*नन्वहमिति* ॥ विषयस्थचैतन्येन तत्प्रकाशसंभवात् "प्रकाशानुपपत्तेरि"त्ययुक्तमित्याशङ्क्याह—*स्वयमिति* ॥

वार्तिकम्

ममाज्ञानं नष्टमिति लोकानां प्रतीतिः ? नैष दोषः ; परोक्षज्ञान इव विशेषाज्ञानेऽपि यावत्तत्प्रत्यक्षेण विषयीकृतम्, तावन्मात्रविषयात् शुक्तेरिदमंशादिवाज्ञानापसरणात् तन्नष्टत्वबुद्ध्युपपत्तेः । नच—एवं शुक्त्यध्यक्षेण तदज्ञाततया अनाशाद् न रजतभ्रमबाध इति—वाच्यम् ; शुक्तित्वमात्रावच्छिन्नचैतन्याज्ञातताम्रात्रोपादानत्वाद् रजतभ्रमस्य तदंशे तदपसारणमात्रेण तद्बाधबुद्ध्युपपत्तेः । नच—एवं ब्रह्मसाक्षात्कारादपि तदपसारणमेव स्यात् नतु तद्विनाश इति—वाच्यम् ; तस्मिन् विज्ञाते सर्वविशेष-

पञ्चपादिका

घटः प्रदीपप्रभावगुण्ठनमन्तरेण न प्रकाशीभवत्येवम्। यः पुनर्विच्छेदावभासः, स जागरेऽपि माया-

पञ्चपादिकाविवरणम्

जडस्येति* ॥ स्वयं चैतन्यहीना विषया आत्मावगतिप्रकाशेनापि न संसृज्यन्ते चेत्, मयाऽवगता इति सम्बन्धावभासो न स्यादित्यर्थः ॥

सर्वत्र चैतन्यावगुण्ठनेऽपि—'अहमिदमि'ति चात्मानात्मानौ विभक्ताविति प्रतिभासः कथमिति ? तत्राह— *यः पुनरिति* ॥ *ननु* चैतन्यमेव सर्वत्रान्तर्बहिर्भेदादिरूपेणावभासते चेत्, कथं तस्याखण्डाद्वितीयतेति ? चेत्यभेदोपरागनिमित्तभेदमन्तरेण स्वरूपभेदानवगमादित्याह—*तस्य च निरंशस्येति* ॥ निरंशद्र-

ऋजुविवरणम्

व्याचष्टे—*स्वयं चैतन्यहीना इति* ॥ चिद्रूपत्वाभावादित्यर्थः। "विषयाः" इति जडत्वोपपादनम्, चेतनत्वे हि साम्याद्विषय-विषयिभावादि न स्यादित्यर्थः। तथापि कथमन्यत्वेन जडस्य प्रकाशो निराक्रियते ? स्वगतप्रकाशेनाऽपि तस्य प्रकाशोपपत्तेरित्याशङ्क्य व्याचष्टे—*आत्मावगतिप्रकाशेनापीति* ॥ *यद्वा*—"आत्मावगतिप्रकाशेनापी"त्यनेन स्वगतचैतन्याभाववदात्मज्ञानसंसर्गाभाव इत्युक्तम्। अहमिदमित्यन्तःकरणघटादीनां विवेको बाह्यान्तरत्वेनात्मानात्मविवेकश्च चैतन्याश्रयत्वे न स्यात्। यद्वा—अहमिदमित्यनेन प्रकारेणात्मानात्मविच्छेदो न स्यादित्यर्थः। "तस्य चे"त्ययं ग्रन्थः पुनरुक्त इवाभाति ; स्वाभाविकभेदनिषेधेनौपाधिकभेदनिरूपणात्, पूर्वमपि चैतन्यभेदस्य निरस्तत्वादित्याशङ्कयावतारयति—*ननु चैतन्यमेवेति* ॥ भवतु निरंशत्वेन प्रदेशभेदाभावः ; तथापि कथं परो-

तत्त्वदीपनम्

पटादयो *विषयाः, *स्वयम्=स्वरूपेण, *चैतन्यहीनाः=चैतन्यासंबन्धिनः। तस्य तद्रूपत्वेन तदधीनव्यवहारभाक्त्वम् ; घटादीनामन्योन्यनिमित्तव्यवहारादृष्टेः, इतरथा न चितस्तत्स्थत्वम् ; स्वप्रकाशचिदधिगमं विना तत्स्थत्वानधिगतेरित्यर्थः ॥

विषये चैतन्यमङ्गीकृत्य तस्याऽऽत्मव्यतिरेके दोषमाह—*आत्मेति* ॥ अभेदवत्संबन्धानुपपत्तिरपेर्थः। आत्माऽवगतिरेव प्रकाश आत्माऽवगतिप्रकाशः, तेन नाभेदलक्षणः संबन्धः ; भिन्नत्वात्, नच संबन्धान्तरं निरूपयितुं शक्यम्, येन विषयेऽन्तःकरणपरिणामसंसृष्टेः प्रमातृचैतन्यस्य तच्चैतन्याभेदेनाभिव्यक्ततया तत्प्रथनं स्यादित्यर्थः। सर्वस्य चिदध्यासे पटादीनां पराक्त्वेनाहंकारादीनां प्रत्यक्त्वेन प्रतिभासः कथं घटते ? इत्याशङ्क्याह— *सर्वत्रेति* ॥ सर्वत्र चैतन्यावगुण्ठनेऽपि विभक्ताविति प्रतिभासः कथमिति संबन्धः। विभक्तशब्दार्थमाह— *आत्मेति* ॥ प्रत्यक्पराञ्चावित्यर्थः ॥

प्रतिभासमभिनयति—*अहमिति* ॥ सर्वस्य पूर्णात्मनि कल्पितत्वेऽप्यहमिति स्फुरणयोग्यप्राक्तनदेहादिसंस्कारसहितमायाकार्यत्वादुत्तरोत्तरदेहादिष्वहंप्रत्ययो घटादीनां चेदन्तया प्रथोपपन्ना ; इदमिति प्रतीतियोग्यपूर्वघटादिसंस्कारसहितमायाकार्यत्वादुत्तरोत्तरघटादेरिति समाधानग्रन्थार्थः। प्रपञ्चस्याद्वितीयचैतन्याश्रयत्वमुक्तम्, तदाक्षिपति—*ननु चैतन्यमिति* ॥ अन्तर्भेदो नामात्मधर्मिक आत्मप्रतियोगिक इत्यर्थः। अनात्मधर्मिकोऽनात्मप्रतियोगिको भेदो *बहिर्भेदः। अखण्डशब्दः सजातीयभेदाभावपरः, अद्वितीयशब्दस्तु विजातीयभेदाभावपरः। सजातीयभेदस्तावदयुक्त इत्याह—*चेत्येति* ॥ संवित्, स्वान्तर्गणिकभेदशून्या, उपाधिमन्तरेणाविभाव्यमानभेदत्वात्, यदित्थम्, तत्तथा ; यथा गगनमित्यर्थः। *तस्य च निरंशस्येत्यस्यायमर्थः*—*तस्य=चैतन्यस्य

वार्तिकम्

विज्ञानाद् अपसृतावस्थानासंभवेन तस्याविनाशोपपत्तेः। तस्मादुपपन्नोऽज्ञाततारूपः स्वाज्ञानविशिष्टतयाऽऽकाशादिप्रपञ्चाध्यासः। सोऽयमज्ञातभ्रमो व्याख्यातः॥ ज्ञानाज्ञानविशिष्टभ्रमस्तु परोक्तभ्रम एव ;

पञ्चपादिका

विजृम्भितः ; सर्वस्य प्रपञ्चजातस्य चैतन्यैकाश्रयत्वात्, तस्य च निरंशस्य प्रदेशभेदाभावात्। प्रपञ्च-भेदेनैव हि तत्कल्पितावच्छेदं सद् अवच्छिन्नमिव बहिरिवान्तरिव प्रकाशते। *अथवा*—दिगाकाशो

पञ्चपादिकाविवरणम्

व्यस्याणुत्वमनन्तत्वं वा स्यात्, मध्यमपरिमाणं चेदं चैतन्यं सर्वत्रावभासते ; नच निरंशं मध्यमपरिमाण-मिति। परोपाधिपरिमाणं चैतन्यमित्यर्थः। जागरणेऽप्येवम्। किमु वक्तव्यं स्वप्नस्य चैतन्याधिष्ठानत्व इत्यर्थः।

केवलस्य मनसो बहिः प्रत्यक्षसाधनत्वाभावादथवेत्यङ्गीकरणवादः। अव्याप्तिः परिहृता, इदानीं मिथ्या-

ऋजुविवरणम्

पाधिभिन्नत्वम्? स्वतो भेदावभासस्य सप्रतियोगिकत्वेन विशेषणापेक्षत्वेन चाऽन्यथासिद्धेरित्याशङ्क्य व्याचष्टे—*निरंशद्रव्यस्येति*॥ *ननु*स्वप्नेऽहमिदमित्यवभासविषयत्वे चोद्ये कृते, तत्रैव परिहर्तव्यम्, किमिति जागरणे परिहृतम्? इत्याशङ्क्यापिशब्दार्थमाह—*जागरणेऽप्येवमिति*॥ "कथं तर्ही"त्यनेन पूर्वोक्तमुपजीव्यान्यत्रानिष्टापादनमिव प्रति-भाति ; तथा सति तत्परिहारेण प्रकृतप्रतिपादनं कर्त्तव्यम्, न परिहारटीकायां तथा प्रतिपादनं दृश्यते ; तथा "किमत्र

तत्वदीपनम्

चित्प्रदेशाद्भेदाभावात्। तत्र हेतुः—*निरंशस्येति*॥ स्वव्यतिरिक्तचैतन्यांशस्याभावान्न तत्प्रतियोगिको भेद इत्यर्थः। कथं तर्हि चिद्भेदप्रथा? इत्याशङ्क्य, औपाधिकभेदादित्याह—*प्रपञ्चेति*॥ *अन्तरिव = स्वचैतन्यमिवेत्यर्थः। विजातीयभेदोऽप्येवमेव निराकर्तव्यः॥

आत्मा, स्वाभाविकभेदवान्, मध्यमपरिमाणत्वात्; घटादिवत्, इत्याशङ्क्य, किं तस्य सांशत्वम्? उतानंशत्वम्? नाद्य इत्याह—*निरंशेति*॥ अवयवावयविनोः प्रत्येकं चैतन्ये कदाचिद्वैमत्येन तदधिष्ठितगात्रविदारणं दुर्वारं स्यात्। तस्मादेकस्य चैतन्यम्, तदितरस्याचित्त्वमिति न तत्रावयवावयवितेत्यर्थः। द्वितीयं दूषयति—*अणुत्व-मिति*॥ आत्मा, अणुमहत्परिमाणान्यतरपरिमाणवान्, निरंशद्रव्यत्वात्; मनो-गगनवदित्यर्थः। तदुभयोरन्यतरपरि-माणं स्यादित्यत्राह—*मध्यमेति*॥ महदणुपरिमाणान्यपरिमाणमित्यर्थः नच तत् परमार्थतो युक्तमित्याह—*न च निरंशमिति*॥ तस्मादन्यप्रयुक्तं मध्यमपरिमाणत्वमित्याह—*इतीति*॥

स्वप्नप्रपञ्चस्य चिदधिष्ठानत्वासंभवे चोदिते, तत्रैव तदुपपादनीयम्, किमिति जागरणे तदुपपादितम्? इत्याशङ्क्य, कैमुतिकन्यायेन स्वप्ने तदुपपाद्यत इत्याह—*जागरणेऽपीति*॥ सर्वस्य प्रपञ्चस्य चिदधिष्ठानमभिधायाऽधिष्ठानान्तर-मूचिवान्—"अथवेत्य"त्र, तन्नोपपद्यते ; तस्य बाह्येन्द्रियासंपृक्तत्वात्, मनसाऽपि न संप्रयुक्तत्वम्; तस्य केवलस्य बहिः प्रसक्त्यभावात्, इत्याशङ्क्याह—*केवलस्येति*॥ केवलस्याऽपि बाह्यस्मृतिजनकत्वमस्ति, तदर्थं प्रत्यक्षेति विशेषणम्। सुखादिप्रत्यक्षसाधनत्वं व्यावर्तयति—*बहिरिति*॥

वार्तिकम्

सामान्यांशेऽनुमित्यादिरूपपरोक्षज्ञाने सत्यपि तद्विशेषांशेऽज्ञानसत्त्वाविशेषात्, अनुमित्यादिप्रमाविषयत्वे-ऽपि तयोरंशभेदेन वृत्त्यविरोधस्य दर्शितत्वात्। नच—एवं सति विषयसहोत्पन्नत्वाच्छुक्तिरजतादिभ्रमवद् अनुमित्यादिभ्रमस्याप्यपरोक्षत्वापत्तिरिति—वाच्यम्; सहोत्पन्नत्वेऽप्यज्ञाततया पुनः सहोत्पन्नया तद्विरोधिन्या विशेषविषयत्वापहारात्। नच—अनुमित्यादेरपि पर्वतीयत्वादिविशेषावगाहनात् कथं सामान्यमात्रविषयत्वमिति—वाच्यम्; तस्याऽपि काष्ठपाषाणादिवृत्तितया सामान्यधर्मत्वाद्विशेषत्वा-सिद्धेः, तद्व्यक्तिमात्रगतरूपादेरेव प्रकृते विशेषपदेनाभिधानादसाधारणधर्मत्वात्। *एतेन*—शुक्त्यादिज्ञानस्य सामान्यमात्रविषयत्वात् परोक्षत्वप्रसङ्ग इति—*अपास्तम्*; तद्गतरूपादिविषयत्वा-

पञ्चपादिका

मनोमात्रगोचरौ सर्वत्राध्यासाधारौ विद्येते इति न परत्रेति विरुद्धयते । *कथं तर्हि नामादिषु ब्रह्माध्यासः* ? किमत्र कथम् ? न तत्र कारणदोषः, नापि मिथ्यार्थावभासः, *सत्यम्* ; अत एव चोदनावशादिच्छातोऽ-

पञ्चपादिकाविवरणम्

ध्यासभ्रान्त्यविद्याप्रसिद्धयभावेऽप्यन्यस्यान्यावभासो विद्यत इति लक्षणस्यातिव्याप्तिमाह—*कथं तर्हि नामादिष्विति* ॥ अन्यस्यान्यात्मना ज्ञानमध्यासलक्षणम्, इयं त्वन्यस्यान्यत्र मानसी क्रियेत्यतिव्याप्तिं परिहरति—*सत्यमत एव चोदनावशादिति* ॥ *ननु* ज्ञानमेव तत्र विधीयत इति, नेत्याह—*नहि ज्ञानमिति* ॥

ऋजुविवरणम्

कथमि''ति चोदयित्वा कारणदोषमिथ्यार्थावभासाभावमात्रमुक्तम्, न साध्यं किंचिद् निर्दिष्टम् ; अतः प्रकृतसाधकबाधकत्वाभावादसङ्गतः ; साध्यानिर्देशान्निरभिप्रायश्चेत्याशङ्क्याह—*अव्याप्तिः परिहृतेति* ॥ कथमत्रातिव्याप्तिराशङ्क्यते सत्यमिथ्यावस्तुसंभेदसंभवात् ? कथम् ? ब्रह्माध्यासे सत्यमधिष्ठानं न संभवति ; ततो न ब्रह्माध्यस्तम्, तथा सत्यमिथ्याभूतेऽप्यध्यासलक्षणव्याप्तेरतिव्याप्तिः, नैवम् ; आत्मनो देहादावध्यास इव मिथ्याभूतस्याधिष्ठानत्वोपपत्तेः । अतो नातिव्याप्तिरित्याशङ्क्याह—*इदानीमित्यादिना* ॥ ज्ञाननिवर्त्यत्वप्रसिद्धयभावान्मिथ्यात्वाभावः, मिथ्यात्वाभावे चाध्यासत्वाभावः ; तस्य सत्यमिथ्यावस्तु संभेदरूपत्वात्, तदभावे भ्रान्तित्वाभावः ; कारणत्रयजन्यत्वाभावात् कारणत्रयजन्यत्वाभावे चाविद्योपादानत्वाभावः, विद्याविरोधित्वाभावश्चेति । ''न तत्र कारणदोषः''इति वदता लक्षणाभाव उक्तः, तत्कथमतिव्याप्तिः ? इत्याशङ्क्याह—*अन्यस्यान्यात्मनेति* ॥ *अयं भावः*—इतरत्र सत्यत्वमङ्गीकृत्यैव प्रसिद्धभ्रान्तिषु लक्षणमुक्तम्, तथा सत्यतिव्याप्तिः, अत एवोक्तम्—''प्रसिद्धयभावेऽपी''ति । *अथवा*—ब्रह्मदृष्ट्या नाम्न उपासनाविधानाद् नाम्नि ब्रह्माध्यासितव्यमिति, तादृशब्रह्माभिप्रायेणातिव्याप्तिः । *अथवा*—चोद्यवादिना तत्सत्यत्वमङ्गीकृत्यातिव्याप्तिरुक्ता ; सिद्धान्तवादिसिद्धमिथ्यात्वाङ्गीकारेऽतिव्याप्त्यापादनायोगात्, तदङ्गीकारेणैव च परिहारोऽपीति । ''सत्यम् ; अत एवे''ति क्रियात्वसाधनमसंगतम् ; प्रकृतातिव्याप्तेरपरिहृतत्वादित्याशङ्क्याभिप्रायमाह—

तत्त्वदीपनम्

''कथं तर्ही''त्यनेनाव्याप्तिराशङ्क्यते ? आहो अतिव्याप्तिः ? नाद्यः ; अव्याप्तिशङ्कायां साधनसमये लक्षणव्याप्तिर्वक्तव्या, नच सोच्यते । नापि द्वितीयः ; अलक्ष्ये लक्षणगमनमतिव्याप्तिः, अत्र तु लक्षणाभाव एवोच्यत इति कथमतिव्याप्तिशङ्का ? तस्मात् कथमित्यादिग्रन्थोऽसंगत इत्याशङ्क्याह—*अव्याप्तिरिति* ॥ नामादौ ब्रह्मदृष्टेरध्यासत्वात्कथमतिव्याप्तिः ? इत्याशङ्क्याह—*मिथ्येति* ॥ अध्यासत्वात्सदसद्विलक्षणात्वरूपं मिथ्यात्वं तस्याऽऽश्रयणीयमित्याशङ्क्य, तदेवासिद्धमित्याह—*अध्यासेति* ॥ ब्रह्मदृष्टेर्नामनि प्रक्षेपात्तस्याध्यासत्वमित्याशङ्क्याह—*भ्रान्तीति* ॥ अध्यासस्य भ्रान्तित्वादस्याश्च तद्वैपम्यान्नैवमित्यर्थः । ज्ञानानिरस्यत्वान्न भ्रान्तित्वमित्याह—*अविद्येति* ॥ ''किमत्र कथमि''त्यादेरेषोऽर्थः—

लक्षणमस्ति चेल्लक्ष्यमप्यस्तीति चोदयति—*किमत्रेति* ॥ दुष्टकारणजन्यज्ञानविषयत्वाभावान्नाध्यासत्वमित्याह *न तत्रेति* ॥ अध्यासत्वाभावे हेत्वन्तरमाह—*नापीति* ॥ मिथ्यार्थज्ञानस्याध्यासत्वं प्रसिद्धम्, नच नाम्नि ब्रह्मदृष्टेर्मिथ्यार्थगोचरत्वम्, नाम-ब्रह्मणोः सत्यत्वादित्यर्थः । लक्षणस्य तत्राभावान्नातिव्याप्तिरिति दर्शयितुं लक्षणमाह—*अन्यस्येति* ॥ *अथवा*—अतिव्याप्तेर्नेदं लक्षणमिति शङ्कायां सत्यमिति तदङ्गीकरणमनुपपन्नमित्याशङ्क्य तात्पर्यमाह—*अन्यस्येत्यादिना* ॥ *अक्षराण्येवं व्याख्येयानि*—अध्यासत्वाभावमङ्गीकरोति—*सत्यमिति* ॥ तर्ह्यतिव्याप्तिः, नेत्याह—*अत एवेति* ॥ अतःशब्दार्थमाह—*चोदनावशादिति* ॥ ज्ञानत्वं मास्तु, ततः किम् ? इत्यत्राह—*ज्ञानस्येति* ॥ मिथ्यार्थविषयज्ञानस्याध्यासत्वम्, नाम्नि ब्रह्मदृष्टेश्चाज्ञानत्वान्न तत्र लक्षणमस्तीत्यर्थः ।

पञ्चपादिका

नुष्ठेयत्वान्मानसी क्रियैषा, न ज्ञानम् ; ज्ञानस्य हि दुष्टकारणजन्यस्य विषयो मिथ्यार्थः, न हि ज्ञानमिच्छातो जनयितुं निवर्तयितुं वा शक्यम् ; कारणैकायत्तत्वादिच्छानुपपत्तेः । *ननु* स्मृतिज्ञानमाभोगेन जन्यमानं मनोनिरोधेन च निरुध्यमानं दृश्यते, *सत्यम्* ; न स्मृत्युत्पत्ति-निरोधयोस्तयोर्व्यापारः, किन्तु कारणव्यापारे तत्प्रतिबन्धे च चक्षुष इवोन्मीलननिमीलने, न पुनर्ज्ञानोत्पत्तौ व्यापार इच्छायाः । तस्माद् ब्रह्मदृष्टिः केवलाऽध्यस्यते चोदनावशात्फलायैव, मातृबुद्धिरिव रागनिवृत्तये परयोषिति । तदेवमनवद्यमध्यासस्य लक्षणम्—*स्मृतिरूपः परत्र पूर्वदृष्टावभास इति* ॥

पञ्चपादिकाविवरणम्

विधिजन्यपुरुषेच्छाप्रयत्ननिरपेक्षमेव सर्वत्र ज्ञानस्य पुष्कलकारणम् ; अनिच्छतोऽप्यनिष्टज्ञानदर्शनात्, अतो विधानान्मानसी क्रियेति भावः । *"ननु* स्मृतिज्ञानमि"त्यारभ्य "तं केचिदि"त्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः ॥ *ननु* अध्यासे वादिविप्रतिपत्तिदर्शनान्नैकरूपेण लक्षणं व्यवस्थापयितुं शक्यत इत्याशङ्क्याधिष्ठानाध्यस्यमानयोः

ऋजुविवरणम्

अन्यस्यान्यात्मनेति ॥ कथं स्वकारणायत्तत्वेनेच्छानुप्रवेशो निराक्रियते ? इच्छाया अपि कारणत्वेनैवानुप्रवेशसंभवादित्याशङ्क्याभिप्रायमाह—*विधिजन्येति* ॥ *ननु* व्याप्त्यादिपरिहारेण लक्षणं वक्तव्यम्, नतु मतान्तरप्रदर्शन

तत्त्वदीपनम्

विहितत्वेऽपि ज्ञानत्वं किं न स्यात् ? इति शङ्कते—*ननु ज्ञानमिति* ॥ प्रसिद्धज्ञानवैलक्षण्यान्नेदं ज्ञानमित्याह—*नेत्याहेति* ॥ स्वकारणायत्तत्वेन कथमिच्छाऽनुप्रवेशो निरस्यते ? इच्छाया अपि ज्ञानकारणान्तर्भावादित्याशङ्क्याह—*विधीति* ॥ नन्वित्यादेरयमर्थः* ॥

ज्ञानस्येच्छयाऽसाध्यत्वमुक्तमाक्षिपति—*ननु स्मृतीति* ॥ *आभोगः = इच्छा । सुरसरित्तीरादिस्मरणमिच्छया जायमानं दृश्यते, दुष्टगन्धस्मरणं निरुध्यमानं चेत्यर्थः । स्मृत्युत्पत्तिनिरोधसमय आभोग-मनोरोधयोः सद्भावमात्रमङ्गीकरोति—*सत्यमिति* ॥ तर्हि पुनरन्वत्रत्वम्, नेत्याह—*न स्मृतीति* ॥ *तयोः = आभोग-मनोनिरोधयोरित्यर्थः । विनिगमनयोर्हेतुभावमाशङ्क्याह—*न पुनरिति* ॥ अनिच्छतोऽपि दुर्गन्धादिबोधदर्शनादित्यर्थः । अब्रह्मणि ब्रह्मदृष्टिकरणमनर्थकमित्याशङ्क्याह—*चोदनावशादिति* ॥

लक्षणकथनानन्तरं संभावनोपन्यास उचितः, न तु मतान्तरोपन्यास इत्याशङ्क्य, लक्षणपरिशोधनार्थमित्युक्तं टीकाकृता, तदनुपपन्नम् ; अव्याप्त्याद्यभावेन लक्षणस्य शुद्धत्वादित्याशङ्क्य, लक्षण एवासंभावनानिराकरणाभिप्रायेण मतान्तरोपन्यास इति तात्पर्यमाह—*नन्वध्यास इति* ॥

वार्तिकम्

त्सामान्यमात्रविषयत्वासिद्धेः ; अन्यथा सादृश्यग्रहानुपपत्तेः । नच—रजतमित्यविद्यावृत्ती रजतस्य सामान्यमात्रविषयिणी, येन परोक्षा स्यादिति—वाच्यम् ; तत्राज्ञाततया अभावात्तस्याः सहोत्पन्नाशेषसामान्यविशेषविषयत्वात्, विशेषविषयैकज्ञानेनाभेदाच्च । तस्मादुपपन्नस्त्रिविधोऽप्यध्यासः—ज्ञानविशिष्टोऽज्ञानविशिष्टो ज्ञानाज्ञानविशिष्टश्चेति । तथाच परोक्षभ्रमस्यापि विषयसहोत्पन्नत्वेनोक्तलक्षणयोगाद् ज्ञानाज्ञानरूपत्वेन परोक्षत्वोपपत्तेश्च तत्राध्यासत्वभावादुपपन्नम्—*"स्मृतिरूपः परत्र पूर्वदृष्टावभासः"* इत्यध्यासलक्षणमि"ति ॥ केचित्त्वपरोक्षभ्रमस्यैवेदं लक्षणमिति वर्णयन्ति । तत्र यदि परोक्षभ्रमो नास्तीत्यङ्गीकृत्यैतदुच्यते, तदा पूर्वोक्तरीत्या न काचिदनुपपत्तिः । अथास्ति स इत्यङ्गीकृत्य, तन्न युक्तम् ; सामान्यतस्तदुपक्रमोपसंहारपरामर्शविरोधात्, असति विरोधे "आहवनीये जुहोति" इत्यादि-

भामती

सर्वेषामेव संमतः, परीक्षकाणां तद्भेदे परं विप्रतिपत्तिरित्यनिर्वचनीयतां द्रढयितुमाह--तं केचिदन्यत्रा-

ऋजुप्रकाशिका

स चायमिति ॥ 'परत्र पूर्वदृष्टावभासः' इत्युक्ताध्यासलक्षणे मतिसंवाद एव सूच्यते—*"सर्वेषामेव संमतः"* इत्यनेन। एवंलक्षणकत्वं च तोयाध्यासस्यानिर्वचनीयतया दर्शितमेव मरुमरीचिकोदकग्रन्थे। *ननु* परीक्षकाणां विप्रतिपत्तिदर्शनात् कथं मतिसंवादार्थत्वमस्य ? इत्यत आह—*परीक्षकाणामिति* ॥ अध्यासस्योक्तलक्षणलक्षितत्वे न विप्रतिपत्तिः, किन्त्वध्यासस्याधिष्ठानारोप्यविशेषविषयकत्व एव विप्रतिपत्तिः ; अतो न मतिसंवादविरोध इत्यर्थः। *अथवा*—स चेत्यस्यायमर्थः—*अनिर्वचनीयः=सिद्धान्तिनाऽनिर्वचनीयत्वेन अनिर्वचनीयख्यातित्वेनोक्तः, अध्यासः = भ्रमः, *एवंलक्षणकः* परत्र पूर्वदृष्टावभास इत्याद्युक्तलक्षणः। यत उक्तरूपस्तल्लक्षणवत्त्वेन सर्वेषामेव सम्मतः, सकलवाद्यङ्गीकृत एव ; सर्वैरपि वादिभिर्भ्रमस्य परत्र पूर्वदृष्टावभासत्वाङ्गीकारात्। तर्हि शान्तो विवादः, इत्यत आह—*परीक्षकाणामिति* ॥ *तद्भेदे = भ्रमावान्तरभेदे। केचिद् भ्रममन्यथाख्यातिं वदन्ति, केचिद् अख्यातिम्, एवं परीक्षकाणां बहुधा विप्रतिपत्तिरिति सिद्धान्ती भाष्यकृत् स्वाभिमतानिर्वचनीयख्यातितां दृढीकर्तुं मतान्तरमाहेत्यर्थः। "अन्यत्रान्यधर्माध्यासः" इति भाष्यं

पञ्चपादिकाविवरणम्

स्वरूप-तत्त्व-देश-कालविशेषेष्वेव वादिनां विप्रतिपत्तिः, अन्यस्यान्यात्मताऽवभासमात्रे लक्षणे न विप्रतिपत्तिः।

ऋजुविवरणम्

उपयोगोऽस्तीत्याशङ्क्योपयोग उक्तः—"स्वमतपरिशुद्धये"इति, तदसंबद्धम् ; लक्षणेनैव स्वमतस्य शुद्धत्वादित्याशङ्क्य साभिप्रायमवतारयति—*नन्वध्यास इत्यादिना* ॥ असंभावितत्वपरिहारायेति भावः। *अधिष्ठानाध्यस्यमानयोरिति* ॥ अधिष्ठानस्वरूपं शुक्तिर्वा ? ज्ञानं वा ? शून्यं वेत्यादिविप्रतिपत्तिरित्यर्थः। अध्यस्यमानत्वे सदेव ? असदेव ? कल्पितं वा ? इति विप्रतिपत्तिरिति ॥ *ननु*अन्यस्यान्यात्मतामात्रं न लक्षणम्, कथं तत्राविप्रतिपत्त्या लक्षणसिद्धिः ? नच विशिष्टलक्षणे विप्रतिपत्त्यभावः ; अतो न तस्य सिद्धिरित्याशङ्कयाह---*तच्च लक्षणमिति*॥ शुक्तेः स्वाभावरजतात्म-

तत्त्वदीपनम्

किमध्यासमात्रे विप्रतिपत्तिः ? उत तदधिष्ठानादौ ? इति विकल्प्याऽन्त्यमङ्गीकरोति—*अधिष्ठानेति*॥ *अयमर्थः* —अधिष्ठानाध्यस्यमानयोः सत्त्वमिति सद्वादिनः, असत्त्वमित्यसद्वादिन इति स्वरूपविप्रतिपत्तिः। अधिष्ठानस्य सत्त्वेऽपि जडत्वमजडत्वं चेति तत्त्वविप्रतिपत्तिः। अध्यस्यमानस्यापि किं शून्यं तत्त्वम् ? उत माया ? आहो धीः ? अथवाऽन्यत् ? इति तत्र विप्रतिपत्तिः। आद्यं दूषयति—*अन्यस्येति* ॥ अन्यस्यान्यात्मनाऽवभासमात्रे विप्रतिपत्त्यभावेऽपि सत्यानृतमिथुनीकरणरूपत्वं त्वदिष्टं कथं सिद्ध्यति ? इत्याशङ्क्यार्थात् सिद्ध्यतीत्याह—*तच्चेति* ॥

वार्तिकम्

वाक्यवत् सामान्यवाक्यस्य संकोचकल्पनानुपपत्तेः, पूर्वोक्तरीत्या परोक्तभ्रमेऽपि लक्षणस्य सङ्गतत्वेन विरोधाभावादित्यास्ताम्। सर्वथाऽपि निर्दुष्टतया सिद्धमिदमध्यासलक्षणम् ॥

तदेवं स्वाभिमतमध्यासलक्षणमभिधाय तत्परिशुद्धये वादिनामपि भङ्ग्यन्तरेण तत्र संप्रतिपत्तिरस्तीति दर्शयितुं स्वकीयलक्षणवाक्यगतैः पञ्चभिः पदैर्व्यावर्त्यानि स्वलक्षणगतद्वि-त्रि-चतुः-पद-संग्राह्यवाद्यभिहिततत्तल्लक्षणान्युपन्यस्यति—*तं केचिदित्यादिना* ॥ तत्र प्रथमलक्षणवाक्यमन्यथाख्याति-

तं केचित्—अन्यत्रान्यधर्माध्यासः—इति वदन्ति ॥

भामती

न्यधर्माध्यास इति वदन्ति। *अन्यधर्मस्य = ज्ञानधर्मस्य रजतस्य ; ज्ञानाकारस्येति यावत्। अध्यासः, अन्यत्र = बाह्ये। *सौत्रान्तिकनये तावद्बाह्यमस्ति वस्तुसत्, तत्र ज्ञानाकारस्यारोपः। विज्ञान-

ऋजुप्रकाशिका

विवृणोति—*अन्यधर्मस्येति* ॥ कथमुक्तम्? तत्राह—*ज्ञानाकारस्येति* ॥ *अध्यासोऽन्यत्र बाह्य इति* ॥ अन्यत्र बाह्येऽध्यास इत्यर्थः। *ननु*—परमार्थसत्येवाधिष्ठाने स्वान्यस्यारोपो वक्तव्यः ; तथाचापरमार्थसति बाह्ये ज्ञानाकारस्य रजतादेः कथमध्यास उक्तः? तत्राह—*सौत्रान्तिकेति* ॥ *वस्तुसत्= परमार्थसत्। *ज्ञानाकारस्यारोपः=ज्ञानाकाररजतस्यारोप इत्यर्थः। *ननु*—सौत्रान्तिकमत उक्तप्रकार-संभवेऽपि विज्ञानवादिनां मते बाह्यस्यापरमार्थत्वात् कथं तत्र ज्ञानाकारस्याऽऽरोपः? इत्याशयवानाशङ्क्य परि-हरति—*"विज्ञानवादिनामपि यद्यपी"त्यादिना *"उपपत्तिश्चे"तः प्राक्तनेन ग्रन्थेन* ॥ *ननु* बाधकाभावा-

पञ्चपादिका

"*तं केचित्*" इत्यादिनाऽध्यासस्वरूपे मतान्तरमुपन्यस्यति स्वमतपरिशुद्धये। कथम्?

पञ्चपादिकाविवरणम्

तच्च लक्षणं लौकिकसामान्यविशेषादिसंसर्गप्रत्ययानां भ्रमत्वप्राप्तिपरिहाराय सत्यस्य मिथ्यावस्तुसम्भेदावभास इति बलादापततीत्यङ्गीकृत्य मतान्तराण्युपन्यस्यति—*तं केचिदित्यादिना* ॥ प्रथमस्त्वात्मख्यात्यन्यथाख्याति-विशेषयोः, द्वितीयस्त्वख्यातेः, तृतीयस्तु शुक्तेः स्वभावरजतात्मना ख्यातिरिति शून्यख्यात्यन्यथाख्यातिविशेषयो-

तत्वदीपनम्

ज्ञानाऽऽकारस्य बहिष्ठस्य वा रूप्यादेः शुक्त्यादावध्यास इत्युक्तं टीकायाम्, तदसंभवि ; ज्ञानाकारत्व-बहिष्ठत्वयो-रेकेनाऽनभ्युपगतत्वादित्याशङ्क्य मतभेदेनाविरोधमाह—*प्रथमस्त्विति* ॥

विवेकमाग्रहणनिबन्धनं तादात्म्यमख्यातिवादिना नाङ्गीक्रियते, अन्यथाख्यातिवादिपक्षश्च पुरेरित एवेत्याश-ङ्क्याह—*द्वितीयस्त्विति* ॥ एकत्वभ्रमशब्देन एकत्वभ्रमव्यवहारस्य विवक्षितत्वादख्यातिमतोपन्यासो युक्त इत्यर्थः। विपरीतधर्मत्वकल्पनामित्यत्र शुक्त्यादे रूप्यादिरूपेण ख्यातिरुच्यते, सा च पुरोक्तेत्याशङ्क्याह—*तृतीयस्त्विति* ॥ शुक्त्यभावो रूप्यं तद्रूपेण शुक्तिः ख्यातीत्यन्यथाख्यात्येकदेशिनः। *विपरीतधर्मत्वकल्पना*

भाष्यभावप्रकाशिका

न्यायतश्च तल्लक्षणेऽनिर्वाच्यतासिद्धेस्सर्वतन्त्रसिद्धान्तोऽयमिति विवक्षितत्वाद्वादिविवादानुपन्यस्यन् केषांचिदन्यथाख्यातिवादिनामात्मख्यातिवादिनां चाभिप्रायमाह—*तं केचिदिति* ॥ अन्यश्चासौ

वार्तिकम्

संग्रहार्थम् ; द्वितीयं त्वख्यातेः ; तृतीयमात्मख्यात्यसत्ख्यात्योरिति विभागः। *तम्= अध्यासम्, *केचित्=अन्यथाख्यातिवादिनः ; एवं वदन्ति—*अन्यत्र=पुरोवर्तिनि शुक्त्यादौ *अन्यधर्माध्यासः=

प्रदीपः

ध्यासाक्षेपः, तल्लक्षणप्रश्नश्च पूर्वमुपक्षिप्तः, तान् वादान् स्वरूपतः संगृह्णाति—*तं केचिदित्यादिना* ॥ *अन्यत्र = शुक्तिकादौ, *अन्यधर्मस्य=रजतादेः, *अध्यासः=भ्रमात्मकं ज्ञानम्। रजतस्य धर्मपदेन परामर्शो धर्मवत् पारतन्त्र्यात् कार्य-त्वेनेति न्यायनिर्णयादौ व्यक्तम्। अनेनान्यथाख्यातिवादो निर्दिष्टः। अत्र *अन्यत्र=बाह्ये शुक्तिकादौ, आत्मरूपस्य

भामती

वादिनामपि यद्यपि न बाह्यं वस्तु सत्; तथाप्यनाद्यविद्यावासनारोपितमलीकं बाह्यम्, तत्र ज्ञानाकारस्यारोपः। उपपत्तिश्च—यद् यादृशमनुभवसिद्धरूपम्, तत् तादृशमेवाभ्युपेतव्यमित्युत्सर्गः, अन्यथात्वं पुनरस्य बलवद्बाधकप्रत्ययवशात्। नेदं रजतमिति च बाधस्येदन्तामात्रबाधेनोपपत्तौ न रजतगोचरतोचिता; रजतस्य धर्मिणो बाधे हि रजतं च तस्य च धर्म इदन्ता बाधिते भवेताम्, तद्वरमिदन्तैवास्य धर्मो

ऋजुप्रकाशिका

दनाद्यविद्यावासनावासितं बाह्यं परमार्थसदेव, तत्र ज्ञानाकारस्याऽऽरोप इति विज्ञानवादिमतमुपपादितम्, तदयुक्तम्; बाधकाभावमात्रेण परमार्थसत्त्वस्यानुपपन्नत्वात्, शरीरेऽहंप्रत्ययस्य बाधकाभावेऽप्यपरमार्थत्वस्य कैश्चिदङ्गीकारात्, इत्यत आह—*उपपत्तिश्चेति* ॥ विद्यत इति शेषः। उपपत्तिमेवाह—*यद्यादृशमिति* ॥ *उत्सर्गः* = बाधकैकापोद्यः। अत्र बाधकाभावादनुभवसिद्धं बाह्यं परमार्थसत्त्वेन स्वीकर्तव्यमित्यर्थः। अपरमार्थत्वं तु तर्हि कथम्? इत्यत आह—*अन्यथात्वमिति* ॥ अपरमार्थसत्त्वमित्यर्थः। बाधकानवतारे परमार्थसदेव यावद्बाधं प्रामाण्यमित्यभ्युपगमादिति भावः। शरीरेऽहंप्रत्ययस्य प्रत्यक्षबाधाभावेऽपि यौक्तिकबाधसत्त्वादपरमार्थत्वमिति भावः। बाह्यं तु परमार्थसत्, बाह्ये इदमिदमित्येव प्रत्ययात्, नेदमित्यप्रत्ययात्; बाधकाभावेन बाह्यं परमार्थसदित्यभिप्रायः। एवंच सति ज्ञानाकारस्य रजतस्य बाह्येऽध्यासं द्रढयति—*नेदं रजतमितीत्यादिना, बहिरध्यासः सिद्ध्यतीत्यन्तेन* ॥ 'नेदं रजतम्' इत्येतत् किमिदंत्वविशिष्टरजतबाधकम्? रजत इदंत्वमात्रबाधकं वा? तत्र द्वितीयमङ्गीकृत्य प्रथमं दूषयति—*इदंतामात्रबाधकत्वेनाप्युपपत्तावित्यादिना* ॥ *न रजतगोचरतोचिता* ॥ इदंत्वविशिष्टरजतबाधकता नोचितेत्यर्थः। अनौचित्यमेव स्पष्टयति—*रजतस्येति* ॥ अस्तूभयबाधः, तावता को दोषः? इत्यत आह—*तद्वर-

पञ्चपादिका

अन्यत्र = शुक्तिकादौ, *अन्यधर्मस्य = अर्थान्तरस्य, रजतादेर्ज्ञानाकारस्य बहिष्ठस्यैव वा; अध्यास

भाष्यभावप्रकाशिका

धर्मोऽन्यधर्मः। अथवा—अन्यस्य ज्ञानादेर्धर्मोऽन्यधर्मः। *अन्यत्र = शुक्त्यादौ, *अन्यस्य=कार्यत्वेन पारतन्त्र्याद्धर्मस्य रजतादेः, *अध्यासः = तादात्म्यधीः। देशान्तरादिगतं रजतादिदोषात् पुरोवर्त्यात्मना भातीत्येवमुक्तमध्यासं केचिदन्यथाख्यातिवादिनो वदन्तीति,*अन्यत्र=बाह्ये शुक्त्यादौ, *अन्यस्य=ज्ञानस्य धर्मो रजतादिस्तस्य, *अध्यासः = बहिरिव तदभेदेन धीरित्यात्मख्यातिवादिनः, तमध्यासमाहुरिति च योजना। पक्षद्वयेऽपि परत्र परावभासे संमतिरस्तीति भावः ॥

वार्तिकम्

*अन्यस्य = देशान्तरीणरजतादेः, धर्मो रजतत्वादिः, तस्याध्यासः प्रतीतिरित्यर्थः। *केचित्तु* अख्यातिवादिनः। तं वदन्तीति पदे अत्रानुषज्येते। तुशब्दः पक्षान्तरपरिग्रहे। एवमन्त्यवाक्येऽपि द्रष्टव्यम्।

प्रदीपः

ज्ञानाकारस्य रजतस्याध्यासः, अथवा—असद्रूपस्य रजतस्याध्यास इत्यात्मख्यात्यसत्ख्यात्योरपि परामर्शो रत्नप्रभा-भामती-न्यायनिर्णयादयो मन्यन्ते। इदमेवाभिप्रेत्य पूर्वमात्मख्यात्यसत्ख्याती अप्यन्यथाख्यातेरेवावान्तरभेदाविति वर्णितम्। अख्यात्यन्यथाख्यात्योरन्यथाख्यातिरभ्यर्हितेति तस्याः प्रथमनिर्देशः। अत्र प्रथमं 'केचित्तु' पदमन्यथाख्यातिवादिपरम्, द्वितीयन्तु

केचित्तु—यत्र यदध्यासः, तद्विवेकाग्रहनिबन्धनो भ्रमः—इति ॥

भामती

बाध्यताम्, न पुना रजतमपि धर्मि। तथाच रजतं बहिर्बाधितमर्थादान्तरे ज्ञाने व्यवतिष्ठते, इति ज्ञानाकारस्य बहिरध्यासः सिद्ध्यति ॥

केचित्तु—ज्ञानाकारख्यातावपरितुष्यन्तो वदन्ति—*यत्र यदध्यासस्तद्विवेकाग्रहनिबन्धनो भ्रम इति* ॥ अपरितोषकारणं चाहुः—'विज्ञानाकारता रजतादेरनुभवाद्वा व्यवस्थाप्येत? अनुमानाद्वा?

ऋजुप्रकाशिका

मिति* ॥ ततो वरं तद्वरम्, धर्मि-धर्मद्वयबाधाद् वरमित्यर्थः। इदन्तैवेत्येवकारव्यवच्छेद्यं दर्शयति—*न पुना रजतमिति* ॥ उभयबाधकल्पनायां गौरवं दोष इति भावः। एवं च सति फलितमाह—*तथाच रजतं बहिरिति* ॥ बाधितेदन्ताकमेव बहिर्बाधितमित्युच्यते। अत एव तदान्तरं ज्ञानाकारं भवतीत्याह—*अर्थादान्तर इति* ॥ *बहिरध्यासः सिद्ध्यतीति* ॥ यत्र यद् बाध्यते, तत् तत्र पूर्वमध्यस्तमिति नियमात् पूर्वोक्तविधया 'नेदं रजतमि'ति बाधितेदंताकतया पश्चाद् बहिर्बाध्यमानस्य रजतस्य ज्ञानाकारस्य पूर्वं बहिरध्यासः सिद्ध्यतीत्यर्थः। एतत्पक्षेऽस्वरसात्—"यत्र यदध्यासः" इत्युपरि पक्षान्तरमवतारयति—*केचित्त्विति* ॥ *यत्र=शुक्तिकादौ, *यस्य=रजतादेरध्यासः, *तद्विवेकाग्रहनिबन्धनः=तद्भेदाग्रहनिबन्धनः, भ्रमः=इदं रजतमित्यादिरित्यर्थः।

पञ्चपादिका

इति वदन्ति। *केचित्तु यत्र यदध्यासस्तद्विवेकाग्रहणनिबन्धनो भ्रम इति* ॥ यत्र यस्याध्यासः, तयोर्विवेकस्याग्रहणात्तन्निबन्धनोऽयमेकत्वभ्रम इति वदन्तीत्यनुषङ्गः।

भाष्यभावप्रकाशिका

अख्यातिमतमाह—*केचित् त्विति* ॥ वदन्तीत्यनुषज्यते। तयोर्विवेकः, तदग्रहणनिबन्धनोऽयमेकत्वभ्रम इत्यख्यातिवादिनः। *यत्र=शुक्त्यादौ, *यस्य=रजतादेः, अध्यासो लोके प्रसिद्धः, तयोस्तद्धियोश्च दोषाद्विवेकाग्रहे तत्कृतो रजतमिदमित्यादिसंसर्गव्यवहार इत्यख्यातिवादिनः। तैरपि संसर्गव्यवहाराय तद्धीरुपास्या; वस्तुग्रहे तदभिन्नविवेकाग्रहायोगात्तस्य तत्कृतत्वासंभवाद्, अविद्येतरदोषस्य वस्तुन्यन्यभानहेतुतानुपलम्भात्। अतः परत्र परावभासे तेषामप्यस्ति संमतिरिति भावः ॥

वार्तिकम्

***यत्र यदध्यासः=*यत्र=पुरोवर्तिनि शुक्तिकादौ यस्य रजतादेरध्यासस्तदर्थितयाऽन्यथाप्रवृत्तिर्लोकप्रसिद्धा, स प्रवृत्तिरूपो व्यवहारः, तयोः शुक्ति-रजतयोर्विद्यमानविवेकाग्रहनिमित्तः सन् भ्रम इति वदन्तीत्यर्थः। तद्विवेकाग्रहनिबन्धनो यत्र यदध्यासः, अन्यथा व्यवहारः, स भ्रम इति वाक्ययोजना।**

प्रदीपः

अख्यातिवादिपरम्। अनिर्वचनीयख्यातिदृष्ट्या खण्डनीयत्वेनाविशेषादुभयत्र 'केचित्तु'पदमेव। *यत्र=इदमि। *यदध्यासः=रजताध्यास इति प्रसिद्धिः, *तद्विवेकाग्रहनिबन्धनः=तयोरिदंपदार्थ-रजतयोरनुभूयमान-स्मर्यमाणयोर्भेदाग्रहप्रयुक्तः, *भ्रमः=भ्रम इति व्यवहारमात्रम्, न तु वस्तुगत्या भ्रमज्ञानं नाम किंचिदस्तीति योजना। वदन्तीत्यनुषज्यते। अख्यात्यन्यथाख्यात्यपेक्षया समादरणीयत्वेन विशेषं सूचयन्ननिर्वचनीयख्यातिं संगृह्णाति—*अन्ये तु यत्र यदध्यास इति* ॥

भामती

तत्रानुमानमुपरिष्टान्निराकरिष्यते। अनुभवोऽपि रजतप्रत्ययो वा स्यात्? बाधकप्रत्ययो वा? न तावद् रजतानुभवः; स हीदङ्कारास्पदं रजतमावेदयति, न त्वान्तरम्, अहमिति हि तदा स्यात्; प्रतिपत्तुः प्रत्ययादव्यतिरेकात्। भ्रान्तं विज्ञानं स्वाकारमिह बाह्यतयाऽध्यवस्यति। तथाच नाहंकारास्पदमस्य गोचरः। *ज्ञानाकारता पुनरस्य बाधकप्रत्ययप्रवेदनीयेति चेत्, हन्त बाधकप्रत्ययमालोचयत्वायुष्मान्—किं पुरोवर्ति द्रव्यं रजताद्विवेचयति? आहो ज्ञानाकारतामप्यस्य दर्शयति? तत्र ज्ञानाकारतोपदर्शनव्यापारं बाधकप्रत्ययस्य ब्रुवाणः श्लाघनीयप्रज्ञो देवानांप्रियः। पुरोवर्तित्वप्रतिषेधादर्थादस्य ज्ञानाकारतेति चेत्, न; असंनिधानाग्रहनिषेधादसंनिहितो भवति प्रतिपत्तुः, अत्यन्तसंनिधानं त्वस्य प्रतिपत्त्रात्मकं कुतस्त्यम्? नचैष रजतस्य निषेधः, नचेदन्तायाः, किन्तु विवेकाग्रहप्रसञ्जितस्य 'रजतमिदमि'ति रजतव्यवहारस्य। नच रजतमेव शुक्तिकायां प्रसञ्जितं रजतज्ञानेन। न हि रजतनिर्भासस्य शुक्तिकाऽऽलम्बनं युक्तम्; अनुभवविरोधात्। न खलु सत्तामात्रेणालम्बनम्; अतिप्रसङ्गात्, सर्वेषामर्थानां सत्त्वाविशेषादालम्बनत्वप्रसङ्गात्। नापि कारणत्वेन; इन्द्रियादीनामपि

ऋजुप्रकाशिका

अपरितोषात् पक्षान्तरावतारेऽपरितोषकारणं वक्तव्यम्, तत्किम्? इत्याकाङ्क्षायां तत्कारणं च त एवाहुरित्याह—*अपरितोषेति* ॥ अपरितोषकारणं वक्तुमेव विकल्पयति—*विज्ञानाकारतेत्यादिना* ॥ द्वितीयपक्षदूषणमुपरिष्टाद् वदिष्यन् आद्यपक्षदूषणाय पुनर्विकल्पयति--*अनुभवोऽपीति* ॥ *रजतप्रत्ययः='इदं रजतमि'ति प्रत्ययः, *बाधकप्रत्ययः='नेदं रजतमि'ति प्रत्ययः। एवं द्वेधा विकल्प्य, आद्यं दूषयति—*न तावदिति*॥ "रजतानुभवः" इत्यनन्तरं रजतादेर्विज्ञानाकारतासाधक इति शेषः। विज्ञानाकारसाधकत्वाभावमेवाह—*स हीति* ॥ 'इदं रजतमि'त्यनुभवो हीत्यर्थः। *नत्वान्तरमिति*॥ *आन्तरम् = ज्ञानाकारं नावेदयतीत्यर्थः। कथं नावेदयति? इत्यत आह—*अहमिति हीति*॥ *तदा=रजतादिज्ञानाकारत्वनिवेदने। *अहमित्येव प्रत्ययः स्यात्*= इदं रजतमिति तु न स्यादित्यर्थः। तत्र हेतुमाह—*प्रतिपत्तुरिति* ॥ प्रतिपत्तृ-प्रत्यययोरभेदादित्यर्थः ॥ तथाचाहमर्थस्य प्रतिपत्तृत्वाद्रजतादेः प्रत्ययाकारत्वेऽहमित्येव प्रत्ययः स्यात्; इदं रजतमिति तु न स्यादेवेत्यर्थः। तर्हि 'इदं रजतमि'ति भ्रान्तविज्ञानं कीदृशमाकारमावेदयति? इत्यत आह—*भ्रान्तं विज्ञानमिति* ॥ स्वाकारं स्वाभेदादहमुल्लेखार्हं रजतम्, इह बाह्यतया=इदन्तया। तत्र हेतुः—*भ्रान्तमिति* ॥ दोषजमित्यर्थः। *अस्य गोचरः=रूप्यम्, *नाहङ्कारास्पदम्=अहमुल्लेखविषयो न। रजताविवेकमात्रगोचरस्य ज्ञानाभेदगोचरतोक्तिरनुभूतिविरुद्धेत्यर्थः। वस्तुतस्तु—अहमुल्लेखयोग्यरजतस्य भ्रमादिदन्तया प्रतीतिरिति शङ्कते—*भ्रान्तमिति* ॥ भ्रान्तिरूपविकल्पस्य हि स्वरूपमपि कल्पकं ग्राह्यम्, तदेव बाह्यत्वेन सविकल्पकत्वेनाध्यवसेयमित्यर्थः। सिद्धे ज्ञानाकारत्व एवं कल्प्येत, तदेव कुतः? तत्राह—*ज्ञानाकारतेति* ॥ प्रागुक्तन्यायेन प्रवेदनीयेत्यर्थः। बाधकप्रत्ययः किं साक्षाद् ज्ञानाकारतां दर्शयति? अर्थाद्वा? इति विकल्प्याऽऽद्यमनुभवविरोधेन निरस्य, द्वितीयं शङ्कते—*पुरोवर्तित्वेति* ॥ इदन्ताप्रतिषेधोऽनिदन्तां गमयेत्, स च देशान्तरादिसत्त्वेऽपि स्यादित्यन्यथोपपत्तिमाह—*असन्निधानेति* ॥ अख्यातिमते रजतस्यासंन्निधानाग्रहः सन्निहितत्वेन व्यवहारहेतुत्वाद् भ्रमः, तन्निषेधोऽसंनिधानग्रहरूपो बाधः; प्रागभावनिवृत्तिरूपत्वाद् बाधस्य। तस्मादारोप्योऽर्थः प्रतिपत्तुरसन्निहितो भवतीत्यर्थः। यदुक्तं कल्पनागौरवमिति, तत्राह—*नचैष इति* ॥ सर्वसम्मतस्य व्यवहारमात्रबाधस्य स्वीकारात् कस्यचिदप्यर्थस्याबाधादतिलाघवमित्यर्थः। *ननु* न व्यवहार एव निषेध्यः, किंतु शुक्तौ प्रतीतं रजतम्, इत्यन्यथाख्यातिमाशङ्क्याह—*नच रजतमेवेत्यादिना* ॥

भामती

कारणत्वात् । तथाच भासमानतैवालम्बनार्थः । नच रजतज्ञाने शुक्तिका भासते, इति कथमालम्बनम् ? भासमानताऽभ्युपगमे वा कथं नानुभवविरोधः ? अपिचेन्द्रियादीनां समीचीनज्ञानोपजनने सामर्थ्यमुपलब्धम्, इति कथमेभ्यो मिथ्याज्ञानसंभवः ? दोषसहितानां तेषां मिथ्याप्रत्ययेऽपि सामर्थ्यमिति चेत्, न ; दोषाणां कार्योपजननसामर्थ्यविघातमात्रे हेतुत्वात्, अन्यथा दुष्टादपि कुटजबीजाद् वटाङ्कुरोत्पत्तिप्रसङ्गात् । अपिच स्वगोचरव्यभिचारे विज्ञानानां सर्वत्रानाश्वासप्रसङ्गः । तस्मात्सर्वं ज्ञानं समीचीनमास्थेयम् । तथाच 'रजतम्' 'इदमि'ति च द्वे विज्ञाने स्मृत्यनुभवरूपे । तत्रेदमिति पुरोवर्तिद्रव्यमात्रग्रहणम्; दोषवशात्तद्गतशुक्तित्वसामान्यविशेषस्याग्रहात् । तन्मात्रं च गृहीतसदृशतया संस्कारोद्बोधक्रमेण रजते स्मृतिं जनयति । सा च गृहीतग्रहणस्वभावाऽपि दोषवशाद् गृहीतत्वांशप्रमोषाद् ग्रहणमात्रमवतिष्ठते ।

ऋजुप्रकाशिका

ननु मा नाम भायाद् रजतज्ञाने शुक्तिः, पुरोदेशे सत्तामात्रेण त्वालम्बनं किं न स्यात् ? अत आह—*न खल्विति* ॥ *सर्वेषाम्=पुरोवर्तिनां लोष्टादीनामित्यर्थः । अथ रजतसदृशे शुक्तिशकले रजतज्ञानहेतुसंस्कारोद्बोधकत्वेनालम्बनत्वम्, तत्राह—*नापीति* ॥ सादृश्यात् शुक्तेः संस्कारोद्बोधद्वारा रजतज्ञानहेतुत्वं तदालम्बनत्वम्, अत आह—*तथाचेति* ॥ सैव शुक्तेरस्तु, अत आह—* नचेति* ॥ अनवभासमानत्वमसिद्धम्, अत आह—*भासमानेति* ॥ *ननु*—शुक्त्याकारस्यालम्बनत्वं न, किंतु इदमाकारस्य, स भासत एवेत्याशङ्क्याह--*अपि चेति*॥ *अथवा*---एवमर्थमारोपितं प्रतिषिद्ध्य, मिथ्याज्ञानमपि निह्नुते--*अपिचेति*॥ शुक्तेरिदंज्ञानालम्बनत्वमेव, न रजतज्ञानालम्बनत्वम्, तथात्वे ; *कथं नानुभवविरोधः ?=अनुभवविरोध एव ; रजतमवभासते शुक्तिकाऽऽलम्बनमिति । किंच—रजतज्ञानस्य शुक्तिविषयत्वे तज्ज्ञानं मिथ्याज्ञानमेव स्यात्, नचेष्टापत्तिः ; सत्यज्ञानक्लृप्तकारणेभ्यो मिथ्याज्ञानासंभवात्, इत्याह—*अपिचेति* ॥ शङ्कते—*दोषसहितानामिति* ॥ *तेषाम्=इन्द्रियादीनाम् । दोषाणां प्रकृतशुक्तित्वविशेषज्ञानप्रतिबन्धकत्वमेव, न विपरीतरजतगोचरमिथ्याज्ञानजनकत्वमिति दूषयति—*न दोषाणामिति ॥ अन्यथेति* ॥ दोषाणां विपरीतकार्यजनकत्व इत्यर्थः । किंच—पुरोवर्तिविषयकरजतज्ञानस्य मिथ्याग्रहणरूपस्याङ्गीकारे विषयीभूतरजतस्य पुरोवर्तिन्यभावाद् ज्ञानस्य विषयव्यभिचारित्वेन सर्वत्र ज्ञानमात्रे तथात्वशङ्कयाऽनाश्वासेन ज्ञानतः प्रवृत्ति-निवृत्ती क्वापि न स्याताम्, इत्याशयेनाह--*अपिचेति* ॥ उपसंहरति—*तस्मादिति* ॥ 'इदं रजतमि'ति ज्ञानस्यैकत्वे कथं समीचीनत्वम् ? तत्राह—*तथाचेति* ॥ द्वे एव विभजते—*स्मृत्यनुभवरूपे इति* ॥ अनुभवरूपं ज्ञानं किम् ? इत्यपेक्षायामाह—*तत्रेदमिति* ॥ *ग्रहणम्=अनुभव इत्यर्थः । पुरोवर्तिद्रव्यमात्रग्रहणमित्यत्र मात्रचा विशेषग्रहणं व्यवच्छिद्यते, तत् कुतः ? इत्यत आह—*दोषवशादिति॥ तद्गतेति* ॥ पुरोवर्तिद्रव्यगतेत्यर्थः । शुक्तित्वरूपो यः सामान्यविशेषः, तस्याग्रहादित्यर्थः । अनुभवरूपं ग्रहणमभिधाय स्मृतिमाह—*तन्मात्रं चेति* ॥ इदमिति पुरोवर्तिद्रव्यमात्रग्रहणं चेत्यर्थः । इदं च रजते स्मृतिं जनयतीत्यनेन सम्बध्यते, तच्च न साक्षात् स्मृतिं जनयति, किंतु संस्कारोद्बोधद्वारेत्याह—*गृहीतसदृशतयेति* ॥ शुक्ति-रजतयोश्चाकचक्यादिना सदृशत्वात् तद्दर्शनेन संस्कारोद्बोधो भवतीति भावः । तथाच 'इदमि'ति ग्रहणम्, 'रजतमि'ति स्मरणम्, इदं च ज्ञानद्वयमगृहीतभेदमख्यातिरित्यख्यातिवादिनो वदन्ति । *ननु* रजतज्ञानस्य स्मरणरूपत्वे पूर्वगृहीततत्ताऽप्युल्लिख्येतेत्यत आह---*सा चेति* ॥ रजतस्मृतिश्चेत्यर्थः । *गृहीतग्रहणस्वभावाऽपि=गृहीतविषयकज्ञानस्वभावाऽपि । *ग्रहणमात्रमवतिष्ठते=ग्रहणमेवावतिष्ठत इत्यर्थः । *ननु* इदंविषयकस्य च रजतविषयकस्य च यथाक्रमं ग्रहण-स्मरणात्मकज्ञानद्वयत्वाङ्गीकारे भेद-

भामती

तथाच रजतस्मृतेः पुरोवर्तिद्रव्यमात्रग्रहणस्य च मिथः स्वरूपतो विषयतश्च भेदाग्रहात्, संनिहितरजतगोचरज्ञानसारूप्येण, 'इदम्' 'रजतमि'ति भिन्ने अपि स्मरण-ग्रहणे अभेदव्यवहारं च सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः। क्वचित्पुनर्ग्रहणे एव मिथोऽगृहीतभेदे ; यथा 'पीतः शङ्खः' इति। अत्र हि विनिर्यन्नयनरश्मिभिः पित्तद्रव्यस्य काचस्येव स्वच्छस्य पीतत्वं गृह्यते, पित्तं तु न गृह्यते। शङ्खोऽपि दोषवशाच्छुक्लगुणरहितः स्वरूपमात्रेण गृह्यते। तदनयोर्गुण-गुणिनोरसंसर्गाग्रहसारूप्यात्पीततपनीयपिण्डप्रत्ययाविशेषेणाभेदव्यवहारः सामानाधिकरण्यव्यपदेशश्च। भेदाग्रहप्रसञ्जिताभेदव्यवहारबाधनाच्च 'नेदमि'ति विवेकप्रत्ययस्य बाधकत्वमप्युपपद्यते। तदुपपत्तौ च प्राक्तनस्य प्रत्ययस्य भ्रान्तत्वमपि लोकसिद्धं सिद्धं भवति। तस्मात्—यथार्थाः, सर्वे विप्रतिपन्नाः संदेह-विभ्रमाः, प्रत्ययत्वात्; घटादिप्रत्ययवत्, तदिदमुक्तम्—*यदध्यास इति*॥ यस्मिञ्शुक्तिकादौ यस्य रजतादेरध्यास इति लोकप्रसिद्धिः, नासावन्यथाख्यातिनिबन्धना, किंतु गृहीतस्य रजतादेस्तत्स्मरणस्य च गृहीततांशप्रमोषेण, गृहीतमात्रस्य य 'इदमि'ति पुरोऽवस्थिताद् द्रव्यमात्रात्तत्प्रज्ञानाच्च विवेकः, तदग्रहणनिबन्धनो भ्रमः। भ्रान्तत्वं च ग्रहण-स्मरणयोरितरेतरसामानाधिकरण्यव्यपदेशो रजतादिव्यवहारश्चेति॥

ऋजुप्रकाशिका

व्यवहारोऽसामानाधिकरण्यव्यपदेशश्च स्यात्, ननु 'इदं रजतमि'त्यभेदव्यवहारः सामानाधिकरण्यव्यपदेशश्च, इत्यत आह—*तथाचेति*॥ *ननु* सर्वज्ञानयथार्थत्ववादे पराभिमतस्मर्यमाणारोपस्थले ग्रहणस्मरणात्मकज्ञानद्वयाङ्गीकारेऽपि 'पीतः शङ्खः', 'लोहितः स्फटिकः,' इत्यादिगृह्यमाणारोपस्थले ग्रहण-स्मरणात्मकज्ञानद्वयायोगात् तत्र भ्रमरूपविशिष्टज्ञानादेकस्मादभेदव्यवहारः सामानाधिकरण्यव्यपदेशश्च समर्थनीय इत्यत आह—*क्वचित्पुनरिति*॥ "अगृहीतभेदे" इत्यनन्तरम् "अभेदव्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः" इत्यनुषङ्गः। तदुदाहरति—*यथा पीतः शङ्ख इति*॥ ग्रहणे इत्युक्तम्, कयोर्ग्रहणे ? इति वीक्षायां "पीतः शङ्खः" इत्यत्र पीतत्व-शङ्खयोरेव ग्रहणे इत्यभिप्रेत्य यथाक्रमं तदाह—*अत्र हि विनिर्यदिति*॥ *पित्तं तु=पित्तद्रव्यं तु। उक्तमुपसंहरति—*तदनयोरिति*॥ *ननु* 'इदं रजतम्' इत्यादेर्ज्ञानद्वयत्वे च तस्याबाध्यत्वाद् बाध्याभावेन 'नेदं रजतमि'त्यादेर्बाधकप्रत्ययत्वं न स्यात्, इत्याशङ्क्य भेदाग्रहप्रसञ्जिताभेदव्यवहारस्य तद्बाध्यतया तस्य बाधकप्रत्ययत्वमुपपद्यत इत्याह—*भेदाग्रहप्रसञ्जितेति* ॥ *ननु*—अभेदव्यवहारेण सह तत्प्रसञ्जकस्य भेदाग्रहस्यापि बाध्यतयोत्तरज्ञानबाध्यस्य प्राचीनस्य भ्रमत्वसिद्धेर्भेदाग्रहस्याऽपि भ्रमत्वप्रसिद्धिर्भवेदित्याशङ्क्य, तन्मते तस्य भ्रमत्वं प्रसिद्धमेवेत्याह—*तदुपपत्तौ चेति* ॥ 'नेदमि'त्यादेरुत्तरज्ञानस्य बाधकत्वोपपत्तौ चेत्यर्थः। अख्यातिवादिमतमुपसंहरन् तन्मतसूचितमनुमानमाह—*तस्मादित्यादिना*॥ *सर्वे सन्देहविभ्रमा* इति पक्षनिर्देशः, याथार्थ्यं साध्यम्, प्रत्ययत्वं हेतुः। नच—सर्वप्रत्यययाथार्थ्ये भ्रमत्वप्रसिद्धिर्निर्मूला स्यादित्युक्तमिति—वाच्यम्; भ्रमत्वप्रसिद्धेर्भेदाग्रहनिबन्धनत्वस्याप्युक्तत्वात्। भ्रमत्वप्रसिद्धेर्भेदाग्रहनिबन्धनत्वे सम्मतिमाह—तदिदमुक्तमिति*॥ *ननु* शुक्तिकादौ रजतादिज्ञानस्यान्यथाख्यातिनिबन्धनत्वमेव, नाख्यातिनिबन्धनत्वमित्यत आह—*नान्यथाख्यातिनिबन्धनेति* ॥ अन्यथाख्यातेर्निरसिष्यमाणत्वादित्याशयः। कथं तर्हि रजतमिदमिति सामानाधिकरण्यव्यपदेशः ? इति शङ्कते—*किन्त्विति*। स्मरणात्मनोऽपि रजतज्ञानस्य ग्रहणरूपत्वमुपपादयति—*तत्स्मरणस्येति* ॥ रजतस्मरणस्येत्यर्थः॥ *गृहीततांशप्रमोषेण=तत्तादिभावतिरोभावेन* ॥ स्वरूपतो विषयतश्चाविवेकमुपपादयति—*पुरोऽवस्थितादित्यादिना* ॥ पुरोवर्तिद्रव्यमात्राद् रजतस्य *विवेकः=भेदः, यश्च पुरोवर्तिद्रव्यस्य सामान्यांशस्तस्माद् भेद इत्यर्थः। न केवलं

अन्येतु—यत्र यदध्यासः, तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति॥

भामती

अन्ये तु—अत्राप्यपरितुष्यन्तः—*यत्र यदध्यासः, तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते*॥ अत्रेदमाकूतम्—अस्ति तावद्रजतार्थिनो 'रजतमिदमि'ति प्रत्ययात्पुरोवर्तिनि द्रव्ये प्रवृत्तिः सामानाधिकरण्यव्यपदेशश्चेति सर्वजनीनम्। तदेतन्न तावद् ग्रहण-स्मरणयोस्तद्गोचरयोश्च मिथो भेदाग्रहमात्राद्भवितुमर्हति। ग्रहण-

ऋजुप्रकाशिका

(विषययो)र्भेदाग्रहनिबन्धन एव भ्रमः, किंतु ग्रहण-स्मरणयोर्ज्ञानयोरपि स्वरूपतो भेदाग्रहनिबन्धनो भ्रम-इत्याह—*तत्प्रज्ञानाचेति*॥ पुरोवर्तिद्रव्यमात्रज्ञानादियर्थः। (एवम)ख्यातिमते स्थिते तत्रापरितोषकथन-पूर्वकं मतान्तरमाह—(*अन्ये त्विति*॥ *अन्ये*=अनिर्वचनीयख्यातिवादिनः। अपरितोषकारणनिरूपण-मुपक्रमते—*इदमत्राकूतमिति*॥ *रजतमिदमितिप्रत्ययात्*=)इदं रजतमिति ज्ञानात्। *सामानाधि-करण्येति*॥ इदं रजतमिति सामानाधिकरण्याभिलाप इत्यर्थः। ... ...

पञ्चपादिका

अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति॥ *यत्र = शुक्तिकादौ, यस्य = *रजतादेः, अध्यासः, *तस्यैव = शुक्तिशकलादेः, *विपरीतधर्मत्वस्य = रजतादिरूपत्वस्य, *कल्पनाम् = अविद्यमानस्यैवावभासमानताम्, आचक्षते।

पञ्चपादिकाविवरणम्

रुपन्यासः। कल्पनामित्यस्य व्याख्या=अविद्यमानस्यैवावभासमानतामिति। "यल्लक्षणमवादिष्मे"ति पूर्व-

ऋजुविवरणम्

नेति, शून्यस्य शुक्त्यात्मना, विवर्तमानस्य रजतरूपेण विवर्ततेति भावः। "कल्पनामि"ति भाष्ये कथं टीकाकृता "अविद्यमानस्यैवावभासमानतामि"त्युक्तम्? विरोधात्, कल्पनाशब्दस्य वस्तुनोऽन्यथाभावमात्रत्ववाचित्वात्, तज्-ज्ञानवाचित्वाभावादित्याशङ्क्य व्याचष्टे---*कल्पनामित्यस्येति*॥ *अथवा* पौनरुक्त्यशङ्का स्यात्, इत्यन्तत्वादे-

तत्त्वदीपनम्

रूप्यादिरूपेण निष्पत्तिः, ततः 'कल्पनामवभासमानतामि'ति कथं सामानाधिकरण्यम्? इत्याशङ्क्यान्यस्यान्या-त्मना निष्पत्त्यसंभवात्तथा प्रतिभासकल्पनेत्यभिप्रायेणाह—*कल्पनामिति*॥ यच्छब्दस्य सन्निहितोत्तरपदान्वये

भाष्यभावप्रकाशिका

केषांचिदन्यथाख्यातिवादिनां माध्यमिकानां च मतं दर्शयति—*अन्ये त्विति*॥ *यत्र=शुक्त्यादौ *यस्य = रजतादेः, अध्यासः, तस्यैव शुक्तिशकलादेः, *विपरीतधर्मत्वस्य=भावान्तरत्वेन शून्यत्वेन वा

वार्तिकम्

*अन्ये तु= विज्ञानवादिनः शून्यवादिनो वा। *यत्र = विज्ञाने पुरोवर्तिशून्ये वा। यस्य बहिष्ठस्य रजतस्य वा। *अध्यासः = आरोपः। *तस्यैव = विज्ञानस्यैव शून्यस्यैव वा, नान्यस्य। *विपरीत-

प्रदीपः

यत्र=इदमि, *यदध्यासः = रजताध्यासः, *तस्यैव = इदम एव, *विपरीतधर्मत्वकल्पनाम् = स्वावृत्तिरजतात्मना भानम्। *आचक्षते*=वदन्ति। इदं भामत्यभिमतं विवरणम्। पञ्चपादिकाद्यभिमतन्तु विवरणम्—"अन्ये तु"

भामती

निबन्धनौ हि चेतनस्य व्यवहार-व्यपदेशौ कथमग्रहणमात्राद्भवेताम् ? *ननु* उक्तं नाग्रहणमात्रात्, किंतु ग्रहण-स्मरणे एव मिथः स्वरूपतो विषयतश्चागृहीतभेदे समीचीन-पुरस्थितरजतविज्ञानसादृश्येनाभेद-व्यवहारं सामानाधिकरण्यव्यपदेशं च प्रवर्तयतः, *अथ* समीचीनज्ञानसारूप्यमनयोर्गृह्यमाणं वा व्यवहार-प्रवृत्तिहेतुः ? अगृह्यमाणं वा सत्तामात्रेण ? गृह्यमाणत्वेऽपि 'समीचीनज्ञानसारूप्यम् अनयोः—इदमि'ति 'रजतमि'ति च ज्ञानयोः' इति ग्रहणम् ? अथवा 'तयोरेव स्वरूपतो विषयतश्च मिथो भेदाग्रहः' इति ग्रहणम् ? तत्र न तावत् 'समीचीनज्ञानसदृशी' इति ज्ञानं समीचीनज्ञानवद् व्यवहारप्रवर्तकम् ; नहि 'गोसदृशो गवयः' इति ज्ञानं गवार्थिनं गवये प्रवर्तयति। 'अनयोरेव भेदाग्रहः' इति तु ज्ञानं पराहतम् ; नहि भेदाग्रहे—'अनयोरि'ति भवति, अनयोरिति ग्रहे भेदाग्रहणमिति च भवति। तस्मात् सत्तामात्रेण भेदाग्रहोऽगृहीत एव व्यवहारहेतुरिति वक्तव्यम्। तत्र किमयमारोपोत्पादक्रमेण व्यवहारहेतुः ? आहोऽनुत्पादितारोप एव स्वत इति ? वयं तु पश्यामः—चेतनव्यवहारस्याज्ञानपूर्वकत्वानुपपत्तेरारोप-

ऋजुप्रकाशिका

भवेतां किं वा स्वरूपतो विषयतश्चाग्रहीतभेदाद् ग्रहणस्मरण ... ...
देशयुगलमित्यर्थः। तद्गोचरयोश्च तद्विषयोश्च कथं न भवित ... ...
णनिबन्धमग्रहणात् भवतीति भावः। द्वितीयं शङ्कते—*नन्विति*। ग्रहण-स्मरणयोः ...
... ...
रोपयोगीत्युक्तम्, तत् किं ज्ञातं सदुपयोगि ? अज्ञातं सत्वरूपसत्तामात्रेण वा ? इति विकल्प्य,आद्यपक्षेऽपि इदमिति रजतमिति च ये ग्रहण-स्मरणात्मके ज्ञाने तयोः सवि ... ...

समीचीनज्ञानतुल्ययोस्तयोर्ग्रहण-स्मरणयोः स्वरूपतो विषयतश्च भेदाग्रह इति ग्रहणं तदुपयोगीति पक्षं विकल्पयति—*गृह्यमाणत्वेऽपीत्यादिना तत्र न तावदित्यतः प्राक्तनेन ग्रन्थेन*॥ तत्राऽऽद्यं दूषयति—*न तावदिति*॥ *व्यवहारप्रवर्तकम्=व्यपदेश-प्रवृत्त्योर्जनकमित्यर्थः। प्रवृत्त्यजनकत्वमेवाह—*नहीति*॥ द्वितीयं दूषयति—*अनयोरिति*॥ ग्रहण-स्मरणयोरित्यर्थः। *पराहतम्=दूरत एवापास्तमित्यर्थः। तदेवाह—*नहीति*॥ *अनयोः=ग्रहण-स्मरणयोरिति। द्विवचनेनैव तयोर्भेदस्य ग्रहणात्। भेदाद् भेदग्रहे भेदाग्रहणमित्यपि न संभवति, भेदाग्रहणग्रहणस्य भेदाग्रहणपूर्वकत्वादित्याह—*भेदाग्रहणमिति चेति*॥ नहीत्येतदुभयत्र भवतीत्यनेन संबध्यते। सारूप्यमज्ञातं सत् सत्तामात्रेणोपयुज्यत इति पक्षं परिशेषयन्नुपसंहरति—*तस्मादिति*॥ अग्रहीत एवेति छेदः। भेदाग्रहणवत् सादृश्यस्याप्यग्रहणमभिप्रेतमिति भावः। अस्त्वग्रहीत एव भेदाग्रहः प्रवृत्ति-व्यपदेशहेतुरित्याशङ्क्य तत्रापि दूषयितुं विकल्पयति—*तत्र किमित्यादिना* वयं त्वित्यतः

वार्तिकम्

धर्मत्वकल्पनाम्=बहिष्ट्वादिरूपकल्पनाम्; तमाचष्टत इत्यर्थः। विपरीतो धर्मो यस्य विज्ञानस्य शून्यस्य वा तद्विपरीतधर्मः, तद्भावो विपरीतधर्मत्वम्, तस्य कल्पना विपरीतधर्मत्वकल्पना, तामिति विग्रहः। आन्तरस्य बहिष्ट्वं च विपरीतो धर्मः; आन्तरत्वविपरीतत्वात्। असत्त्वविपरीतसत्त्वाच्च

प्रदीपः

इति सत्ख्यातिविशेषाणां शून्यख्यातेश्च परामर्श इति। अख्यातिवादवर्जं सर्वेऽपि भ्रमख्यातिवादिनो विशेष्यावृत्तिप्रकारकज्ञानत्वं भ्रमत्वमित्येव स्वीकुर्वन्ति। ततश्च "स्मृतिरूपः परत्रे"ति लक्षणवाक्यं सर्ववादिसम्प्रतिपन्नमित्याह—

भामती

ज्ञानोत्पादक्रमेणैवेति । *ननु* सत्यं चेतनव्यवहारो नाज्ञानपूर्वकः, किंत्वविदितविवेकग्रहण-स्मरण-पूर्वक इति, *मैवम्* ; नहि रजतप्रातिपदिकार्थमात्रस्मरणं प्रवृत्तावुपयुज्यते । इदंकारास्पदाभिमुखी खलु रजतार्थिनां प्रवृत्तिरित्यविवादम् । कथमयमिदंकारास्पदे प्रवर्तेत ? यदि तन्न भवेत् । अन्यदिच्छ-त्यन्यत्करोतीति व्याहतम् । नचेदंकारास्पदं रजतम्, इति कथं रजतार्थी तदिच्छेत् ? यद्यतथात्वेन ग्रहणादिति ब्रूयात्, स च प्रतिवक्तव्यः–अथ तथात्वेनाग्रहणादयं कस्मान्नोपेक्षेतेति ? सोऽयमुपादानो-पेक्षाभ्याममभित आकृष्यमाणश्चेतनोऽव्यवस्थित इदंकारास्पदे रजतसमारोपणोत्पादानपेक्ष एव व्यवस्थाप्यते, इति भेदाग्रहः समारोपोत्पादक्रमेण चेतनप्रवृत्तिहेतुः । *तथाहि*—भेदाग्रहादिदंकारास्पदे रजतत्वं समारोप्य, तज्जातीयस्योपकारहेतुभावमनुचिन्त्य, तज्जातीयतयेदंकारास्पदे रजते तमनुमाय, तदर्थी प्रवर्तत इत्यानुपूर्व्यं सिद्धम् ।

ऋजुप्रकाशिका

प्राक्तनेन*।। *अयम्=अगृहीतो भेदाग्रहः । द्वितीयं दूषयन् प्रथमं परिशेषयति––*वयंत्वित्यादिना* ।। अस्तु प्रथमकल्पशेषः, ततः किम् ? इति चेत्, आरोपस्यैकविशिष्टज्ञानरूपत्वेन ज्ञानद्वयासिद्धौ तन्मतासिद्धिरित्यभिसन्धिः । पुनः प्रवृत्ति-व्यपदेशलक्षणचेतनव्यवहारसम्भवं शङ्कते––*नन्विति* ।। अगृहीतभेदोऽविदितविवेकशब्दार्थः । तत्र किमिदमिति ग्रहणमात्रं प्रवृत्त्यादिव्यवहारहेतुः ? रजतस्मरणमात्रं वा ? तदुभयं मिलितं वा ? नाद्यः ; इदंज्ञानमात्रस्य प्रवर्तकत्वे लोष्टादावपि प्रवृत्त्यापत्तेः, नान्त्यः ; ज्ञानयोः क्रमिकत्वेन तदुभयमेलनायोगात्; इत्यभिप्रेत्य दूषयति—*मैवमिति* ।। द्वितीये रजतप्रातिपदिकार्थमात्रस्मरणं प्रवर्तकमित्यायातम्, तन्न संभवतीति दूषयति––*नहि रजतेति* ।। कुतो नोपयुज्यते ? इत्यत आह––*इदंकारेति* ।। अस्तु, ततः किम् ? तत्राह––*कथमयमिति* ।। *अयम्=रजतप्रातिपादिकार्थमात्रस्मरणवान्, *इदंकारास्पदे=इदमि । *यदि तन्न भवेदिति* ।। यदि रजतस्मरणमिदंविषयकं न भवेत्, तदा इदंपदार्थाविषयकरजतमात्रस्मरणवान् कथमिदमि प्रवर्तते ? इति पूर्वान्वितत्वेनार्थो योजनीयः । रजतार्थिरजतमात्रस्मरणवान् इदमि प्रवर्तताम्, को दोषः ? इत्यत आह—*अन्यदिच्छतीति* ।। *अन्यत् करोति=अन्यत् कृतिविषयीकरोति । व्याहति-मेवाह—*नचेति* ।। *रजतं चेदंकारास्पदं न = इदंप्रतीतिविषयो न ; इतीति हेतौ । यतो रजतमिदं-कारास्पदं न, येन रजतार्थी इदं वस्तु कृतिविषयीकुर्यादित्यर्थः । इदंवस्तुनोऽरजतत्वेनाग्रहणाद् रजतार्थी इदं वस्त्विच्छति, तत्र प्रवर्तते चेत्यत आह—*यदीति* ।। यदीत्यनन्तरं पुरोवर्तिन इति शेषः । *अतथात्वेन=अरजतत्वेन । अग्रहणादित्यनन्तरं पुरोवर्तिनीच्छेति शेषः । प्रतिवक्तव्य इत्यनन्तरं पुरो-वर्तिनीति शेषः । *तथात्वेनाग्रहणात् = रजतत्वेनाग्रहणात् । त्वन्मते पुरोवर्तिनो रजतज्ञानाविषयत्वादिति भावः । *अयम्=रजतार्थी । *नोपेक्षेत* ।। पुरोवर्तीदंवस्त्विति शेषः । *रजतसमारोपणोपादानापेक्षः=रजत-समारोपणपूर्वकं रजतोपादानापेक्षः । *समारोपोत्पादकक्रमेणेति* ।। समारोपश्च पुरोवर्तिनीदंवस्तुनि प्रवर्त-नार्थं पुरोवर्तीदंवस्तुविषयकोऽवश्यं वाच्य इति, न त्वदभिमतज्ञानद्वयसिद्धिरिति भावः । तदेव प्रपञ्चयति—*तथाहीति* ।। *भेदाग्रहादिति* ।। इदं-रजतयोर्भेदाग्रहादित्यर्थः । *तज्जातीयस्य = पुरोवर्तिन्यारोपितं यद्रजतं तत्सजातीयस्य, हट्टपट्टणादिस्थितस्य रजतस्य, आभरणाद्युपकारहेतुभावं पूर्वदृष्टमनुचिन्त्य स्मृत्वा, उपकारहेतुरजतसजातियतयाऽवगत इदंकारास्पदे तमुपकारहेतुभावम्, इदं पुरोवर्ति, आभरणाद्युपकारकम्, रजतत्वात्, संप्रतिपन्नरजतवदित्यनुमाय रजतार्थी इदंकारास्पदे पुरोवर्तिनि प्रवर्तत इत्येतदानुपूर्व्यं सर्वजन-सिद्धमित्यर्थः । ततः किम् ? इति चेत्, तत्र वक्तव्यम्—किं ज्ञानद्वयवादिनस्तव मते किमिदमिति ग्रहणमिदंत्व-

भामती

नच तटस्थरजतस्मृतिरिदंकारास्पदस्योपकारहेतुभावमनुमापयितुमर्हति ; रजतत्वस्य हेतोरपक्षधर्मत्वात् । एकदेशदर्शनं खल्वनुमापकम्, नत्वनेकदेशदर्शनम् । *यथाहुः*—ज्ञातसंबन्धस्यैकदेशदर्शनादिति । समारोपे त्वेकदेशदर्शनमस्ति । तत्सिद्धमेतत्—विवादाध्यासितं रजतादिज्ञानम्, पुरोवर्तिवस्तुविषयम्, रजताद्यर्थिनस्तत्र नियमेन प्रवर्तकत्वात्, यद् यदर्थिनं यत्र नियमेन प्रवर्तयति, तज्ज्ञानं तद्विषयम् ; यथोभयसिद्धसमीचीनरजतज्ञानम्, तथाचेदम् ; तस्मात्तथेति । यच्चोक्तमनवभासमानतया न शुक्तिरालम्बनमिति, तत्र भवान्पृष्टो व्याचष्टाम्—किं शुक्तिकात्वस्य 'इदं रजतमिति ज्ञानं प्रत्यनालम्बनत्वम्' ? आहोस्विद् द्रव्यमात्रस्य पुरःस्थितस्य सितभास्वरस्य ? यदि शुक्तिकात्वस्यानालम्बनत्वम्, अद्धा ; उत्तरस्यानालम्बनत्वं ब्रुवाणस्य तवैवानुभवविरोधः । *तथाहि*—'रजतमिदमि'त्यनुभवन्ननुभविता पुरोवर्ति वस्त्वङ्गुल्यादिना निर्दिशति । दृष्टं च दुष्टानां कारणानामौत्सर्गिककार्यप्रतिबन्धेन कार्यान्तरोपजननसामर्थ्यम् ;

ऋजुप्रकाशिका

विषयकं सद् लिङ्गज्ञानतयेदंकारास्पदस्य पुरोवर्तिन आभरणाद्युपकारहेतुभावेनानुमितिजनकम् ? किं वा तटस्थरजतस्मरणं रजतत्वविषयकं सत् लिङ्गज्ञानतयेदंकारास्पदस्य तदुपकारहेतुभावानुमितिजनकम् ? नाद्यः ; इदंत्वस्य लोष्टादिसाधारणतयाऽऽभरणाद्युपकारहेतुभावालिङ्गत्वेन तज्ज्ञानस्य तदनुमित्यजनकत्वादित्यभिप्रेत्य द्वितीयं दूषयति—*नच तटस्थेति* ॥ रजतत्वगोचरा तटस्थरजतस्मृतिर्लिङ्गज्ञानतयेदंकारास्पदस्य पुरोवर्तिन आभरणाद्युपकारहेतुभावानुमितिं जनयितुं नार्हतीत्यर्थः । कथं नार्हतीति चेत्, इदंकारास्पदे पक्षे आभरणाद्युपकारहेतुभावावानुमापकं लिङ्गं रजतत्वमिति वक्तव्यम्, तत्र किं रजतत्वं इदंकारास्पदपुरोवर्तिनिष्ठतयाऽवगतम् ? उत न ? नाद्यः ; तथात्वे रजतत्वविशिष्टपुरोवर्तिविषयकज्ञानाङ्गीकारापत्त्या ज्ञानद्वयवादभङ्गप्रसङ्गादित्यभिप्रेत्य द्वितीयं दूषयति—*रजतत्वहेतोरिति* ॥ *अपक्षधर्मत्वात् = पक्षभूतेदंपदार्थनिष्ठतयाऽज्ञानादित्यर्थः । तथा ज्ञाने ज्ञानद्वयवादभङ्गप्रसङ्ग इत्युक्तम् । पक्षधर्मताज्ञानाभावे को दोषः ? इत्याशङ्क्य हेतोः पक्षधर्मताज्ञानमावश्यकमित्याह—*एकदेशेति* ॥ साध्येन सहैकदेशे पक्षे हेतोर्दर्शनमित्यर्थः । तथाच कारणीभूतपक्षधर्मताज्ञानाभावेऽनुमित्यभावापत्तिरेव दोष इति भावः । तत्र सम्मतिमाह—*यथाहुरिति* ॥ ज्ञातः सम्बन्धः नियमः साध्येन, न यस्य सः, तथोक्तः ; तस्य साध्येन सह पक्ष एकदेशे दर्शनादित्यर्थः । तथाच रजतत्वहेतोरिदंकारास्पदे पक्षे वृत्तित्वज्ञानाभावान्न तदुपकारहेतुभावानुमितिरिति, अख्यातिपक्षे रजतार्थिन इदंकारास्पदे प्रवृत्तिर्न स्यादिति भावः । इदंकारास्पदे रजतत्वारोपपक्षे तु पक्षधर्मताज्ञानसत्त्वमस्तीत्याह—*समारोपे त्विति* ॥ तथाचैतत्पक्ष उपकारहेतुभावानुमितिसंभवाद् रजतार्थिनस्तत्र प्रवृत्तिरुपपद्यत इति भावः । एवंच रजतार्थिनः शुक्तौ प्रवृत्त्यनुरोधेन रजतज्ञानस्य शुक्तिविषयकत्वमवश्यं वाच्यमिति, न ज्ञानद्वयसिद्धिः । एवं च सूचितमनुमानमाह—*तत्सिद्धमेतदित्यादिना तस्मात्तथेत्यन्तेन* ॥ *तत्र = पुरोवर्तिनि । यद् भासते तदेवाऽऽलम्बनम्, रजतज्ञाने शुक्तिकाया अनवभासत्वाद् नालम्बनत्वमिति यत्पूर्वमुक्तम्, तदनूद्य निराकरोति—*यच्चोक्तमित्यादिना* ॥ निराकरणाय विकल्पयति—*तत्र भवान् पृष्ट इत्यादिना सितभास्वरस्येत्यन्तेन*॥ आद्यमिष्टापत्त्या परिहरति—*यदीत्यादिना, अद्धेत्यन्तेन*॥ द्वितीयमनुभवविरोधेन दूषयति—*उत्तरस्येति* ॥ अनुभवविरोधमेवाह—*तथाहीति* ॥ तथाच पुरोवर्तिवस्तु रजतज्ञानविषय इत्यत्र न विवाद इति भावः। *ननु* दुष्टनयनस्य प्रकृतशुक्तित्वज्ञानलक्षणकार्यप्रतिबन्धकत्वमात्रम्, न विपरीतपुरोवर्तिविषयकरजतभ्रमजनकत्वम्, अन्यथा दुष्टादपि कुटजबीजाद् यवाङ्कुरोत्पत्तिप्रसङ्ग इत्युक्तम्, तद् दूषयति—*दृष्टं च दुष्टानामिति* ॥ *औत्सर्गिकेति* ॥ बाधकैकापोद्यं प्रकृतकार्यमौत्सर्गिकार्यम्, तत्प्रतिबन्धेनेत्यर्थः । दोषादिबाधकसद्भावात् तत्प्रतिबन्धो विपरीतकार्यजननं चेत्यर्थः ।

भामती

यथा दावाग्निदग्धानां वेत्रबीजानां कदलीकाण्डजनकत्वम्, भस्मकदुष्टस्य चौदर्यस्य तेजसो बह्वन्नपचनमिति। प्रत्यक्षबाधापहृतविषयं च विभ्रमाणां यथार्थत्वानुमानमाभासः; हुतवहानुष्णत्वानुमानवत्। यच्चोक्तम्–मिथ्याप्रत्ययस्य व्यभिचारे सर्वप्रमाणेष्वनाश्वासः–इति। तद् बोधकत्वेन स्वतः प्रामाण्यं नाव्यभिचारेणेति व्युत्पादयद्भिरस्माभिः परिहृतं न्यायकणिकायामिति नेह प्रतन्यते। दिङ्मात्रं चास्य स्मृतिप्रमोषभङ्गस्योक्तम्। विस्तरस्तु ब्रह्मतत्त्वसमीक्षायामवगन्तव्य इति। तदिदमुक्तम्—"अन्ये तु यत्र यदध्यासः, तस्यैव विपरीतधर्मत्वकल्पनामाचक्षत इति॥" *यत्र=शुक्तिकाशकलादौ *यस्य = रजतादेरध्यासः,

ऋजुप्रकाशिका

दृष्टं च दुष्टानामित्युक्तम्, दर्शनस्थलमेवाह—*यथा दावाग्निदग्धेत्यादिना*॥ दर्शनस्थलान्तरमाह—*भस्मकेति*॥ *औदर्यस्य तेजसः* इत्यनन्तरं प्रकृतरसार्जनकार्यप्रतिबन्धेनेति शेषः। *बह्वन्नपचनं बह्वन्नभस्मीकरणं च दृष्टमित्यनुषङ्गः। तथाच विपरीतभ्रमलक्षणकार्यसंभवान्न सर्वज्ञानयाथार्थ्यसिद्धिः। *ननु* उक्तं सर्वे प्रत्ययाः, यथार्थाः, प्रत्ययत्वात्, घटादिप्रत्ययवत्; इत्यनुमानम्, तत्राह—*प्रत्यक्षबाधकेति*॥ तत्र दृष्टान्तमाह—*हुतवहेति*॥ क्वचित् पुरोवर्तिनि वस्तुतो रजताभावेऽपि रजतप्रत्यय उक्तः, तस्य विषयव्यभिचारित्वेन सर्वप्रमाणप्रत्ययमात्रे तथात्वशङ्कायामनाश्वास इति पूर्वोक्तमनूद्यापवदति—*यच्चोक्तमित्यादिना व्यभिचारेणेति*॥ विषयाव्यभिचारित्वं ज्ञानस्य प्रामाण्यं चेत्, क्वचिद् विषयव्यभिचारे सर्वत्र तथात्वशङ्कयाऽनाश्वासः स्यात्; अतो न तथा, किन्तु बोधकत्वमेव प्रामाण्यम्; तथाच नानाश्वास इति न्यायकणिकाग्रन्थे परिहृतमित्यर्थः। *ननु* बोधकत्वमेव प्रामाण्यं चेत्, बाधके सति कथं तत्प्रामाण्यमिति चेत्, यावद्बाधं प्रामाण्यमिति तस्याऽऽशयात्। इदमिति ग्रहणं प्रमुष्टतत्ताकं रजतस्मरणं चेति ज्ञानद्वये पूर्ववादिनोक्त उक्तविधया ज्ञानद्वयखण्डने कृते स्मृतिभङ्गात् स्मृतितत्तांशप्रमोषभङ्गस्य दिङ्मात्रमुक्तप्रायम्, स्मृतिप्रमोषभङ्गो विस्तरेण कार्यः, स च ब्रह्मतत्त्वसमीक्षाख्ये ग्रन्थे कृतोऽस्ति, तत्रैव सोऽनुसन्धेय इत्यभिप्रेत्याह—*दिङ्मात्रं चेति*॥*उक्तम् = उक्तप्रायम्। ज्ञानद्वयखण्डनपूर्वकमिदंवस्तुविषयकं रजतज्ञानमुक्तम्, तद् भाष्यारूढं करोति—*तदिदमुक्तमन्ये त्वित्यादिना*॥ भाष्यं योजयति—*यत्र शुक्तिकाशकलादावित्यादिना*॥ *विपरीतेति*॥ शुक्तित्वविपरीतधर्मो रजतत्वादिः, तद्वत्त्वकल्पनामित्यर्थः। एवं पूर्वोक्तरीत्या पुरोवर्तिनि भासमानस्य सत्त्वे बाधानुपपत्त्या सत्ख्यातिर्निरस्ता; तथा पुरोवर्तिनि भासमानस्यासत्त्वे नरशृङ्गादिवदपरोक्षप्रतीत्यनुपपत्त्याऽसत्ख्यातिरपि निरस्ता; ज्ञानाकाररजतभाननिराकरणादात्मख्यातिरपि निराकृता; अव्यवधानेनाख्यातिर्निराकृतैव; अन्यथाख्यातिपक्षोऽपि निराक्रियते;—तत्पक्षे समारोपितरजतस्य देशान्तरस्थत्वं वाच्यम्, नच तत् संभवति; तस्य देशान्तरस्थत्वे प्रमाणाभावात्, यदि प्रमाणम्, तदा वक्तव्यम्—किमि'दं रजतमि'ति भ्रमः समारोपितरजतस्य देशान्तरस्थत्वे प्रमाणम्? किं वा तद्भ्रमानुपपत्तिः? नेदं रजतमिति बाधो वा? बाधानुपपत्तिर्वा? नाद्यः; देशान्तरस्थत्वस्य भ्रमानुल्लिखितत्वे भ्रमस्य तद्विषयत्वायोगात्, न द्वितीयः; अनिर्वचनीयरजतविषयकत्वेनाऽपि भ्रमोपपत्तौ देशान्तरस्थत्वं विना भ्रमानुपपत्त्यभावात्, *नापि तृतीयः; बाधस्य पुरोवर्तिनि रजतनिषेधमात्रविषयकत्वेन तद्गतदेशान्तरस्थत्वाविषयकत्वात्, नापि चतुर्थः; अनिर्वचनीयरजतनिषेधेनैव बाधोपपत्तौ देशान्तरस्थत्वं विना बाधस्यानुपपत्त्यभावात्, तस्मादन्यथाख्यातिरपि निराकृता। *ननु* अस्तु

भाष्यभावप्रकाशिका

सत्ताहीनस्य, *कल्पनाम्=भासमानताम्, अध्यासं भावान्तराभाववादिनः शून्यवादिनश्चाचक्षते। तथाच—तत्रापि परत्र परावभासे संवादोऽस्तीत्यर्थः॥ एवं मतान्तराण्युपन्यस्य प्रकृतं स्वमतानुसारित्वं तेषां निगम-

सर्वथाऽपि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति ।

भामती

तस्यैव* = शुक्तिकाशकलादेः, विपरीतधर्मकल्पनाम् = रजतत्वधर्मकल्पनामिति योजना । *ननु* सन्तु नाम परीक्षकाणां विप्रतिपत्तयः, प्रकृते तु किमायातम् ? इत्यत आह—*सर्वथापि त्वन्यस्यान्यधर्मावभासतां

ऋजुप्रकाशिका

तत्तद्वादिनां विप्रतिपत्तिः, उक्तविधया तत्तद्वाद्यभिमतख्यातिनिराकरणं च, प्रकृते किमायातम् ? इति शङ्कते—*ननु* *सन्त्विति* ॥ विप्रतिपत्तय इत्यनन्तरं तत्तद्वाद्यभिमतख्यातिनिराकरणं चास्त्विति शेषः । अनिर्वचनीयख्यातौ पर्यवसानमायातमित्यभिप्रेत्य तत्पर्यवसानाय सर्वमतेऽप्यन्यस्यान्यधर्मवत्त्वकल्पना न व्यभिचर-

पञ्चपादिका

सर्वथापि त्विति स्वमतानुसारित्वं सर्वेषां कल्पनाप्रकाराणां दर्शयति । अन्यस्यान्यधर्मावभासित्वं नाम लक्षणम्, परत्रेत्युक्तेऽर्थात्परावभासः सिद्ध इति, यदवादिष्म, तन्न व्यभिचरति । कथम् ? पूर्वस्मिन् कल्पे ज्ञानाकारस्य बहिष्ठस्य वा शुक्तिधर्मत्वावभासनान्न व्यभिचारः, द्वितीयेऽपि शुक्ति-रजतयोः पृथक्सतोरपृथगवभासोऽभिमानात्, तृतीयेऽपि शुक्तिशकलस्य रजतरूपप्रतिभासनात् ॥

पञ्चपादिकाविवरणम्

लक्षणशब्देन यच्छब्दस्य सम्बन्धः । अख्यातिवादिनाऽपि मानसं संसर्गज्ञानं संसर्गाभिमानो वा वक्तव्य

ऋजुविवरणम्

व्याख्येयत्व-व्याख्यानत्वसूचकस्याभावात्, तदर्थमाह—*कल्पनामित्यस्येति* ॥ परावभासः सिद्धइति यदवादिष्म, तन्न व्यभिचरतीत्यन्वयः प्रतिभाति ; तथा सति लक्षणमित्यस्यानन्वयः, अनुपयुक्तश्च ; तत्र व्यभिचारशङ्काया एवाभावात्, अप्रकृतोपसंहारश्च ; लक्षणाव्यभिचारस्य प्रस्तुतत्वादित्याशङ्क्य व्याचष्टे—*यल्लक्षणमवादिष्मेति* ॥ अख्यातिपक्षे कथमपृथगवभासाभिमान उक्तः ? तस्यानङ्गीकृतत्वात्, इत्याशङ्क्याभिप्रायमाह—*अख्यातिवा-

तत्त्वदीपनम्

लक्षणशब्दस्यानन्वयः स्यादित्याशङ्क्याह—*यदिति* ॥ स्वरूपलक्षणस्य कथमख्यातिमतेऽनुगतिः ? संसर्गज्ञानस्य तेनाऽनभ्युपगतत्वादित्याशङ्क्याह—*अख्यातीति* ॥ चाक्षुषायथार्थज्ञानाभावेऽपि मानसमयथार्थज्ञानमख्यातिवादिनाऽङ्गीक्रियते ; "देहादावनात्मन्यात्मबुद्धिरविद्ये"ति सांख्योक्तेरित्यर्थः ॥

प्राभाकरेणापि संसृष्टव्यवहारानुपपत्त्या संसर्गज्ञानमङ्गीकरणीयमित्याह—*संसर्गाभिमान इति* ॥ तटस्थ-

भाष्यभावप्रकाशिका

यति—*सर्वथेति* ॥ सर्वेषु पक्षेषु प्रकारविशेषविवादेऽपि पुरोवर्तिनो रजतादित्वेन वेद्यतामध्यासो

वार्तिकम्

सत्त्वेन भासमानं रजतं शून्यस्य विपरीतो धर्म इति बोद्धव्यम् । नच—एकमेव वाक्यं कथं युगपत् ख्यातिद्वयमुपस्थापयेत् ? "सकृदुच्चरितः" इति न्यायविरोधादिति—वाच्यम् ; तन्त्रेणोच्चारितस्याऽऽवृत्तिसंभवात् ॥ भवतु नाम परेषामेवमङ्गीकारः, तथापि किमायातं त्वत्पक्षस्य ? *ननु* एतदेवाऽऽयातम्—यद्र भङ्ग्यन्तरेण तैरप्यस्मत्पक्ष एवेष्ट इत्याह—*सर्वथाऽपि त्वन्यस्यान्यावभासतां न व्यभि-

प्रदीपः

सर्वथाऽपित्विति ॥ अविद्यमानस्यैव भ्रमे भानं ज्ञानलक्षणप्रत्यासत्त्यादिनेति विशेषे सत्यपि *अन्यत्रान्यधर्मावभासताम् = अन्यत्राविद्यमानान्यविषयकत्वम्, *न व्यभिचरति = न जहाति ; ख्यातिमात्रसाधारणमिति भावः । तदेवमन्यत्रा-

भामती

न व्यभिचरतीति। अन्यस्यान्यधर्मकल्पनाऽनृतता, सा चानिर्वचनीयतेत्यधस्तादुपपादिम्। तेन

ऋजुप्रकाशिका

तीत्याह—*अत आहेति* ॥ *न व्यभिचरतीति* ॥ निरुक्ता सर्वमतख्यातिरित्यर्थः। एवंच सत्यनिर्वचनीयख्यातौ पर्यवसानमाह—*अन्यस्येति* ॥ *अन्यस्यान्यधर्मकल्पनाऽनृतता, सा चानिर्वचनीयेत्यधस्तादुपपादितमिति*। सर्वख्यातिनिराकरणेनानिर्वचनीयताया अधस्तादुपपादितत्वेन सर्वतन्त्रेष्वनिर्वचनीयख्यातिरेवावश्यं वाच्येत्याह—*तेनेति* ॥ *ननु* कतिपयज्ञानानां भ्रमस्थलीयानामयथार्थतावादिमतेऽनन्यगत्याऽनिर्वचनीयताभ्युपगमेऽपि सर्वज्ञानयथार्थतावादिमते कथमनिर्वचनीयताभ्युपगमः? इत्यत आह—

पञ्चपादिका

पूर्वदृष्टत्वस्मृतिरूपत्वयोः सर्वत्राव्यभिचारान्न विवाद इत्यभिप्रायः। तत्र "स्मृतिरूपः पूर्वदृष्टावभासः"; इत्येतावति लक्षणे निरधिष्ठानाध्यासवादिपक्षेऽपि निरुपपत्तिके लक्षणव्याप्तिः स्यादिति—तन्निवृत्तये "परत्रे"त्युच्यते ॥

पञ्चपादिकाविवरणम्

इत्यभिप्रायः। *ननु* स्मृतिरूपतया कारणत्रितयजन्यत्वमुपेक्षितमिति, नेत्याह—*पूर्वदृष्टत्वेति* ॥ *ननु* अविद्यादिदोष-पूर्वभ्रमसंस्काराभ्यामेव पदार्थमात्रज्ञानानि जायमानानि विभ्रमाः, न सत्यं वस्तु तत्संप्रयोगादि प्रमाणकारणं चापेक्षते विभ्रम इति, परत्रेतिपदमविवक्षितमिति शून्यवादी मन्यते, तत्राह—*स्मृतिरूपः पूर्वदृष्टावभास इति*। न पदार्थमात्रज्ञानं विभ्रमः; शून्यज्ञानस्यापि तथात्वप्रसङ्गात्, किन्त्व-

ऋजुविवरणम्

दिनोऽपीति* ॥ तत्र "स्मृतिरूपः"इत्यादिना परत्रेति पदाभावे निरधिष्ठानभ्रमपक्षे लक्षणप्राप्तिः कथमाशङ्क्यते? स्मृतिरूपपदेनैव तन्मते लक्षणप्राप्तेर्निरस्तत्वात्, तस्य कारणत्रयजन्यत्ववाचित्वात्, तन्मते कारणत्रयाभावात्, संप्रयोगाङ्गीकारे वा बलादधिष्ठानलाभात्। "उक्तमेतत्पूर्वप्रमाणे"त्यनेन ग्रहण-स्मरणविलक्षणं ज्ञानं स्वयमेव संप्रयोगमधिष्ठानं च साधयतीत्युक्तम्। अतस्तेनाऽपि भ्रान्तिमङ्गीकुर्वताऽधिष्ठानाद्यङ्गीकर्तव्यम्, तत्कथं तन्मते लक्षणाव्याप्तिपरिहारार्थता पदस्य? इत्याशङ्क्य, पदोपयोगसिद्ध्यर्थं तन्मतं दर्शयति—*नन्वविद्यादोषेति* ॥ कथं निरधिष्ठानपक्षे व्याप्तिमात्रेण निरुपपत्तिकत्वं लक्षणस्य? अथवा—लक्षणस्य निरुपपत्तिकत्वे वक्तव्ये कथं तत्प्राप्तिरुच्यते? इत्याशङ्क्योपपादयति—*न

तत्त्वदीपनम्

लक्षणेऽनुगत्यप्रदर्शनात्तदसंभव इति शङ्कते—*ननु स्मृतीति* ॥ भ्रान्तेः संस्कार-संप्रयोगादिदोषजन्यत्वस्य सर्वैरभ्युपगतत्वाल्लक्षणानुगत्यप्रदर्शनं न दोषायेत्याह—*नेत्याहेति* ॥ निरधिष्ठानवादिपक्षे लक्षणे व्याप्तिनिरासार्थं परत्रेति पदमपेक्षितमित्युक्तम्, तत्र निरधिष्ठानपक्ष एव नोपपद्यते; अधिष्ठानज्ञानलक्षणकारणाभावेन भ्रमासंभवादित्याशङ्क्याह—*नन्वविद्येति* ॥ "परावभासः" इत्येतावत्युक्ते घटादिज्ञानानामपि भ्रमत्वं स्यादित्याशङ्क्य, तदिष्टमित्याह—*पदार्थेति* ॥

अधिष्ठानज्ञाने भ्रमोत्पत्तेस्तदपि कारणमित्याशङ्क्य, इदमाकारस्यापि समारोपितत्वान्नाधिष्ठानसिद्धिरित्याह—*न सत्यमिति* ॥ अधिष्ठानबोधं विनाऽप्यविद्यादेर्भ्रमोत्पत्तिसंभवात्कथं निरुपपत्तिकत्वम्? इत्याशङ्क्य, किं पदार्थज्ञान-

वार्तिकम्

चरतीति* ॥ अध्यास इति शेषः। *तुशब्द आशङ्कानिवृत्त्यर्थः। *थाल् वाद्युक्तप्रकारे। *अन्यस्य* रजतादेर्धर्मोऽन्यधर्मः, रजतत्वादि। अन्यो धर्मोऽन्यधर्म इति वा रजतादि। अन्यधर्मस्यावभासो यत्र

पञ्चपादिका

कथम्? निरुपपत्तिकोऽयं पक्षः। न हि निरधिष्ठानोऽध्यासो दृष्टपूर्वः, संभवी वा। *ननु* केशोण्ड्रकाद्यवभासो निरधिष्ठानो दृष्टः, *न*; तस्यापि तेजोऽवयवाधिष्ठानत्वात्। *ननु* रजते संवित्, संविदि रजतमिति परस्पराधिष्ठानो भविष्यति, बीजाङ्कुरादिवत्, *नैतत्सारम्*; न तत्र यतो बीजादङ्कुरस्तत एव तद्बीजम्, अपि त्वङ्कुरान्तरात्, इह पुनर्यस्यां संविदि यद्रजतमवभासते,

पञ्चपादिकाविवरणम्

न्यत्रान्यज्ञानम्; ततश्चाविभ्रमेऽपि पदार्थज्ञाने लक्षणव्याप्तेर्निरुपपत्तिकत्वमिति। *कथं निरुपपत्तिकोऽयमित्यादि-ग्रन्थः स्पष्टार्थः* ॥ *ननु* संविद्रजतयोरितरेतराधिष्ठानत्वेन साधिष्ठाने भ्रमे सम्भवति न तृतीयस्य सत्य-वस्तुनोऽधिष्ठानत्वकल्पना युक्तेति चोदयति—*ननु रजते संविदिति* ॥ *ननु* अध्यस्यमानव्यतिरेकेणा-धिष्ठानस्य सिद्धिर्वक्तव्या, तत्रेतरेतराधिष्ठानत्वे सतीतरेतरापेक्षसिद्धित्वादसमञ्जसं स्यादिति, तत्राह—*बीजा-ङ्कुरादिवदिति* ॥ न बीजाङ्कुरादिष्वितरेतराश्रयता, किन्तु कारणपरम्पराऽनवस्थेति परिहरति—*नैतत्सारमिति* ॥ *ननु* इहापि कारणपरम्परेति, नेत्याह—*इह पुनर्यस्यामिति* ॥ *ननु* इहापि तर्हि रजते संवित्, रजतं पूर्वस्यां संविदि, सा च स्वविषये, तच्च पूर्वसंविदीति परम्परामेव कल्पयामीति—चेत्, यदि तावत्पूर्वपूर्वमुत्तरोत्तरस्यान्वितत्वेनाधिष्ठानं स्यात्, ततः पूर्वस्य पूर्वस्योत्तरस्मिन्नुत्तरस्मिन्नध्यासे

ऋजुविवरणम्

पदार्थमात्रेति* ॥ *ननु* संविद्रजतयोः परस्पराधिष्ठानत्वेन चोद्यमनुपपन्नम्; तावतैव लक्षणाङ्गीकारप्रसङ्गात्, इत्याशङ्क्य, साभिप्रायमवतारयति—*ननु संविद्रजतयोरिति। "बीजाङ्कुरादिष्वपी"ति ग्रन्थेऽभिमतवस्तुसिद्ध्यभाव उक्तः, तत्राभिमतवस्तुशब्देन बीजाङ्कुरयोरेव निर्देशशङ्का स्यात्, तत्र चान्वय-व्यतिरेकविरोधः, अभ्युपगमविरोधश्च

तत्त्वदीपनम्

मात्रं भ्रमः? उताविद्यादिजनितम्? इति विकल्प्याऽऽद्यं प्रत्याह—*न पदार्थेति* ॥ द्वितीयमुत्थापयति—*कथमिति* ॥ किमधिष्ठानमात्रं निह्नूयते? उत सत्यम्? नाद्यः; अविद्यादिवदधिष्ठानग्रहणस्याप्यन्वय-व्यतिरेकसिद्धत्वादित्याह—*न हीति* ॥ व्यतिरेकोऽसिद्ध इति चोदयति—*नन्विति* ॥ करसंमृदितलोचनरश्मिषु येयं केशपिण्डावस्था, स *केशोण्ड्रकः* ॥ मायाहस्त्यादिभ्रम आदिशब्दार्थः। केशोण्ड्रकादावपि निरधिष्ठानत्वमसिद्धमित्याह—*न तस्यापीति* ॥

"ननु रजतम्" इत्यत्र भ्रमस्य साधिष्ठानत्वं निर्दिष्टम्, तथाच सद्दिष्टसिद्धिरिति तस्याऽसंगतिशङ्कायां द्वितीयमुत्थाप-यतीत्याह—*ननु संविदिति* ॥ असत्याऽधिष्ठानत्वाऽनुपपत्तेः सत्यमेवाऽधिष्ठानमिति शङ्कते—*नन्वध्यस्यमानेति* ॥ अधिष्ठानज्ञानस्य कारणत्वादध्यस्यमानसिद्धेः पूर्वं सिद्धिर्वक्तव्या, ततश्चाधिष्ठानबोधेऽध्यस्यमानसिद्धौ ततश्चा-धिष्ठानसिद्धिरिति न किमपि सिद्ध्येदित्यर्थः। बीजाङ्कुरयोरितरेतराधीनत्वेऽपि हेतु-हेतुमद्भाववत् संविद्रजतयोरपि तथात्वं स्यादित्याह—*तत्राहेति* ॥ अङ्कुरान्तरस्य बीजजत्वात्कथं नेतरेतराश्रयत्वम्? इत्याशङ्क्य यस्या बीजव्यक्ते-रङ्कुरव्यक्तेर्जन्म, तस्या बीजव्यक्तेर्जन्मनीतरेतराश्रयत्वम्? उत तज्जातीयायाः? नाद्यः; अनभ्युपगमादित्याह—*न बीजेति* ॥ द्वितीयेऽनेकबीजाङ्कुरव्यक्त्यभ्युपगमाद् नेतरेतराश्रयत्वमित्याह—*किन्त्विति* ॥ अस्माभिरपि संविद्रजतपरम्पराश्रयणाद् नेतरेतराश्रयत्वमित्याह—*नन्विहापीति* ॥ किमत्र कारणपरम्पराऽनुभवसिद्धा? आहो अन्यतः सिद्धा? इति विकल्प्याऽऽद्यं दूषयति—*नेत्याहेति* ॥ इह संविद्रजतयोरितरेतराध्यासो यदि भवेत्, तर्हि *तयोरेव* संविदन्तर-रजतान्तरयोरित्यन्वयः। तच्छब्दार्थमाह—*यस्यामिति* ॥ अनयोः सहोपलम्भादितरेतरयो-स्तथाऽनुपलम्भादित्यर्थः। द्वितीयमनुवदति—*नन्विहापीति* ॥ किं पूर्वस्य पूर्वस्योत्तरत्राऽन्वयित्वेनाधिष्ठानत्वम्? उताऽनन्वयित्वेन? इति विकल्प्याऽऽद्यमनुद्य दूषयति—*यदि तावदिति* ॥ संविदो रजताध्याससमये संविदधिष्ठान-

पञ्चपादिका

तयोरेवेतरेतराध्यासः, ततो दुर्घटमेतत् । बीजाङ्कुरादिष्वपि न बीजाङ्कुरान्तरपरम्परामात्रेणाभिमतवस्तुसिद्धिः ; प्रतीतितो वस्तुतश्चानिवृत्ताकाङ्क्षत्वात्, तथाच 'कुत इदमेवमि'ति पर्यनुयोगे 'दृष्टत्वादेवमि'ति

पञ्चपादिकाविवरणम्

युगपदवस्थानात् क्षणिकत्वहानिः । *ननु* बीजाङ्कुरादावन्योन्योपादानत्वेऽपि न युगपदवस्थानं दृश्यत इति, तत्राह—*बीजाङ्कुरादिष्वपीति* ॥ *अभिमतवस्तुसिद्धिः = अन्वयिकारणत्वसिद्धिरित्यर्थः ; अनन्वितेषु बीजादिष्वन्वयिकारणाकाङ्क्षाया अनिवृत्तत्वादित्यर्थः । अतोऽन्वयिद्रव्यमेव तत्राप्युपादानम् ; बीजादेरन्योन्यनिमित्त-नैमित्तिकतेति भावः । इहापि तर्हि पूर्वस्योत्तरं प्रत्यनन्वितत्वेनैवाध्यासनिमित्तता बीजादिवदिति, नेत्याह—*कुत इदमेवमिति पर्यनुयोगे दृष्टत्वादेवमिति* ॥ अयं भावः—बीजाङ्कुरयोः कार्य-कारणभावस्य दृष्टत्वाद-

ऋजुविवरणम्

इत्याशङ्क्यान्यविषयत्वं दर्शयितुं चोदयति—*नन्विति* ॥ अभिमतवस्तुशब्देन हेतुहेतुमद्भावनिर्देशशङ्कानिवृत्त्यर्थमाह—*अन्वयिकारणत्वेति* ॥ कथमन्वय-व्यतिरेकयोः सतोराकाङ्क्षानिवृत्त्यभावः ? इत्याशङ्क्य व्याचष्टे—*अनन्वितेष्विति* ॥अनेन 'प्रतीतितः' इत्येतद्व्याख्यातम् । वस्तुतश्चेत्यस्य व्याख्या = अन्वयिकारणाकाङ्क्षाया इति । कथं परस्परोपादानभावेन स्वरूपसिद्धिरन्वय-व्यतिरेकनिर्वाहश्च ? अतस्तयोरेव परस्परोपादानत्वं वक्तव्यमित्याशङ्क्याभिप्रायमाह—*अतोऽन्वयीति* ॥ *ननु*—बीजादिष्वपि न सर्वत्र कार्य-कारणभावो दृष्टः ; अदृष्टे च तयोरेव कार्य-कारणपरम्पराऽन्धपरम्परैव भवेत् ; अतः कथं वैषम्यम् ? इत्याशङ्क्याभिप्रायमाह—*अयं भाव इति*॥ "अन्यथे"

तत्त्वदीपनम्

रजतस्य संविद्यन्वितत्ववद् रजताधिष्ठानस्यापि तत्रान्वयित्वेनोपलम्भः । एवं पूर्वपूर्वस्यापि तदानीं भावात् क्षणिकत्वक्षतिरित्यर्थः । तदेतदभिसन्धायोक्तम्—*तत इति* ॥

विषय-विषयिणोरितरेतराध्यासस्यौचित्यं यस्मात, तस्मात् संविद्रजतपरम्पराकल्पनं दुर्घटम् । बीजादेर्वैषम्यं वाऽत्रोपसंह्रियते । संविद्रजतयोरन्वयित्वेनाधिष्ठानत्वेऽपि न युगपदवस्थानं बीजाङ्कुरवदिति चोदयति—*नन्विति* ॥ दृष्टान्तासंमत्या दूषयति—*तत्राहेति* ॥ "अभिमतवस्तुसिद्धिरि"त्यत्र कार्य-कारणभावस्य प्रत्याख्यानमिति शङ्का स्यात्, ततश्चान्वय-व्यतिरेकविरोध इत्याशङ्क्याह—*अभिमतेति* ॥

मा भूत्तर्ह्यन्वयि कारणमिति शङ्कानिवृत्त्यर्थं प्रतीतित इत्याद्युक्तम्, तदनुपपन्नम् ; बीजादिभिराकाङ्क्षोपशमादित्याशङ्क्याह—*अनन्वितेष्विति* ॥ घटशरावादीनां स्वस्तिक-रुचकादीनां च मृत्कनकान्विततयोपलम्भानुसारेण बीजादिष्वप्यनुगतं किंचिदाश्रयणीयम्, तदिदमुक्तम्—*प्रतीतित इति* ॥ पूर्वक्षणवर्त्युत्तरक्षणस्य कारणं नानुगतमित्यस्मिन्पक्षे पूर्वस्यापि कार्यत्वेन कारणान्तराऽऽकाङ्क्षाऽनुपरमादनाद्यनुगतं किंचित्कारणमास्थेयम्, तदिदमुक्तम्—*वस्तुत इति* ॥ बीजादीनामनन्विततया उपादानत्वं चेत्, तर्ह्युपादानान्तरानिरूपणादङ्कुरादि निरुपादानं प्रापदित्याशङ्क्याह—*अत इति* ॥ अन्वयिनोऽवश्यंभावित्वमतःशब्दार्थः । नच बीजादिवैयर्थ्यम् ; निमित्तत्वेनार्थवत्त्वादित्याह—*बीजादेरिति* ॥ अनन्वयित्वेनाधिष्ठानपक्षमुत्थापयति—*इहापीति* ॥ प्रमाणाभावान्नैवमित्याह—*नेत्याहेति* ॥ अत्र तथाचेति नोक्तम् ; तस्य शङ्कानुवादिरूपत्वादित्यर्थः ॥

बीजाङ्कुरयोर्जन्य-जनकत्वं दृष्टत्वादाश्रीयते, न तथा संविद्रजतयोः, अदृष्टत्वादित्युक्तम् । तत्रैवं विवेचनीयम् :—किं सकलबीजाङ्कुरव्यक्तिषु जन्यजनकता दृष्टेत्युच्यते ? उत कतिपयव्यक्तिषु ? आद्ये दृष्टत्वादित्यस्य भागासिद्धिः, द्वितीयेऽदृष्टस्थलेऽपि बीजाङ्कुरयोर्जन्य-जनकतावत् प्रकृतेऽपि तत्संभव इत्याशङ्क्याह—*अयं भाव इति* ॥ बीजा-

वार्तिकम्

शुक्तिकादौ सोऽन्यधर्मावभासः* ॥ *यद्वा*—अन्यधर्मोऽवभासते यत्र स तथा । *यद्वा*—अन्यधर्मात्मनाऽ-

पञ्चपादिका

तत्रैव दूरं वा परिधाव्य स्थातव्यम् ; अन्यथा हेतुपरम्परामेवावलम्ब्य क्व चिदप्यनवतिष्ठमानो नानवस्था-दोषमतिवर्तेत । *अपिच* न क्वचिन्निरवधिको 'नेत्ये'व बाधावगमो दृष्टः, यत्राप्यनुमानादाप्तवचनाद्वा

पञ्चपादिकाविवरणम्

दृष्टेऽपि तयोरेव कार्य-कारणपरम्परा दृष्टपरम्परात्वान्नानवस्थादोषमावहति, संविद्रजतयोरधिष्ठानाधिष्ठेयतया निमित्त-नैमित्तकभावस्य प्रथममेव कल्प्यत्वात्तयोरेव पूर्व-पूर्वनिमित्त-नैमित्तिकभावकल्पना त्वन्धपरम्परैव स्यादिति । दृष्टपरम्परामेव दर्शयति—*दृष्टत्वादेवमिति* ॥ *तत्रैव दूरं वेति ॥ नानवस्थादोषमतिवर्तेतेति* ॥ अन्ध-परम्परामेवेत्यर्थः ॥

द्व्याकारावभासित्वात्सर्वभ्रमाणां परत्र परावभास एव भ्रम इत्युक्तम् । भ्रान्तिज्ञानप्रतिपन्नविषयेऽर्थे भ्रान्त्यं-शान्तराभावविशिष्टांशान्तरज्ञानस्य बाधकत्वाच्च साधिष्ठानो भ्रम इत्याह—*अपि च न क्वचिदिति* ॥ *ननु* अनुमानाऽऽप्तवचनाभ्यां सर्पाभावमात्रमपि कदाचिद्गम्यते, न तदभावविशिष्टमंशान्तरमिति, तत्राह—*यत्राप्य-नुमानादिति* ॥ तत्राप्यभावविशिष्टं वस्तुमात्रं गृह्यते ; विशेषाकाङ्क्षादर्शनादिति भावः । *ननु* प्रधानं

ऋजुविवरणम्

त्यनेन दृष्टत्वाभावेनानवस्थादोष उक्तः, सोऽनुपपन्नः ; दृष्टत्वाभावस्यानवस्थाहेतुत्वाभावान्मूलक्षयाभावादित्याशङ्क्य व्याचष्टे—*अन्धपरम्परामेवेति* ॥ पूर्वं निरधिष्ठानभ्रमो न संभवतीत्युक्तम्, न तु साधिष्ठानत्वे किंचित्प्रमाणमुक्तम् ; अतः—"अपिचे"ति वक्तुमयुक्तम्, नापि निरवधिकत्वनिराकरणं बाधस्यात्र युक्तम् ; अप्रस्तुतत्वात्, प्रमाणानुक्तिस्तु तदवस्थैवेत्याशङ्क्य वृत्तसङ्कीर्तनपूर्वकमवतारयति—*द्व्याकारावभासित्वादिति* ॥ "न क्वचिन्निरवधिकः" इति बाधस्य सावधिकत्वमुक्तम्, तत्र च शून्यावधित्वेनापि सावधिकत्वसंभवात् कथं भवदभिमतसाधिष्ठानत्वलाभः ? इत्याशङ्क्याभि-प्रायमाह—*भ्रान्तिज्ञानप्रतिपन्नेति* ॥ ज्ञानमात्रस्याबाधकत्वादंशान्तरज्ञानस्य शुक्तिस्वरूपविषयस्य बाधकत्वेऽपि न साधिष्ठानता, तदर्थम्—"अंशान्तराभावविशिष्टे"ति । एवमपि भ्रान्तिगृहीतसर्पाभावविशिष्टवस्त्वन्तरज्ञानस्य बाध-कत्वेऽपि न साधिष्ठानता, तदर्थम्—*"भ्रान्ती"ति*॥ अधिष्ठानत्वेऽप्येवं भवतु ? तदर्थम्—*"अर्थे"* इति ॥ भ्रान्ति-ज्ञानाप्रतिपन्नविषयस्यैवंभूतज्ञानस्य बाधकत्वेऽपि न साधिष्ठानता, तदर्थम्--*"भ्रान्तिज्ञानप्रतिपन्नविषये" इति*॥ अपेक्षा-दर्शनेनावधिरस्तीत्युक्तम्, तदनुपपन्नम् ; अभावविशिष्टवस्तुज्ञानं बाधकं न भवति ; वस्त्वन्तरस्याप्रतीतेः, इति चोद्यस्या-परिहृतत्वादित्याशङ्क्याभिप्रायमाह—*तत्राप्यभावविशिष्टमिति* ॥ *ननु*—मायाविनिर्मितहस्त्यश्वादिप्रतीतिबाधयो-

तत्त्वदीपनम्

ङ्कुरयोर्जन्य-जनकभावस्य क्वचित् प्रत्यक्षप्रमितत्वादन्यत्रापि तत्कल्पना—विमतम्, जन्यजनकतावत, बीजमङ्कुर-जातीयत्वात्संमतवदिति नानवस्था दोषाय, प्रस्तुते तु संविद्रजतयोरधिष्ठानाधिष्ठेयभावस्य क्वचिदप्यप्रमितत्वान्निमित्त-नैमित्तिककल्पनान्धपरम्परेत्यर्थः ॥

दृष्टान्ते कार्य-कारणपरम्परा दृष्टिपरम्परेति कथमुच्यते ? दृष्टत्वादेवेत्यभिधानादित्याशङ्क्य तत्राप्येषोऽर्थो विवक्षित इत्याह—*दृष्टेति* ॥ अन्यथेति टीकायामनेकहेत्वभ्युपगमो दोषत्वेनोक्तः, स नोपपद्यते ; अनेकहेत्वभ्युप-गमस्यान्यत्र दृष्टत्वादित्याशङ्क्याह—*नानवस्थेति* ॥ अपिचेत्यनेन निरवधित्वाभावे हेत्वन्तरमुपन्यस्यत इति प्रतिभाति, तन्न संगच्छते, सर्वत्र कस्यचिदपि हेतोरनुपन्यासादित्याशङ्क्य वृत्तानुवर्णनपुरःसरं तात्पर्यमाह—*द्व्याकारेति* ॥

'इदं रजतम्' 'अयं सर्पः' इति द्व्याकारतया भ्रमस्फुरणादधिष्ठानमुपेयमित्युक्तम्, संप्रति बाधकज्ञानपर्यालोचयाऽपि साधिष्ठानत्वं साध्यत इत्यविरोध इत्यर्थः । अंशान्तराभावविशिष्टांशान्तरे ज्ञानस्य बाधकत्वं न नियतमिति चोदयति—*नन्वनुमानेति* ॥ अनुमीयतेऽनेनेत्यनुमानम् = पाषाणप्रक्षेपेऽप्यचलितत्वादिलक्षणं लिङ्गम् । मात्रचो

पञ्चपादिका

न सर्प इत्येवावगमः, तत्रापि 'किं पुनरिदम् ?' इत्यपेक्षादर्शनात्पुरोऽवस्थितं वस्तुमात्रमवधिर्विद्यते। प्रधानादिष्वपि जगत्कारणे त्रिगुणत्वादिबाधोऽधिगतावधिरेव। अथवा सर्वलोकसाक्षिकमेतत्—केशोण्डू-

पञ्चपादिकाविवरणम्

नास्तीत्यादौ न तदभावविशिष्टं वस्त्वन्तरं गृह्यते, तेषामन्यत्रानध्यस्तत्वादिति, तत्राह—*प्रधानादिष्वपीति* ॥ *अथवा*—सर्वभ्रमावभासेषु च साक्षिचैतन्यस्याऽऽलम्बनस्य विद्यमानत्वाच्छङ्क्यमाननिरधिष्ठान-निरवधिकभ्रमबाधेऽपि साक्ष्येवाधिष्ठानमवधिश्च विद्यत इत्याह—*अथवा सर्वलोकसाक्षिकमिति* ॥

ननु अर्थबाधया ज्ञानस्यापि बाधाद् भ्रमबाधे तदवभासिसाक्षिचैतन्यमपि बाध्येतेति, तत्राह—*तद्बाधे तदनुषङ्ग एवेति* ॥ अधिष्ठानत्वेनाऽपि परिशेषादिति भावः। अत इत्युपसंहारः। तदेव प्रपञ्चयति—

ऋजुविवरणम्

नावधिप्रतीतिरस्ति, अतः कथमंशान्तराभावविशिष्टांशान्तरज्ञानस्य बाधकम् ? इत्याशङ्क्यापरितोषात् पक्षान्तरमिति तात्पर्यमाह—*अथवा सर्वभ्रमावभासेष्विति* ॥ तथापि निरवधिकत्वमित्यभिप्रायेण चोदयति—*नन्वर्थेति* ॥ *ननु*—बोधो न बाध्यत इति कथमुच्यते ? बोध्यप्रतियोगित्वात्तस्येत्याशङ्क्याभिप्रायमाह—*अधिष्ठानत्वेनेति* ॥ "तेन तन्मात्रस्ये"ति ग्रन्थः पुनरुक्तः ; चैतन्यावधित्वस्य पूर्वमेवोक्तत्वादित्याशङ्क्य व्याचष्टे—*तदेव प्रपञ्चयतीति* ॥ शङ्कान्तरनिराकरणेन तदेव स्पष्टीक्रियत इत्यर्थः। *शङ्कान्तरं चैवम्*—मा भूद्बोधस्वरूपमात्रस्य बाधः, नैतावताऽधिष्ठानावशेषः ; अध्यस्यमानबाधेऽध्यासाधिष्ठानस्य बाधादित्याशङ्क्याह—*तेन तन्मात्रस्येति* ॥ चैतन्यमात्रस्येत्यर्थः। *ननु*—तद्बाधेऽपि न साधिष्ठानत्वम्, अधिष्ठानावशेषो हि साधिष्ठानत्वम्, स्वरूपमात्रस्याबाधः। रजतप्रतियोगिरूपावगमे तदधिष्ठानमप्यवगतमिति निरधिष्ठानत्वम्, अथवा—रजतावभासकस्वरूपावगमे चैतन्यमप्यव-

तत्त्वदीपनम्

ध्यावर्त्यमाह—*न तदभावेति* ॥ वस्तुमात्रलक्षणाऽवधेः संभवेऽपि न तद्ग्रहणस्य बाधकत्वमित्याशङ्क्याह—*तत्रापीति* ॥ अंशान्तरज्ञानं बाधकमित्येतन्न नियतमिति शङ्कते—*ननु प्रधानमिति* ॥ परमाणवो न सन्ति इत्यादिनिषेध आदिशब्दार्थः। जगत्कारणे त्रिगुणत्वादिविप्रतिपत्तौ तत्तन्निषेधान्न व्यभिचार इत्याह—*तत्राहेति* ॥

अथवेत्यत्राऽर्थानुषङ्गो बाधते न बोध इति प्रकारान्तरेण प्रतिपाद्यत इति प्रतिभाति, तदयुक्तम् ; पूर्वं तत्प्रतिपादनादित्याशङ्क्य तात्पर्यमाह—*अथवेति* ॥ सर्वलोकस्य साक्षि सर्वलोकसाक्षि, चैतन्यम् ; तदधिष्ठानमवधिश्च यस्य भ्रान्त्यादेः, तत् ; तत् तथोक्तम्। चैतन्यस्याधिष्ठानत्वाभ्युपगमफलमाह—*केशेति*॥ केशोण्डूकादावपि साधिष्ठानत्वादि सिद्ध्यतीति शेषः। साक्षिणो बाध्यत्वादधिष्ठानत्वाद्ययुक्तमिति चोदयति—*नन्वर्थेति* ॥ अर्थज्ञानलक्षणसाक्ष्यबाधे तदपेक्ष्यसाक्षिणोऽपि बाध इत्यर्थः। किं विशिष्टाकारस्य बाधः ? उत केवलस्य ? इति विकल्प्याऽऽद्योऽङ्गीक्रियत इत्याह—*तत्राहेति* ॥ एवकारो बाध्यत इत्यनेनानुषज्यते। द्वितीयं प्रत्याह—*न बोध इति* ॥ बाधाबाधे हेतुमाह—*अधिष्ठानत्वेनेति* ॥ बाधसाक्षित्वात्पुनर्भ्रमान्तरहेतुत्वाच्च न चैतन्यबाध इत्यर्थः ॥

"तेने"त्यादिना ग्रन्थेन चिदधिष्ठानताया एवोच्यमानत्वात्पुनरुक्तिरित्याशङ्क्याह—*तदेवेति* ॥ नच—तत्प्रपञ्चनं व्यर्थमिति—शङ्क्यम् ; शङ्कान्तरनिरसनद्वारा तत्प्रपञ्चनसम्भवात्। तथाहि—विमतम्, बाध्यम्, बाध्यसम्बन्धसम्बन्धित्वात् ; संप्रतिपन्नवत्, इत्यनुमानाद् बोधबाधसिद्धेर्न तस्याबाधित्वमित्याशङ्कायां सम्बन्धविशिष्टाऽऽकारस्य बाध्यत्वेऽपि न केवलस्य बाध्यतेत्यर्थः ॥

वार्तिकम्

वभासो यस्य स तथा। अन्यावभास इति वक्तव्ये धर्मग्रहणं कुर्वन् तस्यानिर्वचनीयतां ख्यापयति ;

पञ्चपादिका

कादावपि तद्बाधे तदनुषङ्ग एव बोधे बाध्यते, न बोधः । अतस्तदवधिः सर्वस्य बाधः ; तेन तन्मात्रस्य बाधाभावात्, स्वतश्च विशेषानुपलब्धेः कूटस्थापरोक्षैकरसचैतन्यावधिः सर्वस्य बाधः । नाप्यध्यस्तमप्यसदेव ; तथात्वे प्रतिभासायोगात् ॥

ननु सर्वमेवेदमसदिति भवतो मतम् ! क एवमाह ? अनिर्वचनीयाऽनाद्यविद्यात्मकमित्युद्घोषित-

पञ्चपादिकाविवरणम्

तेन तन्मात्रस्येति ॥ साधिष्ठानभ्रमसाधनप्रसङ्गेनाध्यस्तस्यापि शून्यतां निराचष्टे----*नाप्यध्यस्तमप्यसदिति* ॥ प्रत्यक्षतो 'रजतमि'ति विशेषप्रतिभासाप्रयोगप्रसङ्गादिति भावः ; प्रतिभासमात्रनिराकरणे शून्यं न भासत इति-वाक्यस्याबोधकत्वप्रसङ्गात् । *ननु* अध्यस्तं सर्वं शून्यमेवेति तेऽपि मतमिति चोदयति----*नन्विति* ॥

ऋजुविवरणम्

गतमेव ; अतो निरधिष्ठानत्वमित्याशङ्क्याह—*स्वतश्चेति* ॥ स्वरूपेणाधिष्ठानत्वम्, न तु विशिष्टस्य ; इतरेतराश्रयादिति भावः । स्वतो विशेषाभावमेवापादयति--*कूटस्थेति* ॥ *अथवा*—स्वतो विशेषाभावेऽपि बाध्यात्मकत्वेन बाधोऽपि स्यात्, इत्याशङ्क्याह—*कूटस्थेति* ॥ *यद्वा*—बौद्धमतेऽप्येवंभूतस्याधिष्ठानत्वमस्ति, तदर्थमाह—*कूटस्थेति* ॥ कथमेवंभूतस्याधिष्ठानत्वम्, प्रतीत्यभावादिति ? तत्राह--*अपरोक्षेति* ॥ तर्हि कूटस्थाकारोऽपरोक्षाकारचैतन्याकारौ चेति स्वतो विशेषः स्यादित्याशङ्क्याह—*एकरसेति* ॥ *यद्वा*--आत्मख्यातिपक्षे ज्ञानमवधिः, तदर्थमाह--*एकरसेति* ॥ कथमेकरसता ? विषयाकारप्रतीतेरिति, तदर्थम्---*कूटस्थापरोक्षेति* ॥ *अथवा*—स्वतो विशेषानुपलब्धिरसिद्धा ; रजतावभासत्वादिति, तदर्थम्—*एकरसेति* ॥ तर्हि कथं तथा प्रतीतिः ? तदाह—*कूटस्थापरोक्षेति* ॥ अध्यस्तस्य शून्यतानिराकरणमसंगतमित्याशङ्क्याह—*साधिष्ठानेति* ॥ कथमसत्त्वे प्रतिभासायोगादित्युक्तम् ? अप्रतीतौ तद्वैलक्षण्यस्यापि प्रत्येतुमशक्यत्वात्, प्रतीतौ स्ववचनविरोधापत्तेरित्याशङ्क्य सोपस्कारमभिप्रायमाह—*प्रत्यक्षत इति* ॥ किमित्येवं व्याख्यायते ? स्फुरणस्वभावस्य शून्यस्य प्रतिवाद्यनङ्गीकृतत्वात्, इत्याशङ्क्य तन्मतेऽप्यापादयति—*प्रतिभासमात्रेति* ॥ *ननु* अध्यस्तशून्यत्वस्योभयवादिसिद्धत्वान्नैकः पर्यनुयोज्य इत्यभिप्रायं दर्शयति—*नन्वध्यस्तमिति* ॥ *अथवा*—"भवतो मतमि"ति कथमुक्तम् ? तन्मतत्वव्यावृत्तिशङ्का स्याद् यतः, इत्याशङ्क्याभिप्रायमाह *तेऽपीति* ॥ असत्त्वेन च वेदे शास्त्रे चाध्यस्तस्य

तत्त्वदीपनम्

"तेन"इत्यत्र तच्छब्देन बोधो गृह्यते । बोधो यतः, ततो न बाध्यते । तथाच प्रयोगः—विमितम्, न बाध्यम्, बोधत्वात् ; यन्नैवं न तदेवम्—यथा रूप्यादीति । विमतम्, बाध्यम्, परिच्छिन्नत्वात् ; रूप्यवत्, इत्याशङ्क्य, किं स्वाभाविकं परिच्छिन्नत्वं हेतुः ? उतौपाधिकम् ? नाऽऽद्यः ; असिद्धेरित्याह—*स्वत इति*॥ द्वितीयपक्षव्यावृत्त्यर्थश्चशब्दः । गगनस्यौपाधिकपरिच्छेदवतोऽप्यबाध्यत्वात्तत्र व्यभिचार इत्यर्थः ॥

विज्ञानवाद्यभिमताधिष्ठानाद्विशेषमाह—*कूटस्थेति* ॥ उत्पत्त्यादिधर्मरहितमित्यर्थः । तत्र हेतुमाह—*अपरोक्षैकरसेति* ॥ बोधैकरसमित्यर्थः । "एकधैवाऽनुद्रष्टव्यम्" "प्रज्ञानघनः" इत्यादिवाक्याद् बोधैकरसमित्यर्थः । *अथवा*—स्वाभाविको विशेषो नोपलभ्यत इति कथम् ? उत्पत्त्यादिविशेषोपलब्धेरित्याशङ्क्याह—*कूटस्थेति* ॥ आरोप्यासत्त्वनिराकरणस्याधिष्ठानासत्त्वनिरसनोपक्रमविरोधमाशङ्क्याह—*साधिष्ठानेति* ॥

"असत्त्वे प्रतिभासायोगादि"त्यसंगतम् ; किमसदधिगम्य तन्निषिद्ध्यते ? उतानधिगम्य ? आद्ये स्ववचनविरोधः, द्वितीये त्वसदनधिगतौ तन्निषेधस्यैवासंभव इत्याशङ्क्याह—*प्रत्यक्षत इति* ॥ अध्याहारेण व्याख्याने हेतुमाह—*प्रतिभासेति*॥ असदनवभासे तदनुवादेन—'असन्न भासते' इति शब्दप्रयोगानुपपत्तेरित्यर्थः ॥

अधिष्ठानसत्त्वोपगमादिदं सर्वमसदिति कथमुक्तमित्याशङ्क्याह—*नन्वध्यस्तमिति* ॥ किमविद्यावस्थायां

पञ्चपादिका

मस्माभिः। अथ पुनर्विद्योदयेऽविद्याया निरुपाख्यतामङ्गीकृत्यासत्त्वमुच्येत, काममभिधीयताम्। तथाच बाधकज्ञानम्—'नेदं रजतमि'ति विशिष्टदेश-कालसम्बद्धं रजतं विलोपयदेवोदेति, न देशान्तरसम्बन्धमा-

पञ्चपादिकाविवरणम्

शून्याद् व्यावृत्तिरपि भ्रमस्य कथितैवेत्याह----*क एवमाहेति* ॥ सद्व्यावृत्तिमात्रं भ्रमस्यासत्त्वं नाम, न शून्यत्वम्; निषेधप्रतियोगित्वादिति भावः। *ननु*—भ्रमस्य स्वकालेऽनिर्वचनीयत्वेऽपि बाधादूर्ध्वं शून्यत्वमविशिष्टमिति शङ्कते--*अथ पुनरिति* ॥ सर्ववादिनां सर्वं वस्तु स्वकाले वर्तमानमपि विनाशादूर्ध्वं शून्यमेवेति सम्मतम्, अतो न दोष इत्याह—*काममिति* ॥

ननु भवतु नाम सर्वस्य वस्तुनो विनाशादूर्ध्वं शून्यता, न विभ्रमगृहीतं वस्तु बाधादूर्ध्वं शून्यं भवति, किन्तु देशान्तरादिगतमिति—चेत्, तत्र किं बाधकज्ञानमेव रजतादेर्देशान्तरे सत्त्वं गमयति? किं वेह बाधानुपपत्तिरिति? न तावद् बाधकज्ञानमित्याह—*तथाच बाधकज्ञानमिति* ॥ नेदं रजतम्, किंतु देश-कालान्तरे बुद्धौ वेत्यनवगमादिति भावः। यावदभिधानसामर्थ्यं हि वाक्यमर्थं प्रतिपादयति, देशान्तरवर्तित्वं त्वनभिहितं न वाक्यार्थ इत्यर्थः॥

ऋजुविवरणम्

व्यवहारो दृश्यते, स कथम्? इत्याशङ्क्याभिप्रायमाह—*सद्व्यावृत्तिमात्रमिति* ॥ कथं "काममि"ति शून्यत्वमङ्गीक्रियेत? पूर्वमपि शून्यत्वप्रसङ्गाच्छून्यवादिताप्रसक्तेरित्याशङ्कयाभिप्रायमाह--*सर्ववादिनामिति*॥ विनाशादूर्ध्वं सर्वस्य शून्यत्वमविशिष्टमित्युक्त्वाऽनन्तरं बाधकज्ञानस्यार्थापत्तेर्देशान्तरसम्बन्धसाधकत्वनिराकरणमसङ्गतम्, इत्याशङ्क्य चोद्यनिवर्तकत्वं दर्शयति—*ननु भवत्विति* ॥ "तथाऽनवगमादि"त्ययुक्तम्; विशेषनिषेधसामर्थ्यात्तथाऽवगतेरित्याशङ्क्य, बाधकं प्रत्यक्षरूपं शब्दरूपं च तत्र प्रत्यक्षनिराकरणार्थमुक्तम्, "तथानवगमादि"त्यभिप्रायमाह—*नेदं रजतं किन्त्विति* ॥ मा भूत् प्रत्यक्षेण देशान्तरसम्बन्धप्रतीतिः, यावतैव शब्दसंजल्पस्तावत एव प्रतीतिरिति कृत्वा, वाक्ये तु कथं तत्प्रतीतावसामर्थ्यम्? विशेषनिषेधस्येतरप्रतिपादकत्वादित्याशङ्क्य व्याचष्टे—*यावदभिधानेति* ॥ अभिधानसामर्थ्यानतिक्रमेण वाक्यार्थप्रतिपादकत्वम्। गोरानयने चोदिते हि नान्यानयननिवृत्तिर्वाक्यादवगम्यत इति।

तत्त्वदीपनम्

वेद्यासत्त्वमनभिमतमित्युच्यते? उत विद्यावस्थायाम्? इति विकल्प्याऽऽद्यं प्रत्याह—*शून्यादिति* ॥ प्रपञ्चस्यासद्वैलक्षण्ये शास्त्रीयोऽसत्त्वव्यपदेशः कथम्? इत्याशङ्क्य सद्वैलक्षण्याभिप्रायेणेत्याह—*सद्व्यावृत्तीति* ॥ किमत्र विनिगमने कारणम्? इत्याशङ्क्याह—*निषेधप्रतियोगित्वादिति*॥ *शून्यमिति*॥ शून्यस्याप्रसक्तस्य निषेधासंभवादित्यर्थः। द्वितीयं पक्षमुत्थापयति—*नन्विति* ॥

विद्योदयानन्तरमारोपितासत्त्वमङ्ग्यकारि, तदसंगतम्; उत्तरत्रासत्त्वे पूर्वमप्यसत्त्वाऽऽपातात्, प्राक्सत्त्वे कदाचिदप्यसत्त्वासंभवादित्याशङ्क्याह—*सर्ववादिनामिति* ॥ नष्ट-बाध्ययोर्विशेषं शङ्कते—*ननु भवत्विति* ॥ निरुपाख्यत्वे प्रतिभासासंभवादिति द्रष्टव्यम्। मुद्गरप्रहरणादिना घटादेश्चूर्णीकृतत्वान्नोत्तरकालं क्वचिदपि सत्त्वमित्यर्थः। ततो वैषम्यमाह—*न विभ्रमेति* ॥ इतरेतराभावज्ञानस्य बाधकत्वात्तेनेतरेतरभावो बाध्यते न रूप्यम्, उभयनिषेधे कल्पनागौरवं स्यादित्यर्थः।

पुरोवर्तिनि सत्त्वासंभवात्तुच्छत्वमिति शङ्कते—*किंत्विति* ॥ अन्यत्र सत्त्वान्न शून्यत्वमित्याह—*देशान्तरेति* ॥ प्रमाणाभावान्नान्यत्रापि सत्त्वमित्याह—*तत्रेत्यादिना* ॥ विद्योदयानन्तरं यथा निरुपाख्यता, तथा बाधकज्ञानं प्रवृत्तमिति तथाशब्दार्थः। बाधकबोधेन देशान्तरे सत्ताऽधिगम्यत इति ब्रुवाणं प्रति "तथाऽनवगमादि"ति हेत्वभिधानमयुक्तमित्याशङ्क्य, किमपरोक्षबाधकबोधाद् देशान्तरसत्त्वमधिगम्यत इति ब्रवीषि? उत शाब्दात्? इति

पञ्चपादिका

पादयति ; तथाऽनवगमात् । तथाच दूरवर्तिनीं रज्जुं सर्पं मन्यमानस्तन्निकटवर्तिनाऽऽप्तेन 'नायं सर्पः' इत्युक्ते सर्पाभावमात्रं प्रतिपद्यते, न तस्य देशान्तरवर्तित्वम् ; तत्प्रतिपत्तावसामर्थ्याद्वाक्यस्य । नार्थापत्त्या;

पञ्चपादिकाविवरणम्

एवं सति प्रतिपन्नस्य वस्तुनोऽत्राभावोऽन्यत्र सत्त्वमन्तरेणानुपपन्नः, इत्यर्थापत्त्या वाक्यं गमयिष्यतीति, नेत्याह—*नार्थापत्त्येति* ॥ अन्यथाख्यातौ निषिद्धस्य संसर्गस्याऽऽत्मख्यातौ बहिष्ट्वस्य वाऽन्यत्र सत्त्वमन्तरेण निषेधदर्शनात् , अख्यातावपि ऋत्विग्विच्छेदे सर्वस्वदानकर्तव्यताबुद्धावृत्विग्विच्छेदान्तरनिमित्तादक्षिणयाग-

ऋजुविवरणम्

अनेन "तथाच दूरवर्तिनी" मित्यस्याभिप्राय उक्तः । अर्थापत्तिः सामग्र्यभावेन निराकरणानर्हेत्याशङ्क्यानुपपत्ति-प्रदर्शनेन शङ्कामाह—*एवं सतीति* ॥ किं तत्तद्दर्शनाभिप्रायेणार्थापत्तिरुच्यते ? उत लोकदृष्ट्यभिप्रायेण ? इति विकल्प्य प्रथमपक्षे बहिरेव दूषणमाह—*अन्यथाख्याताविति* ॥ *अख्यातावपीति* ॥

इयं विषयशुद्धिः—ज्योतिष्टोमे "यदि प्रतिहर्ता विच्छिद्येत सर्ववेदसं दद्या"दि"ति सर्वस्वदानं नैमित्तिकम्, उद्गातृविच्छेदे त्वदाक्षिण्यं श्रुतम्—"यद्युद्गाता विच्छिद्येतादाक्षिण्यो यज्ञः संस्थाप्यः"इति । तत्र पूर्वतराधिकरणे द्वयोर्युगपद्विच्छेदे द्वयमपि नैमित्तिकमित्युक्तम्, पूर्वाधिकरणे तु युगपदनिमित्तद्वयेऽपि नैमित्तिकस्य विकल्प उक्तः ; सम्प्रति क्रमेण निमित्ते किं प्रथमं निमित्तं बलवत् ? उत द्वितीयम् ? इति चिन्त्यते । अनुपसंजातविरोधित्वात् पूर्वस्योत्तरबाधकत्वम् ; स्वावरुद्धे कर्मण्युत्तरप्रवृत्तिप्रतिबन्धकत्वादिति पूर्वपक्षं कृत्वा राद्धान्तितम्—"पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्"इति । *पौर्वापर्ये* = पूर्वापरविरोधे, पूर्वस्य दौर्बल्यम् । "प्रकृतिवदि"ति निदर्शनम् । यथा प्राकृतस्य पदार्थस्य विकृतावतिदेशतः प्राप्तस्य वैकृतेनोपदिष्टेन दौर्बल्यम् ; अन्यत्र सावकाशत्वात्, एवमत्रापीत्यनुप-संजातविरोधित्वेनोत्पन्नत्वं बाध्यत्वे हेतुः । अनुपसंजातविरोधित्वं च सापेक्षविषयम्, पौर्वापर्यं तु निरपेक्षविषयम् ।

तत्त्वदीपनम्

विकल्प्याऽऽद्यं दूषयति—*नेदमिति* ॥ रजतं न पुरोवर्तिनि सत्, किन्तु देशान्तरादावित्याकारबुद्धिवृत्त्यदर्शनादि-त्यर्थः । द्वितीयं निराकर्तुम्—"तथाचे"त्युक्तं टीकायाम् । *तस्यायमर्थः*—रज्ज्वाः सर्पात्मना ग्रहणे विशेषाग्रहणं हेतुरित्याह—*दूरेति* ॥ रज्जुं सर्पात्मतया गृहीत्वा ह !! हा !!! इति क्रन्दमानं नरमालोक्य कृपया कश्चिद् ब्रवीति—'मा भैषीः', 'नायं सर्पः' इति, तदा तद्वचनात् सर्पनास्तितां प्रतिपद्य स्वस्थो भवतीति सर्पाभावाधिकरणत्वेन पुरोवर्तिप्रतिपत्तिरपि जायते । अतः कथमभावमात्रं प्रतिपद्यते ? इत्याशङ्क्य मात्रचोऽर्थमाह—*न तस्येति*॥

देशान्तरवर्तित्वं किं पदार्थः ? उत वाक्यार्थः ? नाद्यः ; तद्वाचकपदाभावादिति चेतसि निधाय द्वितीयं कल्पं निराचष्टे—*तत्प्रतिपत्ताविति* ॥ तत्रासामर्थ्यादिति कथम् ? 'विषं भुङ्क्ष्वे'त्यादिवाक्याद्विषभक्षणबोधकादपि भोजन-निवृत्तिप्रतिपत्तिवद् देशान्तरसत्त्वप्रतिपत्त्युपपत्तेरित्याशङ्क्याह—*यावदिति*॥ यत्र वाक्यं मुख्यवृत्त्याऽर्थप्रतिपादकम्, तत्र पदसामर्थ्यमनतिक्रम्याऽर्थं बोधयद् लक्ष्यते—'समिधमाहर' इत्यादौ, यत्र त्वमुख्यवृत्त्या बोधकम्, तत्र पदसामर्थ्याति-क्रमेणापीति व्यवस्था । ततश्चात्र पदसामर्थ्यातिक्रमनिमित्ताभावात्तत्र समाथ्यानुरोधेन वक्तव्यम् । नच तस्य देशान्तरवर्तित्वबोधनजननसमर्थता ; तस्यानभिहितत्वात्, अभिहितपदार्थसंसर्गबोधनसमर्थत्वाद्वाक्यस्येत्यर्थः । बाधानुप-पत्तिरन्यत्र सत्त्वकल्पिकेति मतमुत्थापयति—*एवं सतीति* ॥ प्रत्यक्ष-परोक्षबाधकधियोः साक्षाद् देशान्तरवर्तित्व-बोधकत्वासम्भवे सतीत्यर्थः । वाक्यमिति प्रत्यक्षस्याप्युपलक्षणम् । किमेतद्वादिदृष्ट्योच्यते ? उत लौकिक-दृष्ट्या ? इति विकल्प्य क्रमेण दूषयति—*अन्यथाख्यातावित्यादिना* ॥

पञ्चपादिकाविवरणम्

समाप्तिविज्ञानबाधितायां न सर्वस्वदानकर्तव्यता तत्र प्रतिपन्नाऽन्यत्र सतीति कल्प्यते। प्रवृत्तिरेव तत्र निरुध्यत इति चेत्, न ; प्रवृत्तिनिरोधो न बाध इत्युक्तत्वात्, यागादिषु च प्रवर्तमानस्य राजचोरादिप्रतिबन्धनिश्चयात् प्रवृत्तिनिरोधेऽपि यागादिबुद्धौ बाधप्रसिद्ध्यभावात्, सत्यां चाबाधितकर्तव्यताबुद्धौ यदाकदाचित् प्रवृत्तिसिद्धेः॥

किञ्च लोकेऽपि प्रतिपन्नोपाधावेव यस्य निषेधः, तस्य निषेधोपाधिसजातीयोपाध्यन्तरे सत्त्वं न कल्प्यत इत्याह—*इह भग्नघटाभाववदिति*॥ यथा प्रतिपन्नदेशे निषिद्धस्य घटस्य न देशान्तरे सत्त्वम्, एवं प्रतिपन्नदेश-कालवस्तुसर्वोपाधौ निषिद्धस्य न प्रतियोगित्वेनाप्रतिपन्नसर्वोपाधौ सत्त्वसिद्धिरित्यर्थः। *ननु*

ऋजुविवरणम्

तदुक्तं भट्टपादैः—"पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां जन्म यत्र धियां भवेत्॥"

इति॥ एवं पूर्वदौर्बल्ये प्रकृतोपयोगस्तु—यदा पूर्वं प्रतिहर्तुर्विच्छेदः तदा पूर्वं नैमित्तिकसर्वस्वदानकर्तव्यताप्राप्तिरनन्तर-मुद्गातृविच्छेदान्नैमित्तिकमदाक्षिण्यं भवति, तेन च पूर्वस्य बाधः। तदिह्वोदाहरणम्। *ननु* प्रवृत्तस्य प्रवृत्ति-निरोधो बाधः, परिव्राजकादौ चौदासीन्यप्रच्युतिरस्त्येव, अतः कथं पूर्वोक्तत्वेन तस्य बाध्यत्वं निराक्रियते? इत्याशङ्क्याह—*यागादिष्विति*॥ कथं प्रसिद्ध्यभावेन बाधाभावो निश्चीयते? विद्यमानेऽप्यप्रसिद्धि-दर्शनादित्याशङ्क्याह—*सत्यां चेति*॥ उत्तरत्र प्रवृत्त्या बाधाभावो निश्चीयत इत्यर्थः। द्वितीयपक्षनिराकरण-परत्वेनोत्तरटीकामवतारयति—*किंचेति*॥ *अथवा*—"नार्थापत्त्ये"त्यत्रैव यद्यर्थापत्तेरुपक्षीणत्वं परदर्शनाभि-प्रायेणाभिप्रेतम्, तर्हि 'इह भग्नघटाभाववदि'ति ग्रन्थो व्यर्थः स्यात्; *अथवा*—पूर्वाभिप्रायवर्णनं टीकाविरुद्धम्; तत्रान्यत्रैवोपक्षीणत्वप्रदर्शनात्, इत्याशङ्क्यावतारयति—*किञ्च लोकेऽपीति*॥ "घटाभाववदि"ति निदर्शनं कृतम्, तन्न युक्तम्; 'तत्रत्यः सन् घट इह भग्नः' इत्यादावन्यत्र सत्त्वप्रतीतेरित्याशङ्क्य तदभिप्रेतं दर्शयति—*यथाप्रति-

तत्त्वदीपनम्

अख्यातावपीत्यस्यायमर्थः—"अध्वर्युं निष्क्रामन्तं प्रस्तोता संतनुयात्तमुद्गाता तं प्रतिहर्ता तं ब्रह्मा तं यजमानः" इति ज्योतिष्टोमे ऋत्विजामन्योन्यकच्छोपादानेन यज्ञशालातो निष्क्रमणं श्रूयते। तत्र प्रतिहर्तुर्विच्छेदे सर्वस्वदक्षिणयाऽ-ध्वरपरिसमाप्तिः श्रूयते—"सर्ववेदसं दद्यादि"ति। उद्गातृविच्छेदे दक्षिणां विनैव यागः समापनीय इति। तत्रोभयोर्युगपद् विच्छेदे विकल्पः; तुल्यत्वादिति निर्णयः। क्रमेण निमित्ते जाते परीक्ष्यते—किमाद्यं निमित्तं स्वकार्यं प्रयोजयति? उत चरमं निमित्तम्? इति। तत्रासंजातविरोधितया पूर्वस्य बलीयस्त्वात् तदेव प्रयोजकम्, उत्तरस्य तद्विरोधे प्रयोजकत्वा-सम्भवादिति प्राप्य, राद्धान्तितम्—"पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदि"ति। *अस्यायमर्थः*—निमित्तयोः पूर्वापरीभावे जाते पूर्वस्य दौर्बल्यम्; पूर्वोपमर्दमन्तरेणोत्तरोत्पत्तेरनुपपत्तेः। तदुक्तम्—

"पूर्वात्परबलीयस्त्वं तत्र नाम प्रतीयताम्। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्॥" इति।

तत्र दृष्टान्तः—"प्रकृतिवदि"ति। यथा प्रकृतौ श्रुतानां कुशमयबर्हिषां विकृतावतिदेशप्राप्तानां शरमयबर्हिर्भि-र्बाध्यत्वम्; तेषां प्रकृतौ सावकाशत्वात्, इतरेषां निरवकाशत्वात्, सावकाश-निरवकाशयोर्निरवकाशं बलवदिति न्यायात्। तथाच प्रथमप्राप्तप्रतिहर्तृविच्छेदपरिप्रापितसर्वस्वदानकर्तव्यता चरमप्राप्तोद्गातृविच्छेदनिमित्तादक्षिणयाग-समाप्तिविज्ञानबाधिताऽन्यत्र सत्त्वेन नाऽऽश्रीयते, तद्वदत्रापीति॥

दृष्टान्तोऽसंप्रतिपन्न इति शङ्कते—*प्रवृत्तिरिति*॥ अव्याप्त्या परिहरति—*न प्रवृत्तीति*॥ किंच प्रवृत्तिमात्रस्य निरोधे बाधः? उतायथार्थप्रवृत्तेः? तत्राऽऽद्येऽतिव्याप्तिमाह—*यागादिष्विति*॥ न चरमः; अख्यातिमतेऽन्यथा प्रवृत्तेरयोगादित्यर्थः॥

किं कतिपयप्रसिद्ध्यभावो हेतुः? उत सकलप्रसिद्ध्यभावो हेतुः? तत्राऽऽद्ये कतिपयप्रसिद्ध्यभावस्य सर्वत्र सुलभत्वान्न किमपि सिद्ध्यति। द्वितीयेऽसिद्धिः; निखिलप्रसिद्ध्यभावस्य दुर्ज्ञानत्वादित्याशङ्क्याह—*सत्या-

पञ्चपादिका

इह भग्नघटाभाववत्तावन्मात्रेणापि तत्सिद्धेः । यत्रापि सर्पबाधपूर्वको रज्जुविधिरक्षजन्यः तादृशवाक्य-जन्यो वा, तत्रापि स एव न्यायः ; तथाऽनवगमात्, तदेवं न क्व चिन्निरधिष्ठानोऽध्यासः ? तस्मात्साधूक्तम्—*परत्रेति* ॥

पञ्चपादिकाविवरणम्

कथं सर्वत्र शून्यस्य प्रतिपत्तिरिति ? तत्राह—*तन्मात्रेणाऽपि तत्सिद्धिरिति* ॥ अत्रैवानिर्वचनीयमिथ्यावस्तु-सद्भावमात्रेणाऽपि तस्याः प्रतीतेः सिद्धिरित्यर्थः ॥

ननु तर्हि 'पूर्वं रजतमभूदिदानीं ने'ति घटवत्कालभेदेन निषेधः स्यात्, *न* ; लौकिकपरमार्थरजतस्यात्र कालत्रयेऽपि शून्यत्वात्तदपेक्षया निरुपाधिकनिषेधसिद्धेः । निरुपाधिकनिषेधसामर्थ्याच्च प्रतिपन्नं मिथ्यारजतमिति बाधानन्तरं परामृश्यते—"मिथ्यैव रजतमभादि"ति ; अन्यथा कालभेदे सत्यरजतमेव स्यात् 'नायं सर्पः' इत्यभावमात्रविषया हि प्रत्यक्षप्रतिपत्तिर्न देशान्तरे सर्पसत्त्वं गमयति, किमु वक्तव्यम्—'रज्जुरियमि'त्यधिष्ठाने पर्यवसिता प्रतीतिर्न कल्पयतीति दर्शयति—*यत्रापि सर्पबाधपूर्वक इति* ॥ तदेवमित्याद्युपसंहारः । यद्येवं परत्रेत्यादिः स्पष्टार्थः ।

ऋजुविवरणम्

पत्रेति* ॥ शून्यत्वस्य चोद्ये सन्निहितत्वात् "तन्मात्रेणे"त्यनेन तस्यैव निर्देशशङ्का स्यात्, तदर्थं व्याचष्टे—*अत्रैवेति*॥ यदि निषेधस्य सत्यरजतविषयत्वमङ्गीक्रियते, कथमुत्तरत्र मिथ्यात्वेन रजतपरामर्शः ? अनुभूतविषयत्वात्परा-मर्शस्येत्याशङ्क्याह—*निरुपाधिकनिषेधेति* ॥ सामर्थ्यशब्देनार्थापत्तिरुच्यते । *अथवा*—सामर्थ्यशब्देनाधिष्ठाना-भिव्यक्तं चैतन्यमभिधीयते, तच्च संसृष्टग्राहकम्, रजतनिवृत्तिश्चाधिष्ठानचैतन्यगतेति तेनावभास्यत इति भावः । कल्पना-गौरवपरिहाराय कालभेदेन निषेधः कस्मान्नाङ्गीक्रियत इति ? तत्राह—*अन्यथेति* ॥ सत्यत्वे च पूर्वमेव दूषण-मभिहितमिति भावः । "यत्रापी"त्यनेन न्यायातिदेशः कृतः, स कथम् ? सादृश्याभावात्, इत्याशङ्क्य नायमतिदेश इत्याह—*नायं सर्प इत्यादिना* ॥ *ननु* कैमुत्येऽपि यदुदाहृत्य किञ्चित् साध्यते, तस्मिन्नुदाहरणे किंचित् पूर्वपक्ष-साधकमुद्रिक्तकारणमङ्गीकृत्योदाहरणान्तरे तादृशकारणाभावे पूर्वन्यायेन तादृशत्वसाधनं कैमुत्यम् ; तदभावादत्र कथम् ? इत्याशङ्क्य, अत्रापि तदस्तीत्याह—नायं सर्प इत्यभावेति* ॥ "तदेवं न क्वचिदि"त्ययुक्तम् ; अध्यस्तस्यान्यत्र सत्त्वे प्रमाणं निराकृत्य तदेवोपसंहर्तव्यम्, किं व्यवहितोपसंहारेण ? इत्याशङ्क्यावतारयति—*तदेवमित्यादीति* ॥ ग्रन्थसन्दर्भाद्यत्वेन प्रधानत्वेन च तस्यैवोपसंहारः कृतः । नचाद्यन्ताद्यत्वात्परत्रेति पदसाफल्यमेवोपसंहर्तव्यम् ; आद्युप-

तत्त्वदीपनम्

मिति* ॥ राजादिप्रतिबन्धप्रध्वंसे यागादिषु प्रवृत्त्यनुपपत्त्या तद्धेत्वबाधिततत्कर्तृताबुद्धिरवसीयते ; अन्यथा कर्तव्यताबुद्धेर्बाधात्प्रवृत्तिर्न स्यादित्यर्थः । लौकिकदृष्ट्येति विकल्पं निरस्यति—*किंचेति* ॥ *निषेधो-' पाधीति* ॥ निषेधस्योपाधिर्यो देशादिः, तस्य ; सजातीयदेशादाविति । यदिह निषिध्यते, तदन्यत्र सदिति न व्याप्तिः ; इह नष्टकलशे व्यभिचारादिति वक्तव्ये तदभावादिति किमुक्तम् ? इत्याशङ्क्याह—*यथेति* ॥ इह भग्न-घटस्याऽन्यत्र सत्त्वाभाववद् बाधितस्य नान्यत्र सत्त्वमिति टीकार्थः । *प्रतियोगित्वेनेति* ॥ प्रतियोगि-व्यावर्तकत्वेनेत्यर्थः । विधिप्रत्ययानुपपत्त्या समारोपितस्यान्यत्र सत्त्वमिति शङ्कते—*नन्विति* ॥ बाध-विरोधान्नात्र सत्त्वम्, अन्यत्रापि तत्रेष्यते चेत्, कथं प्रतिभासः ? इत्यर्थः ॥

"तन्मात्रेणे"त्यत्र किं देशान्तरसत्त्वं तच्छब्दार्थः ? उताऽत्रसत्त्वम् ? नाद्यः ; अनङ्गीकृतेः, नापि चरमः ; बाधविरोधादिति शङ्कायामाह—*अत्रैवेति* ॥ सद्विलक्षणत्वमनिर्वचनीयत्वम् ; बाधयोग्यत्वं मिथ्यात्वमिति विभागः । निरुपाधिकनिषेधानुपपत्त्या न पुरोवर्तिनि सत्त्वमिति चोदयति—*ननु तर्हीति* ॥ पुरोवर्तिनि रजतसत्त्वे 'प्राग्

भामती

सर्वेषामेव परीक्षकाणां मतेऽन्यस्यान्यधर्मकल्पनाऽनिर्वचनीयताऽवश्यंभाविनी, इत्यनिर्वचनीयता सर्वतन्त्राविरुद्धोऽर्थ इत्यर्थः। आख्यातिवादिभिरकामैरपि सामानाधिकरण्यव्यपदेश-प्रवृत्तिनियमखेहात्तदिदम-

ऋजुप्रकाशिका

आख्यातिवादिभिरिति ॥ सर्वज्ञानयथार्थवादिभिरित्यर्थः। वस्तुतः शुक्तिकाशकले पुरोवर्तिनि 'इदं रजतमि'ति पुरोवर्तिगतेदंत्व-रजतत्वयोः सामानाधिकरण्यव्यपदेशः *सामानाधिकरण्यव्यपदेशशब्दार्थः। रजतार्थिनस्तत्र शुक्तिशकले पुरोवर्तिनि प्रवृत्तिः *प्रवृत्तिशब्दार्थः*। अनिर्वचनीयता *तदिदंशब्दार्थः*। शुक्तौ रजतार्थिप्रवृत्त्यनुरोधेनोक्तविधया ज्ञानद्वयत्वायोगेनैकज्ञानत्वे वक्तव्ये तस्यान्यथाख्यात्यादिरूपत्वायोग-

पञ्चपादिका

यद्येवम् 'परत्र पूर्वदृष्टावभासः' इत्येतावदस्तु लक्षणम्; तथाविधस्य स्मृतिरूपत्वाव्यभिचारात्, *सत्यम्*; अर्थलभ्यस्य स्मृतित्वमेव स्यात्, न स्मृतिरूपत्वम्। नच स्मृतिविषयस्याध्यासत्वमित्युक्तम्। यद्येवम्, एतावदस्तु लक्षणम्—परत्र स्मृतिरूपावभास इति, तत्र परत्रेत्युक्तेऽर्थलभ्यस्य परावभासस्य स्मृतिरूपत्वं विशेषणम्, न हि परस्यासंयुक्तस्य पूर्वदृष्टत्वाभावे स्मृतिरूपत्वसम्भवः, *सत्यम्*; विस्पष्टार्थं पूर्वदृष्टग्रहणमिति। यथान्यासमेव लक्षणमस्तु। *"तथाच लोकेऽनुभवः"*

पञ्चपादिकाविवरणम्

सत्यं विस्पष्टार्थमिति॥ अस्यायमर्थः*—स्मृतिरूपशब्देन किं संस्कारजन्यत्वम्, पूर्वानुभवसम्भेदो वा, स्मृत्या

ऋजुविवरणम्

संहारो यतः; कारणोपसंहारः पूर्वम्, पश्चात् फलोपसंहार इत्यर्थः। स्मृतिरूपशब्देनैव विस्पष्टं संस्कारजन्यत्वे लब्धे किं "पूर्वदृष्टः"इत्यनेन? इत्याशङ्क्य व्याचष्टे—*अयमर्थ इति* ॥ तत्र लक्षणदूषणं परिहृत्य लक्ष्यस्वरूपं युक्तितः समर्थ-

तत्त्वदीपनम्

रजतमिदानीं नेत्येवं प्रतिषेधः स्यात्, न तु नेदं रजतमिति; नच तथा लक्ष्यत इत्यर्थः। निषेधस्य पुरोवर्तिरूप्यविषयत्वमसिद्धमित्याह—*न लौकिकेति* ॥ परमार्थरजतस्यात्राप्रसक्तत्वान्न निषेध इति न शङ्कापदम्; रूप्याऽऽभासप्रसक्त्या तत्प्रसक्तेरावेदितत्वादित्याशयः ॥

विधिप्रत्ययस्य रूप्याऽऽभासविषयत्वम्, निषेधप्रत्ययस्य परमार्थविषयत्वमिति कल्पनाद् वरं कालभेदेन सत्त्वासत्त्वकल्पनम्, ततश्च विधि-निषेधप्रत्ययोपपत्तिरित्याशङ्क्याह—*निरुपाधिकेति* ॥ चशब्दः शङ्काव्यावृत्त्यर्थः। रजतस्य प्राक्सत्त्वे 'नेदं रजतमि'ति निरुपाधिकनिषेधो न घटते, स चानुभूयते; तस्मान्निरुपाधिकनिषेधबलात् प्रतिपन्नं मिथ्येति निश्चिनुम इत्यर्थः। इतीत्यत्र निश्चिनुम इति शेषः। तत्रैव हेत्वन्तरमाह—*बाधानन्तरमिति* ॥ उपलभ्यमानस्य सत्त्वे मिथ्यात्वपरामर्शो न स्यादित्यर्थः। प्रतीयमानस्य रूप्यस्य पुरोवर्तिनि सत्त्वे तस्य भ्रान्तित्वप्रसिद्धिरपि न स्यादित्याह—*अन्यथेति* ॥ प्रत्यक्ष-परोक्षबाधकप्रत्यययोर्देशान्तरसत्त्वगमकत्वस्य निरस्तत्वात् 'यत्रापी'त्यादेर्वैयर्थ्यमित्याशङ्क्य तात्पर्यमाह—*नायं सर्प इति* ॥ आरोप्यासत्त्वस्य निरस्तत्वात्तदेवोपसंहरणीयमित्याशङ्क्य, तस्य साधिष्ठानभ्रमसाधनप्रसङ्गाऽऽगतत्वादितरस्योपसंहरणं युक्तमित्याह—*तदेवमिति* ॥ *आद्युपसंहार इति* ॥ आदेः प्रधानस्योपसंहार इति यावत्। *"यद्येवमि"त्यादेरयमर्थः*—भ्रमस्य साधिष्ठानत्वनियमादधिष्ठानवाचकं पदमाद्रियताम्, किं 'स्मृतिरूपः' इत्यनेन? इति शङ्कते—*यदीति* ॥ संस्कारजन्यत्वसिद्ध्यर्थं तदर्थवदित्याशङ्क्यार्थसिद्धं तदित्याह—*तथाविधस्येति* ॥ पूर्वदृष्टपदेन संस्कारजन्यत्वं सिद्धमित्येतदङ्गीकरोति—*सत्यमिति* ॥ तर्हीतरस्य वैयर्थ्यम्, नेत्याह—*अर्थेति* ॥ संप्रयोग-दोषजन्यत्वसिद्ध्यर्थं स्मृतिरूपविशेषणमित्यर्थः।

भामती

भ्युपेयमिति भावः। न केवलमियमनृतता परीक्षकाणां सिद्धा, अपितु लौकिकानामपीत्याह—*तथाच

ऋजुप्रकाशिका

स्योक्ततयाऽनिर्वचनीयत्वमभ्युपेतव्यमित्यर्थः। *"तथाच लोकेऽनुभवः" इति* भाष्यमवतारयति—*न केवल-

पञ्चपादिकाविवरणम्

सादृश्यं भ्रान्तेरभिधीयत इति विशये संस्कारजन्यत्वमेवेति स्पष्टीकरणार्थं पूर्वदृष्टस्यावभासो न दर्शनस्येत्युक्त-मिति। पूर्वदृष्टसजातीयस्येत्यर्थः; अनिर्वचनीयरजताभ्युपगमात्। भ्रान्तिश्चेत् सत्यस्य वस्तुनो मिथ्यावस्तु-

ऋजुविवरणम्

नीयम्; न त्वनुभावोपन्यासेन कृत्यमित्याशङ्क्य परिहृतम्—"तथाच लोकेऽनुभवः"इत्यादिनेति। *ननु*—नास्मिन्न-नुभवे स्वाभिमतमिथ्यात्वं स्पष्टम्, तत्कथमनुभवसिद्धत्वेन युक्तेरनादरः क्रियते? इत्याशङ्क्यावतारयति—*भ्रान्तिश्चे-दिति*॥ यद्वा—

व्याप्तं प्रमाणयुक्तिभ्यां लक्षणं लक्ष्यरूपकम्। अविनाभावसंबन्धो लक्ष्य-लक्षणयोरिह॥'

कथं सिद्धेयत्प्रमाणेन विना युक्त्याऽनुकूलया। इत्याह शङ्कां विनिराकरिष्णुर्मानं निरूप्यं स्थितयुक्तियुक्तम्।

व्याप्तौ हि लक्ष्ये कृतलक्षणस्य "तथाच लोके मति"रित्यनेन॥

तत्र किमिति प्रमाणमेवोक्तम्? न तु युक्तिरपीत्याशङ्क्य टीकाकृता व्याख्यातम्—"तथाच लोक इत्यादिना, तदनुपपन्नम्; युक्त्या विना प्रमाणस्यान्यथयितुमप्यशक्यत्वादित्याशङ्क्याह—*भ्रान्तिश्चेदिति*॥ तत्र "लोक-सिद्धमि"त्यनुपपन्नम्; नहि लोको नाम किञ्चन प्रमाणमित्याशङ्क्य व्याचष्टे—*लोकानुभवसिद्धत्वादिति*॥

तत्त्वदीपनम्

स्मृतिः किं न स्यात्? इत्याशङ्क्याह—*नचेति*॥ पूर्वदृष्टपदवैयर्थ्यं शङ्कते—*यद्येवमिति*॥ एतावत्युक्ते साकाङ्क्षत्वेनाऽऽनर्थक्यम्, तत्राह—*तच्च परत्रेति*॥ पूर्वदृष्टत्वमन्तरेण स्मृतिरूपत्वमनुपपन्नमित्याशङ्क्यार्थ-सिद्धत्वान्न तदुपादेयमित्याह—*न हीति*॥

पूर्वदृष्टस्यार्थसिद्धत्वेऽपि स्पष्टीकरणार्थं पूर्वदृष्टपदमित्युक्तम्, तत्र स्पष्टीकरणस्यान्यतः सिद्धत्वाद् वैयर्थ्यं तदवस्थमित्याशङ्क्याह—*सत्यमिति*॥ प्रसिद्धस्मृतौ संस्कारजन्यत्वस्य पूर्वानुभवसंभिन्नविषयत्वस्य च सद्भावात् तयोर्भ्रान्ते कीदृशं सादृश्यं स्मृतिरूपशब्देन विवक्षितम्? इति न ज्ञायत इति पूर्वदृष्टग्रहणमित्यर्थः। तेन वा कथं संशय-व्यावृत्तिः? इत्याशङ्क्याह—*पूर्वदृष्टस्येति*॥ अपूर्वरूप्योत्पत्तेः कथं पूर्वदृष्टस्यावभासनम्? इत्याशङ्क्याह—*पूर्वेति*॥ तत्र हेतुमाह—*अनिर्वचनीयेति*॥ लक्षणवर्णनानन्तरं संभवाद्युच्यताम्, किमनुभवोपन्यासेन? इत्या-शङ्क्योक्तम्—*तथाचेत्यादि*॥ तत्र काऽसौ युक्तिः? तत्राह—*भ्रान्तिश्चेदिति*॥ "शुक्लो गौरि"त्यादिप्रत्ययानां भ्रान्तित्वप्रसङ्गोऽतिप्रसङ्गशब्दार्थः॥

वार्तिकम्

भ्रमे भासमानवैशिष्ट्यप्रतियोगिनो मिथ्यात्वात्। यद्वा—अन्यधर्मः=इदं रजतमित्यवभासो यत्र शुक्तिकादौ स तथा। यद्वा—अन्यधर्मोऽवभास आभासोऽनिर्वचनीयो यत्र सोऽन्यधर्मावभासः, तस्य भावोऽन्य-धर्मावभासता, तामिति विग्रहो द्रष्टव्यः। अस्मत्पक्षे तु सर्व एव विग्रहाः सङ्गच्छन्ते। तदिदमाह—"*सर्वथा*" इति। वाद्युक्तसर्वप्रकारयुक्तोऽप्यध्यासः*॥ *अन्यस्य=शुक्तिकादेः, अन्यधर्मावभासतां न व्यभिचरतीति। तैरपि स्वकीय-स्वकीयनिरुक्तिमार्गेण तस्य तथात्वाङ्गीकारात् तावतैवास्मदभिमता-ध्याससिद्धिरिति भावः। कथम्? इत्थम्; यदैवान्यथाख्यातिवादिना शुक्ते रजतात्मनाऽवभासोऽङ्गी-कृतः, शून्य-विज्ञानवादिभ्यां वाऽसद्विज्ञानयोः सद्बहिरात्मनाऽवभासः, तदैव तन्मतेनाप्यस्मदभिमता-

तथाच लोकेऽनुभवः---'शुक्तिका हि रजतवद्वभासते', 'एकश्चन्द्रः सद्वितीयवदि'ति।

भामती

लोकेऽनुभवः—शुक्तिका हि रजतवदवभासत इति* ॥ न पुना रजतमिदमिति शेषः । स्यादेतत्—

ऋजुप्रकाशिका

मिति* ॥ तत्रापेक्षितं पूरयति—*न पुनरिति* । भ्रमस्थले रजतं न रजतवद् भासते, किंतु शुक्तिरेव

पञ्चपादिका

इत्युदाहरणद्वयेन लौकिकसिद्धमेवेदमध्यासस्य स्वरूपं लक्षितम्, किमत्र युक्त्या? इति कथयति—*शुक्तिका हि रजतवदवभासत इति* ॥

पञ्चपादिकाविवरणम्

सम्भेदावभासः; अन्यथाऽतिप्रसङ्गादित्याद्या या युक्तिरभिहिता; लोकानुभवसिद्धत्वादध्यासस्य। तथापि युक्त्या न प्रयोजनमित्याह—*तथाच लोकेऽनुभव इत्यादिना* ॥

ऋजुविवरणम्

ननु—युक्तावुक्तायां कस्मादेवं टीकाकृता व्याख्यातम्? इत्याशङ्क्याभिप्रायमाह—*तथापि युक्त्येति* ॥ अतिशये-

भाष्यभावप्रकाशिका

न व्यभिचरति, इति युक्तमुक्तलक्षणाध्यासस्य सर्वतन्त्रसिद्धान्तत्वम्। नच तस्य सत्त्वम्; बाधात्, अन्यत्र रजतादिसत्त्वस्याऽभातत्वात्, नच तदसत्त्वम्; अपरोक्षत्वात्, नापि विरोधादेकस्य सदसत्त्वम्। अतोऽनिर्वाच्यतेति भावः। न केवलं वादिनामेवायमध्यासः संमतः, अपि तु लौकिकानामपीत्याह—*तथाचेति* ॥ नयनोपहितेदमंशे रजतादिसंस्कारसहिताविद्यया रजताद्यध्यासवत्

वार्तिकम्

निर्वचनीयख्यातिः सिद्धैव। कुतः? देशान्तरस्थस्य पुरोवर्त्यात्मनाऽपरोक्षत्वेन भासनासंभवस्य पूर्वमेवोपपादितत्वात्, शून्यवादिनोऽप्यसतः सदात्मनाऽपरोक्षतयाऽवभासस्य निरस्तत्वात्, अनिरासे वाऽसतः सदात्मकत्वस्य पारमार्थिकस्यानङ्गीकाराद् असंभवाच्च तदनिर्वाच्यत्वाध्रौव्यात्, तस्याप्यसत्त्वाङ्गीकारे वाऽसद्वादिनस्तत्पारमार्थिकत्वापत्तेर्बाधानुपपत्तेः, विज्ञानवादिनो बहिष्ठ्वस्यासत्त्वेऽपरोक्षप्रथानुपपत्तेः, सत्त्वे च बाधानुपपत्तेरित्युक्तत्वादिति। यस्त्वख्यातिवादी प्रवृत्तेरेवान्यथाप्रकारत्वं मन्यते, तेनापि तदन्यथानुपपत्त्याऽवश्यं ज्ञानेऽप्यन्यथाप्रकारत्वमङ्गीकर्तव्यम्; प्रवृत्तेः समानप्रकारकज्ञानपूर्वकत्वनियमात्, अन्यथा प्रवृत्तिविशेष्य इष्टसाधनतावच्छेदकधर्माग्रहात्तत्त्वेनेष्टसाधनतामनुमाय तत्र प्रवृत्तिर्न स्यात्, अतस्तादृशमानसज्ञानस्य प्रवृत्तिसिद्ध्यर्थं तेनाप्यङ्गीकारादिति। तदिदमभिप्रेत्योक्तम्—*"सर्वथाऽपि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरति"—इति*। न केवलं वादिनामेवास्मिन्नर्थे संप्रतिपत्तिः, किन्तु लोकानुभवसिद्धोऽप्ययमर्थ इत्याह—*तथाच लोकेऽनुभव इति* ॥ अपेरर्थे चकारो भिन्नक्रमः। यद्वा वादिष्व वादिमतेऽपि स्थित्वा

प्रदीपः

विद्यमानस्य तत्र भानमनिर्वचनीयख्यातिं विना नोपपद्यत इत्यनिर्वचनीयख्यातिवाद एव पर्यवसाने वक्तव्यमिति निगूढो भावः। आरोप्यानिर्वचनीयत्वं चेदं न केवलयुक्तिसाध्यम्, किन्तु लोकानुभवसिद्धमपीत्याह—*तथाच लोकेऽनुभव

भामती

अन्यस्यान्यात्मताविभ्रमो लोकसिद्धः, एकस्य त्वभिन्नस्य भेदभ्रमो न दृष्ट इति कुतश्चिदात्मनोऽभिन्नानां जीवानां भेदविभ्रमः ? इत्यत आह—एकश्चन्द्रः सद्वितीयवदिति। पुनरपि चिदात्मन्यध्यासमाक्षि-

ऋजुप्रकाशिका

रजतवद् भासते लोकसाधारण्येनेति। तत्र भासमानरजतस्य तत्र सत्त्वेऽसत्त्वे ज्ञानाकारत्वे देशान्तरस्थत्वे च बाधकस्य साधकाभावस्य चोक्ततयाऽनिर्वचनीयमेव तद्रजतम्, इति तदनिर्वचनीयता लौकिकानामपि सिद्धेत्यर्थः। *ननु* 'शुक्तिका रजतवदवभासते' इत्यनेनैव प्रकृतार्थसिद्धौ *"एकश्चन्द्रः सद्वितीयवदि"ति* भाष्यं व्यर्थमित्याशङ्क्य,तद् भाष्यं प्रकृतोपयुक्तत्वेनावतारयितुं शङ्कामवतारयति—*स्यादेतदिति* ॥ *न दृष्टः = न लोकदृष्टः। *अभिन्नानामिति* ॥ वस्तुत इति शेषः। अभिन्नेऽपि भेदभ्रमो लोकदृष्ट इत्याह—*अत आहेति ॥ पूर्वप्रकृतोऽध्यासाक्षेपो निरस्त एव, इदानीं भङ्ग्यन्तरेणाप्यध्यास आक्षिप्यत इत्याह—*पुनरपीति ॥

वार्तिकम्

"सर्वथाऽपि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरती"ति, लोकेऽपि तथाऽनुभवो भवति—'शुक्ताविदं रजतमि'ति, 'एकस्मिंश्चन्द्रे च द्वौ चन्द्रावित्यर्थः। तत्र—'इदं रजतमि'त्यादिलोकानुभवस्यान्यस्यान्यधर्मावभासरूपतां साधयति—*शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति—इति* ॥ इतिशब्दो लक्षणभाष्यपरिसमाप्तौ। हि=यस्मात्पुरोवर्तिनी शुक्तिका रजतवदवभासते, यथा सत्यरजतम्—'इदं रजतमि'त्यवभासते, तथेयमपीदं रजतमित्येवमाकारेणावभासत इत्यर्थः। तथा 'एकश्चन्द्रः स द्वितीयवत्'; यथा समानजात्या सद्वितीयो घटादिपदार्थोऽवभासते—'द्वौ घटावि'ति, तथाऽयं तद्धीनोऽपि परमार्थतो 'द्वौ चन्द्रावि'त्यवभासत इत्यर्थः। यस्मादेवमवभासते, तस्मात्सिद्धमुक्तलोकानुभवस्यान्यस्यान्यधर्मावभासरूपत्वमित्यर्थः। निरुपाधिकभ्रमोपलक्षणार्थं प्रथमोदाहरणम्, द्वितीयन्तु सोपाधिकभ्रमोपलक्षणार्थमिति मन्तव्यम्। तेन शुक्तौ रजतवद् रज्ज्वां भुजङ्गादिवच्चात्मन्यहङ्कारादेराकाशादेश्च निरुपाधिकोऽध्यासः सिद्धो भवति, तद्धर्माणां च कामादीनां भेदस्य च स्फटिकलौहित्यवद् द्विचन्द्रवच्चौपाधिकोऽध्यास इति। यद्यप्यहङ्काराद्यध्यासेऽप्यस्त्यज्ञानमुपाधिः ; तथापि तस्य सोपाधिक-निरुपाधिकभ्रममात्र उपादानत्वेनान्वयात्, अधिष्ठानकोटौ प्रवेशाच्च, नोपाधित्वव्यवहारो भवति ॥

ननु एवं सत्यात्मनि कामाद्यारोपेऽप्यहङ्कारादेर्नोपाधित्वं स्यात्, तदुपादानत्वादधिष्ठानकोटौ प्रवेशाच्चेति—चेत् ; *न* ; असिद्धेः, यथाहि स्फटिकलौहित्यस्य न जपोपादानम्, नवाऽधिष्ठानम्, किन्त्वज्ञानमुपादानम्, स्फटिकोऽधिष्ठानम्, तद्वत्कामादिविशिष्टाहङ्काराद्युपाधिसम्बन्धादात्मनि प्रतीयमानस्य कामादेरविद्यैवोपादानम्, तद्विशिष्ट आत्मा चाधिष्ठानमित्यहङ्कारादेस्तदधिष्ठानत्वाद्यसिद्धिः। नच—एवं विविक्ततया युगपद् जपा-स्फटिकयोर्लौहित्यद्वयोपलम्भवदहङ्कारात्मनोर्युगपत्कामद्वयं विविक्ततयोपलभ्येतेति—वाच्यम् ; अत्र धर्मिणोः परस्पराध्यासेन तद्धर्मयोरपि परस्पराध्यासाद्विवेकेन तदुपलम्भानुपपत्तेः। नच—धर्मिणोरन्योन्यतादात्म्याध्यासादेव तद्धर्मयोः परस्परविनिमयोपपत्तेः पृथक् तदध्यासकल्पनं न युक्त-

प्रदीपः

इति* ॥ *तथाच=आरोप्यमिथ्यात्वावगाहे च। *लेके = आबालगोपालमित्यर्थः। अनुभवमाकारतो निर्दिशति—*शुक्तिका हि रजतवदवभासत इति* ॥ अत्र रजतवदिति वच्छब्देन वस्तुगत्या न रजतमत्रेति बोधनाद् रजतानिर्वचनीयत्वमनुभूयत इति भावः। जीवानां वस्तुगत्याऽभिन्नानां भेदभ्रमोऽपि नानुपपन्न इति दृष्टान्तनिर्देशेन सूचयति—*एकश्चन्द्र इति* ॥

पञ्चपादिका

ननु न शुक्तिका प्रतिभासते, रजतमेव प्रतिभासते, तेन शुक्तिकेति, रजतवदिति चोभयं नोपपद्यते, *उच्यते* ; शुक्तिकाग्रहणमुपरितनसम्यग्ज्ञानसिद्धं परमार्थतः शुक्तिकात्वमपेक्ष्य, वतिग्रहणं तु संप्रयुक्तस्यारजतस्वरूपस्य मिथ्यारजतसम्भेद इवावभासनमङ्गीकृत्य। मिथ्यात्वमपि रजतस्याऽऽ-

पञ्चपादिकाविवरणम्

ननु 'शुक्तिका' 'रजतवदिति' च वचनं न भ्रान्त्यपेक्षयोपपद्यते ; इदं रजतमित्येवावभासनात्। नच बाधापेक्षा, तत्र वत्करणाभावादिति चोदयति—*ननु न शुक्तिकेति* ॥ बाधकज्ञानापेक्षया शुक्तिका रजतमवभासत इति लक्षणप्रदर्शनम्, बाधकज्ञानविषयतया वा तत्सामर्थ्येन वा सिद्धस्याध्यासस्य मिथ्यात्वस्य लक्ष्यस्य वच्छब्देनाभिधानमिति लक्ष्य-लक्षणसङ्गतिरनेन वाक्येन तत्र प्रदर्श्यत इत्याह—*उच्यते शुक्तिकाग्रहणमिति* ॥ *ननु* मिथ्या रजतमिति विशेषणादन्यत्र सत्यरजतं वक्तव्यमिति, नेत्याह—*मिथ्यात्वमपि

ऋजुविवरणम्

नोक्तमित्यर्थः* ॥ "ननु न शुक्तिके"त्यादिना शुक्तिकाग्रहणाभावाद्रजतस्यैव ग्रहणादिति भाष्यमाक्षिप्तम्, तन्मन्दम् ; शुक्तिकाया रजतात्मतायाश्च ग्रहणदर्शनात्, किमाक्षिप्यते ? इत्याशङ्क्याभिप्रायमाह—*ननु शुक्तिका रजतवदिति* ॥ अतो लक्ष्य-लक्षणयोरविनाभावे न किंचन प्रमाणमिति भाष्यमनुपपन्नमिति भावः। एवं लक्ष्य-लक्षणसंबन्धकथनपरं भाष्यं निर्मूलत्वेनाऽऽक्षिप्य, "शुक्तिकाग्रहणमि"त्यादिना शुक्तिकाग्रहणमुपपादितम्, तथा "संभेद इवावभासमङ्गीकृत्ये"त्युक्तम्, न त्ववभासानुपपत्तिः परिहृता। यच्च भाष्ये लक्ष्य-लक्षणसम्बन्धप्रदर्शनमपि न संभवति ; निर्मूलत्वादित्युक्तम्, तदपि न परिहृतम् ; अतोऽनुपपन्नः परिहार इत्याशङ्क्याभिप्रायमाह—*बाधकज्ञानापेक्षयेति* ॥ *ननु*—कथं बाधकज्ञानविषयत्वं मिथ्यात्वस्योच्यते ? ज्ञानबाध्यत्वरूपत्वान्मिथ्यात्वस्य, न तु ज्ञानसाध्यो बाधस्तस्यैव ज्ञानस्य विषयो भवति ; पूर्वसिद्धविषयापेक्षत्वाद् ज्ञानस्येत्याशङ्क्याह—*तत्सामर्थ्येन वेति* ॥ तर्हि विशेषणवैयर्थ्यमित्याशङ्क्याभिप्रायमाह—*स्वरूपपरमिति* ॥ अयोगव्यावृत्त्यर्थ-

तत्त्वदीपनम्

शुक्तिका रजतवदिति च प्रतिभासमानत्वान्न प्रतिभासत इति कथम् ? इत्याशङ्क्य, शुक्तिका रजतवदिति भ्रान्तिमधिकृत्योच्यते ? उताभ्रान्तिमिति विकल्प्य, क्रमेण दूषयति—*ननु शुक्तिकेत्यादिना* ॥ उत्तरपक्षाङ्गीकारेण समाधत्ते—*बाधकेति* ॥ वतिग्रहणवैयर्थ्यं परिहरति—*बाधकज्ञानविषयेति* ॥ नेदं रजतमिति ज्ञानं बाधकज्ञानशब्दार्थः। *तत्सामर्थ्येन = अधिष्ठानज्ञानानुपपत्त्येत्यर्थः। अध्यस्यत इत्यध्यास आरोप्यः। "मिथ्यारजतसंभेदः" इत्यत्र मिथ्येति विशेषणं नोपपद्यते ; व्यावर्त्यसत्यरूप्याभावात् त्वन्मत इत्याशङ्कते—*ननु मिथ्येति* ॥ विशेषणमन्यथाऽपि घटत इत्याह—*नेत्याहेति* ॥ "नीलमुत्पलमि"त्यादौ व्यावर्त्यरक्तोत्पलसद्भावे 'नीलमि'ति विशेषणमर्थवद्

वार्तिकम्

मिति—वाच्यम् ; अध्यासमन्तरेण तद्विनिमयासिद्धेः। न ह्यध्यासमन्तरेणान्यधर्मोऽन्यदीयतया प्रतीयमानो युक्तः ; अतिप्रसङ्गात्। नच धर्म्यध्यासेनातिप्रसङ्गवारणम् ; शुक्ति-रजतयोः परस्पराध्यासात्, शुक्तौ रजतत्ववद् रजते शुक्तित्वस्य प्रतीतिप्रसङ्गात्, तद्धर्मिणः शुक्तेस्तत्राध्यस्तत्वात्। नच—एवमपि शुक्तौ रजतत्ववत् कामादेरप्यात्मनि संसर्गत एवाध्यासोऽस्तु, न स्वरूपत इति—वाच्यम् ; तथात्वेऽपि स्वरूपाध्यासस्यावश्यकत्वात्, भ्रमे भासमानवैशिष्ट्यप्रतियोगिनो मिथ्यात्वस्योक्तत्वात्। नचैवं रजतत्वस्यापि शुक्तौ स्वरूपतो मिथ्यात्वप्रसङ्गः ; इष्टापत्तेः ॥

पञ्चपादिका

गन्तुकदोषनिमित्तत्वादनन्तरबाधदर्शनाच्च कथ्यते, न पुनः परमार्थाभिमताद्रजतादन्यत्वमाश्रित्य। तत्रासंप्रयुक्तत्वाद्रजतस्य नेदन्तावभासस्तद्गतः, किन्तु संप्रयुक्तगत एव। अपरोक्षावभासस्तु संस्कारजन्मनोऽपि रजतोल्लेखस्य दोषबलादिन्द्रियजज्ञानान्तर्भावाच्चेति द्रष्टव्यम्। तत्र शुक्तिकोदाहरणेन संप्रयुक्तस्या-

पञ्चपादिकाविवरणम्

रजतस्येति* ॥ स्वरूपपरं विशेषणं नान्यव्यावृत्तिपरमित्यर्थः। *ननु* रजतस्य मिथ्यात्वे तद्धर्मत्वादिदन्ताया अपि मिथ्यात्वात् सर्वमिथ्यात्वेन निरधिष्ठानताप्रसङ्ग इति, नेत्याह—*तत्रासंप्रयुक्तत्वादिति* ॥ कथं तस्यासम्प्रयुक्तस्य रजतस्य परोक्षतेति, तत्राह—*अपरोक्षावभासस्त्विति* ॥

उदाहरणद्वयस्य तात्पर्यमाह—*तत्र शुक्तिकोदाहरणेनेत्यादिना* ॥ *अस्मदर्थे = अहमिति प्रतिभास

ऋजुविवरणम्

मित्यर्थः। "तत्रासंप्रयुक्तत्वादि"त्यनेनेदन्ताया रजतगतत्वं निराक्रियते, तदप्रयोजनमित्याशङ्क्य, शङ्काधिक्यं दर्शयति—*ननु रजतस्येति* ॥ *ननु* अस्य भाष्यस्य तात्पर्यमक्षरार्थश्च दर्शितः, अतः पूर्वव्याख्यानेन पौनरुक्त्यमित्याशङ्क्य परिहरति—*उदाहरणद्वयस्येति* ॥ उदाहरणद्वयोपादाने प्रयोजनमुच्यत इति भावः। अस्मच्छब्देन चैतन्ये विवक्षितेऽस्मदर्थेऽनिदमंशस्येत्यनुपपन्नम्; तस्येदंमात्रविषयत्वात्, अनिदमंशाभावात्, अन्तःकरणे चाऽस्मदर्थे तस्य योऽर्थः, तस्मिन्ननिदमंशस्येत्यनुपपन्नम्; तस्य चैतन्यैकविषयत्वादनिदंशब्दवैयर्थ्यादित्याशङ्क्य व्याचष्टे—*अहमिति प्रतिभास इति* ॥ 'तदवभास्यत्वेन युष्मदर्थलक्षणापन्ने'ति व्यर्थम्; स्वतो युष्मदर्थत्वात्, प्रतिभासाभावे तल्लक्षणापत्तेश्चायुक्तत्वात्, अयुष्मदर्थत्वप्रसङ्गात्। नच 'लक्षणापन्ने'ति प्रतिभासव्यवच्छेदः; "तदवभास्यत्वेने"ति प्रतिभास्यत्वकीर्तनविरोधादित्याशङ्क्याह—*प्रतिभासत इति* ॥ "ननु बहिरर्थ" इत्यादिनाऽनन्यप्रकाश्यत्वेनात्म-

तत्त्वदीपनम्

दृष्टमित्याशङ्क्य 'गन्धवती पृथिवी'त्यादौ स्वरूपपरत्वेनाऽपि विशेषणोपादानान्नैतदित्याह—*स्वरूपेति* ॥ इदन्तायाः परमार्थत्वात्तद्धर्मि रजतमपि सदित्याऽऽशयेनाह—*ननु रजतस्येति* ॥ इदमस्तद्धर्मत्वमसिद्धमित्याह—*नेत्याहेति* ॥ अपरोक्षत्वानुपपत्त्या रजतस्य संप्रयुक्तत्वमेष्टव्यमिति शङ्कते—*कथमिति* ॥ तदन्यथाऽपि घटत इत्याह—*अत आहेति* ॥ *दोषबलादित्यादेरयमर्थः*—

संस्कारपरिप्रापितपारोक्ष्यप्रतिबन्धकमाह—*दोषबलादिति* ॥ आपरोक्ष्यसंपादकमाह—*इन्द्रियेति* ॥ इन्द्रियसंप्रयोगे जनितं यदधिष्ठानज्ञानं तस्मिन्नन्तर्यत्प्रतिबिम्बितचैतन्यं तस्मिन्नध्यासादपरोक्षतेति। तत्र 'शुक्तिकोदाहरणे-ने'त्यनेन "तथाचे"त्यादिभाष्याक्षरार्थो व्याख्यायते? उत तात्पर्यार्थः? नाद्यः; अनुपलम्भात्, न द्वितीयः; तात्पर्यस्येरितत्वादित्याशङ्क्यैकेनैवोदाहरणेन लक्ष्य-लक्षणसंगतिसिद्धेः किमुदाहरणान्तरेण? इति शङ्कायां तस्यार्थवत्त्वं दर्शयितुमुत्तरो ग्रन्थ इत्याह—*उदाहरणेति* ॥ निरुपाधिकाध्यासस्योदाहरणमाद्यम्, द्वितीयं सोपाधिकस्येति विभागः ॥

'अस्मदर्थे' इत्यत्रास्मच्छब्देन किं चैतन्यं विवक्षितम्? उतान्तःकरणम्? आद्ये तद्विषये घटादावनिदमंशाभावाद'निमंशस्ये'त्यनुपपन्नम्, द्वितीयेऽपि तद्विषयेऽनात्मन्यनिदमंशाभावादनुपपत्तिरित्याशङ्क्याह—*अस्मदर्थ इति* ॥ प्रतिभासत इति प्रतिभासस्तस्मिन्। *एतदुक्तं भवति*—अस्मच्छब्दस्य योऽर्थोऽहंकार इदमनिदमात्मकस्तस्मिन्। गुर्वभिमताऽऽत्मानं व्यावर्तयति—*चैतन्यस्येति* ॥ हेतुसम्बन्धेन परिणामित्वशङ्कां व्यावर्तयति—*निरञ्जनस्येति* ॥

अहंकारस्यानिदमात्मना प्रतीयमानत्वाद'निदमंशस्यानात्मे'त्युक्तमित्याशङ्क्य, युष्मदर्थलक्षणाक्रान्तत्वान्नानिदमंशोऽहंकार इत्युक्तम्, तदनुपपन्नम्; इदन्तया प्रतिभासाभावे तल्लक्षणापत्तेरयुक्तत्वादित्याशङ्क्याह—*प्रतिभासत इति* ॥ यथा चन्द्रादेरुष्णस्पर्शप्रतिभासाभावेऽपि तेजस्त्वाधिकरणतया तद्वत्त्वमाश्रितम्, तथाऽत्रापीत्यर्थः ॥

पञ्चपादिका

नात्मा रजतमिति * दर्शितम्। निरञ्जनस्य चैतन्यस्यासदर्थेऽनिदमंशस्यानात्मा तदवभास्यत्वेन युष्मदर्थलक्षणापन्नोहंकारोऽध्यस्त इति प्रदर्शनार्थं द्विचन्द्रोदाहरणेन जीवेश्वरयोर्जीवानां चानात्मरूपो भेदावभास इति दर्शितम्।

पञ्चपादिकाविवरणम्

इत्यर्थः। प्रतिभासतो युष्मदर्थत्वत्वाभावेऽपि चिदवभास्यत्वं नाम युष्मदर्थलक्षणमस्तीत्याह—*तदवभास्यत्वेति*॥ अद्वितीयचैतन्यप्रकाशात्मनि द्रष्टर्यहङ्कारादिसङ्घातस्याध्यस्तत्वादध्यस्यमानव्यतिरिक्तमधिष्ठानमध्या-

ऋजुविवरणम्

न्यनवभासो न संभवतीत्युक्तम्, तदप्रस्तुतम्; न ह्यनेन सिद्धान्तवादिनः किंचिद्विरुद्धमभिहितम्। अथ शुक्तिकोदाहरणस्यात्मन्यध्यस्तस्याहंकारादेरनात्मत्वसिद्धिप्रयोजनत्व उक्ते तदध्यस्तत्वमाक्षिप्यत इत्युच्यते, तदसम्बद्धम्; उत्तरत्र भाष्य एव साध्यमानत्वात्; असंगतत्वप्रसङ्गाच्च। अथ प्रकृतलक्षणस्यात्रासंभव उच्यते, मैवम्; आत्मन्यनवभासाभावमात्रेण लक्षणाभावस्यासिद्धेरित्याशङ्क्य ग्रन्थसन्दर्भस्य तात्पर्यमाह—*अद्वितीयचैतन्येति*॥ *ननु*—रजताध्यासवदेवात्राप्यवच्छिन्नचैतन्यस्याधिष्ठानत्वम्, अन्तःकरणादेरेव कारणत्वम्, तद्गतदोषोऽपि, अतः कथमसंभव इत्याशङ्क्याह—*द्रष्टर्यहंकारादीति*॥ अहंकाराद्यतिरिक्तमेव कारणं वक्तव्यम्; तस्याध्यस्यमानकोटित्वादित्यर्थः। *ननु*—अहंकारादेरध्यस्तत्वेऽपि कथमसंभवः? लक्षणस्यात्मन्येव सम्पादयितुं शक्यत्वात्, तथोत्तरत्राऽऽत्मन्येव सर्वं वक्तव्यमित्युच्यते, तदपि कथम्? इत्याशङ्क्यात्मन्यसंभवसिद्ध्यर्थं तत्रैव वक्तव्यत्वसिद्ध्यर्थं चाधिष्ठानस्वरूपं निरूपयति—*अद्वितीयेत्यादिना*॥ तत्र 'द्रष्टरी'त्यहंकारादिसाक्षिनिर्देशस्तत्रैवाध्यस्तत्वसिद्ध्यर्थम्। सर्वस्य तत्राध्यस्तत्वे तत्रैव सर्वं कारणं वक्तव्यमिति सिद्ध्यतीति। तत्र द्रष्टुरपि कारणापेक्षसिद्धत्वं वदन्ति; तथा सति कारणदोषादिसंभवः स्यात्, तदर्थमाह—*प्रकाशात्मनीति*॥ प्रदीपादौ प्रकाशरूपेऽप्यन्यापेक्षसिद्धत्वं दृष्टम्, तदर्थमाह—*चैतन्यप्रकाशेति*॥ 'चैतन्यात्मनी'त्येवोक्ते चैतन्यरूपोऽप्यनुमेयात्मेत्याहुः सांख्याः; तद्वच्चैतन्यरूपत्वेऽप्यनवभासादिसंभवः स्यात्, अतश्चोभयं विवक्षितम्—*चैतन्यप्रकाशात्मनीति*॥ चैतन्यप्रकाशरूपेऽप्याकारान्तरे सति तदनवभासः शङ्क्येत, तदर्थमाह—*अद्वितीयेति*॥ 'अद्वितीये'त्यनेनाधिष्ठाने द्व्याकारत्वाभाव उक्तः। "चैतन्यप्रकाशात्मनी"त्यनेन कारणापेक्षसिद्धित्वं निरस्तम्। तदभावः=कारणदोषाभावः। "अद्वितीयप्रकाशात्मनी"ति विशेषानवभास उक्तः। अधिष्ठान-

तत्वदीपनम्

अध्यासलक्षणेऽतिव्याप्त्यादिविधुरतया निरवद्ये सिद्धे "कथं पुनरित्या"दि व्याख्यायताम्, किं "नन्वि"त्यादिना ग्रन्थेन? नच—अत्र लक्षणेऽव्याप्तिराशङ्क्य निरस्यत इत्यपि—वाच्यम्; "तदिह निद्रादी"त्यत्र कारणत्रितयजन्यतालक्षणस्योपलक्षणस्य परत्र परावभासलक्षणस्वरूपलक्षणस्य च तत्र भावाभिधानादित्यसंगतोऽयं ग्रन्थ इत्याशङ्क्योभयविधलक्षणाव्याप्तेराशङ्क्यमानत्वान्नात्रासङ्गतिरिति टीकाऽऽशयमाविष्करोति—*अद्वितीयेति*॥ आत्मन्यनात्माध्यासे कारणत्रितयजन्यस्य ज्ञानस्य परत्रेत्यस्य चाऽसंभवान्नाध्यासलक्षणमात्मनि संभवतीति सम्बन्धः। उपलक्षणाऽभावे हेतुमाह—*तदभावादिति*॥ कारणत्रितयान्तःपातिनो दोषस्याभावादित्यर्थः। दोषाभावं दर्शयितुं तदाश्रयाधिष्ठानादेरात्मव्यतिरेकेणासत्त्वमाह—*अध्यस्यमानेति*॥ अध्यस्यमानव्यतिरिक्ताधिष्ठानादेरात्मनः पृथक्त्वाभावे हेतुमाह—*द्रष्टरीति*॥ अध्यस्तत्वमुपपादयति—*अद्वितीयेति*॥ आत्मनोऽद्वितीयत्वादिरूपत्वात्तद्विपरीतमध्यस्तमित्यर्थः। *अथवा*—स्वरूपलक्षणाभावं दर्शयितुं द्रष्टारं विशिनष्टि—*अद्वितीयेति*॥ अधिष्ठानं द्व्याकारं दृष्टम्, तादृक्त्वमात्मनो नेत्यादिविशेषणार्थः। विशेषाग्रहणं सामान्यग्रहणं चाधिष्ठानत्वप्रयोजकम्, तच्चात्र नेत्याह—*चैतन्येति*॥ चिद्रूपोऽप्यात्माऽन्याधीनप्रकाश इति चेत्, तत्राह—*प्रकाशात्मनीति*॥

पञ्चपादिका

ननु बहिरर्थे कारणदोषोऽर्थगतः सादृश्यादिरिन्द्रियगतश्च तिमिरादिरुपलभ्यते, तन्निमित्तश्चार्थस्य सांशत्वादंशान्तरावग्रहेऽप्यंशान्तरप्रतिबन्धो युज्येतः, न त्विह कारणान्तरायत्ता सिद्धिः, येन तद्दोषादनवभासोऽपि स्यात्, निरंशस्य चैतन्यस्य स्वयंज्योतिषस्तदयोगात्। *ननु* ब्रह्मस्वरूप-

पञ्चपादिकाविवरणम्

साधिष्ठानयाथात्म्यविषयप्रमाणज्ञानं द्रष्टा चेति त्रितयमात्मेति वक्तव्यम्; ततश्चाधिष्ठानगतो दोषः, द्रष्टुर्दोषः, प्रमाकरणदोषो वा सर्वे दोषजातमात्मन्येवेति वक्तव्यम्; तदभावाच्चैतन्यस्याध्यासविषयज्ञानस्याजन्यत्वात्कारणत्रितयजन्यविज्ञानस्यात्मन्यनात्माध्यासेऽसम्भवाद् अगृहीतविशेषस्य सामान्यग्रहणस्याधिष्ठानत्वनिमित्तस्यात्मन्यसम्भवात् 'परत्रे'त्ययोगाच्च नाध्यासलक्षणं बहिरुक्तमप्यात्मनि सम्भवतीति चोदयति—*ननु बहिरर्थ इत्यादिनोच्यइप्यतः प्राक्तनेन ग्रन्थेन* ॥ *ननु* इहापि बहिरर्थवदगृहीतविशेषत्वमर्थत्वसामान्यादनुमीयतामिति, नेत्याह—*नत्विह कारणान्तरायत्तेति* ॥ *ननु* स्वभावावभासेऽपि संवेदनवदगृहीतविशेषांशोऽपि स्यादिति, नेत्याह—*निरंशस्येति* ॥ मध्यमपरिमाणनिराकरणादणुरनन्तो वाऽऽत्मा निरंश इति ॥

ऋजुविवरणम्

द्रष्टृदोषाभावश्चानेनैव। तथाऽऽनुलोम्येनापि। तत्र "द्रष्टरी"त्युक्ते तस्य रूपान्तरानवभासः शङ्क्येत, तदर्थमाह—*अद्वितीयेति*॥ एवमप्यजडत्वेनावभासादि भवेत, तदर्थम्—"चैतन्ये"ति॥ तस्याप्यविद्याविरोधित्वं दर्शयितुमाह—*प्रकाशात्मनीति*॥ *अथवा*—चैतन्यरूपस्यापि सांख्यवदनवभासः स्यात, तदर्थमाह—*प्रकाशात्मनीति*॥ "अहंकारादिसंघातस्ये"त्यनेनात्मन्येव रूपत्रयं च वक्तव्यमित्युक्तम्, इतरत्रापि यथासंभवं हेतुत्वमूह्यम्, विस्तरभयान्नोक्तम्। अत्र विशेषणोपयोगसंग्रहः—

दोषाद्यभावादवभासभावाद्विशेषरूपस्य तदात्मकत्वात्।
नाध्यासचिह्नं बहिरुक्तमत्र संजाघटीतीति निरूपणीयम्॥

तत्र "बहिरर्थे"इत्येव प्रतीकग्रहणे तस्यैवैतावानभिप्राय इत्याशङ्क्येत, तथा सत्यनुपपन्नत्वमुत्तरग्रन्थवैयर्थ्यं च स्यात्, तदर्थमाह—*उच्यत इत्यत इति*॥ "नन्विहे"त्यनेनान्याधीनसिद्धिर्निरस्ता, नैतावतैवावभाससिद्धिरित्या-

तत्त्वदीपनम्

अस्त्वधिष्ठानादेरात्ममात्रत्वम्, ततः किम्? इत्यत आह—*ततश्चेति*॥ अधिष्ठानदोषः सादृश्यादिः, प्रमातृदोषो रागादिः, करणदोषः काचादिः। नच तद्दोषजातमात्मनि संपादयितुं शक्यम्; तदेकरस्यश्रुतिविरोधादित्यर्थः। जन्यत्वमप्यसंभवीत्याह—*चैतन्येति*॥ अध्यासश्च विषयश्चेत्यध्यास-विषयौ, तयोः साधकं यद् ज्ञानं चैतन्यम्, तस्य नित्यत्वेनाजन्यत्वादित्यर्थः। "अद्वितीये"त्यादिविशेषणफलं स्वरूपलक्षणाभावमाह—*अगृहीतेति*॥ न गृहीतो विशेषो येन सामान्यग्रहणेन, तत्तथोक्तम्। चशब्दोऽयोगादित्यनेन संबध्यते॥

विशेषाग्रहणं प्रसाध्य तद्धेतुत्वेनाविद्यादोषकल्पनयोभयविधलक्षणं संपादयामीत्याशयवान् शङ्कते—*नन्विहापीति*॥ आत्मा, नागृहीतविशेषः, अनन्यनिमित्तप्रकाशत्वात्, व्यतिरेकेण शुक्त्यादिवदित्याह—*नेत्याहेति*॥ अनन्यनिमित्तप्रकाशत्वेऽपि संवेदनवदगृहीतविशेषत्वमित्यप्रयोजकत्वं साध्याव्याप्तिं वा शङ्कते—*ननु स्वभावेति*॥ स्वयंप्रकाशत्व-नित्यत्वादीनां यथासंविद्ग्रहणम्, तद्वदत्रापीत्यर्थः॥

संवेदनशब्देन चैतन्यं विवक्षितम्? उत वृत्तिः? आद्ये न दृष्टान्तसिद्धिः; तस्य पक्षत्वात्, द्वितीयेऽनवभासनिमित्तसद्भावादगृहीतविशेषत्वं तत्र संभवति नात्रेति चेतसि निधाय विशेषाग्रहणासंभवे हेत्वन्तरमाह—*नेत्याहेति*॥ आत्मा, नागृहीतविशेषः, निरंशत्वाद् व्यतिरेकेण शुक्तिकावदित्यर्थः। असिद्धिं निरस्यति—*मध्यमेति*॥ अनित्य-

पञ्चपादिकाविवरणम्

ननु निरंशोऽप्याकाशादिवन्न कात्स्न्येनावभासत इति, तत्राह—*स्वयंज्योतिष इति*।। यावत्सत्त्वमवभासभावादित्यर्थः। कुतः? "अत्रायं पुरुषः स्वयंज्योतिः" "आत्मैवास्य ज्योतिरि"त्यादिश्रुतेः। *ननु* ज्योतिरिति प्रकाशगुणमात्रं नाभिधीयते; आत्मनो गुणत्वप्रसङ्गात्, अतः प्रकाशगुणवद् द्रव्यं ज्योतिरिति, जन्यज्ञानेनापि प्रकाशेनात्मा प्रकाशगुण इति 'ज्योतिरात्मे'ति न विरुद्ध्यते, *नैतत्सारम्*; सर्वभावानामन्यनिमित्त-

ऋजुविवरणम्

शङ्क्य, पूर्वं तदभिप्रायस्यानुक्तत्वात्, अनुक्तौ चोत्तरग्रन्थानुदयः; कारणाभावेनैवानवभाससिद्धेरिति मनसि निधाय चोद्यव्याजेनाभिप्रायमनुवदति—*स्वभावावभास इति*।। निरंशत्वमसिद्धम्; सांशत्वस्यापि कैश्चिदङ्गीकृतत्वादित्याशङ्क्य साधयति—*मध्यमपरिमाणेति*।। आकाशात्मनाऽभिव्यक्तचैतन्येनैवावभास इत्यभिप्रायेण शङ्कां दर्शयति—*ननु निरंशोऽपीति*।। आकाशेऽपि कथंचित् स्वयंज्योतिष्ट्वमुक्तमेवेत्यभिप्रायेण व्याचष्टे—*यावत्सत्त्वमिति*।। "यावत्सत्त्वमि"त्यनेन देशतः कालतश्च व्यतिरेकाभाव उक्तः। आकाशे त्वेकदेश एवेति भावः। *अथवा*—"स्वभावावभासेऽपी"त्यनेनावभासव्यतिरेकाभावादन्याधीनत्वं निरस्तम्, अत्र निरंशेऽप्यवभासमानेऽनवभासमानत्वं दृश्यत इति चोदिते "स्वयं ज्योतिष इति परिहारोऽनुपपन्नः; निरंशत्वेनावभासमानत्वस्यैव विवक्षितत्वात्, तदभ्युपगमेनैव चोदितत्वादित्याशङ्क्य व्याचष्टे—*यावत्सत्त्वमिति*।। "स्वयमि"त्यस्य व्याख्या = यावत्सत्त्वमिति। इतरद् व्यक्तम्। प्रमाणाभावादित्यभिप्रायेण पृच्छति—*कुत इति*।। 'सर्वभावानामि'ति व्यवच्छेदकं विशेषणम्—प्रसक्तस्य च व्यवच्छेद इति। *ननु*अयोगव्यवच्छेदेऽपि विशेषणफले संभवति कथमन्ययोगव्यवच्छेद एव विशेषणफलत्वेन निश्चीयत इति? तत्राह—*आत्मै-

तत्त्वदीपनम्

त्वादिदोषप्रसङ्गान्न मध्यमपरिमाणत्वमित्यर्थः। आत्मा, गृहीतविशेषः, निरंशत्वात्; गगनवदिति प्रत्यनुमानपराहतिमप्रयोजकत्वं वा शङ्कते—*ननु निरंश इति*।। अन्याधीनप्रकाशत्वमुपाधिरिति दूषयति—*तत्राहेति*।। न चाप्रयोजकत्वम्; स्वयंज्योतिष्ट्वस्य बाधकत्वात्।।

ननु स्वयंज्योतिष्ट्वं नाम प्रकाशान्तरनिरपेक्षस्फुरणत्वम्, तच्च कदाचिदनवभासपक्षेऽपि घटते; प्रकाशसमये स्वत एव स्फुरणादित्याशङ्क्याह—*यावदिति*।। प्रकाशान्तरनिरपेक्षस्फुरणस्वभावत्वात् कदाचिदनवभासो न घटत इत्यर्थः। स्वयंज्योतिष्ट्वमाक्षिपति—*कुत इति*।। आत्मा, न स्वयंज्योतिः, व्यवहारपदत्वात्; घटादिवद्, इत्यर्थः। अबाधितविषयत्वस्यानुमितिसामग्र्यन्तर्भावात् श्रुतिविरोधे नानुमोत्तिष्ठतीत्याह—*अत्रायमिति*।। श्रुत्यनुमानयोर्विरोधोऽसिद्ध इति चोदयति—*नन्विति*।।

किं ज्योतिःशब्दस्य प्रकाशगुणवाचकत्वमङ्गीकृत्यात्म-ज्योतिःपदयोः सामानाधिकरण्यश्रुतिविरोध उद्भाव्यते? आहो प्रकाशगुणवद्द्रव्यवाचकत्वम्? इति विकल्प्याऽऽद्यं दूषयति—*ज्योतिरिति*।। नच—ज्ञानस्य गुणत्वमसिद्धमित्यपि—शङ्क्यम्, घट-तज्ज्ञानयोः संबन्धः, गुणनिष्ठः, ज्ञाननिष्ठत्वात्; सत्तावत्। तत्र संबन्धस्य गुणनिष्ठत्वं संबन्धिनोरन्यतरस्य गुणतामन्तरेणापर्यवस्यदन्यतरस्य गुणतां साधयति। तत्र न घटस्य गुणत्वम्; द्रव्यत्वात्, परिशेषाद् ज्ञानं गुणत्वेन सिद्ध्यतीत्यर्थः। द्वितीयं परिशिनष्टि—*अत इति*।। तथापि कथं श्रुत्यविरोधः? इति शङ्कायामाह—*इतीति*।।

आत्म-ज्योतिःपदयोः सामानाधिकरण्यादात्मनो बोधरूपत्वप्रतिपत्तेस्तत्पराहतमनुमानमित्याह—*नैतदिति*।। नच—ज्योतिःशब्दस्य प्रकाशगुणवद्द्रव्यवाचकत्वान्न तत्सामानाधिकरण्यादात्मनो बोधरूपत्वमिति—शङ्क्यम्; तमोविरोधिप्रकाशमात्रवृत्तिसम्भवे द्रव्यवाचकत्वकल्पनाऽयुक्तेः। गुणवाचकशब्दस्याऽऽत्मसामानाधिकरण्यानुपपत्ते-

वार्तिकम्

ननु—एवं सति रजतत्वेन तत्रेष्टसाधनतामनुमाय कथं प्रवृत्तिः स्यात्? मिथ्यारजतत्व द्रष्ट-

पञ्चपादिकाविवरणम्

प्रकाशसंसर्गित्वादात्मन्यपि तत्प्रसङ्गनिराकरणाय स्वयंज्योतिरिति विशेषणोपपत्तेः, "आत्मैवाऽस्य ज्योति"रिति चैवकारात्। *ननु* कारकान्तरानपेक्षतया स्वयमेव स्वात्मनि ज्ञानं जनयतीति स्वयमिति विशेषणं किं न स्यात्? *न*; ज्योतिष्ट्वस्यैव विशेष्यत्वात्, तत्र कारकत्वस्य विशेष्यतयाऽप्रतिभासात्॥

किञ्च ज्ञानजन्मप्रयुक्तत्वात् कारकापेक्षायास्तदभावेऽपेक्षैव नास्तीति। *ननु* ज्ञानप्रयुक्तं जन्मापि विद्यते, न प्रकाशगुणप्रयुक्तमेव; द्रव्यजन्मव्यतिरेके स्वद्रव्योपाधौ जन्माभावस्य प्रदीपादौ दृष्टत्वात्, अत्रापि ज्योतिःशब्दादात्मनि प्रकाशगुणस्य जन्माभावनिश्चयात्। नचान्तःकरणेऽपि प्रकाशगुणोदयो ज्ञानपरिणामः;

ऋजुविवरणम्

वास्येति*॥ व्यवच्छेद एव मुख्यं विशेषणफलं भवतु, तथापि व्यवच्छेद्यान्तरमेवेति चोदयति—*ननु कारकान्तरेति*॥ कथं ज्योतिष्ट्वस्यैव विशेष्यत्वम्? न कारकत्वस्येत्याशङ्क्याह—*कारकत्वस्येति*॥ शाब्देऽन्वये प्रतीयमानमेव विशेष्यमिति भावः। *ननु*अर्थलभ्येऽपि विशेषणान्वयः संभवत्येव, ज्ञानसामर्थ्यलब्धं च कारकम्; अतस्तदेव विशेष्यमित्याशङ्क्याह—*किंच ज्ञानजन्मेति*॥ *ननु—ज्ञानप्रयुक्तमिति*॥ अयं भावः—ज्ञानं धर्मि, जनिमदिति साध्यो धर्मः, ज्ञानत्वात्; विषयज्ञानवदिति। तस्यापीन्द्रियान्वय-व्यतिरेकाभ्यां जन्मसिद्धिः, अन्तःकरणावृत्तिर्वा निदर्शनम्। तथा सति तत्सामर्थ्यलभ्यकारकस्य विशेष्यत्वमिति॥ "प्रकाशगुणप्रयुक्तमि"ति क्रियाविशेषणम्। प्रकाशगुणप्रयुक्तं जन्मैव न भविष्यतीत्यध्याहारः। द्रव्यजन्मेति व्याप्तिप्रदर्शनम्। अयं प्रयोगः—ज्ञानं धर्मि, स्वाश्रये न जायत इति साध्यो धर्मः, प्रकाशगुणत्वादिति हेतुः; प्रदीपप्रकाशवदिति दृष्टान्तः। विरुद्धाव्यभिचारित्वमनुमानेन बाधो वा पूर्वानुमानस्याभिहितः। *ननु*—सिद्धे प्रकाशरूपत्वे ज्ञानस्याजन्यत्वं सिद्धं भवेत्, तदेवासिद्धमित्याशङ्क्याह—*अत्रापीति*॥ *ननु*अन्तःकरणे प्रकाशगुणस्योत्पत्तिर्दृश्यते, अतोऽनैकान्तिको हेतुरित्याशङ्क्याह—*नचान्तःकरणेऽपीति*॥ 'परिणामस्य ज्ञानत्वाभ्युपगमादि'त्युक्ते सर्वपरिणामस्य ज्ञानत्वं भवेत्, तदर्थमाह—*विशेष-

तत्त्वदीपनम्

द्रव्यवाचकत्वं कल्प्यत इति चेत्, मैवम्; ज्ञानस्य गुणत्वासिद्धेः। नचानुमानात्तत्सिद्धिः; प्रतिप्रयोगपराहतत्वात्, रूप-तज्ज्ञानयोः संबन्धः, द्रव्यनिष्ठः, ज्ञाननिष्ठत्वात्, उपक्रमादिपर्यालोचनयाऽनवच्छिन्नात्मप्रतिपादकश्रुतिविरोधादात्मनि गुण-गुणिभावकल्पनाऽनुपपत्तेश्च। तस्मात्—"अत्रायं पुरुषः" इत्यादिवाक्यं बोधाभेदप्रतिपादनपरमित्यर्थः॥

इतोऽपि नाऽऽत्माऽन्याधीनप्रकाश इत्याह—*सर्वेति*॥ भासमानस्यान्याधीनप्रकाशत्वं घटादौ दृष्टम्, तद् व्यावर्तयितुं स्वयमिति विशेषणम्। तच्चाऽऽत्मनोऽन्याधीनप्रकाशत्वेऽनुपपन्नमित्यर्थः। बोधरूपत्वाभावे विशेषणान्तरवैयर्थ्यं चेत्याह—*आत्मैवेति*॥ विशेषणमन्यथा घटत इति चोदयति—*नन्विति*॥ घटादिज्ञानं स्वातिरिक्तकर्त्रादिकारकापेक्षया जायमानमुपलब्धम्, तद्वदात्मज्ञानस्यापि कारकान्तराधीनत्वं प्राप्तं व्यावर्तयितुं विशेषणं युक्तमित्यर्थः। कारकान्तरनिवृत्तिर्न विशेषणफलम्; ज्योतिषो विशेष्यत्वादित्याह—*न ज्योतिष्ट्वस्येति*॥ एवकारव्यावर्त्यमाह—*तत्र कारकत्वस्येति*॥ ज्योतिष्ट्वस्य कस्माद्विशेष्यत्वम्? इति वा शङ्कायामाह—*तत्रेति*॥ इतोऽपि न कारकान्तरव्यावृत्तिर्विशेषणफलमित्याह - *किंचेति*॥ जन्माऽभावोऽसिद्ध इति चोदयति—*नन्विति*॥ विमतम्, जन्मवत्, ज्ञानत्वात्, विषयज्ञानवदित्यर्थः। प्रत्यनुमानविरोधमाह--*न प्रकाशेति*॥ आत्मनि प्रकाशगुणस्य प्रकाशगुणत्वप्रयुक्तमेव जन्माभावनिश्चयादिति संबन्धः। तत्र हेतुमाह—*स्वद्रव्येति*॥ स्वस्याऽऽश्रयभूतं द्रव्यं स्वद्रव्यम्, तदेवोपाधिः, तस्मिन् स्वधर्मिणीत्यर्थः। साध्यवैकल्यं निरस्यति—*द्रव्यजन्मेति*॥ असिद्धिं निरस्यति—*अत्रापीति*॥ अत्रेत्यस्यात्मनीत्यनेन संबन्धः। ज्योतिःशब्दादित्यत्र प्रतीयमानस्येति शेषः। तथाच प्रयोगः—विमतम्, स्वाश्रयोपाधौ न जायते, प्रकाशत्वात्, प्रदीपप्रकाशवत्। विषयप्रकाशे व्यभिचारमाशङ्क्याह—*नचेति*॥ ज्ञानपरिणामोऽन्तःकरणे सति प्रकाशगुणोदयो न भवति, अन्तःकरणेऽपि ज्ञानपरिणामः

पञ्चपादिकाविवरणम्

स्वभावत एव प्रकाशगुणवद्द्रव्यस्यान्तःकरणस्यैव विशेषपरिणामस्य ज्ञानत्वाभ्युगमात्। नच ज्ञानमपि क्वचिज्जन्मवद् दृष्टम्। दृष्टमन्तःकरण इति चेत्, न; ज्ञातुरर्थप्रकाशस्य ज्ञानत्वात्, तस्य चात्माश्रयत्वात्, अन्तःकरणपरिणामे ज्ञानत्वोपचारात्। नच—ज्ञानमात्माश्रयं द्रव्यमिति—युक्तम्; तस्यैव प्रकाशगुणत्वेनाऽऽत्मनो ज्योतिष्ट्वहानात्।

ऋजुविवरणम्

परिणामस्येति* ॥ भवतु विशेषपरिणामस्यैव ज्ञानरूपगुणत्वम्, तथापि स्वाश्रये जन्यत्वं तदवस्थमित्याशङ्क्याह—*प्रकाशगुणवदिति* ॥ एतदुक्तं भवति*—न प्रकाशगुणवत्यन्तःकरणे प्रकाशगुणान्तरोदयः संभवति। विशिष्टस्य परिणामाश्रयत्वमिति मा भूद् गुणद्वयसाहित्यम्; प्रकाशान्तरोदये पूर्वप्रकाशापगम इति, नेत्याह—*ज्ञानपरिणाम इति*॥ स्वभावापगमायोगादित्यर्थः। *अथवा*—विशेषपरिणामस्यान्तःकरणगतस्य प्रकाशगुणवद् ज्ञानत्वाभ्युपगमादित्यन्वयः; 'अन्तःकरणस्ये'त्यस्य परिणामविशेषणत्वात्, उपसर्जनेन चान्वयायोगादिति। कथमन्तःकरणस्यैतादृशपरिणाम इति? तदाह—*ज्ञानपरिणामस्वभावत इति* ॥ *अथवा* "नचान्तःकरणे" इत्यनेनान्तःकरणे प्रकाशगुणोदयो नास्तीति प्रतिज्ञा, ज्ञानपरिणामस्वभावत इति हेतुः। तर्हि ज्ञानस्वभावान्तःकरणे ज्ञानान्तरायोगाद् घटादिज्ञानाभाव इत्याशङ्क्याह—*प्रकाशगुणवदिति* ॥ प्रकाशगुणवद् ज्ञानम्; विशेषपरिणामस्य द्रव्यरूपस्यैव ज्ञानत्वादित्यर्थः। प्रकाशगुणत्वादिति हेतोस्त्रिरूपत्वमुक्त्वा, ज्ञानत्वादित्यस्य हेतोः—नित्या, भूः, गन्धवत्त्वादितिवदसाधारणत्वमाह—*नच ज्ञानमपीति* ॥ कथमसाधारणत्वम्? सपक्षेऽपि तद्दर्शनादिति चोदयति—*अन्तःकरण इतीति* ॥ *ननु*अन्तःकरणवृत्तौ ज्ञानशब्दप्रयोगो दृश्यत इत्याशङ्क्याह—*अन्तःकरणपरिणाम इति* ॥ तर्हि ज्ञानमप्यात्माश्रयं द्रव्यत्वेन जन्यं भवत्वित्याशङ्क्याह—*नच ज्ञानमिति* ॥ अनेन हेतोरसिद्धिः परिहृता। जडप्रकाशत्वस्यैव व्याप्तिदर्शनादित्यभि-

तत्त्वदीपनम्

प्रकाशगुणोदयो न भवतीति वा संबन्धः। तत्र हेतुमाह—*स्वभावत इति* ॥ अन्तःकरणस्य विशेषपरिणामस्य ज्ञानत्वाभ्युपगमादिति सम्बन्धः। सुखादिव्यावृत्त्यर्थं विशेषेति विशेषणम्। परिणामित्वमुपपादयितुमन्तःकरणं विशिनष्टि—*द्रव्यस्येति* ॥ तदुपपादयति—*प्रकाशगुणवदिति* ॥

अन्तःकरणस्य घटादेश्च जडत्व एकस्य प्रकाशगुणत्वमन्यस्य नेत्येतत् कथम्? इत्याशङ्क्याह—*स्वभावत इति* ॥ जडेऽपि प्रदीपे प्रकाशगुणदर्शनादित्यर्थः। नच ज्ञानस्यान्तःकरणपरिणामत्वे प्रमाणाभावः; "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भी'रित्येतत्सर्वं मन एव"इत्यादिना कामादीनां तत्परिणामत्वप्रतिपत्तेः। तथाच मृदो घटादिरूपेणावस्थावदन्तःकरणस्य ज्ञानाऽऽकारेण व्यवस्थितत्वादस्य न स्वाश्रयोपाधौ जन्मेत्यर्थः॥

किंच "विषयज्ञानवदि"त्यत्र ज्ञानशब्देन स्वरूपज्ञानं विवक्ष्यते? उत वृत्तिः? आद्ये साध्यवैकल्यमित्याह—*नचेति* ॥ अपिशब्दः क्वचिदित्यनेन संबध्यते। चशब्दोऽवधारणार्थः। लोके वेदे च स्वरूपज्ञानं जायमानं नैवोपलभ्यत इत्यर्थः। द्वितीयमुत्थापयति—*दृष्टमिति* ॥ अन्तःकरणे धर्मिणि वृत्तिजन्म दृष्टमिति शेषः। अस्मिन् पक्षे दृष्टान्तः साधनविकल इत्याह—*न ज्ञातुरिति* ॥ ततः किम्? इत्यत आह—*तस्य चेति*॥ यद्यप्यात्मा ज्ञप्तिः; तथापि कल्पितभेदमङ्गीकृत्यात्माश्रयत्वादित्युक्तम्। वृत्तावपि ज्ञानशब्दप्रयोगो दृष्ट इत्यत्राह—*अन्तःकरणेति* ॥ चैतन्यस्यैक्याध्यासाद् वृत्तौ ज्ञानत्वमुपचर्यते, दग्धृत्वमिवायःपिण्डे। नच—मुख्यत्वं किं न स्यादिति—शङ्क्यम्; अर्थप्रकाशोऽर्थस्फुरणम्, तच्च स्वयंप्रकाशम्; इतरथा विषयस्य तदधीनव्यवहारानुपपत्तेः। नच—स्वप्रकाशस्य स्फुरणस्य जडान्तःकरणधर्मत्वं वस्तुतो युज्यत इत्यर्थः॥

ज्ञानस्य प्रकाशगुणत्वेन प्रकाशात्मकत्वादित्यसिद्धमित्याशङ्क्याह—*नचेति* ॥ ज्ञानस्य प्रकाशगुणवत्त्व

वार्तिकम्

साधनतया व्याप्त्यग्रहादिति—चेत्; *न*; तत्र व्याप्तिग्रहाभावेऽपि तत्रोत्पन्नानिर्वचनीयरजतगतसत्य-

पञ्चपादिकाविवरणम्

जडप्रकाशगुणो न जन्यः, चित्प्रकाशगुणो जन्य इति चेत्, न; प्रकाशत्वप्रयुक्तत्वात्स्वद्रव्योपाधौ जन्माभावस्य। दर्पणादौ विद्यमानप्रकाशस्यैव तिरोधाननिराकरणं क्रियते, प्रदीपादिषु तु द्रव्यमेव जायते, न प्रकाशगुणः। प्रज्ञानघनशब्दाच्च चैतन्यज्योतिरात्मा न जडज्योतिरिति गम्यते; "विज्ञानमानन्दम्" "प्रज्ञानमानन्दं ब्रह्मे"त्यादिवचनाच्च। ज्ञानमिति ज्ञातृत्वमुच्यते, न भावार्थ इति चेत्, न; भावार्थे

ऋजुविवरणम्

प्रायेण चोदयति—*जडप्रकाशेति*॥ जडप्रकाशत्वेनाजन्यत्वम्, नच तदपि साध्यम्; बाधितविषयत्वप्रसङ्गादिति भावः। परव्याप्त्युपजीवित्वेन धूमगतकटुकत्ववदप्रयोजकं जडत्वमिति परिहरति—*न प्रकाशत्वप्रयुक्तत्वादिति*॥ कथं प्रकाशत्वप्रयुक्तया स्वोपाधौ जन्माभावः? दर्पणादौ व्यभिचारादित्याशङ्क्याह—*दर्पणादाविति*॥ *ननु*—सति प्रदीपे प्रभागुणस्योत्पत्तिर्दृश्यते, इत्याशङ्क्याह—*प्रदीपादिष्विति*॥ *ननु* अजन्यप्रकाशगुणत्वेऽपि तेनैव हेतुनाऽन्याधीनसिद्धित्वमनुमीयते प्रदीपवत्, तथा सति हेतोरिष्टविघातकारित्वमित्याशङ्क्याह—*प्रज्ञानघनशब्दाच्चेति*॥ *अथवा*—"निरंशस्य स्वयंज्योतिषः"इत्यनेनाजन्यप्रकाशत्वे हेतुरुक्तः; तत्र हेतुस्वरूपं साधयित्वेदानीमयं हेतुरनन्याधीनसिद्धिं न साधयति; व्यभिचारादित्याशङ्क्य, 'स्वयंज्योतिषः"इति चैतन्यज्योतिष्ट्वं विवक्षितम्, तच्च प्रमाणसिद्धमित्याह—*प्रज्ञानघनशब्दादिति*॥ *प्रज्ञानघनशब्दः* = प्रकृष्टं ज्ञानं वक्ति। प्रकर्षश्च चिद्रूपत्वमित्यर्थः॥ श्रुत्यन्तरमुदाहृतं दार्ढ्यार्थम्। ज्ञानेऽहंप्रतीत्यभावात् तस्याऽऽत्मसामानाधिकरण्याभावात् कथं चिद्रूपत्वमिति चोदयति

तत्त्वदीपनम्

आत्मनः प्रकाशगुणवत्त्वेन स्वयंज्योतिष्ट्वमुक्तं हीयेतेत्यर्थः। प्रकाशस्य स्वाश्रयोपाधावजायमानत्वेन संबन्धे जडप्रकाशत्वमुपाधिरिति चोदयति—*जडप्रकाशेति*॥ प्रकाशमात्रस्य प्रयोजकत्वसंभवे जडेति व्यर्थं विशेषणमित्याह—*न प्रकाशेति*॥ दर्पणादिप्रकाशे व्यभिचारमाशङ्क्याह—*दर्पणादाविति*॥ मलावृतप्रकाशनस्य निघर्षणक्रियया तिरोधानमात्रनिरसनं क्रियत इत्यर्थः। प्रदीपे सति प्रभागुणस्योत्पत्तेर्दर्शनात्साध्यवैकल्यमित्याशङ्क्याह—*प्रदीपादिष्विति। विरलावयवद्रव्यस्य प्रभाशब्दवाच्यस्योत्पत्तिर्न प्रकाशगुणस्येत्यर्थः॥

"उत्पन्नं द्रव्यं क्षणमात्रमगुणं तिष्ठती"त्यभ्युपगमात् साध्यवैकल्यमित्याशङ्क्याह—*न प्रकाशगुण इति*॥ क्षणमात्रं गुणसंबन्धाभावः कस्मात्? इति विवेचनीयम्—द्रव्येण सहोत्पन्नत्वे जन्य-जनकतानुपपत्तिः; नियतपूर्वक्षणवर्तित्वात्करणत्वस्य, ततः क्षणमात्रमगुणं स्थित्वोत्तरकाले गुणं जनयतीति चेत्, मैवम्; द्रव्योत्पादकेनैव द्रव्यसमवेतगुणोत्पत्त्युपपत्तेः "क्षणमात्रमगुणं तिष्ठती"ति प्रक्रियाऽनवकल्पनादित्यर्थः। स्वयंज्योतिष्ट्वप्रतिपादकश्रुतिपर्यालोचनया स्वप्रकाशत्वमुक्तम्, संप्रति—आत्मा, न स्वातिरिक्तसंविदधीनव्यवहारविषयः, संविदभिन्नत्वात्; संविद्वत्, न चासिद्धिः; प्रज्ञानघनादिवाक्यात्तत्प्रतिपत्तेरिति गुरुमतानुसारिणं प्रत्याह—*प्रज्ञानघनेति*॥ 'अहं जानामी'ति ज्ञानाश्रयतया व्यवह्रियमाणत्वात्प्रत्यक्षविरोध इत्याशङ्क्याह—*न जडेति*॥ 'जानामी'त्यत्र ज्ञानाश्रयत्वेनाहंकारोऽनुभूयत इत्यर्थः। अहंकारविषयत्वं कस्मात्? आत्मविषयत्वमेवास्त्वित्याशङ्क्य ज्ञानरूपब्रह्माभिन्नत्वान्न ज्ञानाश्रयत्वं युक्तमित्याह—*विज्ञानमिति*॥ "विज्ञानं ब्रह्मे" त्यत्र ब्रह्मणो ज्ञात्रभेदः प्रतीयते, न बोधाभेद इति शङ्कते—*ज्ञानमिति ज्ञातृत्वमुच्यत इति*॥ ज्ञानशब्दस्य बोधार्थत्वात् कथं ज्ञातृपरत्वम्? इति न शङ्कास्पदम्; "करणाधिकरणयोश्चे"ति सूत्रे ल्युट्प्रत्ययस्याधिकरणेऽपि विधानात् कथं नियमः? इत्याशङ्क्याह—*न भावार्थ इति*॥ भावार्थस्य क्रियात्मकत्वान्न तद्रूपत्वं युक्तमित्यर्थः। करणाधिकरणयोर्धात्वर्थप्रतिपत्तिसापेक्षतया विलम्बितप्रतिपत्तिकत्वाद् धात्वर्थस्य च पुरःस्फूर्तिकत्वात्तदाश्रयणं युक्तमित्याह—*न भावेति*॥ धात्वर्थाभेदानुपपत्तेर्विलम्बितप्रतिपत्तिकस्याप्यधिकरणस्योपादानमिति चेत्, मैवम्; अद्वैतश्रुतिविरोधात्, आधाराधेयकल्पनाऽयुक्तेः। ज्ञानस्य क्रिया-

पञ्चपादिका

मनवभासमानमस्त्येव, न तदनवभासनाज्जीवेऽनवभास-विपर्यासौ भवतः। न हि शुक्तेरग्रहणात्स्थाणावग्रहणं विपर्यासो वा। *ननु* न ब्रह्मणोऽन्यो जीवः, "अनेन जीवेनाऽऽत्मने"तिश्रुतेः, अतस्तदग्रहण-

पञ्चपादिकाविवरणम्

प्रसिद्धिविरोधात् शब्दस्य। *किञ्च* प्रतिक्षणं प्रकाशगुणकल्पनाद् वरमेकस्यैव गुणस्य स्थायित्वकल्पनम्। आत्मनि प्रकाशगुणव्यतिरेकाभावाच्च नाऽऽगन्तुकत्वे प्रमाणमिति॥

ननु आत्मन्यगृह्यमाणविशेषत्वमनुभवसिद्धमिति चोदयति—*ननु ब्रह्मस्वरूपमिति*। तर्हि शुक्तिकायामिव ब्रह्मण्येवानवभास-विपर्ययौ स्याताम्, न जीव इत्याह—*न तदनवभासनादिति*॥ *ननु* कार्य-कारणभावहीनयोर्द्रव्ययोः सामानाधिकरण्यमेकद्रव्यनिष्ठम्; 'सोऽयं देवदत्तः' इतिवत्, अतो द्रव्यैकत्वाद् जीवगता-

ऋजुविवरणम्

—*ज्ञानमिति*। ज्ञातृत्वमिति*॥ इदानीमनुकूलं तर्कमाह—*किंचेति*॥ आत्मनीति बाधकाभावमाह। अथवा—'आत्मनी'त्यनेनानन्तरानुमानस्य बाधकभावमाह। यत्रागृहीतविशेषसामान्यग्रहणं नास्तीति चोदितम्, तत्रैव विशेषाग्रहणं वक्तव्यम्, नतु ब्रह्मणीत्याशङ्क्य व्याचष्टे—*नन्वात्मनीति*॥ "तदनवभासनादि"त्युक्तम्; स्वाश्रये स्वकार्यकरत्वादित्याशङ्क्योपपादयति—*तर्हि शुक्तिकायामिति*॥ कथं जीव-ब्रह्मणोरेकत्वम्? भेदप्रतीतेः सामानाधिकरण्यस्य च भेदाभेदविषयत्वात्, तथाच सति ब्रह्मगतमग्रहणं कथमात्मनः? इत्याशङ्क्य व्याचष्टे—*ननु कार्यकारणेति*॥ *ननु*—दोषत्रयाभावादगृहीतविशेषसामान्यग्रहणाभावात् कारणत्रयजन्यज्ञानाभावाच्च नाध्यासलक्षण-

तत्त्वदीपनम्

त्मकत्वं चासिद्धम्। नच धात्वर्थत्वात् क्रियात्मकत्वम्; अक्रियात्मकस्यापि धात्वर्थस्य 'गडि वदनैकदेशे' इत्यादौ प्रसिद्धत्वादित्यर्थः॥

अनन्यनिमित्तप्रकाशत्वे लाघवमितरत्र गौरवं चेत्याह—*किंच प्रतिक्षणमिति*॥ ज्ञानस्याजन्यत्वे हेत्वन्तरमाह—*आत्मनीति*॥ *प्रकाशगुणव्यतिरेकः=* व्यावृत्तिः; तस्या अभावः, तदभावादित्यक्षरार्थः। विमतम्, नाऽऽगन्तुकम्, प्रागभावशून्यत्वात्; गगनवत्, नच हेत्वसिद्धिः; आत्मनि प्रकाशप्रागभावोपगमे जिज्ञासा-संशय-विपर्यया न स्युः, ते चोपलभ्यन्ते, तस्मान्नासिद्धिरित्यर्थः। श्रुति-युक्तिभ्यामात्मस्वप्रकाशसिद्धेरग्रहणाभावादात्मनोऽधिष्ठानत्वे प्रत्युक्ते ब्रह्मस्वरूपानवभासनादित्युक्तं न युक्तम्; वैयधिकरण्यात्, इत्याशङ्क्याऽऽत्म-ब्रह्मणोरभेदान्न वैयधिकरण्यमित्याह—*नन्वात्मनीति*॥ अविद्याया आच्छादनादिशक्तिमत्त्वात् कथमनवभासाद्यभावः? इत्याशङ्क्यानवभासाद्यभावं न ब्रूमः, किंत्वन्यत्रानवभासः स्यादित्याह—*तर्हीति*॥ ब्रह्मात्मनोरभेदादात्मन्यपि न स्यादित्याशङ्क्याभेदे मानाभावान्नैतदित्याह—*न जीव इति*॥

"मानाभावादि"त्येतदसिद्धम्; 'अनेन जीवेने'त्यभेदसिद्धेरित्युक्तमयुक्तम्, 'चारेण परसैन्यं समनुप्रविश्य संकलयामी'त्यादौ चारगतसंकलनस्य राज्ञि व्यपदेशवद् जीवगतनामादिव्याकरणं ब्रह्मण्युच्यते, तस्मात्कथमभेदः? इत्याशङ्क्य, इतरत्र मुख्यार्थासंभवादुपचारः, नच तथाऽत्रेत्याह—*ननु कार्येति*॥ तत्त्वमस्यादिवाक्यम्, अखण्डार्थनिष्ठम्, अकार्य-कारणद्रव्यमात्रवृत्तित्वे सति समानाधिकृतत्वात्; 'सोऽयं देवदत्तः' इतिवत्। तत्र समानाधिकृतत्वादित्युक्ते 'खण्डो गौरि'त्यादौ व्यभिचारः, तदर्थम्—*द्रव्यमात्रेति*॥ तावत्युक्ते 'मृद् घटः' इत्यादौ व्यभिचारः—तदर्थम् —*कार्यकारणेति*॥ नच साध्यवैकल्यम्; तदेतद्देशाद्युपलक्षितदेवदत्तस्वरूपपर्यवसायित्वादित्यर्थः॥

वार्तिकम्

रजतत्वे तद्ग्रहात्, तेन च शुक्तिगतानिर्वचनीयरजतत्वस्य परस्पराध्यासात्, सत्यरजतत्वभ्रान्त्या धूलीपटले धूमभ्रान्त्या वह्न्यनुमानवदिष्टसाधनतानुमानोपपत्तेः। नच—शुक्ताविव तद्रजतेऽपि प्रातीतिकमेव

पञ्चपादिका

मात्मन एव तत्, *एवं तर्हि* सुतरामविद्यायास्तत्रासम्भवः ; तस्य विद्यात्मकत्वात्, "तस्य भासा सर्वमिदं विभाती"ति तच्चैतन्येनैव सर्वस्य भासमानत्वात्, *उच्यते*—विद्यत एवात्राप्यग्रहणाविद्यात्मको दोषः

पञ्चपादिकाविवरणम्

वेवानवभास-विपर्ययाविति चोदयति—*ननु न ब्रह्मणोऽन्य इति* ॥ तर्हि ज्ञानप्रकाशविरोधादाश्रय-विषय-भेदाभावाच्च नाज्ञातता ब्रह्मण इत्याह—*एवं तर्हीति* ॥ तत्राद्वितीयाधिष्ठानब्रह्मात्मनि प्रमाणस्य चैतन्यस्या-

ऋजुविवरणम्

मत्रेति चोदिते, प्रकाशाच्छादकदोषकथनमसंगतम् ; अचोदितवस्तुकीर्तनादित्याशङ्क्याभिप्रायमाह—*तत्राद्वितीयेति* ॥ अथवा—अधिष्ठानज्ञानादिष्वाक्षिप्तेषु किमर्थं विशेषणादौ प्रकाशाच्छादकसमर्थनमित्याशङ्क्याह—*तत्राद्वितीयेति* ॥ "अत्रेति" व्याचष्टे—*अद्वितीयाधिष्ठानेति* ॥ अनेन च बहुविषयेऽप्याक्षेपे प्रमाणाच्छादकदोषनिरूपणमेवादौ कर्तव्यम्, तेन विनाऽधिष्ठानादीनां स्वतो निरूपयितुमशक्यत्वादिति दर्शितम् । *अद्वितीयाधिष्ठानेति* स्वतोऽधिष्ठाने द्विरूपत्वाभाव उक्तः । "ब्रह्मात्मनी"त्यनेन द्रष्टृभेदाभाव उक्तः । "प्रकाशस्ये"त्यस्य व्याख्या = चैतन्यस्येति । "प्रमाणस्ये"त्यनेन चैतन्यस्याध्यासकारणत्वम्, तद्दोषत्वे च दोषत्रयान्तर्भावः । "प्रमाणस्ये"त्येवोक्ते सर्वस्याध्यस्यमानत्वात् कथमात्मन्यतिरिक्तं प्रमाणम् ? इति शङ्का स्यात्, तन्निवृत्त्यर्थम्,—"चैतन्यस्येत्ये"वोक्तम् । "चैतन्यस्ये"त्येवोक्ते तद्दोषकीर्तनमप्रस्तुतं स्यात्, तदर्थम्—"प्रमाणस्ये"त्युक्तम् । "ब्रह्मात्मनि प्रमाणस्ये"त्यनेनादौ प्रमाणदोषकीर्तनं कर्तव्यम् ; तस्य चैतन्यरूपत्वेन स्वतःसिद्धत्वात्, तत्प्रतिबन्धे चाधिष्ठानादिविभागोऽपि सिद्धयति ; प्रमाणप्रतिबन्धे प्रमेयेऽपि रूपान्तरसंभवादित्युक्तम् । अत्र संग्रहः—

अत्रेत्यस्य पदस्यार्थः सप्तम्यन्तेन वर्णितः । द्रष्ट्रधिष्ठानयोर्भेदः स्वतो नेत्येतदीरितम् ॥
प्रमाणप्रतिबन्धे हि सिद्धिस्तस्येति सूचितम् । अधिष्ठानद्विरूपत्वमद्वितीयेति वारितम् ॥
"ब्रह्मात्मनी"त्यनेनापि द्रष्टृभेदो निवारितः । प्रमाणस्येत्यनेनापि दोषाद्यत्वमसूसुचत् ॥
तद्रूपस्यावभासे हि नचाध्यासोऽपि सिद्धयति । अन्तर्भावोऽपि दोषेषु प्रमाणस्येति दर्शितम् ॥
अप्रस्तुताभिधाशङ्का प्रमाणस्येति वारिता । तत्प्रमाणगतत्वं च हेतुरादौ प्रसाधने ॥
अवभासनिरोधेन लभ्यते पूर्वदूषितम् । अविशेषितसामान्यविशेषस्यैव रोधनम् ॥
स्वावभासे विरुद्धत्वाच्छादनप्रवणत्वतः । तद्विभागेन तस्यैव तद्दोषत्वप्रसाधनात् ॥
सम्बन्धेनाश्रितत्वेन विषयत्वेन चेह तत् । संबन्धेनान्यदोषत्वं निर्बाह्यं तेन पूर्वता ॥ इति ॥

ननु—पूर्वमात्मन्यज्ञानं साधितम्, इदानीं प्रमाणदोषत्वेनाज्ञानसाधनेऽज्ञानभेदः स्यात्, अनादरो वा पूर्वप्रमाण

तत्त्वदीपनम्

अभेदे विद्यात्मकत्वान्न सुतरामविद्येत्युक्तम्, तन्न संभवति ; भेदेऽपि विद्यात्मकत्वेनाविद्यासंभवसाम्यात्, अतः कथं सुतरामिति ? तत्राह—*तर्हि ज्ञानेति* ॥ अभेदे भिन्नाश्रय-विषयाभावादविद्याभावस्तत्परोऽर्थः । करण-विषय-प्रमातृदोषाद्यसंभवाल्लक्षणे प्रत्युक्ते करणादिदोष एव प्रदर्शनीयः, नाविद्यादोषः, तस्य प्रथमदर्शने वा को हेतुरिति ? तत्राह—*तत्रेति* ॥ अधिष्ठानप्रमाणदोषस्य भ्रमजनकत्वादविद्यायाश्चाधिष्ठानयाथात्म्यप्रमाणदोषत्वाद्भ्रम-जनकत्वं युक्तमित्याशयेनोक्तम्—*अधिष्ठानेति* ॥ प्रथमदर्शने हेतुमाह—*अद्वितीयेति* ॥ द्वयाकारत्वादेरविद्याऽधीन-त्वात् प्रथमं तत्प्रदर्शनमित्यर्थः । *टीकाया एषोऽर्थः*—'अविद्यात्मके'ति विशेषणं काचादिव्यावृत्त्यर्थम् । 'आच्छादकमि'त्यधिष्ठानत्वमुपपादयति । प्रकाशाच्छादकत्वे तन्निवर्त्यत्वासंभवादनिवृत्तिरित्याशङ्क्याऽऽगन्तुकप्रङ्गनिवर्त्यत्व-मित्याह—*अग्रहणेति* ॥

पञ्चपादिका

प्रकाशस्याच्छादकः। कथं गम्यते? श्रुतेस्तदर्थापत्तेश्च। श्रुतिस्तावत्--"अनृतेन हि प्रत्यूढाः" "अनीशया शोचति मुह्यमानः" इत्येवमाद्या। तदर्थापत्तिरपि--विद्यैव सर्वत्र श्रुतिषु ब्रह्मविषया मोक्षाय निवेद्यते, तेनार्थादिदमवगम्यते—जीवस्य ब्रह्मस्वरूपतानवगमोऽविद्यात्मको बन्धो निसर्गत एवास्तीति॥

पञ्चपादिकाविवरणम्

विद्याकारणदोषसंसर्गं प्रथमं दर्शयति—*उच्यते विद्यत एवेति*॥ प्रत्यक्षानुमानार्थापत्तिप्रदर्शिताज्ञानस्य श्रुति-तदर्थापत्तिभ्यां प्रदर्शनं क्रियते—श्रुतिस्तावदिति*॥ सुषुप्ते मिथ्याज्ञानाभावात्तत्संस्कारस्य चाप्रतिबन्धकत्वात् कादाचित्कग्रहणाभावस्य च स्वतःसिद्धग्रहणविरोधित्वाभावात्स्वरूपचैतन्येनैव ब्रह्मस्वरूपावभासे प्राप्ते तदवभासप्रतिबन्धनिमित्तमनृतं दर्शयति—*"अनृतेन हि प्रत्यूढाः" "त इमे सत्याः कामा अनृतापिधानाः"* इति। ततश्च मिथ्याज्ञान-तत्संस्काराग्रहण-कर्मभ्यो व्यतिरिक्तमनवभासनिमित्तमनृतं मिथ्यावस्तु सिद्धम्।

ऋजुविवरणम्

इत्याशङ्क्याह—*प्रत्यक्षानुमानेति*॥ तत्र सर्वोपादानत्वेन साधनं कृतम्, अत्र तु प्रतिबन्धकत्वेन दोषत्वेन च तत्साधनमिति, विषयभेदादपौनरुक्त्यमिति भावः। *ननु*—प्राप्तेऽवभासेऽवभासप्रतिबन्धप्रतिपादनं युक्तम्, कथं तत्प्राप्तिः? अथवा—सत्यामप्यवभासप्रसक्तावन्येनापि प्रतिबन्धसंभवात् कथमज्ञानस्यैव प्रतिबन्धकत्वसिद्धिः? इत्याशङ्क्यावस्थान्तरे प्रतिबन्धान्तरसंभवात् प्रमाणस्य तत्परत्वशङ्काव्युदासायावस्थान्तरमाश्रित्याह—*सुषुप्ते मिथ्याज्ञानेति*॥ "अनृतेन ही"त्यनेनार्थाऽऽत्मनां प्रत्यूढत्वं प्रतिपाद्यते, प्रमाणदोषश्च प्रतिपाद्यतेऽप्रतिज्ञातः; अतो विरोध इत्याशङ्क्य व्याचष्टे—*तदवभासप्रतिबन्धेति*॥ *ननु*—प्रत्यूढशब्दो हि विप्लस्पृष्टत्वमेवाह, आवरणत्वत्र विवक्षितं कथं लभ्यते? इत्याशङ्क्य श्रुत्यन्तरमुदाहरति—*त इमे सत्या इति*॥ एवमपि अनृतशब्दादसदेव किञ्चित् स्यादित्याशङ्क्याह—*ततश्चेति*॥ आवरणेन प्रतिपाद्यमानत्वादिति भावः। कथं ब्रह्मस्वरूपप्रकाशप्राप्तिर्जीवस्य? "अनीशये"ति श्रुत्यामीश्वरत्वाभावप्रतीतेः, तथा—"अनीशये"ति तृतीयया तस्यैव मोहे शोके च हेतुत्वं प्रतीयते;

तत्त्वदीपनम्

प्रमाणाभावात् कथमविद्येत्युक्तानुसंधानाचतुरः कश्चित् शङ्कते—*कथमिति*॥ अनुसंधानाकौशलमुक्तमेव स्मार्यताम्, किमिति प्रमाणान्तरमुपन्यस्तं टीकाकृता? इत्याशङ्क्योक्तस्मारणे ममानुसंधानपाटवाभावादुक्तं स्मारयतीति वादिनः खिन्नमतित्वं स्यात्, तदर्थं तन्मतिमनुसरन् प्रमाणान्तरं कथयतीत्याह—*प्रत्यक्षेति*॥

"अनृतेन हि प्रत्यूढाः" इत्यत्र ब्रह्मप्रतिपत्तेः प्रतिबन्धकमज्ञानमनृतमित्युक्तम्, तन्न संभवति; ब्रह्मप्रतिपत्त्यभावेन तत्प्रतिबन्धकल्पनाऽयोगात्, कल्पनायामपि प्रतिबन्धकान्तरमेव कल्प्यतामित्याशङ्क्य, प्रतिबन्धकान्तरानिरूपणान्न तत्कल्पनमिति तावदाह—*सुषुप्त इति*॥ सुषुप्तेः सकलविशेषज्ञानोपरमत्वान्न तत्र मिथ्याऽज्ञानं प्रतिबन्धकमस्तीत्यर्थः। रूप्यभ्रमसंस्कारे सत्यपि शुक्तिबोधदर्शनान्न संस्कारस्यापि प्रतिबन्धकत्वमित्याह—*तत्संस्कारस्येति*॥ अग्रहणपक्षेऽपि किमागन्तुकग्रहणाभावः प्रतिबन्धकः? उत स्वरूपग्रहणाभावः? नाद्यः; इत्याह—*कादाचित्केति*॥ न द्वितीयः; ग्रहणस्य स्वरूपत्वे तदभावानुपपत्तेस्तस्य प्रतिबन्धकाकाङ्क्षाभावान्न तत्कल्पनमित्युक्तं निरस्यति—*स्वरूपचैतन्येनैवेति*॥ आच्छादकसद्भावे वाक्यान्तरमुदाहरति—*तम इति*॥ अनृतमपिधानमेषां ते तथोक्ताः। अग्रहणादीनामप्रतिबन्धकत्वेऽप्यन्यत्कर्म प्रतिबन्धकमिति शङ्कां निराकुर्वन्नुपसंहरति—*ततश्चेति*॥ कर्मणः प्रतिबन्धकत्वे तन्निवृत्त्युपायाभावाद् न कदाचिदपि तत्प्रतिभास इत्यर्थः। असत्यवदनमनृतमिति शङ्कां व्यावर्तयति—*मिथ्येति*॥

वार्तिकम्

रजतत्वम्, न व्यावहारिकमिति—वाच्यम्; सत्यरजतेन सह मिथ्यारजतस्यानुगतप्रतीतिविरोधात्तद्भेद-

पञ्चपादिकाविवरणम्

"अनीशया शोचति मुह्यमानः" इति स्वभावसिद्धेश्वरस्यानीश्वरत्वं तद्भावाप्रतिपत्तिरेव ; वस्तुनोऽनपायात्, ततश्चेश्वरभावाप्रतिपत्तेः शोकस्य च निमित्तं मोहं दर्शयति। आदिशब्दात् "न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव। नीहारेण प्रावृता जल्प्याचासुतृप उक्थशासश्चरन्ती"ति। नीहारं तमोऽज्ञानमित्यनर्थान्तरम् ; तेन प्रावृतत्वमेव जीवानां ब्रह्मापरिज्ञाने जल्प्यत्वाद्यध्यासे च निमित्तं दर्शयति। तथा "अविद्यायामन्तरे वर्तमाना नान्यच्छ्रेयो वेदयन्ते" इति श्रेयोरूपब्रह्मापरिज्ञाने क्रियाकारकाद्यध्यासे च निमित्तभूतामविद्यां दर्शयन्तीत्याद्याः, "अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ती"त्याद्याः स्मृतयोऽपि द्रष्टव्याः ॥

ऋजुविवरणम्

अतोऽनृतशब्देन मिथ्यावस्तुप्रतिपादनं निश्चेतुं न शक्यते, अतो नेयमुदाहर्तुमुचितेत्याशङ्क्य व्याचष्टे—*"अनीशया-शोचती"ति* ॥ मुह्यमानोऽनीशया शोचतीत्यन्वयः। *ननु*—नीहारेण प्रावृतत्वे कथं भवदभिमतदोषसिद्धिः? तेन प्रावृतत्वं स्वरूपेण प्रतीयते यतः ; नतु तस्य ब्रह्माप्रतिपत्तौ निमित्तत्वमित्याशङ्क्याह—*नीहारं तम इति* ॥ इदानीमविद्यारूपत्वमस्येति सप्रमाणमाह—*तथाऽविद्यायामिति* ॥ उदाहृतश्रुतीनामयमेवार्थ इति दर्शयितुं स्मृतिमुदाहरति—*अज्ञानेनावृतमिति* ॥ "विद्यैवे"त्यनेन कथमर्थापत्तिरुच्यते ? नहि विद्याया मोक्षसाधनत्वमज्ञानेन विना नोपपद्यते, यतो गरुडध्यानाद्विषनिवृत्तिवदुपपद्यते। "*अनवगमोऽविद्यात्मकः"इत्ययुक्तम्* ; अनवगमशब्देनाभावे विवक्षिते विरोधः ; अविद्याया बन्धस्य वा तदात्मकत्वायोगात्, अज्ञाने तु विवक्षिते वैयर्थ्यमविद्याशब्दस्य, अज्ञाने

तत्त्वदीपनम्

"अनीशया शोचती"त्यत्रेश्वरत्वाभावस्य तृतीयया शोक-मोहहेतुत्वप्रतीतेः कथमज्ञानसिद्धिः? इत्याशङ्क्याह—*अनीशयेति* ॥ मुह्यमानः सन्नीश्वरभावं न प्रतिपद्यते, ततः शोकोपलक्षितं संसारमनुभवतीत्यर्थः। यूयं तमीश्वरं न विदाथ, तस्मात्प्रतिपत्त्युपायं कुरुत। ईश्वरस्यासत्त्वादेवाप्रतिपत्तिः, नास्मदपराधादित्याशङ्क्याह—*य इति* ॥ इमाः प्रजाः *जजान = जनितवान्। कार्यलिङ्गेनेश्वरसिद्धेर्न तदपलाप इति। परमाणुवदयोग्यत्वादग्रहणमित्याशङ्कां निरस्यति—*अन्तरमिति* ॥ युष्माकं ब्रह्मणश्चान्तरं व्यवधानं बभूव। देशादिविलक्षणं तदित्याह—*अन्यदिति*॥ किं तदन्तरम्? किं च तत्कृत्यम्? इत्यत्राह—*नीहारेणेति* ॥ आच्छादकत्वसाम्यान्नीहारशब्दोऽज्ञाने प्रयुक्तः। प्रावृतत्वमाच्छन्नपरिपूर्णस्वरूपता, अतो विक्षेपविषया इत्याह—*जल्प्या इति* ॥ 'मनुष्यः' 'ब्राह्मणः' इत्याद्यध्यासविषया इत्यर्थः। *असून् = प्राणानिन्द्रियाणि तर्पयन्तीत्यसुतृपः। उक्थशब्देन कर्माङ्गाभिधानद्वारा कर्मोपलक्षितम्। तस्मिन् शास्यन्ते विधिवाक्ये ये पुमांसः, ते तथोक्ताः। *चरन्ति = संसारचक्रे भ्रमन्तीत्यर्थः। *ननु* अत्र नीहारस्याऽऽवारकत्वं प्रतिभाति, नाज्ञानस्येत्यत्राह—*नीहारमिति* ॥ ब्रह्मण आत्मत्वात्प्रसिद्धनीहारस्याच्छादकत्वानुपपत्तेरज्ञानं नीहारमित्यर्थः। वाक्यान्तरमुदाहरति—*तथाऽविद्यायामिति* ॥ ऐहिकाऽऽमुष्मिकपुरुषार्थव्यतिरिक्तं ब्रह्माख्यं श्रेयो न जानन्तीत्यर्थः। "आवृतं ज्ञानमि"त्यत्र ज्ञानशब्देन स्वरूपज्ञानं गृह्यते ॥

ज्ञानस्य मोक्षसाधनत्वानुपपत्त्याऽविद्यात्मको बन्धोऽस्तीत्युक्तम्, तदनुपपन्नम् ; अविद्यायाः प्रस्तुतत्वाद् अविद्याऽस्तीति वक्तव्यम्, नच बन्धोऽस्तीति ; तथा मोक्षस्य ब्रह्मात्मभावलक्षणस्य नित्यत्वाद् ज्ञानसाध्यत्वं

वार्तिकम्

कल्पनानुपपत्तेः। नच—रजतप्रतीतिवदनुगतप्रतीतिरपि भ्रान्तेति—वाच्यम् ; बाधानुपलब्धेः। न हि शुक्तौ 'नेदं रजतमि'ति रजतत्वबाधवद् 'मिथ्यारजतं रजतं न भवती'ति मिथ्यारजते तद्बाधोऽस्ति, येन रजतमिथ्यात्ववत्तन्मिथ्यात्वं भवेत्। 'नेदं रजतमि'ति विशिष्टबाधात्तन्मिथ्यात्वाध्यवसानमिति चेत्, सत्यं शुक्तावेव तदित्यवोचाम ; अन्यथा धर्माध्यासे सत्यानृतात्मकत्वासिद्धेः, रजत-शुक्तिगतरजतत्वयोरुभयोरपि

पञ्चपादिका

ननु न जीवो ब्रह्मणोऽन्य इत्युक्तम् ॥

पञ्चपादिकाविवरणम्

अर्थापत्तिरपि --ब्रह्मज्ञानाद्बन्धनिवृत्तिः श्रूयमाणा ब्रह्मणि प्रागनवबोधोऽध्याससम्बन्धहेतुरस्तीति कल्पयतीति फलश्रुत्यनुपपत्तिः, अथवा "द्रष्टव्यः" इत्यादिदर्शनविधानानुपपत्तिर्वा प्रागनवगममन्तरेणेति, जीवस्य ब्रह्मस्वरूपानवभासनिमित्तं जीवाश्रिताध्याससम्बन्धहेतुरज्ञानदोषो विद्यत इत्युक्तम्। अत्र च साक्षिवेद्यस्याऽज्ञानस्य प्रमाणैरभावव्यावृत्तिः प्रदर्श्यत इति न तस्य प्रमाणवेद्यत्वप्रसङ्ग इति। तत्र चोदयति—*ननु न जीवो ब्रह्मणोऽन्य इति* ॥ किमत्र जीव-ब्रह्मणोरेकत्वात्पर्यनुयुज्यते ?—किमेकत्वादाश्रय-विषयभेदानुपपत्तिः ?

ऋजुविवरणम्

प्रमाणं वक्तुं प्रक्रम्य बन्धास्तित्वसाधनमप्ययुक्तम्,काऽसौ श्रुतिरनुपपन्नेति न ज्ञायते ? तदर्थं व्याचष्टे—*ब्रह्मज्ञानादिति*॥ "अनवगमोऽविद्यात्मक"इत्यस्य व्याख्या = *अनवबोधोऽध्यासेति* ॥ *ननु*—दोषसाधनमत्र प्रस्तुतम्, नच फलश्रुत्यन्यथानुपपत्त्या दोषत्वसिद्धिः ; अज्ञानात्मकत्वेनैव निवृत्तिसिद्धेरित्याशङ्क्याह—*अथवेति* ॥ स्वरूपाऽनवभासे विपर्ययावभासे च प्रमाणविधानं युज्येत ; तथाच सति दोषवत्त्वमेव भवेदित्यर्थः। *ननु*—फलश्रुतिसामर्थ्यादपि दोषत्वं सिद्ध्येत्, अज्ञानकार्यत्वसिद्धौ तस्याप्रतिबन्धेऽधिष्ठाने विक्षेपपूर्वत्वाभावात्प्रतिबन्धकत्वादिना दोषत्वासिद्धौ बन्धनिवर्तकप्रमाणमपि तथाविधमेव भवति ; अतो न पक्षान्तरोपन्यासो युक्तः, *मैवम्* ; अर्थापत्त्युपस्थितार्थसामर्थ्यसिद्धस्य फलश्रुत्यन्यथानुपपत्तिगम्यत्वायोगात्। अत्र तु साक्षात्तत्सिद्धिरिति विषयव्याप्त्यर्थं वा पक्षान्तरप्रदर्शनमित्यनवद्यम्। *ननु* एवमप्यज्ञानस्य प्रमाणगम्यत्वेन तात्त्विकत्वं स्यादित्याशङ्क्याह—*अत्र च साक्षीति* ॥ *ननु*—जीव-ब्रह्मणोरभेदादज्ञानसंबन्धो न घटत इति चोदिते, कथमनन्यत्वमेव "बाढमि"त्यनेनाज्ञानसाधनेऽपि हेतुत्वेनोच्यते ? नहि विरोध्येव तत्साधने हेतुर्भवतीत्याशङ्क्याविरोधेन हेतुत्वं दर्शयितुं विकल्पयति—*किमत्रेति* ॥ तत्र प्रथमपक्षेऽप्येवं विकल्पः—किमज्ञानमाश्रय-विषयभेदमपेक्ष्य तत्संबन्धि भवति ? किं वा सम्बन्धोत्तर-

तत्त्वदीपनम्

वानुपपन्नमित्याह—*अर्थापत्तिरपीति* ॥ अर्थापत्तिरपि द्रष्टव्येति पूर्वेणानुषङ्गः। काऽसावर्थापत्तिः ? इति वीक्षायामाह—*ब्रह्मज्ञानादिति* ॥ बन्धस्य परमार्थत्वे ज्ञाननिवर्त्यत्वानुपपत्तेस्तस्याविद्यात्मकत्वमाश्रयणीयम्, ततोऽविद्याऽऽश्रयणीयेत्येतदुच्यते टीकयेत्यर्थः ॥

दर्शनविध्यनुपपत्त्याऽविद्याऽऽश्रयणीयेति पक्षान्तरमाह—*अथवेति* ॥ दर्शनोद्देशेन श्रवणादि विधीयमानं निवर्त्याऽविद्यामन्तरेणाऽनुपपद्यमानमविद्यां गमयति, न च ब्रह्मस्वरूपबोधनार्थं श्रवणादि विधीयते ; ब्रह्मणः स्वप्रकाशत्वेनान्यनिरपेक्षत्वादित्यर्थः। अज्ञानस्य प्रमाणगम्यत्वेऽपसिद्धान्ताऽऽपातः, सत्यत्वं चेत्याशङ्क्याह—*अत्रेति* ॥ अस्मिन् ग्रन्थ इत्यर्थः। साक्षिवेद्यत्वान्नापसिद्धान्तः। नच प्रमाणोपन्यासवैयर्थ्यम् ; अभावत्वभ्रमव्यावृत्त्यर्थत्वात्, अभावव्यावृत्तिप्रतिपादकप्रमाणादज्ञानसिद्धेः प्रामाणिकत्वमित्यपि न ; आरोपितसंसर्गमिथ्यात्वस्याप्रामाणिकत्वेऽपि सांसर्गिकत्वं न यथा, तद्वदत्रापीत्यर्थः। ब्रह्माभिन्नत्वाज्जीवस्य नाज्ञत्वमित्युक्तं चोद्यमनुवदतीत्याह—*तत्रेति* ॥ एकत्वेन प्रतीचोऽज्ञानसंबन्धे प्रतिक्षिप्ते कथं तेनैव हेतुनाऽज्ञानं साध्यते टीकायाम् ? इत्याशङ्क्य, विकल्पपूर्वकं टीकां व्याकरोति—*किमत्रेति* ॥ अज्ञानस्याऽऽश्रय-विषयभेदसापेक्षत्वात्प्रत्यग्ब्रह्मैक्ये च तदभावादविद्यासंभव इत्याऽऽद्यविकल्पार्थः। स्वप्रकाशस्वभावस्योष्णांशोः सन्तमसानाश्रयत्ववदात्मनः प्रकाशात्मकस्याविद्याश्रयत्वानुपपत्तिरिति द्वितीयविकल्पार्थः। प्रत्यगैक्याद् ब्रह्मणोऽज्ञत्वम्, ततः सर्वज्ञत्व-नित्यमुक्तत्वादेर्विरोध इति तृतीयविकल्पार्थः।

वार्तिकम्

मिथ्यात्वात्। नच—धर्माणां परस्परविनिमयमात्रम्, न तेषां परस्पराध्यास इति—वाच्यम् ; तेषां

पञ्चपादिकाविवरणम्

किं वा चित्स्वभावस्याविद्याश्रयत्वविरोधः ? ब्रह्मणो वा सर्वज्ञत्वादिहानिरिति ? न तावदज्ञानमाश्रय-विषयभेदापेक्षम्, किन्त्वेकस्मिन्नेव वस्तुन्याश्रयत्वमावरणञ्चेति कृत्यद्वयं सम्पादयति ; स्वाश्रयापवरकप्रदेशे कृत्यद्वयसम्पादितमोवत् ; अक्रियात्मकत्वात्, आवरणत्वाच्च । नहि तमो वस्तुद्वयापेक्षमवभासते । अज्ञानमिति च द्वयापेक्षज्ञानपर्युदासेनाभिधानाद् द्वयसापेक्षवदवभासते । यथा स्थितिरगमनशब्देनाभिधीयमाना कस्य ? किंविषयमगमनम् ? इति कर्मसापेक्षवद्भाति ; तद्वत् । तमोवच्च स्वाश्रयावरणमज्ञानं स्वाश्रयैकत्वेन न विरुध्यते । नापि स्वाश्रय-

ऋजुविवरणम्

कालं तदेकत्वं निरुन्ध्यादिति ? न तावत्प्रथमः कल्प इत्याह—*न तावदिति* ॥ अयं प्रयोगः—अज्ञानं धर्मि, आश्रय-विषयभेदापेक्षया कृत्यद्वयसम्पादकं न भवतीति साध्यो धर्मः, अक्रियात्मकत्वात् । ज्ञाने व्यभिचारशङ्कानिवृत्त्यर्थं हेत्वन्तरम्—आवरणत्वादिति । यद्वा—ज्ञानस्यापि क्रियारूपत्वेन हेतुद्वयम् । दृष्टान्ते कृत्यद्वयसम्पादकत्वविशेषणोपादानं तस्य पराभ्युपगतहेतुत्वेनैकान्तिकत्वप्रदर्शनार्थम् । *ननु* तमः स्वोपादानाश्रितं तद्देशविषयं च, अतः कथमुदाहरणम् ? इत्याशङ्क्याह—*नहि तमो वस्त्विति* ॥ प्रतीतिकृतो विरोधः, सोऽत्र नास्ति ; एकवस्तुगतत्वप्रतीतेः, यद्वा—स्वोपादानगतस्यापि देशाश्रयत्वं घटस्येव भूतलाश्रयत्वमिति, यद्वा—भेदस्य धर्मि-प्रतियोग्यपेक्षया प्रतीतिवद् नाऽऽश्रय-विषयभेदसापेक्षा तमःप्रतीतिः ; अतो विद्यमानोऽपि भेदो न प्रयोजक इति भावः । *ननु* अज्ञानमाश्रय-विषयभेदापेक्षयैव प्रतीयते—अस्यात्राज्ञानमिति, अतो बाधितविषयमनुमानमित्याशङ्क्याह—*अज्ञानमिति चेति* ॥ तमोनीहारशब्देन प्रतीतौ तदभावादिति भावः । *ननु*—स्वत आश्रय-विषयभेदानपेक्षस्य निषेध्यापेक्षया तद्वत्प्रतिभानं न दृष्टमित्याशङ्क्याह—*यथा स्थितिरिति* ॥ *ननु*—मा भूदाश्रय-विषयभेदापेक्षित्वम्, सम्बन्धोत्तरकालं तदेकत्वं विरुणद्धीति द्वितीयकल्पं मनसि निधायाह—*तमोवच्चेति* ॥ द्वितीयेऽपि कल्पे परिहारमाह—*नापि स्वाश्रयेति* ॥

तत्त्वदीपनम्

आद्यं दूषयति—*न तावदिति* ॥ अज्ञानम्, नाश्रय-विषयभेदापेक्षम्, तमस्त्वात् ; बाह्यतमोवदित्यर्थः । तर्हि किं क्रियाद्यपि तद्भेदानपेक्षमिति पृच्छति—*किंत्विति* । विमतम्, आश्रयातिरिक्तविषयसापेक्षम्, सविषयत्वात् ; क्रियाशक्त्यादिवदित्यर्थः । अप्रयोजको हेतुरित्याह—*एकस्मिन्निति* ॥ तर्हि क्रियादेरप्याश्रयातिरिक्तविषयापेक्षत्वं न स्यादित्याशङ्क्य, ततो वैलक्षण्यमाह—*अक्रियेत्यादिना* ॥ बाह्यतमसः स्वोपादानाश्रितस्यान्यत्राऽऽवारकत्वात्साध्यवैकल्यमित्याशङ्क्याह—*नहीति* ॥ मृन्निष्ठस्य घटस्य भूतलनिष्ठत्ववत्तमसः स्वोपादानाश्रितस्याप्यन्याश्रयविषयत्वे न विरुद्धे इत्यर्थः । 'अस्यास्मिन्नज्ञानमि'त्याश्रयादिभेदप्रतीत्या विरोधमाशङ्क्य, प्रतीतिमन्यथयति—*अज्ञानमिति* ॥ ज्ञानस्य द्वयसापेक्षत्वान्न तत्प्रतियोगिकाज्ञानस्यापि तत्सापेक्षत्वप्रथा घटत इत्यर्थः । तत्र दृष्टान्तमाह—*यथेति* * ॥ उपसंहरति—*तमोवदिति* ॥ अज्ञानम् न स्वाश्रयाऽऽवारकम्, आवारकत्वात् ; शुक्त्यज्ञानवदित्याशङ्क्य, तमसि व्यभिचारमाह—*तमोवदिति* ॥ शुक्त्यज्ञानस्यापि चिन्मात्रतन्त्रस्य तदावारकत्वाभ्युपगमात्साध्यवैकल्यं चेति चशब्दार्थः । आत्मा, न तमआश्रयः, प्रकाशत्वात् ; संप्रतिपन्नवदित्युक्ते तद्विरुद्धत्वमुपाधिः । नच साधनव्यापकतेत्याह—*नापीति* ॥ यत्र प्रकाशत्वं तत्र तद्विरुद्धत्वमिति न व्याप्तिः ; संवेदने

वार्तिकम्

परस्पराध्यासमन्तरेण विनिमयासिद्धेरुक्तत्वात्, "तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः" "अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्ये"ति च पूर्वपक्ष-सिद्धान्तभाष्यानुपपत्तेश्च । *एतेन*—शुक्तिगतशुक्लरूपादिना रजतगतानिर्वचनीयशुक्लरूपादेश्च परस्पराध्यासस्तस्य च सत्यानृतात्मकत्वम्—*व्याख्यातम्* ; नच—एवं शुक्तौ रजतत्वाद्यध्यास आत्मनि कामाद्यध्यासवदौपाधिकः स्यादिति—वाच्यम् ; इष्टापत्तेः, धर्माध्यासस्य सर्वत्रौपाधिकत्वात्, धर्म्यध्यासस्यैव निरुपाधिकत्वनियमात् ।

पञ्चपादिकाविवरणम्

चित्प्रकाशेन विरुध्यतेऽज्ञानम्; स्वाभासकेन संवेदनेन चित्प्रकाशेनाज्ञानस्याविरुद्धत्वात्, साक्षिचैतन्यस्य चाज्ञानावभासकत्वात्। अतो न चिदाश्रयत्वविरोधः॥

किञ्च जन्यज्ञानेनात्मन्यवस्थात्रयेऽवभासमान एव स्व-परविषयाज्ञानाश्रयत्वं सर्वैरेवोपगन्तव्यमिति, नावभासमानेऽज्ञानाश्रयत्वविरोधः। नच प्रकाशमात्रमज्ञानविरोधि; स्वज्ञानेऽभावात्। नच स्वयंप्रकाशमानेऽज्ञानसंसर्गविरोधः क्वचिद् दृष्टः; विषयाणां परप्रकाश्यानामेव तत्संसर्गविरोधात्। संवेदनस्यात्मस्वरूपत्वादेव

ऋजुविवरणम्

"स्वाऽऽभासकेन संवेदनेने"ति निदर्शनम्। स्वस्याभासं प्रकाशं करोतीति स्वाभासकम्, तेन संवेदनेनेत्यर्थः। *अथवा*—"स्वाभासकेने"ति वैधर्म्यनिदर्शनम्। स्वस्याऽभासनं निवृत्तिं करोतीति स्वाभासकं बाधकज्ञानम्, तद्वदित्यर्थः। *अथवा*—चित्प्रकाशस्याविरुद्धत्वे स्वाभासकेनेति हेतुः। *ननु*—भवतु स्वविषयज्ञानस्याविरुद्धत्वम्, चित्प्रकाशस्य तु कथमविरोधितेति? तदाह—*साक्षिचैतन्यस्य चेति*॥ अथवा कथमवभासकत्वेनाविरुद्धत्वम्? तस्यैवासिद्धत्वादित्याशङ्क्याह—*साक्षिचैतन्यस्य चेति*॥

ननु—कथमवभास्यत्वेनाविरुद्धता? स्थितस्य ह्यवभास्यता। नच प्रकाशमानेऽज्ञानाश्रयत्वसंभवः, इत्याशङ्क्याह—*किंच जन्यज्ञानेनेति*॥ *ननु*—ज्ञानमज्ञाननिवर्तकमिष्यते, तत्कथमवभासमानात्मन्यज्ञानम्? अतः कथमविरोधित्वेनाश्रयत्वम्? इत्याशङ्क्याह—*नच प्रकाशमात्रमिति*॥ कथमनिदर्शनेनाविरोधनिश्चयः? सिद्धे ह्यविरोधे तद्विषयज्ञानसिद्धिः; नान्यथा। तत्र च विषयत्वमेव, तच्च विरोधेऽपि भवति, अत्र तु संसर्गो वक्तव्यः, न तु स्वयं प्रकाशमानेऽज्ञानसंबन्धो घटते; सवितुरिव तमःसंबन्धः। तदुक्तम्—

"नन्वविद्या स्वयंज्योतिरात्मानं ढौकते कथम्। कूटस्थमद्वितीयं च सहस्रांशुं यथा तमः॥" इति॥

इत्याशङ्क्याह—*नच स्वयंप्रकाशेति*॥ अयं भावः—प्रसिद्धं तावदज्ञानं नेति वक्तुं न शक्यम्। नच जडगतत्वेन निश्चेतुमपि शक्यम्; जडस्य तत्स्वरूपसापेक्षत्वात्, अज्ञाते च ज्ञाते च तस्मिन् अज्ञानावगमायोगादिति। तदुक्तम्—

"प्रसिद्धत्वादविद्यायाः साऽपह्नोतुं न शक्यते। अनात्मनो न सा युक्ता विना नात्मा तथा नहि॥" इति॥

ननु—स्वयंप्रकाशे संवेदनेऽज्ञानसम्बन्धविरोधदर्शनादात्मन्यपि तदनुमीयते, इत्याशङ्क्याह—*संवेदनस्येति*॥

तत्त्वदीपनम्

व्यभिचारादित्याह—*स्वावभासकेनेति*॥ आत्मा, अज्ञानविरोधि, तद्भासकान्यत्वे सति चित्त्वात्; तन्निवर्तकसंविद्वदित्याशङ्क्यासिद्धिमाह—*साक्षीति*॥ साधनव्यापकत्वनिरसनमुपसंहरति—*अत इति*॥ विरोधप्रयोजकमपि दुर्निरूपमित्याह—*किंचेति*॥

किं भासमानत्वं प्रयोजकम्? उत ज्ञानमात्रम्? आहो स्वयंभासमानत्वम्? इति विकल्प्याऽऽद्यं प्रत्याह—*जन्येति*॥ 'सुखमहमस्वाप्समि'ति परामर्शानुपपत्त्या सुषुप्तावप्यात्मनोऽवभासमानत्वमाश्रयणीयम्; अन्यथा परामर्शानुपपत्तेः। तत्र च स्वयंभासमानत्वानाश्रयणादन्यतो भासमानत्वमाश्रयणीयम्। ततश्च न भासमानस्याज्ञानसंबन्धविरोध इत्यर्थः। *अथवा*—जन्यज्ञानेन भासमानस्याप्यज्ञानाश्रयत्वम्, किं पुनर्नित्यचैतन्यस्येत्याशयेनोक्तम्—*जन्यज्ञानेनेति*॥ कुतस्तदिति शङ्कायामाह—*अवस्थेति*॥ अहं-ममाभिमान-रजतादिभ्रमाणामुत्पत्तेः प्राक् तद्धेतुत्वेन, तत्समये स्थितिहेतुत्वेनानन्तरं भ्रमान्तरहेतुत्वेनेति कालत्रयेऽपि स्व-परविषयाज्ञानाश्रयत्वमेष्टव्यमित्यर्थः। द्वितीयं दूषयति—*नचेति॥ स्वज्ञान इति*॥ अज्ञानविषयज्ञान इत्यर्थः। तृतीयं प्रत्याह—*नचेति*॥ स्वप्रकाशस्याज्ञानसंसर्गविरोधव्याप्तेरदृष्टत्वादित्यर्थः। कथमदर्शनमिति चेत्, तत्र किमनात्मनि व्याप्तिदर्शनम्? उत संवेदने? इति विकल्प्याऽऽद्ये व्याप्त्यभावमाह—*विषयाणामिति*॥ द्वितीयेऽपि संवेदनं किं वृत्तिरूपम्? उत स्वरूपज्ञानम्?

पञ्चपादिका

बाढम् ; अत एवार्थाज्जीवे ब्रह्मस्वरूपप्रकाशाच्छादिकाऽविद्या कल्प्यते ; अन्यथा

पञ्चपादिकाविवरणम्

तदाश्रयाज्ञानोपगमान्न तदुदाहरणम् । *अथ* ब्रह्मणः सर्वज्ञत्वविरोधादैक्ये सति नाज्ञानमुपपद्यत इति, *न* ; जीवाश्रयत्वोपगमात् । *ननु* ऐक्यमुक्तम्, सत्यम् ; सत्यप्यैक्ये प्रतिबिम्बात्मन्यध्यस्तश्यामत्वादेर्बिम्बेऽदर्शनाद् अवदाततायाश्चाविरोधदर्शनात्, एवं सर्वज्ञत्वाविद्याश्रयत्वयोः सत्यप्यैक्येऽविरोधात् । तस्मान्नैक्यमविद्याऽऽश्रयत्वेन विरुध्यते, किंत्वविद्यामेवोपपादयतीत्याह—*बाढमत एवार्थादिति* ॥ ऐक्ये स्वयंप्रकाशत्वे सर्वज्ञत्वे च सत्येवानवभासदर्शनादाच्छादिकाऽविद्या कल्प्यते ; अन्यथा भेद-जाड्य-किंचिज्ज्ञत्वे ग्रहणाभावमात्रमेव स्यात् ;

ऋजुविवरणम्

इदानीं किंचेत्यादेरर्थान्तरम् ॥ *ननु*—कथं साक्षिचैतन्यस्याज्ञानावभासकत्वेनाविरुद्धत्वम् ? पूर्वज्ञानावभासकस्याप्युत्तरज्ञानस्य तेन विरोधदर्शनादनैकान्तिकत्वादित्याशङ्क्य, विरोधवादिनाऽपि किं प्रत्यक्षेण विरोधो ज्ञायते ? किंवाऽनुमानेन ? इति विकल्प्य, न तावत्प्रत्यक्षेणेत्याह—*किंच जन्यज्ञानेनेति* ॥ अनुमानपक्षेऽप्यवभासमानत्वं हेतुः ? किं वा प्रकाशत्वम् ? उत स्वप्रकाशत्वम् ? साध्येऽप्येवं विकल्पः—आश्रयत्वविरोधः ? स्वरूपविरोधो वा ? संसर्गविरोधो वा ? तत्र प्रथमपक्षे बाधितविषयत्वं दर्शयति—*किंचेति* ॥ द्वितीयेऽनैकान्तिकत्वमाह--*नच प्रकाशेति* ॥ तृतीये दृष्टान्ताभावमाह—*नच स्वयमिति* ॥ अथवा---किंचेत्यनेन प्रत्यक्षनिराकरणम्, उत्तरेणानुमाननिराकरणम् । तत्र प्रकाशत्वादिति हेतोः स्वज्ञाने व्यभिचार इत्याह---*नच प्रकाशेति* ॥ "न च स्वयं प्रकाशमाने"इत्यनेन तत्रैव दृष्टान्ताभावमाह । *अथवा*---"नच प्रकाशे"त्यनेन स्वज्ञाने व्यभिचार उक्तः, कथं स्वज्ञाने व्यभिचारः ? न ह्यज्ञानविषयं ज्ञानं संप्रतिपन्नमस्तीत्याशङ्क्य दूषणान्तरमाह---*नच स्वयमिति* ॥ दृष्टान्ताभावेनासाधारण्येऽनैकान्तिकत्वमित्यर्थः । "विषयाणामि"त्यनेन सोपाधिकत्वमुक्तम् ; परप्रकाश्यत्वमुपाधिरित्यर्थः । *ननु*--स्वयंप्रकाशमाने घटादिसंवेदने ज्ञानादर्शनात् तदेव निदर्शनम्, अतः कथमसाधारणत्वम् ? इत्याशङ्क्याह---*संवेदनस्येति*॥"अत एवार्थादि"ति कथमुक्तम् ? न ह्येकत्वमज्ञानेन विनाऽनुपपन्नम् कथं तदुपजीव्यम् ? इत्याशङ्क्य व्याचष्टे—*ऐक्ये स्वयंप्रकाशत्व इति* ॥ तत्रानवभासमात्रेणैवाज्ञानं सिद्ध्यतीति, किमिति विशिष्टानुपपत्तिः प्रमाणत्वेनोच्यते ? इत्याशङ्क्याह—*अन्यथा भेदेति* ॥ कथम्—"अतोऽविद्यावच्छिन्ने"त्युपसंह्रियते ? अनुक्तत्वादविद्यावच्छिन्नत्वस्य,नापि तदेव प्रतिपाद्यते ; असंगतत्वादित्या-

तत्त्वदीपनम्

आद्ये व्याप्त्यभावः ; वृत्तेरन्यप्रकाश्यत्वात्, न द्वितीयः ; संदिग्धसाध्यतया तस्य पक्षत्वान्न व्याप्तिस्थलतेत्याह —*संवेदनस्येति* ॥ तृतीयमुत्थापयति—*अथेति* ॥

गूढाभिसन्धिरुत्तरमाह—*न जीवेति* ॥ अभिसन्धिमजानान उक्तं चोद्यं स्मारयति—*नन्विति* ॥ ऐक्यमात्रमङ्गीकरोति—*सत्यमिति* । ऐक्यस्य प्रामाणिकत्वे ब्रह्मणोऽप्यज्ञत्वम्, तत्राह—*सत्यपीति* ॥ बिम्ब-प्रतिबिम्बयोरैक्येऽप्युपाधिभेदात् श्यामत्वादिव्यवस्थावद् व्यवस्थेत्यर्थः । कल्पत्रयनिराकरणमुपसंहरति—*तस्मादिति* ॥ न केवलमैक्यस्य विरोधित्वाभावः, किंतु तदुपपादकत्वमपीत्याह—*किंत्विति* ॥ ऐक्यस्याज्ञानं विनाऽनुपपत्त्यभावात् कथं तदुपपादकत्वमुक्तम् ? इत्याशङ्क्याह—*ऐक्य इत्यादिना* ॥ ऐक्ये सत्येवानवभासदर्शनादविद्या कल्प्यत इत्यन्वयः । ऐक्येऽपि तस्य जाड्येनानवभासः संभवत्यविद्यां विनाऽपीत्यत्राह—*स्वयंप्रकाशत्व इति* ॥

अहमित्युपलब्धाकाराद् ब्रह्मणो व्यतिरेकाभावात्तदनवभासोऽसिद्ध इत्याशङ्क्य, सर्वज्ञत्व-सर्वशक्त्यनवच्छिन्नानन्दात्मक-ब्रह्मानवभासार्थमविद्याऽऽश्रयणीयेत्याह—*सर्वज्ञत्व इति* ॥ अन्यथोपपत्तिं परिहरति—*अन्यथेति* ॥ आच्छादकाभावेऽनवभाससिद्ध्यर्थं तयोर्भेद इत्याह—*भेदेति* ॥ श्रुतिविरोधाद् भेदानुपपत्तिश्चेत्, तर्ह्यात्मनो जाड्यमाश्रयणीयमित्याह—*जाड्य इति* ॥ स्वयंज्योतिष्ट्ववचनविरोधाद् जाड्यासंभवश्चेत्, तर्हि न सर्वज्ञत्वादि-

पञ्चपादिका

परमार्थतस्तत्स्वरूपत्वे तदवबोधोऽपि यदि नित्यसिद्धः स्यात्, तदा तादात्म्योपदेशो व्यर्थः स्यात्। अतोऽनादिसिद्धाविद्यावच्छिन्नानन्तजीवनिर्भासास्पदमेकरसं ब्रह्मेति श्रुति-स्मृति-न्यायकोविदैरभ्युप-

पञ्चपादिकाविवरणम्

ततश्च तमोऽनृत-नीहाराज्ञानावृतत्वादिशब्दा अनवभासाध्यासनिमित्तभावरूपाज्ञानप्रतिपादका बाध्येरन्निति ॥ *ननु* एकद्रव्यत्वे सति जीव-ब्रह्मविभागः किंनिबन्धनः? यतः सर्वज्ञत्वाविद्याऽऽश्रयत्वे व्यवस्थाप्येते इति, अन्तःकरणावच्छेदात्कश्चिद्भेदं वक्ति, अन्यस्त्वतिरेकात्, अपरस्तु स्वभावादेवांशांशिभावात्, तत् सर्वं व्यावर्तयति—*अतोऽनादिसिद्धाविद्यावच्छिन्नेति* ॥ आत्माऽऽवरणमात्माज्ञानमेव जीव-ब्रह्मविभागाद्यध्यासोपादानं यतः, अतो जीवावच्छेदनिमित्तमज्ञानमिति; अवच्छेदस्यापि प्रातिभासिकाध्यासस्य तदुपादानत्वात्, सत्यतो निरवयवस्य द्वैधीभावायोगात्, कर्तृत्व-भोक्तृत्व-दोष-संयोगानां बीजाङ्कुरवदनादिप्रवाहस्य दर्शितत्वात्। तदुपादानमप्यज्ञानमनादीत्याह—*अनादिसिद्धेति* ॥ अनादिर्जीवविभागाध्यासप्रवाहस्यानाद्यविद्यैव कारणम्, नान्तःकरणादीत्याह—*अविद्यावच्छिन्नेति* ॥

ऋजुविवरणम्

शङ्क्योत्तरचोद्यनिवर्तकत्वेन संगतिं दर्शयितुं चोदयति—*नन्वेकद्रव्यत्व इति* ॥ "अतः" इति कथमुक्तम्? न ह्यविद्यावच्छिन्नत्वे किञ्चित्प्रमाणमुक्तमस्ति, यदुपजीव्यत इत्युच्यते, अविद्या-काम-कर्मलिङ्गमवच्छेदकम्, अतोऽविद्यावच्छिन्नेत्ययुक्तमित्याशङ्क्योपस्कारं दर्शयति—*आत्मावरणमिति* ॥ पूर्वोक्तमज्ञानमुपजीव्यत इत्युक्तम्। *ननु*—यदाश्रयोऽवच्छेदः, तदुपादानं स्यात्, कथमज्ञानोपादानत्वम्? यद्वा—"अज्ञानानुपादानाविभाग"इति वक्ष्यते, तत्कथमित्याशङ्क्याह—*अवच्छेदस्यापीति* ॥ प्रातिभासिकाध्यासस्येति हेतुः। प्रातिभासिकाध्यासत्वमपि कथमित्याशङ्क्याह—*सत्यत इति* ॥ भवत्ववच्छेदकत्वमज्ञानस्य, कथमनादित्वम्? इत्याशङ्क्याह—*कर्तृत्व-भोक्तृत्वेति* ॥ *ननु*—प्रातिभासिकोऽवच्छेदो न सुषुप्तौ; तत् कथं तदुपादानता नोदितेति? तत्राह—*अनादिजीवविभागेति* ॥ कथम्? अन्तःकरणस्य कारणत्वाभावः? अविद्यया विशेषाभावादित्याशङ्क्याह—*नचान्तःकरणमिति* ॥ अन्तःकरणनिमित्तत्वे द्वैधीभावेन भवितव्यम्, नचासावास्ते; एकत्वाभावप्रसङ्गात्। यद्वा—अर्थत इत्यज्ञानेन वैलक्षण्यं दर्शितम्। कथं विलक्षणत्वे तत्प्रतीतिः? इत्याशङ्क्याह—*अवच्छेदस्येति* ॥ विभ्रममात्रस्याप्यन्तःकरणोपादानत्वं

तत्त्वदीपनम्

लक्षणं ब्रह्मेत्याह—*किंचिज्ज्ञत्वेति* ॥ एवं सत्यग्रहणमेवाविद्या स्यादित्याह—*ग्रहणेति*। ततः किम्? इत्यत आह—*ततश्चेति* ॥

अविद्यावच्छिन्नजीवनिर्भासाऽऽस्पदं ब्रह्मेति कथमुपसंह्रियते? तस्याप्रस्तुतत्वादित्याशङ्क्य, तद्व्यावर्त्यामाशङ्कामाह—*नन्विति* ॥ जीव-ब्रह्मविभागनिरूपणमकाण्डताण्डवितमित्यत्राह—*यत इति* ॥ तत्र मतान्तराण्युपन्यस्यति—*अन्तःकरणेति* ॥ भेदाभेदव्यवहारसंपादनपटीयान् धर्मविशेषोऽतिरेकः। काल्पनिकांशांशिभावव्यावर्तनार्थम्—*स्वभावादिति* विशेषणम्। अविद्यावच्छिन्नताया अनुपपादनात्कथमुपसंहरणम्? इत्यत्राह—आत्माऽऽवरणेति* ॥ पूर्णात्माऽऽवारकत्वात्तदज्ञानमेवाध्यासोपादानत्वयोग्यं यस्मात्, अतस्तदेवावच्छेदोपादानमिति युक्तमुपसंहरणमित्यर्थः। जनकत्वमात्रं निमित्तशब्दार्थः ॥

अवच्छेदस्य सत्त्वे तदुपादानम्, तदेव कुतस्त्यम्? इत्याशङ्क्याह—*अवच्छेदस्येति* ॥ प्रातिभासिकेति हेतुगर्भविशेषणम्। अध्यस्यत इत्यध्यासः। विमतम्, आरोपितम्, दृश्यत्वात्, शुक्तिरूप्यवत्; ततोऽज्ञाननिमित्तत्वमित्यर्थः। अप्रयोजकत्वं निरस्यति—*सत्यत इति* ॥

वार्तिकम्

ननु—एवं सति द्विचन्द्राध्यासोऽपि निरुपाधिकः स्यात्, तत्र धर्मिणो द्वितीयचन्द्रस्याध्यासादिति—

पञ्चपादिकाविवरणम्

नचान्तःकरणमवच्छेदकम् ; अर्थतो विदारणाभावात्, अवच्छेदस्य विभ्रममात्रत्वात्, अज्ञानस्यैव तदुपादानत्वात्, अन्तःकरणस्य च सम्यग्ज्ञाननिरस्यतयाऽविद्याध्यासत्वात्, स्वकारणावच्छिन्नस्यैवावच्छेदकत्वसंभवात्, सत्यत्वेऽपि सादेरनाद्यविद्योपाधित्वाभावात्, सुषुप्तादौ चान्तःकरणाभावादनवच्छेदप्रसङ्गात्। तदापि सूक्ष्मावस्थमन्तःकरणमवच्छेदकमिति चेत्, किं तावन्निरवयवत्वापत्तिः सूक्ष्मता? सावयवस्यावयवाभावे स्वरूपनाशात्, अथावयवापचयमात्रं सूक्ष्मता? न; अवस्थितावयविनोऽकार्यत्वप्रसङ्गात्, कारणात्मना स्थितिरिति चेत्, किं कारणमेव स्थितमित्यर्थः? कार्यमपीति वा? पूर्वस्मिन्नन्तःकरणाभावात्, इतरस्मिन् स्थित्यवस्थातो न विशेषः। तस्मात् कार्यसंस्कारविशिष्टशक्तिमत्कारणावस्थानमेव सूक्ष्मतापत्तिः। अतो नान्तः-

ऋजुविवरणम्

भवत्विति? नेत्याह—*अज्ञानस्यैवेति*॥ *ननु* अन्तःकरणस्यावच्छेदकत्वं त्वयाप्यङ्गीक्रियते ; कथं तत् निराक्रियते? इत्याशङ्क्याह—*अन्तःकरणस्य चेति*॥ यद्यज्ञानमेवोपाधिरिति सिद्धं भवेत्, ततो ज्ञाननिवर्त्यत्वेन तत्कार्यत्वं भवेत्, नच तदस्ति ; अन्तःकरणमेव सत्यमवच्छेदकम्, आकाशस्येव घट इत्याशङ्क्याह—*सत्यत्वेऽपीति*॥ *अविद्योपाधित्वम्=अविद्यावदुपाधित्वमित्यर्थः। अथवा—तेनापि मिथ्याज्ञानमग्रहणं परं विद्यत इत्यङ्गीक्रियते, सा च जीवाश्रया,अन्तःकरणं च तन्नियामकमित्युच्यते, तन्न ; सादेरन्तःकरणस्यानाद्यविद्योपाधित्वाभावान्नियामकत्वाभावादित्यर्थः। व्यवस्थापकत्वं निराकृत्यावच्छेदकत्वनिराकरणार्थम्—*सुषुप्तादाविति*॥ अथवा—अनाद्येवान्तःकरणम्, तथा सति सर्वमुपपन्नमित्याशङ्क्याह—*सुषुप्तादाविति*॥ *तस्मात् कार्यसंस्कारेति*॥ नच संस्कारस्य तन्मतेऽवच्छेदकत्वम्,

तत्त्वदीपनम्

किंचान्तःकरणमवच्छेदकमिति वदन् प्रष्टव्यः—किं तद् वास्तवावच्छेदस्य हेतुः? उत काल्पनिकस्य? इति। तत्राऽऽद्यं प्रत्याह—*नचेति*॥ अद्वैतश्रुतिविरोधान्न परमार्थतो विदारणमित्यर्थः। कथं तर्हि तत्प्रतिभासः? इत्याशङ्क्याह—*अवच्छेदस्येति*॥ द्वितीयं दूषयति—*अज्ञानस्येति*॥ किंच किमन्तःकरणमपि तात्त्विकम्? उतातात्त्विकम्? इति विकल्प्याऽऽद्यं दूषयति—*अन्तःकरणस्येति*॥ "षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं यन्ति" "भिद्यते हृदयग्रन्थिरि"त्यादिवाक्यादन्तःकरणस्य ज्ञाननिरस्यताऽवसीयते। ज्ञाननिरस्यत्वं चाध्यस्तत्वं विना नेति न तात्त्विकत्वमित्यर्थः। चरमं निरस्यति—*स्वकारणेति*॥ अन्तःकरणस्यावच्छेदकत्वमिच्छताऽज्ञानस्याप्यवच्छेदकत्वमिष्यत एव ; अन्तःकरणस्यारोपितत्वेनाज्ञानात्मकत्वात्, तत उभयोरवच्छेदकत्वकल्पनायां गौरवान्न तावदन्तःकरणमेवावच्छेदकमित्यर्थः। "तन्मनोऽकुरुते"त्यादिश्रुत्याऽन्तःकरणस्य ब्रह्मजत्वात्सत्यत्वं लभ्यते, अतः सत्यमेवावच्छेदकमित्याशङ्क्य, कूटस्थत्वेन साक्षात् कारणताऽसम्भवात्तद्रूपेण विवर्तमानाविद्याधिष्ठानत्वं कारणत्वमिति, न सत्यत्वमन्तःकरणस्य। तदङ्गीकृत्य परिहरति—*सत्यत्वेऽपीति*॥

अवच्छेदवदन्तःकरणस्याप्यनादित्वाद् अवच्छेदकत्वं युक्तमित्याशङ्क्य, किं तत् सुषुप्तिप्रलयादावस्ति? उत न? इति विकल्प्य चरमं निरस्यति—*सुषुप्तादाविति*॥ घटभङ्गे तदुपहितगगनस्य महागगनात्मकत्ववदवच्छेदकविलये जीवस्य ब्रह्मता स्यादित्यर्थः। आद्यमुत्थापयति—*तदापीति*॥ किं निरवयवतापत्तिः सूक्ष्मता? आहो अवयवापचयमात्रम्? उत कारणात्मनाऽवस्थानम्? किं वा कार्यसंस्कारसहितशक्तिमत्कारणावस्थानम्? इति विकल्प्याऽऽद्यं प्रत्याह—*न तावदिति*॥ तन्त्वपगमे पटापगमवदवयवाभावे च सत्यन्तःकरणमपि न स्यादित्यर्थः। द्वितीयमनूद्य दूषयति—*अथावयवेत्यादिना*॥ आरम्भकावयवध्वंसेऽप्यवयविनोऽवस्थाने तस्य तत्कार्यत्वं हीयेतेत्यर्थः। तृतीयमुत्थापयति—*कारणात्मनेति*॥ अत्यन्ताभेदमाश्रित्याऽऽद्यः कल्पः, द्वितीयस्तु भेदाभेदावनुसृत्येति द्रष्टव्यम्। चतुर्थः पक्षः परिशिष्यत इत्याह—*तस्मादिति*॥ अस्त्वेवम्, ततः किम्? इति चेत्, तत्र वक्तव्यम्—किं

वार्तिकम्

चेत्, *न*; स्फटिके लौहित्याऽऽरोपवदेकस्मिन्नेव चन्द्रे द्वित्वधर्ममात्रारोपात् तत्र धर्म्यध्यासासिद्धेः।

पञ्चपादिकाविवरणम्

करणमवच्छेदकमस्ति। तस्मात् क्लृप्ताविद्यासामर्थ्यादेव जीव-ब्रह्मविभागसिद्धौ नातिरेककल्पनावकाशः। 'जीवस्य ब्रह्मण्यविद्ये'त्यविद्या पूर्वमेव विभागमपेक्षत इति चेत्, न; कस्य कस्मादतिरेक इत्यतिरेकस्यापि विभागपुरःसरत्वप्रतीतेः; यथा—भेदाधीनोऽपि धर्मि-प्रतियोगिभावो भेदेनोपरज्यते, कस्य कस्माद्भेद इति? एवमतिरेकाधीनोऽपि जीव-ब्रह्मभावस्तस्मिन्नुपरज्यते। जीवाद् ब्रह्मणोऽतिरेक इति चेत्, अविद्यायामपि तुल्यमेतत्॥ निरंशत्वान्नांशांशिभावेन भेदः संभवति। तस्मादविद्यैव भेदाध्यासनिमित्तमिति॥

ननु अविद्या किंसंबन्धिनी भेदनिमित्तम्? *ननु* दर्पणादिद्रव्यं वा किंसंबन्धि बिम्बभेदनिमित्तम्? मुखमात्रसंबन्धीति चेत्, इहापि चित्स्वरूपमात्रसंबन्ध्यज्ञानं तत्र जीव-ब्रह्मव्यवहारभेदं प्रवर्तयति। कथं पुनः स्वरूपमात्रसंबन्धिनोऽज्ञानस्य ब्रह्मस्वरूपं परिहृत्य जीवविभागैकपक्षपातिता? दर्पण-घटादेर्मुखाकाशभेदे हेतुतया मुखादिसंसर्गिणोऽपि बिम्बाकाशौ परिहृत्य प्रतिबिम्ब-घटाकाशादिपक्षपातित्ववदिति वदामः॥

ऋजुविवरणम्

नापि तद्विशिष्टायाः शक्तेः; तस्या उच्छेत्तुमशक्यत्वे न निर्मोक्षः, उच्छेदे वा जगदनुत्पत्तिप्रसङ्गः; एकत्वादिति भावः। *ननु* अविद्या किं सम्बन्धिनीति* ॥ अयं भावः—संबन्धिनो भेदकत्वम्, नच जीव-ब्रह्मसंबन्धः; इतरेतराश्रयादिति।

तत्त्वदीपनम्

कारणशब्देन परमार्थवस्तु विवक्षितम्? उताज्ञानम्? आद्ये न कदाचिन्मोक्षः; परमार्थस्य निवृत्त्यसंभवात्, द्वितीये प्राप्ताप्राप्तविवेकेनाज्ञानमवच्छेदकं स्यादित्यभिसन्धायोपसंहरति—*अत इति* ॥ अतिरेकपक्षेऽपि वक्तव्यम्—किमतिरेकः पारमार्थिकं भेदं संपादयति? उतापारमार्थिकम्? इति। नाद्यः; श्रुति-स्मृति-न्यायविरोधादित्यभिप्रेत्या-द्वितीये ब्रह्मणि रशनासमारोपितसर्पादाविव हेतुत्वेनानाद्यविद्याया एव विभागहेतुत्वसम्भवेऽप्रसिद्धमतिरेकं किं कल्पयसीत्याह—*क्लृप्तेति* ॥

अविद्याया अवच्छेदकत्वानुपपत्तेरतिरेकः कल्प्यत इति शङ्कते—*जीवस्येति* ॥ 'पूर्वमि'त्यत्र स्वसम्बन्धादित्यध्याहारः। अविद्याया विभागोपजीवित्वेनोपजीव्यत्वानुपपत्तेर्विभागस्याविद्याधीनत्वमनुपपन्नमित्यर्थः। उपजीव्यस्य उपजीवकत्वानुपपत्तिरतिरेकेऽपि तुल्येत्याह—*न कस्येति* ॥ उपजीव्यस्याप्युपजीवकत्वं दृष्टमिति चोदयति—*यथेति* ॥ *भेदेनोपरज्यत इति* ॥ भेदनिर्वाहकत्वेन संबध्यत इत्यर्थः। धर्मि-प्रतियोगिभावो न भिन्नवस्तुनिष्ठः, किंतु वस्तुमात्रनिष्ठ इत्याशङ्क्याह—*कस्येति* ॥ कस्य कस्माद्भेद इति वीक्षायां घटस्य पटादित्यपुनरुक्तशब्दद्वयस्मृतिहेतुतया तयोर्भेदप्रतिपत्तेस्तदधीनत्वं धर्मादिभावस्य; अन्यथा स्वस्मादपि स्वस्य भेदः स्यादित्यर्थः। दार्ष्टान्तिकमाह—*एवमिति* ॥ तुल्यमुत्तरमित्याह—*अविद्यायामिति* ॥ वस्तुतश्चिन्मात्रमाश्रयते, तदेव विषयीकरोतीति न विभागापेक्षत्वमविद्याया इत्यर्थः॥

अंशांशिभावेन भेद इति पक्षं निरस्यति—*निरंशत्वादिति* ॥ नच हेत्वसिद्धिः; "निष्कलं निष्क्रियं शान्तम्" इत्यादिवाक्यात्, सांशत्वेऽनित्यत्वापात इत्यादियुक्तेश्च प्रसिद्धत्वादित्यर्थः। भेदकान्तरनिरसनफलमाह—*तस्मादिति* ॥ भेदकान्तरवदविद्याया अपि भेदकत्वमयुक्तमित्याह—*नन्विति* ॥ किं संबन्धिन्यविद्या भेदिका? उतासंबन्धिनी? आद्येऽपि किं जीवसंबन्धिनी? उत ब्रह्मसंबन्धिनी? नाद्यः; अविद्यासिद्ध्युत्तरकालत्वाज्जीवभावस्य, नापि द्वितीयः; सर्वज्ञत्वादिगुणकब्रह्मणोऽप्यविद्याधीनत्वात्, स्वातन्त्र्यं तु नोपेयते। तस्मादविद्या भेदिकेत्यप्ययुक्तमित्याशयः॥

चिन्मात्रतन्त्राऽविद्येति वक्तुं प्रतिवन्दीमाह—*नन्विति* ॥ दर्पणादेर्बिम्बसंबन्धित्वेन प्रतिबिम्बसम्बन्धित्वेन च भेदकत्वं न सम्भवति; विभागोत्तरकालीनत्वाद्बिम्बादेरित्यर्थः। मुखमात्रमाश्रित्य दर्पणादि बिम्बादिविभागं जनयतीति चोदयति—*मुखेति* ॥ तुल्यमेतदित्याह—*इहापीति* ॥ जीवपक्षपातित्वाच्चिन्मात्रतन्त्रत्वमयुक्तमित्याह—*कथं पुनरिति* ॥ पक्षपातित्वमन्यथाऽपि घटत इत्याह—*दर्पणेति* ॥ दर्पणादेः प्रतिबिम्बादौ

पञ्चपादिकाविवरणम्

ननु किमाश्रयेयमविद्या ? न तावदन्तःकरणविशिष्टस्वरूपाश्रया ; प्रमाणाभावात्, *ननु* 'अहमज्ञः' इति प्रतिभास एव विशिष्टाश्रयत्वे प्रमाणम्, न ; 'अहमनुभवामी'त्यनुभवस्यापि चैतन्यप्रकाशस्य विशिष्टाश्रयत्व-प्रसङ्गात् । *ननु*—यथा 'अयो दहती'ति दग्धृत्वायसोरेकाग्निसंबन्धात्परस्परसंबन्धावभासः, तथाऽनुभवान्तः-करणयोरेकात्मसंबन्धात्तथाऽवभासः, नान्तःकरणस्यानुभवाश्रयत्वादिति—*चेत्*, एवमज्ञानान्तःकरणयोरेकात्म-संबन्धात्—'अहमज्ञः' इत्यवभासः, नान्तःकरणस्याज्ञानसंबन्धादिति तुल्यम् ; प्रतीतेरन्यथासिद्धौ परस्परसंबन्ध-कल्पनाऽयोगात्, आत्मन्यविद्यासंबन्धस्य सुषुप्तेऽपि संप्रतिपन्नत्वाच्च । *अथ* स्वरूपमात्रस्याश्रयत्वानुपपत्ते-र्विशिष्टाश्रयत्वं कल्प्यत इति—चेत्, *न* ; विशिष्टेऽपि स्वरूपसंबन्धस्य विद्यमानत्वात्, जडस्य चाज्ञानाश्रयत्वे

ऋजुविवरणम्

ननु--किमाश्रयेयमिति ॥ स्वरूपमात्रस्याश्रयत्वासंभवेनान्तःकरणस्यैवावच्छेदकत्वमविद्यानियामकत्वं च वक्तव्य-मिति भावः । *ननु* अन्तःकरणव्यतिरेकेणात्मनोऽनुभवसम्बन्धे प्रमाणसद्भावात्प्रतीतेरन्यथासिद्धत्वं भवतु, अज्ञान-स्यान्तःकरणव्यतिरेकेण केवलात्मसंबन्धादर्शनात् कथम्---"अहमज्ञः" इति प्रतीतेरन्यथासिद्धत्वम् ? इत्याशङ्क्याह—*आत्मन्यविद्यासंबन्धस्येति* ॥ *अथ स्वरूपेति* ॥ सर्वज्ञत्वाविद्याश्रयत्वयोर्विरोधादिति भावः । *विशिष्टेऽपीति* ॥ स्वरूपसंबन्धेऽपि स दोषस्तदवस्थ एवेति भावः । *ननु* विशिष्टस्वरूपस्य स्वरूपातिरिक्तत्वात् तत्संबन्धे स्वरूप-सम्बन्धप्रयुक्तो दोषो नास्तीति, तत्राह—*जडस्य चाज्ञानेति* ॥ नच 'जडस्ये'त्यनेन केवलजडस्याश्रयत्वमाशङ्क्य-

तत्त्वदीपनम्

स्वगतधर्मसंसर्गजनकत्वं पक्षपातित्वमित्यर्थः । प्रकारान्तरेण चिन्मात्रसम्बन्धित्वमाक्षिपति—*नन्विति* ॥ कूटस्था-सङ्गाद्वयबोधरूपत्वाच्चितोऽविद्याश्रयत्वमयुक्तमित्यभिसन्धिः ॥

चिन्मात्राश्रयत्वानुपपत्त्या विशिष्टाश्रयत्वं मनुषे ? आहोस्विदनुपपत्तिमात्रम् ? किं वा स्वातन्त्र्यम् ? उत तस्या असत्त्वम् ? इति विकल्प्याऽऽद्यं प्रत्याह—*न तावदिति* ॥ प्रमाणाभावः कथमिति चेत्, तत्र वक्तव्यम्—किं प्रत्यक्षं प्रमाणम् ? उतानुपपत्तिरिति विकल्प्याऽऽद्यमनुवदति—*नन्विति* ॥ किं प्रतिभासमात्रं प्रमाणम् ? उत युक्तिसह-कृतानुभवः ? इति विकल्प्याऽऽद्यं दूषयति—*नाहमिति* ॥ 'अहमनुभवामी'त्यत्र प्रतिपत्तेरित्यध्याहारः । इष्टापत्तिशङ्कां निरस्यति—*चैतन्येति* ॥ अनुभवस्य चित्प्रकाशत्वाद्विशिष्टस्य च तद्विपरीतत्वादाधारादिभावो न युज्यत इत्यर्थः । 'अनुभवामी'ति प्रत्ययस्यान्यथासिद्धिं शङ्कते—*ननु यथेति* ॥ दग्धृत्वस्य दहनधर्मतयाऽन्यत्र दृष्टत्वात्तप्ताऽयःपिण्डे दग्धृत्वव्यपदेशः, तद्वदनुभवधर्म्यात्मसम्बन्धादन्तःकरणेऽनुभवितृत्वप्रथेत्यर्थः । मुख्यार्थे बाधकाभावान्नैवमित्या-शङ्क्याह—*नान्तःकरणस्येति* ॥ करणस्यानुभववेद्यत्वान्न तदाधारत्वमित्यर्थः । तुल्यमुत्तरमित्याह—*एव-मिति* ॥ बाधकसद्भावाद'नुभवामी'ति प्रत्ययस्यान्यथासिद्धिः, न तथाऽत्रेत्याशङ्क्याह—*नान्तःकरणस्येति* ॥ तत्र हेतुमाह—*प्रतीतेरिति* ॥ अन्तःकरणस्याज्ञानकार्यत्वान्न तदाश्रयत्वकल्पना । नच प्रतीत्यनुपपत्तिः ; तस्या अन्यथासिद्धत्वादित्यर्थः । युक्तिसहितानुभवस्य साधकत्वमिति कल्पं निरस्यति—*आत्मनीति* ॥ "न किं चिदवेदिषमि"ति परामर्शानुपपत्त्या पुनरुत्थानानुपपत्त्या च सुषुप्त्यादावविद्यासंबन्धोऽधिगम्यते, स न स्यादन्तः-करणाश्रयत्वे, तस्य विलीनत्वादिति युक्तिशून्योऽयं पक्ष इत्यर्थः ॥

अर्थापत्तिः प्रमाणमिति पक्षमुत्थापयति—*अथेति* ॥ विशिष्टं किं विशेषण-विशेष्याभ्यामन्यत् ? उतान-न्यत् ? तत्राऽऽद्यस्याप्रामाणिकत्वमभिप्रेत्य द्वितीयं प्रत्याह—*न विशिष्ट इति* ॥ दण्ड-देवदत्त-संबन्धेषु विशिष्टशब्द-प्रयोगाभावात्तदर्थान्तरमित्याशङ्क्याह—*जडस्य चेति । "यस्याज्ञानं भ्रमस्तस्य भ्रान्तिः सम्यक् च वेत्ति सः" इति

वार्तिकम्

यथाहि तिर्यक्पतितं वंशं मध्ये च कटादिना छन्नं तत्प्रतिबन्धवशान्मध्ये ग्रहीतुमशक्नुवन्तो नयनरश्मयो

पञ्चपादिकाविवरणम्

भ्रान्ति-सम्यग्ज्ञानयोरपि तदाश्रयत्वप्रसङ्गात्। *ननु* स्वरूपेऽपि ब्रह्मण्यनुपपत्तिस्तुल्या, *सत्यम्* ; अनुपपन्नद्वयाश्रयत्वकल्पनाद् वरं संप्रतिपन्नस्वरूपाश्रयत्वोपादानम्; मोक्षावस्थासंबन्धिन एव संबन्धाश्रयत्वात् ॥

अत्र कश्चित्—अन्तःकरणस्यैवाज्ञानमिति—जल्पति। स वक्तव्यः—किमात्मा सर्वज्ञः? किंचिज्ज्ञो वा? इति। किंचिज्ज्ञत्वे कदाचित्किंचिन्न जानातीति विषयानवबोधस्त्वयैवाऽऽत्मनो दर्शितः। अथाग्रहण-मिथ्याज्ञानयोरात्माऽऽश्रयत्वेऽपि भावरूपाज्ञानमन्तःकरणाश्रयमिति, किं तत्? ज्ञानादन्यच्चेदज्ञानम्, काच-कामलादीनामप्यज्ञानत्वान्न विवादः, अथ ज्ञानविरोधीति, न; भिन्नाश्रययोर्ज्ञानाज्ञानयोरेकविषययोरपि विरोधित्वादर्शनात्, करणाश्रयमज्ञानं कर्त्राश्रयज्ञानेन विरुध्यत इति चेत्, न; प्रमाणाभावात्। पुरुषान्तरसुषुप्तौ च तदीयेनान्तःकरणेन

ऋजुविवरणम्

निरस्यत इति युक्तं वक्तुम्; उत्तरत्र निराकरिष्यमाणत्वात्। *मोक्षावस्थासम्बन्धिन इति* प्रमाणमुक्तं स्वरूपमात्राश्रयत्वे, यस्य मोक्षसम्बन्धः, तस्य बद्धत्वम्; अन्यथा मुक्तत्वानुपपत्तेरित्यर्थापत्तिः। अविद्यानिर्मितप्रतिबिम्बिताविद्याश्रयत्वमित्यपि वक्तुं शक्यते, भेदनिबन्धनधर्मित्वस्यैव भेदाश्रयत्वमिति। *ननु* ज्ञानेनाज्ञानं निवर्तत इति लोकसिद्धम्, तत्राज्ञानस्यान्तःकरणाश्रयत्वसिद्धौ सत्यां करणगतत्वमेव विरोधप्रयोजकमिति निश्चय इत्याशङ्क्याह—*पुरुषान्तरसुषुप्तौ चेति* ॥ *ननु* कर्तृज्ञाने तद्भ्रान्तिहेतुरन्तःकरणगताज्ञानं निवर्तते, तत् कथं करणगतनिवृत्त्यसंभवेनात्मगतत्व-

तत्त्वदीपनम्

न्यायादज्ञान-भ्रम-सम्यग्ज्ञानानामेकाश्रयत्वे सम्यग्ज्ञानाश्रयतया मोक्षान्वयित्वं वक्तव्यम्, नच जडस्य कार्यस्य तत् संभवतीत्यर्थः। जडाश्रयत्ववच्चिदाश्रयत्वमप्यनुपपन्नमिति चोदयति—*ननु स्वरूप इति* ॥ किं चिन्मात्रेऽनुपपत्तिमात्रमुद्भाव्यते? उत विशिष्टाश्रयत्वं साध्यते? तत्राऽऽद्यमङ्गीकरोति—*सत्यमिति* ॥ द्वितीयं दूषयति—*अनुपपन्नेति* ॥ विशिष्टाश्रयत्वेऽनुपपन्नोभयत्वं कल्प्यम्, अस्मन्मते त्वेकाश्रयत्वमिति लाघवादनुपपन्नमपि चिदाश्रयत्वमाश्रयणीयमित्यर्थः। एतेन—चित्यनुपपत्तिमात्रमिति विकल्पोऽपि निरस्त इति द्रष्टव्यम्। विशिष्टाश्रयत्वे दूषणान्तरमाह—*मोक्षेति* ॥ अज्ञान-भ्रान्ति-मुक्तीनामेकाश्रयत्वम्; अन्यथाऽन्यो बद्धोऽन्यो मुच्यत इति वैरूप्यप्रसङ्गः। ततश्च विशिष्टस्य मुक्तावनन्वयाच्चिन्मात्रस्य च सर्वत्रानुगमात्तस्यैवाज्ञत्वमित्यर्थः।

विधान्तरेण जडाश्रयत्वं निराकर्तुं परमतमनुवदति—*अत्र कश्चिदिति* ॥ किमग्रहणादेरप्यन्तःकरणाश्रयत्वम्? उतानादिभावरूपाज्ञानस्यैव? तत्राद्येऽपीदं विचार्यमित्याह—*स वक्तव्य इति* ॥ सर्वज्ञत्वस्यानुभवविरुद्धत्वात्किंचिज्ज्ञत्वमाश्रयणीयम्, तदा च त्वन्मतविहतिरित्याह—*किंचिज्ज्ञत्व इति* ॥ द्वितीयमुत्थापयति—*अथेति* ॥ किं भावरूपाज्ञानस्य ज्ञानादन्यत्वेनाज्ञानत्वम्? उत तद्विरोधित्वेन? इति विकल्पयति—*किं तदिति* ॥ आद्यमनूद्य दूषयति—*ज्ञानादिति* ॥ *न विवाद इति*। अनात्माश्रय इति यावत्। द्वितीयमुत्थापयति—*अथेति* ॥ किमन्तःकरणगतं ज्ञानं तद्विरोधि? उताऽऽत्मगतम्? नाद्यः; तस्य जडत्वेन ज्ञातृत्वानुपपत्तेः, न द्वितीयोऽपि; किं तदेकविषयम्? उत भिन्नविषयम्? नोभयमपीत्याह—*न भिन्नेति* ॥ चैत्र-मैत्राश्रितयोर्घटविषयज्ञानाज्ञानयोर्निवर्त्य-निवर्तकत्वानुपलब्धेः, तथा भिन्नविषययोरपि; तदेतदभिप्रेत्योक्तम्—*अपीति* ॥ करणगताज्ञानस्य कर्तृज्ञाननिवर्त्यत्वाद्भ्रान्तिप्रसङ्ग इति चोदयति—*करणाश्रयमिति* ॥ यस्य यत्करणं तदाश्रितज्ञानेन तत्करणगतस्याज्ञानस्य निवृत्तिः? किं वा करणान्तरगतस्य? नोभयथाऽपीत्याह—*न प्रमाणेति* ॥ करणान्तरगतज्ञाननिवृत्तौ दूषणान्तरमाह—*पुरुषान्तरेति* ॥ अन्तःकरणलयः, कर्मनिमित्तः, लयत्वात्; संमतलयवदित्युत्पद्यमानबोधेन पुरुषान्तरगतेन सुषुप्तकरणगताज्ञाननिरासो नोपलभ्यते; अन्यथोत्थितस्य तत्परामर्शानुपपत्तिप्रसङ्ग इत्यर्थः ॥

वार्तिकम्

विच्छिद्य देशद्वये गृह्णन्तो देशद्वये गृहीतमूर्तिद्वयसादृश्यात्तत्र द्वित्वमात्रमारोपयन्ति—द्वौ चन्द्राविति, यथा स्फटिके लौहित्यम्, न धर्मिणमपि; धर्मारोपमात्रेण तत्प्रतीत्युपपत्तौ तदारोपकल्पने प्रमाणाभावात्। नच

पञ्चपादिका

गन्तव्यम्। तथाच स्मृतिः—"प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपी"ति=क्षेत्र-क्षेत्रज्ञत्वनिमित्तामनादिसिद्धामविद्यां प्रकृतिशब्देनाह; "मायां तु प्रकृतिं विद्यादि"ति श्रुतेः। अतो मायाऽवच्छिन्नरूपत्वादनन्यदपि ब्रह्मरूपमात्मनो न वेत्ति। तथाचोक्तम्—"अनादिमायया सुप्तो यदा जीवः प्रबुध्यते। अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदे"ति ॥

पञ्चपादिकाविवरणम्

लीयमानेन करणभूतेन तन्निमित्तकर्मानुमानेऽपि तदीयान्तःकरणाज्ञाननिवृत्त्यदर्शनात्। भ्रान्तिनिमित्तदोषत्वात् काचादिवत्करणाश्रयमज्ञानमिति चेत्, न; चक्षुरादावपि प्रसङ्गात्। सादित्वात्तेषामनाद्यज्ञानाश्रयत्वानुपपत्तिरिति चेत्, अन्तःकरणेऽपि तुल्यम्। सत्कार्यवादाश्रयणान्न साद्यन्तःकरणमिति चेत्, चक्षुरादावपि तुल्यम्। अतो न तदनाद्यज्ञानाश्रयमिति। अनृत-नीहारादिशब्दैश्च प्राप्तज्ञानानामग्रहणवतां चेतनानामेवावृतत्वाभिधानान्नान्तःकरणाश्रयमज्ञानम्, किंतु चैतन्याश्रयमित्यलमतिविस्तरेण। तदेतदाह—*अविद्याऽवच्छिन्नानन्तजीवेति* ॥

न्यायः प्रदर्शितः। श्रुतिस्तु—"अन्यद् युष्माकमन्तरं बभूव। नीहारेण प्रावृताः" इति व्यवधायकमज्ञानं दर्शयति। "विभेदजनके ज्ञाने नाशमात्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति" ॥ इति स्मृतिः। *ननु* ब्रह्मव्यतिरिक्तमनादिवस्तु नास्तीति, तत्राह—*तथाच स्मृतिरिति* ॥ *अत इत्युपसंहारः स्पष्टार्थः* ॥

ऋजुविवरणम्

साधनम्? करणगतत्वे तु प्रमाणमस्तीत्याह—*भ्रान्तिनिमित्तेति* ॥ उक्तन्यायस्यानुग्राहकं प्रमाणमाह—*अनृतनीहारादीति* ॥ उदाहृतश्रुतौ व्यवधायकमज्ञानं प्रतीयते, नतु तस्यैवावच्छेदकत्वम्, नापि स्वाभाविकभेदाभावः; अतस्तत्र प्रमाणमाह—*विभेदजनक इति* ॥ *ननु* पूर्वमपि "निरंशस्ये"त्यनेन स्वप्रकाशस्यानवभासो न संभवतीत्याक्षिप्य

तत्त्वदीपनम्

अज्ञानस्य ज्ञाननिवर्त्यत्वं तावदसिद्धम्; तस्य करणायत्तत्वे प्रामाणिके तदज्ञाननिवृत्तिः सेत्स्यतीत्यभिसन्धायाह—*भ्रान्तीति* ॥ दोषत्वमुपपादयितुम्—*भ्रान्तीति* विशेषणम् ॥ अज्ञानम्, करणाश्रयम्, विषय-प्रमातृदोषातिरिक्तत्वे सति दोषत्वात्; काचादिवदित्यर्थः। अतिप्रसङ्गलक्षणबाधकतर्कपराहतत्वान्नायं हेतुरित्याह—*न चक्षुरादाविति* ॥ विमतम्, नयनाश्रयम्, दोषत्वात्; काचादिवदित्यतिप्रसङ्गः। प्रलयसमयेऽप्यज्ञानस्य सद्भावात्तेषां चाभावान्न तदाश्रयत्वमिति चोदयति—*सादित्वादिति* ॥ अन्तःकरणस्याऽपि प्रलयादावुपरमान्नाज्ञानाश्रयत्वमित्याह—*अन्तःकरण इति* ॥ तत्रान्तःकरणस्याव्यक्तात्मना सत्त्वादाश्रयत्वं युक्तमिति शङ्कते—*सत्कार्येति* ॥ तुल्यमेतदत्रापीत्याह—*चक्षुरादाविति* ॥

युक्तिपर्यालोचनया जडस्याज्ञानाश्रयत्वं निरस्य श्रुतिपर्यालोचनयापि तन्निरस्यति—*अनृतेति* ॥ 'शब्दैश्चे'त्यस्य नान्तःकरणेत्यनेनानुषङ्गः। स्वान्ताश्रयत्व एव शब्दस्य प्रामाण्यं किं न स्यात्? इत्याशङ्क्याह—*प्राप्तज्ञानानामिति* ॥ सुषुप्तादौ ब्रह्म प्राप्तानां तद्बोधाभावः कस्मात्? इति शङ्कायाम्—"आवरणसद्भावादि"ति श्रुत्योच्यते, नच तत्तवोपपद्यते; जडे ज्ञानप्रसक्त्यभावादित्यर्थः। अज्ञानं स्वतन्त्रमिति कल्पमुत्थापयति—*किंत्विति* ॥ स्वातन्त्र्ये सत्तास्फूर्त्योः सत्त्वाच्चित्यध्यस्तत्वमेष्टव्यमित्याह—*चैतन्येति* ॥ अज्ञानासत्त्वपक्षं प्रतिक्षिपति—*अलमतिविस्तरेणेति* ॥

भेदादिना जगतोऽनिरूपणाद् अन्यथाऽनुपपत्तेः—'अहमज्ञः' इति व्यवहारानुपपत्तेश्चाज्ञानमास्थेयमित्यर्थः। अन्तःकरणादीनां भेदकत्वानुपपत्तिर्न्यायः। न्यायस्य स्वातन्त्र्येण बोधकत्वासंभवादनुग्राह्यमाणमाह—*श्रुतिरिति* ॥

पञ्चपादिका

ननु प्रमाणान्तरविरोधे सति श्रुतिस्तदर्थापत्तिर्वा नाविद्यां निवेदयितुमलम्? किं तत् प्रमाणम्?

पञ्चपादिकाविवरणम्

स्वयंप्रकाशस्याविद्याश्रयत्वमुपपन्नमित्युक्तम्, इदानीं प्रकाशमानस्याविद्याविषयभावो नोपपद्यत इत्याक्षिपति—*ननु प्रमाणविरोध इति* ॥ *ननु* 'त्वदुक्तमर्थं न जानामी'ति प्रतिभासमानमेवाज्ञानस्य व्यावर्तकमवभासते, *ननु* तत्र विशेषाकारस्यानवगतस्य व्यावर्तकता, *न* ; अनवभासमानस्य व्यावर्तकतया प्रतिभासानुपपत्तेः । *ननु* अवभासमानस्यापि तद्व्यावर्तकत्वमनुपपन्नमेव, *न* ; अज्ञानसंबन्धस्य प्रतिभासमात्रशरीरत्वादनुपपत्तेरलङ्कारत्वात्, प्रतिभासस्तु विद्यत एव ; तत्र कथं प्रतीयमानस्याविद्याविषयत्वानुपपत्तिः?

ऋजुविवरणम्

समर्थितम्, "ननु प्रमाणविरोधः"इत्यनेनापि तदेवाक्षिप्य समर्थ्यते ; अतः पौनरुक्त्यमित्याशङ्क्याह—*स्वयंप्रकाशस्येति* ॥ *ननु अवभासमानस्यापीति* ॥ अवभासमानस्यार्थस्याज्ञानेनावृतत्वं न संभवति ; विषयस्य व्यावर्तकत्वं नामाज्ञानावृतत्वम्, तच्चावभासमानत्वादेवानुपपन्नम् ; अतश्च विशेषस्य व्यावर्तकस्यावभास एव नास्तीति वक्तव्यमित्यर्थः । अत्र संग्रहः—

प्रतीयमानं व्यवधीयते नो विशेषरूपं प्रतिभासरोधात् । अबुद्धिचिह्नं कथमत्र भायान्निरूप्यमाणं नहि लभ्यते यत् ॥

अज्ञानसंबन्धस्येति ॥ *अयमर्थः*—प्रतिभासमात्रेण शरीरं स्वरूपं यस्य संबन्धस्य, स प्रतिभासमात्रशरीरः ; तस्य भावः, प्रतिभासमात्रशरीरत्वमिति । कथं प्रतिभासेनानुपपन्नोऽर्थोऽङ्गीक्रियते? इत्याशङ्क्याह—*अनुपपत्तेरिति* ॥ अस्मिन्नर्थेऽनुपपत्तिर्नार्थनिषेधायालमित्यर्थः । "अज्ञानसम्बन्धस्ये"त्यन्तर्गर्भितो हेतुः ; दुरुपपादस्वभावत्वादिति भावः । अत्र संग्रहः—

निरूपणं यन्न सहेत वस्तु तन्नेति वक्तुं नहि युक्तमत्र । सोढुं न शक्नोति विचारणं यत् प्रतीयते चैव तमोमयं तत् ॥

ननु किमित्येवमनुपपन्नोऽर्थः प्रतिभासमात्रशरीरोऽङ्गीक्रियते? विशेषस्याप्रतीयमानस्यैव व्यावर्तकत्वं कस्मान्नाङ्गीक्रियते? इत्याशङ्क्याह—*प्रतिभासस्त्विति* ॥ ननु "भोक्तुरि"त्यादिना स्वयंज्योतिषोऽप्यात्मनो देहाद् व्यावृत्तिर्न प्रतीयत इति व्यभिचारो दर्शितः ; सोऽनुपपन्नः, स्वयंज्योतिःस्वरूपस्यानवभासो न संभवतीति चोदिते व्यावृत्तेरनवभासप्रदर्शनस्य व्यधिकरणत्वम् ; दृष्टान्तवैषम्यात्, तत्र भेदस्य प्रतीतिकारणाभावेन तदुपपत्तेरित्याशङ्क्या-

तत्त्वदीपनम्

स्वयंज्योतिष्ट्वविद्याया व्युत्पादितत्वादाक्षेपानुपपत्तिरित्याशङ्क्याह—*स्वयंप्रकाशस्येति* ॥ ब्रह्म, नाज्ञानविषयः, भासमानत्वात्, भासमानघटादिवत्, इत्युक्ते दृष्टान्तस्य साध्यवैकल्यं शङ्कते—*नन्विति* ॥ व्यावर्तकं विशेषणमिति यावत् । ज्ञातस्याज्ञानव्यावर्तकत्वासंभवादनधिगतस्य व्यावर्तकत्वं वाच्यम्, ततश्च न साध्यवैकल्यमित्याह पूर्ववादी—*ननु तत्रेति* ॥ विशेषस्याप्यनधिगतौ 'तन्न जानामी'ति व्यपदेशानुपपत्तेरधिगतस्य व्यावर्तकत्वम्, ततश्च साध्यवैकल्यमित्याह सिद्धान्ती—*नानवभासमानस्येति* ॥ अवभासमानस्याज्ञानव्यावर्तकत्वं व्याहतमित्याह—*नन्ववभासमानस्येति* ॥

अवभासमानस्याज्ञानविषयत्वं किं युक्त्यसहमित्युच्यते? किं वा तत्प्रतीत्यभावः? इति विकल्प्याऽऽद्यमङ्गीकरोति—*नाज्ञानेति* ॥ अलङ्कारत्वे हेतुः—*प्रतिभासमात्रेति* ॥ द्वितीयं दूषयति—*प्रतिभासस्त्विति* ॥ ग्रन्थान्तरत्वसूचकभावादेकग्रन्थशङ्कां निरस्यति—*निरंशस्येति* ॥ अन्यात्मना सामान्य-विशेषवत्त्वात्तत्र भानाभाने, न तथाऽत्र स्वयंज्योतिषीति समाध्यर्थः ॥

भासमानस्यानवभासमानत्वं नेति वक्तुमशक्यम् ; भासमानेऽप्यात्मनि देहादिव्यावृत्तेरनुपलम्भेन तत्र व्यभिचारादित्युक्तम्, तदसंगतम्, यन्न भासते, न तत्रावभासमानत्वम्, यद्भासते न तत्राऽनधिगतत्वमिति कथं व्यभिचारः?

पञ्चपादिका

येन सह विरोधः, निरंशस्य स्वयंज्योतिषः स्वरूपानवभासानुपपत्तिः। *ननु* भोक्तुः कार्य-करण-संघाताद्व्यावृत्तता स्वयंज्योतिषोऽपि न प्रकाशते, *ननु* न भोक्ता स्वयंज्योतिः, किंत्वहं-प्रत्ययेनावभास्यते। *यथा* स्वयंप्रकाशमानता, अहङ्कारो न प्रत्ययस्तथा वक्ष्यते॥

कथं पुनर्भोक्ता स्वयंज्योतिः कार्यकरणसंघाताद् व्यावृत्तो न प्रकाशते? 'मनुष्योऽहमि'ति मिथ्यैवैक-ताभिमानात्। *ननु* गौणोऽयम्, न मिथ्या? *यथा* न गौणः, तथा भाष्यकार एव वक्ष्यति॥

पञ्चपादिकाविवरणम्

इत्याक्षिपति—*किं तत्प्रमाणमिति*॥ निरंशस्येति परिहारः। संविदभेदोऽपरोक्षप्रकाशमानता नाम। शरीराद् भेदश्च स्वयंज्योतिषाऽऽत्मप्रकाशेनाभिन्नस्तत्तन्त्रो वाऽपरोक्ष एव; तथापि न प्रकाशत इति सिद्धान्ती परिहरति—*ननु भोक्तुरिति*॥ *ननु न भोक्तेत्यादिः स्पष्टार्थः*।

पदार्थज्ञानमेव भेदज्ञानम्, अतो'ऽहमि'त्यात्मपदार्थज्ञानमेव भेदेऽपि प्रत्यक्षमिति मीमांसकमन्यश्चोदयति—*कथं पुनर्भोक्तेति*॥ संसर्गाध्यासो हि भेदानवगमनिमित्तमिति सर्वत्र व्याप्तमिति परिहरति—*मनुष्योऽहमितीति*॥

ऋजुविवरणम्

भिप्रायमाह—*संविदभेद इति*॥ "नन्वि"त्युपक्रमाच्चोद्यत्वशङ्कानिवृत्त्यर्थमाह—*सिद्धान्तीति*॥ "कथं पुनरि"ति चोद्यमनुपपन्नम्; तत्र भेदप्रतीतौ सामग्र्यभावेन तदुपपत्तेरित्याशङ्क्याभिप्रायमाह—*पदार्थज्ञानमेवेति*॥ "मनुष्योऽह-मिति मिथ्यैवे"ति पूर्वशेष इवाभाति; तथा सति विरोधः, नापि परिहारः; भेदग्राहकसद्भावादेकतावभासेऽपि तन्निवारणायोगादित्याशङ्क्याह—*संसर्गाध्यास इति*॥ "ननु गौणः"इति चोद्यमयुक्तम्; अगृहीतभेदे गौणत्वा-

तत्त्वदीपनम्

इत्याशङ्क्य व्यभिचारं दर्शयितुमपरोक्षलक्षणमाह—*संविदिति*॥ अभिन्न इति स्वरूपभेदमाश्रित्योक्तम्। धर्मभेद-माश्रित्याह—*तत्तन्त्र इति*॥ भेदस्य धर्मत्वे धर्मिज्ञानमात्रेण कथमपरोक्षत्वम्? इत्याशङ्क्याह—*एवेति*॥ धर्मा-द्यापरोक्ष्ये भेदाप्रतीत्यदर्शनात्तस्याप्यपरोक्षत्वमित्यर्थः॥

आत्मनि प्रतीयमाने व्यावृत्तेरप्युपलम्भान्न व्यभिचार इत्युक्तम्, तन्नोपपद्यते; भेदज्ञानसामग्र्यभावात्, तृतीयज्ञानस्य च भेदग्राहित्वादित्यत्राह—*पदार्थेति*॥ तृतीयज्ञानात् प्राक् भेदग्रहणाभावेऽसंकीर्णतया धर्म्यादिबोधाभावाद् भेद-बोधो न स्यादित्यर्थः। फलितमाह—*अत इति*॥ एकताज्ञानाद्भेदानवभास इत्युक्तम्, तदनुपपन्नम्; भेद-ग्राहकग्रहणस्याप्युपपत्तेरित्याशङ्क्य, देहव्यतिरिक्तात्मवादिना देहात्मबुद्धेरध्यासात्मत्वं वा गौणत्वं वाऽऽश्रीयते? आद्येऽ-ध्यासस्य भेदाग्रहव्याप्तत्वात्तद्ग्राहकाभावस्त्वयाऽप्याश्रयणीय इत्याह—*संसर्गेति*॥ निमित्तं ज्ञापकमिति यावत्। तत्र हेतुमाह—*इति सर्वत्रेति*॥

वार्तिकम्

द्वित्वोत्पत्तेः—'अयमेकोऽयमेकः' इत्यपेक्षाबुद्धिपूर्वकत्वात्, तस्याश्चैकत्वद्वयाधारवस्तुद्वयजन्यत्वात्तदभावे कथं द्वित्वारोपोऽपि स्यादिति—वाच्यम्; पदार्थद्वयाभावेऽप्येकस्मिन्नेव पदार्थे भेदभ्रमाद् भ्रमरूपापेक्षाबुद्धि-संभवेन तयोर्निद्वित्वोत्पत्तेः संभवात्, अन्यथाऽपेक्षाबुद्धेः सत्यत्वेन तयोर्निद्वित्वस्याऽपि सत्यत्वादा-रोपितत्वानुपपत्तेरिति; तद्बहिर्गच्छन्तो नयनरश्मयोऽङ्गुल्याद्युपधानवशाद् द्वैधीभूय चन्द्रमण्डलं प्राप्य व्यवच्छिद्य तन्मण्डलं देशद्वये गृह्णन्तो देशद्वयगृहीतमूर्तिद्वयसादृश्याद् 'द्वौ चन्द्रावि'त्येकस्मिन्नेव चन्द्रे द्वित्वमेवारोपयन्ति, भ्रमे भासमानवैशिष्ट्यप्रतियोगित्वात्तस्य, न चन्द्रमपि; तदनुयोगित्वेन तस्य

पञ्चपादिका

ननु 'अहमि'ति यदि देहसमानाधिकरणः प्रत्ययः, न तर्हि तद्व्यतिरिक्त आत्मा सिद्ध्यति ; अन्यस्य तथाग्राहिणः प्रत्ययस्याभावात्, आगमानुमानयोरपि तद्विरोधे प्रमाणत्वायोगात्। मिथ्यात्वात्तस्य न

पञ्चपादिकाविवरणम्

पदार्थप्रत्यक्षेणैव भेदेऽपि प्रत्यक्षे सामानाधिकरण्यं गौणावभास इति चोदयित्वा परिहरति—*ननु गौण इत्यादिना* ॥ आह गौणवादी—*नन्वहमिति यदीति* ॥ *ननु* प्रत्यक्षावभासं बाधित्वाऽऽगमानुमानाभ्यामेव व्यतिरेको गृह्यतामिति, नेत्याह—*आगमानुमानयोरपीति* ॥ *ननु* मिथ्यात्वात्प्रत्यक्षावभासस्य द्विचन्द्रावभासस्येव ताभ्यामेव बाध इति चोदयति—*मिथ्यात्वात्तस्येति* ॥ यत्राविचारपुरःसरमेव प्रत्यक्षा-

ऋजुविवरणम्

योगादित्याशङ्क्याह—*पदार्थप्रत्यक्षेणैवेति* ॥ "कुतस्तर्ही"ति ग्रन्थोऽनुपपन्नः ; सर्पादावागमानुमानाभ्यां प्रत्यक्षस्य बाध्यत्वस्य दर्शनात्, इत्याशङ्क्याभिप्रायमाह—*यत्राविचारेति* ॥ "यद्यपी"त्यनेन देहाद् व्यतिरिक्तविषयत्वमभ्युपगम्य तथाऽनध्यवसायेनाध्यास उक्तः, सोऽनुपपन्नः ; विरोधात्, नहि व्यतिरिक्तविषयत्वं व्यतिरेकाध्यवसायाभावश्चोपपद्यते, "अथ पुनरि"त्यनेन विरोधश्च ; तत्र व्यतिरेकप्रतिभासो निराक्रियते, अत्र चाभ्युपगम्यते—इत्याशङ्क्य ; भिन्न-

तत्त्वदीपनम्

ननु "गौणोऽयमि"त्यत्र देहात्मबुद्धेर्गौणत्वपक्षोऽनूदितः, स नोपपद्यते ; गौणत्वव्यापकभेदग्रहाभावादित्याशङ्क्याह—*पदार्थेति* ॥ व्यतिरेकप्रमाणाभावान्नैतत्सिद्धिरित्युक्तं "नन्वहमि"त्यादिना, तन्नोपपद्यते ; प्रस्तुतानुपयोगित्वादित्याशङ्क्य गौणत्वमुपपादयितुं तदित्याह—*आहेति* ॥ 'अयो दहती'ति दग्धृत्वस्य तन्निष्ठतया प्रतिभासेऽपि दग्धृत्वस्यान्यधर्मत्वं यथा, तद्वदित्याशङ्क्य, किं प्रत्यक्षाद् व्यतिरेकसिद्धिः ? उतागमात् ? अथवाऽनुमानात् ? नाद्यः ; अनुपलम्भादित्याशयेनोक्तम्—*अन्यस्येति* ॥ संप्रति द्वितीयतृतीयावुत्थापयति—*ननु प्रत्यक्षेति* ॥ तयोरप्रमाणत्वान्न तत्साधकत्वमित्याह—*नेत्याहेति* ॥

'प्रत्यक्षस्य मिथ्यात्वान्न बाधकत्वमि'त्युक्तमयुक्तम्, मिथ्यात्वस्यैवासिद्धेः। नच—आगमानुमानविरोधान्मिथ्यात्वमिति—शङ्क्यम् ; प्रत्यक्षस्य ज्यैष्ठ्येन तद्बाध्यत्वासंभवादित्याशङ्क्याह—*ननु मिथ्यात्वादिति* ॥ ज्येष्ठस्य बाध्यत्वे दृष्टान्तमाह—*द्विचन्द्रेति* ॥ "कुतस्तर्ही"त्यादावनुमानादेर्बाधकत्वं निरस्तम्, नैतत् संभवति ; 'एकश्चन्द्रो नायं सर्पः' इत्यादावनुमानादेर्बाधकत्वदर्शनादित्याशङ्क्य वैधर्म्यमाह—*यत्रेति* ॥ *प्रत्यक्षावभास-

वार्तिकम्

सत्यत्वात्। *एतेन*—मुखद्वित्वारोपोऽपि—*व्याख्यातः* ; ग्रीवास्थ एव मुखे 'दर्पणे मुखमि'ति दर्पणस्थत्वमारोप्य पश्चात्तस्मिन्नेव मुखे 'द्वे मुखे' इति द्वित्वसङ्ख्याऽऽरोपात् ॥

ननु—मा भून्मुखविशेष्यकभ्रमप्रतीतौ मुखान्तरस्यानिर्वचनीयस्योत्पत्तिः ; मुखस्य तदनुयोगित्वेनाधिष्ठानतया सत्यत्वात्, 'मुखवानादर्शः' इति तद्विशेषणभ्रमप्रतीतौ तु मुखस्योत्पत्तेरङ्गीकारात् कथं न सोपाधिकभ्रमे धर्म्यारोप इति—चेत्, *न* ; दर्पणधर्मतयैव तत्र मुखस्यारोपाद् व्यभिचारासिद्धेः 'मुखवानादर्शः' इत्यादर्शधर्मतयैव स्फटिकादिधर्मतया रूपाद्यारोपवद् मुखारोपः, न—'इदं रजतमि'तिवदादर्शाभेदेन 'इदं मुखमि'ति। तथा सत्याऽऽदर्शत्वेनादर्शभानानुपपत्तेः, तदुपाधित्वानुपपत्तेश्च। 'दर्पणे मुखमि'ति प्रतीतौ तु दर्पणस्थत्वस्यैव मुख आरोपः, न दर्पणे मुखस्यारोप इत्यसकृदवोचाम ॥

ननु—एवं सति 'दर्पणे मुखमि'ति प्रतीतौ मुखे दर्पणस्यारोपप्रसङ्गः ; भ्रमे भासमानवैशिष्ट्यप्रतियोगित्वात्, इति—चेत्, *न* ; तत्प्रतियोगित्वासिद्धेः। न हि मुखे दर्पणं तत्प्रतियोगितयाऽऽरोप्यते ; किं तर्हि ? सप्तम्यर्थस्तदाधारत्वम्, तस्य च न मिथ्यात्वमित्यवोचाम। नच—आरोपितं दर्पणाधारत्व-

पञ्चपादिका

विरोध इति चेत्, कुतस्तर्हि मिथ्यात्वम्? आगमादनुमानाद्वाऽन्यथावगमादिति चेत्, नैतत्; अन्योन्याश्रयता तथा स्यात्—आगमानुमानयोः प्रवृत्तौ तन्मिथ्यात्वम्, तन्मिथ्यात्वे तयोः प्रवृत्तिरिति। तस्माद् देहादिव्यतिरिक्तविषय एवायमहङ्कार इत्यात्मवादिभिरभ्युपेयम्; अन्यथाऽऽत्मसिद्धिरप्रामाणिकी

पञ्चपादिकाविवरणम्

वभासमप्यनुमानादिना झटिति बाधितमुच्छिन्नव्यवहारं भवति, तत्र तथा भवतु; यत्र पुनर्विचारपदवीमुपारूढयोर्ज्ञानयोर्बलाबलचिन्तया न बाधनिश्चयः, तत्र नानुमानादिना प्रत्यक्षस्य मिथ्यात्वसिद्धिरिति मत्वाऽऽह—*कुतस्तर्हीत्यादिना उच्यत इत्यतः प्राक्तनेन ग्रन्थेन* ॥ स्पष्टार्थो ग्रन्थः।

तत्त्वदीपनम्

मिति* ॥ प्रत्यक्षवदवभासत इति प्रत्यक्षावभासम्, द्विचन्द्रादीत्यर्थः। सर्पादिभ्रमनिवर्तनेन बाधकप्रत्ययोत्पादात्तत्र तथात्वम्, अत्र युक्तितो बाध्यबाधकता निश्चेतव्या, नच निश्चेतुं शक्यते; परस्पराश्रयतापातादित्यर्थः। *कुतः "इत्यादेरेषोऽर्थः—प्रत्यक्षस्य मिथ्यात्वं न संभवति; बाधकाभावात्। नचागमादेर्बाधकत्वम्; इतरेतराश्रयत्वप्रसक्तेरित्याशयेनोक्तम्—*कुत इति* ॥ यथाश्रुतमादायाह सिद्धान्ती—*आगमादिति* ॥ *अन्यथाऽवगमादिति* ॥ भिन्नतयाऽवगमादित्यर्थः। देहः, स्वातिरिक्तद्रष्टृकः, दृश्यत्वात्; घटवदित्याद्यनुमानम्। "अशब्दमस्पर्शमरूपमव्ययम्" "न जायते म्रियते" इत्यादिरागमः ॥

स्वाशयमाविष्करोति—*नैतदिति* ॥ तथा सति स्यादित्यर्थः। देहव्यतिरेके न चेन्मानम्, तस्याव्यतिरेक एवास्त्विति, तत्राह—*तस्मादिति* ॥ तत्र हेतुमाह—*आत्मवादिभिरिति* ॥ देहात्मवादे नास्तिकतापातात् पुरुषार्थिभिरतिरिक्त आत्माऽऽश्रयणीय इत्यर्थः। अहंप्रत्ययस्य व्यतिरिक्तविषयत्वे—'अहं मनुष्यः' इति प्रत्ययः कथमिति चेत्, तत्र वक्तव्यम्—किमस्य प्रत्ययस्य गतिः पृच्छ्यते? अथवाऽतिरिक्तविषयत्वाभावः? इति। तत्र द्वितीयोऽ-

वार्तिकम्

मित्ति—वाच्यम्; रजते रजतत्ववदिदमीदन्त्ववच्च तस्य तत्त्वेऽपि सत्यत्वोपपत्तेः। नहि भ्रमे भासमानत्वेन प्रतियोगितया वा भासमानत्वेन मिथ्यात्वम्; तथा सति धर्मिणो धर्मि-प्रतियोगितावच्छेदकयोश्चेदं-रजतत्वयोर्मिथ्यात्वप्रसङ्गात्, किन्तर्हि? यद्धर्मिप्रतियोगिनो वैशिष्ट्यं भ्रमादूर्ध्वं बाध्यते, तस्य मिथ्याभूतवैशिष्ट्यस्य भ्रमे भासमानस्य प्रतियोगिनो मिथ्यात्वमित्युच्यते; प्रकृते च रजतत्ववत् तत्प्रतियोगिनो दर्पणाधारत्वस्यावच्छेदकतया दर्पणस्य सत्यत्वान्न मिथ्यात्वप्रसक्तिरित्यनवद्यम्। *एतेन*—'पीतः शङ्खः' 'तिक्तो गुडः' इत्यादिधर्माध्यासाः सोपाधितया—*व्याख्याताः*; तत्रापि नयन-रसनगतपीत-तिक्तद्रव्ययोरुपाधित्वात्तत्र तद्रूप-रसयोरनुभवेन शङ्ख-गुडयोस्तज्जातीयरूपरसारोपोपपत्तेः। नच—'नीलं नभः' इत्यत्रोपाधेरदर्शनात्कथं नीलगुणारोप इति—वाच्यम्; पृथिव्यास्तच्छायाया वा नीलगुणवत्या उपाधेस्तत्र भावात्तदर्शनासिद्धेः। नच—विशेषादर्शनस्याप्यधिष्ठानेन्द्रियसंप्रयोग-संस्कार-दोषाणामिव भ्रमहेतुत्वावगमात् 'पीतः शङ्खः' इत्यादौ च शङ्खत्वादिविशेषदर्शनस्य सत्त्वात् कथमारोप इति—वाच्यम्; गुणारोपे तद्विरोधिगुणविशेषादर्शनस्यैव हेतुत्वात्, तस्य शौक्ल्याद्यदर्शनस्य प्रकृते सत्त्वात्। नच—तत्राप्यानुमानिकज्ञानसत्त्वात्कथमदर्शनमिति—वाच्यम्; सत्त्वेऽपि तस्य प्रत्यक्षविशेषदर्शनाविरोधित्वात्, प्रत्यक्षज्ञानस्यैव तद्विरोधित्वात्तदुपपत्तेः। नच दोषाभावादनारोपः; सोपाधिकभ्रम उपाधेरेव दोषत्वादित्यास्तामयं प्रसङ्गः। सर्वथाऽपि सिद्ध आत्मन्यहङ्काराद्युपाधितः कामाद्यारोप इति ॥

स्यादेतत्—भवतु नाम लोके सोपाधिक-निरुपाधिकाध्यासद्वयमनुभवसिद्धम्, आत्मनि तु

पञ्चपादिका

स्यात्, अतो गौणो मनुष्यत्वाभिमानः, *उच्यते*—यद्यपि देहादिव्यतिरिक्तभोक्तृविषय एवायमहङ्कारः ; तथापि तथाऽनध्यवसायात्तद्धर्मानात्मन्यध्यस्यति। दृश्यते हि स्वरूपेणावभासमानेऽपि वस्त्वन्तरभेदानध्यवसायात्तत्सम्भेदेनावभासः—यथैकस्मिन्नप्यकारे ह्रस्वादिसम्भेदः ॥

अथ पुनरेकान्ततो भिन्न एव देहादेरहङ्कर्ताऽवभासेत, रसादिव गन्धः, *ततः* तत्सद्भावे न विप्रतिपत्तिः, इति तत्सिद्धये जिज्ञासा नावकल्पते। जिज्ञासोत्तरकालं तर्हि गौण एव युक्तः, कथम् ?

पञ्चपादिकाविवरणम्

किमर्थतो व्यतिरिक्तात्मविषयोऽहङ्कार उच्यते ? किं वा प्रतिभासतः ? अर्थतश्चेत्, तत्राह—*यद्यपि देहादिव्यतिरिक्तेति* ॥ व्यतिरेकप्रतिभास एवाध्यासविरोधितया सामानाधिकरण्यस्य गौणत्वमावहति, नत्वर्थमात्रमिति भावः। *ननु* सामान्येन गृहीतस्य विशेषाग्रहणादन्यसंसर्गावभासो भवति, आत्मा तु विशेषरूपेण गृहीतः, कथं तत्राध्यासः ? तत्राह—*दृश्यते हीति* ॥ अथ प्रतिभासत एवाहंप्रत्ययो विविक्तात्मविषय इति शङ्कते—*अथ पुनरेकान्तत इति* ॥ परिहरति—*ततस्तत्सद्भाव इति* ॥ यौक्तिकज्ञानसहकृतेनाहंप्रत्ययेनात्मनि विविक्ते प्रतिपन्ने पुनः सामानाधिकरण्यं गौणमेव, तत्सामान्यात्पूर्वमपि गौणमेवेत्यभिप्रेत्याह—*जिज्ञासोत्तरकालं तर्हीति* ॥ विचारेणापि नाहंप्रत्ययस्य व्यतिरिक्तात्मविषयत्वमापादितम्, किंतु

ऋजुविवरणम्

विषयत्वेनाविरोधं दर्शयितुं विकल्प्यावतारयति—*किमर्थत इति*॥ *ननु* अर्थव्यतिरेके गौणत्वेन कथमध्यासः ? इत्याशङ्क्याभिप्रायमाह—*व्यतिरेकप्रतिभास इति*॥ "दृश्यते ही"त्यनेन स्वरूपावभासेऽध्यासासंभवमाशङ्क्य, दृष्टान्तप्रदर्शनमिवाभाति, तदनुपपन्नम् ; स्वरूपावभासेऽपि रजतभ्रमदर्शनाच्छङ्कानुदयादित्याशङ्क्य चोद्यान्तरनिवृत्तौ तात्पर्यमाह—*ननु सामान्येनेति*॥ "अथ पुनरि"त्यनेन व्यतिरेकप्रतिभासे दूषणमुक्तम्, तदप्रस्तुतम् ; अहंप्रत्यये तदप्रतिभासस्य दर्शनीयत्वात्, विचारादिना भेदप्रतीतौ जिज्ञासावैयर्थ्याङ्गीकारात्, गृहीतेऽपि जिज्ञासा दृश्यते ; अतो हेयोऽयं ग्रन्थ इत्याशङ्क्यावतारयति—*अथ प्रतिभासत इति*॥ "जिज्ञासोत्तरकालमि"ति चोद्यमप्रयोजकम् ; उत्तरत्र गौणत्वेऽपि पूर्वं भ्रमत्वसंभवात्, तावतैव सिद्धान्तिप्रयोजनसिद्धेरित्याशङ्क्याभिप्रायमाह—*यौक्तिकज्ञानसहकृतेनेति*॥ "न युक्तः" इति गौणत्वं कथं निराक्रियते ? अहंप्रत्ययेन भेदे प्रतीयमानेऽध्यासासंभावादित्याशङ्क्याह—*विचारेणापीति*॥

तत्त्वदीपनम्

संगत इत्याह—*अन्यथेति*॥ अहंप्रत्ययस्य देहतादात्म्यविषयत्व आत्मसाधकाभावात्तदसिद्धिरित्यर्थः। आद्यं दूषयति—*अत इति*॥ अहंप्रत्ययस्य व्यतिरिक्तग्राहित्वे कथं "भेदानध्यवसायादि"त्यूचिवान् टीकाकृत् ? इत्याशङ्क्य, विकल्पोत्तरत्वेन व्याचष्टे– *किमर्थत इत्यादिना*॥

भेदविशेषितप्रत्ययस्याध्यासविरोधित्वे विशेषणीभूतभेदस्यापि विरोधित्वात्कथमध्यासः ? इत्यत्राह—*व्यतिरेकेति*॥ विशिष्टविरोधित्वे विशेषणस्याऽपि विरोधित्वमुक्तम्, तत्राह – *नत्विति*॥ स्रक्-सर्पयोर्व्यावृत्तावप्ययं सर्पः' इत्यध्यासदर्शनान्न भेदमात्रस्य विरोधित्वमित्यर्थः। अध्यासव्यापकाभावान्नाहंकार-तद्धर्माणामात्मन्यारोप इति चोदयति—*ननु इति। विशेषरूपेणेति*॥ चित्त्वेनेत्यर्थः। चित्त्वं प्रतिभाति, परं न त्वहंकारव्यावृत्ताऽऽत्मधर्मतया ; ततः प्रतीयमानेऽपि संभवत्यध्यास इत्याह—*तत्राहेति*॥ द्वितीयमनुवदति—*अथेति*॥ ऐक्यग्रन्थशङ्कां निरस्यति—*परिहरतीति*॥ किं सर्वदाऽहंप्रत्ययस्य विविक्तग्राहित्वम् ? उत जिज्ञासोत्तरकालम् ? आद्ये बहलालोकमध्यस्थहस्त्यादौ विमत्यभाववदात्मनोऽपि व्यावृत्ततया प्रतिभासान्न विप्रतिपत्तिः स्यात्, ततश्च जिज्ञासाऽसंभव इति टीकार्थः। जिज्ञासोत्तरकालं गौणत्वे प्रागगौणत्वप्रसङ्ग इत्याशङ्क्याह—*यौक्तिकेति*॥ *तत्सामान्यादिति*॥ 'अहं मनुष्यः' इति प्रत्ययत्वसामान्यादित्यर्थः। उत्तरकालं गौणत्वव्यवहारो न प्रागिति विशेषः। (मूले)कथमित्यादेरयमर्थः– जिज्ञासायामपि न गौणत्वम्, युक्त्युत्थज्ञानस्याप्रामादिकत्वात्, अहंप्रत्ययस्य चात्ममात्रविषयत्वादिति शङ्कते—*कथमिति*॥

पञ्चपादिका

जिज्ञासा नाम युक्त्यनुसन्धानम् । न हि युक्तिः पृथग् ज्ञानान्तरजननी, किन्तु सिद्धस्यैवाहंप्रत्ययस्य विषयविवेचिनी । तस्माद् विविक्तविषयत्वाद् व्यतिरिक्तात्मानुभवपर्यन्त एवाहंकारो जिज्ञासोत्तरकालं युक्तः, न युक्तः ; अकार इव ह्रस्वत्वाभिमानः । *ननु* तत्रापि कथम् ? अनुभव एव । एवमहङ्कारेऽपि समानश्चर्चः । *ननु* अनुभवस्तर्कबलाद् यथाऽवभासिन्यकारे सम्भवति ; ह्रस्वादेः पृथक्सतस्तथाऽनवगमात्, *तन्न* ; एकस्य पृथक्त्वेऽप्यर्थादितरस्यापि पृथक्त्वात् ॥ *ननु* महदेतदिन्द्रजालम्—यत् तर्कानुगृहीतात् प्रमाणाद् यथायथमसाधारणरूपयोरेवावभासमानयोरेकत्वावगमो न गौण इति, *बाढम्* ; इन्द्रजालमेवैतत्, अविद्याकृतत्वात् ।

पञ्चपादिकाविवरणम्

सर्वदा स्वरूपमात्रविषयोऽहंप्रत्ययः, यौक्तिकज्ञानलब्धस्तु व्यतिरेकः, अतस्तस्याननुसन्धाने पूर्ववदध्यास एवेति परिहरति—*न युक्त इति* ॥ तत्रापि नाध्यास इति चोद्यम् । अनुभवविरोध इति परिहारः । अकारस्य व्यतिरेकेऽपि ह्रस्वादेरव्यतिरेकादध्यास इति चोदयति—*नन्वनुभव इति* ॥ अन्यतरव्यतिरेके द्वयोरेकत्वाद् भेदस्येतरेतरव्यतिरेकः सिद्ध्यतीत्याह—*तन्नेति* ॥ *ननु महदेतदित्यादिचोद्यपरिहारौ स्पष्टौ* ॥

ऋजुविवरणम्

ननु—यौक्तिकेनापि भेदे गृहीते नाध्याससंभवः, तत्राह—*तस्याननुसन्धान इति* ॥ *ननु*—भिन्नत्वेन गृहीते तदनुसन्धानाभावमात्रेण कथमध्यासः ? तत्राह—*अकारस्येति* ॥

"*ननु*महदेतदिन्द्रजालमि"त्यनेन भेदेन गृहीतेऽध्यासकारणाभावाद्गौणत्वनिराकरणं मृषेति चोदयित्वा, "बाढमिन्द्रजालमि"त्यनेनाविद्याकृतत्वेनाध्यासत्वमुक्त्वा, "तथाही"त्यनेनाहंप्रत्ययस्य देहादिप्रतिष्ठितत्वप्रदर्शनं

तत्त्वदीपनम्

जिज्ञासाया अहंप्रत्ययविषयविवेचकत्वात्तद्विरोधाद् देहात्मबुद्धेर्गौणत्वमिति वक्तुं जिज्ञासास्वरूपमाह—*जिज्ञासेति* ॥ युक्तेरप्रमाणत्वमुक्तमङ्गीकरोति—*नहीति* ॥ तर्हि वैयर्थ्यमित्याह—*किंत्विति* ॥ "न युक्तः" इत्यत्र भेदबोधेऽपि न गौणत्वमित्युक्तम्, ज्ञातभेदयोरभेदाभिमानस्य गौणत्वदर्शनादित्याशङ्क्याह—*विचारेणेति* ॥ अहंप्रत्ययस्य व्यतिरिक्तविषयत्वे—"अहं व्यतिरिक्तः" इत्युक्तेः पौनरुक्त्यप्रसङ्गाद् नैतदित्यर्थः । तर्ह्यभेदविषयत्वमिति शङ्कते—*किंत्विति* ॥ अभेदविषयत्वे विप्रतिपत्त्यभावापातात् स्वरूपमात्रविषयत्वमित्याह—*सर्वदेति* ॥ तर्हि व्यतिरेकाभावः प्राप्तः, तत्राह—*यौक्तिकेति* ॥ तर्हि—'अहं मनुष्यः' इत्यस्य गौणत्वम्, तत्राह—*अत इति* ॥ युक्तयो यदाऽनुसन्धीयन्ते, तदाऽपि तर्कज्ञानस्य परोक्षत्वान्नापरोक्षभ्रमविरोधित्वमित्यर्थः ॥

"कथमनुभवः" इत्येकग्रन्थत्वशङ्कां निरस्यति—*तत्रापीत्यादिना* ॥ टीकाक्षराणामेषोऽर्थः—ह्रस्वोऽकार इत्यस्य यथा न गौणत्वम्, तद्वद् 'अहं मनुष्यः' इत्यस्यापीत्युक्ते दृष्टान्तासंमतिमाशङ्कते—*नन्विति*॥ इदंरजतवदकारस्य ह्रस्वतयाऽनुभूयमानत्वादध्यासत्वमित्याह *अनुभव इति* ॥ अध्यासतां गमयतीति शेषः । यौक्तिकज्ञानेनाकारस्य ह्रस्वाद् व्यावृत्त्यभ्युपगमेऽध्यासानुभव इति कथमुक्तम् ? नच—अकाराद् ह्रस्वस्य व्यावृत्तिप्रतीत्यभावाद् अध्यासानुभव इत्यपि—शङ्क्यम् ; अकारस्य ह्रस्वाद् व्यावृत्तिप्रतीतौ तस्मादितरस्यापि व्यावृत्तिप्रतीतिसंभवादित्यत्राह—*अकारस्येति* ॥ इदमः समारोपितरूप्याद् व्यावृत्तावपि न तस्मात्तस्य व्यावृत्तिर्यथा, तद्वदत्रापीत्यर्थः ॥ एकस्य पृथक्त्वमात्रेण कथमितरस्य पृथक्त्वमुक्तं टीकायाम् ? न खलु चैत्रपृथक्त्वेन मैत्रस्यापि पृथक्त्वमित्याशङ्क्य पृथक्त्वं किं संयोगवदुभयगतम् ? उत ह्रस्वत्ववदेकगतम् ? इति विकल्प्याऽऽद्यं दूषयति—*अन्यतरेति* ॥ पृथक्त्वस्य भेदव्यवहारकारणत्वादेकत्र पृथक्त्वज्ञानेऽन्यत्रापि तज्ज्ञानं स्यात् । एकगतत्वेऽप्यकारस्य ह्रस्वप्रतियोगिकभेदज्ञाने ह्रस्वस्यापि तत्प्रतियोगिको भेदोऽधिगतः स्यात्, इतरथा न तस्यापि स्यात् । नच रूप्यदृष्टान्तः ; तस्यापि त्वया व्यावृत्त्यङ्गीकारादित्यर्थः । *नन्वित्यादेरयमर्थः*—भेदज्ञानेऽप्यभेदज्ञानं न गौणमित्येतदयुक्तमिति चोदयति—*ननु महदेतदिति* ॥

पञ्चपादिका

तथाहि--अहंप्रत्ययस्य स्वविषयप्रतिष्ठितस्यैव सतस्तदेकप्रतिष्ठितामप्रतिबन्धकृदनाद्यविद्याकृतं देहादिप्रतिष्ठितत्वमपि दृष्टम् ; अतो देहादिविषयत्वाविरोधि स्वविषयप्रतिष्ठत्वमहंप्रत्ययस्य । अतो युक्त्या विषयविवेचनेऽपि स्वविषयोपदर्शनेन तत्प्रतिष्ठत्वमात्रं कृतम्, नाधिकमादर्शितम् । स्वविषयप्रतिष्ठत्वं च देहादिष्वहं-ममाभिमानेन न विरुध्यत इत्युक्तम् । अतो न्यायतो विषयविवेचनादूर्ध्वमपि न प्रागवस्थातो

पञ्चपादिकाविवरणम्

किंच विवेकानन्तरमध्यासोऽहंप्रत्ययमात्रेण विरुद्ध्यत इत्युच्यते ? किं वा यौक्तिकज्ञानेन ? न तावदहंप्रत्ययमात्रेणेत्याह—*तथा ह्यहंप्रत्ययस्येत्यादिना* ॥ *ननु* पूर्वमात्मविषयोऽपि युक्तिज्ञानसन्निधानाद् व्यतिरिक्तविषयोऽहंप्रत्यय इति, नेत्याह—*अतो युक्त्या विषयविवेचनेऽपीति* ॥ नहि प्रत्यक्षज्ञानं ज्ञानान्तरसन्निधानात् स्वविषयादधिकविषयं भवतीति भावः । विचारजन्यज्ञानस्याननुसन्धानात्, अनुसन्धानेऽपि परोक्षत्वान्नापरोक्षाध्यासः प्रागवस्थातो भिद्यत इत्युपसंहरति—*अतो न्यायत इति* ॥

ऋजुविवरणम्

कृतम्, तद् व्यर्थम् ; गौणत्वेनाप्यङ्गीकारात्, मिथ्यात्वेन तद्विषयत्वमप्ययुक्तमेव ; अविरोधोऽप्ययुक्तः ; "तथाही"त्यप्ययुक्तम् ; विवरणाभावादित्याशङ्क्य, तन्निवृत्त्यर्थं कथमविद्याकृतत्वेनाहंकारादीनामध्यस्तत्वमुच्यते ; भेदज्ञाने सत्यध्यासानुपपत्तेरिति शङ्कानिवर्तकत्वं दर्शयितुं युक्त्यन्तरत्वेन वा विकल्प्यावतारयति—*किंचेति* ॥ "विवेकानन्तरमि"त्यतो "युक्त्ये"त्यन्तेनाधिकज्ञापकत्वं युक्तेर्नास्तीत्युक्तम्, तदयुक्तम् ; "विषयविवेचनेऽपी"त्यधिकविषयत्वस्य दर्शितत्वात्, "तत्प्रतिष्ठत्वमात्रमि"त्यनेनापि युक्तेः स्वविषयाहंप्रत्ययव्यवस्थापकत्वमुक्तम्, तस्य च व्यतिरिक्तविषयत्वादहंप्रत्ययोऽपि तथेत्याशङ्क्याभिप्रायमाह—*नहि प्रत्यक्षज्ञानमिति* ॥ कथमननुसन्धानहेतुकोऽध्यासः ? अनुसन्धानेऽपि तस्य दर्शनादित्याशङ्क्याह—*अनुसन्धानेऽपीति* ॥ "अनादि-

तत्त्वदीपनम्

एकतावगमो न गौणो यस्मात्, तस्माद् 'अहं मनुष्यः' इति ज्ञानमिन्द्रजालमित्युच्यते ? किं वा न गौण इति यत्, तदिन्द्रजालमिति ? तत्राद्यं दूषयति—*बाढमिति* ॥ अङ्गीकृतमंशमाह—*इन्द्रजालमिति* ॥ तत्र हेतुमाह—*अविद्याकृतत्वादिति* ॥ भेदबोधाद् अध्यासस्य निवृत्तत्वात् कथमध्यासत्वम् ? ततो गौणत्वमिति द्वितीयकल्पं प्रत्याह—*किंचेति* ॥ *तथाहीत्यस्यैषोऽर्थः—अहंप्रत्ययस्य देहादिप्रतिष्ठत्वमपि दृष्टमिति संबन्धः । तर्हि देह एवाऽऽत्मा स्यादिति, तत्राह—*स्वविषयेति* ॥ व्यतिरिक्तात्मप्रतिष्ठस्येत्यर्थः । तर्ह्युभयं स्यादिति, तत्राह—*तदेकेति* ॥ अपिशब्दोऽवधारणार्थो दृष्टपदेनानुषज्यते । देहादिप्रतिष्ठत्वे हेतुमाह—*अनादीति* ॥ अहंप्रत्ययमात्रस्याध्यासाविरोधित्वेऽपि सहकार्यनुरोधाद्विरोधितेति शङ्कते—*ननु पूर्वमिति* ॥ सहकारिसन्निधावपि 'अहं मनुष्यः' इत्येवोपलम्भान्नातिरेकग्राहित्वमित्याह—*नेत्याहेति* ॥

धूममात्रस्य वह्निमात्रबोधकत्वेऽपि सौरभदर्शनसहकृतस्य श्रीखण्डेन्धनोत्थदहनबोधकत्वं दृष्टम्, तद्वत् सहकारियुक्तस्याधिकग्राहिता, 'अहं मनुष्यः' इति दर्शनं न गौणमित्यत्राह—*न हीति* ॥ दृष्टान्ते विशिष्टधूमस्य विशिष्टवह्निबोधकत्वम्, न तु धूममात्रजज्ञानस्य सहकारिसन्निधानादन्यविषयत्वम्, अत्र तु प्रत्यक्षस्य यौक्तिकज्ञानसन्निधेरन्यविषयत्वमुच्यत इति वैषम्यमित्यर्थः । द्वितीयं दूषयति—*विचारेति* ॥ सदेति शेषः । अविवेकिनामिति वा । अनुसन्धानेऽपि न विरुध्यतेऽध्यास इत्याह—*अनुसन्धानेऽपीति* ॥ अपरोक्षभ्रमस्यापरोक्षज्ञाननिवर्त्यत्व-

भाष्यभावप्रकाशिका

पूर्वाहङ्कारादिवासनोपहितानाद्यविद्यया चिदात्मन्यनुभूयतेऽहङ्काराध्यास इति ॥ निरुपाधिकाध्यासे दृष्टान्तमाह--*शुक्तिकेति* ॥ सम्यग्धीनिवर्त्याधिष्ठानरूपाभिप्रायेण शुक्तिकाग्रहणम् ॥ संप्रयुक्तस्य

पञ्चपादिका

विशिष्यतेऽहंप्रत्ययः। तेन न कदाचिदपि 'मनुष्योऽहमि'ति प्रत्ययो गौणः। तदेवं स्वयंज्योतिष एव सतो जीवस्य कार्य-करणसङ्घातव्यतिरिक्ततायास्तथाऽनवभासदर्शनात् 'मनुष्योऽहमि'ति चाध्यासोपलब्धेर्ब्रह्मात्मैकत्वस्यापि तत्स्वरूपस्यानवभासनं पूर्वकालकोटिरहितप्रकाशाच्छादितमोनिमित्तं श्रुति-तदर्थापत्तिसमर्पितम्,

पञ्चपादिकाविवरणम्

ननु प्रत्यक्षे देहात्मैक्याध्यासे किमैक्यप्रत्ययमपबाध्य व्यतिरेके प्रमाणमुक्तमिति ? *उच्यते* ;—युक्तिसहितागमानुमानाहंप्रत्ययैर्द्विचन्द्रबाधयैकत्ववद् व्यतिरेकः सिद्धयतीत्युक्तं भवति—*तदेवं स्वयंज्योतिष इति* दृष्टान्तानुवादेन दार्ष्टान्तिककथनपरो ग्रन्थः स्पष्टार्थः॥ स्वयंप्रकाशत्वेऽप्यविद्ययाऽगृह्यमाणविशेषत्वादात्मनोऽधिष्ठानयोग्यत्वकथनेन "परत्र परावभासः" इति लक्षणांशो दर्शितः। कारणत्रितयेऽप्यद्वितीयात्मावभासिचैतन्य-

ऋजुविवरणम्

त्वाच्चे"त्यनेन पूर्वदृष्टत्व-स्मृतिरूपत्वमात्रसाधनं कृतम्, तदयुक्तम्; सकललक्षणाक्षेपे तदंशप्रदर्शनस्यायुक्तत्वात्, तत्राधिष्ठानचैतन्यदोषो लब्धः, पुनस्तत्साधने पौनरुक्त्यम्; नचानादित्वं स्मृतिरूपत्वसाधकम्; तस्य कारणत्रयजन्यत्वसापेक्षत्वादित्याशङ्क्यावतारयति—*स्वयंप्रकाशत्व इति*॥ "पृथग्भोक्तृविषये"ति हेतुर्व्यर्थः; शङ्कानिरा-

तत्त्वदीपनम्

नियमान्न परोक्षज्ञानेन बाध इत्यर्थः। 'अहं मनुष्यः' इति प्रत्ययस्य देहतादात्म्यविषयत्वे न व्यतिरेकसिद्धिरित्युक्तमनुवदति—*ननु प्रत्यक्ष इति*॥

केवलयोरनुमानाऽऽगमयोर्व्यतिरेकासाधकत्वेऽपि युक्तिसहकृताहंप्रत्ययोपोद्बलिताऽऽगमानुमानयोर्व्यतिरेकसाधकत्वं युक्तमित्याह—*उच्यत इति*॥ बाल्याद्यवस्थासु शरीरव्यावृत्तावप्यहंप्रत्ययोऽनुवर्तते। अनुवर्तमानस्य च व्यावृत्तमात्राऽऽलम्बनत्वायोगात्सकलावस्थानुस्यूतमात्मतत्त्वमालम्बनमेष्टव्यमित्याद्या युक्तिः। इतरद् व्यक्तम्। "अनादित्वाच्चे"इत्यत्र पूर्वदृष्टत्वे हेत्वन्तरमुपन्यस्यत इति प्रतिभाति, तदनुपपन्नम्; प्राक् पूर्वदृष्टत्वानुपपादनादित्याशङ्क्य, वृत्तसंकीर्तनपुरस्सरमुत्तरग्रन्थमवतारयति—*स्वयंप्रकाशत्व इति*॥ लक्षणांशशब्देन परत्रेत्यंशो विवक्ष्यते। अधिष्ठानप्रमाण-तद्दोष-संस्काराणां रूप्यभ्रमजनकत्वादत्राप्यधिष्ठानप्रमाणं तावत् सुसंपादमित्याह—*चैतन्येति*॥ तस्य प्रमाणत्वमुपपादयति—*आत्मेति*॥ आत्मावभासित्वमात्मव्यवहारहेतुत्वमित्यर्थः। घटव्यवहारस्य स्वान्यत्वं दृष्टम्, तद्वदत्रापीति शङ्कां निरस्यति—*अद्वितीयेति*॥ दोषस्त्वविद्येत्याह—*तद्गतेति*॥ कारणत्रियसंभवेऽप्यध्यासा-

भाष्यभावप्रकाशिका

मिथ्यारजतत्वभानधीबोधनाय वत्करणम्। अनुभवप्रसिद्धयर्थो हिशब्दः॥ बिम्ब-प्रतिबिम्बयोः प्रतिबिम्बानां च मिथो भेदधीवद् जीव-ब्रह्मणोर्जीवानां च भेदधियः। सोपाधिकभ्रमस्य दृष्टान्तमाह—*एक इति*॥ एकत्वग्रहणवति ग्रहणे पूर्ववत्। लक्षणप्रकरणमुपसंहर्तुमिति

वार्तिकम्

तद् द्वयमपि न संभवति। कुतः? प्रत्यगात्मनोऽविषयत्वात्, अविषयत्वं चात्मनः प्रत्यक्त्वादेव; "पराञ्चि खानी"ति श्रुतेः। प्रत्यक्त्वं च सर्वसाक्षित्वात्। नहीन्द्रियाविषये प्रत्यगात्मनि विषयधर्माणां कामादीनां विषयस्य चाहङ्कारादेरध्यासः संभवति; यतः सर्वो लोकः *पुरोऽवस्थिते इन्द्रियसन्निकृष्टेऽथच तद्विषये शुक्तिकाशकलादौ विषयान्तरं तद्योग्यं रजताद्यध्यस्यति, न तद्विपरीते तद्विपरीतमिति। कुत एतत्? इन्द्रियसंप्रयोग-तद्दोष-संस्काराणां सर्वत्रापरोक्षभ्रमहेतुत्वावगमात्। यदि चाधिष्ठानं नेन्द्रियविषयः,

पञ्चपादिका

तन्निमित्ताहंकाराध्यासश्च सम्भाव्यते । अनादित्वाच्च पूर्वदृष्टत्वं स्मृतिरूपत्वं च । पृथग्भोक्तृ-विषयानुभवफलाभावाद्भोक्तृचैतन्यसंवलितैकानुभवफलत्वाच्च परत्र परावभासस्यान्योन्यसम्भेदस्य विद्यमानत्वादध्यासलक्षणव्याप्तिरिहाप्युपपद्यते ॥

"कोऽयमध्यासो नामे"ति किंवृत्तस्य प्रश्न आक्षेपे च समानवर्तिनो विशेषानुपलब्धेः 'पृष्टमनेन'

पञ्चपादिकाविवरणम्

प्रमाण-तद्गताविद्याकारणदोषौ लब्धौ, संस्कारमिदानीं लम्भयति—*अनादित्वाच्चेति* ॥ *ननु* अध्यस्यमानाधिष्ठानविषयं कारणत्रितयजन्यमेकमेव ज्ञानं वक्तव्यम्, तदभावान्नाध्यास इत्याशङ्क्याह—*पृथग्भोक्तृविषयानुभवफलाभावादिति* ॥ आत्मचैतन्यमेवात्मानात्मसंभेदावभासिस्वरूपेणाजन्यत्वेऽपि विशिष्टविषयोपरक्ताकारेण जन्यते ; भ्रान्तित्वाच्च विषय-विषयिणोरेकस्मिन् प्रत्यये संभेदावभासः संभवति, इति कारणत्रितयजन्यमात्मन्यनात्मावभासिज्ञानमध्यासः सिद्ध इति ॥

"कथं पुनरि"त्यादिभाष्यस्य तात्पर्यमाह—*कोऽयमध्यासो नामेति किंवृत्तस्ये"ति ॥ पृष्टमेवानेन, आक्षिप्तमपि मयेत्युभयत्रैवकारापिशब्दौ प्रयोक्तव्यौ । अध्यस्यमानेन समानेन्द्रियविज्ञानविषयत्वमेवाधिष्ठानस्य

ऋजुविवरणम्

करणासमर्थत्वादित्याशङ्क्य शङ्काबीजप्रदर्शनमनेन क्रियत इति व्याचष्टे—*स्वरूपेणाजन्यत्वेऽपीति* ॥ जन्यज्ञानान्तरं नास्तीत्याह—*आत्मचैतन्यमेवेति* ॥ कथं "भोक्तृचैतन्ये"त्यनेन जन्यत्वमुक्तम् ? अनुक्तौ च शङ्कापरिहारो न स्यादित्याशङ्क्य व्याचष्टे—*विशिष्टविषयोपरक्तेति* ॥ अथवा "आत्मचैतन्यमि"त्यनेन "पृथग्भोक्तृविषये"ति व्याख्यातम्, कथं तस्याजन्यस्य टीकाकृता भोक्तृचैतन्येत्यनेन फलत्वमुक्तमित्याशङ्क्य व्याचष्टे—*स्वरूपेणाजन्यत्वेऽपीति* ॥ "परत्र परावभासस्ये"त्यनुपपन्नम् ; चैतन्यस्याविषयत्वेन तत्संभेदावभासाभावादित्याशङ्क्योपपादयति—*भ्रान्तित्वाच्चेति* ॥

ननु—पुरोऽवस्थितं कथं प्रयोजकत्वेनोपादायाक्षेपः क्रियते ? स्वप्नादौ पुरोऽवस्थितविषयाभावेऽप्यध्यासस्य सर्वैरङ्गीकृतत्वात्, अथ विषयत्वाभावेनाक्षेपः, तन्न ; अज्ञानविषयत्वस्य साधितत्वात्, अतो नाक्षेपबीजमुपलभ्यत इत्याशङ्क्य व्याचष्टे—*अध्यस्यमानेनेति* ॥ कारणान्तरमप्युपाध्यभावासङ्गत्वादि स्वावसरे वक्ष्यमाणत्वान्नेहोक्तम् ।

तत्त्वदीपनम्

संभव इति शङ्कते—*नन्विति* ॥ संसृष्टव्यवहारानुपपत्त्याऽधिष्ठानादिविषयमेकं ज्ञानं जन्यं च दृष्टमन्यत्र, अत्र त्वन्यथा ; आत्मनोऽविषयत्वादधिष्ठानारोप्यज्ञानस्य चैतन्यस्य नित्यत्वाच्चेत्यर्थः । आत्मनोऽविषयत्वेऽप्यारोप्यस्फुरणादन्यज्ञानाभावादधिष्ठानत्वमिति टीकार्थः ॥

आरोप्यस्फुरणव्यतिरिक्तस्फुरणसंबन्धित्वेनाधिष्ठानत्वं कथमुक्तम् ? तुच्छस्याप्यधिष्ठानत्वापातादिति, तत्राह—*आत्मेति* ॥ आरोप्याधिष्ठानयोरेकस्फुरणत्वस्याधिष्ठानत्वप्रयोजकत्वात्तुच्छस्य चातादृक्त्वान्नाधिष्ठानत्वमित्यर्थः । जन्यत्वं घटयति—*स्वरूपेणेति* ॥ एतदभिसन्धायोक्तम्—"भोक्तृचैतन्येति" ॥ आरोप्यस्याधिष्ठानाभिन्नानुभवफलत्वाद्विषयसंवलितत्वेन जन्यत्वाच्च लक्षणोपपत्तिरिति टीकार्थः । आत्माऽनात्मनोर्विरुद्धयोः कथमैक्यम् ? तत्राह—*भ्रान्तित्वादिति* ॥ प्रमाणतयैक्यानवभासेऽपि भ्रान्त्या तत्प्रतिभास इत्यर्थः । लक्षणसमर्थनमुपसंहरति—*इति कारणेति* ॥ किंशब्दस्य व्याख्यातत्वात् पुनस्तत्कस्मादित्याशङ्कयोत्तरशेषत्वादनुवाद इत्याह—*कथमिति* ॥ प्रश्नाक्षेपयोरुभयोरपि कृतत्वात् 'पृष्टमनेने'ति मत्वा, 'आक्षिप्तं मये'ति च कथमुक्तम् ? इत्याशङ्क्याध्याहारेण योजयति—*पृष्टमिति* ॥ सर्वगतत्वेन पुरःस्थितत्वादज्ञानविषयत्वाच्चाविषयत्वाभिधानं भाष्यटीकयोरसंगतम्, तत्राह—*अध्यस्यमानेनेति* ॥ बाढमित्यादेरेषोऽर्थः ।

कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषय-तद्धर्माणाम् ?

भामती

पति—कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषय-तद्धर्माणाम् ? *अयमर्थः*—चिदात्मा प्रकाशते ?

ऋजुप्रकाशिका

"कथं पुनरि"ति भाष्यस्यायमर्थः—प्रातिलोम्येन जडानृताहंकारादिभ्यः प्रातिकूल्येन सत्य-ज्ञानानन्दात्मनाऽञ्चते प्रकाशत इति *प्रत्यक्*,*तादृशेऽविषय आत्मनि विषय-तद्धर्माणामध्यासः कथम् ? *सर्वो हि = लोको *विषये* विषयान्तरं तद्धर्मांश्चाध्यस्यतीति दर्शनादिति। *ननु* आत्मनोऽविषयत्वे ह्यध्यासायोगः, तस्य विषयत्वमेवास्तु, अत एव तत्र तदध्यासोऽप्यस्त्वित्यत आह—*अयमर्थ इति* ॥ अविषयत्वेनाध्यासायोगं वक्तुमेव

पञ्चपादिका

इति मत्वाऽध्यासस्वरूपेऽभिहिते पुनः—'आक्षिप्तं मये'त्यभिप्रायं विवृणोति—*कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषय-तद्धर्माणामिति* ॥ बाढमेवंलक्षणोऽध्यासः, स चेह न सम्भवति। कथम् ?

तत्त्वदीपनम्

अध्यास आक्षिप्यते चेत्, कथं पुनरध्यास इत्येवोच्यताम्, किं "प्रत्यगात्मनी"त्याशङ्क्यान्यत्राध्यासमङ्गीकृत्य, विशेषविषय आक्षेपं द्योतयितुमित्याह—*बाढमिति* ॥ अरूप्ये रूप्याध्यासवदविषयेऽपि विषयारोप इति शङ्कते—*कथमिति*॥ विषयत्वस्याधिष्ठानत्वव्यापकत्वात्तदभावेऽभावं दर्शयितुं तस्य व्यापकत्वमाह—*यत इति*॥ ऐन्द्रिय-

भाष्यभावप्रकाशिका

शब्दः। लक्षितरजताध्यासस्य लोकवादिसिद्धत्वेऽपि नात्मन्यनात्माध्यासः स्यादिति विशेषाक्षेपमुत्थापयति—*कथमिति* ॥ प्रतीचि पूर्णे स्फुरणत्वेनाननुभाव्ये परेषां परिच्छिन्नानामनुभाव्यानां

वार्तिकम्

कथं तदिन्द्रियसंप्रयोगेन्द्रियदोषौ भ्रमहेतू स्याताम् ? यदि चारोप्यं न विषयः, कथं तद्विषयपूर्वानुभवसंस्कारस्तद्धेतुः स्यात् ?

ननु—आत्मनोऽप्यस्ति मनःसन्निकर्षाधारत्वम्, तज्जन्याहमित्यनुभवविषयत्वं चेति—चेत्, *नैवम्*; त्वया तथात्वानङ्गीकारात्। यतस्त्वम्—"युष्मत्प्रत्ययापेतस्य प्रत्यगात्मनोऽविषयत्वं ब्रवीषि" ॥ नहि प्रत्यगात्मनो युष्मत्प्रत्ययगोचरत्वं संभवति; प्रत्यक्त्वव्याहतेः, तद्विषयस्य पराक्त्वात्। नच तदपेतस्य विषयत्वमस्ति; विषयस्य युष्मत्प्रत्ययगोचरत्वनियमस्य त्वयैवाभिहितत्वात्। अतो निरञ्जनत्वान्निर्गुणत्वाच्चात्मन इन्द्रियसंप्रयोगानाधारत्वाद् ज्ञानाविषयत्वादध्यासविषयत्वानुपपत्तेश्च कारण-फलयोरुभयोरप्यात्मन्यसंभवान्न तस्मिन्नध्यासोऽस्तीत्युक्तलक्षणमध्यासमात्मन्यसंभवं मन्वानश्चोदयति—*कथं पुनरित्यादिना* ॥ सुव्याख्यातं चोद्यभाष्यम्। "युष्मदि"त्यादिपूर्वोक्तशङ्काया एव विवरणमेतत्।

प्रदीपः

एतावता कारणत्रयाभावनिबन्धनाध्यासासंभवशङ्का विशदं परिहृता, साम्प्रतन्तु अधिष्ठानाज्ञानरूपतुरीयकारणाभावान्नाध्यास आत्मन्यन्तःकरणस्येत्यभिप्रायेणाक्षिपति—*कथं पुनरिति* ॥ आत्मन्यन्तःकरणाध्यासकारणमधिष्ठानाज्ञानमेवान्तःकरण आत्मसंसर्गाध्यासस्यापि कारणम्, इति विषय-तद्धर्माणामात्मन्यध्यासाक्षेपेण विषये विषयि-तद्धर्माध्यासाक्षेपोऽप्यर्थसिद्ध एवेति

भामती

न वा ? न चेत्प्रकाशते, कथमस्मिन्नध्यासो विषय-तद्धर्माणाम् ? न खल्वप्रतिभासमाने पुरोवर्तिनि द्रव्ये रजतस्य वा तद्धर्माणां वा समारोपः संभवतीति। प्रतिभासे वा, न तावदयमात्माऽजडो-घटादिवत्पराधीनप्रकाश इति युक्तम्। न खलु स एव कर्ता च कर्म च भवति ; विरोधात्। परसम-वेतक्रियाफलशालि हि कर्म। नच ज्ञानक्रिया परसमवायिनी, इति कथमस्यां कर्म ? नच तदेव स्वं च परं च ; विरोधात्, आत्मान्तरसमवायाभ्युपगमे तु ज्ञेयस्यात्मनोऽनात्मत्वप्रसङ्गः, एवं तस्य तस्येत्यन-

ऋजुप्रकाशिका

विकल्पयति—*चिदात्मेत्यादिना* ॥ द्वितीयेऽध्यासायोग एवेत्याह—*न चेदिति* ॥ अस्मिन् चिदात्मन्य-प्रतिभासमानत्वेऽपि तत्राध्यासमाशङ्कमानं प्रत्याह—*नेति* ॥ तथाऽदर्शनादिति भावः। आद्यं प्रत्याह—*प्रतिभासे वेति* ॥ आत्मा प्रकाशते इत्याद्यपक्षेऽपि किमात्माऽजडः ? जडो वा ? आद्ये स्वयंप्रकाशत्वेन प्रकाशान्तरविषयत्वाभावादविषयत्वमेवाऽऽत्मन इति तत्राध्यासायोग एव। नच—स्वयंप्रकाशत्वेन स्वविषय-त्वादविषयत्वमसिद्धमेवाऽऽत्मन इति—वाच्यम् ; स्वव्यवहारे संविदन्तरानपेक्षत्वस्यैव स्वप्रकाशत्वशब्दार्थत्वेन स्वविषयत्वस्य स्वप्रकाशत्वशब्दार्थत्वाभावात्, स्वप्रकाशत्वमात्रेण स्वविषयत्वाभावात्, आत्मनोऽजडत्वेऽपि घटादिवत् पराधीनप्रकाशतया विषयत्वम्, अतोऽध्याससंभव इति भ्रान्ताशङ्कां निवारयति—*न तावदयमात्मा-ऽजडो घटवदिति* ॥ अजडत्वं स्वयंप्रकाशत्वात्। अजडः पराधीनप्रकाश इति न युक्तम् ; "मम माता वन्ध्या" इत्यादिवदित्यर्थः। क्वचिन्न तावदयमात्मा जडो घटादिवदिति पाठः, स साधुः। अतस्त-त्पाठपक्षे जडपक्षं द्वितीयं निरस्यति—*न तावदयमात्मा जडो घटवदिति*॥ आत्मनो जडत्वपक्षे आत्मा घटादि-वत् पराधीनप्रकाश इति वक्तव्यम्, तन्न तावद् युक्तमित्यर्थः। कुतो न युक्तम् ? इत्यत आह—*न खल्विति* ॥ पराधीनप्रकाशत्वं नाम परसमवेतप्रकाशात्मकज्ञानक्रियाफलशालित्वरूपतद्विषयत्वलक्षणं कर्मत्वम्, तच्च ज्ञानकर्तु-रात्मनो न संभवति ; एकस्यैवाऽऽत्मन एकस्यां ज्ञानक्रियायां कर्तृत्व-कर्मत्वयोर्विरोधादित्यर्थः। *स एव = आत्मैव। अत्र एकस्यां ज्ञानक्रियायामिति शेषः। विरोधेन ज्ञानकर्तुः ज्ञानकर्मत्वायोगमभिधाय ज्ञानक्रियायाः परसमवेतत्वाभावेन कर्मलक्षणाभावादपि नात्मा ज्ञानक्रियायाः कर्मेत्याह—*परसमवेतेत्यादिना नचेत्यतः प्राक्तनेन ग्रन्थेन* ॥ *नच ज्ञानक्रियेति* ॥ कर्मेत्यनन्तरम्—'आत्मे'ति शेषः। *ननु* ज्ञान-क्रियायाः स्वसमवेतत्वेऽपि परसमवेतत्वमप्यस्ति ; स्वस्यैव परत्वादित्यत आह—*नच तदेवेति* ॥ *ननु* आत्मनः स्वकीयज्ञानकर्तृतयोक्तविरोधेन स्वज्ञानकर्मत्वाभावेऽपि आत्मान्तरसमवेतज्ञानं प्रति स्वस्याकर्तृतया विरोधाभावेन तज्ज्ञानकर्मत्वं युज्यत एवेत्यत आह—*आत्मान्तरेति* ॥ यः स्वभिन्नात्मसमवेतज्ञानविषयः, सोऽनात्मा, यथा घट इति व्याप्तेरात्मनोऽपि स्वभिन्नात्मान्तरसमवेतज्ञानविषयत्वेऽनात्मत्वप्रसङ्ग इत्यर्थः ॥ किं स्वभिन्नात्मसमवेतज्ञानविषयत्वेनानात्मत्वप्रसङ्गः ? किं वा ज्ञानविषयत्वमात्रेण ? नाद्यः ; अद्वैतमते स्वभिन्ना-त्मनोऽनङ्गीकारात्, न द्वितीयः ; ज्ञेयत्वमात्रेणानात्मत्वप्रसङ्गाभावात्, अद्वैतमतेऽप्यात्मनो ज्ञेयत्वाङ्गीकारा-दिति मन्यमानं प्रत्यनवस्थादूषणमाह—*एवं तस्य तस्येति* ॥ आत्मन आत्मान्तरसमवेतज्ञान-विषयत्वेन कर्मत्वे, आत्मान्तरस्यापि तदन्यात्मान्तरसमवेतज्ञानविषयत्वेन कर्मत्वम्, तदात्मान्तरस्यापि तथेत्यन-वस्थापात इत्यर्थः। यद्यप्यद्वैतमत आत्मान्तरमेव नास्ति ; तथापि वस्तुत आत्मनो नानात्वाभावेऽप्यौपाधिका-त्मनानात्वं पुरस्कृत्येदं दूषणमिति द्रष्टव्यम्। *वस्तुतस्तु*—तन्मते ज्ञानस्याऽऽत्मसमवेतत्वमेव नास्ति, येन तत्समवेतज्ञानविषयत्वेन कर्मत्वं स्यादिति द्रष्टव्यम्। तस्मादुक्तविधया ज्ञानाकर्मणि ज्ञानाविषय आत्मनि विषय-तद्धर्माध्यासोऽयुक्तः, अधिष्ठानाध्यस्यमानयोरेकज्ञानविषयकताया वक्तव्यत्वादविषये तदभावादिति भावः। अत्र चिदात्मा प्रकाशत इति पक्षं तस्य जडत्वपक्षं चाश्रित्य, आत्मा संविदाश्रयतया संवित्कर्तृत्वेनैव

भामती

वस्थाप्रसङ्गः । *स्यादेतत्*—आत्मा जडोऽपि सर्वार्थज्ञानेषु भासमानोऽपि कर्तैव, न कर्म ; परसमवेतक्रियाफलशालित्वाभावात्, चैत्रवत् । यथाहि--चैत्रसमवेतक्रियायां चैत्रनगरप्राप्तावुभयसमवेतायामपि क्रियमाणायां नगरस्यैव कर्मता ; परसमवेतक्रियाफलशालित्वात्, नतु चैत्रस्य क्रियाफलशालिनोऽपि ; चैत्रसमवायाद्गमनक्रियायाः—इति, तन्न ; श्रुतिविरोधात् । श्रूयते हि--"सत्यं ज्ञानमनन्तं ब्रह्म" इति । उपपद्यते च । *तथाहि*—योऽयमर्थप्रकाशः फलम्, यस्मिन्नर्थश्च, आत्मा च प्रथेते, स किं जडः ? स्वयंप्रकाशो वा ? जडश्चेत्, विषयात्मानावपि जडाविति, कस्मिन्किं प्रकाशेत ? अविशेषात्, इति प्राप्तमान्ध्यमशेषस्य जगतः । तथाचाभाणकः—"अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे" । नच—निलीनमेव विज्ञानमर्थात्मानौ ज्ञापयति चक्षुरादिवदिति—वाच्यम् ; ज्ञापनं हि ज्ञानजननम्, जनितं

ऋजुप्रकाशिका

भासते, न कर्मतयेति केचिदाहुः, तन्मतं प्रसङ्गान्निराकर्तुमाशङ्कते—*स्यादेतदित्यादिना* ॥ *सर्वार्थज्ञानेषु भासमानोऽपि=सर्वपदार्थज्ञानाश्रयतया भासमानोऽपि । कर्मत्वाभावे हेतुमाह—*परेति* ॥ स्वकर्तृकज्ञानक्रियायाः स्वसमवेतत्वेन परसमवेतत्वाभावात् परसमवेतक्रियाजन्यफलशालित्वाभावादिति भावः । स्वकर्तृकस्वसमवेतक्रियाकर्तुस्तत्क्रियाकर्मत्वाभावे दृष्टान्तमाह--*चैत्रवदिति* ॥ तदेतदाह--*यथाहीति* ॥ चैत्रसमवेतेत्यनन्तरं गमनेति शेषः । *कर्मता=गमनकर्मता । तत्र हेतुमाह--*परेति* ॥ *नतु चैत्रस्येति* ॥ चैत्रस्य गमनक्रियाजन्यफलशालित्वेऽपि गमनक्रियायाः स्वसमवेतत्वेन परसमवेतत्वाभावाद् न चैत्रस्य गमनक्रियाकर्मत्वम्, किंतु तत्कर्तृत्वमेव ; एवमात्मनोऽपि स्वसमवेतज्ञानक्रियाजन्यफलशालित्वेऽपि परसमवेतक्रियाजन्यफलशालित्वाभावाद् न ज्ञानकर्मत्वम्, किन्तु तत्कर्तृत्वमेवेत्यर्थः । "तत्त्वमसि" इत्यादिवाक्येषु आत्माभिन्नत्वेन प्रतिपाद्यमानस्य ब्रह्मणो ज्ञानरूपत्वस्य श्रुत्या प्रतिपादनात् तदभिन्नात्मनोऽपि ज्ञानरूपत्वेन ज्ञानाश्रयत्वेन ज्ञानकर्तृत्वेन वाऽऽत्मा प्रथते फलार्थप्रकाशेष्वित्युक्तमनुपपन्नम्, श्रुतिविरोधात्, इति दूषयति—*तन्न ; श्रुतिविरोधादिति* ॥ यया श्रुत्या विरोधः, तां श्रुतिमाह—*श्रूयते हि सत्यमिति* ॥ न केवलं श्रुतित एव ज्ञानरूपत्वमात्मनः, आत्मनोऽज्ञानाश्रयत्व उपपत्तिरप्यस्तीत्याह—*"उपपद्यते चे"त्यादिना "प्रत्यगात्मा-स चापराधीनप्रकाशत्वादनंशत्वाच्चाविषयः" इत्यन्तेन* ॥ उपपत्तिमेव प्रतिपादयति--*तथाहीति ॥ यस्मिन्निति* ॥ यस्मिन्नर्थप्रकाश इत्यर्थः । *स इति* । अर्थप्रकाश इत्यर्थः । आद्य आह--*जडश्चेदिति* ॥ *जडाविति*॥ त्वन्मत इति शेषः । *अविशेषादिति* ॥ अर्थप्रकाशस्य जडत्वपक्षेऽर्थप्रकाश-विषयात्मनां त्रयाणामपि जडत्वाविशेषात् किमवलम्ब्य किं प्रकाशेत ? न किञ्चिदपि प्रकाशेतेत्यर्थः । अस्त्वप्रकाशनम्, ततः किम् ? इत्यत आह--*प्राप्तमिति* ॥ तथाच निरुक्तजडत्रयमध्येऽन्यतरस्यान्यतरालम्बनमकिञ्चित्करम् । तत्रानुरूपां गाथामुदाहरति—*तथाचेति* ॥ अर्थप्रकाशस्य जडत्वपक्षेऽज्ञातत्वमुक्तम्, तावता को दोषः ? अज्ञातस्यापि विज्ञानस्य चक्षुरादिवद् ज्ञापकत्वसंभवादित्याशयवानाशङ्क्य निराकरोति—*नचेति* ॥ *निलीनम्* = अज्ञातम् । निराकरणप्रकारमेवाह--*ज्ञापनं हीति* ॥ ततः किमिति ? अत आह—*जनितं हीति* ॥ स्वयं जडम् । *ननु* "विषयात्मानौ प्रकाशयतीत्यायातमान्ध्यमशेषस्य जगतः" इत्युक्तदूषणं तदवस्थमित्यर्थः । चक्षुरादिकमपि ज्ञानजनकं नार्थप्रकाशकमिति जनितमेव ज्ञानं प्रकाशकं वाच्यम् ; जनितज्ञानं च जडं चेत्, कथं प्रकाशकं स्यात् ? इति चक्षुरादिवदिति दृष्टान्तोऽप्ययुक्त इति भावः । अज्ञातं जडज्ञानं ज्ञानजनकं चेत्, तदपि जनितं ज्ञानं जडमज्ञातं ज्ञानान्तरजनकम्, तदपि जनितं ज्ञानं जडमज्ञातं ज्ञानान्तरजनकमित्युत्तरोत्तर-

भामती

च ज्ञानं जडं सन्नोक्तदूषणमतिवर्तेतेति। एवमुत्तरोत्तराण्यपि ज्ञानानि जडानीत्यनवस्था। तस्मादपराधीनप्रकाशा संविदुपेतव्या। तथाऽपि किमायातं विषयात्मनोः स्वभावजडयोः? एतदायातम् -यत्तयोः संविदजडेति। तत् किं पुत्रः पण्डित इति पिताऽपि पण्डितोऽस्तु? स्वभाव एवायं संविदः स्वयंप्रकाशायाः, यदर्थात्मसंबन्धितेति चेत्, हन्त पुत्रस्यापि पण्डितस्य स्वभाव एवः, यत्पितृसंबन्धितेति समानम्। सहार्थात्मप्रकाशेन संवित्प्रकाशः, न त्वर्थात्मप्रकाशं विनेति तस्याः स्वभाव इति चेत्, तत्किं संविदो भिन्नौ संविदर्थात्मप्रकाशौ? तथाच न स्वयंप्रकाशा संवित्; नच संविदर्थात्मप्रकाश इति। अथ संविदर्थात्मप्रकाशौ न संविदो भिद्येते, संविदेव तौ? एवं चेद् यावदुक्तं भवति संविदात्मार्थौ सहेति, तावदुक्तं भवति संविदर्थात्मप्रकाशौ सहेति। तथाच न विवक्षितार्थसिद्धिः। नचातीतानागतार्थगोचरायाः संविदोऽर्थसहभावोऽपि। तद्विषयहानोपादानोपेक्षाबुद्धिजननादर्थसहभाव

ऋजुप्रकाशिका

ज्ञानानि सर्वाण्यपि जडत्वानवस्थां प्राप्तानि न प्रकाशकानि, इति जगदान्ध्यतादवस्थ्यमेवेत्याशयवानाह—*एवमुत्तरेति* ॥ जडत्वपक्षमाद्यं दूषयित्वा स्वयंप्रकाशत्वपक्षं द्वितीयं परिशेषयति—*तस्मादिति* ॥ *अपराधीनप्रकाशा = स्वयंप्रकाशा। इष्टापत्तिमाशङ्क्याह—*तथापीति* ॥ शङ्कते—*एतदायातमिति* ॥ *तयोः = विषयात्मनोः संविदजडेति यत्, एतदायातमित्यर्थः। शङ्कां विधुनोति—*तत्किमिति* ॥ तयोः संविदजडेत्येतावताऽजडायाः संविदः प्रकाशनमुक्तम्, जडयोर्विषयात्मनोः प्रकाशने किमुक्तं स्यात्? न किञ्चिदप्युक्तम्। तयोः संविदोऽजडत्वे तयोरप्यजडत्वमुक्तमिति न शङ्कास्पदम्, जन्यस्याजडत्वमात्रेण जनकस्याजडत्वानियमात्, पुत्रस्य पण्डितत्वमात्रेण पितुः पण्डितत्वादर्शनादित्यर्थः। शङ्कते—*स्वभाव एवायमिति* ॥ अपहासेन दूषयति—*हन्त पुत्रस्यापीति* ॥ पुनः शङ्कते—*सहार्थेति* ॥ *तस्याः* = संविदः ॥ दूषयति—*तत्किमिति* ॥ संवित्प्रकाशः, अर्थात्मप्रकाशेन सहेति सहोक्त्या संवित्प्रकाशार्थप्रकाशयोः संविद्भिन्नत्वमुक्तं स्यात्, तदनुपपन्नमित्यर्थः। अनुपपत्तिमेव स्फोरयति—*तथाचेति* ॥ संविदर्थात्मप्रकाशयोः संविद्भिन्नत्वे संविदोऽप्रकाशत्वमायातमिति स्वप्रकाशत्वभङ्ग इत्यर्थः। तदेतदाह—*नच संविदिति* ॥ संविदर्थात्मप्रकाशो नेत्यर्थः। इदं संवित्प्रकाशो नेत्यस्याप्युपलक्षणम्। अतः प्रकाशभिन्नत्वान्न स्वप्रकाशा संवित् स्यादित्यर्थः। संवित्प्रकाशार्थात्मप्रकाशयोः संविदभेदे संविदः स्वप्रकाशत्वं न व्याहतमित्याशयवानाशङ्कते—*अथेति* ॥ संविद इति पञ्चमी। *तौ = संवित्प्रकाशार्थात्मप्रकाशौ। दूषयति—*एवं चेदिति* ॥ संविदा सह अर्थात्मानावित्युक्ते यावदुक्तं भवति, संविदा सह अर्थात्मप्रकाशावित्युक्तेऽपि तावदुक्तं भवतीत्यर्थः। *अयमाशयः*—संवित्प्रकाशस्य संविदभेदादर्थात्मप्रकाशयोरप्यर्थात्माभेदापत्तिः। तथाचेत्थमनुमानम्—अर्थात्मानौ, न स्वप्रकाशतो भिद्येते, प्रकाशमानत्वात्, संविद्वत्। नच दृष्टान्ते साध्यवैकल्यम्; संविदः संवित्प्रकाशाभेदस्य त्वयोक्तत्वात्। तथाच संविदभिन्नप्रकाशाभिन्नार्थात्मनोरपि संविदभेदः प्राप्त इति। इष्टापत्तिरित्यत आह—*तथाचेति* ॥ संविदाश्रयत्वेन ह्यात्मसिद्धिस्तत्र विवक्षिता, उक्तविधयाऽऽत्मनः संविदभेदे न विवक्षितार्थसिद्धिरित्यर्थः। *ननु* प्रकाशाभिन्नत्वेऽपि संविदः संविदात्मार्थौ सहेति सहोक्त्याऽर्थसहभावमात्रमुक्तम्, नत्वर्थाभेद इत्यत आह—*नचातीतेति* ॥ अर्थसहभावं शङ्कते—*तद्विषयेति* ॥ अर्थविषयेत्यर्थः। हानादिबुद्धिविषयीभूतार्थस्य विद्यमानतया तद्विषयकहानादिबुद्धिजनिकायाः संविदोऽर्थसहभावोऽस्तीत्यर्थः। *अर्थसहभाव इति* ॥ संविद इति शेषः। किमर्थसंविदर्थविषयिणी? उत न? अन्त्य आह—*अर्थसंविदङ्गेति* ॥ हानादिबुद्धीनामपीत्यतः प्राक् तज्जन्येति शेषः। *तद्विषयत्वानुपपत्तेः* = अर्थविषयत्वा-

भामती

इति चेत्, न; अर्थसंविदश्चैव हानादिबुद्धीनामपि तद्विषयत्वानुपपत्तेः। हानादिजननाद्धानादिबुद्धीनामर्थविषयत्वम्, अर्थविषयहानादिजननाच्चार्थसंविदस्तद्विषयत्वमिति चेत्, तत्किं देहस्य प्रयत्नवदात्मसंयोगो देहप्रवृत्ति-निवृत्तिहेतुरर्थ इत्यर्थप्रकाशोऽस्तु? जाड्याद् देहात्मसंयोगो नार्थप्रकाश इति चेत्, नन्वयं स्वप्रकाशोऽपि स्वात्मन्येव खद्योतवत्प्रकाशः, अर्थे तु जड इत्युपपादितम्। नच प्रकाशस्यात्मानो विषयाः; ते हि विच्छिन्नदीर्घ-स्थूलतयाऽनुभूयन्ते, प्रकाशश्चायमान्तरोऽस्थूलोऽनणुरह्रस्वोऽदीर्घश्चेति प्रकाशते। तस्माच्चन्द्रेऽनुभूयमान इव द्वितीयश्चन्द्रमाः स्वप्रकाशादन्योऽर्थोऽनिर्वचनीय एवेति—युक्तमुत्पश्यामः। नचास्य प्रकाशस्याऽऽजानतः स्वलक्षणभेदोऽनुभूयते, नचानिर्वाच्यार्थभेदः प्रकाशं निर्वाच्यं भेत्तुमर्हति; अतिप्रसङ्गात्। नचार्थानामपि परस्परं भेदः समीचीनज्ञानपद्धतिमध्यास्त इत्युपरिष्टादुपपादयिष्यते। तदयं प्रकाश एव स्वयंप्रकाश एकः कूटस्थनित्यो

ऋजुप्रकाशिका

नुपपत्तेः। हानादिबुद्धीनामर्थविषयत्वं न संविदर्थविषयत्वप्रयुक्तम्, येन संविदोऽर्थविषयत्वाभावे हानादिबुद्धीनामप्यर्थविषयत्वमनुपपन्नमित्युच्येत; किन्तु संविदर्थविषयत्वं हानादिबुद्ध्यर्थविषयत्वप्रयुक्तम्, हानादिबुद्ध्यर्थविषयत्वं तु हानाद्यर्थविषयत्वप्रयुक्तम्, इत्येवं प्रणाड्या संविदोऽर्थविषयत्वमिति, संविदोऽर्थविषयत्वपक्षमाद्य शङ्कते—*अर्थविषयहानादिजननादिति* ॥ *हानम्* = निवृत्तिः। आदिशब्दात् प्रवृत्तिरुच्यते। *तद्विषयत्वम्* = अर्थविषयत्वम्; अर्थप्रकाशत्वमिति यावत्। एतावता साक्षाद्वा परम्परया वाऽर्थविषयकप्रवृत्ति-निवृत्तिहेतुरर्थप्रकाशनमित्यायातमिति मत्वाऽतिप्रसङ्गेन दूषयति—*तत्किमिति* ॥ अर्थ इति सप्तमी। तथाच अर्थे देहस्य प्रवृत्ति-निवृत्तिजनको देहात्मसंयोगोऽप्यर्थप्रकाशः किम्? अर्थप्रकाशः स्यादित्यर्थः। शङ्कते—*जाड्यादिति* ॥ पूर्वोक्तं स्मारयन् दूषयति—*नन्वयं स्वयंप्रकाशोऽपीति* ॥ *स्वात्मन्येव* = स्वस्वरूप एव। *अर्थे तु* = विषये तु। *ननु* विषयभूतानामर्थानां प्रकाशात्मकत्वात् प्रकाशस्य स्वस्वरूपप्रकाशत्वे विषयभूतेऽर्थेऽपि प्रकाशत्वमेव, न जडत्वमिति कस्यचिद् भ्रान्तस्याशङ्कां निराकरोति—*नच प्रकाशस्यात्मानो विषया इति* ॥ विषयाः प्रकाशात्मानो न भवन्तीत्यर्थः। विषयाणां प्रकाशानात्मत्वमेवाह—*ते हीति* ॥ विषया हीत्यर्थः। बाह्यत्वं विच्छिन्नत्वशब्दार्थः। प्रकाश-विषयवैलक्षण्यमाह—*प्रकाशश्चेति* ॥ तस्मान्न प्रकाशात्मानो विषया इत्यर्थः। तस्मात् प्रकाशमात्रं परिशिष्यते, अन्यस्त्वनिर्वचनीय इति सदृष्टान्तमुपसंहरति—*तस्मादिति* ॥ अनुभूयमानो द्वितीयचन्द्रमा इवेति व्यत्यासेन योजना। प्रकाशेऽपि किं स्वाभाविकोऽवान्तरभेदोऽस्ति? नेत्याह—*नचास्येति* ॥ प्रमाणाभावादिति भावः। *ननु* अनुभूयत एव विषयभेदप्रयुक्तः प्रकाशभेदः, तत्राह—*नचानिर्वाच्य इति* ॥ अनुभूयमानो विषयोपाधिप्रकाशभेदोऽनिर्वाच्य एव, न वास्तव इति भावः। *अतिप्रसङ्गादिति*। औपाधिकभेदस्य वास्तवत्वे घटमठाद्यौपाधिकाकाशभेदोऽपि वास्तवः स्यादित्यर्थः। तत्रेष्टापत्तिमाशङ्कमानं प्रत्युपाधिभूतार्थभेदस्य वास्तवत्वे खलु तत्प्रयुक्तप्रकाशभेदोऽपि वास्तवः स्यात्, स एव नेत्याह—*अपिचेति* ॥ तस्यैव प्रकाशस्य प्रत्यगात्मस्वरूपत्वमविषयत्वं च वदन्नुपसंहरति—*तदयमिति* ॥ प्रत्यगात्मेत्युक्तम्, तत्रात्मनः प्रत्यक्त्वमवयवव्युत्पत्त्या दर्शयति—*अशक्येति* ॥ अनिर्वचनीयेभ्य इत्यर्थः। *आत्मानं* स्वम्। *अपराधीन-

प्रदीपः

परस्पराध्यासाक्षेपपर एवायं ग्रन्थसन्दर्भः, न तु विषयिणि विषय-तद्धर्माध्यासाक्षेपमात्रपर इति हृदयम्॥ इदं गुरुचन्द्रिकोक्तं मतमनुसृत्य, वार्तिकोक्तरीतौ तु आत्मसंसर्गाध्यासं प्रत्यन्तःकरणावच्छिन्नचैतन्याज्ञानमेव शरणम्॥ *अयं भावः*—अधिष्ठानाज्ञानमपि भ्रमसामान्यं प्रति तुरीयकारणम्, अधिष्ठानन्तु तदेव भवति, यत् केनचन रूपेण ज्ञातम्, केनचन रूपेणा-

भामती

निरंशः प्रत्यगात्माऽशक्यनिर्वचनीयेभ्यो देहेन्द्रियादिभ्य आत्मानं प्रतीपं निर्वचनीयमञ्चति, जानातीति प्रत्यङ्, स चात्मेति प्रत्यगात्मा, स चापराधीनप्रकाशत्वात्, अनंशत्वाच्चाविषयः। तस्मिन्नध्यासो विषयधर्माणाम् = देहेन्द्रियादिधर्माणाम्, कथम् ? किमाक्षेपे। अयुक्तोऽयमध्यास इत्याक्षेपः। कस्मादय-

ऋजुप्रकाशिका

प्रकाशत्वात्=स्वप्रकाशत्वात्। कथंशब्दस्य प्रश्नार्थकत्वभ्रमं वारयति—*किमाक्षेप इति*॥ तथाच फलितमाह—*अयुक्त इति*॥ स्वयंप्रकाशत्वमनंशत्वं च विषयत्वविघटनद्वाराऽध्यासायोग-हेतुतयोक्तम्, तदेतत् प्रपञ्चयति—*एतदुक्तं भवतीत्यादिना*॥ *पराधीनप्रकाशम्=परप्रकाशम्।

पञ्चपादिकाविवरणम्

दृष्टम्, इह तदभावान्नाध्याससंभव इत्याक्षेपग्रन्थार्थः। तत्रैकस्मिन्विज्ञाने द्वयोः संभिन्नतयाऽवभास एवापेक्ष्यते ;

ऋजुविवरणम्

"न तावदयमि"त्यनेन नियमेनाविषयत्वनिषेधाद्विषयत्वमपि प्रतीयते। तथा सत्यध्यासाभाव एव, वैयर्थ्यं वा तत्कीर्तनस्येत्याशङ्क्यावतारयति—*तत्रैकस्मिन्विज्ञान इति*॥*ननु* "विषयिणः" इत्यादिना विरुद्धरूपद्वयापत्तिरिति

भाष्यभावप्रकाशिका

बुद्ध्यादीनां तद्धर्माणां च नाध्यासः ; मिथोविरुद्धानामधिष्ठानाधिष्ठेयत्वासंभवादित्यर्थः। विरुद्धा-

वार्तिकम्

सर्वस्यापि बहिरन्तःप्रपञ्चस्यात्मन्यध्यस्तत्वात् किमु वक्तव्यमन्तःकरणतद्धर्माध्यासस्य प्रत्यगात्माधिष्ठानमित्यभिप्रेत्य परिहरति—*उच्यत इत्यादिना*॥ यथा प्रत्यगात्मा तदध्यासाधिष्ठानं भवति, तथा वक्ष्यमाणप्रकारेणोच्यत इत्यर्थः। यदुक्तम्—"कथं पुनः प्रत्यगात्मन्यविषयेऽध्यासो विषय-तद्धर्माणा"मिति, *तत्र वदामः*—किमत्र भवताऽविषयत्वमभिप्रेतम्? येनात्मनोऽधिष्ठानत्वाभाव आपाद्यत इति, तत्र किमपरोक्षस्फूर्त्यकर्मत्वम्? किं वा वृत्त्यव्याप्यत्वम्? अथ तत्प्रयुक्तव्यवहारागोचरत्वम्? अन्तःकरणानभिव्यङ्ग्यत्वं वा? अपरोक्षत्वराहित्यं वा? आहोस्विद् बहिरिन्द्रियाग्राह्यत्वम्? इति षट् पक्षाः संभवन्ति ;

प्रदीपः

ज्ञातं न भवति। तत्र शुद्धं चैतन्यं ज्ञानस्वरूपं नाज्ञानेनावरणमर्हति। ज्ञानाज्ञानयोर्हि तमःप्रकाशवद् विरुद्धस्वभावत्वेनैकत्र समवधानासंभवः, इत्यन्यतरसत्तायामपरान्यतरसत्ता हि बाधितैवेति, कथं चैतन्यमज्ञातमिति शङ्काहृदयोद्घाटनार्थमिदं विशेषणम्—*प्रत्यगात्मनीति*। स्वप्रकाशचैतन्यस्वरूपे। अध्यासो हि चिदात्मनि मिथ्याऽज्ञाननिमित्त एव खलु विवक्षणीयः, निमित्तन्तु मिथ्याऽज्ञानं शुद्धचैतन्याश्रयं तद्विषयं चेति वक्तव्यम्। जीवो ह्यज्ञानोपाधिकः पाश्चात्यत्वाद् नाज्ञानाश्रयतामर्हतीति विवरणाचार्याः। भामतीकारास्तु—अज्ञानाश्रयस्तु जीव एवानादिः। अनादित्वात्तु नान्योन्याश्रयो दोषाय। तथापि स्वज्ञानेनावरणं शुद्धचैतन्यस्यैव ज्ञानस्वरूपस्येति वदन्ति। तथाचाश्रयानुपपत्त्या विषयानुपपत्त्या च न मिथ्याऽज्ञाननिमित्तः प्रत्यगात्मनि विषयाध्यासंभव इति भावः॥ न केवलमज्ञातत्वाभावान्नाधिष्ठानत्वम्, किन्तु प्रमाणजन्यवृत्त्यभिव्यक्तचैतन्यभास्यस्वरूपज्ञातत्वाभावादपि नाधिष्ठानत्वमिति सूचयन्नाह—*अविषये इति*। अदृश्ये, फलाव्याप्ये ; वृत्त्यव्याप्ये चेति भावः। इदं रजतमित्यादौ ह्यधिष्ठानेन्द्रियसंप्रयोगे तदाकारवृत्तिनिर्गमनानन्तरमेव रजतप्रत्यक्षमुदेति। ज्ञानप्रत्यक्षत्वं विषयप्रत्यक्षत्वं च वृत्तिनिर्गमापेक्षमेव। वृत्तिनिर्गमश्चेन्द्रियाधिष्ठानसम्प्रयोगाधीन इति हि वस्तुस्थितिः। यद्यपि बाह्यप्रत्यक्ष एवेयं व्यवस्था, नान्तरप्रत्यक्ष इति शुद्धचैतन्याकारा वृत्तिरिन्द्रियसम्प्रयोगमन्तराऽपि भवितुमर्हति ; तथाऽपि सा वृत्तिर्यदि निर्निमित्ता, तर्हि कदाऽपि नाज्ञानावरणासंभवः। यदि तु सनिमित्ता, तर्हि अन्तःकरणाध्यासात्पूर्वं केनापि प्रमाणेन शुद्धचैतन्याकारान्तःकरणवृत्तेरनुत्पत्तिप्रसङ्गाद् न वृत्तिव्याप्यत्वमपि संभवतीति, कथमहंप्रत्यक्षतानिर्वाहः ? इति न चिदात्मन्यन्तःकरणाध्याससंभव

सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति ; युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि ।

भामती

मयुक्त इत्यत आह—*सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति* ॥ *एतदुक्तं भवति— यत् पराधीनप्रकाशमंशवच्च तत् सामान्यांशग्रहे कारणदोषवशाच्च विशेषाग्रहेऽन्यथा प्रकाशते, प्रत्यगात्मा त्वपराधीनप्रकाशतया न स्वज्ञाने कारणान्यपेक्षते, येन तदाश्रयैर्दोषैर्दूष्येत, नचांशवान् ; येन कश्चिदस्यांशो गृह्येत । नहि तदेव तदानीमेव तेनैव गृहीतमगृहीतं च संभवतीति, न स्वयंप्रकाशपक्षेऽध्यासः । सदातनेऽप्यप्रकाशे पुरोऽवस्थितत्वस्यापरोक्षत्वस्याभावान्नाध्यासः । नहि शुक्ताव-

ऋजुप्रकाशिका

अपराधीनप्रकाशतया ॥ *तदाश्रयैः=कारणाश्रयैः । निरंशस्वप्रकाशस्यापि तस्यैकदेकेन ग्रहणाग्रहणे किमिति न स्याताम् ? इत्याशङ्क्यासंभवात् तथा नेत्याह—*नहि तदेवेति* ॥ *इतीति* हेतौ । यतो निरंशे स्वयंप्रकाशे प्रत्यगात्मनि अधिष्ठानसामान्यांश-विशेषांशयोरभावादध्यासकारणीभूताधिष्ठानसामान्यज्ञान-विशेषाज्ञानयोरभावः ; अतो न स्वयंप्रकाशपक्षेऽध्यास इत्यर्थः । स्वयंप्रकाशपक्ष इत्येतद् निरंशपक्ष इत्यस्याप्युपलक्षणम् । यत एव स्वप्रकाशत्वमत एव विषयत्वमपि न ; स्वव्यवहारे संविदन्तरानपेक्षत्वस्यैव स्वप्रकाशत्वशब्दार्थत्वेन स्वविषयत्वस्य स्वप्रकाशत्वशब्दार्थत्वाभावाद् विषयत्वाभावाच्चाध्यासाभावः । अधिष्ठानाध्यस्यमानयोरेकज्ञानविषयताया अवश्यवाच्यत्वेन तदभावे तदभाव इति पूर्वमेवोक्तत्वादिति द्रष्टव्यम् । तदेतदाह—*सदातनेऽप्यप्रकाश इति* ॥ प्रकाशाविषय इत्यर्थः । अपुरोऽवस्थितत्वेऽप्यध्यासमाशङ्क्य,

पञ्चपादिका

यतः—*सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति ; युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽ-

तत्त्वदीपनम्

काऽऽरोपे ऐन्द्रियकस्यैवाधिष्ठानत्वमित्याह—*पुरोऽवस्थित इति* ॥ गगने रूपाद्यारोपदर्शनादैन्द्रियकत्वमप्रयोजकम्, विषयत्वं त्वारोपानुपपत्त्याऽपि कल्प्यत इत्याशङ्क्य, विषयत्वमिदन्तया प्रथमं स्यात्, तच्च नेहेत्याह—*युष्मत्प्रत्य-

भाष्यभावप्रकाशिका

नामैक्यप्रतीत्ययोगेऽपि तदध्यासयोग्यतया कल्प्यतामधिष्ठानाधिष्ठेयत्वमित्याशङ्क्याह—*सर्वो हीति* ॥ आरोप्येण तुल्येन्द्रियग्राह्यत्वमधिष्ठानस्य दृष्टम्, इह तदभावान्नाध्यास इत्यर्थः ॥ तर्हि प्रत्यगात्मन्यध्यासदृष्टेर्विषयत्वमपीष्टमित्याशङ्क्याह—*युष्मदिति* ॥ प्रत्यक्त्वादात्मत्वाच्चास्याविषयत्वम् ; अन्यथेदंप्रत्ययविषयत्वापातात्, अपसिद्धान्ताच्च । तस्मात्तस्मिन्नध्यासो दृष्टो विश्लिष्टः, न भवतीत्यर्थः ॥ अनात्म-

वार्तिकम्

इतोऽधिकस्य पक्षान्तरस्यासंभवात् । तत्र प्रथमपक्षस्यातितुच्छतया बहिर्निरासपूर्वकं द्वितीय-तृतीय-चतुर्थ-पक्षाणाम्—*"न तावदयमेकान्तेनाविषयः ; अस्मत्प्रत्ययविषयत्वादि"ति भाष्येण निरासः क्रियते ।

प्रदीपः

इति भावः । *ननु*—शुद्धचैतन्यमविद्यावृतमपि स्वप्रकाशत्वात् प्रकाशमानमपि वर्तते, ततश्चेदं रजतमित्यादाविवाधिष्ठानेन्द्रियसम्प्रयोगानपेक्षेत्यत आह—*सर्वोऽहि पुरोऽवस्थित इति* ॥ आरोप्याधिष्ठानयोरेकेन्द्रियग्राह्यत्वनियमोऽपि शुक्तिरजतादौ दृष्टः ; 'इदं रजतं पश्यामी'त्यनुभवात्, आत्मान्तःकरणयोरपि तन्नियमपरिपालनार्थमधिष्ठानेन्द्रियसम्प्रयोगोऽपेक्षित इति तदभावान्नात्मनि विषय-तद्धर्माध्याससंभव इति भावः । *ननु* अस्तु तर्हि चैतन्यस्यापीन्द्रियसम्प्रयोगजन्यज्ञानविषयत्वमित्यत आह—

भामती

पुरःस्थितायां रजतमध्यस्यति—'इदं रजतमि'ति। तस्मादत्यन्तग्रहेऽत्यन्ताग्रहे च नाध्यास इति सिद्धम् ॥ *स्यादेतत्*—अविषयत्वे हि चिदात्मनो नाध्यासः, विषय एव तु चिदात्माऽस्मत्प्रत्ययस्य, तत्कथं नाध्यास इति? अत आह—*युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि*। विषयत्वे हि चिदात्मनः, अन्यो विषयी भवेत्। तथाच यो विषयी, स एव चिदात्मा। विषयस्तु ततोऽन्यो युष्मत्प्रत्ययगोचरोऽभ्युपेयः। तस्मादनात्मत्वप्रसङ्गादनवस्थापरिहाराय युष्मत्प्रत्ययापेतत्वम्, अत एवाविषयत्वमात्मनो

ऋजुप्रकाशिका

शुक्तौ तथाऽदर्शनाद् नेत्याह—*नहि शुक्ताविति* ॥ उपसंहरति—*तस्मादिति* ॥ अत्यन्तग्रहे विशेषाग्रहणमध्यासकारणं नास्ति, अत्यन्ताग्रहेऽधिष्ठानसामान्यग्रहणमध्यासकारणं नास्तीति नाध्यास इति सिद्धमित्यर्थः। पुनरप्यध्यासयोगं शङ्कते—*स्यादेतदिति* ॥ विषयत्वे प्रत्यगात्मनोऽनात्मत्वप्रसङ्गादविषयत्वमकामेनापि वाच्यम्; तस्मादध्यासायोग इत्यभिप्रेत्याह— *अत आहेति* ॥ अविषयत्वं ब्रवीषीत्युक्तम्, तत् स्पष्टयति—*विषयत्वे हीत्यादिना* ॥ *ततोऽन्यः = चिदात्मनोऽन्यः। *युष्मत्प्रत्ययगोचरः = चैतन्यभास्यः। अत्र चैतन्यभास्यत्वं युष्मत्प्रत्ययगोचरशब्देन विवक्षितम्। तस्मात् चैतन्यभास्यत्वादनात्मत्वप्रसङ्गात्, यो विषयः, स चैतन्यभास्यः, सोऽनात्मेति व्याप्तेरित्यर्थः। तथाच विषयत्वे युष्मत्प्रत्ययविषयत्वलक्षणं चैतन्यभास्यत्वं वाच्यम्। तस्य चैतन्यभास्यस्य विषयस्य विषयिसापेक्षत्वे ततोऽन्यो विषयी वाच्यः। तस्यापि विषयत्व उच्यमाने तस्यापि विषयिसापेक्षत्वात् ततोऽन्यो विषयी वाच्यः; एवं तस्य तस्यापीत्यनवस्थाप्रसङ्गे, तत्परिहाराय युष्मत्प्रत्ययापेतत्वलक्षणं युष्मत्प्रत्ययाविषयत्वम्, तत एवाविषयत्वं च चिदात्मनोऽवश्यं वाच्यम्। अतो न तत्राध्यास इत्यर्थः। उत्तरभाष्यमुक्ताक्षेपपरिहारत्वेन योजयति—

भाष्यभावप्रकाशिका

विशेषारोपे तद्विशेषान्तरस्याधिष्ठानत्वेऽपि तन्मात्रारोपे चिदात्मैवाधिष्ठानमित्याह—*उच्यत इति* ॥

वार्तिकम्

*"अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धे"*रिति भाष्येण पञ्चमपक्षस्य, *"नचायमस्ति नियमः"* इत्यादिभाष्येण च षष्ठपक्षस्य। तदिदं सर्वं यथास्थानं व्याकरिष्यामः। तत्र न तावत्प्रथमः कल्पः; स्फूर्त्यकर्मणोऽपि परोक्षभ्रमाधिष्ठानत्वदर्शनात्। *एतेन*—तद्योग्यताऽपि—*प्रत्याख्याता*; तदयोग्यस्याऽपि नित्यपरोक्षस्य परमाण्वादेस्तत्त्वात्। अथ स्फूर्त्यकर्मत्वमित्यनेन स्फूर्त्यविषयत्वं विवक्षितम्, तथाच परोक्षभ्रमस्थले न व्यभिचारः; तत्राधिष्ठानस्य तदकर्मत्वेऽपि तद्विषयत्वसत्त्वात्। यदि ब्रूयात्—स्फूर्त्यभेदो हि स्फूर्तिविषयत्वम्, नान्यत्; अनिरूपणात्, नच परोक्षस्थले तस्या विषयाभेदः संभवति; अन्तःकरणस्य विषयसंबन्धासत्त्वेन तद्घटकोपाधेरभावात्। अतो लिङ्गादिद्वारा परम्परयौपचारिकमेव तत्र तद्विषयत्वम्, न साक्षात्; तादृशसाधारणस्फूर्तिविषयत्वविवक्षायां चात्मन्यपि तत्सत्त्वादसिद्धो हेतुः स्यात्, अतस्तद्विषयत्वकर्मत्वयोः समव्याप्तत्वेन व्यभिचारावश्यकत्वादुक्तविवक्षा व्यर्थेति। तर्ह्यपरोक्षभ्रमस्थल एवाधिष्ठानस्य स्फूर्तिकर्मत्वनियमात्तदभावेनात्मनोऽपरोक्षभ्रमानधिष्ठानत्वस्यैव साधनान्न व्यभिचार इति चेत्, न; तथाऽप्यावश्यकत्वादनुगमाच्चान्तःकरणवृत्तिविषयत्वस्य, तत्प्रयुक्तव्यवहारविषयत्वस्य वाऽन्तःकरणविषयत्वस्यैव वा सर्वत्र भ्रमाधिष्ठानत्वप्रयोजकत्वात्स्फूर्तिकर्मत्वस्य च वैपरीत्यादप्रयोजकत्वेन नियमासिद्धेः। *ननु*—एवमप्यात्मन्यध्यासाधिष्ठानत्वं न संभवति; उक्तत्रितयविषयत्वस्यापि तत्रासिद्धेः, "यतो वाचो निवर्तन्ते, अप्राप्य मनसा सहे"ति श्रुतेरिति—चेत्, *न*; तद्विषय-

उच्यते—न तावदयमेकान्तेनाविषयः ; अस्मत्प्रत्ययविषयत्वात् ॥

भामती

वक्तव्यम्, तथाच नाध्यास इत्यर्थः । परिहरति—*उच्यते—न तावदयमेकान्तेनाविषयः* ॥ कुतः ? अस्मत्प्रत्ययविषयत्वात् । *अयमर्थः*—सत्यं प्रत्यगात्मा स्वयंप्रकाशत्वादविषयोऽनंशश्च ; तथाह्य-

ऋजुविवरणम्

परिहरतीत्यादिना ॥ *ननु* उक्तं चिदात्मनः स्वयंप्रकाशत्वाद्विषयत्वमेव नास्तीति कुतोऽस्मत्प्रत्यय-विषयत्वम् ? अनंशत्वाच्च सामान्यांशग्रहणं विशेषांशाग्रहणं च नास्तीति, तत्राह—*अयमर्थ इत्यादिना* ॥

पञ्चपादिका

विषयत्वं ब्रवीषि* ॥ नह्यविषयेऽध्यासो दृष्टपूर्वः सम्भवी वा, *उच्यते*—*न तावदयमेकान्तेनाविषयः ; अस्मत्प्रत्ययविषयत्वात्* ॥

पञ्चपादिकाविवरणम्

विषयतयाऽवभास इति विशेषणायोगात्, इति मन्वानः परिहरति—*न तावदयमेकान्तेनाविषय इति* ॥

ऋजुविवरणम्

न युक्तं चोद्यम् ; न ह्यस्मत्प्रत्ययविषयत्वेनेदन्तया प्रतीयमानत्वलक्षणं विषयत्वं भवति ; 'मामि'ति तु भवेत्, अथ

तत्त्वदीपनम्

येति* ॥ आत्मनो विषयत्वाभिधानं सिद्धान्तविरुद्धं चेत्याह—*ब्रवीषीति* ॥ अविषयेऽपि संवेदने क्षणिकत्वाद्यारोपो दृष्ट इत्याशङ्क्य दृष्टान्तोऽसंप्रतिपन्न इत्याशयेनाह—*नहीति* ॥ न केवलमदर्शनमेव, अपि त्वसंभवश्चेत्याह—*संभवी चेति* ॥

एकान्तेनाविषयो नेति वदता सुषुप्तिव्यावृत्तिमात्रमात्मनोऽभ्युपगतम्, तत्र कर्मत्वाभावे कथमधिष्ठानत्वम् ? इत्याशङ्क्याह—*तत्रेति* ॥ अधिष्ठानारोप्ययोरेकबुद्धिस्फुरणे सति कर्मत्वाभावापराधेनाध्यासाभावानुपलब्धेः

भाष्यभावप्रकाशिका

विरुद्धयोर्वस्तुनोरधिष्ठानाधिष्ठेयत्वायोगेऽपि कल्पनया तत्सिद्धिरिति भावः । यत्त्वेकज्ञानाविषयत्वान्नाधिष्ठानाधिष्ठेयतेति, तत्राह—*न तावदिति* ॥ एकस्मिन्विज्ञाने तयोर्भानमात्रमारोपेऽपेक्ष्यते, विषयतया भाने केवलव्यतिरेकाभावात्, आत्मनः स्वप्रकाशत्वादनात्मनस्तद्विषयत्वाद् द्वयोरपि तयोर्मनु-

वार्तिकम्

त्वस्यात्मन्यपि कथञ्चिद् घटयितुं शक्यत्वादित्याह—*न तावदयमेकान्तेनाविषयः ; अस्मत्प्रत्ययविषयत्वादिति* ॥ अयमपरोक्षीभूतः प्रत्यगात्मा स्फूर्त्यविषयोऽपि न सर्वात्मनाऽविषयः ; कुतः ? अस्मत्प्रत्ययविषयत्वात् । अस्मच्चासौ प्रत्ययश्चेत्यस्मत्प्रत्ययः, तद्विषयत्वात् । अत्र यदा प्रत्ययशब्दो

प्रदीपः

युष्मत्प्रत्ययापेतस्येति ॥ यद् दृश्यं तदेवेन्द्रियग्राह्यम्, चैतन्यन्तु न तादृशमिति नेन्द्रियग्राह्यमिति भावः ॥ आत्मन्यध्याससंभावनां प्रतिजानीते—*उच्यत इति* ॥ अध्यासं प्रति सत्यमधिष्ठानज्ञानमपेक्ष्यते, नत्वारोप्याधिष्ठानयोरेकजातीयज्ञानमपेक्ष्यते । तथाच स्वयं प्रकाशमानस्य चैतन्यस्य स्वतोऽन्तःकरणस्य च वृत्त्यभिव्यक्तचैतन्यभास्यत्वेऽप्यध्यासो न विरुद्धः । स्वतो भासमानमधिष्ठानात्मकमेव चैतन्यमहमाकारवृत्त्यभिव्यक्तमपीत्युभयोरप्येकज्ञानविषयत्वं न क्षतम्, यथेदमाकारवृत्त्यभिव्यक्तं रजताकारवृत्त्यभिव्यक्तं च चैतन्यमेकमिति भावः । अत्रान्तःकरणमिव तदाकारवृत्तिरप्याविद्यकैव, अथवाऽन्तःकरणपरिणामरूपेत्यन्यदेतत् । शुद्धचैतन्यं

भामती

निर्वचनीयानाद्यविद्यापरिकल्पितबुद्धि-मनः-सूक्ष्म-स्थूल-शरीरेन्द्रियावच्छेदेनानवच्छिन्नोऽपि वस्तुतोऽवच्छिन्न इव, अभिन्नोऽपि भिन्न इव, अकर्ताऽपि कर्तेव, अभोक्ताऽपि भोक्तेव, अविषयोऽप्यस्मत्प्रत्ययविषय इव जीवभावमापन्नोऽवभासते ; नभ इव घट-मणिक-मल्लिकाद्यवच्छेदभेदेन भिन्नमिवानेकविधधर्मक-

ऋजुप्रकाशिका

अस्मत्प्रत्ययविषय इव जीवभावमापन्नोऽवभासत इति ॥ तथाच वस्तुतोऽनवच्छिन्नस्य चिदात्मनो निरुक्तोपाध्यवच्छिन्नत्वेन जीवभावो दुरपह्नवः। चिदात्मनो वस्तुतोऽविषयस्याप्यस्मत्प्रत्ययविषयत्वं च कल्पिततयाऽनुभूयमानं दुरपह्नवमिति भावः। तथाचाध्याससंभव इति भावः। अतथाभूतस्याप्यवच्छेदक-भेदेन तथा भाने दृष्टान्तमाह—*नभ इवेति* ॥ यदुक्तं स्वप्रकाशेऽनंशे चिदात्मनि गृह्यमाणेऽगृहीतं

भाष्यभावप्रकाशिका

प्योऽहमित्यादिधीवशादन्योन्याध्यासः सिद्ध्यतीत्यर्थः ॥ नियमेनाविषयत्वाभावे कुतः स्वप्रकाशत्वम् ? तत्राह—*अस्मदिति* ॥ अस्मदर्थश्चिदात्मा साक्षितया प्रतीयते प्रतिबिम्बतेऽस्मिन्नित्यस्मत्प्रत्ययः,

वार्तिकम्

भावसाधनः—प्रतीतिः प्रत्यय इति, तदाऽस्मत्प्रत्ययोऽहमाकारवृत्तिः। यदा करणसाधनः—प्रतीयतेऽनेनेति, तदाऽहमित्यभिलापस्तत्फलम्। यदा—प्रत्येतीति कर्तृसाधनः, तदाऽन्तःकरणमभिधीयते। सर्वमत्र श्रुत्यर्थाभ्यां विवक्षितं भवति। तत्राहमाकारान्तःकरणवृत्तिर्द्विधा—एका तावत् 'तत्त्वमस्या'दि-वाक्यजन्या निष्कृष्टाहङ्कारशुद्धचिन्मात्रविषया जीवन्मुक्तानाम्, अन्या तु चिदाभासविशिष्टाहङ्कारविषया संसारिणाम्। इयञ्च यद्यपि साक्षान्नात्मविषया ; तथाऽप्यप्पात्रमिवादित्यविषयम्, आदर्श इव मुख-विषयश्चिदाभासद्वारा तद्विषया भवति ; अन्यथा तद्विषय आत्मव्यवहारानुपपत्तेः॥

ननु—अहङ्कारस्याध्यासिकत्वेनाविद्यावृत्त्या सहोत्पन्नत्वादात्माश्रयापत्तेश्च कथं तदाकाराऽन्तःकरण-वृत्तिरुपपद्यतामिति ? *नैष दोषः* ; आकाशभावापन्नाया अविद्याया वायुकार्यत्ववद् लिङ्गभावापन्नावि-द्याया एव वृत्तिविशिष्टाहङ्कारकार्यत्वात्, लिङ्गस्य चान्तःकरणत्वात्तदाकारान्तःकरणवृत्त्यभ्युपगमस्या-विरुद्धत्वात्। अत एव नात्माश्रयोऽपि ; कार्य-कारणयोर्भेदात्। इदमेवाभिप्रेत्य साङ्ख्याचार्यैरुक्तम्—"प्रकृतेर्महान् महतोऽहङ्कारः" इति। नच—एवं सति शुक्तिरजताध्यासोऽपि लिङ्गभावापन्नाविद्यापरिणामः स्यादिति—वाच्यम् ; शुक्तिविशेषांशेन सह लिङ्गसम्बन्धाभावात्तस्य तत्परिणामत्वानुपपत्तेः, द्वित्रिसृष्टि-पक्षमादायाहङ्कारवत् शुक्तेरपि तत्परिणामतया सम्बन्धापादने चेष्टापत्तेः। नचैवमपसिद्धान्तः ; प्रणव-भाष्ये लिङ्गादिवद् जाग्रत्प्रपञ्चोत्पत्तेरुक्तत्वात्। सर्वथाऽप्यहङ्कारस्याध्यासिकत्वेऽप्यन्तःकरणवृत्तिविषय-त्वमविरुद्धम्॥

तथा तज्जन्याहमित्यभिलापोऽपि द्विविधः—एकः शुद्धात्मविषयोऽनुभविनाम्, अन्यः सर्वेषां चिदा-भासविशिष्टाहङ्कारविषयः, परन्तु प्रथमो लक्षणया, द्वितीयः शक्त्येति भेदः। अत एव—"अहं ब्रह्मास्मी"त्यनुभववाक्य उपदेशवाक्यवल्लक्षणाऽऽश्रीयते। एतदुभयविधाभिलापस्य वृत्तेरिवात्मा विषयः ; ज्ञान-तत्फलाभिलापयोः समानविषयत्वनियमात्। *एतेन*—"यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह" इति

प्रदीपः

चेदं साक्षिरूपमिति नाज्ञानविषयत्वविरोधः ॥ अन्तःकरणवृत्त्युपहितमध्यस्तं चैतन्यमेव शबलितं साक्षीति न दोषः। *एतेन*—अद्वैतमते शुद्धचैतन्यस्यैव साक्षित्वात् तस्य चाज्ञानविरोधित्वात् कथं तस्यावरणमिति शङ्काऽपि—*परास्ता* ॥ *न तावदिति* ॥

भामती

मिवेति। नहि चिदेकरसस्यात्मनश्चिदंशे गृहीतेऽगृहीतं किंचिदस्ति। न खल्वानन्द-नित्यत्व-विभुत्वादयोऽस्य चिद्रूपाद्वस्तुतो भिद्यन्ते, येन तद्ग्रहे न गृह्येरन्; गृहीता एव तु कल्पितेन भेदेन

ऋजुप्रकाशिका

किञ्चिन्नास्तीति, तदङ्गीकरोति—*नहि चिदेकरसस्यात्मन इति*॥ *ननु* चिदेकरसस्यात्मनश्चिदंशे गृह्यमाणेऽपि तस्यानन्दत्व-नित्यत्व-विभुत्वादयो न गृह्यन्ते, अतोऽगृहीतं किञ्चिन्नास्तीति कथमुक्तम्? इत्यत आह—*न खल्वानन्देति*॥ *अस्य* चिदात्मनः। *गृहीता एवेति*॥ आनन्दत्वादयो गृहीता एव।

भाष्यभावप्रकाशिका

अहङ्कारः, तत्संबन्धाल्लब्धपरिच्छेदः सन्नात्मा स्वरूपस्फुरणेन स्फुरन्नपि तद्विषयो निरुच्यते। ततोऽस्य शून्यवदत्यन्ताविषयत्वाभावेऽपि नास्वप्रकाशतेत्यर्थः॥ अध्यासेऽस्मत्प्रत्ययविषयत्वम्, सति तस्मिन्नध्यास

वार्तिकम्

श्रुतेः कथमात्मनो वाङ्मनसविषयत्वमिति—*निरस्तम्; शक्तीन्द्रियाभ्यामेव तयोस्तद्गोचरत्वनिषेधात्। अन्यथा "तन्त्वौपनिषदम्" "मनसैवानुद्रष्टव्यम्" इत्यादिश्रुतिविरोधापत्तेः। एतेनान्तःकरणविषयत्वमप्यात्मनः सिद्धं भवति; आलोकस्येव रूपिद्रव्येण, राहोरिव चन्द्रमसाऽन्तःकरणेनात्मनः स्पष्टतयाऽवभासनात्। यथा ह्याकाशस्थितः सूर्यालोकोऽस्पष्टः सन् व्यवहारायोग्योऽपि रूपिद्रव्यं प्राप्य तत् प्रकाशयन् स्वयमपि तेन स्पष्टीभवन् व्यवहारगोचरो भवति; यथा वा राहुः स्वयमदृश्योऽपि दृश्यं चन्द्रमसमासादयंस्तद्योगात्तेन दृश्यो भवति; एवमनुभवस्वरूप आत्मा स्वयं निर्विकल्पतया व्यवहारायोग्योऽपि स्वयंप्रकाशतयाऽदृश्योऽप्यविद्यया स्वाध्यस्तान्तःकरणं प्रकाशयन् तेन व्यवहारयोग्य इव दृश्य इवावभासत इति। तथा चोक्तं वसिष्ठेन—'अदृश्यो दृश्यते राहुः, गृहीतेनेन्दुना यथा। तथाऽनुभवमात्रात्मा दृश्येनात्माऽवलोक्यते॥" इति। कथम्? इत्थम्—यथा 'घटः' इत्यनुभवे घटे विशेषणतया भासमानं सद् घटत्वं निर्विकल्पगोचरमपि घटव्यक्तिं विकल्पयत् व्यवहारगोचरं करोति, तद्वत्—'अहमि'त्यनुभवे विशेषणतया भासमानमन्तःकरणं स्वविशेष्यं निर्विकल्पकमात्मचैतन्यं विकल्पयद्विशिष्टव्यवहारगोचरं करोति; अत्र विशेषणतया भासमानस्याहन्त्वस्यैवान्तःकरणत्वात् तस्यैव तत्राध्यस्ततया तद्रूपेण भासनात्। *ननु*—घटस्य घटत्ववदहन्त्वमात्मनो धर्म एव, स च जातिरुपाधिर्वेत्यन्यत्, नान्तःकरणमहन्त्वम्; प्रमाणाभावादिति—चेत्, *न*; आत्मनो निर्धर्मत्वस्य सर्वोपनिषत्सिद्धत्वात्तद्विरोधेन त्वत्कल्पनाया एव निष्प्रामाणिकत्वात्। अभ्युपेत्याप्यात्मनो धर्मवत्त्वं दूषणं ब्रूमः। *तथाहि*—अहन्त्वस्य जातित्वे किन्तदात्मत्वमेव? किं वा ततो भिन्नमिति? नाद्यः; तथा सति सर्वात्मसु सर्वेषाम्—'अहमि'ति तत्प्रतीत्यभिलापप्रसङ्गः, 'द्रव्यमित्यात्मे'ति च प्रतीत्यभिलापवत्। न च परात्मनि कस्यापि तौ स्तः। नच—परात्माऽऽत्मैव न भवतीति—वाच्यम्; तथा सति तत्रात्मेति व्यवहारोऽपि न स्यात्। नच—तत्र भ्रान्तोऽयं व्यवहार इति—वाच्यम्; एवं सत्यात्मत्वजातेरेवोच्छेदात्, अनेकव्यक्तिवृत्तित्वाभावात्। तथाच तदभिन्नतयाऽहन्त्वस्य जातित्वं न समर्थितं स्यात्। *अथ*—सर्वत्राहन्त्वसत्त्वेऽपि स्वात्मन्येवापरोक्षतया तत्प्रतीतिः, न परात्मसु, तेषामयोग्यत्वादिति—चेत्; *न*; अपरोक्षप्रतीतेरसंभव आकाशादौ द्रव्यत्वादिप्रतीतिवत् परोक्षप्रतीतेराव-

प्रदीपः

अयम्=प्रत्यगात्मा। *एकान्तेन*=नियमेन। *नाविषयः*=नाप्रकाशमानः। प्रत्यगात्माऽविषय एवेति न नियमः, किन्तु कदाचन विषयः कदाचनाविषयश्चेति भावः॥ अहंकारसम्बन्धात्तदुपहितत्वेन प्रत्यगात्मा विषय इति यावत्। *ननु

भामती

किन्त्वविवेचिता इवाभान्ति। नचात्मनो बुद्ध्यादिभ्यो भेदस्तात्त्विकः, येन चिदात्मनि गृह्यमाणे सोऽपि गृहीतो भवेत्; बुद्ध्यादीनामनिर्वाच्यत्वेन तद्भेदस्याऽप्यनिर्वचनीयत्वात्। तस्माच्चिदात्मनः स्वयं-

ऋजुप्रकाशिका

विशेषांशाग्रहणाभावादध्यासायोग इत्युक्तम्, तत्राह—*किन्त्विति*। *अविवेचिता इवाऽऽभान्ति*॥ विवेचिता इव न भान्ति। तथाच निरंशेऽपि चिदात्मनि कल्पितांशभेदसत्त्वात् चिद्रूपेण भानाद् अधिष्ठानसामान्यज्ञानम्, आनन्दस्य भानेऽपि तस्यापरिच्छिन्नत्वादिविशेषाभानाद् विशेषांशाज्ञानं चाध्यासकारणमस्तीत्यध्याससंभव इति भावः। *ननु* चिदात्मनि कर्तृत्व-भोक्तृत्वादिकं वस्तुतोऽविद्यमानमपि मनो-बुद्ध्यादिगतं भासत इत्युक्तम्, तत् कथम्? चिदात्मनि भासमाने तत्र मनो-बुद्ध्यादिभेदस्याऽपि भासमानतया बुद्ध्यादिगतकर्तृत्वादिभानायोगादित्यत आह—*नचात्मन इत्यादिना*॥ *सोऽपि=बुद्ध्यादिभेदोऽपि। कथं बुद्ध्यादिभेदस्य तात्त्विकत्वाभावः? तत्राह—*बुद्ध्यादीनामिति*॥ उपसंहरति—*तस्मादिति*॥

वार्तिकम्

श्यकत्वात्। नचैवमस्त्विति वाच्यम्; तथा सति—'आकाशो द्रव्यमि'तिवत् परात्मनि—अहं जानामि करोमी'त्यादिप्रयोगापत्तेः। स च बाधित एव। किञ्च यद्यात्मत्वापरनामधेयमहन्त्वं जातिः स्यात्, तदा योग्यद्रव्यवृत्तिकेवलापरजातेर्योग्यवृत्तित्वात्, अन्यथा घटत्वादेरपि तथात्वप्रसङ्गात्, सर्वात्मनां योग्यजातितया घटादिवदेव सर्वसाधारणाहमित्यपरोक्षप्रतीतिगोचरतापत्तिः। तथा चात्मत्वजातिमभ्युपेत्यात्मभेदः साधु समर्थितः स्यात्। *एतेन*—एतद्घटत्व-तद्घटत्वादिवत्स्वकर्मारब्धदेहेन्द्रियविशिष्टात्मत्वमेवाहन्त्वम्, तस्य च प्रत्यात्मं भिन्नतया साधारणत्वान्न सर्वेषां सर्वात्मसु साधारण्येन तत्प्रतीतिरिति—*अपास्तम्*; आत्मत्वजातेरेवोक्तरीत्याऽसंभावितत्वेन तद्विशेषणासिद्धेः। सत्ताभेदादपि तदसंभवः; तात्पर्येण सर्वश्रुतिषु तदैक्यप्रतिपादनात्। तथाऽप्यभ्युपेत्य ब्रूमः—नहि देहादिसंबन्धोऽपि प्रत्यात्मासाधारणः, येन तद्विशेषितत्वादहन्त्वव्यवस्था स्यात्; तदनिरूपणात्। तथाहि—कस्तावद् देहादेः प्रत्यात्मसंबन्धः? न तावत्संयोगः; तस्य सर्वसाधारणत्वात्, सर्वात्मनां विभुत्वाभ्युपगमात्, सर्वमूर्तसंयोगित्वस्य च तत्त्वात्। नापि समवायः; आत्मनोऽस्पर्शतया द्रव्यानारम्भकत्वाभ्युपगमेन तत्समवायित्वानुपपत्तेः। नापि स्व-स्वामिभावः; भृत्यादिदेहसाधारण्यात्, स्वत्वानिरूपणाच्च। स्वादृष्टारब्धत्वं तदिति चेत्, न; अन्योन्याश्रयात्—देहादिषु स्वत्वसिद्धौ तदाधारक्रियाजन्यादृष्टे स्वत्वसिद्धिः, तत्स्वत्वसिद्धौ च तज्जन्यदेहादौ स्वत्वसिद्धिरिति। बीजाङ्कुरवदनादित्वाद्यमदोष इति चेत्, न; अन्धपरम्परात्वप्रसङ्गात्, बीजाङ्कुरादौ दृष्टत्वेन तथात्वाभावात्, प्रकृते चेदानीमेव तस्य कल्प्यत्वात्। तस्मादुक्तरीत्याऽदृष्टदेहादेरसाधारण्यानिरूपणात् तत्सिद्ध्यर्थं शुक्तिरजतादाविव तस्मिन्नाध्यासिक एव संबन्धो वाच्यः। तथाचाध्यासिकदेहादिसंबन्धघटितत्वात् काल्पनिकमेवात्मन्यहन्त्वं स्यात्। एवंच सत्यस्मदिष्टसिद्धिः। *एतेन*—अहन्त्वमात्मत्वजातेर्भिन्नं जात्यन्तरमिति पक्षोऽपि—*अपास्तः*; पूर्ववत् सर्वात्मसु सर्वेषां तत्प्रतीत्यभिलापप्रसङ्गानतिवृत्तेः, आत्मत्वादिना परापरभावानुपपत्तेश्च। तथाहि—आत्मत्वजातेर्घटत्वादिवदपरसामान्यत्वेनाभ्युपगमात्तद्व्याप्यसामान्याभ्युपगमानुपपत्तेरसंभवाच्च तद्व्यापकं वाच्यम्, नच तदपि संभवति; अनात्मनोऽप्यहन्त्वप्रसङ्गात्। आत्मत्वस्य द्रव्यविभाजकोपाधित्वात्तदन्तराले सामान्यान्तरप्रवेशानुपपत्तेश्च। अस्तु तर्ह्युपाधिरेवाहन्त्वमिति चेत्, न; तस्याप्यनिरूपणात्। ज्ञानाश्रयत्वस्य तत्त्वात्कुतस्तदनिरूपणमिति चेत्,

भामती

प्रकाशस्यैवानवच्छिन्नस्यावच्छिन्नेभ्यो बुद्ध्यादिभ्यो भेदाग्रहात् तदध्यासेन जीवभाव इति। तस्य चानिदमिदमात्मनोऽस्मत्प्रत्ययविषयत्वमुपपद्यते। तथाहि—कर्ता भोक्ता चिदात्माऽहंप्रत्यये प्रत्यवभासते। न चोदासीनस्य तस्य क्रियाशक्तिर्भोगशक्तिर्वा संभवति। यस्य च बुद्ध्यादेः

ऋजुविवरणम्

*तदध्यासेन=बुद्ध्यादितादात्म्याध्यासेन। तथाचात्मनि कर्तृत्व-भोक्तृत्वाद्यध्यासोऽपि युज्यत इति भावः। विषयत्वसत्त्वे खलूक्ताध्याससंभवः, इति तस्य विषयत्वमप्युक्तमुपसंहरति—*तस्य चेति* ॥ चिदात्मनश्चेत्यर्थः। *उपपद्यत इति* ॥ उक्तविधयेति भावः। आत्मन्यन्तःकरण-बुद्धि-देहेन्द्रियादितादात्म्याध्यासादन्तःकरणादिधर्मः कर्तृत्व-भोक्तृत्वादिरात्मन्यध्यस्यत इत्येतदुक्तप्रायमपि समाधानं पुनः स्पष्टतया प्रपञ्चयति—*तथाहीत्यादिना* ॥ *प्रत्यवभासते=अहं कर्ता, अहं भोक्ता, इत्येवंरूपेण प्रत्यवभासत इत्यर्थः। तद्योगतमात्मनो वास्तवं कर्तृत्वादिकमिति न तदध्यासः, इत्यत आह—*नचो-

वार्तिकम्

**न ; पूर्ववत्तत्प्रतीत्यभिलापातिप्रसङ्गतादवस्थ्यात्। *ननु*—न ज्ञानाश्रयत्वमात्रमहन्त्वं ब्रूमः, येनोक्तदोषः स्यात् ; किन्तर्हि ? स्वप्रकाशतया विद्यमानज्ञानाश्रयत्वम्, तेन न सुषुप्तावात्मन्यहन्त्वप्रसङ्गः ; तत्काले घटादिविषयकज्ञानस्यात्मन्यविद्यमानत्वात्। घटादिविज्ञानं हि यदोत्पद्यते, तदा प्रमेयादित्रितयमपरोक्षतया भासते—घटादि तत्कर्मतया, विज्ञानं स्वप्रकाशतया, आत्मा च तदाश्रयतया—घटमहं जानामीति, परोक्षज्ञानस्थलेऽपि प्रमेयस्य परोक्षत्वेऽपि ज्ञानात्मनोरुक्तरूपेणापरोक्षावभासोऽस्त्येव। अतो न तत्राप्यात्मन्यहन्त्वोल्लेखविरोधः। *एतेन*—ज्ञान-ज्ञात्रोरपि तत्कर्मतयाऽपरोक्षत्वम्, तस्य तत्कर्मत्वनियतत्वादिति—*अपास्तम्* ; परोक्षज्ञानस्य कर्माजन्यत्वेन तत्र तयोरपरोक्षत्वानुभवविरोधात्। *ननु*—न विषयज्ञाने ज्ञान-ज्ञात्रोः स्वप्रकाशत्व-तदाश्रयत्वाभ्यामपरोक्षता; तत्र तयोर्भाने प्रमाणाभावात्। नच—'घटमहं जानामी'ति विषयवत्तयोस्तज्जन्याभिलाप एव तत्र भाने मानमिति—वाच्यम् ; तदभिलापस्य मनोजन्यतत्त्रितयविषयकज्ञानान्तरजन्यत्वेन तदजन्यत्वात्प्रमाणत्वासिद्धेः, नच—मनसो बहिरस्वातन्त्र्यात् कथं तज्जन्यानुव्यवसाये बहिर्विषयभानमिति—वाच्यम् ; व्यवसायोपनीतत्वेन तत्र तद्भानोपपत्तेः, अन्यथा ज्ञानाभेदे 'घटोऽयम्', 'घटमहं जानामि' इत्यभिलापभेदानुपपत्तेरिति—चेत्, *न* ; ज्ञानप्रत्यासत्तेर्निराकृतत्वात्, बहिर्विषयकमनःसन्निकर्षाभावेन तत्त्रितयविषयकमनोजन्यज्ञानान्तरासिद्धेः। नच—ज्ञानैक्येऽभिलापभेदो न स्यादिति—वाच्यम् ; तद्भेदस्य वक्तुर्व्यवजिहीर्षाभेदमात्राधीनत्वात्, तज्ज्ञानप्रकारभेदानपेक्षणात् ; अन्यथा चाक्षुषघटज्ञानानन्तरं 'घटोऽयमि'त्यभिलापानुपपत्तेः, रूपादेरपि तज्ज्ञाने भासनात्। अतस्तस्मिन् ज्ञाने रूपादिभासनेऽपि यदा वक्ता घटमात्रं व्यवजिहीर्षति, तदा 'घटोऽयमि'त्यभिलपति, यदा तु रूपाद्यपि व्यवजिहीर्षति, तदा भूतले 'रूपवान् घट' इत्याद्यपि यथा ; तद्वद् ज्ञान-ज्ञात्रोस्तत्र भानेऽपि यदा त्रितयं व्यवजिहीर्षति, तदा 'घटमहं जानामी'त्यभिलपति, यदा तु विषयमात्रम्, तदा 'घटोऽयमि'त्यादीति, न तद्भेदस्तद्विषयज्ञानान्तरं कल्पयितुमर्हति ॥ नच—ज्ञान-ज्ञात्रोरपि मनोजन्यापरोक्षानुभवविषयत्वं संभवति ॥

तथाहि—न तावद् ज्ञाता तद्विषयः संभवति ; एकत्र कर्तृ-कर्मविरोधात्, न चांशभेदेन तदविरोधः समर्थनीयः ; विभोरंशाभावात्, तत्कल्पने वा निरंशश्रुतिव्याकोपापत्तेः, नापि सुखादि-**

भामती

कारणसंघातस्य क्रिया-भोगशक्ती, न तस्य चैतन्यम्। तस्माच्चिदात्मैव कार्य-कारणसंघातेन ग्रथितो

ऋजुप्रकाशिका

उदासीनस्येति ॥ *तस्य आत्मनः क्रियाशक्त्यभावाद् वास्तवं भोक्तृत्वमपि न संभवतीत्यर्थः। क्रियाशक्ति-भोगशक्त्यभावे हेतुरुक्त एव—"उदासीनस्ये"त्यनेन। असङ्गोदासीनत्वं चात्मनः—"असङ्गो ह्ययं पुरुषः" इत्यादिश्रुतिसिद्धमिति द्रष्टव्यम्। *ननु* तर्ह्यन्तःकरण-बुद्ध्यादेः कार्य-कारणसङ्घातस्याचेतनत्वात् क्रिया-भोगशक्तिमतोऽपि तस्य कथं कर्तृत्व-भोक्तृत्वे? इत्याशङ्क्य, तस्याचेतनत्वमङ्गीकरोति—*यस्य बुद्ध्यादेरिति* ॥ *कार्यकारणसङ्घातस्येति*॥ एतद् बुद्ध्यादेरित्येतस्य विशेषणम्। तस्मात् कार्य-कारणसङ्घातबुद्ध्यादितादात्म्या-ध्यासापन्नस्य जीवपदाभिलप्यस्य कर्तृत्व-भोक्तृत्वादिकमित्यभिसन्धायोपसंहरति—*तस्मादिति* ॥ तादात्म्या-

वार्तिकम्

विशिष्टाविशिष्टभेदमादाय तद्व्यवस्था? स चाविशिष्टात्मा कर्तृत्वेन संमतोऽहंप्रत्ययगोचरो भवति? न वा? यद्याद्यः, तर्हि कुतः कर्तृत्वकर्मत्वव्यवस्था? अथ द्वितीयः, तर्ह्यात्मप्रत्ययागोचरत्वात्तस्यानात्मत्वप्रसङ्गः। नचैवमस्त्विति वाच्यम्; तस्यैव स्वतन्त्रकर्तृत्वेनात्मत्वात्, अन्यथा मोक्षादौ सुखादिवैशिष्ट्याभावे-नात्माभावप्रसङ्गः। तथाचात्मविनाश एव भवतो मोक्षः स्यात्। *एतेन*—आत्मनो ज्ञानांश-द्रव्यांश-भेदेन कर्तृत्व-कर्मत्वव्यवस्थाऽपि भाट्टानां प्रत्युक्ता—*वेदितव्या*॥ नापि ज्ञानस्य तद्विषयत्वमुपपद्यते। घटे शौक्ल्यद्वयवदेकस्मिन्नात्मनि युगपद् ज्ञानद्वयासंभवात्, गुणत्वावान्तरैकजातीयगुणद्वयस्य योग्यस्य सदाऽनवस्थाननियमात्। एकस्मिन् संयोगद्वयदर्शनान्नैवमिति चेत्, न; तस्याव्याप्यवृत्तित्वात्, अवच्छेदकभेदेन भवता देशभेदाङ्गीकारादुक्तनियमाविरोधात्। अपिच पूर्वोत्तरज्ञानयोः प्रतियोगि-तत्प्राग-भावयोरिव विरोधित्वाङ्गीकारान्न तयोः सहावस्थानम्। नच सहानवस्थितयोर्विरुद्धयोर्वा ज्ञान-तत्कर्मणो-र्विषय-विषयिभावः कुत्रचिद् दृष्टचरः; प्रत्यक्षस्य संबद्धवर्तमानविषयत्वनियमात्। तथा चाहुः—"संबद्धं वर्तमानञ्च गृह्यते चक्षुरादिना" इति। तस्मान्न ज्ञानं मनोजन्याध्यक्षगोचरः, अपि तु स्वप्रकाशमेव। अपिच यदि ज्ञान-ज्ञात्रोर्ज्ञानविषयतयैव भानम्, हन्त कदाचिन्निश्चयासंभवात् तद्विषयसंशयादिरपि स्यात्। नच कश्चिदपि कदाचिद् ज्ञान-ज्ञातृविषये सन्दिहानो विपर्यस्तो वा दृश्यते। तस्मादपि न तयोर्ज्ञानविषयत्वम्। अपिच ज्ञानं विषयप्रकाशरूपत्वात्स्वयंप्रकाशमानमेव विषयं प्रकाशयेत्; आलोके तथा नियमदर्शनात्, अन्यथा चक्षुरयोग्येनाप्यालोकेन तद्विषयप्रकाशनप्रसङ्गात्। न निलीनं सत्; स्वयमप्रकाशमानस्य विषय-प्रकाशनानुपपत्तेः। नहि स्वयमप्रकाशमानं घटादि लिङ्गादि वा घटाद्यन्तरं लिङ्ग्यादि वा प्रकाशयतीति दृष्टम्। नच चक्षुरादिषु व्यभिचारः; तेषां प्रकाशान्तरजननद्वारा विषयप्रकाशकत्वेन स्वतःप्रकाश-रूपत्वाभावात्। न चालोकेऽपि तथा; तस्य तमोनिवृत्तिमात्रे पर्यवसानात् प्रकाशान्तरजनकत्वासिद्धेः। एवंच सति ज्ञानप्रकाशनार्थं चेद् ज्ञानान्तरमभ्युपगन्तव्यम्, तर्हि तस्यापि निलीनस्य विषयप्रकाशना-संभवात्तत्प्रकाशनार्थं ज्ञानान्तरमन्वेषणीयम्, एवं तस्य तस्यापीत्यनवस्थाप्रसङ्गः। युगपद् ज्ञानधारोप-लम्भप्रसङ्गासंभवाभ्यां च। तस्मादकामेनापि ज्ञानस्वप्रकाशत्वमभ्युपगन्तव्यम्; अन्यथा जगदान्ध्यप्रसङ्गात्। तथाच स्वप्रकाशज्ञानाश्रयस्यैवात्मनोऽहन्तयाऽवभासनात्, परकीयज्ञानस्य च परास्वप्रकाशत्वात्—न परात्मनि पराहन्त्वावभासप्रसङ्ग इति चेत्, न; भवन्मते परकीयज्ञानस्य परास्वप्रकाशत्वासिद्धेः। न ह्यग्निः कञ्चित्पुरुषं प्रत्युष्णः, कञ्चित्प्रति त्वनुष्णो भवति; तथा सति सापेक्षत्वेन तत्स्वभावहान्यापत्तेः। *व्यवधानान्नेति चेत्, न*; तदसिद्धेः॥ अथैवं ब्रूषे? न वयं परकीयं ज्ञानं परं प्रत्यस्वप्रकाशस्वरूपं

भामती

लब्धक्रिया-भोगशक्तिः स्वयंप्रकाशोऽपि बुद्ध्यादिविषयविच्छुरणात् कथंचिदस्मत्प्रत्ययविषयोऽहंकारास्पदं जीव इति च, जन्तुरिति च, क्षेत्रज्ञ इति चाऽऽख्यायते। न खलु जीवश्चिदात्मनो भिद्यते। तथाच श्रुतिः—'अनेन जीवेनात्मना' इति। तस्माच्चिदात्मनोऽव्यतिरेकाज्जीवः स्वयंप्रकाशोऽप्यहं

ऋजुप्रकाशिका

ध्यासो विच्छुरणशब्दार्थः। *ननु* चिदात्मन उक्ततादात्म्याध्यासमात्रेण कथं जीवपदाभिलाप्यत्वम्? तस्य ततो भेदात्, इत्यत आह—*न खल्विति*॥ उपाधिभेदाद् भिन्नोऽपि स्वरूपतो न भिद्यत इत्यर्थः। अभेदश्रुतिं प्रमाणयति—*तथाच श्रुतिरिति*॥ "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणी"ति श्रुतिरित्यर्थः। फलितमाह—*तस्मादिति*॥ *अहंप्रत्ययालम्बनम्* अहंप्रत्ययविषयः। एवंच विषयत्वलाभादध्यासः

वार्तिकम्

भवतीति ब्रूमः, येन सापेक्षत्वात्तत्स्वरूपत्वहानिर्विरुद्धस्वरूपत्वं वाऽऽपतेत्, किन्तर्हि? कुड्यादिव्यवधानाद्दीप इव देहान्तरादिव्यवधानात्तं प्रति तद्रूपेण न भातीत्येवमिति चेत्, न; देहान्तरादेस्तद्व्यव धानत्वासिद्धेः। व्यवधानं हि भवत्तज्ज्ञानोत्पत्तिप्रतिबन्धात्तत्कारणप्रतिबन्धाद्वा भवेत्, नच स्वप्रकाशे ज्ञाने तदुभयप्रतिबन्धः संभवति; तत्प्रतिबध्यस्य तदुभयस्याभावात्, स्वप्रकाशज्ञानस्य ज्ञानान्तराविषयत्वात्, अन्यथा स्वप्रकाशत्वक्षतेः, स्वतो भानस्य स्वरूपाव्यतिरेकाद् देहादिना प्रतिबन्धानुपपत्तेः, उपपत्तौ वा स्वाश्रयमात्मानं प्रत्यपि तत्प्रतिबन्धप्रसङ्गः। तथाच ज्ञानस्वप्रकाशकथैव लुप्ता स्यात्। दीपस्य तु प्रकाशो न कुड्यादिना प्रतिबध्यते, किन्तर्हि? तस्य जडप्रकाशत्वेन ज्ञानभास्यत्वात् तत्करणं चक्षुःसन्निकर्षादि प्रतिबध्यत इत्यदृष्टान्तः॥ *अपरोक्षज्ञानाविषयत्वेऽपि परोक्षज्ञानविषयत्वमस्त्येवेति चेत्*= यदि ब्रूयात्—यद्यपि स्वप्रकाशं ज्ञानं नापरोक्षज्ञानान्तरविषयः, स्वयमेवापरोक्षतया भानात्, तत्कृत्याभावात्, पूर्वोक्तरीत्या तस्मिन् तदसंभवाच्च; तथाऽपि परोक्षज्ञानविषयत्वमस्त्येव, तेन स्वप्रकाशत्वाविरोधात्। तथाच तदुत्पत्तेस्तत्कारणस्य वा प्रतिबन्धः प्रकृतेऽपि संभवतीति चेत्, न; *स्वप्रकाशज्ञानाय तत्तद्देहादेस्तज्जनितचेष्टाद्याधारत्वेन तद्गोचरपरोक्षज्ञानानुगुण्यात् तत्प्रतिबन्धकत्वानुपपत्तेः। अस्तु वा तत्प्रतिबन्धः, तथाऽप्युक्तप्रसङ्गो न परिहृतः स्यात्। परकीयज्ञानमपि परं प्रति स्वप्रकाशं स्यात्। तथाच तदाश्रयतया परात्मनोऽपि भासनात्तत्राहमुल्लेखः स्यादिति। अभ्युपेत्य देहादेर्व्यवधायकत्वमेतावदुक्तम्। वस्तुतस्तु—सर्वात्मनो विभुत्वेन सर्वत्र विद्यमानत्वात्तद्व्यवधायकत्वमपि नास्तीति। न चात्मभेदोऽपि परमार्थतोऽस्ति; तदद्वैतप्रतिपादकश्रुतिशतविरोधात्। *ननु* तव मतेऽपि ज्ञानस्वप्रकाशत्वाभ्युपगमात् परकीयं ज्ञानं परस्वप्रकाशं स्यादित्ययं प्रसङ्गस्तुल्य एवेति चेत्, न; स्वरूपचिन्मात्रस्वप्रकाशत्वसाधारण्यापादनस्येष्टत्वात्, अन्तःकरणवृत्तिविशिष्टचित्प्रकाशस्य चाऽध्यस्तत्वेन शुक्तिरजतवत् स्वप्नप्राप्तराज्याभिषेकवच्चासाधारण्यात् साधारण्यापादनानुपपत्तेरस्मन्मते तद्दोषत्वात्। यथाच स्वप्रकाशविषयज्ञानाश्रयतया नात्मनो भानम्, किन्तर्हि? ज्ञानैकरूपत्वेन स्वप्रकाशतया, तथा वक्ष्यामः। तस्मान्न स्वप्रकाशज्ञानाश्रयत्वमप्यहन्त्वम्, किन्तु शुक्तिरजतादिवदसाधारण्यादाध्यासिक एव कश्चिद्धर्म आत्मनि भासते। तस्मिन् तत्सत्यत्वे तन्निरञ्जनत्वादिबोधकश्रुतिशतव्याकोपापत्तेः। स चाऽऽध्यासिको धर्मोऽन्तःकरणमित्यवोचाम। "मनोमयः" "विज्ञानमयः" "सधीः स्वप्नो भूत्वेमं लोकमनुसञ्चरति" "ध्यायतीव लेलायतीवे"त्यादिश्रुतिभ्यः, अन्यथा कूटस्थस्यात्मनः प्रमातृत्वानुपपत्तेः। अतः

भामती

प्रत्ययेन कर्तृभोक्तृतया व्यवहारयोग्यः क्रियत इत्यहंप्रत्ययालम्बनमुच्यते । नच—अध्यासे सति विषयत्वम्, विषयत्वे चाध्यास इत्यन्योन्याश्रयत्वमिति—सांप्रतम्; बीजाङ्कुरवदनादित्वात्, पूर्वपूर्वाध्यास-तद्वासनाविषयीकृतस्योत्तरोत्तराध्यासविषयत्वाविरोधादिति, उक्तं हि—'नैसर्गिकोऽयं लोकव्यवहारः' इति भाष्यग्रन्थेन ।

ऋजुप्रकाशिका

सुकर इति भावः । अत्र चान्योन्याश्रयमाशङ्क्य निराकरोति—*नचेति* ॥ निराकरणमेवाह—*बीजेति* ॥ प्रवाहानादित्वमनादित्वशब्दार्थः । प्रवाहानादित्वमेव स्फोरयति—*पूर्वपूर्वेति* ॥ द्वयोः परस्पराधीनत्वे ह्यन्योन्याश्रयः, अत्र चातथात्वान्नान्योन्याश्रय इति भावः । प्रवाहानादित्वमुक्तम्, तत्र भाष्यकारसम्मतिमाह—*उक्तं हीत्यादिना भाष्यग्रन्थेनेत्यन्तेन* ॥ नैसर्गिकशब्देन प्रवाहानादित्व-

वार्तिकम्

सुख-दुःख-ज्ञानेच्छादिपरिणामाधारं मध्यमपरिमाणमात्मनः सर्वार्थसाधकं तदुपाधिभूतमाध्यासिकं प्रवाहरूपेण संसारस्थाय्यन्तःकरणमेवाहमित्यात्मप्रत्यये तद्विशेषणतयाऽहन्त्वेन रूपेण भासते, नान्यत्; प्रमाणाभावादिति सिद्धम् । ततश्चोपपन्नमात्मनस्तद्विषयत्वमिति ॥

एतेन—आत्मनोऽहमिति ज्ञानविषयत्वमपि—*व्याख्यातम्*, विशेष्यांशे तदविषयत्वेऽपि विशेषणांशे तद्विषयत्वात् । अत एव न कर्तृ-कर्मविरोधोऽपि; अध्यस्तानध्यस्तांशभेदेन तद्विरोधपरिहारात् । नचैतावता निरंशत्वश्रुतिव्याकोपः; तच्छ्रुतेरात्मनः पारमार्थिकांशाभावपरत्वेनाध्यासिकांशावारकत्वात्, अन्यथा जगदुपादानत्वबोधकश्रुतिशतव्याकोपापत्तेः ॥ *एतेन*—अहमिति द्वैरूप्यानवभासनात् सर्वत्राध्यासे द्वैरूप्यावभासस्य नियतत्वात्तद्विरोधेन कथमात्मन्यहमिति प्रतीतेराध्यासिकत्वं स्यादिति—अपास्तम्; कर्तृ-कर्मतया, बोध्यबोधतया, अनुगतानुगततया च तत्रांशद्वयस्य सर्वानुभवसिद्धत्वात् । परं त्वत्राध्यस्यमानातिरेकेणे'दं रजतमि'त्यादाविदंत्वादिवदधिष्ठानावच्छेदकाभावादधिष्ठानस्यात्मनो निर्विकल्पत्वान्न विशिष्टवैशिष्ट्यबोधः, किन्तु विशिष्टबोध इत्यन्यत् । नच—अज्ञानाश्रयचैतन्यस्याहंकाराधिष्ठानत्वात्कथं तस्य निर्विकल्पतेति—वाच्यम्; वस्तुतस्तथात्वेऽप्यज्ञानस्य विशेषणतया तत्कोटावप्रवेशात्, अन्यथा प्रकारतयेदंत्ववद्रजताध्यासेऽहंकाराध्यासेऽज्ञानभानप्रसङ्गात्, तदुपलक्षितसाक्षिण एव निर्विकल्पस्य तदध्यासाधिष्ठानकोटावज्ञानस्य प्रवेशे चाहमज्ञ इत्यध्यासस्येष्टत्वाच्च ॥

एतेन साक्षिचैतन्यमपि—*व्याख्यातम्*; वस्तुतोऽज्ञानाश्रयस्यैव तत्तत्कार्यभासकस्य साक्षित्वात् । *ननु* एवं सति जीव एव साक्षी स्यात्, नोच्चैर्वाच्यम्; श्रोष्यति परः, यत्रैकमेव चिन्मात्रं शुद्धं जीव ईश्वरश्चेत्युक्तम्, तत्र का कथा साक्षिणो जीवाभेदे? *ननु*—वस्तुतः शुद्धचिन्मात्रस्य जीवेश्वरत्वेऽप्यविद्याश्रयत्व-विषयत्वाभ्यां जीवेश्वरत्वव्यवहारभेदनियमो भवतीत्युक्तमिति—*चेत्*, सत्यम्; अत्रापि किमविद्याश्रयत्व-तदुपलक्षितत्वाभ्यां जीवत्व-साक्षित्वव्यवहारभेदनियममपलपसि? *एतेन*—साक्षिभेदोऽपि—प्रत्याख्यातः; अज्ञान-सर्वतत्कार्यभासकस्यैव साक्षित्वात् । अपिच यत्र पूर्वोक्तरीत्या जीवभेद एव नास्ति, तत्र दूरत एव साक्षिभेद इति । तथाच श्रुतिः—"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च" ॥ इत्यादिः । स्मृतिरपि सूतसंहितायाम्—"अचेतने जगत्यस्मिन् साक्षिभेदं वदन्ति ये । ते महामोहसर्पेण दष्टा एव न संशयः ॥" सुरेश्वरोऽप्याह—"चिदाभासितधीरात्मा कूटस्थोऽप्येति साक्षिताम् ।

भामती

तस्मात् सुष्ठूक्तम्—*न तावदयमेकान्तेनाविषय इति*। जीवो हि चिदात्मतया स्वयंप्रकाशतयाऽविषयोऽप्यौपाधिकेन रूपेण विषय इति भावः।

ऋजुप्रकाशिका

मुक्तमित्यर्थः। उपसंहारव्याजेन परिहारभाष्यं प्रस्तौति—*तस्मात् सुष्ठूक्तमित्यादिना* ॥ आत्मनश्चिद्रूपत्वेन स्वयंप्रकाशतयाऽविषयत्वस्योक्तत्वात् कथमविषयो नेत्युच्यते इत्याशङ्क्य, वस्तुतोऽविषयत्वेऽप्यौपाधिकं विषयत्वमस्त्येवेत्युक्तमेव। पुनर्दार्ढ्यार्थमभिप्रायतो विवृणोति—*जीवो हीति* ॥ प्रकारान्तरेणाध्यासाभावं शङ्कते—

वार्तिकम्

आगमापायिरूपेषु स्थितोऽनेकेषु केवलः॥ दृश्यार्थवदभिन्नोऽयं द्रष्टृदर्शनसाक्ष्यपि। द्रष्टृदर्शनभेदेऽपि न भेदोऽस्य मनागपी"पीति ॥

ननु साक्षिण एकत्वे रजताद्यध्यासस्य सर्वसाधारण्यप्रसङ्ग इति—*चेत्*, अहो देहात्मवादं गृहीत्वा भ्रान्तो भवान्। के सर्वे भवदभिप्रेताः? यत्साधारण्यं शुक्तिरजताध्यासस्यापाद्यत इति। अन्तःकरणदेशादिविशिष्टा अस्मदादयः प्रमातारः सर्वे इति चेत्, न; साक्षिमात्रप्रत्यक्षस्य रजतस्येश्वरमात्रप्रत्यक्षपदार्थवदस्मदाद्यध्यक्षगोचरत्वासंभवात्, साक्षिप्रमात्रुपाध्योर्भेदात्सर्वसाधारण्याऽऽपादनस्य दूरनिरस्तत्वात्। *अथ*—रजताध्यासस्य तदनुभवस्य च प्रमात्रनिष्ठत्वेऽपि प्रमात्रवच्छिन्नसाक्ष्यज्ञानपरिणामत्वाद् इदमाकारप्रमातृवृत्त्यभिन्नतयाऽभिव्यक्तसाक्ष्यनुभवगोचरत्वाच्चैकाध्यस्तत्वसंबन्धेन प्रमातृनिष्ठतया तद्भासनमुपपद्यते; तथाऽनुभवात्, *एवं* तर्हि यत्प्रमात्रवच्छिन्नसाक्षिणि यदध्यस्तं यत्प्रमातृवृत्त्यभिन्नतयाऽभिव्यक्तसाक्ष्यनुभवस्य तद्गोचरः, तस्यैव प्रमातुस्तदनुभवगोचरः, न सर्वेषामिति, कुतः सर्वसाधारण्यं तदध्यासानुभवयोः? नच प्रत्यन्तःकरणमवच्छेदभेदात्साक्षिभेदकल्पनम्; अवच्छेदभेदन वस्तुतो धर्मिस्वरूपभेदकल्पनेऽतिप्रसङ्गात्, अन्यथा जीवस्याप्येकत्वेनाभिमतस्यावस्थाभेदेनान्तःकरण-देहाद्यवच्छेदभेदेन च भेदापत्तेः। *ननु*—मा भूदेकजीववादे साक्षिभेदः, नानाजीववादे तु भविष्यति; तत्राज्ञानानेकत्वे तदुपलक्षितानेकत्वात्, अज्ञानोपलक्षितस्य च साक्षित्वादिति—चेत्, *न*; प्रतिजीवमज्ञानभेदेऽपि तद्विषयेश्वरैक्यवत्तदुपलक्षितसाक्ष्यैक्योपपत्तेः, अन्यथाऽज्ञानभेदेन तद्विषयभेदात्तदुपलक्षितभेदवदीश्वरभेदप्रसङ्गात्, तस्य चानिष्टत्वात्, साक्ष्यभेदप्रतिपादकोदाहृतश्रुति-स्मृतिव्याकोपाच्चेत्यास्तामयं प्रसङ्गः। प्रकृतमनुसरामः ॥

तदेवमुक्तप्रकारेणाहंवृत्ति-तज्जनिताभिलापान्तःकरणविषयत्वस्यात्मनि सत्त्वात् सर्वत्र भ्रमे वृत्तिविषयत्वस्य वा तज्जनिताभिलापविषयत्वस्य वाऽन्तःकरणविषयत्वस्य वा नियतत्वेनाधिष्ठानत्वप्रयोजकत्वात् स्फुर्तिविषयत्वस्य कुत्रचित् सत्त्वव्यापकतया तदप्रयोजकत्वात् सिद्धमात्मनोऽहमिति भ्रमाधिष्ठानत्वमिति ॥

ननु—तथापि न सिद्धमात्मनोऽधिष्ठानत्वम्, कथम्? अपरोक्षभ्रमे ह्यारोप्यापरोक्ष्यवद् अधिष्ठानाऽऽपरोक्ष्यमपि नियतम्; अन्यथा भ्रमाऽऽपरोक्ष्यानुपपत्तेः। न चात्मन आपरोक्ष्यं संभवति; कर्तृ-कर्मभावविरोधेन ज्ञानकर्मत्वस्य त्वयैवात्मनो निराकृतत्वात्। नच—ज्ञानस्वप्रकाशत्वस्य साधितत्वात् तदाश्रयतयाऽऽत्मनोऽपरोक्षत्वं भविष्यतीति—वाच्यम्; तदाश्रयत्वस्यासाधारणत्वेनाप्रयोजकत्वात्

पञ्चपादिका

ननु विषयिणश्चिदात्मनः कथं विषयभावः ? पराग्भावेनेदन्तासमुल्लेख्यो हि विषयो नाम, भवति तद्विपरीत्येन प्रत्यग्रूपेणानिदंप्रकाशो विषयी ; तत् कथमेकस्य निरंशस्य विरुद्धांशद्वयसंनिवेशः ?

पञ्चपादिकाविवरणम्

अस्मत्प्रत्ययशब्देनात्मविषयं ज्ञानमुक्तमिति मन्वानश्चोदयति—*ननु विषयिण इति* ॥ एकस्यां प्रत्यक्षदर्शनक्रियायामेकस्यैव कर्तृस्थाने तदैव तद्विपरीतकर्मकारकस्थाने चावस्थानमनुपपन्नमिति भावः । अस्तु तर्ह्यंशाभ्यां तद्भाव इति, नेत्याह—*तत्कथमेकस्येति* ॥ तत्र सर्वतो विप्रसृतस्य सवितृप्रकाशस्याऽऽकाशे विशेषाभिव्यक्तिनिमित्तदर्पणादिवदात्मचैतन्यस्य सविकल्पकतया स्फुटीकरणव्यवहारनिमित्तं भास्वरद्रव्यमात्मन्यध्यस्तमन्तः-

ऋजुविवरणम्

स्वरूपेण तयोर्विरोधः ; तथापि नात्र प्रसक्तिरित्याशङ्क्याभिप्रायमाह—*एकस्यामिति* ॥ तत्र कर्तृत्वं कर्मत्वं च भिन्नव्यक्तिगतं न विरोधि, तदर्थम् "एकस्ये"त्युक्तम् । एकस्यापि कालभेदेनाविरोधः ; तदर्थम्—'तदैवे'त्युक्तम् । *शब्दकर्मत्वम्—ज्ञानकर्तृत्वम् ; यद्वाऽऽलोककर्मत्वम्, स्वव्यापारे कर्तृत्वं घटादेः, यद्वाऽविद्याविषयत्वमन्यत्र कर्तृत्वम्, एवमक्रियाविषयवैषम्यप्रदर्शनार्थम्—'क्रियायामि'ति । अनुमाने द्वयमप्यात्मनो दृश्यते, तदर्थम्—'प्रत्यक्षदर्शने'ति । चोदितम् ; तन्न युक्तम् ; अन्तःकरणे विषयत्वमेव यत इत्याशङ्क्यावतारयति—*अस्मत्प्रत्ययशब्देनेति एवमप्यतदपि ज्ञानभेदे भवेत्, तदर्थम्—"एकस्यामि"त्युक्तम् । एवमानुलोम्येनापि, तत्रैकप्रत्यक्षदर्शनेत्युक्तेऽप्यात्मविषयज्ञानस्याजन्यत्वेन कर्मतैवात्मनः, न कर्तृतेति शङ्का स्यात्, तन्निराकरणार्थम्—'क्रियायामि'ति विशेषणम् । *अथवा*—कर्तृ-कर्मापेक्षत्वप्रदर्शनार्थम्—'क्रियायामि'त्युक्तम् । क्रियाभेदे कर्तृत्वादिदर्शनाद् 'एकस्यामि'त्युक्तम् । अनुमानव्यवच्छेदार्थम्—'प्रत्यक्षे'ति । इतरद् व्यक्तम् । *ननु* अस्मत्प्रत्ययत्वाभिमतोऽहंकार इत्युक्तेऽपि समानो दोषः ; चैतन्यस्याविषयत्वात्, नच ज्ञानातिरिक्तं तदस्ति, तेन शब्दमात्रभेदान्नायं परिहार इत्याशङ्क्यावतारयति—*तत्र सर्वत इति* ॥ कथमस्य स्फुटीकरणव्यवहारनिमित्ततेत्याशङ्क्याह—*भास्वरद्रव्यमिति* ॥

तत्त्वदीपनम्

कर्मत्वमप्रयोजकमित्यर्थः । अस्मदिति प्रत्ययो यस्य, सोऽस्मत्प्रत्ययोऽहंकारः । अस्मच्चासौ प्रत्ययश्चेति वा । तत्र बिम्बितत्वमस्मत्प्रत्ययविषयत्वम् ॥

कर्तृ-कर्मविरोधेन विषयत्वनिराकरणमनुपपन्नम् ; अन्तःकरणविषयत्वस्यास्मत्प्रत्ययविषयशब्दार्थत्वादित्याशङ्क्याह—*अस्मत्प्रत्ययेति* ॥ गमनक्रियाकर्तृत्वं दर्शनक्रियाकर्मत्वं चैकत्रोपलब्धमिति न विशेष इत्याशङ्क्याह—*एकस्यामिति* ॥ देहः स्वातिरिक्तद्रष्टृक इत्यत्र एकस्यैव कर्तृत्वं कर्मत्वं च, तदर्थम्—*प्रत्यक्षेति* विशेषणम् । कर्तृभेदे विरोधाभावं निराकर्तुम्—एकस्येत्युक्तम् । कालभेदेनाविरोधं निराकर्तुमाह—*तदेति* ॥ कर्तृस्थाने क्रियां प्रति गुणभावः, कर्म-करणस्थाने क्रियां प्रति प्राधान्यम्, तत्रैकेनांशेन कर्तृत्वम्, अपरेण कर्मत्वमित्यङ्गीकरणान्न विरोध इति शङ्कते—*अस्तु तर्हीति* ॥ निष्कलादिवचनविरोधान्नैवमित्याह—*नेत्याहेति* ॥ कर्तृ-कर्मविरोधनिराकरणार्थम् —'अहंकारोऽस्मत्प्रत्ययः' इत्युक्तम्, तथापि न विरोधो निराकर्तुं शक्यः ; अहंकारशब्दस्याहंप्रत्ययार्थत्वादित्याशङ्क्याह—*तत्रेति* ॥ अन्तःकरणमस्मत्प्रत्यय इति प्रथमं संबन्धः, प्रतीयमानत्वेन प्रत्ययत्वम् । आत्मनो दृग्रूपत्वादन्तःकरणविषयत्वमनुपपन्नमित्याशङ्क्याह—*आत्मचैतन्यस्येति* ॥ अन्तःकरणे प्रतिबिम्बिततया स्फुटत्वं विषयशब्दार्थः ॥

परिच्छिन्नस्यैवाधिष्ठानत्वमित्यभिनिविशमानं प्रत्याह—*सविकल्पकतयेति* ॥ जडत्वाविशेषेऽपि कस्यचिद् व्यञ्जकत्वं कस्यचिन्नेति कथम् ? तत्राह—*भास्वरेति* ॥ पार्थिवत्वेऽपि वैदूर्यपाषाणादीनामान्तरालिकभेदवदेद इत्यर्थः । अन्तःकरणेन संयोगासंभवात्कथं तत्र व्यक्तत्वम् ? तत्राह—*आत्मनीति* ॥ आत्म-

पञ्चपादिका

अत्रोच्यते—अस्मत्प्रत्ययत्वाभिमतोऽहंकारः । स चेदमनिदंरूपवस्तुगर्भः सर्वलोकसाक्षिकः ।

पञ्चपादिकाविवरणम्

करणमस्मत्प्रत्यय इत्याह—*अस्मत्प्रत्ययत्वाभिमतोऽहङ्कार इति* ॥ *ननु* इदं रजतमितिवदध्यस्तत्वे—'अहमि'ति द्वैरूप्यावभासो वक्तव्य इत्यत आह—*स चेदमनिदमिति* ॥ 'अयो दहती'ति दग्धृत्वविशिष्टस्याग्नेरयसश्च द्वैरूप्यावभासवत्—'अहमुपलभे' इत्युपलब्धृत्वविशिष्टस्यात्मनोऽन्तःकरणस्य चास्त्येव द्वैरूप्याऽवभासः, असाधारणक्रियोपरक्तमात्मादिद्रव्यमेव वस्त्वन्तरविशिष्टमवभासत इति भावः । दुःखि-प्रेमास्पदरूपेण परिणामि-तदागमा-

ऋजुविवरणम्

एवमप्यसंबन्धात्कथमात्मनि स्फुटीकरणनिमित्ततेति ? तत्राह—*आत्मन्यध्यस्तमिति* ॥ *अथवा* ज्ञानव्युदासार्थमाह—*अन्तःकरणमस्मत्प्रत्यय इति* ॥ कथमद्वितीयात्मन्येतादृशं वस्तु संभवतीति ? तत्राह—*अध्यस्तमिति* ॥ तथापि संबन्धाभावाद्विषयत्वमात्मनो न स्यात्, तदर्थमाह—*आत्मनीति* ॥ *ननु* अध्यस्तवस्त्वन्तरे न दृष्टमस्य कथमेतादृशं सामर्थ्यमिति ? तदाह—*भास्वरद्रव्यमिति* ॥ *ननु*—साक्षिचैतन्य आवरणाभावेन तन्निवृत्त्यभावात् कथमन्तःकरणस्य तद्विषयतेति ? तत्राह—*आत्मचैतन्यस्येति* ॥ *ननु*—प्रकाशमानेऽपि वस्तुनि नैतादृशातिशयजननेन तद्विषयत्वं दृश्यते, इत्याङ्क्य दृष्टान्तमाह—*तत्र सर्वत इति* ॥ कथम्—'अहमि'त्यत्र द्वैरूप्यव्यपदेशाभावे द्वैरूप्यमुक्तम् ? इत्याशङ्क्यात्मधर्मप्रतीत्या तत्र प्रतीतिरित्युदाहरणेन साधयति—*अयो दहतीति दग्धृत्वेति* ॥ *ननु* 'अहमुपलभे' इति व्यधिकरणम्; 'अहमि'त्यत्र द्वैरूप्यावभासस्य वक्तव्यत्वात्, नच—'अयो दहती'तिवदुभयप्रतीतिर्निश्चीयते ; तत्रोभयोः प्रत्यक्षत्वात्, अग्नेर्व्यपदेशाभावेऽपि प्रतीतिर्निश्चेतुं शक्यते । नचानेनैव तत्सिद्धिः ; इह त्वहंव्यतिरेकेणात्मप्रतिपत्त्यभावादहम एवोपलब्धिसम्बन्धित्वेनावभासो भवेत्, नतु धर्मिद्वयप्रतीतिः । 'अयो दहती'त्यत्राप्येतावन्मात्रेण नोभयप्रतीतिः, किन्तु दग्धृत्वस्याग्निगतत्वेन प्रमाणसिद्धत्वाद् दहतीत्यत्राग्निस्वरूपप्रतीत्यभावेऽपि तद्धर्मिप्रतीत्याऽग्निस्वरूपमस्तीति कल्प्यते, नतु तत्प्रतीतिः, तद्वदिहाप्यात्मधर्मप्रतीत्या तत्स्वरूपास्तित्वनिश्चयो भवेत्, नतु पूर्वमेव तत्प्रतीतिरित्याशङ्क्याह—*असाधारणेति* ॥ कथं सर्वलोकसाक्षिकत्वम् ? नह्य'हमि'त्यत्र द्वैरूप्यग्राहकं लोके किंचित् प्रमाणमस्ति, तदभावे नोभयसिद्धिः, नास्त्यात्मनोऽन्या प्रतीतिरित्याशङ्क्यावतारयति—*दुःखिप्रेमास्पदेति* ॥ *तदागमापायेति* ॥ तस्य = परिणामस्य, आगमश्चापायश्चा-

तत्त्वदीपनम्

व्यङ्ग्यस्यान्तःकरणस्य कथं तद्व्यञ्जकत्वम् ? तत्राह—*तत्र सर्वत्र इति* ॥ द्व्याकाराद्यवभासत्वाभावान्नान्तःकरणमध्यस्तमिति चोदयति—*नन्विति* ॥ द्व्याकारत्वाभावोऽसिद्ध इत्याह—*अत इति* ॥ इदमनिदंरूपे वस्तुनी गर्भे यस्य, स तथोक्तः । चिद्रूपेणाहंकारगतजाड्याभिभवात्तस्मिन्नहंकारो गर्भित इवाऽऽस्ते, इदंरूपेण च चैतन्यगतस्वप्रकाशकत्वतिरोधानादनिदंरूपमिदंरूपे गर्भितमिवेत्यर्थः । गर्भशब्दप्रयोगः कस्माद् इत्याशङ्क्य, पृथक्त्वेन धर्मिद्वयप्रतीत्यभावादित्याह—*अयो दहतीति* ॥ *द्वैरूप्यावभासेति* ॥ अग्नेश्चतुष्कोणत्वाद्याकारता, अयसश्च दग्धृतेत्यर्थः । 'अहमुपलभे' इत्यत्रोपलब्धिविशिष्टोऽहंकारः प्रतीयते, न रूपान्तरम्, दृष्टान्ते तु दग्धृत्वस्य दहनधर्मतया प्रसिद्धत्वाद् रूपान्तरसंश्लेषनिश्चय इत्याशङ्क्याह—*असाधारणेति* ॥ उपलब्धेः स्फुरणात्मिकाया जडधर्मत्वाभावादुपलम्भधर्माऽऽत्मा बुद्धिसंबद्धतया प्रथते, बुद्धिश्च परिणममाना चित्संवलिततयेत्यर्थः ॥

"सर्वलोकसाक्षिकः" इत्यत्रेदमनिदंरूपमनुभूयत इत्युक्तम्, तन्न संभवति ; अननुभवादेवेत्याशङ्क्यानुभवमभिनयति—*दुःखीति* ॥ निरतिशयप्रेमास्पदत्वेन सुखरूपत्वं प्रतीयते । तस्मिंश्च दुःखसंबन्धानुपपत्तेर्दुःखमन्यदिति द्वैरूप्यम् । एतदभिप्रेत्योक्तम्—*अवहितचेतस्तयेति* ॥ विधान्तरेण द्वैरूप्यमाह—*परिणामीति* ॥ सुखाद्या-

पञ्चपादिका

तमवहितचेतस्तया निपुणतरमभिवीक्ष्य रूपकपरीक्षकवत् स्वानुभवमप्रच्छादयन्तो वदन्तु भवन्तः परीक्षकाः—किमुक्तलक्षणः ? न वा ? इति ॥

ननु—किमत्र वदितव्यम्—असम्भिन्नेदंरूप एवाहमित्यनुभवः, कथम् ? प्रमातृ-प्रमेय-

पञ्चपादिकाविवरणम्

पायद्रष्टृरूपेणाहङ्कारविषयादिष्वनुस्यूतचैतन्यरूपेणा'हमि'ति च व्यावृत्तरूपेण च सर्वलोकसाक्षिकं द्वैरूप्यमित्याह—*सर्वलोकसाक्षिक इति* ॥

ननु, विषयसंविद आश्रय आत्मा, तत्राहं जानामीति संविदाश्रयत्वेनावभासमानोऽहङ्कारः कथमिदमंशः स्यात् ? इति चोदयति—*ननु किमत्र वदितव्यमिति* ॥ *ननु* 'अयो दहती'त्यादावयःपिण्डादिवदकर्तृत्वेऽपि दर्शनक्रियाश्रयकोटिनिक्षिप्ततयाऽहङ्कारस्यावभासः सम्भवतीति, पूर्ववादिनं सिद्धान्ती चोदयति—*कथमिति* ॥ अयःपिण्डव्यतिरेकेण वह्नेर्दहनक्रियाश्रयत्वदर्शनवदहङ्कारव्यतिरेकेणात्मनि ज्ञानक्रियाऽदर्शनादहम एवात्मत्वमित्युत्तरेण ग्रन्थेन प्रतिपादयति ।

*तत्र साङ्ख्यास्तु—अचिदात्मन्यन्तःकरणे चिदाकारप्रतिबिम्बावभासः, तथाविधबिम्बान्तरपुरस्सरः, प्रतिबिम्बत्वात्, मुखप्रतिबिम्बवदिति बिम्बभूतमात्मानम्—*अनुमिमते*; *नैयायिक वैशेषिकाश्च*—इच्छादयो

ऋजुविवरणम्

गमापायौ, तयोर्द्रष्टृरूपेणेति ॥ "ननु किमत्रे"ति चोद्यं नोदेति ; उपलब्धुरिदमंशस्याहमश्च तत्प्रतीतेरुक्तत्वादित्याशङ्क्यावतारयति—*ननु विषयसंविद इति* ॥ प्रमातृ-प्रमेयेति परिहारग्रन्थोऽसंगतः ; अहमो दर्शनाश्रयकोटिनिक्षिप्ततयाऽन्यथासिद्धेरपरिहृतत्वादित्याशङ्क्य ग्रन्थसमुदायस्याभिप्रायमाह—*अयःपिण्डव्यतिरेकेणेति* ॥ *ननु*—किमर्थं प्रमात्रादीनामपरोक्षत्वसाधनं कृतम् ? विप्रतिपत्त्यभावादित्याशङ्क्याह—*तत्र सांख्या इति* ॥ "विशेषगुणत्वादि"तिहेतौ गन्धमादायानैकान्तिकत्वम्, तदर्थम्—"तेष्वदृष्टत्वे सती"ति विशेषणम् । विशेषत्वं गुणत्वं च साधयितुम् "एकेन्द्रियग्राह्यतये"ति । "गुणत्वादि"त्येवोक्ते हेतोरनैकान्तिकत्वम्, "गन्धादौ तेष्वदृष्टत्वादि"त्येवोक्ते मनस्त्वेना-

तत्त्वदीपनम्

कारेण परिणामिनी बुद्धिः, तदुत्पत्तिनाशसाक्षि चैतन्यम् । एकस्मिंश्च साक्षिसाक्ष्यभावानुपपत्तेरिति द्वैरूप्यम् । तदुक्तम्—*निपुणमभिवीक्ष्येति* ॥ द्वैरूप्यान्तरमाह—*अहंकारेति* ॥ बुद्धि-तद्वृत्तिविषयसाक्षितयानुस्यूतं स्फुरणम् । अहंकारस्तु व्यावृत्तः । नच एकस्मिन्ननुवृत्तत्वं व्यावृत्तत्वं च संभवति । तदुक्तम्—*निपुणतरमिति* ॥

असंभिन्नेदंरूप इति कथमुक्तम् ? अहंकारस्येदमंशताया उक्तत्वादित्याशङ्क्याऽऽत्मलक्षणलक्षितत्वादहंकारोऽनिदमंश इत्याह—*नन्विति* ॥ अनात्मत्वेऽपि संविदाश्रयतया स्फुरणं घटत इति चोदयति—*नन्विति* ॥ अयःपिण्डस्यादग्धृत्वेऽपि दहनसंसृष्टतया दग्धृत्वस्फुरणवदात्मसंसृष्टतया तथा स्फुरणं भवतीत्यर्थः । उत्तरग्रन्थस्य प्रश्नाननुरूपत्वमाशङ्क्य तात्पर्यमाह—*अयःपिण्डेति* ॥

तर्हि येन ग्रन्थेनाहमात्मत्वं प्रतिपाद्यते, तावताऽलम्, किं प्रमातृ-प्रमेयेत्यादिनेत्याशङ्क्य, आत्मनः संविदाश्रयत्वेनाऽऽपरोक्ष्यम्, विषयस्य कर्मतया, संविदः स्वप्रकाशतयेति विभागं वक्तुमापरोक्ष्ये विप्रतिपत्तिं तावदाह—*तत्र सांख्या इति* ॥ तत्र वादिनां मध्ये सांख्यास्त्वात्मानमनुमिमत इत्यन्वयः । अनुमानमाह—*अचिदात्मनीति* ॥ अन्तःकरणस्य चित्त्वान्न तत्र चित्प्रतिबिम्बभाव इति शङ्कां व्यावर्तयितुम्—अचिदात्मेति विशेषणम् ; करणत्वाद् दीपवन्न चित्त्वमित्यर्थः । "बिम्बान्तरपुरस्सरः" इत्युक्ते यत्किंचिद्बिम्बपुरःसरत्वसाधनेनार्थान्तरत्वम्, तदर्थमाह—*तथाविधेति* ॥ तथाविधशब्दः प्रतिबिम्बसदृशवाची । 'इच्छादयो गुणाः' इत्युक्ते यस्य कस्यचिद् गुणा इत्यर्थान्तरत्वम्,

पञ्चपादिकाविवरणम्

गुणाः, पृथिव्यादिमहाभूतद्रव्यव्यतिरिक्तस्यैव विशेषगुणाः, तेष्वदृष्टत्वे सत्येकेन्द्रियग्राह्यतया विशेषगुणत्वात्; भूतचतुष्टयेऽदृष्टगन्धवत्, दिक्काल-मनसां विशेषगुणहीनत्वात्परिशेषादिच्छादिगुणवद् द्रव्यमन्यदेवात्मेति—*अनुमिमते* ; तथा संवेदनेषु विषयाकारप्रतिबिम्बावभासः, तथाविधबिम्बसन्निधानपुरःसरः, अतस्मिंस्तदवभासत्वात्, दर्पण-स्फटिकादिगतमुखरक्तत्वादिवदिति नित्यानुमेया विषया इति सौत्रान्तिकाः कल्पयन्ति। तान्प्रत्याह—*प्रमातृ-प्रमेय-प्रमितयस्तावदपरोक्षा इति* ॥

यदि साङ्ख्यादयः प्रत्यक्षसिद्धस्यैवात्मनोऽनुमानानि स्पष्टीकरणार्थानीति मन्येरन्, तदा न कश्चिद्विरोधः। यदि नित्यानुमेयमात्मानमिच्छेयुः, तदा विषयवदहमित्यपरोक्षावभासविरोधः। सौत्रान्तिकस्यापि यदि विषयानुमानज्ञाने साक्षाद्विषया एवावभासेरन्। प्रत्यक्षेऽप्यवभासन्ताम्, कस्तत्रापराधः ? इत्यनुमानज्ञाने विषयस्यैवावभासनादनेकान्तो हेतुः। न चेदनुमानज्ञानेऽपि बिम्बभूतविषयावभासः, प्रतिज्ञानार्थस्य बिम्बपुरस्सर-

ऋजुविवरणम्

नैकान्तिकम्। "तेष्वदृष्टत्वे सति गुणत्वादि"ति वा हेतौ दिक्कालादिगुणत्वं स्यात्, अभिमतसाध्यासिद्धिश्च, तदर्थम्—"विशेषगुणत्वादि"ति। "तदवभासत्वादि"ति हेतौ संवेदने बिम्बे चानैकान्तिकत्वम्, तद्व्यावृत्त्यर्थम्—"अतस्मिन्निति"। "अनुमानानुदयः"इत्यनेन साध्याप्रतीतौ पक्षधर्मत्वादप्रतीतिरित्युक्तम्। *ननु* अनुमानज्ञाने बिम्बभूतविषयावभासोऽस्त्येव, नचानैकान्तिकता ; तस्याप्यन्यापेक्षया प्रतिबिम्बत्वेन बिम्बपुरस्सरत्वादित्याशङ्क्य

तत्त्वदीपनम्

तदर्थमाह—*महाभूतेति* ॥ पृथिव्यादीति स्वरूपनिर्देशः। द्रव्यपदमनुवादमात्रम्। गुणत्वादित्युक्ते गन्धादिषु व्यभिचारः, तदर्थम्—*तेष्वदृष्टत्वे सतीति विशेषणम्* ॥ एतावत्युक्ते मनस्त्वादौ व्यभिचारः, तदर्थम्—*गुणत्वादिति* ॥ विशेषपदं तु दिगादिगुणत्वव्यावृत्त्यर्थम् ॥

विशेषगुणत्वं साधयति—*एकेन्द्रियग्राह्यतयेति* ॥ गुणत्वे सत्येकेन्द्रियग्राह्यो विशेषगुण इति द्रष्टव्यम्। इदमत्र विवक्षितम्—इच्छादि, पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितम्, तदसमवेतत्वे सति विशेषगुणत्वात्, यन्नैवं न तदेवम् ; यथा गन्धादि। नच हेत्वसिद्धिः ; न तावत्स्पर्शवद्विशेषगुणत्वम् ; अयावद्द्रव्याभावित्वात्, स्पर्शवद्विशेषगुणानां च यावद्द्रव्यभावित्वात् ; नापि नभोगुणता ; इच्छादेर्बाह्येन्द्रियाग्राह्यत्वात्, नच दिक्काल-मनोगुणत्वम् ; तेषां विशेषगुणविधुरत्वात्, तस्मादाश्रयान्तरानिरूपणादाश्रयस्यान्यस्यावश्याश्रयणीयत्वात्तदाश्रयत्वेनाऽत्मसिद्धिरिति ॥

एवं प्रमातृपारोक्ष्यमभिधाय सौत्रान्तिकमतमनुसृत्य प्रमेयपारोक्ष्यमाह—*तथेति* ॥ यथा प्रमातुः पारोक्ष्यम्, तथा विषया अनुमेया इति कल्पयन्तीत्यन्वयः। अनुमानमाह—*संवेदनेष्विति* ॥ घटः स्फुरतीति घटनिष्ठतयोपलभ्यमानं स्फुरणम्, करणजन्यम्, कार्यत्वात् ; संप्रतिपन्नवत्, तत्र च कारणान्तरानिरूपणादात्मसमवेतं ज्ञानं कारणतया सेत्स्यतीति नित्यानुमेयत्वं वार्तिककारीया मेनिर इति द्रष्टव्यम् ॥

एवं मतभेदमभिधाय तदुत्तरत्वेन टीकामवतारयति—*तान् प्रतीति* ॥ किमात्मन आनुमानिकत्वमात्रमुच्यते ? उत नित्यानुमेयत्वम् ? इति विकल्प्याऽऽद्यं प्रत्याह—*यदीति* ॥ स्पष्टीकरणार्थानि* ॥ विप्रतिपत्तिनिराकरणेन संभावनाबुद्धिजनकानि। द्वितीयमनूद्य दूषयति—*यदि नित्येति*॥ "बिम्बसन्निधानपुरःसरः" इत्यत्र घटसंवेदनेन तत्स्फुरणमङ्गीकृत्य, किम्—आकारार्पको विषयोऽस्तीत्येतावत्साध्यते ? आहो घटाकारसंवेदनेन विषयस्यानवभास इत्याश्रित्य ? तत्राऽऽद्ये सिद्धसाध्यत्वम्, द्वितीये किमनुमानज्ञाने व्याप्तिव्यवधानं विना प्रतिज्ञातार्थः प्रथते ? उत नेति विकल्प्याऽऽद्यं दूषयति—*सौत्रान्तिकस्यापीति* ॥ फलितमाह—*इतीति* ॥ *अनेकान्त इति* ॥ अनियत-इत्यर्थः। यद् यदाकारं ज्ञानम्, तत् तद्विषयं न भवतीति न नियमः ; अनुमाने व्यभिचारादित्यर्थः। द्वितीयं दूषयति—*न चेदिति* ॥ *अनुमानानुदय इति* ॥ प्रयोजनहीनमनुमानमिति यावत्। घटाकारज्ञानस्य घटविषयत्वाभावे

पञ्चपादिका

प्रमितयस्तावदपरोक्षाः—प्रमेयं कर्मत्वेनापरोक्षम्, प्रमातृ-प्रमिती पुनरपरोक्षे एव केवलम्, न कर्मतया ;

पञ्चपादिकाविवरणम्

त्वस्याप्रतिभासनाद् अनुमानानुदय एव स्यात्। अपरोक्षव्यवहारयोग्यविषयावभासविरुद्धं चानुमानमिति ॥

अत्र विज्ञानवादिनस्तु—विज्ञानभेदनिमित्त एव विषयस्यापरोक्षावभासः—*इत्याहुः*, तन्निराकरोति—*प्रमेयं कर्मत्वेनापरोक्षमिति* ॥ इदं पश्यामीत्यनुभवात्। नच विज्ञानाभेदादेवापरोक्ष्यमवभासते ; बहिष्ठस्यापि रजतादेरापरोक्ष्यात्, तदपि विज्ञानमिति चेत्, न ; रजतवद् बाधाभावप्रसङ्गात्। तस्मादव्यवधानेन संविदुपाधिताऽपरोक्षता विषयस्येति ॥

तत्र—"आत्मा आत्ममनःसंयोगजन्यप्रत्यक्षेणापरोक्षः" इति वार्तिककार-न्याय-वैशेषिकानुसारिणः कल्पयन्ति। प्रमितिस्त्वात्मनि संयुक्तसमवायनिमित्तज्ञानान्तरादपरोक्षेति न्याय-वैशेषिकौ। प्रमेयगता प्रमितिः संयुक्ततादात्म्याज्ज्ञानान्तरेणापरोक्षेति वार्तिककारीयाः, तान्प्रत्याह—*प्रमातृ-प्रमिती पुनरपरोक्षे एव केवलमिति* ॥

ऋजुविवरणम्

दूषणान्तरमाह—*अपरोक्षव्यवहारेति* ॥ *रजतवदिति* ॥ रजतमिदं न भवति, किन्त्वहमेवेति बहिष्ट्वबाधं वदन्ति ; स न स्यादिति भावः। कथं विषयानुभवेनान्यथासिद्धत्वम् ? न ह्यन्यविषयज्ञानेनान्यस्य सिद्धिर्भवति ; अत आत्मविषयज्ञानेनैवात्मसिद्धिः, तद्विषयौ चान्वय-व्यतिरेकावित्याशङ्क्याह—*विषयानुभवसम्बन्धादिति* ॥ "नच संयुक्त-

तत्त्वदीपनम्

प्रत्यक्षविरोधोऽपीत्याह—*अपरोक्षेति* ॥ अपरोक्षमिति व्यवहारयोग्यो यो विषयावभासः, तेन विरुद्धत्वमिति यावत्। ज्ञानपारोक्ष्याऽनुमानेऽप्यनुभवविरोध इति द्रष्टव्यम् ॥

एवं प्रमेयादीनां पारोक्ष्यं निराकृत्य, प्रमेयस्य कर्मतया प्रत्यक्षत्वम्, संविदः स्वप्रकाशत्वेन, आत्मनस्तदाश्रयत्वेनेति वक्तुं प्रथमं प्रमेयस्य संविदभिन्नतयाऽपरोक्षत्वमनूद्य दूषयति—*अत्रेति* ॥ यदपरोक्षम्, तद्विज्ञानाभिन्नम्, यथा संवित् ; अपरोक्षश्च घटादिरिति चोद्यार्थः। कर्मतयाऽऽपरोक्ष्ये हेतुमाह—*इदमिति* ॥ द्वितीयया दर्शनक्रियाकर्मत्वेन विषयस्फुरणात्तद्विरुद्धमभेदानुमानमित्यर्थः। किंच रजतादेर्बहिष्ट्वं ज्ञानाद्भिन्नम् ? उताभिन्नम् ? आद्ये तत्र व्यभिचार इत्याह—*नचेति* ॥ द्वितीयमनुवदति—*तदपीति* ॥ तस्य बाध्यत्वान्न ज्ञानाभेदो युक्त इत्याह—*न रजतवदिति* ॥ कथं तर्हि विषयापरोक्ष्यमिति ? अत्राह—*तस्मादिति* ॥ *संविदुपाधित्वम्*=संविद्विशेषणत्वम्। एतावत्युक्ते चाक्षुषज्ञानमिति ज्ञानविशेषणचक्षुषोऽप्यापरोक्ष्यं स्यात्, तदर्थमाह—*अव्यवधानेनेति* ॥ चक्षुषोत्पन्नं चाक्षुषमित्युत्पत्तिव्यवधानेन चक्षुषो ज्ञानविशेषणत्वाद् व्यावृत्तिरित्यर्थः। न चानुमेयस्यापि संविद्विशेषणत्वेनाऽऽपरोक्ष्यप्रसङ्गः ; संविच्छब्देन इन्द्रियार्थसंप्रयोगजज्ञानस्य विवक्षितत्वादित्यर्थः ॥

विप्रतिपत्त्यन्तरमुत्थापयति—*तत्रेति* ॥ मनसा संयुक्त आत्मा, तस्मिन् समवायः, संयुक्तसमवायः, स निमित्तं यस्य तत्संयुक्तसमवायनिमित्तम्, तच्च ज्ञानं चेति तथोक्तम् ; तस्मादित्यर्थः। पक्षान्तरमाह—*प्रमेयेति* ॥ चक्षुषा संयुक्तार्थेन तादात्म्यसंबन्धात् प्रमितिविषयं ज्ञानान्तरमुपजायते, तेनाऽऽपरोक्ष्यं प्रमितेरित्यर्थः। तदुत्तरत्वेन टीकामवतारयति—*तान् प्रतीति* ॥

प्रमातृ-प्रमिती न कर्मतयाऽपरोक्षे ; प्रमाणाभावादिति संबन्धः। कर्मत्वाभावे तयोः कथमापरोक्ष्यम् ? इति चेत्, तत्र वक्तव्यम्—किं कर्मत्वाभावेन परोक्षत्वं सिषाधयिषितम् ? उताऽऽपरोक्ष्येण कर्मत्वम् ? इति। तत्राद्यमनुभवविरोधेन दूषयति—*एवेति* ॥ नापि द्वितीयः ; अननुभवत्वानात्मत्वप्रसङ्गादित्याह—*केवलमिति* ॥

वार्तिकम्

तेन तदपरोक्षत्वासिद्धेः। नच—विषयवत् तत्सम्बन्धित्वादेवापरोक्षत्वमिति—वाच्यम् ; इन्द्रियादिषु

पञ्चपादिकाविवरणम्

न तावदात्मविषयं प्रत्यक्षं ज्ञानान्तरं मनोजन्यमिति प्रमाणमस्ति ; सति मनस्यात्मदर्शनादसति सुषुप्ते चादर्शनादन्वय-व्यतिरेकौ प्रमाणमिति चेत्, न ; विषयानुभवेनैवान्यथासिद्धत्वात्। विषयानुभवसम्बन्धादेव विषयवदात्मसिद्धावात्मनि ज्ञानान्तरं परिकल्प्य मनसोऽन्वय-व्यतिरेककल्पनायोगात्। तस्माद् विषयत्वमन्तरेणात्माऽपरोक्ष एव ॥

नच संयुक्तसमवायादात्मनि विषये वानुभवस्य ज्ञानान्तरविषयतयाऽपरोक्षता ; प्रत्यक्षस्य वर्तमानविषयापेक्षत्वेन युगपत् फलद्वयावस्थानप्रसङ्गात्, संयुक्तसम्बन्धादनुभवावभासे तद्गतपरिमाण-रसादीनां तेनैव ज्ञानेनापरोक्षताप्रसङ्गात्। अनुभवस्य च स्वसत्तायां प्रकाशव्यतिरेकादर्शनाच्च ज्ञानान्तरागम्यतासिद्धिः। नचात्म-

ऋजुविवरणम्

समवायादि''त्यत्र विषयगतेऽनुभवे संयुक्ततादात्म्यमिति ज्ञेयम् ; अनुवादे तथोक्तत्वात्। *ननु* स्थित्यवस्थस्य फलद्वयस्य विरोधः ; अत्र तु विषयानुभवस्य विनश्यदवस्थत्वात् तद्ग्राहकस्य स्थित्यवस्थत्वेनावभासकत्वं संभवतीत्याशङ्क्य दूषणान्तरमाह—*संयुक्तसम्बन्धादिति*। आदिशब्देनात्मगतगुणादीनां ग्रहणम्। *ननु*—कार्यात्कारणकल्पना, ज्ञाने च प्रतीतिलक्षणकार्यदर्शनात्संयुक्तसम्बन्धादवभासः कल्प्यते, रसादौ तु कार्यादर्शनादस्य सम्बन्धस्यासामर्थ्यं निश्चीयत इत्याशङ्क्य प्रतीतेरन्यथासिद्धत्वमाह—*अनुभवस्य चेति* ॥ प्राकट्यं विषयगतं स्वप्रकाशमित्यपि वदन्ति, तन्मते विषयानुभवजन्मैव न संभवतीति दर्शयति—*नचात्मव्यापारादिति* ॥ *ननु*—फलस्य क्रियैकाश्रयत्वमकर्मकव्यापारजन्यत्वे, सकर्मके तु कर्मण्येव फलम् ; कर्मविकारहेतुत्वात् क्रियाया इत्याशङ्क्याह—

तत्त्वदीपनम्

कर्मतया आत्मन आपरोक्ष्याभावे हेतुमाह—*न तावदिति* ॥ प्रमाणाभावोऽसिद्ध इति शङ्कते—*सति मनसीति*॥ व्यापृते मनस्यात्मदृष्टेरितरत्रादृष्टेर्मानसत्वमात्मन इत्यर्थः। आत्मव्यवहारहेतुविषयानुभवविषयतयाऽन्यथासिद्धिमाह—*न ; विषयेति* ॥ आत्माऽनुभवविषयत्वमेव तयोः किं न स्यात्? इत्याह—*विषयेति* ॥ विषयज्ञानाश्रयत्वेनाऽऽत्मनि व्यवहारसंभवे ज्ञानान्तरात्तत्सिद्धिकल्पनायां गौरवं स्यादित्यर्थः ॥

कर्मतया प्रमितिरपरोक्षेति यत्तूक्तम्, तन्निरस्यति—*नचेति* ॥ आत्मसमवेतानुभवस्य संयुक्तसमवायादपरोक्षता, विषयसमवेतानुभवस्य संयुक्ततादात्म्यादिति नच वक्तव्यमित्यन्वयः। ग्राह्यं ज्ञानं येन मनःसंयोगेनाजनि, तेनैव तद्विज्ञानान्तरं जायते? उत संयोगान्तरेण? नाद्यः ; असमवायिकारणभेदस्य ज्ञानभेद-तत्क्रमप्रयोजकत्वात्। द्वितीयेऽपि किं ग्राहकज्ञानसमये ग्राह्यज्ञानमस्ति? उत न? न चेत्, तत्राह—*प्रत्यक्षस्येति* ॥ प्रत्यक्षस्य वर्तमानग्राहित्वनियमात् पूर्वज्ञानस्य च तदा नष्टत्वान्न प्रत्यक्षत्वमित्यर्थः ॥

आद्ये दूषणमाह—*युगपदिति* ॥ उत्तरज्ञानसमये पूर्वज्ञानास्तित्वाङ्गीकारे फलद्वयस्य युगपदवस्थानमापतितम्, नच तत् संभवति। *तथाहि*—पटज्ञानसमये मनसि क्रिया, ततो विभागः, ततः पूर्वसंयोगविनाशः, तत उत्तरसंयोगाद् ज्ञानजनिरित्यनेकक्षणविलम्बेनोत्पद्यमानज्ञानान्तरसमसमयमाशुतरविनाशिनः पूर्वज्ञानस्यावस्थानमसमञ्जसम्। नच—विनश्यदविनश्यतोस्सहावस्थानमिष्यत इति—शङ्क्यम् ; पूर्वोत्तरवेदनयोर्निवर्त्य-निवर्तकभावेन विरोधाद् भास्य-भासकताऽनुपपत्तेरित्यर्थः ॥

तादात्म्यसंबन्धाद् विषयगतप्राकट्यं प्रत्यक्षमित्यत्र दूषणान्तरमाह—*संयुक्तेति* ॥ *संयुक्तसंबन्धात्= संयुक्ततादात्म्यसंबन्धादित्यर्थः। अथवा—संयुक्तसमवायसंबन्धात् संयुक्ततादात्म्यसंबन्धाद्वाऽनुभवावभास आत्मगतस्य परिमाणस्य विषयगतरसादेश्च तेन ज्ञानेनापरोक्षत्वं स्यादित्यर्थः। परिमाणादीनामयोग्यत्वादनुभवग्राहकेणाग्रहणमित्याशङ्क्यायोग्यत्वमत्रापि तुल्यमित्याह—*अनुभवस्येति* ॥ अनुभवः, न ज्ञानान्तरगम्यः, स्वसत्तायां प्रकाशव्यतिरेकविधुरत्वात्, न यदेवम्, न तदेवम्, यथा घट इत्यर्थः। आद्येन चकारेण हेत्वसिद्धिमुद्धरति। स्वसत्तायां

पञ्चपादिकाविवरणम्

व्यापाराद् विषयानुभवजन्म सम्भवति ; सर्वगतस्य कुठारादिवत् परिस्पन्दाभावात्, परिणामफलस्य च घटादिवत् क्रियाश्रयत्वात्, संविदाश्रयत्वे विषयस्यैव चेतनत्वप्रसङ्गात्। नच तज्जननव्यापारवत्त्वादात्मनश्चेतनता ; मनआदीनामपि प्रसङ्गात्, विषयाश्रयत्वे चानुभवस्य 'मयेदं विदितमि'ति सम्बन्धावभासः स्वात्मनि ज्ञानक्रियाऽनुमानं च न स्यात् ; अनुभवस्यात्मसम्बन्धाभावात्। तस्माद् द्वयोर्न कर्मतयाऽपरोक्षता ॥

ननु उभयोः स्वयम्प्रकाशत्वकल्पना न युक्ता ; अन्यतरस्य स्वयम्प्रकाशत्व आत्मैव स्वयंप्रकाश इति चेत्,

ऋजुविवरणम्

संविदाश्रयत्वे चेति ॥ कथं मनआदीनां चेतनत्वम्? अनुभवजननव्यापारे कर्तृत्वप्रयुक्तत्वाच्चेतनत्वस्येत्याशङ्क्य दूषणान्तरमाह—*विषयाश्रयत्वे चेति* ॥ "स्वात्मनि ज्ञानक्रियानुमानमि"त्यनेनात्मनोऽपि चेतनत्वं न संभवतीत्युक्तम्। *ननु*—'मयेदं विदितमि'ति प्रतीत्या सम्बन्धो निश्चीयते, स च क्रियापूर्वक इति तदनुमानमित्याशङ्क्याह—*मयेदं विदितमिति* ॥ सम्बन्धितया ज्ञातं फलं सम्बन्धिकर्तृव्यापारानुमापकम्, अत्र तु सम्बन्धाभावात्तदवभासाभावाद् न कर्तृविशेषगतक्रियानुमानमिति भावः ; *ननु*—प्रमातृव्यापारः परिस्पन्दपरिणामात्मको

तत्त्वदीपनम्

प्रकाशव्यतिरिक्तत्वे जिज्ञासायां सन्देहादि स्यादित्यर्थः। द्वितीयेन चकारेण सुखादिषु साधनाव्यावृत्तिशङ्कां निरस्यति। सुखादीनामपि ज्ञानात्मकत्वेन पक्षान्तर्भावादित्यर्थः ॥

विषयनिष्ठं प्राकट्यं स्वप्रकाशमिति मते तस्य जन्मैव दुर्निरूपमित्याह—*न चात्मेति* ॥ किं परिस्पन्दलक्षणो व्यापारः? उत परिणामलक्षणः? इति विकल्प्याऽऽद्यं प्रत्याह—*सर्वगतस्येति* ॥ द्वितीयं दूषयति—*परिणामेति* ॥ मृत्परिणतिफलस्य घटस्य मृन्निष्ठत्ववदनुभवस्यापि परिणामिसमानाधिकरणत्वमाश्रयणीयमित्यर्थः। अकर्मकपरिणामफलस्य परिणामिसमानाधिकरणत्वेऽपि सकर्मकक्रियाफलस्य विषयनिष्ठत्वम् ; क्रियायाः कर्मण्यतिशयजननस्वाभाव्यादित्याशङ्क्य, किं संविदाश्रयत्वं चेतनत्वप्रयोजकम्? उत तज्जननव्यापारवत्त्वम्? आद्ये विषयस्यैव चेतनतोत्पत्तिरित्याह—*संविदाश्रयत्व इति* ॥ द्वितीयेऽपि किं संविज्जननव्यापारवत्त्वमात्रं विवक्षितम्? उत संविज्जनकज्ञानव्यापारवत्त्वम्? इति विकल्प्याऽऽद्यं दूषयति—*नचेति* ॥ द्वितीयं प्रत्याह—*विषयेति* ॥ 'मया गतो ग्रामः' इत्यत्र स्वगतगमिक्रियाकर्मत्वं ग्रामस्योपलभ्यम्, तद्वद् 'मयेदं विदितमि'त्यत्रापि स्वगतविदिक्रियाकर्मत्वं विषयस्यानुभूयते, तन्न स्याद्विषयनिष्ठत्व इत्यर्थः। आत्मसमवेतज्ञानक्रियाजन्यानुभवव्याप्तत्वाद् 'घटो मया विदितः' इत्यनुभवो विरुद्ध इत्याशङ्क्य, परिणामक्रिया-तत्फलयोरैकाधिकरण्यनियमान्न ज्ञानानुमितिरित्याह—*स्वात्मनीति* ॥ उपसंहरति—*तस्मादिति* ॥

संविदात्मनोः कर्मत्वाभावे किमुभयोरपि स्वप्रकाशत्वेनापरोक्षत्वम्? उतान्यतरस्य? इति विकल्प्याऽऽद्यं दूषयति—*नन्विति* ॥ गौरवप्रसङ्गादित्यर्थः। द्वितीयेऽपि किमात्मनः स्वप्रकाशत्वम्? उत संविद इति? आद्यमङ्गीकरोति—*अन्यतरस्येति* ॥ द्वितीयस्त्वनुपपन्न इत्याह—*एवंति* ॥ आत्मस्वप्रकाशमात्रेणेतरत्र व्यवहारसंभवे तत्समवेतानन्तसंवित्स्वप्रकाशत्वकल्पने गौरवमापतेदिति भावः। अनुभवस्य जडत्वेऽननुभवत्वप्रसङ्गान्मैवमित्याह—*नेत्याहेति* ॥ प्रमितिः, स्वप्रकाशा, अनुभवत्वात्, व्यतिरेकेण घटवदित्यर्थः। अस्वप्रकाशत्वेऽप्यनुभवत्वं किं न स्यात्? इत्याशङ्क्य, फलत्वभङ्गो बाधक इत्याशयेनाह—*प्रमाणफलमिति* ॥ नच कल्पनागौरवम्,

वार्तिकम्

व्यभिचारात्। *एतेन*—तज्जनकत्वमपि—*प्रत्याख्यातम्*। अपि चान्तःकरणाद्यध्यासात्पूर्वं करणाभावेन ज्ञानाभावान्न तदाश्रयत्वासंभवेनापरोक्षत्वमात्मनस्ततोऽपि वक्तुं शक्यते। अस्तु तर्हि स्वप्रकाशज्ञानाभेदादपरोक्षत्वमात्मनः, अत एव ज्ञानस्य नित्यत्वमपीति चेत्, न ; तयोर्धर्म-धर्मिभावेन भेदस्य

पञ्चपादिका

प्रमितिरनुभवः स्वयंप्रकाशः प्रमाणफलम्, तद्बलेनेतरत् प्रकाशते, प्रमाणं तु प्रमातृव्यापारः फललिङ्गो नित्यानुमेयः। तत्र—'अहमिदं जानामी'ति प्रमातुर्ज्ञानव्यापारः कर्मविषयः, नात्मविषयः, आत्मा तु विषयानुभवादेव निमित्तात्—'अहमि'ति फले विषये चानुसन्धीयते ॥

पञ्चपादिकाविवरणम्

नेत्याह—*प्रमितिरनुभव इति* ॥ अथवा—हानोपादानोपेक्षाः प्रमाणफलमिति केचित्, तत्राह—*प्रमितिरनुभव इति* ॥ नहि हानादीनामितरेतरव्यभिचारिणां मानफलता युक्ताऽव्यभिचारिण्यनुभवे सतीत्यर्थः ॥

ननु संवेदनमेवार्थसारूप्येण प्रमाणम्, प्रमीयतेऽनेनेति व्युत्पत्तेः, अर्थोपलब्ध्यात्मना तदेव प्रमाणफलमिति सुगतमतानुसारिणः, तद् व्यावर्तयति—*प्रमाणं त्विति* ॥ प्रमाणं तु प्रमातृव्यापारश्चतुष्टयसन्निकर्ष एवेति प्राभाकराः। *ननु* 'अहमिदं जानामी'त्यात्मानात्मविषयावनुभवौ भेदेन प्रत्यक्षसिद्धाविति, नेत्याह—*तत्राहमिदं जानामीति* ॥

ऋजुविवरणम्

निरस्तः, कथं टीकाकृता—"प्रमाणं तु प्रमातृव्यापारः" इत्युक्तम्? इत्याशङ्क्य व्याचष्टे—*प्रमातृव्यापार इति* ॥ आत्मनो ज्ञानविषयत्वं नास्तीति पूर्वमुक्तम्, तत्र—'अहमिदमि'त्यनेनापि तदेवोच्यत इति पौनरुक्त्यमित्याशङ्क्य, विषयाधिक्यं दर्शयति—*ननु अहमिदमिति* ॥ *ननु*—पूर्वमात्मविषयज्ञानान्तरसद्भावे प्रमाणं नास्तीत्युक्तम्,

तत्त्वदीपनम्

प्रामाणिकगौरवस्यादोषत्वादित्यर्थः। आत्मा, स्वप्रकाशः, आत्मत्वात्; व्यतिरेकेण घटवत्, इत्यनुमानात् सिद्धं तत्स्वप्रकाशत्वमपीत्याशङ्क्याह—*तद्बलेनेति* ॥ आत्मनोऽस्वप्रकाशत्वेऽपि नानात्मत्वम्; संविदाश्रयत्वेनाऽऽत्मत्वोपपत्तेः, इतरस्य तु वेद्यत्वे घटादिवदनुभवत्वं दुर्वारमित्यर्थः ॥

संविदः फलत्वमसिद्धमित्याशङ्क्य, तत्परिहारत्वेनाऽऽवृत्त्या प्रमितिरनुभव इत्येतद् व्याकरोति—*अथवेति* ॥ इत्थं वा योजनेति शेषः। कथमसिद्धिरिति शङ्कायामाह—*हानेति* ॥ चतुष्टयसंनिकर्षानन्तरं हानाद्युपलम्भात्तस्य फलत्वमित्यर्थः। प्रमितिः प्रमाणफलम्, न हानादिः। तत्र हेतुमाह—*अनुभवेति* ॥ चतुष्टयसंनिकर्षेऽप्यर्थानुभवाभावे तद्विषयहानाद्ययोगादनुभवः फलमित्यर्थः। हानाद्यतिरिक्तफलकल्पनायामनवस्थेत्याशङ्क्याह—*स्वयंप्रकाश इति* ॥ संनिकर्षे सत्यर्थानुभवाभावेन हानाद्यभावादर्शनादनुभवस्याप्रयोजकत्वमित्याशङ्क्याह—*न हीति* ॥

संवेदनस्यैव प्रमाणत्वात्प्रमाणफलं तदित्युक्तमयुक्तमिति चोदयति—*नन्विति* ॥ कथं तर्हि प्रमाण-फलविभागः? इत्याशङ्क्याह—*संवेदनमिति* ॥ अर्थाकारविशिष्टतया संवेदनस्य प्रमाणत्वम्, तत्स्फुरणरूपेण फलत्वमित्यर्थः। लोके करण-फलभावस्यात्यन्तभेदव्याप्तत्वादत्रापि स आश्रयणीयः; इतरथा करण-फलभावो न स्यात्, ततश्च संविदतिरिक्तं करणमास्थेयमित्यभिप्रेत्याह—*तद् व्यावर्तयतीति* ॥ प्रमातृव्यापारः किं परिस्पन्दः? उत परिणामः? उभयथाऽप्यनुपपत्तिः, सर्वगतत्वान्निरवयवत्वाच्चेत्याशङ्क्याह—*प्रमातृव्यापार इति* ॥ अर्थेन्द्रियात्ममनःसंयोगश्चतुष्टयसन्निकर्ष इत्यर्थः। चतुष्टयसन्निकर्षः किं प्रत्यक्षः? उतानुमेयः? नाद्यः; अननुभवादेव, नेतरः; धूमाग्न्योः क्वचित्प्रत्यक्षतायां व्याप्यदर्शनेन व्यापकज्ञानमुदेति, नच तथाऽत्र सन्निकर्षस्य प्रत्यक्षतेति वैषम्यादित्याशङ्कायामुक्तम्—*फललिङ्गो नित्यानुमेय इति* ॥ रूपाद्युपलब्धिकरणत्वेन नानेन्द्रियकल्पनावदनुभवकरणत्वेन नित्यपरोक्षसंनिकर्षकल्पनं घटत इत्यर्थः ॥

प्रमातृ-प्रमित्योः कर्मतयाऽपरोक्षत्वाभावेऽनुभवविरोधः स्यादिति चोदयति—*नन्विति* ॥ 'अहमि'त्यात्मविषयोऽनुभवः, 'इदमि'त्यनात्मविषयः, 'जानामी'ति ज्ञानानुभव इति विभागः। अनात्मकर्मकानुभवाश्रयत्वेनात्म-

पञ्चपादिका

ननु —नायं विषयानुभवनिमित्तोऽहमुल्लेखः, किं त्वन्य एवात्ममात्रविषयः—'अहमि'ति प्रत्ययः। तस्मिंश्च द्रव्यरूपत्वेनात्मनः प्रमेयत्वम्, ज्ञातृत्वेन प्रमातृत्वमिति, प्रमातृ-प्रमेयनिर्भासरूपत्वादहंप्रत्ययस्य ग्राह्य-ग्राहकरूप आत्मा। तस्मादिदमनिदंरूपः; प्रमेयांशस्येदंरूपत्वात्, अनिदंरूपत्वात् प्रमात्रंशस्य, *नचैतद्युक्तम्*; अनंशत्वात्, अपरिणामित्वाच्चात्मनः, प्रमेयस्य चेदंरूपतया पराग्रूपत्वादनात्मत्वात्।

पञ्चपादिकाविवरणम्

ननु यदवभासते, तज्ज्ञानकर्मतयैवावभासत इति विषयेषु नियमादात्माऽप्यवभासते चेत्कर्मतयैव, नाश्रयमात्रतयेति चोदयति—*ननु नायं विषयानुभवनिमित्त इति*॥ *ननु* प्रत्यक्षज्ञानस्य विषयजन्यत्वात्कारकताऽपि विषयस्य वक्तव्या, तत्र कथमेकस्यां क्रियायामेकस्यैव कर्तृत्वेन कर्मत्वेन च विरुद्धरूपद्वयान्वयः? कर्तुश्च गुणभावात्, कर्मणश्च प्राधान्यात्, एकस्य रूपद्वये वैरूप्यप्रसङ्गाच्चेति, तत्राह—*तस्मिंश्च द्रव्यरूपत्वेनेति*॥ तत्र सामान्यांशस्यात्मानात्मसाधारण्यादात्मत्वायोगाद् विशेषांशस्य निरंशत्वान्न कर्तृ-कर्मव्यवस्थेति परिहरति—*नचैतद्युक्तमिति*॥ निरवयवस्य युगपत्कार्यद्वयपरिणामायोगाच्चेत्याह—*अपरिणामित्वादिति*॥

ऋजुविवरणम्

विषयानुभवेऽपि न कर्मतयाऽवभास इत्युक्तम्, तत् कथं चोद्यमुदियात्? इत्याशङ्क्यावतारयति—*ननु यदवभासत इति*॥ "अनंशत्वादि"ति कथमुक्तम्? सामान्य-विशेषरूपांशद्वयभावादित्याशङ्क्य तात्पर्यमाह—*सामान्यांशस्येति*॥ 'अपरिणामित्वादि'ति हेतुरसंगतः; न ह्यनेन पूर्वचोद्यनिराकरणं क्रियते; असिद्धश्चेत्याशङ्क्य हेतुसाधनपूर्वकं तात्पर्यमाह—*निरवयवस्येति*॥ "प्रमेयस्ये"त्यनेन प्रमेयस्यानात्मत्वप्रतिपादनमसङ्गतम्; प्रकृतानुपयोगात्, नचात्मगत-

तत्त्वदीपनम्

व्यवहारसंभवे पृथग् ज्ञानकल्पना न युक्तेत्याह—*नेत्याहेति*॥ प्रतीचः कर्मत्वे मानाभावेन दूषिते कथं चोद्यसमुत्थितिः? इत्याशङ्क्य मानविरहोऽसिद्ध इत्याह—*नन्विति*॥ आत्मा, संवित्कर्मतया भासते, संविदात्मत्वे सत्यपरोक्षत्वात्; घटवदित्यर्थः। संवेदनाश्रयत्वमुपाधिरित्याशङ्क्याह—*नाश्रयमात्रतयेति*॥ विषयव्याप्तिमते संविदाश्रयत्वस्याकर्मत्वाव्याप्तेर्न व्यतिरेकव्याप्तिः। समव्याप्तौ तु तव संविदि व्याप्त्यभाव इत्यर्थः॥

कर्तृ-कर्मविरोधनिरासार्थमभेदमभ्यधात्, तन्न संभवति; कर्मकारकत्वाभावेऽप्यनुमेयस्य विषयतादृष्टेर्न कर्तृ-कर्मविरोध इत्याशङ्क्याह—*नन्विति*॥ अनुमितेः कर्मकारकजन्यत्वाभावाद्विषयस्य कर्मत्वं माऽस्तु, प्रत्यक्षस्य तु कर्मजन्यत्वात्तद्विषयस्य कर्मकारकत्वं वक्तव्यमित्यर्थः। ततः किमिति? तत्राह—*तत्र कथमिति*॥ कर्तृ-कर्मत्वयोश्चैत्र-ग्रामनिष्ठत्वेन दृष्टेर्नैकत्र तयोः संभव इत्यर्थः। विधान्तरेण वैरूप्यमाह—*कर्तुश्चेति*॥ अहंप्रत्ययस्यापि भिन्नकर्म-कर्तृत्वे घटादिप्रत्ययतुल्यत्वमित्याशङ्क्य, द्रव्यबोधस्वरूपस्याऽऽत्मनो द्रव्यात्मकबोधाकारप्राधान्येन कर्तृत्वम्, बोधात्मकद्रव्याकारप्राधान्येन कर्मत्वम्, अतो नोक्तदोष इत्यभिप्रायेणोक्तम्—*प्रमातृ-प्रमेयनिर्भासरूपत्वादिति*॥ अंशद्वयस्योक्तत्वादनंशत्वासिद्धिमाशङ्क्याह—*तत्र सामान्येति*॥ *सामान्यांशस्य=द्रव्यांशस्येत्यर्थः। *विशेषांशस्य=बोधांशस्येत्यर्थः॥

अंशभेदेन कर्तृ-कर्मव्यवस्थाऽभावे—'अपरिणामित्वादि'त्यनेन हेत्वन्तरमुपन्यस्यत इति प्रतिभाति, तदनुपपन्नम्; अपरिणामित्वस्य तत्साधकत्वात्, तदसिद्धेश्चेत्याशङ्क्याह—*निरवयवस्येति*॥ आत्माऽनात्मविषयज्ञानद्वयपरिणामस्य

वार्तिकम्

लोकप्रसिद्धत्वाद्भेदानुपपत्तेः, औलूक्यस्मृतिविरोधाच्च। तेन हि गुणमध्ये ज्ञानस्यान्तर्भावः कृतः, द्रव्य-

पञ्चपादिका

तस्मान्नीलादिज्ञानफलमनुभवः स्वयंप्रकाशमानो ग्राह्यमिदंतया, ग्राहकं चानिदन्तयाऽवभासयति, ग्रहणं चानुमापयतीति युक्तम्, अतो नेदमंशोऽहंकारो युज्यते, *उच्यते*—तत्रेदं भवान् प्रष्टव्यः—किमात्मा चैतन्यप्रकाशोऽनुभवो जडप्रकाशः ? उत सोऽपि चैतन्यप्रकाशः ? अथवा स एव चैतन्यप्रकाशः,

पञ्चपादिकाविवरणम्

किञ्च ग्राहकरूपस्यापि विषयतया सिद्धिरस्ति वा ? नवा ? न चेत्, स्वयंप्रकाशत्व-संविदाश्रयत्वसिद्ध्यो-रनभ्युपगमादसिद्धिप्रसङ्गः, कर्मतया सिद्धिश्चेत्, तत्राह—*प्रमेयस्य चेति* ॥ तस्मात्संविद्बलादेव त्रितय-सिद्धौ संविदाश्रयपक्षपातितयाऽहमः सिद्धेर्नेदमंशोऽहङ्कार इत्युपसंहरति—*तस्मान्नीलादिज्ञानफलमिति* ॥ अहङ्कारस्यात्मव्यतिरिक्तत्वं साधयितुमात्मनः स्वयंप्रकाशत्वसाधनाय विकल्पयति—*तत्रेदं भवानिति* ॥ *उत सोऽपि* अनुभवोऽपीत्यर्थः । तत्रात्मा चित्स्वभावः, अनुभवो जडप्रकाश इति पक्षो नोपपद्यत इत्याह—

ऋजुविवरणम्

द्रव्यरूपविषयत्वं ग्रन्थस्य ; तस्यात्मत्वस्य पूर्वं निरस्तत्वेन पौनरुक्त्यप्रसङ्गादित्याशङ्क्य प्रकृतनिराकरणे हेत्वन्तर-मनेन प्रदर्श्यते तन्मताङ्गीकारेणैवेत्याह—*किञ्च ग्राहकरूपस्येति* ॥ ''तस्मादि''त्युपसंहारो व्यधिकरण इव लक्ष्यते ; नहि नीलानुभवस्येदन्तया विषयग्राहकत्वमनिदन्तयाऽऽत्मग्राहकत्वं ग्रहणानुमापकत्वं चाहंकारस्यानिदमंशत्वसाधक-मित्याशङ्क्याभिप्रायमाह—*तस्मात्संविद्बलादिति*॥ ''आश्रयपक्षपातितये''ति व्यधिकरणत्वपरिहारः । ''अहङ्कारस्याऽऽ-त्माव्यतिरेकः''इत्याक्षेपे तु कृते कस्य स्वयंप्रकाशत्वमिति विकल्पोऽसंगतः, निष्प्रयोजनश्चेत्याशङ्क्याभिप्रायमाह—*अहंकारस्येति* ॥ ''न तावत्प्रथमः कल्पः'' इत्युपक्रम्यानुभवस्य जडत्वनिराकरणमसमञ्जसम् ; तस्य प्रथमपक्षत्वा-भावादित्याशङ्क्य विकल्पस्कन्धप्रदर्शनेनावतारयति—*तत्रात्मा चित्स्वभाव इति* ॥ ''जडरूपे प्रमाणफले''इत्यनेन

तत्त्वदीपनम्

निरवयवे युगपदसंभवादित्यर्थः । ''प्रमेयस्य चे''त्यत्र घटादेरनात्मत्वमुच्यते ? उत द्रव्यांशस्य ? आद्ये प्रकृतानुपयोगिता, द्वितीये तु पौनरुक्त्यमित्याशङ्क्याह—*किंचेति* ॥ न केवलं द्रव्यांशस्यात्मत्वम्, किं तु बोधांशस्यापीत्येतत् ''किंचे''त्यनेनोच्यते । किं ग्राहकांशः सुषुप्तकल्पः ? उत तद्व्यावृत्तः ? आद्ये तद्व्यवहारानुपपत्तिरित्यभिसन्धाय, द्वितीयमपि विकल्पं दूषयति—*ग्राहकेति* ॥

अनुभवांशे स्वयंप्रकाशत्वाद्यभ्युपगमेऽप्यहंकारस्य ग्राह्यत्वादिदमंशत्वम्, ततो ''नेदमंशः'' इति ग्रन्थानुपपत्ति-माशङ्क्य, ग्राह्यत्वासिद्धिमाह—*तस्मादिति* ॥ 'अहं जानामी'ति संविदाश्रयत्वेनाहंकारप्रतिपत्तेस्ततस्तस्याऽऽ-त्मत्वम्, तत इदमंशाभिधानमयुक्तमित्यर्थः । ''नीलादिज्ञानमि''त्यत्र ज्ञायतेऽनेनेति चतुष्टयसंनिकर्षो विवक्ष्यते, ग्रहणं चेत्यत्रापि करणव्युत्पत्त्या सन्निकर्षो विवक्षित इत्यर्थः । अहंकारस्याऽऽत्मत्वेऽभिहितेऽनात्मत्वं सिद्धान्तिना साध-नीयम्, किं स्वप्रकाशत्वसाधनेन ? इत्याशङ्क्याह—*अहंकारस्येति* ॥ अहंकारः, आत्मत्वानाधारः, अस्वप्रकाश-त्वात् ; घटवत् । नच—अहंकारस्यास्वप्रकाशत्वेऽप्यात्मत्वं किं न स्यादिति—शङ्क्यम् ; आत्मनः स्वप्रकाशत्व-स्वाभाव्यादहंकारस्यात्मत्वे स्वप्रकाशत्वानुपपत्तेः । तस्मात् स्वप्रकाशत्वसाधनमुचितमित्यर्थः ॥

''उत सोऽपी''त्यत्र तच्छब्देन जडप्रकाशस्यानन्तरं निर्दिष्टत्वात्तद्ग्रहणशङ्कायामयोग्यत्वात्तद्ग्रहणमित्याह—*उत सोऽपीति* ॥ अनुभवस्य स्वप्रकाशताया अभिहितत्वादात्मनश्च ग्राहकतया सिद्धसाधनात् कथं विकल्पावसर इति चेत्, अत्र ब्रूमः—यद्यप्येवं विभागोऽभ्यधायि ; तथाऽपि युक्तायुक्तत्वनिरूपणार्थं विमर्शसंभव इत्यर्थः । ''न तावत्प्रथमः कल्पः'' इत्यत्राऽऽत्मनश्चित्प्रकाशत्वानुपपत्तिं प्रतिज्ञायानुभवस्य जडत्वं निराक्रियते, तत्र च वैयधिकरण्यं स्यादित्या-शङ्क्यानुभवो जडप्रकाश इति न मतान्तरम्, किंतु पूर्वकल्पान्तर्भूतमिति दर्शयति—*तत्रात्मेति* ॥

वार्तिकम्

मध्ये चात्मन इति । *एतेन*—सत्यं ज्ञानमनन्तं ब्रह्मे''त्यादावात्मनि ज्ञानपदप्रयोगोऽपि—*व्याख्यातः* ;

पञ्चपादिका

आत्मा जडस्वरूपः ? इति । तत्र न तावत्प्रथमः कल्पः ; जडस्वरूपे प्रमाणफले विश्वस्यानवभास-

पञ्चपादिकाविवरणम्

तत्र न तावदिति ॥ *ननु* अप्रकाशमानमेव प्रमाणफलं चक्षुरादिवद् विषयमवभासयेदिति कुतो विश्वस्यानवभासः ? *न* ; विषयप्रकाशजननेन चक्षुषः प्रकाशकत्वात्संविद्वैलक्षण्यात्, संवेदनं तु स्वयंप्रकाश एव, न प्रकाशान्तरहेतुः ; अतश्चक्षुरादिवैलक्षण्यात्प्रदीपवदवभासमान एवानुभवोऽर्थं प्रकाशयति । न च प्रदीपालोकस्यार्थानुभवजननेनैव चक्षुरादिवदर्थस्य प्रकाशकता, किन्तु पृथगेव । *तथाहि*—ज्ञानप्रकाश्यत्वादज्ञानविरोधिनोऽन्यदेवालोकप्रकाश्यत्वं तमोविरोधितया प्रसिद्धं तदव्यवधानेनालोकेन क्रियते, न तदुभयं करोति चक्षुः ; अज्ञानत्वादनालोकत्वाच्च । तस्मादनुभवः सजातीयप्रकाशान्तरनिरपेक्षः

ऋजुविवरणम्

किं जडस्यावभासकत्वं निषिध्यते ? अवभासकत्वे वा चिद्रूपत्वं साध्यते ? उभयत्राप्यनैकान्तिकत्वं दृष्टान्ताभावश्च । नचात्र साध्यान्तरं हेत्वन्तरं वा प्रतीयते, नापि बाधकमात्रप्रदर्शनपरमिति चोदयति—*ननु अप्रकाशमानमेवेति* ॥ प्रागुक्तदोषपरिहारायोभयमपि विवक्षितमिति दर्शयितुं प्रयोजकविवेकं करोति—*न ; विषयप्रकाशेति* ॥ अनुमानं वा—अयं प्रयोगः—प्रमाणफलं धर्मि, अप्रकाशमानमेव विषयमवभासयेदिति साध्यो धर्मः, प्रकाशत्वात् ; चक्षुरादिवत् । "न विषयप्रकाशजननेने"ति सोपाधिकत्वं हेतोरुक्तम् । *ननु* उपाधिः साध्यसमव्याप्तिः साधनाव्यापकः ; अत्र तु साधनाव्यापकत्वं नास्ति ; अनेनैव हेतुना प्रकाशान्तरस्यानुमातुं शक्यत्वादित्याशङ्क्याभिप्रायमाह—*संवेदनन्त्विति* ॥ अथवा—"संवेदनं त्वि"त्यनेन प्रत्यनुमानमुच्यते । अयं प्रयोगः—संवेदनं धर्मि, प्रकाशमानमेव विषयमवभासयेदिति साध्यो धर्मः, अर्थप्रकाशकत्वात् ; प्रदीपवत् । असिद्धमर्थप्रकाशकत्वमित्याशङ्क्य साधयति—*न प्रकाशान्तरहेतुरिति* ॥ *ननु*—प्रदीपस्य प्रकाशकस्यार्थानुभवजननेनैव प्रकाशकत्वम्, अतः साधनविकलो दृष्टान्त इत्याशङ्क्याह—*नच प्रदीपेति* ॥ कथमनुभवजननं विना प्रकाशकता ? न ह्यनुभवं विना विषये प्रदीपप्रकाश्यत्वमपरं दृश्यत इत्याशङ्क्याह—*तथाहीति* ॥

स्वयंप्रकाशत्वमपीह नैवं सिद्ध्येदितीत्थं ह्यनुमोच्यतेऽन्या ।
जडत्वचिह्नं हि तदेव सिद्धं ज्ञेयत्वहानौ चितिरूपताऽपि ॥

इत्यभिप्रायेणाह—*तस्मादिति* ॥ अथवा—"संवेदनन्त्वि"त्यनेन हेतोः पक्षधर्मत्वमुक्त्वा, "नच प्रदीपालोकस्ये"त्यनेन सपक्षे सत्त्वमुक्त्वाऽनुमानं दर्शयति—*तस्मादनुभव इति* ॥ 'विषये प्रकाशादिव्यवहार-

तत्त्वदीपनम्

ज्ञानं किमज्ञायमानमर्थप्रकाशकम् ? उत ज्ञायमानम् ? इति विकल्प्याऽऽद्ये दूषणमुक्तं "जडस्वरूपे" इत्यनेन, तन्नोपपद्यते ; चक्षुरादिवदप्रकाशमानस्यापि प्रकाशकत्वसंभवादिति शङ्कते—*नन्विति* ॥ संवेदनं व्यवधानेन प्रकाशकम् ? उत न ? नाद्य इत्याह—*न विषयेति* ॥ नच—प्रकाशकत्वात् संवेदनस्यापि व्यवधानेन प्रकाशकत्वमिति—अनुमेयम् ; ज्ञानान्तरासिद्धेरित्याह—*संवेदनं त्विति* ॥ प्रकाशान्तरहेतुत्वेऽनवस्थाप्रसङ्ग इत्याह—*न प्रकाशान्तरेति* ॥ तस्माद् द्वितीयः परिशिष्यत इत्याह—*अत इति* ॥ प्रदीपे चक्षुरादिवैलक्षण्यासिद्धिमाशङ्क्याह—*नचेति* ॥ प्रदीपस्य ज्ञानकारणत्वे प्रमाणाभावादित्यर्थः । अनुभवाजनकत्वे प्रदीपस्य कथं प्रकाशकत्वम् ? इति शङ्कते—*किं त्विति* ॥ प्रकाशकत्वमन्यथापि घटत इत्याह—*पृथगिति* ॥ 'ज्ञानप्रकाशितम्' 'प्रदीपप्रकाशितम्' इत्यनुभवाविशेषे कथं प्रकाशकत्वपृथक्त्वम् ? तत्राह—*तथाहीति* ॥ यत् प्रकाशकम्, तदनुभवनिमित्तमिति तथा संविदि व्यभिचरति, तद्वदनुभवातिरिक्तस्यालोकस्यापि ज्ञानजननं विना तमोनिवर्तनेन प्रकाशकत्वं स्यादित्यर्थः । तर्हि प्रकाशकत्वाच्चक्षुषोऽपि तथात्वमित्याशङ्क्याह—*न तदिति* ॥

पञ्चपादिकाविवरणम्

प्रकाशमान एव विषये प्रकाशादिव्यवहारनिमित्तं भवितुमर्हति ; अव्यवधानेन विषये प्रकाशादिव्यवहारनिमित्तत्वात्, प्रदीपालोकवत् । नच चक्षुषा सजातीयप्रकाशेन प्रदीपस्यालोकेनेव घटस्य प्रकाश्यता ; स्वयमेव प्रकाशगुणत्वात् । तद्विषयज्ञानप्रकाशं जनयति चक्षुरिति चेत्, तथापि विजातीयज्ञानेनैव प्रदीपस्य प्रकाश्यतेति न सजातीयालोकापेक्षा । तस्माद् व्यवहितप्रदीपस्येवानुभवस्याप्यप्रकाशमानत्वे प्रदीपप्रकाश्यस्येव विश्वस्यानवभाप्रसङ्ग इति ॥

ऋजुविवरणम्

निमित्तमि'त्येतावति साध्ये सिद्धसाध्यता स्यात्, तदर्थम्—"प्रकाशमान एवे"ति विशेषणम् । प्रकाशमानस्यैव लिङ्गादेर्व्यवहारहेतुत्वेऽपि न स्वयंप्रकाशमानत्वम्, तदर्थमाह—"*प्रकाशान्तरनिरपेक्षः" इति* ॥ एवमपि बाधितविषयत्वं साध्यविकलत्वं वा भवेत्, तदर्थमाह—*सजातीयेति* ॥ अथवा—"प्रकाशमान एवे"त्युक्ते ज्ञानान्तरेण प्रकाशमानस्यापि विषयव्यवहारहेतुत्वदर्शनात् सिद्धसाध्यता स्यात्, तदर्थम्—"सजातीयनिरपेक्षः"इति । सजातीयनैरपेक्ष्यं लिङ्गादावस्ति; नच स्वयंप्रकाशत्वम्, तदर्थमाह—*"प्रकाशान्तरनिरपेक्षः" इति* ॥ *ननु*—साध्यविकलो दृष्टान्तः ; प्रदीपस्यापि चाक्षुषप्रकाशसापेक्षत्वादित्याशङ्क्याह—*नच चक्षुषेति ॥ स्वयमेवेति* ॥ अयमर्थः—प्रकाशरूपो गुणो यस्यासौ प्रकाशगुणः, आलोकस्य प्रकाशकत्वं नाम तमोनिवर्तकत्वम्, तच्चात्र न संभवति ; तमसोऽभावादिति ॥ *तद्विषयेति* ॥ यत्र प्रकाशसंसर्गः प्रकाशमानता वा, तत्र तु सजातीयापेक्षा दृष्टेति भावः । *तथापीति* ॥ विषये यादृशातिशयं जनयति, तादृशातिशये सजातीयानपेक्षत्वं विवक्षितम् । तत्र तु प्रकाशसंसर्गो न ; वृत्त्यधीनत्वादिति भावः । "नैवं प्रमाता चेतनः"इत्यनेन प्रमातुश्चेतनत्वाद् विश्वस्यानवभासो नास्तीत्युक्तम्, तदनुपपन्नम् ; चैतन्यमवभासकम्, न चेतनः ; तथा तच्छब्देन प्रकृतचैतन्यनिर्देशशङ्का स्यात् ; तथा सत्यनुभवहानेनैव चोद्यकरणाद् वैयधिकरण्यमित्याशङ्क्याह—*ननु प्रमातृचैतन्यमिति* ॥ "तन्न ;

तत्त्वदीपनम्

*उभयम्=अज्ञाननिवृत्ति-तमोनिवृत्त्याख्यम् । तर्हि भासमानमेव भानं भासकमस्त्वित्याशङ्क्य, किं परतः ? उत स्वतः ? नाद्य इत्याह—*तस्मादिति* ॥ 'प्रकाशनिमित्तमि'त्युक्तेऽप्रकाशमानस्य निमित्तत्वाङ्गीकारात्सिद्धसाध्यता, तदर्थम्—*प्रकाशमान इति* ॥ एतावत्युक्ते ज्ञानान्तरप्रकाश्यत्वान्न स्वप्रकाशत्वमित्यर्थान्तरता, तदर्थम्—*सजातीयेति* ॥ 'सजातीयप्रकाशनिरपेक्षः' इत्युक्ते चक्षुरादिवदप्रकाशमानस्य व्यवहारनिमित्ततयाऽस्वप्रकाशत्वेनार्थान्तरता, तदर्थम्—*प्रकाशमान इति* ॥ विषयिणि व्यवहारनिमित्तवृत्तौ व्यभिचारपरिहारार्थमाह—*विषय इति*॥ चक्षुषि व्यभिचारनिवारणार्थम्—*अव्यवधानेनेति* ॥ प्रदीपस्य चाक्षुषप्रकाशसापेक्षत्वेन साध्यवैकल्यमाशङ्क्याह—*नचेति* ॥

आलोकः किं तमोविरोधित्वलक्षणप्रकाशत्वसिद्धये चाक्षुषप्रकाशमपेक्षते ? उताज्ञानविरोधित्वलक्षणज्ञानप्रकाश्यत्वार्थम् ? इति विकल्प्य, प्रथमं प्रत्याह—*स्वयमिति* ॥ प्रकाशगुणत्वेन तमःप्रत्ययवत्त्यभावान्न तन्निवृत्तावन्यापेक्षा, स्वरूपेण तन्निवर्तनसमर्थत्वाच्चेत्यर्थः । द्वितीयमनुवदति—*तद्विषयेति* ॥ अस्मिन् पक्षे न साध्यवैकल्यमित्याह—*तथापीति* ॥ ज्ञानोत्पत्तौ प्रदीपश्चक्षुरपेक्षत इत्याशङ्क्य, प्रदीपस्य विजातीयज्ञानापेक्षायामपि सजातीयनैरपेक्ष्यमित्याह—*इति न सजातीयेति* ॥ न द्वितीयः ; जडत्वोपक्रमविरोधात् । तस्माज्जगदान्ध्यप्रसञ्जनं युक्तमित्याह—*तस्मादिति* ॥

"चेतनस्तद्बलेने"त्यत्र तच्छब्देन चेतनपरामर्शाशङ्का स्यात्, ततश्चानुभववैयर्थ्यं दुष्परिहरमित्याशङ्क्याह—

वार्तिकम्

उक्तविरोधेन तस्याधिकरणसाधारणत्वात् । अपिच यद्यात्मा सर्वदाऽपरोक्षः स्यात्, तर्हि तदर्थमुप-

पञ्चपादिका

प्रसङ्गात्, मैवम् ; प्रमाता चेतनस्तद्बलेन प्रदीपेनेव विषयमिदन्तया, आत्मानं चानिदन्तया चेतयते, इति न विश्वस्यानवभासप्रसङ्गः, तन्न ; स्वयंप्रकाशचैतन्यस्वभावोऽपि सन् विषयप्रमाणेनाचेतनेनानुगृहीतः प्रकाशत इति, नैतत् साधु लक्ष्यते। किंच प्रमाणफलेन चेत् प्रदीपेनेव विषयमात्मानं चेतयते, तदा चेतयतिक्रियानवस्थाप्रसङ्गः ॥

द्वितीये कल्पेऽपि आत्माऽपि स्वयमेव प्रकाशते, किमिति विषयानुभवमपेक्षेत ? अथ चैतन्यस्वभावत्वेऽपि नात्मा स्वयंप्रकाशः, विशेषे हेतुर्वाच्यः। न हि चैतन्यस्वभावः सन् स्वयं परोक्षोऽ-

पञ्चपादिकाविवरणम्

ननु प्रमातृचैतन्यमेव जडानुभवबलादात्मानं विषयं चावभासयतीति चोदयति,—*मैवम्, प्रमाता चेतन इति* ॥ तत्र यदि चैतन्यस्य विषयोपरागहेतुरनुभवः पराभ्युपगतबुद्धिपरिणामवदिष्यते, तद् युज्यते ; चिदात्मप्रकाशस्य तु जडानुभवाधीनताऽनुपपन्नेत्याह—*तन्न स्वयंप्रकाशचैतन्यस्वभावोऽपि सन्निति* ॥ चेतयतिक्रियाऽपि पूर्वानुभवफलवज्जडरूपानुभवफलम्, चेतनस्यापि प्रदीपस्थानीयत्वाच्चेतयतिक्रियानवस्थेति दूषयति—*किञ्च प्रमाणफलेनेति* ॥ उभयचैतन्यस्वभावपक्षे पुरुषद्वयवन्नान्योन्याधीनसिद्धिता, नापि संविदात्मसम्बन्धावगम इत्याह—*द्वितीयेऽपि कल्प इति* ॥

ननु चिद्गुणमपि पुरुषान्तरसंवेदनं न पुरुषान्तरस्य स्वयंप्रकाशम्, तथाऽऽत्मा चैतन्यगुणोऽपि न स्वयं प्रकाशत इति शङ्कते—*अथ चैतन्यस्वभावत्वेऽपीति* ॥ परिहरति—*विशेषे हेतुर्वाच्य इति* ॥ अनु-

ऋजुविवरणम्

स्वयमि''त्यनेन जडानुभवाधीनत्वं कथं निराक्रियते ? स्वेनाप्यङ्गीकृतत्वादित्याशङ्क्याह—*तत्र यदीति* ॥ ''किंचे''त्यनेनानवस्थोक्ता ; सा कथम् ? न ह्यनुभवजननमात्रेणानवस्था स्यादित्याशङ्क्याभिप्रायमाह—*चेतयतिक्रियाऽपीति* ॥ ''आत्माऽपि स्वयमेवे''त्यदूषणम् ; स्वयंप्रकाशत्वाङ्गीकारात्, विषयप्रतीतौ तदनुभवसापेक्षत्वस्य वक्तुं शक्यत्वात्। यद्वा—स्वयंप्रकाशत्वं सापेक्षत्वं च भवतु, को दोषः ? एकस्यैव सापेक्षत्वनिराकरणमप्युक्तम् ; कोऽसौ द्वितीयपक्ष इति च न व्यक्तम्, तदर्थमवतारयति—*उभयचैतन्येति* ॥ ''विशेषहेतुरि''त्यनेनाप्रकाशे

तत्त्वदीपनम्

नन्विति ॥ नच—प्रमातुः स्वप्रकाशत्वेनानुभवनैरपेक्ष्यमिति—वाच्यम्—वेदान्ति-सांख्यमते स्वप्रकाशस्याप्यनुभवापेक्षादर्शनादिति भावः। आत्म-विषययोरुभयोरप्यनुभवाधीनत्वशङ्कायामात्मन एव तदधीनत्वं कस्मान्निरस्यते ? इत्याशङ्क्याऽऽत्मनो विषयोपरागहेतुत्वादनुभवस्य तत्प्रकाशकत्वम् ? उत साक्षात् ? नान्त्यः ; अनुपपत्तेरित्यभिप्रेत्याऽऽद्यमङ्गीकरोति—*तत्र यदीति* ॥

चेतयतेः फलत्वात् कथमनवस्था ? इत्याशङ्क्य, किं चेतयतेरपि जडत्वम् ? उताजडत्वम् ? अन्त्ये पूर्वस्यैव जडत्वमस्तु, किं संविदन्तरेण ? इत्यभिप्रेत्याऽऽद्यं दूषयति—*चेतयतिक्रियेति*॥ चेतयतेर्जडत्वे वैयर्थ्यपरिहारार्थं चक्षुरेव चेतयत्यन्तरमाधीयत इति वक्तव्यम् ; ततश्च तस्यापि चेतयत्यन्तरमित्यनवस्थेत्यर्थः। उभयोरजडत्वेऽनुभवनैरपेक्ष्यमुक्तम्, तत्र हेतुमाह—*उभयेति* ॥ आत्माऽनुभवौ, नान्योन्याधीनसिद्धिकौ, चित्स्वभावत्वात् ; पुरुषद्वयवदित्यर्थः। तत्रैव दूषणान्तरमाह—*नापीति* ॥ किं संविदात्मसंबन्धः स्वेन गृह्यते ? उतान्येन ? नाद्यः ; स्वग्रहणमन्तरेण स्वप्रतियोगिकसंबन्धग्रहणासंभवात्, स्वग्रहणे च विषयत्वप्रसङ्गः। नापि द्वितीयः ; आत्मग्रहणमन्तरेण तद्विशेषितसंबन्धग्रहणायोगात् तद्ग्रहणं वाच्यम्। नच तद् युज्यते ; स्वप्रकाशत्वविरोधादित्यर्थः ॥

आत्मा चिद्रूपः, तथाऽपि न स्वप्रकाश इत्युक्तिर्विरुद्धेत्याशङ्क्य तात्पर्यमाह—*नन्विति*॥ *चिद्गुणमिति*॥ चिद्रूपमित्यर्थः। चित्प्रकाशत्वेऽप्यात्मनोऽस्वप्रकाशत्वं पुरुषान्तरसंवेदनवदित्युक्तम्, ततश्च ''विशेषे हेतुर्वाच्यः'' इत्ययुक्त-

पञ्चपादिकाविवरणम्

भवोऽपि तर्हि न स्वयंप्रकाशः स्यात्। पुरुषान्तरसंवेदनवदव्यवधानान्नेति चेत्, आत्मन्यपि तत् समानमिति भावः। *किञ्चेति स्पष्टार्थः*। अस्तु तर्हि जडात्मनः स्वयंप्रकाशानुभवाश्रयतया सिद्धिरिति, नेत्याह—*तृतीयेऽपीति* ॥ अयमर्थः—संवेदनं नाम गुणो द्रव्यं कर्म वा भवति ? कर्मत्वे प्रकाशत्व-फलत्वयोरनुपपत्तिः, द्रव्यत्वेऽप्यणु-मध्यमानन्तरपरिमाणानामणुपरिमाणत्वे विषयेऽपि तावन्मात्रावभासः स्यात्; नहि खद्योत-प्रकाशमात्रसंसृष्टस्य घटस्य सर्वात्मनाऽवभासः, महापरिमाणत्वे तदाश्रयतयाऽऽत्मनोऽपि सर्वत्रावभासप्रसङ्गः; मध्यमपरिमाणत्वे सावयवत्वेनावयवपरतन्त्रता स्यात्। गुणत्वे सति, आत्मैव प्रकाशगुण इति प्रदीपवदात्मा स्वयंप्रकाशः स्यात्। स च गुणः स्वाश्रयोपाधौ न जायते; प्रकाशगुणत्वात्, आत्मन्यव्यभिचारात्, आदित्यादि-प्रकाशगुणवदित्यात्मैव स्वयंप्रकाश इति, तदेतदाह—*अनिच्छतोऽप्यात्मैव चितिप्रकाश इति* ॥

ऋजुविवरणम्

विशेषहेतुर्वक्तव्य इत्युक्तमिव प्रतिभाति, तदयुक्तम्; उक्तत्वात्, इत्याशङ्क्य व्याचष्टे—*अनुभवोऽपीति* ॥ अनुभवे विशेषहेतुर्वक्तव्य इति व्याख्यातम्। "किंच समत्वादि"त्यनेन विषयावभासे सापेक्षत्वनिराकरणादपुनरुक्तिः, "तृतीयेऽपी"त्यनेनात्मन एव चित्प्रकाशत्वमापादितम्, तत् कथम्? न ह्यन्यस्य चित्प्रकाशत्वेऽन्यस्य चित्प्रकाशत्वं संभवति, एकत्वं वा तयोरित्याशङ्क्य व्याचष्टे—*अयमर्थ इति*। गुणस्याप्यागमापायधर्मित्वे तदेकत्वमात्मनो न स्यात्, स्वयंप्रकाशत्वं च, तदर्थमाह—*सच गुण इति*॥ "आत्मन्यव्यभिचारादि"त्यनन्यत्वेऽपि हेतुः। "न तदतिरिक्ते"त्यनेन व्यतिरिक्तफलसद्भावे प्रमाणं नास्तीत्युक्तम्, तदनुपपन्नम्; विषयानुभवदर्शनेनैव व्यतिरिक्तानुभवस्य तथाविधफल-

तत्त्वदीपनम्

मित्याशङ्क्यात्मनोऽन्याधीनप्रकाशत्वेऽनुभवस्यापि तथात्वमित्याह—*अनुभवोऽपीति* ॥ पुरुषान्तरसंवेदनस्य व्यवहितत्वान्न मनुष्यान्तरं प्रति स्वप्रकाशत्वम्, अनुभवस्य तद्वैपरीत्यात्स्वप्रकाशत्वमित्याह—*अव्यवधानादिति* ॥ तुल्यमुत्तरमित्याह—*आत्मनीति* ॥ परात्मनस्तु व्यवहितत्वान्न स्वप्रकाशत्वम्, स्वात्मनस्त्वव्यवहितत्वात्स्व-प्रकाशत्वमित्यर्थः। तृतीयमुत्थापयति—*अस्त्विति* ॥

संविदः स्वप्रकाशत्वेन कथमात्मनस्तदापादनम्? वैयधिकरण्यादित्याशङ्क्याह—*अयमर्थ इति* ॥ गुण इति तार्किक प्राभाकरदृष्ट्योक्तम्, द्रव्यमिति सांख्यमतमनुसृत्य, कर्मेति भाट्टमतानुसारेण। गुणत्वपरिशेषार्थमन्तिमं निरस्यति —*कर्मत्व इति* ॥ क्रियात्वे गम्यादिवत्संवेदनस्य प्रकाशत्वं न संभवति। नच—प्रमाणफलत्वात्प्रकाशत्वमित्यपि —वाच्यम्; कर्मत्वे फलत्वस्याप्यनुपपत्तेरित्यर्थः। मध्यमं निरस्यति—*द्रव्यत्व इति* ॥ "परिमाणानामि"त्यत्र मध्य इति द्रष्टव्यम् ॥

हरिचन्दनबिन्दोर्गात्रैकदेशस्थस्यापि सर्वाङ्गीणाऽऽह्लादहेतुत्ववदेकदेशसंसृष्टस्यापि ज्ञानस्य सकलभासकत्वं किं न स्यात्? इत्यत्राह—*न हीति*॥ प्रकाशसंसर्गो हि प्रकाशमानत्वम्। नचाण्वात्मसंवेदनस्य सकलसंसर्गः; इतरथा खद्योतप्रकाशसंसर्गाद् घटस्य सर्वात्मना भानं स्यात्, हरिचन्दनबिन्दोस्तु सावयवत्वेनावयवप्रसर्पणाद्वारा व्यापि-कार्यहेतुत्वं युक्तमित्यर्थः ॥

अनन्तपरिमाणं ज्ञानमिति पक्षं निरस्यति—*महापरिमाणत्व इति* ॥ मध्यमं दूषयति—*मध्यमेति* ॥ कर्मत्व-द्रव्यत्वयोरनुपपत्तावाद्यः शिष्यत इत्याह—*गुणत्व इति* ॥ प्रकाशगुणस्य प्रदीपादेर्यथा सजातीयप्रकाशनिर-पेक्षत्वम्, तद्वत् स्वप्रकाशसंविद्गुणत्वादात्मनोऽप्यन्यनिरपेक्षत्वमित्यर्थः। संवेदनस्य जन्यत्वात्तदभावेऽप्रकाशः स्यादि-त्याशङ्क्याह—*स चेति* ॥ प्रागभावशून्यत्वादपि न तस्य जन्मेत्याह—*आत्मनीति* ॥

वार्तिकम्

देशशास्त्रमनर्थकं स्यात्; पूर्वमेवैतत्फलस्य सिद्धत्वात्। नच तत्र भ्रमोऽपि संभवति; तदध्यक्षविरो-

पञ्चपादिका

न्यतोऽपरोक्ष इति युज्यते। किंच समत्वान्नेतरेतरापेक्षत्वं प्रकाशने प्रदीपयोरिव। तृतीयेऽपि कल्पेऽनिच्छतोऽप्यात्मैव चितिप्रकाश आपद्यते, न तदतिरिक्ततथाविधफलसद्भावे प्रमाणमस्ति। कथम्? प्रमाणजन्यश्चेदनुभवः, तथा सति स्वगतेन विशेषेण प्रतिविषयं पृथक् पृथगवभासते।

पञ्चपादिकाविवरणम्

ननु मध्यमपरिमाणमेव स्वावयवाश्रयं फलमस्तु, आत्मपरतन्त्रता तु घटस्येव भूतलतन्त्रतेति, नेत्याह—*न तदतिरिक्ततथाविधफलसद्भाव इति*॥ 'प्रदीपेन प्रकाशितमि'तिवद् 'मयाऽवगतमि'त्यनुभवादात्मैव चित्प्रकाशः; अन्यथा काष्ठेन प्रकाशितमितिवदुपचारप्रसङ्गादिति भावः। प्रमाणान्तरापेक्षया पृच्छति—*कथमिति*? संवेदनस्य भेदावभासशून्यत्वाद् अनुभवाधीनसिद्धिकस्य च विषयवदनात्मत्वाद् एकः स्थाय्यात्मैवानुभव इत्याह—*प्रमाणजन्यश्चेदनुभव इति*॥ सामान्य विशेषभेदकल्पनागौरवादात्मैक एवानुभव इत्याह—

ऋजुविवरणम्

भूतस्य सिद्धेः, तथा व्यतिरेकेऽपि प्रमाणं नास्तीत्याशङ्क्याभिप्रायमाह—*प्रदीपेनेति*॥ "कथमि"त्याक्षेपः, प्रश्नो वा नोपपद्यते; पूर्वग्रन्थे व्यतिरिक्तफलसद्भावो निरस्तः, आत्माव्यतिरेके च प्रमाणमुक्तम्, तत्र न तावद् व्यतिरेकप्रमाणाभावविषयौ तौ; एकत्वप्रमाणेनैव तत्सिद्धेः, नाप्येकत्वविषयौ तौ; तत्र प्रमाणस्योक्तत्वात्, इत्याशङ्क्याह—*प्रमाणान्तरापेक्षयेति*॥ तत्र "प्रमाणजन्यश्चेदि"त्यनेन प्रमाणजन्यत्वनिराकरणमसंगतम्; पृष्टप्रमाणस्यानुक्तत्वात्, इत्याशङ्क्याभिप्रायमाह—*संवेदनस्येति*॥ "सर्वानुभवानुगतं चे"त्यनेनानुभवत्वप्रतीतिरापादिता, सा न दूषणम्; तत्प्रतीतेर्विद्यमानत्वात्, इत्याशङ्क्याभिप्रायमाह—*सामान्य-विशेषेति*॥ "प्रमाणजन्यश्चेदि"त्यनेनायं

तत्त्वदीपनम्

मध्यमपरिमाणत्वपक्षमाश्रित्य शङ्कते—*नन्विति*॥ तर्ह्यवयवपारतन्त्र्यं स्यादिति यत्तूक्तम्, तदिष्टमित्याह—*स्वावयवेति*॥ तर्ह्यात्मपारतन्त्र्यं न स्यादिति, तत्राह—*आत्मेति*॥ घटस्य भूतलान्यत्वात् तत्तन्त्रत्वम्, न तथाऽत्रेत्याह—*प्रदीपेनेति*॥ 'प्रदीपेन प्रकाशितो घटः' इत्युक्ते तस्य यथा प्रकाशात्मकप्रदीपप्रकाशत्वम्, तद्वद 'मयाऽवगतमि'त्यत्राप्यवगत्यात्मकस्य प्रकाश्यत्वप्रतिपत्तेरात्मनश्चित्प्रकाशत्वमित्यर्थः। उक्तमर्थं विपक्षबाधकमुखेनोपपादयति—*अन्यथेति*॥ काष्ठस्य ज्वालया प्रकाश्यमाने घटे 'काष्ठेन प्रकाशितः' इति यथोपचारः, तद्वदित्यर्थः॥ आत्मनः प्रकाशरूपत्वे प्रमाणस्योक्तत्वात् प्रश्नानुपपत्तिरित्याशङ्क्याह—*प्रमाणान्तरेति*॥ 'मया गतो ग्रामः' इत्युक्ते स्वान्यगमिक्रियाविषयत्वं यथा ग्रामस्य, तद्वदवगतः स्वातिरिक्तत्वेऽपि 'मयाऽवगतः' इति व्यपदेशो युज्यत इति प्रमाणान्तरं वक्तव्यमिति चोद्यार्थः। प्रमाणान्तरजिज्ञासायां तदेव वक्तव्यम्, किं जन्यत्वादिनिराकरणेन? इत्याशङ्क्य तात्पर्यमाह—*संवेदनस्येति*॥ अत्रैषा योजना—आत्मा, अनुभवान्नातिरिच्यते, संवित्कर्मत्वानधिकरणत्वे सत्यपरोक्षत्वात्; संविद्वत्, इत्याह—*आत्मैवाऽनुभव इति*॥ अनुभवत्वम्, आत्मवृत्ति, अनुभववृत्तित्वात्; सत्तावदिति वा प्रयोगः। भिन्नत्वाजनिविनाशवत्वाच्च नानुभवस्याऽऽत्मरूपत्वमिति बाधकतर्कपराहतिमाशङ्क्याह—*एक इति*॥ एकत्वं स्थायित्वं चाऽसिद्धमित्याशङ्क्याह—*संवेदनस्येति*॥ संवित् स्वान्तर्गणिकभेदशून्या, उपाधिमन्तरेणाविभाव्यमानभेदत्वादाकाशवदित्यर्थः। जन्यत्वाभावेऽपि तथैव प्रयोक्तव्यम्। विपक्षे बाधकमाह—*अनुभवाऽधीनेति*॥ अनुभवत्वमीश्लेतेत्युक्तम्, तदिष्टमेवेत्याशङ्क्याह—*सामान्येति*॥ अनुभव एक एव, तत्श्चात्मेति योजना। अनुभवव्यक्तिभेदाभ्युपगमेऽनुगतव्यवहारहेतुत्वेनानुभवत्वमाश्रयणीयमिति गौरवम्, व्यक्त्यैक्ये तु लाघवम्। व्यक्तेरैक्यं भेदप्रतिभासस्यौपाधिकत्वमिति कल्पनं तवापि समानमिति चेत्, न; सामान्य-विशेषभेदं परिकल्प्य

वार्तिकम्

धात्। नच—आत्मनि सामान्यतोऽप्यन्नमस्त्वेऽपि विशेषतस्तदभावान्न विरोध इति—वाच्यम्; आत्मनो

पञ्चपादिका

सर्वानुभवानुगतं च गोत्ववदनुभवत्वमपरमीक्ष्येत। नच 'नीलानुभवः पीतानुभवः', इति विषयविशेषपरामर्शशून्यः स्वगतो विशेषो लक्ष्यते॥

ननु विनष्टाविनष्टत्वेन विशेषः सिध्यति, सिध्येत्, यदि विनष्टाविनष्टता सिध्येत्; सा च जन्यत्वे सति, तस्यां च सिद्धायां जन्यत्वमिति परस्परायत्तस्थितित्वेनैकमपि न सिध्येत्। *एतेन*--

पञ्चपादिकाविवरणम्

सर्वानुभवानुगतं चेति॥ स्वगतभेदप्रतिभासशून्यतामेव प्रपञ्चयति--*नच नीलानुभव इति*॥ *ननु* नीलसंवित्स्थितिकाले पीतसंविदोऽभावात् स्थिति-विनाशौ दृष्टौ धर्मिभेदं कल्पयत इति चोद्यमुद्भाव्य परिहरति— *ननु विनष्टाविनष्टेत्यादिना*॥ *ननु* साधनसन्निधानादुत्तरसंवेदनस्य जातत्वात् संविद्द्वययौगपद्यायोगाद् विनष्टा पूर्वसंविदिति चेत्, *न*; इतरेतराश्रयादित्याह—*सा च जन्यत्व इति*॥ सिद्धस्यैव संवेदनस्य विषयोपरागनिमित्तं साधनमिति कल्पनं लघीयो विषयोपरक्तसंविज्जन्मसाधनत्वकल्पनादिति भावः॥ सत्यपि संविदां स्वगतभेदेऽतिसादृश्याद् ज्वालायामिव परोपाधिमन्तरेण भेदो न विभाव्यत इति सुगताः कल्पयन्ति, तान्निराकरोति--*एतेनातिसादृश्यादिति*॥ *किञ्च* ज्ञानान्तरगम्यत्वे भेदस्यातिसादृश्याद्-

ऋजुविवरणम्

पुनरुक्तः; तत्रापि भेदावभासस्याऽऽपादितत्वात्, इत्याशङ्क्यावतारयति—*स्वगतभेदेति*॥ नच—व्यतिरेकप्रदर्शनमेवानेन क्रियत इति—युक्तम्; अर्थसिद्धत्वात्। नच तत्परत्वमेव ग्रन्थस्य; "विषयविशेषपरामर्शशून्यः" इत्यस्यांशस्य वैयर्थ्यापातात्, नच व्यतिरेकप्रतिभासाभावोपपादनार्थता; उक्तप्रपञ्चत्वापातादिति भावः। कथमितरेतराश्रयत्वम्? साधनान्वय-व्यतिरेकाभ्यां जन्यत्वसिद्धेरित्याशङ्क्याभिप्रायमाह—*सिद्धस्यैवेति*॥ "न हि चित्प्रकाशस्ये"त्यनेन विद्यमानो भेदः सादृश्यान्न प्रतीयत इत्याशङ्क्य निरस्तमिव प्रतिभाति, तदयुक्तम्; पूर्वग्रन्थे भेदाभाव उक्ते तत्सद्भावे तदप्रतीतौ कारणाभावेन शङ्कानुदयात्, उत्तरोत्तरग्रन्थेन पौनरुक्त्यप्रसङ्गात्, नापि भेदमात्रनिराकरणम्; निरस्तत्वादित्याशङ्क्याह—*किंच ज्ञानान्तरेति*॥ तत्र "बुद्धिवेद्यत्वादि"ति हेतौ स भेदेन प्रतीयमानघटादावनैकान्तिकः

तत्त्वदीपनम्

सामान्यभेदप्रतिभासस्यौपाधिकतायाः कल्प्यत्वात्तव कल्पनाऽधिका, तस्मादेक एवानुभव इत्यर्थः। संवित्, स्वगतभेदवती, प्रकाशात्मकत्वात्; प्रदीपवदित्याशङ्क्याह—*स्वगतेति*॥ अनुभवविरुद्धो हेतुरित्यर्थः।

नष्टानष्टयोरभेदानुपपत्तेर्भेद इत्युक्तमयुक्तम्, नष्टानष्टविभागस्यैवासिद्धेरित्याशङ्क्याह—*ननु नीलेति*॥ पीतसंविदोऽभावादिति कोऽर्थः? किं विशेषणव्यावृत्त्या विशिष्टव्यावृत्तिः? उत विशेष्यव्यावृत्त्येति? आद्ये न संविदभावः सिद्ध्यति, द्वितीये त्वसिद्धिः, संविदोऽन्यदापि दर्शनादिति समाधानग्रन्थार्थः। विधान्तरेण हेतुं समर्थयते—*नन्विति*॥ साधनोपादानानुपपत्त्या संविज्जन्यत्वम्; अन्यथा साधनवैयर्थ्यापातादित्यर्थः॥

अस्तु संविज्जन्म; तथापि पूर्वविनाशः कथमिति? तत्राह—*संविद्द्येति*॥ संविदः साधनाधीनत्वं त्वन्यथाऽपि घटत इत्याशयेनाह—*नेतरेति*॥ अन्यथासिद्धिं व्यनक्ति—*सिद्धस्येति*॥ संविद उत्पत्तिकल्पनायां तस्याः जन्म विषयोपरक्ताकारस्य चेति गौरवम्; अस्मन्मते तूपरागमात्रस्य जन्यत्वमिति लाघवमित्यर्थः॥

संविदां विद्यमानोऽपि भेदो दोषान्न प्रतिभातीति सौगताः कल्पयन्ति; तदश्च विशेषाप्रतिभानं न दोषायेति शङ्कते—*सत्यपीति*॥ *उपाधिमन्तरेण भेद इति*॥ स्वगतभेद इति यावत्। भेदे सिद्धे साधर्म्यकल्पना, तस्यां च सिद्धायां ततो भेदाधिगतौ भेदसिद्धिः, इतीतरेतराश्रयप्रसङ्गान्मैवमित्याह—*तान्निराकरोतीति*॥ संविदि प्रकाशमानायां तद्गतस्य भेदस्यापि प्रकाशमानत्वात्तदग्रहणानुपपत्तिरित्युक्तम्; तदनुपपन्नम्, दूरात तरौ प्रतीयमानेऽपि तद्भेदाप्रतिभासवद् भेदाप्रथनेऽप्यनुपपत्त्यभावादित्याशङ्क्य तात्पर्यमाह—*किंचेति*॥

पञ्चपादिका

अतिसादृश्यादनुभवभेदो न विभाव्यत इति—*प्रत्युक्तम्* ; भेदासिद्धेः। नहि चित्प्रकाशस्य स्वगतो भेदो न प्रकाशत इति युक्तिमत् ; येन तदप्रकाशनात् सादृश्यनिबन्धनो विभ्रमः स्यात्। नच—यथा जीवस्य स्वयंज्योतिषोऽपि स्वरूपमेव सद् ब्रह्मरूपत्वं न प्रकाशते, तद्वत् स्यादिति—युक्तम् ; अभिहितं तत्राप्रकाशने प्रमाणम्, इह तन्नास्ति। नहि सामान्यतोदृष्टमनुभवविरोधे युक्तिविरोधे च समुत्तिष्ठति ; दर्शिते चानुभव-युक्ती। तस्मात् चित्स्वभाव एवाऽऽत्मा तेन तेन प्रमेय-भेदेनोपधीयमानोऽनुभवाभिधानीयकं लभते, अविवक्षितोपाधिरात्मादिशब्दैरभिधीयते ; अवधीरितवना-

पञ्चपादिकाविवरणम्

भिन्नष्वभेदभ्रमजन्म स्यात्, स्वयंप्रकाशस्य तु भेदः प्रकाशाभिन्न इति प्रकाशमानतैव युक्तेत्याह—*नहि चित्प्रकाशस्येति* ॥ *नच यथा जीवस्येति स्पष्टार्थः*। एकत्वेन पुष्कलप्रकाशस्याऽप्यविद्याप्रतिबन्धे प्रमाणमुक्तम्, इह त्वप्रतिबद्धपुष्कलकारणत्वाद् भेदप्रकाशेन भवितव्यमित्याह—*अभिहितं तत्रेति* ॥ *ननु* संविदः, सादृश्यप्रतिबद्धभेदावभासाः, स्थायिप्रकाशबुद्धिवेद्यत्वात्, ज्वालावदित्यनुमातुं शक्यते, तत्राह—*नहि सामान्यतोदृष्टमिति* ॥ पूर्वापरैकरूपानुभवः, भेदस्य च प्रकाशेन भवितव्यम्, इत्यनुभव-युक्ती। कथं पुनरात्म-चैतन्यस्य नित्यस्य विषयानुभवत्वमिति ? तदाह—*तस्माच्चित्स्वभाव एवेति* ॥

ननु स्वयंप्रकाशमानाऽऽत्मचैतन्यस्य विषयानुभवत्वेऽपि विषयानुभवमेव निमित्तीकृत्य—'अहमि'ति द्रष्टृपरामर्शा-

ऋजुविवरणम्

स्यात्, तदर्थम्—*प्रकाशबुद्धिवेद्यत्वादिति* ॥ तथाप्युत्पन्नमात्रविनष्टप्रदीपविद्युदादावनैकान्तिकः स्यात्, तदर्थम्—*स्थायीति* ॥ "बाढम् ; अतः"इत्ययुक्तम् ; नहि स्वयमप्रकाशत्वमात्मनो विषयानुभवत्वं वाऽहंकारस्यानिदंरूपत्वे हेतुः, तदेव हि सन्निहितत्वान्निर्देश्यमित्याशङ्क्यावतारयति—*ननु स्वयंप्रकाशेति* ॥ कथमात्मस्वरूपस्याहंकारस्य विषयानुभवनिमित्तत्वम् ? तस्यैव स्वयंप्रकाशत्वात्, इत्याशङ्क्याभिप्रायमाह—*द्रष्टृरूपेणेति ॥ अन्यथेति* ॥ तदभाव

तत्त्वदीपनम्

अप्रकाशनस्यानुभवसिद्धत्वान्न तत्र प्रमाणापेक्षा, तत'श्चाभिहितमि'त्युक्तमित्याशङ्कयाग्रहणे न प्रमाणोप-न्यासः, किंतु तद्ग्रहणप्रतिबन्ध इत्याह—*एकत्वेनेति* ॥ संविद्भेदप्रकाशप्रतिबन्धे प्रमाणाभावोऽसिद्ध इति चोदयति—*नन्विति* ॥ बुद्धिवेद्यत्वादित्युक्ते घटादौ व्यभिचारः, तदर्थम्—*प्रकाशेति विशेषणम्* ॥ प्रकाश इति बुद्धिः प्रकाशबुद्धिः, तद्वेद्यत्वादित्यर्थः। उत्पन्नमात्रविनष्टप्रदीपादिव्यावृत्त्यर्थम्—*स्थायीति विशेषणम्* ॥ स्थायि-बुद्धिवेद्यत्वादित्युक्ते घटादौ व्यभिचारः तदर्थम्—*प्रकाशेति* ॥ स्वरूपासिद्धि-साधनवैकल्ययोः परिहाराय—*बुद्धि-ग्रहणम्* ॥ के ते अनुभव-युक्ती ? यद्विरोध उद्भाव्यते, तत्राह—*पूर्वापरेति* ॥ पूर्वापरकालयोरेकरूपतयाऽनुभव इति यावत्। भेदस्य स्वरूपत्वाद्वस्तुनि प्रतीयमाने भेदोऽपि भासेत, इत्याद्या युक्तिः। अनुभवाभिन्नत्वेनाऽऽत्मनः स्वप्रकाशत्वमुक्तम् ; तदेवोपसंहरणीयम् ; कस्मात्प्रमेयभेदोपाधिनाऽनुभवपदवाच्यत्वमुपसंह्रियते ? इत्याशङ्क्य, तद्व्या-वर्त्यां शङ्कामाह—*कथमिति* ॥ विषयानुभव आगन्तुकः, आत्मा तु नित्य इति कथं तयोरेकत्वमित्यर्थः। स्वरूपेण नित्यत्वेऽप्युपाध्युपरक्ततया जन्यत्वं ततो विषयानुभवत्वं च घटत इत्याह—*तदाहेति* ॥

स्वप्रकाशत्वं विषयानुभवत्वं चाङ्गीकृत्य तेन हेतुनाऽहंकारस्यानिदंरूपत्वमुच्यत इति प्रतिभाति, तन्नोप-पद्यते, स्वप्रकाशत्वादेरहंकारात्मतया व्याप्त्यभावादित्याशङ्क्य तात्पर्यमाह—*नन्विति* ॥

टीकायाम्—अतःशब्दव्याख्यानम्—*विषयानुभवनिमित्त इति* ॥ अहंकार आत्मैव इत्यन्वयः। तत्र हेतुमाह—*विषयानुभवमिति* ॥ आत्मनः स्वप्रकाशत्वं विषयानुभवत्वं चाङ्गीकृत्याहंकारस्याऽऽत्मत्वमात्रं पूर्व-

पञ्चपादिका

भिधाननिमित्तैकदेशावस्थाना इव वृक्षा वृक्षादिशब्दैरित्यभ्युपगन्तव्यम्, *बाढम्*; अत एव विषयानुभवनिमित्तोऽनिदमात्मकोऽहङ्कारो वर्ण्यते, *सत्यमेवम्*; किन्तु तथा सति सुषुप्तेऽपि—'अहमि'त्युल्लेखः स्यात्। कथम्? नीलानुषङ्गो यश्चैतन्यस्य, स नीलभोगः, नासावहमुल्लेखार्हः। 'अह-

पञ्चपादिकाविवरणम्

दात्मैवाहङ्कारः संवृत्त इति चोदयति—*बाढमत एवेति*॥ द्रष्टृरूपेण परामर्शस्य विषयानुभवो निमित्तम्; अन्यथा द्रष्ट्रादिविभागशून्यश्चिन्मात्राभासः स्यादिति भावः॥ मैवम्; सुषुप्तावात्मन्यवभासमानेऽप्यहङ्कारस्यानवभासमानत्वादिति व्यतिरेकप्रदर्शनेन परिहरति—*सत्यमेवमिति*॥ *ननु* विषयानुभवनिमित्तो द्रष्टृरूपावभासोऽहमुल्लेखः, तद्रहिते सुषुप्ते कथमस्य प्रसङ्गः? इति चोदयति—*कथमिति*॥ विषयानुभवनिमित्तो विषयावभासः स्यात्; जडत्वात्, न तन्निमित्तचिदात्मपरामर्श इति परिहरति—*नीलानुषङ्गो यश्चैतन्यस्येति*॥

ऋजुविवरणम्

इत्यर्थः। यद्वा—विपक्षे बाधकमाह—*अन्यथेति*॥ अहंकारस्यात्मत्वाभावे विषयानुभवस्य तत्र हेतुत्वाभावे वा कदाचिदपि तथा प्रतीतिर्न स्यादित्यर्थः। विषयानुभवनिमित्तो द्रष्टृरूपावभासोऽहमवभास इति चोदिते, "नीलानुषङ्गः" इति ग्रन्थोऽसमञ्जसः; नहि नीलानुषङ्गस्यानुभवत्वकथनं पूर्वचोद्यपरिहार उपयुज्यते, नाप्यनुषङ्गस्यानुभवत्वं संभवति; "नासावहमुल्लेखार्हः"इत्यप्यनुपपन्नम्; नहि तस्याहमुल्लेखार्हत्वमहमित्युल्लेखावभासः, तदर्हत्वं नामाहमिति प्रतीयमानत्वम्; नच तत् पूर्ववादिनाऽप्युच्यते। यद्वा—"नासावहमुल्लेखार्हः"इत्यनेनैवमुक्तम्—अहमित्युल्लेखः संजल्पः, तदर्हत्वं नेति। तत्रापि दूषणं पूर्ववदेव। "अहमित्यात्मे"त्यनुपयोगि; नहि तत्र विप्रतिपत्तिरस्तीत्याशङ्क्य व्याचष्टे---*विषयानुभवनिमित्त इति*॥ अनुषज्यत इत्यनुषङ्ग इति व्युत्पत्तिः प्रदर्शिता। "विषयावभासः" इत्यनेन "नीलभोगः" इति व्याख्यातम्। "तन्निमित्तः"इत्यनेनाहमित्युल्लिख्यते प्रतीयते येन, सोऽहमुल्लेखः=

तत्त्वदीपनम्

पक्षिणा समर्थ्यते; द्रष्टुरात्मत्वात्, द्रष्टा च—'अहमिदं जानामी'ति विषयानुभवमपेक्ष्य प्रथत इत्यहंकारस्याऽऽत्मत्वमित्यर्थः। आत्मनः स्वप्रकाशत्वे विषयानुभवनिमित्तत्वं व्याहतमित्याशङ्क्याह—*द्रष्टृरूपेणेति*॥ द्रष्टेत्युक्ते कस्य द्रष्टा? इति विषयानुभवसापेक्षत्वमनुभवसिद्धमित्यर्थः। उक्तमर्थं व्यतिरेकमुखेनोपपादयति—*अन्यथेति*॥ यद्यपि चिन्मात्रं स्वप्रकाशम्; तथाऽपि विषयसंवित्कर्तृरूपप्रतिपत्तेरन्याधीनत्वमित्यभिप्रायः॥

अहंकारस्याऽऽत्मत्वे सुषुप्तावप्यहमुल्लेखः स्यादित्युक्तम्, तत् कस्मात्? इति वीक्षायामाह—*मैवमिति*॥ "अत्रायं पुरुषः स्वयंज्योति"रित्यादिवाक्यात् सुषुप्तावात्मस्फुरणमवसितम्, तन्मात्रत्वादहंकारस्यापि स्फुरणं स्यात्, न तदस्ति। तथाच प्रयोगः—अहंकारः, नाऽऽत्मा, असति प्रतिबन्धे तस्मिन् भासमाने सत्यनवभासमानत्वात्; घटवदित्यर्थः। सत्यमित्यादेरयमर्थः—विषयानुभवनिमित्तोऽहंकार इत्युक्तमङ्गीकरोति—*सत्यमेवमिति*॥ तर्हि तस्यैवाऽऽत्मत्वं प्राप्तमित्याह—*किंत्विति*॥ अहम आत्मत्व आत्मप्रतिपत्तावितरस्यापि प्रतिपत्तिः स्यात्, न च तथा समस्तीत्याह—*तथा सतीति*॥ अन्यथासिद्धो हेतुरिति चोदयति—*नन्विति*॥ अनुभवनिमित्तत्वे हेतुमाह—*द्रष्टृरूपेति*॥ अहमुल्लेखस्य विषयानुभवव्याप्यत्वात्तदभाव इत्यर्थः॥

स्वप्रकाशत्वेन साधितं यच्चैतन्यं तदेवाहंशब्दार्थः? आहो अन्यत्? इति विकल्प्याऽऽद्ये विषयानुभवनिमित्ता सिद्धिरित्याह—*विषयेति*॥ विषयावभासोऽनुभवनिमित्तः स्यात्; जडत्वात्। तथाऽनुभवस्य विषयाकारत्वाच्च तदनुभवनिमित्तत्वं विषयावभासस्योचितमित्यर्थः। ततो वैलक्षण्यमाह—*न तदिति*॥ विषयानुभवस्याऽऽत्मानाकारत्वान्न तत्साधकत्वम्, आत्मनः संविद्रूपत्वाच्च न तदधीनसिद्धित्वमित्यर्थः। टीकायाम्—*"नीलभोगः"

पञ्चपादिका

मि'त्यात्माऽवभासते। तत्र यदि नाम सुषुप्ते विषयानुषङ्गाभावात्—इदं जानामी'ति विषय-तदनुभवपरामर्शो नास्ति, मा भूत्; अहमित्यात्ममात्रपरामर्शः किमिति न भवेत्?

ननु अहमिति भोक्तृत्वं प्रतिभासते, तदभावे कथं तथा प्रतिभासः? *नैतत्सारम्*;

पञ्चपादिकाविवरणम्

*ननु सुषुप्ते द्रष्टृरूपाभावे कथमहमिति तत्परामर्शः? नेत्याह—*तत्र यदि नामेति* ॥ द्रष्टृत्वं सप्रतियोगिरूपम्, स चेदमहमर्थः, अनात्मैवाहङ्कारः स्यादिति भावः ॥

ननु पराग्व्यावृत्तं द्रष्टृरूपं भोक्तृत्वमेव, तत् सुषुप्तावनुभूयत इति चोदयति—*नन्वहमिति* ॥ न;

ऋजुविवरणम्

ज्ञानम्। यद्वा—उल्लिख्यत इत्युल्लेखः=आत्मेति। अर्हत्वं निमित्तेत्यनेन व्याख्यातम्। *एतदुक्तं भवति*—यदवच्छिन्नं ज्ञानम्, तस्यावभासकविषयावच्छिन्नत्वकथनं तस्यैवावभासकत्वमिति दर्शयितुम्, अहमित्यात्मेत्येवं तदाकारेणैव तदवभास इति दर्शयितुम्। यद्वा—पूर्वचोद्यपरिहारत्वेनायं ग्रन्थ एवं व्याख्यातः। चैतन्यानुषङ्गकथनं तस्य जडत्वेन तदवभासत्वमिति दर्शयितुम्, "अहमित्यात्मे"त्यनेन प्रत्यग्रूपत्वादस्य तदनवभास्यत्वमिति दर्शितं नीलानुषङ्ग इत्यनेनैव ग्रन्थेन, पूर्वेण च विषयानुभवनिमित्तत्वासंभवात्सुषुप्तावहमवभास आपादितः। "तत्र यदि नामे"त्यनेनापि तदेवाऽऽपाद्यते, अतः पौनरुक्त्यमित्याशङ्क्य, पूर्वं स्वरूपमात्रस्याहंकारत्वेऽपि विषयानुभवनिमित्तत्वं न संभवतीति दूषणमुक्तम्, इदानीं रूपान्तरविषयत्वेन पूर्वग्रन्थादाधिक्यं दर्शयितुम्—मा भूदन्याधीनत्वम्, स्वतोऽपि कथं तत्प्रतीतिरापाद्यत इति शङ्कां दर्शयति—*ननु सुषुप्त इति* ॥ अत्रैवं ग्रन्थद्वयं व्याख्यातं विज्ञेयम्। विषयानुभवनिमित्त इति चोद्ये कृते विकल्पः—किं स्वरूपमात्रस्याहंकारत्वं विषयानुभवनिमित्तत्वं च? उतातिरिक्तस्येति? तत्र प्रथमपक्षे नीलानुषङ्ग इत्यनेन दूषणम्, द्वितीयस्य त्वनेनानुवाद इति। तर्हि "तत्र यदि नामे"त्यनेनाहमित्यत्रात्ममात्रप्रतीतिः कथमापाद्यते? नहि तेनात्ममात्रस्याहंकारत्वमुक्तम्, अतो नात्र किञ्चिद् दूषणमुक्तम्, इत्याशङ्क्याभिप्रायमाह—*द्रष्टृत्वमिति* ॥ "नन्वहमिति भोक्तृत्वमि"ति चोद्यमनुपपन्नम्; पूर्वोक्तदूषणसाम्यात्, भोग्यप्रतियोगिकस्य प्रतीतिश्चानुपपन्ना; तथा "तदभावे"इत्यप्यनुपपन्नम्। किमनेन तस्याहंकारस्याभावात् कथं तत्प्रतीतिरापाद्यत इत्युच्यते? किं वा तदभावे तथा प्रतीतिरेव कथं घटते; अतः प्रतीतिसामर्थ्यादेव तदस्तित्वं निश्चीयत इति? उभयथाऽप्यहंकारस्यात्मव्यतिरिक्तसिद्धिः। "प्रतीतिसामर्थ्यादि"ति चानुपपन्नम्; सुषुप्तौ भोक्तृत्वप्रतिपत्तेरेवासिद्धत्वात्, प्रतिज्ञाहानिर्नाम निग्रहस्थानं चेत्याशङ्क्य व्याचष्टे—*ननु पराग्व्यावृत्तमिति* ॥ यद् द्रष्टृरूपं पराग्व्यावृत्तं तद्भोक्तृत्वं भोगः, चिदवसानता यतः। पूर्वं सप्रतियोगि-

तत्त्वदीपनम्

इति* ॥ नीलसिद्धिरित्यर्थः। *अहमुल्लेखार्ह इति* ॥ अहमुल्लेखनिमित्त इति यावत्। तत्र हेतुमाह—*अहमिति* ॥ नीलज्ञानस्येदन्तया नीलभासकत्वात् कथमनिदमस्तदधीनसिद्धित्वमित्यर्थः। द्वितीयमुत्थापयति—*ननु सुषुप्ते इति* ॥ दर्शनक्रियाकर्तृरूपस्याहंप्रतीतिविषयत्वम्, दर्शनक्रियायाश्च सुषुप्तावभावात्तत्कर्तुरभावः, तस्मात्तत्र कथमहमुल्लेखप्रसङ्ग इत्यर्थः ॥

विशिष्टाप्रतिपत्तावप्यात्ममात्रप्रतिपत्तिः स्यादित्याह—*नेत्याहेति* ॥ विशेषितस्यैवाहंशब्दार्थत्वात्तदभावे कथमहमुल्लेखः? इत्याशङ्क्याह—*द्रष्टृत्वमिति* ॥ अहंकारः, नाऽऽत्मा, सप्रतियोगिकत्वात्, विनश्वरत्वाच्च; घटवत्। यतो निष्प्रतियोगिकस्याहंशब्दार्थत्वम्, ततश्च तस्याऽऽत्मत्वे सुषुप्तावप्यहमुल्लेखप्रसङ्गः, नच दृश्यते; तस्मादहंकारस्यानात्मत्वमित्यर्थः। अन्यथासिद्धिं निराकृत्यासिद्धिं शङ्कते—*नन्विति* ॥ पराग्व्यावृत्तं यद्भोक्तृत्वम्, तदेव द्रष्टृरूपमित्यन्वयः। *पराग्व्यावृत्तमिति* ॥ विषयसंबन्धवर्जितमित्यर्थः। निर्विकल्पकं यच्चैतन्यम्, तदहङ्कार-

पञ्चपादिका

समुत्कालितोपाधिविशेषं चैतन्यमात्रमस्मदर्थः, ततः सर्वदाऽहमिति स्यात्, नैतच्छक्यम् ; उपाधिपरामर्शेन

पञ्चपादिकाविवरणम्

अहङ्कारस्य त्वया निष्प्रतियोगिकात्ममात्रत्वाभ्युपगमादिति परिहरति—*नैतत्सारमिति* ॥ *ननु* स्वरूपमपि विषयानुभावादेवाहमिति व्यज्यताम्, नेत्याह—*नैतच्छक्यमिति* ॥ ततश्च विषयोपरक्तसप्रतियोगिकस्व-

ऋजुविवरणम्

कस्याहंकारत्वे नात्मनोऽहंकारत्वमित्युक्तम्, अनेन सप्रतियोगिस्वरूपस्यैवाहंकारत्वमित्यङ्गीकृत्य चोद्यम्। भोक्तृत्वं सप्रतियोगिकमप्यात्मस्वरूपमङ्गीकृतमिति तन्मुखेन चोद्यं कृतम्। एतदुक्तं भवति—पराक्सम्बन्धं यद् द्रष्टृरूपं तदहमुल्लेखार्हम्, अत्र तु तद्वियुक्तम्। अतो नाहमुल्लेखार्हम्। "भोक्तृत्वमेवे"त्यवधारणेन विषयसम्बन्धो व्यावर्तितः। स्वरूपस्यैवाहंकारत्वमित्यङ्गीकृत्य चोद्यम्, "अहमिति भोक्तृत्वमि"त्यनेनाहंकारस्वरूपानुवादः ; "तदभावे"इत्यनेन सुषुप्तौ विषयसम्बन्धरूपाभावाद् नाहमुल्लेख इत्युक्तमिति दर्शितम्, अवभासकत्वं चात्मन एव। ततश्चात्मैवाहंकार इति न पूर्वोक्तदूषणमिति भावः। द्रष्टृरूपग्रहणं प्रकृतविषयमेव चोद्यमिति दर्शयितुम् ॥ अत्र संग्रहः—

दृश्यावभासरूपेण भोक्तेत्युच्येत चेतनः। अहंरूपत्वमस्यापि तस्मात् तद्भावभावतः ॥
इत्यहंकल्पना नैव सुषुप्तौ भागिनी भवेत्। भासकस्यात्मरूपत्वादनात्मत्वनिराकृतिः ॥ इति ॥

अथवा—"नन्वहमि"ति ग्रन्थोऽनुपपन्नः ; नहि सुषुप्तौ भोक्तृत्वं नास्ति ; चिदवभासत्वाद्भोगस्य, इत्याशङ्क्य व्याचष्टे—*पराग्व्यावृत्तमिति* ॥ कथं सुषुप्तावनुभूयत इति वा पाठः। तत्रापि "नन्वहमि"ति टीकाग्रन्थे भोक्तृत्वप्रतिभासः सुषुप्तावस्तीति चोदितमिव प्रतिभाति ; तन्निवृत्त्यर्थमवतारयति—*ननु पराग्व्यावृत्तं द्रष्टृरूपं भोक्तृत्वमेव कथमिति ? यद्वा—निष्प्रतियोगिकत्वमेवाङ्गीकृत्य चोद्यमित्यवतारयति—*ननु पराग्व्यावृत्तमिति* ॥ द्रष्टृरूपं पराग्व्यावृत्तम्, सुषुप्तौ तु तद्रूपं भोक्तृत्वमेवानुभूयते, नतु व्यावृत्तम्, व्यावृत्तरूपमेव चाहमित्युच्यत इति नाहमुल्लेखप्राप्तिः सुषुप्ताविति ॥ "समुत्कालिते"त्यदूषणम् ; अङ्गीकृतत्वात्, नापि प्रतीत्यापादनं युक्तम् ; पौनरुक्त्यात्, परसापेक्षत्वस्याप्युक्तत्वात्, इत्याशङ्क्य तत्र व्यावृत्तस्वरूपस्याहंकारत्वे सप्रतियोगिकत्वं भवेत्, ततश्चाभ्युपगमविरोध इति परिहाराभिप्रायमाह—*नाहंकारस्येति* ॥ सप्रतियोगिकत्वेऽभ्युपगमविरोधो व्यक्त एव। *ननु*—स्वत एव व्यावृत्तं वस्तु, नान्यतः ; प्रतीतिमात्रं तु पराधीनं भेदस्येव, अतो नाभ्युपगमविरोध इति शङ्कते—*ननु स्वरूपमपीति*॥ तत्र भेदादेर्गृहीते स्वरूपे पराधीनाभिव्यक्ते न स्वरूपतावन्मात्रता ; अतश्चात्र निष्प्रतियोगिकत्वसिद्ध्यर्थं स्वरूपतावन्मात्रत्वमेवाङ्गीकर्तव्यम्? अन्याधीनत्वसिद्ध्यर्थं वा सप्रतियोगिकत्वम्? प्रथमपक्षे दूषणमाह—*नैतच्छक्यमिति* ॥ यद्वा—परिमाणे भवतु, अत्र तु निरंशे स्वप्रकाशे न तथेति भावः। द्वितीयपक्षे दूषणत्वेनोत्तरग्रन्थमवतारयति—

तत्त्वदीपनम्

शब्दार्थः। स च सुषुप्तौ भासत एवेति हेत्वसिद्धिरित्यर्थः। "कथं तत्सुषुप्तावि"ति पाठे त्वयमर्थः—सप्रतियोगित्वेनानात्मत्वं प्रत्यक्षविरुद्धमिति शङ्कते—*ननु पराग्व्यावृत्तमिति* ॥ अनात्मभ्यो व्यावृत्ततयाऽहमित्यनुभूयमानस्य कथमनात्मत्वमित्यर्थः। तर्हि सुषुप्तावप्यहमुल्लेखः स्यादित्युक्तम्, तत्राह—*कथमिति* ॥ विषयानुभवाभावान्न तत्राहङ्कारानुभवप्रसङ्ग इत्यर्थः। पूर्वव्याख्यायां तदभाव इति टीकाया एषोऽर्थः—

चिन्मात्रं सुषुप्तौ भाति चेत्, अहमुल्लेखोऽपि स्यादित्याशङ्क्याह—*तदभावे इति* ॥ विषयानुभवाभावे सुषुप्तौ नाहमुल्लेखप्रसक्तिः, तन्निमित्तत्वादहंशब्दोल्लेखस्य, यथा प्रादेशमात्रपरिमितं प्रतियोगिनिरपेक्षतया प्रतीयमानं ह्रस्वशब्दोल्लेखितया प्रतिपत्तौ प्रतियोगिनमपेक्षते, तद्वदित्यर्थः। गूढाभिसन्धिरुत्तरमाह—*नाहंकारस्येति* ॥ गूढाभिसन्धिमजानानः शङ्कते—*नन्विति। स्वरूपमिति* ॥ निष्प्रतियोगिकमिति यावत्। प्रादेशमात्रपरिमितवस्तुनः स्वरूपेणानपेक्षितत्वेऽपि ह्रस्वशब्दोल्लिखितप्रतिपत्तावन्यापेक्षावदित्यर्थः। निष्प्रतियोगिकात्ममात्रस्याहं-

पञ्चपादिका

चैतन्यमहमित्युल्लिख्यत इति वक्तुम्; तत्परामर्शो हि तत्सिद्धिनिमित्तः, न स्वरूपसिद्धिहेतुः। स्वमाहात्म्येनैव तु स्वरूपसिद्धिः। ततश्च विषयोपरागानुभवात्मत्वशून्यः स्वरूपतोऽहमिति सुषुप्तेऽप्यवभासेत; दृशिरूपत्वाविशेषात्। भवत्येवेति चेत्, न; तथा सति स्मर्येत ह्यस्तन इवाहङ्कारः। अविनाशिनः संस्काराभावान्न स्मर्यत इति चेत्, ह्यस्तनोऽपि न स्मर्येत॥

पञ्चपादिकाविवरणम्

भावस्याहङ्कारस्यात्मत्वं सुषुप्तावनुभवविरुद्धमिदमापत्स्यत इत्याह—*ततश्च विषयोपरागेति*॥ आत्मनस्तु सर्वात्मकत्वान्न पराग्व्यावृत्तता, अहमुपरागादेव व्यावृत्त्यवभास इत्यर्थः। *भवत्येवेत्यादिः स्पष्टार्थः*॥ यथा पूर्वस्मिन् दिनेऽहमित्यभिमन्यमान एवासम्, एवमनुभूते स्मृतिनियमाभावेऽपि स्मर्यमाणात्ममात्रत्वादहङ्कारस्य सुषुप्तेऽपि स्मृतिः स्यादित्यर्थः। अहङ्कारादिप्रतिभासस्य नित्यचैतन्यरूपस्याविनाशात्तज्जन्यसंस्कारप्रसूता स्मृतिरनुपपन्नेति चोदयति—*अविनाशिनः संस्काराभावादिति*॥ परिहारः—*ह्यस्तनोऽपीति*॥

ननु सिद्धान्ते कथमहङ्कारस्मृतिः? तदवभासिसाक्षिचैतन्यस्य नित्यत्वात्, *उच्यते*—अहंवृत्त्यवच्छिन्नमेवान्तःकरणं चैतन्यस्य विषयभावमापद्यते, तद्वृत्तिसंस्कारजन्यस्मरणावच्छिन्नमन्तःकरणं पुनः

ऋजुविवरणम्

ततश्चेति॥ अतश्च टीकायां पौनरुक्त्यं परिहृतम्। *ननु* कथं सप्रतियोगिकत्वेनाहंकारस्यात्मत्वं निराक्रियते? *सप्रतियोगिकजडव्यावृत्तेरात्मरूपत्वात्। यद्वा—व्यावृत्तेर्न सप्रतियोगिकत्वम्; त्वयाऽपि स्वरूपस्याङ्गीकृतत्वात्, इत्याशङ्क्य व्याचष्टे—*आत्मनस्त्विति*॥ कथमहंकारस्मृतिरापाद्यते? अनुभूते स्मृतिनियमाभावादित्याशङ्क्य व्याचष्टे—*यथा पूर्वस्मिन्निति*॥ "अविनाशिनः" इत्यनेनाहंकारनिर्देशशङ्का स्यात्; सन्निधानात्, ततश्चाविनाशिन इत्यसाधको हेतुः, न ह्यहंकाराविनाशः संस्काराभावे हेतुरित्याशङ्क्य साभिप्रायमवतारयति—*अहंकारप्रतिभासस्येति*॥ *अहंवृत्त्यवच्छिन्नमिति*॥ अहंकारवृत्त्यवच्छिन्नचैतन्यस्य

तत्त्वदीपनम्

शब्दार्थत्वे प्रतियोगिनैरपेक्ष्यं दृष्टम्, दृष्टान्ते तु प्रमेयभेदस्य विद्यमानत्वात् सापेक्षत्वमिति वैषम्यमित्याशयेनाह—*नेत्याहेति*॥ अहंकारस्य सापेक्षत्वादात्मनश्चानपेक्षत्वात् कथमभेद इत्याह—*ततश्चेति*॥ सप्रतियोगिकस्यानात्मत्वं चेत्, तर्हि त्वन्मतेऽप्यात्मनः पराग्व्यावृत्तत्वादनात्मत्वापात इत्याशङ्क्याऽऽत्मनः पूर्णत्वाद् व्यावृत्तत्वासिद्धिरित्याह—*आत्मन इति*॥ 'अहमि'त्युक्ते व्यावृत्तता प्रथत इत्याशङ्क्य प्रथनमन्यथयति—*अहमिति*॥ उत्थितस्याहमिति यद् ज्ञानम् तत् स्मरणम्; ततश्च स्मर्येतेति नानिष्टमित्यत आह—*यथेति*॥ यथा पूर्वस्मिन् दिने 'अहमि'त्यभिमन्यमान आसम्, तथा सुषुप्तावप्य'हमि'त्यभिमन्यमान आसमित्युत्थितस्य स्मृतिः स्यादित्यर्थः। अनुभूते स्मृतिनियमाभावात् कथं स्मरणापादनम्? इत्याशङ्क्याह—*अनुभूत इति*। आत्मनः स्मर्यमाणत्वात्तद्रूपाभिन्नोऽहंकारोऽपि स्मर्येतेत्यर्थः। एतदभिप्रेत्योक्तम्—*ह्यस्तन इवेति*॥

अहंकारस्याविनाशित्वेन स्मरणाभावाभिधानमयुक्तम्; स्थितेऽपि स्मरणदर्शनादित्याशङ्क्याह—*अहंकारेति*॥ "अविनाशिनः" इत्यत्राहंकारस्याविनाशित्वेन स्मरणाभावं न ब्रूमः, किंतु तद्बोधिचैतन्यस्य नित्यतयेत्यर्थः। ह्यस्तनाहंकारस्यानुभवाश्रयत्वेनोपलम्भात्तस्य चानुभवस्य विनाशित्वेन स्मरणोपपत्तेः—"न स्मर्येत" इत्ययं परिहाराभास इत्याशङ्क्याह—*परिहार इति*॥ अनुभवाश्रयत्वस्य प्राग् निरस्तत्वात् परिहारो भवत्येवेत्यर्थः। अहंकारबोधिचैतन्यस्यानित्यत्वेऽपि यथा त्वन्मते तत्स्मरणम्, तद्वद् ममापीति शङ्कते—*नन्विति*॥ चिन्मात्रस्य नित्यत्वेऽपि विशिष्टाऽऽकारस्यानित्यत्वात् स्मरणं युक्तमित्याह—*उच्यत इति*॥ अहंकाराऽऽकारा काचिदन्तःकरणवृत्तिरुत्पद्यते, तस्यां वृत्तावभिव्यक्तं चैतन्यं वृत्तिविशिष्टान्तःकरणसाधकम्, तस्याश्च वृत्तेर्नाशे तत्संस्कारादन्तःकरणाऽऽकारं स्मरणमुपजायते।

पञ्चपादिका

ननु अस्त्येव सुषुप्तेऽहमनुभवः—'सुखमहमस्वाप्समि'ति ; सुषुप्तोत्थितस्य स्वापसुखानुभवपरामर्शदर्शनात्, नात्मनोऽन्यस्य तत्रानुभवः सम्भवति, *सत्यमस्ति* ; न तत् स्वापे सुखानुभवसंस्कारजं स्मरणम्, किं तर्हि? सुखावमर्शो दुःखाभावनिमित्तः, कथम्? स्वप्ने तावदस्त्येव दुःखानुभवः, सुषुप्ते तु तदभावात् सुखव्यपदेशः। तदभावश्च करणव्यापारोपरमात्। यदि पुनः 'सुप्तः

पञ्चपादिकाविवरणम्

स्मृत्यनुभवावच्छेदकमिति स्मरणोपपत्तिः। *ननु* सुषुप्तावनुभूतसुखस्याप्याश्रयपक्षपातितयाऽहमुल्लेखादस्त्येव सुषुप्तेऽहमनुभव इत्याह—*नन्वस्त्येव सुषुप्तेऽहमनुभव इति*॥ *ननु* सुखमनुभूतं चेत्, तस्य विषयत्वाद् विषयानुभवनिमित्त एव तत्राऽप्यहमुल्लेखः स्यादिति, नेत्याह—*नात्मनोऽन्यस्येति*॥ *सत्यमस्तीत्यादिः स्पष्टार्थः*॥ *ननु* सुखावमर्शस्य मुख्यसुखालम्बनत्वं परित्यज्य कथं विरोधिदुःखाभावविषयतयोपचारः कल्प्यते? शाब्दे हि ज्ञाने लक्षणा स्यात्, प्रत्यक्षस्तु सुखावमर्शो न लक्षणामर्हतीति चोदयति—*कथमिति*॥ मुख्यसुखाभावाद् दुःखाभावस्य लक्ष्यस्य संप्रतिपन्नत्वादिति परिहरति—*स्वप्ने तावदित्यादिना*॥

ननु परामर्शसामर्थ्यादेव मुख्यमेव सुखं कल्प्यतामिति, नेत्याह—*यदि पुनः सुप्तः सुखमिति॥ विशेषत

ऋजुविवरणम्

तन्नाशे नाशात् संस्कारः, स्मरणं चोपपद्यत इत्यर्थः। "नन्वस्त्येवे"त्ययुक्तम्; नहि 'सुखमहमस्वाप्समि'त्युत्थितस्य परामर्शस्तदानीमहमवभासकसाधकः; व्यधिकरणत्वादित्याशङ्क्यावतारयति—*ननु सुषुप्ताविति*॥ "नात्मनोऽन्यस्ये"ति व्याहतम्; सुखानुभवाङ्गीकारात्, नापि परिहारोऽयम्; उत्तरेण पौनरुक्त्यादित्याशङ्क्याह—*ननु सुखमिति*॥ "स्वप्ने तावदि"त्यनेन स्वस्वप्ने दुःखानुभवप्रदर्शनं सुषुप्तौ तदभावप्रदर्शनं च व्यधिकरणम्;

तत्त्वदीपनम्

ततः कथं स्मृत्यसंभवः? नच तथा त्वयाऽऽश्रीयत इति वैषम्यमित्यर्थः। *स्मृत्यनुभवेति*॥ अन्तःकरणाऽऽकारस्मृतावभिव्यक्तानुभवस्यावच्छेदकं विशेषकमिति यावत्॥

उत्थितस्य स्वापकालीनसुखानुभवपरामर्शमात्रेण कथं सुषुप्तावहमुल्लेखकल्पना? वैयधिकरण्यादित्याशङ्क्याह—*नन्विति*॥ सुषुप्तेऽप्यहमनुभवोऽस्तीति सम्बन्धः। तत्र कल्पकमाह—*सुषुप्तावनुभूतसुखस्येति*॥ अनुभूतं सुखं येन पुंसा, असावनुभूतसुखः; तस्येति विग्रहः। तस्यानुभवपदेन संबन्धः। अनुभूतसुखस्य पुरुषस्येत्यर्थः। तत्र सुखानुभवाभावेऽप्यनुभवितुः कथमनुभवः? तत्राह—*आश्रयेति*॥ आश्रय-विषयकोट्योराश्रयकोटिपक्षपातित्वेनाऽऽत्मनः स्फुरणादित्यर्थः। अहमनुभवः सुषुप्तेऽस्त्येवेत्यन्वयः। सुषुप्तौ सुखानुभवमाक्षिपति—*नन्विति*॥ सुषुप्तौ विषयानुभवाभावान्न तन्निमित्तः सुखानुभव इत्यर्थः। विषयानुभवाभावेऽपि परामर्शानुपपत्त्या सुखानुभवः कल्प्यते, इतरथा न तदाश्रयतयाऽहमुल्लेख इत्याह—*नेत्याहेति*॥ सुखावमर्शस्य दुःखाभावविषयत्वमाक्षिपति—*ननु सुखेति*॥ इतोऽपि नोपचार इत्याह—*शाब्द इति*॥ लक्षणायाः शब्दधर्मत्वादितरत्र न तत्कल्पनमित्यर्थः। अशाब्दत्वाभिप्रायेणावमर्शे प्रत्यक्षत्वव्यपदेश इत्यर्थः॥

"स्वप्ने तावदि"त्यत्र मुख्यार्थपरित्यागहेत्वनभिधानादसंगतिरित्याशङ्क्याह—*मुख्येति*॥ न तावत् सुषुप्तावागन्तुकसुखसंभवः; तत्कारणाभावात, नापि नित्यं सुखम्; तत्र प्रमाणाभावादित्यर्थः॥ दुःखाभावस्यापि नालम्बनत्वम्; अश्मादौ प्रसक्तेः, इत्याशङ्क्य सुखात्तावद्वैषम्यमाह—*दुःखाभावस्येति*॥ प्रतियोगिसमानाधिकरणदुःखाभावस्य सुखशब्दप्रवृत्तिनिमित्तत्वाङ्गीकारान्नातिप्रसक्तिरित्यभिसन्धायोक्तम्—*स्वप्ने तावदिति*॥ विमतः, दुःखसंबन्धी, मुक्तिविलक्षणावस्थासंबन्धित्वात; संमतवदित्याशङ्क्याह—*तदभाव इति*॥ सविकल्पकस्य शब्दोल्लिखितत्वात्तत्र लक्षणा युक्तेत्यर्थः। मुख्याभावोऽसिद्ध इति चोदयति—*नन्विति*॥ दुःखव्यावृत्ततया सुखस्यानुभूयमानत्वाद् विशेषतः स्मर्यतेत्येतद्दिष्टमित्याह—*विशेषत इति*॥ चन्दन-गानादिर्विषयविशेषशब्दार्थः॥

पञ्चपादिका

सुखमि'ति च तद्विषयं स्मरणं स्यात्, तदा विशेषतः स्मर्येत, नच तदस्ति। व्यपदेशोऽपि 'सुखं सुप्तः' 'न किंचिन्मया चेतितमि'ति हि दृश्यते। यत्पुनः सुप्तोत्थितस्याङ्गलाघवेन्द्रियप्रसादादिना सुखानुभवोन्नयनमिति, तदसत्; अनुभूतं चेत्सुखं स्मर्येत, न तत्र लिङ्गेन प्रयोजनम्। यद्येवम्, सुप्तोत्थितस्य कथं कस्यचिदङ्गलाघवं कस्य चिन्नेति? उच्यते; जागरणे कार्यकरणानि श्राम्यन्ति;

पञ्चपादिकाविवरणम्

इति* ॥ विषयविशेषोपरक्ततयैवेत्यर्थः। दुःखाभाव एव परामर्शविषय इत्यत्र लिङ्गमाह—*व्यपदेशोऽपीति*॥ *ननु* सुखानुभवस्यापि लिङ्गमस्ति प्रसन्नेन्द्रियत्वादीति, तत्राह—*यत्पुनः सुप्तोत्थितस्येति* ॥ *तदसदिति स्पष्टार्थः*। उत्तरौ च चोद्यपरिहारग्रन्थौ स्पष्टार्थौ। तस्माच्च सुपुप्तौ भोक्तृतयाऽप्यहमुल्लेखोऽनुस्मर्यत इति। *ननु* अनुभूतेऽपि न स्मृतिनियमः, *सत्यम्*; आत्मन्यनुस्मर्यमाणे तावन्मात्रस्याहङ्कारस्य 'अहमि'त्येव स्मृतिनियमः स्यादित्युक्तम् ॥

ननु—दुःखाभावो विद्यमानोऽपि नानुभवितुं शक्यते; प्रतियोगिस्मरणाभावात्, सम्भवति च मुख्य एव स्वरूपानन्दानुभवः। *ननु* तदपि सुखमविद्याऽऽवृतं न प्रकाशमर्हति, *न*; अनावृतसाक्षिचैतन्यसुखांशस्य प्रकाशोपपत्तेः। जागरणे तर्हि किमिति नावभासते? भासत एव परमप्रेमास्पदत्वलक्षणं सुखम्, तीव्रवायु-

ऋजुविवरणम्

प्रकृतचोद्यस्यापरिहारात्, इत्याशङ्क्याह—*मुख्यसुखाभावादिति* ॥ *ननु*—दुःखादिव्यावृत्तमात्मगतत्वेन च सुखमनुभूयते; तत् कथं विशेषत इत्यनिष्टत्वेनोक्तम्? इत्याशङ्क्य व्याचष्टे—*विषयविशेषेति* ॥ "व्यपदेशोऽपी"ति व्यर्थम्; इष्टविघाताव्यधिकरणत्वात्, इत्याशङ्क्याह—*दुःखाभाव एवेति* ॥ "सत्यमस्ती"त्यादिटीकाग्रन्थमाक्षिपति—*ननु दुःखाभाव इति* ॥ *ननु*—सुखानुभवोऽपि न संभवति; विषयजन्यत्वात्, इत्याशङ्क्याह—*संभवति च मुख्य एवेति* ॥ मा भूद् दुःखाभावस्मरणम्, ज्ञानाभावस्मरणं तु दृश्यते, तत् कथं

तत्त्वदीपनम्

अस्मर्यमाणत्वात् सुप्तौ न सुखानुभव इत्यभिज्ञावद् 'व्यपदेशोऽपि—सुखं सुप्तः—' इति कस्मादुदाहृतम्? इष्टविघातापत्तेरित्याशङ्क्याह—*दुःखाभाव एवेति*॥ सुखं सुप्त इत्येतद्विवृणोति—*न किंचिदिति*॥ सुप्तौ सुखानुभवस्य कल्पकसद्भावात् स आश्रयणीय इति शङ्कते—*ननु सुखेति* ॥ प्रतितर्कात् पराहतिमाह—*तदसदिति* ॥ टीकायामपेक्षितं पूरयति—*तस्मादिति। भोक्तृतयेति* ॥ सुखानुभवाश्रयतयेति यावत्। सुपुप्तावहमुल्लेखसाधकं च नेत्याह—*अनुस्मर्यत इति* ॥ नञ्पदमत्राप्यनुपज्यते। अस्मर्यमाणत्वान्न सुपुप्तौ तदनुभव इत्यर्थः। उक्तौ चोद्यपरिहारौ स्मारयति—*नन्वित्यादिना* ॥

"सौषुप्तसुखावमर्शो दुःखाभावनिमित्तः" इत्युक्तं टीकाकृता, तदाक्षिपति—*नन्विति* ॥ किं तत्प्रत्ययः स्मृतिः? उत प्रमाणम्? नाद्य इत्याह—*दुःखेति* ॥ प्रतियोगिस्मरणं धर्मिग्रहणं चाभावप्रतिपत्तौ कारणम्, सुपुप्तौ च तदभावान्नाभावानुभवो युक्त इत्यर्थः; सुखशब्दस्य भावरूपे सुखे प्रसिद्धत्वात्तत्परित्यागेनाभावविषयत्वकल्पनाऽयुक्तः। न द्वितीयोऽपीत्याह—*संभवति चेति* ॥ विषयविशेषाभावात् कथं तत्र सुखानुभवसंभवः? तत्राह—*स्वरूपेति* ॥ स्वरूपसुखानुभवमाक्षिपति—*ननु तदपीति* ॥ स्वप्रकाशात्मस्वरूपत्वात् कथं तदप्रथनम्? इत्याशङ्क्याह—*अविद्याऽऽवृतमिति* ॥ किं पूर्णसुखस्याप्रकाशं ब्रवीषि? उत सुखमात्रस्य? तत्राद्यमङ्गीकृत्य द्वितीयं दूषयति—*न; नावृतेति* ॥ अज्ञानसाधकतया साक्षिणः प्रकाशमानत्वात् तत्स्वरूपसुखानुभवो युक्त इत्यर्थः। साक्षिस्फुरणेऽपि जागरिते यथा न स्वरूपाऽऽनन्दानुभवः, तथा सुपुप्तावपीति चोदयति—*जागरण इति* ॥ जागरिते स्वरूपसुखस्यानुभव एव नेत्युच्यते? उत स्पष्टम्? इति विकल्प्याऽऽद्यं निरस्यति—*भासत इति* ॥ प्रेमास्पदत्वं लक्षणं गमकं

पञ्चपादिका

तदपनुत्तये व्यापारोपरमः स्वापः। तत्र यदि सम्यग् व्यापारोपरमः, तदाऽज्ञानि लघूनि, इतरथा गुरूणीति।

पञ्चपादिकाविवरणम्

विक्षिप्तप्रदीपप्रभावन्मिथ्याज्ञानविक्षिप्ततया न स्पष्टमवभासते, सुषुप्तौ तु तदभावादधिकं व्यज्यत इति॥ *ननु* उत्थितस्य दुःखाभावपरामर्शो विद्यते, स कथं प्रतियोगिज्ञानाभावादननुभूतः परामृश्यते? *उच्यते*—अनुभूतमेव सुखमुत्थितस्यानुस्मर्यमाणं तत्र विरोधिदुःखाभावमर्थापत्त्या गमयति—अनुभूतं चेत् सुखम्, नास्ति दुःखमिति; अतो दुःखाभावो नानुस्मर्यते, किंतु प्रमीयत इति। एवमुत्थितस्य ज्ञानाभावपरामर्शोऽपि ज्ञानविरोधिनोऽज्ञानस्यानुभूततया स्मर्यमाणस्यानुपपत्त्यैव प्रमीयते, नानुस्मर्यते॥

ननु जागरणेऽप्यनुभूयमानमज्ञानं कथं ज्ञानविरोधि स्यात्? *न*; अवस्थाविशेषविशिष्टस्याज्ञानस्य सुषुप्तेऽनुभवात्, तस्य च जागरणेऽपि घटादिज्ञानविरोधितादर्शनात्पटावगमसमये। *ननु* अस्मर्यमाणत्वादेव ज्ञानानां

ऋजुविवरणम्

प्रतियोगिस्मरणाभावे संभवेत्? इत्याशङ्क्याह—*एवमुत्थितस्येति*॥ *ननु—जागरणेऽपीति*॥ विरोधे सति अन्यतरदर्शनादन्याभावनिश्चयः; अत्र तु सहैवैकात्मगतत्वेनानुभूयमानयोः कथं विरोधः? इति भावः। *अवस्थाविशेषविशिष्टस्येति*॥ सर्वाज्ञानत्वं नामावस्थाविशेषः; तेन विशिष्टस्येत्यर्थः। एकाश्रयत्वे सति यद्विषयमज्ञानम्, तद्विषयज्ञानेन विरुद्धयते; तच्च जागरणे पटावगमसमये पटाज्ञानादर्शनाद् घटाज्ञानदर्शनसमये तज्ज्ञानादर्शनाच्च निश्चीयत इत्यर्थः। *ननु*—स्मर्तव्यास्मृत्याऽनुभवाभावनिश्चयोऽपि दृश्यते, राजकुलादागतस्य कस्यचिदुत्तरकाले गजजिज्ञासायामेवं स निश्चिनोति—यदि हि गजोऽनुभूतो भवेत्, स्मर्येतैव, अतः स्मरणानुदयान्नास्तीति; तद्वदत्रापि स्मर्तव्यास्मृत्याऽ-

तत्त्वदीपनम्

यस्य, तत्तथोक्तम्। द्वितीयं प्रत्याह—*तीव्रेति*॥ स्वरूपसुखत्वाविशेषादाच्छादकाविशेषाच्च सुप्तौ न स्पष्टानुभव इत्याशङ्क्याह—*सुषुप्ताविति*॥ परामर्शमङ्गीकृत्य दुःखाभावे परामर्शमाक्षिपति—*ननूत्थितस्येति*॥ 'निर्दुःखमस्वाप्समि'त्यभावपरामर्शो दृश्यते, स नोपपद्यते; प्रतियोगिस्मृत्यभावे सुप्तौ दुःखाभावासंभवादित्यर्थः॥

अस्मन्मते दुःखाभावज्ञानस्य स्मरणत्वमेव नेत्याह—*उच्यत इति*॥ कथं तर्हि परामर्शः? इत्याशङ्क्याह—*अनुभूतमिति*॥ अर्थापत्तिमभिनयति—*अनुभूतमिति*॥ उत्थितस्य ज्ञानाभावस्मृतिवद् दुःखाभावस्मरणमपि किं न स्यात्? इत्याशङ्क्य दृष्टान्तासंप्रतिपत्तिमाह—*एवमिति*॥ संग्रहवाक्यं विवृणोति—*ज्ञानविरोधिन इति*॥ "प्रमीयते"इत्यत्र ज्ञानाभाव इत्यध्याहारः। ज्ञानाभावस्य स्मर्यमाणत्वमेव किं न स्यात्? तत्राह—*नानुस्मर्यत इति*॥ धर्म्यादिज्ञानाभावान्न ज्ञानाभावानुभवः सुषुप्ताविति, न तत्स्मरणमित्यर्थः॥

अज्ञानस्य ज्ञानविरोधित्वमाक्षिपति—*ननु जागरण इति*॥ किमज्ञानमात्रस्य ज्ञानस्य च विरोधाभावः? उत विशिष्टस्य? तत्राऽऽद्यमङ्गीकृत्य द्वितीयं दूषयति—*नावस्थेति*॥ सुषुप्त्यवस्थाविशेषः। ततः किमित्यत्राह—*तस्य चेति*॥ अज्ञानस्य पटज्ञानाऽऽकारपरिणत्यवस्थायां तदन्याशेषविशेषविज्ञानाभावदर्शनाद्विशिष्टज्ञानाज्ञानयोर्विरोधः सिद्धः। नच—पटज्ञानसमये ज्ञानान्तराभावो विरोध्यज्ञानप्रयुक्तो न भवति, किंत्वन्तःकरणस्य ज्ञानद्वयपरिणामसामर्थ्याभावादिति—वाच्यम्; तस्यासंप्रतिपत्तेरित्यर्थः॥

सुप्तौ विरोध्यज्ञानानुभवं परिकल्प्य तदनुपपत्त्या ज्ञानाभावकल्पनातो वरमस्मर्यमाणत्वलिङ्गेन ज्ञानाभावानुमानमिति चोदयति—*नन्विति*॥ "करणाधिकरणयोरि"त्यनेनाधिकरणेऽपि ल्युट्प्रत्ययाभिधानाद् ज्ञानशब्दस्यात्मवृत्तिता। तथा चात्मनां सुषुप्तौ विषयानुभवे तत्स्मरणं स्यात्, नच तदुपलभ्यते; तस्मात् तत्र ज्ञानाभावानुमानम्। विमतम्, सुषुप्तौ नानुभूतम्, अस्मर्यमाणत्वात्; लोकान्तरवर्तिपदार्थवदित्यर्थः। व्यभिचारित्वान्न हेतुः

पञ्चपादिकाविवरणम्

सुषुप्तौ ज्ञानाभावोऽनुमीयते, *न* ; अतिवृत्तज्ञानानामपि सतामस्मर्यमाणत्वात् । प्रातर्गजाभावोऽपीदानीमनुस्मर्यमाणाद् गजविरोधिपदार्थादर्थापत्त्या प्रमीयते, न गजविषयस्मृत्यनुदयमात्रात्, व्यभिचारित्वात् । तस्माद् विशिष्टाज्ञान-सुखानुभवानुपपत्तिगम्यौ ज्ञानाभाव-दुःखाभावाविति मन्तव्यम् । *ननु* अज्ञान-सुखानुभवयोः साक्षिचैतन्यस्य चाविनाशिनः संस्काराभावे कथमुत्थितस्य त्रयाणामनुस्मरणं स्यात् ? *उच्यते*—अज्ञानगतचैतन्याभासजन्मोपाधित्वादज्ञान-सुख-साक्षिविकल्पानुभवस्य, अज्ञानावस्थाभेदेन चैतन्याभासानां भिन्नत्वात् तद्विनाशसंस्कारजस्मरणमज्ञान-सुख-साक्षिचैतन्याकारमज्ञानविशिष्टात्माश्रयमेव सम्भाव्यते, नान्तःकरणाश्रयमिति ।

ऋजुविवरणम्

प्यभावनिश्चय इत्याशङ्क्याह—*प्रातर्गजाभावोऽपीति* ॥ अज्ञानगतेति* ॥ अज्ञानवृत्तिरज्ञानसुखसाक्ष्याकारोत्पाद्यते, तदवच्छिन्नत्वादिति । *ननु*—चैतन्याभासस्यैकत्वादुत्तरत्रैकाकारमेव भवेदित्याशङ्क्याह—*अज्ञानावस्थाभेदेनेति* ॥ *ननु*—यदाश्रयं स्मरणम्, तदाश्रयोऽनुभवो भवेत्, अन्तःकरणाश्रयं च स्मरणं दृश्यते ; तेनानुभवोऽपि तदाश्रयः स्यात्, ततश्च स्मृत्याश्रयपक्षपातितयाऽहंकारानुभवोऽपीत्याशङ्क्याह—*अज्ञानविशिष्टात्माश्रयमिति* ॥ आत्मविषयोऽहंप्रत्ययो नीलादिप्रत्ययादन्यो न भवतीत्युपसंहृतम्—"तदेवमि"त्यनेन ग्रन्थेन, तदयुक्तम् ; अनुक्तोपसंहारात्, व्याहतश्च ; अन्यत्वनिषेधसामर्थ्यान्नीलादिप्रत्ययस्यैवात्मविषयत्वप्रसङ्गात्, उत्तरग्रन्थविरोधश्च ; तत्र

तत्त्वदीपनम्

सायुरित्याह—*न ; अतिवृत्तेति*॥ अतिवृत्तं ज्ञानं येषाम्, ते अतिवृत्तज्ञाना इति विग्रहः । *अपि सतामिति*॥ सताम् विद्यमानानाम् ; अनुभूतानामप्यस्मर्यमाणत्वदर्शनादित्यर्थः । प्रातः किमत्र त्वया चत्वरदेशे गजोऽन्वभावीति केन चित्पृष्टः सन् ब्रवीति—'कश्चिरमत्र नान्वभूवम्, संप्रति तत्स्मृत्यनुदयादि"तीत्यस्मरणेन ज्ञानाभावानुमानमपि क्वचिद् दृष्टमित्याह—*प्रातरिति* ॥ गजविरोधिपदार्थस्य केवलभूतलस्य स्मर्यमाणस्यानुपपत्त्या गजाभावः प्रमीयत इत्यर्थः । गजाभावस्यानुमेयत्वं किं न स्यादिति ? अत आह—*न गजेति* ॥ प्रकृतमुपसंहरति—*तस्मादिति* ॥

सुषुप्तावज्ञानाद्यनुभवकल्पकाभावान्न तद्बलादभावसिद्धिरिति चोदयति—*नन्विति* ॥ स्मरणमेवानुभवकल्पकमित्यत्राह—*अज्ञानेति* ॥ अज्ञान-सुखानुभवयोः साक्षिबोधकचैतन्यस्य च संस्काराभाव इति संबन्धः । तत्र हेतुः—*अविनाशिन इति* ॥ चशब्दात् साक्ष्यनुभववदज्ञान-सुखानुभवयोरप्यविनाशित्वं सूचयति । अनुभवनाशजसंस्कारस्य स्मृतिमूलत्वादज्ञानादिसाधकसाक्षिणश्चाविनाशात् कथं स्मरणमित्यर्थः । अविनाशिनामिति पाठे तस्य त्रयाणामित्यनेन संबन्धः । अज्ञानादेर्बोधकस्यानाशेऽप्यज्ञानादेर्नाशे तत्सहितानुभवस्यापि नाशात् तत्संस्कारो युज्येतापि, नच तथेत्यभिसन्धायोक्तम्—*अविनाशिनामिति* ॥

चैतन्यस्य स्वरूपेण नित्यत्वेऽपि वैशिष्ट्यस्यानित्यत्वात् स्मरणं युक्तमित्याह—*उच्यत इति* ॥ अज्ञानादेर्नित्यत्वाद्वैशिष्ट्यमपि तथेत्याशङ्क्याह—*अज्ञानेति* ॥ अज्ञानं स्वसुखसाक्ष्याकारेण परिणमते, तत्र च परिणताज्ञाने चैतन्याभास उपजायते, तस्माचाज्ञानादिविशेषानुभव इत्यर्थः । चैतन्याभासस्यैक्यात् कथमाकारविकल्पजनिः ? तत्राह—*अज्ञानेति* ॥ परिणामोऽवस्थाशब्दार्थः । आत्मा, ज्ञानाद्यनुभविता, स्मर्ता चान्तःकरणविशिष्ट इति स्मरणानुभवयोर्वैयधिकरण्यमित्यत आह—*अज्ञानविशिष्टेति* ॥ संस्कारजनकं यदाश्रयम्, तदाश्रयः संस्कार इति नियमः । ततश्च संस्कारजनकस्याज्ञानविशिष्टाश्रयत्वात् संस्कारस्यापि तदाश्रयत्वमिति, तस्यैव स्मर्तृत्वमपीत्यर्थः ॥

अहमित्यन्तःकरणाश्रयत्वमुपलभ्यत इत्यत्राह—*नान्तःकरणेति* ॥ स्मरण-संस्कारयोरेकाश्रयत्वनियमादन्तःकरणस्य सद्भावेऽपि न स्मृत्याश्रयतया स्थितिः ; तस्मादज्ञानविशिष्टाश्रयत्वमुचितमित्यर्थः । असंगतिसमर्थनमुपसंहरति—*सर्वथेति* ॥ अज्ञानविशिष्टाश्रयत्वमन्तःकरणविशिष्टाश्रयत्वं वा सर्वथाशब्दार्थः । अभ्युपगमवादत्वाद्

पञ्चपादिका

तदेवं नायं नीलादिप्रत्ययादन्य एवात्मविषयोऽहंप्रत्ययः, नापि विषयानुभवादेवाहमुल्लेखः। तस्माद् ब्रह्मविदामेकपुण्डरीकस्य लोकानुग्रहैकरसतया सम्यग्ज्ञानप्रवर्तनप्रयोजनकृतशरीरपरिग्रहस्य भगवतो भाष्यकारस्य मतमागमयितव्यम् ॥

पञ्चपादिकाविवरणम्

सर्वथापि सुषुप्तेऽज्ञान-सुखानुभवसम्भवाद् असम्बद्धमिदं टीकाकारेणोक्तमिति, *सत्यम्* ; परमतमाश्रित्येदमुक्तम्, न स्वमतमिति न दोषः ॥

स्वयंप्रकाशत्वाहङ्कारभेदावुपसंहरति—*तदेवं नायं नीलादिप्रत्ययादिति* ॥ अहङ्कारभेदस्याप्युपलक्षणार्थम्। यस्मादात्मनोऽहङ्कारो भिद्यते, तस्मादागममूलभाष्यवचनमुपपन्नमित्याह—*तस्माद् ब्रह्मविदामिति* ॥ कश्चासावागमः ? "स एवाधस्तात्स एवोपरिष्टादि"ति भूमाख्यब्रह्मणः सर्वात्मकत्वमभिधाय—"अथातोऽ·

ऋजुविवरणम्

नीलादिप्रत्ययादहमवभासनिषेधादित्याशङ्क्याह—*स्वयंप्रकाशत्वाहंकारेति* ॥ *ननु*—स्वयंप्रकाशत्वमेवोपसंहृतम् ; विषयानुभवात्, अहमवभासनिषेधश्च ; नाहंकारभेद इत्याशङ्क्याह—*अहंकारभेदस्येति* ॥ विषयानुभवादहमुल्लेखो न भवतीति वदता भेदो दर्शित इत्यर्थः। *ननु* अहंकारभेदं प्रसाध्य "तस्मादि"त्यनेनाऽऽगमयितव्यमित्युक्तम्, तदप्रस्तुतमित्याशङ्क्य, एवं न्यायत उपपाद्यानुग्राह्यं प्रमाणमुत्तरग्रन्थेन प्रतिपाद्यत इति तात्पर्यमाह—*यस्मादात्मन इति* ॥ *एकपुण्डरीकस्येति* ॥ एक एव पुण्डरीको व्याघ्रः श्रेष्ठः। यद्वा—एक एव सितच्छत्रः, एतच्छायामाश्रित्य सर्वे ब्रह्मविदो वर्तन्त इत्यर्थः। "आगमयितव्यमि"त्यस्य व्याख्या—*आगममूलमिति* ॥ आगमवदाचरितव्यम् ; तन्मूलत्वादित्यर्थः। *ननु* एकत्वमुपदिश्य भेदोपदेशे प्रसज्ज्यप्रतिषेधः

तत्त्वदीपनम्

नासंगतिरिति समाधत्ते—*सत्यमिति* ॥ किमत्र विनिगमनकारणम् ? इत्याशङ्क्य श्रुति-युक्त्योरेव नियामकत्वमित्याह—*न स्वमतमिति* ॥ टीकायामात्मप्रत्ययस्य नीलादिप्रत्ययादन्यत्वं निराकुर्वता नीलादिप्रत्यय एवात्मप्रत्यय इत्युक्तं स्यात्, नच तद् युज्यते ; अन्याकारप्रत्ययस्यान्यसाधकत्वासंभवादित्याशङ्क्य तात्पर्यमाह—*स्वयमिति* ॥ नीलादिप्रत्ययादन्य एव मनोजनित आत्मविषयः प्रत्ययः, तत्साधकं यन्नैयायिकादिमतम्, तन्न संभवति ; कर्म-कर्तृविरोधात्, संविदाश्रयतयाऽऽत्मसिद्धिरिति यद् गुरुणोच्यते, तदप्यसंगतम् ; अन्याकारज्ञानस्यान्यसाधकत्वासंभवात्। परिशेषात् स्वप्रकाशत्वमिति टीकार्थः ॥

स्वप्रकाशत्वमेव तत्रोपसंहृतम्, ततः कथमुक्तमहंकारभेदस्याप्युपसंहृतिरिति ? तत्राह—*अहंकारेति* ॥ अहंकारस्य विषयानुभवाधीनसिद्धित्वादात्मनश्च तद्वैपरीत्याद् भेद इत्यर्थः। भाष्यकृन्मतस्यागममूलत्वं कस्मादुपसंह्रियते ? तस्याप्रक्रान्तत्वादित्याशङ्क्य, व्यतिरेकस्य न्यायत उपादानाद् न्यायस्य च स्वातन्त्र्येण साधकत्वासंभवात्तदनुग्राह्याऽऽगमप्रदर्शनं युक्तमित्याह—*यस्मादिति* ॥ व्यतिरेकसाधकाऽऽगमजिज्ञासया पृच्छति—*कश्चेति* ॥ "अथातोऽहंकारादेशः" इत्यत्र परापरात्मनोरन्यतरस्य सार्वात्म्यं निर्दिष्टम्, न त्वन्यस्येति शङ्कानिवृत्त्यर्थं वाक्योपक्रमं पठति—*स एवेति* ॥ स एव—परमात्मैव भूमा, अधस्ताद् उपरि मध्ये च ; स सर्वान्तरत्वेन स्थित इत्यर्थः ॥

तत् किं पराक्त्वेन प्रतिपत्तव्यम् ? उत प्रत्यक्त्वेन ? इति वीक्षायां प्राकृतमतिमनुसरन्ती श्रुतिरहंकारात्मतामाह—*अथेति* ॥ ब्रह्मप्रतिपादनानन्तर्यमथशब्दार्थः। ब्रह्मणः सार्वात्म्यमतःशब्दार्थः। अहंकारस्य सप्रतियोगिकत्वादात्मत्वमनुपपन्नमित्याशङ्कायां मुख्यात्मानं दर्शयितुमाह—*अथेति* ॥ अमुख्यकथनानन्तरं मुख्यात्मजिज्ञासायां 'कथ्यते' इत्यभिधानादात्मनोऽहंकारादन्यत्वम् ; अन्यथा पृथङ् निर्देशवैयर्थ्यादित्यर्थः। पृथङ्निर्देशोऽन्य-

पञ्चपादिकाविवरणम्

हङ्कारादेशः" इति तस्यापि सर्वात्मकत्वमुक्त्वा "अथात आत्मादेशः" इत्यात्मानमहङ्काराद् भेदेन निर्दिशति। *ननु* जीव-ब्रह्मणोः सार्वात्म्यव्यपदेशो यथैकत्वसिद्ध्यर्थः, एवमहङ्कारस्यात्मैकत्वसिद्ध्यर्थो व्यपदेशः स्यात्, *तन्न* ; द्वयोः सार्वात्म्यायोगात्। तत्र युक्तं भेदेन प्रतिपन्नयोर्जीव-ब्रह्मणोरेकत्वसिद्ध्यर्थस्तदुपदेशः, अहङ्कारस्य तु पूर्वमेवात्मैकत्वप्रतिपत्तेः पृथगुपदेशो भेदसिद्ध्यर्थ इति गम्यते। ब्रह्मणः परोक्षस्य प्रत्यक्त्वसिद्ध्येऽहमात्मत्वमुपदिश्य पुनस्तद्व्युदासेन मुख्यात्मत्वमुपदिशतीत्यर्थः। "महाभूतान्यहङ्कारः" इति च स्मृतिः॥ तर्ह्ययमहङ्कारः किमुपादानः? किंनिमित्तः? किंस्वरूपः? किंप्रमाणकः? किङ्कार्यः? किमिति सुषुप्ते न भाति?

ऋजुविवरणम्

स्यादित्याशङ्क्य प्रयोजनमाह—*ब्रह्मणः परोक्षस्येति*॥ कथं प्रत्यक्त्वसिद्ध्यर्थ एवायमुपदेशः, नैकत्वसिद्ध्यर्थ इति निश्चीयते? इत्याशङ्क्य, अहंकारभेदस्य प्रमाणसिद्धत्वादेकत्वानुपपत्तेरित्याह—*महाभूतान्यहंकार इति*॥ "तदुच्यत" इत्यादिग्रन्थोऽसंगतः; अविद्या-तदुपादानत्वादिनिरूपणस्याप्रस्तुतत्वात्, पुनरुक्तं च; अविद्याया

तत्त्वदीपनम्

थापि घटत इति शङ्कते—*नन्विति*॥ यथा सार्वात्म्यलक्षणैकलक्षणाक्रान्तत्वेन जीव-परयोरभेदं प्रतिपादयितुं सार्वात्म्यं व्यपदिश्यते, तथाऽहंकारात्मनोरित्यर्थः। वैषम्येणोत्तरमीरयति—*तन्नेति*॥ विरुद्धधर्माक्रान्ततया जीव-परयोर्भेदप्रतिपत्तेः सार्वात्म्यव्यपदेशोऽभेदं द्रढयितुमिति युज्यते, भिन्नयोः सार्वात्म्यायोगादित्यर्थः। ततो वैलक्षण्यमाह—*अहंकारस्येति*॥ "पूर्वमेवे"त्यत्र पृथगुपदेशादित्यनुषङ्गः। अहंकारात्मनोरभेदस्य शास्त्रे संस्काररहितानामपि सिद्धत्वान्नाभेदप्रतिपत्त्यर्थत्वं पृथगुपदेशस्य, किंतु भेदप्रतिपत्त्यर्थत्वमित्यर्थः॥

अहंकारस्याऽऽत्मव्यतिरिक्तत्वे द्वयोः सार्वात्म्यस्य कथनमनुपपन्नमित्याशङ्क्य, किं मुख्यस्यानुपपत्तिः? उतामुख्यस्य? तत्राऽऽद्यमङ्गीकृतम्, द्वितीये तु नानुपपत्तिरित्याह—*ब्रह्मण इति*॥ यथा मुख्यारुन्धतीदर्शनशेषत्वेन स्थूलतारामरुन्धतीत्वेनोपदिश्य तस्या अरुन्धतीत्वं व्यावर्त्य मुख्यप्रदर्शनम्, तथाऽमुख्यमात्मानं प्रथममभिधाय, पुनस्तन्निरसनेन मुख्यप्रदर्शनायाहंकारसार्वात्म्यकथनं युक्तमित्यर्थः। श्रुतिपर्यालोचनयाऽहंकारस्यानात्मत्वमभिधाय तन्मूलस्मृतिपर्यालोचनयाऽप्याह—*महाभूतानीति*॥ "महाभूतान्यहंकारः" इत्युपक्रम्य "एतत्क्षेत्रं समासेने"त्यन्तेऽहंकारस्य क्षेत्रकोटावन्तर्भावमभिधाय, "एतद्यो वेत्ति तं प्राहु"रित्यत्राहंकारसाक्षिण आत्मत्वकथनाद्व्यतिरेक सिद्धिरित्यर्थः॥

श्रुति-स्मृति-युक्त्यनुभवपर्यालोचनयाऽहंकारस्यानात्मत्वं व्यपदिश्य, "तदुच्यते" इत्यादिना ग्रन्थेनाविद्यादिकं प्रदर्श्यते, तस्यात्रानुपगममाशङ्क्य तद्व्यावर्त्यां शङ्कामाह—*तर्हीत्यादिना*॥ अहंकार आत्माऽन्यश्चेत्, स कीदृशः? इति विवेचनीयम्—किं सादिः? उतानादिरिति? अनादित्वेऽविद्या-तत्संबन्धातिरिक्तत्वे सत्यनादित्वादनुच्छेद्यत्वम्, सादित्वेऽपि किं निरुपादानः? उत सोपादानः? आद्ये भावकार्याजनिरित्यभिप्रेत्य द्वितीयं विमृशति—*किमुपादान इति*॥ किमुपादानमस्येति। किं सदुपादानः? उत असदुपादानः? आहो अनिर्वचनीयोपादानः? इति विमर्शार्थः। सदुपादानत्वे कार्यस्यापि सत्यतापातात्। द्वितीये निरस्तसमस्तसामर्थ्यस्य कार्यकरत्वायोगात्। तृतीयेऽपि किं निमित्तमस्ति? उत न? अन्त्ये कार्यं न स्यादित्यभिसन्धायाद्यं विमृशति—*किंनिमित्त इति*॥ किं जीवोऽधिष्ठाता? उत ईश्वरः? नाद्यः; परिच्छिन्नज्ञानत्वेनाहंकारप्रेरकत्वासंभवात्, न द्वितीयः; निर्धर्मकत्वेन प्रेरकत्वानुपपत्तेः॥

तदुपपत्तावप्यहंकारस्वरूपं विवेचनीयमित्याह—*किंस्वरूप इति*॥ किं विषयित्वमेव स्वरूपम्? उतान्यत्? आद्येऽपसिद्धान्त इत्यभिसन्धाय, द्वितीये तत्र मानं वाच्यमित्याह—*किंप्रमाणक इति*॥ किं तत्र प्रत्यक्षादि प्रमाणम्? उत साक्षी? नाद्यः; अनुपलम्भात्, न द्वितीयः; कौटस्थ्यविरोधादित्यर्थः। तस्य कार्यविशेषोऽपि वक्तव्य इत्याह—*किंकार्य इति*॥ किं कर्तृत्व-भोक्तृत्वे कार्यम्? उतान्यत्? नाद्यः; कर्तृत्वादेरात्मधर्मत्वात्, न द्वितीयः; तददर्शनात्, कूटस्थे कर्तृत्वादेरसंभवात्, सोऽहंकारधर्मश्चेत्, तथापि सुषुप्तावेवंविधाहंकाराभावः कस्मात्? इत्याह—*किमितीति*॥

पञ्चपादिका

तदुच्यते ;—येयं श्रुति-स्मृतीतिहास-पुराणेषु नामरूपम्, अव्याकृतम्, अविद्या, माया, प्रकृतिः, अग्रहणम्, अव्यक्तम्, तमः, कारणम्, लयः, शक्तिः,महासुप्तिः, निद्रा, अक्षरम्, आकाशमिति च तत्र तत्र बहुधा गीयते, चैतन्यस्य स्वत एवावस्थितलक्षणब्रह्मस्वरूपतावभासं प्रतिबध्य जीवत्वापादिकाऽविद्या-कर्म-पूर्वप्रज्ञा-संस्कारचित्रभित्तिः सुषुप्ते प्रकाशाच्छादन-विक्षेप-संस्कारमात्ररूपस्थितिरनादिरविद्या, तस्याः परमेश्वराधिष्ठितत्वलब्धपरिणामविशेषो विज्ञान-क्रियाशक्तिद्वयाश्रयः कर्तृत्व-भोक्तृत्वैकाधारः कूटस्थचैतन्यसंजातज्योतिः स्वयंप्रकाशमानोऽपरोक्षोऽहङ्कारः, यत्सम्भेदात् कूटस्थचैतन्योऽनिदमंश आत्म-

पञ्चपादिकाविवरणम्

इति चोदिते सति—*उच्यत इत्यादिपरिहारः ॥ येयमित्युपादानसङ्कीर्तनम् । अविद्या-कर्म-पूर्वप्रज्ञेति*॥ भ्रान्ति-कर्म-पूर्वानुभवसंस्कारा इत्यर्थः । *तस्या इति* निमित्तकारणनिर्देशः । *विज्ञानक्रियाशक्तिद्वयाश्रयः* इति स्वरूपं दर्शयति । *कर्तृत्व-भोक्तृत्वेति* कार्यप्रदर्शनम् । *कूटस्थचैतन्य इति* प्रमाणोपन्यासः । "यत्सम्भेदादि"त्यात्मनि सर्वातदारोपनिमित्तत्वं कार्यान्तरमाह । किमिति तर्हि सुषुप्ते न स्यात् ? इत्यत आह—

तत्त्वदीपनम्

कार्यस्योपादानमस्ति, तच्चानिर्वाच्याज्ञानमित्यभिप्रायेणाह—*येयमिति* ॥ येयमित्यादेरयमर्थः—नामादेः सत्त्वेनासत्त्वेन चानिरूपणादविद्यात्मकत्वमित्याह—*नामेति* ॥ प्रलयादावविद्या विद्यते, नच नामादीति भेदमाशङ्क्याह—*अव्याकृतमिति* ॥ प्रलयादावनभिव्यक्ततया स्थितमित्यर्थः । मुक्तावपि तथा स्थितिं निरस्यति—*अविद्येति* ॥ विद्यानिवर्त्यैत्यर्थः । अद्वितीयवस्तुनि नामरूपप्रदर्शकत्वमाह—*मायेति* ॥ परमाण्वादय उपादानमिति केचित्, तत्राह—*प्रकृतिरिति* ॥ पूर्णानन्दाच्छादकत्वेन व्यवस्थितेत्याह—*अग्रहणमिति* ॥ इन्द्रियाद्यगोचरत्वमाह—*अव्यक्तमिति* ॥ एकाश्रयविषयत्वमाह—*तम इति* ॥ स्वातिरिक्तनिमित्तानपेक्षत्वमाह—*कारणमिति* ॥ सुप्ते प्रलयादौ कार्यप्रपञ्चलयाऽऽधारत्वेनावस्थितेत्याह—*लय इति* ॥ महाप्रलयेऽपि सुप्ताविव विक्षेपहेतुत्वेन स्थितेत्याह—*महासुप्तिरिति* ॥ स्वातन्त्र्यं निरस्यति—*शक्तिरिति* ॥ निद्राया जीवभेदलक्षणविक्षेपहेतुत्वेन तत्साम्यमाह—*निद्रेति* ॥ ज्ञानातिरिक्तानिवर्त्यत्वमाह—*अक्षरमिति* ॥

आकाशस्य नित्यत्वं व्यावर्तयति—*आकाशमिति* ॥ जीवेभ्यो ब्रह्मान्यदित्यपरे, तान् प्रत्याह—*चैतन्यस्येति* ॥ अविद्याया एकरूपत्वान्न विचित्रकार्योत्पादकत्वमिति शङ्कां निराकर्तुमविद्याकर्मेत्युक्तम्, तन्नोपपद्यते, अविद्याया अविद्याभिन्नत्वासंभवादित्यत्राह—*अविद्याकर्मेति* ॥ भ्रान्तिश्च कर्म च पूर्वानुभवश्चेति तथोक्ताः, तेषां संस्कारा एव चित्रम्, तस्य भित्तिरिति विग्रहः । तत्र च भ्रान्ति-सम्यगनुभवभेदमनुसृत्य पृथङ् निर्देश इत्यपि द्रष्टव्यम् ॥

अविद्याया जीवत्वापादकत्वे तस्याः सुषुप्तावपि भावाद् जीवत्वं स्यात्, ततश्च "स्वमपीतो भवती"त्यादिना ब्रह्मसंपत्तिनिर्देशोऽनुचित इत्याशङ्क्य, स तु विक्षेपाभावाभिप्रायः, जीवत्वं तु तदाऽप्यस्तीत्यभिप्रायेणोक्तम्—*सुषुप्त इति* ॥ ईश्वरस्य वस्तुतो निर्धर्मकत्वेऽपि काल्पनिकधर्मसंभवान्निमित्तत्वं युक्तमित्यभिप्रायेणाह—*तस्या इति* ॥ किंस्वरूप इत्यस्योत्तरमाह—*विज्ञानेति* ॥ किंकार्य इत्यस्योत्तरमाह—*कर्तृत्वेति* ॥ प्रमाणप्रश्नोत्तरमाह—*कूटस्थेति* ॥ यद्यपि चैतन्यमविकारम्; तथापि तस्मिन्नैक्याध्यासलक्षणसंवलनेन परिनिष्पन्नप्रकाश इत्यर्थः । आगन्तुकज्ञानसंवेद्यत्वनिराचिकीर्षयोक्तम्—*स्वयंप्रकाशमान इति* ॥ स्वसत्तायामव्यभिचरितप्रकाश इत्यर्थः । नित्यानुमेयत्वं व्यावर्तयति—*अपरोक्ष इति* ॥

कर्तृत्वादेरात्मधर्मत्वं निराकुर्वन्नहंकारस्य कार्यान्तरं दर्शयति—*यत्संभेदादिति* ॥ भोक्तृत्वस्य वास्तवत्वं निरस्यति—*कूटस्थेति* ॥ इदमङ्गीकृत्याऽऽत्मनो भोक्तृत्वं सांख्या मन्यन्ते, तद् व्यावर्तयति—*अनिदमिति* ॥

पञ्चपादिका

धातुरपि मिथ्यैव 'भोक्ते'ति प्रसिद्धिमुपगतः । स च सुषुप्ते समुत्खातनिखिलपरिणामायामविद्यायां कुतस्त्यः ?

पञ्चपादिकाविवरणम्

स च सुषुप्त इति ॥ अज्ञानकार्यलिङ्गशरीरप्रविलयो हि सुषुप्तिरित्यर्थः । *ननु* सति प्राणे क्रियात्मनि कथमहङ्कारस्य क्रियाशक्तेः प्रविलयः ? *उच्यते*—नाहङ्कारमात्रत्वं प्राणस्योच्यते, किन्तु प्राणस्य पृथक्सतः पञ्चधा व्यापारहेतोरहङ्कारस्य क्रियाशक्तिरस्तीत्येतावदुच्यते ; मनोऽधीनतादर्शनात् प्राणवृत्तेरिति । प्राणलक्षणक्रियाशक्त्यंशं वा विहाय विज्ञानशक्त्यंशस्य लयः कल्प्यताम् ; सांशत्वादन्तःकरणस्य । स्वप्नादिवद् दृष्टिसृष्टिमाश्रित्य वा सुषुप्तपुरुषदृष्ट्यभिप्रायेति सर्वस्य तत्र लयो दर्शितः ; सुषुप्तप्राणशरीरादिदर्शनस्य पुरुषान्तरस्य विभ्रमत्वादिति ॥

अत्र सांख्या मन्यन्ते—यद्यचेतनं मायाशब्दादिवाच्यमन्तःकरणाद्युपादानमिष्टं स्यात्, तर्हि तदहङ्कार-

ऋजुविवरणम्

निरूपितत्वात्, "तदि"ति चायुक्तम् ; निर्देश्याभावात्, भाष्योपपन्नत्वं पूर्वमुक्तम्, नच तदेव प्रतिपाद्यं प्रतिपादितं च, इत्याशङ्क्य, "तदि"त्यस्याभिप्रेतं दर्शयति—*तर्ह्ययमहंकार इति* ॥ कथं सुषुप्तौ निखिलपरिणामनाशः ? इत्याशङ्क्याह—*अज्ञानकार्येति* ॥ *ननु*—सुषुप्तावन्तःकरणनाशे तच्छक्तेः कारणगतत्वेन न प्राणव्यापारहेतुत्वम् । तदुक्तम्—"दधिशक्तिर्नहि क्षीरे दाधिकारम्भमर्हती"त्याशङ्क्य, पक्षान्तरमाह—*प्राणलक्षणेति* ॥ *ननु*—सावयवान्तःकरणांशेनान्तःकरणावशेष इत्याशङ्क्याह—*स्वप्नादिवदिति* ॥ यो यो यद्वस्तु पश्यति, तत्तत् तदविद्याविजृम्भितम्, तस्य तु दृष्टिसमयसृष्टिः, न पूर्वोत्तरकालयोस्तदस्तित्वम् ; मानाभावात्, प्रत्यभिज्ञाया व्यभिचारादित्यर्थः । *ननु*—सर्वस्य यदि विलयः स्यात्, कथं तर्हि सुप्तपुरुषशरीरादिकमन्यैर्दृश्यते ? इत्याशङ्क्याह—*सुषुप्तप्राणेति* ॥ पुरुषान्तरदृष्टिसृष्टिरित्यर्थः । कथं भोक्तृतादेरहंकृतिसंसर्गापाकरणम् ? अहंकार-

तत्त्वदीपनम्

सुप्तौ सकलपरिणामाभावे हेतुमाह—*अज्ञानेति* ॥ सुषुप्तावहंकारलयाभिधानमयुक्तमिति शङ्कते—*नन्विति* ॥ तत्र हेतुमाह—*क्रियात्मनीति* ॥ शक्तिमदहंकारलये श्वासादिदर्शनं न स्यात्, अस्ति च तत् ; तस्मान्नाहंकारलय इत्यर्थः । प्राणाहंकारयोर्भेदादन्यतरस्य लयेऽप्यन्यतरदर्शनं घटत इत्याह—*उच्यत इति* ॥ अभिमन्तृत्वेन प्राणनादिधर्मित्वेन च तयोर्भेद इत्यर्थः ॥

अहंकारस्य क्रियाशक्तिमत्त्वात् कथं क्रियात्मकप्राणस्य तदव्यावृत्तौ स्थितिः ? इति शङ्कते—*किंत्विति* ॥ क्रियाशक्तिमान् प्राणोऽन्यः, तत्प्रवर्तनशक्तिमानहङ्कारोऽप्यपर इति न विरोध इत्याह—*प्राणस्येति* ॥ *हेतोरिति* ॥ अस्याहङ्कारस्येत्यनेनानुषङ्गः । प्राणव्यापारस्याहङ्काराधारत्वं चेत्, तर्हि तदभावेऽभावः स्यादित्याशङ्क्याह—*प्राणलक्षणेति* ॥ प्राणलक्षणक्रियांशस्य हेतुर्या शक्तिः, तदंशमित्यर्थः । सुषुप्तौ प्राणावस्थितिमाश्रित्याविरोधमभिधाय, संप्रति तदेव नेत्याह—*स्वप्नादिवदिति* ॥ "अथ रथान् रथयोगान् पथः सृजते" इत्यत्रोच्यमाना स्वाप्नी सृष्टिर्दृष्टिरेव यथा, तथा जागरणेऽपि दृष्टेव सृष्टित्वात्, सुषुप्तस्य च तद्दर्शनाभावात् सर्वलय इत्यर्थः । नच तत्र प्रमाणाभाव इत्याह—*दर्शित इति* ॥ श्रुताविति शेषः । "यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन् प्राण एवैकधा भवति" "तदेनं वाक् सर्वैर्नामभिः सहाप्येती"ति सुषुप्तौ सर्वस्य लयं दर्शयति । एवमेव "एतस्मादात्मनः सर्वे प्राणाः" इत्यत्र प्रबोधावस्थायां सृष्टिं च दर्शयति । नचैवं प्रत्यभिज्ञाविरोधः ; कारणात्मना स्थितस्याभिव्यक्तिमात्राश्रयणादित्यर्थः । प्राणस्थित्यभावे कथं श्वासादिदर्शनम् ? इत्याशङ्क्याह—*सुषुप्तेति* ॥

आत्माधिष्ठिताविद्यापरिणामोऽहङ्कार इत्युक्तम्, तदाक्षिपति—*अत्र सांख्या इति*॥ "अहङ्कारस्य निर्भासे" इति

पञ्चपादिका

नचैवं मन्तव्यम्—आश्रितपरिणतिभेदतयैवाहंकारस्य निर्भासेऽनन्तर्भूतैव तन्निमित्तम्—इति ; तथा सत्यपाकृताहंकृतिसंसर्गी भोक्तृत्वादिस्तद्विशेषः केवलमिदन्तयैवावभासेत, नच तथा समस्ति। स च

पञ्चपादिकाविवरणम्

निर्भाससाक्षिणि तच्छक्तित्वेन वा तदाश्रयत्वेन वा तदधिष्ठानकत्वेन वाऽनन्तर्भूतमेव प्रधानं स्वतन्त्रमेव धर्मलक्षणावस्थाभेदैस्त्रिधा परिणमत इति। तत्र धर्मपरिणामो नाम महदादिकृत्स्नकार्यरूपेणावस्थानम्। तस्यैव च धर्मस्यातीतानागतवर्तमानलक्षणरूपापत्तिर्लक्षणपरिणामः। *तथाहि*—कार्यमनागतलक्षणापन्नं तत् परित्यज्य वर्तमानलक्षणमापद्यते, पुनस्तत् परित्यज्यातीतलक्षणापन्नं भवति, पुनस्तदेव त्वागामिलक्षणापन्नं भवति। अवस्थापरिणामस्त्वतीतमतीततरमतीततममनागतमनागततरमनागततममिति तत्रैव नूतन-चिरन्तनाद्यवस्थापत्तिः ; अतो न चेतनोपादानेन कृत्यम्—इति, नेत्याह—*नचैवं मन्तव्यमिति*॥ कुत इति ? तदाह—*तथा सत्यपाकृताहङ्कृतिसंसर्ग इति*॥ अहमिति कृतिः=करणं यस्मिन्, स साक्षी अहंकृतिः।*अयमाशयः*—चेतनस्यानात्मसम्भेदावभासो नाख्यातिः, नाप्यन्यथाख्यातिः, नापि चाऽऽत्मख्यातिरित्युक्तम्, इदानीं चेतनस्यैव स्वाविद्याविवर्तमानमिथ्यावस्तुसम्भेदावभासलक्षणानिर्वचनीयख्यात्यनभ्युपगमे चेतनाचेतनयोरत्यन्तविविक्तावभास एव स्यात्, न सम्भेदावभास इति॥

ऋजुविवरणम्

धर्मत्वात्तस्येत्याशङ्क्य, भावव्युत्पत्तिशङ्कानिराकरणाय व्याचष्टे—*अहमिति कृतिरिति*॥ एवमपि कथमिदन्त्वेनावभास आपाद्यते ? अहंकारधर्मत्वात्तस्य, तथाऽऽत्मोपादानत्वाभावेऽप्यन्यैरपि भ्रान्तिसम्बन्धाङ्गीकारादित्याशङ्क्याभिप्रायमाह—*अयमाशय इति*॥ कथं बुद्ध्यादीनामनर्थान्तरत्वमक्षपादसूत्रवचनान्निश्चेतुं शक्यते ? बुद्धिर्नामान्तःकरणमित्युच्यते, तस्य च विषयाकारेण परिणामो ज्ञानमित्युच्यते ; उपलब्धिस्तु बुद्धिप्रतिबिम्बितं

तत्त्वदीपनम्

टीकायां निर्भासपदेनाहंप्रत्ययस्याभिधानम् ? उत साक्षिणः ? आद्ये इष्टापत्तिः, अविद्याया अहंप्रत्ययेऽनन्तर्भूताया निमित्तत्वोपगमात्, नापि द्वितीयः ; साक्षिणः प्रज्ञानघनत्वेनाविद्यायास्तदनन्तर्भावेष्टेरिति, तत्राह—*अहङ्कारनिर्भाससाक्षिणीति*॥ अहंकारस्य निर्भासो येन स तथोक्ते साक्षिणि। उक्तदोषमुद्धरति—*तच्छक्तित्वेनेत्यादिना*॥ अविद्यायाः साक्ष्यन्तर्भावस्त्रेधा—तच्छक्तितया, शक्तित्वमन्तरेण गुणादिवत् तदाश्रयतया, रज्ज्वां सर्पादिवत् तदध्यस्ततया वेति ; स त्रिविधोऽप्यन्तर्भावो नेष्यत इत्यर्थः। साक्ष्यन्तर्भावाभावेऽन्यत्रान्तर्भूतमिति शङ्कां निरस्यति—*स्वतन्त्रमिति*॥ परिणामभेदमेव दर्शयति—*तत्रेति*॥

लक्षणपरिणाममाह—*तस्येति*॥ एकस्य युगपदतीतादिरूपत्वं विरुद्धमित्याशङ्क्य क्रमेणाविरोधमाह—*तथाहीति*॥ अवस्थापरिणामं विवृणोति—*अवस्थेति*॥ लक्षणपरिणामादस्य भेदमाह—*तत्रैवेति*॥ फलितमाह—*अत इति*॥ अचेतनस्यैव प्रधानस्योपादानत्वसंभवे चेतनस्याप्युपादानत्वकल्पनायां न निबन्धनमस्तीत्यर्थः। "तन्मनोऽकुरुत" "सच्च त्यच्चाभवदि"त्यादिना युक्त्यनुगृहीतेन चेतनस्याप्युपादानत्वं सिद्ध्यतीत्याह—*नेत्याहेति*॥ आश्रितः परिणतिभेदो ययाऽसावाश्रितपरिणतिभेदा, तस्या भावः, तत्ता, तयेत्यर्थः। एवंच निमित्तत्वं हेतुत्वेन संबध्यते। *निमित्तमिति*॥ उपादानमित्यर्थः॥

भोक्तृत्वादेरहङ्कारधर्मत्वादपाकृताहंकृतिसंसर्ग इति कथमुक्तमिति ? तत्राह—*अहमिति*॥ अहमिति प्रत्ययस्य साक्ष्यधीनत्वात् सोऽहंकृतिशब्देनोक्त इति द्रष्टव्यम्। भ्रान्त्या कर्तृत्वादेरात्मसंबन्धितया प्रतिभाससंभवमाशङ्क्य, भ्रान्तेरप्यस्मन्मत एव संभवो नान्यत्रेत्याह—*अयमाशय इति*॥

पञ्चपादिकाविवरणम्

अत्र नैयायिका मन्यन्ते—आत्मेन्द्रिय-विषयेषु समवहितेषु कदाचिद्विज्ञानोदयसामर्थ्यादात्माश्रयज्ञानादिवृत्तीनां क्रमजनने करणभूतं किञ्चिन्मनः कल्पितम्। तत्र तदतिरेकेणान्तःकरणं नाम ज्ञान-सुख-दुःखेच्छा-द्वेष-प्रयत्नादिविज्ञानक्रियावृत्त्याश्रयमयःपिण्डवदग्नेरादर्शवन्मुखस्याप्पात्रवच्चन्द्रस्यात्मावच्छेदकतया तस्मिन्नतदारोपोपाधिभूतं किञ्चिन्न पश्यामः। बुद्धिरिति चेत्, न; "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम्" इत्यक्षपादसूत्रवचनात्। जानाति बुद्धिरात्मोपलभत इति चेत्, न; प्रतिधात्वर्थं धर्मिभेदप्रसङ्गात्, तस्माद्वर्णितमन्तःकरणं नास्तीति, तत्राह—*स च परिणामविशेष इति* ॥

ऋजुविवरणम्

चैतन्यम्, तच्चात्मन एव। तदुक्तं पतञ्जलिना—"अपरिणामिनी हि भोक्तृत्वशक्तिरप्रतिसङ्क्रमा चापरिणामिन्यर्थे प्रतिसङ्क्रान्तेव तद्वृत्तिमनुपतती"ति, अतो ज्ञातृत्वं बुद्धेः, उपलब्धृत्वमात्मनः; अतो नानर्थान्तरत्वमिति चोदयति—*जानाति बुद्धिरिति* ॥ *प्रतिधात्वर्थमिति* ॥ एवं प्रक्रियामात्रेण बुध्यादिभेदकल्पनायां प्रतिधात्वर्थं धर्मिस्वरूपस्यैव भेदो भवेत्, न तु धर्मद्वयमेवेति भावः। स च ज्ञानाद्भेदेन वेदान्तवादिभिर्व्यपदिश्यत इत्युक्तम्, तत्र न

तत्त्वदीपनम्

अहङ्कारे सिद्धे तद्धर्माणामात्मन्यारोपो युक्तः, स एवासिद्ध इति चोदयति—*अत्र नैयायिका इति* ॥ किमहङ्कारस्य मनसोऽनन्यत्वम्? उतान्यत्वम्? नाद्य इत्याह—*आत्मेन्द्रिय-विषयेष्वित्यादिना* ॥ कदाचिद् ज्ञानोदयसामर्थ्यात् क्रमजनने करणभूतं मनः कल्पितमित्यन्वयः। अन्यथोपपत्तिं निरस्यति—*आत्मेन्द्रिय-विषयेष्विति* ॥ तथाच प्रयोगः—विवादपदानि, क्रमकारिकरणपूर्वकाणि, क्रमवत्कार्यत्वात्; क्रमकारिकुठार-साध्येन्धनद्वैधीभाववत्। ततश्च मनसः करणत्वेन क्लृप्तत्वात् सुखाश्रयत्वेनोच्यमानोऽहङ्कारोऽन्य एवेत्याद्यकल्पनाऽनुपपत्तिरित्यर्थः। द्वितीयं दूषयति—*तत्रेति* ॥ तदतिरेकेणान्तःकरणं नाम न पश्याम इति संबन्धः। प्रमाणाभावादिति हेतुः। ज्ञानादयः, साश्रयाः, गुणत्वात्; संमतवत्। आश्रयान्तरस्य चानिरूपणादन्तःकरणं तद्धर्मैष्टव्यम्। तथाऽऽत्मनि प्रतीयमानकर्तृत्वादिनिर्वाहकत्वेन निर्भेदेऽपि भेदहेतुत्वेनोत्क्रान्त्यादिहेतुत्वेन च तदेष्टव्यमिति। शङ्काचतुष्टयं क्रमेण निरस्यति—*ज्ञानसुखेत्यादिना* ॥

अन्तःकरणाश्रयत्वशङ्काबीजमाह—*विज्ञानेति* ॥ विज्ञानस्य क्रिया विज्ञानक्रिया, ज्ञान-सुख-दुःखेच्छा-द्वेष-प्रयत्नादिश्च सा विज्ञानक्रिया चेति तथोक्ता। सुखादीनां विज्ञानशब्दवाच्यान्तःकरणपरिणामत्वात्तदाश्रयत्वशङ्केत्यर्थः। ज्ञानादीनामात्माश्रयत्वेनाप्युपपत्तेर्न परिशेषादन्तःकरणप्रसिद्धिरित्यभिसन्धिः। कर्तृत्वादेरात्मधर्मत्वाद् न तन्निर्वाहकत्वेनापि तत् कल्प्यमित्याह—*अयःपिण्डवदिति* ॥ अयःपिण्डानुरागाद् वह्नौ दीर्घत्वाद्यारोप इति दृष्टान्तार्थः ॥

जीव-परभेदस्य स्वाभाविकत्वान्न तद्धेतुत्वेनापि तत्कल्पनमित्याह—*आदर्शवदिति* ॥ यथैकस्मिन् मुखे बिम्ब-प्रतिबिम्बभावेन भेद आदर्शनिमित्तः, न तथाऽत्रेत्यर्थः। आत्मन उत्क्रान्त्याद्यसिद्धेर्न तद्धेतुतया तत्कल्पनमित्याह—*अप्पात्रवदिति* ॥ अप्पात्रानुरोधाद् यथा शीतांशौ गत्यादिः, न तथाऽत्र; सर्वगतत्वेनोत्क्रान्त्यादेरसिद्धेः। नच—एकस्मिन् शरीरे नष्टे फलोपभोगाय शरीरान्तरं प्रविशतीत्यपि—शङ्क्यम्; स्वकृतसुकृत-दुष्कृतानुरोधेन शरीरे निष्पन्ने तत्र वृत्तिलाभसंभवादित्यर्थः। बुद्धेः प्रसिद्धत्वात्तदभेदादन्तःकरणमपि प्रसिद्धमेवेति शङ्कते—*बुद्धिरिति* ॥

बुद्धेर्ज्ञानपर्यायत्वेनाक्षपादोक्तेर्नान्तःकरणसिद्धिरित्याह—*न बुद्धिरिति* ॥ यद्यक्षपादवचनमनुसृत्य बुद्धि-ज्ञानयोरेकत्वं मन्यसे, तर्हि पातञ्जलमतानुसारेण तयोर्भेद एव किं न स्यात्? इति शङ्कते—*जानातीति* ॥ ज्ञानपरिणामित्वेन बुद्धेः प्रसिद्धत्वाद् न बुद्धि-ज्ञानयोरनर्थान्तरत्वमित्यर्थः। उपलब्धेरात्मधर्मत्वप्रसिद्धेश्च न ज्ञानपर्यायत्वं तस्येत्याह—*आत्मेति* ॥ उपलब्धिस्तु बुद्धिप्रतिबिम्बितं चैतन्यम, तच्चात्मात्मकमित्यर्थः। किमेतदनुभवमनुरुध्योच्यते? आहो युक्तिम्? नाद्यः; अनुपलम्भात्, नापि द्वितीयः; तथाविधयुक्तेरभावादित्याशयेनाह—*नेति* ॥ न केवलं ज्ञानोपलम्भ-बुद्धीनां भेदाभावः, किं तु ज्ञानोपलम्भयोराश्रयभेदश्च नेत्याह—*प्रतिधात्वर्थमिति* ॥ किं

पञ्चपादिका

परिणामविशेषोऽनिदञ्चिदात्मनो बुद्ध्या निष्कृष्य वेदान्तवादिभिः—अन्तःकरणम्, मनः, बुद्धिः, अहं-

पञ्चपादिकाविवरणम्

अयमाशयः—“बुद्धेर्गुणेनाऽऽत्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोऽपि दृष्टः” इति श्रुतौ परिणामगुणवत्तया द्रव्यमित्यवगता बुद्धिः ; तथा “यदा पञ्चैव लीयन्ते ज्ञानानि मनसा सह । बुद्धिश्च नेङ्गते तत्र परमात्मानमश्नुते” इति श्रुतौ चेष्टाश्रयत्वेन द्रव्यमित्यवगता बुद्धिः ; तथा “विज्ञानं यज्ञं तनुते” इत्यानन्दमयस्यात्मनः पृथगभिधानाद् विज्ञानं बुद्धिरित्यनर्थान्तरत्वाद् बुद्धिः क्रियाश्रयत्वेन द्रव्यमित्यवगता ; तथा “विज्ञानेन वा ऋग्वेदं विजानाति मनसा ह्येव पश्यती”ति च करणान्तःपातिनोर्विज्ञान-मनसोरेकत्वान्मनसश्च काम-सङ्कल्पादिवृत्तिमत्त्व-

ऋजुविवरणम्

व्यपदेशमात्रेण तत्सिद्धिरित्याशङ्क्य, “वेदान्तवादिभिरि”ति वदतो वेदान्तप्रामाण्यमुक्तमित्यभिप्रायमाह—*अयमाशय इति* ॥ “गुणेने”ति धर्माभिप्रायेणापि घटते, तत् कथं द्रव्यत्वनिश्चयः ? इति श्रुत्यन्तरमुदाहरति—*यदा पञ्चैवेति* ॥ *ननु*—“बुद्धिर्नेङ्गते” इति स्वकार्याकरत्वेनापि घटते, इत्याशङ्क्यानन्यथासिद्धं श्रुत्यन्तरमुदाहरति—*तथा विज्ञानमिति* ॥ अत्र विज्ञानशब्देन जीवः कस्माद् न व्यपदिश्यत इति ? तदाह—*आनन्दमयस्येति* ॥ आनन्दमयशब्देन जीवोऽभिधीयत इति भावः । तथापि विज्ञानस्यैव द्रष्टव्यत्वम्, न बुद्धेरित्याशङ्क्याह—*विज्ञानं बुद्धिरिति* ॥ एवमपि क्रियाशक्तिरेव, न ज्ञानशक्तिरित्याशङ्क्य, ज्ञानरूपत्वे प्रमाणमाह—*तथा विज्ञानेनेति* ॥ एवमपि नैकमन्तःकरणम् ; मनो-बुद्धिरूपतत्त्वद्वयावगमादित्याशङ्क्याह—*करणान्तः पातिनोरिति* ॥ कथं प्रत्ययित्वमिति ? तदाह—*मनसश्चेति* ॥ अत्र सर्वश्रुतीनामंशभेदेन साफल्यम् ; अनेकाकारस्य विवक्षितत्वादिति द्रष्टव्यम् । सर्वाध्यासस्य हेतुत्वाद् अध्यस्तत्वमहंकृतेः संभाव्य, धर्मजातस्य तत् संभावयति साम्प्रतमित्यनेनाभिप्रायेणावतारयति—

तत्त्वदीपनम्

तयोर्भिन्नत्वमात्रमाश्रयभेदसाधकम् ? उत विरुद्धविशेषितम् ? आद्ये दाह-पाकभेदेन वह्नावपि व्यावृत्तिप्रसङ्गः, द्वितीये विरोधस्यासिद्धिरित्यर्थः । अथवा—‘अहमुपलभे’ ‘जानामी’त्येकाश्रयत्वप्रतिपत्तावपि धर्मिभेदश्चेत्, तदाऽतिप्रसङ्गः स्यादित्याह—*प्रतिधात्वर्थमिति* ॥

“वेदान्तवादिभिरि”त्यत्र सूचितमन्तःकरणसाधकवाक्यमुदाहरति—*अयमाशय इति* ॥ बुद्धि-ज्ञानयोः पर्यायत्वमिति यत्तूक्तम्, तत्तावदसंगतमित्याह—*बुद्धेर्गुणेनेति* ॥ बुद्धिर्द्रव्यमित्यवगतेति प्रथमं संबन्धः । तत्र हेतुमाह—*परिमाणेति* ॥ बुद्धिः, द्रव्यम्, परिमाणवत्त्वात् ; संमतवत् । नच हेत्वसिद्धिरित्याह—*बुद्धेरिति* ॥ आरशब्देन अरे प्रोताऽयःशलाकोच्यते । तस्याग्रवन्मात्रा परिमाणं यस्य स तथोक्तः । *अवरः=जीवः ॥ बुद्धिगतपरिमाणगुणेनाराग्रमात्रः, आत्ममहात्परिमाणगुणेन महानपि दृष्ट इति श्रुतेरर्थः । क्रियावत्त्वादपि बुद्धेर्द्रव्यत्वं मनसोऽतिरिक्तत्वं चाह—*तथेति* ॥ ज्ञायन्त एभिरिति ज्ञानानीन्द्रियाण्युच्यन्ते । इन्द्रियाणां मनो-बुद्ध्योश्चाचलावस्थायां परमात्मप्राप्त्यभिधानाच्चलनवत्त्वमवसीयते—*यदेति* ॥ विशेषप्रतिषेधस्य शेषाभ्यनुज्ञापर्यवसायित्वादित्यर्थः । क्रियावत्त्वे श्रुत्यन्तरमुदाहरति—*तथेति* ॥ “विज्ञानं यज्ञं तनुते” इत्यनेन क्रियाश्रयत्वेन बुद्धिर्द्रव्यमित्यवगतेति संबन्धः । अस्मिन् वाक्ये जीवस्य क्रियावत्त्वमुक्तम्, नच बुद्धेरित्याशङ्क्याह—*आनन्दमयस्येति* ॥ “अन्योऽन्तर आत्माऽऽनन्दमयः” इत्यत्रेति शेषः । अत्र विज्ञानस्य द्रव्यत्वमुक्तम्, न तु बुद्धेरित्याशङ्क्याह—*विज्ञानमिति* ॥ विज्ञायतेऽनेनेति विज्ञानं बुद्धिरित्यर्थः । बुद्धि-मनसोर्वृत्तिभेदाद्भेदेऽपि न स्वरूपेण भेदः ; तथाच कथं तदपलापः ? इत्याशयवानाह—*तथेति* ॥ ज्ञानोत्पत्तौ मनसः साधारणकारणत्वाद् बुद्धेश्च तादृक्त्वाभिधानान्न स्वरूपभेद इत्यर्थः ॥ यत्तूक्तम्—मनः करणम्, बुद्धिस्तु कर्ता ; ततश्च भेद इति, तत्र करणत्वं कर्तृत्वं चाविशिष्टमित्याह—*मनसश्चेति*॥ “कामः संकल्पः” इत्युपक्रम्य “एतत्सर्वं मनः” इत्यन्तेन श्रवणादित्यर्थः । *श्रुतिलिङ्गेभ्य इति* ॥ श्रुतिगतलिङ्गेभ्य

पञ्चपादिका

प्रत्ययीति च विज्ञानशक्तिविशेषमाश्रित्य व्यपदिश्यते, परिस्पन्दशक्त्या च प्राण इति । तेनान्तःकरणोपरागनिमित्तं मिथ्यैवाहंकर्तृत्वमात्मनः स्फटिकमणेरिवोपधाननिमित्तो लोहितिमा ॥

पञ्चपादिकाविवरणम्

श्रवणादेकमन्तःकरणं विज्ञान-क्रियाशक्तिमद् मनआदिशब्दवाच्यं श्रुतिलिङ्गेभ्यः प्रसिद्धम् ; तथा "बुद्धेर्गुणेनात्मगुणेन चैव" "सधीः स्वप्नो भूत्वेमं लोकं सञ्चरति" "विज्ञानमयः" "मनोमयः" इत्यादिश्रुतावात्मावच्छेदकतया स्वगुणारोप-गमनागमनादिनिमित्तत्वं चावगतम् ; तथा "कस्मिन्न्वहमुत्क्रान्त उत्क्रान्तो भविष्यामी"ति श्रुतावुत्क्रान्त्याद्युपाधेः प्राणस्याप्यन्तःकरणांशत्वमवगतम् ; युगपदुपाधिद्वयायोगात् । ततश्च वर्णितमन्तःकरणं श्रुतिलिङ्गसिद्धमिति । *ननु* अर्थवादलिङ्गानां न्यायापेक्षा विद्यते, *सत्यम्* ; निरंशसर्वगतासङ्गस्याकाशस्येव निरुपाधेर्गमनपरिच्छेदाद्यनुपपत्तिरेव न्याय इत्यलमतिप्रसङ्गेन ॥

ननु आत्मन एव विज्ञान-क्रियापरिणामशक्ती किं न स्यातामिति ? निरवयवसर्वगतासङ्गस्य परिणामानुपपत्तेः, परिणाम्यन्तःकरणसन्निधानाच्च प्रतिभासस्यान्यथासिद्धेरिति सदृष्टान्तमाह—*तेनान्तःकरणोपरागनिमित्तमिति* ॥ मिथ्यात्वं स्फटिकलौहित्यस्य ; क्लृप्तप्रतीति-सत्तयोः कारणाभावादिति भावः । तदुभया-

ऋजुविवरणम्

परिणाम्यन्तःकरणेति ॥ *अयं प्रयोगः*—आत्मनोऽहंकर्तृत्वम्, मिथ्या, क्लृप्तकारणाभावेऽप्युपरागनिमित्तत्वात् ; स्फटिकलौहित्यवदिति । कथं स्फटिकलौहित्यस्य मिथ्यात्वम् ? तदभावे साध्यविकलो दृष्टान्तः, इत्याशङ्क्याह—*मिथ्यात्वमिति* ॥ कारणाभावादित्यसिद्धो हेतुरित्याशङ्क्याह—*तदुभयाभावमिति* ॥ "कथं पुनरि"त्यनेन मिथ्यात्वं न संभवतीति चोदितम्, तदयुक्तम् ; स्फटिके प्रतीयमानस्य लौहित्यस्य सत्त्वायोगात्, तस्य शुक्लत्वा-

तत्त्वदीपनम्

इत्यर्थः । बुद्धेरात्माऽवच्छेदकतया स्वधर्मारोपनिमित्तत्वं नेति यदुक्तम्, तत्राह—*तथा बुद्धेर्गुणेनेति* ॥ यथाऽन्तःकरणं सिद्धम्, तथा स्वगुणारोपादिनिमित्तत्वं चावगतमिति संबन्धः । धिया सह वर्तत इति सधीः ; बुद्ध्यैक्याध्यासमुपगत इति यावत् । *स्वप्नो भूत्वेति* ॥ स्वप्नद्रष्टृभावं प्राप्येत्यर्थः । *इमम्=जागरितलक्षणम् । *विज्ञानमयः=विज्ञानोपाधिकः । बुद्धेः कथमुपाधित्वम् ? "कस्मिन्न्वहमि"त्यादिना प्राणस्योपाधित्वप्रतिपत्तेरित्याशङ्क्याह—*तथा कस्मिन्निति* ॥ प्राणव्यापारस्यान्तःकरणाधीनत्वात्तदंशत्वमित्यर्थः । स्वातन्त्र्येण प्राणस्यैवोपाधित्वं किं न स्यादिति ? अत्राह—*युगपदिति* ॥ "सधीरि"त्यत्रान्तःकरणस्य गमनाद्युपाधित्वम्, अत्र च प्राणस्येति निरपेक्षोपाधिभेदाङ्गीकारे जीवभेदप्रसक्तिरित्यर्थः । अन्यपरवाक्यस्थलिङ्गानां न स्वातन्त्र्येणार्थसाधकत्वमिति शङ्कते—*नन्विति* ॥ नचोत्क्रान्त्यादेरौपाधिकत्वसाधकं न्यायं पश्याम इत्यर्थः । न्यायापेक्षेत्येतदङ्गीकरोति—*सत्यमिति* ॥ कस्तर्हि न्याय इति ? तत्राह—*निरंशेति* ॥ निरंशत्वं सुखाद्याकारेणापरिणामे हेतुः, सर्वगतत्वं स्वतो गमनाद्यभावे, असङ्गत्वं धर्ममात्रासंबन्ध इति विभागः । नच निरंशत्वादौ विमतिः ; श्रुत्यादिसिद्धत्वादित्याह—*इत्यलमिति* ॥ 'करोमि' 'जानामि' 'भुञ्जे चे'त्यनुभवविरोधाद् न्यायस्यानुत्थानमित्याशयेनाह—*नन्वात्मन एवेति* ॥

किमनुभवमात्रस्य विवक्षितसाधकत्वम् ? उत युक्तिसध्रीचीनस्य ? नाद्यः ; 'अहं मनुष्यः' इत्यादिप्रत्ययस्य देहाद्यात्मतासाधकतापातात्, न द्वितीयः ; वास्तवकर्तृत्वादिसाधकन्यायाभावात्, भावेऽपि प्रतितर्कपराहतिर्दुर्वारेत्यभिसन्धायाह—*निरवयवेति*॥ 'करोमी'त्यादिप्रत्ययस्य का गतिः ? इत्याशङ्क्याह—*परिणामीति*॥ अन्यथासिद्धस्यासाधकत्वं चशब्दार्थः । विगीतं कर्तृत्वादि, मिथ्या, क्लृप्तप्रतीति-सत्ताकारणशून्यत्वात् ; स्फटिकलौहित्यवदित्युक्तं दृष्टान्तस्य साध्यवैकल्यमाशङ्क्याह—*मिथ्यात्वमिति* ॥ *क्लृप्तेत्यस्यायमर्थः—परमार्थत्वेन क्लृप्तस्य लौहित्यस्य प्रतीति-सत्तयोर्यत्कारणं तदभावादिति । क्लृप्तप्रतीति-सत्ताकारणाभावादिति पाठे क्लृप्तं च तत् प्रतीतिसत्ताकारणं

पञ्चपादिका

कथं पुनः स्फटिके लोहितिम्नो मिथ्यात्वम् ? *उच्यते*—यदि स्फटिकप्रतिस्फालिता नायना रश्मयो जपाकुसुममुपसर्पेयुः, तदा विशिष्टसंनिवेशं तदेव लोहितं ग्राहयेयुः। नहि रूपमात्रनिष्ठश्चाक्षुषः प्रत्ययो दृष्टपूर्वः; नापि स्वाश्रयमनाकर्षद् रूपमात्रं प्रतिबिम्बितं क्वचिदुपलब्धपूर्वम्। *ननु*अभिजातस्येव पद्म-

पञ्चपादिकाविवरणम्

भावमुत्तरग्रन्थेन साधयति ॥ *तत्राख्यातिवादी—न स्फटिकगतं मिथ्यालौहित्यमवभासते, किन्तु जपाकुसुमगतमेव गृह्यमाणं स्फटिकजपाऽविविक्तमेवावभासते—इति चोदयति—*कथं पुनः स्फटिक इति* ॥ नैतदित्याह—यदि स्फटिकप्रतिस्फालिता इति* ॥

ननु दोषबलादिन्द्रियस्य कुसुमसंयोगाभावान्न सन्निवेशग्रहणमिति, नेत्याह—*नहि रूपमात्रनिष्ठ इति* ॥ संयुक्तसमवायात् संयोगाद्वा गुणग्रहणे द्रव्यमपि संयुक्तमिति भावः। अन्यथाख्यातिवादी—रूपमात्रं प्रतिबिम्बितं स्फटिकात्मना प्रतिभातीति वक्ति, तन्नेत्याह—*नापि स्वाश्रयमिति* ॥ तर्हि स्फटिकदेशे लौहित्यं सद्रव्य-

ऋजुविवरणम्

दित्याशङ्क्यावतारयति—*तत्राख्यातिवादीति* ॥ *विशिष्टसंनिवेशमिति* ॥ जपाकुसुमगतत्वेनेत्यर्थः। "नहि-रूपमात्रनिष्ठः" इत्यसंबद्धम्; रूपमात्रप्रतीतेर्दर्शनात्, द्रव्यप्रतीत्यभावात्, संबन्धाभावेन प्रतीत्यापादनायोगाच्चेत्याशङ्क्याह—*संयुक्तसमवायादिति* ॥ "नापि स्वाश्रयमि"त्यनेन प्रतिबिम्बनिराकरणं कृतम्, तदख्यातिवादिनाऽनङ्गीकृतत्वादनादरणीयम्, तन्मतं च प्रकृतमित्याशङ्क्यावतारयति—*अन्यथाख्यातीति* ॥ "नन्वभिजातस्ये"ति न युक्तम्; नहि प्रभया व्याप्तत्वं लोहितत्वप्रतीतिकारणम्, प्रभाशब्देन लौहित्यगुणविवक्षायां गुणस्य स्वाश्रयं विना स्थित्यसंभवेन तत् निरस्तम्। "लोहित इवे"त्यप्ययुक्तम्; सम्बन्धस्य विद्यमानत्वे भ्रान्तत्वानिरूपणादित्याशङ्क्यावतारयति—*तर्हि स्फटिकदेश इति* ॥ *ननु* अपसरणे चाक्षुषत्वं मा भवतु, प्रतिबन्धे तु कथमचाक्षुषत्वमापाद्यते ?

तत्त्वदीपनम्

चेति तथोक्तम्; परमार्थस्य सत्तादौ क्लृप्तं यत् कारणमन्वय-व्यतिरेकाभ्याम्, तस्याभावादित्यर्थः। कारणाभावासिद्धिमाशङ्क्याह—*तदुभयेति* ॥

शुक्ले स्फटिके प्रतीयमानस्य लोहितिम्नः कथममिथ्यात्वमुक्तम् "कथं पुनः" इत्यत्र ? इत्याशङ्क्य स्फटिके लौहित्यप्रतिभास एवासिद्ध इत्याह—*तत्रेति* ॥ सर्वप्रत्ययस्य याथार्थ्यान्न मिथ्यालौहित्यप्रतिभास इत्यर्थः। प्रतिभासस्य गतिं पृच्छति—*किंत्विति* ॥ *जपाकुसुमगतमिति*। कुसुमगतं लौहित्यं स्वरूपेण गृह्यमाणमिति यावत्। *स्फटिकाविविक्तमिति* ॥ स्फटिकविलक्षणधर्मिनिष्ठतया स्फुरितमित्यर्थः। स्फटिकग्रहणार्थं प्रवृत्ता नायना रश्मयः स्फटिकेन प्रतिहन्यन्ते, प्रतिहताश्च सन्तो रूप्यं गृहीत्वा शौक्ल्यं बोधयितुमनीशानाः परावृत्य कुसुमसमवेतं लौहित्यं गृह्णन्ति, तस्य कुसुमनिष्ठतयाऽप्रतिपत्तौ 'रक्तः स्फटिकः' इति व्यवहारो जायत इत्यर्थः। लोचनस्य कुसुमसंयोगेऽपि न तत्समवेततया लौहित्यावभास इत्यत्र हेतुं न पश्याम इत्याह—*नैतदिति* ॥

प्रतिबन्धवशादग्रहणमिति शङ्कते—*नन्विति* ॥ *सन्निवेशग्रहणमिति* ॥ कुसुमनिष्ठतया ग्रहणमिति यावत्। संयुक्तसमवायादिसम्बन्धाद्रूपमात्रग्रहणं युक्तमित्याशङ्क्याह—*संयुक्तेति* ॥ नैयायिकादिमतमनुसृत्य 'समवायादि'-त्युक्तम्, तादात्म्यवादिमतमनुसृत्य संयोगादिति विभागः। इन्द्रियसंबन्धस्य रूपेणेव द्रव्येणाप्यविशिष्टत्वात्तद्ग्रहणं स्यादित्यर्थः। "नापि स्वाश्रयमि"त्यत्र लौहित्यस्य स्फटिके प्रतिबिम्बितत्वं निराचकार, तदनुपपन्नम्; अख्यातिवादिना प्रतिबिम्बानभ्युपगमादित्याशङ्क्य तद्व्यावर्त्यां शङ्कामाह—*अन्यथाख्यातीति* ॥ गुणिनं विहाय गुणस्यान्यत्र गमनानुपलब्धेर्मैवमिति परिहरति—*तन्नेति* ॥ साश्रयस्य लौहित्यस्य प्रतिबिम्बोऽविवेको वेति शङ्कते—*तर्हीति* ॥ अथवा—प्रभाव्याप्त्या कथं लोहिततया प्रतिभासः ? न खलु गगनव्याप्ततया गगनवद्भासन्ते घटादय इत्याशङ्क्य तात्पर्य-

पञ्चपादिका

रागादिमणेर्जपाकुसुमादेरपि प्रभा विद्यते, तया व्याप्तत्वात् स्फटिकोऽपि लोहित इवावभासते ;*तथापि* स्वयमलोहितो मिथ्यैव लोहित इत्यापद्येत। अथ प्रभैव लोहिताऽवभासते, न स्फटिक इति ; शौक्ल्यमपि तर्हि स्फटिके प्रकाशेत। अथ प्रभयाऽपसारितं तदिति चेत्, स तर्हि नीरूपः कथं चाक्षुषः स्यात् ? नच रूपिद्रव्यसंयोगात् ; वायोरपि तथात्वप्रसङ्गात्। न प्रभानिमित्तं लौहित्यं तत्रोत्पन्नम् ; उत्तरकालमपि तथा रूपप्रसङ्गात्। अभ्युपगम्य प्रभामिदमुक्तम्। यथा पद्मरागादिप्रभा निराश्रयाऽप्युन्मुखोपलभ्यते, न तथा जपाकुसुमादेः। तदेवं स्फटिकमणावुपधानो-

पञ्चपादिकाविवरणम्

मेवाविविक्तं स्फटिकात्मना वा गृह्यत इति चोदयति—*नन्वभिजातस्येति* ॥ तथाप्यन्यथाख्यातौ संसर्गमिथ्यात्वमित्याह—*तथापि स्वयमलोहित इति* ॥

अख्यातिवादिनो मतमाददाति—*अथ प्रभैव लोहितेति* ॥ तर्हि स्फटिकग्रहणे संयुक्तसमवायकारणपौष्कल्यादप्रतिबद्धसंयोगाद् वा रूपग्रहणमपि स्यादित्याह—*शौक्ल्यमपि तर्हीति* ॥ विरोधिगुणया प्रभया विरोधिगुणस्यापसारणं प्रतिबन्धो वा कृत इति शङ्कते—*प्रभयाऽपसारितं तदिति* ॥ अपसारणे दोषमाह—स तर्हि नीरूप इति* ॥ प्रतिबन्धश्च द्रव्यस्यापि समानः ; गुणद्वारा विरोधिसाम्यादित्यर्थः। रूपहीनमपि द्रव्यं रूपिप्रभासंयोगाच्चाक्षुषं स्यात्, इत्याशङ्क्याह—*नच रूपिसंयोगादिति* ॥ तर्हि शौक्ल्यमपसार्य लौहित्यस्योत्पन्नत्वाद् रूपवत्तया चाक्षुषः स्फटिक इति, नेत्याह—*न प्रभानिमित्तमिति* ॥ *अभ्युपगम्य प्रभामित्यादिः स्पष्टार्थः* ॥ ततश्चोपरक्ताहङ्कारनिमित्तमात्मनि कर्तृत्वाद्यारोपणमित्याह—*तदेव-

ऋजुविवरणम्

उद्भूतरूपत्वानपायात्, नच द्रव्यप्रतिबन्धः ; लौहित्येनाविरोधात्, प्रभया च स्वरूपेणाविरोधादित्याशङ्क्याह—*प्रतिबन्धश्चेति* ॥ "तदेवं स्फटिके"त्यनेनाहंकारोपराग उपसंहृत इवाभाति, स न युक्तः ; नह्यहंकारसम्बन्धः प्रकृतः ; दृष्टान्तवैषम्यं च स्यात्, तदर्थमवतारयति—*ततश्चेति* ॥ "तत्र जडरूपत्वादि"त्यनेन जडत्वमवभासकत्वाभावे प्रयोजकमुक्तम्, उत्तरग्रन्थे हि चिद्रूपत्वमवभासकत्वे प्रयोजकमुक्तमिव प्रतिभाति ; तस्यापि वक्तव्यत्वात्,

तत्त्वदीपनम्

माह—*तर्हीति* ॥ अख्यातिमते मिथ्यैव लोहित इत्ययुक्तम्, अविवेकाभ्युपगमादित्याशङ्क्यान्यथाख्यातौ दूषणमुच्यत इत्याह—*तथापीति* ॥

स्फटिके लौहित्यप्रतिभानं नेति कथमुच्यते ? अन्यथाख्यात्यभ्युपगमादित्याशङ्क्याह—*अख्यातीति* ॥ प्रभाभानमात्रेण कथं शौक्ल्यभानप्रसक्तिरिति ? तत्राह—*तर्हीति* ॥ प्रभया शौक्ल्यस्यापसारणमनुपपन्नम् ; विरोधाभावात्, इत्याशङ्क्य गुणद्वारा विरोधमाह—*विरोधीति* ॥ तर्हि प्रभयाऽपसारणे स्फटिके शौक्ल्यप्रतिभानं कथम् ? इत्याशङ्क्याह—*प्रतिबन्ध इति* ॥ अपसारणप्रतिबन्धशङ्कायां साधारणं दूषणमुक्तमिति शङ्क्येत, नच तदुपपद्यते ; प्रतिबन्धशङ्कायां नीरूपत्वासंभवात्, इत्याशङ्क्याह—*अपसारण इति*॥ प्रतिबन्धपक्षे दूषणमाह—*प्रतिबन्ध इति* ॥ गुण-गुणिनोरभेदाद् गुणप्रतिबन्धे तद्द्वारा द्रव्यस्यापि प्रतिबन्धः समान इत्यर्थः। रूपसंबन्धस्य चाक्षुषत्वप्रयोजकत्वात् स्फटिकस्यापि प्रभाद्वारा रूपसंबन्धात् चाक्षुषत्वमिति शङ्कते—*रूपेति* ॥

किं रूपिसंयोगमात्रेण चाक्षुषत्वम् ? उत गुणान्तरमुत्पन्नम् ? इति विकल्प्याऽऽद्ये दूषणमाह—*वायोरिति* ॥ द्वितीयमुत्थापयति—*तर्हीति* ॥ निमित्तापायेऽपि नैमित्तिकस्थितिदर्शनात् कुसुमापायेऽपि तत्र लौहित्योपलम्भः स्यादित्याह—*नेत्याहेति* ॥ कर्तृत्वादिमिथ्यात्वसाधनोपक्रमात् कथमुपरागमिथ्यात्वमुपसंहृतम् ? इत्याशङ्क्योपरागोपसंहारेण कर्तृत्वाद्यारोप उपसंहृियत इत्याह—*ततश्चेति* ॥ उक्तमर्थमाक्षिपति—*नन्विति* ॥ दृष्टान्ते मिथ्या-

पञ्चपादिका

पराग इव चिदात्मन्यप्यहङ्कारोपरागः। ततः सम्भिन्नोभयरूपत्वाद् ग्रन्थिरिव भवतीत्यहङ्कारो ग्रन्थिरिति गीयते ॥

तत्र जडरूपत्वादुपरक्तस्य न तद्बलादुपरागस्य साक्षाद्भावः, चिद्रूपस्य पुनरुपरागस्तद्विषय-

पञ्चपादिकाविवरणम्

मिति* ॥ *ननु* अहङ्कारधर्मस्यात्मन्यारोपमात्रं क्रियते ? किं वा मिथ्यैव धर्मान्तरमुत्पद्यत इति ? पूर्वस्मिन् नायं दृष्टान्तः, अन्यथाख्यातिश्च स्यात्, उत्तरस्मिन् सत्य-मिथ्याकर्तृत्वाद् द्वयावभासः स्यात्, *उच्यते*— अहङ्कारस्य स्वधर्मसहितस्यैवात्मन्यध्यस्ततया मिथ्यात्वान्नान्यथाख्यातिप्रसङ्गः, अन्यसन्निधानादन्यस्मिन्मिथ्या-धर्मावभास इत्येतावति दृष्टान्तः। अथवा—कर्तृत्वद्वयेऽपि धर्मिणोरेकत्वापत्त्या धर्मभेदावभास इत्यविरोधः।

ननु "भिद्यते हृदयग्रन्थिरि"त्यादौ हृदयग्रन्थिरात्मन्यनर्थहेतुरिति गम्यते, तत्कथमहङ्कारस्योच्यत इति ? तत्राह—*ततः संभिन्नोभयरूपत्वादिति* ॥ *ननु* आत्मा स्वात्मन्युपरक्ताहङ्कार-तद्धर्मादीन् नावभासयेत्, उपरक्तत्वसाम्यात् स्फटिकादिवदिति, तत्राह—*तत्र जडरूपत्वादिति* ॥ जाड्य-चैतन्ये अवभासकत्वानवभासकत्वयोर्निमित्ते, नोपरक्तत्वानुपरक्तत्वे इत्यर्थः। *ननु* चेतनस्याप्युपरक्तविषयज्ञानव्यापारशून्यत्वाद् जाड्यादविशेष इति, तत्राह—*चिद्रूपस्य पुनरिति* ॥ अव्यवधानेन चित्संसर्ग एव प्रतिभासहेतुः, न ज्ञान-

ऋजुविवरणम्

तथा सति "तद्विषयव्यापारविरहिणोऽपी"ति व्यर्थम् ; "तद्बलादि"ति वदताऽन्यनिषेधपरत्वमेव प्रतीयते, तेन ग्रन्थानार्जवमिति शङ्कानिवृत्त्यर्थमाह—*जाड्य-चैतन्ये त्विति* ॥ "चिद्रूपस्य पुनरि"त्यनेन व्यापाराभावे चैतन्यबलात् प्रतीतिरुक्ता, सा न युक्ता ; व्यापारव्यवधानेनैवान्यत्र प्रतीतिदर्शनात्, अविप्रसङ्गाच्चेत्याशङ्क्याह—*अव्यवधानेनेति* ॥ "लक्षणतः" इति समानासमानजातीयव्यवच्छेदकेनेत्युक्तमिव प्रतिभाति ; तथा सति "न व्यवहारतः"

तत्त्वदीपनम्

लौहित्यस्योत्पन्नत्वाद् दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यमाह—*पूर्वस्मिन्निति* ॥ यद्यपि मन्मते धर्मान्तरोत्पत्तिः ; तथाऽपि त्वन्मते सर्वत्राऽऽरोपमात्रोपगमाद् दृष्टान्तासिद्धिमाशङ्क्य दूषणान्तरमाह—*अन्यथेति* ॥ द्वितीयं दूषयति—*उत्तरस्मिन्निति* ॥ अहंकारगतसत्यकर्तृत्वमात्मगतमिथ्याकर्तृत्वं चेति कर्तृत्वद्वयप्रतिभासप्रसङ्ग इत्यर्थः। पक्षद्वयोक्तदोषस्यापि नानुषङ्ग इत्याह—*उच्यत इति* ॥

अन्यथाख्यातिप्रसङ्गमुक्तं निरस्यति—*अहंकारस्येति* ॥ अन्यथाख्यातिमतेऽन्यत्र सत्यरूप्यादेः संसर्गमात्रस्यारोप्यत्वम्, अत्र तु धर्मविशिष्टस्याहंकारस्यारोपोपगमान्नान्यथाख्यातिरित्यर्थः। तर्हि दृष्टान्तासिद्धिः ; तत्र धर्म-धर्मिणोरध्यस्तताऽनङ्गीकरणादित्याशङ्क्याह—*अन्यसन्निधानादिति* ॥ पक्षान्तराङ्गीकारेऽपि न दोषानुषङ्ग इत्याह—*अथवेति* ॥ धर्मिणोरहंकारात्मनोरिति यावत्। हृदयग्रन्थेर्ज्ञाननिवर्त्यत्वानुपपत्त्याऽनर्थहेतुत्वप्रतिपत्तेरहंकारोपरागनिमित्तं कर्तृत्वमित्यभिसन्धायाऽहंकारस्य ग्रन्थित्वमूचिवान्, तत् कस्मात्? इत्याशङ्क्य तद्व्यावर्त्यं शङ्कते—*नन्विति* ॥ आत्मनोऽन्तःकरणोपरागमाक्षिपति—*नन्विति* ॥ भासकत्व उपरक्तत्वानुपपत्तिरित्याशयः। उपरक्तत्वमप्रयोजकमित्याह—*तत्रेति* ॥ जडत्वस्य प्रयोजकत्वम्, नेतरस्येत्यत्र किं विनिगमकमिति ? अत्राह—*जाड्येति* ॥ उपरक्तत्वस्याभासकत्वप्रयोजकत्वेऽनुपरक्तत्वस्य भासकत्वप्रयोजकत्वं वक्तव्यम्, न च तद् युज्यते ; संबन्धाभावेऽसिद्ध्यापातादित्यर्थः ॥

चैतन्यस्य भासकत्वप्रयोजकत्वमाक्षिपति—*नन्विति* ॥ किं ज्ञानव्यापारद्वारा तस्य भासकत्वम् ? उताव्यवधानेन ? नाद्यः ; कौटस्थ्यभङ्गात्, द्वितीये भासकत्वासंभव इत्यर्थः। नच—*स्वप्रकाशत्वाद्भासकत्वं स्यादित्यपि—शङ्क्यम् ; स्वसत्तायां प्रकाशान्तरनिरपेक्षतया प्रकाशमानत्वात्स्वप्रकाशत्वम्, तथाच तावता कथमन्यप्रथेत्यर्थः। टीकापेक्षितं हेतुमाह—*अव्यवधानेनेति* ॥ चित्संसर्ग इति* ॥ व्यापाराभावापराधेन

पञ्चपादिका

व्यापारविरहिणोऽपि तद्बलात् प्रकाशते ॥ तेन लक्षणत इदमंशः कथ्यते, न व्यवहारतः। व्यवहारतः पुनर्यदुपरागादनिदमात्मनोऽहंकर्तृत्वं मिथ्या, तदात्मनस्तद्व्यापारेण व्याप्रियमाणस्येव

पञ्चपादिकाविवरणम्

व्यापार इति भावः। *ननु* साक्षिस्वरूपवद् विज्ञानक्रियाव्यवधानमन्तरेणाहङ्कारस्य सिद्धौ कथमिदमंशतेति ? तत्राह—*तेन लक्षणत इति* ॥ अर्थस्वभावत इत्यर्थः। *अर्थतश्चित्स्वरूपताऽनिदमंशता, चैतन्यकर्मता चेदमंशता, न ज्ञानक्रियाव्यवधानेनेत्यर्थः। व्यवहारतः पुनः कथंभूतस्येदमंशतेति ? तदाह—*व्यवहारतः पुनरिति* ॥ *यदुपरागात्=यस्याहङ्कारस्योपरागादित्यर्थः। *तदात्मन इति* ॥ तदात्मताऽहङ्कारात्मतामापन्नस्येत्यर्थः। *तद्व्यापारेण=अहङ्कारव्यापारेणेति। वृत्तिव्यवधानेन सिद्धिरेव शरीरेन्द्रियविषयाणामिदमितिप्रतिभासिता, तदव्यवधानसिद्धिरेवानिदंप्रतिभासितेति भावः। *ननु* अज्ञानव्यवहितोऽ-

ऋजुविवरणम्

इति व्याहतम्; तथाऽन्यनिबन्धनमिदमंशत्वमित्यपि शङ्का स्यात्; तन्निवृत्तये व्याचष्टे—*अर्थस्वभावत इति* ॥ *ननु*—वस्तुस्वभावतोऽपि नेदन्त्वं पृथगस्ति; ज्ञानव्यवधानेन प्रतीतिव्यतिरेकेण तदभावे चानिदन्त्वमेवेत्याशङ्क्याह—*अर्थत इति* ॥ नच—“चैतन्यकर्मते”त्यनेन कर्मत्वं लक्षणमुक्तम्, अतो विरोध इति—वाच्यम्; तत्रापि कर्मत्वतद्गत्व-तत्संबन्धानां व्यभिचारात् तदेकत्वमेव विवक्षितम्, यतः “व्यवहारतः पुनरि”त्यनेनेदन्त्वनिरूपणप्रक्रमाद् व्यवहितोऽहंकारो न यच्छब्दवाच्यः, किन्तु यस्मात् कारणादिति प्रतीयेत; इदमात्मको विषयो वा निर्दिश्येत, “तदात्मनः” इत्यहंकर्तृत्वं निर्दिश्येत; सन्निहितत्वात्, “तद्व्यापारेणे”त्यनेनापि तदेव निर्दिश्येत, तदयुक्तम्, तस्य व्यापारानुपपत्तेः, नाप्यात्मनः; “तदात्मनः” इत्यनुपपत्तेः, “तद्व्यापारेण”इति तथासत्यसमञ्जसं स्यात्, अहंकारनिर्देशे च “तदात्मनः”इत्ययुक्तं स्यात्, तदर्थं व्याचष्टे—*यस्याहंकारस्येत्यादिना* ॥ “व्यवहारतः पुनरि”त्यनेन नेदन्त्वं पूर्वोक्तादधिकं निरूपितम्; न हि मिथ्याभूताहंकर्तृत्वनिरूपणं तत्साधकम्, येन न व्यर्थम्। तद्व्यापारेण व्याप्रियमाणस्यात्मनो व्यापारपूर्वकं परिच्छेदो यस्य, तस्येदंत्वमिति निरूपणात् चित्संसर्ग एव व्यापारो निरूपितः, यतश्चित्संसर्गावभास्यं चार्थत इदमिति पूर्वं निरूपितम्, तदेव व्यावहारिकं वदन् उन्मत्त इवाभाति,तथा व्यावहारिकमिदन्त्वमिदमित्यनिरूपणे तत्प्रतियोगिकमहंकारादीनामनिदन्त्वमपि न स्यादित्याशङ्क्याभिप्रायमाह—*वृत्तिव्यवधानेनेति* ॥ अज्ञा-

तत्वदीपनम्

प्रतिभासाभावानुपलब्धेर्व्यापारस्याप्रयोजकत्वमित्यर्थः। चित्संसर्गं हेतुमाह—*अव्यवधानेनेति* ॥ चित्यध्यस्तत्वान्न व्यवधानमित्यर्थः। अहंकारस्येदमंशत्वाद् व्यवधानेन सिद्धिरिति शङ्कते—*नन्विति* ॥ किं दैवगत्येदमंशत्वं हेतुः ? आहो व्यवहारतः ? इति विकल्प्याद्येऽन्यथासिद्धिमाह—*तत्राहेति* ॥ “लक्षणतः” इत्युक्ते ज्ञानक्रियाव्याप्यत्वलक्षणेनेदमंशत्वमुक्तमिति शङ्क्येत, तत्राह—*अर्थेति* ॥ कोऽसावर्थस्वभावः ? येनेदमंशत्वं यद्वैपरीत्यं चानिदमंशत्वम् ? तत्राह—*अर्थत इति* ॥ *चैतन्यकर्मता=चिद्भास्यता। “इदमंशते”त्यत्रार्थत इत्यनुषङ्गः। विनिगमनहेत्वभावमाशङ्क्याह—*न ज्ञानेति* ॥ केवलव्यतिरेकाभावान्न ज्ञानक्रियाव्यवधानतायाः प्रयोजकत्वमित्यर्थः। द्वितीयेऽसिद्धिरित्युक्तम्—“न व्यवहारतः” इति टीकायामित्यर्थः। चिद्भास्यत्वमेव व्यवहारत इदमंशत्वप्रयोजकमिति शङ्कते—*व्यवहारत इति* ॥ अनुभवविरोधान्नैतदित्याह—*तदाहेति* ॥ “यदुपरागादि”त्यत्र यच्छब्देन व्यवहार एव निर्दिष्ट इति शङ्का स्यात्, तदर्थमाह—*यदुपरागादिति* ॥ “तदात्मनः” इत्यत्र तच्छब्देनाहंकर्तृत्वं निर्दिश्य “तद्व्यापारेणे”त्यत्र तच्छब्देन तस्यैव निर्देशशङ्का स्यात्, तदर्थमाह—*तदात्मन इति* ॥ उक्तेऽर्थे विनिगमनाऽभावमाशङ्क्याह—*वृत्तीति* ॥ अनुभव एव नियामक इति यावत्। इन्द्रियसंनिकर्षजं ज्ञानं वृत्तिशब्दार्थः। वृत्तिशब्दस्य यथाश्रुतमर्थमादायाहंकारस्याव्यवधानसिद्धिमाक्षिपति—*नन्वज्ञानेति* ॥

पञ्चपादिका

व्यापारपूर्वको यस्य परिच्छेदः, स एवेदमात्मको विषयः। अत एव 'अहमि'त्यसम्भिन्नेदमात्मकोऽवभास इति विभ्रमः केषांचित्। दृष्टश्च लक्षणतस्तद्व्यवहारार्होऽपि तमननुपतन्। तद्यथा—अङ्कुरादिफलपर्यन्तो वृक्षविकारो मृत्परिणामपरम्परापरिनिष्पन्नोऽपि घटवल्मीकवन्न मृन्मयव्यवहारमनुपतति, व्युत्पन्नमतयस्तु तद्व्यवहारमपि नातीवोल्बणं मन्यन्ते। अत एव निपुणतरमभिवीक्ष्य रूपकपरीक्षकवदहङ्कारं निरूपयतां सम्भिन्नेदंरूपः स इत्यभिहितम्। यत् पुनर्दर्पण-जलादिषु मुख-चन्द्रादिप्रतिबिम्बोदाहरणम्, तदहङ्कर्तुरनिदमंशो बिम्बादिव प्रतिबिम्बं न ब्रह्मणो वस्त्वन्तरम्, किंतु तदेव तत्; पृथगवभासविपर्ययस्वरूपतामात्रं मिथ्येति दर्शयितुम्। कथं पुनस्तदेव तत्? एकस्वलक्षणत्वावगमात्।

पञ्चपादिकाविवरणम्

हङ्कारः, कथमव्यवधानादिदन्तावभासाभावः स्यादिति? अत्राह—*अत एवाहमिति* ॥ अनिदन्ताप्रतिभासादेव=अज्ञानमात्रव्यवधानादेवेत्यर्थः। *ननु* अर्थतो युष्मदर्थत्वे तथा प्रतिभासाभावो न युक्त इत्यत्राह—*दृष्टश्च लक्षणत इति* ॥ *ननु* तत्र विमर्शेऽपि मृन्मयव्यवहारो न जायते, इह तु विमर्शे युष्मदर्थता व्यवह्रियते, अतो नायं दृष्टान्त इत्यत आह—*व्युत्पन्नमतयस्त्विति* ॥ *अत एव निपुणतरमभिवीक्ष्येत्यादिः स्पष्टार्थः* ॥ यदि स्फटिकोदाहरणेनैवात्मन्यनात्माध्यासः सिद्धः, न तर्हि दर्पण-जलाद्युदाहरणेन वेदान्तविहितेन कृत्यमिति, तत्राह—*यत्पुनर्दर्पण-जलादिष्विति* ॥ *ननु* प्रत्यङ्मुखता-भेदावभासाभ्यां वस्त्वन्तरे बिम्बात् प्रतिबिम्बे प्रत्यक्षे, कथमेकत्वप्रमाणमन्तरेण तदेव तत्? इति चोदयति—*कथं पुनस्तदेव तदिति* ॥ व्यक्तिप्रत्यभिज्ञानादिति परिहरति—*एकस्वलक्षणत्वावगमादिति* ॥ *ननु* अभिज्ञायां भेदप्रतिभासः कथं प्रत्यभिज्ञया

ऋजुविवरणम्

नेन व्यवहितत्वादहंकारस्येदमित्यवभासाभावो न युज्यत इति चोदिते—"अत एवाहमि"त्यनेनाहमित्यत्रेदमंशसंभेदो नास्तीति भ्रान्तिरित्युक्तम्, तन्न युक्तम्; नहि तेनेदन्तयाऽवभासाभावः समर्थितः, नाप्यनिदन्त्वेनावभासः, इत्याशङ्क्य व्याचष्टे—*अनिदन्ताप्रतिभासादिति* ॥ *ननु तत्रेति* ॥ मृत्त्वे विद्यमाने तद्व्यवहाराभावः पूर्वमिति निश्चेतुं न शक्यत इति भावः। *उल्बणम्=स्फुटमित्यर्थः* ॥

धर्मजातमहंकारगतमारोप्यते यतः। तद्वैधर्म्याद्विभागस्य तदनन्तरमुच्यते ॥

"न तद्वस्त्वन्तरत्वे" इत्यनेन भेदे प्रत्यभिज्ञाया अनुपपत्तिरुक्ता, अभेदेऽपि सा समाना; अभिज्ञाया अनुपपन्नत्वात्, अतो न बिम्ब-प्रतिबिम्बयोरभेदनिश्चयः। तथा—"अपिचे"त्यनुपपन्नम्; नहि पूर्वयुक्त्यां परिनिष्ठितायां युक्त्यन्तरं वक्तुमुचितम्, नाप्यनेन पूर्वोक्त एवार्थः साध्यते; परिणामनिराकरणपरत्वप्रतीतेः, अतोऽसंगतश्चेत्याशङ्क्याह—

तत्त्वदीपनम्

व्यापारद्वारा भासमानत्वस्योक्तस्यातःशब्देन परामर्शशङ्कां निरस्यति—*अनिदन्तेति* ॥ स एव कुतः? तत्राह—*अज्ञानेति* ॥ अज्ञानमात्रस्य व्यवधानाद्धेतोरनिदन्ताप्रतिभासः, तत इदं चोद्यमयुक्तमित्यन्वयः। अज्ञानमात्रव्यवहितत्वमिदन्तावभासप्रयोजकं चेत्, अहंकारस्यापि तथा स्यात्, नच तथोपलभ्यते; तस्मादन्यत् प्रयोजकमित्यर्थः। "नन्वर्थतः" इत्यारभ्य "ननु प्रत्यक्" इत्यतः प्राक्तनः स्पष्टार्थः* ॥ कथंशब्दसूचितामनुपपत्तिमाह—*ननु प्रत्यगिति* ॥ प्रत्यङ्मुखत्वं प्रतिबिम्बस्य तद्वैपरीत्यं च बिम्बस्येति युक्तितो भेदः, तथाऽनुभवतोऽपीत्यर्थः। एकस्वलक्षणत्वावगमात् कथमभेदाभिधानम्? 'गौरि'त्येकस्वलक्षणतावगमेऽपि खण्डादौ भेददर्शनादित्याशङ्क्य, जातिविषयत्वान्न तत्र तथात्वम्, अत्र तु वैपरीत्यमित्याह—*व्यक्तीति* ॥ *ननु* प्रतीतिद्वयानुसारेण भेदाभेदयोरुभयोरपि परमार्थत्वमिति शङ्कते—*नन्विति* ॥ विरुद्धार्थत्वादुभयोः प्रामाण्यानुपपत्तेरन्यतरस्याप्रामाण्यं वक्तव्यमित्याह—*तत्राहेति* ॥ अन्यतरा-

पञ्चपादिका

तथाच यथा बहिःस्थितो देवदत्तो यत्स्वलक्षणः प्रतिपन्नः, तत्स्वलक्षण एव वेश्मान्तःप्रविष्टोऽपि प्रतीयते, तथा दर्पणतलस्थितोऽपि ; न तद् वस्त्वन्तरत्वे युज्यते । *अपिच* अर्थाद्वस्त्वन्तरत्वे सत्यादर्श एव बिम्बसन्निधावेव तदाकारगर्भितः परिणत इति वाच्यम् ; विरुद्धपरिमाणत्वात् संश्लेषाभावाच्च प्रतिमुद्रेव बिम्बलाञ्छितत्वानुपपत्तेः, तथा सति बिम्बसन्निधिलब्धपरिणतिरादर्शस्तदपायेऽपि तथैवावतिष्ठेत । न खलु—संवेष्टितः कटो निमित्तलब्धप्रसारणपरिणतिर्निमित्तापगमे तत्क्षणमेव

पञ्चपादिकाविवरणम्

बाध्यत इति ? तत्राह—*न तद्वस्त्वन्तरत्व इति* ॥ *ननु* व्यक्तिगतयोरैक्य-भेदावभासयोः केन किं बाध्यम् ? इति विशये व्यक्तिभेदस्तत्रोपपत्तिशून्यत्वाद् बाध्यत इत्याह—*अपि चार्थाद्वस्त्वन्तर इति* ॥ दर्पणावयवा एव व्यक्त्यन्तराकारेण परिणता इति वाच्यम् ; अन्यथा व्यक्त्युत्पत्त्युपायाभावादिति भावः । *ननु* मुखलाञ्छितप्रतिमुद्रेयम्, न परिणाम इति, नेत्याह—*विरुद्धपरिमाणत्वादिति* ॥ अस्तु तर्हि परिणाम इति, नेत्याह—*तथा सतीति* ॥ *ननु* दृश्यत एव सर्वदा, *नैवम्* ; दर्पणस्य तिर्यङ्निरीक्षणे पूर्वोत्पन्नमुखदर्शनाभावात् ॥

ननु निमित्तकारणापायेऽपि कार्यमपैति, यथा वैशेषिकाणामपेक्षाबुद्धिविनाशे द्वित्वादिविनाशः, हस्तसंयोगापाये च कटविवरणापाय इति, नेत्याह—*न खलु संवेष्टित इति* ॥ सर्वत्राग्निसंयुक्तद्रुतताम्रादाविव

ऋजुविवरणम्

ननु व्यक्तिगतयोरिति ॥ "अपिचे"त्यनेनादर्शस्यैव परिणाम आपादितः, स न युक्तः ; दर्पणव्यापित्वाभावाद् मुखस्य, दर्पणस्यान्यथाभावादर्शनाच्च, नापि परिणामसाधकयुक्तिरप्यस्ति, इत्याशङ्क्याभिप्रायमाह—*दर्पणावयवा एवेति* ॥ *अपेक्षाबुद्धिनाश इति* ॥ एवं द्रष्टव्यम्—एकत्वं विषयीकृत्योत्पद्यमाना बुद्धिरपेक्षाबुद्धिः, तया द्वित्वमुत्पद्यते, एवं त्रित्वादिकम्, तन्नाशे च नाश इति । निमित्तापगमे नैमित्तिकापगमो दृश्यत इति चोदिते "यतश्चिरकाले"त्यनेन संवेष्टनसंस्कारः संवेष्टननिमित्तमित्युक्तम्, तदसंबद्धम् ; निमित्तापगमस्य कार्यापगमहेतुत्वस्यापरिहृतत्वात्, इत्याशङ्क्य, तत्रापि संवेष्टनरूपविरुद्धकार्योदयात् पूर्वकार्यविनाश उक्त इत्यभिप्रायम्—अन्यत्रापि विरुद्धकार्यस्यैव पूर्वविनाशहेतुत्वमिति प्रदर्शनेनाह—*सर्वत्राग्निसंयुक्तद्रुतताम्रादाविति* ॥ यद्वा—द्रुतताम्रादौ निमित्ता-

तत्त्वदीपनम्

प्रामाण्येऽपि भेदप्रतिभासस्याप्रामाण्यमितरस्य प्रामाण्यमित्यत्र न किंचिन्निबन्धनं पश्याम इति शङ्कते—*नन्विति* ॥ असंभावितविषयत्वाद् भेदप्रतिभासस्याप्रामाण्यम्, इतरस्य प्रामाण्यं च घटत इत्याह—*इति विशय इति* ॥

आदर्शस्य मुखाकारपरिणामे तद्व्यापितया मुखोपलम्भः स्यात्, तथा "अर्थादि"त्यत्र कस्यानुपपत्त्येति च न ज्ञायत इति, तत्राह—*दर्पणेति* ॥ अवयवपरिणामाभ्युपगमान्न व्यापिकार्योपलम्भ इत्यर्थः । तत्र हेतुमाह—*अन्यथेति* ॥ दर्पणगतमुखव्यक्त्युत्पत्तौ कारणाभावादवयवपरिणामत्वं वक्तव्यमित्यर्थः । उपायान्तराभावोऽसिद्ध इति चोदयति—*नन्विति* ॥ लौकिकप्रतिमुद्रावैलक्षण्याद् नास्य प्रतिमुद्रात्वमित्याह—*नेत्याहेति* ॥

यादृक्परिमाणा मुद्रा, तादृशी प्रतिमुद्रा लक्ष्यते, अत्र तु वैपरीत्यमित्यर्थः । सर्वदा प्रतिबिम्बोपलम्भः स्यादित्येतदिष्टमिति शङ्कते—*नन्विति* ॥ यदा दर्पणं निरीक्ष्यते, तदा प्रतिबिम्बोपलम्भोऽप्यस्तीत्यर्थः । सर्वदा दर्शनमसिद्धमित्याह—*नैवमिति* ॥ निमित्तापाये नैमित्तिकापायस्यान्यत्र दर्शनाद् बिम्बापाये प्रतिबिम्बापगमः संभवति, ततः कथं तदुपलम्भसम्भवः ? इति शङ्कते—*ननु निमित्तेति* ॥ अपेक्षाबुद्धिं निमित्तीकृत्योत्पन्नस्य द्वित्वादेरपेक्षाबुद्धिविनाशे नाशो वैशेषिकैराश्रीयते ; तथात्र दर्पणोपलब्धस्य प्रतिबिम्बस्य बिम्बापगमेऽपगमो युक्त इत्यर्थः । "संवेष्टितः" इत्यत्र संवेष्टनगिरा प्रसारणनिरासो विवक्षितः, इतरत्र तु कार्यान्तरमिति विभागः ॥

निमित्तापाये नैमित्तिकापायचोद्ये संवेष्टनोत्पत्तौ निमित्तमुक्तम्, तदनुपपन्नम् ; चोद्यस्यापरिहृतेरित्याशङ्क्य,

पञ्चपादिका

संवेष्टते यथा, तथा स्यादिति—मन्तव्यम् ; यतश्चिरकालसंवेष्टनाहितसंस्कारस्तत्र पुनः संवेष्टननिमित्तम् । तथाच यावत्संस्कारक्षयं प्रसारणनिमित्तानुवृत्तौ पुनः संवेष्टनोपजनः, एवं चिरकालसन्निहितबिम्बनिमित्ततदाकारपरिणतिरादर्शस्तथैव तदपायेऽपि यावदायुरवतिष्ठेत, नच तथोपलभ्यते ; यः पुनः

पञ्चपादिकाविवरणम्

पुष्कलकारणेन विरुद्धकार्योदयादेव पूर्वकार्यविनाशः, वैशेषिकाणां च प्रक्रियामात्रम् ; तद्द्वित्वादेर्वस्तुसहभावित्वादिति भावः । *ननु* संस्कारजन्यकार्यान्तरोदयात् पूर्वकार्यविनाशः, न निमित्तं कारणापाय इति, तत्राह—तथाच यावदिति* ॥ निमित्तापायमात्राच्चेद्विवरणापायः, संस्काराभावे संवेष्टेतेति भावः । इहापि तर्हि पूर्वसंस्थानस्य चिरकालं संस्थानसंस्कारबलाद् विरुद्धकार्योदये प्रतिबिम्बापाय इति चेत्, न ; उत्पन्नदर्पणमात्रे चिरकालावस्थितमुखपरिणामसंस्कारेऽपि बिम्बापायमात्रात् प्रतिबिम्बापगमदर्शनादित्याह—*एवं चिरकालेति* ॥

ननु चिरकालावस्थितविकासपरिणामसंस्कारप्रचयेऽपि सवितृकिरणापाये विकासापायदर्शनवत् चिरकाला-

ऋजुविवरणम्

पगमादेव पूर्वकार्यविनाशो दृश्यते, तत् कथं सर्वत्रेत्युक्तम् ? इत्याशङ्क्याह—*अग्निसंयुक्तद्रुतताम्रादाविति* ॥ *अथवा* "यतश्चिरकाले"त्यनेन कथं संस्कारजन्यसंवेष्टनस्य प्रसरणापगमे हेतुत्वमुच्यते ? उत्तरकार्यस्य पूर्वकार्यविनाशहेतुत्वं व्यभिचारान्निश्चेतुं न शक्यते यतः, इत्याशङ्क्याभिप्रायमाह—*सर्वत्राग्निसंयुक्तेति* ॥ *ननु संस्कारजन्येति* ॥ अन्वय-व्यतिरेकतो हेतुत्वम्, न त्वन्यत्र दर्शनमात्रेण, अत्रापि तौ दृश्येते, अतः कथं निमित्तापगमस्य हेतुत्वम् ? इति चोद्याभिप्रायः । तथाच "यावदि"त्यनेन संस्काराभावे संवेष्टनादर्शनादिति हेतुरुक्तः, असंगतः सः ; नहि कारणान्तराभावेन कार्यानुत्पत्तावन्वय-व्यतिरेकसिद्धस्यान्यस्याकारणत्वं भवति, नापि तावन्मात्रेण न कार्यस्योत्पत्तिः ; कुलालादावदर्शनादित्याशङ्क्याभिप्रायमाह—*निमित्तापायमात्रादिति* ॥ निमित्तापगममात्रस्य क्वापि हेतुत्वादर्शनादादर्शे मुखं

तत्त्वदीपनम्

प्रसारणविरुद्धसंवेष्टनेन तन्निवृत्तेरभिधानान्नाननुरूपत्वमिति परिहरति—*सर्वत्रेति* ॥ पुष्कलकारणेन विरुद्धकार्योदयात् पूर्वकार्यविनाश इति संबन्धः । अग्निसंयोगजद्रवभावस्य तदभावेऽभावो दृष्ट इत्याशङ्क्य, तत्रापि तद्विरुद्धकाठिन्योदयात्तन्निरास इत्याह—*अग्नीति* ॥

अपेक्षाबुद्धिनाशे द्वित्वादिनाश इति यत्तूक्तम्, तत्राह—*वैशेषिकाणामिति* ॥ नच—द्वित्वादेर्वस्तुसहभावित्वेऽपेक्षाबुद्ध्यनुविधायित्वं स्यादित्यपि—शङ्क्यम् ; भेदस्य वस्तुसहभावित्वेऽप्यपेक्षाबुद्ध्यनुविधानवदुपपत्तेः । नच—द्वित्वाक्रान्ते त्रित्वानुपपत्तिर्विरोधादित्यपि—शङ्क्यम् ; ह्रस्वत्वादिवत् संभवादिति भावः । तत्र विनिगमनहेत्वभावमाशङ्कते—*नन्विति* ॥ संस्काराभावे संवेष्टनोपजनो माऽस्तु, तथाऽपि विरुद्धकार्योत्पत्तौ पूर्वविनाशः कथम् ? इत्याशङ्क्याह—*निमित्तेति* ॥ प्रकृतेऽपि प्रतिबिम्बविपरीतकार्येण तद्विनाश इति शङ्कते—*इहापीति* ॥ समतलसंस्थानं पूर्वसंस्थानशब्दार्थः ॥

किं सर्वत्र विरुद्धकार्यात् प्रतिबिम्बनिवृत्तिः ? उत क्वचित् ? इति विकल्प्याऽऽद्यं दूषयति—*नोत्पन्नेति* ॥ नोत्पन्नमात्रविशेषणेन समतलसंस्काराभावो निर्दिष्टः । द्वितीयेऽपि प्रतिबिम्बापगमननिमित्ताभावात्तदुपलम्भः स्यादित्यर्थः । निमित्तापायान्नैमित्तिकापाये दृष्टान्तान्तरमाशङ्कते—*नन्विति* ॥ तत्रापि मुकुलसंस्कारान्मुकुलोदये विकासापायः, न किरणापायमात्रात्, ततश्च दृष्टान्तासंगतिरित्याशङ्क्याह—*चिरकालावस्थितेति* ॥ वसन्तकालीनस्याहोरात्र्यपेक्षया दीर्घकालत्वाद् विकाससंस्कारस्य चिरकालसंस्थानं द्रष्टव्यम् । दृष्टान्तासंमत्योत्तरमाह—*नेतीति* ॥ विनिगमनकारणाभावमभिप्रेत्य शङ्कते—*नन्विति* ॥ नियामकं विनाऽपि तदभ्युपगमे वैपरीत्यमेव किं न स्यादि-

पञ्चपादिका

कमलमुकुलस्य विकासपरिणतिहेतोः सावित्रस्य तेजसो दीर्घकालानुवृत्तस्यापि विगमे तत्समकालं पुनर्मुकुलीभावः, स प्रथमतरमुकुलहेतुपार्थिवाऽऽप्यावयवव्यापारनिमित्तः ; तदुपरमे जीर्णस्य पुनर्मुकुलतानुपलब्धेः, नादर्शे पुनस्तथा पूर्वरूपपरिणामहेतुरस्ति । *अत्राह*—भवतु न वस्त्वन्तरम्, तदेव तदिति तु न क्षम्यते ; शुक्तिकारजतस्य मिथ्यारूपस्यापि सत्यरजतैकरूपावभासित्वदर्शनात्, *मैवम्* ;

पञ्चपादिकाविवरणम्

नश्यत्प्रतिबिम्बापायोऽपि बिम्बापाये स्यादिति, नेत्याह—*यः पुनः कमलमुकुलस्येति* ॥ *ननु* निमित्तकारणापाय एव तत्रापि निमित्तम्, न पार्थिवाद्यवयवजन्या मुकुलतेति, तत्राह—*तदुपरम इति* ॥ आदर्शेऽपि तर्हि मुखविपरीतकार्यपरिणामहेतुः कल्प्यतामिति, नेत्याह—*नादर्शे पुनरिति* ॥ कारुकर्मापेक्षं चादर्शतज्जन्मेति भावः । *किंच*—सत्यपि बिम्बसन्निधाने दर्पणद्रव्यं मुखाकारं कर्तुं दाहच्छेदादिबहुप्रयत्नदर्शनात्, स्पर्शगोचरत्वाभावाच्च । अवयवव्यवधाने चाक्षुषत्वमपि न स्यादित्यभ्युच्चयः । *तत्रायं प्रयोगः*—न दर्पणादौ मुखव्यक्त्यन्तरमस्ति, तज्जन्मकारणशून्यत्वात् ; शशमस्तके विषाणवदिति ॥

तर्हि शुक्तिकारजतवन्मिथ्यात्वोपपत्तेर्न मुखैकत्वमिति चोदयति—*अत्राहेति* ॥ *ननु* प्रत्यभिज्ञयैकत्वमवगतमिति, नेत्याह—*शुक्तिकारजतस्येति* ॥ मिथ्यारजतेऽपि प्रत्यभिज्ञा दृश्यते—'मदीयमिदं रजत-

ऋजुविवरणम्

प्रतीयेतेति भावः । आदर्शोत्पादकावयवव्यापार एव कारणमित्याशङ्क्याभिप्रायमाह—*कारुकर्मापेक्षमिति* ॥ "शुक्तिकारजतस्ये"त्यनेन सत्यरजतैकरूपावभासित्वं दर्शयता समानरूपावभासित्वमुक्तमिति प्रतिभाति, तथा सत्यनुत्तरमेव स्यात् ; प्रत्यभिज्ञासमर्थनाभावात्, तदर्थं व्याचष्टे—*मिथ्यारजतेऽपीति* ॥ "तत्र ही"त्यनेन रजते बाधो न मुख इत्युक्तम्, तत् कथम् ? उभयत्र बाधदर्शनात्, बाधितस्य सत्येनैकत्वप्रतीतिसंभवादित्याशङ्क्य व्याचष्टे—

तत्त्वदीपनम्

त्याह—*निमित्तेति* ॥ निमित्तापायान्नैमित्तिकापाये समयान्तरेऽपि मुकुलनोपलम्भः स्यात्, नच तथेत्याह—*तत्राहेति* ॥ मुखविपरीतकार्यान्तरदर्शनात्तदुत्पत्तौ कारणान्तरं कल्प्यमिति शङ्कते—*आदर्श इति* ॥ तदन्यथोपपन्नमित्याह—*नेत्याहेति* ॥ दर्पणं सदा समतलमेव, मुखाऽऽकारप्रतिभानं त्वन्यथेति समाध्यभिसन्धिः । पूर्वरूपपरिणामहेतोरादर्शस्य सद्भावात कथं हेत्वभावः ? इत्याशङ्क्याह—*कारुकर्मेति* ॥ प्रतिबिम्बस्य दर्पणपरिणामत्वाभावे हेत्वन्तरमाह—*किंचेति* ॥

उद्भूतस्पर्शदर्पणपरिणामाङ्गीकारे प्रतिबिम्बस्यापि स्पर्शप्रत्यक्षत्वं स्यात्, नच तदस्तीत्याह—*स्पर्शेति* ॥ बाह्यावयवव्यवहितत्वाद् न स्पर्शप्रत्यक्षत्वमित्याशङ्क्याह—*अवयवेति* ॥ दर्पणावयवानां स्वच्छत्वान्न नायनरश्मिप्रतिबन्धकत्वम् ; स्फटिकान्तरितस्याप्युपलम्भादित्याशङ्क्य, दर्पणादौ न मुखसत्ता, येन चाक्षुषत्वं स्यादित्याशयेनाह—*तत्रायमिति* ॥ विमतम्, दर्पणादिसंसर्गितयोत्पत्त्यनर्हम्, तदुत्पत्तिकारणविधुरत्वात् ; यद् यदुत्पत्तिकारणविधुरम्, तत्तथोत्पत्त्यनर्हम् ; यथा शशमस्तके विषाणमिति द्रष्टव्यम् । तस्माद् भेदावभासस्यासंभावितविषयत्वेनाप्रामाण्याद्भेदानुभवात्तत्सिद्धिरित्यर्थः । परस्परप्रतिस्पर्द्धिनोरन्यतरनिषेधेऽन्यतरव्यवस्थेति न्यायाद् भेदनिषेधेऽभेदस्यार्थसिद्धत्वात् 'तदेव तदिति न क्षम्यते' इत्ययुक्तमित्याशङ्क्य, मिथ्यात्वस्यापि संभवान्नाभेदः सिध्यतीत्याह—*तर्हीति* ॥ एकत्वप्रमाणसद्भावेऽपि नैकत्वमित्येतद् व्याहतमिति शङ्कते—*नन्विति* ॥ प्रत्यभिज्ञाया अन्यथोपपत्तेर्मैवमित्याह—*नेत्याहेति* ॥

"एकरूपावभासित्वदर्शनादि"त्यत्र समानरूपावभासित्वमात्रमुक्तमिति शङ्क्येत, तत्राह—*मिथ्येति* ॥ रजत-

पञ्चपादिका

तत्र हि बाधदर्शनाद् मिथ्याभावः, नेह स बाधो दृश्यते। यत् पुनर्दर्पणापगमे तदपगमः, न स बाधः ; दर्पणेऽपि तत्प्रसङ्गात् ॥

ननु तत्त्वमसिवाक्याद् बाधो दृश्यते, *मैवम्* ; तत्र 'तत्त्वमि'ति बिम्बस्थानीयब्रह्मस्वरूपता प्रतिबिम्बस्थानीयस्य जीवस्योपदिश्यते ; अन्यथा न "तत्त्वमसी"ति स्यात्, किन्तु 'न त्वमसी'ति भवेत्, 'न रजतमस्ती'तिवत्। *किंच*—शास्त्रीयोऽपि व्यवहारः प्रतिबिम्बस्य पारमार्थिकमिव

पञ्चपादिकाविवरणम्

मिती'त्यर्थः। उत्तरमाह—*मैवम् ; तत्र हीति* ॥ तत्र 'नेदं रजतमि'ति रजतस्वरूपमेव बाध्यते, 'नात्र रजतं किन्तु तदिदं रजतमि'ति देशमात्रबाधया सत्यरजतेनैकतया न प्रत्यभिज्ञायते ; अतो रजतेऽभिज्ञाबाधात् प्रत्यभिज्ञाऽपि भ्रम इत्यर्थः। इह तु 'नेदं मुखमि'ति न स्वरूपेण बाध्यते, किन्तु 'नात्र मुखम्, मदीयमेवे'ति प्रत्यभिज्ञायते ; नच सा बाध्यते, व्यक्त्यन्तरत्वे च 'नात्र मुखमस्ती'ति न बाधः स्यादित्यर्थः। *यत्पुनरिति स्पष्टार्थः* ॥ *ननु* स्वमुखावयवानामचाक्षुषत्वात् कथं प्रत्यक्षप्रत्यभिज्ञा ? *न* ; कतिपयावयवदर्शनादपि लोकवदवयविनश्चाक्षुषत्वोपपत्तेः। तत्त्वमसिवाक्यं त्वंपदार्थबाधनिमित्तम् ; संसारिणो विनाशमन्तरेण मोक्षानुपपत्तेः, अतो नायं दृष्टान्त इति चोदयति—*ननु तत्त्वमसिवाक्यादिति* ॥ 'सोऽयं देवदत्तः' इतिवत् तादात्म्यपरम्, न परार्थबाधपरमिति परिहरति—*मैवमिति* ॥ किंच *शास्त्रीयोऽपीति स्पष्टार्थः* ॥

ऋजुविवरणम्

तत्र नेदमिति ॥ "अभिज्ञाबाधादि"त्यनेन बाधदर्शनादित्येतद् व्याख्यातम्। "प्रत्यभिज्ञाऽपी"त्यनेन मिथ्याभाव इति व्याख्यातम्। *ननु* "तत्त्वमसिवाक्यादि"त्ययुक्तम् ; तयोरोकत्वपरत्वात् शास्त्रस्य, अप्रस्तुतं च चोद्यमित्याशङ्क्यावतारयति—*तत्त्वमसिवाक्यमिति* ॥ *"कथमाप्तः"इत्यनेन यथादृष्टार्थवादित्वलक्षणमाप्तत्वं नास्तीत्युक्तम्।

तत्त्वदीपनम्

संसर्गस्य बाधः, न रजतस्येत्युत्तराभासत्वम्, तत्राह—*उत्तरमिति* ॥ उत्तरप्रकारमाह—*तत्रेति* ॥ यदेतावन्तं कालं रजतमिति प्रतिपन्नम्, तन्नेति रजतस्वरूपमेव निषिध्यमानं दृश्यत इत्यर्थः। 'यद् रजतम्, तदिदं न भवती'ति संसर्गबाधमाशङ्क्याह—*नात्रेति* ॥ संसर्गमात्रस्य बाधे देशान्तरे 'तद् रजतमि'ति प्रत्यभिज्ञा स्यात्, नच तथोपलभ्यते ; तस्मात् संसर्गिणोऽपि बाध इत्यर्थः ॥

"नेह बाधो दृश्यते" इत्यत्र बाधाभाव उक्तः, स कथम्? "नात्र मुखमि"ति बाधदर्शनादित्याशङ्क्य, स्वरूपबाधाभावस्तत्रोक्त इत्याह—*इह त्विति* ॥ रजतप्रत्यभिज्ञातो वैलक्षण्यमाह—*नचेति* ॥ उक्तमर्थं व्यतिरेकमुखेनोपपादयति—*व्यक्त्यन्तरत्व इति* ॥ ग्रीवास्थमुखाद् दर्पणस्थस्यान्यत्वे 'दर्पणे मुखं नास्ती'ति संसर्गनिषेधो न भवेदित्यर्थः। मुखप्रत्यभिज्ञामाक्षिपति—*ननु स्वमुखेति* ॥ पूर्वानुभवसंस्कारसहिताक्षार्थसंप्रयोगस्य प्रत्यभिज्ञाकारणत्वादत्र चाक्षस्य मुखावयवसंन्निकर्षाभावात् कथं प्रत्यक्षप्रत्यभिज्ञेत्यर्थः। किं सकलावयवानामचाक्षुषत्वम्? उत कतिपयानाम्? नाद्य इत्याह—*कतिपयेति* ॥ द्वितीयं दूषयति—*अपि लोकवदिति* ॥

नासादिलक्षणकतिपयावयवदर्शनादवयविनो मुखस्य चाक्षुषत्वम् ; घटस्याऽऽन्तरावयवादृष्टावपि चाक्षुषत्ववदित्यर्थः। प्रतिबिम्बस्य बाधो नेत्युक्ते, उत्तरत्र तस्यैव बाधः समर्थ्यत इति शङ्का स्यात्, नच सोपपद्यते ; तत्त्वमसिवाक्यस्य तदबाधकत्वात्। नच—जीवस्य बाधोऽभिधीयत इति—शङ्क्यम् ; वाक्यस्याभेदबोधित्वादित्याशङ्क्य तात्पर्यमाह—*तत्त्वमसीति* ॥ तत्र हेतुमाह—*संसारिण इति* ॥ ब्रह्मभावो मोक्षशब्दार्थः। विरुद्धयोरभेदासंभवात् तद्बोधकत्वे वाक्यस्य निरस्ते, कथं ब्रह्मरूपता बोध्यत इत्यूचिवान्? इत्याशङ्क्याह—*सोऽयमिति* ॥ तदेतद्देशादिवैशिष्ट्यपरित्यागेन यथा 'सोऽयमि'त्यादेर्देवदत्तस्वरूपपरत्वम्, तद्वद् वाच्यांशपरित्यागेन चित्तादात्म्यपरत्वान्न बाधकत्व-

पञ्चपादिका

बिम्बैकरूपत्वं दर्शयति—"नेक्षेतोद्यन्तमादित्यं नास्तं यन्तं कदाचन। नोपरक्तं न वारिस्थं न मध्यं नभसो गतमि"ति। यस्तु मन्यते—न पराक्प्रवणप्रवृत्तनायनरश्मिभिर्बिम्बमेव भिन्नदेशस्थं गृह्यते, किन्तु दर्पणप्रतिस्फालितैः परावृत्त्य प्रत्यङ्मुखैः स्वदेशस्थमेव बिम्बं गृह्यते—इति, तमनुभव एव निराकरोति, इति न पराक्रम्यते। कथं पुनः परिच्छिन्नमेकमेकस्वभावं विच्छिन्नदेशद्वये सर्वात्मनाऽवभासमानमुभयत्र पारमार्थिकं भवति? न वयं विच्छेदावभासं पारमार्थिकं ब्रूमः, किंत्वेकत्वम्?

पञ्चपादिकाविवरणम्

*"न वारिस्थमि"त्यादित्यस्य वारिस्थतोपजीव्यते। अख्यातिवादी—न बिम्बादन्यत्वेन प्रतिबिम्बं नाम दर्पणगतमवभासते, किंतु बिम्बमेव दर्पणादविविक्तं प्रकाशत इति—वदति, तदनुवदति—*यस्तु मन्यत इति*॥ स्पष्टप्रत्यङ्मुखावभासं दर्पणान्तरानुप्रविष्टमिव स्वमात्मानं पुरुषान्तरवन्निरीक्ष्यमाणमिवेदं यादृग् दृश्यमानं मुखम्, तथा नावभासत इति वदन् कथमाप्तः स्यात्? इत्याह—*तमनुभव एवेति*॥

ननु मूर्तद्रव्यस्य युगपत् कार्त्स्न्येन देशद्वयवर्तित्वं लोके न क्वचिदपि दृष्टमिति चोदयति—*कथं पुनः

ऋजुविवरणम्

"कथं पुनः परिच्छिन्नमि"त्यनेन कार्त्स्न्येन देशद्वयवर्तित्वं न संभवतीति चोदितम्, तदयुक्तम्, एकस्य देवदत्तस्य देशद्वयसम्बन्धदर्शनादित्याशङ्क्यावतारयति—*ननु* मूर्तद्रव्यस्येति*॥ "न वयमि"त्यनेन विच्छेदावभासस्यापारमार्थिकत्वम्, एकत्वस्य च पारमार्थिकत्वं कीर्तितम्, तदप्रस्तुतम्; एकस्य देशद्वयवर्तित्वस्य दृष्टत्वात्, नच

तत्त्वदीपनम्

मस्यापीत्यर्थः। तादात्म्यपरत्वं कस्मादिति? अत आह—*न पदार्थेति*॥ सामानाधिकरण्यविरोधान्न बाधपरत्वम्। नच—यस्त्वं संसारी, तद् ब्रह्मेति बाधायां सामानाधिकरण्यमिति—वाच्यम्; 'योऽयं स्थाणुः स पुमानि'त्यत्र स्थाणुपुंसोरन्योन्यात्मताऽयोग्यत्वात् सामानाधिकरण्यस्यातद्विषयत्वम्, अत्र तु काल्पनिकविरुद्धपरित्यागेन चिदेकपर्यवसायित्वसंभवाद् न तथात्वमित्यर्थः॥ *ननु* "नेक्षेतोद्यन्तमादित्यमि"त्यत्र बिम्ब-प्रतिबिम्बयोरैक्यं न निर्दिश्यते, उद्यदादित्यरूपस्येक्षणादिप्रतिषेधादित्याशङ्क्याह—*न वारिस्थमिति*॥ "आदित्यं वारिस्थं नेक्षेते"त्यत्र गगनवर्तिन आदित्यस्य वारिप्रतिबिम्बिततताभिधानात्तयोरैक्यम्। नच—'वारिस्थमि'त्येतावदुदाहरणीयम्, न 'नेक्षेते'त्यादीति—शङ्क्यम्; ऐकग्रन्थ्येनोदाहरणसंभवादित्यर्थः। "यस्तु मन्यते" इत्यत्र दर्पणगततया प्रतिबिम्बग्रह एव नेत्युक्तम्, तदनुभवविरुद्धमित्याशङ्क्याह—*अख्यातीति*॥ अविविक्तज्ञानवादित्वात् संसर्गप्रत्ययाभावसिद्धिरित्यर्थः। प्रतिभासस्य गतिं पृच्छति—*किंत्विति*॥ ग्रीवास्थत्वेनाग्रहणात् तथा प्रतिभास इत्याह—*बिम्बमिति*॥ अनुभवविरुद्धः इत्युक्तं टीकायाम्, तत्रानुभवमभिनयति—*स्पष्टेति*॥

असंभावितविषयत्वेनाभेदप्रत्ययस्य प्रामाण्यानुपपत्तिरित्युक्तम्—"कथं पुनरि"त्यत्र,तदनुपपन्नम्; क्रमेणैकस्य देशद्वयवर्तितासंभवादित्याशङ्क्याह—*ननु मूर्तेति*॥ एकस्य युगपत् कार्त्स्न्येन देशद्वयवर्तित्वं जातौ दृष्टम्, तद्व्यावर्तयति—*द्रव्यस्येति*॥ गगनव्यावृत्त्यर्थम्—मूर्तेति*। वंशद्रव्यस्यावयवशो देशद्वयवर्तित्वं दृष्टम्, तदर्थमाह—*कार्त्स्न्येनेति*॥ क्रमवर्तित्वं व्यावर्तयति—*युगपदिति*॥ "परिच्छिन्नमि"ति टीकाया एषोऽर्थः—देशद्वये भासमानमुभयत्र कथं पारमार्थिकमिति संबन्धः। गगनादेर्व्यावृत्तिमाह—*परिच्छिन्नमिति*॥ महापरिमाणानाश्रयमित्यर्थः। घट-पटौ भिन्नदेशसम्बन्धिनौ व्यावर्तयति—*एकमिति*॥ एवंविधस्यापि संयोगादेर्भिन्नदेशव्यापिनः परमार्थत्वं व्यावर्तयति—*एकेति*॥ तच्चोभयनिरूप्यम्, इदं त्वन्यथेत्यर्थः। अवयविनं व्यावर्तयति—*विच्छिन्नेति*॥ अवयविनः संश्लिष्टावयवनिष्ठत्वम्, अयं तु तद्विपरीत इत्यर्थः। वेग्वादेर्व्यावृत्त्यर्थमाह—*सर्वात्मनेति*॥

किमत्र बिम्ब-प्रतिबिम्बयोर्भिन्नत्वं भिन्नदेशत्वं च सिषाधयिषितम्? उत प्रतिभासस्य गतिः पृच्छ्यते? इति

पञ्चपादिका

विच्छेदस्तु मायाविजृम्भितः । नहि मायायामसम्भावनीयं नाम ; असम्भावनीयावभासचतुरा हि सा ॥

पञ्चपादिकाविवरणम्

परिच्छिन्नमिति* ॥ एकमेकदेशस्थमेव मुखं संभ्रमाद्भिन्नं भिन्नदेशस्थं वाऽवभासत इत्याह—* न वयमिति* ॥ किं पुनरिदमेकस्मिन्नेकदेशवस्तुनि भेदभिन्नदेशत्वलक्षणं वस्त्विति ? तदाह—*विच्छेदस्त्विति* ॥ *ननु* माययाऽपि प्रमाणविरुद्धं कथमवभासत इति ? अत आह—*नहि मायायामिति* ॥ *ननु* विच्छेदावभासः कथमविद्याविजृम्भितः ? यावतोर्ध्वाग्रोऽपि स्पष्टमवभासमानो वृक्षोऽधोऽग्रो जले प्रतीयते ; नच तत्राज्ञानमस्तीति, *उच्यते*—नच विषयावरणमज्ञानमध्यासहेतुरित्युक्तम् । तत्रौपाधिकभ्रमेषूपाधिरेव आत्माऽविद्यापरिणामे पुष्कलकारणम् । नचाधिष्ठानयाथार्थ्यस्य ज्ञानं सोपाधिकभ्रमेष्वध्यासविरोधि, किन्तु निरुपाधिकभ्रमेष्विति द्रष्टव्यम् ॥

ननु सोपाधिकभ्रमत्वे भेदकर्तृत्वाद्यध्यासस्य, न तत्त्वज्ञानादध्यासनिवृत्तिः, किन्तु उपाधिमात्रनिवृत्त्येति

ऋजुविवरणम्

मिथ्यात्वसंभवः ; सर्वकारणभावात्, विरोधिसद्भावाच्च । अतो भिन्नदेशत्वान्यथानुपपत्त्या मुखकारणमपि प्रतीयत इत्याशङ्क्यावतारयति—*एकमेकदेशस्थमिति* ॥ आत्माश्रयाज्ञानस्यैव विक्षेपहेतुत्वम्, नतु जडावरणस्य ; अतो न दोष इति परिहरति—*उच्यत इति* ॥ *ननु*—विच्छेदाकारेण परिणामे कारणाभावात् कथमविद्या परिणमते ? इत्याशङ्क्याह—*तत्रौपाधिकभ्रमेष्विति* ॥ *ननु* अधिष्ठानवृक्षादेर्विशेषावभासे कथमध्यासः संभवति ? विरोधात्, इत्याशङ्क्याह—*नचाधिष्ठानयाथार्थ्यस्येति* ॥ "ननु सत्येवे"त्यनेनैकत्वज्ञानेऽपि भेदो न निवर्ततेति चोदितम्, तदयुक्तम् ; द्विचन्द्रादौ निवृत्तेरपि दर्शनात्, अत्रापि मिथ्यात्वेन तत्त्वज्ञानान्निवृत्त्युपपत्तेः, नापि बिम्ब-प्रतिबिम्बभेदत्वादनिवृत्तिः ; अप्रयोजकत्वात्, अतो निवृत्तौ हेत्वभावादचोद्यमित्याशङ्क्यावतारयति—*ननु सोपाधिकभ्रमत्व इति* ॥

तत्त्वदीपनम्

विकल्प्याद्यं निरस्यति—*एकमिति* ॥ व्यक्तिप्रत्यभिज्ञानादित्यर्थः । द्वितीयं दूषयति—*संभ्रमादिति* ॥ "विच्छेदः" इत्यनेन व्यावर्त्यां शङ्कामाह—*किं पुनरिति* ॥ भेदशब्दस्य कर्मपरत्वं द्रष्टव्यम् । नच—"संभ्रमाद्भिन्नमि"त्यत्र गतेरुक्तत्वान्न चोद्यावसर इति—शङ्क्यम् ; तस्यार्थस्य टीकारूढत्वं कर्तुं चोद्यानुवादादित्यर्थः । माया विरुद्धमर्थं घटयितुं न क्षमते ; अन्यथा मुक्तानपि बध्नीयादिति शङ्कते—*नन्विति*॥ मुक्तावविद्याभावान्नाविद्यानिमित्तबन्धनसंभवः, सत्यां त्वविद्यायामसंभावितमपि संभाव्यते, यथा तरणिमरीचिषु फेनवीच्यादिकम्, तद्वदित्यभिप्रेत्याह—*अत आहेति* ॥

विच्छेदावभासस्य नाविद्यानिमित्तत्वम्, तदभावेऽपि भावादिति शङ्कते—*ननु विच्छेदेति* ॥ विकल्पासहत्वान्नैतदित्याह—*उच्यत इति* ॥ किं विषयावरकाज्ञानस्याभावो विवक्षितः ? उताज्ञानस्यैव ? इति विकल्प्याद्यं दूषयति—*नचेति* ॥ स्वत एवावृतरूपत्वाद् नाऽनात्मावारकमज्ञानमित्युक्तं "प्रमाणवैकल्यादि"त्यत्रेत्यर्थः । द्वितीयं दूषयति—*तत्रेत्यादिना* ॥ अज्ञानस्यैवाभावो न संभवति ; आत्माऽविद्यायाः सद्भावादित्याह—*आत्माऽविद्येति* ॥ तस्याः सदा परिणामप्रसङ्गं निवारयति—*औपाधिकेति* ॥ अन्वय-व्यतिरेकाभ्यामुपाधेरविद्याक्षोभकत्वं दोषरूपितलोचनसंपृक्तेदमंशवदित्यर्थः । अधिष्ठानयाथात्म्यज्ञानस्याध्यासविरोधित्वात् तस्मिन् सत्यप्यध्यास इति कथम् ? इति चेत्, तत्र वक्तव्यम्—सर्वत्र तत्त्वज्ञानस्याध्यासविरोधित्वम् ? उत क्वचित् ? नाद्यः ; तत्त्वज्ञाने सत्यपि सोपाधिकभ्रमदर्शनादित्याह—*नचेति* ॥ कुत्र तर्हि ज्ञानस्याध्यासविरोधित्वम् ? इति पृच्छायां द्वितीयाङ्गीकारेणोत्तरमाह—*किन्त्विति* ॥ इदमत्राभिप्रेतम्*—ऊर्ध्वाग्रवृक्षाज्ञानस्य भ्रमहेतुत्वं नाश्रीयते, किंतूर्ध्वाग्रवृक्षस्य जलप्रतिबिम्बितवृक्षस्य चैक्यावच्छिन्नात्ममोहस्य भ्रमहेतुत्वम्; ततश्च तदैक्यावच्छिन्नात्माऽऽपरोक्ष्यज्ञानाभावादज्ञानानिवृत्तिस्तदभावश्च जललक्षणोपाधिप्रतिबन्धात्, तत्र प्रतिबन्धकनिवृत्त्याऽपरोक्षज्ञानेनाज्ञानादिनिवृत्तिरिति ॥ तत्त्वज्ञाने सत्यध्यासो न निवर्तत इत्येतच्चोद्यं च नावतरति; "सलिल एको द्रष्टा" "तस्मात्तत्सर्वमभवदि"त्यादौ तत्त्वज्ञाने पूर्णताश्रवणादित्याशङ्क्याह—*ननु सोपाधि-

पञ्चपादिका

ननु सत्येव बिम्बैकतावगमे प्रतिबिम्बस्य तद्गतो विच्छेदादिमिथ्यावभासः, तथा ब्रह्मैकतावगमेऽपि जीवस्य विच्छेदादिर्मिथ्यावभासो न निवर्तितुमर्हति, *उच्यते*—देवदत्तस्याचेतनांशस्यैव प्रतिबिम्बत्वात्, सचेतनांशस्यैव वा प्रतिबिम्बत्वे प्रतिबिम्बहेतोः श्यामादिधर्मेणेव जाड्येनाप्यास्कन्दितत्वान्न तत्प्रतिबिम्बं बिम्बैकरूपतामात्मनो जानाति ; अचेतनत्वात्, तथाचानुभवः—*न बिम्बचेष्टया

पञ्चपादिकाविवरणम्

चोदयति—*ननु सत्येव बिम्बैकतावगम इति* ॥ चोदितदोषं परिहर्तुमाशङ्कान्तरं प्रथमं निवर्तयति—कथम् ? जीवः प्रतिबिम्बश्चेत्, न बिम्बात्मतामवगन्तुमलम् ; प्रतिबिम्बत्वात्, अक्षिपात्रगतदेवदत्तप्रतिबिम्बवदित्येतन्निराचष्टे—*देवदत्तस्याचेतनांशस्येति* ॥ अचेतनत्वप्रयुक्ता तत्रानवगतिः, न प्रतिबिम्बत्वप्रयुक्ता ; घटादिषु तथा दर्शनादिति भावः । *ननु* शरीरमेव चेतनमिति लोकायतः, तत्राह—*सचेतनांशस्यैवेति* ॥ दर्पणजाड्येन प्रतिबन्धात् स्वभावजाड्याद्वेत्यर्थः । देवदत्तप्रतिबिम्बस्याचेतनत्वे हेत्वन्तरमाह—*तथाचानुभव इति*॥

ऋजुविवरणम्

पूर्वोदाहरणे कर्तृत्वादिनिवृत्तेरनुक्तत्वाच्चोद्यविषयत्वं दर्शितम् । "देवदत्तस्याचेतनांशस्ये"त्यनेन प्रतिबिम्बस्य बिम्बरूपानवभाससमर्थनमप्रस्तुतम् ; अचोद्यापरिहारात्, इत्याशङ्क्यावतारयति—*चोदितदोषमिति* ॥ "देवदत्तस्ये"त्यनेन चेतनत्वं बिम्बभावापरिज्ञाने कारणमिति वदता "प्रतिबिम्बत्वादि"ति हेतोरप्रयोजकत्वमुक्तम्, तत्र हेतुद्वये विद्यमाने कथमस्यैवाप्रयोजकत्वम् ? इत्याशङ्क्याभिप्रायमाह—*अचेतनत्वेति*॥ "चेतनांशस्यैवाप्रयोजकत्वम् ? इत्याशङ्क्याभिप्रायमाह—*अचेतनत्वेति* ॥ "सचेतनांशस्यैवे"त्ययुक्तम् ; पक्षपरिग्रहे चेतनस्य प्रतिबिम्बत्वशङ्काकारणाभावात्, प्रतिबिम्बस्य चाक्षुषत्वादित्याशङ्क्याह—*शरीरमेवेति*॥ "जाड्येनाप्यास्कन्दनसंभवादि"त्युक्तम्, तत्र कस्य जाड्येन ? इति न ज्ञायते "तत्र प्रतिबिम्बहेतोरि"त्यनेनोपसर्जनत्वेन दर्पणनिर्देशेऽपि योग्यत्वात् तज्जाड्यमेव विवक्षितमिति दर्शयति—*दर्पणजाड्येनेति* ॥ अगत्याऽन्योपसर्जनस्यान्यान्वय आश्रीयते, न तु सत्यां गतावित्यभिप्रायेण पक्षान्तरमाह—*स्वभावजाड्यादिति* ॥ शरीरस्वभावजाड्यादित्यर्थः । "तथाचानुभवः" इत्यनेन पूर्वग्रन्थोक्तेऽर्थेऽनुभवः प्रदर्श्यत इति प्रतिभाति । पूर्वग्रन्थे हि प्रतिबिम्बात्मतां न जानातीति साधितम्, नचायमनुभवस्तत् साधयितुं शक्नोति ; तत् किमर्थमनुभवप्रदर्शनम् ? इत्याशङ्क्यावतारयति—*देवदत्तप्रतिबिम्बस्येति*॥ *ननु* बिम्बचेष्टासापेक्षचेष्टादर्शनं प्रतिबिम्बस्य कथम-

तत्त्वदीपनम्

केति* ॥ तत्त्वज्ञाने सत्यप्यध्यासानुवृत्तिदर्शनादिति द्रष्टव्यम् । कथं तर्हि तन्निवृत्तिः ? इति पृच्छति—*किंत्विति* ॥ उपाधिनिवृत्त्यौपाधिकनिवृत्तिः, उपाधिनिवृत्तेश्च कर्मायत्तत्वात् तत्त्वज्ञानवैयर्थ्यमित्याशयेनाह—*उपाधीति* ॥ तत्त्वज्ञानवैयर्थ्ये शङ्किते लौकिकप्रतिबिम्बस्याज्ञातृत्वं जीवस्य ज्ञातृत्वं चानुपयुक्तमेवोच्यत इत्याशङ्क्याह—*चोदितेति* ॥ आशङ्कान्तराधिगतौ तन्निवृत्त्यधिगमः, तदेव कथम् ? इत्याह—*कथमिति* ॥ आशङ्कान्तरमाह—*जीव इति* ॥ जीवस्य तत्त्वज्ञानानुपपत्तेः कथं तेनाविद्यानिवृत्तिशङ्केत्यर्थः । न प्रतिबिम्बत्वमज्ञत्वप्रयोजकमित्याह—*एतदिति* ॥ तत्र चेतनत्व-प्रतिबिम्बत्वयोः सद्भावेऽचेतनत्वस्य प्रयोजकत्वं कथं निरधारि ? तत्राह—*अचेतनत्वेति* ॥ शरीरस्य चेतनत्वेन तत्प्रतिबिम्बस्यापि चेतनत्वात् कथमचेतनत्वस्य प्रयोजकत्वम् ? इत्याह—*ननु शरीरमिति* ॥ शरीरस्य चेतनत्वमङ्गीकृत्य दूषणमाह—*तत्राहेति* ॥

चेतनप्रतिबिम्बाभ्युपगमे "कथं जाड्येनास्कन्दितत्वादि"त्यभिदधौ टीकाकारः ? तत्राह—*दर्पणेति* ॥ यथाऽवदातस्यापि प्रतिबिम्बस्योपाधिदोषादन्यथात्वम्, एवं चेतनत्वेऽपि प्रतिबिम्बस्योपाधिजाड्याज्जडत्वमित्यर्थः । प्रतिबिम्बस्य चेतनत्वं चासिद्धमित्याह—*स्वभावेति* ॥ रूपादिमत्त्वेन शरीरस्याचेतनत्वात् प्रतिबिम्बस्याप्यचेतनत्वमित्यर्थः । प्रतिबिम्बस्य बिम्बात्मताज्ञानाभावेऽनुभवोपन्यास इति प्रतिभाति, न च तदुपपद्यते ; अनुभवस्य तदसाध-

पञ्चपादिका

विना प्रतिबिम्बं चेष्टते*—इति । यस्य हि भ्रान्तिरात्मनि परत्र वा समुत्पन्ना, तद्गतेनैव सम्यग्ज्ञानेन सा निवर्तते, यस्तु जानीते देवदत्तः प्रतिबिम्बस्यात्मनोऽभिन्नत्वम्, न स तद्गतेन दोषेण

पञ्चपादिकाविवरणम्

कदाचित्तस्यापि चेतनत्वे स्वातन्त्र्यात् तच्चेष्टया विनाऽपीदं चेष्टतामिति भावः । *ननु* देवदत्तस्यैव बिम्बस्य भ्रमनिवर्तकतत्त्वज्ञानाश्रयत्वं दृष्टम्, एवं बिम्बत्वाद् ब्रह्मण एव भ्रमनिरासितत्त्वज्ञानाश्रयत्वं स्यादिति, नेत्याह—*यस्य हि भ्रान्तिरिति* ॥ न बिम्बत्वकृतं तत्त्वज्ञानाश्रयत्वम्, किन्तु भ्रान्तत्वकृतम्, तदप्यज्ञत्वकृतम्, तदपि जीवत्वनिमित्तमिति भावः ॥

ननु जीवलक्षणप्रतिबिम्बात्मतामात्मनो ब्रह्म जानीयाद्वा ? न वा ? न चेत्, सर्वज्ञताहानिः, जानाति चेत्, ब्रह्म स्वात्मन्येव संसारं पश्येदिति, नेत्याह—*यस्तु जानीते देवदत्त इति* ॥ देवदत्तो हि स्वात्मान-

ऋजुविवरणम्

चेतनत्वं साधयति ? चेतनस्याप्यन्यसापेक्षचेष्टत्वसंभवादित्याशङ्क्याभिप्रायमाह—*कदाचित्तस्यापीति*॥ साधनान्तरमापाद्यापीत्यर्थः । बिम्बस्य तत्त्वज्ञानाश्रयत्वेन भवितव्यमिति चोदिते "यस्य हि भ्रान्तिरि"ति परिहारोऽनुपपन्नः ; न ह्यनेन किञ्चिद्बिम्बस्य तत्त्वज्ञानानाश्रयत्वकारणमुक्तम् । न हि यत्र भ्रान्तिः, तद्गततत्त्वज्ञानेन तन्निवृत्तिश्चोद्यवादिनो विरुद्धा, चोद्यवादिविरुद्धेन च परिहारेण भवितव्यमित्याशङ्क्याभिप्रायमाह—*न बिम्बत्वकृतमिति* ॥ तर्हि तत्त्वज्ञानाश्रयत्वनिमित्तं भ्रान्तत्वमप्यस्तु, इत्याशङ्क्याभिप्रायमाह—*तदप्यज्ञत्वकृतमिति* ॥ अज्ञत्वमप्यस्त्वित्याशङ्क्याह—*तदपि जीवत्वेति* ॥ "ननु जीवलक्षणे"ति विकल्पे प्रथमपक्षेऽज्ञत्वस्योपाधित्वं निरस्तम्, द्वितीये भ्रान्तत्वस्योपाधित्वनिरासः ; पक्षे वर्तमानत्वात्, "यस्तु जानीते" इत्यनेन प्रतिबिम्बात्मताज्ञानेऽपि न दोषसंस्पर्श इत्युक्तम्, तदनुपपन्नम् ; न हि तदात्मत्वज्ञाने तन्निमित्तदोषासंस्पर्शो युज्यते, तथा तत्त्वज्ञान-दोषयोः साङ्कर्यं चेत्याशङ्क्याभिप्रायमाह—*देवदत्तो हीति* ॥ "नन्वेकतावगम इति* ॥ जीव-ब्रह्मणोरेकत्वज्ञानम्, भेदादि न निवर्त-

तत्त्वदीपनम्

कत्वादित्याशङ्क्य तात्पर्यमाह—*देवदत्तेति* ॥ प्रतिबिम्बस्य बिम्बाधीनचेष्टावत्त्वमात्रेण कथमचेतनत्वम् ? चेतनस्याप्यन्याधीनव्यापारदर्शनादित्यत्राह—*कदाचिदिति* ॥ नियमेनान्याधीनचेष्टावत्त्वमचेतनत्वप्रयोजकम्, चेतनत्वे तु कदाचित्स्वयमेव चेष्टेतेत्यर्थः । लौकिकप्रतिबिम्बस्याज्ञत्वसमर्थनस्य प्रस्तुतत्वात्—"यस्य हि भ्रान्तिरि"त्यनेन परगतज्ञानेन परगतभ्रान्तेरनिरासाभिधानमसंगतमित्याशङ्क्य टीकाव्यावर्त्यां शङ्कामाह—*ननु देवदत्तस्येति* ॥

टीकायां बिम्बस्य तत्त्वज्ञानाश्रयत्वाभावे न हेतूपन्यास इत्यत्राह—*न बिम्बत्वेति* ॥ भ्रान्तत्वं तत्त्वज्ञानाश्रयत्वप्रयोजकं चेत्, तदपि तत्रैव साधयिष्याम इत्याह—*तदपीति* ॥ यस्याज्ञत्वं तस्यैव भ्रान्तत्वं चेत्, तर्हि तद्वेत्त्वज्ञानाश्रयत्वमपि तत्र कल्प्यत इति, तत्राह—*तदपीति* ॥ सर्वज्ञादिरूपेऽज्ञानाश्रयत्वस्य विरुद्धत्वात् तद्विपरीतजीवस्याज्ञत्वमित्यर्थः । एतच्चाङ्गीकृत्योक्तम्, वस्तुतस्तु चिन्मात्रतन्त्रमज्ञानमित्याशयः ॥

ब्रह्म सर्वज्ञम्, जीवस्तु तद्विपरीत इत्यङ्गीकारेणाज्ञत्वं निह्नोतुं न शक्यते, ब्रह्मणोऽपि सार्वज्ञ्याभावादिति शङ्कते—*नन्विति* ॥ चरमे कल्पे ब्रह्मणः सर्वज्ञत्वासंभवादज्ञत्वं तत्रापि घटयितुं शक्यते, आद्ये स्वस्य संसारदर्शित्वेन भ्रान्ततया ब्रह्मणस्तत्त्वाज्ञानित्वं स्यादित्याशयः । आद्यं पक्षमाश्रित्य तत्प्रयुक्तदोषाभावमाह—*नेत्याहेति* ॥ बिम्बस्य प्रतिबिम्बात्मना ज्ञानेऽपि न दोषसंस्पर्श इत्युक्तम्—"यस्तु जातीते"इत्यत्र, तदनुपपन्नम् ; 'प्रतिबिम्बात्मतां जानाति' 'तद्गतदोषेण न लिप्यते चे'ति व्याघातात्, तत्राह—*देवदत्तो हीति* ॥ ब्रह्मणस्तत्त्वज्ञानितया न संसारित्वं चेत्, तदभेदाज्जीवस्यापि तत्त्वज्ञानितया संसरणाभावप्रसङ्गः, विपक्षे ब्रह्मणोऽपि संसरणं स्यादित्याशङ्क्याह—

पञ्चपादिका

संस्पृश्यते, नापि ज्ञानमात्रात् प्रतिबिम्बस्य निवृत्तिः ; तद्धेतोर्दर्पणादेः पारमार्थिकत्वात् । जीवः पुनः

पञ्चपादिकाविवरणम्

मणिपाणेऽल्पत्वादिगुणमवगच्छन्नपि तत्त्वज्ञानप्रतिहतत्वाद् नानुशोचति, एवं ब्रह्मापि स्वात्मनि जीवे प्रतिबिम्बे संसारं पश्यदपि तत्त्वज्ञानित्वाद् नानुशोचति । तत्त्वज्ञान संसरणे चावदातश्यामत्वादिवन्नेतरेतरत्र व्यवतिष्ठेते इति भावः । *ननु* एकताऽवगमेऽपि न तत्र विच्छेदविभ्रमो निवर्तते, *सत्यम्* ? न प्रतिबिम्बभावकृतं तत्, किन्तूपाधेरज्ञानाजन्यत्वाद् ज्ञानानिवर्त्यत्वकृतमित्याह—*नापि ज्ञानमात्रादिति* ॥ *ननु* जीवस्यापि तद्युपाधिजाड्येनास्कन्दनसम्भवाद् न भ्रान्ति सम्यग्ज्ञानाश्रयत्वम्, अप्रतिबिम्बता च तदाश्रयत्वे स्यादिति, नेत्याह—*जीवः पुनरिति* ॥ "रूपं रूपं प्रतिरूपो बभूव" "एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" "अत एव चोपमा सूर्यकादिवत्" इति च श्रुति-स्मृति सूत्रैर्जीवस्य प्रतिबिम्बभावस्य दर्शितत्वात्, अमूर्तस्य चाकाशस्य साभ्रनक्षत्रस्य जले प्रतिबिम्बवदमूर्तस्य ब्रह्मणोऽपि प्रतिबिम्बसम्भवात्, जानुमात्रप्रमाणेऽपि जले दूरविशाला-

ऋजुविवरणम्

येत, बिम्ब-प्रतिबिम्बयोरैक्यज्ञानत्वात्, यद्वा—बिम्ब-प्रतिबिम्बभावो धर्मी, न तेन निवर्त्यः, बिम्ब-प्रतिबिम्बभावत्वात् ; संप्रतिपन्नवदिति भावः । "जीवः पुनरि"त्यत्र "सर्वेषां नः प्रत्यक्षः" इति प्रतिबिम्बत्वे चिद्रूपत्वे च प्रत्यक्षत्वमुक्तमिति प्रतिभाति ; प्रमाणान्तरानुपन्यासात्, तथा सत्यनुपपन्नं स्यादित्याशङ्क्याभिप्रायमाह—*रूपं रूपमिति* ॥ *ननु* श्रुत्यादौ प्रतिबिम्बभावावगमेऽप्यमूर्तस्य लोके प्रतिबिम्बादर्शनादसंभवदर्थत्वेनातत्परत्वमित्याशङ्क्याह—*अमूर्तस्य चेति* ॥ तत्रापि कथमाकाशस्य प्रतिबिम्बनिश्चयः ? इत्याशङ्क्याह—*साभ्रनक्षत्रस्येति* ॥ *ननु* जलगताकाशसम्बन्धित्वेनाभ्रादेः प्रतिभासः, न प्रतिबिम्बाकाशसम्बन्धितयेत्याशङ्क्याह—*जानुमात्रेति* । *ननु*

तत्त्वदीपनम्

तत्त्वज्ञानेति ॥ बिम्ब-प्रतिबिम्बयोरभेदेऽप्यवदातत्वादेर्यथोपाधिभेदाद् न संकरः, एवं संसरणादेरपीत्यर्थः ॥ जीवस्य प्रतिबिम्बत्वेऽपि तत्त्वज्ञानाश्रयत्वसंभवाद् बिम्बस्य च तदसंभवाद् जीवस्य ब्रह्मज्ञानेन संसारनिवृत्तिः श्रूयमाणा युज्यत इत्युक्तम्, तत्र श्रुतेर्न्यायविरोधमाशङ्कते—*नन्विति* ॥ विमतम्, न भेदभ्रमनिवर्तकम्, ऐक्यज्ञानत्वात् ; बिम्ब-प्रतिबिम्बैक्यज्ञानवदित्यर्थः । लोके तत्त्वज्ञानेन विच्छेदभ्रमानिवृत्तिमङ्गीकरोति—*सत्यमिति* ॥ नच—तेन दृष्टान्तेन ब्रह्मण्यपि भेदानिवृत्तिरिति—वाच्यमित्याह—*न बिम्बेति* ॥ एकत्वेन ज्ञायमानं बिम्बं प्रतिबिम्बनिमित्तं न भवति भेदभ्रमानिवर्तनमित्यक्षरार्थः । तत्र हेतुं पृच्छति—*किंत्विति* ॥ किं कारणं तत्रेत्यर्थः । बिम्बभेदभ्रमस्य दर्पणाद्युपाधिजनितत्वात् क्षोभकोपाधेश्चाज्ञानामूलत्वाद् न ज्ञाननिरस्यत्वम् ; ततश्च भेदभ्रमनिवर्तकत्वायोग्यत्वमुपाधिरित्यभिप्रायवानाह—*उपाधेरिति* ॥ नच साधनव्यापकत्वम् ; ब्रह्मव्यतिरिक्तस्याहंकारादेरज्ञानमूलत्वाद् ज्ञानेनाज्ञाननिवृत्त्यौपाधिकभ्रमनिवृत्तिसम्भवादित्यभिप्रायः ॥

जीवे भ्रान्त्यादेरसम्भवात्तन्निवृत्तिर्वा दूरापास्तेति चोदयति—*जीवस्येति* ॥ विपक्षे बाधकमाह—*अप्रतिबिम्बतेति* ॥ उभयमपि प्रमाणविरुद्धमित्याह—*नेतीति* ॥ जीवस्य प्रतिबिम्बत्वे प्रमाणमाह—*रूपमिति* ॥ रूप्यत इति रूपम्=शरीरादि, तत्प्रतिरूपो बभूव=तत्प्रतिबिम्बो बभूवेत्यर्थः । तत्र श्रुतिमूला स्मृतिरप्यस्तीत्याह—*एकधेति** ॥ स्वत एकरूपत्वेन व्यवस्थितोऽप्युपाधिभेदान्नानेव दृश्यते, जलभाजनभेदेन शीतांशुरिवेत्यर्थः । श्रुति-स्मृतितात्पर्याभिज्ञः सूत्रकृदपीत्थमेव सूत्रयांचक्रिवानित्याह—*अत एवेति* ॥ आत्मा निर्विशेषो यस्मात्, अतः सूर्यकादीन्युपमोपादीयते—शास्त्रे "यथा स्वयंज्योतिरात्मा विवस्वानि"त्यादीत्येष सूत्रार्थः । मूर्तस्य वदनादेः प्रतिबिम्बदर्शनाद् ब्रह्मणश्चामूर्तत्वान्न प्रतिबिम्बभावः ; ततश्च श्रुत्यादीनामन्यथार्थत्वमित्याशङ्क्याह—*अमूर्तस्येति* ॥ जलस्य एवाकाशस्तत्र भातीत्याशङ्क्याह—*साभ्रेति* ॥ साभ्रनक्षत्रगगनस्य जले भावात् प्रतिबिम्ब एवेत्यर्थः ।

पञ्चपादिका

प्रतिबिम्बकल्पः सर्वेषां नः प्रत्यक्षश्चिद्रूपो नान्तःकरणजाड्येनास्कन्दितः । स चाहंकर्तृत्वमात्मनो रूपं

पञ्चपादिकाविवरणम्

काशदर्शनाद्, जलान्तराकाश एवाभ्रादिबिम्बयुक्तो दृश्यत इति वक्तुमशक्यत्वात्। तत्प्रतिबिम्बत्वं चिद्रूपत्वं च शास्त्रप्रतिपन्नं प्रत्यक्षप्रतिपन्नं च न निराकर्तुं शक्यत इति भावः ॥

ननु घटाकाशवदुपाध्यवच्छिन्नो जीवः किं न स्यात्? *न*; सामान्य-विशेषाभ्यामुपाधिभिरण्डान्तर्वर्तिब्रह्मणः सर्वात्मना जीवभावेनावच्छिन्नत्वादनवच्छिन्नस्य ब्रह्मणोऽण्डाद्बहिरेव सद्भावप्रसङ्गात्, तत्र सर्वगतत्व-सर्वनियन्तृत्वादि ब्रह्मणो न स्यात्; अवच्छिन्नप्रदेशेऽप्यनवच्छिन्नस्य द्विगुणीकृत्य वृत्त्ययोगात्। स्वरूपापेक्षया तत् सर्वम्, न बहिःस्थितब्रह्मापेक्षयेति चेत्, न; "यो विज्ञाने तिष्ठन्नि"त्यादौ जीवव्यतिरिक्तस्यैव ब्रह्मणो जीवसंनिधानेन विकारान्तरवस्थानश्रवणात्, प्रतिबिम्बपक्षे तु जलगतस्वाभाविकाकाशे सत्येव प्रतिबिम्बाकाशदर्शनादेकत्रैव द्विगुणीकृत्य वृत्त्युपपत्तेर्जीवावच्छेदेषु ब्रह्मणोऽपि नियन्तृत्वादिरूपेणावस्थानमुपपद्यत इति प्रतिबिम्बपक्ष एव श्रेयानिति ।मिथ्यातत्त्वज्ञानाश्रयत्वं च तत्र प्रत्यक्षमित्याह—*स चाहंकर्तृत्वमिति* ॥ उपाधि-

ऋजुविवरणम्

—प्रतिबिम्बपक्षेऽप्येकत्र कथमवस्थानम्? इत्याशङ्क्याह—*प्रतिबिम्बपक्षे त्विति* ॥ "स चाहंकर्तृत्वमि"त्यनेनाहंकर्तृत्वस्यात्मतया ख्यानप्रदर्शनं ब्रह्मात्मताख्यानाभावप्रदर्शनं चाप्रस्तुतम्; मिथ्याज्ञानाश्रयत्वाप्रतीतेः, इत्याशङ्क्यावतारयति—*मिथ्यातत्त्वज्ञानेति* ॥ अत्र तादात्म्यमात्रस्य भ्रान्तत्वमुक्तमिति प्रतीयेत, तथा सति ज्ञानेनानिवृत्तिः। "तद्रूपे"ति चायुक्तं स्यात्, तदर्थमाह—*उपाधिस्वरूपमिति* ॥ "अतो युक्तः" इत्यनेनावगमे सति मिथ्याभूतस्य निवृत्तिरुक्ता, सा न युक्ता; सोपाधिकेषूपाधिनिवृत्तेरेव निवृत्तिप्रयोजकत्वादित्याशङ्क्यावतारयति—*अतस्तत्त्व-

तत्त्वदीपनम्

ननु अभ्रादेः प्रतिबिम्बः, न गगनस्येत्यत्राह—*जानुमात्रेति* ॥ एवं प्रतिबिम्बत्वं प्रसाध्य चिद्रूपत्वेन भ्रान्त्याद्याश्रयत्वं समर्थयते—*चिद्रूपत्वमिति* ॥ "अत्रायं पुरुषः स्वयंज्योतिरि"त्यादिरागमः शास्त्रशब्दार्थः। "गन्धं जिघ्राणी"ति गन्धं प्रति घ्रातृविषयोऽनुभवः प्रत्यक्षशब्दार्थः ॥

"प्रतिबिम्बकल्पः" इति विशेषणनिर्देशाज्जीवस्यावच्छिन्नत्वमदूदुषत्, तत् कस्मात्? इति शङ्कते—*नन्विति* ॥ सर्वगतस्य गगनस्य घटावच्छेदे यथा घटाकाशत्वव्यपदेशः, तद्वदुपाध्यवच्छिन्ने ब्रह्मणि जीवत्वव्यपदेश इत्यर्थः। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्येणोत्तरमाह—*न सामान्येति* ॥ सामान्य-विशेषाभ्यामिति तृतीयेत्थंभावे। अनुवृत्त-व्यावृत्तरूपेण व्यवस्थितैर्भूतेन्द्रियलक्षणैरुपाधिभिर्जीवभावेन ब्रह्मणः सर्वात्मनाऽवच्छिन्नत्वादिति योजना। बहिःसद्भावाङ्गीकृतौ दोषमाह—*तत्रेति* ॥ नच—सर्वगतत्वाद्यनुपपत्त्याऽन्तरप्यवस्थानमाश्रीयत इत्यपि—वाच्यमित्याह—*अनवच्छिन्नेति* ॥ सर्वगतस्य ब्रह्मण उपाध्यवच्छेदे प्रथममेका वृत्तिः, पुनरवच्छिन्नेऽपि नियन्तृत्वादिसिद्ध्यर्थमनवच्छिन्नस्य वृत्त्यन्तरमाश्रयणीयम्, नचैतदुपलब्धचरमिति द्विगुणीकृत्य वृत्त्यनुपपत्तिः। गगनस्य त्ववच्छिन्ने वृत्त्यनङ्गीकाराद् वैषम्यमिति भावः ॥

गगनवदेवावच्छिन्नेऽनवच्छिन्नस्य वृत्तिर्नेष्यते, नच सर्वगतत्वाद्यनुपपत्तिः; चिन्मात्रविषयत्वात्तस्य, इति शङ्कते—*स्वरूपेति* ॥ जगज्जन्मादिकारणं ब्रह्म, तस्य च नियन्तृत्वादिश्रवणान्नैवमित्याह—*न; य इति* ॥ अन्तःकरणप्रतिबिम्बितजीवनियन्तृत्वेन ब्रह्मणस्तत्रावस्थानाद् द्विगुणीकृत्य वृत्त्यनुपपत्तिस्तवापि समेत्याशङ्क्याह—*प्रतिबिम्बेति* ॥ जीवस्य चिद्रूपत्वे श्रवणादिविधिवैयर्थ्यम्; ब्रह्मणश्चिन्मात्रतया सदा स्फुरणात्, इत्याशङ्क्य, विपर्ययतद्धेतुनिवर्तकवृत्त्युत्पादार्थं श्रवणादिविधानमित्याह—*मिथ्येति* ॥ "रूपं मन्यत इति" रूपशब्दप्रयोगात् कर्तृत्वादिज्ञानं सम्यग्ज्ञानमिति शङ्क्येत, तत्राह—*उपाधीति* ॥ असङ्गोदासीनस्वभावेन स्वतः कर्तृत्वाद्यसंभवाद् भ्रान्त्या तन्मननमित्यर्थः ॥

पञ्चपादिका

मन्यते, न बिम्बकल्पब्रह्मैकरूपताम्; अतो युक्तस्तद्रूपावगमे मिथ्यात्वोपगमः। *ननु* तत्र

पञ्चपादिकाविवरणम्

स्वरूपमपि भ्रान्त्यैवावभासत इत्यर्थः। अतस्तत्त्वज्ञानेनोपाधिनिवृत्तेर्विच्छेदो नाय इत्याह—*अतो युक्त इति* ॥

ननु अज्ञानं जीवावच्छेदोपाधिरिति पुरस्तादुक्तम्, तत् कथमहङ्कारोपाधिना जीवस्याभिधीयत इति? *नैष दोषः*; चैतन्यस्यावच्छेदकविकल्पतारतम्येन व्यवहारविकल्पतारतम्यात्। *तथाहि*—निर्विकल्पकं चैतन्यमात्रैकरसमविद्यासम्बन्धादीषद्विकल्पव्यवहारालम्बनं भवति सुषुप्ते; ततस्तदुपादानान्तःकरणावच्छेदात् तदेव स्थूलतरव्यवहारालम्बनं भवति स्वप्ने; पुनरन्तःकरणसंसृष्टस्थूलशरीरोपरागात् स्थूलतमं भवति जागरणे। न चोपाधिभेदाद् जीवभेदप्रसङ्गः; पूर्वपूर्वोपाध्यवच्छिन्नस्यैवोत्तरोत्तरेणावच्छेदात्। निरपेक्षोपाधिभेदे हि जीवभेदः ॥

ननु स्थूलशरीरोपादानभूतसूक्ष्मरूपसहितेन लिङ्गशरीरसंस्कारेणोपरक्तमज्ञानं सुषुप्ते न जीवमवच्छेत्तुमर्हति; तत्र भ्रान्त्यभावात्, तल्लक्षणत्वाच्च विभागस्य। अथ भ्रान्तिज्ञानमनपेक्ष्यैवार्थगत एव विभागः कल्प्यते, तत्र विभागस्य कार्यत्वे सुषुप्तिप्रलयादावभावाद् ब्रह्मण्येवाविद्यादिसाङ्कर्यं स्यात्, अकार्यत्वे विभागस्यानादित्वाद-

ऋजुविवरणम्

ज्ञानेनेति* ॥ तत्र भ्रान्त्यभावादिति* ॥ अयमर्थः—सुषुप्ते विभागभ्रमाभावात् तदभावे जीवस्वरूपाभावादिति मा भूत् सुषुप्ते विभागप्रतीतिः, अप्रतीत एव कस्मान्न तिष्ठेत्? इत्याशङ्क्याह—*तल्लक्षणत्वादिति* ॥ भ्रान्तिज्ञानं लक्षणं ज्ञापकं

तत्त्वदीपनम्

उपाधिनिवृत्त्या मिथ्याभूतस्यापगम इति वक्तव्यम्, किमिदमुक्तम्—"तद्रूपागमे" इति? इत्याशङ्क्य, तत्त्वज्ञानेनोपाधिनिवृत्तिं सिद्धवत्कृत्वोक्तवानित्याह—*अत इति* ॥ अहंकारस्योपाधित्वे पूर्वापरविरोधः स्यादिति चोदयति—*नन्विति* ॥ अज्ञानोपहितस्यैवोपाध्यन्तरवर्णनान्न विरोधचोद्यमित्याह—*नैष इति* ॥ एकेनोपाधिनाऽपेक्षितसिद्धेः किमुपाध्यन्तरेण? इत्याशङ्क्याह—*चैतन्यस्येति* ॥ तारतम्यं व्यनक्ति—*तथाहीति* ॥

आत्मनः कथं निर्विशेषत्वम्? चैतन्यलक्षणसम्बन्धविशेषसद्भावादित्याशङ्क्य, संबन्धोऽसिद्ध इत्याह—*चैतन्यमात्रेति* ॥ चैतन्यस्वभावेऽपि धर्मान्तरसंबन्धशङ्कां निरस्यति—*एकरसमिति* ॥ "अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन" इति श्रुतेरुक्तार्थसिद्धिरित्यर्थः। चैतन्यमात्रं च तदेकरसं चेति तथोक्तम्। *तत इति* ॥ स्वप्नोपस्थापककर्माभिव्यक्तावित्यर्थः। वासनानिबन्धनो व्यवहारः स्थूलतरशब्दार्थः। जाग्रद्भोगोपस्थापककर्माभिव्यक्तावुपाध्यन्तरोपरागाद् व्यवहारान्तरं भवतीत्याह—*पुनरन्तःकरणेति* ॥ उपाधिभेदेनोपहितजीवभेदात् स्वप्नाद्यनुभूतस्य जागरणेऽनुसन्धानं न स्यादित्याशङ्क्याह—*नचेति* ॥ किमुपाध्यन्तरेणाप्राप्तभेदस्योपाध्यन्तरकल्पनया जीवभेदं मन्यते? उत प्राप्तभेदस्य? इति विकल्प्याद्यं दूषयति—*पूर्वेति* ॥ अज्ञानावच्छिन्नस्यैवान्तःकरणाद्युपाध्यन्तरवर्णनान्न जीवभेदप्रसक्तिरित्यर्थः। द्वितीयं प्रत्याह—*निरपेक्षेति* ॥ उपाध्यन्तरेण प्राप्तभेदामपेक्ष्योपाधितो भेदे जीवभेदापत्तिः, नच तथोपेयत इत्यर्थः ॥

अज्ञानस्यावच्छेदकत्वमाक्षिपति—*नन्विति* ॥ स्थूलशरीरस्योपादानं च तद् भूतं चेति स्थूलशरीरोपादानभूतम्, तस्य यत् सूक्ष्ममपञ्चीकृतभूतलक्षणम्, तेन सहितेनेत्यर्थः। मा भूद् भ्रान्तिरित्यत आह—*तल्लक्षणत्वादिति* ॥ विभागस्य भ्रान्त्यधीनत्वाद्, भ्रान्तेश्च सुषुप्तावभावान्न जीवः स्यादित्यर्थः। भ्रान्तिलक्षणत्वमसिद्धमित्याह—*अथेति* ॥ "अर्थगत एवे"त्येवकारव्यावर्त्यमाह—*भ्रान्तीति* ॥ भेदस्य नाविद्याकार्यत्वम्, किंतु तत्तन्त्रत्वम्; अतश्च भ्रान्त्यभावेऽपि भेदोपपत्तिरिति गूढाभिसन्धिः। अभिसन्धिमजानान आह पूर्ववादी—*तत्रेति* ॥ विभागस्य किं कार्यत्वम्? उताकार्यत्वम्? आद्ये सुषुप्तादौ तदभावाद् जीवाभाव इति ब्रह्मण्यविद्यादिः स्यात्; अन्यथा तदभावात् पुनरुत्थानादि न स्यादित्यर्थः। द्वितीयं प्रत्याह—*अकार्यत्व इति* ॥ *अनादित्वम्=प्रागभावशून्यत्वम् ततो

पञ्चपादिकाविवरणम्

विद्यानिमित्तत्वं न स्यात्, *उच्यते* ;—ब्रह्मण्यविद्यादिसाङ्कर्यपरिहाराय सुषुप्त्यादावप्यस्त्येव जीवब्रह्मविभाग इति कल्प्यते। *ननु*—अर्थगत एव तर्हि विभागः, न विभ्रमगतः, *सत्यम्* ; सुषुप्त्यादिगतविभागादन्यत्र जीव-ब्रह्मविभागो विभ्रममात्रतयाऽविद्योपादान उच्यते। *ननु* यद्यर्थगतो विभागः, तर्हि नाविद्योपादानः ; अनादित्वात्, अविभ्रमत्वाच, *सत्यम्* ; तथाऽप्यविद्यातन्त्रो विभागोऽनादित्वेऽपीति ब्रूमः। यथा ह्यात्माविद्यासम्बन्धोऽविद्यातन्त्रः, नाविद्योपादानः ; सम्बन्धजननात् प्राक् स्वातन्त्र्येणावस्थानानुपपत्तेः, अज्ञानस्यानादित्वाच्चात्माविद्यासम्बन्धस्य नाविद्योपादानता ॥

ननु जीव-ब्रह्माश्रयो विभागः कथमविद्यातन्त्रः स्यात्? *उच्यते* ;—अनाद्यविद्याविशिष्टं चैतन्य-

ऋजुविवरणम्

यस्य, तल्लक्षण इति विग्रहः ; प्रतिभासमात्रशरीरं तदभावे न तिष्ठेदित्यर्थः। "अविद्यानिमित्तत्वमि"त्यविद्यानिमित्तत्वं विभागस्योक्तं पूर्वम्, तद्विरोधः ; तथा तन्निवृत्तावपि मुक्तौ विभागस्थितिरपीति भावः। *नन्वर्थगत इति* ॥ अयं भावः*—अविद्याऽनिवृत्तौ विभागानिवृत्तिः सत्यत्वं च स्यादिति। *ननु*अविद्योपादानत्वाभावे कथमविद्यातन्त्रतेत्याशङ्क्याह—*यथा ह्यात्माविद्येति* ॥ कथमविद्यासम्बन्धस्याविद्यातन्त्रतैव, न तदुपादानता? स्वातन्त्र्येणानवस्थानस्यान्यथासिद्धेरित्याशङ्क्याह—*अज्ञानस्येति*—उच्यते ; *अनादीति* ॥ जीवभावेनाश्रयो न स्वरूपेणेति सम्बन्धः। कथमनादिविभागस्य स्वरूपातिरिक्तत्वेन कादाचित्कजीवभावेनाश्रयत्वमिति? तत्राह—*अनादीति* ॥ कथं तस्यानादिता? कथं च तत्स्वरूपस्य जीवतेति? तदाह—*अनाद्यविद्येति* ॥ *अथवा*—जीवाश्रयत्वेऽपि कथमविद्यातन्त्रता? इत्याशङ्क्याह—*अनाद्यविद्येति* ॥ *ननु*अन्तःकरणविशिष्टाश्रयत्वं कस्मान्नाङ्गीक्रियते? इत्याशङ्क्याह—*अनादीति* ॥ ननु*अनादिवस्त्वन्तरवैशिष्ट्यमेव कल्प्यतामिति? नेत्याह—*काल्पनिकेति* ॥ ननु*-

तत्त्वदीपनम्

विभागस्य यदिदमविद्यानिमित्तत्वमभिहितम्—"अविद्यावच्छिन्ने"त्यत्र तन्न भवेदित्यर्थः। विकल्पासहत्वान्नैतदित्याह—*उच्यत इति* ॥ अज्ञानमवच्छेदकं नेति वदतः कोऽभिप्रायः? किं सुषुप्तावच्छेद एव नास्ति? उतार्थगतः? तत्राद्यं प्रत्याह—*ब्रह्मणीति* ॥ द्वितीयमनुवदति—*नन्वर्थेति* ॥ "अर्थगतः" इति प्रत्यग्ब्रह्मगत इति शङ्का स्यात्, तदर्थमाह—*न विभ्रमगत इति*॥ भ्रान्त्यात्मको न भवतीत्यर्थः। विभ्रमगतत्वाभावमङ्गीकरोति—*सत्यमिति*॥ तर्ह्यविद्याकार्यत्वं कथमुक्तम्? इत्याशङ्क्याह—*सुषुप्त्यादीति*॥ जीव-ब्रह्मविभागशब्देन–'अहमीश्वराद्भिन्नः' इत्यादिरूपेण स्फुटं व्यवह्रियमाणो भेदः कथ्यते। तर्हि सुषुप्त्यादिगतभेदस्याविद्योपादानत्वाभावात् तन्निवृत्तावप्यवस्थानं स्यादिति शङ्कते—*ननु यद्यर्थगत इति* ॥ अविद्यानुपादानत्वमङ्गीकरोति—*सत्यमिति* ॥ तर्ह्यविद्याभावेऽप्यवस्थानं स्यादित्याशङ्क्याविद्यातन्त्रत्वात्तन्निवृत्तौ निवृत्तिर्युक्तेत्याह—*तथापीति*॥ तदकार्यत्वे कथं तत्तन्त्रत्वम्? इत्याशङ्क्याह—*यथा हीति* । दृष्टान्तासङ्गतिमाशङ्क्याह—*सम्बन्धेति* ॥ सम्बन्धस्याज्ञानकार्यत्वे ततः प्रागज्ञानस्य स्वातन्त्र्यं स्यात्, नच तदुपपद्यते ; जडत्वादित्यर्थः ॥ इतोऽपि न सम्बन्धस्याविद्याकार्यत्वमित्याह—*अनादित्वादिति* ॥ प्रागभाववतः कार्यत्वं दृष्टम्। नचायं प्रागभाववान् ; अज्ञानस्यानादित्वेन सम्बन्धस्यानादित्वादित्यर्थः। प्रकारान्तरेणाविद्यातन्त्रत्वमाक्षिपति—*ननु जीवेति* ॥ भेदस्य धर्मि—प्रतियोगितन्त्रत्वमित्यर्थः। विकल्पासहत्वान्नैतदित्याह—*उच्यत इति*॥ जीव-ब्रह्मशब्दाभ्यां विशिष्टं चैतन्यं विवक्षितम्? उत चिन्मात्रम्? इति विकल्प्याद्यमनुवदति—*अनादीति* ॥ चैतन्यं जीवभावेन भेदस्याश्रय इति सम्बन्धः। जीवभावस्यागन्तुकत्वात् कथमनाद्याश्रयत्वम्? अत आह—*अनादीति* ॥ अकृताभ्यागमादिप्रसङ्गान्नागन्तुकत्वमित्यर्थः। चैतन्यस्यासङ्गादिरूपस्य कथं जीवभावः? तत्राह—*अविद्याविशिष्टमिति* ॥ मिथ्याज्ञानं व्यावर्तयति—*अनादीति* ॥ भेदस्य परमार्थत्वान्न तदाश्रयत्वमित्याशङ्क्य हेत्वसिद्धिमाह—*काल्पनिकेति* ॥ अन्तःकरणविशिष्टाश्रयत्वशङ्कां निरस्यति—*अनादीति* ॥ भेदस्य सादित्वेऽ-

पञ्चपादिकाविवरणम्

मनादिर्जीवभावेन काल्पनिकानादिभेदस्याश्रयः, न स्वरूपेण ; तस्यैकत्वात्, अतो विशिष्टाश्रयो विभागः स्वरूपेणाप्युपरज्यमानो विशेषणाविद्यातन्त्रो विशिष्ट इत्यविद्याकृतो विभाग उच्यते। अविद्यातन्त्राणां चानिर्वचनीयत्वमनादित्वं चाविद्यासम्बन्धवन्न विरुध्यते। लोके च दर्पण-घटादिविशिष्टयोरेव मुखाकाशयोर्मिथ्याभेदावभासः, न स्वरूपेणेत्युपाधितन्त्रता भेदस्योच्यते ; तस्मादनाद्यविद्याप्रतिबिम्बकृतविभागस्यैव जीवस्य तदुपन्नाहङ्कारादिविशेषेषु स्थूलप्रतिबिम्बापेक्षया सर्वेषामुपाधित्वं न विरुध्यते ॥

अत्र सर्वसङ्करवादी—प्रतिबिम्बस्यावस्तुत्वाभ्युपगमान्न जीवः प्रतिबिम्बमिति—*जल्पति* ॥ तत्र मुख-चित्स्वरूपयोः प्रतिबिम्बेषु नावस्तुत्वमिष्यते। भेदविपर्यासादीनामवस्तुत्वाभ्युपगमेऽपि न मुख-चैतन्ययोः काचित् क्षतिः। मुखचित्स्वरूपयोश्च बिम्बात्मतां प्रमिमीमहे मिथ्यांशपर्युदासेन। नच मिथ्यांशस्य बन्धमोक्षौ,

ऋजुविवरणम्

एवमप्यविद्याविशिष्टचैतन्यतन्त्रता स्यात्, नाविद्यातन्त्रतेत्याशङ्क्याह—*अतो विशिष्टाश्रय इति* ॥ ननु*—जीव-ब्रह्मविभागोऽविद्याकृत इत्युक्तं पुरस्तात्, तद्विरोधः, तथा व्यपदेशोऽपि विशिष्टकृत इत्येव स्यात्, इत्याशङ्क्याह—*इत्यविद्याकृत इति* ॥ ननु*अविद्यातन्त्रस्यानादित्वं न संभवति ; तत्कार्यवत्, तथाऽविद्या-तत्कार्यव्यतिरिक्तस्य ज्ञाननिवर्त्यत्वं च कथम्? इत्याशङ्क्याह—*अविद्यातन्त्राणामिति। *ननु*उपाधिजन्यस्यैव मुखभेदस्योपाधितन्त्रता दृष्टा, तद्वदत्राप्यविद्याजन्यत्वेनैव तत्तन्त्रत्वं वक्तव्यम्, नतु विशिष्टे प्रतीतिमात्रेणेत्याशङ्क्याह—*लोके च दर्पणेति* ॥ *अत्र सर्वसङ्करवादीति* ॥ अवस्तुत्वे बन्ध-मोक्षयोर्भिन्नाधिकरणत्वमिति भावः। *ननु*—मुखस्वरूपस्य सत्यत्वेऽपि भेदविपर्यस्तरूपेण प्रतिबिम्बत्वम्, तच्च मिथ्याभूतमेव, नच मिथ्याभूतस्य बिम्बात्मतेत्याशङ्क्याह—*मुखचित्स्वरूपयोरिति* ॥ प्रतिबिम्बत्वेनोपलक्षितस्यैवैकत्वम्, नतु विशिष्टस्येति भावः। *ननु*—उपलक्षितस्यैकत्वेऽपि तत्प्रतिबिम्बे बन्धव्यवहारः ; यस्य बन्धः, तद्गतो मोक्षः ; तथा सत्यनाद्यविद्यानिमित्तप्रपञ्चनिवृत्तिरूपत्वान्मोक्षस्य भिन्नाधिकरणत्वमेव बन्ध-मोक्षयोरित्याशङ्क्याह—*नच मिथ्यांशस्येति* ॥ अज्ञानं सन्निधिलब्धप्रतिबिम्बत्वपुरःसरसम्बन्धान्तर्गतमेव, तदपि स्वरूपमात्र एव। नचाज्ञाननिरपेक्षस्वरूपान्तराभिप्रायेण जीवाधारत्वमुक्तम्,

तत्त्वदीपनम्

कृताभ्यागमादिप्रसङ्ग इत्यर्थः। द्वितीयं निरस्यति—*न स्वरूपेणेति* ॥ तस्मादाद्यः परिशिष्यत इत्याह—*अत इति* ॥ चिन्मात्रतन्त्रत्वाभावाद्विभागो विशिष्टाश्रय इति सम्बन्धः ॥

विशिष्टनिष्ठभेदस्य चित्स्वरूपानुषङ्गात् कथमविद्यानिवृत्तौ निवृत्तिः? तत्राह—*स्वरूपेणेति* ॥ स्वरूप उपरज्यमानोऽपि विभागोऽविद्याकृत उच्यत इति सम्बन्धः। अविद्याकृतशब्देन तत्तन्त्रत्वं विवक्षितम्, तत्र हेतुमाह—*विशेषणाविद्यातन्त्र इति* ॥ इतिशब्दो हेत्वर्थः। विभागस्याविद्यातन्त्रत्वात् घटादिवत् कार्यत्वम्, अकार्यत्वे ज्ञाननिवर्त्यत्वं न स्यात्, अविद्यातिरिक्तत्वे सत्यनादित्वादात्मवदित्याशङ्क्योभयत्रापि व्यभिचारमाह—*अविद्येति* ॥ अविद्यातन्त्राणामप्यनादित्वम्, अविद्यासम्बन्धवत्, तद्वदनिर्वचनीयत्वं च न विरुध्यत इति योजना। ज्ञाननिवर्त्यत्वमनिर्वचनीयशब्दार्थः। उपहितसंबन्धिनः स्वरूपमात्रेणासम्बन्धे दृष्टान्तमाह—*लोक इति* ॥ एकोपाध्यवच्छिन्नस्योपाध्यन्तरसम्बन्धसमर्थनमुपसंहरति—*तस्मादिति* ॥ भास्करमतमनुवदति—*अत्रेति* ॥ जीवस्याप्यवस्तुत्वे बन्धमोक्षयोरननुगम आपद्येत ; तस्माद्वस्तुत्वमेष्टव्यम्, इति न जीवस्य प्रतिबिम्बत्वमित्यर्थः। किं स्वरूपमात्रस्यावस्तुत्वम्? उतोपाधिविशिष्टस्य? आद्येऽवस्तुत्वासिद्धिरित्याह—*तत्रेति* ॥ द्वितीयमङ्गीकरोति—*भेदेति*। स्वरूपमात्रस्य सत्त्वे हेतुमाह—*मुखेति* ॥ 'मदीयमिदं मुखमि'ति प्रत्यभिज्ञया मुखस्य बिम्बात्मत्वम्, "अयमात्मा ब्रह्मे"ति वाक्यादात्मनो ब्रह्मात्मत्वमित्यर्थः। विरोधादेकत्वावगमो न युक्त इत्याशङ्क्याह—*मिथ्यांशेति* ॥ चित्स्वरूपे बन्धासंभवाद्विशिष्टे बन्धान्वयो वक्तव्यः ; तथाच मोक्षान्वयित्वमपि स्यात्, नच तदुपपद्यते ; मिथ्यांशस्य तत्र निवृत्तेः, तस्माद्बन्ध-मोक्षयोर्वैयधिकरण्यमित्याशङ्क्याह—*नचेति* ॥ जडत्वाद् मुक्तावनन्वयि-

पञ्चपादिका

विभ्राम्यतो विभ्रमहेतुर्दर्पणालक्तकादिपरमार्थवस्तु संनिहितमस्ति, न तथेह किञ्चित् सर्वत्रैव चिद्विलक्षणे विभ्रमविलासाभिमानिन इति मा भूदाशङ्केति रज्जुसर्पमुदाहरन्ति ॥

पञ्चपादिकाविवरणम्

किन्तु स्वरूपस्यैव ; स्वरूपगतस्यापि साङ्कर्यपरिहारायोपाधिभेदो दर्शितः। तस्मात् परसिद्धान्तापरिज्ञानविलसितोऽयं सर्वसङ्करवादिनो विभ्रमः ; अवस्तुत्वाभ्युपगमादिति ॥

अहङ्कारोपाधिनिमित्तो जीवब्रह्मविभागोऽनात्माध्यासश्च दृष्टान्तद्वयेन सिद्धः, तत्र किं रज्जुसर्पोदाहरणेन वेदान्तविहितेन ? इति चोदिते, तस्य प्रयोजनमाशङ्कान्तरनिवृत्तिरित्याह—*ननु तत्र विभ्राम्यत इति* ॥ निरुपाधिकाध्यासपरिनिष्पन्नाहङ्कारोपाधिकः कर्तृत्वाद्यध्यास इति कथयितुमित्यर्थः ॥

ननु सर्वत्राधिष्ठानाध्यस्यमानव्यतिरिक्तोपाधिनिमित्त एवाध्यासः, न निरुपाधिक इति

ऋजुविवरणम्

किन्त्वज्ञाननिमित्तप्रतिबिम्बभावस्याज्ञानव्यवस्थापकत्वम्, भेदाधीनधर्मि-प्रतियोगिभावस्यैव च भेदव्यवस्थापकत्वमुक्तम्। स्वरूपगतत्वेऽविद्यासाङ्कर्यमिति यच्चोद्यम्, तदपि परिहृतमित्याह—*स्वरूपगतस्येति* ॥ तत्—

सिद्धे सामान्यतोऽध्यासे युज्यते तद्विशेषतः। क्षेपः, तेनोत्तरं ताभ्यां क्रियतेऽयमुपाधितः ॥

"ननु तत्रे"त्यनेन रज्जुसर्पोदाहरणस्य प्रयोजनमुक्तम्, किं तत्परिहारेण ? न ह्येतदुदाहरणमध्याससाधकत्वेन क्वापि सिद्धमित्याशङ्क्याह—*वेदान्तविहितेनेति* ॥ *ननु*—सोपाधिकत्वमध्यासस्योक्तम्, अतस्तद्विरोधो निरुपाधिकाध्यासकथन इत्याशङ्क्य व्याचष्टे, *अथवा*—चिद्विलक्षणस्याप्यध्यासोपाधिर्नास्तीति शङ्कानिवृत्त्यर्थमुदाहरणमित्युक्तम्, तत्र न ज्ञायते—कथं शङ्कानिवृत्तिरस्य प्रयोजनम् ? किं तत्रोपाध्यभावेऽपि यथाऽध्यासः, तद्वदत्रापि ? उत तद्वदेवात्रापि सोपाधिकत्वम् ? इत्याशङ्क्याह—*निरुपाधिकाध्यासेति* ॥ "ननु तत्रे"ति ग्रन्थे सर्पाभावेऽपि संस्कारोऽस्तीति चोदितम्, अचोद्यं तत् ; सिद्धान्तेऽप्यङ्गीकारात्, सिद्धान्तविरोधि च चोद्यमित्याशङ्क्यावतारयति—*ननु सर्वत्रेति* ॥ "बाढम् ; इहापी"त्यनेन सोपाधिकत्वाङ्गीकारे निरुपाधिकाध्याससिद्ध्यर्थत्वमस्योक्तम्, तद्विरुध्यत

तत्त्वदीपनम्

त्वाच्चेत्यर्थः। मिथ्यांशवचित्यपि बन्ध-मोक्षावनुपपन्नाविति शङ्कते—*किंत्विति* ॥ केवलस्य बन्धासिद्धावप्युपाधिद्वारा बन्धान्वयान्मुक्त्युपपत्तिरित्याह—*स्वरूपस्येति* ॥ स्वरूपगतत्वेन सांकर्यप्रलापोऽप्ययुक्त इत्याह—*स्वरूपगतस्येति* ॥ परमतनिराकरणमुपसंहरति—*तस्मादिति* ॥

स्फटिकादिदृष्टान्तेनापेक्षितसिद्धौ रज्जुसर्पोदाहरणं वृथा, इत्याशङ्क्य, शङ्कान्तरनिराकरणपरतयाऽर्थवत्त्वमवोचि, तत्र रज्जुसर्पोदाहरणस्य वैयर्थ्यमेवास्त्वित्याशङ्क्य, वृत्तसंकीर्तनपुरःसरं तात्पर्यमाह—*अहंकारेति* ॥ दर्पणदृष्टान्तेन जीव-ब्रह्मविभागस्यौपाधिकत्वं सिद्धम्, स्फटिकदृष्टान्तेन कर्तृत्वादेर्मिथ्यात्वमिति विभागः। "वेदान्तविहितेने"ति विशेषणवैयर्थ्यशङ्कां निरस्यति। नच—वेदान्तविहितोदाहरणसमर्थनमप्रस्तुतमित्यपि—शङ्क्यम् ; स्फटिकलौहित्यादिप्रतिभास उपाधिवदत्रोपाधेरभावान्न भ्रमसम्भव इति शङ्कायां निरुपाधिकरज्जुसर्पोदाहरणसमर्थनं युक्तमित्यर्थः। अलक्तकोपाधिनिमित्तलौहित्यवत् कर्तृत्वादिकमप्युपधाननिमित्तमित्युक्तम्, अत्र रज्जुसर्पदृष्टान्तेन निरुपाधिकत्वमुच्यत इति विरोधमाशङ्क्य तात्पर्यमाह—*निरुपाधिकेति* ॥ अहंकारस्य निरुपाधिकाध्यासपरिनिष्पन्नत्वमत्रोक्तम्, पूर्वत्र कर्तृत्वादेरौपाधिकत्वमित्यविरोध इत्यर्थः ॥

सर्पभ्रमे संस्कारोपाधिरस्ति, अत्र तु नैवमिति वैषम्यमुक्तम्—*ननु तत्रापीत्यत्र*, तदनुपपन्नम् ; प्रकृतेऽपि संस्कारोपाधेः सम्भवादित्याशङ्क्य तात्पर्यमाह—*ननु सर्वत्रेति* ॥ आत्मव्यतिरिक्तस्य सर्वस्याध्यस्यमानकोट्यन्तर्भावादधिष्ठानाध्यस्यमानव्यावृत्तोपाधेर्निमित्तत्वमहंकारस्याप्यनुपपन्नमित्यर्थः। अधिष्ठानस्यापि निमित्तत्वा-

पञ्चपादिका

ननु —तत्रापि यदि नामेदानीमसन्निहितः सर्पः, तथापि पूर्वनिर्वृत्ततदनुभवसंस्कारः समस्त्येव, *बाढम्*; इहाप्यहङ्कर्तृता-तत्संस्कारयोर्बीजाङ्कुरयोरिवानादेः कार्य-कारणभावस्य वक्ष्यमाणत्वात् तत्संस्कारो विभ्रमहेतुर्विद्यते । तत्र यद्यप्यनिर्वचनीयतयैवारुणादिना स्फटिकादेः सावयवत्वेन सम्भेदयोग्यस्याप्य-

पञ्चपादिकाविवरणम्

चोदयति—*ननु तत्रापि यदि नामेति* ॥ पूर्वानुभवसंस्कारमात्रोपाधिमात्रमिहापि विद्यते, स्वतन्त्रोपाधिरेव निराक्रियत इति परिहरति—*बाढमिहापीति* ॥ न पूर्वानुभवसंस्कार एव भ्रमहेतुः, न पूर्वभ्रान्तिसंस्कार इति नियमोऽस्तीति भावः ॥

ननु आत्मनि सोपाधिकस्य निरुपाधिकस्य चाध्यासस्योदाहरणत्रयेणैव सिद्धत्वाद् न घटाकाशोदाहरणेन वेदान्तविहितेन कृत्यमस्तीत्याशङ्क्य, चोद्यान्तरनिराकरणेनासङ्गत्वसिद्धिः प्रयोजनमित्याह—*तत्र यद्यप्यनिर्वच-

ऋजुविवरणम्

इत्याशङ्क्यावतारयति—*पूर्वानुभवसंस्कारेति* ॥ *ननु* अनुभवसंस्कारस्तत्रास्तीति चोदिते, "बाढमि"त्यङ्गीकारो न युक्तः ; अत्रानुभवसंस्काराभावात्, तथाऽनुभवसंस्कारस्यैव हेतुत्वदर्शनात्, तदभावेऽध्यासोऽपि न संभवेदित्याशङ्क्य व्याचष्टे—*न पूर्वानुभवसंस्कार इति* ॥

अहंकारादिसम्बन्धे तत्राध्यासे निरूपिते । शङ्कितुं शक्यते संगः सोऽनेनैव निरस्यते ॥

चोद्यान्तरनिराकरणेनेति ॥ एवं चोद्यम्—*ननु* असङ्गत्वं न घटाकाशोदाहरणत्वप्रदर्शनाधीनम् ; स्फटिकाद्युदाहरणसामर्थ्यादेव तत्सिद्धेः—इति । "तत्र यद्यपी"त्यत्रानिर्वचनीयतयेति हेतुः प्रयुक्तः ; नासौ "अरुणादिने"-त्यनेनान्वेति ; अनिर्वचनीयत्वस्य हेतोः सम्बन्धिनिरूपकविशेषाकाङ्क्षत्वात्, "अरुणादिने"ति तु सहार्थे तृतीया, न तेनान्वययोग्यमर्थं वक्ति ; "स्फटिकादेरसंभेदः" इत्युक्ते केनेत्यपेक्षायाम्—"अरुणादिने"त्यन्वितत्वाच्च, नापि "स्फटिका-देरि"त्यनेनान्वयः ; हेतोरसिद्धिप्रसङ्गात्, "सावयवत्वेन संभेदयोग्यस्ये"त्युक्तम्, तदपि न ज्ञायते ; निरवयवस्याप्या-

तत्त्वदीपनम्

दवधारणानुपपत्तिरित्याशङ्क्याह—*न निरुपाधिक इति* ॥ निरुपाधिकाध्यासे रज्जुसर्पनिदर्शनमित्यभिधाय, तस्य सोपाधिकतां ब्रुवन् कथमव्याहतव्यापारः स्यात् ? इत्याशङ्क्य तात्पर्यमाह—*पूर्वानुभवेति* ॥ "उपाधिमात्र-मि"त्यत्र मात्रचोऽर्थमाह—*स्वतन्त्रेति* ॥ अध्यस्यमानधर्मसमानलौहित्याश्रयस्य संस्कारव्यतिरिक्तस्योपाधेरभावादत्र नोपाधिः, ततो न व्याघात इत्यर्थः । तथापि तत्र प्रमाणानुभवसंस्कारस्योपाधित्वम्, अत्र तु न तादृश उपाधिरिति वैषम्यशङ्कां निराकर्तुं "पूर्वाऽनुभवसंस्कारमात्रे"ति विशेषणम् ॥ दृष्टान्त-दार्ष्टान्तिकयोः सर्वसाम्यस्यानपेक्षितत्वात् संस्कारमात्रं विवक्षितमित्यर्थः । नच—संस्कारस्याप्यध्यस्तत्वाद् नाध्यासनिमित्तत्वम्, इतरेतराश्रयत्वप्रसङ्गा-दित्यपि—वाच्यम् ; प्राक्तनाहंकारानुभवसंस्काराद्यतनभ्रमोद्भवसम्भवात्, स च संस्कारान्तरादिति न विरोध इत्याशयेनोक्तम् *पूर्वेति* ॥ प्रमाणानुभवसंस्कारस्य भ्रमहेतुत्वप्रसिद्धेस्तादृशः संस्कार एष्टव्यः ; इतरथा भ्रमानु-द्भवापातादित्याशङ्क्याह—*न पूर्वेति* ॥ प्रतीतिरनुभवशब्दार्थः । प्रमाणसंस्कारस्य केवलव्यतिरेकविधुरत्वा-दप्रयोजकत्वमित्यर्थः । द्विविधस्याध्यासस्योक्तन्यायेन सिद्धत्वादुत्तरं भाष्यं व्याक्रियताम्, किमत्रासङ्गत्वप्रतिपादकेन "तत्रे"त्यादिना ग्रन्थेन ? इत्याशङ्क्य तात्पर्यमाह—*नन्वात्मनीति* ॥ सोपाधिकाध्यासस्य दर्पण-स्फटिकोदाहरणद्वयेन सिद्धेर्निरुपाधिकस्य रज्जुसर्पोदाहरणेनेति विभागः । घटाकाशोदाहरणस्य वेदान्तविहितत्वेऽपि नात्रार्थवत्त्वसाधन-मुचितम् ; तस्यात्रानुपक्रमादित्याशङ्क्याह—*चोद्यान्तरेति* ॥ असङ्गित्व आत्मनः सिद्धे कर्तृत्वादेरध्यस्तत्वम्, नच तत्सिद्धिः ; प्रमाणाभावात् । नच—"असङ्गः" इत्यादिवाक्यं प्रमाणम् ; असङ्गत्वसम्भावनाहेतुदृष्टान्ताभावात् । नच स्फटिकादेर्दृष्टान्तत्वम् ; तस्यापि सङ्गित्वादित्येवंविधचोद्यनिरासद्वारा घटाकाशोदाहरणेन श्रुतिसमर्पितासङ्गितायां सम्भावितायां कर्तृत्वादेरध्यस्ततासिद्धिरित्यभिसन्धिः । अनिर्वचनीयतया संभेदयोग्यस्यापीत्यन्वयशङ्का स्यात्,

पञ्चपादिका

सम्भेदावभासः सिद्धः ; तथापि तदासङ्गीव स्फटिकप्रतिबिम्बमुत्प्रेक्षते, रज्ज्वां पुनः सर्पबुद्धिरेव, न तत्सम्भिन्नत्वमसम्भिन्नत्वं वा तस्याम् । तेन—"असङ्गो नहि सज्जते" "असङ्गो ह्ययं पुरुषः" इत्यादिश्रुतिसमर्पिताऽसङ्गताऽऽत्मनो न स्पष्टं दर्शिता, इति तदर्थं घटाकाशोदाहरणम् । तत्र हि तत्परामर्शादृते न भेद-रूप-कार्य-समाख्याः स्वगता दृश्यन्ते । एतच्च सर्वमुदाहरणजातं श्रुति-तन्न्यायानुभवसिद्धस्य तदसम्भावनापरिहाराय बुद्धिसाम्यार्थं च, न वस्तुन एव साक्षात्सिद्धये । तदेवं यद्यपि चैतन्यैकरसोऽनिदमात्मकत्वादविषयः ; तथाप्यहङ्कारे व्यवहारयोग्यो भवति, इति गौण्या वृत्त्याऽस्मत्प्रत्ययविषयतोच्यते ; प्रमेयस्य च व्यवहारयोग्यत्वाव्यभिचारात् ॥

पञ्चपादिकाविवरणम्

नीयतयैवेति* ॥ अरुणादिना स्फटिकादेर्गुण-गुणित्वेन संभेदे योग्यास्याप्यनिर्वचनीयतयाऽरुणादेरसम्भेदावभासः सिद्ध इत्यन्वयः । कथं पुनर्घटाकाशोदाहरणेनासङ्गत्वसिद्धिरिति ? तत्राह—*तत्र हीति* ॥ *ननु* उदाहरणैरेवात्मनोऽविकारित्वैकत्वासङ्गत्वानां सिद्धत्वान्नागमेन कृत्यमिति, नेत्याह—*एतच्च सर्वमुदाहरणजातमिति* ॥ प्रमाणमन्तरेणोदाहरणमात्रादर्थसिध्ययोगात्, प्रत्युदाहरणसम्भवादिति भावः ॥

"अस्मत्प्रत्ययविषयत्वादि"ति भाष्यमात्मन्यध्यासोपपत्त्यर्थम् । तत्रास्मत्प्रत्ययस्तन्निमित्ताध्यासश्च दर्शितः, विषयशब्दार्थमिदानीमाह—*तदेवं यद्यपीति* ॥ गौण्या वृत्त्या विषयशब्दप्रयोगे किं गुणसाम्यमिति ? तदाह—*प्रमेयस्य चेति* ॥ *ननु* सविकल्पकाध्यासस्य सविकल्पकमेवाधिष्ठानं वक्तव्यम् ; तथा दर्शनात्,

ऋजुविवरणम्

रुप्येनान्वयसम्भवात्, इत्येतन्मनसि कृत्वाऽध्याहृत्य योजनां योग्यतां च दर्शयति—*अरुणादिनेति* ॥ कथमसंभावनामात्रनिराकरणहेतुत्वमेव, नार्थसाधकत्वम् ? अनुमानार्थापत्तिरूपत्वादुदाहरणस्येत्याशङ्क्याभिप्रायमाह—*प्रमाणमन्तरेणेति* ॥ "तदेवमि"त्यनेन गौणविषयत्वं दर्शितम्, कस्तस्येदानीं प्रसङ्गः ? इत्याशङ्क्याह—*तत्रास्मत्प्रत्यय इति* ॥ *ननु* "व्यवहारयोग्यत्वे", इत्यनेनेतरेतराश्रयमापादितम्, तदनुपपन्नम् ; निर्विकल्पकेऽप्यज्ञानस्याध्यस्तत्वात, इत्याशङ्क्य साभिप्रायमवतारयति—*ननु सविकल्पकाध्यासस्येति* ॥ "न ; अनादित्वेने"ति व्यधिकरणपरिहारः ;

तत्त्वदीपनम्

तदर्थमाह—*अरुणादिनेति* ॥ "रक्तः स्फटिकः" इति प्रतिभासात् स्फटिकस्यारुणिम्ना संभेदो भासत इत्येतत्—*तदासङ्गी वेति* टीकयोच्यते । सावयवत्वं च धर्मवत्त्वमात्रम् । *ननु* घटाकाशदृष्टान्तेनापि नासङ्गित्वसिद्धिः ; तस्य भेद-रूपाद्यनुषङ्गादिति शङ्कते—*कथमिति* ॥ उपाधिपरामर्शं विना तत्र स्वतो न भेदादिः प्रथत इत्याह—*तदाहेति* ॥ *भेद-रूप-कार्य-समाख्या इत्यस्यायमर्थः*—घटाकाशस्य कूपाकाशात् भेदः, अल्पत्वादिपरिमाणविशेषो रूपम्, अन्न-घृतादिपदार्थानां शब्द-स्थित्यवकाशादिः कार्यम्, घटाकाश इत्यादिसंज्ञा समाख्या चेति । किमेतान्युदाहरणान्यसङ्गत्वादि साधयितुमीशते ? उत न ? इति विकल्प्याद्यं दूषयति—*नन्विति* ॥ स्फटिक-रज्जुसर्पदृष्टान्तेनाविकारित्वस्य सिद्धिः, दर्पणदृष्टान्तेनैकत्वस्य, घटाकाशदृष्टान्तेनासङ्गित्वस्येति विभागः । द्वितीये तद्वैयर्थ्यप्रसक्तिरित्यर्थः । असंभावनाबुद्धिनिवर्तनेनोपयोगाद् न वैयर्थ्यमित्याह—*नेत्याहेति* ॥ असंभावनानिवर्तकत्वं कस्मात् ? तत्साधकत्वमेव किं न स्यात् ? इत्याशङ्क्याह—*प्रमाणमिति* ॥ निरपेक्षागमः प्रमाणशब्दार्थः । "तदेवमि"त्यनेन विषयत्वमुपपाद्यते, तत् कस्मात् ? तस्य प्रकृतासङ्गतेरित्याशङ्क्याह—*अस्मदिति* ॥

ननु 'व्यवहारयोग्यत्वम्' इत्यत्र व्यवहारयोग्यतया विषयत्वसिद्धावध्याससिद्धिस्तत्सिद्धावध्यस्ताहंप्रत्ययाद् व्यवहारयोग्यत्वमितीतरेतराश्रयत्वमुक्तम्, तदसंभवि ; निर्विकल्पकचैतन्येऽज्ञानाध्यासदर्शनादित्याशङ्क्याह—*ननु सविकल्पेति* ॥ परिच्छिन्नस्य योऽध्यासः, तस्येत्यर्थः । तर्ह्यहंकाराध्यासेन सविकल्पके चैतन्येऽहंकारोऽ-

पञ्चपादिका

ननु व्यवहारयोग्यत्वेऽध्यासः, अध्यासपरिनिष्पन्नाहंप्रत्ययबलाद् व्यवहारयोग्यत्वमिति प्राप्तमितरेतराश्रयत्वम्, *न* ; अनादित्वेन प्रत्युक्तत्वात् । तत्रैवंभूतस्याहङ्कर्तुरिदमंशस्य ज्ञानसंशब्दितो

पञ्चपादिकाविवरणम्

न निर्विकल्पकचिन्मात्रम् ; तत्र कथमहङ्काराद्यध्यासेन सविकल्पकेऽहङ्काराध्यासः ? इति चोदयति—*ननु व्यवहारयोग्यत्व इति* ॥ निर्विकल्पेऽपि सविकल्पाध्यासदर्शनाद् अज्ञानाध्यासेन सविकल्पे पूर्वाहङ्काराध्यासेन वा सविकल्पके चिदवभासे सम्भवत्येवोत्तराहङ्काराध्यास इत्याह—*न ; अनादित्वेनेति* ॥

ननु—अविकारिचैतन्यैकतानस्य निष्कलङ्कस्वभावानन्दस्यासङ्गस्यात्मनो न प्रमातृत्वमुपपद्यते ;

ऋजुविवरणम्

निर्विकल्पेऽध्यासासंभवस्येतरेतराश्रयस्य चापरिहृतत्वात्, अनादित्वमात्रस्यान्यथासिद्धत्वात्, मिथ्यात्वेनानादित्वस्यासिद्धत्वादित्याशङ्क्यावतारयति—*निर्विकल्पेऽपीति* ॥ मायानिर्मितहस्त्यादावज्ञाने चेति भावः । *ननु* आत्मन्यविषयेऽध्यासो न सम्भवतीति चोदिते, "न ; अस्मत्प्रत्ययविषयत्वादि"त्यनेनात्मनोऽधिष्ठानयोग्यत्वकथनेन संभव उक्तः, अध्यासे कारणान्तरं चोदाहरणैर्निरूपितम्, एवं सर्वप्रकारैस्संभव उक्तः ; एवंच—"अस्मत्प्रत्ययविषयत्वादि"ति भाष्यस्यार्थोपवर्णनं कृतम्, इदानीमस्यैवाक्षरार्थमनन्तरभाष्यार्थं वा विहाय "तत्रैवंभूतस्ये"त्यादिनाऽऽत्मनः प्रमातृत्वप्रदर्शने कः प्रसङ्गः ? अथाऽऽध्यासिकनिरूपणप्रसङ्गात् प्रमातृत्वनिरूपणम्, *नाध्यासनिरूपणेन तन्निरूपणं युक्तम् ; अतिप्रसङ्गात्, किंतु सत्यामनुपपत्तिशङ्कायाम्, नचाकस्मादनुपपत्तिकारणमस्ति, सत्यां वाऽनुपपत्तिशङ्कायां प्रमातृमूलत्वात् सर्वव्यवहारस्य, आदावेव तन्निरूपणं विहायोदाहरणानन्तरमेव तन्निरूपणे कः प्रसङ्गः ? इत्याशङ्क्य, सङ्गतिं द्योतयितुमुदाहरणोक्तार्थमुररीकृत्याक्षेपं दर्शयति—*नन्वविकारीति* ॥ "अविकारिचैतन्यैकतानस्ये"ति स्फटिकोदाहरणार्थः । "निष्कलङ्के"ति रज्जुसर्पोदाहरणार्थः । "स्वभावानन्दस्ये"ति दर्पणोदाहरणार्थः । "असङ्गस्ये"ति घटाकाशस्य । अथवा—परिणामरहितत्वेनात्मनः प्रमातृत्वाद्यसंभवेन चोद्यं कर्तुं प्रकारान्तरेण तावत् कर्तृत्वाद्यभावं दर्शयति । तत्र जन्यगुणाश्रयत्वेन तावत् प्रमातृत्वं निराकरोति—*नन्वविकारिचैतन्यैकतानस्येति* ॥ "अविकारी"ति जन्यत्वं ज्ञानस्य निराकरोति । "एकताने"ति गुण-गुणिभावम् । "निष्कलङ्कस्वभावानन्दस्ये"ति भोक्तृत्वनिराकरणम् । निष्कलङ्कशब्देन सातिशयत्वम्, विषयसम्पर्कजन्यत्वम्, दुःखव्यामिश्रत्वम्, अनित्यत्वं च निराकरोति । "स्वभावानन्दस्ये"ति भेदम् । "असङ्गस्ये"त्यात्म-मनःसंयोगात् प्रयत्नगुणोत्पत्तौ तन्निबन्धनं यत्कर्तृत्वम्, तन्निराकरोति । अथवा—अपरिणामित्वमेवैभिर्विशेषणैः साध्यते । तत्रैवं योजना—

तत्त्वदीपनम्

ध्यस्यतामित्याशङ्क्येतरेतराश्रयान्मैवमित्याह—*तत्रेति* ॥ व्यवहारयोग्यताऽध्यासयोरागन्तुकत्वात्—"अनादित्वेने"त्युक्तमसङ्गतमित्याशङ्क्य, प्रथमं टीकातो बहिः समाधानमाह—*निर्विकल्प इति* ॥ अपरिच्छिन्नेऽपि गगनादौ सविकल्पकाध्यासदर्शनादित्यर्थः ॥

सविकल्पकस्यैवाधिष्ठानत्वमित्यभिनिवेशश्चेत्, तर्हि तदपि सुसंपादमित्याह—*अज्ञानेति* ॥ अज्ञानाध्यासेन सविकल्पकेऽहंकाराध्यासः ; अज्ञानाध्यासस्य चानादित्वान्नेतरेतराश्रयत्वम् । प्रकारान्तरेणेतरेतराश्रयनिरासमाह—*पूर्वेति* ॥ आत्मनोऽधिष्ठानतोपपादनानन्तरं भाष्यव्याख्यां विहाय प्रतिकर्मव्यवस्थोपपादनप्रसङ्गं न पश्याम इत्याशङ्क्य, सिद्धान्तिमते प्रमातृत्वादिव्यवस्थाऽसंभवाद् विकारित्वादिकमाश्रयणीयम्, ततश्चाध्यासानुपपत्तिरित्युत्तरग्रन्थव्यावर्त्यां शङ्कामाह—*नन्वित्यादिना* ॥ त्वन्मते किमात्मनः प्रमातृत्वम् ? उताहंकारस्य ? आद्ये किं प्रमां प्रति कर्तृत्वं प्रमातृत्वम् ? उतानित्यप्रमाश्रयत्वम् ? नाद्य इत्याह—*अविकारीति* ॥ बोधस्य स्वरूपत्वादपि न साध्यत्वमित्याह—*चैतन्येति* ॥ प्रयोजनाभावादपि न परिणामः । *तथाहि*—किं दुःखपरिहारः फलम् ? उत सुखम् ? नाद्यः ; निर्दुःखस्वभावत्वादित्याह—*निष्कलङ्कस्वभावेति* ॥ द्वितीयं प्रत्याह—आनन्दस्येति* ॥

पञ्चपादिकाविवरणम्

प्रमाणक्रियापरिणामाभावात्, नच प्रमातृत्वहीनस्य कर्तृत्व-भोक्तृत्वे सम्भवतः, इति प्रमातृ-प्रमाण-प्रमेय-कर्तृ-कर्म-कार्य-भोक्तृ-भोग-भोक्तव्यसंसर्गलक्षणस्य व्यवहारस्यात्मन्यसम्भवाद्, अहङ्कारस्य चाचेतनतया तदाश्रयत्वायोगादुच्छिन्नव्यवहारमिदं जगदापद्येतेति प्राप्तम्; अथ स्वभावसिद्धचैतन्यप्रकाशेनैव विषयं प्रकाशयेत्, तर्ह्यविशेषात् सर्वगतत्वाच्च सर्वं प्रकाशयेदित्यव्यवस्थैव। तस्माद्विकारसमर्थ एवात्मेति, *अत्रापर आह*— न तावत् सर्वगतात्मवादिनामिदं चोद्यं सम्भवति; कथम्? यदि तावदात्म-विषयेन्द्रिय-मनश्चतुष्टयसंनिकर्षादिनोत्पद्यमानं विज्ञानं क्रिया वा गुणो वा यावदात्मसमवाय्येवोत्पद्येत; निरवयवे प्रदेशाश्रयत्वानुपपत्तेः, तदा युगपत् सर्वमूर्तद्रव्यसंयोगलक्षणत्वात्सर्वगतत्वस्य, स्वाश्रयात्मसंयुक्तवस्तुनः सर्वस्यावभासि विज्ञानं स्यात्; प्रदीपादिषु क्रिया-प्रकाशगुणयोः स्वाश्रयसंयुक्ते वस्तुन्यनुरूपप्रकाशाद्यतिशयहेतुत्वात्, अदृष्टेन क्वचिदेव विषये ज्ञानं नियम्यत इति चेत्, न; प्रदीपादिषु यावत्संयुक्तवस्त्ववभासिष्वदृष्टेन वस्तुसामर्थ्यमतिक्रम्य नियमादर्शनात्,

ऋजुविवरणम्

आत्मनो न प्रमातृत्वं परिणामवियोगतः। तद्धेतुरविकारित्वं तदन्यत्तन्निरूपकम्॥
नन्वानन्दप्रतीत्या तद्विकारित्वमपीष्यताम्। अर्थजत्वेन तस्येति पदं दुष्टं पदान्तरात्॥
निष्कलङ्कत्वमस्यापि जन्यत्वस्य निवारणम्। स्वरूपत्वोपपत्त्यर्थमसङ्गान्निष्कलङ्कता॥

अथवा—आनन्दरूपाङ्गीकारात्तदवभासकत्वेन प्रमातृत्वमेकतानत्वाभावश्च निश्चीयत इत्याशङ्क्याह—*निष्कलङ्कस्वभावानन्दस्येति*॥ निष्कलङ्कत्वं स्वभावत्वोपपादकम्। कलङ्को भेदः, तद्राहित्यम्; सामानाधिकरण्यादिति। *अथवा*—*कलङ्कः=तारतम्यम्। *ननु*—स्वतोऽविकारस्याप्यन्यतो विकारित्वं दृश्यत इत्याशङ्क्याह—*असङ्गस्येति*॥ अहङ्कारस्यैव प्रमातृत्वादिकं भवत्विति? नेत्याह—*अहङ्कारस्येति*॥ *ननु*—नान्यत्र

तत्त्वदीपनम्

हेतुसंबन्धाभावादपि न परिणाम इत्याह—*असङ्गस्येति*॥ अविकारिपदसूचितं हेतुं व्यनक्ति—प्रमाणेति*॥ प्रमितिः प्रमाणशब्दार्थः। प्रमातृत्वाभावे कर्तृत्वाद्यसंभवात् प्रमातृत्वमेष्टव्यमित्याशङ्क्य, कर्तृत्वाद्यसंभवोऽपीष्ट इत्याशङ्क्याह—*नचेति*॥ मा भूत् कर्तृत्वादिकमित्याशङ्क्याह—*इतीति*॥ अहंकारस्य प्रमातृत्वमिति कल्पनान्तरं निरस्यति—*अहंकारस्येति*॥ अपरिणामित्वेऽप्यात्मनः स्वरूपचैतन्यबलात् प्रमातृत्वमिति शङ्कते—*अथेति*॥ अतिप्रसङ्गेन दूषयति—*तर्हीति*॥ चित्त्वाविशेषेऽपि संबन्धाभावान्न सर्वप्रकाशत्वमित्यपि न वाच्यमित्याह—*सर्वगतत्वादिति*॥ पूर्वपक्षमुपसंहरति—*तस्मादिति*॥

न कस्यापि मते व्यवहारोपपत्तिरिति वैतण्डिकः प्रत्यवतिष्ठते—*अत्रापर इति*॥ प्रमातृत्वादिव्यवस्था न संभवतीति किं सर्वगतात्मवादिनां चोद्यम्? उताणुपरिमाणात्मवादिनाम्? आहो देहपरिमाणात्मवादिनाम्? इति विकल्प्याऽऽद्यं दूषयति—*न तावदिति*। तथाऽपि व्यवस्थाऽनुपपत्तिसाम्यादित्यर्थः। द्वैतिमत आत्मनः सर्वगतत्वेऽपि विकारित्वात् स्वसमवेतेन ज्ञानेन प्रमातृत्वं संभवतीति शङ्कते—*कथमिति*॥

ज्ञानस्य किं क्रियात्वम्? उत गुणत्वम्? उभयथाऽपि किं यावदात्मसमवायि? उत प्रदेशसमवायि? इति विकल्प्याद्यमनुवदति—*यदि तावदिति*॥ पक्षान्तरनिरसनेनोक्तेऽर्थे हेतुमाह—*निरवयव इति*॥ ततः किमिति? अत्राह—*तदेति*॥ सर्वस्यात्मसंयुक्तत्वे हेतुमाह—*युगपदिति*॥ क्रमेण सकलसंसर्गस्यास्मास्वपि संभवः, तदर्थमाह—*युगपदिति*॥ सर्वस्य स्वाश्रयसंयुक्तत्वे ज्ञानं कतिपयावभासि किं न स्यादिति? तत्राह—*प्रदीपादिष्विति*॥ इषुरादिशब्दार्थः। प्रदीपगतप्रकाशगुणस्येषुगतक्रियायाश्च स्वाश्रयसंयुक्तवस्तुप्रकाशनभेदनलक्षणातिशयहेतुत्वादिति हेत्वर्थः। संबन्धाविशेषेऽप्यदृष्टाद् नियम इति शङ्कते—*अदृष्टेनेति*॥ अदृष्टव्यतिरिक्तपुष्कलकारणे सत्यदृष्टाभावेन कार्याभावादर्शनाद् नैतदित्याह—*न प्रदीपादिष्विति*॥ संयुक्तबोधकत्वं वस्तु-

पञ्चपादिकाविवरणम्

सुख-दुःखाद्यनिमित्ततृणाद्युपेक्षणीयसर्वविषयावभासेन चादृष्टनियमानुपपत्तेः। जनकमेव ज्ञानं प्रकाशयति, न सर्वमिति चेत्, न ; चक्षुरादिषु प्रकाशप्रसङ्गात्, विषयस्य निरूप्यमाणत्वाद्विषयतया जनकमिति विशेषणायोगात्, प्रदीपादिषु च प्रकाशगुणस्य स्वाश्रयसंयुक्ताजनकविषयस्यापि प्रकाशकत्वदर्शनात्। क्रियारूपे विज्ञानेऽपि समानमेतद् ; इष्वादिव्यापाराणामनुद्दिष्टेऽपि विषये स्वाश्रयसंयोगे सत्यतिशयहेतुत्वदर्शनात्। निरवयवत्वादात्मनो न सर्वसंयोग इति चेत्, न किञ्चिदपि प्रकाशेत ; क्रिया-गुणयोः स्वाश्रयमतिलङ्घ्यान्यत्र संसर्गायोगादसंसर्गात्, असंसृष्टे चातिशयायोगात् ॥

अथ शरीरावच्छिन्नात्मप्रदेशसमवाय्येव ज्ञानम्, न यावदात्मसमवायीति मतम्, तर्हि सावयवत्वमात्मनः, न व्यवहितविषयावभासश्च स्यात् ; आत्माश्रयप्रकाशस्य विषयेणासंसर्गात्, नचाश्रयातिलङ्घनं क्रियादेरित्युक्तम्। नचानाश्रयात्मप्रदेशसंबन्धादवभासः ; सर्वस्यावभासप्रसङ्गात्। *ननु* अभिचारकर्म स्वाश्रया-

ऋजुविवरणम्

दृष्टत्वेनान्यत्रादृष्टेन नियमः कल्प्यते, किंतु ज्ञानानां सुख-दुःखहेतुत्वमदृष्टजन्यत्वात्, अदृष्टस्य च यद्विषयज्ञानेन सुखं दुःखं वा, तद्विषयज्ञाननियामकत्वमित्याशङ्क्याह—*सुख-दुःखाद्यनिमित्तेति* ॥ कथं "विषयतये"ति विशेषणायोगः ? यदाकारं ज्ञानं तदाकार एव विषयः, अथवा—कर्तृ-करणसाधारणकारणव्यतिरिक्तत्वे सति जनकत्वमित्याशङ्क्याह—*प्रदीपादिषु चेति* ॥ कथं क्रियारूपे समानत्वम् ? क्रियया उद्दिष्टविषय एवातिशयहेतुत्वात्, तावतैव प्रतिकर्मव्यवस्थोपपत्तेरित्याशङ्क्याह—*इष्वादिव्यापाराणामिति* ॥ *ननु*—चतुष्टयसन्निकर्षादेरन्वय-व्यतिरेकाभ्यां हेतुत्व-

तत्त्वदीपनम्

सामर्थ्यशब्दार्थः। इतोऽपि नादृष्टस्य नियामकत्वमित्याह—*सुखेति* ॥ हर्षादिरादिशब्दार्थः। पुण्यापुण्यलक्षणादृष्टस्य सुख-दुःखसाधनस्रक्चन्दन-कण्टकादिनियामकत्वेऽप्युपेक्षणीयज्ञानहेतुत्वं तस्यानुपपन्नमित्यनियम इत्यर्थः। यद् यज्जनकम्, तत् तेन भास्यत इति नियमाद् नातिप्रसङ्ग इति शङ्कते—*जनकमिति* ॥ तथाऽपि कथमतिप्रसङ्गनिरासः ? इत्याशङ्क्य सर्वस्याजनकत्वादित्याह—*न सर्वमिति* ॥ किं ज्ञानस्य जनकमात्रभासकत्वं स्वभावः ? उत विषयतया जनकभासकत्वम् ? इति विकल्प्याद्यमतिप्रसक्त्या दूषयति—*न चक्षुरादिष्विति* ॥ द्वितीयं दूषयति—*विषयस्येति* ॥ अजनकस्यापि विषयत्वदर्शनाद् जनकमेव भासयतीति नियमानुपपत्तिरित्याह—*प्रदीपादिष्विति* ॥

ज्ञानस्य गुणत्वपक्षे जनकभासकत्वनिराकरणं क्रियात्वपक्षेऽतिदिशति—*क्रियारूप इति* ॥ ज्ञानस्योद्दिष्टविषयातिशयाऽऽधायकत्वात् सर्वस्य चानुद्दिष्टत्वाद् न सर्वग्रहणमित्याशङ्क्य व्यभिचारेण दूषयति—*इष्वादीति* ॥ आत्मनः सर्वसंयोगानुपपत्तेर्न तद्द्वारा समवेतज्ञानस्य सर्वभासकत्वमिति शङ्कते—*निरवयवत्वादिति* ॥ अव्याप्यवृत्तिसंबन्धस्य संयोगत्वादात्मनश्च निरवयवत्वान्नैतत्संभव इत्यर्थः। तर्हि नाणुमात्रं भायात्, संयोगासंभवाविशेषादित्याह—*न किंचिदिति* ॥ आत्मनः संयोगासंभवेऽपि ज्ञानस्य स्वसंसृष्टविषयबोधित्वमित्याशङ्क्याह—*क्रिया-गुणयोरिति* ॥ संसर्गाभावेऽपि बोधकत्वशङ्कां निरस्यति—*असंसृष्ट इति* ॥ अतिप्रसङ्गादित्यर्थः। ज्ञानस्यात्मैकदेशसमवायित्वाद् न सकलावभासकत्वमिति शङ्कते—*अथेति* ॥

निरवयवात्मनि प्रदेशासंभव उक्त इत्याशङ्क्यौपाधिकप्रदेशमाह—*शरीरेति* ॥ स किमेकदेशः सत्यः ? असत्यो वा ? तत्राद्यं दूषयति—*तर्हीति* ॥ द्वितीये प्रदेशस्य कल्पितत्वे तत्समवेतज्ञानस्यापि कल्पितत्वाद् दृश्यदृष्टेरतात्त्विकत्वं स्यादित्यर्थः। एकदेशे समवायित्वे दूषणान्तरमाह—*न व्यवहितेति* ॥ प्रकाशस्याश्रयद्वारा विषयसंबन्धो वक्तव्यः, नचाश्रयस्य व्यवहितविषयसंसर्ग इत्यर्थः। प्रदीपस्य विषयासंसर्गेऽपि तत्प्रभाया यथा भासकत्वम्, तथाऽत्रापीत्याशङ्क्य, प्रभाया द्रव्यत्वाभ्युपगमात् तथा घटते, न तथाऽत्र ; ज्ञानस्याद्रव्यत्वात्, इत्याशयेनाह

पञ्चपादिकाविवरणम्

त्मप्रदेशासंयुक्ते पुरुषान्तरेऽनर्थं जनयति, तद्वदिहापि स्यात्, *नैतत् सारम्* ; दृष्टक्रियासामर्थ्यादेवादृष्टेऽप्यु-भयात्मप्रदेशसंयुक्तस्य देवतात्मनो वेश्वरस्य वा हेत्वन्तरस्य वाऽनुमीयमानत्वात्। नचात्मसंयुक्तमनःसंसृष्टेन्द्रिय-संयुक्तविषयेऽतिशयः पुरुषाश्रयज्ञानादुपपद्यते ; विषयसंयुक्तेऽपि वस्त्वन्तरे 'प्रकाशते' इति व्यवहारातिशय-प्रसङ्गात्, पूर्वभावित्वाच्च संयोगप्रवाहस्य ज्ञानवता विषयस्य वर्तमानसंयोगप्रवाहाभावात्। एवमणु-देह परिमाणात्मवादेऽपि तुल्यो दोषः। तस्मान्न सर्ववादिनां प्रमाणादिव्यवहारसम्भव इति, *सत्यम्* ; अस्मत्पक्षे तु कथंचित्सम्भवं प्रदर्शयिष्यामीत्याह—*तत्रैवंभूतस्याहंकर्तुरिति* ॥ *इदमंशस्य=अन्तःकरणस्येत्यर्थः। व्यापार इति परिणामोऽभिधीयते। प्रकाशस्वभावं सावयवमन्तःकरणमदृष्टेन्द्रियादिसहकृतं ध्रुवादिविषयपर्यन्तं

ऋजुविवरणम्

प्रदर्शनान्नातिप्रसङ्ग इत्याशङ्क्याह—*पूर्वभावित्वाच्चेति* ॥ व्यापारशब्देन परिस्पन्दाभिधानशङ्कानिवृत्त्यर्थमाह—*परिणामोऽभिधीयत इति* ॥ कथमन्यत्रादृष्टमेतादृशपरिणामवत्त्वमन्तःकरणस्य ? इत्याशङ्क्याह—*प्रकाशस्वभाव-मिति* ॥ *ननु*—प्रकाशस्वभावेऽप्यात्मनि नैतादृशः परिणामो दृश्यते, तत् कथमन्तःकरणस्य ? इत्याशङ्क्याह—*सावयवमिति* ॥ किमिति सर्वदाऽन्तःकरणस्यैतादृशः परिणामो न भवेत् ? यद्वा—भवत्वन्तःकरणमुपादानम् ; निमित्तेन विनापि नैतादृशकार्यसंभवः, क्वचिदेव विषये ज्ञानं सन्निहितं च विहाय दूरतरविषय इत्याशङ्क्याह—*अदृष्टेन्द्रियादीति* ॥ तथापि कथं दूरस्थवस्तुप्रतीतिरिति ? तदाह—*ध्रुवादिविषयेति* ॥ *ननु* इच्छादि-

तत्त्वदीपनम्

—*नचेति* ॥ आश्रयात्मैकदेशस्य विषयासंसर्गेऽपीतरप्रदेशस्य विषयेण संबन्धात् तत्प्रथनं युक्तमित्याशङ्क्याह—*न चानाश्रयेति* ॥ आश्रयात्मनो विषयासंबन्धित्वेऽपि तत्स्थज्ञानस्य विषयेऽतिशयाधायकत्वं स्यादिति शङ्कते—*नन्वभिचारेति* ॥ दृष्टान्तासंप्रतिपत्त्योत्तरमाह—*नैतत्सारमिति* ॥

क्रियायाः सामर्थ्यं क्रियासामर्थ्यम्, दृष्टं च तत् क्रियासामर्थ्यं चेति तत्, तथोक्तम्। इष्वादिक्रियाया आश्रय संयुक्तातिशयाधायकत्वं दृष्टम्, तथा चाभिचारकर्त्रात्मनोरुद्दिष्टपुरुषात्मना च संयुक्तस्य देवतात्मनोऽनर्थाधायकत्वं कल्प्यत इत्यर्थः। अभिचारक्रियया समाराधितः परमेश्वरो वाऽन्यत्रानर्थहेतुरित्याह—*ईश्वरस्येति* ॥ अभिचारक्रियया वा काचित्कृत्योत्पाद्यते, सा चान्यत्रानर्थं जनयतीत्याह—*हेत्वन्तरस्येति* ॥ चतुष्टयसंनिकर्षजज्ञानस्येन्द्रियसंयुक्तेऽ-तिशयाधायकत्वान्नातिप्रसङ्ग इत्याशङ्क्याह—*न चात्मेति* ॥ आत्मना साक्षात्संबन्धाभावेऽपि परम्परासंबन्ध-माश्रित्य विषयभानोपपादनेऽतिप्रसक्तिरित्याह—*विषयसंयुक्त इति* ॥ चतुष्टयसंनिकर्षस्य ज्ञानोत्पत्तेरूर्ध्वं सत्त्वक-ल्पकाभावादुत्पन्नस्य च ज्ञानस्य विषयसंबन्धाभावान्न तत्साधकत्वमित्याह—*पूर्वेति* ॥

सर्वगतात्मवादे विषयप्रकाशाव्यवस्थामभिधाय मतान्तरेऽप्यव्यवस्थामाह—*एवमिति* ॥ आत्मनोऽणुत्वे तत्समवेतज्ञानादणुमात्रं भायात्, देहपरिमाणत्वे चात्मनो दूरवर्तिवस्तुसन्निकर्षाभावान्न व्यवहितविषयभानसंभव इत्यर्थः। वैतण्डिकं मतमुपसंहरति—*तस्मादिति* ॥ द्वैतिमते व्यवहारासंभवमङ्गीकरोति—*सत्यमिति* ॥ अद्वैतिमतेऽपि व्यवहारासंभव उक्त एवेत्याशङ्क्य, किं परमार्थतोऽसंभवः ? उत कल्पनयाऽपि ? इति विकल्प्याद्यमङ्गीकृत्य द्वितीयं दूषयति—*अस्मत्पक्ष इति* ॥ इदमंशशब्देन भाट्टाभिमतद्रव्यांशो गृह्यत इति शङ्कां निरस्यति—*इदमंशस्येति* ॥ व्यापारशब्दस्य परिस्पन्दपरिणामयोः साधारणत्वाद्विवक्षितमर्थमाह—*व्यापार इति* ॥

अन्तःकरणस्य क्षणमात्रेण व्यवहितध्रुवाद्याकारेण परिणामः कथम् ? इति शङ्कायामाह—*प्रकाशस्वभावमि-त्यादिना* ॥ अन्तःकरणं ध्रुवादिपर्यन्तमविच्छिन्नप्रभाकारेण परिणमत इति संबन्धः। तत्र हेतुमाह—*तेजस इति* ॥ आखण्डलाधिष्ठितकाष्ठायां सहस्रांशूदयमात्रेण तत्किरणानां मन्दिरव्याप्तिदर्शनादित्यर्थः। तेजसोऽतिदूरगमनेऽप्यन्तः-करणस्य किमायातम् ? इत्यत आह—*प्रकाशस्वभावमिति* ॥ प्रकाशस्वभावत्वेऽप्यात्मनः परिणामो न दृष्ट इति,

पञ्चपादिका

व्यापारविशेषः सकर्मत्वात् कर्मकारकाभिमुखं स्वाश्रये कञ्चिदवस्थाविशेषमादधाति ; स्वाश्रयविकारहेतुत्वात् क्रियायाः । स च प्राप्नोतिक्रियाऽऽहितकर्तृस्थविशेषवत् कर्मसम्बन्धो ज्ञातुर्ज्ञेयसम्बन्ध इति गीयते । तेन विषयविशेषसम्बद्धमेवान्तःकरणं चैतन्यस्यावच्छेदकम् । कर्मकारकमपि प्रधानक्रियासिद्धौ

पञ्चपादिकाविवरणम्

दीर्घप्रभाकारेण परिणमते ; तेजसः शीघ्रमतिदूरगमनदर्शनात् , परिणामद्वारेण च कर्तृकर्मसम्बन्धोऽवस्थाविशेष इत्याह—*स च प्राप्नोतिक्रियाऽऽहित इति* ॥

स्यादन्तःकरणस्य स्वपरिणामद्वारेण विषयसम्बन्धः, आत्मनस्तु विषयविशेषावभासः कथमिति ? तदाह—*तेन विषयविशेषसम्बद्धमिति* ॥ सर्वत्राविद्यावृततयाऽनभिव्यक्तस्वभावमपि चैतन्यम्, अन्तःकरणं येन येनावस्थाविशेषेण विवर्तते, तेन तेनाकारेण व्यज्यते ; अयःपिण्डेनेव चतुष्कोणत्वाद्यवस्थाविशेषमापाद्यमानेन कृशानुः, इति विषयसंसृष्टान्तःकरणावच्छिन्नं चैतन्यं तदाकारमवभासत इति भावः । *ननु* प्रमातृरूपा-

ऋजुविवरणम्

परिणामवदेवायमपि स्यात्, तथा सति नानेन व्यवहारनिर्वाह इत्याशङ्क्याह—*दीर्घप्रभाकारेणेति* ॥ "स च प्राप्नोती"त्यनेनावस्थाविशेषो ज्ञातुर्ज्ञेयेन सम्बन्ध इत्युक्तम्, तदनुपपन्नम् ; नहि क्रियाजन्यस्याश्रयगतातिशयस्य संबन्धत्वम् । "कर्मसम्बन्धः" इति चानुपपन्नम् ; नहि तस्याश्रयगतस्य विषयसम्बन्धसंभवः, इत्याशङ्क्य साभिप्रायमवतारयति—*परिणामद्वारेणेति* ॥ "तेने"त्यनेन विषयसंसृष्टान्तःकरणस्य चैतन्यावच्छेदकत्वमात्मनो विषयावभासे कारणमुक्तम्, तत् कथम् ? अविद्यावृतं हि सर्वत्र चैतन्यम्, तत् कथमवच्छेदमात्रेणावभाससंभवः ? अभिव्यक्तावपि न तावन्मात्रेण विषयावभासः, इत्याशङ्क्याभिप्रायमाह—*सर्वत्राविद्यावृतेति । कथं चैतन्यस्येति* ॥

तत्त्वदीपनम्

तत्राह—*सावयवमिति* ॥ कदाचित् कस्मिंश्चिद्विषयेऽन्तःकरणस्य प्ररिणामे को हेतुरिति ? तत्राह—*अदृष्टेति* ॥ आलोक आदिशब्दार्थः । प्रतिपादनफलमाह—*परिणामेति* ॥ परिणामद्वारेण योऽयमवस्थाविशेषः, स कर्तृ-कर्मसंबन्ध इति संबन्धः ॥

अवस्थाविशेषमादधातीत्युक्तम्, तत्र कोऽसाववस्थाविशेषः ? इति शङ्कायां वाऽऽह—*परिणामेति* ॥ *तत्रैवमित्यादिटीकाया अयमर्थः*—*तत्र=अस्मत्प्रत्ययविषयत्वे । *एवंभूतस्येति* ॥ चैतन्यैकरसस्याहंकर्तुरहंकारेक्याध्यासमुपगतस्य* ॥ *व्यापारविशेष इति*॥ सत्त्वप्रधानान्तःकरणपरिणाम इत्यर्थः । व्यापारविशेषस्य प्रयोजनमाह—*सकर्मकत्वादिति* ॥ हर्षादेः सुखादेरव्यवस्थातो विशेषं दर्शयति—*कर्मकारकेति* ॥ कर्मकारकाभिमुखत्वे हेतुमाह—*सकर्मकत्वादिति* ॥ आश्रयगतातिशयाधाने हेतुमाह—*स्वाश्रय इति* ॥ स्वाश्रयगतफलहेतुत्वादित्यर्थः । गतिक्रियायाः कर्तरि ग्रामप्राप्त्यतिशयजनकत्वं दृष्टम्, तद्वद् ज्ञानस्यापि क्रियात्वात् स्वाश्रय एवातिशयजनकत्वमित्याशङ्क्याह—*स चेति* ॥ प्राप्नोतिक्रिययाऽऽहितस्य कर्तृपरमवेतग्रामसंबन्धस्य यथा ग्रामव्याप्तित्वम्, तथा ज्ञानस्यापि सकर्मकत्वात् तदाहितः संबन्धो ज्ञातृ-ज्ञेयतालक्षण इति । आत्मनो विषयविशेषसंबन्धाभावान्न तद्भानमिति शङ्कते—*स्यादन्तःकरणस्येति* ॥ आत्मनोऽपि परिणामद्वारा तत्संबन्ध इत्याह—*तदाहेति* ॥ अन्तःकरणस्य विषयविशेषेण संबन्धो यस्मात्, तस्मात् विषयविशेषसंबद्धमन्तःकरणं चैतन्यस्यावच्छेदकं स्वगतविषयविशेषसंबन्धमापादयतीति टीकार्थः ॥ आत्मनो विषयसंबन्धसंभवेऽप्यनभिव्यक्तत्वात् कथं व्यवहारहेतुत्वम् ? तत्राह—*सर्वत्रेति* ॥ अथवा सर्वगतत्वेन स्वत एव विषयसंबन्धसंभवात् किं परिणामेन ? इत्याशङ्क्याह—*सर्वत्रेति* ॥ सर्वत्र विद्यमानमप्यविद्यावृततयाऽनभिव्यक्तस्वभावमपि चैतन्यं तेनाकारेण व्यज्यत इत्यन्वयः । केनाकारेणेति वीक्षायामाह—*अन्तःकरणमिति* ॥ परिणामोऽवस्थाविशेषशब्दार्थः । इत्थंभावे तृतीया—*तदाकारमिति* ॥ प्रमात्राकारमित्यर्थः । चैतन्य-

पञ्चपादिका

स्वव्यापाराविष्टं चैतन्यविवर्तत्वात् प्रधानक्रियाऽऽहितप्रमात्रवस्थाविशेषावच्छिन्नापरोक्षतैकरूपामपरोक्षतामभि-

पञ्चपादिकाविवरणम्

वच्छिन्नं चैतन्यं तद्रूपेण भासताम्, कथं चैतन्यस्य विषयावच्छेद इति? तदाह—*कर्मकारकमपीति* ॥ *स्वव्यपाराविष्टमिति* ॥ परिणामसंसर्गादापन्नजाड्याभिभवलक्षणयोग्यत्वमुच्यते। अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि चैतन्याभिव्यक्तियोग्यतामापादयतीति भावः ॥

ननु अवच्छेदकभेदे चित्प्रकाशभेदात् कथं विषयावच्छिन्नानुभवस्य प्रमातृरूपावभाससंसर्गः? असंसर्गे वा कथं 'मयेदमवगतमि'ति प्रमातृ-प्रमेयसंसर्गावभासिसंवेदनं स्यात्? अनुभवभेदात्, एकस्मिन् सम्बन्धावगमे पदार्थयोरवभासायोगादिति, तत्राह—*प्रधानक्रियाऽऽहितप्रमात्रवस्थाविशेषावच्छिन्नापरोक्षतैकरूपामिति*॥ एका-

ऋजुविवरणम्

अयमर्थः*—यत्राभिव्यक्तिर्भवति, तदपरोक्षम्, नच विषयेऽभिव्यक्तौ हेतुरस्ति; विषयस्याविद्यातिरोधायकत्वासामर्थ्यात्, अनभिव्यक्तौ च विषयावभासायोगादिति। "स्वव्यापाराविष्टमि"ति कथमुक्तम्? कर्मकारकस्य चैतन्याभिव्यञ्जकव्यापारायोगात्, प्रकाशस्वभावत्वं तादृग्व्यापारवत्त्वे प्रयोजकमुक्तमन्तःकरणे, नात्र तदस्ति। अथ प्रधानक्रियासिद्धौ सत्यामिति विवक्षितम्, तथापि कथं स्वव्यापाराविशिष्टत्वम्? व्यधिकरणत्वात्, इत्याशङ्क्य व्याचष्टे—*परिणामसंसर्गादिति* ॥ कथं परिणामसंसर्गाद् विषयस्य तादृशी योग्यता? इत्याशङ्क्याह—*अन्तःकरणं हीति* ॥ "अपरोक्षतैकरूपामि"ति समानरूपत्वमपि प्रतीयते, तद्व्यावृत्त्यर्थमाह—*एकामित्यर्थ

तत्त्वदीपनम्

स्यान्तःकरणाभिव्यक्ततया तदाकारत्वेऽप्यस्वच्छविषयानभिव्यक्ततया तदाकारत्वाभावत् कथं घटादिसाधकत्वम्? इति शङ्कते—*ननु प्रमातृरूपेति* ॥ *विषयावच्छेद इति* ॥ विषयेणावच्छेदस्तद्युक्त इत्यर्थः। अन्तःकरणवद् विषयस्यापि तत्संबद्धस्य चैतन्यव्यञ्जकत्वान्न विरोध इत्याह—*तदाहेति* ॥

"कर्मकारकमि"त्यादिटीकाया एषोऽर्थः—कर्मकारकमप्यपरोक्षतामभिव्यनक्तीत्यन्वयः। विषयेऽपरोक्षतासद्भावेऽभिव्यक्तिः, सैव कुत इति? तत्राह—*चैतन्येति* ॥ विषयस्य चैतन्यविवर्तत्वात्तत्रापि तदस्तीत्यर्थः। व्यञ्जकत्वे हेतुमाह—*स्वव्यापारेति* ॥ स्वव्यापाराविष्टस्यागन्तुकत्वे हेतुमाह—*प्रधानक्रियेति* ॥ वृत्तिः प्रधानक्रियाशब्दार्थः। "स्वव्यापाराविष्टमि"त्यत्र कर्मकारकस्य चैतन्यव्यञ्जकत्वमुक्तम्, तदसंभवि; अप्रकाशस्वभावत्वात्, तद्व्यापारश्च कीदृशः? इति न ज्ञायत इत्याशङ्क्याह—*स्वव्यापाराविष्टमिति* ॥ आपन्नं तद्गतजाड्याभिभवलक्षणं चैतन्याभिव्यञ्जकत्वरूपयोग्यत्वं येन तत् तथोक्तम्; अन्तःकरणस्य चिद्व्यञ्जकत्वस्वाभाव्यात्। तत् कथं स्यात्? तत्राह—*अन्तःकरणमिति* ॥ प्रदीपः स्वस्मिन्नन्धकारसंसर्गविरोधी स्वसंसर्गिणि विषयेऽप्यन्धकारसंसर्गं निरुणद्धि, तद्वदन्तःकरणमपीत्यर्थः ॥

अन्तःकरण-विषययोश्चैतन्यव्यञ्जकत्वमुक्तम्, तदाक्षिपति—*नन्ववच्छेदकेति* ॥ अन्तःकरण-तद्वृत्ती प्रमातृ-विषयावच्छेदकशब्दार्थः। जलभाजनभेदेन तत्प्रतिबिम्बितचन्द्रभेदाद् यथा परस्परासंसर्गः, तद्वद् व्यञ्जकभेदाद् व्यङ्ग्यस्यापि भेद इति न परस्परसंसर्ग इत्यर्थः। प्रमातृरूपस्यावभासो येन चैतन्येन, तत्प्रमातृरूपावभासम्; तेन संसर्गः। अथवा प्रमातृरूपः प्रमात्राकारः, स चासाववभासश्चेति प्रमातृरूपावभास इत्यर्थः। संसर्गाभावे को दोष इति? तत्राह—*असंसर्ग इति* ॥ तत्र हेतुमाह—*अनुभवेति* ॥ व्यङ्ग्यचैतन्यभेदादित्यर्थः। "मयेदमवगतमि"ति संबन्धावबोधः सम्बन्धावगमशब्दार्थः। *पदार्थयोरिति* ॥ प्रमातृ-प्रमेययोरित्यर्थः ॥

अनुभवभेदोऽसिद्ध इत्याह—*तत्राहेति*॥ प्रधानक्रिययाऽऽहितो यः प्रमातर्यवस्थाविशेषः, तेन हेतुनाऽवच्छिन्ना, अभिव्यक्ता या अपरोक्षता तया, एकरूपामिति विग्रहः। विषयविशेषसंबन्धोऽवस्थाविशेषशब्दार्थः; चिद्व्यञ्जकत्वयोग्यत्वं वा। "एकरूपामि"त्युक्ते समानरूपामिति निर्दिश्यत इति शङ्का स्यात्, तदर्थमाह—*एकामिति*॥ अवच्छेदक-

पञ्चपादिका

व्यनक्ति । ततश्चात्मनोऽन्तःकरणावस्थाविशेषोपाधिजनितो विशेषः । विषयानुभवसंशब्दितो विषयस्था-

पञ्चपादिकाविवरणम्

मित्यर्थः । परिणामस्योभयसंसर्गाद् व्यञ्जकाभेदेन व्यङ्ग्याविच्छेद इति भावः । *ननु* उभयत्र चैतन्याभि-व्यक्त्यविशेषे घटावच्छिन्नानुभवः प्रमाता ? किं वाऽन्तःकरणावच्छिन्नः ? इति न विशेषः स्यादिति, नेत्याह—*ततश्चात्मनोऽन्तःकरणावस्थाविशेषोपाधिजनितो विशेष इति* ॥ प्रमातेति वाक्यशेषः । कर्तुर्हि प्रमातृता, न कर्मणः । तत्रान्तःकरणस्य कर्तृत्वात्तदवच्छिन्नः प्रमातेत्यर्थः । *ननु* चैतन्यस्यैकत्वे प्रमातैव फलमिति विरुद्धमापन्नमिति, तत्राह—*विषयानुभवसंशब्दितो विषयस्थापरोक्षैकरसः फलमिति* ॥ अन्तःकरणावच्छिन्न-तया प्रमाता, विषयावच्छिन्नतया फलमिति भावः ॥

ननु क्रिया-फलयोरन्तःकरणात्मसमवायिनोर्भिन्नाश्रयत्वम्, घटान्तःकरणविषयतया च भिन्नविषयत्वम्,

ऋजुविवरणम्

इति* ॥ *ननु* कथमेकत्वमपरोक्षतया ? अवच्छेदकभेदे भेदस्योक्तत्वादित्याशङ्क्याभिप्रायमाह—*परिणामस्योभय-संसर्गादिति* ॥ "ततश्चात्मनोऽन्तःकरणावस्थे"त्यनेनोपाधिजनितविशेषस्यैव फलत्वमुक्तमिव प्रतिभाति ; ग्रन्थै-क्यात्, ततश्चासंबद्धो ग्रन्थः स्यात् ; पृष्टप्रमातृरूपानिरूपणात्, इत्याशङ्क्याह—*प्रमातेति* ॥ वाक्यशेष इति* ॥ कथमन्तःकरणावच्छिन्नस्यैव प्रमातृत्वम् ? अविशेषादित्याशङ्क्य व्याचष्टे—*कर्तुर्हीति* ॥ "विषयस्थापरोक्षैक-रसः"इति वदता शुद्धस्यैव चैतन्यस्य फलत्वमुक्तम्, तथा सति प्रमातुरेव फलत्वमिति विरोधः तदवस्थ एव ; भेदका-निरूपणात्, अफलत्वं वा ; जन्यत्वायोगात्, इत्याशङ्क्याभिप्रायमाह—*अन्तःकरणावच्छिन्नतयेति* ॥ *ननु क्रिया-फलयोरिति* ॥ क्रियेति वृत्त्यभिधानम्, तदवच्छिन्नं चैतन्यं फलमिति । *घटान्तःकरणेति* ॥ वृत्तिर्घट-विषया ; तत्रातिशयहेतुत्वात् । वृत्त्यवच्छिन्नचैतन्यस्य वृत्तिविषयत्वम् । अन्तःकरणशब्देन वृत्तिरभिधीयते । अथवाऽन्तः-करणविषयत्वमेव विवक्षितं भवतु ; वृत्त्यवच्छिन्नचैतन्यस्याप्यन्तःकरणावभासहेतुत्वात् । क्रियावच्छिन्नस्यैव क्रिया-फलत्वं न विषयावच्छिन्नस्य ; विषयावच्छेदे विषयस्यैव प्राधान्यात्, विषयस्थचैतन्यस्य फलत्वोक्तिस्तु महाफलाभिप्राया, इदन्तु चोद्यमवान्तरविषयाभिप्रायमिति विवेकः । यद्वा—विषयस्थचैतन्याभिप्रायेणैव चोद्यम्, तत्र चाश्रयभेदः स्पष्टः,

तत्त्वदीपनम्

भेदेनानुभवभेद उक्त इत्याशङ्क्याह—*परिणामस्येति* ॥ व्यञ्जकभेदे व्यङ्ग्यभेदो भवेत्, नच तथाऽत्र ; एकस्य परिणामस्य प्रमातृ-प्रमेयसंसृष्टतया व्यञ्जकत्वादित्यर्थः । विषयविशेषे चैतन्याभिव्यक्त्यभ्युपगमे तस्यापि प्रमातृताऽऽ-पातान्नाभिव्यक्तिरिति चोदयति—*ननूभयत्रेति* ॥ विशेषाभावोऽसिद्ध इत्याह—*नेत्याहेति* ॥

परिणामविशेषोऽवस्थाविशेषशब्दार्थः । प्रमातृस्वरूपजिज्ञासायामुपाधिजनितो विशेषः फलमिति फलस्वरूपं कथ्यत इत्यसंगतिरित्यत्राह—*प्रमातेति* ॥ टीकापेक्षितहेतुमाह—*कर्तुर्हीति* ॥ प्रमातृ-फलसांकर्याऽऽपातान्न चैतन्यस्यैकतयाऽभिव्यक्तिरिति शङ्कते—*ननु चैतन्यस्येति* ॥ कर्तृ-फलयोर्भेदस्य लोकप्रसिद्धत्वात्तद्विरुद्धं कर्तुः फलत्वमित्यर्थः । उपाधिभेदादसांकर्यमित्याह—*तत्राहेति* ॥ उपाधिभेदमेव दर्शयति—*अन्तःकरणेति* ॥ विषयस्थश्चासावपरोक्षैकरसश्चेति तथोक्तः । आत्मेति शेषः । बोधैकरसस्यात्मनोऽजन्यत्वात् कथं फलत्वम् ? इति शङ्कायां विषयानुभवसंशब्दित इत्युक्तम् । वृत्तिसंसृष्टविषयाभिव्यक्तचैतन्यस्य विषयानुभवत्वम्, ततश्च फलत्वव्यपदेश उचित इत्यर्थः ॥ *ननु* एवं सति क्रिया-फलयोः समानाश्रय-विषयत्वप्रसिद्धिविरोधः स्यादिति शङ्कते—*ननु क्रियेति* ॥ क्रियाया अन्तःकरणपरिणामत्वात्तत्समवायित्वम्, फलस्य तु चैतन्यप्रतिबिम्बितत्वाद्बिम्बभूतात्मसम-वायित्वम्, इति भिन्नाश्रयत्वम्, तथा तयोर्भिन्नविषयत्वं च ; क्रियाया घटविषयत्वम्, चैतन्यस्यान्तःकरण-प्रतिबिम्बिततया तत्साधकत्वम् । नच—वृत्तिसंसृष्टविषयव्यक्तं चैतन्यं तद्विषयमिति—शङ्क्यम् ; चिद्भास्याया वृत्तेस्तद्विषयत्वादित्यर्थः ॥

पञ्चपादिका

परोक्षैकरसः फलम्, इति क्रियैकविषयता फलस्य युज्यते। एवं चाहङ्कर्ता स्वांशचैतन्यबलेन व्यापारा-

पञ्चपादिकाविवरणम्

इति क्रिया-फलयोरेकाश्रयत्वैकविषयत्वनियमविरोध इति, नेत्याह—*इति क्रियैकविषयता फलस्येति ॥ "विषये" त्याश्रयस्याऽप्युपलक्षणम्। अन्तःकरणात्मनोरैक्याध्यासेनैकाश्रयत्वम्, चैतन्यस्यापि घटावच्छेदादेकविषयत्व-मिति। *ननु* 'बुद्धिस्थमर्थं पुरुषश्चेतयते' इति सांख्याः, कथं तद्विरुद्धमात्मा स्वचैतन्योपरक्तं चेतयत इति ? तत्राह—*एवंचाहं कर्तेति* ॥ प्रथमं बुद्धिस्थमर्थं तदात्मतामापन्नः पश्चाच्चेतयत इत्यर्थः। उक्तं तावत् सर्व-गतस्याप्यात्मनोऽविद्यावृतप्रकाशस्य परिच्छिन्नान्तःकरणपरिणामोपाध्यभिव्यक्त्यपेक्षया विषयविशेषं प्रति

ऋजुविवरणम्

विषयभेदोऽपि ; विषयस्यान्तःकरणावभासकत्वादिति। *ननु* आश्रय-विषयैकत्वनियमविरोधेन चोद्ये कृते, "इति क्रियैकविषयते"त्यनेनैकविषयत्वेनैव परिहारो न युक्त इत्याशङ्क्य पूरयति—*विषयेत्याश्रयस्येति* ॥ *ननु* आश्रय-विषयभेदस्य स्पष्टत्वात् कथम्—"इति क्रियैकविषयत्वमि"त्युक्तम् ? इत्याशङ्क्याभिप्रायमाह—*अन्तःकरणा-त्मनोरिति* ॥ "चैतन्यस्यापी"त्यनेनापिशब्देनैतदुक्तम्—वृत्तिवच्चैतन्यमपि विषयविषयमिति। कथं 'बुद्धिस्थमर्थं चेतयते' इत्युच्यते ? चैतन्यसम्बन्धस्याप्युक्तत्वात्, बुद्धिसम्बन्धे वा पुरुषसम्बन्धाभावात् ज्ञातत्वायोगादित्याशङ्क्य व्याचष्टे—*प्रथमं बुद्धिस्थमिति*॥ "तत्रैवंभूतस्ये"त्यादिना "बुद्धिस्थमर्थमि"त्यन्तेनात्मनो विषयभेदावभासः साधितः, "तत्र च प्रमातुरि"त्यनेनापि तदेव साध्यते, अतः पौनरुक्त्यमित्याशङ्क्याह—*उक्तं तावदिति* ॥ अत्र च प्रमातृ-स्वरूपसाधनम्, "तत्र च प्रमातुरि"त्यस्य विषयं तत्रैव वक्ष्यति—"तदेवमुपाधिवशादि"त्यनेन। अथवा—कथमन्तः-करणाधीनं प्रमातृत्वमात्मनः ? सर्वगतत्वेन सर्वसंयोगात्, परिच्छिन्नत्वे तु कथंचिदन्याधीनसंसर्गात् प्रमातृत्वं भवेदित्याशङ्क्याह—*उक्तं तावदिति* ॥ अपिशब्दः शङ्काद्योतकः। यद्यपि सर्वगतः ; तथाऽपीत्यर्थः। अथवा—अपिशब्दात् किमु वक्तव्यं परिच्छिन्नत्वेऽहङ्कारोपाधिनिमित्तं प्रमातृत्वमिति दर्शितम्। *ननु*—सर्वगतत्वे सति कथं विषयविशेषं प्रति प्रमातृत्वमिति दर्शितम् ? तत्राह—*परिणामोपाध्यभिव्यक्त्यपेक्षयेति* ॥ *ननु*—परिणामोपाधिनाऽपि सर्वत्राभिव्यक्तिः कस्मान्न भवति ? इत्याशङ्क्याभिप्रायमाह—*परिच्छिन्नान्तःकरणेति*॥ *ननु*—स्वप्रकाशस्य कथमभिव्यञ्जकापेक्षेति ? तत्राह—*अविद्यावृतप्रकाशेति* ॥ "तत्र च प्रमातुरि"त्ययं ग्रन्थो व्याहतः ; "विषयसंबन्धसञ्जातविशेषः"इत्युक्त्वा "सर्वान् प्रत्यविशिष्टः"इति वक्तुमशक्यत्वात्, न हि विषयविशेषसम्बन्ध-

तत्त्वदीपनम्

समानाश्रय-विषयत्वप्रसिद्धिविरोधशङ्कायां समानविषयत्वमेव समाधीयते, तत् कस्मात् ? इत्याशङ्क्याह—*विषयेति* ॥ आश्रय-विषयभेदस्योक्तत्वात् कथं फलस्य क्रियासमानाश्रय-विषयत्वम् ? तत्राह—*अन्तःकरणेति* ॥ परिणाम्यैक्याध्यासादात्मनः क्रियाश्रयत्वम्, अन्तःकरणस्य चात्मैक्यारोपादनुभवाश्रयत्वं चेति समानाश्रयत्वम्, अन्तःकरण-तद्वृत्तिसाधकचैतन्यस्य वृत्तिद्वारा घटसाधकत्वयोरेकविषयत्वं चेत्यर्थः। कर्मकारकाभिव्यक्तचैतन्यस्य तत्साधकत्वे सांख्यवचनविरोधः स्यादिति चोदयति—*ननु बुद्धिस्थमिति* ॥ विरोधनिरासप्रकारमाह—*प्रथम-मिति* ॥ वृत्तिद्वारा बुद्धावर्थः प्रतिबिम्बितो भवति, पश्चात् बुद्ध्यैक्याध्यासमापन्न आत्मा वृत्तिसंसृष्टविषयचैतन्या-भेदेनाभिव्यक्तोऽर्थं चेतयतीत्यविरोधः ॥

आत्मनोऽभिव्यक्त्यभ्युपगमेऽविद्याया निवृत्तत्वात् संसारोच्छेदः स्यात्, विषयविशेषप्रमातृता च न स्यात्, आत्मनोऽनभिव्यक्तौ विषयाभिव्यक्तिर्न स्यादित्याशङ्क्याह—*उक्तमिति* ॥ सर्वगतस्याविद्यावृतप्रकाशस्या-प्यात्मनोऽन्तःकरणपरिणामोपाधावभिव्यक्त्यपेक्षया प्रमातृत्वमित्यन्वयः। नच—अविद्यानिवृत्त्या संसारोच्छेद इति—वाच्यम् ; पूर्णाकारपरिणामस्य निवर्तकत्वाद् घटाकारपरिणामस्य परिच्छिन्नत्वान्न निवर्तकत्वम्, तत्रैवाभि-व्यक्तत्वात्तत्प्रमातृत्वं चेत्याशयेनाह—*परिच्छिन्नेति* ॥

पञ्चपादिका

विष्टतया च प्रमाता, इति बुद्धिस्थमर्थं पुरुषश्चेतयत इत्युच्यते। तत्र च प्रमातुः स्वयंज्योतिषो विषयसम्बन्धसञ्जातविशेषोऽनुभवोऽपरोक्षतया सर्वान् प्रत्यविशिष्टोऽपि कारकाणां सम्भूय प्रधानक्रियासाधनत्वाद्, येन सह साधनम्, तन्निष्ठ एव, नान्यत्र। कर्मकारकमपि येन सह साधनम्, तस्यैवापरोक्षम्; गन्तृसम्बन्ध इव ग्रामस्य॥

पञ्चपादिकाविवरणम्

प्रमातृत्वम्॥ *ननु* केयमभिव्यक्तिः? आवरणाभिभव एव, न स्वरूपातिशयः। *ननु* उक्तोपाधिः किंप्रमाणकः? उक्तम्—"ह्रीर्धीर्भीरित्येतत्सर्वं मन एवे"ति। धीशब्दवाच्यज्ञानपरिणामवन्मनो विज्ञानं बुद्धिरिति। तदेवमुपाधिवशान्नियमेऽपि तदज्ञानाद् यच्चोदितम्—चैतन्यस्य सर्वविषयाविशेषित्वात् सर्वमस्य युगपदवभासेतेति, तत् परिहरति—*तत्र च प्रमातुः स्वयंज्योतिष इति*॥ परिणामसंसृष्टकर्मोपाधिनियमान्नासंसृष्टेषु चैतन्याभिव्यक्तिः, इति नैकस्य प्रमातुः सर्वविषयावभास इति भावः। *ननु* कर्मकारकेऽपि चैतन्यमभिव्यक्तं चेत्, सर्वप्रमातृसाधारणतया सर्वेषामवभासतामिति, नेत्याह—*कर्मकारकमपीति*॥ एतत्प्रमातृचैतन्या-

ऋजुविवरणम्

सञ्जातविशेषत्वं यस्योच्यते, तस्यैव साधारण्यमित्याशङ्क्य, विषयसम्बन्धेन विशेषो यस्य भवति, तस्यैव चैतन्यस्य सर्वविषयसम्बन्धस्य साधारणत्वात् सर्वत्राभिव्यक्त्या सर्वावभास इत्यभिप्रायेण चोद्यं दर्शयति—*चैतन्यस्य सर्वविषयेति*॥ कथं विषयसम्बन्धसंजातविशेषत्वं हेतुः? सर्वविषयसम्बन्धिनः सर्वविषयानुभवसंभवात्, तथा "येन सह साधनम्, तन्निष्ठः" इत्यप्ययुक्तम्; सर्वविषयाणामपि चैतन्यसन्निधानेनाभिव्यक्तिसाधनत्वानुभवात्, इन्द्रियसम्बन्धाविशेषादित्याशङ्क्याभिप्रायमाह—*परिणामसंसृष्टेति*॥ कथं "येन सह साधनम्, तस्यैवापरोक्षत्व-

तत्त्वदीपनम्

आत्मनः स्वप्रकाशत्वात् कथमागन्तुकाभिव्यक्तिरिति शङ्कते—*ननु केयमिति*॥ विषयस्थचैतन्यस्याऽऽवरणाभिभूतत्वादभिव्यक्तिर्युक्तेत्याह—*आवरणेति*॥ अभिभवशब्देन प्रतिबन्धो विवक्ष्यते। विषयावच्छिन्नात्माज्ञाननिवृत्तिर्वाऽभिभवः। परिणामलक्षणोपाधौ प्रमाणं पृच्छति—*ननूक्तेति*॥ श्रुतिः प्रमाणमित्याह—*उक्तमिति*॥ *ननु* अत्र लज्जादिधर्मिकं मन उक्तम्, न ज्ञानपरिणामवदन्तःकरणमिति, तत्राह—*धीशब्देति*॥ ज्ञानपरिणामवन्मनः तद्विज्ञानं बुद्धिरित्युच्यत इत्यन्वयः। बुद्धि-मनसोरेकत्वात् परिणामवती बुद्धिः सिद्धेत्यर्थः। विषयस्य व्यवस्थायाः सिद्धत्वाद् 'तत्र चे'त्यादिग्रन्थवैयर्थ्यमाशङ्क्योपसंहारपरतया व्याचष्टे—*तदेवमिति*॥ उपाधितो व्यवस्थाभावेऽपि तदज्ञानाद् यच्चोदितम्—सर्वमस्य भासेतेति, तत् परिहरतीत्यन्वयः॥

यस्य कारकस्य प्रधानक्रियासाधनत्वम्, तन्निष्ठ एवानुभव इति कथमुक्तम्? सर्वविषयाणामपि चित्संनिधानेन चिद्व्यञ्जकत्वाविशेषात्, तत्राह—*परिणामेति*॥ परिणामेन संसृष्टो यः कर्मकारकलक्षण उपाधिः, तत्रैव चैतन्याभिव्यक्तिनियमान्नातिप्रसङ्ग इति भावः। *तत्रेत्यादेरयमर्थः*—स्वप्रकाशस्यानवच्छिन्नस्यात्मन एकविषयभाने सकलविषयभानं स्यात्। न च—तत्तद्विषयव्यक्तचैतन्यस्य तत्तत्साधकत्वाङ्गीकृतेर्नायं प्रसङ्ग इति—शङ्क्यम्; परिणामविशिष्टविषयस्य व्यञ्जकत्वे गौरवाद् विषयमात्रस्य तद्व्यञ्जकत्वमिति वाच्यम्, तथाचातिप्रसक्तिरिति चोद्यार्थः। कर्त्रादिकारकाणि संभूय ज्ञानक्रियां साधयन्तीत्यविगीतम्, तथाच कारकान्तरं येन येन कर्मकारकेण सहितं तत्साधनम्, तेन ज्ञानेन संसृष्टविषयेण व्यक्त्यनुभवे तत्सिद्धिः। न च गौरवं चोद्यम्; प्रामाणिकेऽर्थे गौरवस्यादोषत्वादिति समाधानग्रन्थार्थः। कारकान्तरं येन कर्मकारकेण प्रधानक्रियासाधनम्, तन्निष्ठतयाऽनुभव इति टीकार्थः॥ प्रकारान्तरेणानियममाशङ्कते—*ननु कर्मेति*॥ *इदमुक्तं भवति*—पटगतशौक्ल्यस्य सर्वसाधारण्यवत्पटव्यक्तचैतन्यस्यापि सकलजनसाधारण्यादनियम इति। साधारण्यमसिद्धमित्याह—*नेत्याहेति*॥

पञ्चपादिकाविवरणम्

भिन्नतयैवाभिव्यक्तं तद्विषयचैतन्यं न प्रमात्रन्तरचैतन्याभेदेनाभिव्यक्तम्, अतो न सर्वेषामवभास्यत्वमित्यर्थः ॥ *ननु*—स्वयं प्रकाशमानस्य प्रदीपादिवत् स्वसंसर्ग्यशेषवस्तुप्रकाशित्वे प्राप्ते, कथमहङ्कारोपाधिनियमः कल्प्यते ? नच—अन्तःकरणपरिणामसंसृष्टविषयादन्यत्र चैतन्यमुपरक्तमपि न प्रकाशयतीति—युक्तम् ; प्रकाशसंसर्गस्यैव प्रकाशमानताभिधानात् । विषयान्तरेषु चैतन्यस्यासङ्गितया नोपराग इति चेत्, अन्तःकरणेऽपि तर्ह्यसङ्गितया नोपरागः, इति तदुपाधिनाऽपि न किंचिदपि प्रकाशेत । स्यादेतत्—अन्तःकरणावच्छिन्नो हि जीवः प्रतिबिम्बस्थानीयः परिच्छिन्नस्तत्संसृष्टमेव विषयं प्रकाशयेद्, ब्रह्म तु बिम्बस्थानीयं सर्वगतत्वात् सर्वमवभासयिष्यति । नच ब्रह्मणि सर्वदर्शित्वं मुखावदातत्ववद् जीवमनुगच्छति, जीवगतं वा किञ्चिज्ज्ञत्वं मुखश्यामत्वादिवन्न ब्रह्मानुगच्छतीति सर्वमुपपन्नम्—इति, *नैतत्सारम्* ; तथा सति विषयावच्छिन्नचैतन्यस्य ब्रह्मचैतन्यतयाऽहङ्कारावच्छिन्नजीवानुषङ्गाभावात् सर्वज्ञत्वमिव विषयावभासोऽपि जीवस्य न स्यात् । *ननु*—जीवोपाधेरन्तःकरणस्य विषयस्य च परस्परान्वयादुभयावच्छिन्नमपि चैतन्यमन्योन्यसंसृष्टम्, इति युक्तो जीवस्य विषयावभास इति, नैतद् युक्तम् ; तथा सति सर्वगतेन ब्रह्मणा नित्यसंसृष्टमन्तःकरणम्, इति तदुपाधौ जीव-ब्रह्मचैतन्याभेदाभिव्यक्तेर्ब्रह्मसार्वज्ञ्यं जीवस्य नित्यवत्प्रकाशेत ॥

ऋजुविवरणम्

मि''त्युक्तम् ? नहि साधारण्येनाभिव्यक्तौ सत्यां साधनत्वमात्रं पुरुषविशेषस्यापरोक्षत्वनियामकम् ; साधारण्येनोत्पन्नघटादौ व्यभिचारादित्याशङ्क्याभिप्रायमाह—*एतत्प्रमातृचैतन्येति* ॥ *ननु स्वयंप्रकाशस्येति* ॥ नित्यप्रकाशत्वात् सर्वगतत्वेनात्मनो नोपाधिना व्यवस्थितविषये प्रमातृत्वमिति भावः । *ननु*—चैतन्यस्यावृतत्वात् संसर्गेऽपि न प्रकाशत्वमित्याशङ्क्याह—*नचान्तःकरणेति* ॥ साक्षिणो नावरणम्। परिच्छिन्नत्वाद्वाऽज्ञानस्य सर्वज्ञानावारकत्वमिति परिहरति—*प्रकाशसंसर्गस्यैवेति* ॥ तर्हि ब्रह्मणो न सर्वावभासनसामर्थ्यमित्याशङ्क्याह—*ब्रह्म तु बिम्बस्थानीयमिति* ॥ तर्हि तेनैव सर्वदर्शित्वेन जीवस्यावभास इत्याशङ्क्याह—*नच ब्रह्मणीति* ॥

तत्त्वदीपनम्

येन प्रमात्रा सह प्रधानक्रियायाः साधनं कर्मकारकम्, तस्यैवापरोक्षमिति कथं नियमः ? प्रदीपस्थापकव्यतिरिक्तानामपि तदुचितकार्यदर्शनादित्यत्राह—*एतदिति* ॥ एतत्प्रमात्रभेदेनाभिव्यक्तस्य विषयगतचैतन्यस्य तत्साधकत्वाङ्गीकारात सकलप्रमात्रभेदेन चानभिव्यक्तत्वान्न सर्वेषां भानप्रसङ्ग इत्यर्थः । उक्तां व्यवस्थामाक्षेपसमाधानपुरःसरं स्पष्टीकर्तुमाक्षेपमवतारयति—*ननु स्वयमिति* ॥ सर्वगतनित्यप्रकाशात्मनः सकलप्रकाशनसामर्थ्येऽपि तत्प्रकाशनानुपलम्भादुपाधिः स्वीकार्यश्चेत्, तत्रोपाधेः कुत्रोपयोगः ? इति विवेचनीयम्—किं विषयप्रकाशने ? उत तदुपराग इति ? तत्राद्यं प्रतिक्षिपति—*नचेति* ॥ द्वितीयमनुवदति—*विषयेति* ॥ विषयसंबन्धवदुपाधिसंबन्धोऽप्यसंभवी, तत्संबन्धे वा विषयसंबन्धोऽपि स्यादित्याह—*अन्तःकरणेऽपीति*॥ स चासावुपाधिश्चेति तदुपाधिः, तेनेत्यर्थः । उपाधेरनिरूपणादात्मनः संसृष्टसकलभासकत्वापादनमाकर्ण्य तदसहमानः सिद्धान्ती प्रत्यवतिष्ठते—*स्यादेतदिति* ॥ किं जीवस्य सकलभासकत्वं प्रसञ्जयसि ? उत ब्रह्मणः ? इति विकल्प्याद्यं दूषयति—*अन्तःकरणेति* ॥ अवच्छिन्नः प्रतिबिम्बस्थानीय इति च मतद्वयमनुसृत्योक्तमिति द्रष्टव्यम् । द्वितीये त्विष्टापत्तिरित्याह—*ब्रह्म त्विति* ॥ प्रत्यग्ब्रह्मगतं सार्वज्ञ्यं जीवे स्यात्, जीवगताल्पत्वं च ब्रह्मणीत्याशङ्क्योपाधिभेदाद् व्यवस्थेत्याह—*नचेति* ॥ परिच्छिन्नत्वात् जीवस्य युगपत् सकलासंसर्गवत् कतिपयसंसर्गस्याप्यसंभवात् कस्यापि भानं न स्यादित्याह—*नैतत्सारमिति* ॥ परिच्छिन्नस्यापि जीवस्य वृत्तिद्वारा विषयचैतन्यसंबन्धात् तद्भासकत्वं प्रसक्तमिति शङ्कते—*ननु जीवेति* ॥ ''परस्परान्वयादित्य''त्र वृत्तिद्वारेत्यनुषङ्गः । अतिप्रसङ्गेनोत्तरमाह—*नैतद्युक्तमिति* ॥ एकोपाधिसंसर्गाद् विषयजीवचैतन्ययोरभेदेनाभिव्यक्त्यभ्युपगमे सर्वज्ञत्वादिलक्षणब्रह्मणो जीवस्य चैकान्तःकरणसंसर्गादभेदाभिव्यक्तिरिति सार्वज्ञ्यादिकमपि जीवस्य प्रतीयादित्यर्थः ॥

पञ्चपादिकाविवरणम्

अथ मतम्—सर्वगतमपि चैतन्यमविद्यावृतत्वात् स्वयमपि तावन्न प्रकाशेत, नच स्वयमप्रकाशमान-श्चैतन्यप्रकाशः प्रदीपवत् प्रकाश्यमवभासयितुं क्षमः; अङ्गुलिमात्रेणादित्यवत् परिच्छिन्नेनाप्यज्ञानेन सर्वगतमपि चैतन्यं तिरोधीयते। तत्रान्तःकरणोपरागेणावरणाभिभवात्तत्रैवाभिव्यक्तं चैतन्यं किंचिदेव प्रकाशयति—इति, तदपि न युक्तम्; कार्यभूतेनान्तःकरणेन स्वोपादानाज्ञानाभिभवायोगात्। तस्मान्न युक्तं किंचिदज्ञत्वेऽहङ्कारो-पाधिवर्णनम्—इति, *अत्रोच्यते* ;—युक्त एवायमुपाधिः सर्वगतस्यापि जीवस्यासङ्गितया सर्वेणासंयोगात्। प्रकाशस्य च संयुक्तवस्त्ववभासित्वाद्, ब्रह्म तु सर्वोपादानतया स्वात्माभिन्नं जगदात्मानमिवावभासयति, ननु जीवः; अनुपादानत्वात्। *कथं पुनः* सर्ववस्तुदेशाव्यवहिततया सर्वगतस्य विषयान्तरेष्वसङ्गितयाऽसंसृष्ट-स्यान्तःकरणसंसर्गिता संभवेत्? *उच्यते*—यथा गोत्वादयो जातिविशेषाः केसरादिमद्व्यक्त्यन्तरप्रदेशसंनिहिता अपि स्वभावविशेषादश्वादिव्यक्त्यसङ्गितया तैरनभिव्यक्ता अपि सास्नादिमत्पिण्डसङ्गितयाऽभिव्यज्यन्ते; यथा वा प्रदीपप्रभा वाय्वाकाश-रस-गन्धादिप्रदेशव्यापिन्यपि स्वभावविशेषात् तानि न प्रकाशयन्ती रूपसंसर्गितया

ऋजुविवरणम्

"अथ मतमि"ति ग्रन्थः स्वावभासकव्यतिरिक्तविषयगतचैतन्याभिप्रायेणापि व्याख्येयः। परिच्छिन्नमज्ञानं कथमन्यत्रा-वरणम्? इत्याशङ्क्याह—*अङ्गुलिमात्रेणेति*॥ ब्रह्मणोऽप्यसङ्गत्वेन न सर्वावभासकत्वसम्भवः; तद्वज्जीवस्य वा सर्वाव-भास इत्याशङ्क्याह—*ब्रह्म त्विति*॥ *ननु*—व्यक्तिः सर्वगता, जातिर्न सर्वत्र गता, तेनैव व्यक्त्यन्तरासङ्ग इतीदं वक्तुं शक्यत इति, तदर्थं दृष्टान्तान्तरमाह—*यथावा प्रदीपप्रभेति*॥ "यथावा केवलेने"त्यनेन सर्वविषयसम्बन्ध-

तत्त्वदीपनम्

बुद्ध्यवच्छिन्नो जीव इति नोपेयते, किं त्वविद्यावच्छिन्नः सर्वगतश्चेति, ततश्च विषयसंसर्गात् तद्भानं घटत इत्याह—*अथेति*॥ तर्हि सर्वसंसर्गित्वात् सर्वं जीवः पश्येदित्याशङ्क्याह—*सर्वगतमपीति*॥ *स्वयमपीत्यस्यायमर्थः*—चैतन्यं स्वरूपेणापि न प्रथते, अन्यत्र प्रकाशयतीति किमु वक्तव्यम्? अप्रकाशमानत्वेऽपि नयनवद्भासकमित्या-शङ्क्याव्यवधानेन प्रकाशकत्वान्नैवमित्याह—*नचेति*॥ अविद्या सर्वगता? उत परिच्छिन्ना? नाद्यः? माना-भावात्, न द्वितीयः; परिच्छिन्नस्य सर्वगतचैतन्यतिरोधायकत्वासंभवादित्याशङ्क्याह—*अङ्गुलिमात्रेणेति*॥ "परिच्छिन्नेनापी"त्यत्रापिशब्दादज्ञानस्यापरिच्छेदं सूचयति। "मायां तु प्रकृतिं विद्यादि"त्यादिना सकलभूतभौतिको-पादानतया सर्वगतत्वप्रतिपत्तेरित्यर्थः। तर्ह्यविद्यावृतत्वान्न किंचिदपि जानीयात्, ज्ञाने वा सर्वं जानीयादित्या-शङ्क्याह—*तत्रान्तःकरणेति*॥ अदृष्टेन्द्रियादिसहकृतमन्तःकरणं यदाकारेण परिणमते, तत्संसर्गात् तद्विषया-वच्छिन्नचिद्गतावरणाभिभवे तस्य प्रकाशः, नान्यस्येत्युचितमित्यर्थः॥

कार्यस्य कारणाभिभावकत्वादर्शनादन्तःकरणस्याज्ञानाभिभावकत्वमयुक्तमित्याह—*तदपि न युक्तमिति*॥ अन्तःकरणावच्छिन्नत्वेऽविद्यावच्छिन्नत्वे च प्रमातृत्वादिव्यवस्था घटत इत्याह—*अत्रोच्यत इति*॥ तत्र प्रथम-मविद्यावच्छिन्नत्वमादाय व्यवस्थामुपपादयति—*युक्त इत्यादिना*॥ संयोगाभावेऽपि प्रकाशकत्वं किं न स्यादित्या-शङ्क्याह—*प्रकाशस्य चेति*॥ असङ्गित्वेऽपि ब्रह्मणो यथा सकलभासकत्वम्, तद्वज्जीवस्यापि स्यादित्याशङ्क्य वैधर्म्येणोत्तरयति—*ब्रह्म त्विति*॥ तदभेदाज्जीवस्यापि तथात्वमित्याशङ्क्याह—*ननु जीव इति*॥ चिन्मात्रस्य तदभेदे परिच्छिन्नज्ञानशक्तेर्जीवस्य नोपादानत्वम्, ततः सकलभासकत्वानुपपत्तिरित्यर्थः॥

तदेवं स्वतो विषयसंबन्धाभावात्तत्सिद्ध्यर्थमुपाधिराश्रयणीय इत्युक्तम्, तत्रोपाधिसंसर्गवद् विषयसंसर्गोऽपि स्यात्, अन्यथोपाधिसंसर्गस्याप्यनुपपत्तिरिति शङ्कते—*कथं पुनरिति*॥ सर्वगतत्वेऽपि कस्यचित् केनचित्संसर्गः केन चिदसंसर्ग इत्युभयथापि दर्शनान्न विरोध इत्याह—*उच्यत इति*॥ सर्वगता जातिरिति मतमाश्रित्य दृष्टान्तमाह—*यथेति*॥ व्यक्तिः सर्वगता, न जातिरिति पक्षे दृष्टान्तमाह—*यथावा प्रदीपेति*॥ स्वरूपेणासमर्थस्याप्युपाधि-

पञ्चपादिकाविवरणम्

तदेव प्रकाशयति, एवं चैतन्यमपि स्वभावविशेषादन्तःकरणे संसृज्यते, नान्यत्रेति युक्तम्। यथाच केवलेन वह्निना न दाह्यमपि तृणादि, अयःपिण्डसमारूढेन दह्यते ; तथाऽहङ्कारसमारूढेनाऽऽत्मना, केवलेनाप्रकाश्या अपि विषयाः प्रकाश्यन्त इति युक्तमहङ्कारोपाधिवर्णनम् ॥

अथवा—सोपाधिकत्वाज्जीवः परिच्छिन्नो न सर्वमवभासयति ; जीवावच्छेदनिमित्तान्तःकरणपरिणामसंसर्गकृताभिव्यक्तित्वाद्विषयावच्छिन्नचैतन्यस्य, जीवचैतन्यता च न विरुद्ध्यते। ब्रह्माकारपरिणतान्तःकरणसंसर्गाभावाच्च न नित्यवद् ब्रह्मणः प्रकाशप्रसङ्गः। नचान्तःकरणस्वरूपमात्रसंसर्गिणोऽभिव्यक्तिरङ्गीकृता ; तद्गतधर्मादीनामपि प्रसङ्गात्, जीवाकाराहंवृत्तिपरिणतान्तःकरणेन च जीवोऽभिव्यज्यते ; अन्यथा सुषुप्तेः। अतः परिच्छिन्नत्वान्न सर्वविषयावभासिता। *अथवा*—अज्ञानावृतः स्वयमप्रकाशमानतया विविधविषयाननवभासयन्नन्तःकरणोपरागादावरणतिरोधाने तत्रैवाभिव्यक्तस्तत्संसृष्टमेव विषयमवभासयति। दृष्टं च वृश्चिक-वृक्षादिकार्यस्य गोमय-मृदादिविकारस्वभावतिरोधायकत्वम्, इति सिद्धैवात्मनि प्रमातृत्वादिव्यवस्थेति ॥

ऋजुविवरणम्

मङ्गीकृत्यापि केवलस्याप्रकाशकत्वम्, अन्तःकरणसहकृतस्यैव प्रकाशकत्वमिति दर्शितम्। *ननु*—जीवस्य परिच्छिन्नत्वाभ्युपगमेऽपि विषयावभासो जीवस्य न सम्भवति ; विषयस्थचैतन्यस्य ब्रह्मचैतन्यत्वादित्याशङ्क्य परिहरति—*जीवावच्छेदनिमित्तेति* ॥ जीवोपाधिभूतान्तःकरणेन ब्रह्मणो नित्यसम्बद्धत्वाद् नित्यवद् ब्रह्मप्रकाशप्रसङ्ग इति यच्चोदितम्, तत् परिहरति—*ब्रह्माकारपरिणतान्तःकरणेति* ॥ *ननु*—किं तदाकारपरिणामेन ? अन्तःकरणसम्बन्धादेव ब्रह्मप्रकाशो भवतु ; प्रकाशरूपत्वादन्तःकरणस्यापीत्याशङ्क्याह—*नचान्तःकरणस्वरूपमात्रेति* ॥ *ननु*—अन्तःकरणमात्रसंसर्गेण जीवस्याभिव्यक्त्यङ्गीकरणमस्तीत्याशङ्क्याह—*जीवाकाराहंवृत्तीति* ॥ "*ननु*—नीलादिविषये"त्यनेन कथमपसिद्धान्त आपादितः ? ज्ञानार्थयोरभेदो हि तैरभ्युपगतः ; अत्रतु चैतन्यस्य विषयेऽभिव्यक्तिरुक्ता,

तत्त्वदीपनम्

संबन्धात् सामर्थ्ये दृष्टान्तमाह—*यथाचेति* ॥ केवलेनाप्रकाश्या अपि विषयाः परिणताहंकारसमारूढेनात्मना प्रकाश्यन्त इत्यन्वयः ॥ सर्वगतो जीव इत्यादाय प्रतिकर्मव्यवस्था स्थापिता, संप्रति तस्य परिच्छिन्नत्वेऽपि व्यवस्था घटयितुं शक्यत इत्याह—*अथवेति* ॥ *सोपाधिकत्वादिति* ॥ अन्तःकरणोपाधिकत्वादित्यर्थः। अहंकारावच्छिन्नचैतन्यस्य विषयचैतन्यासंबन्धाद् विषयभानासंभव इति यदभ्यधायि, तद् दूषयति—*जीवेति* ॥ जीवावच्छेदे निमित्तं यदन्तःकरणम्, तत्परिणामसंसर्गेण कृताऽभिव्यक्तिर्यस्य तत्, तथोक्तम्। विषय-प्रमातृचैतन्ययोरेकान्तःकरणपरिणामसंबन्धादभेदेन स्फुरणम्, ततो विषयप्रथोपपद्यत इत्यर्थः ॥

प्रत्यग्-ब्रह्मणोरप्येकान्तःकरणसंबन्धाद् ब्रह्मणोऽपि प्रत्यक्त्वेन स्फुरणं स्यादिति यदवादि, तत्र वक्तव्यम्—किं ब्रह्माकारपरिणतान्तःकरणसंसर्गात् स्फुरणम् ? उतान्तःकरणमात्रसंसर्गात् ? इति विकल्प्याद्यं दूषयति—*ब्रह्मेति* ॥ द्वितीयं दूषयति—*नचेति* ॥ अन्तःकरणमात्रसंसर्गात् प्रत्यग्व्यक्तिवत् ब्रह्मव्यक्तिरपि किं न स्यात् ? इत्याशङ्क्य दृष्टान्तान्तरमाह—*जीवाकारेति* ॥ तत्र विनिगमनमाह—*अन्यथेति* ॥ जीवाकाराहंवृत्त्यभावे जीवस्य भानादर्शनादित्यर्थः। 'बुद्ध्यवच्छिन्नो जीवः' इति मते प्रमातृत्वव्यवस्थोपपन्नेत्युपसंहरति—*अत इति* ॥

जीवस्य सर्वगतत्वे विषयोपरागार्थमुपाधिरेष्टव्य इत्युक्तम्, संप्रत्यावरणाभिभवार्थमिति मतान्तरमुपन्यस्यति—*अथवेति* ॥ विषयाकारेण परिणतान्तःकरणमन्तःकरणशब्दार्थः। विषयस्थचिद्गतावरणमावरणशब्दार्थः। कार्यस्य कारणाभिभावकत्वं नेति यदुक्तम्, तत्राह—*दृष्टमिति* ॥ वेणूत्थो दहन आदिशब्दार्थः। प्रतिकर्मव्यवस्थामुपसंहरति—*इति सिद्धेति* ॥ सर्वगतत्वे विषयोपरागार्थत्वेनावरणतिरोधायकत्वेन चोपाधेरुपयोगः, परिच्छिन्नत्वेऽपि विषयसंसर्गार्थमित्युपाध्यपेक्षया व्यवस्था युक्तेत्यर्थः। इतिशब्देनाद्वैतिमतनिरवद्यतोच्यते ॥

पञ्चपादिका

ननु नीलादिविषयोऽपि चेदपरोक्षस्वभावः, नीलात्मिका संविदित्युक्तं स्यात्; अतः स एव माहायानिकः पक्षः समर्थितः, *मैवम्* ; परस्परव्यावृत्तौ नील-पीताववभासेते, अपरोक्षता तु न तथा; एकरूपावगमाद्विच्छेदावभासेऽपि, अतो न तत्स्वभावता। यदि स्यात्, तद्वदेव व्यावृत्तस्वभावताऽप्यव-

पञ्चपादिकाविवरणम्

विषयस्य चैतन्यविवर्तत्वात्तदभिन्नमपि चैतन्यमहमवभासैकरूपमुक्तम्, तत्रापसिद्धान्तप्रसङ्गं चोदयति—*ननु नीलादिविषयोऽपि चेदिति* ॥ यत्किञ्चित्साम्यादपसिद्धान्तसङ्करः स्यात्, अस्ति चात्र महान् सिद्धान्तभेदः। क्षणिकाद् विज्ञानाद्भेदेनार्थक्रियासामर्थ्यसत्त्वशून्यं विषयमाहुर्विज्ञानवादिनः, तत्त्वदर्शिनस्त्वद्वितीयात् संवेदनादभेदेऽपि विषयस्य भेदेनाप्यर्थक्रियासामर्थ्यसत्त्वं स्थायित्वं चाबाधितमस्तीति वदन्ति। तत्र कथं सिद्धान्तसङ्करः? इति वदितुं संवेदनैक्यं दर्शयति—*मैवम्; परस्परव्यावृत्ताविति* ॥ अस्त्वेकरूपता प्रत्यभिज्ञानात्, भेदोऽपि 'घटसंवित्' 'पटसंविदि'त्यवभासत इति, तत्राह—*विच्छेदावभासेऽपीति* ॥ स्वरूपप्रत्यभिज्ञा परोपाधि-

ऋजुविवरणम्

ननु तयोरभेदः। तथा "नीलात्मिका संविदि"त्युक्तम् "स्यादि"त्युक्तम्, तदप्यसंबद्धम्; नहि विषये चैतन्याभिव्यक्तिमात्रेणाभेद उक्तो भवति। नापि स्वगतचैतन्याभेदेऽपसिद्धान्तः; अहंप्रत्ययसमारूढेन ज्ञानेन भेदात्, तस्मादसंबद्धं चोद्यमित्याशङ्क्य तत्परिहाराय वृत्तसङ्कीर्तनपूर्वकमवतारयति—*विषयस्य चैतन्यविवर्तत्वादिति* ॥ "मैवमि"त्यादिग्रन्थोऽसङ्गतः; न ह्यपरोक्षताया एकत्वसाधनं पूर्वचोद्यपरिहार उपयुज्यते, इत्याशङ्क्याभिप्रायमाह—*यत्किंचित्साम्यादपसिद्धान्तेति* ॥ *ननु*—कथं विच्छेदावभासे सति संवेदनस्य भेदो नास्तीत्युच्यते? अभेदप्रतिभासविरोधित्वाद्, इत्याशङ्क्याभिप्रायमाह—*स्वरूपप्रत्यभिज्ञेति* ॥ "यदि स्यादि"त्यनेन व्यावृत्तताऽङ्गीकारे

तत्त्वदीपनम्

विषयाभिव्यक्तचैतन्येन तत्प्रतीतेरभिहितत्वाद् विषय-संविदोरभेदानभिधानात् कथमपसिद्धान्तश्चोद्यते—*ननु नीलादीत्यादिना*? तस्मादसंगतेयं टीका, इत्याशङ्क्य तात्पर्यमाह—*विषयस्येति* ॥ विषयस्य चैतन्यविवर्तत्वेन तदभेदेऽप्यात्मनोऽन्यस्याभ्युपगमान्नापसिद्धान्त इत्याशङ्क्याह—*अहमवभासेति* ॥ अहमित्यवभासो यस्य स तथोक्तस्तेनाभिन्नमित्यर्थः। प्रमातृ-विषयचैतन्ययोरभेदेनाभिव्यक्तेरुपपादनादस्ति चोद्यावसर इत्यर्थः। अनुवृत्त-व्यावृत्तभावेन विषय-संविदोर्भेदेऽपि विषयस्य चिदभेदाभ्युपगमादपसिद्धान्तप्रसङ्गो दुर्वारः। ततो "मैवमि"त्यादिग्रन्थासामञ्जस्यमाशङ्क्य, किं यत्किंचित्साम्येनापसिद्धान्तं ब्रवीषि? उत सर्वसाम्येन? इति विकल्प्याद्यं दूषयति—*यत्किंचिदिति* ॥ सर्वसाम्यं त्वसिद्धमित्याह—*अस्ति चेति* ॥ सिद्धान्तमेवाह—*क्षणिकादिति* ॥ बाधितस्थायित्वं त्वन्मतेऽप्यस्तीति विशिनष्टि—*अबाधितमिति* ॥ विषयाणां संवेदनप्रतियोगिकप्रामाणिकभेदाभावेऽप्यारोपितभेदोररीकरणान्न मीमांसकमतप्रसङ्गोऽपीत्यर्थः ॥

'गौर्गौरि'त्येकरूपताप्रतिभासेऽपि गोभेदस्त्वयाऽऽश्रीयते, तद्वदत्रापीति शङ्कते—*अस्त्विति* ॥ *इदमुक्तं भवति*—खण्ड-मुण्डादिभेदस्याध्यक्षसिद्धत्वात् 'गौर्गौ'रित्यनुवृत्तप्रत्ययस्य यथा सामान्यविषयत्वम्, तथा संविद्यप्यनुवृत्तप्रत्ययस्य सामान्यविषयत्वम्, भेदप्रतीतेश्च व्यक्तिविषयत्वम्, ततो न संविदैक्यमिति। भेदावभासेऽप्यपरोक्षता न भिद्यत इति कथमुक्तम्? भेदावभासस्य व्यक्तिभेदविषयत्वात्, प्रत्यभिज्ञानस्य च सामान्यविषयत्वादिति, तत्राह—*स्वरूपेति* ॥ दृष्टान्ते व्यक्तिभेदस्य प्रामाणिकत्वात् प्रत्यभिज्ञायाः सामान्यविषयत्वं घटते, प्रकृते तु संविद्भेदस्याप्रामाणिकत्वात् प्रत्यभिज्ञायाः स्वरूपविषयत्वमित्यर्थः। *ननु* नीलसंवित्पीतसंविदिति भेदः प्रतीयते, तत्राह—*परोपाधीति* ॥ उपाधिभेदमन्तरेणाविभाव्यमानभेदत्वान्न संविदां स्वतो भेदः, किन्त्वौपाधिकः; गगनभेदवत्, अतो न भेदप्रत्ययस्य बाधकत्वमित्यर्थः ॥

पञ्चपादिका

भासेत, नच तथा। किंच तैरपि नीलात्मिकसंविदोऽन्य एव पराग्व्यावृत्तोऽपरोक्षः प्रत्यगवभासः स्वरूपमात्रे

पञ्चपादिकाविवरणम्

विच्छेदेन न बाध्यत इति भावः। *ननु* एकत्वेऽपि संविदां विषयाभेदः किं न स्यादिति? तत्राह—*यदि स्यादिति*॥ अनुवृत्तस्य व्यावृत्तान्नाभेदः; अनुवृत्तत्वात्, आकाश-घटादिवदित्यनुमानमुक्तम्। इदानीं प्रत्यक्षोऽपि विषय-संविद्भेद इत्याह—*किंच तैरपीति*॥ नीलात्मिकसंविदिति नीलमेवोच्यते; युगपद्विषय-विषयिसंविद्द्वयानभ्युपगमात्। *प्रत्यगवभास इति* अहंसंवेदनमात्रम्। 'अहं नीलं पश्यामी'ति कर्तृ-कर्मतया भेदप्रत्यक्ष इत्यर्थः॥

ऋजुविवरणम्

दूषणमुक्तमिति प्रतिभाति, तदसारम्; भेदस्य निरस्तत्वात्, अङ्गीकारहेत्वभावात्, "किंचे"ति चायुक्तम्; अर्थान्तरविषयत्वात्तस्येत्याशङ्क्यावतारयति—*नन्वेकत्वेऽपीति*॥ "यदि स्यादि"त्यनेन कथं संविद्विषययोरभेदे तद्वदेव विषयवदेव व्यावृत्ततावभास आपादितः? 'नीलसंविदि'ति व्यावृत्तप्रतीतेर्विद्यमानत्वात्, नहि विद्यमानस्यैवानिष्टत्वेनापादनं युक्तम्, एवंच सत्यनन्तरग्रन्थेऽपि "किंचे"ति न युक्तं वक्तुम्; पूर्वं भेदसाधकप्रमाणस्यानुक्तत्वात्, तथा "तैरपि नीलव्यतिरिक्तसंविदङ्गीक्रियते"इति न युक्तम्; परसिद्धान्तापरिज्ञानलक्षणनिग्रहस्थानप्रसङ्गात्, इत्याशङ्क्य, वृत्तग्रन्थाभिप्रायकथनपूर्वकमवतारयति—*अनुवृत्तस्य व्यावृत्तादिति*॥ अत्यन्तभेदोऽनुमानेनेष्यते; भेदाभेदस्यानङ्गीकारादिति। *ननु*—नीलसंविद्भेदः "प्रत्यक्षः" इत्यनेन ग्रन्थेन कथमुच्यते? तैरपि नीलात्मिकसंविद इत्यभेदस्यैवोक्तत्वात्, तथा "नीलात्मिकसंविद्भेदासाधकत्वात्, इत्याशङ्क्य व्याचष्टे—*नीलात्मिकसंविदिति॥ *नीलमेवेति*। "प्रत्यगवभास"इत्यनेन प्रत्यग्भूतस्यावभास इति प्रतीयते, प्रत्यगाकारोऽवभास इति वा; तथा सति स्वरूपमात्रपर्यवसित इति विरुद्धम्; अनेन विषयाद्भेदसिद्ध्यर्थमनन्याकारस्योक्तत्वात्,' 'उपेयते"इति च विरुध्येत; अनङ्गीकारात्, प्रत्यक् चासाववभासश्चेति विग्रहे व्यर्थविशेषणत्वम्; व्यावर्त्याभावादित्याशङ्क्य व्याचष्टे—*अहंसंवेदनमात्रमिति*॥ "*उपेयत"इति*॥ उपगन्तव्यमित्युक्तं भवति। पराग्व्यावृत्तो विकल्प उपेयः। नीलं चेदन्यथा

तत्त्वदीपनम्

ब्रह्मानुवृत्तं विषयाश्च व्यावृत्ताः, तथाऽप्यभिन्ना इति त्वयोपेयते, तद्वत् संवित्संवेद्ययोरप्यभेद इति शङ्कते—*नन्विति*॥ तत्रापि वास्तवमैक्यं नाङ्गीक्रियते, त्वया तु वास्तवमैक्यमिष्यत इति वैषम्यमित्यभिसन्धायाह—*तत्राहेति*॥ एकेन प्रमाणेन साधितेऽर्थे प्रमाणान्तरोपन्यासे "किंचेत्यु"क्तिर्युक्ता, नच पूर्वत्र प्रमाणोपन्यासं पश्याम इत्याशङ्क्याह—*अनुवृत्तस्येति*॥ संवित्संवेद्ययोरनुवृत्त-व्यावृत्तताभेदविधुरता चेत्यत्र दृष्टान्तमाह—*आकाशेति*॥ अनुवृत्तम्, न तत्त्वतो व्यावृत्ताभेदवत्, अनुवृत्तत्वात्; आकाशवत्। नच जातौ व्यभिचारः; तस्याः पक्षतुल्यत्वादित्यर्थः॥

ननु "नीलात्मिका संविदि"त्यत्र नील-संविदोरभेद उक्तः, तथाच नीलसंविदोऽहमवभासस्य च भेदसाधनमसंगतमित्याशङ्क्याह—*नीलात्मिकेति*॥ तत्र हेतुमाह—*युगपदिति*॥ नच—संविच्छब्देन नीलस्वरूपविवक्षायां 'नीलादन्यः' इत्युच्यताम्, किं संविद्ग्रहणेन? इत्यपि—वाच्यम्; संविद्व्यतिरेकेण नीलाभावे तत्संवित्त्वानुपपत्तेर्नीलसत्त्वेष्टव्या, इति द्योतनार्थत्वात्संविद्ग्रहणस्येत्यर्थः। "प्रत्यगवभासः" इत्यत्र प्रतीचोऽवभास इति विग्रहशङ्का स्यात्, नच सोपपद्यते; अवभासव्यतिरिक्तप्रतीचोऽनभ्युपगमादिति, तत्राह—*प्रत्यगिति*॥ 'अहं नीलं पश्यामी'ति ज्ञानमपरोक्षमिति प्रसिद्धम्, तेन संविदो ग्राह्यत्वे विषय-विषयिसंविदोस्तुल्यकालत्वं स्यात्। नच तद् युज्यते। तस्माद् येन नीलेन संविदोऽभेद उच्यते, तस्मान्नीलादहमुल्लेखस्यान्यत्वं तैरङ्गीक्रियते। तयोर्ग्राह्य-ग्रहकता वाऽनुभवसिद्धेति तद्भेदस्य प्रात्यक्ष्यम्। नच—आलयविज्ञानस्य घटादेश्च भेदस्तदङ्गीकृतः, इति तत्साधनं सिद्धसाधनं प्रस्तुतानानुसारि चेति—भ्रमितव्यम्; आलयविज्ञानस्य परैरात्मत्वेनाभ्युपगतस्य विषयसंविदश्चाद्वैतवादिभिरैक्याङ्गीकृतेः। 'नीलादहमुल्लेखो भिन्नः' इत्यननुभवाद् न कथं तद्भेदस्य प्रात्यक्ष्यम्? तत्राह—*अहं नीलमिति*॥

पञ्चपादिका

पर्यवसितो विकल्प उपेयते, प्रतीयते च नीलसंवित् प्रत्यग्व्यावृत्तेदन्तया ग्राह्यरूपा ; ततश्च वस्तुद्वयं ग्राह्य-ग्राहकरूपमितरेतरव्यावृत्तं सिद्धम् ॥

नैतत् ; द्वयोरपि स्वरूपमात्रनिष्ठयोः कुतो विषय-विषयिभावः ? *कथं पुनः*—

पञ्चपादिकाविवरणम्

अत्र विज्ञानवादी चोदयति—*नैतद् द्वयोरपीति* ॥ अयं भावः—संविदोऽन्यच्चेन्नीलम्, न तत् संवेदनेऽवभासेत। भासते चेत्, सर्वं किमिति नावभासते ? विशेषसम्बन्धाभावाद् नीलस्य। संविदो जनकता विशेषसम्बन्ध इति चेत्, न ; इन्द्रियस्यापि विषयताप्रसङ्गात्। तस्मात् स्वाभाविकासाधारणाभेद-

ऋजुविवरणम्

प्रतीयते, ततश्च वस्तुद्वयं ग्राह्य-ग्राहकरूपं सिद्धमिति कथमुक्तम् ? नहि संविदः प्रत्यक्षाङ्गीकारः कर्तव्य इत्युक्तिमात्रेण विषयस्येदन्तया प्रतीतिमात्रेण च 'नीलमिदमि'ति प्रतीतौ तयोर्भेदाप्रत्यक्षो भवतीत्याशङ्क्य समुदायार्थमाह—*अहं नीलं पश्यामीति* ॥ "नैतदि"ति परिहारे प्राचुर्येण प्रयुज्यते। तथा सति सिद्धान्तग्रन्थत्वशङ्का स्यात्, सिद्धान्तग्रन्थत्वे च विषय-विषयित्वनिराकरणमसम्बद्धं भवेत्। नचैवमन्वयः—स्वरूपमात्रनिष्ठयोः कुतो विषय-विषयिभाव इति नैतन्मन्तव्यमिति ; प्रतिज्ञामात्रत्वप्रसङ्गात्, न चाभिप्रायिका युक्तिः ; उत्तरग्रन्थानाञ्जस्यात्, पौनरुक्त्यं चेत्येतदभ्युदासायाह—*अत्र विज्ञानवादीति* ॥ "नैतद् द्वयोरि"त्यनेन न स्वाभिमताभेदसाधनं क्रियते, नापि पराभ्युपगतविषय-विषयिभावनिराकरणम् ; स्वरूपमात्रे निष्ठा नितरां स्थितिर्ययोरिति स्वनिष्ठत्वं प्रतीयते, नानेन हेतुना विषय-विषयिभावो निराकर्तुं शक्यते ; हेतोरसिद्धिप्रसङ्गात्, नीलादेर्विषयस्यान्यनिष्ठताप्रतीतेः। नापि स्वरूपमात्रनिष्ठत्वमसंबन्धित्वं विवक्षितम् ; सम्बन्धिनोरेवेषु-कुड्ययोर्विषय-विषयित्वादर्शनात्, नापि भिन्नत्वं स्वरूपनिष्ठत्वम् ; तस्यापि विषय-विषयित्वनिराकरणासामर्थ्यात्, विषय-विषयिभावे स्वरूपनिष्ठत्वेन हेतुना निरस्ते, तेनाभेदादेव प्रतीतिरित्यभेदसिद्धिः, ननु तदस्ति ; अतः स्वपक्षसाधन-परपक्षनिराकरणासामर्थ्यादसमञ्जस इत्याशङ्क्याभिप्रायमाह—*अयं भावः संविदोऽन्यच्चेदिति* ॥ "कथं पुनरहमिदमि"ति ग्रन्थो न पूर्ववादिनः ; पूर्वग्रन्थेन पौनरुक्त्यप्रसङ्गात्, "नायं

तत्वदीपनम्

"नीलात्मिकसंविदः" इत्यादेरयोऽर्थः—अहंकारस्य चैतन्यव्यतिरेकेऽपि चैतन्यस्या'हमि'ति भानवन्नीलाहंधियोरैक्यमित्याशङ्कायामाह—*पराग्व्यावृत्त इति* ॥ नित्यानुमेयव्यावृत्त्यर्थम् *अपरोक्षेति* ॥ प्रत्यगवभास इति पदच्छेदः। विकल्प इत्यस्य व्याख्या=प्रत्यगवभास इति। अन्यत्वे हेतुमाह—*स्वरूपेति* ॥ न केवलमन्यत्वोपगमः, किंतु तदनुभवोऽपीत्याह—*प्रतीयत इति* ॥ "नैतद् द्वयोरपी"त्यत्र विषय-विषयिभावो निराक्रियते, तदनुपपन्नम् ; बौद्धेन तदनभ्युपगमादित्याशङ्क्य, परमते विषय-विषयिभावो न संभवतीति चोदयतीत्याह—*अत्रेति* ॥ कुत इति शब्दसूचितामनुपपत्तिं दर्शयति—*अयमिति* ॥

किं संविदाऽसंबद्धं नीलं भाति ? उत संबद्धम् ? इति विकल्प्याद्यं दूषयति—*संविद इति* ॥ अतिप्रसङ्गादित्यर्थः। संविदो नीलाकारत्वात्तद्भासकत्वमिति शङ्कते—*भासते चेदिति* ॥ संबन्धमन्तरेण तदाकारत्वे सर्वावभासकत्वं किं न स्यादित्याह—*सर्वमिति* ॥ द्वितीयं निरस्यति—*विशेषेति* । संयोगादिमूलसंबन्धाः संवित्संवेद्ययोर्न भेदादिना निरूपणपथमवतरन्तीत्यर्थः। जन्य-जनकतासंबन्ध इति शङ्कते—*नीलस्येति* ॥ किं जनकत्वमात्रं संबन्धः ? आहो विषयतया जनकत्वम् ? नाद्यः ; अतिप्रसङ्गादित्याह—*नेन्द्रियस्येति* ॥ न द्वितीयः ; मूलसंबन्धाभावाद्विषय-विषयिभावस्याप्यनुपपत्तेर्विषयतया जनकताऽयोगादित्यर्थः। भेदपक्षे विषय-विषयितासंभवसाधनफलमाह—*तस्मादिति* ॥ नील-विज्ञानयोर्योऽयमभेदसंबन्धः, स नान्यस्येत्याह—*असाधारणेति* ॥ न च तत्र हेतुगवेषणा युक्तेत्याह—*स्वाभाविकेति* ॥ स्वरूपमात्रे निष्ठा ययोस्तौ स्वरूपमात्रनिष्ठौ, तयोः ; परस्परमसंसृष्टस्वरूपयोरित्यक्षरार्थः ॥

पञ्चपादिका

'इदमहं जानामी'ति तयोर्ग्राह्य-ग्राहकताऽवभासः !!! *नायं* तदवभासः, किन्तु—'अहमि'ति 'इदमि'ति 'जानामी'ति च परस्परव्यावृत्ता विकल्पा एते *कथं पुनः* तेषु कटाक्षेणाप्यन्योन्यमनीक्ष-

पञ्चपादिकाविवरणम्

सम्बन्धादेव विज्ञाने नीलमवभासते—*इति* । सिद्धान्ती तु भेदावभासोऽपि प्रत्यक्षो युक्त्या कथमपह्नूयत इत्याह—*कथं पुनरिदमहं जानामीति* ॥ विज्ञानवादी तु नैतत् त्रयमेकसंवित्प्रतिभासि, किंतु संवित्त्रयमेतत्क्रमवर्तीति परिहरति—*नायं तदवभास इति* ॥ क्रमवर्तित्वेऽन्यसंवित्कालेऽन्यन्नावभासेत, इदं तु त्रितयं

ऋजुविवरणम्

तदवभास" इत्यनन्तरग्रन्थे निषेधाभावप्रसङ्गाच्च । नापि सिद्धान्तिनः; तेन ग्राह्य-ग्राहकभावस्याभ्युपगतत्वात् "कथं तयोर्ग्राह्य-ग्राहकभावः", इति वक्तुमयुक्तत्वात्। नापि ग्राह्य-ग्राहकभावस्य प्रतीयमानत्वात् कथमेकत्वं संविद्विषययोर्घटत इति प्रतीतिविरोधापादनमनेन क्रियते ; भेदपक्षे प्रतीतेरप्यनुपपत्तेरुक्तत्वादित्याशङ्क्यावतारयति—*सिद्धान्ती तु भेदावभास इति* ॥ "नायं तदवभासः"इति तच्छब्देन किं निर्दिश्यते ? न तावत् प्रकृतकर्तृ-कर्मत्वनिर्देशः ; 'तदवभासोऽयं न संभवती'ति निषेधानुपपत्तेः, 'अहमिदमि'ति प्रतीतिविरोधात्, अन्यस्यासन्निधानात्, "किन्त्विदमित्यहमि"त्यनेन विरोधापत्तेश्च, तत्र हि परस्परव्यावृत्ताकारतयाऽभ्युपगमात्पूर्वभागेन तन्निषेधात्। कस्यायं ग्रन्थ इत्यपि न ज्ञायते ; "नायं तदवभासः"इत्यनेन पूर्वोक्तार्थनिषेधेन पूर्वपक्षानुकूल्यप्रतीतेस्तत्र निषेध्यानुपपत्त्या "किन्त्विदमि"त्यनेनाकारत्रयाङ्गीकारेण च सिद्धान्तानुकूल्यप्रतीतेरित्यसामञ्जस्यमाशङ्क्यावतारयति—*विज्ञानवादी तु नैतत्त्रयमिति* ॥ अवभासस्य निषेधानुपपत्तेः—'आनर्थक्यतदङ्गन्यायेन' एकत्वमवभासगतं निषिध्यत इति दर्शितवान्। "संवित्त्रयमि"त्यनेन "विकल्पाः" इति व्याख्यातम्। "क्रमवर्ती"त्यनेन "परस्परव्यावृत्ताः" इति व्याख्यातम् ; इतरथा व्यावृत्ताकारत्रयमात्रकथने सिद्धान्तवाद्यभ्युपगतकर्तृ-कर्मज्ञानाभ्युपगमाशङ्कानिवृत्तेरभावात्। "कथं पुनस्तेषु कटाक्षेणापी"त्यनेन—सम्बन्धावगमो न संभवति ; कटाक्षेणाप्यन्योन्यमनीक्षमाणत्वादित्युक्तम्, तत्र कथमन्योन्यमनीक्षमाणत्वं सम्बन्धावगमाभावे हेतुत्वेनोच्यते ? नहि सम्बन्धावगमेऽन्योन्यमीक्षमाणत्वं प्रयोजकम्, येनेक्षणाभावेन सम्बन्धावगमाभावः साध्येत। तथा किमस्मिन् ग्रन्थे प्रतिपाद्यम् ? इति न ज्ञायते—किमत्र सम्बन्धावगमोऽस्ति, स कथमित्युच्यते ? किं वा सम्बन्धावगम एव न संभवतीति ? न तावत् प्रथमः कल्पः ; पूर्वग्रन्थे हि संवित्त्रयं क्रमवर्तित्वेनोक्तम्, तेनैवैकसंविद्भावोऽप्युक्तः, अतः "कथं संबन्धावगमः" इत्याक्षेपोऽनुपपन्नः। नापि द्वितीयः ; नहि सम्बन्धावगमाभावे पूर्ववादिनः किञ्चिद्विरुध्यते ; तेनापि संबन्धावगमाभावाङ्गीकारात्। नच पूर्ववादिन एवायं ग्रन्थः ; पूर्वग्रन्थे संवित्त्रयमित्युक्तम्, अत एव संबन्धावगमोऽपि कथमित्युत्तरग्रन्थानाञ्जस्यप्रसङ्गात्। नायं ग्रन्थः सिद्धान्तेऽप्युपयुज्यते ; "अहमि"त्यादिसंवित्त्रयमेतदित्युक्तम्, नच तन्निराकरणेन विना सिद्धान्तसिद्धिः। नापि तन्निराकरणहेतुरत्रास्ति ; तस्मादप्रयोजन इत्याशङ्क्यावतारयति—*क्रमवर्तित्वेऽन्यसंविदिति* ॥ "क्रमवर्तित्वे"इत्यनेन कटाक्षेणाप्यन्योन्यमनीक्षमाणेष्विति व्याख्यातम् ॥ "तद्भा-

तत्त्वदीपनम्

"कथं पुनरि"ति ग्रन्थः पूर्वपक्षिणः ? उत सिद्धान्तिनः ? नाद्यः ; पौनरुक्त्यापातात्, नान्त्यः ; सिद्धान्तिना ग्राह्य-ग्राहकताऽङ्गीकृतेर्दूषणासंभवात्, प्रश्नाननुसारित्वाच्चेत्यत आह—*सिद्धान्ती त्विति* ॥ तयोर्या ग्राह्य-ग्राहकताऽवभासः, स त्वन्मते कथं स्यादिति टीकायोजना। 'अहमिदं जानामी'ति ग्राह्य-ग्राहकताऽनुभवविरोधान्नाभेद इत्युक्ते, अनुभव एवासिद्धः; 'अहम्''इदम्' 'जानामी'त्याकारज्ञानत्रयाभ्युपगमादिति यदुक्तम्, तदनुपपन्नम्; युगपत् संवित्त्रयानुपपत्तेः। तस्मात् त्र्याकारमेकं ज्ञानमेष्टव्यमित्यत्राह—*विज्ञानवादी त्विति* ॥ *त्रयमिति* ॥ ग्रहीतृ-ग्रहणग्राह्यलक्षणमित्यर्थः। ज्ञानत्रितये संबन्धावगमोऽनुपपन्न इत्युक्तमयुक्तम् ; संबन्धावगमस्यैवासिद्धेरित्याशङ्क्य तात्पर्यमाह—*क्रमेति*॥ "त्रितयमि"त्यत्रान्योन्यसंसृष्टमिति शेषः। "तद्भासने"त्यादेः पूर्वग्रन्थशेषत्वम् ; संबन्धावगमाभाव-

पञ्चपादिका

माणेष्वयं सम्बन्धावगमः !!! *तद्वासनासमेतसमनन्तरप्रत्ययसमुत्थं सङ्कलनात्मकं प्रत्ययान्तरमेतत्; नेह

पञ्चपादिकाविवरणम्

युगपत्प्रत्यक्षमेवावभासते, ततः प्रत्यक्षविरुद्धः क्रम इत्याह सिद्धान्ती—*कथं पुनरस्तेष्विति* ॥ आह विज्ञानवादी—*तद्वासनासमेतसमनन्तरप्रत्ययसमुत्थमिति*॥ 'अहमि'त्यहंकल्पनोपारूढं कदाचिद् विज्ञानं भवति, अनन्तरं 'चेदमि'ति विषयविकल्पितं विज्ञानं भवति। ते एव विज्ञाने वासना; सजातीयज्ञानस्य पूर्ववृत्तसजातीयज्ञानमेव वासना, नान्यः संस्कार इत्युक्तम् ॥ तत्र वासनाद्वयसमेतात् 'जानामी'ति क्रियाविकल्पप्रत्ययात् कारणत्रितयानुरूपेण—'अहमिदं जानामी'ति विषय-क्रियाऽहंकल्पनाविकल्पितं त्र्याकारमेकं विज्ञानमुत्पद्यत इत्याह सिद्धान्ती—

ऋजुविवरणम्

सनासमेते''त्यत्र तच्छब्देन पूर्वग्रन्थे निर्दिष्टत्वात् सम्बन्धावगम एव प्रतीयते; तथा सति विज्ञानवादिमतविरोधः; सम्बन्धज्ञानाभावेन तत्संस्कारानभ्युपगमात्। नापि पूर्वग्रन्थोक्तसम्बन्धावगमस्योपपादनम्; ''समनन्तरप्रत्ययसमुत्थमित्य''नेन विरोधप्रसङ्गात्। विज्ञानवादिना हि तथाविधं ज्ञानमभ्युपगम्यते, न सिद्धान्तवादिना। अतो न ज्ञायते कस्यायं ग्रन्थ इति? तदर्थमवतारयति—*आह विज्ञानवादीति* ॥ ''तद्वासने''ति तच्छब्देन प्रकृतसम्बन्धज्ञाननिर्देशशङ्कां निराकर्तुम्। तथा भवत्वन्या वासना, तथाऽपि सा चासौ वासना चेति, तद्वासना; यद्वा—तस्य वासनेति, एकैव वासना स्यात्? व्युत्पत्तावेकवचनस्यौत्सर्गिकत्वात्, तथासति तत्सहितसमनन्तरप्रत्ययसमुत्थत्वेऽपि विज्ञानस्य यत्किञ्चिदाकारद्वयमेव स्यात्। पूर्वग्रन्थोक्तसकलनिर्देशेऽपि बह्वाकारता, नाभिमताकारत्रयसिद्धिः। कथं विज्ञानमात्रवादिनो वासनाऽपि सम्भवेत्? इत्याशङ्क्य तद् दर्शयति—*अहमित्यहंकल्पनोपारूढमिति*॥ *ननु*—ज्ञानस्य वासनात्वे नियामकाभावात् सर्वं पूर्ववृत्तज्ञानमुत्तरज्ञानं प्रति वासना स्यात्; ततश्चानन्ताकारं ज्ञानं स्यात्, इत्याशङ्क्याह—*सजातीयज्ञानस्येति* ॥ *ननु*—ज्ञानजन्योऽतिशयो वासना, तदन्या वा सदृशी वासनाऽङ्गीकार्या, नतु ज्ञानयोर्वासनात्वमित्याशङ्क्याह—*ज्ञानमेव वासना, नान्य इति*। *उक्तमिति* ॥ तद्दर्शनाभिप्रायेण। अथवा—''स्वेनैवास्यां ज्ञानसन्तताव''त्यत्रात्मख्यातिनिराकरणावसर उक्तम्, तदभिप्रायेण। ''किं पुनरेवमि''त्यनेन पूर्वग्रन्थोक्तेऽर्थे प्रश्नं कृत्वा ''क्षणविध्वंसिनः''इत्यनेन हेतूपवर्णनमित्येकग्रन्थत्वं प्रतिभाति; तथासति व्यधिकरणत्वम्, ''किं पुनरेवमि''त्यनेन सङ्कलनात्मकं ज्ञानमित्यनुभवानारूढं किमर्थं कल्प्यत इति पृष्टे, ''क्षणविध्वंसिनः''इत्यनेन क्षणिकस्य क्रियानिमित्तसम्बन्धेनावभासासंभवाद् ज्ञानार्थयोरभेदसाधनात् संकलनात्मकज्ञानकल्पनायां पृष्टकारणानिरूपणादित्याशङ्क्यावता-

तत्त्वदीपनम्

प्रतिपादनस्योभयत्राविशेषात्, ततश्च पौनरुक्त्यम्, इत्यत आह—*विज्ञानवादीति*॥ पूर्वत्र संविद्भेदोपगमे योऽयं संबन्धावगमः प्रसिद्धः, स न स्यादित्युक्तम्, अत्र तु तस्यासिद्धिरुच्यत इति नैकग्रन्थ्यमित्यर्थः ॥

''तद्वासने''त्यत्र तच्छब्देनानन्तरप्रस्तुतसंबन्धावगमनिर्देशशङ्का स्यात्, नच सोपपद्यते; तस्य विज्ञानवादिनाऽनभ्युपगमादित्यत आह—*अहमिति* ॥ 'अहमि'त्येवंरूपकल्पनासहितमित्यर्थः। *विषयविकल्पितमिति* ॥ विषयरूपकल्पनाविशेषितमित्यर्थः। तयोर्वासना तद्वासनेति विग्रहशङ्का स्यात्, नच सोपपद्यते; ज्ञानान्यवासनाऽनभ्युपगमात्, तत्राह—*ते एवेति* ॥ कर्मधारयसमास उपपत्तिमाह—*नान्य इति*॥ संस्काराश्रयस्य स्थायिनोऽभावात् पूर्वज्ञानमेव संस्कार इत्युक्तं बौद्धग्रन्थ इत्यर्थः। प्राङ् निष्पन्नस्य सकलज्ञानस्योत्तरज्ञानं प्रति वासनात्वमित्याशङ्क्येत, ततश्चोत्तरज्ञानस्यानन्ताकारता स्यात्, इत्यत आह—*सजातीयेति* ॥ विजातीययोर्वास्य-वासकताऽप्रसिद्धेरित्यर्थः। फलितमाह—*तत्रेति* ॥ क्रियाविकल्पप्रत्ययात् त्रितयाकारमेकं ज्ञानमुत्पद्यत इत्यन्वयः। आकारोत्पत्तौ हेतुमाह—*कारणेति*॥ ''किं पुनरि''त्यत्र संबन्धावगमस्यानुभवानारूढत्वाभिधानात् पूर्वग्रन्थशेषत्वशङ्का स्यात्, नचैवं संभवति; उत्तरत्र तन्निरसनाभावादित्यत आह—*आहेति* ॥ एवंशब्देन संकलनात्मकता परामृश्यते। प्रक्रियाया

पञ्चपादिका

सम्बन्धावगमः ? *किं पुनः* एवमनुभवानारूढमेव प्रक्रियां विरचयति भवान् !!! *क्षणविध्वंसिनः

पञ्चपादिकाविवरणम्

किं पुनरेवमिति ॥ नहि केवलम्—'अमहमि'ति च-'इदमि'ति वा 'जानामी'ति वा प्रत्यया दृष्टाः, किंतु प्रथमत एव प्रत्ययः—'अहमिदं जानामी'ति कर्तृ-कर्मानुभवात्मको दृष्टः। तस्माद् यथाप्रतिभासमेवा'हमि'ति विज्ञानाद् भिन्नमर्थक्रियासमर्थं नीलवस्त्वनुमन्तव्यमिति भावः। सत्यं नानुभवमाश्रित्य संवेदनादभिन्नं नीलं ब्रूमः, किन्तु विज्ञानेन नीलस्य प्रतिभासान्यथानुपपत्त्या। कथम् ? स्थायित्वे हि विज्ञान-विषययोः क्रियानिमित्ता-साधारणपरस्परसम्बन्धादसाधारणो विषयावभासः स्यात्, क्षणिकस्य त्वागन्तुकसम्बन्धाभावे यदि स्वाभाविकाभेद-सम्बन्धोऽपि न स्यात्, तत्र चैतन्येनासंसृष्टस्य प्रतिभास एव न स्यात्। अतः प्रतिभासानुपपत्तिरभेदं साधयतीति विज्ञानवादी वर्णयति—*क्षणविध्वंसिनः क्रियानुपपत्तेरिति* ॥

ऋजुविवरणम्

रयति—*सिद्धान्तीति*॥ *किंपुनरेवमिति*॥ किमिदमनुभवानारूढत्वम्—किमनुभवविरुद्धत्वम् ? किं वा न्यायमूलानुभवानारूढत्वम् ? नाद्यः ; अनुभवानारूढत्वेन प्रक्रियानिराकरणायोगात् ; न्यायमूलप्रक्रियाश्रयणस्यापि युक्तत्वात्। तथाहि—'अहमि'त्यादिसंवित्त्रयस्य यौगपद्याभावेनैकसंविद्विषयत्वायोगादेककालीनप्रतिभासस्य च संकलनात्मकत्वेऽप्युपपन्नत्वाद् न ज्ञानाद् भेदेनार्थसिद्धिरित्याशङ्क्याभिप्रायमाह—*नहि केवलमहमिति चेति*॥ "क्षणविध्वंसिनः क्रियानुपपत्तेरि"त्यनेन किमुच्यते ? न तावत् क्षणिकस्य क्रियानिमित्तसम्बन्धेनावभासासंभवात् क्षणिकत्वमेव नास्तीति विज्ञानवादिनोऽनिष्टापादनमनेन क्रियते ; असङ्गतत्वात्, अभेदनिराकरणस्य प्रस्तुतत्वात्। नापि क्षणिकत्वेन हेतुना विज्ञानवादिना क्रियानिमित्तसम्बन्धाभावेनाभेदः साध्यत इति तन्निराकरणमभेदनिराकरणार्थमेव क्रियत इति वक्तुं युक्तम् ; "यद्येवमि"ति भेदापादनग्रन्थोऽसमञ्जसः स्यात्। नापि विज्ञानवादिनोऽयं ग्रन्थः ; "क्षणविध्वंसिनः क्रियाऽनुपपत्तेरि"ति हेतुमात्रस्यैवोक्तत्वात्, साध्यनिर्देशाभावात्। अथ स्थायिन एव क्रियानिमित्तसम्बन्धादवभासः, इति स्थायिनः क्रियानिमित्तसम्बन्धेनावभासप्रदर्शनादर्थादत्र क्षणिकस्य क्रियानिमित्तसम्बन्धाभावादभेदेन भवितव्यमित्युच्यते, तन्न ; भेदग्राहकप्रमाणस्योक्तत्वात् तद्विरोधेनाभेदासिद्धेः, अभेदग्राहकप्रमाणानुपन्यासाच्च। तस्मादसम्बन्धः, इत्याशङ्क्य साभिप्रायमवतारयति—*सत्यं नानुभवमाश्रित्येति* ॥ *ननु*—प्रतिभासानुपपत्तिः सम्बन्धमात्रोपक्षीणा कथमभेदसाधिकेति पृच्छति—*कथमिति* ॥ "यद्येवमि"त्यनेन भेदापादनम्, "स च विद्यते न वे"ति विकल्पश्च व्यर्थः ; भेदस्य विज्ञानवादिनाऽप्यङ्गीकृतत्वात्, प्रतिभासानुपपत्त्या भेदेन भवितव्यमिति चोदिते, संविद्भेदापादनस्य तद्गत-

तत्त्वदीपनम्

अनुभवानारूढत्वमभिनयति—*न हीति* ॥ न केवलमेकाकारप्रत्ययादर्शनम्, प्रत्युत त्र्यात्मकं ज्ञानमुदेतीत्याह—*किंत्विति* ॥ कर्ता च कर्म चानुभवश्चेति कर्तृ-कर्मानुभवाः, त एवात्मा, आकारो यस्य ; स तथोक्तः। फलितमाह—*तस्मादिति* ॥ अनुभवानारूढप्रक्रियेति प्रतिज्ञाय तत्र हेतुरुपन्यस्यते—"क्षणविध्वंसिनः" इत्यादिना ग्रन्थेनेति वक्तुं न शक्यते ; तस्यानुभवानारूढत्वासाधकत्वात्। नच पूर्वपक्षिणोऽयं ग्रन्थः ; क्रियानिमित्तसंबन्धनिरासस्य क्षणिकत्वस्य च प्रस्तुतानुपयोगित्वादित्याशङ्क्य पूर्वपक्षत्वेन व्याचष्टे—*सत्यमिति* ॥ अङ्गीकृतमंशमाह—*नानुभवमिति* ॥ प्रतिभासानुपपत्तिः प्रतिभास्यमात्रमाक्षिपति, नाभेदमिति शङ्कते—*कथमिति* ॥ तत्र वक्तव्यम्—किं स्थायिनोः प्रतिभास्य-प्रतिभासकभावः ? उत क्षणिकयोः ? इति विकल्प्याद्यं प्रत्याह—*स्थायित्व इति* ॥ क्रियाशब्देनान्तर-बाह्येन्द्रियव्यापारोऽभिधीयते। स्थायित्वे विषयावभासः स्यादिति वदता काक्वा स्थायित्वाभावो निर्दिष्टः, तत्र हेतुस्तूत्तरत्र वक्ष्यमाणो द्रष्टव्यः। द्वितीयं प्रत्याह—*क्षणिकस्येति* ॥ क्रियानिमित्तो ह्यसाधारणसंबन्धः। क्रिया च क्षणिकपक्षेऽनुपपन्नेत्यर्थः। संबन्धिनः प्रतिभास इति सामान्यव्याप्तिः, क्रियानिमित्तः संबन्ध इति विशेषव्याप्तिः ; ततः क्रियानिमित्तसंबन्धरूपविशेषस्य क्षणिकत्वेऽसंभवादभेदसंबन्ध आस्थेय इति समुदायार्थः ॥

पञ्चपादिका

क्रियानुपपत्तेः ; स्थायित्वे हि सत्यहमुल्लेख्यस्य स्थायिनैव नीलादिना क्रियानिमित्तः सम्बन्धः, ततश्च क्रियानिमित्तैव नीलादेरप्यपरोक्षता स्यात्, नच स्थायित्वमस्ति, *यद्येवम्*, 'अहमि'ति संविदः प्रतिक्षणं स्वलक्षणभेदेन भाव्यम्, स किं विद्यते ? न वा ? इति स्वसंविदमगूहमानैरेवाभिधीयताम् !! *अथ*

पञ्चपादिकाविवरणम्

तत्र प्रत्यक्षेण विज्ञानानां क्षणिकत्वमुच्यते ? किं वाऽनुमानेन ? *ननु*––प्रत्यक्षेण ; तथाहि—वर्तमानावभासि ज्ञानं स्वात्मनोऽवर्तमानाद् व्यावृत्तिमपि गमयति, नीलज्ञानमिवानीलव्यावृत्तं नीलम् ; अतो वर्तमानक्षणमात्रं विज्ञानं प्रत्यक्षमिति । न तावत् प्रत्यक्षेण विज्ञानभेदावभास इत्याह—*यद्येवमहमिति संविद इति* ॥

ननु—सत्यपि भेदावभासेऽतिसादृश्यान्न स्पष्टमवभासत इति शङ्कते—*अथात्यन्तसादृश्यादिति* ॥ कोऽयमभिप्रायः ? यदि तावत् संविदोऽन्यो भेदो ज्ञानान्तरगम्यश्च सादृश्यदोषात् स्पष्टं नावभासत इत्यभिप्रायः,

ऋजुविवरणम्

विकल्पस्य चासंगतत्वाच्चेत्याशङ्क्य, पूर्वग्रन्थे हि प्रतिभासानुपपत्तिरभेदसाधिकेत्युक्तम्, तच्चैवम्—प्रतिभासो हि सम्बन्धिन इति सामान्यव्याप्तेः क्रियानिमित्तसंबन्धस्य व्यापकविशेषस्य क्षणिकत्वेनासंभवादभेदसिद्धिरिति । तत्र व्यापकविशेषाभावसाधकस्य क्षणिकत्वस्य निराकरणेनार्थापत्तिः "सामग्र्यभावेन नाभेदसाधिके"त्यनेन ग्रन्थेन प्रतिपाद्यत इति तात्पर्यं मनसि निधाय विकल्प्यावतारयति—*तत्र प्रत्यक्षेण विज्ञानानामिति* ॥ तत्रानुमानं स्वयमेवोपन्यस्य निराकरिष्यति—"अथान्ते"त्यादिना । प्रत्यक्षस्य त्वनुपन्यस्तस्यैव निराकरणे तुच्छत्वशङ्का स्यात् ; अज्ञातस्य निराकरणं च न संभवतीति, तन्निवृत्त्यर्थमाह—*ननु प्रत्यक्षेणेति* ॥ "अथात्यन्तसादृश्यादि"त्यनेन भेदो नावभासत इति कथमाशङ्कितम् ? पूर्वापरविरोधप्रसङ्गात्, पूर्वग्रन्थे प्रत्यक्षत्वेन तन्मतस्य प्रक्रान्तत्वात्, इदानीं तद्विरोधेन "नावभासते" इति शङ्कितुमशक्यत्वात्, इत्याशङ्क्यावतारयति—*ननु सत्यपि भेदावभास इति*॥ "संविदोऽपि चेदि"त्यनेन स्वरूपानवभासेऽन्धत्वमुक्तम्, तदप्रस्तुतम् ; पूर्वग्रन्थे हि स्वरूपावभासमङ्गीकृत्य स्पष्टं भेदो नावभासत इति चोदितत्वात्, अनेन ग्रन्थेन स्वरूपानवभासमात्रमनूद्यान्ध्यस्योक्तत्वात्, इत्याशङ्क्य चोद्याभिप्रायमाविष्करोति—*कोऽयमभिप्राय इति*॥ "संविदोऽपि चेत् स्वरूपमि"ति विशेषणोपादानाद् अर्थाद् धर्मपक्षोऽपि चोद्यविषय इति द्योतितम्, अथवा चोद्ये न भेदोऽवभासत इति भेदग्रहणम्, परिहारे च स्वरूपग्रहणं कुर्वन् पक्षद्वयमसूसुचत् । तत्राभिप्रायिकदूषणं पक्षमादौ दर्शयति—*यदि तावत्संविदोऽन्य इति* ॥ धर्मपक्षे स्वरूपातिरेकादवभासकभेदोऽप्यर्थादुक्त एवेति सोऽपि दर्शितः—*ज्ञानान्तरगम्यश्चेति* ॥ तथा स्वरूपपक्षेऽशेषस्य जगत आन्ध्यमिति वदतेतरस्मिन् पक्षे कस्यचिदान्ध्यं द्योतितम्, तद् दर्शयति—

तत्त्वदीपनम्

संविदां प्रतिक्षणं भेदस्याननुभूयमानत्वान्न क्षणिकमिति कथमुच्यते ? आनुमानिकभेदसंभवादित्याशङ्क्य, विकल्पोत्तरत्वेन व्याख्यातुं विकल्पयति—*तत्रेति*॥ व्यापकविशेषाभावस्य क्षणिकत्वायत्तत्वात्, तन्निराकरणे व्यापकविशेषाभावो न सिद्ध्यतीत्याशयेन क्षणिकत्वविकल्प इति द्रष्टव्यम् । क्षणिकत्वस्याप्रत्यक्षत्वाद्विकल्पासंभव इत्याशङ्क्य प्रत्यक्षत्वं समर्थयते—*नन्विति* ॥ नीलाकारज्ञानस्य नीलाभावव्यवच्छेदेन तदविनाभूतपीतादिव्यवच्छेदकत्ववद् वर्तमानमात्राकारज्ञानस्यावर्तमानताव्यावृत्तिगमकत्वात् क्षणिकत्वस्य प्रत्यक्षत्वमित्यर्थः ॥

क्षणिकत्वस्य प्रत्यक्षतामुपपाद्य, तन्निराकरणपरत्वेन टीकामवतारयति—*न तावदिति* ॥ भेदस्य प्रत्यक्षत्वाभ्युपगमान्न भासत इति कथम् ? इत्याशङ्क्य, विद्यमानस्यापि भेदस्य ज्वालाभेदवदनुपलम्भ इति शङ्कते—*नन्विति*॥ भेदाप्रतिभासे चोदिते, संवित्स्वरूपानवभासनाद् जगदान्ध्यप्रसञ्जनमनवसरपराहतमित्याशङ्क्याह—*कोऽयमभिप्राय इति*॥ किं भेदः संविदतिरिक्तो ज्ञानान्तरगम्यश्च ? उत स्वरूपम् तज्ज्ञानमेव तज्ज्ञानमिति ? किंशब्दार्थः । आद्यमनुवदति—*यदि तावदिति*॥ ज्ञानान्तरं किं भेदमात्रं गृह्णाति ? उत धर्म्यादिविशेषितम् ? इति विकल्प्याद्ये कल्पे संविद्भेदो न सिद्ध्यतीत्याह—*तदेति* ॥ तदा तयोर्न भेदग्रहः स्यादिति संबन्धः । द्वितीयं दूषयति—*धर्मि-प्रतियोगीति* ॥

पञ्चपादिका

अत्यन्तसादृश्याद् न भेदोऽवभासत इति, *संविदोऽपि* चेत् स्वरूपं नावभासते, आयातमान्ध्यमशेषस्य जगतः !!! *अपिच* तद्रूपप्रतिभासे सादृश्यकल्पना प्रमाणविरुद्धा, निष्प्रमाणिका च !!!*

तद्रूपप्रतीतेर्व्यामोहत्वान्न प्रमाणविरुद्धता, नाप्यप्रामाणिकता ; निर्बीजभ्रान्त्ययोगादिति चेत्, *न* ;

पञ्चपादिकाविवरणम्

तदा धर्मि-प्रतियोगिसंविदोः संविदन्तराविषयत्वाद् न तयोर्भेदग्रहणं स्यात्, विषयत्वे वा धर्मि-प्रतियोगि-भेदाख्य-त्रितयमपि भेदसंवेदने कल्पितं तदभिन्नं वा स्यात्, अथ संवित्स्वरूपमेव भेदः ; संवेदनमेव तज्ज्ञानमिति, तत्राह—*संविदोऽपि चेदिति* ॥ *अपिच* ऐक्यप्रतिभासे सादृश्यकल्पनं प्रमाणविरुद्धम्, भिन्नयोरैक्यभ्रमश्च सादृश्यकल्पनायां प्रमाणम्, तदभावाच्च न सादृश्यसिद्धिरित्याह—*अपिच तद्रूपप्रतिभास इति* ॥ *ननु*

ऋजुविवरणम्

तदा धर्मि-प्रतियोगीति ॥ तथा “आन्ध्यमि”ति विशेषणसामर्थ्यादितरस्मिन् पक्षे स्वरूपानवभास एव प्रदर्शितः ; आन्ध्यशब्दस्य विद्यमानपदार्थानवभासवाचित्वात्, इतरत्र तद्वैपरीत्येनाभासवत्त्वमेव द्योतितम्, तद् दर्शयति—*विषयत्वे वा धर्मीति*॥ *“अपिच तद्रूपावभासे” इत्यत्र तच्छब्देन संवेदनं परामृश्यत इति प्रतीतिः स्यात् ; पूर्वग्रन्थे प्रकृतत्वात्, तथा सति प्रतिभासमानत्वस्य सादृश्यकल्पनोपयोगित्वात्, अप्रतीयमाने सादृश्यकल्पनाभावात् कथं प्रमाणविरुद्धत्व-मुक्तम् ? तथा तद्रूपप्रतिभास एव निष्प्रमाणकत्वे हेतुत्वेनोक्तः, सोऽपि कथम्? नहि “स्वरूपं नावभासते” इति सादृश्य-कल्पनायां निष्प्रमाणकत्वमुच्यते, इत्याशङ्क्यावतारयति—*अपि चैक्यप्रतिभास इति* ॥ *ननु*—प्रतीते वस्तु-स्वरूपे भेदानवभासो दृष्टो ज्वालादौ, तथा “अपी”ति शङ्कानिवर्तकत्वे संभवति न युक्त्यन्तरत्वेनावतारणं युक्तम्, “अपि चे”ति चायुक्तम् ; सादृश्यनिरासे पूर्वं युक्त्यन्तरानभिधानात्, *मैवम्* ; स्पष्टत्वात्, शङ्काया अर्थान्निरस्तत्वाच्च । पूर्वं स्वरूपत्वाद् भेदानवभासो निरस्तः, इदानीं सादृश्याभावेनापि स निरस्यत इति “अपिचे”त्युक्तम् । “तद्रूपप्रतीतेरि”त्य-नेन किमुच्यत इति न ज्ञायते । न तावदैक्यावभासस्य प्रमाणविरुद्धत्वमप्रमाणत्वं चाशङ्क्य निराक्रियते ; नहि—“तद्रूप-प्रतीतेरि”ति सादृश्यं निर्दिश्य तत्प्रतीतेर्व्यामोहत्वादैक्यावभासस्य न प्रमाणविरुद्धता, तस्यैव चाप्रमाणकत्वमपि नास्ति ; भ्रान्तित्वे कारणाभावादिति—शक्यं वक्तुम् ; उत्तरग्रन्थानाञ्जस्यात्, “स्यादेतदि”त्यनेन पौनरुक्त्याच्च । नापि पूर्वोक्तं सादृश्यपक्षे दूषणमनेन परिह्रियते । “तद्रूपप्रतीतेरि”त्यनेन कथञ्चिदैक्यं निर्दिश्येत ; तत्र प्रयुक्तशब्दत्वात्, सन्निहितत्वाच्चैक्यस्य ; तथापि नाप्रमाणकत्वं परिहर्तुं शक्यते ; निर्बीजभ्रान्त्ययोगात्, अस्याः सादृश्यासाधकत्वात् । भ्रान्तिर्हि कारणेन विनाऽनुपपन्ना कारणं कल्पयति । नैतावता सादृश्यसिद्धिः ; भ्रान्तेस्सादृश्येन जन्यताया नियमा-

तत्त्वदीपनम्

तस्मिन् कल्पितो यथा घट इत्यर्थः । धर्म्यादीनां संविदभिन्नत्वं वा स्यात्, विषय-विषयिणोरभेदाङ्गीकारादित्याह—*तदभिन्नं वेति* ॥ द्वितीयमनुवदति—*अथेति* ॥ संविद्भेदबोधयोरेकत्वाद् भेदानवबोधे बोधानवबोधाद् जगदा-न्ध्यापात इत्याह—*तत्राहेति* ॥ सादृश्याङ्गीकारेण दूषणमुक्त्वा तस्याप्यसिद्धिरुच्यते—*अपिचेत्यनेन ग्रन्थेन* ॥ तत्र तच्छब्देन प्रस्तुतसंवित्स्वरूपाभिधानाद् न तद्विरुद्धत्वं सादृश्यस्य, अप्रामाणिकत्वं चासिद्धमित्याशङ्क्याह—*अपि चेति* ॥ असिद्धिं परिहरति—*भिन्नयोरिति* ॥

“तद्रूपप्रतीतेरि”त्यत्र तच्छब्देन प्रस्तुतसादृश्याभिधानशङ्का स्यात्, तथा चापसिद्धान्तः ; तत्रैक्यप्रतिभास-स्योक्तत्वात्, तस्य तच्छब्देनाभिधानेऽपि सादृश्यस्याप्रामाणिकत्वम् ; भ्रान्तेः सादृश्यव्याप्त्यभावादित्याशङ्क्या-भिप्रायं दर्शयति—*नन्वैक्येति* ॥ ऐक्यप्रतिभासविरोधस्याभिधानात्तस्य तच्छब्देनाभिधानमित्यर्थः । भ्रान्ति-मात्रस्य सादृश्यव्याप्त्यभावेऽपि तद्विशेषस्य व्याप्तिरस्तीत्याह—*ऐक्येति* ॥ भिन्नयोरैक्यभ्रमो भेदतिरोधानमन्तरेण

पञ्चपादिका

इतरेतराश्रयत्वात् सिद्धे व्यामोहे सादृश्यसिद्धिः ; प्रमाणविरोधाभावात्, प्रमाणसद्भावाच्च, सिद्धे च सादृश्ये तन्निमित्ता व्यामोहसिद्धिः ॥

स्यादेतत्—अव्यामोहेऽपि तुल्यमेतत्—सिद्धे हि सादृश्यकल्पनाया अप्रामाणिकत्वे प्रमाणविरोधे च तद्रूपप्रतीतेरव्यामोहत्वम्, अव्यामोहत्वे चास्याः सादृश्यकल्पनाया निष्प्रमाणकत्वं प्रमाणविरोधश्च, *नैतत्* ; स्वारसिकं हि प्रामाण्यं प्रतीतेरनपेक्षम् । तथाच तत्प्रामाण्यात् सादृश्य-

पञ्चपादिकाविवरणम्

ऐक्यावभासस्य व्यामोहत्वाच्च सादृश्यकल्पना प्रमाणविरुद्धा, ऐक्यभ्रमश्च भिन्नेषु सादृश्यमन्तरेणानुपपन्न इत्यर्थापत्तिमूला च सादृश्यकल्पना ; अतः सिद्धं सादृश्यमित्याह पूर्ववादी—*तद्रूपप्रतीतेर्व्यामोहत्वादिति* ॥ मैवम् ; ऐक्यभ्रम सादृश्यसिद्ध्योरितिरेतराश्रयत्वादिति परिहरति—*नेतरेतराश्रयत्वादिति* ॥ *ननु* ऐक्यावभासस्य** प्रामाण्यं न स्वतः सिद्ध्यति, किन्तु सादृश्यस्य निर्मूलत्व-प्रमाणविरुद्धत्वापेक्षया ; सादृश्यस्य च निर्मूलत्व प्रमाणविरुद्धत्वमैक्यप्रतिभासस्य प्रामाण्यापेक्षयेति तुल्यं तवापीतरेतराश्रयत्वमिति चोदयति—*स्यादेतत् ; अव्यामोहेऽपीति* ॥ *ऐक्यावभासो न सादृश्याभावापेक्षः, किन्तु स्वत एव प्रमाणमिति परिहरति—*

ऋजुविवरणम्

भावात्। तस्मादनवधृतार्थो ग्रन्थ इत्याशङ्क्यावतारयति—*नन्वैक्यावभासस्येति* ॥ "तद्रूपप्रतीतेरि"ति व्याख्यातम् । "न प्रमाणविरुद्धते"त्यत्र कस्येति विशेषस्यानुपादानात् स्पष्टयति—*सादृश्यकल्पनेति* ॥ "निर्बीजभ्रान्त्ययोगादि"त्यस्य व्याख्या—*ऐक्यभ्रमश्च भिन्नेष्विति* ॥ सिद्धे व्यामोहे सादृश्यसिद्धिरित्युक्तम्, तत्र कस्य व्यामोह इति न ज्ञायते ; व्यामोहमात्रस्य सादृश्यहेतुत्वाभावाद् नान्योन्याश्रयत्वम् ; तदर्थं विविच्यावतारयति—*मैवमैक्यभ्रम-सादृश्यसिद्ध्योरिति* ॥ "स्यादेतदि"त्यनेन सिद्धान्तपक्षेऽपीतरेतराश्रयसाम्यमुक्तम् ; ऐक्यावभासप्रामाण्यस्यान्यानपेक्षित्वादित्याशङ्क्यावतारयति—*नन्वैक्यावभासस्येति* ॥ परतः प्रामाण्यादिति भावः । "नैतत्स्वारसिकमि"त्यनेनाविशेषेण प्रामाण्यकीर्तनं न युक्तम् ; सादृश्येऽपि प्रसङ्गादित्याशङ्क्यावतारयति—*ऐक्यावभास इति* ॥ "अप्रामाण्यपूर्विके"त्युक्तम्, तदनुपपन्नम् ; न ह्यप्रामाण्यं सादृश्येन विनाऽनुपपन्नम, तथा

तत्त्वदीपनम्

धर्मि-प्रतियोगिप्रतिपत्तिमन्तरेण तद्विशेषितभेदः प्रतिपत्तुं न शक्यः । नच धर्मि-प्रतियोगिनोः प्रतिपत्तिः ; स्वप्रकाशत्वेन संविदन्तरागोचरत्वादित्यर्थः । विपक्षे बाधकमाह—*विषयत्व इति* ॥ विमतम्, भेदसंवदने कल्पितम्, तद्विषयत्वात्, न संभवति, तिरोधानं च न सादृश्यं विना, इति तत्सिद्धिरित्यर्थः । "इतरेतराश्रयत्वादि"त्यत्रापेक्षितं पूरयन्नाह—*मैवमिति* ॥ व्यामोहपक्षोक्तेतरेतराश्रयत्वस्याव्यामोहत्वपक्षेऽपि साम्यमुक्तम्—*स्यादेतदित्यत्र*, तदनुपपन्नम् ; ऐक्यप्रतिभासस्य स्वतः प्रामाण्यादित्याशङ्क्याह—*नन्वैक्येति* ॥ ज्वालैक्यप्रतिभासस्यापि स्वतस्त्वापातादित्यर्थः । किं प्रयुक्तं तर्हि प्रामाण्यम् ? इति पृच्छति—*किंत्विति* ॥ सादृश्यस्याविरुद्धत्व-समूलत्वसिद्धावैक्यप्रतिभासस्य प्रामाण्यासिद्धेस्तत् तन्निर्मूलत्वाद्यायत्तम्, तन्निर्मूलत्वादि चैक्यस्य प्रामाणिकत्वायत्तमितीतरेतराश्रयत्वमित्यर्थः ॥

"नैतदि"त्यत्र प्रतीतेः प्रामाण्यमनपेक्ष्यमित्युक्तमयुक्तम् ; हेतावपेक्षासद्भावादित्याशङ्क्य, विज्ञानसामग्र्यतिरिक्तहेत्वपेक्षा निरस्यत इत्याह—*ऐक्येति* ॥ विज्ञानप्रयोजकप्रयोज्यत्वे संभवत्यतिरिक्तापेक्षायां गौरवं स्यादित्यर्थः । नच ज्वालैक्यप्रतिभासस्यापि स्वतस्त्वप्रसङ्गः शङ्क्यः ; ज्वालाभेदग्राहिप्रमाणविरोधेन स्वतःप्रामाण्यानुपपत्तेरित्यर्थः । प्रतीतेः प्रामाण्यं स्वारसिकं यस्मात्, अतोऽनपेक्षमिति टीकायोजना । सादृश्यकल्पनाया अपि स्वतस्त्वसंभवान्नास्स-

---

** ऐक्यप्रतिभासस्येति पाठान्तरम् ।

पञ्चपादिका

कल्पना निष्प्रामाणिकी प्रमाणविरुद्धा च, न तु सादृश्यकल्पना स्वतःसिद्धा, येन प्रामाण्यमावहेत्, अप्रामाण्यपूर्विकैव सा ।

पञ्चपादिकाविवरणम्

नैतत्स्वारसिकमिति ॥ *ननु* सादृश्यमपि स्वत एव सिद्धमित्याशङ्क्याह—*न तु सादृश्यकल्पना स्वत इति* ॥ कुतस्तर्हि सादृश्यसिद्धिरिति ? अत आह—*अप्रामाण्यपूर्विकेति* ॥ ऐक्यभ्रमो हि भिन्नेषु सादृश्यं कल्पयतीति भावः ॥

ननु—केयं प्रत्यभिज्ञा नाम ? यत्सामर्थ्यबलात् संविदैक्यं प्रतीयते, *पूर्वानुभवसंस्कारसहितादिदानीं-

ऋजुविवरणम्

"अप्रामाण्यपूर्विके"ति न ज्ञायते, नात्र प्रमाणेन कस्यचित् सिद्धिः, तदर्थमभिप्रायमाह—*ऐक्यभ्रमो हीति* ॥ *ननु *केयं प्रत्यभिज्ञेति* । अयं भावः—वर्तमानस्वरूपग्राहिज्ञानव्यतिरेकेण प्रत्यभिज्ञा नामैक्यसाधिका प्रत्यक्षरूपा निरूपयितुं न शक्यते; अक्षाणां भूतकालविशिष्टे रूपेऽसामर्थ्यादिति । तत्र ज्ञानं 'प्रत्यभिज्ञे'त्युक्ते सर्वज्ञानानां प्रत्यभिज्ञात्वं स्यात्, तन्निवृत्त्यर्थमाह—*प्रत्यक्षज्ञानमिति* ॥ "प्रत्यक्षज्ञानमि"त्युक्तेऽभिज्ञायामतिप्रसङ्गः स्यात्, तदर्थमाह—*एकस्य कालद्वयसम्बन्धविषयमिति* ॥ *ननु*—प्रत्यभिज्ञयाऽपि न स्थायित्वं सिद्ध्यति; ज्वाला-प्रत्यभिज्ञादावेतादृशज्ञानेऽपि स्थायित्वादर्शनात्, इत्याशङ्क्याह—*पूर्वानुभवेति* ॥ साहश्यस्य तत्र प्राधान्येन कारणत्वमित्यर्थः । यद्वा—भ्रान्तिसंस्कारसहितप्रमाणकारणजनितेन स्थायित्वसिद्धिर्नास्ति भ्रान्तरजतानुभावानन्तरं सम्यग् रजतानुभवे सत्युत्पद्यमानप्रत्यभिज्ञानादौ, तदर्थं विशिनष्टि—*पूर्वानुभवसंस्कारसहितादिति* ॥ अनु-भवसंस्कारसहितकारणजनितज्ञानेऽपि स्थायित्वसिद्धिर्नास्ति, केशस्वप्नादिप्रत्यभिज्ञादावतिव्याप्तिश्च लक्षणस्य, तदर्थ-माह—*प्रमितिकारणादिति* ॥ अथवा—कथमेकस्य कालद्वयसम्बन्धविषयं प्रत्यभिज्ञानमुत्पद्यते ? वर्तमानमात्र-ग्राहित्वेनेन्द्रियाणामेतादृशज्ञानजननासामर्थ्यात्, संस्कारस्य चानुभूतवस्तुमात्रविषयत्वादित्याशङ्क्याह—*पूर्वानुभव-संस्कारेत्यादिना* ॥ अस्मिन् पक्षे—"अनुभवप्रमितिकारणादि"ति विशेषणाभ्यामुभयविधप्रत्यभिज्ञावैषम्यम् । 'पूर्वानु-भवसंस्कारसहितादिदानीन्तनवस्तुप्रमितिकारणाद् जातं प्रत्यक्षज्ञानं प्रत्यभिज्ञे'त्युक्ते सविकल्पज्ञाने व्यभिचारः; तदर्थ-

तत्त्वदीपनम्

न्मतेऽपीतरेतराश्रयत्वमित्याह—*ननु साहश्यमिति* ॥ *स्वत एवेति* ॥ ऐक्यप्रतिभासस्य व्यामोहत्वापेक्षां विनेत्यर्थः । सादृश्यकल्पनायाः स्वाभाविकत्व एकक्षणवर्तिन्येकस्मिन् भावेऽपि यदैक्यप्रतिभानम्,तदाऽपि सादृश्यनिमित्तं स्यादिति परिहाराभिप्रायः । "गोसदृशो गवयः" इत्यादावैक्यभ्रममन्तरेणापि सादृश्यसिद्धेर्न तदपेक्षं सादृश्यमिति शङ्कते—*कुत इति*॥ गो-गवययोरैक्यस्याप्रतीयमानत्वान्नैतद्भ्रान्तित्वापेक्षं साहश्यम्, अत्र चैक्यप्रतिभासात् तद्भ्रान्ति विना न सादृश्यमित्याशयवानाह—*अत आहेति* ॥ "अप्रामाण्यपूर्विके"त्यत्र कस्याप्रामाण्यमिति वीक्षायामाह—*ऐक्येति* ॥ प्रत्यभिज्ञाप्रत्यक्षविरोधात्सादृश्यासिद्धौ न त्वेतन्निमित्तं भेदाभानमित्युक्ते प्रत्यभिज्ञासंगतिमाशङ्कते—*ननु केयमिति* ॥ प्रत्यभिज्ञानिरूपणस्य प्रकृतसंगतिमाह—*यत्सामर्थ्येति* ॥ किं पूर्वानुभवसंस्कारात् प्रत्यभिज्ञोत्पद्यते ? उताक्षसंयोगात्? अथवोभाभ्याम् ? नाद्यः; संस्कारस्यानुभूतमात्रग्राहित्वात्, एतद्देशादिवैशिष्ट्यग्राहित्वायोगात् । न द्वितीयः; अक्षस्य वर्तमानग्राहित्वेन तद्देशादिवैशिष्ट्यग्राहित्वासंभवात्, तृतीये सामग्रीद्वयप्रसूतत्वात्प्रत्यभिज्ञाया अनुभवत्वं स्मरणत्वं च स्यात् । तथाच तदेतद्देश-कालविशिष्टैक्यलक्षणविषयासंभवात् परोक्षत्वेनापरोक्षत्वेन च ज्ञानस्व-रूपानिरूपणात् तत्प्रत्यभिज्ञाप्रामाण्यमसंभवीत्यर्थः । तत्र कारणस्य दुर्निरूपत्वं तावदसिद्धमित्याह—*पूर्वेति* ॥ पूर्वानुभवसंस्कारसहितेदानीन्तनप्रमितिकारणं प्रत्यभिज्ञासामग्रीत्यर्थः । यत्तूक्तं प्रत्यभिज्ञायाः स्मृतित्वमनुभूतित्वं च स्यादिति, तत्रेदमभिधीयते—संस्कारमात्रजन्यत्वं स्मृतित्वव्यापकम्, तद् व्यावर्तमानं स्मृतित्वमप्यादाय व्यावर्तयति । नच—अनुभवत्वे तद्देशादिवैशिष्ट्यग्राहित्वं न स्यादिति—शङ्क्यम्; संस्कारसहकृतेन्द्रियस्य तत्ताग्राहित्वोपपत्तेरिति

पञ्चपादिकाविवरणम्

ततनवस्तुप्रमितिकारणाज्जातमेकस्य कालद्वयसम्बन्धविषयकं प्रत्यक्षज्ञानं प्रत्यभिज्ञेति चेत्, न तर्ह्यात्मनि सा सम्भवति। कथम्? विज्ञानस्वभावस्य ह्यात्मनः स्थायित्वे, स्वयंप्रकाशस्य ज्ञानान्तरागम्यत्वात् तद्विनाश-संस्काराभावात्, स्वरूपस्य चाविनाशात्, अविनाशिनः संस्काराभावात्, स्वयंप्रकाशस्येदानींतनस्वरूपव्यतिरिक्त-प्रमाणकारणाभावाच्च न प्रत्यभिज्ञाकारणं तावदात्मनि सम्भवति। नच स्वरूपज्ञानमेव प्रत्यभिज्ञा ; तस्य प्रदीप-प्रभावद् वर्तमानप्रकाशिनः पूर्वापरपरामर्शात्मकताऽयोगात् ; 'सोऽहमि'ति च विषयाकाराभ्युपगमे 'सः' इत्य'हमि'ति चाकारभेदेन विषयभेदाज्ज्ञानभेदसिद्धेः। तस्मान्नात्मनि प्रत्यभिज्ञा, इति युक्त्या व्यामोहत्वसिद्धिः—*इति* ॥

अत्रोच्यते—अन्तःकरणविशिष्टे तावदात्मनि प्रत्यभिज्ञानं ब्रूमः, न निष्कलङ्कात्मस्वरूपमात्रे ; तस्य

ऋजुविवरणम्

माह—*एकस्य कालद्वयसम्बन्धविषयकमिति* ॥ मा भूदात्मनः स्थायित्वे जन्यज्ञानं प्रत्यभिज्ञारूपम्, स्वरूपचैतन्यमेव प्रत्यभिज्ञेत्याशङ्क्याह—*नच स्वरूपज्ञानमेवेति* ॥ *ननु*—वर्तमानप्रकाशिनोऽपि चैतन्याद् वर्तमानकालापगमे तद्विशिष्टरूपापगमात् तद्विनाशात् संस्कार उत्पद्यते ; तत्संस्कारसहितचैतन्यस्य पूर्वापरकालसम्बन्धिस्वरूपावभासकत्वं भविष्यति। अथवा—'सोऽहमि'ति प्रत्यभिज्ञा तावदस्ति, तथाच सति स्थितस्य कार्यस्य यथासंभवं कारणं कल्पनीयम्, स्थायित्वं च तथैव सिद्ध्यतीत्याशङ्क्य, तत्र विषयाकारोऽभ्युपगम्यते वा? न वा? इति विकल्प्य, विषयत्वा-भ्युपगमे दूषणमाह—*सोऽहमिति च विषयेति च* ॥ इतरस्मिंश्च पक्षे ज्ञानव्यतिरेकेण विषयाकाराभावे तया स्थायित्वसिद्धिः शङ्कितुमप्यशक्येति सुपरिहरत्वाद् नोक्तं दूषणम्। प्रत्यभिज्ञास्वरूपमेव यदा नास्ति, तदा तन्मूलकारणकल्पना दूरनिरस्तेत्याह—*तस्मान्नात्मनि प्रत्यभिज्ञेति* ॥ इदानीमस्य प्रत्यभिज्ञानिराकरणस्य प्रकृतो-पयोगं दर्शयति—*इति युक्त्या व्यामोहत्वसिद्धिरिति* ॥ एवंच सादृश्यकल्पनायां प्रमाणविरुद्धत्वं निष्प्रमाणकत्वं च नास्तीति भावः। *अन्तःकरणविशिष्टे तावदिति* ॥ व्यवहारोपयोगिनः स्थायित्वं वक्तव्यम्, तच्च विशिष्टस्यैव, तेनैव च पूर्वोक्ताविषयत्वं परिहृतम्। विशिष्टविषयत्वकथनस्य पूर्वोक्तसर्वदूषणपरिहारोपयोगित्वात् तदेवादौ क्रियत इति तावत्पदस्यार्थः। तर्हि शुद्धस्य नित्यत्वं न स्यादित्याशङ्क्याह—*तस्येति* ॥ "मोक्षावस्थायिनः" इति शास्त्रैकसमधिगम्यत्वे हेतुः। मोक्षेऽवस्थातुं शक्तिर्यस्य स्वरूपमात्रस्य, तत्स्वरूपमात्रं मोक्षावस्थायि ; तस्य मोक्षावस्थायिन इति विग्रहः। "मोक्षावस्थायिनः" इति व्यवहारानुपयोगित्वं दर्शयति। *ननु* आत्मनि

तत्त्वदीपनम्

द्रष्टव्यम्। विषयासंभवं निरस्यति—*एकस्येति* ॥ तदेतद्देश-कालोपलक्षितस्वरूपं प्रत्यभिज्ञाविषय इत्यर्थः। प्रत्यभिज्ञा-स्वरूपमाह—*प्रत्यक्षेति* ॥ उक्तां प्रत्यभिज्ञामनात्मन्यभ्युपेत्यात्मनि सा नोपपन्नेत्याह—*न तर्हीति* ॥ 'सोऽ-हमि'ति प्रत्यभिज्ञाया अनुभवसिद्धत्वात् कथं तदपलापः? इत्याशङ्कते—*कथमिति* ॥ सामग्र्यसंभवात् प्रत्यभिज्ञानु-भवो भ्रम इत्याह—*विज्ञानस्वभावस्येत्यादिना* ॥ आत्मनः स्थायित्वे आत्मनि प्रत्यभिज्ञाकारणं तावन्न संभवतीति संबन्धः ॥ संस्कारः कारणमिति वदन् प्रष्टव्यः—किमागन्तुकज्ञानसंस्कारः कारणम्? उत स्वरूपज्ञानसंस्कारः? नाद्य इत्याह—*स्वयंप्रकाशस्येति* ॥ स्वयंप्रकाशत्वमुपपादयति—*विज्ञानेति* ॥ द्वितीयं प्रत्याह—*स्वरूपस्येति* ॥ प्रमितिकारणाभावमाह—*स्वयंप्रकाशस्येति* ॥ वेदनान्तरवेद्यस्य स्थायित्वमुक्तप्रत्यभिज्ञानात् सिध्यति, आत्मनस्तु स्वरूपज्ञानमेव प्रत्यभिज्ञा, ततः स्थायित्वासिद्धिरित्याशङ्क्याह—*नचेति* ॥ प्रत्यभिज्ञाविषयोऽपि दुर्लभ इत्याह—*सोऽहमिति* ॥ किं ज्ञानव्यतिरिक्तो विषयाकार उपेयते? उत न? आद्य आकारभेदेन विषयभेदाद् ज्ञानभेदः। द्वितीये ज्ञानातिरिक्तविषयाकाराभावान्न स्थायित्वविषयिणी प्रत्यभिज्ञेत्यर्थः। प्रत्यभिज्ञानिराकरणमुप-संहरति—*तस्मादिति* ॥ विकल्पासहत्वान्नैतदित्याह—*अत्रोच्यत इति* ॥ किं विशिष्टे प्रत्यभिज्ञाऽसंभवः? उत केवले? इति विकल्प्याद्यस्तावदनुपपन्न इत्याह—*अन्तःकरणेति*। द्वितीयं निरस्यति—*न निष्कलङ्केति* ॥ कथं तर्हि तस्य स्थायित्वमिति? अत्राह—*तस्येति* ॥ "अजो नित्यः शाश्वतः" इत्यादिरागमः शास्त्रशब्दार्थः। अन्तः-

पञ्चपादिकाविवरणम्

मोक्षावस्थायिनः शास्त्रैकगम्यत्वात्, संसारावस्थायामन्तःकरणविशिष्टरूपानपायात्, तस्यैव प्रत्यभिज्ञाया स्थायित्वाभिधानात्। तत्र चान्तःकरणजन्याहंप्रत्ययाधीनत्वाद्विशिष्टात्माभिव्यक्तेः पूर्वकालविशिष्टात्मानुभवनिमित्ताहंवृत्तिसंस्कारसहितमन्तःकरणमेवेदानींतनात्माभिव्यक्तिनिमित्तं सद् पूर्वापरकालविशिष्टात्मविषयं प्रत्यभिज्ञानमुत्पादयति। *ननु* पूर्वापराभिज्ञयोरविषयतयाऽभिव्यक्तस्यात्मनः कथं प्रत्यभिज्ञाविषयत्वमिति? *नैष दोषः*; यथा संवेदनस्य स्वसंविदितरूपस्यापि कालान्तरे स्वसंस्कारजनितस्मृतिविषयत्वम्, तद्वदिहाप्यभिज्ञायामविषयस्यापि प्रत्यभिज्ञाविषयत्वं न विरुध्यते॥

ननु स्वयंप्रकाशस्य विषयतैवानुपपन्ना, *नैवम्*; देश-कालान्तःकरणविशिष्टतया विषयतोपपत्तेः। यथा धर्मस्यागमैकसमधिगम्यस्यापीदानीं फलदानायोन्मुखीभावादिलक्षणधर्मविशिष्टतया वर्तमानफलोदयलिङ्गादिगम्यत्वम्, तद्वत्। *ननु* एकस्यैवात्मनः प्रत्यभिज्ञायां कथं कर्तृ-कर्मतया युगपद्विरुद्धरूपद्वयान्वयः?

ऋजुविवरणम्

प्रत्यभिज्ञानं वक्तव्यम्, तच्चान्तःकरणव्यतिरिक्त एव, तस्य च संसारावस्थायामप्यवस्थानमस्ति; अनादित्वात्, अतस्तत्रापि प्रत्यभिज्ञानं वक्तुं शक्यत एव; ततस्तद्विहाय किमर्थं विशिष्टे प्रत्यभिज्ञानकथनम्? तथा "मोक्षावस्थायिनः शास्त्रैकसमधिगम्यत्वादि"ति चायुक्तं वक्तुमिति, तत्राह—*संसारावस्थायामिति*॥ अथवा—कथमन्तःकरणविशिष्टे प्रत्यभिज्ञानमुच्यते? अन्तःकरणापगमे तद्विशिष्टस्वरूपापगमाद् नाभिमतस्थायित्वसिद्धिरित्याशङ्क्याह—*संसारावस्थायामिति*॥ *ननु*अन्तःकरणविशिष्टविषयमपि प्रत्यभिज्ञानं कथं घटते? विशिष्टचैतन्यस्याप्यन्यप्रकाश्यत्वाभावेन तद्विषयज्ञानस्य जन्यस्याभावात् तद्विनाशजसंस्काराभावात्, इदानीन्तनस्वरूपेऽपि प्रमाजनकस्य कारणस्याभावाद् नात्मविषयं प्रत्यभिज्ञानमुपपद्यत इति, तत्राह—*तत्र चान्तःकरणजन्येति*॥ *ननु—पूर्वापराभिज्ञयोरिति*॥ ज्ञानविषयत्वं नाम ज्ञाननिमित्ताविद्यानिवृत्तिभाक्त्वम्? प्रकाशातिशययोगित्वं वा? उभयमप्यात्मनो न संभवति; स्वरूपावरणाभावात्, प्रकाशरूपे प्रकाशातिशयायोगादिति। *प्रत्यभिज्ञाविषयत्वं न विरुध्यत इति*॥ *अयं भावः*—विशिष्टविषयं प्रत्यभिज्ञानम्। तत्र चोभयविधमपि विषयत्वमुपपद्यत इति। *ननु*—स्वतो विषयत्वाभावेऽन्यविशिष्टतयाऽपि विषयत्वं कथमुपपद्यते? इत्याशङ्क्य दृष्टान्तमाह—*यथा धर्मस्येति*॥ *ननु* एवं प्रत्यभिज्ञानस्य विशिष्टविषयत्वं परिकल्प्य रूपभेदेन कर्तृ-कर्मविरोधपरिहारकल्प-

तत्त्वदीपनम्

करणस्यान्वहविनाशित्वात्तद्विशिष्टस्यापि विनाशित्वमिति न प्रत्यभिज्ञाविषयत्वम्, तत्राह—*संसारावस्थायामिति*॥ नच विशिष्टानपाये सिद्धान्तविरोधः; "तदापीतेः संसारव्यपदेशादि"त्यत्र वेदान्तहृदयवेदिना बादरायणमुनिना सुषुप्त्याद्यवस्थास्वपि सूक्ष्मशरीरस्य सूक्ष्मरूपेणावस्थानाभिधानादित्यर्थः॥ एवं प्रत्यभिज्ञाया विशिष्टविषयत्वमुपपाद्य तस्याः सामग्रीं दर्शयति—*तत्र चेत्यादिना*॥ *विशिष्टात्मविषयमिति*॥ पूर्वापरकालोपलक्षितस्वरूपविषयमिति यावत्। पूर्वानुभवसंस्कारसहितान्तःकरणस्य पूर्वोत्तरकालोपलक्षितात्मप्रत्यभिज्ञाजनकत्वमुक्तम्, तत्रात्मनोऽविषयत्वादन्तःकरणस्य तद्विषयप्रत्यभिज्ञाजनकत्वमनुपपन्नमित्याह—*ननु पूर्वेति*॥ तत्र वक्तव्यम्—किमभिज्ञाविषयत्वाभावात् तद्वानाविषयत्वम्? उत स्वप्रकाशत्वादिति? तत्राद्यस्तावदयुक्त इत्याह—*नैष इति*॥ विशिष्टविषयं प्रत्यभिज्ञानम्, तत्र चोभयविधमपि विषयत्वमुपपद्यत इति भावः। "अविषयस्यापी"त्यत्रापिशब्देन वृत्तिरूपाभिज्ञाविषयत्वमस्तीति सूचयति। द्वितीयमुत्थापयति—*ननु स्वयमिति*॥ किं निरुपाधिकस्याविषयत्वं स्वप्रकाशत्वादिति ब्रवीषि? उत सोपाधिकस्य? इति विकल्प्याद्याङ्गीकारेण द्वितीयं दूषयति—*नैवमिति*॥

स्वरूपेण प्रमाणान्तराविषयत्वेऽपि विशिष्टस्य तद्विषयत्वे दृष्टान्तमाह—*यथेति*॥ "चोदनालक्षणोऽर्थो धर्मः" इत्यत्रागमैकसमधिगम्यतायाः सिद्धत्वेऽपि सुखादिलिङ्गेन फलोन्मुखत्वविशिष्टाकारेणादृष्टमनुमीयते यथा, तद्वदत्रापीत्यर्थः। विधान्तरेण विषयत्वमाक्षिपति—*नन्विति*॥ कर्तृत्वं क्रियोपसर्जनत्वम्, कर्मत्वं प्राधान्यम्, गुण-

पञ्चपादिकाविवरणम्

ननु सर्ववादिनां देहव्यतिरिक्ताद्यनुमानविषयतया कर्तृकर्मभावः संप्रतिपन्नः, तन्न ; अनुमानादौ विषयस्य कारकताऽभावादाकारमात्रतया विषयत्वात् तत्र कर्तृतैवात्मनः, न कर्मता, प्रत्यक्षे तु पुनर्विषयस्यापि स्वविषयज्ञानजनकतया कर्मकारकत्वात् प्राप्तैवात्मनो युगपदेकस्यां क्रियायां विरुद्धरूपद्वयापत्तिः—*इति* ॥

उच्यते—अन्तःकरणविशिष्टतयाऽऽत्मनो ज्ञातृत्वम्, पूर्वापरकालविशिष्टतया च ज्ञेयत्वमित्युपाधिभेदादविरोध इति। 'सोऽहमि'ति च प्रत्यभिज्ञायाः स्वानुभवसिद्धत्वाद् यथाकथंचिन्निमित्तं कल्पयितव्यम् ; व्यवहाराविसंवादाद् भ्रान्तित्वायोगात्। नच 'सोऽहमि'त्याकारभेदादर्थभेदेन ज्ञानभेदो युक्तः ; विज्ञानं क्षणिकमित्याकारभेदेनार्थभेदाद्विज्ञानस्य क्षणिकताऽभावप्रसङ्गात्, सत्यम् ; विज्ञाने क्षणिकत्वादिधर्मोपरागो विकल्पव्यवहारमात्रम्, न सत्यतोऽस्तीति चेत्, तथा स्थायित्वादिव्यवहाराश्च कालादिधर्मोपाधित्वाद्विज्ञाने विकल्पव्यवहारा इत्यविशेषः। इयांस्तु विशेषः—सति काले स्थायित्वादिविकल्पप्रत्ययाः 'सोऽहमि'त्याद्यनुभवसिद्धा व्यवहाराविसंवादिनोऽर्थक्रियासामर्थ्याश्च दृश्यन्ते, न तथा क्षणिकत्वादिव्यवहारा इति ॥

ऋजुविवरणम्

नायां गौरवं स्यात्, ततो वरं प्रत्यभिज्ञैव नास्तीत्युक्तमित्याशङ्क्याह—*सोऽहमिति च प्रत्यभिज्ञाया इति* ॥ तर्हि ज्वालादिप्रत्यभिज्ञानवद् भ्रान्तित्वमेवाङ्गीक्रियतामित्याशङ्क्याह—*व्यवहाराविसंवादादिति* ॥ *ननु*—भ्रान्तित्वे कारणमुक्तम्, विषयभेदाद् ज्ञानभेदेन भवितव्यम्, विषयाकारानभ्युपगमे नतरां प्रत्यभिज्ञोपपद्यत इति, तत्राह—*नच सोऽहमिति* ॥ *आकारभेदादिति* ॥

तत्त्वदीपनम्

प्रधानभावस्य भिन्नव्यक्तिनिष्ठत्वान्नैकस्मिन् संभव इत्यर्थः। गुण-प्रधानभावस्य भिन्नव्यक्तिनिष्ठत्वनियमोऽसिद्ध इत्याह—*ननु सर्वेति* ॥ इन्द्रियाद्यतिरेक आदिशब्दार्थः। अनुमानविषयत्वं नाम किं कर्मतया जनकत्वम्? उत तदाकारप्रदत्वम्? इति विकल्प्याद्येऽसिद्धिमाह—*तन्नेति* ॥ भविष्यदादेरसत्त्वान्न ज्ञानजनकतया विषयत्वमित्यर्थः। द्वितीये न विरोध इत्याह—*आकारमात्रतयेति* ॥ आकारवत्त्वमात्रेणेत्यर्थः। प्रत्यक्षविषयस्य तु कर्मकारकत्वाद् विरोधो दुर्वार इत्याह—*प्रत्यक्षे त्विति* ॥ तस्मात् कर्तृ-कर्मविरोधान्नात्मनो विषयत्वमित्यर्थः। एकस्मिन्नप्युपाधिभेदात् कर्म-कर्तृभावो युक्त इत्याह—*उच्यत इति* ॥ *कालविशिष्टतयेति* ॥ तदुपलक्षिततयेत्यर्थः। उपाधिभेदकल्पनया विरोधनिराकरणाद् वरं प्रत्यभिज्ञानङ्गीकरणमित्याशङ्क्याह—*सोऽहमिति* ॥ चशब्दः शङ्कानिवृत्त्यर्थः। *यथा कथंचिदिति* ॥ उपाधिसंबन्धं विना ज्ञातृ-ज्ञेयभावासंभवेऽप्युपाधितस्तत्संभव इत्यर्थः। उपाधितो विरोधनिरासे न कुत्रापि कर्तृ-कर्मविरोधः स्यादिति शङ्कायां वाऽऽह—*सोऽहमिति* ॥ यथाऽत्रानन्यथासिद्धं कल्पकम्, न तथेतरत्रेत्यर्थः। ज्वालाप्रत्यभिज्ञावद् भ्रान्तित्वमाशङ्क्याह—*व्यवहारेति* ॥ भेदग्राहिप्रमाणविरोधाद् ज्वालाप्रत्यभिज्ञायां भ्रान्तित्वम्, नच तथात्र बाधकमस्तीत्यर्थः ॥

आकारभेदाद् ज्ञानभेद इति यदभ्यधायि, तत् प्रतिक्षिपति—*नच सोऽहमिति* ॥ किं परमार्थतो ज्ञानस्य क्षणिकत्वाभावं ब्रवीषि? उत व्यवहारतः? इति विकल्प्याद्यमङ्गीकरोति—*सत्यमिति* ॥ अङ्गीकृतमंशमाह—*विज्ञान इति* ॥ मात्रचोऽर्थमाह—*न सत्यत इति* ॥ धर्मस्य धर्मिणो भिन्नत्वादिरूपेणानिरूपणात् वस्तुतो ज्ञानं निर्धर्मकमित्यर्थः ॥ नापि द्वितीयः ; क्षणिकत्वस्य प्रामाणिकत्वादिति द्रष्टव्यम्। तुल्यमुत्तरमित्याह—*तथेति* ॥ जन्यत्वादिकमादिशब्दार्थः ॥

"कालादी"त्यत्रादिशब्देनान्तःकरणवृत्तिर्गृह्यते। कालस्य स्थायित्वधर्मित्वात् तदनुवेधाद् ज्ञाने स्थायित्वव्यवहारः। वृत्तेर्जन्यादिधर्मित्वात् तत्संबन्धाद् ज्ञानेऽपि तद्व्यवहारः। वस्तुतस्तु निर्धर्मकत्वमित्यर्थः। किं तर्ह्युभयोरन्तरम्? तत्राह—*इयांस्त्विति* ॥ विकल्पप्रत्यये प्रमाणमाह—*सोऽहमिति* ॥ अनुभवस्तु तन्मतेऽप्यस्ति, तदर्थमाह—*व्यवहारेति* ॥ न केवलं विसंवादाभावः, प्रत्युत संवादश्चेत्याह—*अर्थक्रियेति* ॥

पञ्चपादिकाविवरणम्

अत्र प्राभाकरा मन्यन्ते—नैवम्प्रत्यभिज्ञायां विषयत्वेनायमात्मा सिद्धयति, किंत्वाश्रयत्वेन—*इति*, *तदयुक्तम्* ; पूर्वापरकालविशिष्टस्यात्मनः क्षणमात्रवृत्तिप्रत्यभिज्ञानाश्रयत्वायोगात्तदाश्रयतया स्थायित्व-सिद्धयभावात् । *ननु* पूर्वकालसंवेदनमिदानीमनुस्मर्यमाणं स्वाश्रयं तदानीन्तनमात्मानं साधयति, स्मृतिश्च स्वाश्रयतयेदानींतनमात्मानं साधयति, इति कालद्वयविशिष्टात्मसिद्धिरिति, *नैतत् सारम्*; स्मृति-पूर्वानुभवौ हि तत्तत्कालमात्मानं साधयतः, अभिज्ञाप्रत्यक्षद्वयवत्, एकस्य कालद्वयसम्बन्धः केन सिद्धयतीति वक्तव्यम्—पूर्वापरसंविद्द्वयमेव साधयतीति चेत्, (१)मैवम् ;घटादिष्वभिज्ञाद्वयव्यतिरेकेण प्रत्यभिज्ञोपादानात् । *किंच*

ऋजुविवरणम्

"अत्र प्राभाकराः"इत्यादेरेषोऽर्थः—सर्वज्ञानेष्वाश्रयत्वेनैवात्मनः सिद्धिः, न विषयतया ; कर्तृ-कर्मत्वविरोधात्, विषयानुभवव्यतिरेकेणात्मविषयज्ञानसद्भावे प्रमाणाभावात् । एतच्च "प्रमातृ-प्रमिती"त्येतद्व्याख्यानावसरे प्रदर्शितत्वान्नेहोक्तम् । आश्रयैकत्वसिद्धिश्च—'सोऽयं देवदत्तः' इति प्रत्यभिज्ञोत्पत्तौ 'सोऽयमि'ति विषयाकारानुसन्धाने ग्रहीताऽप्याश्रयत्वेनानुसन्धीयते तत्तदभिज्ञायामिवेति भावः । *पूर्वापरकालेति* ॥ एकमेवेदं प्रत्यभिज्ञानम्, तच्च संस्कार-सहितसामग्रीजन्यत्वात् पूर्वकालविशिष्टवस्तुग्राहकम्, नतु स्मृतिसहकृतसामग्रीजन्यत्वेन तद्विषयत्वम् ; कथंचित् स्मृतिजन्यत्वे स्मृत्या पूर्वकालीनानुभवोपस्थापनेन तदानीन्तनानुभवितुरुपस्थापनात् तज्जन्यज्ञानेऽपि तस्यानुसन्धानं स्यात्, तच्च पूर्वं निरस्तम्—"अयमेव च न्यायः प्रत्यभिज्ञाज्ञानेऽपी"त्यत्र । तथाच सति न प्रत्यभिज्ञाज्ञानेना-श्रयस्थायित्वसिद्धिरिति भावः ॥

ननु एकैकस्यासमर्थत्वेऽपि मिलितयोः साधकत्वं संभवति ; अन्यत्र तथा दर्शनात्, इति चोदयति—*पूर्वा-परसंविदिति* ॥ यद्वाऽनुभवितुरेव स्मर्तृत्वनियमादेकत्वसिद्धिः । अथवा—'अनुभूतं मये'त्यत्र स्मर्तुरेवानुभवि-तृत्वप्रतिभासनादेकस्य कालद्वयसंबन्धः प्रतीयत एव, किं प्रमाणान्वेषणेन ? इति भावः । संविद्द्वितयमपि न साधयति ; सहितयोः कालद्वयसम्बन्धिविषयत्वे विद्यमानेऽपि साधकत्वादर्शनादिति परिहरति—*मैवं घटादिष्विति* ॥ *यद्वा* —स्मर्यमाणस्यैवानुभूयमानत्वेनैकत्वसिद्धावपि प्रत्यभिज्ञोपादानदर्शनादत्रापि तदङ्गीकरणीयमिति भावः । *ननु* अभिज्ञाद्वयं न साधयति ; अयुगपद्भावात्, इहतु युगपदुपस्थितसंविद्द्वितयं साधयति, प्रत्यक्षज्ञानस्य ज्ञानान्तरा-सन्निधानाद्विषयाधिक्याभावाच्चेति—चेत्, *मैवम्*, किमेकैकमेवान्यसन्निधानात् साधयति ? मिलितं वा ? नाद्य इत्याह

तत्त्वदीपनम्

आत्मनः प्रत्यभिज्ञाविषयत्वेन स्थायित्वसाधनमाकर्ण्य तदसहमानाः प्राभाकराः प्रत्यवतिष्ठन्त इत्याह—*अत्र प्राभाकरा इति* ॥ विषयत्वेऽनात्मत्वापातादित्यर्थः । संविदधीनप्रकाशस्य तत्कर्मतया व्याप्तत्वाद् नाश्रयतया सिद्धिरित्याह—*तदयुक्तमिति* ॥ आश्रयतया सिद्धावपि स्थायित्वं दुःसाधमित्याह—*पूर्वेति* ॥ ज्ञानस्य क्षणिकत्वात् तदाश्रयत्वेनैकक्षणवर्तिरूपं सिध्येत्, न पूर्वकालसंबन्धि; तस्यानाश्रयत्वात्, ततश्च न स्थायित्वसिद्धिरित्यर्थः । प्रत्यभिज्ञामन्तरेणापि स्थायित्वं सिद्धयतीति शङ्कते—*ननु पूर्वकालेति* ॥ स्मर्यमाणज्ञानस्य निराश्रयत्वायोगात् तदा-श्रयत्वेन तत्कालविशिष्टं रूपं सिध्यति, वर्तमानस्मृत्याश्रयत्वेन वर्तमानमिति कालद्वयवैशिष्ट्यसिद्धिरित्यर्थः । विकल्पासहत्वान्नैतच्चोद्यमित्याह—*नैतदिति* ॥

कालद्वयविशिष्टयोर्यदैक्यम्, तत् किं स्मृत्या सिद्धयति ? उत पूर्वानुभवेन ? आहो अन्येन ? इति विकल्प्योभयं निरस्यति—*स्मृतीति* ॥ स्मृतेर्वर्तमानात्मसाधनेनोपक्षयात् पूर्वानुभवस्य च तत्कालीनसाधनेनेति न विवक्षित-सिद्धिरित्यर्थः । नापि तृतीयः ; तादृशस्य प्रत्ययान्तरस्यानिरूपणादित्यभिसन्धिः । किंशब्दस्य प्रश्नार्थतां मत्वा चोदयति—*पूर्वापरेति* ॥ पूर्वानुभव-स्मृती पूर्वापरसंविच्छब्दार्थः ॥

किं सर्वत्र संविद्द्वयमेव कालद्वयसंबन्धसाधकमुपेयते ? उतात्मनि ? इति विकल्प्याद्यमपसिद्धान्तेन दूषयति—*न घटादिष्विति* ॥ द्वितीयेऽप्येतद्विवेचनीयम्—किं संविद्द्वयमेकैकं साधयति ? उत संभूय ? उत संविदन्तरोत्पादनेन ? इति

(१) नेति पाठान्तरम् ।

पञ्चपादिकाविवरणम्

न तावत् स्वयमेव संविद्द्वयं साधयति ; एकैकस्य कालद्वयवदात्माश्रयत्वाभावात् , नच संभूय(१) पूर्वापरसंविद्द्वयं तद्वन्तमात्मानं साधयति ; अन्योन्यस्यान्योन्यसंविद्विशिष्टात्माश्रयत्वाभावात् । अथ संविद्द्वयमेव पूर्वापरसंविद्द्वयाश्रयात्मैकत्वविषयसंविदन्तरमुत्पादयति, सिद्धं तर्हि प्रत्यभिज्ञानमात्मविषयम् । *किञ्च* 'अनुभूतं मये'त्याश्रयविशिष्टपूर्वसंविदनुस्मृतेः स्वानुभवसिद्धत्वात् स्मर्यमाणतयैवेदानीं पूर्वानुभूतात्मसिद्धिः, न पूर्वसंवेदनाश्रयतया ; तस्याविद्यमानस्येदानीमसाधकत्वात् ।

ऋजुविवरणम्

—*किञ्च न तावदिति* ॥ नहि स्मरणसमये स्मृतेरनुभवस्य वाऽऽश्रयाधिक्यं भवति, येन कालद्वयसम्बन्धः सिध्येदिति भावः । न द्वितीय इत्याह—*नापि संभूयेति* ॥ *एतदुक्तं भवति*—ज्ञानान्तरसन्निधाने ज्ञानान्तरस्याधिकार्थसाधकत्वं भवत्याश्रये विषये वा सत्याधिक्ये, अत एव नोभयम् ; स्मरणविशिष्टस्यात्मनोऽनुभवविषयत्वेऽनुभवविशिष्टस्य स्मरणविषयत्वे द्वयोर्वोभयविशिष्टविषयत्व एकस्य कालद्वयसम्बन्धः सिद्ध्येत्, नतु तदस्ति ; स्मरणस्य भूतकालवस्तुविषयत्वात्, स्मरणानुभवयोरेकविषयत्वप्रतीतावपि न ताभ्यां कालद्वयसम्बन्धसिद्धिरिति तत्सिद्ध्यर्थं प्रत्यभिज्ञोपादानम् , प्रकृते तु स्मरणस्य वर्तमानाश्रयसापेक्षत्वादनुभवाश्रय एव स्मृतिनियमाद् वर्तमानाश्रयप्रतीतेश्च कालद्वयसंबन्धसिद्धिरिति । तर्ह्यत्रापि स्मरणेन वर्तमानाश्रयप्रतीतिः, स्मर्यमाणानुभवेन च स्वाश्रयात्मप्रतीतिरिति नैकस्य कालद्वयसम्बन्धसिद्धिः । *ननु* 'अनुभूतं मये'त्येकत्वं प्रतीयत इत्युक्तम् , यद्वा—स्मरणानुभवयोरेकाश्रयत्वेन तदेकाश्रयत्वसिद्धिरिति, *सत्यमुक्तम्* ; तदेव निरूपयितुं न शक्यते—किं स्वयमेव ? अनुपपत्तिसहकृतं वा ? अनुपपत्तिरेव वा ? यदा स्वयमेव, तदा किमेकैकम् ? उत मिलितमिति ? न तावत् प्रथमः कल्प इत्याह—*किञ्च न तावदिति* ॥ न द्वितीय इत्याह—*नापि संभूयेति* ॥ *एतदुक्तं भवति*—ग्रहणविशिष्टस्य स्मरणविषयत्वे स्मरणविशिष्टस्य वाऽऽत्मनो ग्रहणविषयत्व एकैकेन प्रातिस्विकाश्रयस्य गृहीतत्वात् तदेकस्य ग्रहणाश्रयस्यैव स्मरणविषयत्वात् स्मरणाश्रयस्यैव ग्रहणविषयत्वेनैकविषयत्वाद् विषयस्यैव चाश्रयत्वादाश्रयैकत्वसिद्धिर्नान्यथा, इति विषयत्वनिराकृतिः । अन्यसहितस्यापि न साधनत्वम् ; न ह्युत्पन्नज्ञानस्य सामग्र्यन्तरसन्निधानादाश्रयाधिक्यं भवति, विषयाधिक्यं तु दूरतः । नाप्यन्यदेव साधयति ; ग्रहण-स्मरणयोराश्रयैकत्वग्रहणपुरःसरत्वान्नियमप्रमाणस्य । पारिशेष्याद्विषयत्वेन जनकत्वपक्षमवलम्बते—*अथ संविद्द्वयमेवेति* ॥ *ननु* 'अनुभूतं मये'ति स्मर्तुरेवानुभवितृत्वं प्रतीयते, तत् कथमाभ्यां स्थायित्वं न सिद्ध्यतीति युक्त्या तदपह्नवः क्रियते ? इत्याशङ्क्याह—*किं चानुभूतमिति* ॥ यद्वा—पूर्वमाश्रयतया स्थायित्वसिद्धिर्नास्तीति युक्त्याऽभिहितम्, इदानीं विषयत्वप्रतीतिसामर्थ्यादपि नाश्रयत्वसिद्धिरित्याह—*किं चानुभूतमिति* ॥ एतदुक्तं भवति—विशिष्टानुभवस्य स्मर्यमाणत्वाद् विशेषस्यापि प्रतीयमानस्य विषयत्वेनैव प्रतीतिरिति । *ननु*—न विशिष्टविषयं स्मरणम् , किन्तु संवेदनविषयम्, आत्मनः स्वसंवेदनाश्रयतया प्रतीतिरन्यथा सिद्धा, इति कथं विशिष्टप्रतीत्या विशेषणस्य विषयत्वं कल्प्यत इति ? तत्राह—*तस्याविद्यमानस्येति* ॥ *ननु* अविद्यमानस्यापि स्मृतिविषयतया प्रतीयमानस्य स्वाश्रयसाधकत्वसंभवात् कथं विषयत्वेनैव प्रतीति-

तत्त्वदीपनम्

विकल्प्याद्यं दूषयति—*न तावदिति* ॥ *स्वयमेवेति* । एकैकमित्यर्थः । द्वितीयं दूषयति—*नचेति* ॥ स्मृतिसमये पूर्वानुभवाभावात्तत्समये च स्मृतेरभावान्नान्योन्यसंविद्विशिष्टाश्रयतया स्थायित्वसिद्धिरित्यर्थः । तृतीयमुत्थापयति—*अथेति* ॥ अस्मिन् कल्पे त्वस्मदिष्टसिद्धिरित्याह—*सिद्धमिति* ॥ इतश्चात्मनो विषयत्वमुपेयमित्याह—*किंचेति* ॥ विशिष्टस्मरणानुपपत्त्या न विशिष्टात्मनः स्मर्यमाणत्वम् ; संविन्मात्रस्य स्मर्यमाणत्वात्, तदाश्रयत्वेनात्मप्रथासम्भवाच्चेत्याशङ्क्याह—*न पूर्वेति* ॥ पूर्वानुभवस्येदानीमविद्यमानत्वेऽपि प्रकाशमानत्व-

(१) नार्पीति पाठान्तरम् ।

पञ्चपादिकाविवरणम्

स्वयं प्रकाशमानं हि संवेदनमात्माश्रयं साधयति, न स्मृतिविषयतया परप्रकाश्यम्; अन्यथा धर्मादीनामपि परतः सिद्धानां स्वाश्रयात्मसाधकत्वप्रसङ्गात्। तस्मात् सिद्धमात्मनि प्रत्यभिज्ञानमिति ॥

ऋजुविवरणम्

रात्मनो निश्चीयत इति? तत्राह—*स्वयंप्रकाशमानं हीति* ॥ कथं स्वयंप्रकाशमानत्वमेव प्रयोजकत्वेनाश्रीयते; नतु प्रकाशमानत्वमेवेति? "तत्राह—*अन्यथा धर्मादीनामिति* ॥

अथवा—मा भूत् स्मरणानुभवयोः साधकत्वम्, अभिज्ञाद्वयेन सिद्ध्यतीति चोदयति—*पूर्वापरसंविद्द्वयमिति* ॥ *अस्यायमभिप्रायः*—संविद्द्वयाश्रयस्वरूपमेकमेव प्रतीयते, कालद्वयसंबन्धश्च प्रतीयते, नच तस्यैक्यमपरमस्ति, यत्प्रत्यभिज्ञागम्यं स्यात्। *नैवं घटादिष्विति* ॥ घटादिष्वभिज्ञाद्वयेऽप्येकं स्वरूपं प्रतीयते, ऐक्यान्तराभावोऽप्यविशिष्टः; तथाऽपि प्रत्यभिज्ञोपादानदर्शनादत्रापि तदङ्गीकरणीयमिति भावः। *ननु* ऐक्यद्वयाभावेऽपि घटादावभिज्ञाद्वये प्रतीयमाने कालद्वयविशेषणसामर्थ्यात् प्रसक्तस्वरूपभेदनिवृत्त्यर्थं प्रत्यभिज्ञोपादानम्; तयोरसामर्थ्यात्, जातौ त्वनेकत्रैकाकारप्रतीतिरेकत्वं कल्पयति, 'अहमि'त्येकाकारप्रतीतिमात्रेण नात्मैकत्वसिद्धिः, आत्मान्तरेष्वहमाकारस्य विद्यमानत्वेऽप्येकात्वाभावात्, अतश्चैक्याकारप्रतीतिव्यतिरेकेणास्यां प्रसक्तभेदनिवृत्तिद्वारेण कालद्वयसंबन्धसिद्धिरेकस्य वक्तव्या। सा चात्र कालद्वयसम्बन्धितैकता किमाभ्यां साक्षादेव साध्यते? किं वा संविद्द्वयवत एकत्वप्रतीतिसामर्थ्यात्? इति वक्तव्यम्। साक्षात्त्वपक्षेऽप्येकैकेन? उत द्वाभ्यामेव? इति विकल्प्य द्वितीयपक्षेऽपि संविद्द्वयवतः एकत्वं किमेकैकेन? उत द्वाभ्यामेव? इति विकल्पः। न तावत् प्रथमः कल्प इत्याह—*किंचेति* ॥ न द्वितीय इत्याह—*नच संभूयेति* ॥ शेषं नेयम् ॥

अथवा—पूर्वापरसंविद्द्वयमेवेति* ॥ अयं भावः—प्रत्यभिज्ञावादिनाऽपि विषयप्रत्यभिज्ञाया एकाश्रयाभिज्ञाजन्यत्वं वक्तव्यम्; भिन्नाश्रयाभिज्ञयोः प्रत्यभिज्ञाजनकत्वादर्शनात्, एवंच सति ताभ्यामेव स्थायित्वसिद्धेर्न तद्विषयप्रत्यभिज्ञोपयोग इत्याह—"न घटादिष्वभिज्ञाद्वयेति* ॥ अयं भावः—एकविषयाभिज्ञयोरेव प्रत्यभिज्ञाजनकत्वनियमेऽपि प्रत्यभिज्ञाङ्गीकारादत्रापि तदङ्गीकरणं युक्तमिति। *ननु*—घटादौ नाभिज्ञाद्वयातिरेकेण प्रत्यभिज्ञोपादानं युक्तम्; अभिज्ञाद्वयस्यैव प्रत्यभिज्ञाजनकत्वनियमाभावात्, देवदत्तविषयाभिज्ञया यज्ञदत्तविषयाभिज्ञया च सदृशयज्ञदत्तविषयप्रत्यभिज्ञोत्पत्तिदर्शनात्, एकाश्रयाभिज्ञयोरेव प्रत्यभिज्ञाजनकत्वमित्यस्य व्यभिचारादर्शनान्न प्रत्यभिज्ञोपयोग इति। विषयप्रत्यभिज्ञाजनकाभिज्ञयोरेकाश्रयत्वं सत्तया, ज्ञाततया वा प्रत्यभिज्ञावयर्थ्यापादकम्? न तावदाद्यः पक्षः; अतिप्रसङ्गात्, द्वितीयेऽप्याभ्यामेव ज्ञातत्वम्? उत प्रत्यभिज्ञोत्पादकसामर्थ्येन? तथा संविद्द्वयं किं साक्षात् कालद्वयसम्बन्धसाधकम्? उत संविद्द्वयवानेक एवेति साधयति? अर्थाद्भिन्नकालसंविद्द्वयवत एकत्वे तस्यापि कालद्वयसंबन्धावगाहिप्रत्यभिज्ञया स्थायित्वे पश्चात् तत्सामग्रीनिरूपणसमये तदाश्रयाभिज्ञयोरेव कारणत्वं निश्चीयते; तथा सत्युत्तरकालीनमेकाश्रयज्ञानं प्रत्यभिज्ञागृहीतैकत्वसाधकत्वादनुवादकमेव। प्रत्यभिज्ञाया अनङ्गीकारे पूर्वमेव प्रत्यभिज्ञामनपेक्ष्य ताभ्यामेवैकत्वसिद्धिर्वक्तव्या। साच न संभवति; यद्वा—घटादिषु प्रमाणप्रत्यभिज्ञाया एकविषयाभिज्ञाजन्यत्वम्;

तत्त्वदीपनम्

मात्रेण साधकत्वं स्यात्; यथा बहुलनीलाम्बुदानुमिताया वृष्टेर्वर्तमानकालसत्त्वाभावेऽपि कृषीवलप्रवृत्तिहेतुत्वम्, तद्वदित्याशङ्क्याह—*स्वयंप्रकाशमानमिति* ॥ वृष्ट्यादेरविद्यमानस्यापि ज्ञानद्वारा साधकत्वम्, संवेदनं तु स्वयंप्रकाशमानं सद् आश्रयं साधयति। स्वयंप्रकाशमानत्वं च स्वसत्तायाम्, इति नाविद्यमानस्याप्रतीतस्याश्रयसाधकत्वम्। न खल्ववर्तमान-स्मर्यमाणप्रदीपाश्रयत्वेन मन्दिरप्रथा दृष्टेत्यर्थः। प्रकाशमानत्वमात्रेणाश्रयसाधकत्वेऽतिप्रसक्तिमाह—*अन्यथेति* ॥ प्रत्यभिज्ञासमर्थनमुपसंहरति—*तस्मादिति* ॥ कारण-विषयाद्यनुपपत्त्यभावस्तच्छब्दार्थः। प्रत्यभिज्ञाविरोधेन सादृश्यकल्पनासम्भवान्न सादृश्यप्रतिबद्धं संविद्भेदभानम्, ततश्च स्वलक्षणभेदादर्शनाद् न प्रत्यक्षं क्षणिकतां साक्षात्कर्तुं क्षमत इत्यर्थः ॥

पञ्चपादिका

अथ अन्ते क्षयदर्शनादादौ क्षयानुमानम्; अतो भिन्नत्वात् सादृश्यकल्पनेति ?

पञ्चपादिकाविवरणम्

स्यात् तर्ह्यनुमानात् क्षणिकत्वमिति घटादौ साधयति— *अथान्ते क्षयदर्शनादिति*॥ घटस्य विनाशानन्तर-

ऋजुविवरणम्

नियमज्ञानस्य प्रत्यभिज्ञानिमित्तस्थायित्वसापेक्षत्वात्पूर्वभाविप्रत्यभिज्ञावैयर्थ्यापादकत्वायोगात्, अत्र त्वात्मैकविषय-प्रत्यभिज्ञाऽनङ्गीकारे ताभ्यामेवाश्रयैकत्वसिद्ध्या भवितव्यम्, सा न संभवतीत्याह—*किंच न तावदिति*॥ संविद्द्वयमेव साधयति ? ज्ञानान्तरजननेन वा ? प्रथमपक्षेऽप्येकैकमेव कालद्वयसम्बन्धसाधकम् ? उत मिलितमिति ? न तावत् प्रथमः कल्प इत्याह—*किंच न तावदिति*॥ द्वितीयपक्षे दूषणमाह—*नच संभूयेति*॥ तत्र विषयत्वेन सिद्धिनिराकरणम्—प्रत्यभिज्ञानङ्गीकारे विषयत्वेनाप्यभिज्ञयोर्नैकस्यात्मनः कालद्वयसम्बन्धसिद्धिः; किमुत केवलाश्रयत्वपक्षे कालद्वयसंबन्धसिद्धिरिति दर्शयितुम्। यद्वा—ज्ञानेन सिद्धिर्विषयस्यैव, नाश्रयस्य, अत्रापि विषयत्वेन भवितव्यमित्यापाद्य विशिष्टविषयत्वाभावेन कालद्वयसम्बन्धासाधकत्वमुक्तम्। ज्ञानान्तरजनकत्वपक्षमाशङ्कते—*अथेति*॥ इदानीं पूर्वापरसंविद्द्वयमेवेत्यादेरर्थान्तरम्—यथा गोत्वादिजातेरभिज्ञाद्वयमेवैकत्वसाधकम्, एवमभिज्ञाद्वय-मेवाश्रयैकत्वसाधकमित्याह—*पूर्वापरेति॥ घटादिष्विति*॥ यथा घटादिव्यक्तौ 'अयं घटोऽयं पटः' इत्यभिज्ञानेऽपि प्रत्यभिज्ञाङ्गीकरणम्, तद्वदात्मन्यप्यङ्गीकरणीयमिति भावः। *ननु*—जातिवैषम्यं घटादिज्ञानेषु विद्यते; प्रति-ज्ञानं विलक्षणरूपप्रतीतेः, जातौ तु न तथा; 'गौरयं गौरयमि'त्येकाकारप्रतीतेः, एकव्यक्तौ त्वेकाकारप्रतीतिर्न जातिनिबन्धना; अतस्तत्राभिज्ञाभ्यामेवैकत्वम्, व्यक्तौ तु प्रत्यभिज्ञयैकत्वम्, आत्मनि तु न जातिवैलक्षण्यमस्ति; 'अहमहमि'ति सर्वज्ञानेषु ग्राहकाकारस्यैकत्वप्रतीतेः। अतश्च न प्रत्यभिज्ञाया उपयोगः, *मैवम्*; "अयं गौरयं च गौरि"ति स्वरूपातिरेकेण प्रत्यभिज्ञायते, अत्रापि यदि स्वरूपातिरेकेणाश्रयस्य कालद्वयसंबन्ध आभ्यां सिद्ध्येत्, तदा भवेत् प्रत्यभिज्ञावैयर्थ्यम्, नच तदाभ्यामेकैकाभ्यां समुदिताभ्यां वोपपद्यत इत्याह—*किंच न तावदिति*॥ शेषं नेयम्॥

"अथान्ते क्षयदर्शनादि"त्यनेन क्षयानुमानं क्रियते, तदसङ्गतम्; क्षणिकत्वं हि प्रस्तुतम्, तद्विहाय क्षयानु-मानात्। तथा प्रकृतत्वात् संवेदने क्षयानुमानमिति प्रतिभाति, तथा सति "क्षयदर्शनादि"त्यसंबन्धः; संवेदनस्यान्ते क्षय-दर्शनाभावात्, अथवा—"अथान्ते क्षयदर्शनादि"त्युक्तम्, "आदौ क्षयानुमानमि"ति च, तत्र किमिदं क्षयानुमानम् ? कुत्र वा क्षयदर्शनम् ? कुत्र वा क्षयानुमानमिति च न ज्ञायते, तदर्थं विविच्यावतारयति—*स्यात्तर्ह्यनुमाना-दिति*॥ अनुमानशब्दप्रयोगस्तु पूर्वं विकल्पितपक्षयोर्मध्ये प्रत्यक्षं दूषितम्, तत्रैव द्वितीयपक्षस्वीकार इति दर्शयितुम्; व्यवहितत्वात्। *ननु*—नायं ग्रन्थः क्षणिकत्वानुमानं गमयति; अत्र ह्यादौ क्षयः साध्यः, अन्ते क्षय-दर्शनं हेतुरिति प्रतिभाति; तथा सति व्यधिकरणत्वं स्यात्, "अथान्ते क्षयदर्शनादि"ति सपक्षप्रदर्शनम्, हेत्वन्तरे-णैव क्षयानुमानमिति, तथाऽपि न क्षणिकत्वसिद्धिः, बाधितविषयं चानुमानं स्यात्; अन्ते क्षयदर्शनादेवादौ सत्ता-प्रतीतेः। नहि पूर्वमपि विनष्टस्य पश्चात् नाशदर्शनं संभवति। स्थितस्यैव नाशः, ननु नष्टस्य। अन्यत्र क्षयदर्शनमन्यत्र क्षयानुमानमिति च विप्रतिषिद्धम्। अथान्तशब्दो विनाशवाची, तत् कथमन्ते क्षयानुमानमित्युक्तम् ? क्षये क्षयदर्शनादिति पुनरुक्तत्वात्। एवंच क्षयदर्शनमात्रं सपक्षः स्यात्, तथाप्यनुमानं न भवेत्; साध्यसाधनविकल्पत्वप्रसङ्गात्। अथान्तशब्दो मध्यपरत्वेन स्वीक्रियेत, तथाऽपि सपक्षाभाव इत्याशङ्क्य व्याचष्टे—*घटस्य विनाशानन्तरेति*॥

तत्त्वदीपनम्

क्षणिकत्वस्य प्रत्यक्षत्वे निरस्ते तस्यानुमानिकत्वं वक्तव्यम्। किमिदमुच्यते—क्षयानुमानमिति ? नच—आदौ क्षयानुमानमेव तदनुमानमित्यपि—शङ्क्यम्; संविदामेकरूप्यस्य साधितत्वात्, अन्ते क्षयदर्शनादित्यस्यानुपपत्ते-रित्याशङ्क्य तात्पर्यमाह—*स्यात्तर्हीति*॥ घटादेः क्षणिकतां प्रसाध्य, तद्दृष्टान्तेन संवित्क्षणिकतां साधयामीत्यनु-सन्धानेन घटादेः क्षणिकत्वं साध्यत इत्यर्थः। अन्त-क्षयशब्दयोः पर्यायत्वेन वैयर्थ्यमाशङ्क्याह—*घटस्येति*॥ यस्मिन्

पञ्चपादिका

आदौ सत्तादर्शनादन्तेऽपि सा किं नानुमीयते !!!

पञ्चपादिकाविवरणम्

पूर्वक्षणविशिष्टसत्त्वमन्त इत्युच्यते। तस्य स्वसत्ताक्षणादुत्तरक्षणे विनाशो दृष्टः। तत्रान्त्यक्षणावच्छिन्नघट-सत्त्वात् पूर्व-पूर्वक्षणावच्छिन्नघटसत्त्वान्यादिरित्युच्यन्ते। तान्यपि, स्वसत्ताक्षणादुत्तरक्षणे विनाशव्याप्तानि, घट-सत्त्वात्; अन्त्यक्षणावच्छिन्नघटसत्त्ववदित्यनुमानम्। ततश्च सतोऽनन्तरं विनाशात् क्षणिकत्वसिद्धिरिति क्षणिकेष्वैक्यं सादृश्यनिबन्धनमिति ॥

तत्र प्रत्यनुमानमाह—*आदौ सत्तादर्शनादिति* ॥ आदिरिति घटसत्तावच्छेदकाः क्षणा उच्यन्ते।

ऋजुविवरणम्

लक्षणयेति भावः। अथवाऽन्तशब्दः स्वरूपवाची विवक्षयाऽन्त्यक्षणावच्छिन्नं सत्त्वमाह। अथवाऽग्रवाचित्वेनैवमन्त-शब्दो व्याख्यातः। "क्षयदर्शनादि"ति नाशित्वमात्रं प्रतीयते, तथा सति क्षणिकत्वे दृष्टान्तत्वं न स्यात्; साध्य-विकलत्वात्, अतो व्याचष्टे—*तस्य स्वसत्ताक्षणादिति* ॥ "आदौ क्षयानुमानमिति कथमुक्तम्? उत्पन्नस्य च स्थितस्य च नाशः; नादावेव नाशः संभवति। बाधितविषयत्वं चोक्तम्। तथाऽभिमतसाध्यासिद्धिः। आदौ क्षयेऽप्य-वच्छिन्नत्वेन मध्य आर्थिकस्य क्षणिकत्वासिद्धेः, इत्याशङ्क्य व्याचष्टे—*तत्रान्त्यक्षणावच्छिन्नेति* ॥ तत्रान्त्य-क्षणात्पूर्वपूर्वक्षणावच्छिन्नसत्त्वानां क्षयानुमानेऽपि नाभिमतसाध्यसिद्धिः; सिद्धसाध्यता च। तथा हेत्वभावाच्च नानुमान-मित्याशङ्क्याह—*तान्यपि स्वसत्ताक्षणादिति* ॥ "अतो भिन्नत्वात्सादृश्यकल्पने"ति कथमुक्तम्? भिन्नत्वस्य सादृश्यगमकत्वाभावात्, भिन्नघट-पटादौ सादृश्यादर्शनादित्याशङ्क्य व्याचष्टे—*क्षणिकेष्वैक्यमिति* ॥ "आदौ सत्ते"ति किमर्थम्? न ह्यनेन पूर्ववादिनः किञ्चिद्विरुद्धमभिहितम्, अन्ते सत्त्वस्य संप्रतिपन्नत्वादनुमानानुपपत्ते-रित्याशङ्क्याह—*तत्र प्रत्यनुमानमिति* ॥ तत्राद्यन्तशब्दयोरर्थः पूर्वग्रन्थोक्त एव प्रतीयेत; सन्निहितत्वात्, तथा सति न तत्प्रत्यनुमानम्। नह्यन्ते सत्ता पूर्वानुमानविरोधिनी, अनभ्युपगता वा; अतः सिद्धसाध्यतेत्युक्तम्। अथ प्रत्यनुमानसिद्ध्यर्थं सत्त्वेन प्रतीयमानाः क्षणादिशब्दभाजः, "अन्तः" इति विनाशे प्रसिद्धत्वात् तदवस्थो घटो विवक्ष्यते, तथा सत्युत्तरक्षणावच्छिन्नघटस्य पक्षीकरणादाश्रयासिद्धत्वमित्याशङ्क्य व्याचष्टे—*आदिरिति* ॥ *घटसत्तावच्छेदका इति* अन्तशब्देन कालविवक्षां कृत्वा; पूर्वं वस्तुविवक्षायामुभयविकलत्वप्रसङ्गात् तत्रापि काल

तत्त्वदीपनम्

क्षणे विनाशः प्रसिद्धः, तस्मादव्यहितपूर्वक्षणावच्छिन्नं यत् सत्त्वं तदन्तशब्देन गृह्यते। तस्य सत्ताक्षणानामन्तिमशब्दा-वाच्यत्वं च घटत इत्यपि द्रष्टव्यम् ॥ अन्तशब्देन सत्ताक्षणस्य विवक्षायां तस्मिन् क्षयदर्शनादित्युक्तमयुक्तम्, तत्राह—*तस्येति* ॥ सत्ताक्षणधर्मिणि सत्तावच्छेदकक्षणादव्यवहितोत्तरकाले विनाशदर्शनादित्यर्थः। स्वसत्ताक्षणादुत्तरक्षणे विनाशदर्शनादित्यभिधाय, "आदौ क्षयानुमानादि"ति वदतामन्तिमक्षणस्यैवादिशब्देनोपात्तत्वमिति शङ्का स्यात्, नच तथोपपद्यते; विरोधादित्याशङ्क्याह—*तत्रेति* ॥ भवतु तेषामादिक्षणत्वम्, तथाऽपि तत्र क्षयानुमानं व्याहतमित्या-शङ्क्यानुमानमाह—*तान्यपीति*॥ विनाशव्याप्तानीत्युक्ते सिद्धसाध्यता; यदा कदाचिद्विनाशव्याप्त्युपगमात्, तत्राह—*उत्तरेति* ॥ अत्राव्यवहितेति विशेषणं द्रष्टव्यम्। यस्मात्कस्माच्चिदुत्तरक्षणे विनाशव्याप्त्या सिद्धसाध्यत्वं निराकर्तु-माह—*स्वसत्तेति* ॥ पटसत्ताक्षणं व्यावर्तयति—*घटेति* ॥ तथाऽपि कथं क्षणिकत्वसिद्धिः? इत्याशङ्क्याह—*ततश्चेति* ॥ स्वसत्ताक्षणादव्यवहितोत्तरक्षणविनाशित्वं क्षणिकत्वमित्यभ्युपगमात् क्षणिकत्वसिद्धिरित्यर्थः ॥

भिन्नत्वात् सादृश्यकल्पनमिति कथमुक्तम्? भिन्नेऽपि घट-पटादौ सादृश्यानुपलब्धेरित्याशङ्क्य, भिन्नत्वे सत्यैक्येन प्रतीयमानत्वं सादृश्यकल्पकमित्याह—*इति क्षणिकेष्विति* ॥ अन्ते सत्त्वानुमानं नानिष्टमित्याशङ्क्याह—*तत्रेति* ॥ आद्यन्तशब्दार्थस्य पूर्वत्र व्याख्यातस्याङ्गीकरणे कथं तत्सत्त्वानुमानस्य प्रत्यनुमानत्वम्? इत्याशङ्क्यादि-शब्दार्थः प्राक्तन एव, अन्तशब्दार्थस्त्वन्य इत्याह—*आदिरित्यादिना* ॥ अक्षरार्थमभिधाय समुदायार्थमाह—

पञ्चपादिका

क्षयानुभवविरोधादिति चेत्, *इहापि* तद्रूपसत्त्वादनुभवविरोधः ; न ह्युभयोरनुभवयोः कश्चिद् विशेषः !!! *अथ मन्येत* —योऽसौ स्थिरत्वेनाभिमतोऽहमुल्लेखः, स किं कांचिदर्थक्रियां कुर्याद्वा ? न वा ? यदि न कुर्यात्, असल्लक्षणप्राप्तेर्न परमार्थवस्तु ; अथ कुर्यात्, न तर्हि स्थायी ; स्थायिनोऽ-

पञ्चपादिकाविवरणम्

अन्त इति विनाशावच्छेदकत्वेनाभिमताः क्षणाः। तत्रान्त्यक्षणाः सर्वे, घटसत्तया व्याप्ता इति साध्यते, कालत्वात्, सत्तावच्छेदककालवदिति प्रत्यनुमानम्। अभावानुभवविरुद्धमन्ते सत्तानुमानमिति चोदयति—*क्षयानुभवेति*। तर्ह्यन्त्यक्षणात् पूर्वक्षणावच्छिन्नघटसत्त्वानामनन्तरक्षयानुमानमपि प्रत्यभिज्ञाविरुद्धमिति परिहरति—*इहापीति*। क्षयानुभवोऽभिज्ञाऽनुमानं बाधते, न प्रत्यभिज्ञा ; अनुमानाद् दुर्बलेति, नेत्याह—*नह्युभयोरिति* ॥

सर्वे भावाः, क्षणिकाः, अर्थक्रियाकारित्वात्, यदक्षणिकं न तदर्थक्रियाकारि ; यथा शशविषाणमित्यनुमानान्तरं दर्शयितुं स्थायिनोऽर्थक्रियानुपपत्तिमाह—*अथ मन्येत योऽसौ स्थिरत्वेनाभिमत इत्यादिना* ॥ *ननु* स्थिरस्यैव निमित्तसंयोगादन्यथाभूतस्य क्रियापूर्वकं कार्यमुत्पादयितुं सामर्थ्यम्, न क्षणिकस्येति सिद्धान्ती

ऋजुविवरणम्

विवक्षेति मन्तव्यम्। एवमपि हेत्वभावादनुमानासंभव इत्याशङ्क्यानुमानस्वरूपं दर्शयति—*तत्रान्त्यक्षणा इति* ॥ प्रत्यक्षानुमानयोः क्षणिकत्वबाधकत्वं निरस्तम्। किमर्थमिदानीं स्थायिनोऽर्थक्रियानिराकरणम् ? नहि स्थायिनोऽर्थक्रियानिराकरणेनाभिमतं क्षणिकत्वं सिध्यति। स्थायिनोऽर्थक्रियानिराकरणेऽर्थक्रियैव न भवेत्। *ननु* अर्थक्रियया स्थायित्वनिराकरणं न सिध्यति ; अर्थक्रियायाः क्षणिकत्वेन व्याप्त्यभावात्, अतोऽर्थक्रियाकारित्वादेव न स्थायीति कथमुक्तम् ? इत्याशङ्क्याभिप्रायमाह—*सर्वे भावा इति* ॥ *ननु* अर्थक्रिया नामैका प्रतीयते, कथं तत्र क्रम-यौगपद्य-विकल्पः ? तथा क्रमशब्दप्रयोग उभयत्र दृश्यते, एककर्तृके निरन्तरोत्पद्यमाने, व्यवधानोत्पद्यमानेऽपि। तत्र व्यवधान-

तत्त्वदीपनम्

तत्रेति ॥ "क्षयानुभवविरोधादि"त्यनेन पूर्वोक्ते हेतुरुपन्यस्यत इति प्रतिभाति, नच तदुपपद्यते ; वैयधिकरण्यादित्याशङ्क्याह—*अभावेति*॥ सतोऽविनाशदर्शनात् कथं तद्विरुद्धं क्षयानुमानम् ? इत्याशङ्क्य तात्पर्यमाह—*तर्ह्यन्त्येति*॥ क्षयानुभवः सत्तानुमानं यथा बाधते, तथा प्रत्यभिज्ञानुभवस्य क्षणिकत्वानुमानबाधकत्वमुक्तम्, तत्र विशेषं शङ्कते—*क्षयेति* ॥ अभिज्ञाया एकदेश-कालावच्छिन्नार्थबोधकतया झटित्युत्पत्तेः, अनुमानस्य च लिङ्गदर्शन-व्याप्तिस्मरणादिद्वारा विलम्बेनोत्पत्तेरभिज्ञाया अनुमानबाधकत्वं घटते, प्रत्यभिज्ञायास्तु तदेतद्देश-कालप्रतिपत्तिपूर्वकमुत्पद्यमानत्वात् तदनुमानस्य चाविलम्बितोत्पत्तिकत्वान्न बाध्य-बाधकतेत्यर्थः ॥

प्रत्यभिज्ञाया बाध्यत्वमनुमानस्य बाधकत्वं च ज्वालाप्रत्यभिज्ञायां दृष्टम्, तथाच प्रकृतेऽपि तथात्वशङ्कया न प्रत्यभिज्ञाया बाधकत्वमित्याशयेनाह—*अनुमानादिति* ॥ क्षयानुभवस्य च धर्मि-प्रतियोगिप्रतिपत्तिसापेक्षतया विलम्बितोत्पत्तिकत्वस्याविशेषादिति परिहरति—*नेत्याहेति* ॥ ज्वालाप्रत्यभिज्ञावत् प्रत्यभिज्ञाबाध्यत्वशङ्कायामभिज्ञात्वाविशेषाद् 'द्वौ चन्द्राविति' प्रत्ययवदितरस्य बाधकत्वशङ्काया दुर्वारत्वमिति द्रष्टव्यम ॥ "अथ मन्येत" इत्यादौ स्थायिनोऽर्थक्रियाकारित्वं निराकारि, न चैतावता क्षणिकता सिध्येत्, अर्थक्रियाकारितायाः क्षणिकताव्याप्त्यभावादित्याशङ्क्याह—*सर्व इति* ॥ *अर्थक्रियानुपपत्तिमाहेति* ॥ व्यतिरेकव्याप्तिमाहेत्यर्थः ॥ "कथमयोगः" इत्यत्र कथंशब्दस्याक्षेपार्थत्वमाह—*ननु स्थिरस्येत्यादिना* ॥ त्वत्पक्षेऽर्थक्रिया न भवति चेत्याह—*न क्षणिकस्येति* ॥ क्षणिकस्य सहकारिसंबन्धोत्तरकालं क्रिया, ततः कार्यमित्यनेकक्षणस्थायित्वात् परिहारस्याभासत्वमाशङ्क्याह—*इत्थमयोग इति*॥ अङ्कुरोत्पत्त्यव्यवहितपूर्वक्षणस्य समर्थक्षणत्वात् तस्य चानपेक्षत्वाद् विपर्ययपर्यवसायित्वमित्यर्थः।

पञ्चपादिका

र्थक्रियाऽयोगात्। कथमयोगः !!! इत्थमयोगः—स तां कुर्वन् क्रमेण कुर्यात्? यौगपद्येन वा? न तावत् क्रमेण; पूर्वोत्तरकालयोस्तस्य विशेषाभावेऽपि, किमिति पूर्वस्मिन्नेव काल उत्तरकालभाविनीमपि न कुर्यात्? नापि यौगपद्येन; यावज्जीवकृत्यमेकस्मिन्नेव क्षणे कृतम्, इत्युत्तरकाले तद्विरहादसल्लक्षण-प्राप्तेः। अतोऽर्थक्रियाकारित्वादेव न स्थायी। तेन प्रतिक्षणं भिन्नेष्वहमुल्लेखेषु तद्बुद्धिः सादृश्य-निबन्धना—इति, *उच्यते*;—अथ केयमर्थक्रिया? यदभावादसल्लक्षणत्वप्राप्तिः। *स्वविषयज्ञान-

पञ्चपादिकाविवरणम्

चोदयति—*कथमयोग इति*॥ *इत्थमयोग इत्यादिः परिहारः। *क्रमेणेति*। अनेकानि सातत्येन कुर्यादित्यर्थः। एकं वाऽनेकं वा कार्यं सकृत् कृत्वोपरमत इत्याह—*यौगपद्येनेति*॥ क्रमपक्षं दूषयति—*न तावदिति*॥ अनेकानि कार्याणि कर्तुं समर्थश्चेत्, पुष्कलकारणस्य भावादेकस्यानेककार्यदर्शनाच्च सकृदेव कुर्यादिति भावः। द्वितीयं पक्षं दूषयति—*नापि यौगपद्येनेति*॥ अर्थक्रियाकारित्वलक्षणत्वात् सत्त्वस्येति भावः। अतः सकृत्कर्तुः कालान्तरे पुनः कर्तृत्वे निमित्ताभावादकर्तृत्वे वाऽसत्त्वात् सकृदेव सत्त्वमित्युपसंहरति—*अतोऽर्थक्रियाकारित्वादेवेति*॥

सिद्धान्ती तु—स्थायिनः सकृदेव कार्यं कृत्वा तूष्णीम्भूतस्यापि नासत्त्वप्राप्तिः; सत्त्वस्यार्थक्रियाकारित्व-लक्षणत्वाभावात्, इत्युपपादयति—*अथ केयमित्यादिना*॥ तत्राह—*स्वविषयज्ञानजननमिति*॥ युक्तं

ऋजुविवरणम्

पक्षस्योत्तरत्र दूष्यमाणत्वादविशेषेण क्रममात्रविवक्षायां तेन पौनरुक्त्यं स्यात्, तदर्थमाह—*क्रमेणेति*॥ *अनेका-नीति*॥ *ननु* कथं विशेषाभावेन युगपत् सर्वकार्यकरत्वमापाद्यते? सामग्रीसापेक्षत्वेन विशिष्य वक्तुं शक्यत्वात्, एकस्मिन् क्षण एकस्यानेककार्यकरत्वाभावाच्चेत्याशङ्क्याह—*अनेकानि कार्याणीति*॥ कथमुत्तरकाले तत्क्रिया-भावेनासत्त्वमापादितम्? इत्याशङ्क्याभिप्रायमाह—*अर्थक्रियाकारीति*॥ *ननु* अर्थक्रियां कृत्वोपरतस्यापि कारणान्तर-वशात् पुनःकर्तृत्वसंभवात् कथं न स्थायित्वम्? इत्याशङ्क्यावतारयति—*सकृत्कर्तुः कालान्तर इति*॥ "केयमर्थक्रिये"-त्यादिनाऽर्थक्रियानिराकरणं निष्प्रयोजनम्; यस्मात्तेनापादितं क्षणिकत्वं निराकर्तव्यम्, नान्यत्; स्वेनाप्यङ्गीकृतत्वाच्च नार्थक्रियानिराकरणं युक्तमित्याशङ्क्याभिप्रायमाह—*सिद्धान्ती तु स्थायिन इति*॥ "अनैन्द्रियकत्वादि"त्युक्तम्;

तत्त्वदीपनम्

"तामि"त्येकवचनप्रयोगादर्थक्रियाया एकत्वम्, ततश्च क्रम-यौगपद्यविकल्पासंभव इत्याशङ्क्याह—*क्रमेणेत्यादिना*॥ जात्युपाधावेकवचनप्रयोग इत्यर्थः। विच्छिद्य करणशङ्कां व्यावर्तयति—*सातत्येनेति*॥ सकृत् कृत्वा पुनः सकृत् करोतीति यौगपद्यशब्देनोच्यत इति शङ्का स्यात्, तथाचासत्त्वप्रसञ्जनं न स्यादित्याशङ्क्याह—*एकमिति*॥ यथैकं कार्यं सकृत्कृत्वो-परमते, तथाऽनेकमपीत्यर्थः॥कालान्तरता व्यर्था; क्रियाजननसामर्थ्यस्य पूर्वस्मिन् क्षणेऽभावात् कथं तदा कार्यकरणम्? इत्याशङ्क्य, सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मस्यैकस्मिन्नसंभवात् समयान्तरभाव्यर्थक्रियासामर्थ्यमुपेयम्, ततश्चातिप्रसक्ति-रित्याह—*अनेकानीति*॥ एकस्य युगपद् बहुकार्यजनकत्वादर्शनात् कथमेकस्मिन् क्षणे बहुकार्यकरत्वम्? इत्यपि न शङ्क्यमित्याह—*एकस्येति*॥ धूम-ज्वालाद्यनेककारित्वस्यैकस्मिन् वह्नौ युगपदुपलम्भादित्यर्थः। अर्थक्रियाऽभावेऽपि सत्त्वं किं न स्यात्? इत्याशङ्क्याह—*अर्थक्रियेति*॥ सर्वस्य युगपत्करणेऽपि पुनः करणं किं न स्यात्? इत्याशङ्क्याह—*अतः सकृदिति*॥ अनिष्पन्नं हि निष्पादनीयम्, यावज्जीवकृत्यस्य चैकस्मिन् क्षणे कृतत्वान्न पुनः करणमित्यर्थः। *इत्युपसंहरतीति*॥ इत्यभिसन्धायोपसंहरतीत्यर्थः॥

स्थायिवादिमतेऽप्यर्थक्रियायाः प्रतिपन्नत्वात् कथं तन्निराकरणम्? इत्याशङ्क्य तात्पर्यमाह—*सिद्धान्तीति*॥ किं स्वविषयज्ञानजननमर्थक्रिया? उत क्षणान्तरोत्पादः? इति किंशब्दार्थः। आद्यमुत्थापयति—*तत्राहेति*॥ संविद्येवार्थ-क्रियालक्षणनिरसनं कस्मात्? इत्याशङ्क्याह—*युक्तमिति*॥ किं स्वसन्ताने ज्ञानजननम्? उत संतानान्तरे? नाद्यः;

पञ्चपादिका

जननम्? *प्राप्तं* तर्हि सर्वासामेव संविदां स्वसंविदितरूपत्वेन स्वविषयज्ञानाजननादसल्लक्षणत्वम्। न सन्तानान्तरेऽपि तज्जननम्; अनैन्द्रियकत्वात्, अनुमानेऽप्यर्थजन्यत्वाभावात्।

पञ्चपादिकाविवरणम्

बाह्यार्थानामेतादृशं सत्त्वम्, विज्ञानानां तु स्वविषयविज्ञानाजनकत्वान्न सत्त्वलक्षणमिति दूषयति—*प्राप्तं तर्हि सर्वासामिति*॥ *ननु* एकसन्तानज्ञानानामन्योन्यविषयविषयिताऽभावेऽपि पुरुषान्तरज्ञानस्य विषयतया पुरुषान्तरज्ञानं जनकमित्यर्थक्रियाल्लाभः संविदामिति, नेत्याह—*न सन्तानान्तरेऽपीति* ॥ पुरुषान्तरज्ञानं प्रति पुरुषान्तरज्ञानस्याप्रत्यक्षत्वात्, अनुमेयत्वादिति भावः। अनुमानज्ञानविषयत्वात् तर्हि सन्तानान्तरज्ञानस्य सन्तानान्तरज्ञानं जनकमिति, नेत्याह—*अनुमानेऽपीति* ॥ प्रत्यक्षमेवार्थजन्यम्, नानुमानादीति ते मतमित्यर्थः। *ननु* सर्वं संवेदनजातं सर्वज्ञज्ञानस्य विषयतया जनकं भवति, तस्य सर्वविषयप्रत्यक्षत्वादित्यत आह—

ऋजुविवरणम्

तत्र कस्यानैन्द्रियकत्वमिति न ज्ञायते, असिद्धयादि च भवेत्, तदर्थं व्याचष्टे—*पुरुषान्तरेति* ॥ *ननु* ऐन्द्रियकत्वाभावे पुरुषान्तरज्ञानं प्रतीयते, तत् कथम्? इत्याशङ्क्याभिप्रायमाह—*अनुमेयत्वादिति* ॥ "अनुमानेऽपी"ति कथमुक्तम्? प्रत्यक्षेऽप्यर्थजन्यत्वाभावप्रसङ्गात्, अपेः समुच्चयार्थत्वात्। "अर्थजन्यत्वाभावादि"ति चायुक्तम्; असिद्धत्वादित्याशङ्क्याभिप्रायमाह—*प्रत्यक्षमेवेति* ॥ "न सार्वज्ञेऽपी"त्यनेन कथं स्वविषयज्ञानजनकत्वमाशङ्क्य निराक्रियते? स्वविषयप्रत्यक्षज्ञानजनकत्वस्य निराकृतत्वात्, अनुमानपक्षे च विषयस्य जनकत्वाभावस्योक्तत्वात्, अतो न पुनराशङ्का युक्ता। तथा "सार्वज्ञे" इति तद्धितेन किं निर्दिश्यते? इति न ज्ञायते, तदर्थं सोपपादनमवतारयति—*ननु सर्वं संवेदनजातमिति* ॥ "साक्षादि"त्यनेन यदि ज्ञानस्यैवाव्यवधानेन जनकत्वमुच्यते, तर्हि संसारसंविदेकरूपत्वप्रसङ्गलक्षणो हेतुरसिद्धः स्यात्; संवेदनस्यैव जनकत्वात्, संसारसंविदेकरूपत्वेन च सर्वज्ञज्ञानस्योपप्लुतत्वस्य विवक्षितत्वादित्याशङ्क्याह—*साक्षादिति* ॥ *सह विज्ञानोपप्लवैरिति* ॥ यद्वा—साक्षादिति व्यर्थम्; प्रत्यक्षज्ञानजनकत्वस्य विवक्षितत्वात्, तत्सामर्थ्यादेव साक्षात्त्वस्य लब्धत्वात्, प्रत्यक्षे विषयस्य साक्षादेव व्यापारा-

तत्त्वदीपनम्

प्रकाशत्वेन स्वविषयज्ञानजनकत्वासंभवादित्यर्थः। द्वितीयमनुवदति—*नन्वेकेति* ॥ नच विषयत्वे स्वप्रकाशत्वभङ्गः; स्वज्ञानं स्वप्रकाशमित्यभ्युपगमादित्यर्थः। सन्तानान्तरशब्देन किं संसारिसन्तानो विवक्षितः? उतेतरः? इति विकल्प्याद्यमयुक्तमित्याह—*नेत्याहेति* ॥ तत्रापि किं स्वविषयप्रत्यक्षज्ञानजनकत्वम्? उतानुमानजनकत्वम्? इति विकल्प्याद्यनिरासार्थमुक्तम्—"अनैन्द्रियकत्वादि"ति, तदनुपपन्नम्; किं स्वात्मानं प्रत्यनैन्द्रियकत्वम्? उत परं प्रति? नाद्यः; असिद्धेः, न द्वितीयः; पुरुषान्तरस्य पुरुषान्तरज्ञानव्यवहारभङ्गप्रसङ्गादित्याशङ्क्याह—*पुरुषान्तरेति* ॥ अथवा—अनैन्द्रियकत्वमसिद्धम्; स्वज्ञानस्यापरोक्षत्वात्, इत्याशङ्क्याह—*पुरुषान्तरज्ञानस्येति* ॥ टीकायां पुरुषान्तरस्येति शेषः। कथं तर्हि तत्प्रथा? इत्याशङ्क्य चेष्टादिलिङ्गेनेत्याह—*अनुमेयत्वादिति* ॥ द्वितीयमनुवदति—*अनुमानज्ञानेति* ॥ अनुमानेऽप्यर्थजन्यत्वाभावं वदता प्रत्यक्षस्याप्यर्थजन्यत्वं निरस्तं स्यात्; अपिशब्दप्रयोगात्, असिद्धिश्च हेतोरित्याशङ्क्याह—*प्रत्यक्षमिति* ॥ अपिशब्देनागमज्ञानादेरर्थजन्यत्वं निरस्तम्। न चासिद्धता; अवर्तमानस्य जनकताऽसंभवादित्यर्थः। नचात्र युक्तिः प्रष्टव्या, त्वयाऽङ्गीकृतत्वादित्याह—*इति ते मतमिति* ॥ द्वितीयमुत्थापयति—*नन्विति* ॥

पुरुषान्तरे पुरुषान्तरज्ञानस्य स्वविषयप्रत्यक्षानुमानजनकत्वस्य निरस्तत्वात् कथं कल्पान्तरोत्थितिः? तत्राह—*तस्येति* ॥ ईश्वरस्यास्मद्विलक्षणत्वात् सर्वमपरोक्षं भवतीत्यर्थः। सर्वो विषयः प्रत्यक्षोऽस्येति सर्वविषयप्रत्यक्षम्, तस्य भावस्तत्त्वम्; तस्मादित्यक्षरार्थः। सर्वस्येश्वरप्रत्यक्षत्वेन साक्षात् संविज्जनकत्वस्य सिद्धत्वात् 'साक्षादि'ति विशेषणं व्यर्थमित्याशङ्क्याह—*साक्षादिति* ॥ किमुपप्लुतं ज्ञानं तस्य विषयः? उत ज्ञानमात्रम्? इति विकल्प्याद्य॰

पञ्चपादिका

न सार्वज्ञेऽपि साक्षात् स्वसंविदं जनयति ; संसारसंविदेकरूपत्वप्रसङ्गात्,

पञ्चपादिकाविवरणम्

न सार्वज्ञेऽपीति ॥ *साक्षादिति* ॥ सह विज्ञानोपप्लवैरव्यवधानेन सर्वज्ञज्ञानोपरक्ततया ; तदभेदेनेत्यर्थः। तत्र हेतुः—*संसारसंविदेकरूपत्वप्रसङ्गादिति* ॥ संविद्विषययोरभेदोपगमात् सांसारिकज्ञानैः सोपप्लवैः सर्वज्ञज्ञानं दूषितं स्यादिति भावः । *ननु* सर्वोपप्लवोपरक्तमपि तत्त्वज्ञानेन बाधितत्वान्न दोषमावहति, न तावत्तदेव ज्ञानं सोपप्लवं बाधते ; प्राप्ति-बाधयोरेकस्मिन् क्षणेऽनुपपत्तेः, ज्ञानान्तरस्य तु न पूर्वज्ञानोपप्लवो विषयः, येन

ऋजुविवरणम्

दित्याशङ्क्य व्याचष्टे—*साक्षादिति* ॥ *सहेति* ॥ तथापीन्द्रियाणां विषयसाहित्येन जनकत्ववद् एतदिति शङ्का स्यात् ; तदर्थमाह—*अव्यवधानेनेति* ॥ इन्द्रियाणां विषयव्यवधानादिति भावः । *यद्वा*—"साक्षादि"त्यस्य व्याख्या—*अव्यवधानेनेति* ॥ तथापि सजातीयज्ञानस्योत्तरज्ञानजनकत्वेऽपि नोत्तरज्ञानस्य पूर्वज्ञानाकारत्वम्, तद्वदिति शङ्का स्यात्, यद्वा—ज्ञानजनकत्वमव्यवधानेन विषयाणां सर्वैरभ्युपगतम्, नतु ज्ञानस्य तदाकारत्वम्, तद्वदत्रापीति शङ्कानिवृत्त्यर्थमाह—*सर्वज्ञज्ञानोपरक्ततयेति* ॥ तथाऽपि भिन्नयोरुपराग इति शङ्कानिवृत्त्यर्थमाह—*तदभेदेनेति* ॥ *यद्वा* अव्यवधानेन तदुपरक्तत्वं हेतुर्भिन्नयोरुपरागेऽपि, न तदाकारत्वम्, तदर्थम्—*तदभेदेनेति* ॥ यद्वा—सह विज्ञानोपप्लवैर्जनकत्वेऽपि तावन्मात्रेण तस्य दूषणमापादयितुं न शक्यते, तदर्थमाह—*तदभेदेनेति* ॥ अभेदेन तावन्मात्रत्वे नाभिमतदूषणं भवेत्, तदर्थमाह—*सर्वज्ञज्ञानोपरक्ततयेति* ॥ यद्वा—सह विज्ञानोपप्लवैः सर्वज्ञज्ञानेनाभेदोऽपि कथं घटते ? इत्याशङ्क्याह—*सर्वज्ञज्ञानोपरक्ततयेति* ॥ *ननु* उपरागोऽपि देशादिभेदात् कथं घटते ? इत्याशङ्क्याह—अव्यवधानेनेति* ॥ *एतदुक्तं भवति*—अव्यवधानेन जनकत्वादुपरागः, तदुपरक्तत्वेन चाभेदः, इति हेतु-हेतुमद्भावो दर्शितः ; तैरङ्गीकृतत्वात् । तदुक्तम्—

भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः । हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम् ॥ इति ।

"संसारसंविदेकरूपत्वप्रसङ्गादि"ति ॥ किमनेन पूर्ववादिनोऽनिष्टमापादितम्? नहि संविदेकरूपत्वं समानरूपत्वमनभ्युपगतम्, अनिष्टं वा, तथा कस्य संसारसंविदेकरूपत्वम्, इति न ज्ञायते, तदर्थमभिप्रायमाह—*संविद्विषययोरिति* ॥ "अतद्रूपत्वे तद्विषयत्वायोगादि"ति व्यधिकरणम् ; नहि जनकज्ञानस्योपप्लवशून्यत्वे जन्यसर्वज्ञज्ञानस्योपप्लुतत्वा-

तत्त्वदीपनम्

निरासार्थं विशेषणोपादानं युक्तमित्यर्थः । अर्थान्तरमाह—*अव्यवधानेनेति* ॥ तदेव स्पष्टयति—*सर्वज्ञेति* ॥ उपरक्तत्वं संबन्धमात्रमिति निराकर्तुमाह—*तदभेदेनेति* ॥ नच—अस्मिन् पक्षे विशेषणं व्यर्थमिति—शङ्क्यम् ; किमनयोरभेदः ? उत भेदः ? इति विकल्प्याद्यनिरासार्थत्वादित्यर्थः । संविदेकत्वं संवित्समानस्वभावत्वम्, तस्य चेष्टत्वाद्धेतोराभासत्वमित्याशङ्क्याह—*तत्रेति*॥ हेतुत्वं व्यनक्ति—*संविद्विषययोरिति*॥ *एकरूपत्वम्=अभिन्नत्वम्, ततश्च हेतुत्वं युक्तमित्यर्थः । *दूषितं स्यादिति* ॥ ततश्च हेयं स्यादित्यर्थः ॥

यथा ब्रह्म स्वाभिन्नान् जीवान् पश्यदपि न तद्दोषेण दूष्यते ; तस्य बाधितत्वात्, तद्वदेवात्रापीति चोदयति—*ननु सर्वेति* ॥ यस्मिन् ज्ञान उपप्लवः, तत् किं तं बाधते ? आहो ज्ञानान्तरमिति विकल्प्याद्यं दूषयति—*न तावदिति* ॥ यस्मिन् क्षण उपप्लवप्रसक्तिः, तस्मिन् क्षणे बाधः ? उत क्षणान्तरे ? नाद्य इत्याह—*प्राप्तीति* ॥ प्राप्तस्य बाधो वक्तव्यः, नचैकस्मिन् क्षणे ते भवत इत्यर्थः । द्वितीये क्षणिकत्वक्षतिरित्यर्थः । द्वितीयेऽपि पूर्वज्ञानोपप्लवः किं तस्य विषयः ? उत न ? नाद्य इत्याह—*ज्ञानान्तरस्येति* ॥ पूर्वज्ञानग्रहणमन्तरेण न तदुपप्लवो ग्रहीतुं शक्यः, नच तद्ग्रहणयोग्यम् ; एकसन्ततिपतितयोर्विषय-विषयिभावानभ्युपगमादित्यर्थः । द्वितीयं प्रत्याह—*येनेति* ॥ उपप्लवप्रतिपत्तौ तदनुवादेन बाधो युज्यते, नान्यथा ; तस्मादविषयत्वानुपपत्तिरित्यर्थः । विषयत्वमङ्गीकृत्य

वार्तिकम्

निःसामान्यविशेषत्वेन तत्कल्पनानुपपत्तेर्विरोधावश्यंभावात् । तस्मान्नास्त्यात्मन्यपरोक्षत्वम्, तदभावाच्च

पञ्चपादिका

अतद्रूपत्वे तद्विषयत्वायोगात् ॥ *अथ* क्षणान्तरोत्पादोऽर्थक्रिया ? *चरमक्षणस्यासल्लक्षणत्वप्रसङ्गः* !!

पञ्चपादिकाविवरणम्

तदनुवादेन बाधः स्यात्, विषयत्वे च बाधकज्ञानेऽप्युपप्लवानामभेदः स्यात् । तर्हि विनैवोपप्लवैः सार्वज्ञे ज्ञाने विज्ञानान्युपरज्यन्त इति, नेत्याह—*अतद्रूपत्व इति* ॥ सर्वज्ञस्य लौकिकोपप्लवानवभासनादुपदेशायोग इति भावः ॥ *अथ* न स्वविषयज्ञानजननमर्थक्रिया, किन्तु सजातीयक्षणान्तरोत्पाद इति चोदयति—*अथेति* ॥ उत्तरमाह—*चरमक्षणस्यासल्लक्षणत्वप्रसङ्ग इति* ॥ अयमर्थः—अहमितिसन्तानपतितानि विज्ञानानि स्थायित्वानुसन्धान कल्पनाभ्यां रागादिदोषैर्विपर्ययैश्चोपप्लुतानि पूर्व-पूर्वसजातीयविषयविज्ञानलक्षणसंस्कारेभ्य उत्तरोत्तराण्युत्पद्यन्ते । तत्र सर्वमिदं क्षणिकमिति भावनया स्थायित्वकल्पना निवर्तते ; स्वलक्षणभावनया द्रव्य-गुण-शब्द-कर्म विशेषण विशेष्यकल्पना विनश्यति ; दुःखमिति भावनया रागादिदोष प्रवृत्ति-सुख-दुःखोपप्लवाः क्षीयन्ते ; शून्यमिति भावनया विषयोपप्लवविगमः ; ततश्च भावनाभेदैश्चतुर्भिश्चतुर्विधोपप्लवे क्रमेण मन्दीकृते, भावनाप्रकर्षपर्यन्तात् समनन्तरप्रत्ययात् सर्वोपप्लवविरहि विज्ञानमुत्पद्यते, तत् संसारसन्तानस्यान्त्यत्वाच्चरमम्, इति तस्य कार्या-

ऋजुविवरणम्

भावो ज्ञानविषयत्वं निरुणद्धीत्याशङ्क्याभिप्रायमाह—*सर्वज्ञस्येति* ॥ पूर्वग्रन्थेष्वपि क्षणान्तरजनकत्वं निरस्तम् ; क्षणान्तरस्यापि ज्ञानरूपस्य विवक्षितत्वात्, "अथ क्षणान्तरं"त्यनेनापि तदेव निरस्यते ; अतः पौनरुक्त्यमित्याशङ्क्य विषयभेदमाह—*अथ न स्वविषयेति* ॥ "मैवमि"त्यादेः प्रयोगे परिहारोऽपि स्पष्टतया प्रतीयते, तदभावादवतारयति—*उत्तरमाहेति* ॥ कथं चरमक्षणस्यासत्त्वमापादितम् ? नहि चरमक्षणो नाम निरूपयितुं शक्यते ; अनन्तत्वादापेक्षिकत्वाच्च चरमत्वस्य । नच हेतुरपि चरमत्वे निरूपयितुं शक्यते । कथं वा तस्यासत्त्वमिति न ज्ञायते । भवतु वा चरमस्यैकस्यासत्त्वम्, नानेन किंचिद्धीयते ; अन्येषामर्थक्रियालाभेन सत्त्वलाभादित्याशङ्क्य व्याचष्टे—*अयमर्थः—अहमिति सन्तानेति* ॥ "चरमत्वानुपपत्तेरि"ति कथमुक्तम् ? सर्वज्ञज्ञानजननेऽपि तस्य सन्ता-

तत्त्वदीपनम्

दूषणमाह—*विषयत्व इति* ॥ विषय-विषयिणोरभेदोपगमादुपप्लवस्य ज्ञानाभिन्नतया न बोध्यत्वम्, ज्ञानस्यापि बाधापातादित्यर्थः ॥ सर्वज्ञज्ञानेन विज्ञानमात्रं विषयीक्रियत इति विकल्पान्तरमुत्थापयति—*तर्हीति*॥ किं ज्ञानमात्रस्य विषयत्वायोगः ? उत विशिष्टस्य ? नाद्यः ; उपप्लवविषयत्वाभावेऽपि ज्ञानमात्रविषयत्वसंभवात्, न द्वितीयः ; इष्टापत्तेः, इत्याशङ्क्याह—*सर्वज्ञस्येति* ॥ दुष्टं दृष्ट्वोपदेष्टव्यम् ; अन्यथा मुक्तान् प्रत्युपदेशः स्यादित्यर्थः । क्षणान्तरं नाम ज्ञानान्तरम्, तद् निरस्तम्, इति कथं पुनराशङ्का ? तत्राह—*अथेति*॥ चरमक्षणस्यापि क्षणत्वात् क्षणान्तरोत्पादकत्वम्, ततः कथमसत्त्वप्रसक्तिः ? इत्याशङ्क्य, क्षणान्तरोत्पादकत्वे चरमत्वं हीयेतेत्याह—*उत्तरमाहेति* ॥

सजातीयपूर्वक्षणस्योत्तरक्षणोत्पादकत्वनियमात् चरमक्षण एव नास्तीति तटस्थशङ्कां निरस्यति—*अयमर्थ इति*॥ *अनुसन्धानकल्पना = ज्ञातृ-ज्ञान-ज्ञेयसंबन्धरूपकल्पना । तथापि कथं चरमक्षणोदयः ? इत्याशङ्क्य चतुर्विधभावनाप्रभेदात् तदुदय इति वक्तुं भावनानामुपयोगमाह—*तत्रेति* ॥ स्वमसाधारणं लक्षणं स्वरूपं यस्य तत् स्वलक्षणम् ; असङ्गमिति भावनयेत्यर्थः । ज्ञानव्यतिरिक्तं सर्वं दुःखम्, तद्धेतुत्वादिति भावनयेत्यर्थः । रागादिदोषाभ्यां प्रवृत्तिः, ततः सुखदुःखोपप्लवा इत्यर्थः । उपप्लुतज्ञानस्य विरोध्यभाव उपप्लुतज्ञानान्तरोत्पादकत्वम् । विरोधिभावनाप्रभेदैरुपप्लवस्य निरस्तत्वान्निरुपप्लवं ज्ञानं जायते । ततश्चरमक्षणाभावचोद्यमसङ्गतमित्यर्थः ॥ भवतु चरमक्षणः, तथाऽपि कथमसत्त्वं तस्य इत्याशङ्क्य, सोऽपि किं क्षणान्तरजनकः ? उत न ? चरमे दूषणमाह—*तस्येति* ॥ अर्थक्रियाकारि सदित्यभ्युपगमादित्यर्थः । असत्त्वमप्यस्तु, को दोषः ? इत्यत्राह—*क्रमेणेति* ॥

पञ्चपादिका

नच सार्वज्ञज्ञानजननेनार्थवत्त्वम्; चरमत्वानुपपत्तेर्मुक्त्यभावप्रसङ्गात्। नच संवित् संविदो विषयः;

पञ्चपादिकाविवरणम्

न्तराभावादसत्त्वप्रसङ्गात् क्रमेण सर्वमसदेव पूर्वं स्यादिति। *ननु* चरमक्षणोऽपि स्वसन्तानज्ञानान्तराभावेऽपि सर्वज्ञज्ञानं विषयतया जनयतीति, नेत्याह—*नच सार्वज्ञज्ञानजननेति*॥ तुल्यस्वभावयोः कार्य-कारणभाव एवैकसन्तानता नाम, चरमक्षण-सार्वज्ञज्ञानयोर्विशुद्धतया तुल्यस्वभावयोः कार्य-कारणभावादविच्छिन्नः सन्तान इति भावः। मा भूत् सन्तानविच्छेद इति, नेत्याह—मुक्त्यभावप्रसङ्गादिति*॥ सन्तानविच्छेदो हि मुक्तिरभिप्रेतेति भावः। *अथ* सर्वज्ञसन्तानस्य तुल्यसन्तानस्य तुल्यस्वभावतया जनकत्वात् तत्सन्तानैक्यमेव मुक्तिरिति, तर्हि विषयतया जनकत्वमेव नास्तीत्याह—*नच संवित् संविदो विषय इति*॥ प्रत्यक्षत्वं विषयशब्देनोच्यते; पुरुषान्तरसंवेदनस्यानुमेयत्वात्। *अथवा*—प्रत्यक्षस्यैव संवेदनस्य देहान्तरसम्बन्ध एवानुमीयत इति सर्वप्रमाणाविषयः संविदिति, *अथवा—संविदात्मना भेदाभावादित्यस्यायमर्थः—संवित् संविदन्तरान्न संविदा-

ऋजुविवरणम्

त्मान्तरत्वात्, इत्याशङ्क्याभिप्रायमाह—*तुल्यस्वभावयोरिति*॥ कथं मुक्त्यभावप्रसङ्गः? सांसारिकोपप्लवविगमात्, तावन्मात्रेण मुक्त्युपपत्तेरित्याशङ्क्याभिप्रायमाह—*सन्तानविच्छेदो हीति*॥ "नच संवित्संविदो विषयः" इति कथमुक्तम्? संवेदनविषयज्ञानादर्शनादित्याशङ्क्य व्याचष्टे—*प्रत्यक्षत्वं विषयशब्देनेति*॥ अथवा—"संविदात्मने"त्यनेन प्राचीनपक्षद्वयेऽयं हेतुः समानस्वभावविवक्षयेति द्योतितम्। "संवित् संविदन्तरादि"त्यसम्बन्धम्; एवं भेदनिराकरणेऽतिप्रसङ्गात्, घटो घटान्तराद् न घटाकारेण भिद्यते; प्रतियोगिनोऽघटत्वप्रसङ्गात्, एको घटः स्यात्, अघटाकारेण भेदेऽपि घट एक एव स्यादिति सर्वत्र भेदापलापस्य शक्यत्वात्, मैवम्; घटादेः स्वरूपस्य प्रत्यक्षेणैव विलक्षणत्वप्रतीतेर्नैकत्वमापादयितुं शक्यम्, अत्र तु प्रतीयमान एव स्वरूपस्यैकत्वे भेदमप्रतीयमानं परिकल्प्य विषय-विषयित्वकल्पने भेद एव न सिद्ध्यति; भेदनिरूपणस्य भेदकाकारसापेक्षत्वात्, तस्य च स्वरूपाकारान्तरा-

तत्त्वदीपनम्

चरमक्षणस्यासत्त्वे तज्जनकतया न पूर्वस्य सत्त्वम्, ततश्च तत्पूर्वस्याप्येवमेव, इति सर्वासत्त्वमित्यर्थः। द्वितीयेऽपि किं स्वसन्ताने कार्यारम्भकत्वम्? उत सन्तानान्तरे? आद्ये चरमत्वव्याघात इत्यभिप्रेत्य द्वितीयमुत्थापयति—*ननु चरमेति*॥ स्वसन्ताने जनकत्वाभावान्न चरमत्वानुपपत्तिरित्याशङ्क्य, एतज्जन्यचैतन्यसन्तानान्तरत्वं न सिद्ध्यतीत्याह—*तुल्येति*॥ नच—सर्वविषयतयाऽतुल्यस्वभावत्वान्नैकसन्तानत्वमिति—शङ्क्यम्; सर्वत्रापि कस्यचिद्वैषम्यस्य भावादेकसन्तानताऽनुपपत्तेरित्यर्थः॥ सन्तानानुच्छित्तावपि सांसारिकोपप्लवविगममात्रेण मुक्तिः स्यादित्याशङ्क्य, सिद्धान्तक्षतेर्नैवमित्याह—*सन्तानेति*॥ सर्वज्ञसन्तानैक्यं मोक्ष इति मतान्तरमुत्थापयति—*अथेति*॥ हेत्वसिद्ध्या दूषयति—*तर्हीति*॥ संविदात्मनेत्यस्यायमर्थः—*भेदाभावात्=वैलक्षण्याभावादित्यर्थः। तत्र हेतुमाह—*संविदात्मनेति*॥ संविद्रूपेण समयोर्न विषय-विषयिभाव इत्यत्र दृष्टान्तमाह—*प्रदीपस्येति*॥ स्वप्रकाशमपि पुरुषान्तरसंवेदनं पुरुषान्तरसंवेदनस्य विषयो भवति, ततः कथं संविदोरविषयत्वाभिधानम्? तत्राह—*प्रत्यक्षत्वमिति*॥ पुरुषान्तरसंवेदनस्य प्रत्यक्षत्वाभावान्न तत्र व्यभिचार इत्यर्थः। पुरुषान्तरसंवेदनस्याप्रत्यक्षत्वात् कथं तत्प्रतीतिः? तत्राह—*पुरुषान्तरेति*॥ संविदोऽद्वितीयत्वात् कथं संविदितरविषयत्वम्? इत्याशङ्क्य, इष्टापत्त्योत्तरमाह—*अथवेति*॥ अथवेत्यस्य—'अविषयः' इत्यनेन संबन्धः। पुरुषान्तरसंवेदनस्यानुमेयत्वमाश्रित्याप्रत्यक्षत्वम्, प्रत्यक्षेऽपि, अत्र तु तदपि नेत्युच्यत इत्यर्थः। चेष्टादिलिङ्गेन परसंवेदनानुमानमिष्टमिति, तत्राह—*प्रत्यक्षस्येति*॥

संविद्भेदमङ्गीकृत्य न समानयोर्विषय-विषयिभावः प्रदीपवदित्येवं व्याख्यानं सिद्धवत्कृत्वा भेदाभावपरतया "संविदात्मने"ति ग्रन्थं व्याचष्टे—*अथवेति*॥ संविदन्तरात् संवेदनस्य व्यावर्तकं किं संवित्त्वम्? उतासंवित्त्वम्? नाद्य इत्याह—*संविदिति*॥ प्रतियोगिनोऽपि संवित्त्वे संवित्त्वं तस्य व्यावर्तकं न स्यात्, यथा घटत्वं न घटयो-

पञ्चपादिका

संविदात्मना भेदाभावात्, प्रदीपस्येव प्रदीपान्तरम्। *किञ्च* नार्थक्रियातः सत्त्वं भवति; स्वकारणनिष्पन्नस्य कार्यजननात्। अतः प्रतीतिर्वक्तव्या। तत्र तस्या अन्यतः सत्त्वप्रतीतिः, तस्या अप्यन्यतः, इत्यनवस्थानान्न

पञ्चपादिकाविवरणम्

कारेण भिद्यते ; प्रतियोगिनोऽसंवित्त्वप्रसङ्गादेका संवित् स्यात्। असंविदाकारेण भेदेऽपि संविदेकैव स्यात्, इति न संविदां विषय-विषयिभाव इति ॥

किंचेति ॥ अर्थक्रिया नाम कारणसत्त्वे हेतुः ? प्रतीतिनिमित्तं वा ? इति विकल्प्य हेतुत्वे दूषणमाह— *स्वकारणनिष्पन्नस्येति* । कार्यात्प्रागेव कारणस्य निष्पन्नत्वादित्यर्थः । नच निष्पन्नमप्यर्थक्रियातः पूर्वमसदिति शक्यं वक्तुम् ; शशविषाणतुल्यत्वेनाकारणत्वप्रसङ्गात् । प्रतीतिपक्षेऽनवस्थादूषणमाह—*तत्र तस्या अन्यत इति* ॥ *ननु* कार्यमर्थक्रिया नाम, ज्ञानानि च पूर्वेषामुत्तरोत्तराणि कार्याणि स्वयंसिद्धानि, इति न

ऋजुविवरणम्

स्यामनिरूपणात्। एवं यत्र यत्र भेदोऽस्ति, तत्र तत्र प्रामाणिको भेदाकारोऽस्त्येव, अत्र तु भेदाकारो नास्तीति न भेदसिद्धिरिति भावः। *ननु* अर्थक्रिया सत्त्वोत्पादिका न भवतीत्यत्र पूर्वं युक्त्यन्तरानभिधानात् "किंचे"ति वक्तुं न युक्तमित्याशङ्क्यावतारयति—*किंचेति ॥ अर्थक्रिया नामेति* ॥ "स्वकारणनिष्पन्नस्ये"त्यत्र कारण-शब्देनार्थक्रियानिष्पादकमभिधीयते, "निष्पन्नस्य" इत्यनेन निष्पाद्यमर्थक्रियास्वरूपम्, "कार्यजननादि"त्यत्र कार्यशब्देन सत्त्वं निर्दिश्यत इति प्रतिभाति ; तथा सति साध्यहेत्वोर्व्याघातः स्यात्, स्वकारणान्निष्पन्नस्य कार्यस्य सत्त्वजनकत्वप्रतीतेः। अथ "स्वकारणनिष्पन्नस्ये"त्यत्रार्थक्रियाजनकस्य कारणस्य निष्पत्तिरभिप्रेता ; तथा सति षष्ठ्यर्थस्यानन्वयः स्यात्, "कार्यजननादि"ति च हेतुना न साध्यं किञ्चिद् दृश्यते। अथ षष्ठ्यनादरेण पञ्चम्यर्थः स्वीक्रियते ; तथाऽपि "जनना"दिति पञ्चम्या अनन्वयः स्यात्, हेतोरनुपयोगश्च स्यादित्याशङ्क्य व्याचष्टे—*कार्यात्प्रागेवेति* ॥ दिग्योगे पञ्चमीत्यर्थः। षष्ठ्यर्थस्य चानादरेण हेतुत्वमेव विवक्षितमिति भावः। *ननु* स्वकारणान्निष्पन्नस्याप्यर्थक्रियाजननात् प्रागसत्त्वमेवेत्याशङ्क्याह--*नच निष्पन्नमपीति*॥ "स्वज्ञानार्थक्रियायाः" इत्ययुक्तम् ; स्वस्य ज्ञानं स्वजन्यं निरस्तम् ; अविषयत्वात्। नच तद्व्यतिरिक्तं स्वज्ञानमस्ति। नापि तस्य पूर्वज्ञानार्थ-क्रियारूपत्वम्, इत्याशङ्क्याह—*ननु कार्यमिति* ॥ "ननु तर्ह्यर्थक्रियातः" इत्ययुक्तम् ; कार्यज्ञानस्वप्रकाशत्वस्य पूर्वज्ञानसत्त्वे ग्राह्यत्वविरोधित्वाभावादित्याशङ्क्याह—*तर्हि कार्य-कारणेति* ॥ "स्थायिनो"पीति व्यर्थम् ; अयोग-

तत्त्वदीपनम्

व्यावर्तकं तथेत्यर्थः। द्वितीयं प्रत्याह—*असंविदिति* ॥ *एकैव स्यादिति* ॥ प्रतियोगिसंविदेव स्यादित्यर्थः। अर्थक्रियातः सत्त्वाभावे पूर्वमेकस्य हेतोरनभिधानात् "किंचे"त्यनुपपन्नमित्याशङ्क्य, विकल्पपूर्वकं व्याचष्टे—*किंचेति* ॥ अर्थक्रियाकारित्वं न सत्त्वलक्षकमित्यत्रोपपत्त्यन्तरं चशब्देन समुच्चीयते, किंशब्दस्तु विकल्पद्वयं सूचयति। "अर्थक्रिया सत्त्वनिष्पादिके"त्यत्रापि विवेचनीयम्—किमनिष्पन्ना निष्पादयति ? उत निष्पन्नेति ? तत्राद्यं निराकर्तुम्—*स्वकारणनिष्पन्नस्येत्युक्तम्* ॥ तस्यायमर्थः—स्वकारणशब्देनार्थक्रियानिष्पादकमुच्यते। तस्याभिनिष्पन्नस्यार्थ-क्रियास्वरूपस्य सत्त्वलक्षणकार्यजनकत्वाद् नानिष्पन्नस्य हेतुत्वमिति। द्वितीयं प्रत्याह—*कार्यादिति* ॥ निष्पन्नत्वं च कारणनिष्पत्तौ, तन्निष्पत्तिश्च स्वाधीनकार्यात् प्रागेवेत्यर्थः ॥

घटस्य कारणं मृदादि, तस्मान्निष्पन्नस्य घटस्यार्थक्रियाजनकत्वमित्युक्तं टीकायाम्, एतावता कथं सत्त्वस्यार्थ-क्रियाऽधीनत्वाभावः ? इति शङ्कायामाह—*कार्यादिति* ॥ उदकाहरणादिलक्षणार्थक्रियाजननात् पूर्वमेव घटसत्त्वस्य लाभान्न तदधीनं सत्त्वम्, इतरथेतरेतराश्रयादित्यर्थः। कारणनिष्पत्तिरर्थक्रियाधीनेति न ब्रूमः, किंतु तत्सत्त्वमित्या-शङ्क्याह—*नचेति* ॥ *तत्र तस्या इत्यादेरयमर्थः*—अर्थक्रिया सत्त्वज्ञापिका चेत्, तर्हि तस्या अपि प्रतिपन्नाया ज्ञापकत्वं वक्तव्यम्। प्रतिपत्तिश्चार्थक्रियान्तराधीना, तस्या अप्येवमेवेत्यनवस्थेति। ज्ञानविषयज्ञानस्यानिरस्तत्वात् "स्वज्ञानार्थक्रियायाः" इत्यसंगतमित्याशङ्क्य, स्वजन्यज्ञानं स्वज्ञानमिति विवक्षितत्वान्न दोष इत्याह—*ननु कार्य-

पञ्चपादिका

क्वचित् सत्तावगमः, इति शून्यं जगदभविष्यत् । *ननु* स्वज्ञानार्थक्रियायाः स्वयंसिद्धत्वान्नानवस्था ? *न* तर्ह्यर्थक्रियातः सत्तावगमः ; न हि स्वरूपमेव स्वस्यार्थक्रिया ॥ *यत्पुनः* क्रमेणार्थक्रिया न युज्यते ; पूर्वोत्तरकालयोस्तस्य विशेषाभावादिति, *नैष दोषः* ; स्थायिनोऽपि कारणस्य सहकारि-सव्यपेक्षस्य जनकत्वाद् विशेषाभावादित्ययुक्तम् ।

*अथ कारणस्यान्यापेक्षा न युक्ता, *अकारणस्यापि नतरामित्यसहकारि विश्वं स्यात् । *अथाकारणं

पञ्चपादिकाविवरणम्

प्रतीत्यनवस्थेति चोदयति—*ननु स्वज्ञानार्थक्रियाया इति* ॥ तर्हि कार्यकारणभूतानां ज्ञानानां स्वयं सिद्धत्वान्नार्थक्रिया सत्ताऽवगतिनिमित्तमित्याह—*न तर्ह्यर्थक्रियात इति* ॥ मा भूत् कारणभूतं ज्ञानं कार्यभूत-ज्ञानाधीनप्रकाशम् ; स्वयंप्रभत्वात्, तथाऽपि स्वयं स्वेनैवावभासत इति स्वयमेव स्वस्यार्थक्रियेत्याह—*नहि स्वरूपमेवेति* ॥ तस्मान्नार्थक्रियाकारित्वलक्षणं सत्त्वम्, किन्तु स्वाभाविकम्, इति सकृत्कार्यं कृत्वा तूष्णीं-भूतस्यापि स्थायिनः सत्त्वं न विरुध्यत इति ॥

इदानीं क्रमेणापि कार्यं कृत्वा सत्त्वं न विरुद्ध्यत इत्याह—*यत्पुनः क्रमेणेति* ॥ शक्तस्यापि सहकारि-सन्निधानविशेषक्रमापेक्षया कार्यक्रमो युज्यत इत्याह—*स्थायिनोऽपीति* ॥ शक्तस्य सहकारिकारणापेक्षा-मपलपति—*अथ कारणस्येति* ॥ गूढाभिसन्धिरुत्तरमाह—*अकारणस्यापि नतरामिति* ॥ मा भूत् तर्हि शक्तस्याशक्तस्य च सहकार्यपेक्षेति, तत्राह—*असहकारि विश्वं स्यादिति* ॥ शक्तस्यैव सहकार्यपेक्षया

ऋजुविवरणम्

पद्यस्य तन्निमित्तत्वाभावादित्याशङ्क्याह—*शक्तस्यापीति* ॥ "कारणस्यान्यापेक्षा न युक्ते"ति कथमुक्तम् ? नहि कारणत्वमन्यापेक्षित्वे विरुद्ध्यते, येन हेतुत्वेन न विवक्ष्येत । इष्टविघातकारी चायं हेतुः; चोद्यवादिनाऽपि कारणस्यानन्या-पेक्षित्वस्याङ्गीकृतत्वादित्याशङ्क्य व्याचष्टे—*शक्तस्येति* ॥ शक्तस्य सहकारिसापेक्षत्वस्य संप्रतिपन्नत्वात् तद-संभवेन चोद्ये कृते, तत्समर्थनं कर्तव्यम्, न त्वकारणस्य सहकारिकारणापेक्षानिराकरणं युक्तमित्याशङ्क्यावतारयति—*गूढाभिसन्धिरिति* ॥ "असहकारि विश्वमि"त्यनिष्टापादनं न युज्यते ; सहकारिव्यपेक्षत्वं मा भूदिति चोदितत्वा-दित्याशङ्क्याह—*शक्तस्यैवेति* ॥ "अथाकारणं कारणोत्पत्तये"इति व्याहतम् ; "उत्पत्तयेऽपेक्षते" इत्यनेन कारणत्वप्रतीतेः, 'अकारणमि'ति विरुद्धत्वात् । "अकारणमि"ति च न ज्ञायते—कुत्राकारणमिति ? "कारणोत्पत्तये"

तत्त्वदीपनम्

मिति*॥ ज्ञानस्य प्रकाशत्वमात्रेण कारणसत्त्वावगमस्य कथमर्थक्रियाऽनधीनत्वम् ? इत्याशङ्क्याह—*तर्हि कार्येति* ॥ स्वप्रकाशत्वेऽप्यर्थक्रियागम्यत्वं युक्तमिति शङ्कते—*मा भूदिति* ॥ एकस्यैव कार्यत्वं कारणत्वं चायुक्तमित्याह—*नेति* ॥ टीकायामपेक्षितमुपसंहारं दर्शयति—*तस्मादिति* ॥ सकृत् सकलकार्यकरणकक्षीकारे क्रमपक्षे दूषणं मुचेत्यत्राह—*इदानीमिति* ॥ क्रमेण कार्यं कृत्वा स्थितस्यापि सत्त्वं न विरुध्यत इतीदानीमाहेति योजना । कारणस्य स्थायित्वेऽपि सहकार्यपेक्षया जनकत्वाद् न सदा कार्यप्रसङ्ग इत्युक्तमयुक्तम् ; कारण-सहकारिणोरुभयोरपि स्थायित्वात् क्रमानुपपत्तेः, इत्याशङ्क्य, सन्निधानविशेषस्यागन्तुकत्वात् तत्क्रमापेक्षया कार्यक्रमो युक्त इत्याह—*शक्तस्यापीति* ॥

चोद्यवादिनाऽपि सहकारिण आस्थानात् कथं निरसनम् ? इत्याशङ्क्य, सहकारी नापलप्यते, किंतु समर्थस्यान्या-पेक्षेत्याह—*शक्तस्येति* ॥ शक्तस्य सहकार्यपेक्षायां निरस्तायां सैव समर्थनीया, न त्वकारणस्य तन्निरसनं युक्त-मित्याशङ्क्याह—*गूढेति* ॥ शक्तस्यापि सहकार्यपेक्षया कार्यकरत्वानुभवात् सहकार्याश्रयणीय इति गूढोऽभिसन्धिः । सहकारिनिरसनस्येष्टापत्तितां शङ्कते—*मा भूदिति* ॥ सहकार्यपलापवादिनं प्रत्यसहकारि स्यादित्यसमञ्जस-मित्याशङ्क्याह—*शक्तस्येति* ॥ कारणोत्पत्तये सहकारिणमपेक्षत इत्यभिधानात् कारणत्वं प्रतीयते, ततश्चाकारण-

पञ्चपादिका

कारणोत्पत्तयेऽपेक्षत इति चेत्, अथ तत् कारणस्य कारणम् ? अकारणं वा ? कारणं चेत्, नापेक्षितुमर्हति। अकारणं चेत्, नतराम्। *अथ* नापेक्षा हेतूनां सहकारिणीति ब्रूयात्, *दर्शनेन बाध्येत ; दृष्टं हि सहकार्यपेक्षत्वं हेतूनाम्। तस्माद् यथैव हेतोर्हेतुत्वं सति कार्ये केनाप्यतर्कणीयेन क्रमेण ज्ञायते ; सत्येव हेतौ कार्यस्य दर्शनात्, तथा समेतसहकारिण्येव दर्शनात् सहकार्यपेक्षस्य तद् विज्ञेयम् ॥

यस्तु मन्यते—सहकारिजनितविशेषो हेतुः कार्यं जनयति ; अन्यथाऽनुपकारिणोऽपेक्षा-

पञ्चपादिकाविवरणम्

कार्यकरत्वानुभवविरोध इति भावः। अशक्ता एव पदार्थाः सामग्रीलक्षणकारणोत्पत्तौ परस्परमपेक्षन्ते, इति नानुभवविरोध इत्याशङ्कते—*अथाकारणं कारणोत्पत्तय इति* ॥ कार्यं प्रत्यशक्ता अपि पदार्थाः सामग्रीकारणं प्रति शक्ता वा ? न वा ? इति विकल्पयति—*अथ तत् कारणस्येति* ॥ उभयत्र दूषणम्—*कारणं चेदिति* ॥ *अथ नापेक्षेत्युक्तार्थम्*। *ननु* शक्ताशक्तयोरपेक्षाऽभावे कथं सहकार्यनुभवः कथ्यते ? *ननु* कार्यस्याप्यसत्त्वाविशेषात् सर्वस्माद् जन्म किं न स्यात् ? कारणस्य वा विशेषसम्बन्धहीनस्य सर्वस्य जनकता किं न स्यात् ? इत्यव्यवस्थायां कथं कार्य-कारणभावमात्रं त्वया व्यवस्थाप्यते ? अथान्वय-व्यतिरेकसामर्थ्यात् कार्य-कारणनियम इति, सहकारिणोऽपि तथेत्याह—*तस्माद्यथैव हेतोरिति* ॥ क्व तर्हि सहकार्युपयोग इति ? तत्र मतान्तरमुपन्यस्य पूर्ववादिनं दूषयति—*यस्तु मन्यते सहकारिजनितविशेष इति* ॥

ऋजुविवरणम्

इति चाप्रस्तुताभिधानम्। कार्योत्पत्तौ कारणस्य सहकारिसव्यपेक्षत्वं हि निरूपणीयम्। तद् विहाय "कारणोत्पत्तये" इत्यभिधानात्, पूर्वोक्तानुभवविरोधश्चापरिहृतः, अतः कथमत्र चोद्यमित्याशङ्क्य व्याख्यानेनावतारयति—*अशक्ता एवेति* ॥ "अकारणमि"त्येतद् व्याख्यातम्। *ननु शक्ताशक्तयोरिति*॥ अपेक्षायां कारणसापेक्षत्वनिरूपणम्। तदभावेऽनुभवो विद्यमानोऽपि न सापेक्षत्वज्ञापक इति भावः। "तस्माद्यथैवे"त्यसम्बद्धम् ; दृष्टान्तवैषम्यात्, युक्त्या निरूपणासहस्याप्यनुभवमात्रेण व्यवस्थापने हि साम्यम्, तदत्र निरूपणासहत्वं कथम् ? इति न ज्ञायते। सम्प्रतिपत्तौ च दृष्टान्तता ; साऽपि न ज्ञायते, इत्याशङ्क्यासम्प्रतिपत्तिं दर्शयितुमव्यवस्थां दर्शयति—*ननु कार्यस्यापीति* ॥

तत्त्वदीपनम्

मिति व्याघातः। कारणस्योत्पन्नत्वात् तदुत्पत्तय इत्येतच्च विरुध्यत इत्याशङ्क्य तात्पर्यमाह—*अशक्ता इति*॥ अकारणं कारणम् ? अथाकारणम् ? इति विकल्पस्य व्याघातेनासंभवमाशङ्क्याह—*कार्यं प्रतीति* ॥ कार्यापेक्षयाऽसमर्थस्यापि सामग्रीं प्रति सामर्थ्यादिविकल्पनाद् न व्याघात इत्यर्थः। सामग्रीं प्रत्यसमर्थस्यापि तत्सामग्रीसिद्धये सहकार्यपेक्षेति दूषणाभासत्वमाशङ्क्याह—*उभयत्रेति* ॥ उक्तविकल्पदूषणयोस्तत्रापि सत्त्वात् तत्सामग्र्यां सहकार्यपेक्षेति वक्तव्यम्। तथाचान्धपरम्परेत्यर्थः ॥ सहकार्यनपेक्षत्वेऽनुभवविरोधस्योदीरितत्वात् पौनरुक्त्यमित्याशङ्क्यापेक्षाऽभावस्यानिष्टपर्यवसायितां दर्शयितुमुक्तस्मारणमित्याशयेनाह—*अथेति* ॥ 'अहं मनुष्यः' इत्यनुभववत् सहकार्यनुभवस्यापि युक्त्यसहत्वादसाधकत्वमिति शङ्कते—*नन्विति* ॥ अनुभवविरोधाद् युक्तय एवाभासीभवन्ति ; अन्यथाऽतिप्रसङ्गः स्यादित्याह सिद्धान्ती—*नन्विति* ॥ दध्नः क्षीर-मृदादावसत्त्वाविशेषे क्षीराद् जन्म निर्निमित्तम्, इति सर्वस्मादुत्पत्तिः स्यादित्यर्थः। मृदादेर्दधिजननासामर्थ्यम्, क्षीरस्य च तज्जननसमर्थत्वादुत्पत्तिरित्याशङ्क्य मृदादेरसामर्थ्यमसिद्धमित्याह—*कारणस्येति* ॥ अन्वय-व्यतिरेकविरोधाच्च क्षीर-दध्नोरुपादानोपादेयभावापलापो युक्त इति शङ्कते—*अथेति*॥ तुल्यमुत्तरमित्याह—*सहकारिण इति*। अतर्कणीयेन क्रमेणेति*॥ अतर्कणीयेन प्रकारेणेत्यर्थः। सहकार्यपेक्षामङ्गीकृत्योपयोगप्रकारं पृच्छति—*क्व तर्हीति* ॥ हेतौ कार्ये वा सहकारिण उपयोग इति विमर्शार्थः ॥

क्षणिकत्ववादिना सहकारिणा हेतौ विशेषजन्मानङ्गीकरणात्—"यस्तु मन्यते" इत्यादेरनुपपत्तिरित्याशङ्क्याह—*तत्रेति*॥ वैशेषिकादिमतं मतान्तरशब्दार्थः। *उपन्यस्य = तन्निराकृत्य, *पूर्ववादिनम्=क्षणिकत्ववादिनं दूषयतीत्यर्थः।

पञ्चपादिका

योगात्—*इति*; स वक्तव्यः—विशेषस्य स हेतुः? अहेतुर्वा? अहेतुश्चेत्, विशेषोत्पत्तौ नापेक्ष्येत; तत्र केवला एव सहकारिणो विशेषमुत्पादयेयुः, ततश्च कार्यं स्यात्। अथ हेतुः? सहकारिभिर्जनितविशेषस्तमेव कथं कुर्यात्? विशेषस्य वा जननेऽनवस्था। अथ मतम्—न सर्वं कार्यं सहकारिजनितात्मभेदहेतुजन्यम्, समग्रेषु हेतुषु तावत्येवाभवदङ्कुरादि; तथा किञ्चित्सन्निहित-सहकारिहेतुजन्यम्, यथाऽक्षेपकारीन्द्रियादिज्ञानम्; तत्राद्यो विशेषः सहकारिसन्निधानमात्रलभ्यः;

पञ्चपादिकाविवरणम्

यः सहकारिणमपेक्षते, स स्वात्मनि विशेषोत्पत्तौ शक्तो वा? न वा? इति विकल्प्याहेतुत्वे दूषणमाह—*विशेषोत्पत्ताविति* ॥ नह्यशक्तं सहकारिसहस्रसन्निधानेऽपि किंचित्कुर्वद् दृष्टमित्यर्थः। हेतुत्वे दूषणमाह—*अथ हेतुरिति* ॥ तत्र प्रथमविशेषस्य विशेषान्तरापेक्षयाऽनवस्थाप्रसङ्गदोषपरिहाराय किंचिदेव सहकारिभिः कारणे विशेषो जन्यते कार्यजननाय, क्वचित्तु कारणे विशेषजन्मानपेक्षमेव सहकारिभिः कार्यं जन्यत इत्यव्यवस्थां स्वयमेव दर्शयति—*अथ मतं न सर्वं कार्यमिति* ॥ *तावत्येवाभवत्=उच्छूनताविशेषे सत्येवेत्यर्थः।

ऋजुविवरणम्

अथान्वयव्यतिरेकेति ॥ अनेन संप्रतिपत्तिमाविष्करोति। "सहकारिजनितविशेषः" इति टीकापदम्। सहकारिभिर्जनितो विशेषो यस्मिन् हेतौ स हेतुः, सहकारिजनितविशेष इति विग्रहः। कथं हेतुत्वे सहकार्यपेक्षत्वं नास्तीत्युक्तम्? स्वतोऽहेतोरपि सहकार्यपेक्षया कार्यकरत्वसंभवादित्याशङ्क्य व्याचष्टे—*नह्यशक्तमिति* ॥ "अहेतुश्चेदि"ति व्याख्यातम्। "सहकारिजनितात्मभेदहेतुजन्यमि"ति ॥ सहकारिभिर्जनितः = उत्पादित आत्मभेदस्स्वरूपगतोऽपि विशेषो यस्मिन् हेताविति टीकापदविग्रहः। "तावत्येवाभवदि"त्यत्र "तावती"ति किं निर्दिष्टमिति न ज्ञायते, यद्वा—"तावत्येवे"त्यनेन समग्रत्वमेव निर्दिष्टमिति प्रतीयते, समग्रत्वस्य सन्निहितत्वात्, एवकारेणान्यनिवृत्तिप्रतीतेश्च। तथा सति "किञ्चित्सन्निहिते"त्यनेन पुनरुक्तं स्यात्; तत्रापि सहकारिसन्निधानमात्रस्योक्तत्वात्, तदर्थं व्याचष्टे—*उच्छूनताविशेष इति* ॥ "अक्षेपकारी"ति। न विद्यते क्षेपः प्रक्षेपो विशेषस्य सहकारिभिर्येष्विन्द्रियेषु, तान्यक्षेपाणि; अक्षेपेणैव कुर्वन्तीत्यक्षेपकारिणीति, तान्यादिः कारणं यस्मिन् ज्ञाने, तद् ज्ञानमक्षेपकारीन्द्रियादीति विग्रहः। अथवा—इन्द्रियमादिर्यस्य

तत्त्वदीपनम्

अथवा—पूर्ववादिनं वैशेषिकादिकमित्यर्थः। सहकारिणा जनितो विशेषो यस्मिन् हेतौ स तथेति विग्रहः। "विशेषस्य स हेतुरि"त्यत्र तच्छब्देन सहकारी गृह्यते? आहो प्रधानहेतुः? आद्ये विकल्पासंभवः; सहकारिणो हेतुत्वोक्तेः, नापि द्वितीयः; विशेषाश्रयत्वेन तस्यापि हेतुत्वसिद्धेरित्याशङ्क्य तात्पर्यमाह—*यः सहकारिणमिति* ॥ असमर्थस्यापि सहकारिसाकल्यापेक्षया कार्यप्रसवहेतुत्वम्, तत्राह—*नहीति* ॥ धूमजननासमर्थस्य शिलादेरिन्धनभारेणापि तज्जनकत्वं नोपलब्धचरमित्यर्थः ॥ प्रधानकारणस्य विशेषाकारणत्वे तदजनिः स्यादित्याशङ्क्य, तस्यान्यथासिद्धेस्तस्य वैयर्थ्यमेव स्यादित्युक्तं टीकाकृता, तत्र "केवला एवे"त्यनेन सविशेषस्य बीजस्य जनकत्वेष्टेः—"जनितविशेषः" इत्ययुक्तमित्याशङ्क्यासमर्थत्वेऽपि किं निर्विशेषस्य हेतोर्विशेषहेतुत्वम्? उत सविशेषस्य? आद्ये विशेषजनकत्वं न स्यात्; उच्छूनताऽनपेक्षबीजस्याङ्कुरजनकत्वादृष्टेः, नापि द्वितीयः; अनवस्थानात्; विशेषोत्पादनोपयोगित्वेन यो विशेषः समाश्रितः, तदुपपत्तावपि विशेषान्तरमाश्रयणीयम्, एवं तस्य एवं तस्यापीत्यनवस्थेत्याह—*हेतुत्व इत्यादिना* ॥

"अथ मतमि"त्यत्र क्वचिद्विशेषानपेक्षत्वं क्वचित्तदपेक्षत्वमित्युक्तम्, तत्र को हेतुः? इत्याशङ्क्य हेतुं दर्शयति—*तत्रेति*। हेताविति यावत्। *प्रथमविशेषस्य=उच्छूनताविशेषस्य। सहकारिभिर्जनितः स्वरूपविशेषो यस्मिन् हेतौ स तथोक्तः, तेन हेतुना जन्यम्; सहकारिजनितात्मभेदहेतुजन्यमिति यावत्। "तावत्येव" इत्यनेन समग्रहेतूनां सन्निधानात् तत्परामर्शशङ्का स्यात्; तथाच पौनरुक्त्यमित्याशङ्क्यार्थमाह—*तावत्येवेति* ॥ यावति विशेषे जाते कार्योदय-

पञ्चपादिका

अक्षेपकारीन्द्रियादिज्ञानवदिति नानवस्था ? अनुपकुर्वन्नपि तर्हि सहकार्यपेक्ष्येत। न हि तत्र हेतोः सहकारिभ्य आत्मभेदः। नानुपकुर्वन्नपेक्ष्यते ; अतिप्रसङ्गात्। स्वरूपे तु नोपकरोति, किन्तु कार्ये ; तत्सिद्धेस्तन्नान्तरीयकत्वात् ? नित्योऽपि तर्ह्यनाधेयातिशयो भावः कार्यसिद्धये क्षणिक इव सहकारिणमपेक्षत इति किन्नाभ्युपेयते ? यथैव क्षणिको भावः सहकारिसमवधान एव कार्यं जनयति ; सामग्रीसाध्यत्वात्, तथा नित्योऽपि स्वरूपानुपयोगित्वेऽपि सहकारिसमवधानं कार्योपयोगादपेक्षेत ॥

पञ्चपादिकाविवरणम्

तर्हि शक्तिमता कारणेन स्वात्मन्यनुपकुर्वन्नपि सहकार्यपेक्ष्यत इति त्वयैव स्वपक्षो निरस्त इति परिहरति—अनुपकुर्वन्नपि तर्हीति* ॥ आह साक्षात् क्षणिकवादी—*नानुपकुर्वन्निति* ॥ सर्वस्य सहकारित्वप्रसङ्गादित्यर्थः। क्व तर्ह्युपकरोति ? तदाह—*स्वरूपे तु नोपकरोतीति* ॥ कार्यं हि सहकारिणा जायमानमुपक्रियत इत्यर्थः। तर्हि क्षणिकस्येव नित्यस्यापि कार्यस्योपकाराय सहकार्यपेक्षा न विरुध्यत इति परिहरति—*नित्योऽपि तर्ह्यनाधेयातिशय इति* ॥ तदेव प्रपञ्चयति—*यथैव क्षणिको भाव इति* ॥ *सामग्रीसाध्यत्वादिति* ॥ बहुकारकव्यापारसाध्यत्वादित्यर्थः। पुनश्चोपकार्यमेवोपकारकं सहकारिणमपेक्षते, नानुपकार्यं

ऋजुविवरणम्

कारणजातस्य, तदिन्द्रियादि ; परस्परं क्षेपेण विशेषस्य जननेन विना करोतीत्यक्षेपकारि। अक्षेपकारि च तदिन्द्रियादि चाक्षेपकारीन्द्रियादि ; इन्द्रियादेः सकाशाज्जन्यं ज्ञानमिन्द्रियादिज्ञानमिति विग्रहः। "नानुपकुर्वन्नि"ति पूर्वोक्तिविरुद्धमित्याशङ्क्याह—*साक्षादिति* ॥ अतिप्रसङ्गमेव विशिनष्टि—*सर्वस्येति* ॥ यदि कार्य उपकरोति सहकारिवर्गः कारणस्य, तर्ह्यर्थात् कारणस्वरूप एवोपकार इत्युक्तो भवेत् ; अन्यथा कारणमुपकारकमेवापेक्षत इति कथमुक्तम् ? नहि कार्ये उपकृते कारणमुपकृतं भवति ; अतो "यस्तु मन्यते" इत्यनेन पुनरुक्तमित्याशङ्क्य व्याचष्टे—*कार्यं हीति* ॥ "कारणस्योपकारकमि"ति व्यपदेशस्य गतिरुक्ता टीकायाम्—"तत्सिद्धेरि"ति। कारणोपकारसिद्धेरित्यर्थः। "तन्नान्तरीयकत्वादि"ति ॥ तेन कार्येणैवोपक्रियमाणेन नान्तरीयकतया भवतीति। सहकारिसमवधाने भवनस्य सामग्रीसाध्यत्वस्य च भेदाभावात् साध्याविशिष्टत्वमित्याशङ्क्याह—*बहुकारकेति* ॥ "अथ मतमि"त्यनेन किमाशङ्क्यते ?

तत्त्वदीपनम्

स्तावत्त्येवेति यावत्। क्षेपो विलम्बः, तमन्तरेण करोतीत्यक्षेपकारि, तच्चेन्द्रियं चेत्यक्षेपकारीन्द्रियम्, तदादिः कारणं यस्य, तदक्षेपकारीन्द्रियादि, तच्च ज्ञानं चेति तथोक्तम्। इन्द्रियं सहकारिजनितविशेषमाश्रित्य न कार्यकरम्, किंतु सहकारिसंनिधिमात्रेण ; अन्यथाऽनवस्थानादित्यर्थः। इन्द्रियम्, आदिर्यस्य कारणवर्गस्य तदिन्द्रियादि, अक्षेपकारि च तदिन्द्रियादि चेति, तथोक्तम् ; तदुत्थितज्ञानमिति वा विग्रहः ॥ सहकारिणः कार्यजनकत्वात्—"अनुपकुर्वन्नि"ति कथमुक्तम् ? इत्याशङ्क्याह—*तर्हीति* ॥ सहकारिजनितविशेषस्य हेतोर्यद्धेतुत्वमुक्तम्, तद्दृश्येत विशेषजनने ; लिङ्गादेर्विशेषजनकत्वाभावादित्यर्थः। "नानुपकुर्वन्नि"त्यादिना सहकारिणः कार्यहेतुत्वमुक्तम्, तत्प्रक्रमविरुद्धमित्याशङ्क्याह—*साक्षादिति* ॥ अतिप्रसङ्गं स्पष्टयति—*सर्वस्येति* ॥ "कार्ये उपकरोती"ति कथमुक्तम् ? सहकारिसंबन्धात् प्राक् कार्याभावादित्याशङ्क्याह—*कार्यं हीति* ॥ सहकारिणः कार्यजनकत्वमेव तदुपकारकत्वमित्यर्थः। किं कारणस्यापेक्षा ? उत कार्यस्य ? आद्ये तुल्यमुत्तरमित्याह—*तर्हीति* ॥ क्षणिकस्य सहकार्यपेक्षया कथं कार्यजनकत्वम् ? उत्पत्त्यनन्तरक्षणविनाशात्, ततश्च दृष्टान्तासिद्धिरिति शङ्कानिराकरणेन तत्प्रपञ्च्यत इत्याह—*तदेवेति* ॥ सहकारिसंपत्तिसमय उत्पद्यमानस्य क्षणिकस्य कार्यकरत्वात् सहकार्यपेक्षोच्यत इत्यर्थः। सहकारिसमवधाने यत् कार्यजन्म, तस्य सामग्रीसाध्यत्वपदाभिलप्यत्वात् पौनरुक्त्यमित्याशङ्क्याह—*सामग्रीति* ॥ घटादेर्दण्डादिकारकव्यापारनिर्वर्त्यत्वात् तत्समवधाने कार्यजन्मेत्यपौनरुक्त्यमित्यर्थः। कारणस्य न सहकार्यपेक्षेत्युक्तम्—"अथ मतमि"त्यत्र, न तत् संभवति ; कार्यसिद्धये तदपेक्षाऽसंभवादित्याशङ्क्याह—*पुनरिति* ॥

पञ्चपादिका

अथ मतम्—क्षणिकोऽपि नैवापेक्षते, जन्यजनकस्य स्वयमन्यापेक्षानुपपत्तेः, कार्यं तु यदन्यसन्निधौ भवति तत्; तस्यान्यसन्निधावेव भावादन्यथा चाभावात्, नित्यस्य तु जनकस्य सर्वदा जननप्रसङ्गः। को हेतुरन्यापेक्षायाः? क्षणिकस्तु यो जनको भावः, स न पुरस्तात्, न पश्चात्, इति न पूर्वोत्तरकालयोः

पञ्चपादिकाविवरणम्

कारणमित्याशङ्कते—*अथ मतं क्षणिकोऽपि नैवापेक्षत इति*॥ यदन्यसंनिधौ भवति, तदपेक्षत इति सम्बन्धः। नित्येऽपि तर्हि कारणे कार्यमेव सहकारिणमपेक्ष्य क्रमेण भवतीति, नेत्याह—*नित्यस्य तु जनकस्येति*॥ सहकारिणां कारणस्य च सर्वदा भावात् सर्वदा कार्य-जननादित्यर्थः। *ननु* सहकारिणामपि सन्निधानमपेक्ष्यत इति, नेत्याह—*को हेतुरिति*॥ कारण-सहकारिणोरपि सम्बन्धः कार्यं चेत्, सोऽपि कारण-सहकारिभ्यां सदा भवति, इति कार्यजन्म सदा भवेदित्यर्थः। *ननु* क्षणिकादपि सहकारिसव्यपेक्षात् किमिति सदा कार्यं न

ऋजुविवरणम्

इति न ज्ञायते; अंशे विरोधादंशे व्यक्तत्वात्, "क्षणिकोऽपि नैवापेक्षते" इति विरुद्धम्; अन्यजनकस्यापि स्वकार्य-सिध्यर्थमन्यापेक्षाया उक्तत्वात्, "कार्यं त्वि"त्यनेनान्यसन्निधौ भावाभावमात्रमुक्तम्, न त्वपेक्षाऽनपेक्षे उक्ते; नच कस्याप्यपेक्षैव नास्तीत्यस्मिन् ग्रन्थे तन्मतमनूद्यते; अनुभवविरोधस्योक्तत्वात्, असदनुवादप्रसङ्गाच्च। अथ कार्यमेवापेक्षते, न कारणमिति, तथाऽपि "नानुपकुर्वन्नि"त्यनेन पुनरुक्तमित्याशङ्क्यावतारयति—*पुनश्चेति*॥ दूषणान्तरं वक्तुमाशङ्कितमिति भावः। *ननु*—कार्यस्याप्यन्यसन्निधौ भावाभावमात्रमुक्तम्, नतु सहकार्यपेक्षत्वमत्र प्रतीयत इत्याशङ्क्याध्याहृत्य योजनान्तरं दर्शयति—*तदपेक्षत इति सम्बन्ध इति*॥ *ननु*—जनकस्य स्थायित्वेऽपि न सर्वदा कार्यजननं भवति; कार्यस्य सहकार्यपेक्षया क्रमभावेनोपपत्तेरित्याशङ्क्याभिप्रायमाह—*सहकारिणामिति*॥ "को हेतुरन्यापेक्षायाः" इत्यन्यशब्देन सम्बन्धं निर्दिश्य तदपेक्षो हेतुः कः? इत्याक्षिप्तमिव प्रतिभाति; तस्य सन्निहितत्वात्, सम्बन्धसापेक्षत्वे च चोदिते तदपेक्षानिराकरणस्यैव प्रतीतेः, तथा सत्यसंबद्ध एव स्यात्; सम्बन्धेन विना जनकत्वायोगात्, संबन्धापेक्षिणोऽपि जनकत्वस्यैव हेतुत्वात्, "को हेतुरि"ति वक्तुमयुक्तत्वादित्याशङ्क्य व्याचष्टे—*कारणसहकारीति*॥ अन्यशब्देन कारण-सहकारिव्यतिरिक्तं कारणान्तरं निर्दिश्यते, तदपेक्षा चात्र निवार्यत इति व्याख्यातम्। कथं क्षणिकात् सर्वदा कार्यमापाद्यते? क्षणमात्रवर्तित्वेन कार्यस्यापि क्षण एव भावो-

तत्त्वदीपनम्

उपकार्यमेव सहकारिणमपेक्षते, न पुनः कारणमिति संबन्धः। चशब्दोऽवधारणार्थः। स च नञा संबध्यते। यस्य यत्र किंचिदायतते, तत् तदपेक्षते। सहकारिणा च तत्र विशेषानुत्पत्तेर्न तत्रापेक्षेत्यर्थः॥

"कार्यं त्वि"त्यत्र अन्यसन्निधौ भावमात्रमुक्तम्, न सहकार्यपेक्षत्वमित्याशङ्क्याध्याहारेण योजयति—*यदन्येति*॥ साम्यमाशङ्कते—*नित्येऽपीति*॥ सहकार्यपेक्षायामपि क्रमभवनमनुपपन्नमित्याह—*नेत्याहेति*॥ प्रधानहेतोर्नित्यत्वेऽपि क्रमभाविसहकार्यपेक्षया क्रमभवनमाशङ्क्य किं सहकारिणोऽपि स्वरूपेण हेतुत्वम्? उत सन्निहिततया? इति विकल्प्याद्यं प्रत्याह—*सहकारिणामिति*॥ यत्र कुत्रचित्सहकारिणामस्तित्वं सदा सिद्धमित्यर्थः। द्वितीयमनुवदति—*ननु सहकारिणामिति*॥ अपिशब्दस्य सन्निधानमित्यनेन संबन्धः। सन्निधानस्यापि सदा भावान्न क्रमजन्मेत्याह—*नेत्याहेति*॥ "अन्याऽपेक्षाया" इत्यत्र सहकारिव्यतिरिक्तापेक्षा निषिध्यते? उत सहकारितत्संबन्धातिरिक्तापेक्षा? नाद्यः; संबन्धापेक्षाया उक्तत्वात्, न द्वितीयः; संबन्धासंभवादित्याशङ्क्य, किं संबन्धस्यानागन्तुकत्वम्? उतागन्तुकत्वम्? आद्ये सदा भवनं स्यादित्यभिप्रेत्य द्वितीयमनूद्य दूषयति—*कारणेति*॥ संबन्धः किं कारण-सहकारिमात्राद्भवति? उतान्यस्मात्? नाद्यः; सदा कार्यप्रसङ्गात्, न द्वितीयः; अन्यस्यापि सदा भावात्। तत्राप्यन्यापेक्षायामनवस्था स्यादित्यर्थः। कार्यसातत्यप्रसङ्गस्तवापि सम इति शङ्कते—*ननु क्षणिकादिति*॥ सत्ताक्षणस्य कार्यहेतुत्वात् तस्य च सदा भावाद् नातिप्रसङ्ग इत्याशङ्क्य, किं यस्मिन् क्षणे सत्ता, तस्मिन् क्षणे

पञ्चपादिकाविवरणम्

जायते ? विशेषवति सत्ताक्षणे कार्यजन्माभावात्, पूर्वोत्तरकालयोर्विशेषाभावादिति, तत्राह—*क्षणिकस्तु यो जनक इति*॥ *इदमयुक्तं वर्तत इति*॥ *अयमर्थः*—न तावदग्निस्वलक्षणस्यैव धूमस्वलक्षणं प्रति कारणत्वमवगन्तुं शक्यम्; क्षणमात्रापवर्गिणोरन्वय-व्यतिरेकबुद्धिद्वयकालावस्थानायोगात्, किन्त्वग्नि-धूमसन्तानयोरन्वय-व्यतिरेकाभ्यामग्निस्वलक्षणानि धूमस्वलक्षणानां कारणानीति सामान्योपाधौ प्रमातव्यम्। तत्राग्निस्वलक्षणानां विशेषाभावादङ्गारगतादप्यग्निस्वलक्षणाद् धूमजन्म किं न स्यात्? काष्ठस्वलक्षणाभावादिति चेत्, न; तस्यापि स्वसन्ताने विद्यमानत्वात्। अग्नि-काष्ठस्वलक्षणसंसर्गापेक्षा विद्यत इति चेत्, न; सन्तानद्वयनित्यत्वे तन्निमित्तसन्निधानस्यापि सदा प्रसङ्गात्, तत्राप्यन्यापेक्षेति चेत्, इहापि। नित्येऽपि सहकारिसन्निधानस्य

ऋजुविवरणम्

पपत्तेरित्याशङ्क्याह—*विशेषवति सत्ताक्षण इति*॥ "इदमयुक्तमिति" किमुक्तम्? किं पूर्ववादिनोऽपि सर्वदा कार्यप्रसङ्गाद् न युक्तमित्युक्तमित्युच्यते? किं वा स्वपक्षे सर्वदा कार्यप्रसङ्गो न युक्त इति? न तावत् प्रथमः कल्पः; क्षणिकस्य पूर्वोत्तरकालयोरसत्त्वेन सर्वदा कार्यप्रसङ्गाभावस्योक्तत्वात्, द्वितीयपक्षे सम्बन्धे कारणान्तरापेक्षायोगात् सदा सम्बन्धः, कार्यं च सदा स्यादित्युक्तम्; अतः किम्—"अयुक्तमि"ति न ज्ञायते, तदर्थमवतारयति—*इदमयुक्तमिति*॥ *अयमर्थ इति*॥ इहापीति*॥ अन्यापेक्षेत्यर्थः। *ननु*—सम्बन्धस्य कारणान्तरापेक्षत्वेऽपि कारणेनापि सर्वदा सम्बन्धजननेन सर्वदा कार्यमापादयितुं शक्यत इत्याशङ्क्याह—*नित्येऽपि सहकारीति*॥ क्षणिकपक्षेऽप्येवं सम्बन्धजनकस्य सर्वदा भावेन सम्बन्धस्य सातत्यं कार्यस्य चेत्यापादयितुं शक्यते, किंतु कार्यस्य कादाचित्कत्वेन सम्बन्धकादाचित्कत्वमङ्गीकर्तव्यम्, कदाचिदेव सम्बन्धप्रतीत्या वा; तदत्रापि सम्बन्धकादाचित्कत्वेन कार्यकादाचित्कत्वम्, इत्यपिशब्दस्यार्थः।" "किमत्रायुक्तमित्यसम्बन्धम्; सर्वदा कार्यजननप्रसङ्गस्योभयत्र समानस्योक्तत्वात्, अन्वय-व्यतिरेकसिद्धकारणसन्निधानापेक्षया कादाचित्कत्वस्य साम्यमप्युक्तमेव, तेन नात्राधिकं

तत्त्वदीपनम्

कार्यजन्म? उतोत्तरक्षणे? इति विकल्प्याद्यं प्रत्याह—*विशेषवतीति*॥ अव्यवहितपूर्वक्षणवर्ति कारणमित्यङ्गीकरणादेकक्षणमात्रवर्तिनोर्न कार्य-कारणतेत्यर्थः। द्वितीयं प्रत्याह—*पूर्वेति*॥ उत्तरक्षणे कारणसत्ताऽभावेऽपि कार्यं स्यात्; असत्त्वाविशेषादित्यर्थः। कार्यापेक्षया नियतप्राक्सत्त्वस्य कारणत्वे प्रयोजकत्वात् तस्य सदा भावाद् नातिप्रसङ्ग इत्याह—*तदाहेति*॥ स्थायित्वपक्षे कार्यसातत्यम्, इतरत्र च तदभाव इत्युक्तम्, तत्र कस्यायुक्तत्वमुच्यते "इदमयुक्तमि"त्यत्र,—किं स्थायिमते कार्यसातत्यस्यायुक्तत्वम्? अथवेतरस्य? नाद्यः; कारणसहकारिणां तत्संबन्धानां सदा भावेन कार्यसातत्यस्य दुर्वारत्वात्, न द्वितीयः; तत्र कार्यसातत्यहेत्वभावादित्याशङ्क्याह—*इदमयुक्तमिति*॥ यस्मादग्निस्वलक्षणाद् यो धूमस्वलक्षण उत्पद्यते, अनयोरेव कार्य-कारणताधिगतिः? आहो वह्नि-धूमजातीययोः? इति विकल्प्याद्यं दूषयति—*न तावदिति*॥ स्वम्=असाधारणं व्यावृत्तम् *लक्षणम्=रूपं यस्य, स स्वलक्षणः॥ किमन्वय-व्यतिरेकाभ्यां तदधिगतिः? उतान्वयमात्रात्? नाद्यः; द्रष्टुः स्थिरस्याभावादित्याह—*अन्वयेति*॥ अग्नौ सति धूम इति ज्ञानमन्वयबुद्धिः, अग्न्यभावे धूमाभाव इति बोधो व्यतिरेकबुद्धिः, तयोरेककालेऽवस्थानं न युज्यत इत्यक्षरार्थः। द्रष्टुरिति शेषः। किंच धूमाभावे तदर्थिना तज्जननसमर्थोऽग्निरुपादीयते, तयोश्च जन्य-जनकताया अग्रहणाद्धूमार्थिनाऽग्न्युपादानं न स्यात्, इत्याह—*क्षणमात्रापवर्गिणोरिति*॥ ययोस्तु तद्ग्रहणं तयोर्नष्टत्वादित्यर्थः। आकाङ्क्षापूर्वकं द्वितीयपक्षमवतारयति—*किंत्विति*॥ ततः किमिति? अत्राह—*तत्रेति*॥ सहकार्यभावान्नाङ्गारावस्थाने धूमजन्मेति शङ्कते—*काष्ठेति*॥ किं काष्ठस्वलक्षणमात्राभावो हेतुः? उत सन्निहित-स्वलक्षणाभावः? आद्येऽसिद्धिरित्याह—*न तस्यापीति*॥ द्वितीयमनुवदति—*अग्नीति*॥ किमग्नि-काष्ठ-संसर्गोत्पत्तौ तयोरेव हेतुत्वम्? उतान्यस्यापीति विकल्प्याद्यं दूषयति—*न संतानेति*॥ द्वितीयमनुवदति—

पञ्चपादिका

कार्योत्पादः ॥ इदमयुक्तम् वर्तते ! किमत्रायुक्तम् ? सति नियमेऽपि निरपेक्षत्वम् । *तथाहि*—यः कश्चित् कस्यचित् क्वचिन्नियमः, स तदपेक्षाप्रभावितः ; अनपेक्षत्वे नियमानुपपत्तेः । एवं हि कार्य-कारणभावसिद्धिः । कार्यार्थिभिश्च विशिष्टानां हेतूनामुपादानम् । तत्र यदि न क्षणिकं कारणं सहकारिण-

पञ्चपादिकाविवरणम्

कदाचिद्भावाद् नित्यवत् कार्यजननप्रसङ्गो न युक्तो वर्तत इति । *ननु* सहकारिसन्निधानादेव कार्योदयनियमेऽपि धूम-काष्ठसन्तानयोर्नोपकार्योपकारकसम्बन्ध इत्याह---*किमत्रायुक्तमिति* ॥ परिहरति---*सति नियम इति* ॥ सहकारिणां कार्येणान्वय-व्यतिरेकनियमेऽपि नोपकार्योपकारकसम्बन्ध इत्युक्तिर्विरुद्धेत्यर्थः । *ननु* अन्वय-व्यतिरेकनियमस्योपकार्योपकारकसम्बन्धव्याप्तिः क्व दृष्टेति ? दृष्टा कार्य-कारणयोरित्याह----*तथाहि यः कश्चिदिति* ॥ उपकार्योपकारकसम्बन्धाभावे जल-धूमयोरिवान्वय-व्यतिरेकनियमानुपपत्तेरिति भावः ॥ *ननु* ययोरेवाग्नि-धूमस्वलक्षणयोः कार्य-कारणभावो दृष्टः, तत्रैवान्वय-व्यतिरेकनियमः, नाग्नि-धूमसन्तानयोः ; येनाविशेषात् सर्ववह्निस्वलक्षणेषु धूमस्वलक्षणकारणेषु काष्ठसंयोगासंयोगाभ्यां धूमभावाभावदर्शनेन सहकारि-कारणेष्वन्वय-व्यतिरेकनियमोऽपेक्षालक्षणोपकार्योपकारकसम्बन्धश्च स्यात् । तस्मान्न कार्य-कारणस्वलक्षणादन्यत्र

ऋजुविवरणम्

दृश्यते, इत्याशङ्क्यावतारयति—*ननु सहकारीति* ॥ काष्ठसंयोगाभावेन धूमस्य कादाचित्कत्वं नियन्तुं न शक्यते, इति चोद्याभिप्रायः । कस्य केन नियमः ? इति न ज्ञायते, तथा "निरपेक्षत्वमि"ति च साकाङ्क्षम् ; कस्य किमपेक्षा ? इत्यनुक्तत्वात्, तदर्थं व्याचष्टे—*सहकारिणामिति*॥ "तथाही"ति पुनरुक्तो ग्रन्थः ; पूर्वग्रन्थ एवान्वय-व्यतिरेकनियमेनोपकार्योपकारकसम्बन्धस्योक्तत्वात्, अत्रापि "यः कश्चित् कस्यचिन्नियमः ; स तदपेक्षाप्रभावितः" इति नियमेनोपकार्योपकारकत्वमुच्यते ; नचाधिक्येन विना तस्य विवरणमपि संभवतीत्या-शङ्क्य विषयान्तरं दर्शयति—*नन्वन्वय-व्यतिरेकेति* ॥ *ननु*कार्य-कारणयोरपि नियमेनोपकार्योपकारकत्वे किमत्र कारणमनन्यथासिद्धमुक्तम् ? नियममात्रे तु पूर्ववदेव वदितुं शक्यत्वादित्याशङ्क्याह—*उपकार्योपकारकसम्बन्धाभाव-इति* ॥ "एवं हि कार्य-कारणभावसिद्धिरि"ति कथमुक्तम् ? नहि सामान्ययोः कार्य-कारणभावः ; तथा स्वल-क्षणयोः कार्य-कारणभावेऽपि तत्सिद्धिः समाना, उपादानमपि स्वलक्षणस्यैव, न सामान्यस्येत्याशङ्क्याभिप्रायमाह—

तत्त्वदीपनम्

तत्रापीति ॥ संयोजकोऽन्यशब्दार्थः । साम्येन समाधत्ते—*इहापीति* ॥ तदेव विवृणोति—*नित्येऽपीति* ॥ संसर्गिसद्भावेऽप्यसंसर्गार्थमन्यापेक्षाङ्गीकरणे कारणसहकारिसद्भावेऽपि संयोजकसातत्याभावात् सन्निधेरागन्तुकत्वम् । अतश्च नोक्तदोष इत्यर्थः ॥

सहकारिसन्निधानस्य कार्यं प्रत्यन्वय-व्यतिरेकावङ्गीकृत्योपकार्योपकारकभावमाक्षिपति—*ननु सहकारीति* ॥ प्रमाणाभावादिति शेषः । एकग्रन्थत्वशङ्कां निरस्यति—*परिहरतीति* ॥ प्रमाणाभावादित्युक्तं धुनीते—*सहकारिणामिति* ॥ अन्वय-व्यतिरेकनिरपेक्षस्योपकार्योपकारकसंबन्धव्याप्त्यदृष्टेर्नोपकार्योपकारकभाव इत्याह—*नन्वन्वयेति* ॥ व्याप्त्यदर्शनमसिद्धमित्याह—*दृष्टेति* ॥ *कार्य-कारणयोरिति* ॥ उपादानोपादेययोरित्यर्थः । कस्यचित्कार्यविशेषस्य क्वचिदुपादानकारणविशेषे यः कश्चिदन्वय-व्यतिरेक इत्यक्षरार्थः । नियमानुपपत्तिं स्पष्टयति—*उपकार्येति* ॥ सहकारिणां कार्यान्वय-व्यतिरेकवत्त्वे भावात्तयोरुपकार्योपकारकभावसंबन्धः, नच तदस्तीति शङ्कते—*ननु ययोरिति* ॥ न द्रष्टृव्यक्तिभेदेऽपि तत्सन्तानैक्यादन्वयादिना कार्य-कारणताऽधिगतिर्युक्तेत्यर्थः । धूमार्थिनोऽ-ग्न्युपादानोपपत्त्या तज्जातीययोः स इत्युक्तं निरस्यति—*नाग्नीति* ॥ व्यक्तौ हेतु-हेतुमद्भावेऽपि दहनोपादानमुपपद्यते ; धूमः, दहनोत्थः, धूमजातीयत्वात् ; संमतवदित्यनुमानादित्यर्थः ॥

पञ्चपादिका

मपेक्षते, नापि तत्कार्यम्, कथं नियमः ? तथाहि—हेतुपरम्पराप्रतिबन्धान्न हेतुः स्वरूपे सहकारिणमपेक्षते, न कार्ये ; स्वयंजननशक्तेः । नापि कार्यम् ; एकस्यापि शक्तिमत्त्वेन प्रसह्यजननात् तत्र सहकारिसन्निधिनियमोऽनर्थकः स्यात् । काकतालीयमुच्यते ? तथाच कार्य-कारणव्यवहाराः सर्वे एवोत्सीदेयुः । तस्मात् क्षणिकस्यापि भावस्य स्वयं जनकस्य स्वरूपानुपयोगिन्यपि सहकारिणि कार्यसिद्धयेऽपेक्षा वाच्या ; कार्यस्यैव वा सामग्रीसाध्यत्वात्, तत्र नियमात् ; तथा नित्येऽपीति न विशेषं पश्यामः ॥

पञ्चपादिकाविवरणम्

सामान्योपाधौ कार्य-कारणयोग्यताप्राप्तिरिति, तत्राह—*एवं हि कार्य-कारणभावसिद्धिरित्यादिना* ॥ सामान्योपाधौ हि व्यवहारो दृश्यत इति भावः । अस्तु सामान्योपाधौ जन्य-जनकयोग्यतानियमः, ततः किमिति ? तत्राह—*तत्र न यदि क्षणिकं कारणमिति* ॥ तदेव साधयति—*तथाहि हेतुपरम्पराप्रतिबन्धादिति* ॥ कारणस्य स्वयंशक्तित्वादित्यर्थः । *नापि कार्यं सहकारिणमपेक्षत इति* ॥ कारणादेव जननादित्यर्थः । *ननु* वह्निस्वलक्षणाद् धूमजन्मनि काष्ठसंसर्गस्यापि सन्निधानात् तदपि सहकारि कल्प्यत इति, *तन्न ; प्रागपि हि कृशानुस्वलक्षणस्य धूमजननयोग्यस्य काष्ठसंसर्गाभावात् तदहेतुत्वलक्षणस्य व्यतिरेकस्य दर्शनमन्तरेणान्वयमात्रान्न सहकारित्वसिद्धिरित्याह —*काकतालीयमुच्यत इति* ॥ तर्हि मा भूत् सहकार्यपेक्षेति, कारणमपि मा भूदित्याह—*तथाच कार्य-कारणव्यवहारा इति* ॥ तस्मात् क्षणिक-नित्ययोः सहकारिसन्निधानक्रमस्याविशेषात् कारणत्वमविशिष्टमित्युपसंहरति—*तस्मात् क्षणिकस्यापीति* ॥ *अयमर्थः*—यथैकस्मादग्निस्वलक्षणात् समानदेशे वह्निः, उपरिष्टाद् धूमः, अधस्ताद्भस्म, पुरुषे विज्ञानमिति सहकारिभेदेनैकस्मादनेकानि कार्याण्युत्पद्यन्ते, तथैकस्मात् कारणात् कालभेदेन सहकारिभेदात् कार्यभेदा इति ॥

ऋजुविवरणम्

सामान्योपाधाविति ॥ "स्वयं जननशक्तेरि"त्यत्र कस्य स्वयंजननशक्तिरिति न ज्ञायते, तदर्थं व्याचष्टे—*कारणस्येति* ॥ एकस्यापि प्रसह्य बलाद् जनकत्वमुक्तम्, तत्र कस्यैकस्य ? इति न ज्ञायते, अथवा—"शक्तिमत्त्वेन जननादुत्पत्तेरि"त्युक्तम्, तत्र कस्मादिति न ज्ञायते, तदर्थं व्याचष्टे—*कारणादेवेति* ॥ अथ सामान्योपाधावेव व्यवहार इति नियन्तुं न शक्यते ; स्वलक्षणोपाधावपि ज्ञातुं शक्यत्वात् । अतश्च नास्मत्पक्षे सर्वदा कार्यजननमापादयितुं शक्यते, इत्यभिप्रायेण चोदयति—*ननु* वह्निस्वलक्षणादिति* ॥ ननु*अन्वय-व्यतिरेकनियमात् सहकार्यपेक्षत्वमस्तु, नतु क्रमेणानेककार्यकरत्वं भवति ; एकस्यानेककार्यादर्शनात्, संभवेऽपि सकृदेव जनकत्वान्न स्थायित्वसिद्धिरित्याशङ्क्य व्याचष्टे—*अयमर्थो यथैकस्मादिति* ॥

तत्त्वदीपनम्

सामान्योपाधौ कार्य-कारणभाव इत्युक्तम्, तत्र हेतुमाह—*सामान्योपाधाविति* ॥ स्वलक्षणयोः कार्य-कारणभावपक्षे दध्यर्थिनां दुग्धोपादानं न स्यात्, जातेरभावात्, कल्पितजात्यङ्गीकृतौ सिद्धं नः समीहितम्, सन्तानस्य च अवास्तवत्वात् सन्तानिनो द्रष्टुश्च क्षणिकत्वात् कथमन्वयादिग्रहः स्यादित्यर्थः । कार्य-कारणयोः सहकार्यनपेक्षाया उक्तत्वात् पौनरुक्त्यमित्याशङ्क्य, तत्प्रपञ्चनार्थत्वान्मैवमित्याह—*तदेवेति* ॥ अथवा—कार्य-कारणयोः सहकार्यनपेक्षा कुतः ? इति शङ्कायामाह—*तदेवेति* ॥ *हेतुपरम्पराप्रतिबन्धादिति* ॥ पूर्व-पूर्वक्षणादुत्तरोत्तरक्षणोत्पत्तेरित्यर्थः ॥

"स्वयं जननशक्तेरि"त्यभिधानात् स्वभाववादशङ्का स्यात्, तदर्थमाह—*कारणस्येति*॥ "जननादि"त्यस्यापेक्षितं पूरयति—*कारणादेवेति* ॥ अन्वयभावात् कार्य-कारणतासिद्धेर्न व्यतिरेकापेक्षा, ततश्च व्यन्तरयोरेव हेतुत्वाद्वातिप्रसङ्ग इति शङ्कते—*ननु वह्नीति* ॥ अन्वयमात्रेण कार्यनिष्पादकत्वे पक्वतालफलपतनकालीनकाकसंबन्धस्यापि पतनसाधकतापाताद् नैतदित्याह—*तन्नेति* ॥ *प्रागपीति* ॥ काष्ठसंसर्गादिति शेषः । स्पष्टार्थ उत्तरग्रन्थः ॥

स्थायिनः कारणत्वेऽप्येकस्यानेककार्यकरत्वं कथम् ? अन्यत्रादृष्टत्वादित्याशङ्क्याह—*अयमर्थ इति* ॥ *पुरुषे विज्ञानमिति* ॥ स्वविषयज्ञानमित्यर्थः । *सहकारिभेदादिति* ॥ एकस्माद् अग्निक्षणात् काष्ठादिसहकारादुत्तरो

पञ्चपादिका

तदेवमहंकर्तुः सदैकरूपावगमात् स्थायित्वेऽप्यर्थक्रियासम्भवान्न नीलस्य स्वगतापरोक्षत्वमात्रेण

पञ्चपादिकाविवरणम्

तस्मात् सत्यपि विषयाभेदेऽहंसंवेदनस्य यथाप्रतिभासमद्वितीयात् संवेदनाद् भेदेनाप्यर्थक्रियासमर्थतयाऽवस्थायित्वमस्तीति महदेतत्सिद्धान्तवैलक्षण्यमस्तीत्युपसंहरति—*तदेवमहङ्कर्तुः सदैकरूपावगमादिति* ॥ यत्किञ्चित्साम्येन च सिद्धान्तसाङ्कर्ये मन्त्रार्थवादेतिहास-पुराणप्रामाण्यानभ्युपगमाद् देवता-स्वर्गेश्वर-मोक्षानभ्युपगमात् क्षणिकप्रमाणसम्बन्धस्य क्षणिकस्यैव सत्त्वाभ्युपगमाद् लोकायत-बौद्धांशद्वयपरिणतः प्राभाकरः,भेदाभेदाभ्युपगमाद् मन्त्राद्यप्रामाण्याच्च लोकायत-क्षपणकांशद्वयपरिणतो वार्तिककारः। यस्तु कश्चित्—क्षपणकपादावनत-शिरोबिम्बस्तत्त्वदर्शन-तन्निष्ठपरमहंसप्रद्वेषतीव्रवायुविक्षिप्तविवेकविज्ञानलवः स्व-परपक्षगुण-दोषविभागदूरीकृतविज्ञानो भेदाभेदाभ्यां बन्ध-मोक्षादिसङ्करमिव कुर्वन् दुर्जनरमणीयां वाचं जल्पति—*सुगतविज्ञानवादसमानोऽयं वेदान्तवाद इति*, स सम्प्रदायश्रवणपरिचयशून्यतया दर्शनविवेकमनवबुद्ध्यमानो नापवाद्यः, किन्तु शोचनीय इत्युपेक्षणीयो विद्वद्भिः ॥

ननु विज्ञाने प्रपञ्चस्य कल्पितत्वं तव तस्य च तुल्यम्, *सत्यम्* ; विज्ञाने प्रतिभास्यमानत्वं च तव तस्य च तुल्यम्, इति विज्ञानवादस्त्वदीयं दर्शनं किं न स्यात् ? सत्यपि प्रतिभास्यत्वे सत्य-मिथ्याविभागोऽस्तीति चेत्, इहापि सत्यपि मिथ्यात्वेऽर्थक्रियासमर्थसत्त्वासत्त्वविभागोऽस्त्येव। कल्पितत्वे नेयं विभागसिद्धिरिति

तत्त्वदीपनम्

वह्निक्षणो जायते ; आर्द्रतासहकाराद् धूमः ; इन्धनसहकाराद् भस्म ; नयनसंयोगसहकाराद्विज्ञानमिति। परमप्रकृत-मुपसंहरति—*तस्मादिति* ॥

विषय-चैतन्ययोरभेदमात्रेणापसिद्धान्तः स्यादित्याशङ्क्य, सर्वसिद्धान्तसंकरः स्यादित्युक्तं विवृणोति—*यत्किं-चिदिति* ॥ किमेतद् गुरोश्चोद्यम् ? उत वार्तिककारस्य ? अथवैकदेशिनः ? इति विकल्प्याद्यं प्रत्याह—*मन्त्रेति* ॥ प्रमाण्यानभ्युपगमात् स्वार्थे प्रामाण्यानभ्युपगमादित्यर्थः। विग्रहवती चतुर्थ्यन्तशब्दातिरिक्तदेवता नाभ्युपेयते गुरुणा, तथेतराभ्यामिति साम्यम्। तथा मन्त्रादिप्रसिद्धस्वर्गाद्यनभ्युपगमोऽप्यविशिष्टः। वेदान्तप्रसिद्धमोक्षान-भ्युपगमोऽपीति। द्वितीयं दूषयति—*भेदाभेदेति* ॥ तृतीयमुत्थापयति—*यस्त्विति* ॥ क्षपणकस्य पादौ क्षपणकपादौ तयोरवनतं शिरोबिम्बं यस्य तथोक्तः, अनेन च विशेषणेन भेदाभेदवादित्वेन क्षपणकविनेयत्वम्, ततस्तत्समयस्योपेक्ष्यत्वमुक्तम्। तत्त्वज्ञानशून्यत्वाच्च तन्मतमुपेक्ष्यमित्याह—*तत्त्वदर्शनेति* ॥ तत्त्वदर्शनं च तन्निष्ठपरमहंसश्चेति तत्त्वदर्शन-तन्निष्ठपरमहंसौ, तयोः प्रद्वेष एव तीव्रो वायुः, तेन विक्षिप्तो विवेकज्ञानलवो यस्य, स तथोक्तः। न्यायशून्यत्वाच्चोपेक्ष्यत्वमित्याह—*स्वपरेति* ॥ स्वस्य परस्य च पक्षौ स्व-परपक्षौ, तयोर्गुणा दोषाश्च स्वपरपक्षगुण-दोषाः, तेषां विभागे दूरीकृतं ज्ञानं यस्य, स तथोक्तः। दृष्टादृष्टार्थप्रवृत्ती च तस्य न संभवत इत्याह—*भेदेति* ॥ बन्धस्यापुरुषार्थत्वान्मोक्षस्य च तदभिन्नत्वान्न तदर्था प्रवृत्तिः, नापि बन्धार्था ; मोक्षाभिन्नतया बन्धासंभवात्। आदिशब्देन ब्राह्मण्यादिकं गृह्यते। तर्हि किं तज्जल्पनं व्यर्थम् ? तत्राह—*दुर्जनेति* ॥ अप-वाद्यत्वाभावे हेतुमाह—*संप्रदायेति* ॥ वेदान्तसंप्रदायश्रवणाभावात् तत्परिचयाभावाच्च वेदान्तसमयस्य बौद्ध-सिद्धान्तादन्तरं न जानाति। तस्मान्नापवादयोग्यत्वम् ; "विवादश्च विवाहश्च समैरेष्यते बुधैरि"ति न्यायादित्यर्थः। तर्हि स्वीकार्यत्वं प्राप्तमित्याह—*किंत्विति* ॥ तत्रापि न योग्यतेत्याह—*शोचनीय इति* ॥

संप्रदायश्रवणादिशून्यत्वमसिद्धमिति क्रुद्धः शङ्कते—*ननु विज्ञान इति* ॥ कल्पितत्वमात्रमङ्गीकरोति—*सत्य-मिति* ॥ तर्ह्यन्यसमयापत्तिरित्याशङ्क्य, त्वत्पक्षेऽप्येतद् दूषणं तुल्यमित्याह—*विज्ञान इति* ॥ वैधर्म्यान्तर-सद्भावान्न मे विज्ञानवादापत्तिरिति शङ्कते—*सत्यपीति* ॥ प्रतिभास्यं सत्यं मम, इतरस्य तु मिथ्येति वैधर्म्यात् कथमपसिद्धान्त इत्यर्थः। तुल्यमुत्तरमित्याह—*इहापीति* ॥ स्वप्नोपलब्धकलधौतादौ सत्यमिथ्याविभागाभा-

पञ्चपादिका

माहायानिकः पक्षः समर्थ्यते, किन्तु ग्राहकस्याहङ्कर्तुरात्मनः स्थायिनोऽभावे। स चैकरूपोऽनुभवाद् युक्तिबलाच्च प्रसाधितः। *ननु* नानुमेयादिष्वपरोक्षता दृश्यते ?

पञ्चपादिकाविवरणम्

चेत्, प्रतिभास्यत्वेऽपि न सत्य-मिथ्याविभागसिद्धिः। दृश्यतेऽयं विभाग इति चेत्, तदेव विभागदर्शनं मम किं न स्यात्? घटादेर्मिथ्यात्वमप्रसिद्धमिति चेत्, न; प्रतिभास्यसत्यत्वस्याप्यसिद्धत्वात्। शुक्तिरजत-घटयोरर्थक्रियाभावाभावसत्त्वासत्त्वविभागदर्शनाच्च। दृश्यते च माया प्रीति-द्वेषादिकारणम्, श्रूयते च देवासुरसंग्रामादिषु मायाविनिर्मितशस्त्रभेदानां दाह-च्छेद-भेदादिहेतुत्वमित्यलमतिप्रसङ्गेन ॥

ननु विषयस्यापि चैतन्यव्यञ्जकतयाऽपरोक्षत्वेऽनुमानादिष्वपि तथा स्यात्, न तथा दृश्यत इति चोदयति—*ननु नानुमेयादिष्विति* ॥ अन्तःकरणपरिणामसंसर्गकृतयोग्यत्वापत्त्या विषयस्य चैतन्यं प्रति

ऋजुविवरणम्

"मन्त्रार्थवादे"ति अन्यपरत्वात् प्रामाण्यानभ्युपगमादित्युक्तम् ॥ *दृश्यतेऽयं विभागः* इत्यस्यायमर्थः—स्वप्नादिदृश्ये पदार्थे मिथ्यात्वम्, जाग्रद्दृश्ये सत्यत्वमिति। *तदेव विभागदर्शनमिति* ॥ *अयमर्थः*—स्वप्नादौ नार्थक्रियाकारित्वम्, इतरत्रार्थक्रियाकारित्वमिति ॥ *घटादेरिति* ॥ मिथ्यात्वे प्रमाणतः सिद्धेऽर्थक्रियानिमित्तो विभाग इति वक्तुं शक्यते; तदभावात् सत्यत्वे न विभाग इति भावः। *प्रतिभास्येति* ॥ सिद्धे हि सत्यत्वे तन्निमित्तो विभागः; अर्थक्रियायाः सत्यत्वसापेक्षत्वात्, तदभावे तु सत्यत्वेन विनाऽप्यर्थक्रियाया विद्यमानत्वात् तन्निमित्तो विभागो भवेत्, न त्वन्यतरनिर्णय इत्याशङ्क्याह—*शुक्तिरजत-घटयोरिति*। *ननु*—मिथ्याभूतस्यान्यत्र कार्यकरत्वे दृष्टे, शुक्तिरजत-घटादेर्मिथ्यात्वाविशेषेऽपि कस्यचिदर्थक्रियाकारित्वम्, कस्यचिद् न, इति विभागः सिद्ध्येत्, तदभावेऽर्थक्रियासामर्थ्यादेव सत्त्वसिद्धेस्तदेव भेदकं भवेदित्याशङ्क्याह—*दृश्यते चेति* ॥ *ननु*—ज्ञानमेव सत्यं तत्र प्रीत्यादिकारणम्, न मिथ्याभूतोऽर्थ इति वक्तुं शक्यते, इत्याशङ्क्यान्यदुदाहरति—*श्रूयते चेति* ॥ "ननु नानुमेयादिष्वि"त्यसंगतो ग्रन्थ इत्याशङ्क्य सङ्गतिमाह—*ननु विषयस्यापीति* ॥ "नानुमेयादिष्वि"ति परिहारोऽगमकः; प्रत्यक्षवदेव परोक्षस्य वक्तुं शक्यत्वात्, वैषम्याभावात्। "अव्यापृतत्वादि"ति चासिद्धम्; प्रत्यक्षवदेव व्यापारस्यापि वक्तुं शक्यत्वादित्याशङ्क्यावतारयति—*अन्तःकरणपरिणामेति* ॥ *ननु*—

तत्त्वदीपनम्

वात्कल्पितत्वेन विभागासिद्धिरिति शङ्कते—*कल्पितत्व इति* ॥ साम्येन दूषयति—*प्रतिभास्यत्व इति* ॥ प्रतिभास्यत्वाविशेषात् सत्यत्वं मिथ्यात्वं चोभयोः स्यात्, न वैषम्यमित्यर्थः। अनुभवावष्टम्भेन विभागं शङ्कते—*दृश्यत इति* ॥ स्वप्नदृश्यस्य मिथ्यात्वम्, जाग्रद्दृश्यस्य च सत्यत्वम्, इत्येवंविधो विभागोऽनुभवसिद्धत्वान्न निराकार्य इत्यर्थः। स्वप्नोपलब्धस्यार्थक्रियाऽसमर्थत्वम्, जाग्रद्दृश्यस्य च वैपरीत्यमित्यनुभवादेव स्वीकार्यमित्याह—*तदेवेति* ॥ जाग्रद्दृश्यस्य मिथ्यात्वासिद्धेर्नायं विभागो युक्त इति शङ्कते—*घटादेरिति* ॥ जाग्रद्दृश्यस्य समासिद्धत्वाद्विभागासिद्धिस्तुल्येत्याह—*न प्रतिभास्येति* ॥ त्वन्मते सर्वस्य मिथ्यात्वात् कस्यचिदर्थक्रियाकारित्वम्, कस्यचिन्नेति विभागः कथं घटेत ? इत्याशङ्क्यानुभूयमानत्वान्न विरुध्यत इत्याह—*शुक्तीति* ॥ मिथ्याभूतस्यार्थक्रियाकारित्वं संमतं चेत्याह—*दृश्यते चेति* ॥ मायात्मकहस्त्यादिज्ञानस्य प्रीत्यादिकारणत्वम्, न हस्त्यादेरित्याशङ्क्य दृष्टान्तान्तरमाह—*श्रूयते चेति* ॥ असत्यस्यापि प्रतिबिम्बादेः सत्यबिम्बादिबोधकत्वं चोदाहार्यमित्याह—*अलमिति* ॥ अहंकर्तुः स्थायित्वप्रसाधनस्य प्रस्तुतत्वादनुमेयादिष्वापरोक्ष्याभावचोद्यस्यासङ्गतिमाशङ्क्याह—*नन्विति* ॥ प्रसङ्गागतं सुगतसमयं निरस्य, प्रस्तुतां प्रतिकर्मव्यवस्थामास्थायेदं चिन्त्यत इत्यर्थः ॥

प्रत्यक्षविषयवदेवानुमेयस्यापि व्यापृतत्वसंभवात् कथमव्यापृतत्वाभिधानम् ? इत्याशङ्क्य, संभवं दर्शयितुमापरोक्ष्यप्रयोजकमाह—*अन्तःकरणेति* ॥ योग्यत्वशब्देन जाड्याभिभवो गृह्यते। परिणामद्वारा संसृष्टविषयस्य व्यञ्ज-

पञ्चपादिका

उच्यते ;—नानुमेयादिष्वपरोक्षत्वम्; स्वज्ञानोत्पत्तावव्यापृतत्वात्,

पञ्चपादिकाविवरणम्

व्यञ्जकत्वम्, तदनुमेयादिष्ववर्तमानत्वसम्भवात्तेषु वर्तमानधर्मद्वयोत्पत्त्ययोगान्नापरोक्षतेति परिहरति—*नानुमेयादिष्वपरोक्षत्वमिति* ॥ *अव्यापृतत्वादिति* ॥ कारकत्व-व्यञ्जकत्वधर्मद्वयानुपपत्तेरित्यर्थः। नहि विनष्टे घटेऽग्निसंयोगाल्लौहित्यमुत्पद्यते। *ननु* अतीतानागताकारेण वृष्ट्यादेर्वर्तमानत्वमपि दृश्यते, *न* ; वृष्टेर्युगपदतीतत्व-वर्तमानत्वायोगात्, अतीतताधर्मस्यापि वर्तमानकालो घटादेरिव नान्वयितयाऽवच्छेदकः, किन्तु प्रतियोगितया, इति घटादिवन्न वर्तमानतासिद्धिः। *किंच* अतीताकारेण वर्तमानस्य नेदानींतनक्रिया-गुणाश्रयत्वम्; अतीताकारतया वर्तमानस्य घटस्य वर्तमानलौहित्यगमनाश्रयत्वादर्शनात्, अतो नानुमेयादिषु कारकत्व-व्यञ्जकत्वे युक्ते। प्रत्यक्षे पुनरिन्द्रियसंयोगस्य गुणस्य गुणिव्यापारमन्तरेणाव्यापाराद् युक्तो विषयस्य सामग्र्यन्तर्भाव इति। कथं तर्हि विषयव्यापाराभावेऽनुमेयादिषु विषयाकारता विज्ञानस्येति? तदाह—

ऋजुविवरणम्

धर्मद्वयोत्पत्त्ययोगाद् नापरोक्षतेति कथमुक्तं टीकाकारेण? अव्यापृतत्वमेवापरोक्षत्वाभावे कारणत्वेनोक्तं यतः, ततो विरोधः, असिद्धिश्चेत्याशङ्क्य व्याचष्टे—*अव्यापृतत्वादिति*॥ *कारकत्वेति*॥ *ननु*वर्तमानेऽपि वृत्तिसङ्गात् कारकत्वं व्यञ्जकत्वं चोत्पद्यतामित्याशङ्क्याह—*नहि विनष्ट इति*। *ननु*—अतीतताधर्मो वर्तमानकालसम्बन्धितया प्रतीयते, अतस्तेनाकारेण वर्तमानस्य घटादेः कारकत्वादि भविष्यतीत्याशङ्क्याह—*अतीतताधर्मस्यापीति* ॥ *ननु* अतीतताधर्मस्य वर्तमानत्वाभावे तस्याभाव एव स्यात्; तथा सति घटस्य वर्तमानत्वप्रसङ्गः, अतश्चातीताकारस्य वर्तमानत्वात् तेनाकारेण कारकत्वादि भवेदित्याशङ्क्याह—*किंचातीताकारेणेति* ॥ प्रत्यक्षेऽपि तर्हि कारकत्वं व्यञ्जकत्वं च मा भूत्; तेन विनाऽप्यनुमानज्ञानवदुत्पत्त्युपपत्तेरित्याशङ्क्याह—*प्रत्यक्षे पुनरिति* ॥ कथं

तत्त्वदीपनम्

कत्वं भवतु, तथाऽप्यनुमेयादेः कथं नापरोक्ष्यम्? तत्राह—*तदनुमेयादिष्विति* ॥ *तत्=तत्र। परिणामसंसृष्ट-विषयस्य चैतन्यव्यञ्जकत्वे सत्यनुमेयादिषु नापरोक्षतेति संबन्धः। तत्र हेतुमाह—*अवर्तमानत्वसंभवादिति* ॥ कारणत्व-व्यञ्जकत्वे धर्मद्वयशब्दार्थः। "अव्यापृतत्वादि"त्यत्र कारणताऽभावाभिधानाद् धर्मद्वयोत्पत्त्ययोगादिति कथमुक्तम्? तत्राह—*अव्यापृतत्वादिति* ॥ अव्यापृतत्वमुपलक्षणार्थमित्यर्थः। धर्मद्वयानुत्पत्तौ हेतुमाह—*नहीति* ॥ अवर्तमानत्वं किं स्वरूपेण? आहो अतीताद्याकारेण? इति विकल्प्याद्यमङ्गीकृत्य द्वितीयेऽसिद्धिमाह—*नन्विति* ॥ विकल्पासहत्वान्नैतदित्याह—*नेति* ॥

अतीताद्याकारेण वृष्टिर्वर्तत इति कोऽर्थः? वृष्टिः स्वरूपेण वर्तते? आहो तस्यातीतादिर्धर्मः? नाद्य इत्याह—*वृष्टेरिति* ॥ द्वितीयं प्रत्याह—*अतीतेति* ॥ घटोऽस्तीत्युक्ते वर्तमानकालान्वयित्वं घटस्य यथोपलभ्यते, तद्वदतीतत्वादिधर्मस्य वर्तमानकालान्वयित्वं न घटते; धर्मिव्यतिरेकेण धर्मस्यासंभवादित्यर्थः। 'संप्रति वृष्टिरतीता वर्तते' इत्यादिव्यपदेशस्य का गतिरिति शङ्कते—*किंत्विति* ॥ वृष्टेर्वर्तमानकालसंबन्धाभावापेक्षयाऽयं व्यपदेश इत्याह—*प्रतियोगितयेति* ॥ 'घटो ने'त्यत्र यथा घटस्याभावप्रतियोगितयाऽवच्छेदकत्वं प्राप्तम्, तथा प्राक्काल-संबन्धित्वस्य वर्तमानकालविरोधात् तस्य तत्प्रतियोगितयाऽवच्छेदकत्वमिति वाऽऽह—*प्रतियोगितयेति*॥ अतीताद्याकारेण वृष्टेर्वर्तमानत्वमङ्गीकृत्य वर्तमानधर्माश्रयत्वं निराकरोति—*किंचेति* ॥

कर्मकारकव्यापारं विनाऽनुमानोदयवत् प्रत्यक्षोदयोऽपीति घटादेः कारकत्वासिद्धिरित्याशङ्क्याह—*प्रत्यक्ष इति* ॥ गुणानां निष्क्रियत्वाङ्गीकरणात् संयोगस्य व्यापारानुपपत्तेर्गुणिनोऽर्थस्य व्यापारो वक्तव्यः, इति कर्मतया जनकत्वमित्यर्थः। ज्ञानस्य विषयाकारत्वात् तज्जन्यत्वमाश्रयणीयम्, अन्यथा न तदाकारत्वं सिध्यतीति शङ्कते—*कथं तर्हीति* ॥ विषयस्य ज्ञानजननव्यापाराभावेऽपि लिङ्गादीनामविनाभावादिसंबन्धविशेषाद्विषयाकारज्ञान-जनकत्वं युक्तमित्याह—*तदाहेति* ॥ अतीतादेः कारकत्वानुपपत्तिवद् विषयत्वमपि न स्यात्; अन्यथा कारकत्वमपि

पञ्चपादिका

लिङ्गादीनामेव कुतश्चित्सम्बन्धविशेषाद्विशिष्टैकार्थज्ञानहेतुत्वात्, प्रमेयस्य च स्वज्ञानोत्पत्तिहेतुत्वे प्रमाणाभावात्। अलं प्रसङ्गागतप्रपञ्चेन। स्वावसर एवैतत् सुगतमतपरीक्षायां निपुणतरं प्रपञ्चयिष्यामः॥

तदेवमहङ्कारग्रन्थिरस्मच्छब्दसंशब्दितः। प्रत्ययश्चासौ ; आदर्श इव प्रतिबिम्बस्यानिदञ्चित्संवलितत्वेन तस्याभिव्यक्तिहेतुत्वात्। अतस्तस्य विषयवद् भवतीत्युपचारेणानिदं चिदात्मधातुरस्मत्प्रत्ययविषय

पञ्चपादिकाविवरणम्

लिङ्गादीनामेवेति ॥ *ननु* अतीते वर्तमानविषयत्वजन्मवत् कारकत्वमपि स्यादिति, नेत्याह—*प्रमेयस्य चेति* ॥ विषयत्वं नामानुमेयेषु सुषुप्तिव्यावृत्तिः। सा चाभावस्तद्धर्मो न भवति। विज्ञानाकारताऽपि न विषयव्यापारः, किंतु विज्ञानस्यैव, इति नातीतेऽर्थक्रियाकारित्वम्। जानातेश्चानुमेयादिषु फलापेक्षया सकर्मकत्वम, न कर्मकारकापेक्षयेति ; सकर्मकारकत्वे च प्रत्यक्षवदपरोक्षताऽपि स्यादिति ॥

अर्थमुपवर्णयेदानीम्—"अस्मत्प्रत्ययविषयत्वादि"ति भाष्यं योजयति—*तदेवमहङ्कारग्रन्थिरिति*॥ *ननु*

ऋजुविवरणम्

ज्ञानोत्पत्तिहेतुत्वे प्रमाणाभावः? विषयत्ववदेवानुमातुं शक्यत्वादित्याशङ्क्याह—*विषयत्वं नामेति* ॥ *ननु*—ज्ञाने स्वाकारसमर्पकत्ववद् ज्ञानजनकत्वमस्यापि स्यादिति? नेत्याह—*विज्ञानकारताऽपीति* ॥ कथं तर्हि अनुमेयादिषु सकर्मकजानातेः प्रयोगः—'अग्निं जानाती'ति? तत्राह—*जानातेरिति* ॥ कथं फलापेक्षयैव सकर्मकत्वम्, न मुख्यकर्मापेक्षयेति? तत्राह—*सकर्मकारकत्वे चेति* ॥

"तदेवमि"त्युपसंहार इति प्रतिभाति, नतु तथात्वम्; भाष्यव्याख्यानप्रतीतेः। नच तदपि युक्तम्; "अस्मत्प्रत्ययत्वाभिमतोऽहंकारः, "तदेवं यद्यपी"त्यनेन पौनरुक्त्यप्रसङ्गादित्याशङ्क्य विषयभेदमाह—*अर्थमुपवर्ण्येति* ॥ अथवा—अस्य भाष्यस्य व्याख्यानेन समापितस्य क्षणभङ्गनिराकरणेन व्यवहितस्य पुनर्व्याख्याने कः प्रसङ्गः? इत्याशङ्क्याह—*अर्थमुपवर्ण्येति* ॥ "स पुनरेवंभूतः"इत्यनेनाहंकार-तत्संस्कारसहिताविद्याप्रतिबन्धस्यैवानेकव्यपदेश इति प्रदर्शितम्, तत् किमर्थम्? नहि तन्निरूपणस्येदानीं संगतिरस्तीत्याशङ्क्योपयोगमाह—*ननु

तत्त्वदीपनम्

दुर्वारं स्यादिति शङ्कते—*नन्वतीत इति* ॥ विषयत्वस्यैवाभावान्न कारकत्वप्रसक्तिरित्याह—*नेत्याहेति* ॥

विषयत्वस्योपलभ्यमानत्वात् कथं तदभावः? इत्याशङ्क्य, विषयत्वाभावं दर्शयितुं विषयशब्दार्थमाह—*विषयत्वं नामेति* ॥ *सुषुप्तिव्यावृत्तिः=तद्विषयाज्ञाननिवृत्तिरित्यर्थः। ततः किमिति? अत आह—*सा चेति* ॥ अज्ञानस्यात्माश्रयत्वात् तद्व्यावृत्तेरप्यात्माश्रयत्वं युक्तमित्यर्थः। अविद्यमानस्याप्यर्थस्य बुद्धौ प्रतिबिम्बितत्वाद् जनकत्वं किं न स्यादिति? तत्राह—*विज्ञानेति* ॥ विज्ञाने धर्मिणि या विषयस्याकारता स्वप्रतिबिम्बनम्, असौ न विषयव्यापारः ; तस्य नष्टत्वादित्यर्थः। कथं तर्हि विज्ञाने विषयाकारता? इति पृच्छति—*किंत्विति* ॥ अविनाभावादिसंबन्धबलाद् ज्ञानमेव तदाकारमित्याह—*विज्ञानस्येति* ॥ जानातेः सकर्मकत्वनियमात् कथं कर्मासंभवः? इत्याशङ्क्याह—*जानातेरिति* ॥ *फलापेक्षयेति* ॥ सुषुप्तिव्यावृत्त्यपेक्षयेत्यर्थः। विपक्षे बाधमाह—*सकर्मकारकत्व इति* ॥ अवर्तमानस्य कारकत्वानुपपत्तावपि वर्तमानस्यानुमेयस्य कारकत्वं स्यादिति चेत्, मैवम् ; इन्द्रियसंयुक्तस्यार्थस्य कर्मकारकत्वम्, अनुमेयस्य चेन्द्रियासंयुक्तत्वात् कथं कारकत्वमित्यर्थः ॥

अनुमेयापरोक्ष्यासंभवस्य प्रस्तुतत्वात् "तदेवमि"त्यत्र तस्यैवोपसंहरणं प्रतिभाति। नच तदुपपद्यते ; अस्मत्प्रत्ययविषयत्वव्याख्यानरूपत्वात्तस्येत्याशङ्क्याह—*अर्थमिति* ॥ *ननु* ॥ *तत्र=वेदान्तार्थ एवं स्थिते सतीत्यर्थः। अतोऽहंकारस्येदमनिदंरूपत्वम्। इदमाकारस्यान्तःकरणपरिणामसंसृष्टतया चैतन्यव्यञ्जकत्वम्। नचापसिद्धान्तः ; चैतन्यस्याद्वितीयत्वात्। नचानुमेयस्यापरोक्षता, इत्येवं विषयधर्मजातं तच्छब्दार्थः ॥

अस्मत्प्रत्ययशब्दार्थस्य सप्रपञ्चं प्रतिपादनात्—"अपरोक्षत्वादि"ति भाष्यं व्याख्यायताम्, किं "स पुनरि"त्यादिना?

भामती

स्यादेतत्—न वयमपराधीनप्रकाशतयाऽविषयत्वेनाध्यासमपाकुर्मः, किन्तु प्रत्यगात्मा न स्वतः, नापि परतः प्रथते, इत्यविषय इति ब्रूमः ; तथाच सर्वथाऽप्रथमाने प्रत्यगात्मनि कुतोऽध्यास इति ? अत आह—

ऋजुप्रकाशिका

स्यादेतदिति ॥ *अपराधीनप्रकाशतया* स्वप्रकाशतया । ततः किमिति ? अत आह—*तथाचेति* ॥ सर्वथाऽप्रकाशमानत्वमसिद्धमित्याह—*अत आहेति* ॥ प्रत्यगात्मप्रसिद्धेरपरोक्षत्वादित्येतद्भाष्यं विवृणोति—

पञ्चपादिका

उच्यते। स पुनरेवम्भूतो जाग्रत्स्वप्नयोरहमुल्लेखरूपेण, सुषुप्ते तत्संस्काररञ्जिताग्रहणाविद्याप्रतिबद्धप्रकाशत्वेन च गतागतमाचरन् संसारी, जीवः विज्ञानघनः, विज्ञानात्मा, प्राज्ञः, शरीरी, शारीरः, आत्मा, सम्प्रसादः, पुरुषः प्रत्यगात्मा, कर्ता भोक्ता, क्षेत्रज्ञ इति च श्रुति-स्मृतिप्रवादेषु गीयते। *किञ्च*

पञ्चपादिकाविवरणम्

"शारीरः" "क्षेत्रज्ञः"इत्यादिबहुविधोपाधिसंसृष्टमात्मानं वर्णयति श्रुतिः। तत्र कथमहङ्कारस्यैवोपाधितेति चोदिते, अहङ्कार-तत्संस्कारोपरक्ताज्ञानोपाधिकस्यैवात्मनोऽवस्थात्रयेऽपि बाह्यबहुविधोपाध्यन्तरनिमित्तोऽयं व्यपदेश इत्याह—*स पुनरेवंभूतो जाग्रत्स्वप्नयोरिति* ॥ गतागतमाचरन्नित्येकानेकोपाध्युपराग उच्यते। सविकल्पकेऽधिष्ठाने सविकल्पाध्यास इति वदता—"अस्मत्प्रत्ययविषयत्वादि"ति परिहार उक्तः, इदानीं निर्विकल्पकेऽपि सविकल्पाध्यासः

ऋजुविवरणम्

शारीरः क्षेत्रज्ञ इति* ॥ "गतागतमाचरन्नि"ति किमर्थम् ? न ह्यनेन व्यपदेशे हेतुरुक्तः ; गतागतं गमनागमनमिति क्रियामात्रप्रतीतेः। नच क्रियामात्रनिमित्ताः शरीरित्वादिव्यपदेशाः। अतस्तद्व्यपदेशहेतुं विहाय नैतत्कीर्तनं युक्तम्। नच 'गतागतमि'ति कर्मणि निष्ठां कृत्वोपाधिविवक्षा ; तथाऽप्युपाधिद्वयप्रतीतेर्नानेकव्यपदेशः समर्थितः स्यादित्याशङ्क्य व्याचष्टे—*एकानेकोपाध्युपराग इति* ॥ "किंच न केवलमि"त्यनेनोत्तरभाष्यं युक्त्यन्तरपरत्वेन व्याख्यातमिव दृश्यते, तदनुपपन्नम् ; तथा सति विषयत्वमेवाध्यासे मुख्यकारणमङ्गीकृतं भवेत्, तथा सति "न तावदयमेकान्तेने"-त्यनेन विरोधः स्यात्। तथा—"न ; अनादित्वेन प्रत्युक्तत्वादि"त्येतद्व्याख्यानावसरे निर्विकल्पकेऽपि सविकल्पकाध्यासः संभवतीत्युक्तम् ; तथा "अप्रत्यक्षेऽपी"त्यत्राप्युच्यते, तद्विरोधश्च स्यादित्याशङ्क्यावतारयति—*सविकल्पकेऽधिष्ठान इति* ॥ कथं स्व-परसंवेद्ययोर्विशेषो न स्यात् ? स्वसंवेद्य-परसंवेद्यत्वेनैव विशेषसिद्धेरित्याशङ्क्य साधयति—

तत्त्वदीपनम्

इत्याशङ्क्य तद्व्यावर्त्यां शङ्कां दर्शयति—*नन्विति* ॥ आत्मनोऽनेकोपाधिसंबद्धत्वादहंकारस्यैवोपवर्णने भाष्यकारस्य कोऽभिप्राय इति चोद्यार्थः। कार्याध्यासेऽहंकाराध्यासस्य प्राधान्येनोपवर्णनमिति समाधानग्रन्थार्थः। जाग्रत्स्वप्नयोरहंकारस्योपाधित्वम्, सुषुप्तावविद्याया उपाधित्वमित्युपाधिद्वयशङ्का स्यात्, तदर्थमाह—*गतागतमिति*॥ *स पुनरिति* ॥ एवंभूतश्चिदेकरसः। अहमित्युल्लिख्यत इत्यहमुल्लेखः, तद्रूपेण तदुपाधिनेत्यर्थः ॥

सुषुप्तावहमुपाध्यभावान्मुक्तिः स्यादित्याशङ्क्याह—*सुषुप्त इति* ॥ अविद्यायाः प्रतिबन्धकत्वं च न ग्रहणोत्तरकालमित्याह—*अग्रहणेति* ॥ जागरितात् स्वप्नं स्वप्नात् सुषुप्तं तद्विपर्ययेणागमनमित्येवं गतागतशब्दार्थः। जीवः प्राणोपाधिः। तेजोरूपान्तःकरणैक्याध्यासाद् विज्ञानघनत्वम्। तादात्म्याध्यासेन विज्ञानात्मत्वम्। अज्ञानैक्याध्यासेन च प्राज्ञत्वम्। शरीरसंबन्धाध्यासमाह—*शरीरीति* ॥ शारीर इति* ॥ शरीरप्रेरकतया स्थित इत्यर्थः। न केवलं तत्रैव स्थितः, किं त्वन्यत्रापीत्याह—*आत्मेति* ॥ सुषुप्त्यवस्थासंबन्धमाह—*संप्रसाद इति* ॥ शरीरैक्याध्यासे कर-शिरश्चरणादिमत्त्वभ्रमविषय इत्याह—*पुरुष इति* ॥ *प्रत्यगात्मेति* ॥ विशेष्यनिर्देशः। अन्यस्य कर्तृत्वमन्यस्य भोक्तृत्वमिति शङ्कां निरस्यति—*कर्ता भोक्तेति* ॥ क्रियावद्बुद्ध्यैक्याध्यासात्कर्तृत्वम्, सुखाद्याकारेण परिणतबुद्धिद्रष्टृतया भोक्तृत्वम्। तत्रोपपत्तिमाह—*क्षेत्रज्ञ इति* ॥ अस्मत्प्रत्ययविषयत्वाभावेऽप्यपरोक्षत्वादधिष्ठानं चेत्, तदा विषयत्वोपपादनं व्यर्थमित्याशङ्क्याह—*सविकल्पक इति* ॥

अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः ॥

भामती

अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेः ॥ प्रतीच आत्मनः प्रसिद्धिः प्रथा ; तस्या अपरोक्षत्वात् । यद्यपि प्रत्यगात्मनि नान्या प्रथाऽस्ति ; तथाऽपि भेदोपचारः—यथा 'पुरुषस्य चैतन्यमि'ति । एतदुक्तं

ऋजुप्रकाशिका

प्रतीच इति ॥ प्रत्यक्चैतन्यरूपस्येत्यर्थः । *तस्याः=प्रथायाः, प्रतीचः=आत्मनः, प्रसिद्धिरिव सिद्धेति व्याख्याने प्रथाया आत्मनः सकाशाद् भेदः प्रतीयेत, तदनुपपन्नम् ; सिद्धान्ते तस्यास्ततो भेदाभावादित्याशङ्क्य, अभेदेऽपि भेदोपचाराद् तथा व्याख्यातमित्यभिप्रेत्याह—*यद्यपीत्यादिना* ॥ अभेदेऽपि भेदोपचारे दृष्टान्तमाह—*यथेति* ॥ प्रत्यगात्मरूपप्रथाया अपरोक्षत्वानभ्युपगमे किं बाधकम् ? इत्याशङ्क्य पूर्वोक्तं बाधकं स्मारयति—*एतदुक्तं भवतीत्यादिना* ॥ जडप्रपञ्चस्य सर्वस्यापि चिद्रूपात्मप्रकाशाधीनप्रकाशत्वादात्म-

पञ्चपादिका

न केवलमस्मत्प्रत्ययविषयत्वादध्यासार्हः ; अपरोक्षत्वाच्च, तत्साधनार्थमाह—*प्रत्यगात्मप्रसिद्धेरिति* ॥ न ह्यात्मन्यप्रसिद्धे स्व-परसंवेद्ययोर्विशेषः ।

पञ्चपादिकाविवरणम्

संभवतीत्याह—*किंच न केवलमिति* ॥ *ननु* नित्यानुमेय आत्मा कथमपरोक्षतया सिद्ध इति ? नेत्याह—*नह्यात्मन्यप्रसिद्ध इति* ॥ स्व-परयोः-'मयेदं विदितमि'ति कर्तृ-कर्मसम्बन्धावगमशून्यत्वाविशेषात् । अनुभव-

ऋजुविवरणम्

स्व-परयोर्मयेदमितीति ॥ *अनुभवनिमित्तेति* ॥ अयं भावः—अनुभवे निमित्तम्, अनुभवनिमित्तम्, तच्च तद् ज्ञानं चानुभवनिमित्तज्ञानम्, ज्ञानस्याश्रयो ज्ञानाश्रयः, तस्य भावो ज्ञानाश्रयत्वमिति । अनुभवः फलरूपः कर्तृव्यापारं गमयति ;

तत्त्वदीपनम्

इन्द्रियाविषयत्वे कथमपरोक्षत्वम् ? इति शङ्कायां प्रत्यगात्मप्रसिद्धेरित्यभिधौ, तत्र प्रसिद्धिरन्यथासिद्धेत्याह—*नन्विति* ॥ अन्तःकरणे चित्प्रतिबिम्बोदयः, तादृशबिम्बपूर्वकः, प्रतिबिम्बत्वात् ; संमतवदित्यनुमानादात्मसिद्धिरित्यर्थः । स्वप्रकाशत्वेनात्मनोऽपरोक्षत्वात्तद्विरुद्धं परोक्षत्वाभिधानमित्याशयेन स्वप्रकाशत्वं तावदाह—*नेत्याहेति* ॥

"मयेदं विदितमि"ति विशिष्टप्रत्ययस्तावदनुभूयते । तत्रायमात्मा विशेषणप्रतिपत्तिपूर्वकः ? उत न ? इति विकल्पान्त्यनिरासार्थम्—"न ह्यात्मनी"त्युक्तम्, तत्र स्वविदितत्वलक्षणविशेषसद्भावात् कथं विशेषाभावः ? इत्याशङ्क्याह—स्व-परयोरिति* ॥ विशेषणभूतात्माप्रतिपत्तौ कर्तृ-कर्मसंबन्धो बोद्धुमशक्यः । ततश्च "मयेदं विदितमि"त्यनु-

वार्तिकम्

नात्मनोऽपरोक्षभ्रमाधिष्ठानत्वमिति, नेत्याह—*अपरोक्षत्वाच्च प्रत्यगात्मप्रसिद्धेरिति* ॥ चकार उक्तेन सहास्य समुच्चयार्थः । न केवलमहंवृत्तिविषयत्वादेव हेतोरात्मनोऽध्यासाधिष्ठानत्वसिद्धिः, अपरोक्षत्वादपि तस्य तत्सिद्धिः । कुतश्चात्मनोऽपरोक्षत्वम् ? यतः, *प्रत्यगात्मप्रसिद्धेः*=प्रत्यगात्मनः सर्वेषां

भाष्यभावप्रकाशिका

इत्यन्योन्याश्रयत्वमाशङ्क्यानादित्वेन परिहारसम्भवेऽपि परिहारान्तरमाह—*अपरोक्षत्वाच्चेति* ॥ अस्मत्प्रत्ययाविषयत्वेऽप्यपरोक्षत्वादेकान्तेनाविषयत्वाभावात्तस्मिन्नहङ्काराध्यास इत्यर्थः । अपरोक्षत्वमपि

प्रदीपः

एवं शून्यवादापत्तिः, यतो विषयस्य प्रत्यगात्मनश्चोपहितस्य मिथ्यात्वम्, अनुपहितं तु न विषयः, इत्यत आह—*अपरोक्षत्वाच्चेति* ॥ "यः साक्षादपरोक्षाद् ब्रह्म" इति श्रुत्या स्वत एव ब्रह्मणोऽधिष्ठानस्य सिद्धत्वान्न शून्यवादापत्तिरिति भावः ॥ कथं

पञ्चपादिका

नच संवेद्यज्ञानेनैव तत्सिद्धिः ; अकर्मकारकत्वाद्, अतिप्रसङ्गात् ।

पञ्चपादिकाविवरणम्

निमित्तज्ञानाश्रयत्वमन्यतरस्य विशेष इति चेत्, न ; आत्मपदार्थानुभवाभावे सम्बन्धावगमायोगात्, अनुभव-सम्बन्धाभावाविशेषेऽन्यतराश्रयज्ञानानुमानायोगादिति भावः । अस्तु तर्हि विषयानुभवाश्रयतया सिद्धिरिति, नेत्याह—*नच संवेद्यज्ञानेनेति* ॥

ननु संवित् स्वोपाधिं साधयति, न कर्मकारकमिति, न तावदाश्रयत्वमुपाधिः ; विषयेऽभावात् । आश्रयविषयत्वमुपाधिरिति चेत्, किं विषयत्वं नाम ? संवित्प्रयुक्तव्यवहारयोग्यत्वमिति चेत्, न ; आत्माऽपि

ऋजुविवरणम्

फलस्य कर्तृव्यापाराविनाभावादिति । *सम्बन्धावगमायोगादिति* ॥ आत्मनाऽनुभवस्य सम्बन्धावगमो न संभवति ; ज्ञातयोः संबन्धावगम इत्यर्थः । *ननु*—अनुभवसंबन्धस्यात्मसंबन्धावगमो मा भूत्, फलत्वेन तु कर्तृव्यापारानुमान-संबन्ध उक्तः ; तेनैव स्व-परयोर्विशेषोऽपि सिध्यतीत्याशङ्क्याह—*अनुभवसम्बन्धाभावाविशेषे चेति* ॥ अनुभव-सम्बन्धाभावोक्तिस्तु ज्ञानाभावाभिप्राया । फलत्वेन कर्तृव्यापारमात्रानुमानं भवेत्, नान्यतराश्रयज्ञानानुमानम् ; लिङ्गस्यान्यतरासम्बन्धात् । कर्मकारकत्वं विनाऽवभासाङ्गीकारो न युक्तः ; अतिप्रसङ्गादिति हेतुः टीकायाम् । तत्रावगमाभावादिति भावः । यद्वा-विषयगतफलाभिप्रायकर्मकारकत्वेन विनाऽवभासो व्यवस्थापयितुं शक्यत इति चोदयति—

तत्त्वदीपनम्

सन्धानाभावान्न विशेषसिद्धिरित्यर्थः । विशेषाभावोऽसिद्ध इति शङ्कते—*अनुभवेति* ॥ अनुभवः=घटप्राकट्यम्, तस्य निमित्तं यज्ज्ञानम्, तदाश्रयत्वमिति यावत् । उक्तविशेषमङ्गीकृत्य तदसिद्धौ संबन्धावगमासिद्धिदोषस्तदवस्थ इत्याह—*नात्मपदार्थेति* ॥ संप्रत्यङ्गीकृतं परिहरति—*अनुभवेति* ॥ घटानुभवेनात्मनः संबन्धाभावात्तद्धेतु-ज्ञानानुमानानुपपत्तिरित्यर्थः ॥

आत्मप्रतिपत्तिपूर्वको विशिष्टप्रत्यय इत्यत्रेदं निरूपणीयम्—किं संविदाश्रयतया तत्प्रतिपत्तिः ? उत तत्कर्मतयेति ? तत्राद्यमुत्थापयति—*अस्त्विति* ॥ संविदधीनप्रकाशतायाः संवित्कर्मतया व्याप्तत्वात् तदभावेऽभाव इत्याह—*नेत्याहेति* ॥ आत्मा, न स्वातिरिक्तसंविदधीनव्यवहारविषयः, संवित्कर्मत्वानधिकरणत्वे सत्यपरोक्षत्वात् ; संवेदनवत्, विपक्ष एकेन ज्ञानेन सकलप्रथाप्रसङ्ग इति टीकार्थः । संवित्कर्मताया व्यापकत्वमसिद्धमिति शङ्कते—*ननु संविदिति* ॥ *स्वोपाधिम्=विशेषणमित्यर्थः । अत एवातिप्रसङ्गोऽपि निरस्य इति द्रष्टव्यम् ॥

किमुपाधिशब्देनाश्रयो विवक्षितः ? उत विषयः ? आहो आश्रयविषययोरन्यतरः ? इति विकल्प्याद्यं निरस्यति—*न तावदिति* ॥ द्वितीये आत्मासिद्धिरित्यभिप्रेत्य तृतीयं शङ्कते—*आश्रयेति* ॥ आश्रय-विषययोरन्यतरत्वमित्यर्थः । विषयशब्दार्थस्य दुर्निरूपत्वाद्विशिष्टलक्षणासिद्धिरित्यभिप्रेत्याह—*किं विषयत्वमिति* ॥ किं संवित्प्रयुक्तव्यवहारयोग्यत्वं विषयत्वम् ? उत संविद्व्यावर्तकत्वम् ? अथवा—आश्रयान्यत्वे सति तत्प्रयुक्तव्यवहार-योग्यत्वम् ? उत कर्मकारकत्वम् ? इति किंशब्दार्थः । आद्यमनुवदति—*संविदिति* ॥ अतिव्याप्त्या दूषयति—*आत्माऽपीति* ॥ द्वितीये किं संविद्व्यावर्तकत्वमात्रं विषयत्वम् ? उतान्याश्रयत्वे सति संविद्व्यावर्तकत्वम् ? नाद्यः ;

वार्तिकम्

सर्वत्र सर्वदा सर्वावस्थायामसंदिग्धाविपर्यस्तापरोक्षव्यवहारगोचरत्वात् । *यद्वा*—"प्रत्यगात्मप्रसिद्धेरि"ति शैषिकी षष्ठी । प्रत्यगात्मा चासौ प्रसिद्धिश्चेति कर्मधारयः । प्रत्यगात्मरूपप्रसिद्धेरपरोक्षत्वादिति योजना । यद्वा—प्रसिद्धिर्व्यवहारः, प्रत्यगात्मनः प्रसिद्धिः, प्रत्यगात्मप्रसिद्धिः, तस्या अपरोक्षत्वात् । तथाचापरोक्षव्यवहारविषयत्वादात्मनोऽपरोक्षत्वं सिद्धं भवति ॥

पञ्चपादिका

नच ज्ञानान्तरेण ; भिन्नकालत्वे संवेद्यसम्बन्धानवगमात्, स्व-परसंवेद्याविशेषात् । न ह्येककालं

पञ्चपादिकाविवरणम्

तर्हि विषयः स्यात् । आश्रयव्यतिरिक्तत्वे सति संविद्यावर्तकत्वमिति चेत्, चक्षुषोऽपि प्रसङ्गः । नचाश्रयव्यतिरिक्तत्वे सति तत्प्रयुक्तव्यवहारयोग्यो विषयः ; संवित्तदाश्रयसम्बन्धस्यापि विषयत्वप्रसङ्गात् । नच सम्बन्धो नास्ति तव वक्तुम् । तस्मात् संप्रयुक्तादि वस्त्वेवावभास्यत इति । अस्तु तर्ह्यात्मविषयज्ञानान्तरादिति, नेत्याह—*नच ज्ञानान्तरेणेति* ॥ *कुतः ? तच्च ज्ञानान्तरं विषयानुभवसमकालं वा ? भिन्नकालं वा ? भिन्नकालत्वे दूषणमाह—*भिन्नकालत्व इति* ॥ एककालत्वमिति चेत्, तत्राह—*न ह्येककालमिति* ॥ निरवयवस्य युगपदेकदेशे वा भिन्नदेशे वा परिणामद्वयायोगादित्यर्थः । एकस्य युगपत् सामस्त्येन

ऋजुविवरणम्

ननु संविदिति ॥ *ननु* संविदात्मनोस्सम्बन्ध एव नास्ति, कथं तत्रातिप्रसङ्गः ? इत्याशङ्क्याह—*नच सम्बन्धो नास्तीति* ॥ "तस्मात् संप्रयुक्तादी"त्यादिशब्देन संप्रयुक्तगतत्वादि विवक्षितम् । *ननु* एकस्मिन् शरीर आध्मानं विशुष्कता चेत्यादिविरुद्धपरिणामो दृश्यते, तद्वदात्मनोऽपि स्यात्, अथवा—कथं विषयद्वयग्राहिज्ञानद्वयस्य विरोधः ? येन ज्ञानद्वयोत्पत्त्यसंभव उच्येत ; इत्याशङ्क्याभिप्रायमाह—*निरवयवस्येति* ॥ "मा भूत् चलनात्मकमि"त्यनुपपन्नम् ; चलनात्मकक्रियाद्वयस्यापि युगपद् दृश्यमानत्वादित्याशङ्क्याह—*एकस्य युगपदिति* ॥ परिस्पन्दद्वयं पदार्थेषु दृश्यत एव, तदर्थमाह—*एकस्येति* ॥ एकस्यापि क्रमेण दृश्यते, तदर्थमाह—*युगपदिति* ॥ युगपदप्येकदेशे दृश्यते, तदर्थमाह—*सामस्त्येनेति* ॥ अनयैव दिशा प्रतिलोमतो विशेषणोपयोगो द्रष्टव्यः । "मैवमि"त्य-

तत्त्वदीपनम्

आत्मनि व्यभिचारादित्यभिप्रेत्य द्वितीयमुत्थापयति—*आश्रयेति* ॥ "चाक्षुषं ज्ञानमि"त्युक्ते चक्षुषोऽपि विशेषणत्वाद्विषयत्वप्रसक्तिरित्याह—*चक्षुष इति* ॥ तृतीयं प्रत्याह—*नचेति* ॥ नच—संबन्धस्य विषयत्वप्रसञ्जनमिष्टमित्यपि—शङ्क्यम् ; संविदात्मसंबन्धस्य समवायरूपत्वेनाप्रत्यक्षत्वाभ्युपगमव्याघातादित्यर्थः ॥

आत्मत्वात्कुतः संबन्धः ? कुतस्तरां च तत्रातिव्याप्तिः ? तस्य संवित्प्रयुक्तव्यवहारयोग्यत्वं चासिद्धमित्याशङ्क्य, सिद्धान्तविरोधात् त्वयेत्थं वक्तुं न शक्यत इत्याह—*तवेति* ॥ चतुर्थेऽतीतादेर्विषयत्वं न स्यादित्यर्थः । तस्मात् संवित्कर्मताया व्यापकत्वं सिद्धमित्याह—*तस्मादिति* ॥ संयुक्तसमवेतमादिशब्दार्थः । संवित्कर्मतयाऽऽत्मसिद्धिरिति पक्षान्तरमुत्थापयति—*अस्तु तर्हीति* ॥ *"कुत इत्यारभ्य निरवयवस्ये"त्यतः प्राक्तनः स्पष्टार्थः* ॥

ज्ञानद्वयं विरुद्धमित्युक्तं टीकायाम्, तत्र विरोधं व्यनक्ति—*निरवयवस्येति* ॥ एकविषयत्वेनापि तद्द्वयस्य विरुद्धत्वाद्विषयद्वयेति विशेषणं कस्मात् ; इत्याशङ्क्याह—*एकदेशेति* ॥ देशशब्दो विषयवाची । टीकायां विशेषणमविवक्षितमित्यर्थः । अन्यथा वा—देशभेदेन ज्ञानद्वयमविरुद्धमित्याशङ्क्याह—*निरवयवस्येति* ॥ एकदेशे चेति दृष्टान्तार्थः । एकदेशे यथा परिणामद्वयासंभवः, एवं भिन्नदेशेऽपीति ; देशभेदाभावादित्यर्थः । परिस्पन्दात्मकक्रियाद्वयस्य भागाभ्यामेकत्र संभवाद् "मा भूदि"ति ग्रन्थानुपपत्तिरित्याशङ्क्याह—*एकस्येति* ॥ परिणामद्वयस्यापि भागे च तत्र संभवाद् 'मैवमि'त्याद्यसङ्गतमित्याशङ्क्याह—*परिणामेति* ॥ शरीरस्य सभागत्वाद् यौवन-

वार्तिकम्

इदमत्राकूतम्—प्रत्यगात्मनि खलु सर्वेषामसंदिग्धाविपर्यस्तापरोक्षव्यवहारो भवतीति सर्वानुभवसिद्धम् । नच स प्रत्यगात्मनः सर्वदाऽपरोक्षत्वमन्तरेणोपपद्यते । यद्यात्माऽपरोक्षो न स्यात्, परोक्षोऽपि स कदाचित् स्यात्, तर्हि कारणाभावादपरोक्षत्वव्यवहारोऽपि न स्यादेव, भवन् वा सर्वदाऽसन्दिग्धोऽ-

प्रदीपः

स्वप्रकाशत्वमित्यत आह—*प्रत्यगात्मप्रसिद्धेरिति* ॥ प्रत्यगात्मनः संशयविपर्यासाविषयत्वेन स्वतः सिद्धत्वादित्यर्थः । व्यक्तीकरिष्यते चेदं भाष्य एवोत्तरत्र ॥

पञ्चपादिका

विरुद्धविषयद्वयग्राहिज्ञानद्वयोत्पादः। नहि देवदत्तस्याग्र-पृष्ठदेशस्थितार्थव्यापिगमनक्रियाद्वयावेशो युगपद् दृश्यते। *आह*—मा भूच्चलनात्मकं क्रियाद्वयं युगपत्, परिणामात्मकं तु भवत्येव; मैवम्; परिस्पन्दात्मकमपि भवत्यविरुद्धम्—यथा गायन् गच्छतीति, परिणामात्मकमपि न भवति विरुद्धम्—यथा यौवन-स्थाविरहेतुः। तस्मात्प्रत्यगात्मा स्वयंप्रसिद्धः सर्वस्य हानोपादानावधिः स्वयमहेयोऽनुपादेयः स्वमहिम्नैवापरोक्षत्वादध्यासयोग्यः॥

पञ्चपादिकाविवरणम्

परिस्पन्दद्वयमनुपपन्नम्, परिणामस्तु संभवतीत्याह—*मा भूदिति*॥ परिणामद्वयमपि कार्त्स्न्येन युगपन्न सम्भवतीत्याह—मैवमिति*॥ यौवन-स्थाविरयोः कृत्स्नशरीरवर्तित्वादिति। नच भागेन परिणामः; निरवयवत्वादिति भावः। *तस्मादिति*॥ परिशेषात् स्वयंप्रकाशतयाऽपरोक्षत्वोपसंहारः। अध्यस्यमाने-

ऋजुविवरणम्

नेन परिस्पन्दत्व-परिणामत्वयोः संभवासंभवप्रयोजकत्वं नास्ति, किंतु विरुद्धत्वाविरुद्धत्वमेव संभवासंभवप्रयोजकमित्युक्तम्, तदप्रस्तुतम्; परिणामद्वयस्य युगपद्भावात्, ज्ञानद्वयमपि परिणामरूपं संभवेदिति चोदिते, तदसंभवकारणं वक्तव्यम्। नच विरोधिनोऽन्यत्रासंभवमात्रेणात्रासंभवः सिद्ध्यति; विरोधप्रयोजकानिरूपणेन विरोधासिद्धेरित्याशङ्क्यावतारयति—*परिणामद्वयमपीति*॥ *ननु*—कार्त्स्न्यमत्रासंभवे प्रयोजकत्वेन विवक्षितमिति कथं गम्यते? इत्याशङ्क्य द्योतकं दर्शयति—*यौवन-स्थाविरयोरिति*॥ अथवा—यदि परिणामद्वयस्य युगपदसंभवे कार्त्स्न्येन परिणामः कारणं भवेत्, कथं तर्हि यौवन-स्थाविरयोरसंभव उक्तः? इत्याशङ्क्याभिप्रायमाह—यौवन-स्थाविरयोरिति*॥ आत्मनि तर्ह्येकदेशेन ज्ञानद्वयपरिणामः संभवत्येव, अतश्चैवमपि नात्मनि ज्ञानद्वयाभावसिद्धिरित्याशङ्क्याभिप्रायमाह—*नच भागेनेति*॥ "तस्मात् प्रत्यगात्मा स्वयं प्रसिद्धः" इति कथमुपसंहृतम्? नहि विषयानुभवाश्रयतया स्वविषयज्ञानेन वा सिद्ध्यभावमात्रेण स्वयंप्रकाशत्वं सिद्ध्यति; ज्ञानान्तरेणासिद्धे स्वयंप्रकाशत्वसाधकत्वाभावात्, प्रकारान्तरेण सिद्धिसंभवाच्चेत्याशङ्क्याह—*तस्मादिति*॥ *परिशेषादिति*॥ यद्वा "स्वयं प्रसिद्धः" इति व्यर्थम्; नहि तत्प्रसिद्धौ विप्रतिपत्तिरस्ति। "स्वमहिम्ने"ति चासंबद्धम्; स्वस्य महिमा ज्ञानमिति पुनरपि स्वविषयज्ञानप्रसङ्गात्, इत्याशङ्क्याह—*स्वयं प्रसिद्ध इति*॥ अनेनात्मनोऽप्रसिद्धत्वं निरस्तम्, पारिशेष्यात् स्वयंप्रकाशत्वसिद्ध्यर्थम्। प्रसिद्धौ हि सत्यां कारणान्तराभावे पारिशेष्यात्स्वयंप्रकाशत्वं सिध्यति; नाप्रसिद्धाविति। "ननु न क्वचिदि"त्यत्र संप्रयोगितया पुरोऽवस्थितत्वमेव प्रयोजकमङ्गीकृत्य शङ्का कृता; सा न युक्ता; "कथं पुनरि"त्युपक्रमोक्तं हि प्रयोजकमङ्गीकृत्य शङ्का कर्तव्या, ननु तदेकदेशेन; तथा मनोगोचरतयाऽऽकाशेऽपि संप्रयोगितया पुरोवस्थितत्वसंभवाद्, न व्यभिचारोऽपि दर्शयितुं शक्यत इत्याशङ्क्याह—*अध्यस्यमानेनेति*॥ अथवा—"*ननु* न क्वचिदि"त्यनेन

तत्त्वदीपनम्

स्थाविरनिमित्तं परिणामद्वयं संभवति, ततश्च दृष्टान्तासंगतिरित्याशङ्क्याह—*यौवनेति*॥ नच—यूनोऽपि पालित्यदर्शनात् परिणामद्वयसंभव इत्यपि—शङ्क्यम्; तस्य पित्तादिधातुवैषम्यनिमित्तत्वात्; अन्यथा कृत्स्नशरीरव्यापित्वं स्यादित्यर्थः। अंशभेदेनात्मनः परिणामद्वयशङ्कां प्रत्याह—*नचेति*॥

स्वप्रकाशत्वे किं प्रमाणमुपन्यस्तमिति वीक्षायां परिशेषानुमानमाह—*तस्मादिति*॥ सर्वस्येत्यादेरयमर्थः—अन्तःकरण-तद्वृत्तिभावाभावसाक्षित्वादपि स्वप्रकाशत्वमित्याह—*सर्वस्येति*॥ आत्मनोऽप्युत्पत्तिविनाशित्वान्न हानाद्यवधित्वमित्याशङ्क्य श्रुत्यादिविरोधान्नैवमित्याह—*स्वयमहेय इति*॥ संप्रयोगितयाऽपरोक्षस्याधिष्ठानत्वदर्शनादात्मनश्चातथात्वान्नाधिष्ठानत्वमित्यनुपपन्नम्, आपरोक्ष्यमात्रस्य प्रयोजकत्वात्। संप्रयोगित्वं तु तद्धेतुतयाऽन्यथासिद्धमित्याशङ्क्याह—*अध्यस्यमानेनेति*॥ अध्यस्यमानाधिष्ठानयोरेकेन्द्रियाग्राह्यत्वे—'इदं रजतमि'ति संभिन्न-

पञ्चपादिका

ननु न कचिदपरोक्षमात्रेऽध्यासो दृष्टपूर्वः, सर्वत्राक्षिसम्प्रयोगितया पुरोऽवस्थितापरोक्ष एव

पञ्चपादिकाविवरणम्

नैकेन्द्रियग्राह्यत्वमधिष्ठानस्य वक्तव्यम्, नापरोक्षतामात्रेण कृत्यमित्याशङ्क्याकाशदृष्टान्त इति भाष्यतात्पर्यमाह—*ननु न कचिदिति* ॥

अत्र शब्दस्य बाह्यैकेन्द्रियग्राह्यत्वाद् गन्धवद् द्रव्यव्यतिरेकेणोपलब्धेः सम्भवाद् विशेषगुणत्वे वक्तव्ये स्पर्शादिगुणचतुष्टयसहवृत्तित्वाभावाद् बाह्येन्द्रियग्राह्यत्वाद् दिक्काल-मनसां विशेषगुणशून्यत्वाद् भूतचतुष्टयात्म-दिगादि-

ऋजुविवरणम्

"अप्रत्यक्षेऽपी"ति भाष्यस्य व्याख्यानेनोत्तरग्रन्थस्य पौनरुक्त्यमित्याशङ्क्य विषयभेदमाह—*अध्यस्यमानेनेति*॥ "अप्रत्यक्षेऽपी"ति कथमुक्तम्? अपरोक्षताऽङ्गीकारात्, अपरोक्षेऽधिष्ठाने सर्वत्राध्यासाङ्गीकारात् तद्विरोधात्, नापि परमताभिप्रायम्; परेषामाकाशस्वरूपे प्रत्यक्षत्वे च विवादात्, इत्याशङ्क्य, परमताभिप्रायमेतदिति वक्तुं तन्मतानि दर्शयति—*अत्र शब्दस्येत्यादिना* ॥ "बाह्येन्द्रियग्राह्यत्वादि"ति हेतौ सङ्ख्यादावनैकान्तिकः स्यात्, तदर्थमाह—*एकेन्द्रियग्राह्यत्वादिति* ॥ "गुणत्वे सती"ति द्रष्टव्यम्। गुरुत्वमपि बाह्येन्द्रियग्राह्यमिति केचित्, तदर्थमाह—*द्रव्यव्यतिरेकेणेति* ॥ अथवा—अयमपि स्वतन्त्रो हेतुः; अस्यैव पृथिव्यादिगुणत्वनिराकरणसामर्थ्येऽपि विशेषगुणत्वमर्थान्तरसाधकत्वसंभवप्रदर्शनार्थम्। "गन्धवदि"ति निदर्शनम्। "विशेषगुणत्वे वक्तव्ये"इति साध्यनिर्देशः। पृथिव्यादिद्रव्यचतुष्टयगुणत्वमस्त्वित्याशङ्क्याह—*स्पर्शादिगुणचतुष्टयेति*॥ तर्ह्यात्मगुणत्वमस्त्वित्याशङ्क्याह—*बाह्येन्द्रियग्राह्यत्वादिति* ॥ तर्हि दिक्काल-मनसां गुणत्वम्, इत्याशङ्क्याह—*दिक्काल-मनसामिति* ॥ "*अनुपलब्धि-

तत्त्वदीपनम्

तया प्रतिभासो न स्यात्; अतश्चैकेन्द्रियग्राह्यत्वस्याधिष्ठानत्वव्यापकत्वादात्मन्यसंभवान्न तस्याधिष्ठानत्वमित्यर्थः ॥ एकेन्द्रियग्राह्यत्वस्य न व्यापकत्वम्; तदभावेऽपि गगने मलिनताद्यध्यासस्य दर्शनादित्युक्तम्, तन्नोपपद्यते; इन्द्रियाग्राह्यत्वे तत्सिध्युद्याभावात्, कैश्चिदिन्द्रियग्राह्यत्वोपगमाच्चेत्याशङ्क्योभयाभावस्तावदसिद्ध इत्याह—*अत्रेति* ॥ अत्र वादिनां मध्ये वैशेषिकादयो गगनमनुमिमत इत्यन्वयः। अनुमानं दर्शयितुं शब्दस्य विशेषगुणत्वं तावदाह—*शब्दस्येति* ॥ "इन्द्रियग्राह्यत्वादि"त्युक्ते संयोगादौ व्यभिचारः, तदर्थमाह—"एकेति" ॥ संयोगादीनां द्वीन्द्रियग्राह्यत्वात् तन्निवृत्तिरित्यर्थः। आत्मनि व्यभिचारनिवारणार्थम्—"बाह्ये"ति। प्रभादौ व्यभिचारवारणार्थम्—"गुणत्वे सती"ति विशेषणं द्रष्टव्यम्। प्रभा-कुम्भसंयोगव्यावृत्त्यर्थं बाह्यैकेन्द्रियग्राह्यजातीय इत्यपि विशेषणं द्रष्टव्यम्। शब्दस्य विशेषगुणत्वमाश्रयव्यतिरेकेण न स्यादित्याशङ्क्याह—*गन्धवदिति* ॥ द्रव्यग्रहणमन्तरेणापि गन्धो यथोपलभ्यते, तद्वच्छब्दोऽप्युपलम्भसंभव इत्यर्थः। शब्दस्य भूतचतुष्टयान्यतमगुणत्वसंभवान्न तदाधारत्वेनाम्बरसिद्धिरित्याशङ्क्याह—*स्पर्शादीति* ॥ शब्दस्य स्पर्शवद्विशेषगुणत्वे स्पर्शादिषु सत्सु न निवृत्तिः स्यात्, अस्मत्प्रत्यक्षाणां स्पर्शवद्विशेषगुणानां यावद्द्रव्यभावित्वात्, नचैतदस्ति; शब्दो न स्पर्शवद्विशेषगुणः, अस्मत्प्रत्यक्षत्वे सति अयावद्द्रव्यभाविविशेषगुणत्वात्, व्यतिरेकेण रूपादिवत्, तदिदमुक्तम्—*सहवृत्तित्वाभावादिति* ॥ आत्मगुणत्वं व्यावर्तयति—*बाह्येन्द्रियेति* ॥ दिगादिगुणत्वं निरस्यति—*दिक्कालेति* ॥ तथाऽपि कथमाकाशस्य सिद्धिः? इत्याशङ्क्याह—*भूतचतुष्टयेति* ॥ शब्दः, साश्रयः, गुणत्वात्, रूपवत्; पृथिव्याद्यष्टद्रव्यस्य चाश्रयत्वा-

वार्तिकम्

विपर्यस्तो वा न स्यादेव; कदाचिदपरोक्षतया भासमानस्य घटादेः कदाचित् संदेहादि-तज्जन्यव्यवहारविषयत्वदर्शनेन प्रकृतेऽपि तत्संभवात्। अतो ज्ञानत्वादेवात्माऽपि स्वप्रकाशः सिद्धो भवति; अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वात्। अवेद्यत्वं चात्मनः पूर्वमेव कर्तृ-कर्मविरोधादिना निवेदितम्। *सन्देहाद्यगोचरत्वाच्च= यद्धि वेद्यं लोके दृष्टम्, तत्तत् कदाचित् सन्देहगोचरोऽपि दृष्टम्। नत्वात्मा कदाचिदपि सन्देहादिगोचरः; तज्जन्यव्यवहारागोचरत्वादित्युक्तमेव। अपरोक्षव्यवहारयोग्यत्वं तु तदगोचरत्वादेवावगतम् ॥

पञ्चपादिकाविवरणम्

व्यतिरिक्तद्रव्यस्यैव विशेषगुणः शब्दः । तद्गुणश्चाकाश इति वैशेषिकादयोऽनुमिमते । बौद्ध-लौकायताश्चानुपलब्धिलिङ्गकं मूर्तद्रव्याभावमात्रमाकाशमनुमिमते । प्राभाकराणां त्वस्त्येवाकाशोऽनुपलब्धिलिङ्गः ; मूर्तद्रव्याभावमात्रत्वात्, भावान्तरस्यैव चाभावत्वात् । क्षपणक-वार्तिककारीयास्तु चाक्षुषमाकाशमिच्छन्ति । तथा सति स्पर्शवत्त्वमपि स्यात् । अस्त्विति चेत्, न ; रूपस्पर्शवत्येव द्रव्ये चक्षुरादिप्रवृत्तिनियमात्, चक्षुःप्रसारणस्य

ऋजुविवरणम्

लिङ्गकमिति* ॥ मूर्तद्रव्यानुपलब्धिर्लिङ्गं यस्याकाशस्य, तदनुपलब्धिलिङ्गम् । *ननु* बौद्धादिवदेव प्राभाकरा अप्यनुपलब्धिलिङ्गमिच्छन्ति, अतः पृथक्कृत्य ग्रहणं न युक्तमित्याशङ्क्याह—*प्राभाकराणामिति* ॥ कथं तर्ह्यनुपलब्धिलिङ्गत्वमित्याशङ्क्याह—*मूर्तद्रव्याभावमात्रत्वादिति* ॥ मूर्तद्रव्याभावमात्रत्वे कथमस्त्येव ? इत्याशङ्क्याह—*भावान्तरस्यैवेति* ॥ *तथा सति स्पर्शवत्त्वम्*=स्पर्शगुणवत्त्वमपीत्यर्थः ; चाक्षुषस्य स्पर्शवत्त्वनियमात् । अथवा—"तथा सती"त्यत्रत्येनापिशब्देन रूपवत्त्वमापादितम् । यद्वा—"स्पर्शवत्त्वमपी"त्यनेन चाक्षुषत्वे स्पर्शनग्राह्यत्वं स्यादित्युक्तम् । *अस्त्विति चेदिति* ॥ *अयमर्थः*—स्पर्शगुणवत्त्वमस्तु, अथवा स्पर्शादिना विना चाक्षुषत्वमस्तु ; रूपादौ रूपाद्यभावेऽपि चक्षुरादिप्रवृत्तिदर्शनात्, द्वितीयपक्षेऽप्येवं चोद्यम्—अस्तु चाक्षुषत्वम् ; रूपवत्त्वाद्यभावेऽपि काले चाक्षुषत्वदर्शनात्, मा भूत् स्पर्शवत्त्वम् ; स्पर्शगुणाभावादिति । *यद्वा*—अस्तु स्पर्शनग्राह्यत्वमिति चोद्यार्थः । *न रूप-स्पर्शवत्येव द्रव्य इति* ॥ चक्षुः-स्पर्शनयोः प्रवर्तनं रूपस्पर्शवत्येव द्रव्ये, तदभावे न संभवति । नचाकाशे तदुभयमिति । अवधारणेन चैतदुक्तम्—रूपवत्येव चक्षुषः प्रवृत्तिः ; स्पर्शवत्येव स्पर्शनप्रवृत्तिरिति ; नतूभयगुणवत्येकैकस्य प्रवृत्तिरित्यवधारणेन विवक्षितम् । तथा सति चाक्षुषत्वे रूपवत्त्वम्, रूपवत्त्वे च स्पर्शवत्त्वम्,स्पर्शवत्त्वे च तदिन्द्रियग्राह्यत्वमिति । गुणादीनां तद्रहितानामेव चाक्षुषत्वं दृष्टमिति—"द्रव्यस्ये"त्युक्तम् । कालस्य तु द्रव्यरूपस्यानङ्गीकारान्न व्यभिचारः, अङ्गीकारे त्वाकाशवदेवाचाक्षुषत्वमिति । *ननु*—चक्षुःप्रसारणान्वय-व्यतिरेकानुविधायित्वमाकाशावभासस्य विद्यते, अतश्चाक्षुषत्वं नियमविरोधेऽपि स्वीक्रियत इत्याशङ्क्याह—*चक्षुःप्रसारणस्येति* ॥ कथमक्ष-

तत्त्वदीपनम्

संभवात्तदाश्रयत्वेनाकाशसिद्धिरित्यर्थः । मतान्तरमाह—*बौद्धेति* ॥ अनुपलब्धिर्लिङ्गं गमकं यस्य तदनुपलब्धिलिङ्गम् । योग्यत्वे सत्यनुपलब्ध्या कथं गगनसिद्धिः ? अनुपलब्धेरभावसाधकत्वादित्याशङ्क्याह—*मूर्तेति* ॥ विमतः, अभावः, योग्यत्वे सत्यनुपलभ्यमानत्वात् ; संप्रतिपन्नवदित्यर्थः । गुरुमतमाह—*प्राभाकराणामिति* ॥ तत्र प्रमाणमाह—*अनुपलब्धीति* ॥ भावरूपस्य कथमनुपलब्धिलिङ्गत्वम् ? तत्राह—*मूर्तेति* ॥

अभावमात्रत्वे—'अस्ती'ति वचनं व्याहतमित्याशङ्क्याह—*भावान्तरस्येति* ॥ इन्द्रियाग्राह्यत्वेऽप्यनुमानाद् गगनस्य सिद्धिमभिधाय, वादिभिरभिधीयमानमिन्द्रियग्राह्यत्वं निराकर्तुं तन्मतमाह—*क्षपणकेति* । अन्वय-व्यतिरेकाभ्यां तस्य चाक्षुषत्वमित्यर्थः । चाक्षुषद्रव्यस्य स्पर्शवत्त्वव्याप्तत्वात्तदभावे न चाक्षुषत्वं युक्तमित्यभिप्रेत्याह—*तथा सतीति* ॥ *स्पर्शवत्त्वमिति* ॥ स्पर्शगुणकत्वमित्यर्थः । विमतम्, न चाक्षुषम्, द्रव्यत्वे सति स्पर्शविधुरत्वात् ; मनोवत् । विपक्षे स्पर्शवत्त्वप्रसङ्गो बाध इत्युक्ते इष्टापत्तिं शङ्कते—*अस्त्विति* ॥ तथापि नीरूपत्वान्न चाक्षुषत्वमित्याह—*न रूपेति* ॥ रूपवद्द्रव्ये चक्षुषः प्रवृत्तिनियमात् स्पर्शवति स्पर्शनेन्द्रियप्रवृत्तिनियमादित्यक्षरार्थः । "स्पर्शवती"ति विशेषणेनोद्भूतस्पर्शवत्त्वेन स्पार्शनप्रत्यक्षं स्यादित्युक्तमिति द्रष्टव्यम् । विमतम्, न चाक्षुषम्, अरूपद्रव्यत्वात् ; आत्मवदित्युक्तेऽन्वय-व्यतिरेकविरोधः स्यादित्याशङ्क्याह—*चक्षुषः प्रसारणस्येति* ॥ आकाशस्यानुमाने यल्लिङ्गं योग्यानुपलब्धिलक्षणम्, तस्य दर्शनेनान्यथासिद्धत्वादित्यर्थः । योग्यत्वे सत्यनुपलब्धेरभावप्रतिपत्तिसामग्रीत्वात् चक्षुषः प्रसारणस्य तत्रान्तर्भावादन्यथासिद्धिरित्यर्थः । सिद्धान्ते तु चक्षुषः प्रसारणे आकाशानुगतसत्तायाः स्फुरणात्तद्विषयत्वेनान्यथासिद्धिरित्यर्थः । 'इह पक्षी प्लवते' इति गगनं प्रत्यक्षतोऽनुभूयते, इत्याशङ्क्यानुभवस्य

वार्तिकम्

"अत्रायं पुरुषः स्वयंज्योतिरि"ति स्वयंज्योतिःश्रुतेरपि स्वप्रकाशत्वमात्मनः । अत्र "ज्योतिरि"ति हि=

भामती

भवति—अवश्यं चिदात्माऽपरोक्षोऽभ्युपेतव्यः ; तदप्रथायां सर्वस्याप्रथनेन जगदान्ध्यप्रसङ्गादित्युक्तम् । श्रुतिश्चात्र भवति—"तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति । तदेवं

ऋजुप्रकाशिका

प्रथने जगदान्ध्यं स्यादित्युक्तमित्यर्थः । जडप्रपञ्चस्य सर्वस्यापि चिद्रूपात्मप्रकाशाधीनप्रकाशने श्रुतिमप्युदाहरति—*श्रुतिश्चात्रेत्यादिना* ॥ आत्मा श्रुतिस्थतच्छब्दार्थः । *ननु*—अपरोक्षतया प्रथमान आत्मन्यध्याससम्भवस्योक्तत्वाद् भाष्ये "पुरोऽवस्थितेऽपरोक्षे विषये विषयान्तरमध्यसितव्यमिति नियमो नास्ती"ति नियमखण्डनं कथं क्रियते ? इत्याशङ्क्य, आत्मनः परोक्षत्वमभ्युपेत्यापि तन्नियमखण्डनपूर्वकं परोक्षेऽप्यध्यासोऽस्तीत्येतत्परि-

वार्तिकम्

सजातीयान्तरानपेक्षस्व-परगोचरापरोक्षव्यवहारहेतुपदार्थोऽभिधीयते ; तत्त्वस्यैव वागादिसाधारणतया ज्योतिःशब्दप्रवृत्तिनिमित्तत्वात्, अन्यस्य जातेरुपाधेर्वाऽऽदित्य-चन्द्राग्नि-वागात्म-ज्योतिःसाधारणस्यासंभवात्, तेषु चास्मिन् प्रकरणेऽविशेषेण ज्योतिःशब्दप्रयोगात् । नच सजातीयान्तरानपेक्षेत्यधिकम् ; घटादौ व्यभिचारवारणार्थत्वात्, घट-तद्रूपयोरन्योन्यस्व-परगोचरापरोक्षव्यवहारहेतुत्वेऽपि सजातीयान्तरालोक-रूपादेरपेक्षणात् । नापि स्व-परेति विशेषणं व्यर्थम् ; अदृष्टादिवारणार्थत्वात् । तथाऽपि परपदं व्यर्थम् ; स्वपदेनैवादृष्टादिवारणादिति—चेत्, सत्यम् ; परपदस्य वस्तुकथनमात्रपरत्वात् । उक्तज्योतिष्ट्वञ्च लोके सूर्याद्यालोके वाचि विज्ञाने च दृष्टम्, नान्यत्र, परन्तु आदित्यादिषु तद् ज्ञानद्वारा दृष्टम्, ज्ञाने तु साक्षादित्यन्यत् । तत्रैतेषां ज्योतिषामन्यतमश्चेदात्मा भवति, तदाऽऽत्मनोऽप्युक्तज्योतिष्ट्वं सिद्धं भवति । तत्र सूर्याद्यालोक-वाचोः पराक्त्वेनात्मत्वं दूरापास्तमेव । प्रत्यक्त्वेन च ज्ञानस्य तदभेदः संभवति । नच जागरे ज्ञानस्य वागादिकरणजन्यत्वभ्रमे पुरुषस्य जागरे सति तदभेदो दर्शयितुं शक्यते ; जन्याजन्ययोरभेदानुपपत्तेः । स्वप्ने तु वागादिकरणाभावेन ज्ञानोत्पत्त्यसंभवात्, आत्मैव नित्यज्ञानरूपः सजातीयान्तरानपेक्षस्व-परगोचरव्यवहारहेतुरिति संभावयितुं शक्यत, इत्यभिप्रेत्य भगवती श्रुतिः स्वप्न-

भाष्यभावप्रकाशिका

कैश्चिदात्मनो नेष्टमित्याशङ्क्याह—*प्रत्यगात्मेति*॥ *अथवा*—प्रत्यगात्मनः प्रसिद्धिः प्रथनम्, तस्यापरोक्षत्वादित्यर्थः । *अस्यार्थः*—अस्ति तावद् 'मयेदं विदितमि'ति विशिष्टधीः, सा च न विशेषणदर्शनादृते युक्ता । नच ज्ञानान्तरादस्य स्फुरणम् ; युगपद् ज्ञानद्वयाभावात् । विमतम्, नैतद्विषयम्, एतन्निष्ठसाक्षात्कारत्वात् ; घटसाक्षात्कारवत्, इत्यनुमानात् । नच संवेद्यघटादिज्ञानाश्रयतयाऽऽत्मसिद्धिः ; तस्य तदधीनप्रकाशत्वेन वेद्यत्वापातात्, अकर्मकारकस्यात्मनस्संवेद्यघटादिविज्ञानविषयत्वायोगाच्च । नच ज्ञानान्तरेण भिन्नकालेन पूर्वसंवेदनविशिष्टात्मसिद्धिः ; तदा पूर्वज्ञानस्याभावात् । अथ पूर्वज्ञानस्य विनश्यदवस्थायामुत्पन्नज्ञानेन पूर्वसंवेदनविशिष्टात्मसिद्धिरिति मतम्, तदाऽपि वक्तव्यम्—यत् पूर्वसंवेदने विनश्यत्क्षणोत्पन्नस्य ज्ञानान्तरस्य यदिदं विषयित्वम्, तदागन्तुकम् ? अनागन्तुकं वेति ? यद्यागन्तुकम्, तर्हि तस्य ज्ञानकार्यत्वात् तदुत्पत्त्यनन्तरक्षण एव संभवात् तदा च पूर्वज्ञानस्य नाशात्तद्ग्रहणायोगः । नहि विषयि स्वाधर्मं प्रकाशयितुर्मीष्टे ; सर्वप्रकाशकत्वप्रसङ्गात् । अथ ज्ञानत्वसमवायभावो विषयित्वम्, अतोऽनागन्तुकमिति मतम्, तदपि न ; ज्ञानमागन्तुकम्, तस्य घटादिविषयित्वं पुनः सदातनमिति वक्तुमयुक्तत्वात् । अथ ज्ञानत्वं समवायाविशेषितं विषयित्वम्, तर्हि तस्याप्यागन्तुकत्वम् ? अनागन्तुकत्वं वा ? उभयथा पूर्वोक्तदोषप्रसङ्गः । एवं तन्निरूप्यत्वादिष्वपि द्रष्टव्यम् । किं बहुना ?

वार्तिकम्

स्थाने "अत्रायं पुरुषः स्वयंज्योतिर्भवती"त्याह। न वागादिवद् ज्ञानद्वाराऽऽत्मा ज्योतिर्भवति, किं तर्हि ? स्वयमेव = अन्यनिरपेक्षतया ज्योतिर्भवतीत्यर्थः। तेन 'स्वयमि'ति विशेषणाद् "आत्मैव ज्योतिरि"त्यवधारणाच्च सिद्धमात्मनो ज्ञानैकरूपत्वेन स्वप्रकाशत्वम्—इति॥

नच—ज्ञानस्यानित्यत्वात्तदभेदे सत्यात्मनोऽप्यनित्यत्वप्रसङ्ग इति—वाच्यम्; "सत्यं ज्ञानमनन्तं ब्रह्मे"-त्यादिश्रुतेस्तदनित्यत्वासिद्धेः। नचैवं सति प्रमाणवैयर्थ्यप्रसङ्गः; विषयसम्बन्धमात्रजन्मार्थत्वेन तदवैयर्थ्यात्। यथा च चितेर्नित्यता, यथा च प्रमाणानामविद्याध्यस्तविषयसम्बन्धमात्रजन्मार्थत्वं चितेः, तथा वक्ष्यामः। अपिच त्वया ज्ञानानां जन्म कल्पयित्वा तेषां विषयसम्बन्धजन्मापि कल्पनीयम्, तन्निष्ठं च ज्ञानत्वादिसामान्यम्, तद् वरमेकमेव ज्ञानं नित्यं श्रुतिसिद्धमस्तु, तस्य च विषयसम्बन्धजन्ममात्रकल्पनं युक्तम्; लाघवात्। इतोऽपि ज्ञानम्, न सजातीयाद्भिद्यते, नवा जायते, स्वोपाधिपरामर्शमन्तरेणानुपलभ्यमानभेदत्वात्; आकाशवत्। नचेच्छादिषु व्यभिचारः; तेषां स्वत उपाधेरभावात्, स्वकारणज्ञानोपाधेरेव तदुपाधितया भासनात्। अपिच ज्ञानं न स्वाश्रयोपाधौ जायते; प्रकाशगुणत्वात्, प्रदीपप्रकाशवत्। नच—प्रदीपे प्रकाशगुणस्य जायमानत्वदर्शनात् साध्यविकलो दृष्टान्त इति—वाच्यम्; तत्र स्वाश्रयेण सह तदुत्पत्तेः, तदुपाधौ तदुत्पत्तिदर्शनासिद्धेः। *एतेन*—ज्ञानोपाधावन्तःकरणपरिणामविशेषे व्यभिचार इत्यपि—*प्रत्याख्यातम्*; तत्राप्यन्तःकरणस्य द्रव्यत्वेन तत्परिणामविशेषस्यापि द्रव्यरूपत्वात्, तेन सहोत्पद्यमानस्य तत्प्रकाशस्य स्वाश्रयोपाधावुत्पत्त्यभावात्। यदपि दर्पणादौ घर्षणादिना स्वाश्रयोपाधौ प्रकाशगुणोत्पत्तिदर्शनमिति, तदप्यसत्; नहि तत्र स्वाश्रयोपाधौ प्रकाशगुणो जायते, अपितु स्वाश्रयदर्पणेन सहोत्पन्नतया विद्यमानस्य सतो मलादिप्रतिबन्धादनभिव्यक्तौ घर्षणादिना तदपगमेनाभिव्यक्तिः क्रियते। नच—प्रदीपादिवदात्मनो जनिरस्ति, येन तदुपाधौ जन्माभावेऽपि तेन सहोत्पत्तिर्ज्ञानस्य स्यादिति—वाच्यम्; "अजो नित्यः शाश्वतोऽयं पुराणः"इत्यादिश्रुति-स्मृतिवादेषु तदजन्यत्वावधारणात्। तस्मादपि न ज्ञानोत्पत्तिरस्ति। तथाच नित्यज्ञानस्वरूप एवात्मा, न तद्व्यतिरिक्तः; अजडत्वात्, घटादिवदनात्मत्वापत्तेः॥

अपिच सैन्धवघनदृष्टान्तेनात्मनोऽपि ज्ञानघनत्वमुपपाद्य "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति" इत्यविद्याकृतकार्य-करणसम्बन्धप्रातिविलयभावं विनाशं चोक्त्वा, "अत्रैवे"त्यादिना पुनस्तद्विनाशमाशङ्क्य, "न वा अरे मोहं ब्रवीमि मात्रासंसर्गस्त्वस्य भवती"त्यादिना कार्य-करणादिसंबन्धविनाशाभिप्रायेण स्ववाक्यं व्याख्याय, "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात्," "नतु तद् द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येदि"त्याद्यनुबन्धेन तस्याविनाशित्वं ज्ञानैकरसत्वं च प्रतिपाद्य, तदवेद्यत्वमुपसंहरति श्रुतिः—"विज्ञातारमरे केन विजानीयादि"ति; अतोऽप्यात्मनोऽविनाशिज्ञानैकरसत्वं स्वप्रकाशत्वं च सिद्धं भवति। यस्तु लोके ज्ञान-ज्ञात्रोर्भेद उपलब्धः, स त्वौपाधिक एव; अन्यथोक्तश्रुति-न्यायविरोधापत्तेः। *एतेन*—औलूक्यस्मृतिरपि—*प्रत्याख्याता*; औदुम्बरीसर्ववेष्टनस्मृतिवत्

भाष्यभावप्रकाशिका

ज्ञानमात्रस्य सर्वान् प्रत्यविशिष्टत्वाद् विशिष्ट-विषयकत्वायोगाद् संबन्धाभिलक्षणविशेषेण नियतविषयकत्वं वक्तव्यम्। तथा सत्यागन्तुकत्वानागन्तुकत्वयोः पूर्वोक्तदोषप्रसङ्गः। नच धर्म-धर्मिणोर्युगपदुद्भवस्संभवति, अभ्युपगम्यते वा परैः। किंचानुव्यवसायस्यानियतत्वात् स्वविदितेऽपि 'मयाऽन्येन वा विदितोऽयमि'ति क्वचित् सन्देहस्स्यात्। तस्माद् यस्मिन्नात्मनि विशेषणत्वं कल्पितम्, तस्य संविद्रूपत्वेनैव स्फुरणादपरोक्षत्वम्; देवदत्तस्वापकालः, देवदत्तात्माऽस्तीतिव्यवहारहेतुसाक्षात्कारवान्, कालत्वात्;

नचायमस्ति नियमः—पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति ; अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति ।

भामती

परमार्थपरिहारमुक्त्वा, अभ्युपेत्यापि चिदात्मनः परोक्षताम्, प्रौढवादितया परिहारान्तरमाह— *नचायमस्ति नियमः* पुरोऽवस्थित एव=अपरोक्ष एव विषये विषयान्तरमध्यसितव्यम्* ॥ कथमयं न नियम इति ? अत आह—*अप्रत्यक्षेऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्ति* ॥ हिर्यस्मादर्थे । नभो हि द्रव्यं

ऋजुप्रकाशिका

हारान्तरमेव शङ्कोत्तरत्वेनावतारयति—*कथमिति* ॥ "अप्रत्यक्षेऽपि ह्याकाशे" इत्यत्रत्यहिशब्दस्य हेत्वर्थतामाह —*हिर्यस्मादर्थ इति* ॥ हि=यस्मात् कारणादित्यर्थः । आकाशस्याप्रत्यक्षत्वमुक्तम् ? तत् कथम् ? प्रत्यक्षत्वमेवास्तीति चेत्, तत्र वक्तव्यम्—किमाकाशं बाह्येन्द्रियप्रत्यक्षम् ? मानसप्रत्यक्षं वा ? तत्राद्यं निरस्यति

पञ्चपादिका

दृश्यते, इत्याशङ्क्याह—*नचायमस्ति नियम इति* ॥ *अप्रत्यक्षेऽपि ह्याकाश इति ॥ परोक्ष इत्यर्थः ; *अथवा*—अक्षव्यापारमन्तरेणाप्यपरोक्ष आकाशे बालाः = अयथार्थदर्शिनः, तलम् = इन्द्रनील-तमाल-

पञ्चपादिकाविवरणम्

चाकाशानुमानलिङ्गदर्शनेऽन्यथासिद्धत्वात् । तस्मात्—*अप्रत्यक्षेऽपि ह्याकाश इत्युक्तम्* ॥ *अथवेति* ।

तत्त्वदीपनम्

गगनविततेजःपुञ्जविषयत्वान्नैवमित्यभिप्रायेणाह—*तस्मादिति* ॥ अक्षव्यापारमन्तरेण गगनस्याऽऽपरोक्ष्याभिधानमयुक्तम्, बाह्यस्याक्षविषयत्वेनैवाऽऽपरोक्ष्यस्य संभवादित्याशङ्क्याह—*अथवेति* ॥

वार्तिकम्

श्रुतिविरोधेनापस्मृतित्वात् । तथाचोक्तमभियुक्तैः—"विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्"—इति ॥ तस्माद् ज्ञानैकरसत्वेनात्मनः स्वप्रकाशत्वादपरोक्षत्वेन सिद्धमपरोक्षभ्रमाधिष्ठानत्वमिति ॥

***स्यादेतत्*—नापरोक्षत्वमात्रमपरोक्षभ्रमाधिष्ठानत्वे प्रयोजकम्, किं तर्हि ? बहिरिन्द्रियविषयतयाऽपरोक्षत्वम्, यतः "सर्वो लोकः पुरोऽवस्थित एव विषये विषयान्तरमध्यस्यती"त्युक्तम्, अत आत्मनस्तद्भावान्नापरोक्षाध्यासाधिष्ठानत्वमिति, नेत्याह—*नचायमस्ति नियमः पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति ; अप्रत्यक्षेऽपि ह्याकाशे बालास्तल-मलिनताद्यध्यस्यन्तीति* ॥ नचायमस्त्ये-**

भाष्यभावप्रकाशिका

इतरकालवदिति चानुमानात् । नच स्वापेऽहंवृत्तिः ; तद्व्याघातात् । नच पुरुषान्तरं तत्साक्षात्कर्तुमलम् । ईश्वराद्यस्तित्वे च साक्षात्कारस्यास्मद्विशेषणमादेयमिति ॥ अपरोक्षाध्यासो नापरोक्षमात्रे क्वचिदपि युक्तः ; संप्रयुक्ततया पुरोऽवस्थित एवापरोक्षः ; तद्दृष्टेरित्याशङ्क्याह—*नचेति* ॥ तत्र हेतुः—*अप्रत्यक्षेऽपीति* ॥ साक्षिवेद्यतया संप्रयोगमन्तरेणापरोक्षेऽपीति यावत् । नहि नभो द्रव्यत्वे सत्यस्पर्शत्वात्

प्रदीपः

तथाचेयमत्र योजना—प्रत्यगात्मप्रसिद्धिवशाद् आत्मनः स्वप्रकाशत्वम्, अहंकारसम्बन्धादस्मत्प्रत्ययविषयत्वम्, ततश्च प्रत्यगात्माऽयं नाविषय एवेति नियम इति ॥ यत्तु 'इदं रजत'मित्यादावारोप्याधिष्ठानयोस्तुल्येन्द्रियग्राह्यत्वं दृष्टम्, सोऽयमुत्सर्गः, न नियमः ; व्यभिचारात्, तथाच न दोष इत्याह—*न चायमस्ति नियम इति* ॥ किन्तूत्सर्ग इति शेषः । व्यभिचारस्थलं प्रदर्शयति—*अप्रत्यक्षेऽपीति* ॥ इन्द्रियसम्प्रयोगमन्तराऽप्रत्यक्षेऽपीत्यर्थः । शुद्ध आकाशोऽधिष्ठानं साक्षिमात्रभास्यः, न

भामती

सत् रूपस्पर्शविरहान्न बाह्येन्द्रियप्रत्यक्षम् ; नापि मानसम् ; मनसोऽसहायस्य बाह्येऽप्रवृत्तेः, तस्माद्-

ऋजुप्रकाशिका

नभो हि द्रव्यमिति ॥ द्वितीयं निरस्यति—*नापि मानसमिति* ॥ उक्तविधयोभयविधप्रत्यक्षविरहाद-प्रत्यक्षमाकाशमित्युपसंहरति—*तस्मादिति* ॥ एवं सति तत्र बालानां तलमलिनताद्यध्यासं दर्शयति—

वार्तिकम्

कान्तः ; कोऽयम् ? *पुरोऽवस्थित एव* = बहिरिन्द्रियग्राह्य एव-*विषये* = अधिष्ठाने तद्योग्यविषयान्तर-मध्यसितव्यमिति। किमिति नायमस्त्येकान्तः ? *हि* = यस्मात् *अप्रत्यक्षेऽपि* = इन्द्रियाग्राह्येऽपि नभसि *बालाः* = अविवेकिनः, *तल-मलिनतादि* = तलं च मलिनं च तल-मलिने, तयोर्भावः, तलमलिनता, सा आदिर्यस्य धूसरतादेः ; तत्, *अध्यस्यन्ति* = आरोपयन्ति। तत्र *तलता नाम* = कुब्जवत्कटाहवच्च सर्वदिक्षु निम्नता। *मलिनता* = नीलरूपता। 'नीलोऽयमाकाशो निम्नश्च सर्वदिक्षु कटाहादिवदिति प्रतिपद्यन्त इत्यर्थः ॥

ननु—अचाक्षुषमाकाशम् ; चक्षुरन्वय-व्यतिरेकाभ्यां तद्ग्रहाग्रहदर्शनात्, तत् कथमनियमः ? इति—चेत्, नीरूपद्रव्यत्वेनाकाशस्य चाक्षुषत्वासिद्धेः। *ननु*—आकाशस्य द्रव्यत्वमसिद्धम् ; मूर्तद्रव्याभावरूपत्वात्, तथाच नीरूपस्यापि तस्य चाक्षुषत्वमविरुद्धमिति—चेत्, न ; अभावाचाक्षुषत्वस्य पूर्वमेव निरूपितत्वात्, अभावचाक्षुषत्वेऽपि न तावदाकाशः सर्वमूर्ताभावश्चाक्षुषो भवितुमर्हति ; परमाण्वादेरयोग्यत्वेन योग्यानुपलब्धेरभावात्। योग्यमूर्ताभावः स इति चेत्, न ; योग्यमूर्ते च पक्षिण्युड्डीयमाने सति तद्देशव्यापिनि सौरालोके तदनुपलब्धिप्रसङ्गात्। तद्देशावच्छेदेन तदनुपलब्धिर-विरुद्धेति चेत्, न ; सौरालोकव्यापिन्यपि देशे नभोबुद्धिदर्शनात्, आलोकसहकारित्वाच्चक्षुषस्तमन्तरेण तद्ग्रहानुपपत्तेश्च ; अन्यथाऽस्मदादीनां दिवस आकाशोपलब्धिर्न स्यात्। *ननु*—तदितरमूर्ताभावोप-लब्धिस्तद्देश इति—चेत्, एवं तर्हि भूधरादिव्यावृत्ते देशे तदितरमूर्ताभावस्य विद्यमानत्वादाकाशोपलब्धि-प्रसङ्गः। कस्तावद् भवता मूर्ताभावस्य देशोऽभिमतः ? न तावन्मूर्तमेव ; तदनुपलब्धावप्याकाशोपलब्धि-दर्शनात्। नाप्यन्यत् किञ्चित् ; तदनिरूपणात्, परिशेषादाकाश एव। तथाच तदाश्रयत्वेन तद्भिन्न-तयाऽऽकाशसिद्धेर्न मूर्तद्रव्याभाव आकाशः। किं तर्हि ? द्रव्यमेव ; शब्दगुणाश्रयत्वादिति सिद्धम् ॥

नच तद् रूपवत्त्वेन चाक्षुषं स्यात् ; तथासत्याकाशस्य क्रियावत्त्वप्रसङ्गः ; रूपस्य क्रिया-नियतत्वात्। नचाकाशे क्रियासंभवोऽस्ति ; तथा सति मूर्तत्वेन नित्यत्वहानेः, 'दधिधवलमाकाशमि'ति प्रतीते'र्नीलं नभः' इति प्रतीतिवद् भ्रान्तित्वात्। का तर्हि चक्षुरन्वय-व्यतिरेकयोर्गतिरिति—चेत्, न ; अन्धादेरप्याकाशप्रतीतेः, अन्यथा तद्गमनाद्यभावप्रसङ्गात् ; तदन्वय-व्यतिरेकयोर्मूर्तद्रव्यभावाभावनिश्च-यार्थत्वेन तदन्यथासिद्धेः ॥

ननु—आकाशं चेदतीन्द्रियम्, हन्त कथमपरोक्षभ्रमाधिष्ठानं स्यात् ? तदधिष्ठानस्यापरोक्षत्व-नियमात्। नच—अतीन्द्रियत्वेऽप्यात्मवत् स्वप्रकाशत्वात्तस्यापरोक्षत्वं स्यादिति—वाच्यम् ; जडत्वात्तस्य

भाष्यभावप्रकाशिका

बाह्येन्द्रियग्राह्यम्, नापि मनसोऽसहायस्य बाह्ये वृत्तिः ; तेन प्रसिद्धप्रत्यक्षत्वहीनेऽपि नभसि, अविवेकिनः, तलम् = इन्द्रनीलकटाहकल्पम्, मलिनतां धूम्रतामन्यच्चापीताद्यध्यस्यन्ति। तथाचाधिष्ठाना-

भामती

प्रत्यक्षम् । अथच तत्र *बालाः=अविवेकिनः परदर्शितदर्शिनः, कदाचित् पार्थिवच्छायां श्यामतामारोप्य, कदाचित्तैजसं शुक्लत्वमारोप्य–'नीलोत्पलपलाशश्याममि'ति वा 'राजहंसमालाधवलमि'ति वा निर्वर्णयन्ति । तत्रापि पूर्वदृष्टस्य तैजसस्य वा तामसस्य रूपस्य परत्र नभसि स्मृतिरूपोऽवभास इत्येवम् । तदेव तलमध्यस्यन्ति–अवाङ्मुखीकृतमहेन्द्रनीलमणिमयमहाकटाहकल्पमित्यर्थः । उपसंहरति–*एवम्=उक्तेन

ऋजुप्रकाशिका

तत्र बाला इति ॥ बालशब्दस्य स्तनन्धयार्थकत्वभ्रमं वारयति—*अविवेकिन इति* ॥ सदात्मनाऽविवेकित्वेन तेषामध्यासस्संभव इत्यत आह—*परदर्शितेति* ॥ आकाशे तल-मलिनताद्यध्यासेऽध्यास-लक्षणं दर्शयति—*तत्रापीति* ॥ "इत्येवमि"त्यनन्तरं लक्षणमस्तीत्यध्याहार्यम् । तथाचाध्यासलक्षणयोगात् सोऽध्यास एवेति भावः । तदेव प्रकारान्तरेणाप्यध्यस्यन्तीत्याह—*तदेव तलमिति* ॥ आकाशतल-मेवेत्यर्थः । प्रकारान्तरेणाध्यासप्रकारमेवाह—*अवाङ्मुखीकृतेति* ॥ आकाशमेवावाङ्मुखीकृतमहेन्द्रजाल-मणिमयमहाकटाहकल्पमित्यप्यध्यस्यन्तीत्यर्थः । भाष्यस्थमुपसंहारं व्याचष्टे –*एवमुक्तेन प्रकारेणेत्यादिना* ॥

वार्तिकम्

तदनुपपत्तेरिति—चेत्, *नैष दोषः* ; साक्षिभास्यतया तदपरोक्षतोपपत्तेः । *ननु*—बहिःपदार्थ आकाशः कथं साक्षिभास्यः स्यात्? तथात्वे वा सर्वप्रमाणवैयर्थ्यप्रसङ्ग इति—चेत्, न ; बहिःपदार्थस्यापि शुक्तिरजतादेः साक्षिभास्यत्ववत् तदुपपत्तेः । नचैतावता प्रमाणवैयर्थ्यम् ; प्रमाणायोग्यस्यैव साक्षात् साक्षि-भास्यत्वाङ्गीकारात् । नचाकाशमिन्द्रिययोग्यमित्युक्तमेव । *ननु*—शुक्तिरजतादिकं बहिःसंसर्गितया भासमानमपि न बहिःपदार्थो भवति ; साक्षिण्यध्यस्तत्वादिति—चेत्, *सत्यम्*; आकाशस्यापि साक्षि-ण्यध्यस्तत्वेनाबहिष्ठत्वात्, सर्वस्यापि प्रपञ्चस्य ज्ञाताज्ञाततया साक्षिण्यध्यस्तत्वादित्युक्तं लक्षणभाष्यविभागे ।

***ननु*—अज्ञाततयैव साक्षिण्याकाशादेरध्यास उक्तः, *सत्यमुक्तः* ;—किमेतावता? अज्ञाततयैव तद-परोक्षत्वसिद्धेः । नच भ्रमाधिष्ठानत्वानुपपत्तिः; शुक्तिकांशवदज्ञाततयाऽपरोक्षस्यैवाकाशस्य तदुपपत्तेः । *ननु* शुक्तेः सामान्यांशे ज्ञाततयाऽपरोक्षत्वमप्यधिष्ठानत्वे प्रयोजकं दृष्टम्, *सत्यम्* ; यत्राधिष्ठानेऽस्त्यंशभेदस्तत्र तथा दर्शनमुपपद्यते, यत्र तु नास्ति तद्भेदः, तत्राज्ञाततयैवापरोक्षत्वमधिष्ठानत्वे प्रयोजकम्, यथाऽऽत्मनि प्रपञ्चाधिष्ठानत्वे, तद्वदाकाशेऽपि सामान्य-विशेषांशाभावादज्ञाततयैवापरोक्षत्वं तत्प्रयोजकमिति श्लिष्टम् ॥ अस्तु वा तादात्म्याध्यासेंऽशभेदेन ज्ञाताज्ञातरूपद्वयमधिष्ठानस्य, धर्माध्यासे तु न तदुभयरूपमपेक्षते; तदन्यतररूपेणैव तदधिष्ठानत्वोपपत्तेः । तद्यथा स्फटिकादौ लौहित्याद्यध्यासे ज्ञातरूप एव स्फटिकादिर्धर्मी भवति, आत्मनि कामादिधर्माध्यासे चाज्ञात एवात्मा, तद्वदज्ञात एवाकाशो नीलादिधर्माध्यासधर्मीति न किञ्चिदनुपपन्नमस्ति । नच—अज्ञातस्य नभसः कथं नभस्त्वेन नील-विशेष्यतया भानमिति—वाच्यम्; 'घटं न जानामी'त्यादावज्ञातस्यापि घटादेस्तत्त्वेन भानवत्तदुपपत्तेः । *वस्तुतस्तु*—ज्ञाततयैव साक्षिण्याकाशाध्यासः ; साक्षादविद्याकार्यत्वात्, शुक्तिरजतवत्, अन्तःकरणा-भौतिकत्वपक्षे तद्वच्च ; अन्यथा-'अयमाकाशः' इति ज्ञाततया सर्वजनीनानुभवविरोधापत्तेः । नच—एवमा-काशस्य वृत्तिविशिष्टतयाऽध्यस्तत्वे शुक्तिरजतादिवत् सर्वजनीनानुभवगोचरतैव न स्यादिति—वाच्यम् ; अन्तःकरणाद्यनवच्छिन्ने शुद्धे साक्षिणि तदध्यासात्सर्वाध्यक्षगोचरतोपपत्तेः, शुक्तिरजताद्यध्यासस्यान्तः-**

पञ्चपादिका

पत्रसदृशम् मलिनताञ्च = धूमादिकमन्यच्च नीलोत्पलसमानवर्णतादि, अध्यस्यन्ति ।

पञ्चपादिकाविवरणम्

साक्षिवेद्यतया मनोमात्रगम्यतया वाऽपरोक्ष इत्यर्थः । इन्द्रनीलमिव नीलमित्यर्थः ।

ऋजुविवरणम्

व्यापारमन्तरेणापरोक्षत्वमुपपद्यते ? इत्याशङ्क्य व्याचष्टे—*साक्षिवेद्यतयेति* ॥ "इन्द्रनीलमि"ति कथमुक्तम् ? नहीन्द्रनीलबुद्धिराकाशे स्वीक्रियते, इत्याशङ्क्य व्याचष्टे—*इन्द्रनीलमिवेति* ॥ "अध्यासमविद्येति मन्यन्ते"इति कथमुक्तम् ? विरोधात्, नहि प्रमाणाभावे "पण्डिता मन्यन्ते"इत्येतावन्मात्रेणाविद्यात्वसिद्धिः । नापि तेषां पण्डितत्वम् ; प्रमाणाभावेऽप्यन्यदन्यत्वेन मन्यन्ते यतः । तथा "तमेतमि"ति कीदृशस्य निर्देशः ? इति न ज्ञायते, तदर्थम्—

तत्त्वदीपनम्

साक्षिणमनङ्गीकुर्वाणं प्रत्याह—*मनोमात्रेति* ॥ मनसोऽसहायस्य बहिरप्रवृत्तिरित्याशङ्क्य कार्यदर्शनेन बहिःप्रवृत्तिकल्पनसंभवादिति प्रौढ्यवलम्बनेनोक्तमिति द्रष्टव्यम् । किमाकाशस्य नित्यानुमेयत्वम् ? उतापरोक्षस्पष्टीकरणार्थमनुमानम् ? नाद्यः ; अपरोक्षानुभवविरोधात्, द्वितीयस्त्वङ्गीक्रियते । यच्चेदमुच्यते—मूर्तद्रव्याभाव इति, तदप्यसङ्गतम् ; विहायस्येकस्मिन्वयसि सञ्चरति वयोऽन्तरे सञ्चरणं न स्यात् ; प्रतिबन्धसद्भावात् । नच—यत्रावरणाभावस्तत्र सञ्चरणमित्यपि—शङ्क्यम् ; आवरणाभावाधिकरणत्वेन तदतिरिक्तगगनसिद्धेरित्यभिसन्धिः । 'गगनम् इन्द्रनीलमि'ति बुद्ध्यभावात् कथमिन्द्रनीलमित्युक्तमित्याशङ्क्याह—*इन्द्रनीलमिवेति* ॥

लक्षण-संभवानाभ्यामध्यासमर्थनं सूत्रासङ्गतम्, अध्यासस्यासूत्रितत्वादित्याशङ्क्याविद्यायाः सूत्रितत्वादध्यासस्याविद्यात्वात्तद्दर्शनमित्युक्तम्, तदयुक्तम्, तस्याविद्यात्वे प्रमाणाभावात् । नच पण्डितमतिविषयत्वेन प्रामा-

वार्तिकम्

करणाद्यवच्छिन्नचैतन्याध्यस्तत्वादसाधारण्योपपत्तेः । नच—एवं तदभिव्यञ्जकसाक्षिणस्तदाकाराविद्यावृत्तेश्च साधारण्यात् सर्वेषां सर्वदाऽऽकाशानुभवः स्यादिति—वाच्यम् ; अविद्यानुभववत्तदनुभवतथात्वस्येष्टत्वात् । परंतु सर्वसाधारणस्यापि निर्विकल्पकसाक्ष्यनुभवस्य तदवच्छेदकाविद्यावृत्तेश्च जागरे यन्मनःसम्भेदेन विकल्पनम्, तस्यैवाविद्यानुभववत् सविकल्पतयाऽऽकाशानुभवः, नान्यस्य । एतदभिप्रायेणैव टीकाकार आकाशस्य मनोवेद्यत्वं जगादेति, तदपि समञ्जसम् । *एतेन*—आकाशाध्यासस्य साक्ष्याश्रितत्वे ईश्वरोपादानत्वं न स्यात्—*इत्यपास्तम्* ; रजताध्यासस्य साक्ष्याश्रितत्वेऽपि शुक्त्युपादानत्ववद् आकाशाध्यासस्य साक्ष्याश्रितत्वेऽपि विषयत्वमात्रेणेश्वरोपादानत्वाविरोधात् । *एतेन*—ज्ञाताज्ञाततया सर्वावभासकत्वेन सर्वज्ञत्वादीश्वरोपाधिसाङ्कर्यम्—*इत्यपास्तम्* ; मायावृत्त्या ज्ञाततया सर्वावभासकत्वरूपसर्वज्ञत्वस्यैवेश्वरोपाधित्वात् । साक्षिणस्तु ज्ञाताज्ञाततया सर्वावभासकत्वेऽपि ज्ञाततया सर्वावभासकत्वाभावात्तदुपाधिसाङ्कर्यानुपपत्तेरित्यास्तामयं प्रसङ्गः । सर्वथाऽप्याकाशस्य साक्षिभास्यतयाऽपरोक्षत्वम् । तथाचापरोक्षत्वादुपपन्नम्—"नीलं नभः" इत्यादिभ्रमाधिष्ठानत्वमिति । सम्भावनां

भाष्यभावप्रकाशिका

रोप्ययोर्नैकेन्द्रियग्राह्यत्वनियतिरिति भावः ॥ दार्ष्टान्तिकं ब्रुवाणः संभावनां निगमयति—*एव-

प्रदीपः

तु सम्प्रयोगजप्रत्यक्षविषयः, नैल्यं तु भूम्यादिगतमौपाधिकमाकाशेन्द्रियसम्प्रयोगजप्रत्यक्षविषय इति तुल्येन्द्रियग्राह्यत्वं व्यभिचरितमिति भावः । व्यक्तं चाद्वैतसिद्धावाकाशस्य साक्षिभास्यत्वं प्रतिपादितम् । अत्राकाशदृष्टान्तोपादानात् स्वप्नविभ्र-

एवमविरुद्धः प्रत्यगात्मन्यप्यनात्माध्यासः। तमेतमेवंलक्षणमध्यासं पण्डिताः—'अविद्ये'ति मन्यन्ते।

भामती

प्रकारेण सर्वाक्षेपपरिहारादविरुद्धः प्रत्यगात्मन्यप्यनात्मनाम्=बुद्ध्यादीनाम्, अध्यासः। *ननु* सन्ति च सहस्रमध्यासाः, तत् किमर्थमयमेवाध्यास आक्षेप-समाधानाभ्यां व्युत्पादितः? नाध्यासमात्रमिति? अत आह—*तमेतमेवंलक्षणमध्यासं पण्डिता 'अविद्ये'ति मन्यन्ते* ॥ अविद्या हि सर्वानर्थ-

ऋजुप्रकाशिका

सहस्रमध्यासा इति ॥ रजताद्यध्यासप्रभृतय इत्यर्थः। *अयमेवाध्यास इति* ॥ आत्मन्यनात्माध्यास एवेत्यर्थः। *नाध्यासमात्रमिति* ॥ अध्यासमात्रं किमिति न व्युत्पाद्यत इत्यर्थः। आत्मन्यनात्माध्या-सस्यैवानर्थहेतुत्वेनाविद्यात्वात् तत्परिज्ञानाभावे तदुच्छेदाय प्रवृत्त्ययोगात् स एवावश्यं व्युत्पाद्यत इत्यभिप्रेत्याह —*अत आहेति* ॥ अभिप्रायमेव विवृणोति—*अविद्या हीत्यादिना* ॥ *स एव* आत्मन्य-

पञ्चपादिका

*एवमविरुद्धः *इति सम्भावनां निगमयति। यथाऽऽकाशस्याक्षव्यापारमन्तराऽप्यपरोक्षता, तथा दर्शयिष्यामः ॥ *ननु* ब्रह्मविद्यामनर्थहेतुनिबर्हणीं प्रतिजानताऽविद्याऽनर्थहेतुः सूचिता, ततः सैव कर्तृत्वाद्यनर्थबीजमुपदर्शनीया, किमिदमध्यासः प्रपञ्च्यते? इत्याशङ्क्याह—*तमेतमेवंलक्षणमध्यासं पण्डिताः=प्रमाणकुशलाः 'अविद्ये'ति मन्यन्ते।

पञ्चपादिकाविवरणम्

एवमविरुद्ध इत्यादिः स्पष्टार्थः। प्रतिपन्नोपाधौ निरस्यमानमर्थमविद्यान्वय-व्यतिरेकाभ्यामविद्यां मन्यन्त इत्यर्थः ॥ न केवलमविद्यान्वयव्यतिरेकसामर्थ्यादविद्योपादानतयाऽविद्यात्वम्, किन्तु विद्याविपरीतत्वाच्चेत्याह—

ऋजुविवरणम्

व्याचष्टे—*प्रतिपन्नोपाधाविति* ॥ "तद्विवेकेने"ति भाष्यकारेण विवेकशब्दप्रयोगः कृतः, स न युक्तः; अविवेका-नङ्गीकारात्, अध्यासस्वरूपप्रदर्शनावसरेऽविद्यास्वरूपप्रदर्शनस्यासङ्गतत्वादित्याशङ्क्याभिप्रायमाह—*न केवलमविद्या-

तत्त्वदीपनम्

णिकत्वम्; अतिप्रसङ्गादित्याशङ्क्याह—*प्रतिपन्नेति* ॥ "प्रमाणकुशलाः" इत्यनेनान्वय-व्यतिरेकावुक्तावित्यर्थः। अध्यासस्याविद्यात्वसाधनस्योपक्रान्तत्वात्"तद्विवेकेने"त्यत्र विद्याप्रदर्शनमनुपपन्नमित्याशङ्क्याह—*न केवलमिति* ॥

वार्तिकम्

निगमयति—*एवमविरुद्धः प्रत्यगात्मन्यनात्माध्यास इति* ॥ यथाऽतीन्द्रिये नभस्यपरोक्षत्वमात्रे-णेन्द्रियविषयजातीयनीलाद्यपरोक्षाध्यासो लोके दृष्टत्वादविरुद्धः, एवं प्रत्यगात्मन्यपीन्द्रियाविषयेऽपरोक्षत्व-मात्रेणापरोक्षान्तःकरणाद्यध्यासो न विरुध्यत इत्यर्थः ॥

ननु—उक्ताध्यासः प्रत्यगात्मन्यविरुद्धश्चेत, हन्त तर्हि तत्कृतगुण-दोषाभ्यामात्मा सम्बद्धः स्यात्; अन्यथा तत्र तद्वैफल्यापत्तेः, दृष्टश्च लोके रज्ज्वादौ भुजङ्गाद्यध्यासकृतभयाद्युत्पादनार्थक्रियाकारितायोगः। नच—एवमस्त्विति—*वाच्यम्*; तथा सत्यात्मनो निरञ्जनत्वादिश्रुतिव्याकोपापत्तेः, इत्याशङ्क्या-त्मनि तत्कृतगुण-दोषासंसर्गं दर्शयितुमध्यासस्याविद्यात्मत्वं दर्शयति—*तमेतमेवंलक्षणमध्यासं पण्डिता

भाष्यभावप्रकाशिका

मिति* ॥ आत्मानात्मनोः चिदचित्त्वेन वास्तवाभेदासिद्धौ सामानाधिकरण्यात् तदभेदधीरध्याससंभावनां

भामती

बीजमिति श्रुति-स्मृतीतिहास-पुराणादिषु प्रसिद्धम्। तदुच्छेदाय च वेदान्ताः प्रवृत्ता इति वक्ष्यति। प्रत्यगात्मन्यनात्माध्यास एव सर्वानर्थहेतुः, न पुनारजतादिविभ्रमाः, इति स एवाविद्या। तत्स्वरूपं चाविज्ञातं न शक्यमुच्छेत्तुम्, इति तदेव व्युत्पाद्यम्, नाध्यासमात्रम्। अत्र च "एवंलक्षणम्" इत्येवंरूपतयाऽनर्थहेतुतोक्ता। यस्मात् प्रत्यगात्मन्यशनायादिरहितेऽशनायाद्युपेतान्तःकरणाद्यहितारोपेण प्रत्यगात्मानमदुःखं दुःखाकरोति; तस्मादनर्थहेतुः। नचैवं पृथग्जना अपि मन्यन्तेऽध्यासम्, येन न व्युत्पाद्येतेत्यत उक्तम्—*पण्डिता मन्यन्ते*॥ *ननु* इयमनादिरतिनिरूढनिबिडवासनानुबद्धाऽविद्या न शक्या निरोद्धुम्;

ऋजुप्रकाशिका

नात्माध्यास एव। *तत्स्वरूपम्=आत्मन्यनात्माध्यासस्वरूपम्। तदेव=आत्मन्यनात्माध्यासस्वरूपमेव। अविद्यारूपनिरुक्ताध्यासस्यानर्थहेतुत्वमुक्तम्, तत् केन पदेन सूचितमिति वीक्षायामाह—*अत्र चैवंलक्षणमिति*॥ *एवंरूपतया*॥ एवंलक्षणपदेनेत्यर्थः। *उक्ता=सूचिता। *ननु*—प्रत्यगात्मनि अनात्मान्तःकरणाहङ्कारादितादात्म्याध्यास एवंलक्षणशब्दार्थः, तावता एवंलक्षणशब्देन कथमनर्थहेतुता सूच्यते? इत्यत आह—*यस्मात् प्रत्यगात्मनीत्यादिना*॥ एवंलक्षणशब्दार्थस्य निरुक्ताध्यासस्य दुःखित्वापादनत्वदर्शनादनर्थहेतुत्वं तेन सूचितमिति भावः। पण्डितपदकृत्यमाह—*नचैवमिति*॥ *पृथग्जनाः=

वार्तिकम्

'अविद्ये'ति मन्यन्ते–इति*॥ यद्वा—*ननु*—भवतु नामोक्ताध्यास आत्मनि, तथाऽपि सांख्यादिसिद्धान्तन्यायेन स पारमार्थिको भविष्यति, तथाच तत्कृतगुण-दोषादिप्रसक्तिरात्मनि स्यादिति, नेत्याह—*तमेतमिति*॥ यद्वा—"अविद्यात्मकबन्धप्रत्यनीकत्वादि"त्यत्र बन्धस्याविद्यात्मकत्वासिद्धिशङ्कायां तदविद्यात्मकत्वमेव प्रतिपादनीयम्, किमध्यासप्रतिपादनेनेति? नेत्याह—*"तमेतमि"ति॥—*तम्=आक्षेप-समाधानाभ्यामादिभाष्याभ्यां व्युत्पादितम्, *एतम्=सम्भावनाभाष्येण सम्भावितम्, *एवंलक्षणम्=लक्षणभाष्येण लक्षितम्; आत्मनि धर्म-धर्म्यध्यासमित्यर्थः। सदसद्विवेचिका बुद्धिः पण्डा, सा येषां सञ्जातेति "तदस्य सञ्जातं तारकादिभ्य इतच्" इति सूत्रेण 'तारकितम्' इतिवत्, ते; पण्डिताः=व्यासादयः—तमेतमेवंलक्षणमध्यासं सर्वानर्थमूलत्वाद् अविद्याकार्यत्वाद् 'अविद्ये'ति मन्यन्ते। तथाच तेषां स्मरणम्—

"तमो मोहो महामोहस्तामिस्रश्चान्धतामिस्रः। अविद्या पञ्चपर्वैषा प्रादुर्भूता महात्मनः"॥ इति॥

भगवानपि पतञ्जलिरुक्ताध्यासस्याविद्यात्वमाह—अनित्याशुचि-दुःखानात्मसु नित्य-शुचि-सुखात्मख्यातिरविद्ये"ति। किमर्थं तेषां मूलाविद्यां परित्यज्य तत्कार्याध्यासेऽविद्याभिमानः? सर्वानर्थसाधकत्वादित्यवोचाम; सुषुप्ति-प्रलयादौ मूलाविद्यायां सत्यामप्यनर्थादर्शनात्, तद्भावे च जागरादौ च

भाष्यभावप्रकाशिका

गमयतीति भावः॥ *ननु* ब्रह्मविद्यापोह्यत्वेन सूत्रितामविद्यां हित्वा किमित्यध्यासो वर्ण्यते? तत्राह—*तमेतमिति*॥ आक्षिप्तत्वं समाहितत्वं च लक्षितत्वविशेषणार्थः। "अध्यासः" इत्यनुभवानुसारिण्यनर्थतोक्ता। *पण्डिता मन्यन्त इति*॥ पृथग्जनागोचरत्वेनैतदविद्यात्वस्य व्युत्पाद्यत्वमुक्तम्। प्रतिपन्नोपाधौ निषेध्यस्याविद्यान्वय-व्यतिरेकित्वादविद्यात्वमस्येति वक्तुमविद्याग्रहणम्; अतो न सूत्रिताऽविद्योपेक्षिता; तस्या एव वर्ण्यमानत्वादित्यर्थः॥ न केवलमन्वयादिनाऽस्याविद्यात्वम्; विद्यापोह्यत्वेन

तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः ।

भामती

उपायाभावादिति यो मन्यते, तं प्रति तन्निरोधोपायमाह—*तद्विवेकेन च वस्तुस्वरूपावधारणम् = निर्विचिकित्सं ज्ञानं विद्यामाहुः पण्डिताः । प्रत्यगात्मनि खल्वत्यन्तविविक्ते बुद्ध्यादिभ्यः, बुद्ध्यादिभेदाग्रह-

ऋजुप्रकाशिका

पामरजनाः । *तद्विवेकेन=अध्यस्तदेहेन्द्रियाहङ्कारादिभ्यो भेदेन । वस्तुस्वरूपावधारणशब्दार्थमाह—*निर्विचिकित्समिति* ॥ "पण्डिताः" इत्येतत्—"आहुरि"त्यनेन सम्बध्यते । विद्यामभिधाय तन्निवर्त्योऽध्यासः किंनिमित्तकः ? इति वीक्षायां तन्निवर्त्यमध्यासं पुनः सुखबोधाय सनिमित्तं दर्शयति—*प्रत्यगात्मनीति* ॥ बुद्ध्यादिभ्योऽत्यन्तविविक्ते प्रत्यगात्मनीति योजनीयम् । बुद्ध्यादिस्तच्छब्दार्थः । एवं सनिमित्तमध्यास-

पञ्चपादिका

तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः* ॥ अध्यस्तातद्रूपसर्पविलयनं कुर्वद् वस्तुस्वरूपं रज्जुरेवेत्यवधारयद् विज्ञानं विद्येति प्रसिद्धमेव लोके ब्रह्मविदो वदन्ति ।

पञ्चपादिकाविवरणम्

तद्विवेकेनेति ॥ *ननु* अविद्यामुपवर्ण्य तस्या ज्ञाननिवर्त्यत्वप्रदर्शनेनाध्यासनिवृत्तिसिद्धेः किमध्यासोप-

ऋजुविवरणम्

न्वयेति* ॥ "विद्याविपरीतत्वाच्चे"त्यनेन विवेकप्रतियोगितयाऽविवेकमात्रमध्यास इति शङ्कानिरासः कृतः । "अध्यस्तातद्रूपे"ति व्याख्याने विवक्षाऽप्युक्ता । "यद्येवमि"त्यनेनाविद्येत्येवोपक्रमः कुतो युक्तः ; इतरथाऽध्यासस्याविद्यात्वेन विना ज्ञाननिवर्त्यत्वाभावात् तदपि वक्तव्यमिति यत्नगौरवं स्यादित्युक्तम् ; तदयुक्तम् ; अध्यासनिवृत्तिः प्रयोजनम् । सा चाध्यासस्याविद्योपादानत्वकथनेन विना न सिध्यति, अतः प्रयोजनवशाद्गौरवं न दोषायेत्याशङ्क्यावतारयति—*नन्वविद्यामुपवर्ण्येति* ॥ "नैतत्सारमि"त्यनेनैतदुक्तम्—अविद्याशब्देनाच्छादनप्रधानरूपमभिधीयते, न तु विक्षेप-

तत्त्वदीपनम्

अध्यासनिवृत्तिफलसंभवात् तद्वर्णनमुचितम्; अतः कथमध्यासवर्णनस्यायुक्तत्वम्? इत्याशङ्क्य निवृत्तिरन्यथाऽपि संभवतीत्याह—*नन्वविद्यामिति*॥ टीकाया'मविद्ये'त्येव कुत उपक्रमो वरमिति योजना । अविद्यायां वर्ण्यमानायामाच्छादकत्वमेवोक्तं स्यात्, न तु विक्षेपरूपत्वमित्युक्तम् ; तत्र विक्षेपरूपाभिधाने किं प्रयोजनम् ? न स्वरूपेणानर्थत्वम्; सुषुप्तौ तददर्शनात्। ततश्च विक्षेपहेतुत्वेनानर्थत्वं वक्तव्यं निवृत्तिसिद्ध्य इत्यर्थः। *प्रकृतोपयोगितयेति*॥ अनर्थहेतुतया निवृत्तिसिद्ध्यर्थं

वार्तिकम्

तद्दर्शनात्। नन्वेवं सति मूलाविद्या निरर्थिका ; तदभावेऽध्यासासिद्धेस्तत्सार्थक्यात्। इतोऽपि तस्याविद्यात्वमित्याह—*तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुरिति* ॥ यदि ह्यात्मन्यहमाद्यध्यासः पारमार्थिकः स्यात्, तर्हि तस्यापि वस्त्वन्तःपातित्वात्ततोऽहमादेर्निष्कृष्य वस्तुनः स्वरूपावधारणं विद्यां नाचक्षीरन्। तथाच श्रुतिः "द्वे विद्ये वेदितव्ये" इति—"यद् ब्रह्मविदो वदन्ती"त्युपक्रम्य परापरविभागेन परविद्यास्वरूपमवधारयति—"अथ परा यया तदक्षरमधिगम्यते" इत्युपन्य-

भाष्यभावप्रकाशिका

तद्विरोधित्वाच्चेत्याह—*तद्विवेकेनेति* ॥ अथवा—केनोपायेन तन्निवृत्तिरित्याकाङ्क्षायां तन्निवृत्त्युपायमाह—*तद्विवेकेनेति* ॥ तस्याध्यस्तस्य बुध्यादेः, विवेको विलापनम् । तेन रूपेणात्मनोऽ-

प्रदीपः

मात्रानुपादानान्तःकरणेन्द्रियत्ववाद एव समर्थित इति सूच्यते, इति तदिन्द्रियतासिद्धान्तो भामतीकाराणां न भाष्यासम्मतः । सदेवमध्यासमसंभावनाशङ्कापरिहारसंभावितमुपसंहरति—*एवमविरुद्ध इति* ॥ *ननु* एवमपि चिद्रूपे प्रत्यगात्मनि कथम-

भामती

निमित्तो बुद्ध्याद्यात्मत्व-तद्धर्माध्यासः। तत्र श्रवण-मननादिभिर्यद् विवेकविज्ञानम्, तेन विवेकाग्रहे निवर्तिते, अध्यासावबाधात्मकं वस्तुस्वरूपावधारणं विद्या चिदात्मरूपं स्वरूपे व्यवतिष्ठत इत्यर्थः ॥

स्यादेतत्—अतिनिरूढनिबिडवासनानुविद्धाऽविद्या विद्ययाऽपबाधिताऽपि स्ववासनावशात्

ऋजुप्रकाशिका

मभिधाय तन्निवर्तकविद्यास्वरूपं सुखबोधाय सनिमित्तं दर्शयति—*तत्र श्रवणेत्यादिना* ॥ निदिध्यासनमादिशब्दार्थः। "तेने"त्यनन्तरमध्यासनिमित्तभूत इति शेषः। *अध्यासावबाधात्मकम्=अध्यासनिवर्तकम्। वस्तुस्वरूपं च तदवधारणं चेति कर्मधारयमाश्रित्याविद्यानिवर्तकाखण्डाकारवृत्त्यभिव्यक्तचैतन्यमेव विद्येत्यभिप्रेत्याह—*विद्या चिदात्मस्वरूपमिति* ॥ *ननु* अभिव्यक्तचैतन्यस्य स्वरूपेणाजडत्वेऽपि अभिव्यक्तत्वविशिष्टवेषेण जडतया ज्ञानलक्षणविद्यात्वायोगात् कथमविद्यानिवर्तकत्वम्? ज्ञानस्यैवाज्ञाननिवर्तकत्वात्, इत्याशङ्क्य, अभिव्यक्तचैतन्यमपि विशेषणभागं परित्यज्य चैतन्यस्वरूपे पर्यवस्यति, तच्च वृत्तिसहकारादज्ञाननिवर्तकमेवेत्यभिप्रेत्याह—*स्वरूपे व्यवतिष्ठत इति* ॥ "स न सम्बध्यते" इत्युक्तम्—किं दोष-गुणासंस्पर्शित्वमेकस्य ?

पञ्चपादिका

यद्येवम् अध्यास इति प्रक्रम्य पुनस्तस्याविद्याभिधानव्याख्याने यत्नगौरवाद् वरमविद्येत्येवोपक्रमः कृतः? *नैतत् सारम्*; अविद्येत्येवोच्यमान आच्छादकत्वं नाम यत् तस्यास्तत्त्वम्, तदेवाभिहितं स्यात्, नातद्रूपावभासितयाऽनर्थहेतुत्वम्। अतोऽतद्रूपावभासित्वमध्यासशब्देन प्रकृतोपयोगितयोपक्षिप्य पुनस्त-

पञ्चपादिकाविवरणम्

द्वर्णनेन? इति चोदयति—*यद्येवमध्यास इति* ॥ *प्रक्रम्येति* ॥ पुरुषाकाङ्क्षाया अनर्थनिवृत्तिविषयत्वाद् अनर्थस्यैवाविद्यात्वेन ज्ञाननिवर्त्यत्वं वक्तव्यमिति परिहरति—*नैतत्सारमिति* ॥ अनर्थस्यैवाविद्यात्मकत्वे तदाश्रये विषये वा वस्तुतस्तन्निमित्तगुणदोषाभावाद् ज्ञानेन सर्वानर्थनिवृत्तिः फलिष्यति, तत्फलवचनमुत्तरभाष्य-

ऋजुविवरणम्

रूपम्, तदभिधानमेव चात्र प्रकृतोपयोगितया वर्णितव्यमित्युक्तम्, तदयुक्तम्; अविद्यानिवृत्तौ तन्निवृत्तिसिद्धेः, किं तज्ज्ञानेन? तथाऽऽच्छादनरूपस्य प्राधान्येनाभिधानम्, नतु तदेवाभिधेयम्; विक्षेपरूपस्याप्यभिधेयरूपत्वात्, अतोऽविद्ययोपक्रमेऽपि प्रकृतोपयोगः सिध्यत्येव, तेन नायमध्यासोपक्रमे हेतुरित्याशङ्क्याभिप्रायमाह—*पुरुषाकाङ्क्षाया इति* ॥ "तदेवाहे"त्ययुक्तम्; पूर्वग्रन्थे हि विद्यामात्रापनोदार्हत्वं दर्शनीयमित्युक्तम्। "तदेवाहे"त्यत्र तच्छब्देन तदेव निर्दिश्यते। नच तदस्मिन् भाष्ये प्रतीयते; गुण-दोषाभावमात्रप्रतीतेः। तथा परस्परव्याहतश्च; "तदेवाहे"त्युक्त्वाऽनन्तरग्रन्थे—"अवास्तवमनर्थं दर्शयती"त्युक्तत्वात्। नचार्थद्वयमस्मिन् भाष्ये प्रतीयते। नाप्येकैकस्यार्थद्वयमुपपद्यते, इत्याशङ्क्याभिप्रायमाह—*अनर्थस्यैवाविद्यात्मकत्वेनेति* ॥ *ननु*—आत्मनोऽध्यासविषयत्वे, आश्रयविषयत्वे च कथं तन्निमित्त-

तत्त्वदीपनम्

प्रवर्तकसूत्रतया प्रवृत्तिसिद्ध्यर्थं वेत्यर्थः। अध्यासस्यानर्थात्मकस्याविद्याशब्दतया विद्यामात्रनिवर्त्यत्वमुक्त्वा तस्मिन्नर्थे भाष्यमवक्ष्यत्—"तदाहे"ति, तदनुपपन्नम्; भाष्ये गुणदोषासंबन्धमात्रप्रतिपादनादित्याशङ्क्याह—*अनर्थस्येति* ॥ आश्रयशब्देन भ्रान्तिपरिणामिनिर्देशः। विषयपदमधिष्ठानवाचि। *तत्=एतदित्यर्थः। *तत्=तत्र; अनर्थस्याविद्यात्मकतया विद्यानिवर्त्यत्वे सति। एतत्पदं बुद्धिस्थं फलमाह ॥

प्रदीपः

ज्ञानाश्रय-विषयभावः? विरोधात्, इत्याशङ्कानिरासः कथमिति चेत्, यथा मिथ्याज्ञाननिमित्तोऽध्यासस्तत्राविरुद्धः, एवं मिथ्याज्ञानमप्यविरुद्धम्। स्वरूपचैतन्यं हि यद्यज्ञानेन विरुद्धम्, तर्हि कथं तत्कार्यप्रपञ्चजातेनापि न विरुद्धमिति। तथा च "अक्षमा भवतः केयं साधकत्वप्रकल्पने। किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम्" इति कारिकोक्तरीत्या यत्र ब्रह्मणि सर्वोऽपि प्रपञ्चः कल्पितः, तत्राज्ञानाश्रयत्व-विषयत्वकल्पनमपि न दुष्टमिति भावः। इममेवार्थं सूचयितुमाह—*तमेतमेवंलक्षणमध्यासं पण्डिता

तत्रैवं सति यत्र यदध्यासः, तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि न स सम्बध्यते ।

भामती

पुनरुद्भविष्यति, प्रवर्तयिष्यति च वासनादिकार्यं स्वोचितमित्यत आह—*तत्रैवं सति = एवंभूतवस्तुतत्त्वावधारणे सति यत्र यदध्यासः, तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि स न संबध्यते = अन्तःकरणादि-

ऋजुप्रकाशिका

अधिष्ठानाध्यस्यमानयोर्द्वयोर्वा ? नाद्यः ; एकस्य गुण दोषसंस्पर्शाप्रसक्तेस्तन्निषेधायोगात्, द्वितीय एव पर्यवसानं वाच्यम् , तत्र किंगतेन दोषेण को न संबध्यते ? किंगतेन वा गुणेन को न संबध्यत इति वीक्षायामाह—*अन्तःकरणादीति* ॥ "न सम्बध्यते" इत्येतत् चिदात्मेत्यत्रान्तःकरणादिरित्यत्र चोभयत्र योजनीयम् । *ननु* अस्त्वधिष्ठानाध्यस्यमानयोर्यथाक्रमं दोष गुणाद्यसम्बन्धः, तथाऽपि निविडवासनानुबन्धाऽविद्या विद्यया बाधिताऽपि

पञ्चपादिका

याविद्याशब्दितया विद्यामात्रापनोदनार्हत्वं दर्शनीयम् । तदेवाह—*यत्र यदध्यासः, तत्कृतेन दोषेण

पञ्चपादिकाविवरणम्

मित्याह—*तदेतदाह यत्र यदध्यास इति* ॥ अविद्याध्यासविषयत्वप्रयुक्तस्तावद् गुण दोषाभावः सिद्धः ॥

ऋजुविवरणम्

गुण-दोषाभावः ? इत्याशङ्क्याह—*अविद्याध्यासविषयत्वेति* ॥ विषयत्वं विना यद्यध्यासः साधितः, तदा तन्निमित्त-गुणाद्यभावः सिद्ध एव । अथवोदाहरणे विषयत्वप्रयुक्तगुण-दोषाभावः सिद्धः, इति न तत्र चोद्यमिति तावत्पदस्यार्थः । अथवाऽसङ्गत्वमविकारित्वं चात्मनः पूर्वमेव सिद्धम्, किमर्थं पुनर्गुण-दोषाभावकीर्तनम् ? पुनरुक्तिप्रसङ्गादित्याशङ्क्य परिहरति—*अविद्याध्यासविषयत्वेति* ॥ अथवा—यत्रेति सप्तम्यर्थत्वाद्विषयत्वप्रयुक्तगुण-दोषाभावः सिध्येदाकाशादि-वत्, नैतावताऽऽत्मनो गुण-दोषाद्यभावः सिध्यति ; आश्रयत्वप्रयुक्तस्य गुण-दोषस्यापरिहार्यत्वादित्याशङ्क्याह—*अविद्याध्यासविषयत्वेति* ॥ आश्रयत्वप्रयुक्तस्तु बहिरेव कथ्यत इत्यर्थः । *ननु*—आश्रयत्वप्रयुक्तगुण-दोषौ

वार्तिकम्

स्य तद्विषयवस्तुस्वरूपमनात्मनो विविच्य पण्डितमत्याऽवधारयति—"यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः-श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यन्ति धीराः" इति । तस्माद-ध्यासो न वस्तुतत्त्वेऽन्तर्भवति । किं तर्हि ? अविद्येत्यभिप्रायः । भवत्वेवम् , तथाऽपि प्रकृते किमायातमिति ? अत आह--*"तत्रैवं सति यत्र यदध्यासः, तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि स न संबध्यते" इति* ॥

भाष्यभावप्रकाशिका

साधारणरूपस्येदमित्थमित्यवधारणं विद्या । तद्विरोधित्वादिना सिद्धेरध्यासस्याविद्यात्वे सैवोच्यत इत्यर्थः ॥ तथाऽपि कारणाविद्यां त्यक्त्वा कार्याविद्योक्तिरयुक्तेत्याशङ्क्याह—*तत्रेति* ॥ तस्मिन्नध्यासे दर्शनरीत्याऽविद्यात्मके सत्याच्छादकाविद्यायाः स्वापादौ स्वतोऽनर्थत्वादर्शनात् कर्तृत्वाध्यासात्मना तस्या जागरादौ तथात्वात् कार्याविद्यावर्णने यत्रात्मनि बुध्यादौ वा यस्य बुध्यादेरात्मनीवाध्यासः, तेन बुध्यादिना

प्रदीपः

'अविद्ये'ति मन्यन्त इति* ॥ अविद्याकार्यत्वादविद्याशब्देनाध्यासोऽपि व्यवह्रियते । तथाच प्रपञ्चाध्यासवद् अज्ञानाश्रयत्वादि-कमपि न दुष्टमिति फलितम् । *ननु* एवं सति चैतन्यस्याध्यासाविरोधित्वे, चैतन्येनाध्यासस्य सुतरां तन्मूलभूतमिथ्या-ज्ञानस्य च न निवृत्तिः ; निवर्तकान्तराभावात्, इति श्रीभाष्याद्यापादितनिवर्तकानुपपत्तिशङ्कानवसरं सूचयन्नध्यासनिवर्तक-मुपक्षिपति—*तद्विवेकेन च वस्तु स्वरूपावधारणं विद्यामाहुरिति* ॥ 'इदं रजतमि'त्याद्यध्यासोऽविवेकग्रहनिबन्धनः, तस्य विवेचनेन अगृहीतशुक्तित्वांशविवेचनेन ; अभेदे तृतीया । तथाच शुक्तित्वज्ञानरूपं यद् वस्तुस्वरूपावधारणम्—'इयं शुक्ति'रिति

भामती

दोषेणाशनायादिना चिदात्मा, चिदात्मनो गुणेन चैतन्यानन्दादिनान्तःकरणादि न संबध्यते। *एतदुक्तं भवति*—तत्त्वावधारणाभ्यासस्य हि स्वभाव एव स तादृशः, यदनादिमपि निरूढनिबिडवासनमपि मिथ्याप्रत्ययमपनयति। तत्त्वपक्षपातो हि स्वभावो धियाम्। यथाहुर्बौद्धा अपि—

'निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः। न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः॥' इति॥

विशेषतस्तु चिदात्मस्वभावस्य तत्त्वज्ञानस्यात्यन्तान्तरङ्गस्य कुतोऽनिर्वाच्ययाऽविद्यया बाध इति? यदुक्तम्—"सत्यानृते मिथुनीकृत्य विवेकाग्रहादध्यस्याहमिदं ममेदमिति लोकव्यवहारः" इति, तत्र

ऋजुप्रकाशिका

पुनरुद्भविष्यति, वासनादिकार्यं च प्रवर्तयिष्यतीत्यस्य कः परिहारः? इत्यत आह—*एतदुक्तं भवतीत्यादिना*॥ *ननु* तत्त्वावधारणाभ्यासस्य कथं निरूढनिबिडवासनमिथ्याज्ञानापनायकत्वम्? मिथ्याज्ञानपक्षपातित्वमेवास्तु, इत्याशङ्क्य, न तथा, किन्तु तत्त्वपक्षपातित्वमेव तत्त्वधियां स्वभाव इत्याह—*तत्त्वपक्षपातो हीति* ॥ बाह्या अपि तत्त्वपक्षपातित्वमेव धियां वदन्ति, किमु वक्तव्यम्? अस्मदादय इत्यत्र, इति कैमुतिकन्यायमभिप्रेत्याह—*यथाहुरित्यादिना* ॥ प्रत्युत विशेष एवात्रास्तीत्याह—*विशेषतस्त्विति* ॥

पञ्चपादिका

गुणेन वाऽणुमात्रेणापि स न सम्बध्यते इत्यवास्तवमनर्थं दर्शयति। वास्तवत्वे हि 'ज्ञानमात्रात् तद्विगमः' इति प्रतिज्ञा हीयेत॥

पञ्चपादिकाविवरणम्

अत्राध्यासपरिणामितयाऽऽश्रयत्वप्रयुक्तदोष-गुणाभावः कथ्यते। कथम्? अनाद्यविद्याध्यासस्य नित्यचैतन्यावभासत्वान्न तत्राध्यासपरिणामः। कादाचित्काध्यासपरिणामस्याविद्योपादानत्वादविद्यासंभेदादात्माश्रयत्वादिसिद्धिरिति। *प्रतिज्ञेति* सूत्रकारस्य---ज्ञानेन बन्धनिवृत्तेरर्थात्सूत्रणमुच्यते॥

ऋजुविवरणम्

न स्त इति कथमुच्यते? न ह्यध्यासपरिणामिनस्तन्निमित्तगुण-दोषाभावः संभवतीत्याक्षिपति—*कथमिति* ॥ अज्ञानाकारेण तदवभासाकारेण वा न परिणाम इत्याह—*अविद्याध्यासस्येति*॥ *ननु*—परिणामित्वाभावे कथमात्माश्रयत्वमध्यासस्य? इत्याशङ्क्याह—*अविद्यासंभेदादिति* ॥ "प्रतिज्ञा हीयेते"ति कथमुक्तम्? नहि बन्धनिवृत्तिप्रतिज्ञाऽस्ति, येनैवमुच्येत, इत्याशङ्क्य व्याचष्टे—*प्रतिज्ञेति*॥ *सूत्रकारस्येति* ॥ एवम्—"अध्याससद्भावमि"त्यादिनाऽ-

तत्त्वदीपनम्

"न संबन्ध्यत"इति कथमुक्तम्? संबन्धस्य प्रतीयमानत्वादिति शङ्कायां टीकाकृतोक्तम्—"अवास्तवमि"ति। अवास्तवत्वमुपपादयति—*वास्तवत्व इति* ॥ आश्रय-विषयत्वप्रयुक्तगुण-दोषासंस्पर्शाभिधानमनुपपन्नम्; विषयत्वप्रयुक्तगुणाद्यसंस्पर्शस्य शुक्तिकादिदृष्टान्तेन सिद्धत्वेऽप्याश्रयत्वप्रयुक्तगुणादिसंस्पर्शोऽतिदुर्वारः। सर्पादिभ्रान्त्याश्रये परमार्थत एव भय-कम्पादिदृष्टेरित्याशङ्क्य तात्पर्यमाह—*अविद्येति*। तावदिति* ॥ लौकिकन्यायेन सिद्धत्वान्न किंचिद् वक्तव्यमस्तीत्यर्थः। आत्मनः परिणामित्वे तन्निमित्तगुणादिसंस्पर्शो दुर्वार इत्याह—*कथमिति* ॥ आत्मनः किमज्ञानाध्यासपरिणामित्वम्? उताहंकाराध्यासपरिणामित्वम्? इति विकल्प्याद्यं दूषयति—*अनाद्यविद्येति*॥ द्वितीयं प्रत्याह—*कादाचित्केति* ॥ आगन्तुकाध्यासस्याविद्याश्रयत्व आत्मनो नित्यमुक्तत्वाद् ज्ञानवैयर्थ्यमित्याशङ्क्याऽविद्या-तत्कार्ययोरात्मन्यध्यस्तत्वाद् ज्ञानस्यार्थवत्त्वमित्याह—*अविद्येति* ॥

"प्रतिज्ञा हीयेते"त्यत्र किं भाष्यकृतः प्रतिज्ञा उच्यते? उत सूत्रकृतः? नाद्यः; तददर्शनात्; न द्वितीयः; विचारकर्तव्यतायास्तत्र प्रतिज्ञादर्शनादित्याशङ्क्याह—*प्रतिज्ञेति* ॥ ब्रह्मज्ञानप्रयोजनां विचारकर्तव्यतां सूत्रयताऽऽ-

पञ्चपादिका

एवं तावद् "युष्मदस्मदि"त्यादिना "मिथ्याऽज्ञाननिमित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहारः" इत्यन्तेन भाष्येण सिद्धवदुपन्यस्तमात्माऽनात्मनोरितरेतरविषयम-विद्याख्यमध्यासं सिषाधयिषुः, तस्य लक्षणमभिधाय, तत्सम्भवं चात्मनि दर्शयित्वा, पुनस्तत्र सद्भावनि-

पञ्चपादिकाविवरणम्

वृत्तसंकीर्तनपूर्वकमुत्तरभाष्यस्य तात्पर्यमाह—*एवं तावद्युष्मदस्मदित्यादिनेति* ॥ अत्र च प्रमातृ-प्रमाण-प्रमेय-कर्तृ-कर्म-कार्य-भोक्तृ-भोग-भोग्यत्वलक्षणस्य व्यवहारत्रयस्य शरीरेन्द्रियादिष्वहं ममाध्यासपुरःसरत्वं प्रत्यक्षमिति

ऋजुविवरणम्

ध्यासमुपपत्तित उपपादयितुमिच्छन्नाहेति भाष्यमवतारितम्, तत्र कथमुपपादनं कृतमिति न ज्ञायते, नहि "इतरेतराध्यासं पुरस्कृत्य व्यवहाराः"इत्येतावन्मात्रेणाध्याससिद्धिः; प्रमाणाधीनत्वात्सिद्धेः। तथा "प्रमाण-प्रमेयव्यवहारा लौकिकाः"-इत्युक्तम्, के ते? इति न ज्ञायते; तदर्थं व्याचष्टे—*अत्र च प्रमातृ-प्रमाणेति* ॥

"बाढमुक्तलक्षणे"त्यत्रैतदुक्तम्—उक्तलक्षणं संभावनं चास्ति, नैतावता तत्सद्भावसिद्धिरिति, तदयुक्तम्; प्रमाणस्याप्युक्तत्वात्, लक्षण-संभावनामात्राङ्गीकारायोगात्, नैतावता तत्सद्भावसिद्धिरिति चायुक्तम्; प्रमाणस्याप्युक्त-

तत्त्वदीपनम्

त्वार्येण बन्धनिवृत्तिः सूत्रिता; ज्ञानस्य स्वरूपेणापुरुषार्थत्वादित्यर्थः। पूर्वोत्तरभाष्ययोरध्यासविषयत्वाद् मध्ये वृत्तकीर्तनमनुपपन्नमित्याशङ्क्य, लक्षणादेः पुरोक्तत्वात् प्रमाणस्य च "कथं पुनरि"त्यत्रोच्यमानत्वाद् व्यवहारस्य चा-ध्यासपुरःसरताया द्वितीयभाष्ये सिद्धत्वादुत्तरभाष्यमसङ्गतमिति शङ्कायां प्रमाणपरत्वाद् नास्य तावद् वैयर्थ्यमित्या-शयेनाह—*वृत्तेति* ॥ कर्त्रादिव्यवहारस्याविद्याविषयत्वमत्र कस्माद् नोक्तम्? प्रमाणं चोपन्यस्यमानं न पश्यामः, इत्याशङ्क्याह—*अत्रेति* ॥ प्रमात्रादिव्यवहारस्येतरेतरोपलक्षणत्वाद् "अध्यासं पुरस्कृत्ये"ति च साक्षिप्रत्यक्षस्योक्त-त्वाद् नावद्यमित्यर्थः ॥

वार्तिकम्

तत्रैवं सति=अध्यासाविद्यात्वे सतीत्यर्थः। दोषः=दुःखादिः; प्रतिकूलत्वात्, *गुणः=सुखादिः; अनुकूलत्वात्, *अणुमात्रेणापि=अत्यल्पेनापीत्यर्थः। नच रज्ज्वां कल्पितभुजङ्गादिकृतभयादिहेतुत्व-योगः; तत्पूर्वोत्तरकालयोस्तत्र तदभावेन तत्कालेऽपि तस्यास्तद्योगात्, कल्पितसर्पज्ञानस्यैव भयादि-जनकत्वात्—इति। तथाच प्रयोगः—विवादाध्यासितोऽध्यासः, न वस्तुतः स्वाधिष्ठानातिशयहेतुः, अविद्या-त्मकत्वात्; स्वप्नेन्द्रजाल-गन्धर्वनगर-शुक्तिरजत-रज्जुभुजङ्गादिवत्। *ननु*—अस्त्यत्र प्रतिप्रयोगः; तथाहि—विवादाध्यासितोऽध्यासः, वस्तुतः स्वाधिष्ठानेऽतिशयाधायकः; वासनाधारत्वात्, चम्पकपुष्पा-दिवदिति—चेत्, *न*: तत्र स्वाश्रयपुष्पावयवेन सहैव पुटे पुष्पगन्धस्य विद्यमानत्वाद् वस्तुतस्तदाश्रय-त्वाभावाद् दृष्टान्तस्य साध्यविकलत्वात्। किं वा हेतौ वासनाशब्देन विवक्षितम्? यदि भावनापरपर्यायः संस्कारो गृह्यते, तदा साधनविकलो दृष्टान्तः। अथ गन्धः, तर्हि स्वरूपासिद्धो हेतुः; अन्तःकरण-कामाद्य-ध्यासस्यापार्थिवत्वेन गन्धानाधारत्वात्। नचोभयसङ्ग्राहकः कश्चिद्धर्मोऽस्ति, येन तं निमित्तीकृत्योभय-सङ्ग्राहकवासनाशब्दः स्यात्; तदद्दर्शनात्। यदि ब्रूयात्—वासनाशब्देन संस्कारत्वजात्यवच्छिन्नं संस्कार-मात्रमभिधीयते, तच्च पक्ष-दृष्टान्तयोरुभयोरप्यस्ति; अन्तःकरणादेरध्यासिकस्य धर्माधर्मादिसंस्काराश्रय-त्वात्, चम्पकपुष्पादेश्च वेगाख्यसंस्काराश्रयत्वादिति, एवमपि साध्यवैकल्यमस्त्येवेति ॥ लक्षितस्तावदात्मा-नात्मनोः सामान्यतोऽध्यासः, सम्भावितश्च विशेषतः; अथेदानीं तत्र प्रमाणं वाच्यम्। नहि रजनीकरस्या-परभागे हरिणमनवलोकयन् पुमान् परभागे तं सम्भावयन्नपि प्रमाणमन्तरेणाधिगच्छति; तत्र तस्य प्रमाणा-प्रवृत्तेः। *ननु*—एवं तर्हि प्रमाणमेव वाच्यम्, न सम्भावना; प्रमाणनिश्चितेऽर्थे सम्भावनाध्रौव्यादिति

तमेतमविद्याख्यमात्माऽनात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमातृ-प्रमाण-प्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधि-प्रतिषेध-मोक्षपराणि ।

भामती

व्यपदेशलक्षणो व्यवहारः कण्ठोक्तः । इतिशब्दसूचितं लोकव्यवहारमादर्शयति । *तमेतमविद्याख्य-मिति* निगदव्याख्यातम् ॥

ऋजुप्रकाशिका

चिदात्मन एव तत्त्वज्ञानत्वप्रयुक्तविद्याबाध्यत्वमत्र विशेषः । *यदुक्तमिति* ॥ भाष्य इति शेषः ॥ *इति-शब्दसूचितमिति* ॥ 'अहमिदं ममेदम्' इतीत्यत्रत्येतिशब्दसूचितमित्यर्थः । *निगदव्याख्यातमिति* ॥ "तमेतमविद्याख्यमि"त्यारभ्य "मोक्षपराणी"त्यन्तं भाष्यं ; *निगदव्याख्यातम्=स्पष्टार्थमित्यर्थः । भाष्येऽध्यासं

पञ्चपादिका

श्चयमुपपत्तित उपपादयितुमिच्छन्नाह—*तमेतमविद्याख्यमात्माऽनात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाण-प्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधि-प्रतिषेध-मोक्षपराणीति* ॥

ऋजुविवरणम्

त्वात्, तदसिध्ययोगात् । तथा सह विवरणेन भाष्यमसङ्गतम् ; पूर्वभाष्ये हि व्यवहारत्रितयस्याध्यासपुरःसरत्व-मुक्तम्, अनन्तरं तत्रैव प्रश्नादिकरणं युक्तम् । नह्यविद्यावद्विषयत्वं प्रकृतं निरूप्यं वा, कुतस्तत्र प्रश्नकरणम् ? समासे

वार्तिकम्

चेत्, *न* ; व्यभिचारात्, प्रत्यक्षेणाधिगतेऽपि वाराणस्यामार्द्रमरिचे 'नैतदत्र सम्भवती'त्यसम्भावना-दर्शनात् । तस्मात्तदसम्भावनानिवृत्त्यर्थं पृथक् सम्भावनाया अपि वक्तव्यत्वान्न प्रमाणाभिधानेन सम्भावनाऽभिधानवैयर्थ्यम्, नवा सम्भावनाऽभिधानेन प्रमाणाभिधानवैयर्थ्यम् ; सम्भावितस्यापि रजनी-करपरभागहरिणस्य प्रमाणाभावेनानिश्चयात् । *ननु*—एवमपि न पृथक् प्रमाणाभिधानं कर्तव्यम्, लक्षणाभिधानेनैव तत्प्राप्तत्वात्, व्यतिरेकिहेतोर्लक्षणत्वादिति—चेत्, *सत्यम्* ; परन्तु लक्षणस्यैव गगनारविन्दसौरभविशेषवत् प्रमाणमन्तरेणासिद्धत्वात् तत्सिध्यर्थमेव प्रमाणमभिधातव्यम् । *ननु* तत्रापि प्रमाणमभिहितम्—"तथाच लोकेऽनुभवः" इत्यादिना, *सत्यम्* ; बहिरध्यासे तत् प्रमाणं प्रदर्शितम्, नात्मानात्माध्यासे, अतस्तत्प्रदर्शनमत्र क्रियते । *ननु* एवं तर्हि तत्रैव तत्प्रदर्शनमपि कार्यम्, *नेत्युच्यते* ; असम्भाविते प्रमाणप्रदर्शनस्य कर्तुमशक्यत्वादित्यास्ताम् । सर्वथापि प्रमाण-प्रदर्शनमत्र कर्तव्यम्, तदाह—"तमेतमविद्याख्यमाऽत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमातृ-प्रमाण-

भाष्यभावप्रकाशिका

वाऽऽत्मना वा कृतेनाशनायादिदोषेण चैतन्यगुणेन वात्माऽनात्मा वा वस्तुतो न स्वल्पेनापि युज्यत इत्यतो विद्यया तन्निवृत्तिरित्यर्थः ॥ लक्षण-संभावने भेदोनोक्त्वा सद्भावं निर्णेतुमादौ प्रत्यक्षं दर्शयति—*तमिति* ॥ अथवा लोकव्यवहार इति व्यपदेशलक्षणो यो व्यवहारस्तद्धेतुत्वं तस्यैव कण्ठोक्तम्, इदानीं व्यवहारान्तरहेतुत्वमध्यासस्य दर्शयति—*तमिति* ॥ आक्षेप-समाधिविषयत्वं तदर्थः । लक्षितत्वमेतदर्थः ।

प्रदीपः

ज्ञानम्, तदेव विद्येति वाक्यार्थः । अनेन चेदमेवाभिप्रेयते—यद् इदमवच्छिन्नचैतन्यं केनचन रूपेणावृतं रूपान्तरेण च गृहीतं नाध्यासनिवर्तकम्, किन्तु प्रमाणजन्यविशेषांशावगाहिवृत्त्यभिव्यक्तचैतन्यमेव तदध्यासनिवर्तकमिति । तथाच न केवलं चैतन्यं विशेषानवगाहिवृत्त्यभिव्यक्तचैतन्यं वा नाध्यासस्याज्ञानस्य वा विरोधि, किन्तु प्रमाणजन्यविशेषांशावगाहिवृत्त्यभिव्यक्त-

पञ्चपादिका

मोक्षपरत्वं च शास्त्रस्य विधि-प्रतिषेधविरहिततयोपादान-परित्यागशून्यत्वात् स्वरूपमात्रनिष्ठत्वमङ्गीकृत्य पृथक् क्रियते ।

पञ्चपादिकाविवरणम्

प्रश्नपूर्वोपन्यासः कृतः । *ननु* "विधि-प्रतिषेधपराणि शास्त्राणी"त्येव वक्तव्यम्, तन्निष्ठत्वात् सकलशास्त्रस्य ; किमिदं मोक्षपराणीति ? तत्राह—*मोक्षपरत्वं चेति* ॥ "कथं पुनरि"त्यादिभाष्यस्याध्यासोपादानं व्यवहार-

तत्त्वदीपनम्

शास्त्रस्य विधि-प्रतिषेध-मोक्षपरत्वमुक्तम्, तदाक्षिपति—*ननु विधीति* ॥ शास्त्रस्य प्रवृत्ति-निवृत्त्युपदेशन-स्वाभाव्याद् ब्रह्मणश्च प्रवृत्त्याद्यसंस्पर्शित्वान्न तत्परत्वं शास्त्रस्येति चोद्यार्थः । नच प्रवृत्त्याद्युपदेष्टृतया शास्त्रत्वम् ; अतिप्रसङ्गात्, किंतु पुरुषार्थोपदेष्टृतया, तच्च वेदान्तेष्वस्तीत्यभिप्रायेणाह—*तत्राहेति* ॥ वेदान्तेषु विधि-प्रतिषेध-वाचकपदाभावाद् ब्रह्मविषयोपादानाद्यसंभवादध्याहारस्यानुपपत्तेः स्वरूपमात्रनिष्ठमपि शास्त्रमस्तीति पृथक्करणमिति टीकार्थः । "कथं पुनः प्रत्यगात्मनी"त्यत्रासंभवाशङ्कायाः परिहृतत्वात् पुनस्तच्छङ्कानुदय इति भाष्यानुपपत्तिमाशङ्क्य, प्रमाणप्रश्नपरतया भाष्यं व्याचख्यौ, तदयुक्तम् ; प्रमाणस्य पूर्वोक्तत्वादित्याशङ्क्य तात्पर्यमाह—*कथं पुनरिति* ॥ "निदर्शनीयम्" इत्यत्र नितरां दर्शनीयमिति प्रमाणान्तरं च दर्शनीयमित्युक्तम् ; साक्षिणः प्रतिवाद्यसंमतत्वात् । नच—"कथं पुनरि"त्यतः प्रागध्यासस्वरूप-तत्संभावनाय, तदादि तत्सद्भावनिर्णयार्थमिति टीका विरुध्यते, प्रमाणस्य पूर्वभाष्येऽप्युक्तत्वादिति—शङ्क्यम् ; साक्षिण इतरासंमततया तत्संमतप्रमाणस्यात्रैव प्रदर्श्यमानत्वादित्यर्थः ॥

वार्तिकम्

प्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधि-प्रतिषेधमोक्षपराणीति* ॥ अत्र प्रत्यक्षं व्यवहारान्यथाऽनुपपत्तिश्चेति प्रमाणद्वयमुक्तलक्षणाध्यासे प्रदर्श्यते । *तम्*=पूर्वोक्तम् । *अविद्या-ख्यम्*=अविद्येत्याख्या संज्ञा यस्य, तम् । कस्याविद्येत्याख्येत्यत्र तदा परामृष्टमाह—*आत्मानात्मनोरितरेतराध्यासम्* ॥ तस्य प्रत्यक्षानुभवसिद्धत्वमाह—*एतमिति* ; जडाऽजडतादात्म्यस्याहं-ममेत्यादिप्रत्यक्षानुभवसिद्धत्वस्य सर्वजनीनत्वात् । प्रत्यक्षं प्रदर्श्यानुपपत्तिप्रमाणमाह—*पुरस्कृत्येति* ॥ अनन्यथासिद्धनियतपूर्ववर्तिनं कृत्वेत्यर्थः । व्यवह्रियन्त इति *व्यवहाराः* ॥ प्रमाता च, प्रमाणञ्च, प्रमेयञ्च, तान्येव व्यवह्रियमाणत्वाद् व्यवहाराः ; प्रमातृ-प्रमाण-प्रमेयव्यवहाराः । व्यवह्रियन्ते हि प्रत्यक्षेण प्रमात्रादयः "अहमिदं चक्षुषा प्रमिणोमि" इति । "सर्वे" इति विशेषणं व्याप्तिप्रदर्शनार्थम् । *लौकिकाः*=सर्वप्राणभृद्व्यवहारगोचराः । लौकिका इति विशेषणं शास्त्रीयप्रमात्रादिवैलक्षण्यसूचनार्थम् । अतश्च अत एव ततो निष्कृष्य पृथक् "सर्वाणि शास्त्राणी"त्युक्तम् । "प्रवृत्ताः" इत्यत्र स्वस्वकार्ये इति शेषः । तेन तत्पूर्वकाः कर्तृ-करण-कार्य-भोक्तृ-भोग-भोग्यव्यवहारा अपि संगृहीता द्रष्टव्याः । यद्वा—प्रमातृ-प्रमाण-प्रमेयाणां व्यवहाराः=अभिज्ञाऽभिवदनादयः, ते सर्वे आत्मानात्मनोरितरेतराध्यासं पुरस्कृत्य प्रवृत्ता इति व्याख्येयम् । अस्मिन् पक्षे प्रमात्रादीनामाध्यासिकत्वमर्थात्सिद्धं भवतीति द्रष्टव्यम् । सर्वथाऽपि प्रमातृत्वाद्यन्यथाऽनुपपत्तिस्तद्व्यवहारान्यथाऽनुपपत्तिर्वा आत्मानात्मनोरितरेतराध्यासे प्रमाणं दर्शितं

प्रदीपः

चैतन्यमेवाध्यासस्याज्ञानस्य वा विरोधि, इति न निवर्तकानुपपत्तिः, न वा चैतन्ये शुद्धेऽज्ञानाश्रयत्व विषयभावानुपपत्तिः ॥ *अयं भावः*—वृत्तिः, वृत्त्यभिव्यक्तं चैतन्यं वाऽज्ञानविरोधि, न तु शुद्धचैतन्यमात्रम् । यथाहि सूर्यकिरणानां स्वतः प्रकाश-मानानां गगनतलवर्तिनां न दाहकत्वम्, सूर्यकान्तमणिफलितानां तु दाहकत्वम्, एवं वृत्तिफलितस्यैव चैतन्यस्याज्ञानविरोधित्व-मिति, मतान्तरानुसारिणां वृत्त्यवच्छिन्नपरामर्शेनाज्ञाने सत्यानुपपत्त्यापादनमनुकोपालम्भनमेवेति भावः ॥

ननु एवं भवतु नामाज्ञानवशेनान्योन्यात्मताध्यासनिबन्धन एवाहंव्यवहारादिः, तावताऽपि त्वविद्याकार्यत्वेन सत्यत्वमेव.

वार्तिकम्

भवति ; कारणं विना कार्यानुपपत्तेरिति। यथाच तयोः कार्य-कारणभावः, तथाऽग्रे दर्शयिष्यामः। न केवलं लौकिका एव सर्वे प्रमातृत्वादिव्यवहारास्तदधीनाः, शास्त्रीयोऽपि सर्वो व्यवहारस्तदधीन इत्याह—*सर्वाणि च शास्त्राणीति*॥ अत्र "प्रवृत्तानी"ति लिङ्गं विपरिणमय्यानुषङ्गः। शास्यते, अनुशिष्यते, कर्तुर्हिताहितप्राप्ति-परिहारसाधनेषु पुरुषो येन, तत् शास्त्रम् ; उपदेशवाक्यमिति यावत् ; कर्तुर्हिताहितप्राप्ति-परिहारसाधनबोधकवाक्यस्यैवोपदेशत्वात्, न प्रयोक्तुः ; तस्याज्ञादिरूपत्वात्। तद्यथा लोके 'अयं सुपन्थाः, अनेन गच्छतु भवान्, अयं तु चोराकुलः, नानेन गच्छतादि'ति। वेदे च "ज्योतिष्टोमेन स्वर्गकामो यजेत," "न हिंस्यात् सर्वा भूतानि", "तत्त्वमसी"त्यादि। तथाच जैमिनिराह—"तस्य ज्ञानमुपदेशः" इति। भट्टपादा अप्याहुः—

"प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत, तच्छास्त्रमिति कथ्यते॥" इति।

अत्र केचित्—विधि-प्रतिषेधशास्त्रयोरपि प्रपञ्चविलयनद्वारा मोक्षपरत्वं मन्यन्ते। तथाहि—"स्वर्गकामो ज्योतिष्टोमेन यजेते"ति वाक्यं न तावद् ज्योतिष्टोमस्य स्वर्गसाधनत्वं वक्तुं शक्नोति ; आशुतरविनाशिनस्तस्य कालान्तरभाविस्वर्गसाधनत्वायोगात्। नच मध्येऽपूर्वव्यापारकल्पनम् ; तत्कल्पने प्रमाणाभावात्। नच—श्रुतार्थान्यथानुपपत्तिरेव तत्र मानमिति—वाच्यम् ; प्रपञ्चविलयपरत्वेनापि श्रुतोपपत्तेः। अपिच यदीदं वाक्यं स्वार्थपरं स्यात्, तर्ह्यस्य शास्त्रत्वं व्याहतं स्यात् ; कर्तुर्हितसाधनत्वबोधकवाक्यस्यैव शास्त्रत्वात्। नच स्वर्गः कर्तुर्हितः ; तस्य पुरुषरागवर्धकत्वेन संसारहेतुतयाऽहितत्वात्। तस्माद् देहान्तरभोग्यस्वर्गादिसाधनत्वमाशुतरविनाशिनो यागस्य बोधयच्छास्त्रं तन्मुखेन देहात्मभावविलयपरम् ; देहात्मत्वे तद्भोगानुपपत्तेरिति समञ्जसम् ; अन्यथा शास्त्रत्वव्याहतेरित्युक्तम्। एवं ग्रामादिदृष्टफलकसाङ्ग्रहण्यादिबोधकवाक्यस्य सेवादितत्साधनान्तरविलयपरत्वम्, गोदोहनादिवाक्यस्याधिकारान्तरविलयपरत्वम्, नित्य-नैमित्तिकवाक्यानाञ्च प्रत्यवायविलयपरत्वम्, निषेधवाक्यानाञ्च स्वाभाविकप्रवृत्तिविलयपरत्वम्, इति परम्परया भवति विधि-निषेधशास्त्रयोरपि मोक्षपरत्वम्—इति, तान् प्रत्याह—*विधि-प्रतिषेध-मोक्ष-पराणीति*॥ *विधिः=इष्टसाधनत्वम्। *प्रतिषेधः=तदभावः। *मोक्षः=जीव-ब्रह्मणोरैक्यम्। *तत्पराणि=तद्बोधकानीत्यर्थः। *अयमभिप्रायः*—"स्वर्गकामो ज्योतिष्टोमेन यजेते"त्यत्र लिङ् तावत् पदश्रुत्या योग्यतया च यागस्येष्टसाधनत्वं ब्रूते—याग इष्टसाधनमिति। *ननु*—एवं सति "ज्योतिष्टोमेने"ति तृतीयाविभक्तिर्व्यर्था ; लिङैव तत्साधनत्वाभिधानात्। नच—प्रत्ययेन यागसामान्यगतकरणत्वेऽभिहितेऽपि तद्विशेषज्योतिष्टोमकरणत्वानभिधानात् तदभिधानार्थं तृतीयाश्रुतिरिति—वाच्यम् ; विशेषमनादायापर्यवस्यतः सामान्यस्य नामपदसामानाधिकरण्यश्रुतेर्ज्योतिष्टोममादाय पर्यवसानादिति—

प्रदीपः

सर्वस्य प्रपञ्चस्य विवक्ष्यते, इति कथं ब्रह्माद्वैतसिद्धिरिति ? अत आह—*तत्रैवं सतीति*॥ तस्मिन्नध्यासे पूर्वोक्तप्रकारेण विवेकज्ञानबाध्ये सति। तथाच तत्त्वज्ञानबाध्यत्वाद् अविद्या, तत्कार्योऽध्यासः, अध्यस्यमानः प्रपञ्चो वा मिथ्येति न ब्रह्माद्वैतविरोध इति भावः। "अद्वितीयं ब्रह्मे"ति वाक्येन परमार्थतो द्वितीयपदार्थरहितं ब्रह्मेत्येव विवक्ष्यते, इत्यध्यासवद् गुण-दोषादिरपि मिथ्येति न दोषः। अणुमात्रेणापि=लेशतोऽपि। *न सम्बध्यते*=परमार्थगत्येति शेषः। यथा हि नभसि कल्पितं नैल्यं न नभसः स्वच्छतां विरुणद्धि ; तद्वदिति भावः॥ एतावताऽविद्याया लक्षणम्, तस्याः संभावना च वर्णिता। सम्प्रति तत्र प्रमाणानि दर्शयितुमाह *तमेतमविद्याख्यमिति*॥ अध्यासं पुरस्कृत्य सर्वे प्रमातृ-प्रमाण-प्रमेयव्यवहाराः प्रवृत्ताः इति च।

*एतम्—प्रत्यक्षसिद्धमित्यर्थः। अनेन प्रत्यक्षमविद्यायां प्रमाणं प्रदर्शितम्। अध्यासं पुरस्कृत्य प्रवृत्तत्ववर्णनेन प्रमातृ-प्रमाणादिव्यवहारानुपपत्तिरूपार्थापत्तिप्रमाणमप्यविद्यायां प्रदर्श्यते॥

तत्त्वदीपनम्

प्रमाणादीनामविद्यावद्विषयत्वे किं प्रमाणमिति प्रश्नपरत्वं भाष्यस्याश्रित्योपयोगाभावादविद्यावद्विषयत्वमनुप-

वार्तिकम्

चेत्, *नैष दोषः*; तस्यास्तत्करणत्वानभिधायकत्वेऽपि तदनुवादेन यागगतैकत्वाद्यभिधानार्थत्वात्, साधुत्वार्थत्वाच्च; अन्यथा सामानाधिकरण्यानुपपत्तेः। तत्र च सति—किमिष्टम्? यस्य साधनं यागः, इत्यपेक्षायां पुरुषगतेच्छाविशेषणतया स्वर्गकामपदेन स्वर्गस्योपस्थापनात्, योग्यतया वाक्येन तदन्वयसिद्धेराकाङ्क्षापूरणात्, याग-स्वर्गयोः साध्य-साधनभावो वाक्यात्सिद्धो भवति। नच साक्षात्प्रतिपाद्यं तयोः साध्य-साधनभावं परित्यज्य, वाक्यस्यार्थिकदेहात्मभावविलयपरत्वं युज्यते; श्रुतहानाश्रुतकल्पनाप्रसङ्गात्, उपजीव्यविरोधाच्च। नहि याग-स्वर्गयोः साध्य-साधनभावाभावे तद्भोगान्यथानुपपत्त्या देहव्यतिरिक्त आत्मा कल्पयितुं शक्यते। नच तत्कल्पनां विना देहात्मभावविलयो भवति। नच तयोः साध्य-साधनभावाभावेऽप्यापातप्रतिपन्नेन तेन तत्सिद्धिरिति—वाच्यम्; नहि "वह्निना सिञ्चती"ति वाक्येनापातप्रतिपन्नेन वह्निकरणकसेकेन तत्कार्यक्लेदनादिसिद्धिः पारमार्थिकी भवति। देहान्तरभोग्यस्वर्गाभावेऽपि तज्ज्ञानमात्राद् देहात्मभावलयभावनासिद्धिर्भवत्येवेति—चेत्, सत्यम्; यथाकथञ्चित् भावना सिध्येत्, नतु लयः। नहि भावनामात्रेण वस्तुलय ईश्वरेणापि कर्तुं शक्यते। नहि 'शीतो वह्निरि'ति शतधा भाव्यमानोऽपि वह्निः शीतो भवति। तस्मादसदेतत्—यद् विधिवाक्यं प्रपञ्चविलयनपरमिति। *एतेन*—निषेधवाक्यमपि स्वार्थपरमेव, न प्रपञ्चविलयनपरमिति—*व्याख्यातम्। अपिच यदि विधि-प्रतिषेधवाक्ययोः स्वार्थपरत्वं न स्यात्, तर्ह्यविशेषादुपनिषदामपि स्वार्थपरता न स्यात्। तथाचापसिद्धान्तो नास्तिक्यप्रसङ्गश्चेत्यास्ताम्। यथा चैतत्, तथा भाष्यकार एव तृतीयेऽभिधास्यति। यदप्युक्तम्—कर्तुर्हिताहितप्राप्ति-परिहारसाधनत्वबोधकवाक्यस्यैव शास्त्रत्वात् स्वर्गादे रागजनकत्वेनाहितत्वात् तत्साधनत्वबोधकवाक्यानामशास्त्रत्वापत्तिरिति, तन्न; स्वर्गादिफलानां विवेकिपुरुषाहितत्वेऽपि सरागपुरुषहिततमत्वात्। न ह्यविद्याभूमौ लोके हितमहितं वा किञ्चिदाजानतो वस्त्वस्ति; हितबुद्धिगोचरस्यापि कदाचिदहितबुद्धिगोचरत्वात्, किं तर्हि? यदा यस्मै यद् रोचते, तदा तस्य तद् हितम्; यद् न, तदहितमिति लोकमर्यादा। सरागपुरुषेभ्यश्चाविद्यकमपि स्वर्गादिसुखं रोचतेतराम्, न पारमार्थिकमपि मोक्षसुखम्; तत्र तेषां रागाभावात्, प्रत्युत द्वेषाच्च। तथाच रागिगीतम्—

"अपि वृन्दावने शून्ये शृगालत्वं स इच्छति। नतु निर्विषयं मोक्षं मन्तुमर्हति गोतम॥" इति।

तथाच सार्वजनीनो वेदः पुरुषरुचिवैविध्यमनुसरन् तस्मै तस्मै पुरुषाय तं तं पुरुषार्थमुपदिशन् न शास्त्रत्वं जहाति, प्रत्युत शास्त्रत्वमेव स्वस्यानुकूलयति; अन्यथाऽनभिमतमुपदिशन् तं प्रति शास्त्रत्वं जह्यादेव। अत एव "वेदोपरा वेदान्ताः" इति केषांचिदुद्गारः। यस्तु पुरुषधौरेयः, तमधिकृत्योपनिषदः

भाष्यभावप्रकाशिका

अविद्याख्यमिति संभावितत्वोक्तिः। पुरस्कृत्येत्यध्यासस्य व्यवहारहेतुतया स्वानुभवसत्यत्वमुक्तम्। प्रमाण-प्रमेयग्रहणं प्रमात्रादेरुपलक्षणम्। अपौरुषेयत्वेन विशेषं मत्वा शास्त्राणां पृथग्ग्रहणम्।

प्रदीपः

यद्यप्यध्यास एवात्र प्रमाणं प्रदर्शितम्, नतु तन्मूलभूतायामविद्यायाम्; तथाऽपि तदिदं तत्प्रमाणानामप्युपलक्षणम्। सर्वाणि तु प्रमाणानि प्रमातारमाश्रित्य प्रवर्तमानानि प्रमातुरध्यस्तस्य सिद्धिं विना नोपपन्नानि, इति प्रमात्रध्यासमाक्षिपन्तीति भावः। *विधि-प्रतिषेधपराणि*=कर्मकाण्डोपासनाकाण्डगतानि वाक्यानि। *मोक्षपराणि=विधि-प्रतिषेधशून्य-प्रत्यग्-ब्रह्मैक्यनिरूपणपराणि वाक्यानि। *ननु*—भवतु नाम प्रमाणानि प्रमातारमाश्रित्य प्रवर्तन्त इति, न हि तावताऽविद्या-

कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति ?

भामती

आक्षिपति---*कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि* ? तत्त्वपरिच्छेदो हि प्रमा

ऋजुप्रकाशिका

पुरस्कृत्य प्रमाणादीनां शास्त्राणां च प्रवृत्तत्वोक्त्या प्रमाणादीनां चाविद्यावद्विषयत्वाक्षेपं स्फोरयति---*तत्त्वपरिच्छेदो हीति*॥ प्रमेत्यस्य विवरणम्---*विद्येति* ॥ ततः किमिति ? अत आह---*तत्साधनानीति*॥

पञ्चपादिका

कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति॥ बाढम्---उक्तलक्षणाऽविद्या

पञ्चपादिकाविवरणम्

तितयमित्यत्र प्रमाणान्तरप्रश्नविषयत्वं दर्शयति---*बाढमुक्तलक्षणाऽविद्येत्यादिना* ॥ "कथं पुनरि"त्याक्षेपार्थं

ऋजुविवरणम्

वा पूर्वस्मिन्नर्थान्तरविषयप्रसङ्गो युक्तः, नात्र तथेत्याशङ्क्याह---*कथं पुनरित्यादीति* ॥ अत्र प्रमाणान्तर-विषयत्वप्रतीतिरेवं प्रत्यगृदृश्यपि संभवेदित्यन्वयो न संभवति ; अन्यत्रापि संभवप्रतीतेः । न चान्यत्रासंभवशङ्का, येन संभवः प्रदर्श्येत, अतश्च प्रत्यग्दृशि संभवेदपीत्यन्वयः ; तथा सति पूर्वमुक्तं प्रमाणमपि शब्दादनूदितमेव । एवंच सति प्रमाणान्तरविषयत्वं स्पष्टमेव ॥

अथवा---प्रत्यग्दृश्यपि संभवेदित्येवान्वयः संभवतु । अत्र प्रत्यग्रूपत्वेनासंभवाशङ्का भवति । अत्रासंभव-प्रकारानुवादोऽपिशब्देन क्रियते । यद्यपि प्रत्यग्रूपः ; तथाऽपि संभवेदिति । एवमपि "नैतावते"त्यत्रैतावतेति किं निर्दिश्यते ? न तावल्लक्षण-संभावनयोरेव निर्देशो घटते ; ताभ्यामसद्भावसिद्धिप्रसक्त्यभावात्, नैतावता तत्सद्भाव इति निषेधानुपपत्तेः । अतश्च "नैतावते"त्यनेन प्रकृतलक्षण-संभावनाप्रमाणं निर्दिश्यते ; तेनासिद्धिरपि । एवम्---"अहं मनुष्यः" इति प्रमाणम्, तद् गौणमित्यपि वक्तुं शक्यते, इति नाध्यासमेव गमयतीति । अत एवोक्तं पुरस्तात्---"कथं पुनरविद्या-वद्विषयाणी"त्यतः प्रागध्यासस्वरूप-तत्संभावनायेति ; इतरथा "अविद्यावद्विषयाणी"त्यतः प्रागित्यवधिकरणस्य विरोधो दुष्परिहरः । "तमेतमेवमि"त्यत्र प्रत्यक्षोपन्यासो वाऽस्तीति वक्तव्यम्,अवधिर्वा । तदुभयमपि वक्तुं न शक्यते ; ग्रन्थेऽ-व्यक्तत्वात्, अतश्च "तमेतमि"त्यत्रोक्तस्य प्रमाणस्य प्रत्यक्षस्य "कथं पुनरि"त्यारभ्य दृढीकरणादवधिकरणमिति शोभनम् । "तेन निदर्शनीयः सः"इत्युक्त्वा "प्रमातारमि"त्यनन्तरं लिखितत्वादध्यासपुरःसरत्वप्रतिपादकेन भवि-तव्यम् । नच तत्प्रतिपादनमत्र दृश्यते ; अविद्यावत्त्वस्यानुपयोगप्रतीतेः । नच पूर्वग्रन्थशेष एवायम् ; पूर्वग्रन्थे प्रमाण-प्रश्नः कृतः ; न तत्रानुपयोगकथनमुपयुज्यते, अतोऽनुपपन्न इत्याशङ्क्याह---*कथं पुनरित्याक्षेपार्थमिति* ॥ अथवा---

तत्त्वदीपनम्

पन्नमित्यभिप्रायप्रदर्शनमसङ्गतमित्याशङ्क्य, व्याख्यानान्तरस्य क्रियमाणत्वाददोष इत्याह---*कथं पुनरिति* ॥ पूर्वस्मिन् व्याख्याने अविद्यावद्विषयाणि, पुनः कथम् ? साक्षिव्यतिरिक्तं किं मानम् ? इति योजना । द्वितीये कथं

वार्तिकम्

प्रवर्तन्ते, इति न किञ्चिदनुपपन्नमस्ति । अपिच यदि विहित-प्रतिषिद्धकर्मणां न संसारफलता, तर्हि कारणाभावेन संसारस्यैवाभावात् कस्य विलयः साध्यः स्यात् ? नच--उभयफलपरत्वं वाक्यस्येति

भाष्यभावप्रकाशिका

*मोक्षपराणि = विधि-प्रतिषेधशून्यानि ; वस्तुस्वरूपमात्रनिष्ठानीत्यर्थः । त्रिविधव्यवहारस्याध्यासिकत्वे प्रमाणान्तरजिज्ञासया पृच्छति---*कथमिति* ॥

प्रदीपः

साधकत्वं प्रमाणानामित्याशयेन शङ्कते---*कथं पुनरविद्यावद्विषयाणि...प्रमाणानीति* ॥ प्रमातारमेवापेक्षमाणानीति शेषः ।

भामती

विद्या, तत्साधनानि प्रमाणानि कथमविद्यावद्विषयाणि ? नाविद्यावन्तं प्रमाणान्याश्रयन्ति ; तत्कार्याया विद्याया अविद्याविरोधित्वादिति भावः । सन्तु वा प्रत्यक्षादीनि संवृत्त्याऽपि यथा तथा, शास्त्राणि तु पुरुषहितानुशासनपराण्यविद्याप्रतिपक्षतया नाविद्यावद्विषयाणि भवितुमर्हन्तीत्याह—*शास्त्राणि

ऋजुप्रकाशिका

कथंशब्दसूचितमर्थमाह--*नाविद्यावन्तमिति* ॥ तत्र हेतुमाह--*तत्कार्याया इति* ॥ प्रमाणकार्याया इत्यर्थः । इदानीं शास्त्राणामविद्यावद्विषयत्वाक्षेपं स्फोरयति---*सन्तु वेत्यादिना* ॥ अपिशब्दो वाऽर्थः । स चोत्तरत्र सम्बध्यते । तथाच सांव्यवहारिकप्रमाणत्वेन प्रत्यक्षादीनि यथा तथा वा सन्त्वित्यर्थः । तद्वैपम्यार्थस्तुशब्दः । शास्त्राणि कथमविद्यावद्विषयाणि ? नाविद्यावन्तमाश्रयन्ति ; उक्तयुक्तेरिति भाष्यार्थः ।

पञ्चपादिका

प्रत्यग्दृश्यपि सम्भवेत्, नैतावता तत्सम्भवः सिध्यति, तेन निदर्शनीयः सः ! प्रमातारमाश्रयन्ति प्रमाणानि, तेन प्रमाता प्रमाणानामाश्रयः, नाविद्यावान् ; अनुपयोगादित्यभिप्रायः । *अथवा*—

पञ्चपादिकाविवरणम्

दर्शयति—*प्रमातारमाश्रयन्तीति* ॥ अविद्याध्यासपरिनिष्पन्नाहङ्कारात्मसंपिण्डितोपादानत्वे प्रमाणानां प्रामाण्य-

ऋजुविवरणम्

"कथमि"त्यादिग्रन्थः "प्रमातारमि"त्यनेन पुनरुक्तः ; तत्राविद्यावान् प्रमाणाश्रयो न भवतीत्युक्तम्, अथवेत्यत्रापि प्रत्यक्षादीनि शास्त्राणि च प्रमाणानि कथमविद्यावद्विषयाणीत्यन्वयप्रतिभानात्, अथ "प्रमातारमि"त्यत्रार्थप्रदर्शनम्, अनन्तरं योजनाप्रदर्शनमिति पौनरुक्त्यपरिहारः, तन्न ; तत्रैव सामर्थ्याद्योजनाप्रतीतेः, "अथवे"त्युक्तिविरोधाच्च । *ननु* "प्रमाणानी"ति मध्ये स्थितस्यान्ते प्रक्षेपात्तेनैव "कथमि"त्यस्यान्वयान्न पौनरुक्त्यम्, *मैवम्* ; नान्ते प्रक्षेपोऽन्वयकारणम् ; सन्निहितेनैवान्वयसंभवात् । अथ "प्रमाणानी"त्यस्य मध्ये स्थितस्यान्ते प्रयोगे कारणान्तराभावात् "कथमि"त्यनेनान्वयः, एवमपि 'कथं प्रमाणानी'ति प्रामाण्याक्षेपो न घटते ; अन्तःकरणात्मनोः सम्पिण्डितयोरुपादानत्वस्योक्तत्वात्, अविद्यावदुपादानत्वाभावादित्याशङ्क्यावतारयति—*अविद्याध्यासपरिनिष्पन्नेति* ॥ वस्तुसंग्रहः, उत्तरेण तत्प्रपञ्च इति कथनं किमर्थम् ? भाष्यव्याख्यानस्य प्रस्तुतत्वात् । नच—अनेन भाष्यव्याख्यान-

तत्त्वदीपनम्

प्रमाणान्यविद्यावद्विषयाणि ? प्रमाणानां प्रमात्राश्रयत्वादिति योजना । प्रत्यक्षादीनां प्रमात्राश्रयत्वान्नाविद्यावदाश्रयत्वम्, ततः कथमप्रामाण्यप्रसञ्जनम् ? इत्याशङ्क्य, प्रमातृत्वस्याविद्याविलसितत्वात् तद् युक्तमित्याह—*अविद्येति* ॥

वार्तिकम्

—वाच्यम् ; "अर्थैकत्वादेकं वाक्यमि"ति न्यायविरोधापत्तेः । तस्माद्विधि-प्रतिषेध-मोक्षप्रतिपादकशास्त्राणां प्रयोजनभेदादुपपन्नो भेद इति ॥ प्रतिषेध-मोक्षशास्त्रयोर्यद्यप्यनर्थनिवृत्तिप्रयोजनत्वादेकप्रयोजनत्वेनैकत्वं वक्तुं शक्यते ; तथाऽपि तत्फलभूतयोरनर्थनिवृत्त्योरात्यन्तिकत्वानात्यन्तिकत्वेन वैजात्यादस्ति तयोर्भेद इति । एवंच सति प्रमातृत्वादिलौकिकव्यवहाराः शास्त्राणि चोक्ताविद्याबलमधिकृत्य प्रवर्तमाना अनुपपद्यमानतया तं गमयन्तीत्यर्थापत्तिप्रमाणमपि तत्र दर्शितं भवति । तदिदं संक्षेपेण प्रवृत्तं प्रमाणभाष्यम् । एतस्यैवाक्षेप-समाधानाभ्यां विस्तारो भविष्यति यावत्प्रयोजनभाष्यम् । तदिदमात्मानात्मनोरितरेतराध्याससिध्यर्थमुदाहृतमनुपपत्तिप्रमाणमाक्षिपति—*कथं पुनरविद्यावद्विषयाणि प्रत्यक्षा-

भाष्यभावप्रकाशिका

यद्यपि प्रत्यक्षादि सर्वमविद्योत्थाहंकारविशिष्टात्माश्रयमिति स्वसाक्षिकम् ; तथाऽपि केन मानान्त-

पञ्चपादिका

कथमविद्यावद्विषयाणि प्रत्यक्षादीनि शास्त्राणि च प्रमाणानि ? इति सम्बन्धः । अविद्यावद्विषयत्वे सत्या-

पञ्चपादिकाविवरणम्

मेव न सिध्यतीत्यस्मिन्नर्थे भाष्यं योजयति—*अथवा कथमविद्यावद्विषयाणीति* ॥ अविद्यावदुपादानत्वे का प्रामाण्यानुपपत्तिरिति ? तदाह—*अविद्यावद्विषयत्व इति* ॥ *"उच्यते देहेन्द्रियादिष्वि"त्यादि-

ऋजुविवरणम्

मेव क्रियत इति—युक्तम् ; उत्तरव्याख्यानेन पौनरुक्त्यप्रसङ्गादित्याशङ्क्याभिप्रायमाह विभागेन—*अवतारयतीति* ॥ "नहि देहेन्द्रियादिष्वि"त्यसङ्गतो ग्रन्थः ; प्रश्नानन्तरं तस्योत्तरं वक्तव्ये तद्विहाय देहेन्द्रियादिष्वभिमानहीने सुषुप्तौ व्यवहाराभावप्रदर्शनात् । उद्भाष्यं च ; भाष्ये हि देहादिष्वभिमानाभावे व्यवहारासंभवादभिमानेन भवितव्यमित्युक्त-

तत्त्वदीपनम्

अहंकारश्चात्मा चेत्यहंकारात्मानौ, तयोः संपिण्डितरूपमहंकारात्मसंपिण्डितं चेति तथोक्तम्, तदुपादानं येषां तानि तथोक्तानि, तेषां भावस्तत्त्वं तस्मिन्निति विग्रहः । अविद्यावदुपादानत्वेऽपि सत्यविषयत्वेन प्रामाण्यमिति शङ्कते—*अविद्यावदिति* ॥ त्वन्मते सत्यविषयत्वमपि न सिध्यतीत्याह—*तदाहेति* ॥

भाष्यव्याख्यानस्य प्रस्तुतत्वात्—"एतत्संग्रहवाक्यम्, अस्यैव प्रपञ्चः" इत्येतत् कुत्रोपयुज्यते ? इत्याशङ्क्य,

वार्तिकम्

दीनि प्रमाणानि शास्त्राणि चेति* ॥ अनुपपत्तिप्रमाणमाक्षिपता प्रत्यक्षमप्यन्यथासिद्धत्वादाक्षिप्तं भवतीति । न पृथक् तदाक्षेपाय यत्न आस्थेयः, न वा तत्साधनायेत्यभिप्रेत्य भाष्यकृदनुपपत्तिमेवाक्षिपति । यथा चैतत्, तथा तदाक्षेपं व्याकुर्वन्तो दर्शयिष्यामः ।

अयमत्राक्षेप्तुरभिप्रायः—यदुक्तमविद्यावन्तमधिकृत्य लौकिकप्रमातृ-प्रमाणादिव्यवहाराः शास्त्राणि च प्रवृत्तानि, अतस्तदन्यथानुपपत्तिरात्मानात्मनोरितरेतराध्यासे प्रमाणमिति, तदसत् ; प्रत्यक्षादीनां प्रमाणत्वव्याघातात् । यदि हि प्रमाताऽऽध्यासिकः स्यात्, तर्हि तदुपकरणभूतानि प्रत्यक्षादिप्रमाणान्याध्यासिकानि भवेयुः ; स्वप्नदृष्टराजोपकरणच्छत्र-चामरादिवत्, रज्जुसर्पकृतदंश-तद्विषोपसर्पणवच्च । नचैवं प्रत्यक्षादीनामाध्यासिकत्वे मिथ्याज्ञानरूपत्वात्प्रामाण्यमुपपद्यते । नचैषामप्रामाण्ये सर्वलोकव्यवहार उपपद्यते ; तस्य प्रमाणपूर्वकत्वात्, अन्यथा प्रामाणिकाप्रामाणिकव्यवहार-भेदानुपपत्तेः । तस्माद् लोकयात्रासिध्यर्थमकामेनापि प्रत्यक्षादीनां प्रामाण्यमभ्युपगन्तव्यम्, तदभ्युपगमे च तदाश्रयस्य प्रमातुर्नाध्यासिकत्वम् ; आध्यासिकस्य प्रमाणाश्रयत्वानुपपत्तेः, किं तर्हि ? पारमार्थिकत्वमेव । तथाच प्रमात्रादिव्यवहारस्याध्यासपुरःसरत्वाभावाद् न तदन्यथानुपपत्तिरात्मा-

भाष्यभावप्रकाशिका

रेण तथा स्यात् ? पुनःशब्दात् तन्मानान्तरविवक्षाधीः । यद्वा—प्रमाता प्रमाणानामाश्रयो नाविद्यावान् ; अनुपयोगादित्याक्षेपः । यद्येतानि प्रमाणानि, कथमविद्यावद्विषयाणीत्यन्वयः । यद्वा—यद्येतान्यविद्यावद्वि-षयाणि, कथं प्रमाणानि ? अविद्यावदाश्रयत्वे करणदोषादप्रामाण्यं स्यात् ; "यस्य च दुष्टं

प्रदीपः

तथाच प्रमातारमेवापेक्षमाणानि *कथमविद्यावद्विषयाणि*=अविद्यावत्पुरुषाश्रयाणीति कथमिति योजना । अथवा प्रमातार-माश्रित्य प्रवर्तमानानि प्रमाणानि यदि परम्परया पूर्वोक्तप्रकारेणाविद्यावद्विषयाणीति मन्यते, तर्हि मिथ्याज्ञाननिमित्तत्वात् प्रमाणत्वमेव तेषां न स्यात् ; अतः प्रमाणानां प्रमाणत्वनिर्वाहार्थमविद्याविरोधित्वमेवाङ्गीकर्तव्यम्, न तु तत्साधकत्वमित्यभिप्रायेण शङ्कते—*कथं पुनरविद्यावद्विषयाणीति* ॥ अविद्यावद्विषयाणि प्रत्यक्षादीनि कथं प्रमाणानीति योजना । प्रथमयोजनायां प्रमाणा-न्युद्दिश्याविद्यावद्विषयत्वाभाव आपाद्यते, द्वितीयस्यां तु अविद्यावद्विषयप्रत्यक्षाद्युद्देशेन प्रमाणत्वाभाव आपाद्यत इति विवेकः ।

उच्यते ;—देहेन्द्रियादिष्वहं-ममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः ।

भामती

चेति* । समाधत्ते—*उच्यते ; देहेन्द्रियादिष्वहं-ममाभिमानहीनस्य = तादात्म्य-तद्धर्माध्यासहीनस्य प्रमातृत्वानुपपत्तौ सत्यां प्रमाणप्रवृत्त्यनुपपत्तेः* ॥ *अयमर्थः*—प्रमातृत्वं हि प्रमां प्रति कर्तृत्वम् ।

ऋजुप्रकाशिका

"अहं-ममाभिमानहीनस्ये"त्यस्य विवरणम्—*तादात्म्य-तद्धर्माध्यासहीनस्येति* ॥ "तादात्म्ये"त्यतः प्राग् 'देहेन्द्रियादी'त्यध्याहर्तव्यम् । *प्रमाणप्रवृत्त्यनुपपत्तेरिति* ॥ तथाचाध्यासपूर्वकं प्रमाणप्रवृत्तेः प्रमाणानामविद्यावद्विषयत्वमावश्यकमित्यर्थः । अमुमर्थं विशदयति—*"अयमर्थः"इत्यादिना*—"अथे"त्यतः प्राक्तनेन ग्रन्थेन*॥

पञ्चपादिका

श्रयदोषानुगमादप्रमाणान्येव स्युरित्याक्षेपः ॥ *उच्यते ; देहेन्द्रियादिष्वहं-ममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरिति* भाष्यकारस्य वस्तुसंग्रहवाक्यम् ॥ अस्यैव प्रपञ्चः—"नहीन्द्रियाण्यनु-

पञ्चपादिकाविवरणम्

परिहारभाष्यमवतारयति—*वस्तुसंग्रहवाक्यमस्यैव प्रपञ्च इति* ॥ व्यवहारत्रितयमध्यासोपादानमित्यत्रार्थापत्ति-व्यतिरेक्यनुमानप्रदर्शनाय । यत्र यत्राध्यासाभावः संप्रतिपन्नः, तत्र व्यवहाराभावो दृष्ट इति व्यतिरेकव्याप्तिं

ऋजुविवरणम्

त्वात्, इत्याशङ्क्याभिप्रायमाह—*व्यवहारत्रितयमिति* ॥ "यतो देहेऽहमभिमानः"इत्यादिना हेतुरुक्त इति प्रतिभाति, तदयुक्तम् ; पूर्वग्रन्थे ह्यध्यासाभावे व्यवहाराभावात् सुषुप्त इति व्यतिरेकव्याप्तिरुक्ता, सा नानेन साध्यते ; तत्रैव साधकस्योक्तत्वात्, अस्यापि तत्साधकत्वमिति यद्युच्येत, वैयधिकरण्यमेव स्यात्, नहि देहादिष्वहं-ममाभिमानो देहादिशब्दार्थप्रतिपादनं च सुषुप्तौ व्यवहाराभावं साधयति, विभागेनाध्यासप्रदर्शनमप्यप्रयोजकम् ; यथा-

तत्त्वदीपनम्

पौनरुक्त्यनिरासेन तात्पर्यं कथ्यत इत्याह—*उच्यत इति* ॥ विभागो विभजनमपुनरुक्तत्वमिति यावत् । प्रमाणान्तर-प्रश्ने प्रतिवचने तदेव प्रदर्शनीयम्, नच तत्प्रदर्श्यत इति भाष्यासङ्गतिमाशङ्क्याह—*व्यवहारत्रितयमिति* ॥ "यतो

वार्तिकम्

नात्मनोरितरेतराध्यासे प्रमाणम्—इति । *एतेन*—'अहमि'त्यादिप्रत्यक्षस्याध्यासगोचरत्वम्—*प्रत्याख्यातम् ; तस्य प्रमात्रादिविषयत्वेनानध्यस्तगोचरत्वात् । अपिच विवेकिनामपि प्रमात्रादिव्यवहारो दृष्टः, नच सोऽध्यासपुरःसरः ; तथा सति विवेकित्वव्याघातापत्तेः । एवं चेदविवेकिव्यवहारोऽपि समानः ; तयोर्व्यवहारत्वाविशेषात् । अस्तु वा लौकिको व्यवहारो यथा तथा ; तस्य देहात्मभावेनापि यथाकथञ्चिदुपपत्तेः, शास्त्रीयव्यवहारस्य त्वध्यासपुरःसरत्वं मनसाऽपि नोत्प्रेक्षितुं शक्यते, देहादिव्यतिरिक्त-

भाष्यभावप्रकाशिका

कारणमित्यादि" भाष्यादित्याक्षेपः ॥ व्यवहारहेतुमध्यासमनुमानादिना साधयितुमारभते—*उच्यत इति* ॥ तत्रानुमाने व्यतिरेकव्याप्तिमाह—*देहेति* ॥ सशिरस्कोऽवयवी त्वगिन्द्रियस्यान-

प्रदीपः

तत्र प्रथमं प्रमाणप्रवृत्तिः, अहमध्यासमूला, अविद्यान्वय-व्यतिरेकानुविधायित्वात् ; यथा मृदन्वय-व्यतिरेकानुविधायी घटो मृन्मूलकः, यत्र तु नाहमभिमानः सुषुप्तौ, न तत्र प्रमाणप्रवृत्तिरिति व्यतिरेकव्याप्तिप्रदर्शनपूर्वकं सिद्धान्तमुपक्षिपति—*उच्यते ; देहेन्द्रियादिष्विति* ॥ अत्र देहेऽहमभिमानरहितस्येन्द्रिये ममताभिमानहीनस्येति विवरणानुसारिणां पन्थाः ।

भामती

तच्च स्वातन्त्र्यम्। स्वातन्त्र्यं च प्रमातुरितरकारकाप्रयोज्यस्य समस्तकारकप्रयोक्तृत्वम्। तदनेन प्रमात्रा प्रमाकरणं प्रमाणं प्रयोजनीयम्। नच व्यापारमन्तरेण करणं प्रयोक्तुमर्हति। नच कूटस्थनित्यश्चिदात्माऽपरिणामी स्वतो व्यापारवान्। तस्माद् व्यापारवद्बुद्ध्यादितादात्म्याध्यासाद् व्यापारवत्तया प्रमाणमधिष्ठातुमर्हति, इति भवत्यविद्यावत्पुरुषविषयत्वमविद्यावत्पुरुषाश्रयत्वं प्रमाणानामिति ॥

ऋजुप्रकाशिका

*तच्च=कर्तृत्वं च। स्वातन्त्र्यशब्दार्थमाह—*स्वातन्त्र्यं चेत्यादिना* ॥ अस्तु, तेन किम्? तत्राह—*तदनेनेति* ॥ *तत्* तस्मात् कारणात्। "अनेने"त्येतत् "प्रमात्रे"त्यस्य विशेषणम्। *ननु* प्रमाणप्रयोगोऽप्यध्यासहीनस्यैवास्तु, तथाच नाविद्यावद्विषयत्वं प्रमाणानामित्यत आह—*नच व्यापारमिति* ॥ अस्त्वध्यासविहीन एव व्यापारवान्, तथाच नाविद्यावद्विषयत्वमित्यत आह—*कूटस्थेति* ॥ तथाचाध्यासमुपसंहरति—*तस्मादिति* ॥ अविद्यावत्पुरुषविषयत्वमित्येतद् व्याचष्टे—*अविद्यावत्पुरुषाश्रयत्वमिति* ॥ *ननु* प्रमाणप्रवृत्तेरावश्यकत्व उक्तविधयाऽविद्यावद्विषयत्वं भवेत्, प्रमाणप्रवृत्तिरेव माऽस्तु, किमनिष्टम्? इति शङ्कते—

वार्तिकम्

भोक्तृभानमन्तरेण तत्र प्रवृत्त्ययोगात्। नहि देहादिव्यतिरिक्तं नित्यं भोक्तारमनवगम्य बुद्धिपूर्वकारी कश्चिदप्यतिकष्टात्मके देहान्तर-कालान्तरभोग्यफलके वैदिके कर्मणि प्रवर्तत इति दृष्टचरम्। तस्मान्नोक्तव्यवहारान्यथानुपपत्तिरात्माऽनात्मनोरितरेतराध्यासे प्रमाणम्—इति॥ व्यतिरेकव्याप्तिपरिशुद्धेरुक्तान्यथानुपपत्तिरुक्ताध्यासे प्रमाणमिति परिहरति—*उच्यत इति*॥ तत्परिशुद्धिमेव दर्शयति—*"देहेन्द्रियादिष्वहं-ममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरिति*॥ देहशब्देन स्थूलसूक्ष्मदेहद्वयं परिगृह्यते। तेनान्तःकरणेऽप्यहमध्यासः परिगृहीतः। स्थूलदेहोऽत्र सशिरस्कमनुष्यत्वादिविशिष्ट-निरपेक्ष-त्वगिन्द्रियाधार उच्यते। तस्मिन् देहे—'अहमि'त्यभिमानः; इन्द्रिय-लिङ्ग-देहाद्यवयवादौ ममेत्यभिमानः; तदुभयाभिमानहीनस्य पुरुषस्य स्वापादौ प्रमातृत्वाभावेन प्रमाणप्रवृत्त्यभावदर्शनात्, तस्मिन् सति जागरादौ प्रमातुः प्रमाणप्रवृत्तिदर्शनात्, उक्ताभिमानस्य चाध्यासत्वाद् व्यतिरेकव्याप्तिसिद्धेः, अनुपपन्नप्रमातृ-प्रमाणादिव्यवहारान्यथानुपपत्तिस्तत्र प्रमाणमित्यर्थः।* एतेन*—प्रत्यक्षतो व्यतिरेकव्याप्तिप्रदर्शनेन प्रत्यक्षमपि प्रमाणं तत्र दर्शितं भवतीति—*द्रष्टव्यम्*॥ तस्यैव संक्षिप्तवाक्यस्य गूढाभिसन्धिनाऽभिहितस्य "नही"त्यादिना "सर्वलोकप्रत्यक्षः"इत्यन्तेन प्रपञ्चेन विवरणं भविष्यति॥ *ननु*—उक्तं प्रत्यक्षादीनामविद्यावद्विषयत्वे प्रमाणत्वव्याहतिरिति? कोऽभिप्रायः? किमध्यासमूलत्वे प्रत्यक्षादीनाम्—'प्रत्यक्षादि प्रमाणमि'ति तेषु व्यवहारो न संभवतीत्युच्यते? किं वा निराश्रयाण्येव प्रत्यक्षादीनि प्रमाणानि

भाष्यभावप्रकाशिका

पेक्षाधारो देहः। तत्र मनुष्यत्वादिजातिविशिष्टेऽहमित्यभिमानः। इन्द्रियेष्वेवमादिशब्दगृहीतदेहावयवेषु च ममाभिमानः; तेन हीनस्य सुषुप्तस्य प्रमातृत्वानुपपत्तौ सत्यां मानाप्रवृत्तेरध्यासः, तद्धेतुरित्यर्थः। यत्र नाध्यासः, तत्र न व्यवहारः, यथा सुषुप्ताविति व्याप्तिः। देवदत्तस्य जागरादिकालः, तस्यैवा-

प्रदीपः

यतस्तन्मत इन्द्रियाणां परोक्षत्वाद् नेन्द्रियाध्यासस्यापरोक्षाहमभिमानविषयत्वम्, किन्तु 'अन्धोऽहमि'त्यन्धत्वादिधर्माध्यासस्यैवापरोक्षाहमभिमानविषयत्वमिति मन्यन्ते। भामतीमते तु नात्र यथासंख्यन्यायः, यत उभयत्रोभयाध्यासोऽप्यपरोक्ष इति तन्मतमिति पूर्वमेव सूचितम्॥ "इन्द्रियादी"त्यादिपदेनान्तःकरणपरामर्शः। *हीनस्य*॥ सुषुप्तस्येति शेषः। कथं सुषुप्तौ न प्रमाणप्रवृत्तिः? सुषुप्तस्य प्रमातृत्वाभावादित्याह—*प्रमातृत्वानुपपत्ताविति*॥ प्रमातृत्वं हि प्रमां प्रति

नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति ।

भामती

अथ मा प्रवर्तिषत प्रमाणानि, किं नश्छिन्नमिति ? अत आह—*नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवति । व्यवह्रियतेऽनेनेति व्यवहारः फलम्, प्रत्यक्षादीनां प्रमाणानां फलमित्यर्थः ।

ऋजुप्रकाशिका

अथेति ॥ प्रमाणप्रवृत्तिं विना प्रत्यक्षादिव्यवहारासंभवात् तत्प्रवृत्तिरावश्यिकेत्याह— *अत आहेति* ॥ भाष्ये—इन्द्रियाण्यनुपादाय इन्द्रियाणि प्रमाणान्यनुपादाय । *ननु* प्रत्यक्षादिव्यवहारस्य ज्ञानसाध्यत्वात् कथम्—"इन्द्रियाणी"ति प्रमाणप्रवृत्तिं विना तद्व्यवहारासंभव उक्तः ? इत्याशङ्क्य व्यवहारशब्देन प्रत्यक्षादिप्रमाणफलं ज्ञानमेवोच्यत इत्याह—*व्यवह्रियत इति* ॥ *ननु* "नहीन्द्रियाण्यनुपादाय प्रत्यक्षव्यवहारः

पञ्चपादिका

पादाये"त्यादिः । न हि देहेन्द्रियादिष्वहं-ममाभिमानहीनस्य सुषुप्तस्य प्रमातृत्वं दृश्यते। *इन्द्रियाणीति* ॥

पञ्चपादिकाविवरणम्

भाष्यार्थं दर्शयति—*नहि देहेन्द्रियादिष्विति* ॥ देहादिशब्दार्थं विभागेनाध्यासं च कथयति—*यतो

ऋजुविवरणम्

संख्यन्यायेन विभागसिद्धेः, तेनायं न युक्त इत्याशङ्क्य व्याचष्टे—*देहादिशब्दार्थमिति* ॥ अयमर्थः—"देहेन्द्रियादिष्वहं-ममे"ति भाष्य उभयप्रकारोऽप्यध्यासः सर्वत्रोक्त इति प्रतिभाति ; अनेकपदार्थकीर्तनेन यथासंख्यन्यायासंभवात्, तथाच सति विरुद्धं भाष्यं भवेत् ; 'मे मनुष्यः' इति प्रतीत्यसंभवात्, 'अहमिन्द्रियमि'ति च, तन्निवृत्त्यर्थं विभागप्रदर्शनमिति । देहशब्दार्थप्रयोजनं स्पष्टम् । "सर्वो हि मनुष्यः"इत्यनेन ग्रन्थेन जातिविशेषैकाधिकरण्यं सामानाधि-

तत्त्वदीपनम्

देहः" इत्यादिना व्यतिरेकव्याप्तो हेतुः प्रदर्श्यत इति, नच तदुपपद्यते ; तदसाधकत्वादित्याशङ्क्याह—*देहादीति* ॥ *एतदुक्तं भवति*—सुषुप्तावहं-ममाभिमानाभावादप्रमातृत्वं चेत्, कदाचिदपि प्रमातृत्वं न स्यात् ; न खलु देहेऽहमित्यभिमानो लक्ष्यते, तथा इन्द्रियेष्विति शङ्कायां देहादिशब्दार्थस्य विभागेनाध्यासप्रदर्शनस्योचितत्वमिति । देह-

वार्तिकम्

प्रमेये व्याप्रियन्ते, अतस्तेषां नाविद्यावद्विषयत्वमिति ? अथवा तदाश्रयस्याध्यासमन्तरेणैव देहादिसंबन्धमावात्तद्विषयव्यापार इति ? किं वा देहेन्द्रियादिसंबन्धं विनैवात्मनः प्रमातृत्वमिति ? अथवा आत्मनः प्रमातृत्वमन्तरेण ततः प्रमाणप्रवृत्तिरिति ? आहोस्विद् उक्ताध्यासप्रमाणस्यार्थापत्तेर्विवेकिव्यवहारे व्यभिचारित्वात् प्रत्यक्षादेर्नाविद्यावद्विषयत्वमिति ? व्यभिचारित्वेऽपि किं विवेकिलौकिकव्यवहारे व्यभिचारः ? किं वा शास्त्रीयव्यवहारे ? इत्येते पक्षा भवन्ति ॥

तत्राद्यं पक्षं दूषयति—*नहीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः संभवतीति* ॥ आदिशब्देन

भाष्यभावप्रकाशिका

ध्यासाधीनव्यवहारवान्, तस्यैव स्वापादिकालादन्यकालत्वात् ; तस्यैव स्वापकालवदिति भावः ॥ इन्द्रियादिपु ममत्वाभावेऽपि देहेऽहंभावमात्रात् प्रवृत्तिमाशङ्क्याह—*नहीति* ॥ *अनुपादायेति* ॥

प्रदीपः

स्वतन्त्रत्वम् । ननु प्रमाणव्यापारयितृत्वं विना नोपपद्यत इति प्रमातुर्देहेन्द्रियाद्यध्यास आवश्यक इति भावः । *ननु* प्रमाता प्रमाणानि देहेऽहमभिमानेन प्रवर्तयिष्यति, किमिन्द्रियाध्यासेनान्तःकरण-तद्धर्मीद्यध्यासेन वेत्याशङ्कायामाह—*न हीन्द्रियाणीति* ॥ प्रमाणानि नाम प्रमाकरणानि, यानि प्रमां प्रति प्रमातुः साधनानीति, इति प्रमातृ-प्रमाणतादात्म्येऽकल्पिते

भामती

इन्द्रिय-लिङ्गानीति द्रष्टव्यम् ; 'दण्डिनो गच्छन्ती'तिवत् । एवं हि 'प्रत्यक्षादि' इत्युपपद्यते ॥ व्यवहारक्रियया च व्यवहार्याक्षेपात् समानकर्तृकता । अनुपादाय यो व्यवहार इति योजना ॥

किमिति पुनः प्रमातोपादत्ते प्रमाणानि ? अथ स्वयमेव कस्मान्न प्रवर्तत इति ? अत आह—

ऋजुप्रकाशिका

संभवती"ति वक्तव्ये "प्रत्यक्षादिव्यवहारः संभवती"त्यादिपदं कथमुपात्तम् ? इत्याशङ्क्य, तत्रादिग्रहणानुरोधाद्— "इन्द्रियाणी"त्यत्रापि 'इन्द्रियलिङ्गादीनी'ति व्याख्यायत इत्यभिप्रेत्याह—*इन्द्रियाणीति । इन्द्रिय-लिङ्गानीति द्रष्टव्यमिति* ॥ लिङ्गानीत्यत्रापि लिङ्गादीनीति द्रष्टव्यम् । तत्र दृष्टान्तमाह—*दण्डिन इति* ॥ अदण्डिनामपि गमने "दण्डिनो गच्छन्ति" इत्युक्ते लक्षणया दण्डिप्रभृतयो गच्छन्तीति यथा वक्तव्यम्, तथाऽत्रापि "इन्द्रियाणी"त्यत्रापि लक्षणयेन्द्रियलिङ्गादीति, इत्यादिपदोपपत्तिमाह—*एवं हीति* ॥ *ननु* "अनुपादाय व्यवहारः" इत्यत्रानुपादान-व्यवहारयोः व्यवहारसमानकर्तृकत्वाद् व्यवहारी उपादातव्यः कथं नोपात्तः ? इत्यत आह—*व्यवहारक्रिययेति* ॥ व्यवहार्यनुपादानेऽप्याक्षिप्तव्यवहारिणा कर्त्राऽनुपादान-व्यवहारयोः समानकर्तृकतोपपन्नेत्यर्थः । एवंचेत्थं योजनीयमित्याह—*अनुपादायेति* ॥ इन्द्रियादिप्रमाणान्यनुपादाय यो प्रत्यक्षादिव्यवहारः, स न संभवतीति योजनीयमित्यर्थः । *ननु—प्रत्यक्षादिव्यवहारानुरोधेनेन्द्रियादिप्रमाणप्रवृत्त्यावश्यकत्वे स्वत एवेन्द्रियादिप्रमाणप्रवृत्तिरस्तु, किं प्रमात्रपेक्षया ? येन प्रमातृत्वस्याध्यासपूर्व-

वार्तिकम्

अनुमान-शब्दादेर्ग्रहणम् । *अयमभिप्रायः—इन्द्रियप्रवृत्त्यधीना हि सर्वप्रमाणानां स्वस्वव्यापारप्रवृत्तिः ; अनुमानादेरपि प्रत्यक्षपूर्वकत्वनियमात्, अपौरुषेयवेदस्य यद्यपि स्वार्थावधारणार्थं तत्पूर्वकत्वं नापेक्ष्यते ; तथाऽपि पदस्वरूपावधारणार्थं प्रवृत्तौ तत्पूर्वकत्वमस्त्येव, इति सर्वत्र प्रमाणप्रवृत्तावस्ति तदपेक्षा । एवंच सति यथा 'चक्षुषा पश्यामि' 'श्रोत्रेण शृणोमी' त्यादिप्रत्यक्षव्यवहार इन्द्रियाण्युपादाय भवति, तथा 'लिङ्गेनानुमिनोमि' 'शब्देन वाऽनुभवामी'त्याद्यनुमानादिप्रमाणव्यवहारोऽपि साक्षात् परम्परया च तान्येवादाय भवति। इन्द्रियोपादानञ्च प्रमातुस्तेषु ममाभिमान एव, नान्यत् ; दण्डादिवत् तेषामादानाद्यसंभवात् । ममाभिमानश्चाध्यास एवेत्युपपादितमधस्तात् ; स्वत्वस्य तेष्वध्यासमन्तरेणासम्भवादित्यस्याप्युपपादितत्वात् । तथाचाध्यासस्य प्रत्यक्षादिप्रमाणव्यवहारोपपादकत्वाद् न तेन तस्य विरोधः ।

ननु—एवं सत्यध्यासस्य दोषत्वात् तन्मूलज्ञाने कथं प्रमाणत्वव्यवहारः ? *नैष दोषः* ; तन्मूलकत्वाज्ञाने शुक्तिरजतादिज्ञाने प्रमाणत्वव्यवहारवत् तत्रापि तदुपपत्तेः, तज्ज्ञाने च तद्वदेव तत्रापि तद्व्यवहाराभावस्येष्टत्वात् । दोषजन्यत्वात् शुक्तिरजतज्ञानवदेव प्रत्यक्षादेः प्रमात्वं न स्यादिति चेत्, न ; पारमार्थिकप्रामाण्याभावसाधने सिद्धसाधनत्वात्, व्यावहारिकतदभावसाधनस्य च प्रत्यक्षव्यवहारदर्शनेन तद्विरोधादनुपपत्तेः । *अथ* न मया प्रत्यक्षादौ व्यावहारिकप्रमाणत्वाभावः साध्यते, येनोक्तविरोध आपद्येत, किं तर्हि ? त्वं विनियुज्यसे—कथं दोषजन्यत्वाविशेषेऽपि घटादिज्ञाने व्यावहारिकप्रामाण्यमुत्पद्यते, न शुक्तिरजतादिज्ञाने ? इति, *एतदपि न* ; नित्य-नैमित्तिककर्मणोर्निमित्तजन्यत्वाविशेषेऽपि स्वाभाविकागन्तुकनिमित्तभेदेन तयोर्नित्य-नैमित्तिकत्वव्यवस्थावत् प्रमाऽप्रमयोर्दोषजन्यत्वाविशेषेऽपि स्वाभाविकागन्तुकदोषभेदाद्व्यवस्थया प्रमाऽप्रमात्वव्यवस्थोपपत्तेः । नहि य एव प्रमातृत्वादिदोषः प्रमात्वसाधकः, स एव तद्व्याघातको भवति ; विरोधात् । नच—दोषजन्यत्वमेव लाघवाद् ज्ञानस्याप्रमात्वसाधकम्, न तद्विशेषजन्यत्वम्; गौरवादिति—वाच्यम् ; दोषाध्यक्षप्रमायामेव तस्य व्यभिचारात् । तस्मादहं-ममाध्यासजन्यत्वं प्रत्यक्षादिप्रमाणव्यवहारानुगुणमेव, न विरोधीति । तदिदमुक्तम्—

पञ्चपादिका

यतो देहेऽहमभिमानः,इन्द्रियादिषु ममाभिमानः। आदिशब्देन बाह्यावयवग्रहणम् । देहशब्देन सशिरस्को मनुष्यत्वादिजातिसम्भिन्नोऽवयव्यभिमतः, न शरीरमात्रम् ; देहोऽहमिति प्रतीत्यभावात्। सर्वो हि 'मनुष्योऽहम्' 'देवोऽहमि'ति जातिविशेषैकाधिकरणचैतन्य एव प्रवर्तत इति स्वसाक्षिकमेतत्। तत्र

पञ्चपादिकाविवरणम्

देहेऽहमभिमान इत्यादिना* ॥ प्रमाणान्तरप्रदर्शनाय व्यवहारत्रयमूलाध्यासे प्रत्यक्षमुक्तमनुवदति—*सर्वो हि मनुष्योऽहमिति* ॥ अत्रायं प्रयोगः—देवदत्तस्य जाग्रत्स्वप्नकालौ, तस्यैव कर्तुः करणभूतदेहेन्द्रियादिष्वहं-ममाध्यासपुरःसरप्रमातृत्वादिव्यवहारवन्तौ, तस्यैव सुषुप्तिकालादन्यकालत्वात् ; यः कालस्तथाविधव्यवहारवान्न

ऋजुविवरणम्

करणम् ; तच्च तच्चैतन्यं च जातिविशेषैकाधिकरणचैतन्यम् ; तस्मिंश्चैतन्ये सति प्रवर्तत इति स्वसाक्षिकमित्युक्तम्। व्यतिरेकव्याप्तेरुक्तत्वादनुमानमेव प्रदर्शनीयम्, नतु प्रत्यक्षम् ; प्रक्रमविरोधात्, पौनरुक्त्यप्रसङ्गाच्च, "तमेतमि"ति भाष्ये प्रत्यक्षस्योक्तत्वादित्याशङ्क्य व्याचष्टे—*प्रमाणान्तरप्रदर्शनायेति* ॥ अनुमानविशेषणोपयोगस्त्वेवम्। तत्र न तावद् जाग्रत्स्वप्नकालयोरेव पक्षीकरणं युक्तम् ; स्वरूपेण तयोरनिरूपणात्, अवस्थोपाधिकौ तौ नावस्थावन्तं विहाय निर्देष्टुं युक्तौ। नचावस्थामात्रयोगेन पक्षत्वं कालयोः ; यत्र क्वाप्यध्याससाधनादात्मन्यध्यासपूर्वत्वासिद्धेः। यदि चाध्यास एव स्वरूपेण साध्येत, तत्र जाग्रत्स्वप्नकालावध्यासपुरस्सरव्यवहारवन्ताविति, तदा हेतुरसिद्धः स्यात् ; अवस्थान्तरयोगेन तयोः सुप्तिरूपत्वस्यापि संभवात् पुरुषेणाविशेषितत्वात्, दृष्टान्तश्च न स्यात् ; सुषुप्ति-रूपत्वादन्यरूपत्वस्यापि संभवात्, तदर्थम्—"देवदत्तस्ये"त्युक्तम्। तत्र देवदत्तस्य जाग्रत्कालमात्रपक्षीकरणेऽध्यास-पुरःसरव्यवहारवतः स्वप्नस्य विद्यमानत्वाद् व्यतिरेक्यनुमानमेव न भवेत्, नाप्यन्वय-व्यतिरेकित्वम् ; स्वप्नेऽध्यास-पुरस्सरत्वस्य परसिद्धत्वाभावेन दृष्टान्तासंभवात्। यदि स्वप्नेऽध्यासपुरःसरत्वं नास्तीत्युच्यते, तर्हि देहेन्द्रियादिष्वहं-ममाध्यासहीनस्य सुषुप्तस्य व्यवहारादर्शनादिति योऽयं व्यतिरेकः, स न सिध्येत् ; अध्यासहीनस्य स्वप्ने व्यव-हारस्य दर्शनात्, अतश्चोभयोः पक्षत्वं जाग्रत्स्वप्नयोरिति। तत्र "प्रमातृत्वादिव्यवहारवन्तावि"त्येतावदिति साध्ये सिद्धसाध्यता स्यात्, तन्निवृत्त्यर्थमाह—*अध्यासपुरःसरेति* ॥ एवमपि सिद्धसाध्यता स्यात् ; प्रमातृत्वादि-व्यवहारे रजताद्यध्यासपुरःसरत्वस्य विद्यमानत्वात्, तदर्थमाह—*अहं-ममेति* ॥ एवमपि बौद्धमताभिप्रायेण सिद्धसाध्यता स्यात् ; ज्ञान एवाहं-ममाध्यासपुरःसरमपि व्यवहाराङ्गीकारात्, इत्याशङ्क्याह—*देहेन्द्रियादिष्वहं-ममेति* ॥ एवमप्यन्यदेहेन्द्रियादिष्वहं-ममाध्यासे स्वदेहाभिमानोत्पत्तिसंभवाद् नाभिमताध्याससिद्धिः, सिद्ध-साध्यता चांशे, तदर्थमाह—*करणभूतदेहेन्द्रियादिष्विति* ॥ करणभूतदेहेन्द्रियादिष्वन्यस्याहं-ममाध्यासे देवदत्त-व्यक्तावुक्तसाध्ये विद्यमानेऽपि नाभिमताध्याससिद्धिः, सिद्धसाध्यता च स्यात्, तदर्थमाह—*कर्तुरिति* ॥ अन्यस्य करणभूतदेहेन्द्रियादिष्वहं-ममाध्यासपुरःसरस्य देहादिना ज्ञानोत्पत्तौ सिद्धसाध्यता स्यात्, तदर्थमाह—*तस्येति* ॥

तत्त्वदीपनम्

शब्देनेत्यादेरेषोऽर्थः—बाह्यावयवानां देहशब्दान्तर्भावात्पृथग्ग्रहणमयुक्तमित्याशङ्क्याह—*देहशब्देनेति* ॥ देहशब्दे-नावयव्यभिमत इत्यन्वयः। छिन्नबाह्यावयवेऽप्यहंबुद्धिवत् छिन्नशिरसोऽप्यवयवित्वात तद्धीनेऽभिमानप्रसिद्धिं निरस्यति—*सशिरस्क इति* ॥ एवंभूतेऽप्यवयविनि देहे-'अहमि'त्यभिमानशङ्कां निरस्यति—*मनुष्यादीति* ॥ प्रसिद्धेरध्यास-मूलत्वे साक्षिप्रमाणस्य दर्शितत्वात्पुनस्तत्प्रदर्शनं व्यर्थमित्याशङ्क्य तात्पर्यमाह—*प्रमाणान्तरेति* ॥ नचानुवाद-वैयर्थ्यम्, पराभिप्रायेण प्रमाणान्तरोपन्यासः, स्वमते तु साक्ष्येव प्रमाणमिति दर्शनार्थत्वादित्यर्थः। जातिविशेषेत्य-स्यायमर्थः*—जातिविशेषेणैकाधिकरणं समानाधिकरणं जातिविशेषैक्यमापन्नम् ; तच्च चैतन्यं चेति तथोक्तम् ; तस्मिन् सतीत्यर्थः। अथवा—जातिविशेषैक्यापन्नं चैतन्यं यस्य स तथोक्त इति ॥

भाष्यटीकयोर्विवक्षितं प्रमाणान्तरमाह—*अत्रेति* ॥ अवस्थामात्रपक्षीकरणे यस्य कस्यचिद् देहेन्द्रिया-

ऋजुविवरणम्

पुरःसरशब्दस्य पूर्वभावित्ववाचित्वमङ्गीकृत्य व्यावर्त्यभेदो दर्शितः। इदानीं हेतुत्ववाचित्वमङ्गीकृत्य तस्यैव कर्तुः करणतेत्येतावता प्रकारान्तरेण व्यावर्त्यत्वमुच्यते। उत्तराणां हेतुत्वेऽपि पूर्वोक्तस्यैव व्यावर्त्यत्वात्, तत्र देहेन्द्रियाद्यध्यासपुरःसरत्वं समुदितं वा साध्यम्? व्यस्तं वा? पक्षद्वयेऽपि बाधितविषयत्वम्; व्यवहाराभावदर्शनात्, अनैकान्तिकश्च हेतुः स्यात्, तदर्थमाह—*करणभूतेति*॥ अथवा—देहेन्द्रियादिष्वध्यासपुरःसरत्वे साध्येऽविशेषात् सर्वदेहादिष्वध्यासपुरःसरत्वं साध्यं भवेत्, तथा सति बाधितविषयत्वमनुमानस्य, तदर्थमाह—*करणभूतेति*॥ एवमप्यन्यचित्तादौ व्यवहारो नाध्यासपुरःसरो दृश्यते; तेन बाधितविषयत्वम्, असंप्रज्ञातसमाधिदशायामपि न तादृग्व्यवहारः, तदर्थमाह—*कर्तुरिति*॥ उन्मत्तव्यवहारे कस्मिंश्चित् सिद्धसाध्यता, तदर्थमाह—*तस्यैवेति*॥ "सुषुप्तिकालादन्यकालत्वादि"ति हेतावसिद्धता स्यात्, तदर्थमाह—*तस्येति*॥ "तस्य सुषुप्तिकालादन्यकालत्वादि"ति हेतौ पुरुषान्तरसुषुप्तिकालेऽपि हेतोर्विद्यमानत्वादनैकान्तिकता, तदर्थमाह—*तस्यैवेति*॥ अत्र संग्रहः—

जाग्रदादिः स्वरूपेण न कालोऽस्ति कदाचन। अवस्थोपहितः कालो जाग्रत्स्वप्नादिशब्दभाक्॥
पक्षीकर्तुं कथं शक्यौ पुरुषेणाविशेषितौ। अवस्थामात्रयोगेन पक्षत्वं यदि चेष्यते॥
आत्मन्यध्यासपूर्वत्वं व्यवहारस्य नो भवेत्। तथैव चेद्यदीष्येत साध्यं हेतोरसिद्धता॥
अवस्थान्तरयोगेन सुप्तिरूपत्वसंभवात्। साध्य-दृष्टान्तयोश्चैवमसिद्धेस्तौ विशेषितौ॥
जाग्रन्मात्रस्य पक्षत्वे व्यतिरेकी न सिध्यति। विद्यमानसपक्षत्वाद् अहंमानाद्यसंभवः॥
विपक्षे वर्तनात् स्वप्ने हेतुर्नैगमको भवेत्। अन्वय-व्यतिरेकित्वं सपक्षाभावतो नहि॥
स्वप्ने तत्पूर्वकत्वं हि विगीतं तेन पक्षता।
प्रमातृतादिव्यवहारवन्तावित्येव साध्यं नहि कर्तुमेति॥
सिद्धस्य साध्यत्वमिहेदृशे स्यात्तेनोक्तमध्यासपुरःसरेति॥
अध्यासान्तरपूर्वत्वात् सिद्धसाध्यतया पुनः। दुष्टं भवेत्तदर्थं हि शरीरादि समीरितम्॥
भृत्यदेहेऽभिमानेऽपि नोपादानत्वमिष्यते। केवलस्य प्रमातृत्वमितरस्य निमित्तता॥
कर्तुः करणभूतेति शङ्कां नोदितुमीरितम्। कर्तुः कस्यचिदेवैतदुन्मत्तस्य भवेदिति॥
शङ्कानिवारणायैव तस्यैवेति समीरितम्। शरीराद्यभिमानेन विना नैव यदीष्यते॥
उपादानत्वमेवातः शुद्धस्यासंभवेन च। सुप्तिकालान्यकालत्वं हेतुश्चेत्स्यादसिद्धता॥
व्यभिचारोऽपि चानेन तस्येति हि समीरितम्। तस्यापि सुप्तेरन्यत्वं सुप्तिकालेऽपि विद्यते॥
व्यवहारो न तादृक् तत्सावधारणमीरितम्।

तत्त्वदीपनम्

दिष्वभिमानपुरःसरव्यवहारत्वप्रसाधने बाधः स्यात्, तदर्थमाह—*देवदत्तस्येति*॥ जाग्रत्स्वप्नकालयोरन्यतरपक्षीकरण इतरत्र साध्यसद्भावेन व्यतिरेकित्वं साध्याभावे सव्यभिचारिता; तस्मादुभयोः पक्षीकरणम्। 'प्रमातृत्वादिव्यवहारवन्तावि'त्युक्ते सिद्धसाध्यता, तदर्थमाह—*अध्यासपुरःसरेति*॥ एतावत्युक्ते रजताद्यध्यासपुरःसरव्यवहारवत्त्वसाधनेन बाधः, तदर्थमाह—*अहं-ममेति*॥ यस्मिन् कस्मिंश्चिदहं-ममाभिमानपुरःसरव्यवहारवत्त्वसाधनाद् बाधशङ्कां निराकर्तुमाह—*देहेन्द्रियादिष्विति*॥ अन्यदीयदेहेन्द्रियेष्वहं-ममाभिमानपुरःसरव्यवहारवत्त्वसाधने बाधः स्यात्, तदर्थं विशेषणम्—*तस्येति*॥ कर्तुः करणभूतेति साध्यविशेषणं संबन्धापेक्षां द्योतयितुम्; "इतरदेशकालत्वादि"त्युक्ते सुषुप्तिकाले सव्यभिचारत्वम्, तदर्थमाह—*सुषुप्तिकालादिति*॥ एतावत्युक्तेऽसिद्धिः स्यात्, देवदत्तजाग्रत्स्वप्नकालयोर्यज्ञदत्तसुषुप्तिकालत्वं विद्यते। नच स्वस्मात्स्वस्यान्यत्वसिद्धिः, तदर्थमाह—*तस्यैवेति*॥ "देवदत्तसुषुप्तिकालादन्यकालत्वादि"त्युक्ते पुरुषान्तरजाग्रदादिकालयोर्व्यभिचारः स्यात्, तदर्थं देवदत्तसुषुप्तिकालादन्यत्वे

पञ्चपादिका

स्वत्वेन संबन्धिना मनुष्यावयविना तदनुस्यूतेन वा चक्षुरादिना प्रमातादिव्यवहारः सिध्यति ; भृत्यादि-मनुष्यावयविनाऽपि प्रसङ्गात् ॥

अपर आह—आत्मेच्छानुविधायित्वं कार्ये कारणसंघातस्यात्मना सम्बन्धः, तस्यापि तस्य

पञ्चपादिकाविवरणम्

भवति, न स तस्यैव सुषुप्तिकालादन्यकालः, यथा तस्यैव सुषुप्तिकाल इति । व्यवहारत्रितयं वा दर्शिताध्यासोपादानमन्तरेणानुपपन्नम् ; अध्यासाभावे व्यवहारादर्शनात्सुषुप्ते, इत्यर्थापत्तिः ॥

ननु कर्तृ-करणयोः सम्बन्धमात्रं व्यवहारेऽपेक्ष्यते, न तादात्म्यसंबन्धः, इति तत्र परिशेषानुमानार्थापत्ति-सिद्धये सम्बन्धान्तराणि व्यावर्तयन् न तावत् स्व-स्वामिसम्बन्ध इत्याह—*न स्वत्वेन सम्बन्धेनेति* ॥ सुषुप्तेऽपि तस्य भावादित्यभ्युच्चयः । इच्छानुविधायित्वमेव व्यवहारनिमित्तम् ; तदभावात्सुषुप्ते व्यवहारविपर्ययः, इति चोदयति—*अपर आहाऽऽत्मेच्छानुविधायित्वमिति* ॥ अस्त्विच्छामात्रेण विनियोज्य-विनियोजकसम्बन्धः, ततः

ऋजुविवरणम्

"न स्वत्वेने"ति व्यर्थम् ; अनुमानार्थापत्तिभ्यामध्यासपुरःसरत्वस्य साधितत्वादित्याशङ्क्योपयोगसिद्ध्यर्थं चोदयति—*ननु कर्तृ-करणयोरिति* ॥ *ननु*—एतच्चोद्यमेव नोदेति ; नह्यपेक्षया सम्बन्धाङ्गीकारः, किन्तु प्रमाणवत्त्वेन, उक्तं च प्रमाणमध्यासे ; अतः सम्बन्धान्तरनिराकरणं व्यर्थमित्याशङ्क्याभिप्रायमाह—*तत्र परिशेषानुमानेति* ॥ *अयमर्थः*—परिशेषानुमानत्वात् सम्बन्धान्तरवारणे तादात्म्यमेव हेतुः स्यात्, तेनात्रान्यनिराकृतिः । *एतदुक्तं भवति*—नानुमानार्थापत्तिभ्यामेवाध्यासपुरःसरत्वं सिध्यति ; अनुमाने व्यर्थविशेषणत्वाप्रयोजकत्वयोः शङ्कितुं शक्यत्वात्, अर्थापत्तेरन्यथाप्युपपत्तेः । तथाहि—यः कालस्तथाविधव्यवहारवान् न भवतीत्यत्र 'तथाविधे'ति व्यर्थम् ; व्यवहारवत्त्वाभावमात्रेणैव सुप्तिकालादन्यत्वनिषेधसिद्धेः । तथा "यः कालस्तथाविधव्यवहारवान् न भवती"त्यत्राध्यासपुरःसरव्यवहारवत्त्वाभावे सुषुप्तिकालादन्यकालत्वमपि नास्तीति व्यतिरेकव्याप्तिरयुक्ता ; यत्र तथाविध-

तत्त्वदीपनम्

सति तत्कालत्वादिति द्रष्टव्यम् । केवलव्यतिरेकिणमनङ्गीकुर्वाणं प्रत्यर्थापत्तिमाह—*व्यवहारत्रितयं वेति* ॥ "अनुपपन्नमि"त्यत्राध्यासं गमयतीति शेषः । अनुपपत्तिमेवाह—*अध्यासाभाव इति* ॥

देहादीनां प्रमातुश्च यः कर्तृ-करणभावः, स संबन्धपुरःसर इति सामान्यव्याप्तिः । स्व-स्वाम्यादिसंबन्धलक्षण-व्यापकविशेषश्च नात्र विद्यते, इति व्याप्तिसामान्यविशेषाभावबोधप्रसूताऽर्थापत्तिः प्रमाणमित्यर्थः । स्वत्वादिना व्यवस्थित-मनुष्यावयव्यादिना व्यवहारस्योभयसंमतत्वात् कथं तन्निरसनमित्याह—*ननु कर्त्रिति* ॥ कर्तृ-करणयोः संबन्धमात्रे सति तादात्म्याभावापराधेन तत्कार्याभावादर्शनादर्थापत्तेरन्यथोपपत्तिः । अनुमानस्याप्रयोजकत्वमिति शङ्कार्थः । प्रमातृत्वादि-व्यवहारोपयोगिनां संबन्धान्तराणामनिरूपणात् कल्पिततादात्म्यमेव संबन्धः, ततश्च नानुमानार्थापत्त्योर्दुष्टतेत्याह—*तत्रेति* ॥ किं स्व-स्वामिता संबन्धः ? आहो विनियोज्य-विनियोजकता ? किं वा संयोगः ? उत समवायः ? आहो भोक्तृ-भोग्यता ? किं वा स्वकर्मारभ्यत्वम् ? उत स्वेन्द्रियाधिष्ठेयत्वम् ? अन्यो वा ? इति विकल्प्याद्यं दूषयति—*न तावदिति* ॥ स्व-स्वामिभावस्याप्रयोजकत्वे हेत्वन्तरमाह—*सुषुप्तेऽपीति* ॥ नच—सुषुप्ते चक्षुरादिसहकार्यभावात् कथं प्रमात्रादिव्यवहारप्रसक्तिरिति—शङ्क्यम् ; स्वत आत्मनः प्रमातृत्वशक्तिसत्त्व एतद् भवेत् ; नच संभवति । प्रमातृत्वं प्रमाकर्तृत्वम्, तच्चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वम् ; न तत् कूटस्थस्य संभवतीत्यर्थः ॥

देहादेरिच्छानुविधायित्वस्य सिद्धान्तिनाभ्युपगतत्वान्नानिष्टं किंचित्—"अपर आहे"त्यनेनोक्तमित्याशङ्क्याह—*इच्छेति* ॥ तत्र हेतुमाह—*तदभावादिति* ॥ अन्वय-व्यतिरेकाभ्यामुक्तं संबन्धहेतुत्वं निश्चीयत इत्यर्थः । शरीरस्यात्मना संबन्धस्तदिच्छानुविधायित्वं चेत्, तर्ह्यात्मनो न शरीरादिसंबन्धः ; तदिच्छाननुविधायित्वादित्याशङ्क्योक्तं टीकाकृता—*तस्यापीति* ॥ *तस्य=आत्मनोऽपि । *तेन=कार्यकारणसंघातेन । *संबन्धः=तस्य देहादेर्यथेष्ट-

पञ्चपादिका

यथेष्टविनियोजकत्वं तेन सम्बन्धः, तत आत्मनः प्रमातृत्वादिकः सर्वः क्रिया-कारक-फलव्यवहारः। तथा चोत्तिष्ठामीतीच्छयोत्तिष्ठत्युपविशति च। नच भृत्यादिषु तदस्ति। तेन तत्र प्रमातृत्वादिव्यवहाराभावो न मिथ्या; मुख्याभिमानाभावात्—इति, *नैतत् संविदि बहुमानवतो युक्तम्*; *तथाहि*—'मनुष्योऽहमि'ति स्वसाक्षिका संवित्, 'न मे मनुष्यः' इति। गौणीति चेत्, भवानेवात्र प्रमाणम्। *अपिच*, इच्छाऽपि परिणामविशेषः, स कथमपरिणामिन आत्मनः स्यात्? परिणाम्यन्तःकरणसंवलिताहङ्कर्तृ-

पञ्चपादिकाविवरणम्

किमिति? तत्राह––*तत आत्मन इति*॥ *ननु* एतत्सम्बन्धमूलो व्यवहार इति किमत्र प्रमाणमिति? अत आह––*तथाचोत्तिष्ठामीति*॥ *ननु* भृत्यादयोऽपि तदिच्छानुविधायिनः, तच्छरीरेणापि व्यवहारः स्यादिति, नेत्याह—*न च भृत्यादिषु तदस्तीति*॥ *उच्यते*—यदीच्छानुविधानयोग्यतामात्रं सम्बन्धः, सुषुप्तेऽपि तदस्तीति तत्रापि व्यवहारः स्यात्। अथेच्छयाऽनुविधीयमानत्वं सम्बन्धः, अर्थान्तरे तदभावात्प्रमातृत्वादिव्यवहारो न स्यात्, अथ दृश्यतेऽयं सम्बन्धो व्यवहारमूलमिति, नेत्याह—*नैतत्संविदि बहुमानवतो युक्तमिति*॥ नच गौणत्वम्; मुख्यानुभवविरोधादित्याह—*गौणीत्यादिना*॥ इच्छाऽप्यध्यासमूलैवेत्याह—*अपि चेच्छाऽपि परिणामविशेष इति*॥ अन्तःकरणाध्यासमूलैवेच्छेत्यत्र प्रत्यक्षमाह––*तथाचानुभव इति*॥ नचात्मानात्मनोः संयोग-समवायौ व्यवहारनिमित्तम्; सुषुप्तेऽपि भावात्; भोक्तृ-भोग्यान्वय-स्वकर्मारभ्यत्व-

ऋजुविवरणम्

व्यवहारवत्त्वाभावः, तत्र सुप्तिकालादन्यकालत्वाभावासिद्धेः। तथा व्यवहारत्रितयस्याध्यासोपादानत्वमन्तरेण नानुपपत्तिः; सम्बन्धान्तरेणाप्युपपत्तेः। अतो व्यर्थविशेषणत्वादिपरिहाराय सम्बन्धान्तरनिराकरणमिति भावः॥ "नैतत्संविदि बहुमानवतः" इत्ययुक्तम्; तेनापि संविन्मूलस्योक्तत्वात्,'मनुष्योऽहमि'ति प्रतीतिरेव तद्धेतुत्वानिवर्तकत्वात्, अन्यथासिद्धत्वाच्च; अतो नेच्छानुविधायित्वस्याहेतुत्वमित्याशङ्क्याह—*उच्यते यदीच्छेति*॥ "विधिमुखोप-

तत्त्वदीपनम्

विनियोजकत्वमित्यन्वयः। तस्येति कर्मणि षष्ठी। तत्रेष्टापत्तिं शङ्कते—*अस्त्विवति*॥ उक्तसंबन्धादेव व्यवहारभावान्नाध्याससिद्धिः, ततश्चानिष्टापत्तिरित्याह—*तत्राहेति*॥ "तथाचे"त्यनेनेच्छानुविधायित्वमङ्गीकृत्य—"उत्तिष्ठामी"त्यादिना तदेवोच्यते, ततश्च वैयर्थ्यमित्याशङ्क्य तद्व्यावृत्त्यर्थं शङ्कामाह—*नन्वेतदिति*॥ अनुभवः प्रमाणमित्याह—*अत आहेति*॥ उक्तसंबन्धाद् यथा व्यवहारसिद्धिः, तथा तदनुरोधेनानुभवोऽपीति टीकार्थः। अतिप्रसङ्गान्न विनियोज्य-विनियोजकत्वसंबन्ध इति शङ्कते—*नन्विति*॥

किमिच्छाऽनुविधायित्वमात्रस्य प्रयोजकत्वं निरस्यते? उताव्यवधानेनेच्छाऽनुविधायित्वस्य? नाद्यः; इष्टापत्तेः, इत्यभिप्रेत्य द्वितीयं दूषयति—*नेत्याहेति*॥ स्वामिन इच्छाऽनुविधायिनी कदाचित् भृत्यादाविच्छा जायते, ततो व्यवहार इत्युक्तप्रयोजकाभावान्नातिप्रसङ्ग इत्यर्थः। अनुभवस्योभयत्रापि सद्भावाद् "नैतत् संविदि"इत्युक्तमयुक्तमित्याशङ्क्य, त्वदनुभवस्य दुर्निरूपविषयत्वाद् दौर्बल्यमित्याह—*उच्यत इति*॥ किमिच्छाऽनुविधानयोग्यतामात्रं संबन्धः? उतेच्छाऽनुविधीयमानत्वं संबन्धः? इति विकल्प्योभावप्यतिव्याप्त्यव्याप्तिभ्यां दूषयति—*यदीत्यादिना*॥ उक्तसंबन्धस्यानुभूयमानत्वात् तदपलापो युक्त इति शङ्कते—*अथेति*॥ अनुभवशरणं प्रत्यनुभवान्तरविरोधेनोत्तरमाह—*नेत्याहेति*॥ त्वदीयाऽनुभवो गौण इत्याशङ्क्याह—*नचेति*॥ उपाधियोगेनापीच्छासंभवात् कथं तन्निराकरणम्? इत्याशङ्क्याह—*इच्छाऽपीति*॥ इच्छाऽनुविधीयमानत्वं संबन्ध इति वदताऽप्यध्यास एष्टव्यः; कूटस्थासङ्गादिस्वभावात्मनि तत्त्वत इच्छाऽसंभवादित्यर्थः। "तथाचानुभवः" इत्यत्रेच्छयाऽनुविधीयमानत्वस्य संबन्धतासंप्रतिपत्तेः सिद्धान्तिनस्तदुदाहरणमनुपयुक्तमित्याशङ्क्य तात्पर्यमाह—*अन्तःकरणेति*॥ तृतीय-चतुर्थौ दूषयति—*नचात्मेति*॥ परिशिष्टकल्पान्तराणि निरस्यति—*भोक्तृ-

पञ्चपादिका

त्वमन्तरेण । तथाचानुभवः—'अहमुत्तिष्ठामी'ति ; इच्छयोत्तिष्ठत्युपविशति च । तस्माद्यत्किञ्चिदेतत् । अतः स्वयमसङ्गस्याविकारिणोऽविद्याऽध्यासमन्तरेण न प्रमातृत्वमुपपद्यते । तेन यद्यपि प्रमातृत्वशक्तिमन्मात्रं

पञ्चपादिकाविवरणम्

स्वेन्द्रियाधिष्ठेयत्वादीनां भोगाद्यध्यासापेक्षत्वात्, भृत्यादिशरीरे च भावात् । अव्यवधानेन भोग्यत्वं मूलसम्बन्ध इति चेत्, यदि भोगयोग्यता सम्बन्धः, सुषुप्तेऽप्यस्ति ; यद्यव्यवधानेन भुज्यमानसम्बन्धः, तन्न ; आत्मनः सर्वशरीर-देश-कालाव्यवधाने सत्यत्यैव भोगान्वयस्य मूलसम्बन्धान्वेषणात् । तस्माद्यत्किञ्चिदेतत्सम्बन्धान्तरम् । अतः परिशेषादर्थापत्त्यनुमानाभ्यामध्यास एव व्यवहारमूलं सिद्ध इत्युपसंहरति—*अतः स्वयमसङ्गस्यापीति* ॥

ननु सर्वशरीरसंनिधानाविशेषे सत्यात्मनः कथमस्मिन्नेव शरीरेऽध्यासनियम इति ? अनादिस्तावदविद्याऽध्यासः । तत्परिणामत्वाल्लिङ्गशरीरे तत्कार्यभूतसूक्ष्मशरीरारब्धत्वात्तत्संश्लेषाद्वा स्थूलशरीरे चाध्यासनियमो

तत्त्वदीपनम्

भोग्येत्यादिना* ॥ इन्द्रियाधिष्ठेयत्वं स्वेन्द्रियं प्रति वशवर्तित्वम्, स्वप्राणपरिपाल्यत्वादिरादिशब्दार्थः । आत्मनि भोगाद्यध्याससिद्धावुक्तसंबन्धसिद्धिस्तत्सिद्धौ च भोगाद्यध्याससिद्धिरितीतरेतराश्रयत्वमित्यर्थः ॥ भोक्तृ-भोग्यान्वय-स्वकर्मारभ्यत्व-स्वेन्द्रियाधिष्ठेयत्वानामसंबन्धत्वे हेत्वन्तरमाह—*भृत्यादीति* ॥ तत्र व्यभिचारं निराकर्तुं विशिनष्टि—*अव्यवधानेनेति* ॥ किं भोगयोग्यत्वं भोग्यत्वम् ? उत भुज्यमानत्वम् ? इति विकल्प्याद्यं दूषयति—*यदीत्यादिना* ॥ द्वितीयमनुवदति—*यद्यव्यवधानेनेति* ॥ संबन्धमन्तरेणायमेव न सिध्यतीत्याह—*तन्नेति* ॥ शरीरविशेषेण संबन्धविशेषाभावेऽस्मिन्नेव शरीरे भोगसंबन्धो न भवेत्, अत्र सन्निधानात्तदङ्गीकारे सर्वशरीरे संबन्धात् सर्वत्र भोग आपद्येत ; नच स उपपद्यत इत्यर्थः । एतच्छब्दपरामृष्टमर्थमाह—*तस्मादिति* ॥ आत्म-देहादीनां संबन्धान्तरसंभवेनार्थापत्त्यनुमानयोरन्यथासिद्धिशङ्कायां संबन्धान्तरनिरासानन्तरं टीकाकारस्य प्रमाणोपसंहरणं युक्तम्, न प्रमेयोपसंहरणमित्याशङ्क्य, प्रमाणोपसंहरणसिद्धवत्करणाददोष इत्याह—*अत इति* ॥ अध्यासाभावे शरीरविशेषेण भोगान्वयासंभववदध्यासभावेऽप्यनियमस्तुल्य इति शङ्कते—*ननु सर्वेति* ॥ किं सूक्ष्मशरीरेऽध्यासानियम आक्षिप्यते ? उत स्थूलशरीरे ? इति विकल्प्योभयथाऽप्यसंभवं दर्शयितुमविद्याऽध्यासस्यानादित्वं तावदाह—*अनादिस्तावदिति* ॥ अनादित्वान्न तत्रानियमशङ्केत्यर्थः । भवत्वविद्याध्यासानादित्वम्, तथापि शरीरे कथमध्यासनियमः ? इत्याशङ्क्याह—*तत्परिणामत्वादित्यादिना* ॥ लिङ्गशरीरेऽध्यासनियमो न विरुध्यत इति संबन्धः ॥

अखण्डानन्दस्वभावं चैतन्यमविद्यासहायं सृज्यमानप्राणिकर्मानुरोधेनेक्षणपुरःसरमपञ्चीकृतपञ्चभूतान्युत्पादयति । तानि च तत्कर्मानुरोधेन लिङ्गशरीरं जनयन्ति । तच्च द्विविधम्—समष्टि-व्यष्टिरूपेण । तत्समष्टिरूपेण नानियमशङ्का ; तस्यैकत्वात्, नापि व्यष्टौ; एतत्कर्मार्जितत्वेन तस्मिन्नेवान्वयसंभवात्, इत्येतत् सर्वं हृदि निधायाह—*तत्परिणामत्वादिति* ॥ द्वितीयं प्रत्याह—*तत्कार्येति* ॥ तस्या अविद्यायाः कार्यं तत्कार्यम्, तच्च भूतं चेति तत्कार्यभूतम्, तच्च सूक्ष्मशरीरं चेति तथोक्तम्, तेनारब्धत्वादिति विग्रहः । सूक्ष्मशरीराकारेण परिणतत्वाद्भूतानां सूक्ष्मशरीरत्वमुक्तम् । तच्च विशेषणं सूक्ष्मशरीरस्थकर्मानुरोधेन भूतानां स्थूलशरीरस्रष्टृत्वोपपादनार्थम् । *इदमत्र विवक्षितम्*—अपञ्चीकृतभूतानि कर्मानुरोधाच्चिदधिष्ठानाच्च पञ्चीकृतत्वमापद्यन्ते । तानि च पञ्चीकृतानि प्राग्भवसंचितसुकृतदुष्कृतानुरोधेन स्थूलं शरीरमारभन्ते, तत्र यद् यत्कर्मणाऽऽरब्धम्, तस्य तत्र प्रवेशः, नान्यत्र । नच—अदृष्टेन संबन्धविशेषाभावान्न तन्निमित्ता व्यवस्थेति—शङ्क्यम् ; एतद्गात्रनिर्वर्तितत्वेनैतदीयत्वात् । न परस्पराश्रयता ; गात्रे दृष्टभेदाङ्गीकरणात् । नचात्र प्रमाणाभावः; "रमणीयचरणा रमणीयां योनिमापद्यन्ते"इत्यादिश्रुतेरिति । अन्तःकरण-

पञ्चपादिका

प्रमाणप्रवृत्तौ निमित्तम्, तदेव त्वविद्याऽध्यासविलसितम्, इत्यविद्यावद्विषयता प्रमाणानामुच्यते। तथा

पञ्चपादिकाविवरणम्

न विरुध्यते। *ननु* प्रमातैव व्यवहाराश्रयो नाध्यास इति, *न*; प्रमातृत्वमेवाध्यासपरिनिष्पन्नमित्याह—*तेन यद्यपीति* ॥ यत्त्वध्यासपरिनिष्पन्नाहङ्कारात्मसंपिण्डितोपादानत्वे कारण-दोषादप्रामाण्यं प्रमाणानामिति, तत्र यदि प्रतिपन्नोपाधौ केनापि प्रमाणेनाबाध्यत्वलक्षणतत्त्वावेदनप्रामाण्यहानिरुच्यते, तदङ्गीकृतमेव। अथागमेन परमार्थसत्यत्वांशे बाध्यमानेऽपि व्यवहारसमर्थवस्त्वङ्गताप्रामाण्यहानिरुच्यते,न; तत्र बाधाभावादित्याह—*तथा निरपेक्षाणामिति* ॥ विधिमुखोपदर्शितमिति*। व्यवहाराङ्गतायां प्रत्यक्षेणाध्यासमूलतायां प्रत्यक्षानु-

ऋजुविवरणम्

दर्शितमि"त्युक्तम्, तत्र द्विविधं बोधकत्वं प्रमाणानाम्—विधिमुखं निषेधमुखं च। अयमित्थंभूत इति भावमुखेन यद्बोधकत्वम्, तदेव विधिमुखेन बोधकत्वम्। अन्यनिषेधमुखेनान्यनिरूपणं निषेधमुखमिति। अथवा—"विधिमुखोपदर्शितमि"त्यादिना "प्रदर्शितं न नेति शक्यमि"त्यत्रैवमर्थः प्रतिभाति—यद्विधिमुखोपदर्शितम्, न नेति शक्यमपह्नोतुमिति। *ननु* अत्रेदं प्रमाणम्, अतो नास्यापह्नव इत्युक्तमित्याशङ्क्य व्याचष्टे—*विधिमुखोपदर्शितमित्यादिना* ॥ "प्रदर्शितमुभयमि"त्युक्ते किं केन प्रदर्शितमित्यपेक्षायामाह—*व्यवहाराङ्गतायामिति*॥ व्यवहाराङ्गत्वं प्रत्यक्षेण, अध्यासमूलत्वं प्रत्यक्षादिभिरिति। अथवा—व्यवहाराङ्गतायां प्रत्यक्षम्, अध्यासमूलतायां प्रत्यक्षानुमानार्थापत्तय इति। प्रातिपदिकार्थे तृतीया। अथवा—व्यवहाराङ्गतायां प्रत्यक्षेण प्रदर्शितायाम्, अध्यासमूलतायां व्यवहारस्य प्रत्यक्षानुमानार्थापत्तिभिः प्रदर्शितायां सत्यामशक्यमपह्नोतुमित्यर्थः। अस्मिन् पक्षे "प्रदर्शितमुभयमि"ति हेतुनिर्देशः, प्रदर्शितो यस्मादित्यर्थः। मा भूद्बाधो मिथ्यात्वे; शब्दादीनां कथं तत्त्वज्ञानादिहेतुत्वम्? इत्या-

तत्त्वदीपनम्

संबन्धस्यात्मनो नियतत्वात् तद्द्वारा वा नियम इत्याह—*तत्संश्लेषाद्वेति* ॥ नच—तत्संश्लेषेऽप्यनियम इति—वाच्यम्; कर्मानुरोधान्नियमसंभवात्, यद् यथा प्रतीयते, तत्तथेत्यभ्युपगमाच्च मायावादिनं प्रति नैतच्चोद्यमवतरति। नच परमतेऽप्यदृष्टानुरोधाद् भोगव्यवस्थोपपत्तिः; अदृष्टस्याप्यनियतत्वात्। नच तत्कार्येन्द्रियैर्निर्वर्तितत्वात्तस्य नियतत्वम्; अविद्याऽध्यासमन्तरेण कार्यादेस्तदीयताऽयोगात्, आत्मनोऽसङ्गाद्वयभावत्वादित्यर्थः ॥

एवं प्रमाणप्रश्नोत्तरमभिधाय, आक्षेपमवतारयति—*ननु प्रमातेति* ॥ अनुपयोगादिति शेषः। करणाप्रयोज्यत्वे सति तत्प्रेरकत्वं कर्तृत्वम्, तस्य कूटस्थासङ्गेऽसंभवादध्यासमूलं प्रमातृत्वमित्यभिप्रेत्याह—*न प्रमातृत्वमिति* ॥ आक्षेपान्तरमुत्थापयति—*यत्त्विति* ॥ अविद्यावदुपादानत्वे प्रामाण्यानुपपत्तिमात्रं चोद्यते? उत तदनुपपत्त्याऽविद्यावदनुपादानत्वम्? आद्ये किं तत्त्वावेदनस्य प्रामाण्यहानिः? उत व्यावहारिकस्य? इति विकल्प्याद्यमङ्गीकरोति—*तत्र यदीति* ॥ एतच्चोपनिषद्व्यतिरिक्तप्रमाणविषयमिति द्रष्टव्यम्। द्वितीयमनुवदति—*अथेति* ॥ "नेह नानाऽस्ति किंचने"त्यागमेन भेदस्य परमार्थत्वं बाध्यत इत्यर्थः। व्यवहारसमर्थं च तद्वस्तु चेति व्यवहारसमर्थवस्तु, तदङ्गतालक्षणं यत्प्रामाण्यम्, तस्य हानिरिति विग्रहः। वस्त्वङ्गत्वं तद्बोधकत्वमिति यावत् ॥ बाधायोग्यं प्रामाण्यम्, अत्र तु तन्नेत्याह—*न तत्रेति* ॥ तथा निरपेक्षाणामित्यादेरेषोऽर्थः—

किं साऽपेक्षतालक्षणमप्रामाण्यम्? उताबोधकतालक्षणम्? आहो विसंवादलक्षणम्? इति विकल्प्य क्रमेण दूषयति—*तथेत्यादिना* ॥ प्रामाण्यानुपपत्तेरविद्यावदुपादानत्वासंभव इति पक्षं निराचष्टे—*अविद्यावद्विषयत्वमिति* ॥ "विधिमुखोपदर्शितमि"त्यत्र विधिः प्रेरणादिरूप इति शङ्कां निरस्यति—*विधिमुखोपदर्शितमित्यादिना* ॥ प्रत्यक्षेण प्रमाणादेर्व्यवहाराङ्गतायां सिद्धायां प्रत्यक्षानुमानार्थापत्तिभिः प्रमातृत्वादिव्यवहारस्याध्यासमूलतायां च सिद्धायां प्रामाण्यमविद्यावद्विषयत्वं चेत्युभयं प्रदर्शितमिति योजना। इदमेतादृशमिति बोधनं विधिः प्रत्यक्षम्, तन्मुखमादिर्यस्यानुमानादेस्तद्विधिमुखमित्यर्थः। शब्दादिनाऽर्थक्रियाकारिणो मिथ्यात्वात्, बाध्यधूमवत्। ततश्च न प्रामाण्यमित्या-

पञ्चपादिका

निरपेक्षाणां स्वसामर्थ्येनार्थसिद्धिं विदधतां बाधानुपलब्धेः प्रामाण्यमविद्यावद्विषयत्वं च विधिमुखोपदर्शि ।

पञ्चपादिकाविवरणम्

मानार्थापत्तिभिः प्रदर्शितमुभयमित्यर्थः। अर्थक्रियासमर्थत्वाच्च । शब्दादिप्रत्यक्षाणामविद्यानिवृत्ति-ब्रह्मावगति-लक्षणार्थक्रियाहेतुत्वं मिथ्यात्वेऽपि शब्दादीनां न विरुध्यते ॥

ननु अर्थक्रियासंवादात् प्रामाण्यप्रसङ्गः, *न* ; ज्ञानादेवार्थतथात्ववदर्थावगमादेवार्थक्रियासामर्थ्य-निश्चयात्, अन्यथा तवापि तथात्वज्ञानात्प्रामाण्यप्रसङ्गः । *ननु* ब्रह्मज्ञानस्याप्यध्यासोपादानत्वान्मिथ्या-त्वमापन्नम्? यदि तावत् स्वरूपमिथ्यात्वमुच्यते, अङ्गीकृतमेव तत् ; अर्थविषयमिथ्यात्वं न ब्रह्मणि ; बाधा-भावात् । प्रपञ्चस्यापि बाधादेव मिथ्यात्वम् ; नाध्यासोपादानज्ञानगम्यत्वात् । *ननु* दुष्टकारणजन्यस्य

ऋजुविवरणम्

शङ्क्याह—*अर्थक्रियासमर्थत्वाच्चेति* ॥ भवतु ज्ञानादेवार्थक्रियानिश्चयः ; तथाऽपि तेन निश्चितार्थक्रियायां प्रामाण्य-निश्चयेऽपि परतः प्रामाण्यमित्याशङ्क्याह—*अन्यथा तवापीति* ॥ *ननु*—*ब्रह्मज्ञानस्यापीति* ॥ ब्रह्मज्ञानं धर्मि, मिथ्येति साध्यो धर्मः, अध्यासोपादानत्वात् ; प्रपञ्चज्ञानवत् । "अर्थविषये"त्यत्रैवं प्रयोगः—ब्रह्मज्ञानं धर्मि, मिथ्याविषयमिति साध्यो धर्मः ; अध्यासोपादानत्वात् ; प्रपञ्चज्ञानवत् । अथवा—ब्रह्म धर्मि, मिथ्येति साध्यो धर्मः, अध्यासोपादानज्ञानविषयत्वात्, प्रपञ्चवत् । "न ; ब्रह्मणि बाधाभावादि"त्यनेन सोपाधिकत्वमुक्तम्, कथमस्यो-पाधित्वम्? अध्यासोपादानज्ञानगम्यत्वेनैव प्रपञ्चे मिथ्यात्वदर्शनात्, साध्यसमव्याप्त्यभावादित्याशङ्क्याह—*प्रपञ्चस्यापीति* ॥ अथवा—"बाधाभावादि"त्यनेनाप्रयोजकत्व उक्ते कथमस्याप्रयोजकत्वम्? व्याप्तिदर्शना-दित्याशङ्क्याह—*प्रपञ्चस्यापीति* ॥ दुष्टकारणजन्यत्वेन बाध्यार्थमनुमातुं शक्यत इति चोदयति—*ननु दुष्ट-कारणजन्यस्येति* ॥ "दोषस्त्वागन्तुकः" इत्यसम्बद्धमुक्तम्, अविद्याया अनागन्तुकत्वेऽपि दोषत्वस्योक्तत्वात्, विद्यत

तत्त्वदीपनम्

शङ्क्याह—*अर्थक्रियेति* ॥ शब्दादीनां मिथ्यात्वेऽप्यविद्यानिवृत्त्याद्यर्थक्रियाहेतुत्वं न विरुध्यत इत्यन्वयः । तत्र हेतुमाह—*अर्थक्रियासमर्थत्वादिति* ॥ शब्दादिविषयत्वादित्यर्थः । शब्दादीनामर्थक्रियासामर्थ्यस्यानुभूयमान-त्वात्तद्विरोधेऽनुमानानुदय इत्यर्थः ॥

शब्दादीनामर्थक्रियाकारितया प्रामाण्यं चेत्, प्रामाण्यपरतस्त्वं दुर्वारमित्याशङ्कते—*नन्वर्थेति* ॥ ज्ञानं स्वत एव प्रमाणम्, संवादज्ञानं त्वप्रामाण्यशङ्कानिरासार्थम्; अतो न स्वतस्त्वविरोध इत्याह—*ज्ञानादेवेति* ॥ यथा मीमांसकमते स्वतःप्रमाणस्यापि ज्ञानस्यार्थतथात्वं न मृग्यते, नच परतस्त्वम् ; ज्ञानादेवार्थतथात्वनिश्चयात्, तद्वद-त्रापीत्यर्थः । विपक्षे दण्डमाह—*अन्यथेति* ॥ ब्रह्मज्ञानम्, मिथ्या, अज्ञानोपादानत्वात्, संमतवत् ; ततश्च न तस्याविद्यानिवर्तकत्वमिति शङ्कते—*ननु ब्रह्मेति* ॥ अध्यस्यत इत्यध्यासोऽज्ञानम् । दूषणान्तराभिधित्सया परिहृतस्यापि पुनरुत्थापनमिति द्रष्टव्यम् ॥

किं स्वरूपस्य मिथ्यात्वं विवक्षितम्? उत विषयस्य? इति विकल्प्याद्ये सिद्धसाध्यतेत्याह—*यदि तावदिति* ॥ नच—तस्य मिथ्यात्वेऽविद्यानिवर्तकत्वमनुपपन्नमिति—शङ्क्यम् ; मिथ्याभूतस्यापि स्वप्नोपलब्धकुञ्जरारोहणादेरर्थ-क्रियाकारित्वदर्शनादित्यर्थः । द्वितीयमनुवदति—*अर्थेति* ॥ ब्रह्मज्ञानम्, न विषयतो मिथ्या, अनुपलभ्यमानबाधत्वात् ; संमतवत्, इत्यभिप्रायेणाह—*न ब्रह्मणीति* ॥ ब्रह्म, मिथ्या, अध्यासोपादानज्ञानगम्यत्वात् ; प्रपञ्चवदित्याशङ्क्याह—*प्रपञ्चस्यापीति* ॥ "नेह नानाऽस्ति किंचने"ति प्रतिपन्नोपाधौ प्रपञ्चस्य निषिध्यमानत्वात् परमार्थसद्विलक्षण-त्वम्, ब्रह्मणश्चातथात्वादप्रयोजको हेतुः ; अन्यथा मिथ्याज्ञानविषयत्वादिदमोऽपि मिथ्यात्वं स्यादित्यर्थः । ब्रह्म-ज्ञानम्, विषयतो मिथ्या, दुष्टकारणजन्यत्वात् ; संमतवदिति शङ्कते—*ननु दुष्टेति* ॥ अप्रयोजको हेतुरित्याह—

प्रदीपः

प्रमाणानामिन्द्रियादीनां प्रमाणत्वमेव न स्यादितीन्द्रियाद्यध्यास उपपद्यते । *ननु* एवं तर्हि व्यर्थं देहेऽहमभिमानकल्पनम् ;

पञ्चपादिका

न 'ने'ति शक्यमपह्नोतुम् । दोषस्त्वागन्तुक एव मिथ्यात्वे हेतुः, न नैसर्गिकः ; तथोपलब्धेः । नच

पञ्चपादिकाविवरणम्

विषयतोऽपि मिथ्यात्वं दृष्टमिति, नेत्याह—*दोषस्त्वागन्तुक इति* ॥ प्रमाणकारणेषु सत्सु पश्चाद्भवन् दोषो दोष इत्युच्यते, स आगन्तुक इत्युक्तः । प्रमाणकारणत्वेनैव यो दोषो व्यवतिष्ठते, स न दोषः ; कारणत्वात् ; अविद्याध्यासस्तु चैतन्यस्याद्वितीयावभासं प्रत्येव दोषः, न द्वैतावभासं प्रति ; तस्य कारणत्वात्, यथा काचादिश्चक्षुरादिदोषस्तथाविधपापादृष्टोदयमनुमापयंस्तत्र प्रमाणत्वाद् न दोषः, तद्वदित्यर्थः। चैतन्यदोषत्वादेव तत्प्रकाश्याव्यवहार्यब्रह्मविपरीतं व्यवहारयोग्यं वस्तु प्रदर्शयति । दोषत्वं चाविद्यायाश्चैतन्यस्य तथाऽवभासविरोधितयाऽन्यथाप्रतिभासनिमित्तत्वात् । कथमागन्तुके दोषबुद्धिः ? न नैसर्गिके ? इत्येतावन्मात्रे दृष्टान्तमाह—*नच सर्व-

ऋजुविवरणम्

एवात्रापि दोषकारणजन्यत्वमित्याशङ्क्य व्याचष्टे—*प्रमाणकारणेष्विति* ॥ *ननु* अध्यासव्यतिरेकेण पूर्वं विषयज्ञानकारणेन भवितव्यम् ; अविद्याध्यासस्य दोषत्वेन व्यतिरिक्तप्रमाणाकाङ्क्षत्वात्, इत्याशङ्क्याह—*अविद्याध्यास इति*॥ यद्वा—एवमविद्याया दोषत्वमेव न स्यात् ; प्रमाणकारणेषु सत्सु पश्चाद्भावित्वाभावादित्याशङ्क्याह—*अविद्याध्यास इति* ॥ अथवा—व्यावहारिकप्रामाण्याभावोऽपि दोषजन्यत्वेनानुमातुं शक्यत इत्याशङ्क्याह—*अविद्याध्यास इति* ॥

ननु—दोषस्य कारणत्वेऽपि न दोषत्वमपगच्छति, ततस्तत्प्रयुक्ताप्रामाण्यमपि स्यात् ; वस्तुनि विकल्पाभावात्, इत्याशङ्क्य दृष्टान्तमाह—*यथा काचादिरिति* ॥ एवं तर्हि नाविद्याध्यासेन प्रपञ्चज्ञानसंभवः, चैतन्यदोषत्वादित्याशङ्क्याह—*चैतन्यदोषत्वादिति* ॥ यद्वा—दृष्टदोषजन्यत्वमुपाधिर्न भवति; प्रपञ्चज्ञाने तदभावेऽपि विषयतो मिथ्यात्वदर्शनात्, इत्याशङ्क्याह—*चैतन्यदोषत्वादेवेति* ॥ *ननु*—सिद्धे दोषत्वे चैतन्यविपरीतवस्तुप्रतीतिहेतुत्वम्, तदेव कथम् ? इत्याशङ्क्याह—*दोषत्वं चेति* ॥ कथं तर्हि टीकाकारेण नैसर्गिकानैसर्गिकत्वेन क्षुत्पिपासाप्रभृतीनामदोषत्वं दोषत्वं चोदाहृतम् ? नैसर्गिकस्यापि दोषत्वात्, अथवा—विषमो दृष्टान्तः ; "दोषस्त्वागन्तुकः" इत्यत्रागन्तुकस्यैव मिथ्यात्वहेतुत्वमुक्तम्, तदेव निदर्शनीयम्, नान्यदित्याशङ्क्याभिप्रायमाह—*कथमागन्तुक इति* ॥

तत्त्वदीपनम्

नेत्याहेति॥ आगन्तुकदोषस्य मिथ्यात्वहेतुत्वम्, इतरस्य च तद्वैपरीत्यं चेत्, जन्मत एव दुष्टाक्षस्य उत्पद्यमानज्ञानस्य मिथ्याविषयत्वं न स्यादित्याशङ्क्यागन्तुक-नैसर्गिकशब्दार्थमाह—*प्रमाणेत्यादिना* ॥ कथं तर्हि अविद्याया "विद्यत एवे"त्यत्र दोषत्वमुक्तम् ? तत्राह—*अविद्येति* ॥ एकस्य क्वचिद् दोषत्वं गुणत्वं चेत्येतत् कुत्रोपलब्धम् ? तत्राह—*यथेति* ॥ काचादेः शुक्तित्वादिविशेषांशप्रतिबन्धत्वाच्चक्षुरादौ दोषत्वम्, स्वहेतुपापादृष्टानुमापकत्वेन च गुणत्वं यथा, तथेत्यर्थः । अविद्याया अद्वैतावभासं प्रति दोषत्वमुक्तम्, तत् कथम् ? अत्राह—*चैतन्येति* ॥ चित्प्रकाश्याव्यवहार्यब्रह्मविपरीतवस्तुप्रकाशकत्वाद् दोषत्वमित्यर्थः । पापादृष्टानुमापकस्य काचादेरदोषत्वम्, तद्वदविद्याया अपि व्यवहारयोग्यप्रकाशकत्वाददोषत्वमित्याशङ्क्याह—*दोषत्वमिति* ॥ व्यवहारयोग्यवस्तुप्रकाशत्वमात्रेण न दोषत्वं ब्रूमः, किंतु सच्चिदानन्दस्वप्रकाशमानप्रतिबन्धेन तद्विपरीतावभासहेतुत्वात्, चक्षुःप्रकाश्यशुक्त्यादिविपरीतप्रकाशककाचादिवदित्यर्थः । "नच सर्वसाधारणे" इत्यादिनाऽऽगन्तुकस्य दोषत्वं नेतरस्येत्युक्तम्, तदनुपपन्नम् ; आगन्तुकस्य मिथ्यात्वहेतुत्वं नेतरस्येति प्रस्तुतत्वात्, प्रस्तुते दृष्टान्ताभिधानस्योचितत्वादित्याशङ्क्य तात्पर्यमाह—*कथमिति* ॥

वार्तिकम्

"नहीन्द्रियाण्यनुपादाय=तेषु ममाध्यासमकृत्वा, *प्रत्यक्षादिरूपो यो व्यवहारः, तद्विषयो वा यो व्यवहारः —'प्रमाणमि'ति, स न संभवतीति । हिशब्दोऽवधारणार्थः । नैव संभवतीत्यर्थः ॥

ननु—भवतु तर्हि ममाध्यासापेक्षा ; तद्व्यतिरेकेणेन्द्रियोपादानासंभवात्प्रत्यक्षादिव्यवहारानुपपत्तेः, तथाऽपि देहादौ न—'अहमि'त्यध्यासापेक्षाऽस्ति ; तमन्तरेणैव ममाध्यासगृहीतानामिन्द्रियाणां व्यापारोपपत्तेः । एवंच सति ममकारोऽपि स्वत्वनिबन्धन एव, नाध्यासनिबन्धन इति द्वितीयपक्षमाशङ्क्य

नचाधिष्ठानमन्तरेणेन्द्रियाणां व्यापारः संभवति। नचान[1]ध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते।

भामती

नचाधिष्ठानमन्तरेणेन्द्रियाणां व्यापारः=प्रमाणानां व्यापारः संभवति ॥ नहि जातु करणान्यनधिष्ठितानि कर्त्रा स्वकार्ये व्याप्रियन्ते ; मा भूत् कुविन्दरहितेभ्यो वेमादिभ्यः पटोत्पत्तिरिति। अथ देह एवाधिष्ठाता कस्मान्न भवति ? कृतमत्रात्माध्यासेनेति ? अत आह—*नचानध्यस्तात्मभावेन देहेन कश्चिद् व्याप्रियते* ॥ सुषुप्तेऽपि व्यापारप्रसङ्गादिति भावः। *स्यादेतत्*—यथाऽनध्य-

ऋजुप्रकाशिका

कत्वेनाविद्यावद्विषयत्वं प्रमाणानां स्यादिति शङ्कते—*किमिति पुनरिति* ॥ इन्द्रियादिप्रमाणप्रवृत्तिर्व्यापारः, स चाधिष्ठानादृते स्वतो न भवतीत्याह—*अत आहेति* ॥ *इन्द्रियव्यापार (२) इति* भाष्यस्यार्थमाह—*इन्द्रियाणां व्यापार इति* ॥ तस्यैव विवरणम्—*प्रमाणानां व्यापार इति* ॥ "अधिष्ठानमन्तरेणे"ति भाष्यस्याधिष्ठातारमन्तरेणेत्यर्थः। न संभवतीत्युक्तम्, तदेव व्यतिरेकमुखेनाह—*नहि जात्विति* ॥ कर्त्राऽनधिष्ठितानीति व्यत्यासेन योजना। यदि कर्त्राऽनधिष्ठितान्यपि व्याप्रियन्ते, तदा कुविन्दादिरहितेभ्यो वेमादिभ्योऽपि पटोत्पत्तिः स्यात्, मा भूत्तथा पटोत्पत्तिरिति, कर्त्राऽनधिष्ठितानि करणानि स्वतो न व्याप्रियन्त इत्यर्थः। देह एव प्रमाणानामधिष्ठाताऽस्तु, न प्रमाता ; तथाच प्रमातृत्वाध्यासं विना प्रमाणप्रवृत्तेर्नाविद्यावद्विषयत्वं प्रमाणानामिति शङ्कते—*अथ देह एवेति* ॥ देहस्याप्यात्मतादात्म्याध्यासानापन्नस्याधिष्ठानत्वायोगादविद्यावद्विषयत्वमेवेत्यभिप्रेत्याह—*अत आहेति* ॥ कश्चिदित्यनन्तरम् इन्द्रियादिरिति शेषः। विपक्षेऽतिप्रसङ्गमाह—*सुषुप्तेऽपीति* ॥ पुनरपि प्रमाणानामविद्यावद्विषयत्वाभावमाशङ्कते—*स्यादेतदिति* ॥ "भविष्यति तदभिज्ञः प्रमाते"त्युक्तम्, तत्र प्रमातृत्वमेवेतरेतरतादात्म्य-

वार्तिकम्

निराकरोति—*"न चाधिष्ठानमन्तरेणेन्द्रियाणां व्यापारः संभवतीति* ॥ कर्तारमनाश्रित्य करणव्यापारादर्शनात्, कर्तुर्व्यापारविषयस्यैव करणत्वात्, अहङ्कारमन्तरेण ममकारासंभवादित्याशयः॥

***ननु*—भवतु कर्त्रपेक्षा करणानाम्, तदभावे कस्य ममकारग्राह्यत्वमिन्द्रियाणां स्यात् ? नचैतावता देहे—'अहमि'त्यध्यासापेक्षा ; तमन्तरेणाप्यात्मनः स्वाद्दृष्टारब्धत्वरूपदेहसंबन्धेन तदधिष्ठितेन्द्रियव्यापारणोपपत्तेः, भद्रसेनद्वारा राज्ञः कर्तृत्ववत् तत्कर्तृत्वाविरोधादिति तृतीयपक्षमाशङ्क्य परिहरति—*नचानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियत इति* ॥ न अध्यस्त आत्मभावो यत्र देहे, सोऽनध्यस्तात्मभावः ;**

भाष्यभावप्रकाशिका

ममत्वेनागृहीत्वेत्यर्थः। इन्द्रियग्रहणं लिङ्गादेरुपलक्षणम् ; प्रत्यक्षादीत्यादिपदप्रयोगात्। व्यवहारस्य व्यवहर्तारं विनाऽयोगाद् अनुपादानस्य च व्यवहारस्य च कर्तृसाम्ये, तान्यनुपादाय यो व्यवहारः, स नेति योजना ॥ यो द्रष्टृत्व-वक्तृत्वादिरक्षमक्षं प्रति नियतो व्यवहारः, यस्य लिङ्गादिनाऽनुमानत्वादिव्यवहारः, नासौ तानि ममत्वेनागृहीत्वा युक्तः ; देहाध्यासेऽपि चक्षुराद्यनध्यासेऽन्धादेरदर्शनादित्यर्थः ॥ इन्द्रियाध्यासे तेनैव व्यवहारादलं देहाध्यासेनेत्याशङ्क्याह—*नचेति* ॥ *अधिष्ठानमिन्द्रियाणाम् = शरीरम्। इन्द्रियाणामधिष्ठानत्वेन देहे गृहीतेऽपि तस्मिन्नहंभावस्य न प्रवृत्त्युपयोगः, देहात्मनोरिच्छया नियोज्यनियोजकत्वलक्षणसंबन्धान्तरादपि प्रवृत्त्युपपत्तेरित्याशङ्क्याह—*नचानध्यस्तेति*॥अस्यार्थः—

(१) "न तेनानध्यस्तभावेन" इति पञ्चपादिकादिप्रस्थानाभिमतः पाठः।
(२) "इन्द्रियव्यापारः" इति समस्तपाठ ऋजुप्रकाशिकाभिमतः।

नचैतस्मिन् सर्वस्मिन्नसत्यसङ्गस्यात्मनः प्रमातृत्वमुपपद्यते ।

भामती

स्तात्मभावं वेमादिकं कुविन्दो व्यापारयन् पटस्य कर्ता, एवमनध्यस्तात्मभावं देहेन्द्रियादि व्यापारयन् भविष्यति तदभिज्ञः प्रमातेति, अत आह—*नचैतस्मिन् सर्वस्मिन्—इतरेतराध्यास इतरेतरधर्माध्यासे च असति, आत्मनोऽसङ्गस्य—सर्वथा सर्वदा सर्वधर्म-धर्मिवियुक्तस्य प्रमातृत्वमुपपद्यते* । व्यापारवन्तो हि कुविन्दादयो वेमादीनधिष्ठाय व्यापारयन्ति, अनध्यस्तात्मभावस्य तु देहादिष्वात्मनो न व्यापारयोगः ;

ऋजुप्रकाशिका

तद्धर्मादिकं सर्वं विनाऽसङ्गस्यात्मनो न संभवतीत्याह—*अत आहेति* ॥ सर्वशब्दार्थमाह—*इतरेतराध्यास इति* ॥ "नचे"त्येतत् "उपपद्यते" इत्यनेन सम्बध्यते । कुविन्दादिदृष्टान्तं विघटयति—*व्यापारवन्तो हीति* ॥ प्रकृते तद्वैषम्यमाह—*अनध्यस्तात्मभावस्य त्विति* ॥ देहादिष्वनध्यस्तात्मभावस्य त्वात्मनो न व्यापारयोग इति योजनीयम् ; अतिप्रसङ्गादित्यर्थः । एवं *देहेन्द्रियादिष्वहं-ममाभिमानहीनस्य = तादात्म्य-तद्धर्माध्यासहीनस्य प्रमातृताऽनुपपत्तौ सत्यां प्रमाणप्रवृत्त्यनुपपत्तेरित्यादिनाऽध्यासाभावे प्रमाणप्रवृत्त्यभावात् प्रमाणप्रवर्तकत्वेनाध्यास आवश्यक इत्यध्यासः समर्थितः । संप्रति प्रमाणफलीभूतां प्रमां विना प्रमाणवृत्त्य-

वार्तिकम्

तेनेत्यर्थः । सुषुप्त्यादौ स्वादृष्टारब्धत्वरूपदेहसंबन्धे सत्यपि तत्रात्माध्यासाभावात् तेनात्मन इन्द्रियादि-गोचरव्यापारादर्शनात्, जागरादौ च तद्भावे तद्दर्शनात् । अतो देहेऽहम्भावपुरस्कारेणात्मन इन्द्रियेषु ममाध्यासे सत्येव तद्गोचरव्यापारः, नान्यथेति भाष्यवाक्यार्थः ॥ अत एव न चतुर्थकल्पोऽपि ; देहेन्द्रि-यादिष्वहं-ममाध्यासरहितस्य प्रमातृत्वानुपपत्तेरित्याह—"नचैतस्मिन् सर्वस्मिन्नसति—प्रमातृत्वमुपपद्यत इति* ॥ तेन देहेन्द्रियादिष्वहं-ममाध्यासविशिष्टस्यैवात्मनः प्रमातृत्वम्, न तार्किकादिपरिकल्पितरीत्येत्य-भिहितं भवति ॥

भाष्यभावप्रकाशिका

अध्यासेतरो देहात्मयोगः—देहस्यात्मेच्छयाऽनुविधीयमानत्वं वा ? तदनुविधानयोग्यत्वं वा ? तत्कर्मारभ्यत्वं वा ? नाद्यः ; तदभावेऽप्यातुरदेहे प्रमातृत्वादिदर्शनात् । न द्वितीयः ; स्वापादावपि तत्प्रसङ्गात्, तद्योग्यताया यावद्द्रव्यभावित्वात् । नच—यावत्कार्यलयमशरीरमेवेति—वाच्यम् ; स्वदृष्ट्या तदभावेऽपि परदृष्ट्या तद्भावात्, तस्य तस्मिन् प्रमातृत्वादिधीध्रौव्यात् । न तृतीयः ; भृत्यादिदेहैरपि प्रमातृत्वादिप्रसङ्गात्, तेषां स्वामिकर्मारभ्यत्वात् । अतो देहस्यात्मनि संबन्धान्तरासिद्धेरध्यास इति ॥ *ननु*—आत्मा स्वतश्चेतनत्वान्मातृत्वादिशक्तिमानिन्द्रियाद्यव्यवधानेन जागरादौ मातृत्वादिकमश्नुते, स्वापादौ चक्षुराद्यभावात्तदभावः, नाध्यासभावात् ; अतो व्यतिरेकिणि व्यतिरेकः सन्दिह्यते, तत्राह—*नचैतस्मिन्निति* ॥ अस्यार्थः—प्रमातृत्वं प्रमां प्रति कर्तृत्वं स्वातन्त्र्यम् ; तच्च कारकान्तराप्रयो-

प्रदीपः

इन्द्रियाद्यध्यासेनैव प्रमाणप्रवृत्तिसंभवात्, इत्यत आह—*नचाधिष्ठानमन्तरेणेति* ॥ अत्र वाक्ये 'व्यवहारः' इत्येकः पाठः, अपरस्तु 'व्यापारः' इति । रत्नप्रभादिसंमतो 'व्यवहारः' इति पाठः, भामतीसम्मतश्च 'व्यापारः' इति । तत्र रत्नप्रभादिसम्मतं "नचाधिष्ठानमित्यादि—कश्चिद्व्याप्रियत" इत्यन्तं देहाध्यासावश्यकतानिरूपणपरं विवरणम् । तत्रेन्द्रियाणामधिष्ठानं शरीर-मन्तरेण शरीरसम्बन्धमन्तरेण कश्चित्प्रमाता न व्यवहरेत्, इति प्रमातुः शरीरसम्बन्धावश्यकतां प्रथमेन वाक्येन प्रदर्श्य, सच सम्बन्धः संयोगादिरूप एव भवतु, किमित्यध्यासाख्य एवेति शङ्कावारणार्थम्—*"नचानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते" इति वाक्यम् । सर्वथा तु देहाध्यासस्याप्यावश्यकतैवात्र प्रतिपाद्यते । भामतीसम्मतं तु विवरणम्—प्रमाता कथं विनाऽध्य-

वार्तिकम्

ननु—कथं तार्किकादिरीत्याऽऽत्मनः प्रमातृत्वं न संभवति? तेषामपि मत आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेनेत्यादिप्रणालिकया प्रमातृत्वोपपत्तेः। नच—सर्वेषामात्मनां तन्मते विभुत्वादात्मादिचतुष्टयसन्निकर्षस्याविशिष्टत्वात् ततो जायमानायाः प्रमितेः साधारणत्वापत्त्या न प्रमातृत्वनियम इति—वाच्यम्; यदात्मीयं मनआदि, तदात्मीयमन-आदिसन्निकर्षस्यैव तद्धेतुत्वेन तत्साधारण्याभावात् प्रमातृत्वसाधारण्यानुपपत्तेरिति—चेत् *न*; मनआदावपि स्वीयत्वनियामकाभावात्, स्वादृष्टारब्धत्वादेश्चान्योन्याश्रयादिदोषग्रस्तत्वेन तन्नियामकत्वानुपपत्तेः पूर्वमेवोक्तत्वात्। अपिच तव मते ज्ञानस्य घटादिविषयनियमो न स्यात्। तथाहि—ज्ञानं क्रिया? गुणो वा? सर्वथाऽपि न तद्विषयनियमः स्यात्; क्रिया-प्रकाशगुणयोः स्वाश्रयसंयुक्त-मात्रातिशयाधायकत्वनियमस्य प्रदीपेष्वादिषु दर्शनात्, आत्मनश्च विभुत्वेन सर्वमूर्तसंयोगित्वात् तदाश्रय-ज्ञानस्य सर्वमूर्तविषयत्वापत्तेः। *अथ*—यदवच्छिन्न आत्मनि ज्ञानमुत्पद्यते, तदवच्छिन्नात्मसंयोग एव विषयत्वप्रयोजकः; प्रदीपेष्वादिष्वपि तथैव दर्शनात्, देहावच्छिन्ने चात्मनि ज्ञानमुत्पद्यते, अतस्तत्संयोगिन एव विषयत्वमिति—चेत्, *न*; देहासंयुक्तघटादेस्तदवच्छिन्नात्मसंयोगस्याभावादविषयत्वप्रसङ्गात्। *अथ* न स्वाश्रयसंबद्धत्वमात्रं विषयत्वप्रयोजकम्, किन्तु जनकत्वे सति तत्त्वमिति—चेत्, *न*; प्रदीपेष्वादिषु स्वाश्रयसंयुक्तमात्रे क्रिया-प्रकाशगुणयोरतिशयाधायकत्वदर्शनादुक्तविशेषणानुपपत्तेः, उपपत्ता-वपीन्द्रियादौ व्यभिचारावश्यकत्वात्। *ननु*—इन्द्रियादेरात्मसंयोगित्वेऽपि न तत्त्वेन जनकत्वम्; विषयसंयुक्तत्वादिनैव जनकत्वात्, विषयस्यात्मसंयोगित्वेनैव जनकत्वं विवक्षितम्, अतो न व्यभिचार इति—चेत्, *न*; विषयस्यापि तत्त्वेन जनकत्वे प्रमाणाभावादुक्तविवक्षाया असिद्धेः, इन्द्रियसन्निकृष्टत्वेनैव तस्य जनकत्वात्। अस्तु तर्हीन्द्रियसन्निकृष्टत्वेन जनकत्वमेव विषयत्वप्रयोजकमिति—चेत्, न; मनसि व्यभिचारात्, तस्यापि तत्त्वेन बहिरध्यक्षजनकत्वात्, अन्यथेन्द्रियसंयोगाभावेऽपि मनसो बहिरध्यक्षजन-कत्वप्रसङ्गात्। *एतेन*—उद्देश्यत्वमेवास्तु विषयत्वप्रयोजकमिति—अपास्तम्; पथि गच्छतस्तृणादे-रुद्देश्यत्वाभावेऽपि ज्ञानविषयत्वदर्शनात्। तस्माद् घटादिज्ञानस्य विषयनियमासंभवादुक्तरीत्या सर्वविषय-त्वापत्तिः, इति विभ्वात्मवादिनो नैयायिकादेर्न प्रमातृत्वोपपत्तिः॥ अण्वात्मवादिनोऽपि न प्रमातृत्वमुपपद्यते; क्रिया-प्रकाशगुणयोः स्वाश्रयसंबद्धविषयत्वनियमात्, तदसंयुक्तघटादेर्ज्ञानविषयत्वानुपपत्तेः, तदसंबद्धस्यापि तदाश्रितज्ञानविषयत्वकल्पने न तद्विषयनियमः स्यात्; सर्वेषां तदसंबद्धत्वाविशेषात्, जनकत्वादिना तन्नियमस्येन्द्रियादौ व्यभिचारित्वेन पूर्वमेव निरस्तत्वात्। *एतेन*—विषयत्वेन जनकत्वं तन्नियामकमिति

भाष्यभावप्रकाशिका

ज्यस्य समस्तकारकप्रयोक्तृत्वम्। नच कूटस्थस्यासङ्गस्यात्मनः स्वतो व्यापारः। नचेच्छातिरेकेण प्रमाकरणप्रयोक्तृत्वम्। नचात्मन्यक्रियेऽगुणे च क्रिया-गुणवद्बुद्ध्याध्यासादृते सा युक्ता। तस्माद् बुध्याद्य-भेदाध्यासे तद्धर्माध्यासे वाऽसति स्वतोऽसङ्गस्य प्रमातृत्वायोगादध्यासस्तद्धेतुरित्यर्थः॥ तर्हि मा भूत्

प्रदीपः

ध्यासमिन्द्रियाणि न व्यापारयतीति शङ्कावारणार्थं प्रथमवाक्यम्। तत्र चाधिष्ठानमध्याससम्बन्धेन प्रमातुः सम्बन्धं विना इन्द्रियाणां व्यापारः प्रमाजननानुकूलो न संभवतीति योजना। प्रथमयोजनायां व्यवहारकर्ता प्रमाता, द्वितीययोजनायां व्यापारकर्तृ इन्द्रियमिति विवेकः। द्वितीययोजनायां शरीराध्यासावश्यकतानिरूपणार्थम्—"नचानध्यस्तात्मभावेने"ति वाक्यमिति निष्कर्षः। *व्याप्रियते* प्रवर्तते; अन्यथा सुषुप्तौ, यदा न देहात्मैक्याध्यासः, तदाऽपि व्यवहारापत्तिरिति भावः। न केवलं प्रमाण-

वार्तिकम्

—*अपास्तम्* ; अन्योन्याश्रयापत्तेः—विषयत्वेन जनकत्वसिद्धौ विषयत्वनियमः, तन्नियमे च सिद्ध विषयत्वेन जनकत्वसिद्धिरिति, परोक्षस्थले जनकत्वाभावेनाविषयत्वापत्तेश्च ॥

एतेन —देह-तत्परिमाण-विज्ञान-शून्यात्मपक्षेषु प्रमातृत्वानुपपत्तिः—*व्याख्याता* ; क्रिया-प्रकाशगुणयोः स्वाश्रयसंबद्ध एवातिशयाधायकत्वात् तदसंबद्धघटादिग्रहणानुपपत्तेः॥ सांख्यमते त्वात्मन इन्द्रियाणामन्तःकरणानाञ्च व्यापकत्वेन सर्वदा सर्वविषयसंबन्धात् सर्वदा सर्वग्रहणप्रसङ्गः, सुषुप्त्यभावप्रसङ्गश्च। कलतग्रहणसामग्र्यां सत्यामपि कदाचिद्ग्रहे सर्वदैवाऽग्रहप्रसङ्ग इत्यादिदूषणमुन्नेयम्, तस्माद् न वादिमते प्रमातृत्वमुपपद्यते ॥ तथाहि—कस्तावत्तव मते प्रमाता? शुद्धचिन्मात्रमिति चेत्, न; तस्य व्यापकत्व-नित्यत्वाभ्यां सर्वदा सर्वविषयसंबन्धात् सर्वदा सर्वावभासप्रसङ्गात्, कूटस्थत्वव्याहते-रेकात्मत्वात्प्रमातृव्यवस्थानुपपत्तेश्च। अज्ञानविशिष्ट इति चेत्, न; सुषुप्तावपि प्रमातृत्वप्रसङ्गः। अन्तःकरणादिविशिष्ट इति चेत्, न; तस्य बहिरस्वातन्त्र्याद्बहिर्विषयसंबन्धायोगात्तद्ग्रहणानुपपत्तेरिति—*चेत्,* न; स्वतो बहिर्गमनासम्भवेऽपीन्द्रियद्वारा बहिर्गमनादन्तःकरणादिविशिष्टस्य प्रमातृत्वोपपत्तेः॥

तथाहि—चक्षुरिन्द्रियं तावदप्रतिबद्धं बहिर्गच्छत् तैजसत्वादतिशीघ्रं ध्रुवादिविषयं प्राप्य तदाकारेण परिणमते। सौरालोक इव गृह-भूधरादि प्रकाश्यं प्राप्य तदाकारेण। स च चक्षुषो विषयाकारपरिणामो निर्विकल्प एव; विशेषण-विशेष्यभावानवगाहात्, वस्तुमात्रालोचनरूपत्वात्, विशेषण-विशेष्यभावेन वस्तुविकल्पनस्य मनोमात्रधर्मत्वात्, मनसः सङ्कल्प-विकल्पात्मकत्वात्। तथाच तेनेन्द्रियालोचनेन विषयस्येषज्जाड्याभिभवेऽपि नाशेषजाड्याभिभवो भवति, सविकल्पनया स्थितस्य विषयस्य तदनुरूपसविकल्पकवृत्तिमन्तरेण तदभिभवासंभवात्, सम्भवे वा मनोवै-यर्थ्यापत्तेः। अतश्चक्षुः स्वविषयं विकल्पयितुं मनोऽपेक्षते, मनोऽपि तदन्तरेण बहिर्व्यापारं कर्तुमशक्नुवत् चक्षुरपेक्षते। नहि करणं विनैव कर्ता कर्मणि व्यापृतो भवति; करणकारकवैयर्थ्यापत्तेः। *ननु*—एवं तर्हि करणमपि कर्त्रधिष्ठानं विना स्वातन्त्र्येण न व्याप्रियेत; कर्तृवैयर्थ्यापत्तेः। तथाच कथं मनो-व्यतिरेकेण चक्षुषो विषये व्यापारो दर्शित इति—चेत्, *न*; वर्धकिव्यापारात् कुठारव्यापारस्य निष्कृष्य प्रदर्शनवद् मनोव्यापारान्निष्कृष्य चक्षुर्व्यापारदर्शनमात्राभिप्रायत्वात्तदभिधानस्य, न स्वातन्त्र्येण विषये चक्षुर्व्यापारोऽस्तीत्यभिप्रायत्वमित्यदोषः। तथाच सति पङ्ग्वन्धन्यायेन नदीकुल्यान्यायेन च परस्पराश्रिते मनश्चक्षुषी स्वविषयं गत्वा व्याप्नुतः। यथा पङ्ग्वन्धौ गतिशक्ति-दृक्शक्तिहीनौ प्रत्येकं ग्रामगमनादिकार्यं साधयितुमशक्नुवन्तौ परस्परं साहाय्यमपेक्षेते—पङ्गुरन्धस्य स्कन्धमारुह्य दृक्शक्तिसंपन्नत्वात् तं मार्गे चालयति, अन्धस्तु गतिशक्तिसंपन्नत्वात् तं गृहीत्वा तदुपदिष्टमार्गेण गच्छति, इति मिलित्वा ग्रामगमनादि-कार्यं च साधयतः, यथा वा—नदी स्वतो ह्रदादिदेशपूरणेऽसमर्थाऽपि तत्र गमनमार्गालाभात् कुल्यासाहाय्य-मपेक्षते, कुल्या तु गमनमार्गे सत्यपि तत्पूरणसामर्थ्याभावाद् नदीपूरमपेक्षते, इति मिलित्वा ते ह्रदादिपूरण-लक्षणं स्वकार्यं साधयतः; एवं मनसः स्वतो विकल्पजननसामर्थ्ये सत्यपि बहिर्गमनासामर्थ्यात्, चक्षुस्तु गमनसामर्थ्ये सत्यपि विकल्पजननासामर्थ्याद् मिलित्वा मनश्चक्षुषी स्वविषयं प्राप्य द्रुतताम्रमिव मूषाम्, दीप इव हर्म्योदरम्, तदाकारां विकल्परूपां वृत्तिं साधयतः। *एतेन*—प्रमातृचैतन्यस्यापि विषयाकारता—*व्याख्याता*; अङ्गुल्याद्युपाधेरार्जववक्रादिभावेन तत्प्रतिफलिततेजस आर्जववक्रादिभाववद् मनः-प्रतिफलितचैतन्यस्यापि तथात्वात्। एतदेवाभिप्रेत्य भगवता भाष्यकारेण—*"देहेन्द्रियादिष्वहं-ममाभि-मानहीनस्य प्रमातृत्वानुपपत्तिरित्युक्तम्* ॥

वार्तिकम्

न ह्यन्तःकरण-देहयोरहमित्यभिमानमन्तरेणात्मनः संबन्धान्तरमस्ति, नवा तमन्तरेण देहादि-संबन्धीन्द्रियेषु ममाभिमानः, तता वा संबन्धान्तरमिति। तथाच तद्वृत्तिद्वारा विषयाकारजननेऽपि चैतन्यस्य न कूटस्थत्वव्याहतिरिति॥ इयमेव वृत्तिः साक्षिचैतन्यस्य विषयेण संबन्ध इति गीयते। तेन यत्प्रमातृवृत्तिरियम्, तदवच्छिन्नसाक्षिचैतन्यस्यैव वृत्तिद्वारा विषयाकारभजनाद् न तस्य सर्वप्रमातृसाधारण्यम्। एवंच सत्युक्तप्रकारेण जातायामन्तःकरणावच्छेदेन स्वविषयजाड्याभि-भवसमर्थायां विकल्परूपायां साक्षिचैतन्यखचितायां वृत्तावय्यःपिण्डवत्तादात्म्यापन्नस्य विषयस्य जाड्याभिभवो भवति ; तदनभिभवेऽजडव्यावृत्त्या तादात्म्यानुपपत्तेः, विषयचैतन्यस्य चानावृतवृत्तिप्रति-फलितसाक्षिचैतन्याभेदादावरणभङ्गः ; तदभङ्गेऽनावृतसाक्षिचैतन्याभेदानुपपत्तेः। तदभेदश्च तदुपाध्यो-रन्तःकरणवृत्ति-घटयोरैक्यात्। नहि समानजात्योरुपाध्योरेकलोलीभावे जाते तदुपधेययोः समानजात्योरेक-लोलीभावो न भवति ; शरावद्वयस्थजलयोरेकलोलीभावे तदुपहितादित्यप्रतिबिम्बयोरेकत्वदर्शनात्। तथाच वृत्तेः पूर्वमपि घटस्य स्फुरणाभेदे सत्यपि तत्स्फुरणस्यावृतत्वेनानभिव्यक्तेः, वृत्तौ सत्यां तदभिव्यक्त-चैतन्याभेदेनावरणभङ्गात् तदभिव्यक्तेश्च 'घटः स्फुरती'ति प्रतीत्युपपत्तिः ; अन्यथा तत्स्फुरणस्यावृतत्वात्तद-नुपपत्तेः। *ननु*—वृत्त्युत्तरकालं वृत्त्युपहितस्फुरणमेव वृत्त्यभेदाद् घटे भासताम्, नतु तदुपादानस्फुर-णमपीति—चेत्, *न* ; उक्तोत्तरत्वात्। उक्तं हि—न ह्युपाध्योरेकलोलीभावः ; दृष्टविरोधादिति। अपिच वृत्तिद्वाराऽभिव्यक्तसाक्षिचैतन्येन तदैक्ये ह्येकत्राभिव्यक्त्यनभिव्यक्त्योर्विरोधात्तदावरणभङ्गः, नान्यथा। नच तदावरणभङ्गं विना तदध्यस्तघटाभिव्यक्तिः संभवति ; अनभिव्यक्तचैतन्याभेदेन घटस्याप्यनभिव्यक्तत्वात्। नच—तदभेदे सति घटस्य वृत्तिद्वाराऽभिव्यक्तसाक्षिचैतन्याभेदेनाभिव्यक्तिः संभवति ; युगपदेकस्याभि-व्यक्तत्वानभिव्यक्तत्वविरोधात्। अपि च ज्ञाने हि ज्ञेयमध्यस्तमिति सर्ववेदान्तरहस्यम्। नच तस्मिन्नन-भिव्यक्ते ज्ञेयावभासः संभवति ; सर्वदा सर्वस्य सर्वभानप्रसङ्गात्। नच तद्भिन्नतयाऽवस्थितेनानभिव्यक्त-चैतन्यान्तरेणावभासः संभवति। न ह्यन्यचैतन्याध्यस्तमन्यचैतन्येन वेद्यते ; शुक्तिरजतावभासस्यापि सर्वसाधारणत्वप्रसङ्गात्। *एतेन*—वृत्त्युपहितसाक्षिचैतन्याभेदादेव घटस्य जाड्याभिभवादवभासोप-पत्तौ न तदुपादानचैतन्येनापि साक्षिणोऽभेदोऽपेक्ष्यते, प्रमाणाभावादिति—*अपास्तम्*; तदुपादानचैतन्या-भेदं विना साक्षिणो ज्ञेयाभेदस्यैवासंभवात् तज्जाड्याभिभवानुपपत्तेः। न ह्यन्यस्यान्येनाभेदः परमार्थतः संभवति। न ह्येकमेवाध्यासिकं वस्तूभयत्राधिष्ठाने युगपदारोप्यते। नच साक्षिण्येवाध्यस्तं तत् ; व्यावहारिकत्वभङ्गप्रसङ्गात्, व्यावहारिकसत्त्वपक्षमादायैव प्रतिकर्मव्यवस्थाप्रदर्शनात्। तस्मात् प्रमाण-प्रमेयचैतन्ययोरैक्यादेव विषयाभिव्यक्तिरिति युक्तमुत्पश्यामः। नच—आवरणभङ्गे तदैक्यम्, तदैक्ये च प्रमेयचैतन्यगतावरणभङ्ग इत्यन्योन्याश्रय इति—वाच्यम् ; दीपे सत्यन्धकारनाश-तत्प्रकाशानां समकाली-नत्ववत् परस्परप्रयोज्य-प्रयोजकभावेऽपि प्रमाणे सत्यावरणभङ्ग-तच्चैतन्यैक्यानां समकालीनत्वात्, प्रतिबन्धा-भाव-कार्ययोः समकालीनत्वस्य पूर्वमेव प्रदर्शितत्वात्। अपिच प्रमाण-प्रमेयचैतन्ययोरैक्यस्य सर्वदा विद्यमानत्वाद् न तत् कर्तव्यं भवति ; "एको देवः सर्वभूतेषु गूढः" इतिश्रुतेः। किं तर्हि ? घटाकाश-महाकाशयोरिवावृतत्वानावृतत्वोपाधिमात्रेण तयोर्भेदः प्रतीयते। स चावरणभङ्गादनुविलीयते। अत आवरणभङ्गकरणमेव तदैक्यकरणम्, न पृथक् ततो व्यापारान्तरमपेक्षते, इति कुतोऽन्योन्याश्रयः ? *एतेन*—प्रमेयचैतन्याभेदेनाभिव्यक्तौ तस्य ब्रह्मस्वरूपादैन्यसिद्धेर्मोक्षप्रसङ्गः, साधारण्याच्च सर्वेषां प्रमेयाव-भासप्रसङ्ग इति—*अपास्तम्* ; तच्चैतन्यस्य ब्रह्मचैतन्यत्वेऽपि विषयावच्छिन्नतयैवाभिव्यक्तेः स्वस्वरूपे

वार्तिकम्

भानाभिव्यक्त्यभावाद् मोक्षानुपपत्तेः, यत्प्रमातृचैतन्येनाभिव्यक्तिः, तस्यैव तदभिव्यक्तेः सर्वसाधारण्याभावात्॥

ननु—प्रमाणचैतन्याभेदेनैव प्रमेयचैतन्याभिव्यक्तिः, वृत्त्यवच्छिन्नस्य प्रमाणत्वात्, तद्भेदं विना पूर्वोक्तयुक्त्या प्रमेयाभिव्यक्त्यसंभवात्, न प्रमातृचैतन्याभेदेनापि ; प्रमाणाभावादिति—चेत्, *न* ; प्रमातृ-प्रमाणचैतन्ययोरेकलोलीभावमन्तरेण प्रमाणस्य प्रमेयप्राप्त्यसंभवस्य पूर्वमुक्तत्वात्, प्रमाणचैतन्येन तदैक्ये प्रमातृचैतन्येनापि तदैक्यस्य ध्रौव्यात् प्रमाणाभावासिद्धेः। *ननु*—प्रमातृ-प्रमाण-प्रमेयाणामैक्ये कथं प्रमातृत्वादिभावः स्यात्? तेषां तद्भावस्य भेदनियतत्वादिति—चेत्, *न* ; अभेदस्यैव तेषां पूर्वोक्तरीत्या तद्भावप्रयोजकत्वात्, भेदनियतत्वासिद्धेः। नच—एवं प्रमातृत्वादिसाङ्कर्यप्रसङ्गः ; अन्तःकरण-वृत्ति-प्रमेयोपाधिभेदेन तदैक्येऽपि साङ्कर्यपरिहारात्। *ननु*—उपाध्योरप्यैक्यापन्नत्वात् कथं तैस्तेषां साङ्कर्यपरिहार इति—चेत्, *न* ; तेषामाध्यासिकैक्येऽपि पारमार्थिकैक्याभावात्। न ह्यत्यन्तभिन्नानां स्वतोऽन्तःकरणादीनां परमार्थत ऐक्यमस्ति, सत्यपि तदवच्छिन्नचैतन्यानां परमार्थत ऐक्ये। नहि रज्ज्वा ऐक्येऽपि तदध्यस्तवंशोरग-धारादीनां परस्परमैक्यं भवति ; विरोधात्। तस्मादुपाधिभेदान्नास्ति प्रमातृत्वादिसाङ्कर्यमिति। एवंच सति 'घटोऽयमि'ति प्रतीतौ प्रमात्रादित्रितयावभास उपपद्यते। *ननु*—'घटोऽयमि'ति प्रतीतौ प्रमेयमात्रं घटो भासते, न प्रमातृ-प्रमाणे इति—*चेत्,* त्रयाणामेकलोलीभावेनैकाकारत्वप्रदर्शनात्, 'घटोऽयमि'त्येकाकारेण त्रितयावभासोपपत्तेः प्रमेयमात्रभानासिद्धेः। नच—एवम'हमि'ति केवलप्रमातृप्रतीतिर्न स्यात् ; त्रयाणामेकशृङ्खलाबद्धत्वात्, नहि प्रमाणमव्यापारयतः प्रमातृत्वमस्ति, नवा प्रमेयमविषयीकुर्वतः प्रमाणत्वम्, नापि तदविषयीभवतः प्रमेयत्वमिति—वाच्यम् ; 'अहमि'ति प्रतीतेरपि त्रितयविषयत्वस्येष्टत्वात्। नहि सुषुप्तावात्मनः प्रमाण-प्रमेयसंबन्धाभावे प्रमातृत्वमस्ति, नवा तदभावे'ऽहमि'ति प्रतीतिरस्ति। नच—स्मृत्यादिज्ञानकर्तर्यहमिति प्रतीतिर्न स्यात्, तत्र प्रमेयसंबन्धाभावादिति—वाच्यम् ; तत्रापि वासनादिरूपेण प्रमेयसत्त्वात् तत्संबन्धाभावासिद्धेः। अत एव विषयज्ञानाश्रयतयैवा'हमि'त्यात्मनो भानम्, न तद्विषयम'हमि'ति केषाञ्चिद् भ्रमः। सच निराकृत एव।

ननु—एवं तर्हि 'अहमि'ति 'घटोऽयमि'ति प्रतीत्योः को विशेषः? समानविषयत्वादिति—चेत्, *ननु* 'घटोऽयमि'ति 'घटे घटत्वमि'ति प्रतीत्योः समानविषयत्वाद्विशेषोऽभिधीयतां भवता !!! अथ समानविषयत्वेऽपि तयोर्विषयगतगुणप्रधानभाववैषम्यादस्ति विशेषः ;—एकत्र घटत्वस्य विशेषणतया भासनाद् अन्यत्र विशेष्यतयेति—चेत् *एवं तर्हि* प्रकृतेऽपि दीयतां दृष्टिः। यदा प्रमातुः प्राधान्यम्, इतरयोरुपसर्जनता, तदा 'अहमि'ति प्रतीतिः, यदा प्रमेयप्राधान्यम्, तदा-इदमिति, यदा तु प्रमाणप्राधान्यम्, तदा प्रमाणज्ञानमित्यस्ति विशेषः। अत एव 'घटमहं जानामि' 'घटोऽयमिति' च त्रितयविषयत्वाविशेषादेकमेव ज्ञानमित्याचक्षते वृद्धाः। अभिलापभेदस्तु प्रतिपित्साभेदादेव ; न ज्ञानभेदात्। यथा एकस्मिन्नेव चाक्षुषज्ञाने 'रूपवान् घटः' 'अयं घटः' इत्यभिलापभेद इत्युक्तमधस्तात्। अत एव सांख्याचार्या अपि—"इन्द्रियेण कृतं विषयालोचनमेव तद्द्वारा मनः प्राप्य तदेकतामापन्नं सद् विकल्पो भवति, तद्द्वारा चाहंकारं प्राप्य पूर्ववदभिमानः, पूर्ववदेव बुद्धिं प्राप्याध्यवसायः, आत्मानं प्राप्य च भोगः, इत्येक एव प्रत्ययः पञ्चभिः संबद्धः पञ्चधा व्यपदिश्यते"=इत्याहुः। ननु—एकस्यैव 'घटोऽयमि'त्यनुभवस्य प्रमात्रादित्रितयविषयत्वा-

नच प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति ।

भामती

असङ्गत्वादित्यर्थः । *आतश्चाध्यासाश्रयाणि प्रमाणानीत्याह—*नच प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति* ॥ प्रमायां खलु फले स्वतन्त्रः प्रमाता भवति । अन्तःकरणपरिणामभेदश्च प्रमेयप्रवणः कर्तृस्थश्चित्स्वभावः प्रमा। कथं च जडस्यान्तःकरणस्य परिणामश्चिद्रूपो भवेत्? यदि चिदात्मा तत्र नाध्यस्येत ; कथं चैष चिदात्मकर्तृको भवेत्? यद्यन्तःकरणं व्यापारवत् चिदात्मनि नाध्यस्येत । तस्मादितरेतराध्यासाच्चिदात्मकर्तृस्थं प्रमाफलं सिध्यति । तत्सिद्धौ च प्रमातृत्वम् । तामेव च प्रमामुररीकृत्य प्रमाणस्य प्रवृत्तिः । प्रमातृत्वेन च प्रमोपलक्ष्यते । प्रमायाः फलस्याभावे प्रमाणं न

ऋजुप्रकाशिका

भावात् प्रमाफलस्य चाध्यासं विनाऽयोगात् प्रमाफलानुरोधेनाप्यध्यासः समर्थ्यत इत्याह––*आतश्चेति* ॥ तदेतद्विशदयति––*प्रमायां खल्वित्यादिना*॥ प्रमास्वरूपं किम्? इति वीक्षायां प्रमास्वरूपमाह––*अन्तःकरणेत्यादिना—चित्स्वभावः प्रमेत्यन्तेन*॥ *ननु* भवत्वीदृशी प्रमा, तावता कथं प्रमानुरोधेनाध्याससमर्थनम्? इति वीक्षायां तदनुरोधेनैवाध्यासं समर्थयति––*कथं च जडस्येत्यादिना*––*तस्मादित्यतः प्राक्तनेन ग्रन्थेन* । *तत्र = अन्तःकरणे । *एषः = चित्प्रतिबिम्बग्राह्यन्तःकरणपरिणामभेदः । उपसंहरति––*तस्मादिति* ॥ *तत्सिद्धौ च* ॥ *प्रमामिति* ॥ फलीभूतामित्यर्थः । *ननु* फलीभूतप्रमामुररीकृत्य प्रमाणप्रवृत्तौ, भाष्ये 'नच प्रमामन्तरेण प्रमाणप्रवृत्तिरस्ती'ति वक्तव्ये *नच प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्तीति* कथमुक्तम्? इत्याशङ्क्य, भाष्यस्थप्रमातृत्वशब्देन प्रमैवोपलक्ष्यत इत्याह––*प्रमातृत्वेन चेति* ॥ प्रमातृत्वशब्देन चेत्यर्थः ।

वार्तिकम्

विशेषे किमिति घट एव तत्प्रतीतौ प्रमेयतया व्यवह्रियते, न प्रमात्रादिः? तत्र प्रमातृत्वादिव्यवहारे वा किमिति घटेऽपि न तद्व्यवहारः? इति—*चेत्,* न ; तद्विषयत्वाविशेषेऽपि तेषां प्रधानक्रियाकर्तृत्वरूपेणोपाधिभेदेन तद्व्यवहारासाङ्कर्यादित्यास्तामयं प्रसङ्गः । विस्तरस्तु वेदान्तमन्दाकिन्यामद्वैतामृतकन्दे चानुसन्धेयः। तस्मादस्मन्मत एवोक्तरीत्याऽऽत्मनः प्रमातृत्वमुपपद्यते, न देहेन्द्रियादिष्वहं-ममाध्यासमनङ्गीकुर्वतां परेषां मत इति सिद्धम् ॥

***ननु*—माऽस्तु तर्ह्यात्मनः प्रमातृत्वम्, तदन्तरेणापि बुध्यधिष्ठितानां करणानां प्रवृत्त्युपपत्तेरिति सांख्याभिमतपक्षमपक्षमाशङ्क्य निराकरोति––"*नच प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ती"ति*॥ आत्मन- इति शेषः । बुद्धेरचेतनायाश्चैतन्याध्यासमन्तरेण प्रमाणप्रवर्तकत्वानुपपत्तेः, तत्र चैतन्याध्यासाङ्गीकारे**

भाष्यभावप्रकाशिका

आत्मनोऽसङ्गस्य प्रमातृत्वम्, नेत्याह—*नचेति* ॥ आत्मन्याध्यासिकप्रमातृत्वाभावे सर्वव्यवहारहानिरित्यर्थः । एवं व्यतिरेकिणि व्यतिरेकासन्देहात् तस्यादोषत्वादर्थापत्तेरपि तेनाविरोधात् प्रमाणान्तरप्रश्ने

प्रदीपः

प्रवृत्त्यन्यथाऽनुपपत्त्याऽध्यासः कल्प्यते, किन्तु प्रमातुः प्रमातृत्वानुपपत्त्या प्रमेयस्य वा प्रमेयत्वानुपपत्त्याऽपि । अत एवोक्तम्—"सर्वे प्रमातृ-प्रमाण-प्रमेयव्यवहाराः" इति, इत्यभिप्रायेण प्रमातृत्वाध्यासमपेक्षत इत्याह—*नचैतस्मिन्सर्वस्मिन्नसतीति* ॥ *प्रमातृत्वम्* प्रमाश्रयत्वम् । कर्तृगामित्वात्फलस्य, कर्तृत्वस्य च करणव्यापारयितृत्वनिबन्धनत्वादिन्द्रियाद्यध्यासाभावे प्रमातृत्वमेव न संभवेत् । *ननु* माऽस्तु तर्हि प्रमातृत्वमात्मनः, इत्यत आह—*नच प्रमातृत्वमन्तरेणेति* ॥ तदेवं सर्वे प्रमातृ-प्रमाण-प्रमेयव्यवहारा एतमध्यासं पुरस्कृत्य प्रवृत्ताः" इति प्रतिज्ञातमेव फलितमित्याह—*तस्मादिति* ॥ अनेन प्रमाणानाम-

तस्माद्विद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च*॥

भामती

प्रवर्तेत ; तथाच प्रमाणमप्रमाणं स्यादित्यर्थः । उपसंहरति—*तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि* ॥

ऋजुप्रकाशिका

"उपलक्ष्यते" इत्यनन्तरं यत इति शेषः । प्रमाफलस्याभावेऽपि प्रमाणप्रवृत्तौ बाधकमाह—*तथाचेति* ॥ तथा सतीत्यर्थः । एवंचोक्तविधयाऽध्यासपूर्वकमेव प्रमाणप्रवृत्तेरध्यासस्य चाविद्यात्वादविद्यावद्विषयाणि प्रमाणानि शास्त्राणि चेत्युपसंहरतीत्याह—*तस्मादिति* ॥ शास्त्राणामप्यविद्यावद्विषयत्वमेवमेवेति द्रष्टव्यम् ।

पञ्चपादिका

सर्वसाधारणे नैसर्गिके दोषबुद्धिः । *तथाहि*—क्षुत्पिपासोपजनिते सन्तापे शश्वदनुवर्तमाने जाठराग्नि-

वार्तिकम्

च स्वातन्त्र्यादात्मन एव प्रमातृत्वम्, न बुद्धेः ; तत्तन्त्रत्वादित्याशयः । तदेवं पञ्चभिर्विकल्पैरर्थापत्ते-र्व्यतिरेकव्याप्त्यसिद्धिं परिहृत्य शङ्कितव्यभिचारपरिहारार्थमवसरं दातुमुपसंहरति—*तस्मादविद्या-वद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चे"ति* ॥ *तस्मात्*=प्रमातृत्वस्य देहेन्द्रियादिष्वहं-ममाभिमानपूर्वकत्वनियमादित्यर्थः । व्यतिरेकव्याप्तिसिद्धावर्थादन्वयेऽपि तत्सिद्धिः फलतीत्यभिप्रेत्या-न्वयेऽविद्यावद्विषयाण्येवेति नियमो दर्शितः ; विशेषणसङ्गतैवकारस्य तद्विरुद्धान्ययोगव्यवच्छेदार्थत्वात् । तद्यथा—"शङ्खः पाण्डर एवे"त्यत्र विशेषणीभूतपाण्डरत्वविरोधिपीतादिरूपयोगस्तद्विशेष्ये शङ्खे तत्सङ्ग-तैवकारेण व्यवच्छिद्यते, तद्वदविद्यावद्विषयत्वविशेषणविरोधियोगस्तद्विशेष्ये प्रत्यक्षादौ तत्सङ्गतैवकारेण व्यवच्छिद्यते । तथाच व्यतिरेकव्याप्तिरप्युपसंहृता भवति, इति नोपसंहारस्यार्थान्तरविषयत्वमिति ॥

संप्रति विवेकिव्यवहारस्याध्यासव्यभिचारित्वमिति षष्ठं पक्षं निरसितुम्—किं तस्य लौकिकव्यवहारेऽ-ध्यासानपेक्षा ? किं वा शास्त्रीयव्यवहारे ? इति विकल्प्य, तत्र प्रथमपक्षं निरसितुं पश्वादिव्यवहार-

भाष्यभावप्रकाशिका

समाहितेऽपि कथमाक्षेपसमाधिः ? तत्राह—*तस्मादिति* ॥ प्रमाणस्य सत्त्वादिति यावत् ॥ *अयं भावः*—मातुरेव मानाश्रयत्वेऽपि तस्याध्यस्तत्वात् तेषामविद्यावदाश्रयत्वम् । नच कारणदोषाद-प्रामाण्यम् ; सति प्रमाकारणे पश्चाद्भाविनो दोषस्यादोषत्वात्, अविद्यायास्तत्कारणनिविष्टत्वात्, "यत्र च दुष्टं कारणमि"ति चोक्तेरागन्तुकदोषविषयत्वात्, अध्यक्षादीनां च तात्त्विकप्रामाण्याभावस्येष्टत्वात्, व्यवहारे बाधाभावाद् व्यावहारिकप्रामाण्यसिद्धेरिति । नच तेषामतात्त्विके प्रामाण्ये तदन्तर्गत-श्रुतेरपि तथात्वान्नेष्टसिद्धिः ; श्रुत्यर्थस्य ब्रह्मणः "सत्यं ज्ञानमि"त्यादिना तात्त्विकत्वदृष्टेस्तस्यास्तात्त्विक-प्रामाण्यादिति ॥

प्रदीपः

विद्यावद्विषयत्वसमर्थनेनाविद्यावद्विषयत्वं प्रमाणत्वस्य साधकमेव, न बाधकमिति सूचनाद् द्वितीयाक्षेपोऽपि समाहितप्राय एव—यद् अविद्यावद्विषयाणि प्रत्यक्षादीनि कथं प्रमाणानीति ॥

ननु—प्रमाणानि, नाविद्यावत्पुरुषाश्रितानि, अविद्याविरुद्धविद्यावत्पुरुषाश्रितत्वात्, यद् यद्विरुद्धयद्वदाश्रितम्, तत् तद्वदनाश्रितम् ; यथा तमोविरुद्धप्रदीपवद्देशाश्रितः प्रकाशो न तमोवद्देशाश्रितः, इति कथं प्रमाणान्यविद्यावत्पुरुषा-श्रितानीति ? *न* ; व्यवहाराः, अध्यासमूलकाः, तदन्वय-व्यतिरेकानुविधायित्वादित्यनुमानेन सत्प्रतिपक्षितत्वात्, अथवा

पश्वादिभिश्चाविशेषात् ।

भामती

स्यादेतत्—भवतु पृथग्जनानामेवम्, आगमोपपत्तिप्रतिपन्नप्रत्यगात्मतत्त्वानां व्युत्पन्नानामपि पुंसां प्रमाण-प्रमेयव्यवहारा दृश्यन्ते, इति कथमविद्यावद्विषयाण्येव प्रमाणानि ? अत आह—*पश्वादिभिश्चाविशेषादिति* ॥ विदन्तु नामागमोपपत्तिभ्यां देहेन्द्रियादिभ्यो भिन्नं प्रत्यगात्मानम्, प्रमाण-

ऋजुप्रकाशिका

पुनरपि प्रमाणानामविद्यावद्विषयत्वाभावं शङ्कते—*स्यादेतदिति* ॥ *पृथग्जनानाम्* अज्ञानामित्यर्थः । *आगमोपपत्तिप्रतिपन्नप्रत्यगात्मतत्त्वानामिति*॥ अनेनाविद्याराहित्यं सूचितम् । अत एवाह—*कथमविद्यावद्विषयाण्येवेति* ॥ तेषां व्युत्पन्नत्वेऽपि तदीयप्रमाण-प्रमेयव्यवहारस्य पशु-शकुन्तादिव्यवहारसाधारण्येनाविद्यावद्विषयत्वमेवेत्याह---*अत आहेति* ॥ पश्वादितोऽविशेष उक्तः, तमेव विशदयति----*विदन्तु नामेत्यादिना* ॥ "प्रत्यगात्मानमि"त्यनन्तरम्----'तथा वेत्तारोऽपी'ति शेषः । "प्राणभृन्मात्रधर्मतां नातिवर्तन्ते" इत्युक्तम्, तदेव

पञ्चपादिका

कृतविकारेऽन्नपाननिष्यन्दे वा न रोगबुद्धिर्जनस्य, मुहूर्तमात्रपरिवर्तिनि मन्दे ज्वरे प्रतिश्याये वाऽल्पकफप्रसूतावपि रोगबुद्धिः ; अनैसर्गिकत्वात् । अनैसर्गिकं च दोषमभिप्रेत्योक्तम्—"यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः, स एवासमीचीनः प्रत्ययो नान्यः"इति ॥

इतश्चैतदेवम्—*पश्वादिभिश्चाविशेषात्* ॥ तथाच पश्वादयः प्रमातृत्वादिव्यवहारकाले प्रवृत्ति-

पञ्चपादिकाविवरणम्

साधारण इति* ॥ *ननु* भाष्यकारेण दोषमात्रमेव विषयतोऽपि ज्ञानमिथ्यात्वे हेतुरुक्त इति, नेत्याह—*अनैसर्गिकं च दोषमिति* ॥

ननु अविवेकिव्यवहारोऽध्यासमूलो भविष्यति, न विवेकिव्यवहार इति ; नेत्याह—*इतश्चैतदेवं पश्वादिभिश्चेति*॥ पश्वादिदृष्टान्तेऽध्यासमूलतां व्यवहारस्य दर्शयति—*तथाच पश्वादय इति* ॥ अध्या-

तत्त्वदीपनम्

प्रतिश्यायशब्देन नासिकाविवरनिस्सृतकफोत्थनीरबिन्दुरभिधीयते । आगन्तुकदोषस्य विषयमिथ्यात्वहेतुत्वम्, नेतरस्येत्येतत् शबरस्वामिवचनपराहतमिति चोदयति—*ननु भाष्येति* ॥ "यस्य च दुष्टं करणमि"त्यत्रेति शेषः । आगन्तुकदोषे दोषत्वप्रसिद्धेरितरत्र तदभावात्सामान्यवचनं विशेषविषयत्वेन निर्णीयत इत्यभिप्रायेणाह—*नेत्याहेति* ॥

प्रमाणादीनामविद्यावदाश्रयत्वेऽनुपपत्त्यभावात् प्रमाणादिव्यवहारस्याध्यासमूलत्वमुक्तम् । तत्र वक्तव्यम्—किमविवेकिव्यवहारस्याध्यासमूलत्वम् ? उतेतरस्य ? इति विकल्प्याद्ये सिद्धसाध्यतेत्याह—*नन्वविवेकीति* ॥ द्वितीयस्त्वनुपपन्न इत्याह—*न विवेकीति* ॥ अध्यासस्याविवेकपुरस्सरत्वाद्विवेकिनां च तदभावात् कथमध्यासपुरःसरत्वं व्यवहारस्येत्यर्थः । विवेकिशब्देन किं बुद्धिमत्त्वमात्रं विवक्षितम् ? उत शास्त्रीयविवेकवत्त्वम् ? इति विकल्प्याद्ये व्यवहारस्याध्यासमूलत्वं दुर्वारमित्याह—*नेत्याहेति* ॥ विवेकिनां व्यवहर्तृत्वादध्यासवत्त्वेन पश्वादिविशेषाभावमुक्तं विहाय पश्वादावध्यासप्रदर्शनमयुक्तमित्याशङ्क्याह—*पश्वादीति* ॥

वार्तिकम्

साम्येन तद्व्यवहारस्याध्यासपूर्वकत्वं साधयति—*पश्वादिभिश्चाविशेषादिति*॥ व्युत्पत्तिमतां

भाष्यभावप्रकाशिका

ननु अविवेकिव्यवहारस्याध्यासिकत्वेऽपि नाविद्यावद्विषयाण्येव प्रमाणानि ; विवेकिनामपि तद्व्यवहारात्, तत्राह—*पश्वादिभिश्चेति* ॥ चशब्दः शङ्काव्यावृत्त्यर्थः । यौक्तिकविवेकस्या-

भामती

प्रमेयव्यवहारे तु प्राणभृन्मात्रधर्मान्नातिवर्तन्ते । यादृशो हि पशु-शकुन्तादीनामविप्रतिपन्नमुग्धभावानां व्यवहारः, तादृशो व्युत्पन्नानामपि पुंसां दृश्यते । तेन तत्सामान्यात् तेषामपि व्यवहारसमयेऽविद्यावत्त्वमनुमेयम् । चशब्दः समुच्चये । उक्तशङ्कानिवर्तनसहितपूर्वोक्तोपपत्तिरविद्यावत्पुरुषविषयत्वं प्रमाणानां

ऋजुप्रकाशिका

विशदयति—*यादृशो हीति* ॥ *तत्सामान्यात्=पशु-शकुन्तादिव्यवहारवत्त्वात् । *तेषामपि=व्युत्पन्नानामपि । *अनुमेयमिति* । अत्रेत्थमनुमानम्---विमता व्युत्पन्नाः, अविद्यावन्तः, पशु-शकुन्तादिव्यवहारसमानव्यवहारवत्त्वात्, पामरवदिति । तथाच तान् प्रति प्रवृत्तानां प्रमाणादीनामविद्यावद्विषयत्वमेवेत्यर्थः । "पश्वादिभिश्चाविशेषात्" इत्यत्रत्यश्चशब्दः समुच्चयार्थ इत्याह—*चशब्द इति* ॥ समुच्चयमेवाह---*उक्तशङ्केति* ॥ निवर्तनेति छेदः । "पश्वादिभिश्चाविशेषात्" इत्युक्तं भाष्यकृता, तदेतद् भाष्यकार एव विशदयतीत्याह---

पञ्चपादिका

निवृत्त्यौदासीन्यं भजमानाः कार्य-कारणसंघात एवाहंमानं कुर्वन्तीति प्रसिद्धं लोके । तदेकरूपयोगक्षेमा हि मनुष्या जन्मत एव पश्वादिभ्योऽधिकतरविवेकमतयः शास्त्राधेयसाम्परायिकमतिसामर्थ्या अपि ; अतस्तदेकरूपकार्यदर्शनात् कार्य-कारणसंघातेऽप्यात्माभिमानः समानो युक्तः । *ननु* पश्वादी-

पञ्चपादिकाविवरणम्

सानुमाने हेतुभूतव्यवहारस्य विवेकिष्वपि पक्षधर्मतामाह—*तदेकरूपयोगक्षेमा इति* ॥ तत्र हेतुदर्शनाद् हेतुमन्तमध्यासमनुमिमीते—*अतस्तदेकरूपकार्यदर्शनादिति* ॥ पश्वादिदृष्टान्तेऽप्यध्याससद्भावे प्रमाणं चोदयति—*ननु पश्वादीनामिति* ॥ पदार्थद्वयदर्शने सति प्रत्यक्षानुमानागमैर्भेदाप्रतिपत्तावध्यासः परिशिष्यत

ऋजुविवरणम्

पश्वादिव्यवहारेऽध्यासपूर्वकत्वे किं प्रमाणमिति चोदिते, "प्रौढमतिभ्यः"इत्यनेन प्रौढमतिभ्यो ह्यात्मव्युत्पादनं दृश्यते, अतस्तेषां व्युत्पादनात् प्राग् यथाऽध्यासः ; तद्वदत्रापि, अथवा—प्रौढमतिभ्योऽपि व्युत्पादिते सत्येवात्मज्ञानम्, किमुत पश्वादीनाम् ? "पूर्वं ज्ञानं नास्तीति वक्तव्यत्" इत्युक्तम्, तदसंबद्धम् ; विवेकिष्वध्यासपुरःसरत्वं कथमिति तत्रैव चोदिते पश्वादिदृष्टान्तोपादानात्, पुनस्तत्रापि चोदिते प्रौढमतिष्वध्यासदर्शनेन पश्वादिष्वपि तत्साधन इतरेतराश्रयप्रसङ्गात्, इत्याशङ्क्याभिप्रायमाह—*प्रत्यक्षानुमानेति* ॥ स चासौ कालश्चेति तत्काल इति विग्रहः प्रतिभाति, तथा सति

तत्त्वदीपनम्

"तदेकरूपे"त्यत्र पश्वादीनां मनुष्याणां च साम्यमुच्यते । "अतस्ततदेकरूपे"त्यनेन पौनरुक्त्यं स्यात्, तदर्थमपुनरुक्तमर्थमाह—*अध्यासेति* ॥ विवेकिव्यवहारः, अध्यासनिबन्धनः, व्यवहारत्वात् ; पश्वादिव्यवहारवदित्युक्तम्, तदनुपपन्नम् ; तस्याप्रसिद्धत्वात् । तथाच साध्यविकलो दृष्टान्त इति चोदयति—*पश्वादीति*॥ शरीरादावहंकारानुबन्धो गौणत्वेनाप्युपपत्स्यत इत्यभिसन्धिः । दृष्टान्तेऽध्यास आक्षिप्ते तत्समर्थनं विहाय प्रौढमतीनां व्युत्पाद्यत्वं कस्मात् सिद्धान्तिनोक्तम् ? इत्याशङ्क्य तात्पर्यमाह—*पदार्थेति*॥ आत्मानात्मानौ पदार्थद्वयशब्दार्थः॥ "उच्यते" इत्यादेरयमर्थः—देहात्मनोर्भेदानधिगतावहं-ममाभिमानस्याध्यासत्वम् ; ज्ञातभेदयोरभेदाभिमानस्य गौणत्वादित्याशयेनोत्तरयति—

वार्तिकम्

व्यवहार इति शेषः । चोऽप्यर्थे भिन्नक्रमः । नहि व्युत्पत्तिमतामपि पुरुषाणां व्यवहारे कर्तव्ये

भाष्यभावप्रकाशिका

ध्यक्षभ्रान्त्यविरोधित्वात्, विरोधित्वेऽपि तदननुसन्धाने विवेकिनामपि व्यवहारे पश्वादिभिरविशेषाद् व्यवहारोऽप्याध्यासिक एवेत्यर्थः ॥ कथं व्यवहारकाले विवेकिनः पश्वादिव्यवहारमनुवर्तन्ते ? तत्राह—

प्रदीपः

विद्वद्व्यवहारे व्यभिचारात्, इत्याशङ्क्य समाधत्ते—*पश्वादिभिश्चाविशेषादिति* ॥ विदुषामिति शेषः । व्यवहर्तारो

पञ्चपादिका

नामपि कार्य-कारणसंघातेऽहङ्कारानुबन्ध इति कुतोऽवसीयते ? येन सिद्धवदभिधीयते, *उच्यते*— प्रौढमतिभ्य एव प्रत्यक्षादिवृत्तकुशलैरात्मा व्युत्पाद्यते ; अन्यथा तदनर्थकत्वप्रसङ्गात् । एवमेव प्रमाण-विचारविरहं सर्वः संप्रतिपद्येत ॥

ननु गोपालाङ्गनादयः प्रमाणविरहमेव वर्तमानदेहपातेऽपि स्थायिनं भोक्तारं मन्यमानास्तदर्थ-माचरन्ति *न* ; तदभिज्ञव्यवहारमात्रप्रमाणकत्वात् । तथाच ते पृष्टाः—कः परलोकसम्बन्धी ? इति, 'न

पञ्चपादिकाविवरणम्

इत्याह—*प्रौढमतिभ्य इति* ॥ स्वाभाविकप्रत्यक्षेण विवेकदर्शने दोषमाह—*एवमेवेति* ॥ *ननु* अनुमानागमविचारहीनानामप्यदृष्टार्थे व्यवहारदर्शनात् प्रत्यक्षेणैव विवेको गृह्यत इति चोदयति—*ननु गोपालाङ्गनादय इति* ॥ न प्रत्यक्षेण विवेकग्रहः, किन्त्वाप्तवचनादित्याह—*न तदभिज्ञव्यवहारेति* ॥ प्रत्यक्षश्चेद्विवेकः, विशेषतः प्रत्यगात्मानं प्रतिपद्येरन्नित्याह—*तथाच ते पृष्टा इति* ॥ अतो निगमनवाक्य-

तत्त्वदीपनम्

उच्यत इति ॥ कथं भेदानधिगतिरिति चेत् ? तत्र वक्तव्यम्—किमनुमानाद् व्यतिरेकसिद्धिः ? उतागमात् ? अथवा प्रत्यक्षात् ? इति विकल्प्य कल्पद्वयं दूषयति—*प्रौढमतिभ्य इति*॥ व्युत्पादनयोग्येभ्य इत्यर्थः । पश्वादीनामुपदेष्टृत्वनिरा-करणार्थं प्रत्यक्षादीति विशेषणम् । पश्वादीनामप्रौढमतित्वादुपदेष्टृभावाच्च न व्युत्पाद्यत्वमित्यर्थः । तृतीयं कल्पं शङ्कते—*अन्यथेति* ॥ व्युत्पाद्यत्वं विनाऽप्यधिगतावित्यर्थः । प्रत्यक्षाद्विवेकसिद्धिं ब्रुवाणं प्रत्युपदेशानर्थक्यप्रसञ्जनं नानिष्टमित्याशङ्कायाम्—"एवमेवे"त्याद्युक्तमनुपपन्नम्, युक्तिसहकृतप्रत्यक्षस्याभेदबोधकत्वात्, सर्वेषां च तदभावादित्या-शङ्क्याह—*स्वाभाविकेति* ॥ *एवमेवेति* ॥ पश्वादिवदित्यर्थः । सर्वेषां प्रत्यक्षेणात्मप्रतिपत्त्यभावेऽपि केषां चित्तदस्तीत्युक्तम्—"ननु गोपाले"त्यत्र, तदनुपपन्नम् ; तत्र प्रमाणाभावादित्याशङ्क्य तात्पर्यमाह—*नन्विति* ॥ अदृष्टोद्देशेन देव-भूदेवसमाराधनसंदर्शनाद् देहस्य चात्र भस्मीभावोपलम्भात् कालान्तरीयफलभोक्त्रधिगतिस्तेषां निश्चीयते ; आगमाद्यप्रवीणत्वाच्च प्रत्यक्षाद्विवेकाधिगतिरित्यर्थः ॥

"व्यवहारबलाद्भेदः प्रत्यक्ष" इत्युक्ते तदभिज्ञव्यवहारमात्रं व्यतिरेकस्य प्रत्यक्षत्वे प्रमाणमिति सिद्धान्तिनोक्तमिति प्रतिभाति, तन्न संभवति ; अनिष्टापादनाभावादित्याशङ्क्य टीकार्थं स्पष्टयति—*न प्रत्यक्षेणेति* ॥ देहव्यति-रिक्तात्मज्ञानवानाप्तः, तदभिवदनादिरप्यात्मनि प्रमाणमिति टीकार्थः । उक्तेऽर्थे विनिगमनमुक्तम्—"तथाचे"त्यत्र, तदनुपपन्नम् ; व्यतिरिक्तात्मविशेषप्रतिपत्तेरित्याशङ्क्याह—*प्रत्यक्ष इति* ॥ *विशेषत इति* । असंसार्यादि-रूपेणेत्यर्थः । "प्रत्यक्षादिव्यवहारः" इति भाष्ये हेतूपसंहरणं प्रतिभाति, न हेतुमतः, तत्र कोऽभिप्रायः ? इत्याशङ्क्य हेतुमतोऽप्युपसंहरणमस्तीत्याह—*अत इति* ॥ स चासौ कालश्चेति कर्मधारयसमासः ? उत तस्य कालस्तत्काल इति षष्ठीसमासः ? नाद्यः ; व्यवहारस्य कालत्वाभावात्, न द्वितीयः ; किं तच्छब्देन व्यवहारः परामृश्यते ?

वार्तिकम्

पश्वादिभिः कश्चन विशेषोऽस्ति ; तद्व्यवहारस्याविवेकपूर्वककर्तृकत्वेन पशु-पक्षि-सरीसृपादिव्यवहार-साम्यादित्यर्थः । *यद्वा*—नहि पश्वादिभिः क्रियमाणो यो व्यवहारः, ततो व्युत्पत्तिमतामपि व्यवहारे

प्रदीपः

विद्वांसोऽपि पश्वादिवदविद्यावन्त एवेति न व्यभिचारः, नवा सत्प्रतिपक्षानुमानावकाश इति भावः । अनेन चैदमेव सूच्यते—यद् अपरोक्षज्ञानमेवाध्यासविरोधि, न परोक्षज्ञानमिति । आगमादिप्रतिपन्नप्रत्यगात्मतत्त्वव्यवहर्तारश्च पुरुषा नापरोक्षज्ञानिनः, इति सत्प्रतिपक्षानुमानमसिद्धमेव । अत्रायमनुमानप्रयोगो विवक्षितः—विपश्चितः, अविद्यावन्तः, व्यवहर्तृत्वात् ; पश्वादिवदिति । दृष्टान्ते हेतु-साध्यसमन्वयप्रदर्शनार्थमुदाहरणवाक्यं निर्दिशति—*यथाहीति* ॥ पश्वादयः प्रत्यक्षव्यवहारवन्तोऽध्यासवन्तश्चेति सूचनार्थम्—"शब्दादिभिः श्रोत्रादीनां सम्बन्धे सती"त्यादि "प्रवर्तते" इत्यन्तम् । प्रतिकूले जाते निवर्तन्तेऽनुकूले जाते प्रवर्तन्त

यथाहि पश्वादयः शब्दादिभिः श्रोत्रा(१)दीनां संबन्धे सति, शब्दादिविज्ञाने प्रतिकूले ज्ञाते ततो निवर्तन्ते, अनुकूले (२)च प्रवर्तन्ते ; यथा—

भामती

साधयतीत्यर्थः । एतदेव विभजते—*यथा हि पश्वादय इति* ॥ अत्रच *शब्दादिभिः श्रोत्रादीनां संबन्धे सति* इति प्रत्यक्षं प्रमाणं दर्शितम् । *शब्दादिविज्ञाने* इति तत्फलमुक्तम् ।

ऋजुप्रकाशिका

एतदेवेति ॥ अतः समानः पश्वादिभिः पुरुषाणां प्रमाण-प्रमेयव्यवहारः* इत्यग्रे भाष्य उपसंहारात् तदनुरोधेन "पश्वादिभिश्चाविशेषात्" इति भाष्यानन्तरं पश्वादिभिः पुरुषाणां प्रमाणादिव्यवहारसाम्यमुपपादनीयम् । अत्र पश्वादीनां किं प्रमाणमुपन्यस्तम् ? इति वीक्षायामाह----*अत्र शब्दादिभिः श्रोत्रादीनामिति* ॥ प्रत्यक्षप्रमाणं दर्शितमित्यभिधाय, तत्फलमपि दर्शितमित्याह----*शब्दादिविज्ञान इतीति* ॥ एवमनुमानफलमपि दर्शितमित्याह----*प्रतिकूल इतीति* ॥ अनुमानफलप्रदर्शनेनानुमानप्रमाणमपि दर्शितप्रायम् । तदेतदुपपादयति---*तथाहीति* ॥ शब्दादिस्वरूपमुपलभ्येत्यतः प्राक् पश्वादय इति शेषः । *तज्जातीयस्येति* ॥ उपलभ्यमानशब्दसजातीयस्येत्यर्थः । *प्रतिकूलतामनुस्मृत्येति* ॥ पूर्वानुभूतां प्रतिकूलतामनुस्मृत्येत्यर्थः । *अनुमिमत इति* ॥ अयमुपलभ्यमानः शब्दः, प्रतिकूलः, प्रतिकूलतया पूर्वानुभूतो यः शब्दस्तत्सजातीयत्वादित्यनुमिमत इत्यर्थः । ततस्ततो निवर्तन्त इति भावः । *भाष्ये*----अनुकूले च प्रवर्तन्त इति* ॥

वार्तिकम्

कश्चन विशेषोऽस्ति ; अविवेकपूर्वकत्वसाम्यादित्यर्थः । *यद्वा*—पश्वादिभिर्व्यवहर्तृभिर्व्युत्पत्तिमतामपि व्यवहर्तॄणामविशेषादित्युक्तेऽर्थाद्विवक्षिताविवेकेन च तद्व्यवहारसाम्यं प्रतिपादितं भवति । एतस्य संग्रहवाक्यत्वात् । एवंच सत्युत्तरग्रन्थोऽपि समञ्जसो भवतीति । एतदेव संग्रहवाक्यं विभजते—' यथाही''त्यादिना—"समान इति निश्चीयते"* इत्यन्तेन ॥ तत्र दृष्टान्तं विभजते—*"यथाहि पश्वादयः शब्दादिभिः श्रोत्रेन्द्रियादीनां सम्बन्धे सति, शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते, अनुकूले च जाते प्रवर्तन्ते"इति* ॥ हिशब्दो लोकप्रसिद्धिद्योतनार्थः । "शब्दादिभिरि"त्यादिशब्देन स्पर्शादेर्ग्रहणम् । श्रोत्रेन्द्रियादीनामिति त्वगादेः । *ततः = देशाद्विषयाच्चेत्यर्थः । शब्दादिज्ञानस्यैवानुकूलत्वं प्रतिकूलत्वं च वदता न शब्दादेः स्वतोऽनुकूलत्वं प्रतिकूलत्वं वाऽस्ति, किन्त्वध्यासकृतमेवेति ध्वनितं भवति । कुतः ? कश्चित्प्रत्यनुकूलस्यापि शब्दादेस्तस्यैवान्यं प्रति प्रतिकूलत्वदर्शनात् , वस्तुनोऽनेकस्वाभाव्यानुपपत्तेः, उपपत्तौ वा सर्वान् प्रत्यविशेषेण तत्स्वाभाव्यापत्तेः । नचैकं प्रत्यपि तस्यैकस्वाभाव्यमस्ति ; देश-कालभेदेनैकं प्रत्यप्येकस्य नानास्वाभाव्यदर्शनात् , तस्य चैकत्वस्य परमार्थतो विरोधादविद्यात्मकत्वमन्तरेणानुपपत्तेरिति ॥ तत्र 'शब्दादिभिः श्रोत्रेन्द्रियादीनां सम्बन्धे सति, शब्दादिविज्ञाने प्रतिकूले जातेऽनुकूले च जाते" इत्यनेन

भाष्यभावप्रकाशिका

यथाहीति ॥ संगृहीतोऽर्थो यथा व्यज्यते, तथोच्यत इति यावत् । आदिशब्देन शकुन्तादिरुक्तः । अत्र च "शब्दादिभिः श्रोत्रादीनां सम्बन्धे सती"ति अर्थेन्द्रियसन्निकर्षात्मकमध्यक्षमुक्तम् , "शब्दादिविज्ञाने" इति तत्फलम्, "प्रतिकूलेऽनुकूले" इत्यनुमानम् । ते हि शब्दाद्युपलभ्य तज्जातीयस्य प्रातिकूल्यमानुकूल्यं वाऽनुस्मृत्य, अस्यापि तज्जातीयत्वात् तथात्वमनुमिन्वन्ति ; तत्र प्रतिकूलत्वानुमानफलं निवृत्तिः, अनुकूलत्वानुमानस्य तु प्रवृत्तिरिति विवेकः ॥ उक्तमर्थमुदाहरति—*यथेति* ॥

(१) श्रोत्रेन्द्रियादीनामिति । (२) अनुकूले च जाते इति च वार्तिकाभिमतः पाठः ।

दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुपलभ्य तं प्रत्यभिमुखीभवन्ति ; एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान् बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान् प्रति प्रवर्तन्ते !!! अतः समानः पश्वादिभिः पुरुषाणां प्रमाण-प्रमेयव्यवहारः ।

भामती

प्रतिकूले इति चानुमानफलम् । तथाहि—शब्दादिस्वरूपमुपलभ्य, तज्जातीयस्य प्रतिकूलतामनुस्मृत्य तज्जातीयतयोपलभ्यमानस्य प्रतिकूलतामनुमिमत इति । उदाहरति—*यथा दण्डेति* ॥ शेषमतिरोहितार्थम् ।

ऋजुप्रकाशिका

अभिमुखमागतेन पुंसा प्रयुक्त उपलभ्यमानोऽयं शब्दः, अनुकूलः, अनुकूलतया पूर्वानुभूतो यः शब्दः, तत्सजातीयत्वादित्यनुमाय तदभिमुखं प्रवर्तन्त इत्यर्थः । भाष्ये----"दण्डोद्यतकरम्" ॥ क्रूरमाक्रोशन्तमिति शेषः । *हरिततृणेत्यतः* प्राग् अनुनयशब्दवन्तमिति शेषः । एवं पश्वादिनिवृत्तिलक्षणं व्यवहारमुपपाद्य, तत्साम्यं पुरुषव्यवहारस्यापि दर्शयति----भाष्ये--*एवं पुरुषा अपीत्यादिना* ॥ *भाष्ये----तद्विपरीतानिति* ॥ ललितदृष्टीननुनयवतो हिरण्योद्यतकरानित्यर्थः । भाष्ये----*अतः* इत्युपसंहारः । *ननु* पश्वादीनां प्रत्यक्षादि-

वार्तिकम्

ग्रन्थेन पश्वादीनां प्रमाण-प्रमेयव्यवहारः प्रदर्शितः । "ततो निवर्तन्ते प्रवर्तन्ते" इत्यनेन तल्लिङ्गतया तज्जन्यप्रवृत्ति-निवृत्ती प्रदर्शिते इति मन्तव्यम् । एवं सामान्यतोऽनुकूल-प्रतिकूलविज्ञानविषये प्रमाण-प्रमेयव्यवहारमूलकप्रवृत्ति-निवृत्ती अभिधाय, तद्विशेषविषये ते उदाहरति—*"यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य मां हन्तुमयमिच्छतीति पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुपलभ्य तं प्रति पुनरभिमुखीभवन्तीति* । पश्वादय इत्यनुषङ्गः । "मां हन्तुमयमिच्छती"त्यादिना देहे तेषामात्माभिमानो दर्शितः । *हरिततृणम्*=बालघासः, तेन पूर्णः पाणिर्यस्य सः, हरिततृणपूर्णपाणिः ; तमित्यर्थः । एवं पश्वादीनां प्रवृत्ति-निवृत्तिलिङ्गकं प्रमाण-प्रमेयव्यवहारं लोकसिद्धमभिधाय, व्युत्पन्नचित्तानां प्रवृत्ति-निवृत्तिलिङ्गके तद्व्यवहारे तत्समानतां लोकसिद्धामाह—*"एवं पुरुषाः,अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान् बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान् प्रति प्रवर्तन्ते" इति* ॥ यथा पश्वादयः प्रवर्तन्ते निवर्तन्ते च स्वानुकूले प्रतिकूलविषयाच्च ; एवं पुरुषा अपीति योजना । एवंशब्दपरामृष्टं तद्व्यवहारसाम्यं

भाष्यभावप्रकाशिका

पुरुषविशेषं दृष्ट्वा तज्जातीयस्य हन्तृत्वमनुस्मृत्य, अस्यापि तज्जातीयत्वात् तदनुमाय निवृत्तिः, एवं तज्जातीयस्योपकर्तृत्वमनुस्मृत्य तज्जातीयत्वात्तदनुमाय तदाभिमुख्यमित्याह—*दण्डेति ।हरितेति च* ॥ दार्ष्टान्तिकं वदन् व्यवहारलिङ्गेनाध्यासमनुमातुं तस्य पक्षधर्मतामाह—*एवमिति*॥ पित्रादित्रितयशिक्षाजन्यपदवाक्याभिज्ञता—*व्युत्पन्नचित्तता* ॥ क्रूरदृष्ट्यादिविशिष्टान् पुरुषान् दृष्ट्वा तद्विधानां प्रातिकूल्यं स्मृत्वा, तथात्वेनैषामपि तदनुमाय, पश्वादिवद्विवेकिनोऽपि तेभ्यो विमुखीभवन्ति, तेभ्यो विपरीतान् प्रसन्नदृष्टित्वादिविशिष्टान् पुरुषविशेषानालक्ष्य, तादृशानामानुकूल्यं स्मृत्वा तथात्वादेषामपि तदनुमाय तेष्वभिमुखीभवन्तीत्यर्थः । पक्षधर्मतां निगमयति—*अतइति* ॥ अनुभवार्थोऽतश्शब्दः । *ननु*

पश्वादीनां च प्रसिद्धोऽविवेकपूर्वकः(१) प्रत्यक्षादिव्यवहारः, तत्सामा(२)न्यदर्शनाद् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयते ।

भामती

स्यादेतत्—भवन्तु प्रत्यक्षादीन्यविद्यावद्विषयाणि, शास्त्रं तु 'जोतिष्टोमेन स्वर्गकामो

ऋजुप्रकाशिका

व्यवहारस्याविद्यावद्विषयत्वे सिद्धे खलु, तत्साम्याद् व्युत्पन्नपुरुषप्रत्यक्षादिप्रमाणव्यवहारस्यापि तथात्वं सिध्येत्, तदेव कुतः ? इति पुनः स्पष्टीकरणार्थमाशङ्कायामाह----भाष्ये-----पश्वादीनां चेति* ॥ *भाष्ये---अविवेकपूर्वक इति छेदः । प्रमाणानामविद्यावद्विषयत्वमङ्गीकृत्य शास्त्रस्याविद्यावद्विषयत्वाभावमाशङ्कते----*स्यादेतदित्या-

पञ्चपादिका

विद्वो विशेषतः, प्रसिद्धो लोके' इति प्रतिब्रुवन्ति । तस्माद् युक्तमुक्तम्—पश्वादीनां च प्रसिद्धोऽविवेकपूर्वकः प्रत्यक्षादिव्यवहारः, तत्सामान्यदर्शनाद् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति* ॥

पञ्चपादिकाविवरणम्

मुपपन्नमित्याह--*तस्माद्युक्तमुक्तमिति* ॥ तस्य व्यवहारस्य काल एव कालो यस्याध्यासस्य, सोऽध्यासस्तत्कालः, स च पश्वादिभिर्विवेकिनामपि समान इति ॥

ऋजुविवरणम्

"व्यवहारः"इत्यनेन सामानाधिकरण्यं न स्यात्, नच तस्य व्यवहारस्येति विवक्षितम्, नापि तस्याध्यासस्य काल इति ; अनन्वयात्, नापि तस्याध्यासस्य काल एव कालो यस्येति व्यवहारपरत्वम् ; असाध्यनिगमनप्रसङ्गात्, इति, मध्यमपदलोपिसमासान्तरं दर्शयति—*तस्य व्यवहारस्येति* ॥ "न तेनानध्यस्तात्मभावेनासङ्गस्ये"त्यनेन गतभाष्य-

तत्त्वदीपनम्

उताध्यासः ? नाद्यः ; व्यवहारस्य कालत्वाभावात् ; अत एव न द्वितीयोऽपि संगच्छत इत्याशङ्क्याह—*तस्येति* ॥ मध्यमपदलोप्ययं समास इत्यर्थः । नचाध्यासस्य व्यापकत्वाद् व्यवहारस्य च व्याप्यत्वादध्यासस्य काल एव कालो

वार्तिकम्

स्पष्टीकृत्य दर्शयति—*"क्रूरदृष्टीनि"त्यादिना* । बहूनामपि पश्वादीनामेकं पुरुषं दण्डोद्यतकरं दृष्ट्वा पलायनं दृष्टम्, इति दृष्टान्त एकवचनेन तदुपन्यासः कृतः,न तथा बहूनां व्युत्पन्नमतीनां पुरुषाणामेकं पुरुषं तादृशं दृष्ट्वा पलायनं दृष्टमिति, दार्ष्टान्तिके क्रूरदृष्टीनिति बहूनां ग्रहणं कृतमिति द्रष्टव्यम् । स्वभावतोऽपि केचन क्रूरदृष्टयो भवन्ति, नच तान्दृष्ट्वा पलायनं संभवतीत्यत उक्तम्—*आक्रोशतः इति* ॥ छिन्धि, भिन्धि, जहि,

भाष्यभावप्रकाशिका

'अस्माकं प्रवृत्तिरध्यासादि'ति न पश्वादयो भणन्ति, नापि परेषामेतत् प्रत्यक्षम् ; अतो दृष्टान्तस्य साध्यवैकल्यम्, तत्राह—*पश्वादीनां चेति* ॥ अधिष्ठानारोप्यज्ञाने सति, अध्यक्षानुमानागमैश्च सामानाधिकरण्यविरोधिविवेकाभावादध्यासवत्त्वं तेषां कल्प्यते, विनाऽपि मानैर्विवेके तदानर्थक्यम्, ततो विना विवेकं पश्वादिषु व्यवहारदृष्टेस्तन्मूलाध्याससिद्धिरित्यर्थः । संप्रत्यनुमानमाह—*तत्सामा-

प्रदीपः

इति योजना । अनेन च दृष्टान्ते हेतुसमन्वयः साधितः । "यश्चे"त्यादिना चानुमानिकव्यवहारवत्त्वं बोध्यते । "एवं पुरुषाः" इत्यनेन हेतोः पक्षधर्मत्वमुच्यते । दृष्टान्त-पक्षोभयसाधारण्यं हेतोरुपसंहरति—*अतः पश्वादिभिरिति* ॥ पक्षधर्मता-

(१) अविवेकपुरस्सर इति वार्तिकाद्यभिमतः पाठः । (२) तत्साम्यदर्शनादिति वार्तिकाभिमतः पाठः ।

भामती

यजेत' इत्यादि न देहात्माध्यासेन प्रवर्तितुमर्हति; अत्र खल्वामुष्मिकफलोपभोगयोग्योऽधिकारी प्रतीयते। *तथाच पारमर्षं सूत्रम्—"शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात् स्वयं प्रयोगे

ऋजुप्रकाशिका

दिना* ॥ कथं न प्रवर्तितुमर्हति? इत्यत आह—*अत्र खल्विति* ॥ *शास्त्रफलम्=स्वर्गादि स्वभोक्तरि कर्तरि यत्र विद्यते, स एव खल्वामुष्मिकफलोपभोगयोग्यः ॥ *अत्र="ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादिशास्त्रेऽधिकारी प्रतीयत इत्यर्थः। आमुष्मिकस्वर्गादिफलयोग्योऽधिकारी, फलं च तन्निष्ठमित्यत्र पारमर्षं सूत्रं प्रमाणयति—*तथाच पारमर्षं सूत्रम्—शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वादितीति* ॥ शेषलक्षणे स्थितम्—शास्त्रफलं प्रयोक्तरि; तल्लक्षणत्वात् तस्मात् स्वयं प्रयोगे स्यात्। अत्र—"दर्श-पूर्णमासाभ्यां स्वर्गकामो यजेत" इति श्रूयते। तत्र संशयः—किं साङ्गे प्रधाने यजमानः कर्ता? उत उद्देशत्यागात्मकप्रधान एव यजमानः कर्ता, अङ्गेषु यथायोग्यमृत्विजां कर्तृत्वमिति? एवं संशये स्थिते—तत्रेदं पूर्वपक्षसूत्रम् ॥ साङ्गप्रधानस्य प्रयोगेऽनुष्ठाने स्वयं यजमानः कर्ता स्यात्; साङ्गप्रधानकर्मप्रयोक्तृत्वात्, साङ्गे प्रधाने यजमानः कर्ता। अत्र हेत्वन्तरम्। किं तद्धेत्वन्तरमिति चेत्, उच्यते—यतः शास्त्रफलं प्रयोक्तरि प्रतीयते, ततो हेतोः। तद्वा कुतः? इति चेत्, तल्लक्षणत्वात्; "शास्त्रफलं प्रयोक्तरी"त्यस्यार्थस्य शास्त्रप्रमाणकत्वात्। कुतस्तस्यार्थस्य शास्त्रप्रमाणकत्वमिति चेत्, उच्यते—"स्वर्गकामो यजेत" इति हि शास्त्रम्। तत्र स्वर्गोद्देशेन यागभावनां विदधदाख्यातं भावनाऽऽक्षिप्तकर्तृसंबद्धं फलमवगमयति। फले कर्तृगामिनि सति आत्मनेपदप्रवृत्तेः, आत्मनेपदेन च फलस्य कर्तृगामिता प्रतीयते। अतः प्रयोक्तरि शास्त्रात् फलमिति। एतच्चात्र सप्रमाणकमेव। अस्त्वेवम्, तथाऽपि साङ्गे प्रधाने यजमानः कर्तेति कथमिति पुनः शङ्का चेत्, उच्यते;—साङ्गमेव प्रधानं प्रयोक्तृगतफलसाधनम्, प्रयोक्ता च यजमान एव, इति साङ्गे प्रधाने यजमानः कर्तेति पूर्वपक्षे प्राप्ते, राद्धान्तः;—

वार्तिकम्

इत्येवमुच्चैः शब्दान् कुर्वत इत्यर्थः। तथाच तल्लिङ्गान्निश्चीयते—नैते स्वभावतः क्रूरदृष्टयः, किन्तर्हि? अस्मदादिहननाकाङ्क्षयेति। आक्रोशनमपि परिहासादिना कदाचित् संभवति, तद्वारणार्थम्—*क्रूरदृष्टीनित्युक्तम्* ॥ तथापि शस्त्ररहितत्वान्निष्प्रयोजका एव स्युरिति, नेत्याह—*खड्गोद्यतकरानिति* ॥ तथाऽप्यबलत्वान्निष्प्रयोजकाः स्युरिति, नेत्याह—*बलवत इति* ॥ *तद्विपरीतान् प्रति*=अक्रूरदृष्ट्यादीन् प्रतीत्यर्थः। सर्वलोकप्रत्यक्षेण व्यवहारसाम्यमुपपाद्योपसंहरति—*"अतः समानः पश्वादिभिः पुरुषाणां प्रमाण-प्रमेयव्यवहार इति* ॥ तथाच प्रयोगः—विवादाध्यासितः प्रमाण-प्रमेयव्यवहारः, देहेन्द्रियादिष्वहं-ममाध्यासपुरःसरः, प्रमाण-प्रमेयव्यवहारत्वात्, पश्वादिव्यवहारजातीयत्वाद्वा; पश्वादिव्यवहारवत्। षष्ठाद्याधिकरणपूर्वपक्षन्यायेन दृष्टान्ते साध्यवैकल्यमाशङ्क्याह—*"पश्वादीनाञ्च प्रसिद्धोऽविवेकपुरःसरः प्रत्यक्षादिव्यवहार इति* ॥ अविवेकोऽत्र देहेन्द्रियादिष्वहं-ममाभिमानः कथ्यते; अविवेकहेतुत्वात्। नहि पश्वादीनां देहेन्द्रियादिभ्य आत्मविवेके किञ्चित्प्रमाणमस्ति, येन तेषामुक्ताध्यासमन्तरेणैव प्रमाण-प्रमेयादिव्यवहारः स्यात्। न तावत् प्रत्यक्षेण तेषां देहादिविविक्तात्मग्रहणम्; प्रत्यक्षस्य तदसामर्थ्यात्, सामर्थ्ये वाऽस्मदादीनामपि तथात्वप्रसङ्गेन शास्त्रवैयर्थ्यापत्तेः। नाप्यनुमानेन; तेषां दृष्टमात्रव्यवहारित्वेन तद्विषये तदवतारानुपपत्तेः ॥ शास्त्रोपदेशस्तु तेषां नास्त्येव; तद्ग्रहणादिसामर्थ्याभावात्। षष्ठाद्यपूर्वपक्षन्यायस्तु तत्रैव निराकृतः। अतः पश्वादीनां प्रत्यक्षादिव्यवहारस्याध्यासपूर्वकत्वप्रसिद्धेर्न साध्यविकलो दृष्टान्त इत्याशयः। तदेवं दृष्टान्तस्य साध्यवैकल्यं परिहृत्य बाध-

भामती

स्यात्" । नच देहादि भस्मीभूतं पारलौकिकाय फलाय कल्पते, इति देहाद्यतिरिक्तं कञ्चिदधिकारिणमाक्षिपति शास्त्रम् । तदवगतिश्च विद्या, इति कथमविद्यावद्विषयं शास्त्रम् ? इत्या-

ऋजुप्रकाशिका

अन्यो वा स्यात् परिक्रयाम्नानादिप्रतिषेधात् ॥ यदि यजमान एव साङ्गे प्रधाने कर्ता स्यात्, तर्हि ऋत्विजां दक्षिणाभिः परिक्रयणमनर्थकं स्यात् । नच—दक्षिणाभिः परिक्रयणं स्वविषयम्, न ऋत्विग्विषय-मिति—वाच्यम् ; स्वस्मिन् परिक्रयस्य विप्रतिषिद्धत्वात् । अत आध्वर्यवादिकं ऋत्विग्भिरेव कार्यम् । अत ऋत्विज एव कर्तारः । *ननु*—तर्हि ऋत्विजां कर्तृत्वप्राप्तौ ऋत्विज एव फलभागिनः स्युरिति—चेत्, *न* ; परिक्रयद्वारा यजमानस्यैव प्रयोजककर्तृत्वाद् यजमान एव साङ्गप्रधानफलभागित्यविरोधात् । अत्र पूर्वपक्ष-सिद्धान्तयोः कर्तृगामिनि फले न विवादः, इति पूर्वपक्षसूत्रमपि प्रयोजककर्तृत्वांशे प्रमाणं चेदपि न विरोध इति । *शास्त्रफलम्=स्वर्गादि ॥ देहाध्यासापन्नस्यैव पारलौकिकफलोपभोगयोग्यत्वमाशङ्क्याह—*नच देहादि भस्मीभूतमिति* ॥ *तदवगतिः=देहादिव्यतिरिक्तात्मावगतिः । "स्वर्गकामो यजेत" इत्याद्यधिकार-

वार्तिकम्

सत्प्रतिपक्षशङ्कानिरासाय सहेतुकं साध्यं पक्षे निगमयति—*तत्साम्यदर्शनाद् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयत इति* ॥ तथाचोक्तमभियुक्तेन—"हेत्वपदेशात्साध्यस्य पुनर्वचनं निगमनमि"ति ॥ "तदि"ति पश्वादिव्यवहारपरामर्शः । 'तत्साम्यादि'ति वक्तव्ये तत्साम्यदर्शना-दिति वदन् ज्ञायमानं लिङ्गं लिङ्गज्ञानं वा हेतुरिति दर्शयति । अत एव धूमादिति हेतुवचनं विषये विषयिणमुपलक्ष्य व्याकुर्वन्ति तद्व्याख्यातारः । तत्साम्यं तु तदेकजातीयत्वम् । एकजातीयत्वन्तु समानविषयत्वात्, समानविषयकप्रवृत्ति-निवृत्तिजनकव्यवहारत्वाद्वेति ध्येयम् । *समान इति* ॥ अध्यास-पूर्वक इत्यर्थः । तेन न हेतोः साध्याभेद इति द्रष्टव्यम् । तथाऽपि भागासिद्धो हेतुः ; "अहं ब्रह्मास्मि" "अहमेको न मे कश्चिदि"त्यादिजीवन्मुक्तव्यवहारे पश्वादिव्यवहारसाम्याभावात्, तस्य शुद्धात्मविषयत्वात्, पश्वादेश्च तद्विषयव्यवहाराभावादित्याशङ्क्य तं विशिनष्टि—*तत्काल इति* ॥ 'तदि'ति देहेन्द्रियादिष्वहं-ममाभिमानकालः परामृश्यते । तेन देहेन्द्रियादिष्वहं-ममाभिमानकाल एव कालो यस्य व्यवहारस्य, स तत्कालः । तथाचाध्यासकालीनव्यवहारस्य पक्षीकरणाद् न भागासिद्धो हेतुरित्यभिप्रायः । नच—एवं कालविशेषणतया साध्यस्य पक्षतावच्छेदकेऽत्र लाभादन्योन्याश्रयः—पक्षसिद्धौ साध्यसिद्धिः, साध्यसिद्धौ च पक्षसिद्धिरितीति—वाच्यम् ; विवादाध्यासितत्वेन रूपेण तस्य पक्षावच्छेदकत्वाविरोधादन्योन्याश्रया-नुपपत्तेः । अत एवैतादृशस्थलेऽभियुक्ता विवादाध्यासित इति पक्षं विशिंषन्ति । तस्माददोषः । यद्वा—"तदि"ति पश्वादिव्यवहारसमानजातीयव्यवहारकालः परामृश्यते ; हेत्ववच्छिन्नस्यापि पक्षत्वदर्श-

भाष्यभावप्रकाशिका

न्येति* ॥ तैः पश्वादिभिः सामान्यं व्यवहारवत्त्वम्, तस्य विवेकिषु भानादिति यावत् । अपरोक्षा-ध्यासस्य व्यवहारपुष्कलकारणत्वात् तस्याध्यासस्य काल एव कालो यस्य व्यवहारस्य, स तत्कालः । *समानः*। पश्वादिभिरिति शेषः । विमतो व्यवहारः,अध्यासकृतः, व्यवहारत्वात्, संमतवत् ; विमताः, अध्यासवन्तः, व्यवहारवत्त्वात् ; पश्वादिवदिति वा प्रयोगः । मान-युक्तिभ्यां विवेकेऽप्यध्यासविरोधि-प्रमित्यभावादध्यासवत्त्वमविरुद्धमिति मत्वा—*व्युत्पत्तिमतामपि* इत्युक्तम् ॥

नच व्यवहारत्वाद्यप्रयोजकम् ; आत्मनो मातृत्वादिशक्तिमत्त्वे शक्तेः सन्निमित्तशक्याधीनतया

पञ्चपादिका

एवं तावत् प्रत्यक्षादीनि प्रमाणानि चक्षुरादिसाधनानि। तानि च नाधिष्ठानशून्यानि व्याप्रियन्ते। अधिष्ठानं च देहः। *न तेनानध्यस्तात्मभावेनासङ्गस्याविकारिणश्चैतन्यैकरसस्यात्मनः प्रमातृत्वमुपपद्यते*, इत्यनुभवारूढमविद्यावद्विषयत्वं प्रत्यक्षादीनामुपदिश्य, पश्वादिव्यवहारसाम्येन कार्यतोऽ-

पञ्चपादिकाविवरणम्

*एवं तावत्प्रत्यक्षादीनी*त्युक्तानुवादः। "न तेनानध्यस्तात्मभावेने"ति भाष्यं पूर्वं न व्याख्यातम्, तदनुवादग्रन्थे व्याचष्टे॥ *तत्रेयमाशङ्का*—भवत्वध्यासस्य व्यवहारनिमित्तता, तथाऽपि रजतादिवद् निमित्तकारणमेवाध्यासो व्यवहारस्य, आत्मैव केवलस्तूपादानमिति, तत्राह—*न तेनानध्यस्तात्मभावेनासङ्गस्येति* ॥

ऋजुविवरणम्

व्याख्यानं कृतम्, तदसङ्गतम्; इत्याशङ्क्याभिप्रायमाह—*पूर्वं न व्याख्यातमिति*॥ "अनुवादः"इत्यनेन धीस्थताकारणमुक्तम्। अथवा—"अनुवादग्रन्थे"इत्यनेन शङ्काबीजमुक्तम्। किमर्थं स्वस्थानातिक्रमेणेदानीं व्याख्यायते? इत्याशङ्क्याभिप्रायमाह—*तत्रेयमाशङ्केति*॥ सिद्धे हेतुत्वे निमित्तत्वमेव भवतु, नोपादानत्वमिति शङ्का स्यात्। नतु पूर्वमिति भावः। कथमनेनोपादानत्वमुक्तम्? चैतन्यैकरसत्वेन स्वतः प्रमातृत्वाभावे, अविकारित्वेनागन्तुकविकाराभावे, असङ्गत्वेनान्यनिमित्तप्रमातृत्वाभावे चोक्ते नाध्यासस्योपादानत्वमुक्तम्, किन्त्वध्यस्तात्मभावेन भवितव्यमित्युक्तम्। अथवा—"न तेनानध्यस्तात्मभावेने"त्यनेनैव व्याख्यानं कृतम्। देहादिष्वात्मभावाध्यासेन विनाऽऽत्मनः प्रमातृत्वं नास्ति। प्रमाश्रयत्वं हि प्रमातृत्वम्। नच तदात्मनः संभवति; विषयेण प्रमासाधनैर्वाऽसङ्गत्वेन संसर्गाभावात्। नच केवलस्यैव तदाकारपरिणामः; अविकारित्वात्। अविकारित्वं च चैतन्यैकरसत्वात्। अथवा—स्वाभाविकप्रमाश्रयत्वेन विषयतादात्म्येन वा प्रमातृत्वं 'चैतन्यैकरसस्ये"त्यनेन निरस्तम्। नच तावतोपादानत्वमुक्तम्; कुठारेण विनाऽऽत्मनश्छेतृत्वाभावेऽपि नैव कुठारस्योपादानत्वम्, तद्वदध्यासस्वरूपनिमित्ताभावात् केवलस्य प्रमातृत्वाभाव इत्यपि वक्तुं शक्यते। अतो न निमित्तवैलक्षण्यमध्यासस्यानेनोक्तमित्याशङ्क्याभिप्रायमाह—

तत्त्वदीपनम्

यस्य, स तत्काल इति विवेचनीयम्, किमिदमुच्यते—व्यवहारस्य काल एव कालो यस्येति चेत्, तत्र ब्रूमः—व्यवहारस्य व्याप्यत्ववद् व्यापकत्वमप्यध्यासं प्रत्यस्तीति प्रदर्शयितुमेवं समासमाचार्याश्चक्रिर इत्यर्थः। नचात्रान्वयासंभवः; 'च' शब्दाध्याहारेण तत्कालपदोदिताध्यासस्य व्यवहारस्य च समत्वाभिधानादित्याह—*स च पश्वादिभिरिति*॥ "शास्त्रीये तु व्यवहारे" इत्यत्र व्यतिरिक्तात्मज्ञानमनुज्ञायोपनिषदात्मज्ञानं प्रतिचिक्षेप, तदनुपपन्नम्, तस्य प्रकृताननुसारित्वादित्याशङ्क्य, वृत्तानुवादेन तात्पर्यं कथ्यते—"एवं तावदि"त्यत्र, तत्रानुवादत्वे "न तेने"त्यादिना भाष्यव्याकरणमनुपपन्नमित्याशङ्क्याह—*एवं तावदिति*॥ अनुवादत्वे भाष्यव्याख्यानमनुचितमिति यत्तूक्तम्, तत्राह—*न तेनेति*॥ पूर्वमव्याख्यातत्वादनुवादव्याजेन व्याख्योपपत्तिरित्यर्थः। नच स्थानातिक्रमणेन व्याख्यानमसङ्गतमिति—शङ्कनीयम्; शङ्कानिमित्ताभिधाने शङ्कावकाशादित्याह—*तत्रेति*॥ अध्यासस्य हेतुत्वे सिद्धे निमित्तत्वमेव, नोपादानत्वमिति शङ्कासंभव इत्यर्थः॥

व्यवहारस्याध्यासपुरस्सरत्वमुक्तम्, तत्र किं तस्य निमित्तत्वम्? उतोपादानत्वम्? आद्ये सिद्धसाधनता, इत्याह—*भवत्विति*॥ द्वितीयस्त्वनुपपन्न इत्याह—*तथापीति*॥ रजताध्यासादेर्व्यवहारं प्रति निमित्तत्वादत्रापि तदेव युक्तमित्यर्थः। किं तर्ह्युपादानम्? तत्राह—*आत्मैवेति*॥ *केवल इति*॥ अनध्यस्तात्मभाव इत्यर्थः। *असङ्गस्येत्यादेरयमर्थः*—प्रमातृत्वं ततः स्वतो न संभवति; संवित्स्वभावत्वादित्याह—*चैतन्येति*॥ कर्तृत्वमप्यसंभवीत्याह—*अविकारिण इति*॥ सहकारिसंबन्धाभावादपि न तस्य कर्तृत्वमित्याह—*असङ्गस्येति*॥ रजता-

वार्तिकम्

नात्। यद्वा—*व्युत्पत्तिमतामपि पुरुषाणां पश्वादिसाम्यदर्शनात्*॥ पश्वादिसादृश्यन्तु तेषां रञ्जनीय-

पञ्चपादिकाविवरणम्

अयमर्थः—रजताद्यध्यासानां व्यवहाराश्रयकोटिनिक्षिप्तत्वाभावात्तदन्तरेण चात्मनि प्रमातृत्वादिव्यवहार-दर्शनाद् निमित्तकारणतैव युक्ता, इह तु पुनराश्रयकोटिनिक्षिप्तत्वात् केवलात्मनि सुषुप्ते व्यवहारादर्शन उपादान-कारणस्याभ्यर्हितत्वाद् अन्वय-व्यतिरेकवतोऽध्यासस्योपादानकारणत्वमेव व्यवहारं प्रति कल्पयितुं युक्तमिति।

ऋजुविवरणम्

अयमर्थो रजतेति ॥ *ननु*—स्वर्गसाधनकर्मणां व्यतिरिक्तात्मना विनाऽप्युपपत्तिरस्तीत्याशङ्क्याह—*तज्जन्य-

तत्त्वदीपनम्

ध्यासस्य निमित्तत्वमेवेति यत्तूक्तम्, तत्राह—*अयमर्थ इति* ॥ व्यवहाराश्रयः प्रमाता रजताध्यासश्चात्मात्राश्रय इत्यसिद्धो हेतुरित्याशङ्क्याह—*तदन्तरेणेति* ॥ रजताध्यासस्य प्रमातरि सद्भावेऽपि न प्रमातृत्वप्रयोजकत्वम्, तदभावेऽपि व्यवहारदर्शनात्। ततश्च तस्य निमित्तत्वं युक्तमित्यर्थः। ततो वैषम्यमाह—*इह त्विति* ॥ तत्र हेतुमाह—*केवलेति* ॥ निमित्ताभावादपि नैमित्तिकाभावप्रसिद्धेर्व्यतिरेकस्यान्यथासिद्धिमाशङ्क्याह—*उपादानेति* ॥ सत्ता-स्थितिहेतुतयोपादानस्यान्तरङ्गत्वादन्वयः, अतस्तद्विषयत्वम्। नच—मिथ्याज्ञान-तत्संस्कारयोर्निमित्तत्वमात्रस्य पुरोक्तत्वात्तद्विरोध इति—वचनीयम्; मिथ्याज्ञानस्यानुपादानत्वेऽपि तद्विषयाहंकारादिसंपिण्डितरूपस्योपादानत्व-संभवादित्यर्थः। उपदिश्य, आपाद्य, आशङ्क्याहेति ग्रन्थच्छायाऽनुसारेण शङ्काप्रदर्शनस्याप्यनुवादप्रतीतिं व्यावर्तयति—

वार्तिकम्

कोपनीयविषयकप्रवृत्ति-निवृत्तिदर्शनात्। *तत्कालः=तादृशप्रवृत्ति-निवृत्तिकालीनः। *प्रत्यक्षादिव्यवहारः समानः* =पश्वादीनामिवाविवेकपूर्वक इति निश्चीयत इत्यर्थः। कारणसाम्यमन्तरेण कार्यसाम्यानुपपत्ते-रित्याशयः॥

स्यादेतत्—मा भूद् व्युत्पत्तिमतां लौकिकप्रत्यक्षादिव्यवहारे व्यभिचारः; पश्वादिव्यवहारसाम्येना-विवेकपूर्वकत्वनिश्चयात्तस्य, शास्त्रीये तु विवेकपूर्वके तद्व्यवहारे भविष्यति। नहि देहादिव्यतिरिक्तं परलोकसंबन्धिनमात्मानमविदित्वा देहान्तरादिभोग्ये स्वर्गादौ बुद्धिमतां कामनोपपद्यते। नच तत्कामनां विना तत्साधनमन्विष्य तत्र प्रवृत्तिः। नचैवं तद्विवेकज्ञाने सति तदविवेकोऽध्यासो भवितुमर्हति; विरोधादिति द्वितीयपक्षमाशङ्क्य परिहरति—*शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वाऽऽ-त्मनः परलोकसंबन्धमधिक्रियते; तथापि न वेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्म-क्षत्रादिभेदमसंसार्यात्मतत्त्व-मधिकारेऽपेक्ष्यते; अनुपयोगादधिकारविरोधाच्चेति* ॥ तत्र वक्तव्यम्—किमैहिकग्रामादिफलकसाङ्ग्रहण्या-द्यनुष्ठानरूपः शास्त्रीयव्यवहारः स्थलदेहव्यतिरिक्तकालान्तरस्थाय्यात्मज्ञानमपेक्षते? किं वा पारलौकिक-फलकज्योतिष्टोमाद्यनुष्ठानरूपः? आहोस्विद् मोक्षशास्त्रविहितश्रवणाद्यनुष्ठानरूपः? उत तदनन्तरं कृतसाक्षा-त्कारस्य 'अहं ब्रह्मास्मी'त्यनुभवादिरूप इति? तत्र नाद्यः; स्थूलदेहव्यतिरिक्तात्मनोऽभावेऽपि तेनैव तत्फल-भोगसंभवात्, साङ्ग्रहण्याद्यनुष्ठाने स्थूलदेहव्यतिरिक्तात्मज्ञानानपेक्षणादिति प्रथममंशं प्रसिद्धनिरसन-

भाष्यभावप्रकाशिका

मुक्तानामपि सन्निमित्तशक्तिशक्त्यापादकत्वात्, तत्रापि मातृत्वादिप्रसक्त्या मुक्त्यभावापातस्य विपक्षे बाधकत्वात्, प्रमातृत्वादिलक्षणशक्त्यभावे च ग्राहकमानाभावेन शक्तिमत्त्वस्यापि दुर्वचत्वात्। नच

प्रदीपः

ज्ञानस्य व्याप्तिज्ञानस्य च प्रदर्शनानन्तरमनुमितिप्रकारप्रदर्शनार्थम्—"तत्सामान्यदर्शनादि"त्यादि "निश्चीयत" इत्यन्तम्। एतावता लौकिकव्यवहारस्याध्यासपूर्वकत्वं पश्वादिदृष्टान्तेन साधितम्, सम्प्रति ज्योतिष्टोमादिवैदिकव्यवहारस्याप्यध्यासपूर्वकत्वं साधयिष्यन्—ज्योतिष्टोमादिव्यवहाराः, अध्यासपूर्वका न, देहात्मविवेकजन्यत्वात्, यन्नैवं तन्नैवम्, यथा पश्वादिव्यवहाराः,

शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वाऽऽत्मनः परलोकसंबन्धमधिक्रियते ;

भामती

शङ्कयाह—*शास्त्रीये त्विति* ॥ तुशब्दः प्रत्यक्षादिव्यवहाराद्भिनत्ति शास्त्रीयम् ।

ऋजुप्रकाशिका

शास्त्रं स्वर्गकामस्य परलोकसम्बन्धमात्रं प्रत्याययति, नतु तस्याध्यासानापन्नत्वमसंसारित्वमपि, येन शास्त्रमविद्यावद्विषयं न स्यादित्यभिप्रेत्याह—*इत्याशङ्कयाहेति* ॥ "शास्त्रीयमि"त्यनन्तरं व्यवहारमिति शेषः ।

पञ्चपादिका

प्यापाद्य, शास्त्रं पुनः प्रतिपन्नात्मविषयमेव, तेन न तत्राध्यासपूर्विका प्रवृत्तिरिति विशेषमाशङ्क्य, तस्याप्यविद्यावद्विषयत्वप्रदर्शनायाह—*शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वाऽऽत्मनः परलोकसम्बन्धमधिक्रियत इति* ॥

ननु फल-नैयमिक-नैमित्तिक-प्रायश्चित्तचोदना वर्तमानशरीरपातादूर्ध्वकालस्थायिनं भोक्तारमन्त-

पञ्चपादिकाविवरणम्

"शास्त्रं पुनरि"त्युत्तरभाष्यस्याशङ्का । *तस्यापीति* तात्पर्याभिधानम् । *शास्त्रीये त्विति* अदृष्टार्थप्रवृत्तौ व्यतिरेकज्ञानमभ्यनुजानाति । अभ्यनुज्ञामाक्षिपति—*ननु फलनैयमिकेति* ॥ फलचोदना तावत्

तत्त्वदीपनम्

शास्त्रं पुनरिति॥ "विद्वान् यजेत"इत्यादिवाक्याद् ज्ञानवदात्मविषयत्वं शास्त्रस्य, ततो नाध्यासपुरस्सरत्वमिति शङ्कार्थः। शास्त्रीयविवेकवत्त्वमिति कल्पान्तरमत्रोत्थापितमित्यर्थः ॥ "शास्त्रीये"त्विति भाष्येऽविद्यावद्विषयत्वस्यानुक्तत्वात् "तस्याप्यविद्यावद्विषयत्वप्रदर्शनाये"ति ग्रन्थानुपपत्तिरित्याशङ्क्य तस्य तात्पर्यार्थत्वाददोष इत्याह—*तस्यापीति* ॥ "कारीर्या यजेते"त्यादिशास्त्रीयव्यवहारस्य व्यतिरेकज्ञानानपेक्षणात्तदभ्यनुज्ञासंभवमाशङ्क्याह—*शास्त्रीये त्विति* ॥

देहव्यतिरिक्तात्मज्ञानं विनाऽपि फलादिचोदनानां प्रामाण्यसमर्थनस्यात्र पूर्वपक्ष-सिद्धान्तयोरनुपयोगादविद्यावद्विषयत्व-तदभावयोर्वादिप्रतिवादिनोरिहाभिप्रेतत्वाद् "ननु फले"त्यादिग्रन्थोऽसमञ्जस इत्याशङ्क्य, परलोकसंबन्ध्यात्मज्ञानं विना न प्रवृत्तिरित्यवसरमालक्ष्य, लब्धावसरश्चार्वाकवरः शङ्कत इत्याह—*अभ्यनुज्ञामिति* ॥ टीकाऽपेक्षितं हेतुं

वार्तिकम्

तया तुश्ब्देन निरस्य,द्वितीयेऽपि किं तद्व्यतिरिक्तपरलोकसंबन्ध्यात्मास्तित्वमात्रज्ञानमपेक्षते ? किं वा देहात्माध्यासविरोधिवेदान्तवेद्यात्मतत्त्वज्ञानमिति ? नाद्यः ; तादृशज्ञानस्य देहात्माध्यासाविरोधित्वादिष्टापत्तेरित्याह—*"शास्त्रीये त्वि"*त्यादिना । *अधिक्रियते* =प्रवर्तते, तत्फलस्वाम्यं वाऽऽत्मनोऽभिजाना-

भाष्यभावप्रकाशिका

सर्वो व्यवहारः, रजताध्यासवत्, अध्यासकृतः, व्यवहारत्वात् ; इत्याभासतुल्यता ; विरोधादेव तस्यानुमानस्य, मनुष्योऽहमित्यध्यासस्य सर्वानुभवसिद्धतया तदभावादिति भावः । विवेकिनामविवेकिनां च लौकिकव्यवहारस्याध्यासिकत्वेऽपि शास्त्रीयव्यवहारस्य प्रतिपन्नात्मविद्वद्विषयत्वाद् न तत्पूर्वतेति भागे बाधमाशङ्क्य, तस्यापि तत्पूर्वतार्थं देहेतरात्मज्ञानपूर्वकत्वमङ्गीकरोति—*शास्त्रीये त्विति* ॥

प्रदीपः

इत्यनुमानविषया वैदिकव्यवहाराणामध्यासपूर्वकत्वमाक्षिपति—*शास्त्रीये तु व्यवहार इति* ॥ तुशब्देन लौकिकव्यवहारवैलक्षण्यप्रदर्शनाद् व्यतिरेकदृष्टान्तः सूच्यते । "नाविदित्वाऽऽत्मनः परलोकसम्बन्धमि"ति देहात्मविवेकज्ञानपूर्वकत्वरूपहेतोः पक्षधर्मता ज्ञाप्यते । तथाच शास्त्रीयव्यवहारः, नाध्यासपूर्वकः, देहात्मविवेकजन्यत्वात् ; व्यतिरेकेण लौकिकव्यवहारवदिति शङ्का-

पञ्चपादिकाविवरणम्

पश्वादीनामस्मिन्नेव जन्मनि लब्धुं शक्यत्वात्, तज्जन्यसुखस्य च स्वर्गस्य पश्वादिचोदनाफलत्वाभावाद् ज्योतिष्टोमादिफलत्वोपपत्तेः, निरतिशयप्रीतेरप्यत्रैव सम्भवात्, न देहान्तरसम्बन्धिनमात्मानमापादयति, नैयमिक-नैमित्तिकचोदना तु सुतराम्; फलशून्यत्वात्, फलवत्त्वे वा दृष्टेनैवोपभोक्तुं शक्यत्वात्। प्रायश्चित्तस्य तु दोषनिबर्हणफलत्वात्, दोषफलस्यास्मिन् जन्मनि भोक्तुं शक्यत्वात्, जन्मान्तरस्य चैतादृशत्वात्, फलादर्शने च कारीर्यादि-

ऋजुविवरणम्

सुखस्येति* ॥ कथं क्रत्वादिजन्यसुखस्य ज्योतिष्टोमादिकर्मफलत्वम्? कर्मान्तरफलत्वादित्याशङ्क्याह—*पश्वादिचोदनाफलेति* ॥ *ननु*—निरतिशयप्रीतिर्हि स्वर्गः, तादृशं च ज्योतिष्टोमादिफलम्, तच्च देहान्तरसम्बन्धमापादयति, तदुक्तम्—"अन्यथाऽनुपपत्त्या तु विधिनाऽऽत्मन्यपेक्षिते" इति, तत्राह—*निरतिशयप्रीतेरिति* ॥ *ननु*—नित्यकर्मणां प्रत्यवायपरिहारार्थत्वात् प्रत्यवायस्य च जन्मान्तरे फलहेतुत्वात् तन्निवर्तकनित्यकर्मणां व्यतिरिक्तात्मना विनाऽनुपपत्तिः; तदभावे नरकादिफलप्रत्यवायनिवृत्त्यर्थं नित्यकर्मसु प्रवृत्त्यनुपपत्तेः, इत्याशङ्क्याह—*फलवत्त्वे वेति*॥ *ननु—*जन्मान्तर एव तद् भोक्तुं शक्यते; नास्मिन् जन्मनि; ततो जन्मान्तराक्षेपकत्वम्, इत्याशङ्क्याह—*जन्मान्तरस्येति* ॥ *ननु—अनुष्ठितधर्मस्यापि फलादर्शनात्, ध्रुवफलत्वाच्च कर्मणाम्, जन्मान्तराक्षेपकत्वमित्याशङ्क्याह—*फलादर्शने चेति* ॥ *ननु*—स्वर्गो नाम विशिष्टदेशादिजन्यो भोगः, नचानेन शरीरेण स भोक्तुं शक्यते, इत्याशङ्क्याह—*मन्त्रौषधादिसिद्धेनेति* ॥ "सत्यमेवमि"त्यादिना व्यतिरिक्तात्मज्ञानापेक्षित्वे "प्रामाणिक-

तत्त्वदीपनम्

व्यनक्ति—*फलेति* ॥ फलचोदना तावद् देहान्तरसंबन्धिनमात्मानं नापादयतीति संबन्धः। कुत इति चेत्, तत्र वक्तव्यम्—किं पश्वादिफलचोदना व्यतिरिक्तात्माऽऽपादिका? उत स्वर्गादिफलचोदनेति? नाद्य इत्याह—*पश्वादीनामिति* ॥ नच—पश्वादीनामस्मिन्नेव जन्मनि लाभे चित्रादेः कारीर्यादितुल्यतेति—शङ्क्यम्; कारीर्यादेर्नियतसमनन्तरफलत्वे पश्वादिचोदनानां चास्मिन्नेव जन्मनि यदा कदाचित्फलसंबन्धपरत्वादिति वैषम्यादित्यर्थः। द्वितीयेऽपि किं लोकविशेषः स्वर्गः? उत सुखमात्रम्? नाद्यः; तत्र मानाभावात्; द्वितीये न विवक्षितात्मसिद्धिरित्यभिप्रायेणाह—*तज्जन्येति* ॥ स्वर्गस्यास्मिन् जन्मनि लब्धुं शक्यत्वादिति संबन्धः। पश्वादिजनितसुखस्य पश्वादिचोदनाफलत्वाद् न ज्योतिष्टोमादिफलत्वम्, तत्राह—*पश्वादीति* ॥ "चित्रया यजेत पशुकामः" "सांग्रहण्या यजेत ग्रामकामः' इत्यादिचोदनानां पश्वादिसमर्पकत्वान्न सुखसमर्पकत्वम्, यथाश्रुत्यङ्गीकारस्य युक्तत्वादित्यर्थः। निरतिशयप्रीतेः स्वर्गशब्दार्थत्वात्तद्भोक्तृत्वेन व्यतिरिक्तात्मसिद्धिः? अत्राह—*निरतिशयेति* ॥ कार्तवीर्यादिवत्साम्राज्यादिपदप्राप्त्या तद्भोगस्यापीह संभवादित्यर्थः ॥ फलचोदनाया अनपेक्षत्वमभिधाय, नैयमिक-नैमित्तिकचोदनयोरप्यनपेक्षत्वमाह—*नैयमिकेति* ॥ "यावज्जीवमग्निहोत्रं जुहुयादि"त्याद्या नैयमिकचोदना, 'गृहदाहवान् यजेत' इत्याद्या नैमित्तिकचोदना। फलवतोऽपि यदा न भोक्त्राक्षेपकत्वम्, तदा तद्विधुरस्य नाक्षेपकत्वमिति किमु वक्तव्यमित्याह—*सुतरामिति* ॥ नैयमिकादेरपि फलवत्त्वं ब्रुवाणं भाट्टं प्रत्याह—*फलवत्त्व इति* ॥ सुख-दुःखप्राप्ति-निवृत्तिफलस्य दृष्टेनैव शरीरेणोपभोगसंभवान्नादृष्टार्थकल्पनेत्यर्थः। नापि प्रायश्चित्तचोदनाया व्यतिरिक्तात्मप्रापकत्वमित्याह—*प्रायश्चित्तस्येति* ॥ "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इत्याद्या प्रायश्चित्तचोदना। अकृतप्रायश्चित्तदोषफलोपभोगाय व्यतिरिक्तापेक्षेति शङ्कां प्रत्याह—*दोषेति* ॥ दोषफलम्=दुःखम्, तच्चात्र सुलभमित्यर्थः ॥

*ब्रह्महत्यायाश्च सूकराद्यनेकयोनिसंबन्धफलत्वात् तदुपभोक्तृतया व्यतिरिक्तात्मसिद्धिरित्याशङ्क्याह—*जन्मान्तरस्येति* ॥ जन्मान्तरसंबन्धस्य न स्वरूपेण फलत्वम्, किं तु दुःखहेतुत्वेन; तच्च दुःखमत्रैव भोक्तुं शक्यम्, इति न जन्मान्तरापेक्षा; सूकरादिसमानदुःखपरतयाऽपि संभवादित्यर्थः। चित्रादिफलस्यास्मिन् जन्मनि कदाचिदनुपलम्भाद् अदत्तफलस्य कर्मणः क्षयायोगात् फलोपभोगाय देहान्तरसंबन्धापेक्षेत्यत्राह—*फलादर्शन इति* ॥ साङ्गानुष्ठानेऽपि फलादर्शनादङ्गवैकल्यकल्पनमयुक्तमित्याशङ्क्य, प्रतिबन्धाद् बहुसहकार्यभावाद्वा फलादर्शनं युक्तमित्याह—

पञ्चपादिका

रेणापि प्रमाणतामश्नुवत एव। यथा चैतदेवम्, तथा—"एक आत्मनः शरीरेऽभावादि"त्यधिकरणारम्भे दर्शयिष्यामः, सत्यमेवम्; तथाऽपि सकलशास्त्रपर्यालोचनापरिनिष्पन्नं प्रामाणिकमर्थमङ्गीकृत्याह भाष्यकारः। तथाच विधिवृत्तमीमांसाभाष्यकारोऽप्युत्सूत्रमेवात्मसिद्धौ पराक्रान्तवान्। तत् कस्य हेतोः?

पञ्चपादिकाविवरणम्

वदङ्गवैकल्यप्रतिबद्धतया सहकार्यभावकल्पनोपपत्तेः, मन्त्रौषधादिसिद्धेनानेनापि शरीरेण स्वर्गादिभोगसम्भवाद् न देहव्यतिरेकज्ञानोपयोग इति। तत्र देवताधिकरणनयेन मन्त्रादिप्रामाण्याद् विशिष्टदेश-काल-शरीरादिभोग्यं स्वर्गादि फलमङ्गीकृत्येदमुक्तमिति परिहरति—*सत्यमेवं तथाऽपीति* ॥

ननु मन्त्रादिसमन्वयप्रामाण्यमनपेक्ष्यैव चोदनाभिरेव व्यतिरिक्तात्माऽपेक्ष्यते, कर्ममात्रनिर्णयप्रवृत्तेन भाष्यकारेणात्मनो निरूपितत्वादिति, तत्राह—*तथाच विधिवृत्तेति* ॥ विधिभिरेवापेक्षितश्चेत्, सूत्रेणापि भवितव्यमित्यर्थः। *ननु* अनपेक्षितस्यासूत्रितस्य च भाष्यकारेण प्रतिपादनमयुक्तमित्याक्षिपति—*तत्कस्य हेतोरिति* ॥ "तत् प्रमाणं बादरायणस्यानपेक्षत्वादि"ति सूत्रावयवेन मन्त्रादिप्रामाण्यद्वारेण परम्परया सूत्रित

ऋजुविवरणम्

मर्थमङ्गीकृत्ये"ति प्रामाणिकत्वं हेतुत्वेनोक्तम्, प्रामाणिकत्वे च सकलशास्त्रपर्यालोचनापरिनिष्पन्नत्वं हेतुः, तत्र कस्य प्रामाणिकत्वमिति न ज्ञायते? न तावद् देहान्तरोपभोग्यफलस्य प्रामाणिकत्वम्; देहान्तरोपभोग्यत्वग्राहकप्रमाणस्यादर्शनात्, विधीनां चातद्गोचरत्वात्; ततश्चात्मनोऽपि न प्रामाणिकत्वं युक्तम्; विध्यपेक्षितत्वात्, अन्यस्य तत्साधकत्वादर्शनादित्याशङ्क्य व्याचष्टे—*तत्र देवताधिकरणेति* ॥ देवताधिकरणे हि प्रमाणान्तरसंवाद-विसंवादाभावे मन्त्राद्यर्थवादानां प्रामाण्यमुक्तमिति भावः। विध्यनपेक्षितत्व उत्सूत्रत्वं हेतुत्वेनोक्तम्—"उत्सूत्रत्वमेवे"त्यनेन, तदयुक्तम्; न ह्युत्सूत्रं भाष्यकारेण प्रतिपादितमिति कृत्वा विध्यनपेक्षितत्वं निश्चेतुं शक्यम्; विध्यपेक्षितत्वेनोत्सूत्रमपि प्रतिपादितमिति वक्तुं शक्यत्वादित्याशङ्क्य व्याचष्टे—*विधिभिरेवेति*॥ कथम्—"उपयोगाभावादि"त्युक्तम्? धर्मेण

तत्त्वदीपनम्

प्रतिबद्धेति ॥ देशान्तरादिभोग्यं स्वर्गमङ्गीकृत्याह—*मन्त्रेति* ॥ फलादिचोदनानां व्यतिरिक्तात्मानं विनाऽनुपपत्त्यभावात्प्रमाणान्तरस्य च तत्साधकस्यासंभवाद् व्यतिरेकाभ्यनुज्ञानमयुक्तमित्याक्षेपे कृते, तदङ्गीकारेण समाधानमयुक्तमित्याशङ्क्य तात्पर्यमाह—*तत्रेत्यादिना* ॥ तत्र चोद्यं परिहरतीति संबन्धः। अन्यपराणां वाक्यानां प्रमाणान्तरविसंवाद-संवादाभावे स्वार्थे प्रामाण्यमिति देवताधिकरणन्यायः। विशिष्टो देशो=मेरुपृष्ठादिः। विशिष्टकालः=शरीरपातोत्तरक्षणः। विशिष्टं शरीरम्=तैजसादि। टीकाया एषा योजना—

चोदनामात्रपर्यालोचनया व्यतिरिक्तात्मसिद्धिरित्येतदङ्गीकरोति—*सत्यमेवमिति* ॥ तर्ह्यभ्यनुज्ञानमनुपपन्नमित्याशङ्क्याह—*तथाऽपीति* ॥ मन्त्रादिप्रामाण्याद्विशिष्टदेश-कालोपभोग्यस्वर्गोपलब्धेस्तस्य च व्यतिरिक्तात्मना विनाऽसंभवात् स आश्रयणीय इत्युक्तमनुपपन्नम्, मन्त्राद्यप्रामाण्यवादिना शबरस्वामिना व्यतिरिक्तात्मसमर्थनादिति शङ्कते—*नन्विति* ॥ चोदनानामतिरिक्तानपेक्षत्वे व्यतिरिक्तात्मनिरूपणवैयर्थ्यं स्यात्; विधिवाक्यार्थमात्रनिर्णयप्रवृत्तत्वाच्छबरस्वामिनः। ततश्च मन्त्रादिप्रामाण्यमाश्रित्य व्यतिरेकाभ्यनुज्ञानमसंगतमित्यर्थः। चोदनापेक्षितत्वं तावदसिद्धमित्याह—*तत्राहेति* ॥ विधौ वृत्ता मीमांसा, विधिवृत्तमीमांसा। विधेर्वृत्तं विधिवृत्तम्, तद्विषया वा मीमांसा विधिवृत्तमीमांसा। उत्सूत्रप्रतिपादितत्वमात्रेण कथं विध्यनपेक्षितत्वम्? तत्राह—*विधिभिरेवेति* ॥ विध्यपेक्षितन्यायप्रतिपादनार्थं जैमिनेर्व्यापारः। ततश्च विध्यपेक्षितत्वे तत्सूत्रणं स्यात्। नच तदुपलभ्यते। तस्मान्मन्त्राद्यपेक्षयैव तत्प्रतिपादनमित्यर्थः। भाष्यकृतो विध्यपेक्षितप्रतिपादकसूत्रार्थव्याख्यानप्रवृत्तत्वादसूत्रितप्रतिपादकत्वे सूत्राननुसारित्वमिति शङ्कते—*नन्विति* ॥ अयुक्तत्वे हेतुमाह—*भाष्यकारेणेति* ॥ प्रामाण्यप्रयोजकस्यानपेक्षत्वस्य कुत्र सूत्रणमिति न ज्ञायते? तत्राह—*तत्प्रमाणमिति* ॥ "औत्पत्तिकस्तु शब्दस्यार्थेन

पञ्चपादिका

"धर्मजिज्ञासे"ति कार्यार्थविचारं प्रतिज्ञाय तदवगमस्य प्रामाण्येऽनपेक्षत्वं कारणमनुसरता सूत्रकारेण विशेषाभावात् स्वरूपनिष्ठानामपि वाक्यानां प्रामाण्यमनुसृतं मन्यते, तथा "चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोत्यवगमयितुमि"ति वदंश्चोदनाशेषत्वेनापि स्वरूपावगमेऽनपेक्षत्वमविशिष्टमवगच्छतीत्यवगम्यते। स च स्वरूपावगमः कस्मिन् कथं वेति धर्ममात्रविचारं प्रतिज्ञाय, तत्रैव प्रयतमानेन भगवता जैमिनिना न मीमांसितम्; उपयोगाभावात्, भगवांस्तु पुनर्बादरायणः पृथग् विचारं प्रतिज्ञाय व्यचीचरत् समन्वयलक्षणेन। तत्र च देहान्तरोप-

पञ्चपादिकाविवरणम्

एवात्मेति परिहरति—*धर्मजिज्ञासेति कार्यार्थविचारं प्रतिज्ञायेति* ॥ एवं सूत्रार्थपरम्परया भूतेऽप्यर्थे प्रामाण्यमाश्रित्य भाष्यकारेणात्मविचारः कृतः, न चोदनासामर्थ्यमाश्रित्येति कथमवगम्यत इति? तत्राह—*तथा चोदना हि भूतमिति* ॥ तर्हि चोदनापेक्षितत्वात् समन्वयोऽप्यत्रैव वर्णनीय इति, नेत्याह—*स च स्वरूपावगम इति* ॥ *ननु धर्मे प्रयतमानेनाप्यपेक्षितत्वात् कर्तव्य एवात्मविचार इति, नेत्याह—*उपयोगाभावादिति* ॥ नहि धर्ममात्रं व्यतिरिक्तात्मानमपेक्षते, किन्तु फलमपेक्षते; फले च न प्रयतते जैमिनिरित्यर्थः। *ननु* फलमप्यपेक्षते चेत्, तत्रापि प्रयत्नो युक्त इति, न; अन्यथासिद्धत्वादित्याह—*भगवांस्तु पुनरिति* ॥

ऋजुविवरणम्

व्यतिरिक्तात्मनोऽपेक्षितत्वादित्याशङ्क्याह—*नहि धर्ममात्रमिति* ॥ पिष्टपेषणमिति* ॥ "नात्मा श्रुतेरि"त्यादिभिरात्मनिरूपणं कृतम्, तद् व्यर्थमित्यर्थः। "तेने"ति सन्निहितत्वादप्रामाण्यमेव निर्दिष्टमिति शङ्का स्यात्,

तत्त्वदीपनम्

संबन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं बादरायणस्यानपेक्षत्वा"दिति सूत्रम्। तस्मिंश्च सूत्रे विधिवाक्यस्यापौरुषेयत्वेनानपेक्षत्वं प्रामाण्यप्रयोजनमुक्तम्, तन्मन्त्रादिष्वविशिष्टम्, इति तत्प्रामाण्यमप्यर्थात्सूत्रितमित्यर्थः। उक्तेऽर्थे विनिगमनकारणं पृच्छति—*एवमिति* ॥ भाष्यकारेण योऽयमात्मविचारः कृतः, स भूतेऽर्थे प्रामाण्यमाश्रित्य, न चोदनासामर्थ्यमाश्रित्येति कथमवगम्यत इति योजना। तद्वचनं तत्र प्रमाणमित्याह—*तत्राहेति* ॥

"चोदना हि भूतमि"त्यत्र चोदनाया भूतादिबोधकत्वं लक्ष्यते। तत्र विधिवाक्यानां क्रियार्थत्वात्साक्षाद्भूतादिबोधकत्वासंभवाच्छेषभूतमन्त्रादिद्वारेण तद्बोधकत्वं वक्तव्यम्। ततश्च मन्त्रादिप्रामाण्यमाश्रित्यात्मविचारं चकार शबरस्वामीति समाधिग्रन्थार्थः। सिद्धार्थनिष्ठानामपि वाक्यानां प्रामाण्यस्य सूत्रितत्वेन तत्प्रामाण्यविशेषोऽपि तत्र विचारणीय इत्याह—*तर्हीति* ॥ *वर्णनीय इति* ॥ जैमिनिनेति शेषः। स्वरूपस्यावगमो येन शब्देन, स स्वरूपावगमः, कस्मिन्=किं चोदना शेषभूत आत्मनि प्रमाणम्? उत स्वतन्त्र इति विमर्शः। *कथं चेति* ॥ किमखण्डार्थम्? उत संसृष्टार्थमिति? वेदान्तानां प्रामाण्यस्यासूत्रितत्वेऽपि विधिवाक्यार्थनिरूपणप्रवृत्तत्वात्तद्विचारः कृतो जैमिनिनेत्यर्थः। आत्मविचारस्य विधिवाक्यार्थनिरूपणाविघातित्वात्तदनुकूलत्वाच्च स कर्तव्य इत्याह—*ननु धर्म इति* ॥ असिद्धो हेतुरित्याह—*नेत्याहेति* ॥ धर्मस्य व्यतिरिक्तात्मापेक्षितत्वात्कथमुपयोगाभाव उक्तः? तत्राह—*नहीति* ॥ किं धर्मस्य स्वरूपेण व्यतिरिक्तात्मापेक्षा? उत फलद्वारा? नाद्यः; उपयोगानिरूपणात्, न द्वितीयः; फलनिरूपणार्थप्रवृत्तत्वाज्जैमिनेरित्यर्थः। धर्मस्य फलापेक्षत्वात्तत्रापि यत्नो युक्त इति शङ्कते—*ननु फलमिति* ॥

प्रदीपः

स्वरूपं प्रदर्शितं भवति ॥ अयमत्र परिहाराशयः—सत्यं शास्त्रीयव्यवहारो देहात्मविवेकजन्यः, तथाऽपि न नाध्यासपूर्वकः, अप्रयोजकत्वादुक्तहेतोः। अध्यासं प्रति ह्यद्वितीयात्मतत्त्वज्ञानमेव विरोधि, नतु देहात्मविवेकमात्रमिति हि सांप्रदायिको निर्णयः, इति नेदमप्रयोजकशङ्काकलङ्कितमनुमानमत्रावसरतीति। तमिममाशयं 'तथाऽपी'ति हेतोः पक्षवृत्तित्वाभ्युपगमद्वारेण सूचयन्

पञ्चपादिका

भोग्यः स्वर्गः स्थास्यति । तच्च सर्वं कार्य-कारणसंघातादन्येन भोक्त्रा विना न सिध्यति । तत्सिद्धिश्च नागममात्रायत्ता ; प्रमाणान्तरगोचरस्य तदभावे तद्विरोधे वा शिलाप्लवनवाक्यवदप्रामाण्यप्रसङ्गात् । अतस्तत्सिद्धौ पराक्रान्तवांस्तेन । सत्यं विनाऽपि तेन सिध्येत्प्रामाण्यम् , अस्ति तु तत् । तस्मिन् विद्यमाने न तेन विना प्रामाण्यं सिध्यति फलादिचोदनानामिति मत्वाऽऽह—*शास्त्रीये तु व्यवहारे यद्यपि विद्यमाने बुद्धिपूर्वकारी नाविदित्वाऽऽत्मनः परलोकसंबन्धमधिक्रियते* ॥

पञ्चपादिकाविवरणम्

ननु ब्रह्मैव तत्र विचारितम्, न चोदनाफलमिति, तत्राह—*तत्र च देहान्तरोपभोग्य इति* ॥ *तच्च सर्वमिति स्पष्टार्थः* ॥

ननु समन्वयसामर्थ्यादेव व्यतिरिक्तात्मसिद्धेरात्मविचारः पिष्टपेषणमिति, नेत्याह—*तत्सिद्धिश्चेति* ॥ *ननु* प्रमाणान्तरयोग्यस्य तदभाव-विरोधयोः शब्दस्याप्रामाण्याद् नात्मसिद्धिरिति, तत्राह—*अतस्तत्सिद्धौ पराक्रान्तवांस्तेनेति* ॥ विरोधपरिहारफलेन विचारेणेत्यर्थः ।"सत्यम् विनाऽपि तेन सिध्येदि"त्यादिनोक्तमर्थं संक्षेपतो दर्शयति—*अस्ति तु तदिति* ॥ भूतेऽर्थे प्रामाण्यम् ; स्वर्गादावित्यर्थः । *न तेन विनेति* ।

ऋजुविवरणम्

तथा सति "अतः" इत्यनेन पुनरुक्तम् । नच हेत्वन्तरपरत्वम् ; तस्यादर्शनात् । नच हेत्वन्तरेऽपि बाधकप्रमाणस्याप्रामाण्ये सत्यात्मसिद्धिरित्याशङ्क्य, 'तेन' व्याचष्टे—*विरोधपरिहारफलेन विचारेणेति* ॥ "सत्यं विनाऽपि तेने"ति पुनरुक्तमित्याशङ्क्य, प्रयोजनभेदेन पौनरुक्त्यं परिहरति—*संक्षेपत इति* ॥ "अस्ति तु तदि"ति तच्छब्देन सन्निहितत्वाद् विधिप्रामाण्यमेव निर्दिश्यत इति शङ्का स्यात् , तथा सत्युत्तरग्रन्थेऽपि "तस्मिन् विद्यमाने" इत्यत्र तस्यैव निर्देशः स्यात् ; तथा सति व्यतिरिक्तात्मना विना चोदनाप्रामाण्याभाव इति मत्वेति ग्रन्थार्थः स्यात् , एवंच पूर्वग्रन्थविरोधः स्यादित्याशङ्क्याह व्याचष्टे—'भूतेऽर्थ इति* ॥ "तेन विने"ति प्रामाण्यमेव सन्निहितत्वान्निर्दिश्येत ; तथा सति व्याहतोक्तिः स्यात् , वैयधिकरण्यं च ; न ह्यन्यप्रामाण्याभावेऽन्यस्याप्रामाण्यमित्याशङ्क्य व्याचष्टे—*व्यतिरिक्तात्मना विनेति*॥ *ननु*—एकेनैव पदेनासंसार्यात्मतत्त्वसिद्धिर्भवति, नचैकरसत्वप्रदर्शने प्रयोजनमपीत्याशङ्क्याह—*कर्त्रन्वयेति* ॥

तत्त्वदीपनम्

निष्फलस्तावद् धर्मोपदेशो न संभवति ; फलस्य कस्यचित्कालान्तरे संभवात् । तस्य च व्यतिरिक्तात्मानं विनाऽनुपपत्तेस्तद्विचारो युक्त इत्यर्थः । उत्तरमीमांसायां तत्सिद्धेर्न तत्र प्रयत्न इत्याह—*नान्यथेति* ॥

उत्तरमीमांसाया ब्रह्मपरत्वान्न कर्मफलनिरूपणपरत्वमिति चोदयति—*ननु ब्रह्मेति* ॥ वेदान्तानां भूतेऽर्थे प्रामाण्ये सिद्धे कर्मप्रतिपादकार्थवादादेरपि प्रामाण्यादिः सेत्स्यतीत्याशयेनाह—*तत्राहेति* ॥ वाक्यपर्यालोचनयैवात्मनः सिद्धत्वाद् बादरायणस्यापि तद्विचारो न युक्त इति शङ्कते—*ननु समन्वयेति* ॥ भूतस्य प्रमाणान्तरयोग्यत्वात् तदभाव-तद्विरोधयोः सतोर्न वाक्यमात्रात् तत्सिद्धिरित्याह—*नेत्याहेति* ॥ तर्हि देहातिरिक्तात्मनि प्रमाणाभावाद् देह एवात्मेत्याह—*ननु प्रमाणेति* ॥

आत्मनः प्रमाणान्तरयोग्यत्वमसिद्धम् ; तद्योग्यत्वेऽप्यक्षादिवद् वेदान्तानां प्रामाण्यात् । नच प्रमाणान्तरविरोधः ; तस्याभासत्वादित्यभिसन्धायाह—*तत्राहेति*॥ अतःशब्देनाप्रामाण्यस्य परामृष्टत्वात् "तेने"त्यत्रापि तत्परामर्शशङ्का स्यात्, तदर्थमाह—*विरोधेति* ॥ विचारस्य प्रस्तुतत्वाद् योग्यतया तस्य ग्रहणमित्यर्थः । फलाभावादुक्तसंकीर्तनं व्यर्थमित्याशङ्क्याह—*सत्यम्—इत्यादिनेति* ॥ विस्तरेणोक्तस्य संक्षेपेण प्रदर्शने बुद्धिसौकर्यं भवतीत्यर्थः । "अस्ति तु तदि"त्यत्र देहातिरिक्तात्माभावेऽपि फलादिचोदनानां प्रामाण्यस्य प्रस्तुतत्वात् तत्परामर्शशङ्का स्यात्, तत्राह—*अस्ति तु तदिति* ॥ प्रामाण्यादेर्विद्यमानत्वादेव तेन विना प्रामाण्यं नेति निषेधानुपपत्तिमाशङ्क्याह—*न

तथाऽपि न वेदान्तवेद्यम्, अशनायाद्यतीतम्, अपेतब्रह्म-क्षत्रादिभेदम्, असंसार्यात्मतत्त्वमधिकारेऽपेक्ष्यते ;

पञ्चपादिका

तथाऽपि न वेदान्तवेद्यमिति* ॥ किं तदित्यत आह—*असंसार्यात्मतत्त्वं न तदधिकारेऽपेक्ष्यते ।

पञ्चपादिकाविवरणम्

व्यतिरिक्तात्मना विनेत्यर्थः । *ननु* सूत्रकार-भाष्यकाराभ्यां देवताधिकरणे मुखत एव देवतादिषु मन्त्रादि-प्रामाण्यं नास्तीत्युक्तम्, तत् कथं सूत्रावयवसामर्थ्यात् प्रामाण्यमनुमतमिति मन्यते, *नैष दोषः* ; तत्र देवताया विग्रहवत्त्वे सन्निपत्योपकारकत्वप्रसङ्गाद् योग्यानुपलब्धिविरोधात्, कर्मणि विरोधप्रसङ्गाभिप्रायेणोक्तत्वात्, नाप्रामाण्याभिप्रायेण, अर्थवादलिङ्गानामपि तत्र तत्र द्वादशलक्षण्यां प्रमाणत्वेनोदाह्रियमाणत्वादिति । *तथाऽपि न वेदान्तवेद्यमित्यादिभाष्यव्याख्यानं स्पष्टार्थम्* । तत्र "अशनायाद्यतीतमि"त्यादिना कर्त्रन्वयाधिकारान्वय-भोक्त्रन्वयाः क्रमेण निरस्यन्ते ।

तत्त्वदीपनम्

तेन विनेति* ॥ मन्त्रादीनां स्वार्थे प्रामाण्यं न सूत्रकार-भाष्यकृदभिप्रेतम्, स्वोक्तिविरोधादिति शङ्कते—*ननु सूत्रेति* ॥ प्रामाण्यनिषेधस्यान्याभिप्रायत्वान्न विरोध इत्याह—*नैष इति* ॥ विग्रहवताम् ऋत्विगादीनां प्रत्यक्षतो हविर्भाग-स्वीकारवद् देवतादीनामपि तथात्वं स्यात्, न च तदुपलभ्यते ; तस्माद् देवता नागतेति कर्मानुष्ठानलोपः स्यात्, तन्निरासार्थमप्रामाण्याभिधानमित्यर्थः । अप्रामाण्याभिप्रायत्वं कस्मान्न ? इत्याशङ्क्याह—*नाप्रामाण्येति* ॥ "अश-नायाद्यतीतमि"ति भाष्यस्थविशेषणानां कृत्यमाह—*तत्रेति* ॥ 'मयेदमनुष्ठेयमि'ति बुद्धिः कर्त्रन्वयः । 'मदभिलषित-साधनमिदमि'त्यन्वयोऽधिकारान्वयः । 'ममाऽयं नियोगः' इति स्वामित्वेनाऽन्वयो भोक्त्रन्वयः ॥

वार्तिकम्

तीत्यर्थः । द्वितीयस्तु न सञ्जावटीतीत्याह—*"तथापी"त्यादिना*॥"असंसार्यात्मतत्त्वमि"ति विषयेण विषयि तज्ज्ञानं लक्ष्यते । अधिक्रियत इत्यधिकारः =शास्त्रीयव्यवहारः =ज्योतिष्टोमाद्यनुष्ठानम्, तस्मिन्नित्यर्थः । यद्वा—*अधिकारे =तदनुकूलप्रवृत्तौ तत्फलस्वाम्यबोधे वाऽऽत्मन इत्यर्थः । वक्ष्यमाणहेत्वोः पक्षधर्मतां दर्शयितुमात्मतत्त्वं विशिनष्टि—*वेदान्तवेद्यमिति* ॥ वेदान्तवेद्यरूपमेव दर्शयति—*अशनायाद्यतीतमि-त्यादिना* ॥ अशनायादि अतीतम्, अतिक्रान्तम् ; तद् अशनायाद्यतीतम् । "योऽशनाया-पिपासे शोकं मोहं जरां मृत्युमत्येती"ति श्रुतेरित्यर्थः । *अपेतः =निरस्तः, ब्रह्म-क्षत्रादिजातिभेदः =तद्विशेषः, तद्विभागश्च यत्र, तत् ; अपेतब्रह्मक्षत्रादिभेदम् । "यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः" "ब्रह्म तं परा-दाद् योऽन्यत्रात्मनो ब्रह्म वेद, क्षत्रं तं परादाद् योऽन्यत्रात्मनः क्षत्रं वेदे"त्यादिश्रुतेरित्यर्थः। संसारो यस्याऽस्ति तत्, संसारि, न संसारि, असंसारि । "अज आत्मा महान् ध्रुवः", "अविनाशी"वा अरेऽयमात्माऽनु-च्छित्तिधर्मे"त्यादिश्रुतेरित्यर्थः । "वेदान्तवेद्यमि"ति विशेषणमुक्तविशेषणत्रयविशिष्टस्य प्रामाणिकत्वप्रद-र्शनार्थम् । तच्च विशेषणत्रयं हेत्वोः पक्षसत्त्वज्ञापनार्थमिति द्रष्टव्यम् । कुतो बुद्धिपूर्वकारी, उक्ताधिकार

भाष्यभावप्रकाशिका

तस्य तद्विषयत्वे कथमध्यासाधीनतेत्याशङ्क्याह—*तथाऽपीति* ॥ किं तद् वेदान्तवेद्यम् ? तदाह—*अशनायादीति* ॥ कर्त्रन्वयाधिकारान्वय-भोक्त्रन्वया विशेषणैर्व्यावर्त्यन्ते ॥

अनुपयोगात्, अधिकारविरोधाच्च ।

भामती

अधिकारशास्त्रं हि स्वर्गकामस्य पुंसः परलोकसंबन्धं विना न निर्वहति, इति तावन्मात्रमाक्षिपेत्, न त्वस्यासंसारित्वमपि ; तस्याधिकारेऽनुपयोगात्, प्रत्युतौपनिषदस्य पुरुषस्याकर्तुरधिकारविरोधात् । प्रयोक्ता हि कर्मणः कर्मजनितफलभोगभागी कर्मण्यधिकारी स्वामी भवति । तत्र कथमकर्ता प्रयोक्ता ? कथं वाऽभोक्ता च कर्मजनितफलभोगभागी ? तस्मादनाद्यविद्यालब्धकर्तृत्व-भोक्तृत्व-ब्राह्मणत्वाद्यभिमानिनं नरमधिकृत्य विधि-निषेधशास्त्रं प्रवर्तते । एवं वेदान्ता अप्यविद्यावत्पुरुषविषया एव । नहि प्रमात्रादिविभागादृते तदर्थाधिगमः । ते त्वविद्यावन्तमनुशासतो निर्मृष्टनिखिलाविद्यमनुशिष्टं स्वरूपे व्यवस्थापयन्तीत्येतावानेषां विशेषः । तस्मादविद्यावत्पुरुषविषयाण्येव शास्त्राणीति सिद्धम् ॥

ऋजुप्रकाशिका

*अस्य=स्वर्गकामस्य । *तस्य=असंसारित्वस्य । प्रत्युतासंसारित्वेऽधिकारित्वस्यायोग एवेत्याह--*प्रत्युतेति* ॥ *औपनिषदस्य=उपनिषद्गम्यस्यासंसारिणः । तस्याधिकारविरोधमेव स्फोरयति—*प्रयोक्ता हीत्यादिना*—*तस्मादित्यतः प्राक्तनेन ग्रन्थेन* । कर्मणः प्रयोक्ता हीत्यन्वयः । अधिकारीत्येतद् विवृणोति—*स्वामीति* ॥ "अभोक्ता चे"त्यनन्तरम् 'असंसारी'ति शेषः । एवंचासंसारिणोऽधिकारविरोध इति भावः । उपसंहरति—*तस्मादिति* ॥ अस्तु विधि-प्रतिषेधशास्त्रस्याविद्यावद्विषयत्वम्, वेदान्तानां तु तन्नेत्याशङ्क्याह—*एवं वेदान्ता अपीति* ॥ तदेव व्यतिरेकमुखेन द्रढयति—*नहीत्यादिना* ॥ वेदान्ता उभयत्र तच्छब्दार्थः । *स्वरूपे=अद्वितीयब्रह्मात्मस्वरूपे । *एषाम्=वेदान्तानाम् । *विशेष इति* । विधि-प्रतिषेधशास्त्राद् विशेष इत्यर्थः । एवंच प्रत्यक्षादिप्रमाणवद् विधि-प्रतिषेधशास्त्रस्य, विधि-प्रतिषेधशास्त्रवद् वेदान्तशास्त्रस्य चेति सर्वेषां शास्त्राणामविद्यावद्विषयत्वमेवेत्युपसंहरति--*तस्मा-

पञ्चपादिका

अनुपयोगादधिकारविरोधाच्च* । अशनायाद्यतीतमित्यसंसार्यात्मतत्त्वं दर्शयति । अशनायाद्युपप्लुतो हि सर्वो जन्तुः स्वास्थ्यमलभमानः प्रवर्तते, तदपाये स्वास्थ्ये स्थितो न किंचिदुपादेयं हेयं वा पश्यति । *अपेतब्रह्मक्षत्रादिभेदमिति* प्रपञ्चशून्यमेकरसं दर्शयति ।

वार्तिकम्

उक्तात्मतत्त्वज्ञानं नापेक्षते ? इत्यत्राह—*"अनुपयोगादधिकारविरोधाच्चेति* ॥ *ननु*—एवं तर्ह्येकेनैव विशेषणेन हेत्वोः पक्षधर्मत्वसिद्धेर्विशेषणत्रयं व्यर्थम् । तथाहि—अशनायाद्यतीतात्मविज्ञानं हि नाधिकारोपयोगि ; दृष्टविनाशस्थूलदेहव्यतिरिक्त-कालान्तरभाविभोक्तृज्ञानस्यैव तदुपयोगित्वात्, अस्य च

भाष्यभावप्रकाशिका

आमुष्मिकफलकर्मसु देहेतरात्मज्ञानादेव प्रवृत्तावुक्तात्मज्ञानस्याकिञ्चित्करत्वादित्याह—*अनुपयोगादिति*॥ विविक्तात्मज्ञाने सर्वाभिमानभङ्गात् कर्मस्वप्रवृत्तिरेवेति कुतस्तदपेक्षेत्याह—*अधिकारेति*॥

प्रदीपः

समाधत्ते—*तथापीति* ॥ अध्यासविरोधि ह्यशनायादिधर्मातीतासंसार्यात्मतत्त्वज्ञानम्, नच शास्त्रीयव्यवहाराधिकारस्तादृशमात्मतत्त्वज्ञानमपेक्षत इत्याह—*न वेदान्तवेद्यमिति* ॥ *अशनायाद्यतीतमिति* ॥ फलभोगकामनारहितमित्यर्थः । फलकामनायाः कर्माधिकारप्रयोजकत्वादशनायाद्यतीतो न कर्माधिकारीति भावः । *ननु* काम्ये कर्मणि फलकामोऽधिकारी, न नित्ये ; तथाच नित्यकर्मानुष्ठानमध्यासं विरुणद्धीत्याशङ्क्याह--*अपेतब्रह्मक्षत्रादिभेदमिति*॥ नित्यकर्मसु फलकामनानपेक्षायामपि ब्राह्मणत्वाद्यभिमानोऽधिकारप्रयोजकोऽपेक्षितः, इति ब्राह्मणत्वाद्यभिमानपूर्वकं नित्यकर्मानुष्ठानमपि न नाध्यासपूर्वकमिति

वार्तिकम्

तद्रूपत्वाभावात्, प्रत्युत तद्विरोधि ; तस्मिन् सति तत्फलभोगेच्छानुदयात् तत्र प्रवृत्त्यनुपपत्तेरिति। एवमात्मनो ब्राह्मणत्वाद्यभावे ज्ञाते तदुचितकर्मणि बृहस्पतिसवादौ शूद्रस्येवाप्रवृत्तिः, तथाऽसंसारित्वज्ञानेऽपि परलोकगामिनो भोक्तुरभावनिश्चयादप्रवृत्तिरिति विशेषणत्रयं व्यर्थमिति—चेत्, *न* ; उपयोगभेदेनाधिकारभेदेन च तत्सार्थकत्वोपपत्तेः। तथाहि—त्रेधा खल्वत्रात्मज्ञानमधिकार उपयुज्यते। प्रथमतस्तावदात्मनो भोक्तृत्वज्ञानम् ; तदभावे भोगार्थितया प्रवृत्त्यनुपपत्तेरुक्तत्वात्, तत्सिध्यर्थं चेहलोक-परलोकगामित्वज्ञानम् ; तदभावे इहलोक-परलोकसंबन्धाभावात्तत्रत्यभोगानुपपत्तेः, तदुभयज्ञाने सत्यप्यात्मनि ब्राह्मणत्वाद्यभिमानाभावे तदुचिते कर्मणि शूद्रस्येव न प्रवृत्तिरित्यपि त्वयैवोक्तमेव। एवं च सति प्रवृत्त्युपयोग्युक्तज्ञानत्रयं परस्परविलक्षणतया स्वविषयमप्यधिकारं त्रिधा भिनत्ति। नवैतेषामेकतररूपमप्युक्तात्मज्ञानेऽस्ति, येन तदेकतररूपेणोपयोगोऽधिकाराविरोधो वा भवेदिति प्रतिपादनार्थमुपपन्नं विशेषणत्रयमिति ॥

ननु—मा भूत् कर्माधिकारे उक्तात्मतत्त्वज्ञानापेक्षा, मोक्षशास्त्रविहितश्रवणाद्यधिकारे तु तदपेक्षाऽस्त्येव ; आत्मानात्मविवेकज्ञानस्य तद्धेतुत्वाभ्युपगमात्, पूर्वोक्तदोषाभावाच्चेति तृतीयकल्पमाशङ्क्य, किं तादृशात्मतत्त्वसाक्षात्कारः श्रवणाद्यधिकारेऽपेक्ष्यते ? किं वा श्रुतित आपातप्रतिपन्नतज्ज्ञानमात्रम् ? तत्र नाद्यः ; कर्माधिकार इव प्रकृतेऽपि तस्यानुपयोगात्, अधिकारविरोधाच्च। श्रवणादेस्तदर्थतयाऽनुष्ठानात् तस्यान्यतस्तत्पूर्वमेव सिद्धौ तद्वैयर्थ्यापत्तेः। अन्योन्याश्रयाच्च—श्रवणाद्यनुष्ठाने तत्सिद्धिः, तत्सिद्धौ च श्रवणाद्यनुष्ठानमिति। अथ द्वितीयः पक्षः, न तर्हि काचिदनुपपत्तिः ; आपातज्ञानस्य परोक्षत्वेनाध्यासाविरोधित्वादित्यभिप्रेत्याह—*प्राक् च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तत इति* ॥ श्रवणादिव्यवहारस्यापि शास्त्ररूपत्वात् शास्त्रमित्युक्तम्। सामान्यतः शास्त्रमिति वदन् यदाशङ्कितम्—कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चे''त्यत्र शास्त्रस्याविद्यावद्विषयत्वं न संभवतीति, तदपि तन्त्रेण परिहरति। अत एवाग्रे "ब्राह्मणो यजेते''त्यादिशास्त्रोदाहरणमप्युपपन्नं भवति ; अन्यथा "ब्राह्मणः पाण्डित्यं निर्विद्ये''त्येवमादिमोक्षशास्त्रमेवोदाहरिष्यत्। *विज्ञानम्* = साक्षात्कारः। *तथाभूतात्मा*=अशनायाद्यतीतत्वादिपूर्वोक्तविशेषणकः। "प्राक् चे''ति चकारादुत्तरकालीनविद्वद्व्यवहारस्याप्यविद्यावद्विषयत्वं दर्शितं भवति ; प्रारब्धकर्मस्थित्यनुरोधेन तस्यापि लेशाविद्याङ्गीकारात्। "अहं ब्रह्मास्मी''त्यादिव्यवहारोऽपि यद्यन्तःकरणतदाकारवृत्त्यादिरूपः, तर्हि तस्याप्यध्यासपूर्वकत्वमस्त्येव। अथ स्वरूपानुभवरूपः, न तर्हि स व्यवहार इति निरवद्यम् ॥

प्रदीपः

भावः ॥ *ननु*--दहरोपासनादयो न कर्तुर्ब्राह्मणत्वाद्यभिमानमपेक्षन्ते ; न वा फलकामनामित्युपासनाकाण्डीयव्यवहाराः, नाध्यासपूर्वकाः, अशनायाद्यतीतापेतब्रह्म-क्षत्रादिभेदात्मतत्त्वज्ञानपूर्वकत्वादिति, नान्तःकरणाद्यध्यासपूर्वकः सर्वोऽपि व्यवहार इत्याशङ्क्याह--*असंसारीति* ॥ अन्तःकरणादावप्यहं-ममाभिमानरहितमित्यर्थः। तथाचोपासनादिव्यवहारोऽपि नात्मतत्त्वज्ञानिनां वर्तते, किन्तु तज्ज्ञानविधुराणामेव, इति कस्यापि व्यवहारस्य मोक्षशास्त्रपर्यन्तप्रयुक्तस्य न नाध्यासपूर्वकत्वमिति निष्कर्षः ॥ *ननु*—ज्योतिष्टोमादिव्यवहारा अपि न देहात्मविवेकमात्रमूलाः, किन्तु पूर्वोक्तासंसार्यात्मतत्त्वज्ञानपूर्वका एवेति शास्त्रीयव्यवहारस्याध्यासपूर्वकत्वं बाधितमित्याशङ्क्याह--*अनुपयोगादिति* ॥ 'अधिकारे'इत्यनुवज्यते। अशनायाद्यतीतात्मतत्त्वज्ञानस्येति चाध्याह्रियते। "अधिकारविरोधादि"त्यत्र तु उक्तविधात्मतत्त्वज्ञानस्येत्यनुषङ्गमात्रम्। देहात्मविवेकज्ञानेनैवाधिकारनिर्वाहाद् नोक्तविधात्मतत्त्वज्ञानापेक्षा शास्त्रीयव्यवहाराणामिति भावः। *विरोधादिति* ॥ पूर्वोक्तप्रकारेण शास्त्रीयव्यवहारेषु अशनायादीनामपेक्षितत्वाद् अशनायाद्यतीतत्वमधिकारविरुद्धमिति भावः। *ननु* एवमपि साधनचतुष्टयसम्पन्नानां मोक्षशास्त्र-

प्राक्च(१) तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते ।

भामती

स्यादेतत्—यद्यपि विरोधानुपयोगाभ्यामौपनिषदः पुरुषोऽधिकारे नापेक्ष्यते ; तथाऽप्युपनिषद्भ्योऽवगम्यमानः शक्नोत्यधिकारं निरोद्धुम् । तथाच परस्परापहतार्थत्वेन कृत्स्न एव वेदः प्रामाण्यमपजह्यादित्यत आह—*प्राक् च तथाभूतात्मेति* ।

ऋजुप्रकाशिका

दिति* ॥ शङ्कते—*स्यादेतदिति* ॥ ततः किमिति ? अत आह—*तथाच परस्परेति* ॥ अविद्यावदधिकारिणि सत्यधीतवेदान्तेन तेनौपनिषदः पुरुषोऽवगम्यते ; औपनिषदपुरुषावगमेन चाविद्यावत्त्वभङ्गादधिकार्यलाभः, इति परस्परव्याहतार्थत्वेनाधिकारिशून्यो वेदः कृत्स्नोऽप्यविद्यावद्विषयत्वमपि न प्राप्तः, इति प्रामाण्यमपि जह्यादित्यर्थः । औपनिषदपुरुषावगमानन्तरमविद्यावत्त्वभङ्गेऽपि तदवगमात् प्रागविद्यावत्त्वसत्त्वादविद्यावद्विषयत्वसंभवेन नोक्तदोष इत्याह—*अत आहेति* ॥ *अनुपजातेनेति* ॥ औपनिषद-

पञ्चपादिका

प्राक् च तथाभूतात्मविज्ञानात्प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तत इति*॥ "तत्त्वमसी"तिवाक्यार्थावगमादर्वागविद्याकृतं संसारमहमुल्लेखमाश्रित्य प्रवर्तमानं शास्त्रं नाविद्यावद्विषयत्वमतिवर्तते । तस्माद् युक्तमुक्तं प्रत्यक्षादीनां प्रमाणानां शास्त्रस्य चाविद्यावद्विषयत्वम् ॥

पञ्चपादिकाविवरणम्

प्राक् चेत्यादि भाष्यव्याख्यानम्—*"तत्त्वमसी"ति वाक्यार्थावगमादित्यादि* ॥ कथं पुनर्व्यतिरेकज्ञानेनाध्यासस्य सहवृत्तिः ? परोक्षापरोक्षविभागात् चन्द्रद्वित्वज्ञानवदविरोध इति केचित् ।

तत्त्वदीपनम्

वाक्यार्थावगमोत्तरकालमपि शास्त्रस्याविद्यावद्विषयत्वाद् भाष्य-टीकयोरनुपपत्तिमाशङ्क्यावगमशब्देन साक्षात्कारस्य विवक्षितत्वान्नानुपपत्तिरित्यभिप्रायेणाह—*प्राक् चेति* ॥ भाष्यव्यावर्त्यां शङ्कामाह—*कथं पुनरिति* ॥ अदृष्टार्थप्रवृत्तौ व्यतिरेकज्ञानं तावदपेक्षितम् । ज्ञानाध्यासयोस्तु निवर्त्य-निवर्तकभावप्रसिद्धेर्न शास्त्रीयस्य व्यवहारस्याविद्यावद्विषयत्वमित्यर्थः । निवर्त्य-निवर्तकभावोऽसिद्ध इत्याह—*परोक्षेति* ॥ अपरोक्षभ्रमस्यापरोक्षज्ञाननिवर्त्यत्वनियमाद् व्यतिरेकज्ञानस्य च परोक्षत्वान्न निवर्तकत्वमित्यर्थः ॥

वार्तिकम्

यद्वा—एवमयं ग्रन्थो योजनीयः—एवं प्रत्यक्षादिप्रमाणानामविद्यावद्विषयत्वं समर्थ्य, शास्त्राणामविद्यावद्विषयत्वं समर्थयति—*शास्त्रीयेत्वित्यादिना* ॥ व्याख्यानं पूर्ववत् । किं तादृशात्मविज्ञानमनुष्ठानादुत्तरकालं तदधिकारेऽपेक्ष्यते ? तत्पूर्वकालं वा ? नाद्य इत्याह—*अनुपयोगादिति* ॥ न द्वितीय इत्याह—"*अधिकारविरोधाच्चेति*॥ माऽस्तु तर्हि शास्त्रार्थानुष्ठानात् पूर्वं तथाभूतात्मविज्ञानापेक्षा, प्रकृते किमायातमिति ? अत आह-*प्राक् चेत्यादिना* ॥ अविद्यावान् विषयो नियोज्यो यस्य, तद् अविद्यावद्विषयम् ; तस्य

भाष्यभावप्रकाशिका

तथाऽपि कथं शास्त्रीयप्रवृत्तेराध्यासिकत्वम् ? नहि देहादिव्यतिरिक्तात्मज्ञाने बाधके तदध्यासानुवृत्तिरित्याशङ्क्य, तस्य पारोक्ष्यादपरोक्षाध्यासविरोधे तत्पूर्विकैव शास्त्रीयप्रवृत्तिरित्याह—*प्राक्त्विति* ॥

१ 'प्राक्त्वि'ति भाष्यभावप्रकाशिकादृतः पाठः ।

भामती

सत्यमौपनिषदपुरुषाधिगमोऽधिकारविरोधी, तस्मात्तु पुरस्तात्कर्मविधयः स्वोचितं व्यवहारं निर्वर्तयन्तो नानुपजातेन ब्रह्मज्ञानेन शक्या निरोद्धुम् । नच परस्परापहतिः ; विद्याविद्यावत्पुरुषभेदेन व्यवस्थोपपत्तेः । यथा "न हिंस्यात्सर्वा भूतानि" इति साध्यांशनिषेधेऽपि "श्येनेनाभिचरन् यजेत" इति शास्त्रं प्रवर्तमानं "न हिंस्यादि"त्यनेन न विरुध्यते, तत्कस्य हेतोः ? पुरुषभेदादिति । अपजितक्रोधारातयः पुरुषा निषेधेऽधिक्रियन्ते, क्रोधारातिवशीकृतास्तु श्येनादिशास्त्र इति ॥

ऋजुप्रकाशिका

पुरुषावगमात् प्राग्विरोधिनोऽसंजातत्वेनानुपजातत्वं बोध्यम् । यच्चोक्तं परस्परापहतार्थत्वमिति, तदपि नेत्याह—*नचेति* ॥ यद्यप्येकस्यैव पुरुषस्य कालभेदेन विद्यावत्त्वाविद्यावत्त्वे उपपद्येते ; तथाऽपि तत्तत्कालभेदात् तत्तद्विशिष्टपुरुषभेदमाश्रित्य तथोक्तम् । तथाच—भविष्यता विद्यावत्त्वेन पूर्वमविद्यावन्तमाश्रित्य प्रवर्तमानं शास्त्रं नापहतप्रामाण्यमिति भावः । तत्रानुकूलं दृष्टान्तमाह—*यथा न हिंस्यादिति* ॥ *अभिचरन्= शत्रुवधकामः । "न विरुध्यते" इत्यत्र हेत्वाकाङ्क्षोद्भावनापूर्वकं हेतुमाह—*तत् कस्य हेतोः ? पुरुषभेदादिति* ॥ पुरुषभेदमेवाह—*अपजितेति* ॥ अपजिताः क्रोधाद्या अरातयो यैस्ते तथोक्ताः, क्रोधाराल्यवशीकृता इत्यर्थः । "श्येनादिशास्त्रे" इत्यनन्तरम्—'अधिक्रियन्ते' इति शेषः । तथाच यथा "न हिंस्यादि"ति निषेधशास्त्रे "श्येनेने"ति शास्त्रे चाधिकारिभेदाद् न तयोर्विरोधः ; तद्वदौपनिषदपुरुषावगमोत्तरकाले विद्यावत्त्वेऽपि तत्पूर्वमविद्यावत्त्वादविद्यावन्तं पुरुषमाश्रित्य प्रवर्तमानं शास्त्रमप्यविरोधादविद्यावद्विषयमेवेति भावः ।

पञ्चपादिकाविवरणम्

सूक्ष्मशरीरस्यात्माविद्याकार्यत्वात् कार्य-कारणयोर्भेदाभेदभावात् स्थूलशरीरस्याग्न्ययःपिण्डवत् सूक्ष्मशरीरेण संश्लेषाद् भेदज्ञानेऽप्यध्यास इत्यपरे । सर्वथाऽपि यावदपरोक्षज्ञानमध्यासो न निवर्तत इति भावः । *तस्मादित्यध्यासप्रमाणोपसंहारः । नच प्रत्यक्षानुमानार्थापत्तिभिरेवाध्याससिद्धिः, किन्त्वागमोऽपि विधेर्बोद्धारमधि-

ऋजुविवरणम्

"तदेवे"ति व्यर्थम् ; पूर्वप्रमाणैः साधितत्वात्, इत्याशङ्क्याह—*नच प्रत्यक्षेति* ॥ आत्मशब्दस्य विशिष्टवाचित्वमुक्तम्, अस्मदर्थश्चाहंप्रत्ययिसंभिन्न इति, तदयुक्तम् ; विशिष्टे प्रयोगाभावात्, प्रसिद्धार्थहानेना-

तत्त्वदीपनम्

स्वयूथ्यमतमाह—*सूक्ष्मशरीरस्येति* ॥ आत्मा चाविद्या चेत्यात्माऽविद्ये, तत्कार्यत्वादित्यर्थः । मिथ्याज्ञान-तत्संस्कारयोर्निमित्तत्वमभिप्रेत्य—"आत्माविद्याकार्यत्वादि"त्युक्तम्, शरीरात्मनोरुपादानोपादेयभावाद् भिन्नाभिन्नत्वम्, ततश्च भेदज्ञाने सत्यप्यभेदज्ञानानुवृत्तिर्युक्तेत्यर्थः । कथं तर्हि स्थूलशरीराभिमानानुवृत्तिरिति ? तत्राह—*स्थूलशरीरस्येति* ॥ सूक्ष्मशरीरारम्भकस्य कर्मवृन्दस्य स्थूलशरीरं विना स्वफलदानेऽसमर्थत्वात् स्वारभ्यभूतद्वारेण वा तदारम्भकत्वम् । एतदभिप्रेत्योक्तम्—*संश्लेषादिति*॥ किं तर्ह्यादर्तव्यमिति ? अत आह—*सर्वथेति*॥ आचार्यमतस्येतरस्य वाऽनुसरणेऽपीत्यर्थः । प्रमाणानवद्यतामनुपसंहृत्य प्रमेयोपसंहरणे को हेतुः ? इत्याशङ्क्यानुपसंहरणमसिद्धमित्याह—*तस्मादिति* ॥ "सर्वाणि शास्त्राणी"त्यत्र शास्त्रीयव्यवहारस्याविद्यावद्विषयत्वसिद्धेः—"तथा ही"त्येतत् कथम् ? इत्याशङ्क्य तात्पर्यमाह—*नचेति* ॥ "ब्राह्मणो यजेते"त्यादौ चिदचितोरैक्यावभासो न प्रतीयते, इत्याशङ्क्याह—*विधेरिति* ॥ मदभिलषितसाधनमिदं कर्मेति प्रतिपत्तिसमर्थस्याधिकारिणः कर्तव्यविशेषोपदेशात्

भाष्यभावप्रकाशिका

अथवा—कर्म-ज्ञानकाण्डयोः कर्त्रकर्त्रात्मविषयत्वात् परस्परविगीतार्थत्वादप्रामाण्यं स्यादित्याशङ्क्य, विद्याऽविद्यावत्पुरुषभेदेन व्यवस्थोपपत्तेर्न विरोध इत्याह—*प्राक्त्विति* ॥ न केवलमुक्तप्रमाणैरेवाध्यास-

प्रदीपः

व्यवहारो नाध्यासपूर्वक इति शङ्कावारणार्थमाह—*प्राक् च तथाभूतात्मविज्ञानादिति* ॥ तथाच मोक्षशास्त्रपर्यन्तानां सर्वेषा-

तथाहि—"ब्राह्मणो यजेत" इत्यादीनि शास्त्राण्यात्मनि(१)वर्णाश्रम-वयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते ।

भामती

अविद्यावत्पुरुषविषयत्वं नातिवर्तत इति यदुक्तं तदेव स्फोरयति—*तथाहीति* ॥ वर्णाध्यासः—'राजा राजसूयेन यजेत' इत्यादिः । आश्रमाध्यासः—'गृहस्थः सदृशीं भार्यां विन्देत'

ऋजुप्रकाशिका

भाष्ये—*वर्णाश्रम-वयोऽवस्थादिविशेषाध्यासमाश्रित्येत्युक्तम्*, तत्र वर्णाध्यासम्, आश्रमाध्यासम्, वयोऽध्यासम्, अवस्थाद्यध्यासं च क्रमेण स्वयमाह—*वर्णाध्यास इत्यादिना* ॥ "ब्राह्मणो बृहस्पतिसवेन यजेत"

पञ्चपादिका

तदेव दर्शयति—*तथाहि—"ब्राह्मणो यजेते"त्यादीनि शास्त्राण्यात्मन्यतदध्यासमाश्रित्य प्रवर्तन्ते । वर्ण-वयोऽध्यासः "अष्टवर्षं ब्राह्मणमुपनयीते"त्यादिः । आश्रमाध्यासः—"न ह वै स्नात्वा भिक्षेते"ति । अवस्थाध्यासः—"यो ज्योगामयावी स्यात् स एतामिष्टिं निर्वपेदि"ति । आदिशब्देन "यावज्जीवं जुहुयादि"ति जीवनाध्यासः । एवमध्याससद्भावं प्रसाध्य, "स्मृतिरूपः" इत्यादिना "सर्वथाऽपि त्वन्य-

पञ्चपादिकाविवरणम्

कारिणं ब्राह्मणादिशब्दैरनुवदंश्चेतनाचेतनयोरैक्यावभासं दर्शयतीत्याह—*तदेव दर्शयति तथाहीति* ॥ *यो ज्योगामयावी=उज्ज्वलामयवानित्यर्थः । वृत्तसङ्कीर्तनपूर्वकमध्यासो नामेति लक्षणभाष्यमवतारयति—

तत्त्वदीपनम्

चेतनस्तावत् प्रतीयते, तस्य च वस्तुतो ब्राह्मणत्वाद्यसंभवादारोपितैक्यं प्रतीयत इत्याशयः । अध्याससद्भावं प्रसाध्य लक्षितं परामृशतीत्यभिधानात् प्रसाधनस्य पूर्वकालीनत्वं लक्षणस्योत्तरकालीनत्वं प्रतिभाति, तत्राह—*वृत्तेति* ॥ लक्षितमध्याससद्भावं प्रसाध्य परामृशतीत्यन्वयः ॥

कस्य युष्मदर्थस्य कस्मिन्नस्मदर्थेऽध्यासः ? इति विमर्शे तस्योत्तरम्—"एतस्मिन्नि"ति शङ्का स्यात्, तत्राह—*भाष्यमिति* ॥ "पुत्र-भार्यादिष्वि"त्यादिनाऽध्यासानुभवः प्रदर्श्यत इति शङ्का स्यात्, नच सोपपद्यते ; अनुभवस्य

वार्तिकम्

भावस्तत्त्वमित्यर्थः । कुत एतदध्यवसीयते ? इति चेत्, शास्त्रलिङ्गेभ्य एवेत्याह—तथाहि "ब्राह्मणो यजेते"त्यादीनि शास्त्राण्यात्मनि वर्णाश्रम-वयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्त इति* ॥ "ब्राह्मणो बृहस्पतिसवेन यजेत," "राजा राजसूयेन यजेत", "वैश्यो वैश्यस्तोमेन यजेते"त्यादीनि शास्त्राणि ब्राह्मणोत्वादिवर्णाध्यासमात्मनि पुरस्कृत्य प्रवर्तन्ते ; "ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेते"त्यादीनि चाश्रमाध्यासम् ;"अष्टवर्षं ब्राह्मणमुपनयीते"त्यादीनि च वयोऽध्यासम् ; "जातपुत्रः कृष्णकेशोऽग्नीनादधीते"त्या-

भाष्यभावप्रकाशिका

सिद्धिः, किन्त्वागमोऽपि विधेर्बोद्धारमधिकारिणं ब्राह्मणादिशब्दैरुपदिशंश्चेतनाचेतनयोरैक्याभासं दर्शयतीत्याह—*तथाहीति* ॥

प्रदीपः

मविद्यावत्पुरुषाश्रितत्वमेव ; अन्यथा साधनचतुष्टयसम्पत्तिमात्रेण मुक्त्यापत्त्या मोक्षशास्त्रमेव वितथमापद्येतेति सुष्ठूक्तम्—"इममेवाध्यासं पुरस्कृत्य सर्वे प्रमातृ-प्रमाण-प्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधि-प्रतिषेध-

(१) "आत्मन्यतदाध्यासमि"ति पञ्चपादिकादृतः पाठः; तत्रातदाध्यासो वर्णाश्रमाद्यध्यास इति भावः ।

भामती

इत्यादिः । वयोऽध्यासः—"कृष्णकेशोऽग्नीनादधीत" इत्यादिः । अवस्थाध्यासः—'अप्रतिसमाधेयव्याधीनां जलादिप्रवेशेन प्राणत्यागः' इति । आदिग्रहणं पातकोपपातक-संकरीकरणापात्रीकरण-मलिनीकरणाद्यध्यासोपसंग्रहार्थम् । तदेवमात्मानात्मनोः परस्पराध्यासमाक्षेपसमाधानाभ्यामुपपाद्य, प्रमाण-प्रमेयव्यवहारप्रवर्तनेन च दृढीकृत्य तस्यानर्थहेतुतामुदाहरणप्रपञ्चेन प्रतिपादयितुं तत्स्वरूपमुक्तं स्मार-

ऋजुप्रकाशिका

इत्यादिशब्दार्थः । भाष्यस्थादिशब्दस्यार्थमाह—*आदिग्रहणमित्यादिना* ॥ पातकेति* ॥ *पातकम्=ब्रह्म-वधादि, *उपपातकम्=गोवधादि, सङ्करीकरणादीनि च मनुनोक्तानि—

"खराश्वोष्ट्रवराहाणामजाविक वधस्तथा । सङ्करीकरणं ज्ञेयं मीनाहि-महिषस्य च ॥
निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयमसत्यस्याभिभाषणम् ॥
कृमि कीट-वयो हत्याऽमेध्यानुगतभोजनम् । फलैधः कुसुमस्तेयमधैर्यं च मलावहम् ॥"

इति । आदिशब्दात् तदुक्तजातिभ्रंशकरादि गृह्यते—

"ब्राह्मणस्य रुजःकृत्या-घ्रातिरघ्रेय मद्ययोः । जैह्मं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम् ॥"

इति । *तस्य=अध्यासस्य । *तत्=स्वरूपम् । *एतत्=अतस्मिन् तद्बुद्धिरित्येतत् । अनर्थहेतुत्वात्

वार्तिकम्

दीनि वावस्थाध्यासमिति । 'अवस्थादी'त्यादिशब्देन "ज्योतिष्टोमेन यजेत स्वर्गकामः," "गतश्रियोधार्योऽग्निरि"त्यादीन्यात्मनि काम-गतश्रीत्वाद्यध्यासं पुरस्कृत्य प्रवर्तन्त इत्यभिप्रेतम् । एवं "ब्राह्मणो न सुरां पिबेत्," "ब्राह्मणः प्रव्रजेदि"त्यादीनि निषेध-मोक्षपराणि शास्त्राणि वर्णाश्रमाद्यध्यासपुरस्कारेण प्रवृत्तानीत्युदाहर्तव्यानि । तस्माच्छास्त्रलिङ्गान्येव तेषामध्यासपूर्वकत्वे प्रमाणानि, इति सिद्धम्—प्रमाण-प्रमेयादि-व्यवहारान्यथानुपपत्तिर्निर्दिष्टतयाऽऽत्मानात्मनोः परस्पराध्यासे प्रमाणमित्याशयः ॥

तदेवमनुपपत्तिप्रमाणेनात्मानात्मनोः परस्पराध्यासे सिद्धे दृढमूलत्वात्तत्प्रत्यक्षमपि स्वविषयात्प्रच्याव्यान्यथा न नेतुं शक्यते, इति तदपि तत्र प्रमाणं सिद्धं भवतीत्यभिप्रेत्य, संप्रति तत्र पूर्वोदाहृतप्रत्यक्ष-प्रमाणमेव विशदीकृत्य दर्शयितुमनुपपत्तिप्रमाणव्यवधानात् शिष्यस्याध्यासलक्षणविस्मरणं मत्वा, तमनुक-

भाष्यभावप्रकाशिका

तत्र *वर्णवयोऽध्यासः*—"अष्टवर्षं ब्राह्मणमुपनयीत" इत्यादिः ; *आश्रमाध्यासः*—"न ह वै स्नात्वा भिक्षेते"त्यादिः ; *अवस्थाध्यासः—"ज्योगामयावी यजेत्" इति ; *ज्योगामयः = उज्ज्वलामयवानित्यर्थः ॥ "यावज्जीवं जुहुयात्" इति जीवनाध्यासो गृह्यते । कस्य युष्मदर्थस्य कस्मिन्नस्मदर्थे तद्विपर्ययेण वाऽध्यास इति विशेषतः प्रदर्शयितुमुपपादितस्याध्यासस्य लक्षणं परामृशति—

प्रदीपः

मोक्षपराणि चेति । किं बहुना ? स्पष्टमानम एवाविद्यावत्पुरुषविषयत्वमध्यासस्य प्रतिपादयतीत्याह—*तथाहि*—*ब्राह्मणो यजेतेति* ॥ ब्राह्मणत्वं हि शरीरधर्म इति शरीरात्माध्यासवन्तमेव "ब्राह्मणो यजेते"ति वाक्यमधिकरोति । "ब्राह्मणो यजेते"ति वाक्यं वर्णविशेषाध्यासमाश्रित्य प्रवर्तते । "गृहस्थः सदृशीं भार्यां विन्दे"त्याश्रमविशेषाध्यासम्, "जातपुत्रः कृष्णकेशोऽग्नीनादधीते"ति वयोविशेषाध्यासम्, "अप्रतिसमाधेयव्याधिर्जलप्रवेशादिनाऽऽत्मानं हन्यादि"त्यादि त्ववस्थाविशेषाध्यासमाश्रित्य प्रवृत्तानीति वर्णाश्रमवयोऽवस्थाविशेषाध्यासमाश्रित्येत्यस्य क्रमेणोदाहरणानि । तदेवं लक्षणप्रमाणाभ्यां साधितमध्यासं

अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचाम। तद्यथा—पुत्रभार्यादिषु विकलेषु सकलेषु वा, 'अहमेव विकलः सकलो वे'ति बाह्यधर्मानात्मन्यध्यस्यति।

भामती

यति—*अध्यासो नाम—अतस्मिंस्तद्बुद्धिरित्यवोचाम* ॥ "स्मृतिरूपः परत्र पूर्वदृष्टावभासः" इत्यस्य संक्षेपाभिधानमेतत्। तत्राहमिति धर्मितादात्म्याध्यासमात्रं ममेत्यनुत्पादितधर्माध्यासं नानर्थहेतुः, इति धर्माध्यासमेव ममकारं साक्षादशेषानर्थसंसारकारणमुदाहरणप्रपञ्चेनाह—*तद्यथा पुत्रभार्यादिष्विति* ॥ देहतादात्म्यमात्मन्यध्यस्य देहधर्मं पुत्र-कलत्रादिस्वाम्यं च कृशत्वादिवदारोप्याह—*अहमेव विकलः

ऋजुप्रकाशिका

धर्म्यध्यासः प्रथमं वक्तव्य इत्यत आह—*तत्राहमिति धर्मितादात्म्येति* ॥ *ममेत्यनुत्पादितधर्माध्यासमि*त्येतद् धर्मितादात्म्याध्यासमात्रमित्यस्य विशेषणम्। *ममकारमिति* ॥ मम भार्या, मम पुत्रः, मम क्षेत्रम्,

पञ्चपादिका

स्यान्यधर्मावभासतां न व्यभिचरती"त्यन्तेन भाष्येण लक्षितं निरुपचरितमतदारोपम्—*अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचामेति* परामृशति—कस्य युष्मदर्थस्य कस्मिन्नयुष्मदर्थे तद्विपर्ययेण चाध्यास इति विवेकतः प्रदर्शयितुम्। अतस्मिन्नयुष्मदर्थेऽनिदंचिति तद्बुद्धिर्युष्मदर्थावभास इत्यर्थः। तदाह—*तद्यथा पुत्रभार्यादिष्वित्यादि* ॥

पञ्चपादिकाविवरणम्

एवमध्यासमद्भावं प्रसाध्येत्यादिना ॥ किमिति पुनरत्रोक्तलक्षणानुवाद इति? तदाह—*कस्य युष्मदर्थस्येति* ॥ भाष्यं योजयति—*कस्मिन्नयुष्मदर्थ इत्यादिना* ॥ "आत्माऽनात्मनोरितरेतराध्यासं पुरस्कृत्ये"त्यादिना प्रत्यक्षतो दर्शितस्याध्यासस्य विभज्य प्रदर्शनायोत्तरं भाष्यमित्याह—*तदाह तद्यथा पुत्रभार्यादि-

तत्त्वदीपनम्

पुरोक्तत्वादित्याशङ्क्याह—*आत्मानात्मनोरिति* ॥ *विभज्य प्रदर्शनायेति* ॥ देहविशिष्टे साकल्यादीनामारोपः, देहस्य चान्तःकरणविशिष्टे, तस्य च प्राक्तनाहंकारसंस्कारविशिष्टात्मनीत्येवंरूपेण विभागप्रदर्शनायेत्यर्थः ॥

वार्तिकम्

स्मयन् तत् स्मारयति—*अध्यासो नामातस्मिंस्तद्बुद्धिरित्यवोचामे"ति* ॥ "स्मृतिरूपः परत्र पूर्वदृष्टावभासः" इत्यनेनेति शेषः। यथाचैतत् तथा पूर्वमेव व्याख्यातम्। उक्तलक्षणमध्यासं स्मारयित्वा तत्र प्रत्यक्षप्रमाणमुदाहरति—तद्यथा पुत्रभार्यादिषु विकलेषु सकलेषु वाऽहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यतीति* ॥ आत्मनोऽत्यन्तभिन्नतयोपलब्धानामपि पुत्रादीनां धर्मा विकलत्वादय

भाष्यभावप्रकाशिका

अध्यासो नामेति ॥ अध्यासस्यानर्थहेतुतां दर्शयितुमध्यासविशेषानुदाहरति—*तद्यथेति* ॥ प्रसिद्धव्यतिरेकयोरपि पुत्रादिगतसाकल्य-वैकल्ययोरनुभवत एव मुख्याध्याससिद्धावप्रसिद्धव्यतिरेकाणां कृशत्वादीनां मुख्याध्यासः स्यादिति किमु वक्तव्यमित्यभिप्रत्याह—*पुत्र-भार्येति* ॥ बाह्यधर्माः,

प्रदीपः

सोदाहरणं प्रदर्शयितुं पूर्वोक्तमध्यासस्वरूपं स्मारयति—*अध्यासो नामेति* ॥ "मम"त्यनुत्पादितधर्माध्यासः—"अहमि"ति-धर्मिमात्राध्यासो नानर्थहेतुः, इति धर्म्यध्यासमेकरूपत्वाद्विभजनानर्हं मत्वा धर्माध्यासं सोदाहरणप्रपञ्चमुपक्षिपति—*पुत्रभार्यादिष्विति* ॥

भामती

सकल इति* ॥ स्वस्य खलु साकल्येन स्वाम्यसाकल्यात् स्वामीश्वरः सकलः संपूर्णो भवति। तथा स्वस्य वैकल्येन स्वाम्यवैकल्यात् स्वामीश्वरो विकलोऽसंपूर्णो भवति, इति बाह्यधर्मा ये वैकल्यादयः स्वाम्यप्रणालिकया संचारिताः शरीरे,तानात्मन्यध्यस्यतीत्यर्थः। यदा च परोपाध्यपेक्षे देहधर्मे स्वाम्य इयं गतिः,

ऋजुप्रकाशिका

ममेमान्युपकरणानि, इत्येवंरूपमित्यर्थः। "बाह्यधर्मानात्मन्यध्यस्यती"त्युक्तं भाष्ये, तद्विशदयति—*स्वस्य खल्वित्यादिना* ॥ स्वम्=स्वकीयं वस्तु, तस्येत्यर्थः। स्वामीत्येतस्य विवरणम्—*ईश्वर इति* ॥ सकल इत्यस्य विवरणम्—*सम्पूर्ण इति* ॥ एवमग्रेऽपि "स्वामी"त्यस्य विवरणम्—*ईश्वर इति* ॥ विकल इत्यस्य विवरणम्—*असम्पूर्ण इति* ॥ *बाह्यधर्मा इति* ॥ इत्येवंरूपा बाह्यधर्माः, ये साकल्य-वैकल्यादयः स्वाम्यप्रणाडिकया शरीरे सञ्चारिताः, तानात्मन्यध्यस्यतीत्यर्थ इत्यर्थः। *परोपाध्यपेक्षे=पुत्र-भार्यादिलक्षणो-

पञ्चपादिका

ननु प्रणव एव विस्वरः ; नहि पुत्रादीनां वैकल्यं साकल्यं वाऽऽत्मनि मुख्यमध्यस्यति, मुख्यो ह्यतदारोपो दर्शयितुं प्रारब्धः, *सत्यम्* ; स एव निदर्श्यते। कथम्? तद्यथा बालके प्रातिवेश्यमात्रसंबन्धिना केनचिद्वस्त्रालङ्कारादिना पूजिते निरुपचरितमात्मानमेव पूजितं मन्यते पिता। पूजयिताऽपि पितरमेवापूपुजमिति मन्यते। यतो न बालकस्य पूजितत्वाभिमानः ; अव्यक्तत्वात्, तथैव राजानमुपहन्तुकामोऽनन्तरो विजिगीषुस्तद्राष्ट्रे ग्राममात्रमप्युपहत्य तमेवोपघ्नन्तमात्मानं मन्यते, सोऽप्युपहतोऽस्मीति संतप्यते। तदेवं प्रसिद्धव्यतिरेकस्यात्मनि मुख्य एवाध्यासो दृष्टः, किमु वक्तव्यम्—कृश-स्थूलाद्यभिमानस्य मुख्यत्वमिति कथयितुमाह—*अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यतीति* ॥ बाह्येषु पूजादेर्धर्ममात्रस्यैव युष्मदर्थस्याध्यासः ॥

अस्मदर्थश्चाहंप्रत्ययिसम्भिन्न एवानिदंचिदंशो विषयः, न पुनः शुद्ध एवाहंप्रत्ययिन इवाध्यासेऽ-

पञ्चपादिकाविवरणम्

ष्वित्यादि* ॥ *तथाऽन्तःकरणधर्मानित्यतः* प्राक्तनो ग्रन्थः स्पष्टार्थः। अत्रोत्तरोत्तराध्यासविशिष्टे पूर्वपूर्वाध्यास इति कथयितुमात्मन्यध्यस्यतीत्यात्मशब्दार्थमाह—अस्मदर्थश्चाहंप्रत्ययिसम्भिन्न इति* ॥ *ननु*

ऋजुविवरणम्

प्रसिद्धार्थस्वीकारे प्रयोजनाभावात्, अथवा—प्रसिद्धार्थत्वात् किं व्याख्यानेन? इत्याशङ्क्याभिप्रायमाह—*अत्रोत्तरोत्तराध्यासेति* ॥ यद्यपि देहाद्यध्यासस्यैव वस्तुत उत्तरत्वम् ; तथाऽपि भाष्यकारेण तत्पुरःसरमेवाध्यासस्य प्रदर्शितत्वात्

तत्त्वदीपनम्

स्पष्टार्थ इति ॥ उत्सर्गतः स्पष्टार्थत्वम्। कानिचित्त्वस्पष्टपदानि व्याख्यायन्त इत्यर्थः। आत्मशब्दस्य प्रसिद्धार्थत्वात् किं तद्व्याख्यानेनेति? तत्राह—*अत्रोत्तरेति* ॥ अत्राध्यासानां मध्य इत्यर्थः। पाठक्रममभिप्रेत्योत्तरेत्युक्तम्।

वार्तिकम्

आत्मन्यारोप्यन्त इति सर्वप्रत्यक्षसिद्धम्, किमु वक्तव्यं देहादीनां प्रत्यक्तया भासमानानां गौरत्वादयो धर्मा आत्मन्यारोपिताः प्रत्यक्षसिद्धा इति !! इति कैमुतिकन्यायसूचनार्थं प्रथमं बाह्यधर्माध्यासप्रदर्शनं कृतमिति द्रष्टव्यम्॥ यद्वा—पुत्र-भार्यादीनामनात्मत्वे चार्वाकादीनामप्यविवाद एव, इति सर्ववाद्यविप्रतिपत्तिविषयतया प्रथमतस्तद्धर्माध्यासाध्यक्षमुदाहृतम्। *ननु*—पुत्र-भार्यादीनां धर्मिणामनध्यासे कथं तद्धर्माणां सकलत्वादीनामात्मन्यध्यास इति—चेत्, *न* ; तेषाम्—'अहमि'त्यध्यासाविषयत्वेऽपीन्द्रियवदध्यस्तदेहसंबन्धितया ममाध्यासविषयत्वादनध्यासासिद्धेः। एवं बाह्यधर्माध्यासमात्मनि सर्वप्रत्यक्षसिद्धं प्रदर्श्यात्मप्रत्यक्षोप-

तथा देहधर्मान्'--स्थूलोऽहम्' 'कृशोऽहम्' 'वीरोऽहम्' 'तिष्ठामि' 'गच्छामि' 'लङ्घयामि' चेति। तथा-इन्द्रियधर्मान्-'मूकः' 'काणः' 'क्लीबः' 'बधिरः' 'अन्धोऽहमि'ति।

भामती

तदा कैव कथाऽनौपाधिकेषु देहधर्मेषु कृशत्वादिषु ? इत्याशयवानाह—*तथा देहधर्मानिति* ॥ देहादेरप्यन्तरङ्गाणामिन्द्रियाणामध्यस्तात्मभावानां धर्मान्मूकत्वादीन्, ततोऽप्यन्तरङ्गस्यान्तःकरणस्याध्यस्तात्मभावस्य धर्मान् काम-संकल्पादीन् आत्मन्यध्यस्यतीति योजना। तदनेन प्रपञ्चेन धर्माध्यासमुक्त्वा

ऋजुप्रकाशिका

पाध्यपेक्षे। इन्द्रियेष्वात्मतादात्म्याध्यासाभाव आत्मनीन्द्रियधर्माध्यासायोगः, तदर्थमाह—*अध्यस्तात्मभावानामिति* ॥ इन्द्रियाणामित्यस्य विशेषणम्। अन्तःकरण *आत्मतादात्म्याध्यासाभाव आत्मन्यन्तःकरणधर्माध्यासायोगः, तदर्थमाह—*अध्यस्तात्मभावस्येति* ॥ अन्तःकरणस्येत्येतस्य विशेषणम्। "अहं-

पञ्चपादिका

ध्यासान्तरानास्कन्दितः। *देहधर्मान् कृशत्वादीनिति* ॥ धर्मिणोऽपि ; धर्मशब्दस्तु मनुष्यत्वादिधर्मसमवायिन एवाध्यासः, न 'देहोऽहमि'ति कथयितुम्। तन्निमित्तश्च शास्त्रेणेतश्चेतश्च नियमः क्रियते।

पञ्चपादिकाविवरणम्

शरीरमप्यध्यस्यते, न धर्मा एवेत्यत आह—*धर्मिणोऽपीति* ॥ ग्रहणमित्यध्याहारः। धर्मशब्दस्तर्हि किमिति गृहीत इति ? अत आह—*धर्मशब्दस्त्विति* ॥ शास्त्रीयव्यवहारमूलत्वेन प्राधान्याच्च धर्माध्यासस्य प्राधान्येन ग्रहणमित्याह—*तन्निमित्तश्चेति* ॥

ऋजुविवरणम्

तन्निर्देशाभिप्रायेणैवमुक्तम्। तन्निर्देशोऽपि समूलतारतम्येन प्रतिपादनस्य सौकर्यापेक्षया ; तस्यैव च व्यवहारप्रत्यासत्तेरिति मन्तव्यम्। *ननु*—नान्तःकरणधर्मत्वे कामादीनां प्रमाणमस्ति ; कथं सिद्धवदुपादानम् ? इत्याशङ्क्याह—

तत्त्वदीपनम्

देहधर्ममात्राध्यास उक्तः, स नोपपद्यते, धर्मिणोऽप्यध्यासदर्शनादिति शङ्कते—*ननु शरीरमिति* ॥ अपेक्षितं पूरयति—*ग्रहणमिति* ॥ धर्म्यध्यासे धर्माध्यासस्यार्थसिद्धत्वात् तद्ग्रहणं वक्तव्यमिति शङ्कते—*धर्मशब्द इति* ॥ मनुष्यत्व-ब्राह्मणत्वादिकं विहाय केवलदेहेऽभिमानाभावेन प्राधान्यात्तद्ग्रहणमित्याह—*अत आहेति* ॥ तत्र हेत्वन्तरमाह—*शास्त्रीयेति* ॥ कार्य-कारणत्वादीनामात्मन्यारोपमङ्गीकृत्य सुखादीनामारोपमाक्षिपति*—नन्वन्तः-

वार्तिकम्

गृहीतानां देहादीनां तदुपाधिकं स्वधर्माध्यासं सर्वप्रत्यक्षसिद्धमात्मनि दर्शयति—*तथा देहधर्मान् स्थूलोऽहम्, कृशोऽहम्, तिष्ठामि, गच्छामि, लङ्घयामि चेति* ॥ यथा बाह्यपुत्रादिधर्मानध्यस्यति, तथा देहधर्मानपि कृशत्वादीनात्मन्यध्यस्यति। कथमिति ? अत आह—'कृशोऽह'मित्यादीति वाक्ययोजना। एवमुत्तरत्रापि—

भाष्यभावप्रकाशिका

ये वैकल्यादयः, तत्स्वाम्यनिमित्तस्वशरीरे तानध्यस्यतीत्यर्थः ॥ इदानीमप्रसिद्धव्यतिरेकाणां सुतरामध्यास इत्याह—*तथा देहधर्मानिति* ॥

अत्र चाहंप्रत्ययसंभिन्नचैतन्यस्याधिष्ठानता, न पुनरहङ्काराध्यास इव शुद्धस्य। "देहधर्मानि"ति धर्मिणोऽपि ग्रहणम्, धर्मशब्दस्तु मनुष्यत्वादिधर्मविशिष्टस्यैवाध्यासात्, तथाभूतस्यैव विधि-प्रतिषेधशास्त्रगोचरत्वाच्च धर्मप्राधान्यात् ॥ इदानीमस्मादप्यन्तरङ्गेन्द्रियधर्माध्यासमाह—*तथेन्द्रियधर्मानिति* ॥

तथाऽन्तःकरणधर्मान्—काम-संकल्प-विचिकित्साऽध्यवसायादीन्।

पञ्चपादिका

तथेन्द्रियधर्मान्मूकत्वादीनिति धर्ममात्रम्। *तथाऽन्तःकरणधर्मान् कामादीनिति* धर्मग्रहणम्।

पञ्चपादिकाविवरणम्

ननु अन्तःकरणधर्माः कामादयो दण्ड्यादिवत् सम्बन्धितयाऽवगमान्नाध्यासमर्हन्तीति, नेत्याह—*तथाऽन्तःकरणधर्मान् कामादीनिति* ॥ तथाहि—सत्यन्तःकरणे भावादसति च सुषुप्ते तेषामभावादन्तःकरणधर्माः कामादयः सम्बन्धितयाऽध्यस्यन्ते, न तादात्म्येनेति भावः। *ननु* आत्मसमवायिनामेव कामादीनामन्तःकरणस्य चान्वय-व्यतिरेकौ करणविषयतयाऽन्यथासिद्धौ, *न*; कार्यस्य कारणपरतन्त्रतानियमात् करणनियमाभावात्, करणकल्पनादुपादानकल्पनस्याभ्यर्हितत्वात्, चक्षुरादिकरणान्तरभावाच्च। *ननु* 'अहं कामी'त्यादिप्रत्यक्षप्रत्ययादात्माऽप्युपादानान्तरमस्तीति चेत्, *न*; दण्ड्यादिवत् सम्बन्धिप्रत्ययात्, उपादानत्वे

ऋजुविवरणम्

तथाहि सत्यन्तःकरण इति ॥ भवत्वन्तःकरणधर्मत्वम्, तथाऽपि कथमात्मन्यध्यस्तता? सम्बन्धमात्रप्रतीतेः, अध्यासे हि तादात्म्यप्रतीत्या भवितव्यमित्याशङ्क्याह—*सम्बन्धितयेति* ॥ *ननु*—अन्यथासिद्धावन्वय-व्यतिरेकौ न धर्मत्वसाधकावित्याह—*नन्वात्मसमवायिनामिति* ॥ समवायनिमित्तः सम्बन्धावभासः, नाध्यासनिमित्त इति भावः। *कार्यस्येति* ॥ कामादीनामन्तःकरणपारतन्त्र्यं दृश्यते; तदन्तःकरणकार्यत्वे सति संभवति; कार्यस्योपादानपारतन्त्र्यनियमात्, करणपारतन्त्र्यनियमाभावादित्यर्थः। *ननु*—अन्तःकरणसंयोगस्यासमवायिकारणत्वादसमवायिकारणनाशस्यापि नाशहेतुत्वाद् अन्तःकरणपारतन्त्र्यमन्यथासिद्धमित्याशङ्क्याह—*करणकल्पनादिति*॥ *ननु*—करणमप्यभ्यर्हितमेव, तेन विना कार्यादर्शनादित्याशङ्क्याह—*चक्षुरादिकरणान्तरेति* ॥ नाभ्यर्हितत्वादुपादानत्वकल्पना; उपादानान्तरप्रतीतेः, इति चोदयति—*नन्वहं कामीति* ॥ नच सम्बन्धमात्रनिबन्धनत्वम्;

तत्त्वदीपनम्

करणेति* ॥ "अहं सुखमि"त्यभिमानाभावात् 'सुखी'ति च सद्भावान्न तदध्यास इत्यर्थः। कूटस्थासङ्गाद्वयात्मनि स्वतोऽसंभवात्, तेषामध्यस्तत्वमाह—*नेत्याहेति* ॥

कामादीनामन्तःकरणधर्मत्वे सिद्ध आत्मन्यध्यस्तता, तदेवासिद्धमित्याशङ्क्याह—*तथाहीति* ॥ 'इदं रजतमि'त्यादिवत्तादात्म्येनानुपलम्भात् कथमध्यासः? इत्याशङ्क्याह—*संबन्धितयेति* ॥ यत्र तादात्म्याध्यासः, तत्र सामानाधिकरण्यम्, अत्र च तदभावान्न सामानाधिकरण्यप्रथाऽपेक्ष्यत इत्यर्थः। अन्वय-व्यतिरेकयोरन्यथासिद्धिं शङ्कते—*नन्वात्मेति* ॥ अवश्यापेक्षितानपेक्षितयोरपेक्षितं समर्थनीयमिति न्यायात् करणस्यानपेक्षितत्वान्न तद्विषयत्वमित्याह—*न कार्येति* ॥ करणव्यापारस्य करणान्तरानपेक्षत्वान्न कार्यस्य करणनियम इत्यर्थः। करणव्यापारातिरिक्तकार्यस्य करणजन्यत्वमित्यनियममाशङ्क्याह—*करणकल्पनादिति* ॥ अभ्यर्हितत्वं सत्ता-स्थिति-हेतुत्वेनान्तरङ्गत्वम्। करणान्तरस्य क्लृप्तत्वाच्च न तद्विषयत्वमित्याह—*चक्षुरादीति* ॥ करणान्तरस्य क्लृप्तत्वान्न करणविषयत्वं चेत्, तर्ह्युपादानान्तरस्य क्लृप्तत्वान्न तयोस्तद्धर्मकत्वमिति शङ्कते—*नन्वहमिति*॥ 'मृद् घटः' इत्यादिवदात्मतादात्म्येनानुपलम्भान्न तस्योपादानत्वमित्याह—*न दण्ड्यादिवदिति* ॥

भाष्यभावप्रकाशिका

अत्र धर्माणामेव ग्रहणम्; धर्मिणां नित्यानुमेयतया परोक्षाध्यासयोग्यत्वात्। संबन्धित्वेन कामादि-

प्रदीपः

पुत्र-भार्यादिषु विकलेष्वहं विकलः, तेषु सकलेष्वहं सकल इति वाऽऽत्मधर्माध्यासः। 'स्थूलोऽहमि'त्यादिशरीरधर्माध्यासः, 'मूकोऽहम्' 'काणोऽहमि'तीन्द्रियधर्माध्यासः, 'अहं संकल्पयामि' 'इच्छामी'त्यादिरन्तःकरणधर्माध्यासश्च सर्वलोकप्रसिद्धः। अतेन्द्रियधर्मान्, अन्तःकरणधर्मानिति च पृथङ्निर्देशाद् भाष्यकारा मनोऽनिन्द्रियतावादं स्पष्टं सूचयन्तीति प्रति-

एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य, तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यति ।

भामती

तस्य मूलं धर्म्यध्यासमाह—*एवमहंप्रत्ययिनमिति* ॥ अहंप्रत्ययोऽहंवृत्तिर्यस्मिन्नन्तःकरणादौ सोऽयमहंप्रत्ययी, तम् । *स्वप्रचारसाक्षिणि*—अन्तःकरणप्रचारसाक्षिणि चैतन्योदासीनताभ्याम्, प्रत्यगात्मन्यध्यस्य । तदनेन कर्तृत्व-भोक्तृत्वे उपपादिते । चैतन्यमुपपादयति—*तं च प्रत्यगात्मानं सर्वसाक्षिणं

ऋजुप्रकाशिका

प्रत्ययिनमि"त्युक्तं भाष्ये, तस्य व्युत्पत्तिं दर्शयति—*अहंप्रत्ययोऽहंवृत्तिरिति*॥ *तम्=अहंप्रत्ययिनम्, अहङ्कारमित्यर्थः । "स्वप्रचारसाक्षिणी"त्यत्र स्वस्यान्तःकरणमहङ्कारमर्थं कृत्वा दर्शयति—*अन्तःकरणस्य प्रचारसाक्षिणीति* ॥ औदासीन्य बोधाभ्यां साक्षी भवति लोके, तदत्र दर्शयति—*चैतन्योदासीनताभ्यामिति* ॥ एतत् "प्रचारसाक्षिणी"त्यनेन सम्बध्यते । विशेषणमभिधाय विशेष्यं निर्दिशति—*प्रत्यगात्मनीति* ॥ एवं स्वात्मन्यहंप्रत्ययिनोऽहङ्कारस्याध्यासे दर्शिते तस्याहङ्कारगतकर्तृत्व-भोक्तृत्वाध्यासोऽपि दर्शितप्राय एवेति मत्वा, आह—*तदनेनेति* ॥ अहंप्रत्ययिनि प्रत्यगात्मचैतन्याध्यासं दर्शयितुं प्रत्यगात्मचैतन्यमुपात्तमित्याह—

पञ्चपादिका

अन्तःकरणमित्यहंप्रत्ययिनो विज्ञानशक्तिभागोऽभिधीयते । तस्य धर्माः कामादयः । *एवमहंप्रत्ययिनमिति* धर्मिग्रहणम् । *प्रत्ययाः = कामादयोऽस्येति प्रत्ययी, अहं चासौ प्रत्ययी चेत्यहंप्रत्ययी ॥ *तमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्येति*॥ स्वशब्देनाहङ्कारग्रन्थिः संसारनृत्यशालामूलस्तम्भोऽभि-

पञ्चपादिकाविवरणम्

तादात्म्याद् 'अहं कामः' इति स्यात् । तस्मान्न्यायसहकृतान्वय-व्यतिरेकावन्तःकरणस्यैव कामाद्युपादानत्वं कल्पयत इति भावः । *अन्तःकरणमित्यहंप्रत्ययिन इत्यादिः स्पष्टार्थः* ॥

'अशेषस्वप्रचारसाक्षिणि' 'प्रत्यगात्मनी'तिपदद्वयं व्याचष्टे—स्वशब्देनाहङ्कारग्रन्थिरित्यादिना* ॥ साक्षि-

ऋजुविवरणम्

उपादानान्तरसिध्द्यायत्तत्वात्, तस्य चैतदन्यथासिद्धिसापेक्षत्वादिति भावः । *ननु*—अन्तःकरणेन तादात्म्यप्रतीत्यभावात् कथं तदुपादानत्वमपि कामादीनाम् ? *मैवम्* ; "कामः सङ्कल्पो विचिकित्से"त्यादिश्रुतौ "सर्वं मन

तत्त्वदीपनम्

सामानाधिकरण्याभावेनात्मनोऽनुपादानत्वेऽन्तःकरणस्यापि नोपादानत्वम् ; सामानाधिकरण्याभावस्याविशेषात्, इत्याशङ्क्याह—*तस्मादिति* ॥ सामानाधिकरण्याभावस्योभयत्राविशेषेऽप्यात्मनः कूटस्थादिरूपत्वान्न तत्परिणामत्वं कामादीनाम्, अन्तःकरणस्य च तद्वैपरीत्यादुपादानत्वं युक्तमित्यर्थः । अन्तःकरणस्य चिदचित्संवलितत्वात् तद्ग्रहणशङ्कायामन्तःकरणमित्याद्युक्तम्, तच्च स्पष्टार्थमित्याह—*अन्तःकरणमिति* ॥ 'अशेषस्वप्रचारसाक्षिणि' 'प्रत्यगात्मनी'त्यनयोः स्पष्टार्थत्वान्न व्याख्यानापेक्षेत्याशङ्क्य, व्यावर्त्यशङ्कासद्भावेन व्याख्यानमपेक्षितमित्याशयेनाह—*अशेषस्वप्रचारेति* ॥ स्वशब्देनात्मोच्यत इति शङ्कानिराकरणार्थं स्वशब्दव्याख्यानमिति द्रष्टव्यम् । प्रचरणमनेनेति

वार्तिकम्

तथेन्द्रियधर्मान् मूकः, काणः, क्लीबो बधिरो वाऽहमिति ; तथाऽन्तःकरणधर्मान्—काम-सङ्कल्प-विचिकित्साऽध्यवसायादीन्*॥ आत्मन्यध्यस्यतीति सर्वत्रानुषज्यते । देहादिधर्म्यध्यासोपाधिकधर्माध्यासमुक्त्वा संप्रति तदुपाधिभूतदेहादिधर्म्यध्यासं दर्शयति—*एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्य-

भामती

तद्विपर्ययेण = अन्तःकरणादिविपर्ययेण ; अन्तःकरणाद्यचेतनम्, तस्य विपर्यय चैतन्यम्, तेन; इत्थंभूतलक्षणे तृतीया; अन्तःकरणादिष्वध्यस्यति । तदनेनान्तःकरणाद्यवच्छिन्नः प्रत्यगात्मेदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्य-कारणाविद्याद्वयाधारोऽहङ्कारास्पदं संसारी सर्वानर्थसंभारभाजनं जीवात्मेतरेतराध्यासोपादानः, तदुपादानश्चाध्यासः, इत्यनादित्वाद् बीजाङ्कुरवन्नेतरेतराश्रयत्वमित्युक्तं भवति । प्रमाण-प्रमेय-व्यवहारदृढीकृतमपि शिष्यहिताय स्वरूपाभिधानपूर्वकं सर्वलोकप्रत्यक्षतयाऽध्यासं सुदृढीकरोति—

ऋजुप्रकाशिका

चैतन्यमुपपादयतीति॥ ''तद्विपर्ययेणान्तःकरणादिष्वध्यस्यती''त्युक्तं भाष्ये, तद् विवृणोति—*तद्विपर्ययेणान्तःकरणादिविपर्ययेणेत्यादिना* ॥ अन्तःकरणादिस्वरूपं दर्शयित्वा तद्विपर्ययस्वरूपं दर्शयति—*अन्तःकरणाद्यचेतनम् तद्विपर्ययश्चैतन्यमिति* ॥ *तेन=तेन रूपेण । ''तद्विपर्ययेणे''ति तृतीयेत्थंभावे वर्तत इत्याह—*इत्थमिति* ॥ एवमहङ्कारात्मनोरितरेतराध्यासं दर्शयित्वा फलितमाह—*तदनेनेति* ॥ *इदमनिदंरूपः=चिदचिद्ग्रन्थिरित्यर्थः । अचिदन्तःकरणाद्यवच्छिन्नतया चिदचिद्ग्रन्थित्वं बोध्यम् । *कार्येति* ॥ पूर्वपूर्वभ्रमजन्यसंस्काररूपाऽविद्या कार्याविद्या ; अनादिभावरूपाऽविद्या कारणाविद्या ; तद्द्वयाधार इत्यर्थः । अविद्याधारत्वं च चिदंशमादाय ; अचिदंशस्य जडस्य तदनाधारत्वादिति बोध्यम् । *अहङ्कारास्पदम्=अहंप्रत्ययविषयः । *जीवेति* ॥ अन्तःकरणतादात्म्याध्यासेनान्तःकरणावच्छिन्नत्वात् तदध्यासोपादानभूताविद्यावच्छिन्नत्वाच्च चिदात्मैव जीवतामापन्न इत्यर्थः । यत एवान्तःकरणतादात्म्याध्यासेन जीवतामापन्नः, अत एवाह—*इतरेतरेति* ॥ *तदुपादानश्चाध्यास इति* ॥ जीवशरीरप्रविष्टचिन्मात्रोपादानक इत्यर्थः । अध्यासाधिष्ठानचैतन्यं विनाऽध्यासायोगादिति भावः । *ननु* उक्तविधया तयोः परस्परोपपादकत्वे परस्पराश्रयत्वं स्यादित्यत आह—*इत्यनादित्वादिति* ॥ बीजाङ्कुरवदनादित्वात्=प्रवाहानादित्वात् न परस्पराश्रयत्वमित्युक्तं भवतीत्यर्थः । तथाचाध्यासो दृढ इति भावः । *अनादिः = प्रवाहानादिः । ''अनन्तः'' इत्युक्तं भाष्ये, तत् कथम् ? तत्त्वज्ञानसमुच्छेद्यतया सान्तत्वादध्यासस्य, इत्याशङ्क्य, अनन्तशब्दार्थमाह—

पञ्चपादिका

धीयते । तस्य प्रचारः = काम-सङ्कल्प-कर्तृत्वादिरनेकविधः परिणामः, यन्निमित्तं ब्रह्मादिस्थावरान्तेषु प्रदीप्तशिरा इव परवशो जन्तुर्बम्भ्रमीति । तं प्रचारमशेषमसङ्गितयाऽविकारित्वेन च हानोपादानशून्यः साक्षादव्यवधानमवभासयति चितिधातुः । स एव देहादिष्विदन्तया बहिर्भावमापद्यमानेषु प्रातिलोम्येनाञ्चतीवोपलक्ष्यते, इति प्रत्यगुच्यते, आत्मा च ; निरुपचरितस्वरूपत्वात् तत्राध्यस्य । *तं च प्रत्यगात्मानमिति* ॥

पञ्चपादिकाविवरणम्

शब्दार्थमाह—*असङ्गितयाऽविकारित्वेनेत्यादिना* ॥ कथं पुनः सर्वान्तरस्यात्मनः प्रत्यगञ्चनमिति ? देहादिषु विप्रसृतचैतन्यस्य चित्तसमाधानविषयेऽन्तरनुप्रवेशभ्रमापेक्षयेत्याह—स एव देहादिष्विदन्तयेति* ॥

तत्त्वदीपनम्

प्रचारः कामादिः, न तु गमनादिरित्यभिप्रायेण प्रचारशब्दस्य व्याख्यानम् । असङ्गित्वादेः प्राक् सिद्धत्वात्तदभिधानं व्याख्योपयोगितयेत्याह—*साक्षीति* ॥ *असङ्गितयेत्यादेरयमर्थः*—साक्षादेव भासयतीति साक्षी । परिणामद्वारा भासकत्वं निराकर्तुमाह—*हानेति* ॥ समावस्थाया हानम्, विषमावस्थाया उपादानम्, ताभ्यां हीन इत्यर्थः । तत्र हेतुमाह—*अविकारित्वेनेति* ॥ तदुपपादयति—*असङ्गितयेति* ॥ 'प्रत्यगात्मनी'त्यत्र प्रत्यक्त्वमुक्तम्, तदाक्षिपति—*कथं पुनरिति* ॥ अन्तर्मुखतया गमनं प्रत्यगञ्चनम्, तत् सर्वान्तरस्य व्याहतमित्यर्थः । नौयानाद् नगेषु गतिकल्पनवच्चित्तवृत्तिगमनापेक्षया गमनमित्याह—*देहादिष्विति* ॥

पञ्चपादिकाविवरणम्

ननु न साक्षिवेद्यमन्तःकरणम्, किन्त्वात्मेन्द्रिय-विषयेषु समवहितेषु ज्ञानोत्पादक्रमसामर्थ्यगम्यमिति, *न* ; अन्यथासिद्धत्वात् ; आत्मन एव क्रमज्ञानजननसामर्थ्यकल्पनयाऽन्यथासिद्धः क्रमज्ञानोत्पादः। द्रव्यान्तर-तत्क्रमसामर्थ्यकल्पनागौरवाच्च वरं प्रसिद्धस्यैवात्मनः क्रमसामर्थ्यकल्पनालाघवम्। *ननु*—नार्थापत्त्या मनः कल्पयामि, येनान्यथासिद्धिः स्यात्, किन्त्वनुमानेन—*तथाहि*—आत्मनः सर्वविषयसन्निधाने क्रम-कार्योत्पादः, कर्तुः क्रमकारिसाधारणकारणापेक्षः, सन्निहितबहुविषयस्य कर्तुः क्रमकार्योत्पादत्वात् ; सन्निहितबहु-च्छेद्यस्य देवदत्तस्य कुठारसापेक्षक्रमच्छेदनवत्—*इति*, *नैतत्सारम्* ; मनसः प्रतीन्द्रियसंयोगव्यापारे क्रमवर्तिनि साधारणकारणान्तरशून्येऽनैकान्तिकत्वात्, फलस्य च वृक्षात्पततः क्रमवर्तिन्याकाशसंयोगे

ऋजुविवरणम्

एवे"ति सामानाधिकरण्यात्। "स्वप्रचारसाक्षिणी"त्याक्षिपति—*ननु न साक्षिवेद्यमिति* ॥ *अयं भावः*—नान्तःकरणमध्यस्तम्, कामादिधर्मकं वा। साक्षिवेद्यत्वे हि तत्राध्यस्तत्वम्, कथञ्चिदन्वय-व्यतिरेकौ न्यायानुगृहीतौ कामाद्युपादानविषयाविति च वक्तुं शक्यते। क्रमरूपकार्यान्यथानुपपत्त्या तु कल्प्यमानं करणत्वेनानध्यस्तत्वेनैव कल्प्यते, इति तद्ग्राहकप्रमाणविरोधादन्वय-व्यतिरेकावपि करणविषयाविति। *ननु*—कारणं तावत्कल्पयितव्यम्, तच्चान्तःकरणमात्मा वेति विशेषः कथमिति ? तत्राह—*द्रव्यान्तर-तत्क्रमसामर्थ्येति* ॥ साधारणकारणापेक्ष इत्युक्ते सिद्धसाध्यता, तदर्थमाह—*क्रमकारीति* ॥ एवमपि कर्तरि सिद्धसाध्यता, तदर्थम्—*कर्तुरिति* ॥ क्रमकार्योत्पादत्वादित्येव हेतौ करणकार्येऽनैकान्तिकं स्यात्, तदर्थम्—*कर्तुरिति* ॥ एवमपि विषयासन्निधानेऽपि क्रमसंभवादनैकान्तिकं स्यात्, तदर्थम्—*सन्निहितेति* पदम्। मनसः क्रमेणेन्द्रियसंयोगेऽदृष्टस्य करणत्वं वक्तुं शक्यत इति दृष्टान्तान्तरमाह—*फलस्येति* ॥ फलसंयोगे च गुरुत्वमेव कारणं वक्तुं शक्यते, तदर्थमन्यदुदाहरति—

तत्त्वदीपनम्

अन्तःकरण-तद्धर्माणां साक्षिवेद्यत्वमुक्तम्, तदाक्षिपति—*ननु न साक्षीति* ॥ मनः, परोक्षम्, अणुत्वात् ; परमाणुवत्, साक्षिणोऽसंप्रतिपत्तेश्चेत्यर्थः। कुतस्तर्हि तत्प्रथेत्याह—*किंत्विति* ॥ अर्थापत्त्येत्याह—*आत्मेति* ॥ क्रमेण ज्ञानोत्पादः करणक्रमपुरःसर इति सामान्यव्याप्तिः। नचात्मेन्द्रिय-विषयसमवधानापेक्षया क्रमोपपत्तिः, इति व्याप्तिसामान्य-व्यापकविशेषाभावोपलब्धिप्रसूतार्थापत्तिरन्तःकरणे प्रमाणमित्यर्थः। व्यापकविशेषाभावोऽसिद्ध इत्याह—*नान्यथेति* ॥ अन्यथासिद्धिमेवाह—*आत्मन इति*॥ अन्यथैवोपपत्तिमाह—*द्रव्यान्तरेति*॥ अप्रसिद्धद्रव्यान्तरम्, तत्र क्रमजननसामर्थ्यं चेति द्वयं कल्प्यं तव, मन्मते धर्मिणः प्रसिद्धत्वात् तत्र क्रमजननसामर्थ्यमात्रं कल्प्यमिति लाघवमित्यर्थः ॥ अनुमानं मनसि प्रमाणमिति शङ्कते—*नन्विति* ॥ कार्योत्पाद इत्युक्ते एकक्षणवर्त्यनेककार्योत्पादस्य क्रमकारिकारणापेक्षत्वाभावात्तत्साधने बाधः स्यात्, तदर्थं—*क्रमेति* ॥ विषयासंनिधानादन्यथासिद्धिं निराकर्तुम्—*सर्वविषयेति* ॥ "करणापेक्षः" इत्युक्ते चक्षुरादिना सिद्धसाध्यता, तदर्थं विशिनष्टि—*साधारणेति* ॥ एतावत्युक्ते बाह्येन्द्रियसंयोगलक्षणकारणाऽपेक्षया सिद्धसाध्यत्वम्, तदर्थम्—*क्रमकारीति* ॥ ईश्वरप्रयत्नव्यवच्छेदार्थम्—कर्तुरिति विशेषणम्* ॥ ईश्वरप्रयत्नस्य कर्तृव्यापारागोचरत्वाद् व्यवच्छेद इत्यर्थः। "कार्योत्पादत्वादि"त्युक्त एकक्षणवर्तिकार्योत्पादे व्यभिचारः स्यात, तदर्थम्—*क्रमेति विशेषणम्*॥ सामग्रीक्रमापेक्षया ज्ञायमानक्रमकार्योत्पादनिरासार्थम्—*सन्निहितेति विशेषणम्* ॥ करणव्यापारनिरासार्थम्—*कर्तुरित्युक्तम्*॥ व्यभिचारित्वान्नायं हेतुः साधुरित्याह—*नैतत्सारमिति* ॥ किं कर्तृमात्रम् ? उत प्रधानकर्ता ? नाद्य इत्याह—*मनस इति* ॥ द्वितीये क्रियायाः संयोगादिजनने करणान्तर-नैरपेक्ष्यवन्नैरपेक्ष्यमित्यर्थः। नच—संयोगोत्पादेऽपीश्वरप्रयत्नापेक्षणान्न व्यभिचार इत्यपि—शङ्क्यम् ; कर्तुर्व्यापार-गोचरस्य करणत्वाभ्युपगमात, ईश्वरप्रयत्नस्य चास्मद्व्यापाराविषयत्वात्। अन्यथेश्वरप्रयत्नेन सिद्धसाध्यता दुर्वारा स्यादित्यर्थः। व्यभिचारस्थलान्तरमाह—*फलस्य चेति* ॥ नच—कुठारव्यापारे कर्तुः क्रमकार्योत्पादकत्वमित्यपि—शङ्क्यम् ; स्वव्यापारं प्रति करणस्य कर्तृत्वोपगमादित्यर्थः ॥

पञ्चपादिकाविवरणम्

कुठारादिव्यापारे चानैकान्तिकत्वात्, इन्द्रियाणां प्रतिविषयसंयोगव्यापारे चानैकान्तिकत्वाच। *अथ मतम्*—विशेषगुणजन्म, स्वाश्रये द्रव्यान्तरसंयोगलक्षणासमवायिकारणापेक्षम्, नित्यद्रव्यविशेषगुणजन्मत्वात्, अग्निसंयोगजन्यपरमाणुगतपाकजलौहित्यवदित्यनुमानम्, यत् तद् द्रव्यान्तरम्, तन्मनः—इति, *नैतत्*; शरीरेन्द्रियसंयोगस्य सिद्धत्वाद् द्रव्यान्तरसंयोगेऽनुमानायोगात्, स्वप्नस्मृत्यादिज्ञानेष्वपि शरीरादिसंयोगानपायाद् द्रव्यान्तरसंयोगकल्पनानुपपत्तेः। तस्मान्नानुमानार्थापत्ती मनसि प्रमाणम्। आगमाच

ऋजुविवरणम्

कुठारादिव्यापार इति॥ यद्वा—अदृष्टस्यात्रापि संभवात् तद्व्यतिरिक्तस्यैव साध्यत्वम्, तत्र च दृष्टान्तसमुच्चय इति। जन्यत्वे हेतावुदकगतकर्मण्यनैकान्तिकत्वम्, तदर्थमाह—*गुणत्वे सतीति*॥ गुणत्वे सति संयोगजन्यत्वं संख्यादेरप्यस्ति, तदर्थम्—*विशेषगुणत्वम्*॥ एवमपि रूपादिष्वनैकान्तिकः; तत्र संयोगस्यासमवायिकारणत्वाभावात्, तदर्थमाह—*नित्यद्रव्येति*॥ अनयैव दिशा प्रतिलोमतो विशेषणोपयोगो ज्ञेयः। कथं शरीरादिसंयोगस्यासमवायिकारणत्वम्? शरीरव्यापाराभावेऽप्युत्पद्यमानस्वप्नादिज्ञानेषु द्रव्यान्तरसंयोगकल्पनाप्रसङ्गात्, इत्याशङ्क्याह—*स्वप्नस्मृत्यादिज्ञानेष्विति*॥ तर्हि मनःसद्भाव एव निष्प्रमाणकः, इत्याशङ्क्याह—*आगमाच्चेति*॥ प्रागहंकारटीकायामित्यर्थः। अथवा—मा भूदनुमानार्थापत्तिगम्यत्वम्, आगमगम्यत्वं तु भविष्यतीत्याशङ्क्याह—*आगमाच्च प्रागेवेति*॥ आगमव्यवहारहीनानामपि तत्प्रतीतिदर्शनादिति भावः। तर्हि प्रत्यक्षत्वम्, इत्या-

तत्त्वदीपनम्

अनुमानान्तरमुत्थापयति—*अथ मतमिति*॥ धर्मिणि विशेषगुणपदं स्वरूपपरम्। "कारणापेक्षमि"त्युक्ते समवायिकारणापेक्षतया सिद्धसाध्यत्वम्, तदर्थम्—*असमवायीति*॥ यत्किंचिदसमवायिकारणपुरःसरतयाऽर्थान्तरमपाकर्तुमाह—*संयोगेति*॥ यत्किंचित्संयोगलक्षणासमवायिकारणापेक्षत्वव्यावृत्त्यर्थम्—*स्वाश्रय इति*॥ येन द्रव्यान्तरेण संयोगः, तद् मन इत्यभिसन्धिः। समवायिकारणप्रत्यासन्नमसमवायिकारणम्, प्रत्यासत्तिश्च द्वेधा—कार्यैकार्थसमवायः, कारणैकार्थसमवायश्चेति। अत्र च ज्ञानादिलक्षणकार्येणैकस्मिन्नात्मनि समवेतत्वात् संयोगस्य समवायिकारणप्रत्यासन्नत्वमिति द्रष्टव्यम्। "जन्मत्वादि"त्युक्ते संयोगोत्पादकाद्यकार्यजन्मनि व्यभिचारः, तदर्थम्—*गुणेति*॥ विभागगुणजन्मव्यावृत्त्यर्थम्—*विशेषेति*॥ पटादिसमवेतशौक्ल्यादिजन्मव्यावृत्त्यर्थम्—*नित्यद्रव्येति*॥ "नित्यद्रव्यगुणजन्मत्वादि"त्युक्ते परमाणुगतसंख्यादौ व्यभिचारः, तदर्थम्—*विशेषेति*॥

तथाऽपि कथं मनसः सिद्धिः? इत्याशङ्क्य परिशेषादित्याह—*यत्तदिति*॥ परिशेषासिद्धयोत्तरयति—*नैतदिति*॥ शरीरेन्द्रियैः संयोगस्येत्यर्थः। विभागज-शब्दजन्मनि संयोगासमवायिकारणानपेक्षे व्यभिचारश्चेत्यर्थः। न सर्वत्र शरीरादेः संयोगस्यासमवायिकारणत्वं वक्तुं युक्तम्; शरीरेन्द्रियव्यापाराभावेऽपि स्वप्ने ज्ञानजननदर्शनात्; ततश्च द्रव्यान्तरसंयोगस्यासमवायित्वमित्याशङ्क्याह—*स्वप्नेति*॥ आत्मनः सर्वमूर्तद्रव्यसंयोगितया तदाऽपि संयोगस्य भावात् कथं द्रव्यान्तरकल्पनमित्यर्थः। सुखसाक्षात्कारः, इन्द्रियजः, साक्षात्कारत्वात्, रूपादिसाक्षात्कारवत्, सुखाद्युपलब्धिः, करणजन्या, कार्यत्वात्; छिदिक्रियावदित्यनुमानमिति चेत्, मैवम्; किं साक्षात्कारमात्रस्य धर्मित्वं हेतुत्वं च? उतानीश्वरसाक्षात्कारस्य? आद्ये किमीश्वरसाक्षात्कारस्यापि धर्मित्वम्? उत न? धर्मित्वे बाधः, इतरत्र व्यभिचारः। द्वितीये साक्षिवेद्यत्वसंभवादप्रयोजकत्वम्। द्वितीये हेतौ यत् कार्यम्, तत्कारणजन्यमिति न नियमः; करणव्यापारे व्यभिचारादित्यर्थः॥

अस्तु तर्ह्यागमो मनसि प्रमाणमित्यत आह—*आगमादिति*॥ आगमज्ञानविधुरबालगोपालादीनामपि मनः-

भाष्यभावप्रकाशिका

धर्माध्यासमुक्त्वा धर्म्यध्यासमाह—*एवमहंप्रत्ययिनमिति*॥ *स्वप्रचाराः = कामादयः। *प्रत्यगात्मनीति*। देहादिषु विवेकाद् बहिर्भावमापद्यमानेषु प्रातिलोम्येन*अन्तः = अञ्चति = गच्छतीति

पञ्चपादिकाविवरणम्

प्रागेव मनः सिद्धम्। नचैन्द्रियकत्वम्; अणुपरिमाणे परमाणुवदयोग्यत्वात्, अनन्तपरिमाणे मनसि युगपत् संयोगाद् युगपज्ज्ञानजन्मप्रसङ्गात्, मध्यमपरिमाणे च मनसि स्वप्नावस्थायामिन्द्रियाभावेऽपि मनोदर्शनाद् 'मम मनोऽन्यत्र गतमि'त्यनुभवाच्च साक्षिवेद्यमेव मन इति ॥*

तं च प्रत्यगात्मान मित्यात्मनोऽन्तःकरणादिष्वध्यासो दर्शितः, तदयुक्तम्; इतरेतराध्यासे द्वयोरध्यस्यमानत्वान्मिथ्यात्वापातात्, द्वयोरप्यधिष्ठानत्वे द्वयोर्विशेषावभासो न स्यादिति, तत्राह—*यदि युष्मदर्थस्यैवेति*॥

ऋजुविवरणम्

शङ्क्याह—*नचैन्द्रियकत्वमिति*॥ *अणुपरिमाण इति*॥ तन्मताभिप्रायेण, सौक्ष्म्याभिप्रायेण वा। मा भूद् अणुत्वम्, परिमाणान्तरमेव स्यादित्याशङ्क्य परममहत्परिमाणं निराकरोति—*अनन्तपरिमाण इति*॥ मध्यमपरिमाणपक्षेऽपि नैन्द्रियकत्वम्; इन्द्रियाभावेऽपि स्वप्ने प्रतीतिदर्शनादित्याह—*मध्यमपरिमाणे चेति*॥ *ननु*—मनसः प्रतीतिरेव नास्ति, कथं सिद्धवदिन्द्रियव्यतिरेकोऽभिधीयते? कथं वा साक्षिवेद्यत्वम्? इत्याशङ्क्याह—*मम मनोऽन्यत्रेति*॥ *ननु*—नोभयोरध्यस्तत्वम्; एकतराध्यासेन व्यवहारसिद्धेः, तथोभयोरध्यस्तत्वे विशेषाव-

तत्त्वदीपनम्

सिद्धेर्न तत्सिद्धत्वमित्यर्थः। परिशेषात् साक्षिसिद्धत्वं मनसो दर्शयितुमैन्द्रियकत्वं निरस्यति—*नचेति*॥ मनसः किमणुत्वम्? उतानन्तत्वम्? अथवा मध्यमपरिमाणत्वम्? इति विकल्प्य क्रमेण दूषयति—*अणुपरिमाण इत्यादिना*॥ मा भून्मन इत्यपि न शङ्क्यमित्याह—*मम मन इति*॥ कथं तर्हि तत्सिद्धिरिति? अत आह—*साक्षीति*॥ मनः, अपरोक्षम्, बोधासमवायिकारणाधारत्वात्; आत्मवत्। तत्र चैन्द्रियकत्वेन स्वप्रकाशतया वाऽपरोक्षत्वानुपपत्तेरपरोक्षसाक्ष्यध्यस्ततया तत्सिद्धिरित्यर्थः॥

"यदि युष्मदर्थस्ये"त्यत्रेतरेतराध्यासे दूषणमुक्तम्, तत् कस्मात्? इतरेतराध्यासस्यैवादर्तव्यत्वादित्याशङ्क्यो-

वार्तिकम्

ध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यतीति*॥ 'अहमि'ति प्रत्ययोऽस्यास्तीत्यहंप्रत्ययी=कार्य-करणसङ्घातः, अन्तःकरणादिस्थूलदेहान्तः; तमहंप्रत्ययिनमित्यर्थः। *प्रत्यगात्मन्यध्यस्य=इदंपदार्थेभ्यः प्रातिलोम्येन प्रतिकूलतया विपरीतधर्मतयेति यावत्, अञ्चति=गच्छति पूजां प्राप्नोतीति प्रत्यक्, प्रत्यक् चासावात्मा चेति प्रत्यगात्मा; तस्मिन्नहंप्रत्ययिनमध्यस्येत्यर्थः। "आत्मन्यध्यस्ये"त्युक्तेऽन्तःकरणादावप्यात्मशब्दप्रयोगात् स्वस्मिन् स्वाध्यासो मा भूदित्यत उक्तम्—*प्रत्यगिति*॥ तर्ह्यन्तःकरणादिरूपात्मविरोधित्वादनात्मत्वमेव तस्येति, नेत्याह—*आत्मेति*॥ तस्यैव मुख्यात्मत्वादित्याशयः। कुतस्तस्य मुख्यात्मत्वम्? कुतो वा प्रत्यक्त्वमिति? अत आह—*अशेषस्वप्रचारसाक्षिणीति*॥ स्वशब्देनात्राहंप्रत्ययी कार्य-करणसङ्घातो गृह्यते, तस्य प्रचाराः=धर्माः कार्यभूताः; प्रकर्षेण ततस्ततश्चरन्ति, उद्गच्छन्तीति व्युत्पत्तेः, काम-सङ्कल्प-निश्चयादयः, द्रष्टृत्व-श्रोतृत्व-घ्रातृत्वादयः, गन्तृत्व-लङ्घयितृत्वादयश्च, ते च, *अशेषाः*=सर्वे स्वप्रचाराः, तेषां साक्षिणि=साक्षाद् द्रष्टरीत्यर्थः। तथा "दृष्टेर्द्रष्टा श्रुतेः श्रोता मतेर्मन्ता विज्ञातेर्विज्ञाता नान्यदतोऽस्ति द्रष्टा नान्यदतोऽस्ति श्रोते"त्यादिश्रुतेश्च। प्रमात्रादिवदन्योपाधिद्रष्टृत्वाभावेन नित्यदृष्टित्वात् सिद्धमस्यागौणमात्मत्वम्; दृष्ट्यादेरपि दृष्टिकर्मत्वेन तद्भास्यत्वात् प्रत्यक्त्वमप्यस्य

भाष्यभावप्रकाशिका

प्रत्यगात्मा; निरुपचरितस्वरूपत्वात्, तस्मिन्नित्यर्थः॥ आत्मन एवाधिष्ठानत्वे चैतन्यविशेषस्यानवभासः स्यात्, एवमहंकारादेरप्यधिष्ठानत्वे तद्विशेषावभासो न स्यात्, इह च द्वयोर्विशेषावभासः परस्पराध्यासं गमयति; अध्यासे विशेषावभासस्याध्यस्यमानताप्रयुक्तत्वादित्यभिप्रेत्यात्मनोऽप्यनात्मन्यध्यासमाह—

पञ्चपादिका

यदि युष्मदर्थस्यैव प्रत्यगात्मन्यध्यासः स्यात्, प्रत्यगात्मा न प्रकाशेत; नहि शुक्तौ रजताध्यासे शुक्तिः प्रकाशते। प्रकाशते चेह चैतन्यमहङ्कारादौ। तथा यदि चैतन्यस्यैवाहङ्कारादावध्यासो भवेत्, तदा नाहङ्कारप्रमुखः प्रपञ्चः प्रकाशेत; तदुभयं मा भूदित्यनुभवमेवानुसरन्नाह—*तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यतीति* ॥ नात्र विवदितव्यम्—इतरेतराध्यासे पृथगवभासनान्न मिथ्या, गौणोऽयमिति; तथाऽनुभवाभावान्मुख्याभिमानः। नहि दृष्टेऽनुपपन्नं नाम ॥

ननु अन्तःकरण एव प्रत्यगात्मनः शुद्धस्याध्यासः, अन्यत्र पुनश्चैतन्याध्यासपरिनिष्पन्नापरोक्ष्यअन्तःकरणमेवाध्यस्यते, अत एव—"तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं

पञ्चपादिकाविवरणम्

अयमर्थः—एकतराध्यासेऽन्यतरस्य सामान्यावभासोऽन्यतरस्यैव विशेषावभासश्च स्यात्। अत्र चिजडरूपेण द्वयोर्विशेषावभासो द्वयोरितरेतराध्यासं गमयति; अध्यासे विशेषावभास्याध्यस्यमानताप्रयुक्तत्वात्। नच द्वयोरपि मिथ्यात्वापातः; चेतनस्याचेतने स्वरूपाध्यासाभावात्, संसृष्टतयैवाध्यासात्। नच विशेषावभासादधिष्ठानत्वविरोधः; अधिष्ठानधर्मतया विशेषस्याप्रतीतेः, अधिष्ठानान्तरधर्मतया प्रतीतेरिति। *ग्रन्थस्तु स्पष्टार्थः*। *ननु* द्वयोः सामान्य-विशेषात्मनाऽवभासमानयोर्नाध्यासः सम्भवति, सामानाधिकरण्यमस्ति चेत्, गौणमिति, नेत्याह—*नात्र विवदितव्यमिति* ॥ *ननु* विशेषावभासेऽध्यासविरोध उक्तः, नेत्याह—*नहि दृष्टेऽनुपपन्नमिति* ॥ तद्विपर्ययेणान्तःकरणादिष्वित्यादिशब्दो विरुद्ध इत्याह—*ननु* अन्तःकरण एव प्रत्यगात्मन इति* ॥ अन्तःकरणविशिष्टस्यैव बहिरध्यास इति कुत इति ? तत्राह—*अत एव तद्विपर्ययेणेति* ॥ *ननु* तस्मिन् भाष्ये विशिष्टस्यैवाध्यासः कथमुक्त इति ? धर्मग्रहणसामर्थ्या-

ऋजुविवरणम्

भासाभाव उक्तः, तथोभयोरपि मिथ्यात्वं चेत्याशङ्क्याभिप्रायमाह—*अयमर्थ एकतराध्यास इति* ॥ *ननु*—अगृहीतविशेषस्यैव वस्तुनोऽधिष्ठानत्वं दृष्टम्, अतस्तदभावान्नाधिष्ठानत्वमित्याशङ्क्याह—*नच विशेषाव-

तत्त्वदीपनम्

त्तरग्रन्थस्य व्यावर्त्यामाशङ्कामाह—*तं चेत्यादिना* ॥ द्वयोरध्यस्यमानत्वप्रयुक्तं दोषमभिधायाधिष्ठानत्वप्रयुक्तं दोषमाह—*द्वयोरपीति* ॥ सामान्यत आकलितस्य विशेषतोऽनाकलितस्य चाधिष्ठानत्वनियमादत्र चोभयोश्चिज्जडरूपेण विशेषतः प्रसिद्धेर्नाधिष्ठानत्वमित्यर्थः ॥

मिथ्यात्वापातान्नोभयोरध्यस्तत्वमधिष्ठानत्वं चेति यदुक्तम्, तत्राह—*अयमर्थ इति* ॥ किं मिथ्यात्वापातादन्यतरस्याध्यस्तत्वमधिष्ठानत्वं च सिषाधयिषितम्? उतेतरेतराध्यासे मिथ्यात्वादिप्रसङ्गस्य कः समाधिरिति? तत्राद्यं दूषयति—*एकतरेति* ॥ अस्तु को दोष इति? अत्राह—*अत्रेति* ॥ तत्र हेतुमाह—*अध्यास इति* ॥ द्वितीयं दूषयति—*नचेति* ॥ विशेषत आकलितत्वादनधिष्ठानगततया विशेषस्फुरणमधिष्ठानत्वविरोधि? उत विशेषस्फुरणमात्रम्? इति विकल्प्याद्येऽसिद्धिमाह—*अधिष्ठानेति* ॥ द्वितीयं दूषयति—*अधिष्ठानान्तरेति* ॥ विशेषस्फुरणमात्रस्याधिष्ठानत्वविरोधे रजततालक्षणविशेषस्फुरणादिदमोऽधिष्ठानत्वं न स्यादित्यर्थः ॥

एवं समुदायार्थमभिधायोक्तमर्थं टीकारूढं कर्तुं पुनश्चोदयति—*ननु द्वयोरिति* ॥ 'अहं मनुष्यः' इति सामानाधिकरण्यस्योपलम्भात् कथं तन्निरसनम्? इति शङ्कते—*सामानाधिकरण्यमिति* ॥ गौणत्वानुभवाभावान्न गौणत्वमित्याह—*नेत्याहेति* ॥ गौणत्ववदध्यासोऽप्यसंमत इति शङ्कते—*ननु विशेषेति* ॥ स्वगततया विशेषस्यास्फुरणान्न विरोध इत्याह—*नेत्याहेति* ॥ विशिष्टस्यान्यत्राध्यासे को दोषः? इत्याशङ्क्य दोषमाह—*तद्विपर्ययेणेति* ॥ "अन्तःकरणविशिष्टस्ये"त्यारभ्य यद्यपीत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः। "सत्यमि"त्यत्र विशिष्टस्या-

पञ्चपादिका

युक्तमि''त्युक्तम् ; अन्यथा चैतन्यमात्रैकरसस्य कुतो धर्माः ? येऽध्यस्येरन्, *सत्यमाह भवान् * ; अपि त्वन्यत्रान्तःकरणं सचितिकमेवाध्यस्यमानं यत्राध्यस्यते, तस्यैवात्मनः कार्यकरत्वमापाद्य स्वयमविद्यमानमिव तिरस्कृतं तिष्ठति चिद्रूपमेव सर्वत्राध्यासे, स्वतः परतो वा न विशिष्यते, तेनोच्यते—*तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यतीति* ॥ अत एव बुद्ध्यादिष्वेव चिद्रूपमनुस्यूतमुत्प्रेक्षमाणा बुद्धि-मनः-प्राणेन्द्रिय-शरीरेष्वेकैकस्मिंश्चेतनत्वेनाहङ्कर्तृत्वं योजयन्तो भ्राम्यन्ति ।

पञ्चपादिकाविवरणम्

दित्याह—*अन्यथा चैतन्यमात्रैकरसस्येति* ॥ यद्यपि चैतन्यस्य विषयेऽध्यासेऽन्तःकरणमुपाधिः, तथाऽपि चैतन्यमेव विषयावच्छिन्नं प्रकाशः, तेनान्तःकरणमिति प्रतिभासाभिप्रायेणोक्तमित्याह—*सत्यमाह भवानिति* ॥ तस्यैव विषयस्यात्मानं प्रति कार्यकरत्वमापाद्येत्यर्थः । *ननु* बहिरप्यहङ्कारस्य चैतन्यवत्सम्बन्धोऽवभासते—'अहं मनुष्यः' इत्यादावित्यत आह—*अत एव बुध्यादिष्विति* ॥ चिन्मात्रस्यावगमादेव सर्वपदार्थेष्वात्मत्वविभ्रम इत्यर्थः ; अन्यथाऽहङ्कारस्य चैतन्याव्यतिरेकात् स एवात्मेति प्रतिपत्तिः स्यादिति । *ननु* उपन्यास-

ऋजुविवरणम्

भासादिति* ॥ ''तस्यैवे''त्यत्र ''सचितिकमि''त्युपन्यस्तस्यात्मनो निर्देशः ; आत्मन इति विशेष्यत्वप्रतीतेः, नच तद् युक्तम् ; अध्यस्यमानस्याधिष्ठाने कार्यायोगात्, व्यर्थं च तत्कीर्तनमित्याशङ्क्याह—*तस्यैव विषयस्येति* ॥ ''तस्यैवे''त्यनेन यत्रेत्युपात्तस्यात्माध्यासाधिष्ठानस्य निर्देश इत्युक्तम् । *स एवात्मेति* ॥ अहंकार एवात्मेति

तत्त्वदीपनम्

ध्यासाङ्गीकरणे कथं केवलस्याध्यस्तत्वाभिधानम् ? तत्राह—*यद्यपीति* ॥ *सत्यमाहेत्यादेरयमर्थः*—सचितिकमन्तःकरणं देहादावध्यस्यत इत्यङ्गीकरोति—*सत्यमिति* ॥ तर्ह्यादिशब्दो विरुध्यत इत्यत आह—*अपित्विति* ॥ अन्यत्र देहादावध्यस्यमानमन्तःकरणं सचितिकमेव यत्राध्यस्यते, तस्य देहादेरात्मानं प्रति कार्यकरत्वमापाद्य स्वयमविद्यमानमिव तिरस्कृत्य तिष्ठतीति योजना । ''तस्यैवात्मनः'' इत्युभयोः सामानाधिकरण्यमित्याशङ्क्याह—*तस्यैवेति* ॥ आत्मन इति कर्मणि षष्ठी । अन्तःकरणस्य तिरस्कृतत्वेऽपि तस्य देहादावध्यासात् कथं केवलस्य स स्यादिति ? अत्राह—*चैतन्यमिति* ॥ *सर्वत्र = देहादावन्तःकरणे । चैतन्यं तत्र विशिष्यत एव । कस्तर्हि विशेष इति ? तत्राह—*स्वयमिति* ॥ क्वचिदुपाधावपेक्षा, क्व चिदनपेक्षेत्यर्थः (टीकायाम्) ॥

देहादावन्तःकरणस्य प्रतिभासाभावोऽनुभवविरुद्ध इति शङ्कते—*ननु बहिरिति* ॥ नास्तिकस्य देहादावात्मत्वभ्रमानुपपत्त्याऽहंकारस्य देहादावात्मप्रतिभासो नाश्रयणीय इत्याह—*अत आहेति* ॥ अतःशब्दार्थमाह—*चिन्मात्रस्येति* ॥ अहंशब्दस्य चिन्मात्रमर्थ इति नास्तिकाभिमान इत्यर्थः । विपक्षे दण्डमाह—*अन्यथेति* ॥ चैतन्यस्याहंकारेऽध्यासस्तद्विशिष्टस्यैव देह इति विशिष्टस्यानात्मत्वादात्मत्वभ्रमो न स्यादित्यर्थः । आत्मनः कर्तृत्वादिशक्तिमतः प्रवृत्तेर्मिथ्याज्ञानस्यानुपयोगतः, ततश्च मिथ्याज्ञानं दोषप्रवर्तनमित्ययुक्तमित्याशङ्क्य, सह-

वार्तिकम्

सिद्धमित्याशयः । ''तं चे''ति चकारो भिन्नक्रमोऽप्यर्थतः ''तद्विपर्ययेणे''त्यनन्तरं संबध्यते । *तद्विपर्ययेणापि =पूर्वोक्ताध्यस्यमानाधिष्ठानभावविपरीतप्रकारेणापि मूढोऽध्यस्यति । कथंकारम् ? तमन्तःकरणादिषु ; तम् कम् ? प्रत्यगात्मानम्=सर्वसाक्षिणमिति योजना । 'अहंप्रत्ययिनी'ति वक्तव्येऽन्तःकरणादिष्विति वदन् भगवान् भाष्यकारः प्रत्येकमपि तेषामात्माध्यासाधिष्ठानत्वमिति सूचयति । अत एव 'देहश्चेतनः' इत्यन्तःकरणादिसङ्घाताधिष्ठानत्वमनपेक्ष्यैव केवले देहे चैतन्यप्रतीतिरिति । ''अन्तःकरणादिष्वि''ति बहुवचनप्रयोगादिन्द्रियेष्वप्यहमध्यासं मन्यते भाष्यकारः ; अन्यथा देहान्तःकरणयोरेवाहंप्रत्ययत्वाद् बहुवचनप्रयोगं

एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्व-भोक्तृत्वप्रवर्तकः(१) सर्वलोकप्रत्यक्षः ।

भामती

एवमयमनादिरनन्तः—तत्त्वज्ञानमन्तरेणाशक्यसमुच्छेदः । अनाद्यनन्तत्वे हेतुरुक्तः—*नैसर्गिक इति* । *मिथ्याप्रत्ययरूपः = मिथ्याप्रत्ययानां रूपमनिर्वचनीयत्वम्, तद्यस्य, स तथोक्तः ;

ऋजुप्रकाशिका

तत्त्वज्ञानमन्तरेणेति ॥ "मिथ्याप्रत्ययरूपः" इत्येतद्विवृणोति—*मिथ्याप्रत्ययानामिति* ॥ *"अस्यानर्थ-

पञ्चपादिका

एवमयमनादिरनन्तो नैसर्गिक इति निगमयति ॥ *ननु* उपन्यासकाले नैसर्गिकोऽयं लोकव्यवहार इति लोकव्यवहारो नैसर्गिक उक्तः, कथमिहाध्यासो निगम्यते? अनादिरिति चाधिकावापः, *अत्रोच्यते* ; तत्रापि प्रत्यगात्मन्यहङ्काराध्यास एव नैसर्गिको लोकव्यवहारोऽभिप्रेतः ;

पञ्चपादिकाविवरणम्

काले"नैसर्गिकोऽयं लोकव्यवहारः" इत्यारभ्य "कर्तृत्व-भोक्तृत्वप्रवर्तनः" इत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः* । अत्र

वार्तिकम्

नाकरिष्यत् । नच—अन्तःकरणभेदेन तदुपपत्तिरिति—वाच्यम् ; अन्तःकरणपदेन तत्त्रितयस्यापि ग्रहात् तदादिशब्दादुपरि प्रयुज्यमानेन बहुवचनेन तद्बहुत्वाभिधानानुपपत्तेः । अन्तःकरणेषु प्रत्येकमह-मध्यासभेदादर्शनाच्च । *एतेन*—"अहंप्रत्ययिनमि"त्यत्रान्तःकरणमात्रस्य ग्रह इति—अपास्तम् ; "अन्तःकरणादिष्वि"त्यादिशब्द-बहुवचनप्रयोगानुपपत्तेः, देहादेरप्यहंप्रत्ययित्वाच्च,तत्राप्यहमध्यासस्य वक्तव्य-त्वात्, तद्वृत्तिसङ्कोचे प्रमाणाभावात् । नच—इन्द्रियेषु 'अहं चक्षुरहं श्रोत्रमि'ति तादात्म्यप्रतीत्य-भावात्, 'मम चक्षुर्मम श्रोत्रमि'त्यादिप्रतीतिदर्शनाद् ममाध्यास एव तेषु नाहमध्यासोऽपीति—वाच्यम् ; देहान्तःकरणयोरपि—'अहं देहः अहमन्तःकरणं मनो बुद्धिरहङ्कारो वे'ति प्रतीत्यदर्शनात्, 'मम देहः' 'ममान्तःकरणं मनो बुद्धिरहङ्कारश्चे'ति प्रतीतिदर्शनाच्च ममाध्यास एव नाहमध्यासोऽपीति वक्तुं शक्यत्वात् ।

भाष्यभावप्रकाशिका

तं चेति ॥ द्वयोर्विशेषावभासेऽप्यधिष्ठानत्वं न विहन्यते ; स्वगततया विशेषानवभासात्, परगततयैव प्रतीतेरिति भावः । एवमात्मन्यहंकाराध्यासकथनेन तस्य कर्तृत्व-भोक्तृत्वे उपपादिते, अहङ्कारादिष्वात्माध्यासकथनेन चाहंकारादिषु चैतन्यमुपपादितम् । अध्यासमुक्तप्रमाणविशिष्टं निगमयति—*एवमिति*॥ अनादिः प्रवाहरूपेण । *अनन्त इति विद्याऽनुदये मिथ्याप्रत्ययरूप इति रूपग्रहणं लक्षणतस्तथा रूप्यते, न प्रतीतित इति दर्शयितुम्, अथवा मिथ्याप्रत्ययानां रूपमनिर्वचनीयं लक्षणतः, तथोक्तोऽनिर्वचनीय इत्यर्थः । तस्यानर्थहेतुतां दर्शयति—*कर्तृत्वेति* ॥ प्रमाणं निग-

प्रदीपः

भाति । धर्माध्यासव्यापकत्वाद्धर्म्यध्यासस्य धर्म्यध्यासोऽप्यर्थसिद्धत्वादुपक्षिप्तप्रायोऽपि प्रकान्तार्थस्योपसंहरणार्थं सङ्ग्रहेण निर्दे-शमर्हति, इति प्रथममन्तःकरणधर्म्यध्यासं परस्परं स्वरूपतो निर्दिशति—*एवमहंप्रत्ययिनमिति* ॥ अहंप्रत्ययी, अहंकारोऽन्तः-करणमिति यावत् । *अशेषस्वप्रचारसाक्षिणि*—स्वप्रकाशे । *तद्विपर्ययेण*—अन्तःकरणविपर्ययेण ; जडस्यान्तः-करणस्य चैतन्यमेव विपर्ययः, इति तेनाध्यासोऽहंकारे चैतन्यसंसर्गाध्यास एवेति पर्यवस्यति । अत्र संसर्गाध्यास एव, नतु चैतन्यमेवाध्यस्यत इति 'तद्विपर्ययमि'ति द्वितीयान्तपदाप्रयोगेण 'तद्विपर्ययेणे'ति तु तृतीयान्तपदप्रयोगेण च ज्ञाप्यते । *ननु*

(१) "प्रवर्तनः" इति पञ्चपादिकाचादृतः पाठः ।

पञ्चपादिका

स च प्रत्यगात्माऽनादिसिद्धः ; तस्मिन् नैसर्गिकस्यानादित्वमर्थसिद्धम्। अतः प्रक्रमानुरूपमेव निगमनम्, नचाधिकावापः ॥

ननु भवेदनादिः, अनन्तः कथम् ? यदि स्यात्, तत्प्रहाणाय कथं वेदान्ता आरभ्यन्ते ? अन्तवत्त्वेऽपि तर्हि कथम् ? स्वतोऽन्यतो वा तत्सिद्धेः। तस्मादनन्तस्य प्रहाणाय वेदान्ता आरभ्यन्त इत्युक्ते, अर्थाद् एष एव प्रहाणहेतुः, असत्यस्मिन्ननन्त इति निश्चीयते। "मिथ्याप्रत्ययरूप" इति रूपग्रहणं लक्षणतस्तथा रूप्यते, न व्यवहारत इति दर्शयितुम्। "कर्तृत्व-भोक्तृत्वप्रवर्तनः" इत्यनर्थहेतुत्वं दर्शयति

वार्तिकम्

यदि ब्रूयात्—देहत्वादिपुरस्कारेणात्मनि देहादितादात्म्याध्यासाभावेऽपि-'अहं मनुष्यो गौरो गच्छामि' 'अहं सुखी दुःखी ज्ञानी कामी'त्यादिप्रतीतिदर्शनाद् देहादिधर्मितादात्म्याध्यासमन्तरेणासाधारणतद्धर्मतया दृश्यमानजाति-गुण-क्रियाद्यध्यासस्यात्मन्यनुपपत्तेस्तद्धर्मपुरस्कारेणात्मनि देहादितादात्म्याध्यासोऽप्यस्तीति, तर्हि प्रकृतेऽपि दीयतां दृष्टिः—'अहं चक्षुरि'त्यादिप्रतीत्यभावेऽपि--'अहं काणः' 'बधिरः' 'पश्यामि' 'शृणोमी'त्यादिप्रतीतिदर्शनात् काणत्वादिधर्मपुरस्कारेण तत्तादात्म्याध्यासस्याप्यात्मन्यविरोधात्। अपिच यदीन्द्रियेषु तादात्म्याध्यास एव नास्ति, तर्हि तदनात्मत्वे वादिविप्रतिपत्तिर्न स्यात्। नह्यात्मतादात्म्येनाभासमाने घटादौ कस्यचिदप्यनात्मत्वे विप्रतिपत्तिरात्मत्वप्रतिपत्तिर्वाऽस्ति ; अतोऽप्यस्तीन्द्रियेष्वात्म-तादात्म्याध्यास इति। तदेवं "युष्मदस्मदि"त्यादिनाऽऽत्मन्यनात्माध्यासमुपवर्ण्य पुनर्लक्षण-संभावना-सद्भाव-प्रमाणैस्तत्सद्भावमुक्त्वोपसंहरति—*एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्व-भोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्ष इति* ॥ *अयम्=देहेन्द्रियादिषु तद्धर्मेषु च—'अहं ममे'ति नैसर्गिकोऽध्यासः। *एवम्=उदाहृतप्रकारेण सर्वलोकप्रत्यक्ष इति संबन्धः। नैसर्गिकोऽध्यास इत्युक्तम्, तत्राध्यासपदार्थमाह—*मिथ्याप्रत्ययरूप इति* ॥

"सूत्रार्थो वर्ण्यते येन वाक्यैः सूत्रानुकारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥" इति भाष्यलक्षणात्। प्रतीतिः प्रत्ययः, प्रतीयत इति च प्रत्ययः, इति भाव-कर्मव्युत्पत्त्या ज्ञानार्थयोर्द्वयोरपि प्रत्ययपदेन ग्रहणम्। तावत्युक्ते प्रमा-तद्विषययोरतिव्याप्तिर्मा भूदिति मिथ्येत्युक्तम्। मिथ्या चासौ प्रत्ययश्चेति मिथ्याप्रत्ययः। धर्मलक्षणतां वारयति—*रूप इति* ॥ मिथ्याप्रत्यय एव, रूपम्=स्वरूपं यस्याध्यासस्य, स मिथ्याप्रत्ययरूप इत्यर्थः। नैसर्गिकपदार्थमाह—*अनादिरनन्त इति* ॥ अनादित्वन्तु प्राक्कोटिराहित्यम्। तच्चाध्यासस्य बीजाङ्कुरवत्प्रवाहरूपेण कारणाविद्यारूपेण चेति द्रष्टव्यम्। अनन्तत्वन्तु प्रकृते तत्त्वज्ञानेतरानुच्छेद्यत्वमित्यपि द्रष्टव्यम् ; अन्यथा मोक्षशास्त्रवैयर्थ्यापत्तेः, 'अमरा देवाः' इति वत् सापेक्षेऽप्यनुच्छेद्ये तत्प्रयोगोपपत्तेरिति। *ननु*—एवमप्यध्यासस्यैवाविद्यात्मकत्वं निरूपितम्, किमागतं बन्धस्येति ? अत आह—*कर्तृत्व-भोक्तृत्व-प्रवर्तक इति* ॥ कर्तृत्वं क्रिया-कार्यत्वयोरुपलक्षणम्, भोक्तृत्वं भोग-भोग्यत्वयोरिति। प्रमातृ-प्रमाण-प्रमेयव्यवहारत्रयहेतुत्वं चाध्यासस्य पूर्वमेव

प्रदीपः

अयमध्यासः सादिर्वोतानादिः ? आद्ये प्रथमाध्यासानुपपत्तिः, अनादित्वे च निवर्तकाभावाद् निवृत्त्यनुपपत्तेश्च नाद्वितीयब्रह्मसिद्धिः, न वा तस्य मिथ्यात्वसिद्धिः। सति चैवं कर्तृत्व-भोक्तृत्वादीनां जीवधर्माणां बाधाभावान्न जीवब्रह्मैक्योपपत्तिरित्याशङ्कानिरासेनाध्यासभाष्यमुपसंहरति—*एवमयमिति* ॥ *अयम्*=धर्म्यध्यास-धर्माध्यासोभयरूपोऽध्यासो हि अनाद्यविद्यात्मकत्वादविद्यावदनादिः, तत्रापि च प्रवाहत एवानादिर्यतो नैसर्गिकः। अनादित्वेनाविद्यानिवृत्त्यनुपपत्तिशङ्का त्विद्यापत्ति-

पञ्चपादिका

हेयतासिद्धये। तेन कर्तुर्भोक्तुश्च सतो मिथ्याज्ञानं दोषप्रवर्तनमिति येषां मतम्, तन्निराकृतं भवति। *सर्वलोकप्रत्यक्ष इति* "देहेन्द्रियादिष्वहंममाभिमानहीनस्ये"त्युपन्यस्य "नहीन्द्रियाण्यनुपादाये"त्यादिना योऽनुभवो मिथ्यात्वसिद्धयेऽनुसृतस्तं निगमयति॥

एवं तावत्सूत्रेणार्थादुपात्तयोर्विषय-प्रयोजनयोः सिद्धये जीवस्याब्रह्मस्वरूपत्वमध्यासात्मकमुपदर्श्य,

पञ्चपादिकाविवरणम्

सांख्यव्यतिरिक्ताः सर्वे वादिनः स्वत एव कर्तृत्व-भोक्तृत्वशक्तिमतः प्रवृत्तिमात्रनिमित्तमध्यास इति वदन्ति, तान्निराकरोति—*तेन कर्तुर्भोक्तुश्चेति*॥ सर्वलोकप्रत्यक्ष इत्यादिः स्पष्टार्थः। अस्यानर्थहेतोरिति भाष्यस्य वृत्तसङ्कीर्तनपूर्वकं तात्पर्यमाह—*एवं तावत् सूत्रेणार्थादुपात्तयोरिति*॥

ऋजुविवरणम्

प्रतिपत्तिः स्यात्, नतु देहादिरिति। तथा सति देहादिष्वहंकारविप्रतिपत्तिः स्यात्? देहो वाऽहम्? इन्द्रियं वेति?

तत्वदीपनम्

कारित्वेनोपयोग इत्याह—*अत्रेति*॥ मिथ्याज्ञानं राग-द्वेषादिदोषोत्पादनेन प्रवृत्तिकारणमिति टीकार्थः। अध्यासेऽनुमानार्थापत्त्यागमानामुपन्यस्तत्वात "सर्वलोकप्रत्यक्षः" इति कथमुक्तम्? इत्याशङ्क्य, अनुभवस्याध्याससाधनत्वात् प्रमाणान्तरस्य च तत्साधकत्वेन विवक्षितत्वान्न विरोध इत्यभिप्रायेणोक्तम्*—देहेन्द्रियादिष्विति*॥

अध्यासात्मकत्वमब्रह्मरूपत्वं निर्दिश्य प्रयोजनं निर्दिशति, इत्यनुपपन्नम्; "अस्यानर्थहेतोरि"त्यस्याध्यासप्रदर्शकत्वाभावादित्याशङ्क्याह—*अस्येति*॥ अध्यासात्मकमब्रह्मरूपत्वमुपदिश्येति वृत्तार्थोऽनूदित इत्यर्थः। हेतोः

वार्तिकम्

प्रदर्शितम्, इति नेह पुनः प्रदर्शितम्। यद्वा=तस्याप्युपलक्षणमेतदेतस्याप्युपलक्षणं तत्र तत्; प्रमातृत्वादि-कर्तृत्वादि-भोक्तृत्वादि-समुदायत्रयस्य परस्परसापेक्षत्वेन परस्पराविनाभूतत्वात्। नच—एवं सति तेनेदं पुनरुक्तमिति—वाच्यम्; पूर्वोक्तस्यैवात्रोपसंहारात्। तेन कर्तृत्वादिनवविधसंसारबन्धबीजभूतस्य देहेन्द्रियादिष्वहं-ममाभिमानस्याविद्यात्वे सिद्धे, सिद्धमेव तत्कार्यभूतस्य बन्धस्याविद्यात्मकत्वम्। तथाच नासिद्धोऽविद्यात्मकबन्धप्रत्यनीकत्वादिति हेतुरित्याशयः। एवमुपोद्घातन्यायेनादौ हेतुं प्रसाध्य हेतुमती शास्त्रस्य विषय-प्रयोजने दर्शयति—*"अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति*॥ *अस्य*=अनाद्यनन्ताहं-ममाध्यासस्य। *अनर्थः*=नवविधसंसारबन्ध उक्तः, तस्य हेतोरित्यर्थः। "अस्यानर्थहेतोरि"ति समानाधिकरणे षष्ठ्यौ। *हानम्*=विनाशः। स चाध्यासस्य कार्यस्वाभाव्याद्विद्यामन्तरेणाप्यस्तीत्यत उक्तम्—*प्रहाणायेति*॥ विनाशस्य प्रकर्ष आत्यन्तिकता। सा च प्रतियोगिनः पुनरनुत्पादाद्भवति। तदनुत्पादश्च तन्मूलाविद्यानाशादिति "प्रहाणाये"ति समूलाध्यासनाशो विवक्षितः। नच स प्रकृतविद्यामृते संभवति। अतस्तत्प्रयोजनाशयाऽऽत्मनस्त्वंपदलक्ष्यस्य

प्रदीपः

परांहता; यतो यावन्मूलविद्यावस्थानमस्यान्तो न भवति, इदमेवाभिप्रेत्योक्तम्—*अनन्त इति*॥ कार्यरूपस्याध्यासस्य नाशमात्रमेव तत्त्वसाक्षात्कारेण भवति, नतु बाधः; उपादाननाशेन साकं कार्यनाशस्यैव बाधरूपत्वात्॥

यत्तु—केचन—अत्रत्यमनन्तपदमवलम्ब्याविद्याया अनादेन विनाश इति मन्यन्ते, तदिदमत्र मूलाविद्याया अपरामर्शाच्चिन्त्योपपत्तिकम्। अनन्तोऽप्ययं वस्तुगत्या बाध्यमानत्वान्मिथ्याप्रलयरूप इति न दोषः। तथाच तन्निबन्धनकर्तृत्वादिकमपि बाधितत्वान्न पारमार्थिकम्, इति न ब्रह्मणः प्रत्यगभेदासिद्धिः, इति प्रत्यगभिन्नं ब्रह्मस्वरूपं कर्तृत्वादिसम्बन्धरहितं वाऽऽत्मस्वरूपं वा जिज्ञास्यतया प्रतिज्ञातं नासिद्धम्, इति जिज्ञास्यब्रह्मस्वरूपसाधकत्वादध्यासभाष्यमिदं सूत्रारूढमेव। *ननु*—अध्यासोऽविद्या

अस्यानर्थहेतोः प्रहाणाय, आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते ।

भामती

अनिर्वचनीय इत्यर्थः । प्रकृतमुपसंहरति—*अस्यानर्थहेतोः प्रहाणाय*।। विरोधिप्रत्ययं विना कुतोऽस्य प्रहाणमिति ? अत उक्तम्—*आत्मैकत्वविद्याप्रतिपत्तये* ।। प्रतिपत्तिः = प्राप्तिः तस्यै, नतु जपमात्राय, नापि कर्मसु प्रवृत्तये । आत्मैकत्वम् = विगलितनिखिलप्रपञ्चत्वम् । आनन्दरूपस्य सतः तत्प्रतिपत्तिं निर्विचिकित्सां भावयन्तो वेदान्ताः समूलघातमध्यासमुपघ्नन्ति ।।

ऋजुप्रकाशिका

हेतोरि"त्यत्र "अस्ये"त्यस्याध्यासस्येत्यर्थः । *अस्य=अध्यासस्य । "विद्याप्रतिपत्तये" इत्यत्र प्रतिपत्तेरपि विद्यात्वाद् "विद्याप्रतिपत्तये" इत्यत्र पौनरुक्त्यमित्याशङ्क्य, प्रतिपत्तिशब्दार्थमाह---*प्रतिपत्तिः प्राप्तिरिति*।। तस्यै= तद्विद्याप्राप्तये । आत्मैकत्वविद्याप्राप्तय एव वेदान्तारम्भः, न जपाय, नापि कर्मसु प्रवृत्त्यर्थमित्याह----*नत्वित्यादिना* ।। "आत्मैकत्वविद्याप्रतिपत्तये" इत्यत्र आत्मैकत्वस्वरूपमाह---*आत्मैकत्वमिति* ।। *विगलितनिखिलप्रपञ्चत्वम् = अद्वितीयसच्चिदानन्दरूपत्वम् । एवं सत्याह---*आनन्दरूपस्येति* ।। *तत्प्रतिपत्तिम् =

पञ्चपादिका

अस्यानर्थहेतोः प्रहाणायेति प्रयोजनं निर्दिशति । हेतोः प्रहाण्या हि हेतुमतः प्रहाणिरात्यन्तिकी यतः । *ननु* अनर्थहेतुरध्यासोऽनादिः, स कथं प्रहीयते ? तथाहि—मनुष्यादिजातिविशेषमात्राध्यासस्ततो विविक्तेऽपि न्यायतोऽहंप्रत्ययेऽनादित्वात्पूर्ववदविकलो वर्तते । *नायं दोषः* ।।

पञ्चपादिकाविवरणम्

ननु अनर्थस्य प्रहाणायेति वक्तव्यम्, न हेतोः प्रहाणायेति, अत आह—*हेतोः प्रहाण्या हीति* ।। प्रयोजनभाष्यमाक्षिपति—*नन्वनर्थहेतुरध्यासोऽनादिरिति* ।। *ननु* शास्त्रप्रामाण्यान्निवर्ततामिति, *न* ; प्रत्यक्षविरोधादित्याह—*तथाहि मनुष्यत्वादीति* ।। नहि सादित्वमनादित्वं वा विनाशाविनाशयोर्निमित्तम्, किन्तु विरोधिसन्निपातासन्निपाताविति परिहरति—*नायं दोष इति* ।।

ऋजुविवरणम्

एतावत्त्वाच्च प्रयोजकस्येत्यर्थः । नायं दोष इति कथमुक्तम् ? नहि ज्ञानान्तरोत्पत्त्यङ्गीकारेण निवृत्तिः सिद्धा ; अनादित्वस्य तदवस्थत्वादित्याशङ्क्याह—*न सादित्वमिति* ।। कथं विरोधिसन्निधिमात्रमेव प्रयोजकम् ? कथं

तत्त्वदीपनम्

स्वरूपेणापुरुषार्थत्वाभावात् "तत्प्रहाणाये"त्युक्तमिति शङ्कते—*नन्विति* ।। यद्यपि हेतुनिवृत्तिः स्वरूपेणानभिलषिता ; तथाऽपि कार्यस्यात्यन्तोच्छेदसिद्ध्यर्थं हेतुनिवृत्तिनिर्देश इत्याह—*अत आहेति*।।*"कथं प्रहीयते"इत्यत्र कथमः प्रश्नार्थतां निरस्यति—प्रयोजनेति*।। विमतम्, अनिरस्यम्, अनादित्वात् ; आत्मवदित्युक्ते शास्त्रविरोधं शङ्कते—*ननु शास्त्रेति* ।। "तरति शोकमात्मवि"दित्यादि शास्त्रशब्दोपात्तम् । तस्य प्रामाण्यमेवासिद्धमित्याह—*न प्रत्यक्षेति* ।। *अहंप्रत्यये

भाष्यभावप्रकाशिका

मयति—*सर्वलोकेति* ।। प्रत्यक्षप्रमाणमुक्तप्रमाणोपलक्षणार्थम् । अध्यासप्रतिपादनस्य प्रयोजनं निर्दिशति—*अस्यानर्थहेतोरिति* ।। विषयं निर्दिशति—*आत्मैकत्वेति* ।। अथवा—कुतोऽस्य

प्रदीपः

वा, न निवर्तते, अनादित्वात् ; ब्रह्मवत्, इत्याशङ्क्याह—*अस्यानर्थहेतोः प्रहाणायेति* ।। *प्रहाणाय*=बाधाय । उपादानना-

वार्तिकम्

तत्पदलक्ष्येणैक्यविषयिणी विद्या महावाक्यजनिता तदविद्यानिवर्तनक्षमाऽन्तःकरणवृत्तिः, तदभिव्यङ्ग्या वा तदैक्यरूपा या, तस्याः *प्रतिपत्तिः* =उत्पत्तिः, विस्मृतकण्ठचामीकरादिवत् प्राप्तिर्वा ; तस्यै। *सर्वे वेदान्ताः* =सर्वा उपनिषदः। *आरभ्यन्ते* =विचार्यन्ते। अस्मिन् शास्त्र इति शेषः। विचारमन्तरेणारभतेः प्रकृतेऽर्थान्तरस्यासंभवादुपनिषदामपौरुषेयत्वात्। तथाच करणेतिकर्तव्यतयोः समानार्थविषयत्वनियमाद् वेदान्तानामिव तद्विचारशास्त्रस्यापि समूलानर्थहेतुनिवृत्तिमुख्यं प्रयोजनम्, आत्मैकत्वविद्याप्रतिपत्तिरवान्तरप्रयोजनम्, आत्मैकत्वञ्च विषयः सिद्धो भवति॥ नच—तयोः समानप्रयोजनत्वेऽपि न समानविषयत्वम् ; करणस्य कर्मकारकविषयत्वात्, इतिकर्तव्यतायाश्च करणविषयत्वादिति—वाच्यम् ; तस्याः करणविषयत्वेऽपि तद्द्वारा कर्मकारकविषयत्वाविरोधात्, अन्यथा कर्मणः कर्तृव्यापाराविषयत्वात् कर्तुः स्वातन्त्र्यव्याहतेः, कारकान्तराप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वस्यैव तत्त्वादिति। *ननु*—परमानन्दावाप्तिरपि मुख्यं प्रयोजनम्, तत् किमिति नाभिहितं भाष्यकारेण? प्रवृत्तिविशेषकरत्वाच्च भवितव्यं तदभिधानेन। *तत्र केचिद्वदन्ति*—नास्त्येव मोक्ष आनन्द इति। कुतः? आनन्दस्य संवेद्यैकस्वभावत्वात्, मोक्षे च संवेदनासंभवात्, तत्कारणशरीराद्यभावात्, अन्यथा मोक्षानुपपत्तेः, "विज्ञानमानन्दं ब्रह्मे"त्यादिसामानाधिकरण्यश्रुतेर्विज्ञानस्तुतिमात्रपरत्वात्—इति, तन्न ; ब्रह्मण आनन्दरूपत्वे श्रुतितात्पर्यस्य—"आनन्दमयोऽभ्यासादि"त्यत्र निदर्शयिष्यमाणत्वात्। अत एव न वेद्यं तत् ; विदभिन्नत्वात्। *ननु*—अवेद्यं कथं सुखं स्यात्? लोके वेद्यस्यैव सुखत्वदर्शनादिति—चेत्, *न* ; असिद्धेः। नहि सुखं लोकेऽपि वेद्यम् ; ब्रह्मसुखस्यैव तत्र पुण्यासादिततत्तद्विषयसंपर्कजनितान्तःकरणवृत्तिभेदप्रतिफलितस्य लौकिकसुखत्वेनाभिमतत्वात्, तस्य चावेद्यत्वात्। कथं तर्हि लोके तद्वेद्यत्वाभिमान इति चेत्, न ; अन्तःकरणवृत्त्युपाधितो जन्मविनाशाभिमानवत् तस्य तदभिमानोपपत्तेरिति। *एतेन*—ये मोक्षे नित्यसुखं लोकानुभवानुसारेण वेद्यमिच्छन्ति, तेषामपि मतम्—*अपास्तम्* ; लोकानुभवस्यान्यथासिद्धेः। अपिच यदि यः पदार्थो लोके यादृशो दृष्टः, तादृश एव पदार्थो मोक्षेऽपि कल्पनीयः, तर्हि लोक आत्मा दुःखादिविशिष्टो दृष्टः, सुखञ्चानित्यं दृष्टम्, इति मोक्षेऽपि दुःखादिविशिष्ट आत्मा, सुखञ्चानित्यं कल्प्येत। तथाच साधु मोक्षः प्रतिपादितः स्याद्भवता। अपिच किमनित्यज्ञानेन मोक्षे तत् सुखं वेद्यते? नित्यज्ञानेन वा? नाद्यः ; मोक्षकाले शरीराद्यभावेनानित्यज्ञानासंभवात्। द्वितीयेऽपि किं ब्रह्मानन्दभिन्नं तद् ज्ञानम्? अभिन्नं वा? नाद्यः ; अद्वैतप्रतिपादकश्रुतिशतविरोधात्। नापि द्वितीयः ; एकस्यैव ग्राह्य-ग्राहकभावानुपपत्तेः, "विज्ञातारमरे केन विजानीयात्" "अविज्ञातं विजानताम्" "यत्तदद्रेश्यमग्राह्यम्" "एतदप्रमयं ध्रुवम्" इत्याद्यवेद्यत्वप्रतिपादकश्रुतिशतविरोधाच्च।

भाष्यभावप्रकाशिका

प्रमाणमित्यत उक्तम्—*आत्मैकत्वेति*॥ प्रतिपत्तिरप्रतिबन्धतया प्राप्तिः। एवं "युष्मदस्मदि"त्यादिना

प्रदीपः

ज्ञाधीनस्वनाशवत्त्वमेव बाधितत्वम्। तथाचानादित्वेऽपि यथोपादानं नश्यति, एवमध्यासोऽपि। अनादित्वं हि ब्रह्मणाऽविद्यायाः साधर्म्यमात्रम्, नतु तदनिवर्त्यत्वप्रयोजकम्। अनादीनां प्रागभाव-परमाणुगतश्यामत्व-वासनादीनां निवृत्तिदर्शनादिति भावः। *एतेन*—अविद्याया निवृत्त्यनुपपत्तिरपि—*परास्ता*॥ आत्मैकत्वविद्याप्रतिपत्तये=आत्ममात्रविषयकनिर्विकल्पकसाक्षात्कारसिद्धय इत्यर्थः। नह्यात्ममात्रविषयकनिर्विकल्पसाक्षात्कारं विनाऽज्ञाननिवृत्तिः। आत्ममात्रसाक्षात्कार एव ह्यात्मविद्या आत्ममात्रविषयकाविद्यानिवर्तनक्षमा, नोपासकोपास्योपासनाभेदाद्यवगाहिनी। उपासनं हि निदिध्यासनपदवाच्यं न

पञ्चपादिका

तत्त्वमसीत्यादिवाक्याद्ब्रह्मस्वरूपावगाहिज्ञानान्तरोत्पत्तेरिष्टत्वात्। तद्धि ब्रह्मणोऽवच्छिद्यैव चैतन्यस्य

पञ्चपादिकाविवरणम्

लोके तावदनादिः प्रागभावो निवर्तते; सुगतानां तत्त्वपरिभावनाप्रकर्षेणानादिवासनासन्तानानां निवृत्तिरिष्टा; नैयायिकादीनामप्यनादिर्मिथ्याज्ञानप्रवाहः परमाणुश्यामता च निवर्तते; सांख्यानामप्यविवेको निवर्तते विवेकेन; मीमांसकादीनामिदानींतनधर्मतत्त्वज्ञानप्रागभावोऽनादिर्निवर्तते। अनादिभावरूपमात्मवन्न निवर्तत इति चेत्, न; अनिर्वचनीयत्वादज्ञानस्य। अनादिर्न निवर्तत इति सामान्यव्याप्तिः, ज्ञानेनाज्ञाननिवृत्तिरिति तु विशेषव्याप्तिः; अतः सैव बलवती॥ *ननु* स्वोपादानगतोत्तरावस्था विनाशः, तत्र कथमनादेर्निरुपादानस्य विनाशः? *न*; स्वाश्रयगतोत्तरावस्थेत्येतावत्त्वात्, अन्यथाऽणुश्यामत्वादीनामनिवृत्तिप्रसङ्गात्। अभाववैलक्षण्यादात्मवदज्ञानस्यानिवृत्तिरिति चेत्, न; सद्वैलक्षण्यात् प्रागभाववन्निवृत्तिः किं न स्यात्? कस्तर्हि निर्णयः? ज्ञानाज्ञानकृतो विशेषान्वय इत्युक्तम्॥

*यत्तु व्यतिरेकज्ञानेऽप्यध्यासो न निवर्तत इति, तत्राह—*तत्त्वमसिवाक्यादिति* ॥ *ननु*

ऋजुविवरणम्

वाऽनादेस्तत्सन्निपातसंभवः? इत्याशङ्क्याह—*लोके तावदिति* ॥ *न सद्वैलक्षण्यादिति* ॥ अनेन विरुद्धव्यभिचारित्वम्, अनुमानेन वा बाधो दर्शितः। "तद्धि ब्रह्मणः" इत्यनेन ब्रह्मज्ञानमविद्यां निराकुर्वदुत्पद्यत इत्युक्तम्, तत्र व्यतिरेकज्ञानेनास्य को विशेषः? व्यतिरेकज्ञानस्यानिवर्तकत्वादेतदपि न निवर्तकमिति चोदिते, निराकरणेनोत्पत्तेरित्युक्ते साध्यस्यैव हेतुत्वं स्यात्, नाप्यसहभावेन विरोधाद्विशेषः; तस्याप्रयोजकत्वादित्याशङ्क्याभिप्राय-

तत्त्वदीपनम्

विविक्तेऽपीति* ॥ विविक्तविषयेऽपीत्यर्थः। अनादेर्न निवृत्तिरित्युक्ते ज्ञानान्तरोत्पत्तिप्रदर्शनमनुपयुक्तमित्याशङ्क्य, "नायमि"त्यत्र सूचितां युक्तिमाह—*न हीति* ॥ सादित्वादेरनिमित्तत्वे हेतुं दर्शयति—*लोके तावदित्यादिना* ॥

अनादिर्न निवर्तत इत्यत्र किमनादित्वमात्रं विवक्षितम्? उतानादिभावत्वम्? आद्येऽपि किं लौकिकस्य वेदम्? उत वादिनाम्? इति विकल्प्याद्यं दूषयति—*लोके तावदिति* ॥ द्वितीयेऽपि किं सुगतस्य? उत नैयायिकस्य? अथवा सांख्यस्य? उत मीमांसकस्य? इति विकल्प्य क्रमेण दूषयति—*सुगतानामित्यादिना* ॥ द्वितीयं पक्षमुत्थापयति—*अनादीति* ॥ भावशब्देन किं सत्त्वं विवक्षितम्? उताभाववैलक्षण्यम्? इति विकल्प्याद्ये विशेष्यासिद्धिमाह—*नानिर्वचनीयत्वादिति* ॥ अनादित्वे सति भावस्य निवृत्तिरस्तु, को बाधः? नच सामान्यव्याप्तिर्बाधः, ततो विशेषव्याप्तेर्बलीयस्त्वादित्यभिप्रायेणाह—*अनादिर्न निवर्तत इति* ॥ लोके ज्ञानाज्ञानयोर्निवर्त्य-निवर्तकतादर्शनाद्ब्रह्मज्ञानाज्ञानयोरपि तथात्वमित्यर्थः। प्रकारान्तरेणानादेर्नाशासंभवं शङ्कते—*ननु स्वोपादानेति*॥ घटादेर्नाशो नाम स्वकारणसमवायिनी कपालाद्यवस्था, अज्ञानस्य चाकार्यत्वान्न स्वकारणसमवायिन्युत्तरावस्थेत्यविनाश इत्यर्थः। व्यर्थविशेषणतया परिहरति—*न स्वाश्रयेति* ॥ स्वाश्रयगतोत्तरावस्थाया नाशत्वसंभवे समवायिकारणेति विशेषणं व्यर्थम्, तथाचात्मनो ब्रह्मस्वरूपाभिव्यक्तिरविद्यानिवृत्तिरिति किमत्रावद्यमित्यर्थः। न केवलं व्यर्थविशेषणता, किंत्वव्याप्तिश्चेत्याह—*अन्यथेति* ॥ प्रागभावादिरादिशब्दार्थः।

कल्पान्तरमुत्थापयति—*अभावेति ॥ अत्रानादित्वं विशेषणं द्रष्टव्यम्। अनुमानपराहतिमाह—*न सद्वैलक्षण्यादिति*॥ समानबलत्वान्नानयोर्बाध्य-बाधकतेति शङ्कते—*कस्तर्हीति*। समानबलवत्त्वमसिद्धमित्याह—*ज्ञानाज्ञानेति*॥ आत्मज्ञाने सत्यप्यध्यासानिवृत्तेर्न तयोर्निवर्त्य-निवर्तकतेत्युक्तम्। चोद्यमनुवदति—*यत्त्विति* ॥ लौकिकात्मज्ञानानिवर्त्यत्वेऽप्यौपनिषदात्मज्ञाननिवर्त्यत्वमध्यासस्य युक्तमित्याह—*तत्राहेति ॥ औपनिषदात्मज्ञानम्, नाध्यास-

प्रदीपः

वेदान्ताजन्यसाक्षात्काररूपम्; अन्यथा "आत्मा वाऽरे द्रष्टव्यः" इति द्रष्टव्यपदवैयर्थ्यापत्तेः। नहि रज्जूपासनेन रज्ज्वज्ञाननिवृत्तिरनुभवसिद्धा, रज्जुतत्त्वसाक्षात्कारेणैव। *ननु*—आत्ममात्रसाक्षात्कारः किंप्रमाणकः? नच वेदान्तप्रमाणकः;

पञ्चपादिका

ब्रह्मरूपत्वप्रच्छादनेन जीवरूपत्वापादिकामनादिसिद्धामविद्यामहङ्कारादिविक्षेपहेतुं निराकुर्वदेवोत्पद्यते। ततः कारणनिवृत्तौ तत्कार्यम्—'अहमि'ति जीवे भोक्तृत्वरूपता सपरिकरा निवर्तत इति युज्यते। अहंप्रत्ययः पुनरनादिसिद्धेनैव कार्य-करणमात्रेण सहभावादविरोधान्न स्वरूपविवेकमात्रेण निवर्तते। नापि ज्ञानान्तरमुत्पन्नमिति विशेषः।

ननु—निरतिशयानन्दं ब्रह्म श्रूयते, ब्रह्मावाप्तिसाधनं च ब्रह्मविद्या, "स यो ह वै तत्परमं

पञ्चपादिकाविवरणम्

व्यतिरेकब्रह्मात्मज्ञानयोरध्यासनिवृत्तौ को विशेष इति? तत्राह—*तद्धि ब्रह्मणोऽवच्छिद्येति*॥ नच व्यतिरेकानवबोधनिमित्तः संसारः, किन्तु ब्रह्मानवबोधनिमित्त इति श्रुति-तदर्थापत्तिभ्यां दर्शितम्। अतस्तत्त्वज्ञानान्निवर्तत इति भावः। *ननु* ज्ञानमज्ञानस्यैव निवर्तकम्, कथमध्यासस्य निवृत्तिरिति? तत्राह—*ततः कारणनिवृत्ताविति*॥ *ननु* अहंप्रत्ययोऽप्यर्थतस्तथाभूतब्रह्मविषय एव, स किमित्यज्ञानं न निवर्तयतीति? ब्रह्मात्मतानवभासकत्वादित्याह—*अहंप्रत्ययः पुनरिति*॥ *ननु* विचाराद्विवेकज्ञानान्तरमुत्पन्नं निवर्तयेदिति? न; अप्रमाणज्ञानत्वादित्याह—*नापि ज्ञानान्तरमिति*॥ *ननु* नानर्थनिवृत्तिः शास्त्रस्य प्रयोजनम्, किंतु निरतिशयब्रह्मानन्दावाप्तिः, इति पुनः प्रयोजनभाष्यमाक्षिपति—*ननु निरतिशयानन्दं ब्रह्म श्रूयत इति*॥ यथा शास्त्रजन्यब्रह्मविद्याफलमानन्दावाप्तिः,

ऋजुविवरणम्

माह—*नच व्यतिरेकानवबोधेति*॥ "न वक्तव्यमि"त्ययुक्तम्; विषयत्वेन लाभेऽपि प्रयोजकत्वेनानिर्देशात्,

तत्त्वदीपनम्

निवर्तकम्, आत्मज्ञानत्वात्; लौकिकात्मज्ञानवदिति; इतरथेतरस्यापि निवर्तकत्वप्रसङ्ग इति शङ्कते—*ननु व्यतिरेकेति*॥ विशेषाभावोऽसिद्ध इत्याह—*तत्राहेति*॥ औपनिषदात्मज्ञानस्याज्ञाननिवर्तकत्वादध्यासनिवर्तकत्वम्, इतरस्य तु तद्वैपरीत्यम्; अनिवर्तकत्वमित्यर्थः। अज्ञानानिवर्तकत्वेऽप्यध्यासनिवर्तकत्वं व्यतिरेकज्ञानस्य किं न स्यात्? इत्याशङ्क्याह—*नचेति*॥ यदविद्याविजृम्भितोऽध्यासः, तद्विद्यया तन्निरास इति निश्चयः, न तद्व्यतिरेकाज्ञाननिमित्तत्वं संसारस्य, इति न व्यतिरेकज्ञाननिवर्त्यत्वमित्यर्थः। *अथवा*—इतोऽपि न व्यतिरेकज्ञानस्य निवर्तकत्वमित्याह—*नचेति*॥ अर्थस्तु पूर्ववदेव। *श्रुति-तदर्थापत्तिभ्यामिति*;। "इन्द्रो मायाभिः पुरुरूप ईयते" "मायां तु प्रकृतिं विद्यादि"त्याद्या श्रुतिः। बन्धस्य ब्रह्मज्ञाननिरस्यत्वानुपपत्तिरर्थापत्तिः॥

ज्ञानाज्ञानयोर्निवर्त्य-निवर्तकताप्रसिद्धेर्ज्ञानस्य नाध्यासनिवर्तकत्वमिति शङ्कते—*नन्विति*॥ अर्थान्निवृत्तिरित्याह—*तत्राहेति*॥ ज्ञानत्वाविशेषादुभयोरप्यज्ञाननिवर्तकत्वं तुल्यमिति शङ्कते—*नचाहंप्रत्यय इति*॥ *तथाभूतेति*॥ प्रत्यग्भूतब्रह्मानाकारान्न निवर्तकत्वमित्याह—*ब्रह्मात्मेति*॥ *टीकाया एषोऽर्थः*—न स्वरूपविवेकमात्रेण सकलोऽध्यासो निवर्तते; ब्रह्मानाकारत्वात्। विवेकमात्रेणानिवर्त्यत्वे हेत्वन्तरमाह—*अहंप्रत्यय इति*॥ व्यतिरेकविषयाहंप्रत्ययानिवर्त्यत्वेऽपि विचारजन्यज्ञानेनागन्तुकेन निवृत्तिः स्यादिति शङ्कते—*ननु विचारादिति*॥ विचारशब्देन किमनुमानं विवक्ष्यते? उत तर्कः? नाद्यः; परोक्षत्वादित्यभिप्रायेण द्वितीयं प्रत्याह—*नाप्रमाणेति*॥ अनर्थहेतुनिवृत्तेरप्यर्थ्यमानतया पुमर्थत्वादाक्षेपानुपपत्तिमाशङ्क्याह—*ननु नानर्थेति*॥ सुखप्रतिबन्धकत्वात्तन्निवृत्तिप्रार्थनमित्यभिसन्धिः॥

अनर्थप्रहाणस्यान्यथासिद्धेरभिहितत्वात् "ननु चानर्थस्यापी"त्यस्यानुपपत्तिमाशङ्क्याह—*यथेति*॥ सुखप्राप्तेरर्थ्यमानत्वात् फलत्वाच्च यथा पुरुषार्थता, तद्वद् दुःखनिवृत्तेरपीत्यर्थः। अनर्थनिवृत्तेः पुमर्थत्वेऽपि नात्र तत्संकीर्त-

प्रदीपः

वेदान्तानां वाक्यरूपत्वात्, वाक्यानां च पदार्थद्वयसम्बन्धावगाहिज्ञानजनकत्वनियमेन ततो निर्विकल्पकसाक्षात्कारासम्भवात्।

पञ्चपादिका

ब्रह्म वेद ब्रह्मैव भवती"त्यादिश्रुतिभ्यः ; तस्मान्निरतिशयसुखावाप्तय इति वक्तव्यम्, किमिदमुच्यते—"अनर्थहेतोः प्रहाणाये"ति ? *ननु*—चानर्थस्यापि समूलस्य प्रहाणं श्रूयते ब्रह्मविद्याफलम्—"तरति शोकमात्मवित्" "जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः"इति च ॥ उभयं तर्हि वक्तव्यम् ; श्रूयमाणत्वात् पुरुषार्थत्वाच्च ? न वक्तव्यम् ॥ कथम् ? "आत्मैकत्वविद्याप्रतिपत्तये" इत्यात्मनो जीवस्य ब्रह्मात्मकता शास्त्रस्य विषयः, तेनानन्दात्मकब्रह्मस्वरूपताप्राप्तिर्जीवस्य विषयतयैव संवृत्ता । न च सा विषयाद्बहिः, येन पृथङ्निर्देशार्हा स्यात्, समूलानर्थहानिस्तु बहिः शास्त्रविषयाद्

पञ्चपादिकाविवरणम्

तथाऽनर्थनिवृत्तिरपि श्रुता, तत्र कथं प्रयोजनापेक्षा ? इत्याह—*ननु चानर्थस्यापीति*॥ तर्हि कृत्स्नस्य फलस्य संकीर्तनं कर्तव्यम्, न फलांशस्येति चोदयति—*उभयं तर्हीति* ॥ न ; प्रयोजनत्वेन वक्तव्यानन्दावाप्तेर्विषयत्वनिर्देशसामर्थ्यादेव पुरुषाकाङ्क्षया प्रयोजनत्वसिद्धेः श्रुत्यर्थाभ्यां प्रयोजनसम्पूर्णतासिद्धिर्विषयनिर्देशलाभश्चेति युक्तोऽयं व्यपदेश इत्याह—*न वक्तव्यमित्यादिना* ॥ *ननु* ब्रह्मात्मतैव विषयो भवतु, आनन्दावाप्तिस्तु पृथक् प्रयोजनत्वेन निर्दिश्यतामिति, नेत्याह—*नच सा विषयाद्बहिरिति* ॥ ब्रह्मात्मतैवानन्दप्राप्तिरित्यर्थः ।* ननु* अनर्थनिवृत्तेरपि फलवचनविषयत्वात्साऽपि शास्त्रविषय इति, नेत्याह—*समूलानर्थहानिरिति* ॥ ब्रह्मात्मैकत्वमेव शास्त्रविषयः, फलं त्वर्थसिद्धमिति भावः । तर्हि ब्रह्मात्मैकत्वशास्त्रविषय

ऋजुविवरणम्

तत्साफल्याय वक्तव्यत्वादित्याशङ्क्याह—*न प्रयोजनत्वेनेति* ॥ *ननु*—ब्रह्मप्राप्तिरन्या, अन्या चानन्दप्राप्तिः, अतः कथं विषयाद् बहिष्ठत्वाभावः ? इत्याशङ्क्य व्याचष्टे—*ब्रह्मात्मतैवेति* ॥ भवतु ब्रह्मरूपाच्छास्त्रविषयाद् बहिष्ठं फलम् ; शास्त्रस्यापि विषयत्वात्, न प्रयोजनत्वेन निर्देश्यमित्याशङ्क्याभिप्रायमाह—*ब्रह्मात्मैकत्वमेवेति* ॥ भवतु ब्रह्मप्रतिपादनपूर्वकं जीवस्य ब्रह्मरूपत्वप्रतिपादनम् ; तथाऽपि नाभावस्य वाक्यार्थत्वम्, भावरूपैक्यपरत्वात् शास्त्रस्येत्या-

तत्त्वदीपनम्

नम्, तस्य प्रवृत्तिफलत्वात्, प्रवृत्तेश्चानन्दावाप्तिकथनेन सिद्धेर्नोभयं वक्तव्यमित्याशङ्क्याह—*तर्हीति* ॥ *कृत्स्नेति* ॥ यद्यप्येककथने प्रवृत्तिसिद्धिः ; तथाऽपि फलस्य साकल्येन संकीर्तन आदरेण प्रवृत्तिसिद्धिरित्यर्थः । आनन्दावाप्तेरर्थ्यमानत्वात् फलत्वम्, इति फलत्वेन पृथङ् निर्देष्टव्यमित्याशङ्क्य, तस्यार्थसिद्धत्वान्न पृथक् कीर्तनमित्याह—*न प्रयोजनत्वेनेति* ॥ अग्निसंयोगान्नवनीते यथा द्रवावस्थोपजनिः, तद्वदानन्दात्मकेन जीवेनानन्दात्मके ब्रह्मण्युपास्यमान आनन्दावस्थोपजायते, ततश्च पृथङ्निर्देशो युक्त इत्याशयेन शङ्कते—*ननु ब्रह्मेति* ॥ "एष ह्येवानन्दयाती"ति ब्रह्मण आनन्दहेतुत्वश्रवणात् कथं तस्यानन्दात्मकत्वमित्याशङ्क्याह—*ब्रह्मात्मतैवेति* ॥ "विज्ञानमानन्दं ब्रह्म" "यदेष आकाश आनन्दः" इत्यादिवाक्याद् ब्रह्मण आनन्दत्वम्, तदभेदादितरोऽपि तादृशः । ततश्च प्रतिबन्धनिवृत्त्यपेक्षया भेदव्यपदेश इत्यर्थः ।

अनर्थनिवृत्तेरभावत्वाद्विषयान्तर्भावशङ्कासंभवात् "समूलानर्थेति" ग्रन्थानुपपत्तिमाशङ्क्याह—*नन्वनर्थेति* ॥ "तरति शोकमात्मवित्" "यदा सर्वे प्रमुच्यन्ते" इत्यादिफलवचनशब्दार्थः । किमनर्थनिवृत्तेः प्रत्यग्ब्रह्मैक्यविषयान्तर्भाव उच्यते ? किं वा पृथग्विषयत्वम् ? नाद्य इत्याह—*नेत्याहेति* ॥ द्वितीयं दूषयति—*ब्रह्मात्मैकत्वमिति* ॥ अज्ञातज्ञापकं हि शास्त्रम्, ब्रह्मात्मैक्यस्य चाज्ञातत्वाद्विषयत्वम् ; अविद्या-तत्कार्यप्रतिभासनिवृत्तेर्ब्रह्मापरोक्षोदयनान्तरीयकत्वान्न प्रतिपाद्यत्वमित्यर्थः । ब्रह्मैक्यस्य शास्त्रविषयत्वेऽनर्थनिवृत्तेरपि तद्विषयत्वमुपगन्तव्यम्, ब्रह्मणो निष्प्रपञ्चत्वादिति शङ्कते—*तर्हि ब्रह्मेति* ॥ तत्त्वमस्यादिशास्त्रे प्रपञ्चाभावाप्रतिपत्तेर्न तस्य विषयत्वमिति

वार्तिकम्

तस्मान्न वेद्यो ब्रह्मानन्दः, किंतु विद्यमानतया स्वप्रकाश एवेति स्थितम् । तथाच तादृशं सुखं प्रयोजनं

पञ्चपादिका

ब्रह्मात्मरूपात्। अनर्थहेतुप्रहाणमपि तर्हि न पृथङ्निर्देष्टव्यम्? यतः सर्वेषु वेदान्तेष्वलौकिकत्वाद् ब्रह्मगस्तत्प्रतिपादनपूर्वकमेव जीवस्य तद्रूपता प्रतिपाद्यते। तद्यथा—"सदेव सोम्येदमग्र आसीदि"त्युपक्रम्य--"ऐतदात्म्यमिदं सर्वं तत्सत्यम् स आत्मे"त्यवसानं निरस्तसमस्तप्रपञ्चं वस्तु तत्पदाभिधेयं समर्पयदेकं वाक्यम्; तथा सति तादृशेन तत्पदार्थेन संसृज्यमानस्त्वंपदार्थः पराकृत्यैव निर्लेपमनर्थहेतुमग्रहणमन्यथाग्रहणं च तथा निश्चीयत इति। यद्येवं ब्रह्मात्मावगतिनान्तरीयकमनर्थहेतोरविद्यायाः प्रहाणम्, न शब्दस्य तत्र व्यापारः, तेन पृथङ्निर्दिश्यते। युक्तं चैतत्—न हि विपर्यासगृहीतं वस्तु

पञ्चपादिकाविवरणम्

एवानर्थनिवृत्तिर्न फलवचनविषय इत्याह—*अनर्थहेतुप्रहाणमपि तर्हीति*॥ *ननु* तत्त्वमसिवाक्येऽप्यनर्थनिवृत्तिर्विषयतया नावगम्यत इति, तत्राह—*यतः सर्वेषु वेदान्तेष्विति*॥ वाक्यार्थस्य भावरूपत्वेऽपि ब्रह्मपदार्थस्यानर्थाभावविशिष्टतयैव प्रतिपादनात्सोऽपि विषय इत्यर्थः॥

ननु न पदार्थप्रतिपादकं वाक्यमस्ति, किन्त्वैक्यप्रतिपादकमेवेत्याशङ्क्याह—*तद्यथा सदेव सोम्येदमित्यादि। समर्पयदेकं वाक्यमिति*॥ अयमर्थः—अलौकिकत्वाद् ब्रह्मपदार्थं प्रतिपाद्य तादात्म्यवाक्येनैकवाक्यमिति। *ननु* ब्रह्मणि निष्प्रपञ्चे शास्त्रविषये जीवगतानर्थनिवृत्तिः कथं शास्त्रविषयः? इत्याशङ्क्याह-- *तथा सति तादृशेन तत्पदार्थेनेति*॥ एवमपि स्वाभाविकनिष्प्रपञ्चता शास्त्रविषयः, अविद्या-तत्कार्यनिरासस्तु निष्प्रपञ्चब्रह्मात्मतावगतिसामर्थ्यलभ्यो न शास्त्रविषयः, अविद्या-तत्कार्यप्रतिभासाभावस्य तत्प्रतिभासविरोधादेव

ऋजुविवरणम्

शङ्क्य व्याचष्टे—*वाक्यार्थस्येति*॥ कथं ब्रह्मपदार्थसमर्पणेनैकवाक्यत्वम्? पदार्थप्रतिपादनस्य लोकव्युत्पन्नत्वात्, अथवा—ब्रह्मपदार्थसमर्पणेनैकवाक्यत्वेऽपि कथमनर्थनिवृत्तेः शास्त्रविषयत्वम्? समर्पकस्य वाक्यस्य मननवदेव विमर्शमात्रजनकत्वादित्याशङ्क्य व्याचष्टे—*अलौकिकत्वादिति*॥ "यद्येवमि"त्यनेन नान्तरीयकत्वं हेतुत्वेनोक्तमिति प्रतिभाति; असिद्धं तु तत्, "न शब्दस्ये"त्यपि न हेतुः; व्यापाराभावस्यासिद्धत्वात्, नच हेत्वन्तरम्; अतो न पृथङ्निर्देशनिराकरणासिद्धिरित्याशङ्क्याह—*एवमपि स्वाभाविकेति*॥ *ननु*—निषेधशास्त्रस्य स्वाभाविकप्रपञ्चनिषेधकत्ववन्मिथ्याभूतप्रपञ्चनिषेधकत्वमपि सामर्थ्याविशेषादङ्गीकर्तव्यम्, तथा सति विषयत्वेनैव लब्धत्वान्न फलत्वेन निर्देशसंभव इत्याशङ्क्याह—*अविद्या-तत्कार्येति*॥ *तस्य=ब्रह्मणः।*तदगोचरत्वात्=प्रत्यक्षादिप्रमाणागोचरत्वादित्यर्थः। सम्बन्धिग्रहणपुरःसरं हि सम्बन्धग्रहणम्, अन्यतरसम्बन्ध्यग्रहणेऽपि न सम्बन्धग्रहणमिति भावः। *ननु*—प्रपञ्चः प्रतीयते; तस्य केनचिदाश्रयेण भवितव्यम्, निराश्रयस्य कार्यस्यासंभवादित्यनुपपत्त्या ब्रह्मसम्बन्धः प्रतीयत

तत्त्वदीपनम्

शङ्कते—*ननु तत्त्वमसीति*॥ तत्त्वमस्यादिवाक्यादापाततोऽप्रतिपत्तावपि वाक्यान्तरात् प्रतिपत्तिरित्याह—*तत्राहेति*॥ ब्रह्मणो भावरूपत्वात् तस्मिन्नभावानन्तर्भावात् कथमभावस्याविषयत्वम्? तत्राह—*वाक्यार्थस्येति*॥ 'निर्घटं भूतलमि'ति वाक्यस्य यथाऽभावविशिष्टभूतलविषयत्वम्, तद्वदस्यापीत्यर्थः। ब्रह्मणो वाक्यप्रमेयत्वमाक्षिपति—*ननु न पदार्थेति*॥ पदार्थस्य स्मर्यमाणत्वादित्यर्थः॥

पदार्थस्य स्मर्यमाणत्वादवाक्यार्थत्वमिति शङ्कां निरस्यति—*अयमर्थ इति*॥ कर्तृत्वादिनिवृत्तेर्ब्रह्मण्यनन्तर्भावात्तस्याः पृथङ्निर्देशोऽयुक्त इति शङ्कते—*ननु ब्रह्मणीति*॥ संसारिणोऽसंसारिरूपत्वानुपपत्तेर्विरुद्धरूपनिवृत्तिरपि प्रमीयत इति समाध्यर्थः। निष्प्रपञ्चप्रत्यग्ब्रह्मैक्यस्य शास्त्रप्रमेयत्वात् कथं न शब्दस्य तत्र व्यापार इत्युक्तम्? इत्याशङ्क्य, परमार्थतो निष्प्रपञ्चत्वं शास्त्रप्रमेयम्? उताविद्या-तत्कार्यप्रतिभासनिरसनम्? इति विकल्प्याद्योऽङ्गीक्रियत इत्याह—*एवमपीति*॥ द्वितीयं दूषयति—*अविद्येति*॥ शास्त्राविषयत्वे हेतुमाह—*अविद्येति*॥ *अशक्यत्वात्=अयोग्यत्वादित्यर्थः। तत्र हेतुः—*तत्प्रतिभासेति*॥ अविद्या-तत्कार्यं तच्छब्दार्थः॥

पञ्चपादिकाविवरणम्

शास्त्रेण प्रतिपादयितुमशक्यत्वादिति परिहरति--*यद्येवं ब्रह्मात्मावगतिनान्तरीयकमिति* ॥ *ननु*—यथा प्रातिभासिकाविद्या-तत्कार्यविरोधान्न तदभावविशिष्टो वाक्यार्थः प्रतिपत्तुं शक्यते, तथा ब्रह्मणि प्रपञ्चावभासविरोधान्निष्प्रपञ्चं ब्रह्मात्मत्वेन नावेदयितुं शक्यमस्थूलादिवाक्यैः—*इति,* *उच्यते* ; न तावत् प्रत्यक्षादिसिद्धो ब्रह्मणि प्रपञ्चः ; तस्य तदगोचरत्वात् , नच प्रपञ्चसिद्धिमात्रेण ब्रह्मसम्बन्धावगमः ; कारणमात्रकल्पकत्वात्तत्य । *ननु* "इदं सर्वं यदयमात्मे"त्यादिसप्रपञ्चवाक्यैर्ब्रह्मणि प्रतिभासते प्रपञ्चः, *सत्यम्* ; तेषां ब्रह्मणः सर्वोपादानकारणत्वसामर्थ्यसिद्धसार्वात्म्यानुवादेन निषेध्यसमर्पकतया निषेधकवाक्यैरेकवाक्यतयाऽन्वयान्निष्प्रपञ्चविरोधित्वाभावात् । नच सर्वोपादानतया सर्वात्मभावेऽसिद्ध सप्रपञ्चवाक्यैः सर्वात्मता प्रतिपादयितुं शक्यते । नच निषेधवाक्यैर्निषेध्याकाङ्क्षितसमर्पणेनैकवाक्यतासंभवे वाक्यभेदं कृत्वा स्वातन्त्र्येण प्रयोजनवन्निष्प्रपञ्चविरुद्धं सप्रपञ्चं प्रयोजनशून्यं च प्रमातुं शक्यम् । दृष्टश्च सुषुप्ते चेतनस्य निष्प्रपञ्चता पुरुषार्थ इति । श्रुतिश्च—"अशब्दमस्पर्शमरूपमव्ययं निचाय्य तं मृत्युमुखात् प्रमुच्यते" इति । दृष्टा च चेतनस्य

ऋजुविवरणम्

इत्याशङ्क्याह—*नच प्रपञ्चसिद्धिमात्रेणेति*॥ अन्यथाऽपि सिद्धत्वादिति भावः । कथम्—"इदं सर्वमि"त्यादिवाक्यानां सर्वोपादानसामर्थ्यसिद्धप्रपञ्चानुवादकत्वेन महावाक्येनैकवाक्यत्वम् ? प्रतिपादकत्वमेव कस्मान्न भवति ? इत्याशङ्क्याह—*नच सर्वोपादानतयेति*॥ *ननु*—अस्य वाक्यस्य स्वातन्त्र्येण सर्वात्मत्वप्रतिपादने संभवति सति तद् विहाय, अन्यतः प्राप्तसप्रपञ्चानुवादेन निषेधवाक्येनैकवाक्यता न युक्ता कल्पयितुम् ; तुल्यत्वाद्वेदवाक्यानामित्याशङ्क्याह—*नच निषेधवाक्यैरिति* ॥ कथं निष्प्रपञ्चत्वं पुरुषार्थत्वेनेति निश्चितम् ? येन निषेधवाक्यैकवाक्यत्वमुच्यते, इत्याशङ्क्याह—*दृष्टश्चेति* ॥ भवतु निष्प्रपञ्चता पुरुषार्थः, नैतावता तदेकवाक्यत्वं संभवति ; सप्रपञ्चत्वस्यापि पुरुषार्थत्वेन समर्थत्वादित्याशङ्क्याह—*दृष्टा च चेतनस्येति* ॥ *ननु*—सप्रपञ्चत्वमेकान्ततो नानर्थहेतुः ; तेनापि

तत्त्वदीपनम्

स्वाभाविकनिष्प्रपञ्चस्य शास्त्रप्रमेयत्वमङ्गयकारि, तदाक्षिपति—*ननु यथेति* ॥ विकल्पासहत्वान्नैतदित्याह—*उच्यत इति* ॥ किं प्रत्यक्षादिना ब्रह्मणि प्रपञ्चतत्संबन्धोऽधिगतः ? उतागमेन ? नाद्य इत्याह—*न तावदिति* ॥ ब्रह्मणः प्रत्यक्षाद्यगोचरत्वेऽपि प्रपञ्चस्योपलभ्यमानत्वात् तत्संबन्धप्रथा किं न स्यात् ? इत्याशङ्क्य, संबन्धस्योभयनिष्ठत्वादेकाग्रहणेऽग्रहणमित्याह—*नचेति* ॥ द्वितीये निष्प्रपञ्चप्रकरणपठितैः—"इदं सर्वमि"त्यादिभिः सप्रपञ्चत्वं बोध्यते ? उत जगदुपादानत्वप्रतिपादकैः ? अथवोपास्तिप्रकरणपठितैः "सर्वकर्मेत्यादिभिः" इति विकल्प्याद्यमुत्थापयति—*नन्विदं सर्वमिति* ॥ प्रतिभासमात्रमङ्गीकरोति—*सत्यमिति* ॥ तर्हि तद्विरोधः स्यादिति, अत आह—*तेषामिति* ॥ तेषां निष्प्रपञ्चविरोधित्वाभावादित्यन्वयः । तत्र हेतुमाचष्टे—*ब्रह्मण इति* ॥ प्रपञ्चसंबन्धस्यान्यतः प्राप्तत्वात्—"इदं सर्वमि"त्यादेर्न तत्प्रतिपत्तिहेतुत्वमिति न निष्प्रपञ्चवाक्यस्य बाधकमित्यर्थः । तत्रैव हेत्वन्तरमाह—*निषेधेनेति* ॥ "नेति नेत्या"दीनां निषेध्याकाङ्क्षत्वादाकाङ्क्षितनिषेध्यसमर्पकत्वान्न तद्विरोधात् स्वार्थे प्रामाण्यमित्यर्थः ॥ श्रुतेः श्रुतार्थापत्तिसमधिगतबोधकत्वेन नानुवादकत्वम् , ततः प्रागेवार्थावबोधकत्वादित्याशङ्क्याह—*नचेति* ॥ असिद्धे इति पदच्छेदः । "यदिदं सर्वमि"ति यच्छब्दसमानाधिकृतं तत्सर्वम्, यच्छब्दस्य चोत्सर्गतोऽन्यसिद्धबोधित्वान्न स्वयं सार्वात्म्यं बोधयतीत्यर्थः ॥

"इदं सर्वमि"त्यादेर्निषेधवाक्यैकवाक्यत्वं कस्मात् ? अर्थविशेषपरत्वं किं न स्यात् ? इत्याशङ्क्याह—*नचेति* ॥ निषेध्यं च तदाकाङ्क्षितं चेति निषेध्याकाङ्क्षितम्, तत्समर्पणेनेत्यर्थः । तन्निषेधवाक्यैरेकवाक्यतासंभवे वाक्यभेदं कृत्वा प्रपञ्चवाक्येन सप्रपञ्चं प्रमातुं न शक्यमित्यन्वयः ; 'संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यते' इति न्यायविरोधादित्यर्थः । 'फलवत्सन्निधावफलं तदङ्ग'मिति न्यायादपि न सप्रपञ्चं प्रतिपाद्यमित्याह—*स्वातन्त्र्येणेति* ॥ प्रयोजनवच्च निष्प्रपञ्चं चेति प्रयोजनवन्निष्प्रपञ्चम्, तच्च ब्रह्म चेति तत्तथोक्तम्, तद्विरुद्धमिति विग्रहः । निष्प्रपञ्चवाक्यस्य

पञ्चपादिकाविवरणम्

सप्रपञ्चताऽनर्थकरीति। नच तत्र श्रूयते फलम्। अतो निषेधैरेकवाक्यता त्यक्ता। नच निषेध्यप्रपञ्चानुवादप्रतिभासो निष्प्रपञ्चप्रमितिं बाधते; तादर्थ्यादनुवादस्य। *ननु*—अप्राप्तं प्रपञ्चं ब्रह्मणि सप्रपञ्चवाक्यैः प्रापय्य पुनस्तन्निषेधोऽनर्थक एव; "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमि"ति न्यायात्? *उच्यते*; अद्वितीयब्रह्मप्रतिपत्त्यर्थं सर्वजगदुपादानत्वप्रतिपादनसामर्थ्यादेव प्राप्तस्य ब्रह्मणि प्रपञ्चस्याद्वितीयपुरुषार्थसिध्यर्थमनूद्य निषेधो युज्यते। *ननु*—तर्हि सर्वोपादानत्वसामर्थ्यादेव सप्रपञ्चताप्रमितिः प्राप्ता, *न*; श्रुतिसामर्थ्यप्राप्तस्य सप्रपञ्चत्वस्य साक्षान्निषेधश्रुतिविरोधे दौर्बल्यात्। न तर्हि सर्वोपादानतया सप्रपञ्चताप्राप्तिः,

ऋजुविवरणम्

पुरुषार्थदर्शनात्, अतो नापुरुषार्थत्वेनान्यार्थत्वमित्याशङ्क्याह—*नच तत्र श्रूयत इति*॥ *ननु*—अनुवादवाक्येऽनूद्यं प्रतिभासते; तेन प्रतिभासेन विरोधो निष्प्रपञ्चत्वबोधस्य, इत्याशङ्क्याह—*नच निषेध्यानुवाद इति*॥ अनुवादग्रहणेन दौर्बल्यं द्योतितम्, प्रमिति-तादर्थ्यग्रहणाभ्यामितरस्य प्राबल्यं दर्शितम्। अद्वितीयत्वप्रतिपत्त्या सर्वजगदुपादानत्वप्रतिपादनं कर्तव्यमित्याह—*उच्यते; अद्वितीयेति*॥ अद्वितीयं ब्रह्मात्र प्रतिपाद्यम्। अद्वितीयार्थतासिद्धिश्च प्रत्यक्षादिसिद्धप्रपञ्चस्य ब्रह्मण्येवोत्पत्त्यादिप्रतिपादनेन कारणान्तरे तदभावप्रतिपादने सति भवति, नतु तत्र निषेधमात्रेणाद्वितीयत्वसिद्धिः; कारणान्तरनिषेधेन विना तत्राभावासिद्धेः, तत्राभावासिद्धौ चाद्वितीयत्वसिध्यभावादिति भावः। *ननु तर्हीति*॥ प्रमितस्य न निषेध इति भावः। *न; श्रुतिसामर्थ्येति*॥ प्रबलप्रमाणेन विरोधे सति दुर्बलं न प्रमाजनकमिति भावः। *न तर्हीति*॥ यदुक्तमद्वितीयत्वसिध्यर्थं जगदुपादानत्वप्रतिपादनं कर्तव्यम्, उपादानत्वेन चार्थात् सप्रपञ्चत्वप्राप्तिः, सप्रपञ्चत्वप्राप्तौ सत्यां निषेधश्रुत्या तन्निषेधः क्रियतेऽद्वितीयत्वसिद्ध्यर्थमिति, तन्न स्यात्; सर्वोपादानत्वस्य सप्रपञ्चताप्रापकत्वाभावात्। कथं प्रापकत्वाभाव इति चेत्, न; निषेधश्रुति-

तत्त्वदीपनम्

कथं प्रयोजनवत्त्वम्? इति वीक्षायामाह—*दृष्टश्चेति*॥ न केवलं दर्शनमेव, किं तु श्रवणमपीत्याह—*श्रुतिश्चेति*॥ *निचाय्य=साक्षात्कृत्येत्यर्थः। अनर्थव्रातम्=मृत्युः, तस्य मुखम्=कारणम्, अज्ञानम्, तस्मान्मुक्तो भवतीत्यर्थः। निष्प्रपञ्चस्य प्रयोजनवत्त्वमुक्त्वा, इतरस्य तद्विधुरतामाह—*दृष्टा चेति*॥ 'अहं मनुष्यः' इत्याद्यभिमाने दुःखादयो दृष्टा इत्यर्थः॥

चन्दन-वनितादिसंपर्कात् सुखोदयात् स्वर्गाद्युद्देशेन यागादिविधेश्च न सप्रपञ्चस्याप्यपुमर्थत्वमित्याशङ्क्य, तस्याभासत्वादनाभासफलं न श्रूयत इत्याशयेनाह—*नचेति*॥ मा भूत् तर्हि फलवत्त्वमित्याशङ्क्य, अध्ययनविध्युपात्तत्वेन नैरर्थक्यासंभवान्निषेध्यसमर्पकतया निषेधवाक्यैकवाक्यत्वमित्याह—*अत इति*॥ प्रपञ्चवाक्यानां प्रमित्यजनकत्वेऽपि तत्प्रतीतिजनकत्वादस्त्येव विरोध इत्यत्राह—*नचेति*॥ अनुवाद-प्रमित्योरनुवादस्य दुर्बलत्वान्न बाधकत्वमित्यर्थः। किंच बाधकत्वे स्वयमपि बाधितं स्यादित्याह—*तादर्थ्यादिति*॥ सप्रपञ्चवाक्यानां निषेधपरत्व आनर्थक्यप्रसङ्गात् सप्रयोजनपरत्वमिति शङ्कते—*नन्वप्राप्तमिति*॥ प्रयोजनसद्भावान्न पङ्कप्रक्षालनसाम्यमित्याह—*उच्यत इति*॥ भेदग्राहकप्रमाणविरोधाद् नाद्वितीयमिति शङ्कायां भेदप्रपञ्चस्य ब्रह्मोपादानत्वात् कार्यस्य चोपादानव्यतिरेकेणानिरूपणादद्वितीयमित्यद्वैतसिद्ध्यर्थं ब्रह्मणि प्रपञ्चमारोपयामास श्रुतिः, तत्रारोपितस्यापि सर्पादेरनर्थहेतुतादर्शनादारोपितनिवृत्त्यर्थो निषेधः साधीयानित्यर्थः॥

उपादानत्वप्रतिपादकवाक्याद् ब्रह्मणः सप्रपञ्चत्वमिति द्वितीयं विकल्पमुत्थापयति—*ननु तर्हीति*॥ उपादानोपादेययोस्तादात्म्यं दृष्टम्, ब्रह्मणश्चोपादानत्वात् सप्रपञ्चत्वमित्यर्थः। श्रुति-तदर्थापत्त्योर्विरोधेऽर्थापत्तिर्नोदेति; बलीयस्या श्रुत्या बाधितत्वात्, अतश्च निष्प्रपञ्चत्वमित्याह—*न श्रुतसामर्थ्येति*॥ अर्थापत्तेरुपजीव्यप्रपञ्चविषयत्वेन प्राबल्याद् न श्रुत्या बाध्यत इति शङ्कते—*न तर्हीति*॥ प्रपञ्चाप्राप्तौ निषेधासंभव इत्यर्थः। 'इदं रजतमि'त्याद्यनुभवस्योपजीव्यविषयत्वेऽपि बाध्यत्ववदर्थापत्तेरपि बाध्यत्वं युक्तमित्यभिप्रेत्याह—*न यावद्बाधमिति*॥

पञ्चपादिकाविवरणम्

न ; यावद्बाधं श्रुतोपादानत्वसामर्थ्यादेव शुक्तिकारजतादिवत् सप्रपञ्चताप्रतिभासात् । प्रतिपन्नमेव तु बलवत् प्रमाणेन बाध्यते, नाप्रतिपन्नम्, नापि प्रमितम् । नचोपासनाप्रकरणपठितसप्रपञ्चवाक्यैर्ब्रह्म तथा प्रमीयते ; अन्यपराणां तत्परवाक्यविरोधात्, आरोपितरूपेणाप्युपासनासंभवात्, सृष्टिवाक्यैरद्वितीयब्रह्मप्रतिपत्तये निषेध्यप्रतिपरैः प्राप्तत्वाच्च । तस्मान्निष्प्रपञ्चब्रह्मात्मप्रमितौ शाब्दी वा लौकिकी वा प्रमितिर्न विरुध्यते ॥

ननु जीवोऽपि वाक्यार्थप्रमितिविषयः, तस्मिन्प्रपञ्चे प्रत्यक्षावगते कथं निष्प्रपञ्चवाक्यार्थप्रमितिरिति ? *उच्यते ;—न तावदनुमानादिगम्यः कर्तृत्वादिप्रपञ्चः, अपरोक्षत्वात् ; नापि चक्षुरादिगम्यः ; प्रत्यगात्मनो

ऋजुविवरणम्

विरोधात्, तदप्राप्तौ निषेधोऽपि निषेध्याभावान्न भवेदिति भावः ॥ *ननु*—शुक्तिरजतादौ यावद्बाधं रजतप्रतिभासो युक्तः ; भिन्नकालत्वाद् बाधस्य, इह तु उपादानसामर्थ्य-निषेधयोरसमकालत्वान्न च यावद्बाधं वचनस्यार्थो विद्यत इत्याशङ्क्याह—*प्रतिपन्नमेव तु बलवत्प्रमाणेनेति* ॥ बाधस्यापि प्राप्तिसापेक्षत्वाद् न तत्समकालत्वमिति भावः । तर्हि यावद्बाधं प्रमितिरेव कस्मान्नाङ्गीक्रियते ? इत्याशङ्क्याह—*नापि प्रमितमिति* ॥ *ननु*—"सर्वं खल्विदमि"त्यादिवाक्यैः सप्रपञ्चत्वं प्रतीयते, इत्याशङ्क्याह—*नचोपासनाप्रकरणेति* ॥ *ननु*—उपासनापरत्वेऽप्युपास्यस्य सप्रपञ्चत्वात्प्रपञ्चाभावे सत्युपासनानुपपत्तेस्तत्परत्वात्समपक्षत्वमित्याशङ्क्याह—*आरोपितरूपेणापीति* ॥ *ननु*—आरोपोऽपि नात्यन्तमप्राप्तस्य भवति, अतः प्रापकत्वेन तत्परत्वमित्याशङ्क्याह—*सृष्टिवाक्यैरिति* ॥ कथं प्रपञ्चसत्ताकारणत्वेन मनसोऽन्वय-व्यतिरेकयोरन्यथासिद्धत्वम् ? सुषुप्तौ भोक्तृत्वाद्यनवभासे प्रतीतिहेतुत्वमेव

तत्त्वदीपनम्

प्रतिपन्नरजतादेरपि कथं बाध्यत्वम् ? इत्याशङ्क्य, बाध्यत्वं कथमिति प्रश्नमात्रम् ? उताप्रतिपन्नस्य बाध्यत्वं विवक्षितम् ? इति विकल्प्याद्यस्योत्तरमाह—*प्रतिपन्नमिति* ॥ प्रतिपन्नं बलवत्प्रमाणेन बाध्यत एवेत्यन्वयः । तुशब्दस्तु बाधकत्वशङ्कानिरासार्थः । रजतादेर्भ्रान्तिप्रतिपन्नत्वाद्बाध्यत्वम्, अधिष्ठानप्रत्ययस्याभावप्रत्ययस्य वा प्रमाणत्वाद् बाधकत्वमित्याशयः । द्वितीये प्रसक्त्यसंभवान्न निषेधसंभव इत्याह—*नाप्रतिपन्नमिति* ॥ अप्रतिपन्नस्यानिषेध्यत्वात प्रतिपन्नस्यैव निषेध्यत्वमापादितमित्याशङ्क्याह—*नापीति* ॥ प्रमितस्य निषेध आत्मनोऽपि निषेधप्रसङ्गाद् भ्रान्तिप्रतिपन्नस्य निषेध्यत्वं वक्तव्यम्, ततश्च न निष्प्रपञ्चप्रमितिविरोध इत्यर्थः । तृतीयं प्रत्याह—*नचोपासनेति* ॥ "सर्वकामः" इत्यादि सप्रपञ्चवाक्यार्थः । अन्यपराणां तत्पराणां च विरोधेऽन्यपरदौर्बल्यमिति प्रसिद्धम्, ततः "सर्वकर्मे"त्यादीनामुपासनापरत्वान्न निषेधश्रुतिबाधकत्वमित्यर्थः । उपास्तिपरत्वेऽपि सप्रपञ्चपरत्वम्, अन्यथा निर्विषयत्वेनोपास्त्यसंभवादित्याह—*आरोपितेति* ॥ "वाचं धेनुमुपासीत" इत्यादौ यथा समारोपितविषयमुपासनम्, तद्वदत्रापीत्यर्थः । अन्यतः प्राप्त्यर्थत्वादपि 'सर्वकर्मे'त्यादीनां न तत्परत्वमित्याह—*सृष्टिवाक्यैरिति* ॥ सप्रपञ्चस्याप्रामाणिकत्वसमर्थनफलमाह—*तस्मादिति* ॥

प्रकारान्तरेण निष्प्रपञ्चप्रतीतेर्विरोधं शङ्कते—*ननु जीव इति* ॥ प्रत्यग्ब्रह्मैक्यवाक्यार्थविषयया प्रमित्या जीवो विषयीक्रियत इति वक्तव्यम् ; अन्यथा तद्विषयत्वासंभवः । नच जीवविषयत्वं संभाव्यते ; संसारिरूपस्य त्वंपदार्थस्यासंसार्यैक्याभावादित्यर्थः । किं त्वंपदलक्ष्यस्यैक्यासंभवः ? उत वाच्यस्य ? नाद्यः ; लक्ष्ये संसारित्वाद्यसंभवात् । द्वितीयस्त्वङ्गीक्रियत इत्याशयेनाह—*उच्यत इति* ॥ कर्तृत्वसुखादेः प्रामाणिकत्वात्तस्य निराश्रयत्वासंभवाच्चेतनाश्रयत्वं वक्तव्यमित्याशङ्क्य, किं कर्तृत्वादेरानुमानिकत्वम् ? उत प्रत्यक्षत्वम् ? उत प्रमाणान्तरगम्यत्वम् ? इति विकल्प्याद्यं प्रत्याह—*न तावदिति* ॥ द्वितीयेऽपि किं बाह्येन्द्रियप्रत्यक्षत्वम् ? उतान्तरेणेन्द्रियेणेति विकल्प्याद्यं प्रत्याह—*नापीति* ॥ बाह्येन्द्रियमपि किं कर्तृत्वादिमात्रं विषयीकरोति ? उतात्मविशेषितम् ? प्रथमे नात्मनः सप्रपञ्चत्वमित्यभिप्रेत्य द्वितीयं प्रत्याह—*प्रत्यगात्मन इति* ॥ आत्मन

पञ्चपादिकाविवरणम्

बाह्येन्द्रियाविषयत्वात्, मानसप्रत्यक्षगम्य इति चेत्, किं तत्र प्रमाणम्? सत्येव मनस्यात्मनि बन्धोपलब्धेः, असति च सुषुप्तेऽनुपलब्धेरन्वयव्यतिरेकौ प्रमाणमिति चेत्, न; अन्यथासिद्धत्वात्, आत्मनि कर्तृत्वादि-प्रपञ्चसत्ताकारणतयाऽप्यन्वय-व्यतिरेकोपपत्तेः, सुषुप्ते कर्तृत्वाद्यनवभासः किं मनसोऽभावात् किं वा स्वयमभावात्? इति संदिग्धव्यतिरेकत्वात्। प्रतीतिः करणमप्यपेक्षत इति चेत्, न; आत्मचैतन्येनैवा-व्यवधानात् प्रतिभासोपपत्तेः। *ननु* कर्तृत्व-भोक्तृत्व-राग-द्वेष-सुख-दुःखादयोऽप्यात्मनि स्वयंप्रकाशा इति बौद्ध-प्राभाकराः कल्पयन्ति,* नैतद् युक्तम्; तेषां द्रव्यत्वे बहुप्रकाशगुणकल्पनया तद्विशिष्टात्मप्रकाशकल्पना-दात्मन एवैकं प्रकाशगुणं परिकल्प्य तदन्वयादितरेषां प्रकाशकल्पनाया लघीयस्त्वात्। तेषां गुणत्वे सति गुणस्य गुणान्तराभावान्न स्वयंप्रकाशता। त एव प्रकाशगुणा इति चेत्, न; प्रकाशगुणस्य स्वाश्रयो-पाधावादित्यादाविवानुत्पत्तेः। बन्धस्य स्वसत्तायां प्रतीतिव्यतिरेकाभावोऽपि न स्वयंप्रकाशमानतां कल्पयति; नित्यात्मप्रकाशसंसर्गादपि तदुपपत्तेः। नच क्लृप्तकारणाभावेऽपि बन्धापरोक्ष्ये प्रमाणकारणान्तरं कल्पयितुं

ऋजुविवरणम्

निश्चीयत इत्याशङ्क्याह—*सुषुप्ते कर्तृत्वाद्यनवभास इति* ॥ *अव्यवधानात्=तत्रैवाध्यस्तत्वेन साक्षात्संम्बन्धा-दित्यर्थः। *ननु*—यदा सम्बन्धसत्ता, तदा प्रतीतिनियमोऽस्ति; अतः स्वसत्तायामस्फुरणशून्यत्वं स्वप्रकाशत्वेन विनाऽनुपपद्यमानं तत् कल्पयतीत्याशङ्क्याह—*बन्धस्य स्वसत्तायामिति* ॥ किमिति बन्धापरोक्ष्यमात्मचैतन्य-मात्रनिबन्धनमिति कल्प्यते? क्लृप्तकारणाभावेऽपि प्रमाणकारणान्तरमेव कल्प्यतामित्याशङ्क्याह—*नच क्लृप्तकारणा-भावेऽपीति* ॥ कथं निष्प्रपञ्चागमविरोधेन प्रमाणकारणान्तरकल्पना निवार्यते? प्रपञ्चावगमस्यापि कारणेन विनाऽनुप-

तत्त्वदीपनम्

इन्द्रियाविषयत्वात्तद्विशिष्टकर्तृत्वादेरपि न तद्विषयत्वमित्यर्थः। द्वितीयमुत्थापयति—*मानसेति* ॥ प्रमाणा-भावान्नैतदित्याह—*किं तत्रेति* ॥ प्रमाणाभावोऽसिद्ध इत्याह—*सत्येवेति* ॥ अनन्यथासिद्धान्वय-व्यति-रेकयोः साधकत्वादत्र च तादृक्त्वाभावान्नैतदित्याह—*नान्यथेति* ॥ तदेव साधयति—*आत्मनीति* ॥ सत्ता-कारणतयाऽपीत्यस्यैषोऽर्थः—मनसः कर्तृत्वादिसत्ताकारणत्वात् तद्विषयतयाऽन्वयादिसंभव इत्यर्थः। किंच व्यति-रेकस्य संदिग्धत्वादन्वयमात्रस्य चासाधनत्वान्न कर्तृत्वादेर्मानसत्वमित्याह—*सुषुप्त इति* ॥ कर्तृत्वादिसाक्षा-त्कारः, करणजः, साक्षात्कारत्वात्; संप्रतिपन्नवत्। करणान्तरस्य चासंभवाद् मनसः करणत्वम्। ततश्च तदभावात् कर्तृत्वाद्यनवभास इति व्यतिरेकनिश्चय इति शङ्कते—*प्रतीतिरिति* ॥ करणजन्यत्वं विनाऽपि साक्षात्कारत्व-संभवान्नायं प्रयोगः साधुरित्याह—*नात्मेति* ॥ सुखाद्याकारान्तःकरणपरिणामव्यवधानमन्तरेणात्मा स्वाध्यस्तं सुखादिकं साधयतीत्यर्थः। सुखादीनामात्मसिद्धत्वमुक्तमसहमानः शङ्कते—*ननु कर्तृत्वेति* ॥ प्रमाणाभावान्मैव-मित्याह—*नैतदिति* ॥ सुखादयः, स्वप्रकाशाः, स्वसत्तायां प्रतीतिव्यतिरेकविधुरत्वात्; संवेदनवत्, इत्यनुमानं प्रमाणमिति चेत्, तत्र वक्तव्यम्—किं तेषां द्रव्यत्वम्? उत गुणत्वम्? आद्ये किं प्रकाशगुणकत्वम्? उत प्रकाश-स्वभावत्वम्? तत्राद्ये पक्षे बाधकतर्कपराहतत्वादप्रयोजकत्वमित्याह—*तेषामिति*। *तदन्वयादिति* ॥ प्रकाश-गुणवदध्यासादित्यर्थः। स्वभावपक्षोऽपि गौरवप्रतिहत इति द्रष्टव्यम्। द्वितीयेऽपि किं सुखादेः प्रकाशो गुणः? उत स्वभावः? इति विकल्प्याद्यं दूषयति—*तेषामिति* ॥ द्वितीयमनुवदति—*त एवेति* ॥

सुखादीनां स्वाश्रयोपाधौ जायमानत्वान्न प्रकाशगुणत्वमित्याह—*न प्रकाशेति* ॥ अयमर्थः—यः प्रकाश-गुणः, स स्वाश्रयोपाधौ न जायते; यथा सवितृप्रकाशः। सुखादयः स्वाश्रयोपाधौ जायन्ते। तस्मान्न प्रकाशगुणत्व-मित्यर्थः। अस्वप्रकाशगुणत्वे स्वसत्तायां प्रतीतिव्यतिरेकराहित्यं कथं घटते? इत्याशङ्क्याह—*बन्धस्येति* ॥ कर्तृत्वादिः प्रमाणान्तरगम्य इति तृतीयं पक्षं दूषयति—*नचेति* ॥ प्रमाणान्तराकल्पने हेत्वन्तरमाह—*इन्द्र

पञ्चपादिका

तन्निरासादृते तत्त्वतो निर्णेतुं शक्यम्। तस्मात् पूर्वावसितमतद्धर्मं निरस्यदेव तत्त्वावद्योति वाक्यं तत्त्वमवसाययति ॥

पञ्चपादिकाविवरणम्

युक्तम्; निष्प्रपञ्चागमविरोधात्, "इन्द्रो मायाभिरि"ति मिथ्याकारणान्तरक्लृप्तेश्च। तस्मादज्ञानादिसत्य-मिथ्यावस्तुसाधारणेन साक्षिमात्रेण वेद्यत्वात् प्रपञ्चस्य सत्यतो निष्प्रपञ्चब्रह्मात्मप्रमितिः सप्रपञ्चप्रमित्या न बाध्यते। तस्माद् अविद्या-तत्कार्यप्रपञ्चप्रतिभासाभावस्य तद्विरोधादेव ब्रह्मात्मविशेषणत्वेन प्रमातुमशक्य-त्वाद् ब्रह्मात्मावगतिनान्तरीयकतया प्रातिभासिकबन्धनिवृत्तिरिति सूक्तम् ॥

ननु अनर्थनिवृत्तिर्न शास्त्रविषयश्चेत्, कथं विषयावगतिसामर्थ्यलभ्येति? तत्र किमनर्थनिरासः पर्यनु-युज्यते? तन्निरासप्रतिभासो वा? यदि निरासः, तत्राह—*युक्तश्चैतदिति* ॥ तत्त्वावभासविरोधित्वाद-विद्या-तत्कार्यत्वाच्चेति भावः। *ननु* 'नेदं रजतमि'ति यत्र विज्ञानम्, तत्र 'रजतमि'ति विपर्यासं निवर्तयति,

ऋजुविवरणम्

पद्यमानस्य तत्कल्पकत्वसामर्थ्यात् सिद्धे प्रमाणकारणे निष्प्रपञ्चावगम एवान्यथा क्रियतामित्याशङ्क्याह—*इन्द्रो मायाभिरिति* ॥ *ननु*—चैतन्येनापि सप्रपञ्चत्वप्रतीतौ कथं निष्प्रपञ्चत्वप्रतीतिः? तद्विरोधात्, इत्याशङ्क्याह—*तस्मादज्ञानादीति* ॥ साक्षिणः प्रमाणत्वाभावात्। नच मिथ्याऽवभासेन विरोधः; सत्यस्यैव निषेधप्रतियोगित्वात्, मिथ्याभूतस्य साक्षिवेद्यत्वेन प्रतीति-निषेधयोर्भिन्नविषयत्वादिति भावः। "युक्तं चैतदि"त्यादि पूर्वग्रन्थविरुद्धम्; पूर्वग्रन्थे हि बन्धनिषेधस्य शास्त्रीयत्वं नास्तीत्युक्तम्, अत्र विपर्यासगृहीतस्य विपर्यासनिरासादृते निर्णयाभावात् तन्निरासपूर्वकं निर्णयेन भवितव्यमिति वदता विषयत्वप्रतिपादनादित्याशङ्क्य चोद्यपूर्वकमवतारयति—*नन्वनर्थनिवृत्तिरिति* ॥ शास्त्रविषयस्यैव विषयावगतिसामर्थ्यलभ्यत्वमैन्द्रियकज्ञानस्येवेन्द्रियविषयविषयित्वमिति भावः। "नहि विपर्यासे"त्यनेन विपर्यासनिरासादृते निर्णयासंभवाद् निरासो भवतीत्युक्तम्, तदसम्बद्धम्; पूर्वं हि ज्ञानाज्ञानयोर्विरोधात् कर्तृत्वादेस्तत्कार्यत्वे निवृत्तिसंभवः, नान्यथेत्यज्ञानकार्यत्वमुक्तम्, इदानीं विपर्या-सत्वमेव निवर्त्यत्वप्रयोजकमुपादीयते, इत्याशङ्क्याह—*तत्त्वावभासेति* ॥ "ननु—च नञादेरि"त्ययुक्तं चोद्यम्; तत्त्वज्ञानस्य निवर्तकत्वात्, तस्य चात्र संभवादित्याशङ्क्याह—*ननु नेदं रजतमितीति* ॥ "नेदं रजतमिति यत्रे"त्यनेन विपर्यासमात्रनिरासो वस्तुतत्त्वाप्रतिपत्तिश्च यस्मिन् ज्ञाने तत्र नञपेक्षा भवति, न वस्तुतत्त्वज्ञान इत्युक्तम्, तदसंबद्धम्; नञ्संबन्धमन्तरेण तत्त्वाप्रतिपत्तौ निवर्तकत्वादर्शनाद्विषयभेदनिरूपणायोगात्। "इह

तत्त्वदीपनम्

इति* ॥ अवस्थाभेदाद् "मायाभिरि"ति बहुवचनम्। मायाऽवच्छिन्नः परमेश्वर एव तत्तदाकारेण परिणमते; अज्ञातसजः सर्पाद्याकारभाववद्दित्यर्थः। साक्षिणा प्रपञ्चस्य प्रतीयमानत्वान्निष्प्रपञ्चप्रमितेस्तद्विरुद्धत्वशङ्कामुपसंहारव्याजेन निरस्यति—*तस्मादिति* ॥ प्रपञ्चसंबन्धस्य प्रामाणिकत्वाभावस्तच्छब्दार्थः। साक्षिसिद्धं परमार्थसदिति नियन्तुं न शक्यम्, मिथ्यावस्तुनोऽपि साक्ष्यधीनसिद्धित्वात्। ततश्च न तद्विरुध्यत इत्यर्थः। परमप्रकृतमुपसंहरति—*तस्मा-दिति* ॥ अविद्यादेर्भासमानत्वं तच्छब्दार्थः—*तद्विरोधादिति* ॥ प्रपञ्चप्रतिभासविरोधादित्यर्थः ॥

बन्धनिवृत्तेर्ब्रह्मावगतिनान्तरीयकत्वमाक्षिपति—*नन्वनर्थ इति* ॥ प्रमाणाभावादित्यर्थः। विपर्यास-निरासमन्तरेण वस्तु निर्णेतुमशक्यमित्युक्तम्, तत्र हेतुमाह—*तत्त्वावभासेति* ॥ विरोधं व्यनक्ति—*अविद्येति* ॥ अन्वय-व्यतिरेकाभ्यां च विपर्यासस्य तत्त्वज्ञाननिवर्त्यत्वेनाधिगतिश्चशब्दार्थः। तत्त्वमस्यादिवाक्ये नञाद्यभावेऽपि तज्जन्यज्ञानस्य विपर्यासनिवर्तकत्वसंभवात्, "ननु*—नञादेरि"त्यस्यायोगमाशङ्क्याह—*ननु नेदमिति* ॥ अभावज्ञानस्यापि विपर्यासनिवर्तकत्वं दृष्टम्, तत्त्वमस्यादिवाक्यं च सद्विषयमिति न विपर्यासनिवर्तकमित्यर्थः। *निषेधविषयमिति* ॥ अभावविषयमित्यर्थः ॥

पञ्चपादिका

ननु च नञादेर्निरासकृतो निरस्यमानवाचिनश्च पदस्याश्रवणात्कथं तन्निरस्येदेवेति ? *उच्यते* ;—नेदं रजतमिति यत्र विपर्यासमात्रं निरस्यते, न वस्तुतत्त्वमवबोध्यते ; तत्र तथा भवतु ; इह पुनर्विज्ञानमेव तादृशमुत्पन्नम् , यद् विरोधिनिराकरणमन्तरेण न स्वार्थं साधयितुमलम् , तुलोन्नमनव्यापार इवानमननान्तरीयकः । तथा ह्युन्नमनव्यापारः स्वविषयस्य तुलाद्रव्यस्योर्ध्वदेशसम्बन्धं न साधयितुमलम् , तत्कालमेव तस्याधोदेशसम्बन्धमनापाद्य । नचोन्नमनकारकस्य हस्तप्रयत्नादेरानमनेऽपि कारकत्वम् ; प्रसिध्यभावात् , अनुभवविरोधाच्च । तदेवं विपर्यासगृहीते वस्तुनि तत्त्वावद्योतिशब्द-

पञ्चपादिकाविवरणम्

इह तु 'अहं ब्रह्मास्मी'ति विज्ञानं वस्तुस्वरूपनिष्ठं न प्रपञ्चनिषेधविषयम् , तत्र कथं विपर्यासनिरासः ? इति चोदयति—*ननु च नञादेर्निरासकृत इति* ॥ तत्र द्वे ज्ञाने विपर्यासविरोधिनी—विरोधिशुक्तिकादिभावान्तरात्मज्ञानम्, अध्यस्तवस्तुतत्त्वाभावज्ञानं च ; तत्राध्यस्ततत्त्वाभावज्ञानेनाध्यासनिरासे नञाद्यपेक्षा,न विरोधिभावान्तरज्ञान इति परिहरति—*नेदं रजतमिति यत्रेति* ॥ ब्रह्मणि तु विरोधिभावान्तरज्ञानादध्यासनिवृत्तिरित्याह—*इह पुनर्विज्ञानमेव तादृशमिति* ॥ *ननु* सर्वो हि व्यापारः स्वविषयमेव साधयति, न नान्तरीयकमर्थान्तरम् ; अतो विपर्यासनिरासविषयो ज्ञानव्यापारो वक्तव्यः, न भावान्तरविषय इति नेति, दृष्टान्तमाह—*तुलोन्नमनव्यापार इवेति* ॥ अन्यविषयव्यापारादन्यविषयस्य नान्तरीयकतासिद्धिं साधयति—तथाह्युन्नमनव्यापार इति* ॥ *ननु* व्यापार एवोभयविषय इत्युभयं विषयतयैव सिध्यति, नान्यतरन्नान्तरीयकमिति, नेत्याह—*नचोन्नमनकारकस्येति* ॥

भवतु शुक्ति-ब्रह्मात्मज्ञानाभ्यां रजत-बन्धयोर्नान्तरीयको निरासः, निरासप्रतिपत्तिस्तु कथमिति ? सापि

ऋजुविवरणम्

पुनर्विज्ञानमेव तादृशमि"त्यप्यसंबद्धम् ; "नञ्वियुक्तस्य निषेधकत्वादर्शनात्" इति चोदिते विज्ञानमेव तादृशमिति वक्तुं न शक्यते ; नञा सम्बन्धाभावे विज्ञानस्य तादृशत्वायोगात्, इत्याशङ्क्याह—*अत्रेति* ॥ "इह पुनरि"त्यनेन कथं नञ्सम्बन्धानपेक्षत्वमुक्तमिति न ज्ञायते, विज्ञानस्य सामर्थ्यमात्रप्रतिपादनात्, तस्य च पक्षद्वयसाधारणत्वात् । नच नञपेक्षानिवारणमत्र न क्रियते ; "तत्र तथे"ति वचनस्वारस्यात् तथा प्रतीतेः ; अतोऽयुक्त इत्याशङ्क्याह—*ब्रह्मणि तु विरोधीति* ॥ "तदेवमि"त्युपसंहार इव प्रतिभाति, तथा सत्यन्यदुक्तम् , अन्यदुपसंहियत इत्याशङ्का स्यात् ; तन्निवृत्त्यर्थमवतारयति—*भवतु शुक्ति-ब्रह्मात्मेति* ॥ "तदेवमि"ति व्याचष्टे—*यथा-

तत्त्वदीपनम्

निषेधज्ञानस्य निवर्तकत्वम्, न भावान्तरज्ञानस्येति चोदिते, निषेधज्ञानस्य लोके निवर्तकत्वेऽप्यत्र भावान्तरज्ञानं निवर्तकमिति कथमुक्तम् ? व्याप्तिविरोधादित्याशङ्क्य व्याप्तेरुभयथा भावमाह—*तत्र द्वे इति* ॥ उभयथाऽपि दर्शने कर्तृत्वादिनिवृत्तिः कं पक्षमवलम्बताम् ? तत्राह—*ब्रह्मणीति* ॥ असंसार्यद्वितीयब्रह्माकारतयोत्पद्यमानस्तत्त्वप्रत्ययः स्वस्य विरोध्यध्यासनिवर्तक इत्यर्थः । इष्वादिव्यापाराणां स्वगोचरातिशयकारित्वमनुपपन्नमिति शङ्कते—*ननु सर्व इति* ॥ अन्यविषयस्याप्यन्यसाधकतादर्शनात्स्वविषयमेव साधयतीति नियमोऽनुपपन्न इत्याह—*नेतीति* ॥ उन्नमनव्यापारस्याप्यन्यविषयस्य कथमानमनसाधकत्वम् ? इत्याशङ्क्य, साधकत्वप्रकारः पृच्छ्यते ? उतोन्नमनव्यापारस्याप्यानमनविषयत्वं साध्यते ? इति विकल्प्याद्यं दूषयति—*अन्यविषयेति* ॥ द्वितीयमुत्थापयति—*ननु व्यापार इति* ॥ लोकप्रसिद्ध्यनुभवविरोधान्नैवमित्याह—*नेत्याहेति* ॥

ब्रह्मज्ञानस्य विपर्ययनिवृत्तिहेतुत्वमुपपाद्य, "तदेवमि"त्यनेन तज्ज्ञानहेतुतोपसंह्रियते, तदनुपपन्नमित्याशङ्क्य, सद्व्यावर्त्यां शङ्कामाह—*भवत्विति* ॥ विपर्ययनिवृत्तिहेतुत्वस्य तच्छब्देनोक्तत्वादेवमित्येतद् व्यर्थमित्याशङ्क्याह—

पञ्चपादिका

निमित्त आत्मनो ज्ञानव्यापारो 'नाहं कर्ता ब्रह्माहमिति ग्राहयति ; 'नेदं रजतं शुक्तिकेयमि'ति यथा । तस्मात् 'शुक्तिकेयमि'त्येव निराकाङ्क्षं वाक्यम्, 'नेदं रजतमि'त्यनुवादः । अत एवाख्यातपदस्य वाक्यत्वे

पञ्चपादिकाविवरणम्

नान्तरीयकेत्याह—*तदेवं विपर्यासगृहीते वस्तुनीति* ॥ *एवमिति* ॥ यथा निरासस्तथा तत्प्रतिपत्तिरपीत्यर्थः । अभिनयेन दर्शयति—*नाहं कर्ता ब्रह्माऽहमिति* ॥ व्युत्क्रमेण सम्बन्धः । ब्रह्माहमिति वाक्यार्थबोधेऽहं ब्रह्मैव चेत्, नाहं कर्तेति नान्तरीयकबोधः । 'नेदं रजतमि'त्यत्राप्येषैव योजना । *ननु* वाक्यमेव द्व्यर्थं किं न स्यादिति । नेत्याह—*तस्माच्छुक्तिकेयमित्येव निराकाङ्क्षमिति*॥ *अनुवाद इति* ॥ वाक्यार्थज्ञाननान्तरीयकसिद्धस्यानुवाद इत्यर्थः । अर्थान्तरज्ञानेनार्थान्तरज्ञानस्य नान्तरीयप्रतिभासे दृष्टान्तमाह—*अत एवाख्यातपदस्येति* ॥ वाक्यार्थभूतक्रियावाचकत्वादाख्यातस्य वाक्यत्वम् । क्रियाज्ञानसामर्थ्यादेव सर्वसाधनानां विकल्पेन क्रियान्वयप्रतिपत्तौ पदान्तराण्यन्यतमनियमार्थानि, नित्यवदन्वयप्रतिपत्तावनुवादमुखेनान्यनिवृत्त्यर्थानीत्यर्थः । सम्भवति च नित्यवदन्वयप्रतिपत्तिः ; एकस्य बहुसाधनतोप-

ऋजुविवरणम्

निरास इति* ॥ *ननु*—नान्तरीयकस्य कथं पूर्वनिर्देशः कृतः ? तथा "शब्दनिमित्तः" इत्युपक्रम्य, नाहं कर्तेति प्रदर्शितत्वात्, नान्तरीयकत्वासंभव इत्याशङ्क्य व्याचष्टे—व्युत्क्रमेणेति* ॥ *ननु*—"नेदं रजतमित्यनुवादः" इत्यसम्बद्धमुक्तम् ; तस्य पुरोवादसाकाङ्क्षत्वेन पूर्ववाक्यस्य व्यर्थत्वप्रसङ्गात्, इत्याशङ्क्य व्याचष्टे—*अनुवाद इति* ॥ *वाक्यार्थेति* ॥ "अत एवाख्यातपदस्ये"त्यसङ्गतम्, व्यधिकरणं च । नहि बन्धनिवृत्तेर्नान्तरीयकताप्रतिभासः क्रियाज्ञानादेव सर्वसाधनानां क्रियान्वयप्रतीतिं साधयति, येन "अतः" इत्युच्येतेत्याशङ्क्यावतारयति—*अर्थान्तरज्ञानेनेति* ॥ नान्तरीयकत्वमुपजीव्यमित्युक्तं भवति । कथमाख्यातपदस्य वाक्यत्वमुक्तम् ? विरोधात्, अनेकपदात्मकं हि वाक्यम्, नैकं पदमित्याशङ्क्य व्याचष्टे—*वाक्यार्थभूतक्रियेति* ॥ "क्रियाज्ञानादेव तत्साधनप्रतीतिरि"त्यसंबद्धमुक्तम् ; अन्यज्ञानस्यान्यप्रतिभासकत्वायोगात्, इत्याशङ्क्याह—*क्रियाज्ञानसामर्थ्यादिति*। क्रिया हि कारकनिष्पाद्यस्वभावा, तेन तद्बोधकस्य नान्तरीयकं तत्साधनबोधकत्वं यथा, तद्वदित्यर्थः । "नियमायानुवादाय वे"त्यसंबद्धमुक्तम् ; साधनमात्रप्रतीतौ नियमायोगात्, पाक्षिकविषयत्वान्नियमस्य, पाक्षिकप्रतीतिविवक्षायाम्—"अनुवादायवे"त्यसंबद्धं भवेत्, पक्षे प्राप्तावनुवादायोगादित्याशङ्क्य, प्रतीतिशब्दस्य विभज्यार्थं दर्शयति—*विकल्पेन क्रियान्वयप्रतिपत्ताविति* ॥ अनुवादपक्षे प्रतीतिशब्दं व्याचष्टे—*नित्यवदन्वयप्रतिपत्ताविति* ॥ नियमपक्षे त्वन्यनिवृत्तिरर्थात्, अनुवादपक्षे त्वन्यनिवृत्तिरेवार्थ इति कथमेकक्रियायां सर्वसाधनानां नित्यवदन्वयप्रतिपत्तिः ? इत्याशङ्क्याह—*संभवति च नित्यवदिति* ॥ "तथाचाहुर्यजतिचोदने"त्यादिरित्यत्रोदाहरणान्तरशब्दप्रयोगाद् द्वितीयो-

तत्त्वदीपनम्

एवमिति ॥ ज्ञानस्य व्यापार एव 'नाऽहं कर्ता' 'ब्रह्माहमि'ति ग्राहयतीत्युक्तत्वादभावबोधस्य नान्तरीयकत्वमनुपपन्नमित्याशङ्क्य, नान्तरीयकोऽर्थः स्पष्टीक्रियत इत्याह—*अभिनयेनेति* ॥ तथाऽपि नान्तरीयकस्य पूर्वनिर्देशोऽनुपपन्न इत्याशङ्क्य, "अग्निहोत्रं जुहोति" "यवागूं पचती"तिवद्वैपरीत्येन संबन्ध इत्याह—*व्युत्क्रमेणेति* ॥

साध्यक्रियाज्ञानात्साधनप्रतीतिरुदाहृता, ब्रह्मज्ञानं प्रति निरासस्यासाधनत्वमिति वैषम्यमित्याशङ्क्य तात्पर्यमाह—*अर्थान्तरेति*॥ पदसमुदायस्य वाक्यत्वात् पदमात्रस्य वाक्यत्वं कथमुक्तम् ? इत्याशङ्क्याह—*वाक्यार्थेति*॥ क्रियाज्ञानसामर्थ्यात् साधनस्यापि प्रतीतत्वात् पदान्तरस्यानुवादकत्वं भवेत्, न नियमार्थत्वम्, पक्षे प्राप्तौ नियमसंभवादित्याशङ्क्याह—*क्रियाज्ञानेति* ॥ क्रियायाः साधनापेक्षत्वाद् व्रीहि-यवादीनां विकल्पेन साधनताप्रतिपत्तौ पदान्तरस्य नियमार्थत्वम्, युगपद् बहुसाधनकारणानां प्रतिपत्तावनुवादकत्वमित्यर्थः । बहूनामेकक्रियां प्रति युगपत् कथं साधनत्वेनान्वय इत्याशङ्क्याह—*संभवति चेति* ॥ गुडदध्याद्यनेकसाधनानामेकभुजिक्रियासाधनत्वदर्शनादित्यर्थः ॥

पञ्चपादिका

क्रियाज्ञानादेव तत्साधनमात्रेऽपि प्रतीतिसिद्धेः पदान्तराणि नियमायानुवादाय वेति न्यायविदः। तथाचाहुः—"यजतिचोदना द्रव्य-देवता-क्रियासमुदाये कृतार्थत्वादि"ति ॥

अपरे तु "यज्ञं व्याख्यास्यामो द्रव्यं देवता त्यागः" इति। कथम्? क्रियामात्रवाचिनो द्रव्य-देवताभिधानं नान्तरीयकं तद्विषयज्ञाननिमित्तत्वं विहाय। प्रत्यक्षबाधस्याप्ययमेव प्रकारः, असंप्रयुक्त-

पञ्चपादिकाविवरणम्

पत्तेः। "तथाचाहुर्यजतिचोदने"त्यादि उदाहरणान्तरं श्रुतार्थापत्त्यैवार्थान्तरप्रतिपत्तौ। कथं द्रव्य-देवतयोर्याग-श्रुत्यन्यथानुपपत्तिगम्यतया यजत्यर्थतेत्याशङ्क्याह—*कथं क्रियामात्रवाचिन इति* ॥ *ननु* यत्र विपर्यास गृहीतस्य वस्तुनो विरोधिभावान्तरात्मविषयं वाक्यं विपर्यासं निवर्तयति, तत्र विपर्यासनिरासप्रतिपादने वाक्यस्य सामर्थ्याभावान्नान्तरीयकं निरासज्ञानमस्तु; यत्र पुनः प्रत्यक्षं बाधकम्, तत्र विपर्यासनिरासविशिष्टभावान्तर-ज्ञानमेव बाधकम्; न तत्र विपर्यासनिरासस्य नान्तरीयज्ञानम्, इहाप्यपरोक्षज्ञानाद् बन्धनिवृत्तेरुभयविषयमेव ज्ञानं नान्यतरस्य नान्तरीयकतेत्याशङ्क्याह—प्रत्यक्षबाधस्यापीति* ॥ न तावदनुपलब्धिगम्यो रजताभावः;

ऋजुविवरणम्

दाहरणप्रयोजनमाहेति गम्यते। "श्रुतार्थापत्त्यै"वेति पूर्वं यजिबोधान्तर्गतत्वं विवक्षितमिति द्योतितम्। *ननु*—यजिवाच्यत्वमेव कस्मान्नाङ्गीक्रियत इति चोदयति—*कथं द्रव्य-देवतयोरिति* ॥ वाक्यस्य सामर्थ्याभावादिति* ॥ अयमर्थः—पदार्थस्यैव वाक्यार्थत्वाद्विपर्यासनिरासविषयपदाभावात् कथं प्रत्यक्षबाधे पूर्वन्यायातिदेशः? व्यापकान्तरा-भावे हि स्थितस्याभावस्य नान्तरीयकतया प्रतिभासो भवेत्; तदभाव एव कथमित्याशङ्क्याह—*न तावदनुप-

तत्त्वदीपनम्

"यजतिचोदने"त्यत्र चोदनाया द्रव्याद्यात्मत्वं सामानाधिकरण्येनोच्यते, तच्चानुपपन्नम्। नच—अत्र चोदनाया द्रव्याद्यभिधायित्वं विवक्षितमिति—शङ्क्यम्; तस्य प्रस्तुतानुपयोगादित्याशङ्क्य तात्पर्यमाह—*तथाचेति। उदाहरणान्तरमिति* ॥ अभियुक्तोक्त्यन्तरमुदाह्रियत इत्यर्थः। न दृष्टान्तान्तरमत्रोक्तम्; पूर्वोक्तस्यैवोच्यमानत्वा-दिति द्रष्टव्यम्। कथं क्रियावद् द्रव्य-देवतयोरपि वाच्यत्वं प्रतीयते नान्तरीयकत्वात्? इति शङ्कते—*कथमिति* ॥ अनुपपत्तिगम्यतया यजत्यर्थता कथम्? यजत्यभिधेयत्वमेव किं न स्यादित्यक्षरार्थः। क्रियामात्रबोधकत्वसंभवेऽ-नेकत्र शक्तिकल्पनायां गौरवं स्यादिति समाध्यर्थः। यजतिचोदना क्रियां साक्षाद् बोधयन्ती द्रव्य-देवतयोरपि प्रतीति-मुपजनयति, तत्र हेतुमाह—*समुदाय इति* ॥ द्रव्यदेवताक्रियाणां समुदायबोधे चोदनाया आकाङ्क्षोपरमा-दिति सूत्रार्थः ॥

उक्तन्यायस्य प्रत्यक्षबाधेऽपि समानत्वादतिदेशो व्यर्थ इत्याशङ्क्याभ्यधिकां शङ्कामाह—*ननु यत्रेति* ॥ पदार्थस्य वाक्यार्थत्वाद् विपर्यासनिरासस्य चापदार्थत्वान्न वाक्यगम्यत्वम्, ततो नान्तरीयको निरासबोध इत्यर्थः। ततो वैषम्यमाह—*यत्र पुनरिति* ॥ तथाऽपि प्रस्तुते किमायातमिति? अत्राह—*इहापीति* ॥

परोक्षबाधेऽधिष्ठानज्ञानस्य विपर्यासनिरास-तत्प्रतिभासहेतुत्वं यथा नान्तरीयकम्, तद्वत् प्रत्यक्षबाधेऽपीत्युक्तम्, तत्र नान्तरीयकत्वं कस्मात्? इति वीक्षायां प्रकारान्तरासंभवादित्याशयेनात्मावबोधस्य प्रत्यक्षत्वं निराकर्तुमनुप-लब्धिगम्यत्वं तावन्निरस्यति—*न तावदिति* ॥ रजताभावज्ञानं संप्रयोगजमिति मतान्तरमुत्थापयति—*अथेति* ॥

वार्तिकम्

किमिति भाष्यकारेण नाभिहितमिति नैष दोषः; विषयाभिधानेनैव तदभिधानात्, अद्वितीयात्म-तत्त्वस्यैव परमानन्दरूपत्वात्। अपिच यत्रापि लोके क्रियाफलमुत्पाद्यादिरूपम्, तत्रापि कर्मकारकमेव तथाभावमापन्नं फलमित्युच्यते; कर्तुरीप्सिततमस्य कर्मत्वात्, फलस्य च तादृक्स्वरूपत्वात्, किमु वक्तव्यम्—कूटस्थाद् निर्विकाराद् निरञ्जनाद् आत्मत्वेन सदा प्राप्तस्वभावात् चिदानन्दैकस्वभावाद् ब्रह्मणो

पञ्चपादिका

विषयत्वाद्बाधस्य। तदेवमशाब्दमविद्याविलयं मन्वानः श्रुति-न्यायकोविदो भगवान् भाष्यकारो विषयात् पृथङ् निर्दिशति—*अस्यानर्थहेतोः प्रहाणायेति* ॥ चतुर्थीप्रयोगोऽपि विद्यासामर्थ्यसिद्धिमभिप्रेत्य, न तदर्थमुपादानम्। प्रयोजनत्वं च पुरुषाकाङ्क्षयैवास्तु। न हि विद्या गवादिवत्तटस्था

पञ्चपादिकाविवरणम्

पुरोदेशे दृश्यमानत्वात्; अथ संप्रयोगजन्य इति, नेत्याह—*असंप्रयुक्तविषयत्वादिति* ॥ रजत-तदभावौ न संप्रयोगयोग्यावित्यर्थः। *तदेवमशाब्दमित्युपसंहारः स्पष्टार्थः* ॥

ननु ब्रह्मविद्याफलमनर्थहेतुनिरासो न वेदान्तारम्भफलम्, तत्र कथं *प्रहाणाय वेदान्ताः* ? इत्याशङ्क्याह—*चतुर्थीप्रयोगोऽपीति* ॥ उपादानं वेदान्तारम्भ इत्यर्थः। तर्हि ब्रह्मविद्याफलत्वान्न शास्त्रस्यानर्थनिरासः प्रयोजनम्, न; परम्परयाऽपि पुरुषाकाङ्क्षितप्रयोजनत्वोपपत्तेरित्याह—*प्रयोजनत्वं चेति* ॥ विद्याप्रतिपत्तय इति प्रतिपत्तिशब्दमाक्षिपति—*नहि विद्या गवादिवदिति* ॥ ज्ञानं हि वस्तुतः प्रतीतितश्च

ऋजुविवरणम्

लब्धीति* ॥ अनेनानुपलब्धिर्लिङ्गमभावप्रमाणं वा ग्राहकं न भवति; अपरोक्षत्वादित्युक्तम्—*अथ सम्प्रयोगजन्य इति* ॥ *अस्यायमर्थः*—संप्रयोगादुत्पद्यते ज्ञायते चेति संप्रयोगजन्यज्ञानजन्यत्वेन तज्जन्यत्वं ज्ञानविषयत्वमपीति चोद्यार्थः। अथवा—संप्रयोगजन्ये ज्ञाने प्रतीयत इति चोद्यार्थः। असंप्रयुक्ततया बाधस्याविषयत्वमित्ययुक्तमुक्तम्; संप्रयोगोऽपि तेन भवत्विति चोदितुं शक्यत्वादित्याशङ्क्य व्याचष्टे—*रजत-तदभावाविति* ॥ रजतस्य प्रतिभानमात्रम्, पुरोवर्तित्वेनाविषयत्वम्, निरासस्य तु ज्ञानाधीनत्वात् पूर्वं तदभावादेव न सम्प्रयोगयोग्यत्वमित्यर्थः। सम्प्रयुक्तत्वाभावे तज्जन्यज्ञानस्यापि न तद्विषयत्वम्; इन्द्रियविषयस्यैव ज्ञानविषयत्वादिति। "न तदर्थमुपादानमि"त्यत्र तच्छब्देन विद्यासामर्थ्यसिद्धत्वविवक्षया चतुर्थीप्रयोगो न भवति, वेदान्तारम्भो वेत्युक्तमिति प्रतिभाति; एकग्रन्थत्वात्, तदयुक्तम्; इष्टव्याघातादित्याशङ्क्य व्याचष्टे—*वेदान्तारम्भ इति* ॥ तच्छब्देन विद्या निर्दिश्यते; साक्षात् तत्प्रयोजनत्वं न विवक्षितमित्युक्तम्। "नहि विद्या गवादिवदि"त्यनेनाप्तेः पृथगुपादानमाक्षिप्तम्, तदसङ्गतम्; नह्याप्तिः क्वाप्युपात्ता दृश्यते, येनाक्षिप्य साध्येत; अतो हेय इत्याशङ्क्यावतारयति—*विद्याप्रतिपत्तय इति* ॥ प्रतिपत्तिशब्दमिति* ॥ "नहि विद्या गवादिवदि"त्यादिनाऽत्राश्रयत्वेन वेद्यप्रकाशकत्वेन चोत्पद्यत इत्युक्तम्, प्रतीतितोऽवाप्तिर्नोक्ता। तथाच सति प्रतीतितोऽवाप्तिसिध्यर्थं प्रतिपत्तिग्रहणं भाष्यगतं युक्तम्, अत आक्षेपोऽनुपपन्न इत्याशङ्क्याभिप्रायमाह—*ज्ञानं हि वस्तुत इति* ॥ "सत्यमेवमि"त्युक्तं वैषम्यम्; पृथगाप्त्यभावेनाक्षेपे प्रतिष्ठाभावाभिधानात्, नच तावन्मात्रेणानवाप्तिः; संशयादौ व्यभिचारादित्याशङ्क्याव-

तत्त्वदीपनम्

संप्रयोगजन्ये ज्ञानेऽभावः प्रतीयत इत्यर्थः। बाधस्यासंप्रयुक्तविषयत्वमसिद्धम्, इत्याशङ्क्याह—*रजतेति* ॥ रजतस्य प्रतिभासमात्रशरीरतया संप्रयोगायोग्यत्वात् तदभावस्यापि संप्रयोगानर्हत्वमित्यर्थः। विद्याऽविद्ययोर्विरोधप्रसिद्धेर्नानर्थनिवृत्तेर्वेदान्तफलत्वमिति शङ्कते—*ननु ब्रह्मेति* ॥ विद्याद्वारेणानर्थनिवृत्तेर्वेदान्तफलत्वं युक्तमिति समाधयर्थः। उपादानशब्दस्यार्थक्रियापरत्वं व्यावर्तयति—*उपादानमिति* ॥ अनर्थनिवृत्तेर्विद्याद्वारा शास्त्रफलत्वं कस्मात्? शास्त्रस्य प्रमितिः फलम्, प्रमितेस्त्वनर्थनिवृत्तिः किं न स्यात्? इति शङ्कते—*तर्हीति* ॥ ब्रह्मविद्या फलं यस्य शास्त्रस्य, तद् ब्रह्मविद्याफलम्, तस्य भावस्तत्त्वम्; तस्मादिति विग्रहः। सुखप्राप्ति-दुःखनिवृत्त्योरन्यतरस्य पुरुषाणां काङ्क्षितत्वाद्विद्यायाश्च तथात्वाभावात् शास्त्रमनर्थनिवृत्तौ पर्यवस्यतीत्याह—*न; परम्परयेति* ॥ टीकायामाकाङ्क्षाशब्दः कर्मपर इति द्रष्टव्यम् ॥ ईप्सितानर्थनिवृत्तेः प्रयोजनत्वमभिधाय, "नहि विद्ये"ति विद्यायास्ताटस्थ्यं निराक्रियते, तदसङ्गतम्; प्रस्तुतानुपयोगात्, आप्तेर्भाष्येऽनुपात्तत्वात् तदाक्षेपोऽप्ययुक्त इत्याशङ्क्य तात्पर्यमाह—*विद्येति* ॥ प्रतीतिविशिष्टतया आप्तिः प्रतिपत्तिशब्देन विवक्ष्यत इति शङ्कायामाह—*ज्ञानं हीति* ॥

पञ्चपादिका

सिध्यति, येनाप्तिः पृथगुपादीयेत। सा हि वेदित्राश्रया वेद्यं तस्मै प्रकाशयन्त्येवोदेति। सत्यमेवमन्यत्र; प्रकृते पुनर्विषये विद्योदिता वै न प्रतिष्ठां लभते; असम्भावनाभिभूतविषयात्वात्। तथाच लोकेऽस्मिन् देशे काले चेदं वस्तु स्वरूपत एव न सम्भवतीति दृढभावितम्, यदि तत्कथञ्चिद्दैववशादुपलभ्येत, तदा स्वयमीक्षमाणोऽपि तावन्नाध्यवस्यति, यावत् तत्सम्भवं नानुसरति। तेन सम्यग्-

पञ्चपादिकाविवरणम्

ज्ञादुत्पत्त्यैवाप्तमेवेत्यर्थः। तत्र प्रत्यक्षान्तरेषु स्वविषयेण सहापरोक्षावभासा विद्या भवति, आप्तिशब्देन च विषयेण सहापरोक्ष्यनिश्चयो विवक्ष्यते, तदिह न संभवतीत्याह—*सत्यमेवमन्यत्रेति* ॥ अत्र "विद्ये"ति शक्तितात्पर्यविचारसहकृताच्छब्दाद् यत् प्रमाणज्ञानमुत्पद्यते, तदभिधीयते। तस्य प्रतिष्ठा स्वविषयेण सहापरोक्ष्यमिति। *तत्रासंभावनेति* ॥ चित्तस्य ब्रह्मात्मपरिभावनाप्रचयनिमित्ततदेकाग्रवृत्त्ययोग्यतोच्यते। *विपरीतभावनेति* शरीराद्यध्यासंस्कारप्रचयः। *ननु* अपरोक्षावभासनिमित्तप्रमाणगृहीते वस्तुनि नोभयविधचित्तदोषादपरोक्षनिश्चयाभावदर्शनमस्तीति, तत्राह—*तथाच लोकेऽस्मिन्देशे काल इति* ॥ यथा दूरदेशवर्तिन्यार्द्रमरीचफलादौ तथाविधवस्तुदर्शनसंस्कारशून्यतया विपरीतसंस्कारवत्तया च प्रत्यक्षदृष्टेऽपि न निश्चिनोति। असंभावितविशेषांशापरोक्षनिश्चयो नोत्पद्यत इत्यर्थः। *ननु* प्रमाणादनिश्चीयमानः कथं तर्कप्रत्ययान्निश्चीयत इति? तत्राह—

ऋजुविवरणम्

तारयति—*तत्र प्रत्यक्षान्तरेष्विति* ॥ टीकायाम्—विद्योदितापि न प्रतिष्ठां लभत इत्युक्तम्, तत्र विद्याशब्दप्रयोगेणापातप्रतीतिमात्रमुक्तमिव प्रतिभाति; प्रतिष्ठाऽभावकीर्तनात्, असंभावना-विपरीतभावनाऽभिभूतविषयत्वस्य प्रतिष्ठाभावहेतुत्वेन कीर्तनाच्च। नच प्रमाणज्ञाने प्रतिष्ठाऽभावोऽसंभावनादि च संभवति; तथा सति व्यधिकरणत्वं परिहारस्य तदवस्थम्। भाष्ये हि वेदान्तजनितज्ञाने प्रतिपत्तिशब्दः प्रयुक्तः, नच तत्र प्रतिष्ठाऽभावादि वक्तुं शक्यते, तेन नानेन प्रतिपत्तिशब्दः समर्थ्यत इत्याशङ्क्याह—*अत्र विद्येति* ॥ शक्ति-तात्पर्येति* ॥ कथं तर्ह्यप्रतिष्ठेत्याशङ्क्याह—*तस्य प्रतिष्ठेति* ॥ कथं तर्ह्यसंभावनाद्यभिभूतविषयत्वमुक्तम्? विचारेण तदपनयनादित्याशङ्क्य व्याचष्टे—*तत्रासंभावनेति। चित्तस्येति* ॥ *ननु*—विषमो दृष्टान्तः; तत्रापि ज्ञानस्य विषयेण सहापरोक्ष्यादित्याशङ्क्याभिप्रायमाह—*असंभावितविशेषांशेति* ॥ "अत एव प्रमाणानामि"ति व्यधिकरणम्; प्रमाणादनिश्चिते कथं

तत्त्वदीपनम्

वेदित्राश्रयत्वेन वेद्यप्रकाशकत्वेन च विद्याया उत्पन्नत्वादप्यनुपपत्तिशङ्कायां तदपरिहारेणाप्रतिष्ठोपपादनमसंगतमित्याशङ्क्य तात्पर्यमाह—*तत्रेत्यादिना* ॥ तत्रैषा योजना*—आप्तिशब्देन विषयेण सहाऽऽपरोक्ष्यमुत्पन्नाया विद्याया आप्तिरिति यद्विवक्ष्यते, तन्न संभवतीति संबन्धः। घटादिप्रत्यक्षवदत्रापि तथात्वं किं न स्यात्? इत्याशङ्क्य स्पष्टविषयत्वान्न तत्रानाप्तिरित्याह—*तत्र प्रत्यक्षेति* ॥ अपरोक्षविद्याया एव विद्याशब्दत्वात् कथमाप्तिरित्याशङ्क्य, विद्याशब्दार्थमाह—*अत्र विद्येति* ॥ अत्र भाष्ये इत्यर्थः। अस्य पदस्यास्मिन्नर्थे सामर्थ्यम्, अस्य वाक्यस्यास्मिन्नर्थ इति योऽयं विचारः, तत्सहकृतादित्यर्थः। प्रतिष्ठाशब्दस्य स्थितिवाचित्वशङ्कां निरस्यति—*तस्य प्रतिष्ठेति* ॥ असंभावनादेर्विचारेणानिरस्तत्वादसंभावनाभिभूतविषयत्वमसिद्धमित्याशङ्क्याह—*तत्रासंभावनेति* ॥ ब्रह्मण आत्मभावेन परिभावना, तथा तस्याः प्रचयो निमित्तं यस्याः सा, तथोक्ता, सा च तदेकाग्रवृत्तिश्चेति, तथा तां प्रति चित्तस्यायोग्यता सा तथोक्ता ॥

वेदान्तानामपरोक्षप्रमाकरणत्वाङ्गीकरणात् कथं तत्त्वविद्यायामप्रतिष्ठत्वमिति शङ्कते—*नन्वपरोक्षेति* ॥ असंभावनादिरुभयविधो दोषः। "तथाच लोकः" इत्यनेन सूचितमुदाहरणं स्पष्टयति—*यथा दूरदेश इति* ॥ मरीचफलमिदमित्याप्तोक्तौ तथा निश्चिनोतीत्याशङ्क्याह—*असंभावितेति* ॥ आर्द्रताविशिष्टमरीचिफलत्वं विशेषांशशब्दार्थः।

पञ्चपादिका

ज्ञानमपि स्वविषयेऽप्रतिष्ठितमनवाप्तमिव भवति। तेन तत्स्वरूपप्रतिष्ठायै तर्कं सहायीकरोति। अत एव प्रमाणानामनुग्राहकस्तर्क इति तर्कविदः॥

अथ कोऽयं तर्को नाम? युक्तिः। *ननु* पर्याय एषः? स्वरूपमभिधीयताम्। इदमुच्यते—प्रमाणशक्तिविषयतत्सम्भवपरिच्छेदात्मा प्रत्ययः।

पञ्चपादिकाविवरणम्

अत एव प्रमाणानामिति॥ प्रसिद्धेव सहकारिसंपत्तौ फलसिद्धिरित्यर्थः। *ननु* तर्कस्यापि प्रमाणत्वे कथं प्रमाणद्वयादर्थनिश्चयो भवति? अप्रमाणत्वे नतरामिति मन्वान आह—*अथ कोऽयमिति*॥ अप्रमाणमपि तर्कः सहकार्येव; प्रत्ययविशेषत्वात्, इत्याह—*प्रमाणशक्तिविषयतदिति*॥ तेषां तत्त्वं तदित्युच्यते। प्रमाणादितत्त्वे संभवासंभवप्रत्ययस्तर्को न निश्चयरूप इत्यर्थः॥

तत्रेदं निरूपितं प्रथमे तन्त्रे—ज्ञानानां प्रामाण्यमप्रामाण्यं च स्वत इति केचित्। उभयमपि परत इत्यन्ये। प्रामाण्यं परतः, अप्रामाण्यं स्वत इत्यपरे। अप्रामाण्यं परतः, स्वतः प्रामाण्यमिति वेदवादिनः।

ऋजुविवरणम्

तर्कप्रत्ययस्य निश्चायकत्वमिति चोदिते तत्परिहारमनुक्त्वा सहकारित्वनिरूपणादित्याशङ्क्याभिप्रायमाह—*प्रसिद्धैव सहकारीति*॥ अप्रमाणत्वे सुतरामसहकारित्वमिति यच्चोदितम्, तत्परिहारेणावतारयति—*अप्रमाणमपीति*॥ "परिच्छेदात्मा प्रत्ययः" इति वदता निश्चयप्रत्ययस्यैव तर्कत्वमुक्तमिव प्रतिभाति, तन्निवृत्त्यर्थमाह—*प्रमाणादितत्त्व इति*॥

"नन्वेवमि"त्यनेनानपेक्षत्वापगमेनाप्रामाण्यं भविष्यतीति यच्चोदितम्, न तदनिष्टम्; भवतु नामानपेक्षत्वहानेनाप्रामाण्यम्, नह्यनपेक्षत्वेन प्रामाण्यं सिद्धम्, न वा तत्प्रमाणत्वेनापि सिद्धम्; अतस्तदपगमेन चोद्यकरणमयुक्तमित्याशङ्क्यावतारयति—*तत्रेदं निरूपितमिति*॥ उभयं स्वत इति सांख्याः; उभयं परत इति वैशेषिकादयः; प्रामाण्यं परतः, अप्रामाण्यं स्वत इति बौद्धाः॥ *विरोधादिति*॥ अयमर्थः—प्रमाणत्वमप्रमाणत्वं च परस्परपरिहारस्थितिलक्षणेन विरोधेन विरुद्धम्; अतो नैकस्य ज्ञानस्य युगपत्तयोः संभवः। नच रक्तारक्तत्वयोरेकत्र क्रमेण समावेशवत् प्रमाणत्वाप्रमाणत्वयोः समावेशसंभवः; क्षणिकत्वाद् ज्ञानस्य, तथा "स्वतो द्वयमि"ति वदतः प्रमाणत्वाप्रमाणत्वे प्रति परापेक्षाऽपि नास्तीति क्रमेणापि न तयोः संभवः; तत्र विरोधपरिहाराय नील-

तत्त्वदीपनम्

यथा यवाङ्कुरजननासमर्थस्य शालिबीजस्य सहकार्यनुरोधादपि तदजनकत्वम्, तद्वद्वेदान्तानामपीति शङ्कते—*नन्विति*॥ वेदान्तेष्वसामर्थ्यमसिद्धमित्याह—*तत्राहेति*॥ सामर्थ्ये सहकार्यपेक्षा युक्तेत्याशङ्क्याह—*प्रसिद्धेति*॥ धूमजननसमर्थस्यापि दहनस्येन्धनसन्निधौ धूमजनकत्ववद् वेदान्तानामपि तथात्वमित्यर्थः। प्रकारान्तरेण तर्कापेक्षां प्रतिक्षिपति—*ननु तस्येति*॥ आलोकादिवदप्रमाणत्वेऽपि सहकारित्वं युक्तमित्याह—*अप्रमाणमपीति*॥ "प्रमाणशक्तिविषयतत्संभवासंभवे"त्यत्र तच्छब्दस्य वैयर्थ्यमित्याशङ्क्याह—*तेषामिति*॥ परिच्छेदशब्दस्य निश्चयवाचित्वशङ्कां निरस्यति—*प्रमाणादीति*॥

वेदान्तानां प्रमितौ तर्कापेक्षत्वेऽप्रामाण्यापत्तिरित्युक्तम्, तत्रानपेक्षताप्रामाण्यभङ्गप्रसञ्जनमिष्टमित्याशङ्क्याऽनिष्टापत्तिं दर्शयितुं पूर्वतन्त्रनिर्वृत्तमर्थमाह—*तत्रेत्यादिना*॥ उभयं स्वत इति सांख्याः; परत इति नैयायिकादयः;

वार्तिकम्

विषयादतिरिक्तं न ज्ञानस्य फलमिति। तस्मात् शास्त्रस्य विषयाभिधानेनैव परमानन्दावाप्तिरूपप्रयोजनाभिधानान्न पृथग् भगवता भाष्यकारेण तदभिधानं कृतम्; पौनरुक्त्यप्रसङ्गादिति॥

ननु—एवं तर्हि समूलानर्थहेतुनिवृत्तिरपि विषयादतिरिक्ता? अनतिरिक्ता वा? अतिरिक्ता

पञ्चपादिकाविवरणम्

तत्र न तावज्ज्ञानानां प्रामाण्यमप्रामाण्यं च स्वत इति युज्यते ; विरोधात् । *ननु*— व्यक्तिभेदेन व्यवस्था, सत्यमर्थतस्तथैव ; प्रतीतितस्तु प्रमाणाप्रमाणप्रतिभासाविशेषात् कस्य किमित्यनवगमाद् व्यवहाराभावप्रसङ्गात् । नच मूर्तामूर्तविभागवत् प्रमाणाप्रमाणविभागः प्रत्यक्षतोऽवभासते । अर्थतस्तु व्यक्तिभेदेन व्यवस्थीयते ।

ऋजुविवरणम्

पीतवह्निन्नव्यक्तिगतत्वं परिगृह्णाति—*ननु व्यक्तिभेदेनेति । प्रतीतितस्त्विति* ॥ बोधस्वरूपत्वं सर्वज्ञानेषु स्वतः साधारणमेव प्रतीयते ; नतु तत्र कश्चिद्विशेषः प्रतीयत इति भावः । *कस्य किमित्यनवगमादिति* ॥ कस्य प्रामाण्यम् ? कस्य वाऽप्रामाण्यमित्यर्थः । *ननु*—प्रतीयत एव ज्ञानानां प्रामाण्यमप्रामाण्यं च ; अतः कथं व्यवहाराभाव इति चेत्, तत्र किं ज्ञानेनैव प्रतीयते ? अर्थतो वा ? न तावत् प्रत्यक्षेणेत्याह—*नच मूर्तामूर्तेनेति* ॥ नाप्यर्थत इत्याह—*अर्थतस्त्विति* ॥ व्यक्तिगतत्वेन व्यवस्थीयते प्रामाण्यमप्रामाण्यं च । नाप्यर्थतः तत्प्रतीतेः ; अर्थस्य तत्सामर्थ्याभावादिति भावः । अथवा—स्वभावतो विद्यमानं प्रामाण्यं तथैव व्यक्तिभेदेन व्यवह्रियत इत्याशङ्क्याह—*अर्थतस्त्विति* ॥ *अर्थतः=स्वभावतः । व्यक्तिभेदे प्रामाण्यमप्रामाण्यं च व्यवस्थीयते, न प्रतीयत इति वा योजना । अथवा—मा भूत् प्रत्यक्षेण स्वतो ज्ञाने विशेषावभासः ; अर्थतस्तु व्यवस्था भविष्यति—यस्य तथाभूतोऽर्थः, तत्प्रमाणमिति व्यवह्रियते, यस्य चातथाभूतः, तदप्रमाणमिति, प्रवृत्त्यादिकमपि तेनैव । अतः कस्य किमित्यनवगमादित्यसम्बद्धमेवेत्याशङ्क्याह—*अर्थतस्त्विति* ॥ विषयतोऽपि किं यस्य परमार्थभूतोऽर्थः, तत्प्रमाणमितरदप्रमाणमिति प्रतीतिरुच्यते, ? उत यस्य विषयस्य परमार्थत्वं निश्चितं भवति, तत्र प्रमाणत्वनिश्चयः ? तत्र प्रथमपक्षे व्यवस्थामात्रम्, नतु विशेषेण प्रमाणत्वादिनिश्चयः । द्वितीये तु निश्चितेऽर्थतथात्वे प्रामाण्यादिति निश्चयः, पूर्वं तु व्यवस्थामात्रमेव भवेत्, नतु प्रतीतिः ॥ अनेन—अर्थतथात्वे ज्ञानान्तरेण संवादादिना निश्चिते प्रामाण्यादिनिश्चय इति पक्षो—*निरस्तः* ॥ नच स्वतो द्वयवादिनां प्रामाण्याप्रामाण्यनिश्चये संवादाद्यपेक्षा शक्या वक्तुमिति । अथवा—किं प्रमाणत्वाप्रमाणत्वप्रतीत्या ? इन्द्रियगतशक्तिवत्सत्तयैव व्यवहारहेतुरित्याशङ्क्याह—*अर्थतस्त्विति* ॥ स्वभावतो व्यक्तिभेदे व्यवस्थामात्रं प्रामाण्यादेव न तावन्मात्रेण व्यवहारः । अथवाऽर्थतो व्यक्तिभेदे भिन्नविषये व्यवहारो न व्यवस्थीयते । *एतदुक्तं भवति*—स्वरूपतो विद्यमानं प्रामाण्यं व्यवस्थितविषयत्वेन व्यवहारहेतुः ; प्रतीतिसापेक्षत्वात्तस्य, इन्द्रियशक्तेरगृहीताया एव कार्यकरत्वदर्शनात्, तथा नेह तथेति वैषम्यम् । *प्रमाणाप्रमाणेति* ॥ यदा ज्ञानं प्रतीयते, तदा प्रमाणत्वेन वाऽप्रमाणत्वेन वा प्रतीयते ; अत उभयमपि परत

तत्त्वदीपनम्

तृतीयस्तु सुगतमतानुसारिणाम् । तत्राद्यं दूषयति—*तत्रेति* । स्वतस्त्वं ज्ञानसामग्रीमात्रप्रयोज्यत्वम् । तत्रोभयोरपि स्वतस्त्व एकव्यक्तावपि सद्भाव आपतेत्, स च विरुद्ध इत्यर्थः । अथवाऽग्निरुष्णः शीतश्चेति वाक्यं यथा विरुद्धार्थत्वादप्रमाणम्, तथा एकस्य ज्ञानस्य प्रामाण्यमप्रामाण्यं चेत्येतद् विरुद्धमित्यर्थः । ज्ञानसामग्रीव्यक्तीनां भिन्नत्वात्प्रामाण्यादिव्यवस्थेति शङ्कते—*ननु व्यक्तीति*। दोषासहकृतज्ञानसामग्र्युत्पन्नज्ञानव्यक्तौ प्रमात्वम्, इतरथाऽप्रमात्वमिति व्यवस्थेत्यर्थः । उत्पत्तिव्यवस्थामङ्गीकरोति—*सत्यमर्थत इति* ॥ तर्हि न विवादः, तत्राह—*प्रतीतित इति* ॥ प्रामाण्याप्रामाण्ययोर्ज्ञानज्ञापकज्ञाप्यत्वे एकव्यक्तावुभयोर्भानप्रसङ्गाद् व्यवहारविशेषो न स्यादित्यर्थः । प्रमाणाप्रमाणप्रतिभासाविशेषोऽसिद्ध इत्याशङ्क्याह—*नचेति* ॥ प्रत्यक्षतो विभागप्रतिपत्तौ

वार्तिकम्

चेत्, न ; द्वैतप्रसङ्गेन शास्त्रविषयक्षतेः, अथानतिरिक्ता, तर्हि तदभिधानेनैव तस्याः प्राप्तत्वात्पृथगभिधानं व्यर्थं स्यादिति—चेत्, *सत्यम्* ; परमार्थतः साऽपि न विषयाद्भिद्यते ; आरोपितनिवृत्तेरधिष्ठानैकरूपत्वात्, रज्ज्वारोपितभुजङ्गनिवृत्तेस्तदेकरूपत्ववत् ; तथापि तत्त्वज्ञानात् पूर्वं बन्धस्येव तन्निवृत्तेरपि श्रोतुः प्रयोजनस्य विषयात् पार्थक्येन प्रसक्तत्वादधिकारिनिर्देशवत् पृथक् तन्निर्देश

पञ्चपादिकाविवरणम्

नाप्युभयं परतः ; प्रमाणाप्रमाणविभागहीनस्य ज्ञानस्य स्वरूपानवगमात् । नापि प्रामाण्यमर्थपरिच्छेदसामर्थ्यं कारणगुणज्ञानात्परतोऽवगम्यते ; अनवस्थापातात् । नापि ज्ञानकारणव्यतिरिक्तात् कारणात् प्रामाण्यं जन्यते । क्षणमात्रापवर्गिणि ज्ञाने तदयोगात्, प्रतिभासतो भ्रान्ति-सम्यग्ज्ञानयोर्विशेषाभावे चक्षुरादिगुणजन्यत्वावगमात् प्राक् प्रामाण्यनिश्चयाभावाद् व्यवहाराभावप्रसङ्गात्, प्रामाण्यनिमित्तचक्षुरादिगुणज्ञानस्यापि गुणान्तरजन्यत्वा-

ऋजुविवरणम्

इति वक्तुं न शक्यत इत्यर्थः । अथवा—प्रमाणाप्रमाणभागहीनस्य स्वरूपावगम एव न संभवति ; निःस्वभावत्वादित्यर्थः । *ननु*—प्रामाण्यमर्थपरिच्छेदसामर्थ्यम्, न स्वरूपम्, नचोत्पन्नमात्रमेव ज्ञानं स्वविषयनिश्चायकम् ; प्रमाणेतरयोस्तदानीं विशेषानवभासात्, अतोऽन्यतः प्रामाण्ये विषयनिश्चायकत्वम् । नच स्वरूपावभासाभावः ; असत्यपि प्रामाण्याद्याकारे ज्ञाने सत्त्व-ज्ञेयत्व-गुणत्वादिसंभवात् प्रतीतिरुपपद्यते, अन्यतः प्रामाण्यं चेति । तत्र किं परतः प्रामाण्यम्—ज्ञाने? उत्पत्तौ वा? तत्र न तावत् प्रथमः कल्प इत्याह—*नापि प्रामाण्यमिति* ॥ अनवस्थापातादिति* ॥ अयमर्थः—कारणगुणज्ञानं हि स्वयं गुणजन्यत्वेनार्थपरिच्छेदकतया निश्चितं सदन्यस्य ज्ञानस्य गुणजन्यत्वेनार्थपरिच्छेदकत्वं गृह्णाति ? गुणजन्यत्वेनानिश्चितं वा ? निश्चितं चेत्, निश्चयोऽपि न तावत्स्वेनैव ; असामर्थ्यात्, अन्येन निश्चयेऽपि तदप्यन्येन निश्चितसामर्थ्यमेव निश्चायकम्, तदपि तादृशेनेत्यनवस्था । द्वितीये पक्षे परिहारमाह—*नापि ज्ञानकारणव्यतिरिक्तादिति* ॥ क्षणमात्रेऽपवर्गो विनाशो यस्य, तत् क्षणमात्रापवर्गि, तस्मिन्निति । एतदुक्तं भवति—प्रामाण्योत्पादकं ज्ञानं स्वयमुत्पन्नं यावत्प्रामाण्यमुत्पादयति, तावत्पूर्वज्ञानस्य विनष्टत्वादेव तज्जन्यप्रामाण्याधारत्वायोगादिति कथं कारणगुणज्ञानात् प्रामाण्यनिश्चयेऽनवस्थोक्ता । मूलक्षयाभावात्, यदा प्रामाण्यं जिघृक्षितं भवति, तदा गुणज्ञानेन निश्चीयते; इतरत्र नापेक्षेति । अथवा—सहैवोत्पद्यते प्रामाण्यमतश्च, परतो व्युत्पत्तिसंभव इति, तथाऽपि स्वेनैव ज्ञायते वा ? नवा ? तत्रानवभासे दूषणमाह—*प्रतिभासत इति* ॥ मा भूत् प्रामाण्यनिश्चयात्प्राग्व्यवहारः, गुणजन्यत्वानिश्चयेन प्रामाण्ये निश्चिते व्यवहारः, इत्याशङ्क्याह—*प्रामाण्यनिमित्तचक्षुरादीति । *ननु*

तत्त्वदीपनम्

प्रामाण्याप्रामाण्यविवादो न स्यादित्यर्थः । चक्षुषः सत्तयाव्यवहारहेतुत्ववत् प्रमाणाप्रमाणयोरपि सत्तया व्यवहाराहेतुत्वं स्यादित्याशङ्क्याह—*अर्थत इति* ॥ *अर्थतः=स्वभावत इति यावत् । प्रमाणाप्रमाणव्यक्त्योर्भेदेऽसंकरेऽपि व्यवहारो न व्यवस्थाप्यते । इन्द्रियस्याऽज्ञायमानत्वेऽपि ज्ञानद्वारा व्यवहारहेतुत्वम् । प्रमाणाप्रमाणज्ञानयोस्तु साक्षाद् व्यवहारहेतुत्वाद् ज्ञायमानत्वं वक्तव्यमित्यर्थः । द्वितीयं पक्षं दूषयति—*नापीति* ॥ ज्ञानमात्रे सिद्धे तत्प्रयोजकातिरिक्तप्रयोज्यत्वम्, न प्रमाणाप्रमाणातिरिक्तं ज्ञानमस्तीत्यर्थः ॥

स्वतःप्रामाण्यवादिनाऽपि ज्ञानमाश्रयणीयम् ; अन्यथा ज्ञानमात्रप्रयोजकातिरिक्तप्रयोज्यलक्षणमप्रामाण्यपरतस्त्वं न सिध्यतीत्याशङ्क्य, किं प्रामाण्यं परतो ज्ञायते ? उत न ज्ञायते ? आद्येऽपि किं कारणगुणज्ञानाद् ज्ञायते ? उतार्थक्रियासंवादज्ञानात् ? नाद्य इत्याह—*नापि प्रामाण्यमिति* ॥ गुणजन्यत्वात्—'इदं प्रमाणमि'त्यभिगम्यते चेत्, तर्हि गुणजन्यत्वज्ञानस्यापि प्रामाण्यं गुणजन्यत्वेन निर्धारणीयम्, तत्प्रामाण्यस्यापि तथात्वमित्यनवस्था । नच—गुणज्ञानस्य प्रामाण्याऽनिश्चयेऽप्याद्यज्ञानप्रामाण्यव्यवहारहेतुत्वमिति—शङ्कनीयम् ; आद्यज्ञानस्यापि तथैव स्वविषयव्यवहारहेतुत्वेनानपेक्षाप्रसङ्गादित्यर्थः । द्वितीयं जन्मपक्षं प्रत्याह—*नापि ज्ञानेति* ॥ किं ज्ञानोत्पत्त्यनन्तरं प्रामाण्यं जायते ? उत ज्ञानेन साकम् ? इति विकल्प्याद्यं प्रत्याह—*क्षणमात्रेति* ॥ नच—ज्ञानस्य द्वि-त्रिक्षणावस्थायित्वात् तत्र प्रामाण्यजन्मसंभव इति—शङ्क्यम् ; कार्यसमवायिकारणतया द्रव्यत्वापातादित्यर्थः । प्रामाण्यं परतो जायत इत्यत्र दोषान्तरमाह—*प्रतिभासत इति* ॥ गुणजन्यत्वावगमोत्तरकालं प्रामाण्यनिश्चयपुरःसरो व्यवहार इत्याशङ्क्योक्तामनवस्थां प्रपञ्चयति—*प्रामाण्यनिमित्तेति* ॥ स्वेनैव स्वस्य गुणजन्यत्वमिति निश्चयाद्

पञ्चपादिकाविवरणम्

वगममन्तरेण गुणनिश्चयनिमित्तत्वायोगात्, प्रतिभासतो भ्रान्तेरविशेषात् स्वतो गुणजन्यत्वानिश्चयात्, ज्ञानस्य गुणान्वय-व्यतिरेकयोश्च प्रामाण्यप्रतिबन्धकदोषाभावविषयतयाऽन्यथासिद्धत्वात्, दोषनिवृत्तिव्यतिरेकेणेन्द्रियादिषु गुणादर्शनाच्चान्यतोऽपि प्रामाण्यस्य ज्ञानेन सह जन्माभावः। अर्थक्रियासंवादज्ञानात्; प्रामाण्यनिश्चयेऽपि तुल्योऽनवस्थादिदोषः। साधनज्ञानानामेवार्थक्रियासंवादात् प्रामाण्यम्, न फलज्ञानानाम्, अर्थक्रियान्तराभावात्, अतो नानवस्थेति चेत्, तद्वदेव साधनज्ञानानामपि तत् स्वत एव स्यात्; अन्यथा प्रवृत्तस्यार्थक्रियातः प्रामाण्यम्, प्रामाण्याच्च प्रवृत्तिरितीतरेतराश्रयं स्यात्। नच प्रामाण्यनिश्चयाय प्रवृत्तिः;

ऋजुविवरणम्

गुणजन्यज्ञानस्य गुणजन्यत्वानिश्चयेऽपि गुणविषयत्वात् प्राधान्येन गुणजन्यत्वाच्च निश्चायकत्वमित्याशङ्क्याह—*प्रतिभासत इति*॥ कथं प्रमाणज्ञाने गुणजन्ये सति प्रतिभासतो विशेषाभावः? इत्याशङ्क्याह—*स्वतो गुणजन्यत्वेति*॥ यद्वा—प्रतिभासतो विशेषाभावात्पूर्वमुक्तमुपसंहरति—*प्रतिभासत इति*॥ कथं विशेषाभावः? स्वेनैव गुणजन्यत्वनिश्चयादित्याशङ्क्याह—*स्वतो गुणजन्यत्वेति*॥ *ननु*—गुणान्वय-व्यतिरेकाभ्यां प्रामाण्यस्य तावद् गुणेन विज्ञानकारणातिरिक्तकारणेन जन्म सिद्धं निराकर्तुं न शक्यते, इत्याशङ्क्याह—*ज्ञानस्य गुणान्वयेति*॥ (कथं गुणान्वय-व्यतिरेकाभ्यां प्रामाण्यस्य तावद् गुणेन विज्ञानकारणातिरिक्तकारणेन जन्म सिद्धं निराकर्तुं न शक्यते? इत्याशङ्क्याह—*ज्ञानस्य(१) गुणान्वयेति*॥) कथं गुणान्वय-व्यतिरेकयोर्दोषाभावविषयत्वम्? वैयधिकरण्यात्, नह्यन्यविषयावन्वय-व्यतिरेकावन्यविषयौ भवतः, इत्याशङ्क्याह—*दोषनिवृत्तिव्यतिरेकेणेति*॥ अथवा—दोषाभावविषयत्वमेव—गुणेभ्यो दोषाभावः, तदभावाच्च प्रतिबन्धकाभावेन प्रामाण्यमिति। एवंच प्रामाण्यप्रतिबन्धकदोषाभावहेतुत्वेन गुणान्वय-व्यतिरेकयोरन्यथासिद्धत्वमेवमङ्गीकृत्य गुणसद्भावान्वय-व्यतिरेकयोरन्यथासिद्धिरुक्ता। इदानीं गुणा एव न सन्ति; कथं तेषामन्वय-व्यतिरेकावित्याह—*दोषनिवृत्तिव्यतिरेकेणेति*॥ *ननु*—अर्थक्रियासंवादादेव प्रामाण्यनिश्चयः, अतो न व्यवहारासंभव इत्याशङ्क्याह—*अर्थक्रियासंवादेति*॥ *ननु—नेतरेतराश्रयः; निश्चित एव प्रामाण्ये तन्निश्चयाय प्रवृत्त्युपपत्तेरित्याशङ्क्याह—*नच प्रामाण्येति*॥ *असन्दिग्धार्थत्वादिति*॥ प्रवर्तकज्ञानानामित्यर्थः। अथवा—प्रमाणज्ञानानामिति शेषः। सन्देहे निश्चयाय प्रवृत्तिः, असन्दिग्धार्थत्वे च न प्रामाण्य-

तत्त्वदीपनम्

नानवस्था, इत्याशङ्क्याह—*स्वत इति*॥ फलज्ञानस्य गुणजन्यत्वानाकारत्वान्न तन्निश्चायकत्वमित्यर्थः। गुणान्वय-व्यतिरेकाभ्यां प्रामाण्यपरतस्त्वमुपलभ्यमानं कथं युक्त्या निह्नूयते? इत्याशङ्क्याह—*ज्ञानस्येति*॥

गुणमङ्गीकृत्य तदन्वय-व्यतिरेकयोरन्यथासिद्धिरवादि, इदानीं न दोषनिवृत्त्यतिरेकेण गुणोऽस्तीत्यत्राह—*दोषनिवृत्तीति*॥ प्रामाण्य-ज्ञानयोर्युगपद्भावपक्षं निरस्यति—*अन्यत इति*॥ ज्ञानस्य प्रामाण्यसमवायिकारणत्वात् कारणस्य नियतप्राक्क्षणवर्तित्वान्न तयोः सहसंभव इत्यर्थः। अर्थक्रियासंवादज्ञानात् प्रामाण्यनिश्चय इति कल्पं निरस्यति—*अर्थक्रियेति*॥ अर्थक्रियाकारिविषयज्ञानस्य प्रामाण्यं येनार्थक्रियाज्ञानेन ज्ञायते, तस्य प्रामाण्यं किं परतः? उत स्वतः? आद्ये तत्प्रामाण्यनिश्चयार्थं तदर्थक्रिया ज्ञातव्या, एवं तत्र तत्रापीत्यनवस्थेत्यर्थः। द्वितीयमुत्थापयति—*साधनेति*॥ अर्थक्रियाकारि वस्तु साधनशब्दार्थः। फलशब्देनार्थक्रिया कथ्यत इत्यर्थः। क्वचित्प्रामाण्यस्वतस्त्वाङ्गीकार इतरत्रापि तदनुमानं सुकृतमित्याह—*तद्वदिति*॥ विमतानि, स्वतः प्रमाणानि, नियतप्रमाणत्वात्; संमतवदित्यर्थः। विपक्षे दण्डमाह—*अन्यथेति*॥ साधनज्ञानानां प्रामाण्यमर्थक्रियाधीनं चेत्, तदा साधनज्ञानप्रामाण्यं निश्चित्य प्रवृत्तस्यार्थक्रियासंदर्शनेन प्रामाण्यं वक्तव्यम्, प्रामाण्यसिद्धौ च प्रवृत्तिसंभव इति परस्पराश्रयत्वमित्यर्थः। प्रामाण्यनिश्चयमन्तरेणापि तन्निश्चयार्थप्रवृत्तिसंभवान्नेतरेतराश्रयत्वमित्याशङ्क्य, किं सर्वत्र प्रामाण्यनिश्चयार्थं प्रवृत्तिः? उत क्वचिदिति विकल्प्याद्यं निरस्यति—*नच प्रामाण्येति*॥ *ज्ञानानामिति*॥

(१) ( ) चिह्नान्तर्गतः आदर्शगतोऽपि पुनरुक्त इति प्रतिभाति।

पञ्चपादिकाविवरणम्

असंदिग्धार्थत्वाज्ज्ञानानाम् । रूपकपरीक्षादौ प्रत्ययचतुष्टयाद् दृश्यतेऽर्थनिश्चय इति चेत्, न; प्रथमज्ञानस्यैव संशयादिप्रतिबन्धनिरासित्वादुत्तरज्ञानानाम् । तस्माद् ज्ञानोत्पत्तिमात्रप्रयुक्तार्थव्यवहारदर्शनात् प्रतीतितोऽर्थतश्च स्वत एवार्थनिश्चयः प्रामाण्यम् । अप्रामाण्यजन्म दोषसहितात् कारणात् तत्प्रतीतिबाधात्, इति परत एवाप्रामाण्यं युक्तम् । नचाप्रामाण्यस्य परतो जन्म संभवति; प्रामाण्यप्रागभावत्वादिति चेत्, न; अज्ञान-संशय-मिथ्याज्ञानानामप्रामाण्यानां भावरूपत्वात् । *ननु* स्वतःप्रमाणस्य कथं परतोऽप्रामाण्यम्? स्वभावविरोधादिति चेत्, दोषप्रतिबन्धबलादग्नेरिव शैत्यस्पर्शो न विरुध्यते । स्वतःप्रामाण्यादेव च यावद्दोषावगमं ज्ञानादेव व्यवहारदर्शनम् । तस्मात् प्रामाण्यवत् प्रतीत्योर्गुण-तज्ज्ञानान्तराद्यनपेक्षमेव ज्ञानं स्वतः सत्तयैव निश्चयव्यवहारनिमित्तमिति स्थापितम् ॥

ऋजुविवरणम्

निश्चयाय प्रवृत्तिरिति भावः । *प्रत्ययचतुष्टयादिति* ॥ निरीक्षण-दाह-च्छेद-निघर्षणप्रत्ययेभ्य इत्यर्थः । स्वतःप्रामाण्यसमर्थनेन परतःप्रामाण्यसमर्थनेन च बौद्धमतनिरसनसिद्धेस्तदेव क्रियते, न तु बौद्धमतस्य पृथङ् निराकरणं कृतम् । *ननु* स्वतः परतश्चोभयाभावे किं तत्प्रामाण्यम्? कथं च तत् स्वतस्तया व्यवस्थाप्यत इति? तदाह—*तस्मादिति* ॥ अथवा—स्वतःप्रामाण्यपक्षेऽप्यनवस्थादूषणं समानम्; अपवादकदोषाभावज्ञानस्यापेक्षितत्वादित्याशङ्क्याह—*तस्माद् ज्ञानोत्पत्तिमात्रेति* ॥ कथं तर्ह्यप्रामाण्यं परतः; उत्पादकज्ञापकयोरभावादिति? तदाह—*अप्रामाण्येति* ॥ *अज्ञान-संशयेति* ॥ अज्ञानमित्यनुत्पत्तिलक्षणमप्रामाण्यमाकाशादीनामिति । कथं तर्ह्यप्रमाणाज्ज्ञानेन त्वत्पक्षे व्यवहारः? इत्याशङ्क्याह—*स्वतःप्रामाण्यादिति* ॥ अथवा—विद्यमानप्रामाण्यप्रतिबन्ध एव कथं निश्चीयते? स्वत एवाप्रामाण्यं कस्मान्न भवति? इत्याशङ्क्याह—*स्वतःप्रामाण्यादेवेति* ॥

तत्त्वदीपनम्

अभ्यस्तविषयज्ञानानामित्यर्थः । द्वितीयमुत्थापयति—*रूपकेति* ॥ *प्रत्ययचतुष्टयादिति* । निरीक्षण-दहन-च्छेदन-निघर्षणप्रत्ययेभ्य इत्यर्थः । प्रमाणसंप्लवापाताद् बहूनां संभूय प्रामाण्यानुपपत्तेरेकस्य प्रमितिजनकत्वम्, इतरस्य प्रतिबन्धनिरासित्वमित्याश्रयणीयमित्याह—*न प्रथमेति* ॥

प्रामाण्यस्य परतस्त्वम्, अप्रामाण्यस्य च स्वतस्त्वमिति मतं निरस्यति—*तस्मादिति*॥ अर्थनिश्चयः प्रामाण्यं च स्वत एवेति योजना । स्वत इत्येतद् विवृणोति—*प्रतीतित इति* ॥ अप्रामाण्यस्योत्पत्तिपरतस्त्वमाक्षिपति—*नचेति*—स्वतो जन्मासंभव इति चशब्दार्थः । अभावत्वमसिद्धमित्याह—*नाज्ञानेति* ॥ नच—अज्ञानस्यापि प्रागभावत्वाद् जन्मासंभव इति—शङ्क्यम्; अन्यवस्तुज्ञानस्याज्ञानशब्देन विवक्षितत्वात् । तच्चोक्तम्—

"प्रत्यक्षादेरनुत्पत्तिः प्रामाण्याभाव उच्यते । आत्मनोऽपरिणामो वा विज्ञानं वाऽन्यवस्तुनि" ॥ इति । नच पदत्रयवैयर्थ्यम्; अप्रामाण्यस्य भावतासमर्थनस्य विवक्षितत्वात्, अज्ञानस्यापि भावत्वात् । तथाचोक्तम्—"अप्रामाण्यं त्रिधा भिन्नं मिथ्यात्वाज्ञान-संशयैः"—इति ॥

प्रकारान्तरेणाप्रामाण्यपरतस्त्वमाक्षिपति—*ननु स्वत इति* ॥ उष्णस्य वह्नेः शीतताऽसंभववत् स्वतःप्रमाणस्य परतोऽप्रामाण्यं विरुद्धमित्यर्थः । स्फोटजननसमर्थस्यापि वह्नेर्मण्यादिप्रतिबन्धादन्यथात्वम्; तद्वत् स्वतःप्रमाणस्य परतोऽप्रामाण्यमित्येतन्न विरुद्धमित्याह—*दोषेति* ॥ स्वतःप्रामाण्ये हेत्वन्तरमाह—*स्वत इति* ॥ शुक्तिकायामपि रूप्यबोधे रजतार्थिनामसंदिग्धप्रवृत्तिदर्शनात् प्रामाण्यस्वतस्त्वम्; अन्यथा झटिति निःशङ्कव्यवहारानुपपत्तिरित्यर्थः ॥ अस्तु प्रामाण्यं स्वतः, प्रकृते तु किमायातम्? अत्राह—*तस्मादिति* ॥ तर्कापेक्षायामपि स्वतस्त्वं न

वार्तिकम्

स्यापेक्षणात् । नचैवं स्वरूपानन्दो विषयात् पार्थक्येन प्रसक्तोऽस्ति, येन तस्यापि पृथगभिधानमपेक्ष्येत । तस्मान्नायं दोष इति ॥

पञ्चपादिका

ननु एवं तर्कसापेक्षं स्वमर्थं साधयतोऽनपेक्षत्वहानेरप्रामाण्यं स्यात्, न स्यात्; स्वमहिम्नैव विषयाध्यवसायहेतुत्वात्, क्व तर्हि तर्कस्योपयोगः? विषयासम्भवाशङ्कायां तथाऽनुभवफलानुत्पत्तौ तत्सम्भवप्रदर्शनमुखेन फलप्रतिबन्धविगमे। तथाच तत्त्वमसिवाक्ये त्वंपदार्थो जीवस्तत्पदार्थे ब्रह्मस्वरूपतामात्मनोऽसम्भावयन् विपरीतं च रूपं मन्वानः समुत्पन्नेऽपि ज्ञाने तावन्नाध्यवस्यति, यावत्तर्केण विरोधमपनीय तद्रूपतामात्मनो न सम्भावयति।

पञ्चपादिकाविवरणम्

तदेतद्विरुध्यते तर्कप्रत्ययापेक्षया ज्ञानस्य स्वविषयं प्रति निश्चायकत्व इति चोदयति—*नन्वेवं तर्कसापेक्षं स्वमर्थमिति* ॥ परिहरति—*न स्यात् स्वमहिम्नैवेत्यादिना* ॥ प्रमाणादेवार्थापरोक्ष्यनिश्चये तत्प्रतिबन्धविगमे तर्कस्योपयोगान्नार्थनिर्णयहेतुतेत्युक्तम्। *ननु* एवं बहिरर्थे प्रमाणप्रतिबन्धसम्भवात्तद्विगमाय भवतु तर्कोपकारः, न तथाऽऽत्मनि; स्वयंप्रकाशे प्रतिबन्धाभावादिति, तत्राह—*तथाच तत्त्वमसिवाक्ये त्वंपदार्थ इति* ॥ "असम्भावयन्" इति, आपरोक्ष्याभाव उच्यते, "विपरीतमि"ति च पारोक्ष्यमुच्यते ॥

अत्रायमाशयः—लोके तावद्विषयस्यापरोक्षता संविदभेदाद्वा विषयस्याव्यवधानतया स्वसंविज्जनकत्वाद्वा प्रमाणकारणेन्द्रियसंप्रयुक्तत्वाद्वा भवति; उक्तकारणत्रयहीनेऽनुमेयादौ परोक्षतादर्शनात्। तत्र ब्रह्मण एव सर्वसंविदुपादानत्वाद् ब्रह्माकारशब्दप्रमाणजन्यसंवेदनेऽपि तदभिन्नतया वा तज्जनकतया वा ब्रह्मापि प्रथममेवापरोक्षतयाऽवभासते। तच्च चित्तस्यातिसूक्ष्मेऽनेकाग्रतादोषाद् विपर्ययसंस्कारदोषाच्च प्रतिबद्धं भ्रान्त्या परोक्षवद-

ऋजुविवरणम्

यौक्तिकासंभावनादिप्रतीतिनिराकरणार्थं व्याचष्टे—*आपरोक्ष्याभाव इति*॥ *ननु*—सिद्धे ब्रह्मणि शब्दस्यापरोक्षज्ञानजनकत्वे प्रतिज्ञाशब्दस्तत्परो व्याख्यायेत, असंभावनादिशब्दानां तस्याजन्यत्वेऽपीतरयोर्जनिसंभव इति। नचाज्ञानमन्यार्थता च स्वीक्रियेत, नच शब्दस्यापरोक्षज्ञानजनकत्वमस्ति; सामर्थ्यादर्शनात्, माप्यत्रापरोक्षज्ञानमेवोत्पद्यत इति प्रमाणमस्ति; अतो नेदं व्याख्यानं न्यायोपेतम्, नापीदृक्ग्रन्थस्वारस्यानुरोधीत्याशङ्क्याह—*अत्रायमाशयः—*लोक इति* ॥ यदि प्रथममेवापरोक्षतया ज्ञायते, तर्हि तथैव व्यवहारः स्यादित्याशङ्क्याह—*तच्च चित्तस्येति* ॥

ननु—प्रथममेव यद्यपरोक्षज्ञानमुत्पन्नं चित्तगतानेकाग्रतादोषात् परोक्षवदवभासते, तर्हि तन्निमित्तदोषाणामनेकत्वात्

तत्त्वदीपनम्

हीयत इत्याह—*परिहरतीति*॥ प्रमाणस्यार्थप्रमितिजननेऽनपेक्षत्वेऽपि प्रतिबन्धनिरासे तर्कापेक्षणात् स्वतस्त्वं सिद्धम्; ततश्च "तथाचे"त्यादिग्रन्थानुपयोगः, इत्याशङ्क्य, वृत्तसंकीर्तनपूर्वकं तद्व्यावर्त्यां शङ्कामाह—*प्रमाणादेवेत्यादिना*॥ स्वप्रकाशेऽपि प्रतिबन्धो दृष्ट इत्याह—*तत्राहेति* ॥ युक्तितोऽसंभावनादेर्निरस्तत्वात् कथम्—"असंभावयन्विपरीतं च मन्वानः" इत्युक्तमित्याशङ्क्याह—*असंभावयन्निति* ॥

तत्त्वमस्यादिवाक्यादसंभावना-विपरीतभावनाऽभिभूतविषया विद्योत्पद्यते, तस्या आक्षिरप्रतिबन्धापरोक्षप्रत्ययोत्पाद इत्युक्तम्, तदयुक्तम्; शब्दस्य परोक्षज्ञानजननस्वाभाव्यादात्मापरोक्षज्ञानजनकत्वासंभवादित्याशङ्क्य, शब्दाद् ब्रह्मण्यपरोक्षप्रतिपत्तिं दर्शयितुमनात्मन्यपरोक्षाभिधामाह—*लोके तावदिति* ॥ अतीताद्यर्थस्यापि संस्कारद्वारा संविज्जनकत्वव्यावर्तनार्थम्—*अव्यवधानतयेति विशेषणम्* ॥ उक्तमर्थं व्यतिरेकमुखेनोपपादयति—*उक्तेति* ॥ फलितमाह—*तत्रेति* ॥ अनात्माकारान्तःकरणपरिणामप्रतिबिम्बितसंविदां बिम्बभूतब्रह्मोपादानत्वात् सर्वसंविदुपादानत्वं ब्रह्मण इत्युक्तम्, तच्च कैमुतिकन्यायेन ब्रह्मणः संविदभिन्नत्वदर्शनायेति द्रष्टव्यम्। शब्दमात्रस्य परोक्षज्ञानजनकत्वस्वाभाव्येऽपि स्वयंप्रकाशापरोक्षात्मन्यपरोक्षज्ञानजनकत्वमविरुद्धमित्यर्थः। ब्रह्मणः प्रथममपरोक्षतया प्रतिपत्तौ मननादिविधानमनर्थकमित्याशङ्क्याह—*तच्चेति* ॥ तच्च ब्रह्म भ्रान्त्या परोक्षवदवभासत इत्यन्वयः। भ्रान्तौ हेतु-

पञ्चपादिकाविवरणम्

वभासते। तत्रापरोक्षज्ञानमुद्दिश्य यज्ञादीनां निदिध्यासनादीनां च विधानसामर्थ्याद् यज्ञादिनिर्बर्हितकल्मषप्रतिबन्धम्, शमादिनिरुद्धविपरीतप्रवृत्तिदोषम्, मननसंदर्शितप्रमेयादिसंभावनागुणप्रदीपोज्ज्वलितम्, अतिसूक्ष्मतरब्रह्मात्मविषयनिदिध्यासनप्रचयपरिनिर्मिततदेकाग्रवृत्तिगुणं चेन्द्रियं पारोक्ष्यविभ्रमनिमित्तप्रतिबन्धनिरासेन शब्दादेवापरोक्षनिश्चयनिमित्तं भवतीति गम्यते ; लोके चातिसूक्ष्मवस्तुनिर्धारणे चित्तैकाग्र्यविशेषापेक्षाया दर्शनात्। तर्कशब्देन चात्रैतादृशं सर्वप्रतिबन्धनिरासि चित्तदर्पणमुच्यते ; यौक्तिकासंभावना-विपरीतभावनानिरासितर्काणां

ऋजुविवरणम्

तन्निराससमर्थकारणाभावान्न कदाचिदापरोक्ष्यनिश्चय इत्याशङ्क्याह—*तत्रापरोक्षज्ञानमिति* ॥ नच यज्ञादीनां विधानादेव तन्निवर्तकत्वं निश्चेतुं शक्यते ; ज्ञानाङ्गत्वे प्रमाणाभावे न त्वापरोक्ष्यप्रतिबन्धनिरासहेतुत्वमित्याशङ्क्य, तमेव प्रथमं निरूपयति—*अपरोक्षज्ञानमुद्दिश्येति* ॥ *यज्ञादिनिर्बर्हितेति* ॥ "धर्मेण पापमपनुदति" "तपसा कल्मषमि"ति श्रुति-स्मृत्योर्निवर्तकत्वप्रतीतेर्यज्ञादिभिर्निवर्तितकल्मषप्रतिबन्धो यस्मिन् चित्तेन्द्रिये, तच्चित्तं यज्ञादिनिर्बर्हितकल्मषप्रतिबन्धमिति। लौकिकं विनियोगं दर्शयति—*शमादिनिरुद्धेति* ॥ शमादिभिर्निरुद्धो विपरीतप्रवृत्तिदोषो यस्मिंश्चित्तेन्द्रिय इति विग्रहः। दोषशब्दो रागद्वेषपरः ; शमादीनामुपशमरूपत्वाद् बाह्येन्द्रियाणामन्तःकरणस्य चोपरमे सामर्थ्याद्विपरीतप्रवृत्तिदोषस्य च निषेधः ; इन्द्रियप्रवृत्तिसापेक्षत्वाद्विपरीतप्रवृत्तेर्दोषस्य चेत्यर्थः। अथवा—विपरीतप्रवृत्तिरेव दोष इति। मननेन सन्दर्शिता चासौ प्रमेयादिसंभावना च, संभावनैव गुणः संभावनागुणः ; स एव प्रदीपः, तेन प्रदीपेनोज्ज्वलितं चित्तेन्द्रियमिति। पुनरपि तदेव विशिनष्टि—*अतिसूक्ष्मतरेति* ॥ अतिसूक्ष्मतरं ब्रह्म आत्मत्वेन प्रत्यग्रूपमेव विषयो यस्य, तदतिसूक्ष्मतरब्रह्मात्मविषयम्, ब्रह्मात्मविषयं च तन्निदिध्यासनम्, ब्रह्मात्मविषयनिदिध्यासनम्, निदिध्यासनस्य प्रचयो निदिध्यासनप्रचयः, निदिध्यासनप्रचयेन परिनिर्मिततदेकाग्रवृत्तीति, तस्मिन् ब्रह्मात्मैकत्वे एकाग्ररूपा वृत्तिरेकाग्रवृत्तिः, एकाग्रवृत्तिरेव गुण एकाग्रवृत्तिगुणः, प्रचयेन परिनिर्मितः ब्रह्मात्मैकत्वविषयः एकाग्रवृत्तिरूपो गुणो यस्मिन् चित्ते ; तदेवंभूतमिति विग्रहः। कथं चित्तैकाग्र्यहेतुत्वमलौकिकं कल्प्यते ? इत्याशङ्क्याह—*लोके चेति* ॥ *ननु*—तर्कस्य प्रतिबन्धनिरासकत्वमुक्तं टीकाकृता ; तद्विरोधः, इत्याशङ्क्याह—*तर्कशब्देनेति* ॥ किमर्थं मुख्यतर्कहानेनान्यस्वीकारः ? इत्याशङ्क्याह—*यौक्तिकेति* ॥ *ननु*—अपरोक्षज्ञानमुत्पद्यत इत्यङ्गीकृत्य सर्वेषामन्यथाकरणे बहुतरस्यामुख्यत्वप्रसङ्गात् किमर्थमेवमाश्रितम् ? इत्याशङ्क्याह—*एवं-

तत्त्वदीपनम्

माह—*चित्तस्येति* ॥ कथं तर्ह्यप्रतिबन्धसिद्धिः ? इत्यत आह—*तत्रेति* ॥ अपरोक्षज्ञानमुद्दिश्य यज्ञादिविधानसामर्थ्यात् चित्तेन्द्रियमापरोक्ष्यनिश्चयनिमित्तं भवतीत्यन्वयः। "यज्ञादीनामि"त्यत्रादिशब्देन दानादिर्गृह्यते। "शमादीनामि"त्यत्रादिशब्देन दमोपरमप्रभृतिर्गृह्यते। "निदिध्यासनादीनामि"त्यत्रादिशब्देन मननादिकं गृह्यते ॥

यज्ञादीनामप्रामाण्यात् कथमपरोक्षहेतुत्वम् ? इत्याशङ्क्य, उपयोगप्रकारमाह—*यज्ञादीति*॥ यज्ञादिना निर्बर्हितः कल्मषलक्षणः प्रतिबन्धो यस्मिन्, तत्तथोक्तम्। शमादिनिरुद्धौ विपरीतप्रवृत्तिदोषौ यत्र, तथोक्तम्। अनात्मविषयप्रवृत्तिः प्रवृत्तिशब्दार्थः। अनात्मनीव मुक्तावपि न प्रवृत्तिः ; असंभावनाप्रतिबन्धाद् इत्याशङ्क्याह—*मननेति*॥ मननेन संदर्शितः प्रमेयादिसंभावनालक्षणो यो गुणः, स एव प्रदीपः, इति मननसंदर्शितप्रमेयादिसंभावनागुणप्रदीपः, तेनोज्ज्वलितं प्रतिबन्धकनिवर्तकत्वेन प्रदीपसमम् अतिसूक्ष्मतरं यद् ब्रह्म, तदात्मविषयनिदिध्यासनम्, तस्य प्रचयेन परिनिर्मितस्तदेकाग्रवृत्तित्वलक्षणो गुणो यस्मिन्, तत्तथोक्तम्। "चित्तेन्द्रियमि"त्यत्रेन्द्रियशब्देन शब्दसहकारितया चित्तस्यापरोक्षप्रत्ययहेतुत्वं द्योत्यते। चित्तैकाग्र्यस्योपकारकत्वमन्वय-व्यतिरेकसिद्धमित्याह—*लोके चेति* ॥ टीकायां प्रतिबन्धनिवर्तने तर्कस्य सहकारित्वमवादि, अत्र तु चित्तस्य सहकारित्वमुच्यत, इति विरोध इत्याशङ्क्याह—*तर्कशब्देनेति* ॥ अत्र टीकायां तर्कशब्दस्य कथं चित्ते वृत्तिः ? इत्याशङ्क्य प्रतिबन्धनिवर्तनगुणयोगेनेत्याह—*सर्वेति* ॥ शक्तितात्पर्यावधारणहेतवस्तर्कास्तर्कशब्देन गृह्यन्ताम् ? तत्राह—*यौक्तिकेति* ॥ *प्रथमज्ञान इति* ॥

पञ्चपादिकाविवरणम्

प्रथमज्ञानेऽन्तर्भूतत्वात्। एवं च "तं त्वौपनिषदमि"ति तद्धितप्रत्ययेन ब्रह्मावगतिहेतुत्वं शब्दस्य दर्शितमुपपन्नं भवति; अपरोक्षावगतेरेव सम्यगवगतित्वादिति ॥

अन्यन्मतम्—न प्रथमोत्पन्नं शाब्दज्ञानमेव प्रतिबन्धविगमापेक्षयाऽपरोक्षावभासं भवति, किंतु शब्द एव प्रथमं ब्रह्मणि परोक्षज्ञानमुत्पाद्य पुनर्वर्गितचित्तदर्पणसहकारिकारणापेक्षया द्वितीयमपरोक्षज्ञानमुत्पादयति; शब्दादीनां तद्धितप्रत्ययादिनाऽपरोक्षज्ञाने विनियोगसामर्थ्यात्, यथा संप्रयोगोऽभिज्ञामुत्पाद्य पुनः पूर्वानुभवसंस्कारापेक्षया प्रत्यभिज्ञामुत्पादयति, तद्वत्। नच स्वयम्प्रकाशे ब्रह्मणि परोक्षज्ञानं विभ्रमः; स्वयम्प्रकाशेऽपि पुरुषान्तरसंवेदने परोक्षानुमानदर्शनादिति। सर्वथाऽप्यापारोक्ष्यस्य प्रयत्नान्तरलभ्यत्वाद् युक्तं पृथक्प्रतिपत्तिशब्दग्रहणमित्याह—*ततः प्राग्विद्योदितापीति* ॥

कैः पुनः सहकारिभिः शब्दप्रमाणादापरोक्ष्यं लभ्यत इति? तत्राह—*अवाप्तिप्रकारश्च वेदान्तेष्वेव निर्दिष्ट इति* ॥

ऋजुविवरणम्

चेति* ॥ *ननु*—तत्रापि ज्ञानहेतुत्वं प्रतीयते, न त्वपरोक्षज्ञानहेतुत्वमित्याशङ्क्याह—*अपरोक्षावगतेरेवेति* ॥ लोके तु विषयस्याजनकत्वाच्छब्दज्ञाने विषयस्यापरोक्षत्वाभावः। इहच तद्वैषम्यमिति परिहाराभिप्रायः ॥

"अन्यन्मतमि"ति मतान्तरप्रदर्शने कारणमिदम्—न शब्दस्यापरोक्षज्ञानजनकत्वं प्रथमत एव क्वापि दृष्टम्। यत्रापि 'त्वं दशमः'इत्यादौ दृश्यते, तत्रापि नात्यन्तमनधिगत एवार्थे ज्ञानम्। अतः प्रथममपरोक्षज्ञानासंभव इति मनसि निधाय, *ननु*—द्वितीयज्ञानेऽपि शब्दस्यैव हेतुत्वं कस्मादङ्गीक्रियते? इत्याशङ्क्याह—*शब्दादीनां तद्धितेति* ॥ आदिशब्देनेतरेषां विनियोजकप्रमाणपरिग्रहः। *ननु*—प्रथममपरोक्षज्ञानजननसामर्थ्याभावे पश्चादन्यसहितस्यापि कथं जनकत्वम्? इत्याशङ्क्याह—*यथा सम्प्रयोग इति* ॥ *ननु*—अपरोक्षवस्तुनि प्रथमं परोक्षज्ञानजनकत्वे प्रामाण्यमेव न स्यात्; अन्यथाज्ञापकत्वादित्याशङ्क्याह—*नच स्वयंप्रकाश इति* ॥ परमार्थतस्तु नायमपरितोषात् पक्षान्तरपरिग्रहः, किन्तु विषयव्याप्त्यर्थ एव। "सर्वथाऽपी"ति वदतैतदेव द्योतितम् ॥

"अतः प्राग्विद्ये"त्युपसंहारोऽसम्बन्धः; साध्यानुपसंहारात्, प्रतिपत्तिशब्दस्य वैयर्थ्येन चोद्ये कृते तत्र प्रतिपत्तिशब्दार्थं निरूप्य तदेवोपसंहर्तुं युक्तम्, न त्वनवाप्तेरुपसंहारो युक्तः; तस्य साधनत्वात्; नाप्यनवाप्तिरेव—"अतः" इत्यनेन हेतूपन्यासेन साध्यते; पूर्वमेवानवाप्तेः साधितत्वादित्याशङ्क्यावतारयति—*सर्वथाऽप्यापरोक्ष्यस्येति* ॥

तत्त्वदीपनम्

प्रथमज्ञानसाधनमित्यर्थः। शब्दस्यापरोक्षज्ञानसाधनत्वं लोकविरुद्धं कस्मात् कल्प्यते? इत्याशङ्क्याह—*एवं चेति* ॥ परोक्ष-प्रत्यक्षहेतुत्वेनापि तद्धितप्रत्ययो घटत इत्याशङ्क्याह—*अपरोक्षेति* ॥ अपरोक्षस्वभावे वस्तुनि परोक्षप्रत्ययस्य विभ्रमत्वाद् न तज्जनकत्वेन शब्दस्य प्रामाण्यम्, किं त्वपरोक्षहेतुत्वेनेत्यर्थः ॥

वेदान्तानां ब्रह्मण्यपरोक्षप्रमितिजनकत्वात् प्रतिबन्धविगमे तर्कापेक्षेत्युक्तम्; संप्रति शब्दस्य परोक्षज्ञानजननस्वाभाव्याद् वेदान्तानामपि तथात्वम्, सहकार्यपेक्षया चापरोक्षप्रमितिहेतुत्वमिति मतान्तरमुत्थापयति—*अन्यन्मतमिति* ॥ शब्दस्य परोक्षज्ञानजनकत्वादिति द्रष्टव्यम्। चित्तदर्पणस्यैव परोक्षज्ञानहेतुत्वात् किं शब्दादिना? इत्याशङ्क्याह—*शब्दादीनामिति* ॥ यज्ञादय आदिशब्दार्थः। "तद्धितप्रत्ययादिने"त्यत्रादिशब्देन "यज्ञेन दानेने"ति तृतीयाश्रुतिः संगृह्यते। सहकार्यपेक्षयाऽपि शब्दः कथं परोक्षज्ञानजननस्वाभाव्यं जह्यात्, तत्राह—*यथेति* ॥ अपरोक्षे परोक्षप्रत्ययजनकत्वेऽप्रामाण्यं स्यादित्याशङ्क्याह—*नचेति* ॥ परोक्षप्रत्ययजनकस्यापि सहकार्यपेक्षया परोक्षप्रमितिजनकत्वं युक्तमिति इतिशब्दार्थः। कः पक्ष आस्थेयः? इत्याशङ्क्योभयथाऽपि प्रतिपत्तिशब्दो न विरुध्यत इत्याह—*सर्वथेति* ॥ पूर्वपक्ष एव सिद्धान्त इति रहस्यम्। वाक्यादपरोक्षप्रत्ययोत्पत्तावुपायं पृच्छति—*कैः पुनरिति* ॥ शम-दमाद्यपेक्ष्यं लभ्यत इत्याह—*तत्राहेति* ॥

पञ्चपादिकाविवरणम्

ननु—मनन-निदिध्यासनयोः कथं श्रवणं प्रत्यङ्गतावगमः? यावता ब्रह्मण्येव शक्ति-तात्पर्यविशिष्टवेदान्त-शब्दावधारणात् श्रवणशब्दाभिधेयादात्मन्यवबुद्धे पश्चाद् मननमर्थसंभावनोपपत्तिपर्यालोचनाद्वारा जनिता ब्रह्मणि प्रत्ययावृत्तिरुत्पद्यते; ततश्च प्रमाण-युक्तिसंभावनाभ्यां परिनिश्चितेऽपि विषये, तदेकाकारं चित्तसमाधानं निदिध्यासनमुत्पद्यते; तदेवं निदिध्यासनस्वरूपोपकारितया श्रवण-मननयोस्तदङ्गभावेऽवगते न युज्यते श्रवणाङ्गता मनन-निदिध्यासनयोः—*इति*, *अत्रोच्यते*—यस्मिन्पक्षे शक्ति-तात्पर्यविशिष्टशब्दावधारणं प्रथमं ब्रह्मणि परोक्षज्ञानमुत्पाद्य मनन-निदिध्यासनसंस्कारविशिष्टान्तःकरणापेक्षयाऽपरोक्षज्ञानमुत्पादयति, तत्र ब्रह्मणि परोक्ष-ज्ञानस्य निदिध्यासनोपकारितया तदङ्गत्वेऽपि तात्पर्यविशिष्टशब्दावधारणादपरोक्षज्ञानोत्पत्तौ मनन-निदिध्यासने श्रवणस्य फलोपकार्यङ्गतामश्नुवाते। *ननु* अपरोक्षफलोदयेऽपि निदिध्यासनाङ्गतैव श्रवण-मननयोः किं न स्यात्? त्रयाणामपि सन्निपत्योपकाराविशेषात्, दर्श-पौर्णमासवत्समप्रधानता वा किं न स्यादिति? *उच्यते*—विशिष्टशब्दावधारणं प्रमेयावगमं प्रत्यव्यवधानेन कारणं भवति; प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात्। मनन-निदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवणतासंस्कारपरिनिष्पन्नतदेकाग्रवृत्तिकार्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते, इति फलं प्रत्यव्यवहितस्य करणस्य विशिष्टशब्दावधारणस्य व्यवहिते मनन-निदिध्यासने तदङ्गे अङ्गीक्रियेते। यदा तु पुनः शब्दादेव प्रथममपरोक्षानुभवफलं विज्ञानमुत्पन्नम्, भ्रान्ति-विक्षेपसंस्कारखचितान्तःकरणदोषादर्थोऽपि परोक्षानुभवफलतया विश्रान्त्याऽवतिष्ठते, तदा मनन-निदिध्यासने चित्तगतविक्षेपादि-दोषप्रतिबन्धनिरासेनापरोक्षफलप्रतिष्ठाहेतुतया प्रमाणस्य फलोपकार्यङ्गमिति न विरुध्यते। नच शब्दकरण-

ऋजुविवरणम्

निदिध्यासनस्याप्यापरोक्ष्यादन्तरङ्गत्वादित्यभिप्रायेणाह—*नन्वपरोक्षफलेति। त्रयाणामपीति*॥ अगृह्यमाणविशेषगत्वात् समप्राधान्यम्, आपरोक्ष्ये च सर्वेषां सामर्थ्यमविशिष्टमिति भावः। *ननु*—निदिध्यासनस्यैवापरोक्षज्ञानजनकत्व-दर्शनादत्रापि तदेवास्तु, किं श्रवणस्य साधनत्वकल्पनया? इत्याशङ्क्याह—*नच शब्दकरणमन्तरेणेति*। भवतु

तत्त्वदीपनम्

अपरोक्षज्ञानोत्पत्तौ श्रवणस्य प्राधान्यम्, इतरयोः सहकारित्वमुक्तम्, तदसहमानः शङ्कते—*ननु मननेति*॥ तत्र हेतुमाह—*यावतेति*॥ श्रवण-मननयोर्निदिध्यासनस्वरूपोपकारकत्वात् तस्याङ्गित्वम्, इतरयोस्त्वङ्गत्व-मित्यर्थः। *अर्थसंभावनेति*॥ संभावनाहेतवो या उपपत्तयस्तत्पर्यालोचनद्वारेणोत्पन्नेत्यर्थः। विकल्पासहत्वान्नायं पक्षः साधुरित्याह—*अत्रोच्यत इति*॥ शब्दः स्वतः परोक्षज्ञानजनक इति पक्षमाश्रित्य निदिध्यासनस्याङ्गित्वमुच्यते? उत शब्दस्यापरोक्षज्ञानजनकत्वप्रतिबन्धनिरासे च सहकार्यपेक्षेति? तत्राद्यमनूद्य दूषयति—*यस्मिन्पक्ष इत्यादिना*॥ अपरोक्षज्ञानोत्पत्तावपि निदिध्यासनस्याङ्गित्वं किं न स्यात्? इति शङ्कते—*नन्वपरोक्षेति*॥ श्रवणमननयोरङ्गत्वे प्रमाणाभावश्चेत्, तर्हि समप्राधान्यं स्यादित्याह—*त्रयाणामपीति*॥ श्रवण-मनन-निदिध्यासनानां परस्परं सन्निपत्यज्ञानजनकत्वे विशेषाभावात् समप्राधान्यमित्यर्थः। विशेषाभावोऽसिद्ध इत्याह—*उच्यत इति*॥ शक्तितात्पर्यवैशिष्ट्यं विशिष्टशब्दार्थः। करणत्वे हेतुमाह—*अव्यवधानेनेति*॥ तदुपपादयति—*प्रमाणस्येति*॥ मननादेस्तु वैपरीत्यमाह—*मननेति*॥ प्रत्यगात्मप्रवणतालक्षणो यः संस्कारः, तेन निष्पन्ना या ब्रह्मैकाग्र्यलक्षणा वृत्तिः, सैव कार्यम्, तद्द्वारेणेत्यर्थः। अव्यवधानफलमाह—*इति फलमिति*॥ कल्पान्तरे तु मननादेरङ्गत्वमेवेत्याह—*यदा त्विति*॥ भ्रान्तिरेव विक्षेपो भ्रान्तिविक्षेपः, तस्य संस्कारेण खचितं मिश्रितं यदन्तःकरणम्, तद्दोषादित्यर्थः॥

अन्वय-व्यतिरेकाभ्यां निदिध्यासनस्यैव परोक्षप्रमितिहेतुत्वं केचित् कल्पयाञ्चक्रुः, तद् दूषयति—*नचेति*॥

वार्तिकम्

स्यादेतत्—तथापि "आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते" इत्ययुक्तम्।

पञ्चपादिका

अतः प्राग् विद्योदिताऽपि वाक्यादनवाप्तेव भवति । अवाप्तिप्रकारश्च वेदान्तेष्वेव निर्दिष्टः साक्षादनुभवफलोद्देशेन । तेनोच्यते—*विद्याप्रतिपत्तये इति* ॥

ननु आत्मैकत्वविद्याप्रतिपत्तिर्नानर्थहेतुप्रहाणाय प्रभवति ; तथाहि—जीवस्य कार्यकारणसंघातादन्यत्वप्रतिपत्तेर्ब्रह्मस्वरूपताप्रतिपत्तिर्न विशिष्यते ; उभयत्राप्यहङ्कारग्रन्थेर्मनुष्याभिमानपर्यन्त-

पञ्चपादिकाविवरणम्

मन्तरेण निदिध्यासनादेवापरोक्षानुभवफलजन्म संभवति ; तस्य प्रामाण्यासिद्धेः । शब्दावगतब्रह्मात्मविषयत्वादपरोक्षस्य तद्द्वारेण प्रामाण्यनिश्चय इति चेत्, नैवम् ; उत्पन्नस्य हि विज्ञानस्य प्रमाणान्तराधीनविषयसद्भावनिश्चयाधीनप्रामाण्यकल्पनाद् वरं स्वस्यैव क्लृप्तप्रमाणजन्यत्वकल्पनम् ; अन्यथा परतःप्रामाण्यात्, इतरत्र स्वतःप्रामाण्यात् । तस्माद् युक्तं श्रवणस्य फलोपकार्यङ्गता मनन निदिध्यासनयोरिति ॥

ननु ब्रह्मापरोक्षज्ञानमपि नानर्थनिवृत्तिनिमित्तम् ; सत्यपि तस्मिन् संसारानुवृत्तिदर्शनात्, अन्यथा सद्य एव शरीरपातः स्यादिति चोदयति—*नन्वात्मैकत्वविद्याप्रतिपत्तिरिति*॥ *ननु* व्यतिरेकज्ञानात् तत्त्वज्ञानस्य विशेषो दर्शितः, *सत्यम्* ; फलतो न विशेष इत्याह—*तथाहि जीवस्येति* ॥ नैतद् युक्तम् ; तत्त्वापरोक्ष्यात्

ऋजुविवरणम्

संसारानुवृत्तिः, कथमेतावता ज्ञानानुवृत्तिर्निश्चेतुं शक्यते ? इत्याशङ्क्याह—*अन्यथेति*॥ कार्यदर्शनान्यथानुपपत्त्याऽनुवृत्तिर्निश्चेतुं शक्यत इत्यर्थः । "तथाही"ति विवरणमसङ्गतम् ; ब्रह्मज्ञानस्यानिवर्तकत्वमिति चोद्यं कृत्वा व्यतिरेकज्ञानेनाविशेषप्रदर्शनात्, इत्याशङ्क्यावतारयति—*ननु व्यतिरेकेति* अपसारिताविद्यादोषो येन ज्ञानेन, तदपसारिताविद्यादोषमिति कथमुक्तम् ? तस्यैवासंभवेन चोद्ये कृते तदेव कथमुत्तरम् ? साध्याविशिष्टत्वप्रसङ्गात्, इत्याशङ्क्याभिप्रायमाह—*नैतद्युक्तं तत्त्वापरोक्ष्यादिति* ॥ अविद्यादोषमिति क्रियाविशेषणं वा । "न हि जीवस्ये"त्यनेन ब्रह्मज्ञानस्यानवगमनिवर्तकत्वेन विनोत्पत्तिरेव न संभवतीति कथमुक्तम् ? व्यतिरेकज्ञानवदेवोत्पत्तिसंभवात्,

तत्त्वदीपनम्

नष्टपुत्रादिचिन्तनजनितापरोक्षप्रत्ययस्य भ्रान्तित्ववदेवास्यापि भ्रान्तित्वान्न प्रामाण्यं सिध्यतीत्याह—*तस्येति* ॥ दृष्टान्ते यथार्थत्वाभावादप्रामाण्यम्, अत्र तु तद्वैपरीत्यमित्याह—*शब्दावगतेति* ॥ शाब्दबोधप्रभूतनिदिध्यासनजनितत्वादपरोक्षप्रत्ययस्याऽप्रामाण्यमित्यर्थः—*तद्द्वारेणेति* ॥ शब्दद्वारेणेत्यर्थः । कल्पनालाघवादपरोक्षप्रत्ययस्य शब्दजत्वकल्पनमुचितमित्याह—*नैवमिति* ॥ प्रमाणान्तराधीनो योऽयं विषयसद्भावनिश्चयः, तदधीनं यत्प्रामाण्यं तत्कल्पनात् क्लृप्तप्रामाण्यशब्दजन्यत्वकल्पनं वरमित्यर्थः । विपक्षे दण्डमाह—अन्यथेति* ॥ अपरोक्षप्रत्ययेऽप्यहंकारग्रन्थेरविचलनुवर्तमानत्वान्नानर्थनिवर्तकत्वमित्युक्तम्, तत्र हेत्वसिद्धिमाशङ्क्याह—*ननु ब्रह्मेति* ॥ व्यतिरेकमुखेन तदेव द्रढयति—*अन्यथेति** ॥ सद्यः शरीरपाताभ्युपगमेऽपि जीवन्मुक्त्यादिप्रतिपादकशास्त्रपीडा स्यादित्यर्थः ॥

विमतम्, नानर्थनिवर्तकम्, ज्ञानत्वात् ; व्यतिरेकज्ञानवदित्युक्ते अद्वयानन्दाद्यनाकारत्वान्न व्यतिरेकज्ञानस्य निवर्तकत्वम्, अत्र तु तद्वैपरीत्यमिति विशेषं शङ्कते—*ननु व्यतिरेकेति* ॥ उक्ते विशेषसद्भावेऽपि ब्रह्मज्ञानस्य नानर्थनिवर्तकत्वम्, अनुभवविरोधादित्यभिप्रायेणाह—*सत्यमिति* ॥ व्यतिरेकिज्ञाने सत्यपि संसारानिवृत्तिर्घटते ; मूलाज्ञानस्यानिवर्तितत्वात्, ब्रह्मज्ञानेनाज्ञानस्य निवर्तितत्वात् संसारनिवृत्तिरिति वैषम्यमुक्तम्, तत्र प्रमाणाभावात् नैतद्वैषम्यमिति शङ्कामाह—*नैतद्युक्तमिति* । अन्वय-व्यतिरेकेति* ॥ अन्वय-व्यतिरेकाभ्यां शास्त्रेण च सिद्धत्वादिति विग्रहः । रज्जुतत्त्वसाक्षात्कारे समूलसर्पभ्रमनिवृत्तेः, अन्यथा चाभावात्, इत्यन्वय-व्यतिरेकानुरोधेन ब्रह्मतत्त्वसाक्षात्कारस्यापि समूलसफलसंसारनिवर्तकत्वं कल्प्यते । विमतम्, समूलकार्यनिवर्तकम्, अधिष्ठानतत्त्वसाक्षात्कारत्वात् ; रज्जुतत्त्वसाक्षात्कारवदिति । "तरत्यविद्यां विततान्" "भिद्यते हृदयग्रन्थिः" इत्यादिशास्त्रशब्दार्थ इति । अन्वय-व्यतिरेकलक्षणशास्त्रसिद्धत्वादिति वा विग्रहः । "यत्र हि द्वैतमिव भवति" "यत्र त्वस्य सर्वमात्मैवाभूदि"त्यादिवाक्यादुक्तार्थनिश्चय इत्यर्थः ॥

पञ्चपादिका

स्याविकलमनुवर्तमानत्वात्, *उच्यते*—भवतु तत्राविद्याया अनिवर्तितत्वात् तत्, इह पुनरपसारिताऽविद्यादोषं ब्रह्मात्मज्ञानमुदयमासादयत् कथं तन्निमित्तभोक्त्रादिग्रन्थिप्रवाहं नापनयति ? नहि जीवस्य ब्रह्मात्मावगमस्तद्विषयानवगममबाधमान उदेति ॥

ननु ब्रह्मज्ञानादग्रहणापाये तन्निमित्तस्याहङ्कारग्रन्थेस्तत्कालमेवाभावः प्रसज्जेत ? *न* ; संस्कारादप्यग्रहणानुवृत्तेः सम्भवात् ; भयानुवृत्तिवत् । तथाहि—सम्यग्ज्ञानान्निवृत्तमपि भयं स्वसंस्कारा-

पञ्चपादिकाविवरणम्

समूलाध्यासनिवृत्तेरन्वयव्यतिरेकशास्त्रसिद्धत्वादित्याह—*भवतु तत्राविद्याया इति* । *ननु* अध्यासविरोधिव्यतिरेकावगमात्तत्त्वावबोधोऽध्यासविरुद्धोऽपि तन्नापनयतीत्यनुमीयतामिति, नेत्याह—*नहि जीवस्येति* ॥ अनवबोधविरुद्धं तत्त्वज्ञानम्, न व्यतिरेकज्ञानमित्यर्थः । सशरीरेन्द्रियस्यैवापरोक्षावगमात् । तर्हि सद्य एव शरीरपातः स्यादिति चोदयति—*ननु ब्रह्मज्ञानादिति* ॥ तत्त्वज्ञानादविद्यानिरोधेऽपि पुनर्वृत्तिर्युज्यत इत्याह—*न संस्कारादिति* ॥ तदेव प्रपञ्चयति—*तथाहीति* ॥ *ननु* क्रिया-ज्ञानयोरेव संस्कारः सम्भवति, नाज्ञान-तत्कार्ययोः, *न* ; गन्धादिसंस्कारदर्शनात्, प्रलयावस्थायां सर्वकार्यसंस्कारोपगमात्, सर्वत्र

ऋजुविवरणम्

इत्याशङ्क्याभिप्रायमाह—*अनवबोधविरुद्धमिति* ॥ कथं व्यतिरेकज्ञानस्यानवबोधेन विरोधाभावः ? इत्याशङ्क्याह—*सशरीरेन्द्रियस्येति* ॥ क्रिया-ज्ञानव्यतिरिक्तस्यापि गन्धादेः पुष्पकरण्डकादिषु संस्कारो दृश्यत इति परिहरति—*न गन्धादीति* ॥ आदिशब्देन रसादिसंस्कारपरिग्रहः । ननु—गन्धाद्याश्रयस्यैव स्थित्या तत्प्रतिभासः ; न गन्धसंस्कारात्, अतो नानेन दृष्टान्तेन क्रियाज्ञानव्यतिरिक्तवस्तुसंस्कारसिद्धिरित्याशङ्क्य, अन्यदुदाहरति—*प्रलयावस्थायामिति* ॥ *ननु*—नाभ्युपगममात्रेण सर्वसंस्कारसिद्धिः ; अभ्युपगममात्रस्याप्रमाणत्वात्, अन्यस्य च संस्कारग्राहकप्रमाणस्यादर्शनात्, इत्याशङ्क्याह—*सर्वत्र विनाशमात्रेति* ॥ *ननु*—क्रियाज्ञानत्वमेव संस्कारा-

तत्त्वदीपनम्

व्यतिरेकज्ञानस्यानिवर्तकत्ववत् तत्त्वज्ञानस्यापि न तन्निवर्तकत्वमनुमीयत इति शङ्कते—*नन्वध्यासेति*॥ अध्यस्यत इत्यध्यासो ज्ञानम्, शास्त्रानुमानयोः परस्परविरोधेन संशयादपि पक्षासिद्धिरित्यभिप्रायः । दृष्टान्ते विरोधासंप्रतिपत्त्योत्तरयति—*नेत्याहेति* ॥ हिशब्दसूचितमर्थमाह—*अनवबोधेति* ॥ यद्विषयमज्ञानं तत् तत्त्वज्ञानेन निवर्त्यते, अद्वैतानन्दात्मविषयं चाज्ञानम्, इति तज्ज्ञानान्निवर्त्यते, न व्यतिरेकज्ञानेनेत्यर्थः ॥

ब्रह्मज्ञानेनाज्ञाननिवृत्तावहंकारस्याप्यभावप्रसङ्ग इत्युक्तं टीकायाम्, तत्रेष्टापत्तिमाशङ्क्य तात्पर्यमाह—*सशरीरेति* ॥ शरीरस्याप्यज्ञानविलासत्वादहंकारग्रन्थिवत्सद्य एव विलयः स्यादित्यर्थः । सोऽपीष्ट एवेति शङ्कां निरस्यति—*सशरीरेति* ॥ शरीरादियुक्तस्य ब्रह्माऽऽपरोक्ष्यमनुभूयते, तद्विरुद्धं सद्यस्तद्विलयाभिधानमित्यर्थः । अग्रहणानुवृत्तौ तत्त्वज्ञानवैयर्थ्यमिति शङ्कां निरस्यति—*तत्त्वज्ञानादिति* ॥ ज्ञानाज्ञानयोर्निवर्त्य-निवर्तकभावसिद्धेरित्यर्थः । न चानुभवविरोधोऽपीत्याह—*अपि पुनरिति* ॥ भ्रमणसंस्कारात्तदनुवृत्तिवदनुवृत्तिर्युक्तेत्यर्थः ॥

अज्ञानजनितविपरीतज्ञानाद् भयानुवृत्तिः, न संस्कारात्, ततश्च दृष्टान्तोऽसंप्रतिपन्न इत्याशङ्क्य, सम्यगपरोक्षप्रत्ययेऽज्ञानस्थित्यसंभवात् संस्कारानुवृत्तिर्युक्तेत्याह—*तदेवेति* ॥ संस्कारस्यैवासंभवात् कथं ततः संसारानुवृत्तिः ? इति शङ्कते—*ननु क्रियेति*॥ भ्रमणादिः क्रियाशब्दार्थः । वेग-स्थितिस्थापकयोः क्रियासंस्कारत्वम्, भावनाया ज्ञानसंस्कारत्वमिति विभागः । क्रिया-ज्ञानयोरेव संस्कारजनकत्वमित्ययुक्तम् ; अन्यस्यापि संस्कारहेतुत्वदर्शनादिति सिद्धान्तयति—*न गन्धादीति* ॥ अपनीतपुष्पायां पुटिकायां पुष्पाभावे स्वरूपतो गन्धानुवृत्त्यसंभवात् संस्कारादनुवृत्तिर्वक्तव्येत्यर्थः । रस आदिशब्दार्थः । गन्धाद्याश्रयत्वेन प्रसूनत्रसरेण्वादीनां स्थितिमाशङ्क्याह—*प्रलयेति* ॥ तत्र संस्काराभावे पुनस्तथाभूतकार्यानुपपत्तेः संस्कारः समस्तीत्यर्थः ॥

पञ्चपादिकाविवरणम्

विनाशमात्रप्रयुक्तसंस्कारजन्मानुमानात्, अविद्या-तत्कार्यस्य भ्रान्तिज्ञानात्मकत्वात्, अज्ञानादौ च साक्षि-चैतन्यावच्छेदकज्ञानाभासोपगमात्संस्कारसिद्धेः। *ननु* संस्कारात् स्मृतिमात्रहेतोः कथमपरोक्षद्वैतावभासः स्यात्? अविद्यावत्संस्कारस्यापि चैतन्यदोषत्वादिति वदामः। अपरोक्षावभासकारणगतो दोषोऽपरोक्षभ्रम-हेतुरिति सिद्धत्वात्, आत्ममात्रस्यैवाविद्याश्रयत्ववत् संस्काराश्रयत्वोपपत्तेश्च, अविद्यासंस्कारव्यतिरिक्तकार्या-णामेवाविद्योपादानत्वात्, आत्मनो मिथ्याभूतसंस्कारोपादानत्वाभावेऽप्याश्रयोपाधित्ववदविरोधात्। तत्त्व-

ऋजुविवरणम्

नुमापकं भवितुं शक्नोति; तस्यैव स्मरणादिलक्षणकार्यसामर्थ्यात् संस्कारजनकत्वावगमात्, कार्यमात्रप्रयुक्त्या संस्कारानुमाने सोपाधिकत्वप्रसङ्गादित्याशङ्क्याह—*अविद्या-तत्कार्यस्येति* ॥ अथवा—अतीतकल्पसादृश्यादुत्तर-कल्पस्य यादृच्छिकत्वं स्यादित्यनेन द्वितीयसूत्रे वक्ष्यमाणन्यायेन कार्यस्य संस्कारजनकत्वम्, तेनैव न्यायेन सर्वत्रानुमान-मात्रम्, उत्तरग्रन्थे तु तन्मतेन ज्ञान-क्रिययोरेव संस्कारजनकत्वं सिद्धवत्कृत्य ज्ञानत्वमपि संवादयितुं शक्यत इत्याह—*अविद्या-तत्कार्यस्येति* ॥ ननु—सिद्धे भ्रान्तिज्ञानात्मकत्वे तत्संस्कारसिद्धिः, तदेव कथम्? इत्याशङ्क्याह —*अज्ञानादौ चेति* ॥ भवतु चैतन्यदोषत्वम्, तथाऽपि कथमपरोक्षभ्रमहेतुत्वम्? इत्याशङ्क्याह—*अपरोक्षावभास-कारणेति* ॥ *ननु*—संस्कारो निराश्रयो भवितुं नार्हति, नचात्ममात्रस्य शुद्धस्य तदाश्रयत्वमुपपद्यते; अतः संस्काराश्रयत्वेन ज्ञानमपि तिष्ठेदित्याशङ्क्याह—*आत्ममात्रस्यैवेति* ॥ *ननु*—सर्वस्य कार्यस्य सोपादानत्वाद-ज्ञानस्यैव सर्वकार्योपादानत्वनियमादज्ञानाभावे संस्कारायोगः, अज्ञानस्थितौ तु सुतरां तत्संस्कारायोगः, इत्याशङ्क्याह —*अविद्या-संस्कारव्यतिरिक्तेति* ॥ *ननु*—आत्मन उपादानत्वे सत्याश्रयत्वमहंकारादौ दृष्टम्, तदभावे कथमात्मा-श्रयत्वम्? नचात्मनः केवलस्योपादानत्वम्; मिथ्याभूतत्वात्संस्कारस्येति, तत्राह—*आत्मनो मिथ्याभूतेति* ॥

तत्त्वदीपनम्

प्रलयानङ्गीकारवादिनं प्रत्याह—*सर्वत्रेति*॥ विमतम्, संस्काराधायकम्, विनश्यमानक्रियत्वात्, इत्यनुमानाद-ज्ञानादेरपि संस्कारसंभव इत्यर्थः। क्रिया-ज्ञानयोरेव संस्कार इति नियमोररीकरणेऽपि न दोष इत्याह—*अवि-द्येति* ॥ अविद्या-तत्कार्यदेहादेर्ज्ञानविषयत्वं न ज्ञानत्वम्, ज्ञानं च साक्षिचैतन्यम्, तच्च नित्यसिद्धम्, इति कथं संस्कारः? इत्याशङ्क्याह—*अज्ञानादाविति* ॥ अज्ञानं स्वाकारेणान्तःकरणाकारेण च परिणमते। तस्मिंश्च परिणामे चित्प्रतिबिम्बो भवति। ततश्च परिणामनाशात् संस्कार उत्पद्यत इत्यर्थः। चित्प्रतिबिम्बहेतुरज्ञानपरिणामो ज्ञानाभासशब्दार्थः। अपरोक्षप्रतीत्या संस्कारातिरिक्तकारणं वक्तव्यमिति शङ्कते—*ननु संस्कारादिति* ॥ संस्का-रमात्रस्यापरोक्षप्रतीतिजनकताऽदर्शनादित्यर्थः। संस्कारस्य दोषत्वादपरोक्षप्रतीतिहेतुत्वमविरुद्धमित्याह—*अविद्या-वदिति* ॥ दोषत्वमात्रेण कथमपरोक्षप्रतीतिहेतुत्वम्? इत्याशङ्क्याह—*अपरोक्षेति* ॥ अपरोक्षावभासकारणनयन-दोषस्यापरोक्षज्ञानहेतुत्वं प्रसिद्धम्। तथाच चैतन्यस्याप्यपरोक्षप्रतीतिहेतुत्वात् तद्गतसंस्कारस्याप्यपरोक्षप्रतीतिहेतुत्व-मविरुद्धमित्यर्थः ॥ संस्कारः किं निराश्रयः? उत साश्रयः? नाद्यः; निराश्रयसंस्कारादर्शनात्, द्वितीयेऽपि किम्—अना-त्माश्रयः? उतात्माश्रयः? नाद्यः; तस्य निवृत्तत्वात्; न द्वितीयः; असङ्गत्वव्याघातादित्याशङ्क्याह— *आत्ममात्रस्येति* ॥ अविद्याश्रयत्वे यथाऽऽत्मासङ्गत्वं व्याहन्यते, तद्वदत्रापीत्यर्थः। संस्कारः किं निरुपादानः? उत सोपादानः? नाद्यः; भावकार्यस्य सोपादानत्वनियमात्; द्वितीये उपादानान्तराऽसंभवादविद्याया उपा-दानत्वं वक्तव्यम्, न च तद् युज्यते; संस्कारसमयेऽविद्याऽभावात्, भावसंस्कारस्यैवासंभवादित्याह—*अविद्येति* ॥ सकलमूलोपादानसंस्कारस्य सोपादानत्वासंभवात् तदतिरिक्तभावकार्य एवेयं व्याप्तिरित्यर्थः। आत्मा, न संस्काराश्रयः, अनुपादानत्वात्, यद् यस्यानुपादानम्, न तत् तस्याश्रयः; यथा घटानुपादानं तन्तुरित्याशङ्क्याह—*आत्मन इति* ॥ अविद्यानुपादानत्वेऽपि यथाऽऽत्मनस्तदाश्रयत्वम्, तद्वत् संस्काराश्रयत्वमित्यर्थः। सामान्यनित्यगुणादौ व्यभिचार इति द्रष्टव्यम् ॥

पञ्चपादिका

दनुवर्तते, कम्पादिनिमित्तं च भवति। तथा ग्रहणमपि स्वसंस्कारादनुवर्ततेऽहङ्कारश्चेश्च निमित्तं भवतीति न किञ्चिदनुपपन्नमस्ति॥

ननु न सर्वे वेदान्ता विद्यार्थमेवारभ्यन्ते, तदेकदेशः क्रममुक्तिफलायैश्वर्यायाभ्युदयार्थकर्मसमृद्धये चोपासनानि विविधान्युपदिशन्नुपलभ्यते। *सत्यम्* ; उपासनाकर्म तु ब्रह्म, तच्चापाकृता-

पञ्चपादिकाविवरणम्

ज्ञानानुसन्धानादेव च क्रमेण संस्कारनिवृत्तेः कंचित्कालमवस्थायैव विदेहमुक्तिर्न विरुध्यते। अविद्यालेशो वा तमोलेशवत् संस्कारशब्देनाभिधीयत इति निरवद्यम्॥

ननु न सर्वे वेदान्ता इति स्पष्टार्थः॥ तत्र निर्विशेषब्रह्मप्रतिपत्त्यर्थेषु वेदान्तेषु सगुणब्रह्मोपासनानां तावत् प्रासङ्गिकत्वं दर्शयति—*सत्यमुपासनाकर्म त्विति*॥ *ननु* निर्विशेषं चेद् ब्रह्म प्रतिपाद्यम्, तस्य कथं सगुणोपासनालम्बनं सप्रपञ्चं ब्रह्माङ्गभूतं स्यात्? येनाश्रित्य विधानमुच्यत इति, अध्यारोपापवादन्यायमभिप्रेत्याह—*तच्चापाकृताशेषप्रपञ्चमिति*॥ निराक्रियमाणे प्रपञ्चे कथमुपासनाविधानं निराकरण-

ऋजुविवरणम्

संस्कारस्य निवर्तकाभावान्निर्हेतुकविनाशाभावाद् न विनाशः, तथाच सति मुक्तिरेव न स्यादित्याशङ्क्याह—*तत्त्वज्ञानानुसन्धानादेवेति*॥ *ननु*—संस्कारस्यावारकत्वं न संभवति ; भ्रमसंस्कारे सत्यपि तत्त्वज्ञानदर्शनात्, तथाऽस्मिन् पक्षे कार्यस्य सोपादानत्वनियमभङ्गोऽपि स्यात्, अतो न संस्काराद्ग्रहणानुवृत्तिरित्याशङ्क्य पक्षान्तरमाह—*अविद्यालेशो वेति*॥ "सत्यमि"त्यादिनाऽन्यार्थप्रपञ्चमाश्रित्योपासनाविधानात् सर्वेषां तादर्थ्यं न विरुध्यत इत्युक्तम्, तदसंबद्धम् ; नह्याश्रित्य विधानमात्रेण तादर्थ्यमित्याशङ्क्याभिप्रायमाह—*तत्र निर्विशेषब्रह्मेति*॥ "प्रासङ्गिकत्वमि"त्यनेनैतदुक्तम्—प्राधान्येन प्रवृत्तिर्वेदान्तानां ब्रह्मात्मैक्यपरेति। *ननु निर्विशेषं चेदिति*॥ *अयमर्थः*—निर्विशेषब्रह्मणो न सगुणं ब्रह्माङ्गम्। अङ्गाश्रितश्च सर्वत्राश्रित्य विधिरिति। *अध्यारोपापवादेति*॥ अध्यारोप्यापवादः

तत्त्वदीपनम्

संस्कारस्य किं तत्त्वज्ञानं निवर्तकम्? उताऽन्यत्? नाद्य ; तेन सह स्थितत्वात्, न द्वितीयः ; तददर्शनात्, ततश्च मुक्त्यसंभव इत्याशङ्क्याह—*तत्त्वज्ञानेति*॥ तत्त्वज्ञानसंस्कारस्येतरसंस्कारनिवर्तकत्वान्न किंचिदवद्यमित्यर्थः। संस्कारानुवृत्तिसमर्थने भावकार्यं सोपादानमिति प्रसिद्धिविरोध इत्याशङ्क्य पक्षान्तरं कक्षीकरोति—*अविद्यालेश इति*॥ प्रारब्धकार्यसंपादनपटीयानविद्याया अवस्थाविशेषो लेशशब्दस्यार्थः। नच तत्र प्रमाणाभावः ; जीवन्मुक्त्यादिशास्त्रस्य प्रमाणत्वादित्यर्थः॥

ऐश्वर्यादिफलकोपासनविधाव्युपनिषत्पदकदम्बकसंदर्शनात् सर्वासामुपनिषदामात्मैकत्वविद्याप्रतिपत्त्यर्थत्वमुक्तमयुक्तमित्याशङ्क्योक्तमर्थमङ्गीचक्रे "सत्यमि"ति, तदसंगतम्, तस्मिन् पक्ष आत्मविद्याप्रतिपत्त्यर्थत्वव्याघातादित्याशङ्क्याह—*तत्र निर्विशेषेति*॥ ब्रह्माब्रह्मोपासनानां मध्ये निर्विशेषब्रह्मणि चेतसोऽवतरणासंभवात्तत्र प्रपञ्चसंबन्ध आरोपितः, ततस्तत्प्रतिपत्त्यर्थत्वं सगुणवाक्यानामुचितमित्यर्थः। कथं तर्ह्युपास्तिविषयत्वम्? इत्याशङ्क्याह—*सगुणेति*॥ प्रासङ्गिकत्वमिति*॥ निर्विशेषब्रह्मप्रतिपादनप्रसङ्गादापातत्वमित्यर्थः। *सत्यमित्यादेरयमर्थः—

वेदान्तेषूपासनोपदेशमङ्गीकरोति—*सत्यमिति*॥ तर्हि भाष्यविरोध इति, नेत्याह—*उपासनेति*॥ निर्विशेषप्रतिपत्त्यङ्गसविशेषब्रह्माश्रयणेनोपासनविधानाश्रयणेन गोदोहनादिविधानवदिति तत्र दृष्टान्तो विषम इति शङ्कते—*ननु निर्विशेषमिति*॥ निर्विशेष-सविशेषयोर्विरोधादङ्गाङ्गिभावानुपपत्तेर्नाश्रित्य विधानमित्यर्थः। *येनेति*॥ सप्रपञ्चस्याप्यङ्गत्वहेतुना तदाश्रयणेनोपासनाविधानं युज्यत इत्यर्थः। कल्पिताकल्पितरूपत्वात् तयोरङ्गाङ्गिता युक्तेत्याशयेनाह—*अध्यारोपेति*॥ अपवादस्यारोपापेक्षत्वादारोपस्य निर्विशेषप्रतिपादकत्वं युज्यते, यथा

पञ्चपादिका

शेषप्रपञ्चं जीवस्य निजं रूपमिति निरूपयितुमखिलप्रपञ्चजन्मादिहेतुतया प्रथमं सर्वात्मकं सर्वज्ञं सर्वशक्ति च ब्रह्म लक्षितम्। अस्यां चावस्थायामनपाकृत्यैव ब्रह्मणि प्रपञ्चं तेन तेन प्रपञ्चेनोपधीयमानं

पञ्चपादिकाविवरणम्

प्रत्ययविरोधादिति? तत्राह—*अस्यां चावस्थायामिति* ॥ *ननु* आश्रित्य विधाने गोदोहनवदधिकृताधिकारताऽपि स्यादिति मुमुक्षोरेवोपासनास्वप्यधिकारः स्यादिति—*उच्यते*;—अपां प्रणयनस्य प्रकृततयोद्देश्यत्वाद् न गोदोहनविधिनाऽनुष्ठेयतया सिद्धिः; अतः प्राप्तोद्देशनत्वात् प्रणयनस्य, स्वतन्त्रपशुकामिनोऽप्राप्तत्वात्, प्राप्तप्रणयनस्य दर्श-पूर्णमासाधिकारिण एव पशुकामस्य गोदोहनेऽप्यधिकारो दर्शितः। सप्रपञ्चब्रह्मप्रतिपत्तिश्चाश्रीयमाणा मुमुक्षोरमुमुक्षोश्च शब्दादविशेषेण प्राप्नोति। तदाश्रित्य विधानं मुमुक्षूणामप्युपपद्यते, इति न मुमुक्ष्वधिकारकल्पना, किन्त्वाश्रित्य विधानमात्रमिति निरवद्यम्। अतो महातात्पर्यप्रक्रमो ब्रह्मपर इत्युपसंहरति—*तस्मात्तदर्थोपजीवित्वादिति* ॥

ऋजुविवरणम्

क्रियते, अपवादस्याध्यारोपसापेक्षत्वात्, अपवादार्थं प्राप्तप्रपञ्चाश्रितत्वादुपासनाविधेराश्रित्य विधानोक्तिः, नत्वङ्गाश्रयाभिप्रायेणेति। *आश्रित्य विधानेति* ॥ अन्यार्थप्राप्तप्रपञ्चमाश्रित्येत्यर्थः। *गोदोहनवदिति* ॥ "गोदोहनेन पशुकामस्य प्रणयेदि"त्यत्र दर्श-पूर्णमासार्थं प्रणयनमाश्रित्य पशुकामिनो गोदोहनविधानाद् दर्श-पूर्णमासाधिकारिण एव गोदोहनाधिकारः, इति मुमुक्षोः प्राप्तप्रपञ्चाश्रयत्वादुपासनस्य मुमुक्षोरेवोपासनास्वधिकार इति। "तस्मात्तदर्थोपजीवित्वादि"त्युपसंहारोऽसम्बद्धः; सर्वविद्याप्रयोजनं येषां ते, तदर्थाः; तानुपजीव्य प्रवर्तन्त इति तदर्थोपजीविनः। यद्वा—तेषामर्थः, तदर्थः; तदर्थमुपजीव्य वर्तनात् तदुपजीवित्वम्। नहि तदर्थोपजीवित्वमात्रेण तादर्थ्यं भवति; अतः प्रासङ्गिकत्वेऽपि स्वार्थपरत्वसंभवात् कथं सर्वेषां तादर्थ्यम् इत्याशङ्क्याभिप्रायमाह—*अतो महातात्पर्येति* ॥ "सत्यं तान्यपी"त्यनेन क्रममुक्तिप्रदर्शनं व्यधिकरणम्; विद्यार्थत्वाभावेन चोद्ये कृते क्रममुक्त्यर्थत्वप्रदर्शनात्। किंचान्यान्यपि

तत्त्वदीपनम्

'तद्रजतमभादि'त्यत्रारोपितरजतस्य शुक्तिप्रमितिहेतुत्वम्, तद्वदित्यर्थः। "नेति नेत्या"दिवाक्येनारोपितस्य निरस्यमानत्वान्न तद्विषयमुपासनमिति शङ्कते—*निराक्रियमाण इति* ॥ तत्त्वज्ञानात् प्रागवस्थायामुपास्तिविधानं घटत इत्याह—*तत्राहेति* ॥ *अस्यामिति* ॥ आरोपावस्थायामित्यर्थः।

आश्रितविधानमाक्षिपति—*नन्वाश्रित्येति* ॥ दर्श-पूर्णमासाङ्गत्वेन प्राप्ताप्प्रणयनमाश्रित्य तदधिकारिण एवं पशुकामनायां चमसपरित्यागेन गोदोहनविधानं दृष्टम्, तद्वद्विद्यार्थत्वेन प्राप्तप्रपञ्चाश्रयणेनोपासनविध्यङ्गीकरणे मुमुक्षोरेवोपासनास्वधिकारः स्यात्, नच स उपपद्यते; तस्यैहिकामुष्मिकभोगनिर्विण्णत्वादित्यर्थः। दृष्टान्तो विषम इत्याह—*उच्यत इति* ॥ *एतदुक्तं भवति*—"प्रणयेदिति यत् तद् गोदोहनेने"ति प्राप्तप्रणयनोद्देशेन गोदोहनं विधीयते; अन्यथोभयत्र तात्पर्यापातात्। प्रणयनस्य च दर्श-पूर्णमासाधिकारिसंबन्धित्वेन प्राप्तत्वात्स्वतन्त्रपशुकामिनोऽप्राप्तत्वाच्च तस्यैव गोदोहनाधिकारः। नच तथा सप्रपञ्चं ब्रह्म मुमुक्षोरेव प्राप्तम्, इति सर्वेषां फलकामिनामुपासनास्वप्यधिकार इति। *प्राप्तोद्देशनत्वादिति* ॥ प्राप्तमुद्देशनं यस्य तथोक्तम्, तस्य भावस्तत्त्वम्, तस्मादित्यर्थः ॥

सर्वशब्दार्थमुपसंहरति—*अत इति* ॥ निष्प्रपञ्चब्रह्मप्रतिपत्त्यर्थं यदिदं सप्रपञ्चम् तदुपजीवित्वादुपासनाभागस्येत्यक्षरार्थः। निर्विशेषब्रह्माङ्गसप्रपञ्चाश्रयणेनोपासनं विदधतां वाक्यानामात्मविद्यार्थत्वेऽप्यब्रह्मोपासनानामतदर्थत्वात् सर्वशब्दविरोधस्तदवस्थः, इत्याशङ्क्य, तेषामपि क्रममुक्तिफलत्वमभिदधौ, तदसंभवि, तथात्वेऽपि विद्यार्थ-

भामती

एतदुक्तं भवति—अस्मत्प्रत्ययस्यात्मविषयस्य समीचीनत्वे सति ब्रह्मणो ज्ञातत्वान्निष्प्रयोजनत्वाच्च न जिज्ञासा स्यात्, तदभावे च न ब्रह्मज्ञानाय वेदान्ताः पठेयरन्, अपित्वविवक्षितार्था जपमात्र

ऋजुप्रकाशिका

तदेकत्वविद्याम्, आनन्दरूपब्रह्मैकत्वविद्यामिति यावत्। *ननु* बृहत्त्वाद् बृंहणत्वाच्चात्मैव ब्रह्म, तस्य वस्तुतो देहेन्द्रिय-मनो-बुद्ध्यादिविषयेभ्यो भिन्नस्यास्मत्प्रत्ययविषयत्वेन सन्देहाभावात् प्रयोजनाभावाच्च न जिज्ञास्यं ब्रह्म ; अतो न ब्रह्मज्ञानाय वेदान्ता आरभ्याः, किंत्वविवक्षितार्थास्ते जपमात्रोपयोगिनः, इति निरुद्धगतिकस्य पुनराशङ्कायामाह—*एतदुक्तं भवतीत्यादिना* ॥ *समीचीनत्वे सति = प्रमाणत्वे सति। *तदभावे =

पञ्चपादिकाविवरणम्

ननु अब्रह्मोपासनान्यपीत्यादेरयमर्थः*—साक्षाद्वा परम्परया वाऽन्तःकरणशुद्धिद्वारेण वा ब्रह्मात्मैकत्वावगतिपराः सर्वे वेदान्ता इति। वेदान्तविषय-प्रयोजनयोरेव विचारशास्त्रस्यापि विषय-प्रयोजनत्वम्, इति कथ-

ऋजुविवरणम्

"चक्षुष्यः श्रुतो भवती"त्यादिदृष्टफलान्युपासनानि दृश्यन्ते ; अतो न फलेनापि ज्ञान उपयोग इत्याशङ्क्याभिप्रायमाह—*साक्षाद्वा परम्परयेति* ॥ "यथाचायमर्थः" इत्यनेन भाष्येण ब्रह्मात्मैकत्वप्रतिपादकत्वं "दर्शयिष्यामः" इत्युक्तम्, तदप्रयोजनम् ; वेदान्तारम्भस्य प्रतिज्ञातत्वात्, तस्मिन् कृते तत्प्रदर्शनस्यापि सिद्धत्वात् किमर्थं पृथक्

तत्त्वदीपनम्

त्वाभावाद् "विद्याप्रतिपत्तये" इत्यस्यायोगादित्याशङ्क्य तात्पर्यमाह—*नन्वब्रह्मेति* ॥ *"इत्यादेरि"त्यस्यायमर्थः नन्वब्रह्मेत्यादिपूर्वपक्ष इतिशब्दोक्त आदिर्यस्य सिद्धान्तग्रन्थस्य, स इत्यादिस्तस्येत्यर्थः। "परम्परये"त्युक्तं विवृणोति—*अन्तःकरणेति* ॥ सर्वेषां वेदान्तानां विद्यार्थत्वे निर्दिष्टे तात्पर्यालोचनया तस्यार्थस्य सिद्धेः—"यथा चे"ति भाष्यस्य वैयर्थ्यमाशङ्क्याह—*वेदान्तेति* ॥ वेदान्तानां विषयप्रयोजनादिमत्त्वेऽपि विचारशास्त्रस्य तद्विधुरत्वादनारभ्यत्वमिति शङ्कायां वेदान्तव्याख्यानरूपत्वात् तदीयविषयादिकमेवास्यापीति प्रदर्शनं भाष्यार्थ इत्यर्थः। वेदान्तैरेव विषयादि-

वार्तिकम्

नहि सर्वेषां वेदान्तानामात्मैकत्वमेव विषयः ; यावताऽभ्युदयफलकप्राणाद्युपासनादेरपि तत्र दर्शनादित्याशङ्क्याह—"*यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्याम

प्रदीपः

यदि मनःप्रमाणकः ? तदाऽपि तेनात्मस्वरूपमात्रविषयकत्वेन निर्विकल्पकसाक्षात्कारानुदयः। निर्विकल्पकं समानजातीयेषु प्रथमपिण्डग्रहणम्। नचात्मबहुत्वमद्वैतिनो मन्यन्ते, इति कथमात्मविषयकनिर्विकल्पकसाक्षात्कारः ? कथं वा च तस्य निर्विशेषात्ममात्रविषयकत्वम् ? यतो निर्विकल्पोऽपि सविशेषविषय एवेति शङ्कानिरासार्थमाह—*सर्वे वेदान्ता इति* ॥ *अयं भावः*—वेदान्तवाक्यम्, न निर्विकल्पकसाक्षात्काराजनकम् वाक्यानि हि तात्पर्यानुसारेण बोधयन्ति। तद्यदि स्वरूपमात्रे तात्पर्यं वाक्यस्य, तर्हि संसर्गानवगाहिस्वरूपमात्रबोधजनकत्वं न विरुद्धम्। *एतेन*—मनःप्रमाणकोऽप्यात्ममात्रसाक्षात्कारो निर्विकल्पकरूपोऽत्र न विरुद्ध इति—*सूचितम्* ; समानजातीयेषु प्रथमं पिण्डग्रहणं निर्विकल्पकमिति प्रक्रिया तु नास्माभिरूरीक्रियते। यतः सर्वं घटादिज्ञानं 'सन् घटः' इत्यधिष्ठानानुवेधेन सत्ताविशिष्टतयैव जायमानं सविकल्पकमेव भवति, यदि प्रथमं यदि वाऽनन्तरम्। अस्तु वा तादृशं निर्विकल्पस्वरूपम्, एवमपि तत्सविशेषविषयमेवेति न नियमः संभवति, किन्तूत्सर्ग एव स्यात्। निर्विशेषस्वरूपमात्रबोधेच्छया जायमानं तादृशस्वरूपमात्रविषयकमपि ज्ञानं संभवत्येव। वस्तुस्वभावानुसारि खलु प्रमाणज्ञानम्। तद्यदि शास्त्रतो निर्विशेषं वस्तु बोध्यते, तर्हि कथं वा तद्बोधासंभवः ? तथाच वेदान्तवाक्यमहिम्नाऽऽत्ममात्रविषयकसाक्षात्कारसंभवात् तत्सिद्धये वेदान्ता आरभ्यन्त इति भावः ॥ "वेदान्ता आरभ्यन्ते"-इत्यनेन वेदान्तसम्बन्धिविचारशास्त्रमेव लक्ष्यत इति न दोषः। *ननु*—वेदान्तारम्भोऽयमात्मतत्त्वावबोधनार्थतयाऽनपेक्षितः ;

भामती

उपयुज्येरन् । नहि तदौपनिषदात्मप्रत्ययः प्रमाणतामश्नुते । नचासावप्रमाणमभ्यस्तोऽपि वास्तवं कर्तृत्व-भोक्तृत्वाद्यात्मनोऽपनेतुमर्हति । आरोपितं हि रूपं तत्त्वज्ञानेनापोद्यते, नतु वास्तवमतत्त्वज्ञानेन । नहि रज्ज्वा रज्जुत्वं सहस्रमपि सर्पधाराप्रत्यया अपवदितुं समुत्सहन्ते । मिथ्याज्ञानप्रसञ्जितं च रूपं शक्यं तत्त्वज्ञानेनापवदितुम्, मिथ्याज्ञानसंस्कारश्च सुदृढोऽपि तत्त्वज्ञानसंस्कारेणादर-नैरन्तर्य-दीर्घकाल-तत्त्वज्ञानाभ्यासजन्मनेति । स्यादेतत्—प्राणाद्युपासना अपि वेदान्तेषु बहुलमुपलभ्यन्ते, तत्कथं सर्वेषां

ऋजुप्रकाशिका

ब्रह्मणो जिज्ञासाऽभावे । नचास्मत्प्रत्ययः प्रमाणमित्याह—*नहीति* ॥ औपनिषदश्चासावात्मा च, स तथोक्तः, तस्य प्रत्ययः, स चासावौपनिषदात्मप्रत्ययश्च ; स इत्यर्थः । निर्धर्मक आत्मनि ब्रह्मणि ब्रह्मस्वरूपे 'अहं कर्ता' 'अहं भोक्ते'ति कर्तृत्व-भोक्तृत्वादिधर्मोल्लेख्यस्मत्प्रत्ययो न समीचीनः, न प्रमाणमिति भावः । *ननु* अप्रमाणत्वेऽप्यस्मत्प्रत्ययश्चिराभ्यस्तः कर्तृत्व-भोक्तृत्वादिबन्धनिवर्तनाक्षमः, अतस्तन्निवर्तकब्रह्मज्ञानाय वेदान्तारम्भ इति—चेत्, *तत्र वक्तव्यम्*—किं कर्तृत्व-भोक्तृत्वादि वास्तवम् ? अवास्तवं वा ? आद्येऽप्रमाणस्यास्मत्प्रत्ययस्य न तन्निवर्तकतेत्याह—*नचासाविति* ॥ *असौ = अस्मत्प्रत्ययः । द्वितीयं दूषयन्नेवाद्यपक्ष उक्तं दूषणं द्रढयति—*आरोपितं हि रूपं तत्त्वज्ञानेनापोद्यते, नतु वास्तवमतत्त्वज्ञानेनेति* ॥ *आरोपितं रूपम् = अवास्तवं कर्तृत्वादीत्यर्थः । *तत्त्वज्ञानेनेति* ॥ अस्मत्प्रत्ययश्च न तत्त्वज्ञानम्, येनावास्तवं कर्तृत्वादि निवर्तयेदिति भावः । *अनेन*—द्वितीयकल्पः—*निरस्तः* । *नतु वास्तवमिति* ॥ *वास्तवम् = कर्तृत्वादिकम् । *अतत्त्वज्ञानेन = अस्मत्प्रत्ययेन नापोद्यत इत्यर्थः । अनेनाद्यकल्पे दूषणं दृढीकृतम् । अतत्त्वज्ञानेन वास्तवस्यापवादो नेत्येतद् व्यतिरेकमुखेन द्रढयति—*नहि रज्ज्वा रज्जुत्वमिति* ॥ वास्तवं तत्त्वज्ञानानिरस्यमित्यभिधाय, अवास्तवं तु तत्त्वज्ञानेन निरस्यत इत्याह—*मिथ्येति* ॥ *रूपमिति* । अवास्तवमित्यर्थः ॥ *ननु* मिथ्याज्ञानसंस्कारस्य सुदृढत्वात् कथं मिथ्याज्ञानप्रसञ्जितमवास्तवं तत्त्वज्ञानेनापोद्येतेति ? अत आह—*मिथ्याज्ञानसंस्कारश्चेति* ॥ "जन्मने"त्यनन्तरम्—'अपवदितुं शक्यः' इति शेषः । तथाच कर्तृत्वादिकमवास्तवमेव वाच्यम् । तच्चानर्थहेतुभूतमस्मत्प्रत्ययेन न निरस्यते, इति तन्निवर्तकब्रह्मात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्या एवेति भावः । तत्र शङ्कते—*स्यादेतदिति* ॥ *अर्थ इति* ॥

भाष्यभावप्रकाशिका

भाष्येण प्रथमसूत्रेणार्थादुपात्तविषय-प्रयोजनसिद्धिहेतुमध्यासमुपपाद्येदानीमनेन सूत्रेण विषय-प्रयोजनयोरुपादाने निमित्तमाह—*वेदान्ता इति* ॥

वार्तिकम्

इति* ॥ *अयम्=ब्रह्मात्मैकत्वरूपः । *अर्थः=विषय इत्यर्थः ॥ शरीरमेव शरीरकम्, जुगुप्सितत्वात् ; तस्मिन् भवः ; शारीरको जीवात्मा । तद्याथात्म्यमधिकृत्य वेदान्तानां मीमांसा=विचारः, शारीरकमीमांसा ; मीमांसाशब्दस्य विचारे रूढत्वात्, 'इदमनेन मीमांसितम्, इदमनेन विचारितमि'त्यविशेषेण लोके प्रयोगदर्शनात् । तत्प्रतिरूपकत्वादियमपि चतुर्लक्षणी शारीरकमीमांसेत्यभिधीयते ; उपनिषदिति ग्रन्थाभिधानवत् ।

तदयं समुदायार्थः—सर्वासामुपनिषदां ब्रह्मात्मैकत्वं विषयो यथा भवति, तथा कृत्वा तमर्थमस्यां चतुर्लक्षण्यां शारीरकमीमांसायां वयम्=सूत्रभाष्यकारप्रभृतयः, प्रकर्षेण=विशेषतः, "तत्तु समन्वयादि"त्यारभ्य दर्शयिष्याम इति ॥ प्राणाद्युपासनानामपि "सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदि"ति न्यायेन सत्त्वशुद्ध्यादिद्वारा तदर्थत्वात्, "अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादि"ति

यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरक-मीमांसायां प्रदर्शयिष्यामः ।

भामती

वेदान्तानामात्मैकत्वप्रतिपादनमर्थः ? इत्यत आह—*यथाचायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः* ॥ शरीरमेव शरीरकम्, तत्र निवासी शारीरको जीवात्मा, तस्य त्वंपदाभिधेयस्य तत्पदाभिधेयपरमात्मरूपतामीमांसा या, सा तथोक्ता ॥

ऋजुप्रकाशिका

प्रयोजनमित्यर्थः । सर्वेषां वेदान्तानामात्मैकत्वविज्ञानप्रतिपादनार्थकत्वस्य प्रदर्शयिष्यमाणत्वाद् नात्र शङ्काशूकमित्यभिप्रेत्याह—*अत आहेति* ॥ शारीरकमीमांसाशब्दार्थमाह—*शरीरमेव शरीरकमित्यादिना* ॥ *तस्य = जीवात्मनः । *त्वंपदाभिधेयस्य = "तत् त्वमसि" इति महावाक्यस्थत्वंपदाभिधेयस्य । एतत् तस्येत्यस्य विशेषणम् । *तत्पदाभिधेयेति* । उक्तमहावाक्यस्थतत्पदाभिधेयेत्यर्थः ॥

पञ्चपादिका

ब्रह्म तस्मै तस्मै फलायोपास्यत्वेन विधीयते, दर्शपूर्णमासार्थाप्प्रणयनमिव गोदोहनोपरक्तं पशुभ्यः; तस्मात्तदर्थोपजीवित्वादितरस्यात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति न विरुध्यते ॥

पञ्चपादिकाविवरणम्

यितुमाह—*यथाचायमर्थ इति* ॥ भाष्यस्य तात्पर्यमाह—*प्रतिज्ञातेऽर्थ इति* ॥ *शरीरेत्यादिः स्पष्टार्थः ॥ वेदान्तानां शारीरकपरत्वेऽपि विचारस्य कथं शारीरकपरत्वमिति ? तदाह—*तदिह वेदान्तानामिति*॥ *ननु* विचारकर्तव्यतामात्रं सूत्रार्थः ; तत्र विषय-प्रयोजनयोरसूत्रितयोरुपादानं वेदान्त-तद्विचारसंबन्धितया

तत्त्वदीपनम्

सिद्धेर्विचारशास्त्रनैरर्थक्यम्, तेन "मीमांसायां प्रदर्शयिष्यामः" इत्येतदसंगतमित्याशङ्क्याह—*भाष्यस्येति* ॥ वेदान्तार्थाप्रतिपत्त्यादिनिरासेन तदर्थं द्रढयितुं विचारशास्त्रारम्भ इत्यर्थः । उत्तरभाष्यव्याख्यानं विहाय मध्ये सूत्रार्थानुवर्णनमसङ्गतमित्याशङ्क्याह—*ननु विचारेति* ॥ ज्ञानस्य स्वरूपेणापुरुषार्थत्वेऽपि न मोक्षफलत्वम्; अन्यस्य

वार्तिकम्

न्यायेन तद्वाक्यैकवाक्यतयोपासनावाक्यानां तदैकार्थ्यपरत्वं न विरुध्यते; फलान्तरश्रवणस्य संयोगपृथक्त्वन्यायेनाप्युपपत्तेरित्याशयः ।

यद्वा—*ननु*—भवेदयमस्याः शास्त्रस्य ब्रह्मात्मैकत्वरूपो विषयः, यदि वेदान्तानां स विषयो भवेत्; तद्विषयस्यैव तद्विचारशास्त्रविषयत्वात्, करणेतिकर्तव्यतयोः समानविषयत्वस्योक्तत्वात्, नच वेदान्तानां स विषयो भवति; परकल्पितप्रधानादेरपि तद्विषयत्वसंभवात्, "अजामेकां लोहित-शुक्ल-कृष्णाम्" "महतः परमव्यक्तमि"त्यादिवाक्यानां तत्प्रत्यायकत्वदर्शनादित्याशङ्कायामाह—*यथाचायमर्थ इति* ॥

भाष्यभावप्रकाशिका

ननु प्राणाद्युपासनाद्यपि वेदान्तेषु बहुलमुपलभ्यते, तत् कथं सर्वेषां वेदान्तानामात्मैकत्वप्रतिपादनसामर्थ्यमिति ? अत आह—*यथाचायमर्थ इति* ॥ शरीरमेव शरीरकम्, तन्निवासी

प्रदीपः

यतः—'अहमि'ति प्रत्यक्षत एवात्मा निर्णीयते, सत्यं प्रत्यक्षानवगतमेवाहमर्थं वेदान्ताः प्रतिपादयन्ति, तथाऽपि प्रत्यक्षविरोधात्तदविरोधेनैव वेदान्ता नेया इति शङ्कायामाह—*यथाचायमर्थः सर्वेषां वेदान्तानामिति* ॥

वेदान्ता हि संभावितदोषपौरुषप्रत्यक्षापेक्षया प्रबला न प्रत्यक्षानुरोधेनान्यथानयनमर्हन्ति । प्रत्यक्षन्तु नाहमर्थमेक-

भामती

एतावानत्रार्थसंक्षेपः—यद्यपि च स्वाध्यायाध्ययनविधिना स्वाध्यायपदवाच्यस्य वेदराशेः फलवदर्थावबोधपरतामापादयता कर्मविधिनिषेधानामपि स्वाध्यायशब्दवाच्यानां फलवदर्थावबोधपरत्वमापादयता कर्मविधिनिषेधानामिव वेदान्तानामपि स्वाध्यायशब्दवाच्यानां फलवदर्थावबोधपरत्वमापादितम्। यद्यपि च 'अविशिष्टस्तु वाक्यार्थः' इति न्यायाद् मन्त्राणामिव वेदान्तानामर्थपरत्वमौत्सर्गिकम्। यद्यपि च वेदान्तेभ्यश्चैतन्यानन्दघनः कर्तृत्व-भोक्तृत्वरहितो निष्प्रपञ्च एकः प्रत्यगात्माऽवगम्यते ; तथाऽपि कर्तृत्व-भोक्तृत्व-दुःख-शोकमोहमयमात्मानमवगाहमानेनाहंप्रत्ययेन संदेहबाधविरहिणा विरुध्यमाना वेदान्ताः स्वार्थात्प्रच्युताः, उपचरितार्था वा जपमात्रोपयोगिनो वा, इत्यविवक्षितस्वार्थाः। तथाच तदर्थविचारात्मिका चतुर्लक्षणी शारीरकमीमांसा नारब्धव्या। नच सर्वजनीनाहमनुभवसिद्ध आत्मा संदिग्धो वा सप्रयोजनो वा, येन जिज्ञास्यः सन् विचारं प्रयुञ्जीत—इति पूर्वपक्षः, सिद्धान्तस्तु—भवेदेतदेवं यद्यहंप्रत्ययः प्रमाणम्, तस्य तूक्तेन क्रमेण श्रुत्यादिबाधकत्वानुपपत्तेः, श्रुत्यादिभिश्च समस्ततीर्थकरैश्च प्रामाण्यानभ्युपगमादध्यासत्वम्। एवंच वेदान्ता नाविवक्षितार्थाः, नाप्युपचरितार्थाः, किंतूक्तलक्षणाः। प्रत्यगात्मैव तेषां मुख्योऽर्थः। तस्य च वक्ष्यमाणेन क्रमेण संदिग्धत्वात्,

ऋजुप्रकाशिका

इयता ग्रन्थेन ब्रह्मजिज्ञासायाः संभवमुक्त्वाऽद्वितीयब्रह्मज्ञानाय वेदान्तशास्त्रारम्भणीयत्वमुक्तम्, उक्तेऽर्थे बुद्धिसौकर्यायाधिकरणं रचयति—*एतावानत्रार्थसंक्षेप इत्यादिना तां जिज्ञासामसूत्रयत्—*"अथातो ब्रह्मजिज्ञासा" इत्यन्तेन* ॥

अत्र "श्रोतव्यः" इति श्रुतिस्तु विषयः। किं वेदान्तशास्त्रमारम्भणीयम्? उतानारम्भणीयम्? इति विषयप्रयोजनसम्भवासम्भवाभ्यां संशयः। तत्रादौ सिद्धान्तिशङ्कामनूद्य तत्परिहारपूर्वकं पूर्वपक्षमारचयति—*यद्यपीत्यादिना* ॥ "स्वाध्यायोऽध्येतव्यः" इति विधिः स्वाध्यायाध्ययनविधिशब्दार्थः। *फलवदर्थावबोधपरत्वमिति*। अध्ययनविध्युपात्तनिखिलस्वाध्यायमध्येऽक्षरमात्रस्याप्यानर्थक्यायोगादित्यर्थः। तथाच वेदान्तशास्त्रारम्भणीयत्वमिति भावः। *औत्सर्गिकमिति* ॥ असति बाधके न त्याज्यमित्यर्थः। तथाच ततोऽपि वेदान्तशास्त्रारम्भणीयत्वमिति भावः। *प्रत्यगात्माऽवगम्यत इति* ॥ तथाच तथाऽपि वेदान्तशास्त्रारम्भणीयत्वमिति भावः। *चतुर्लक्षणी मीमांसा = उत्तरमीमांसा ; वेदान्तमीमांसेति यावत्। *नारब्धव्येति* ॥ असन्दिग्धत्वेन विचारविषयाभावात्, प्रयोजनाभावाच्चेत्यर्थः। असन्दिग्धत्वाप्रयोजनत्वे एवाह—*नच सर्वेति* ॥ "जिज्ञास्यः सन्नि"त्यतः प्राक् सन्दिग्धत्व-सप्रयोजनत्वाभ्यामिति शेषः। *विचारमिति* ॥ वेदान्तशास्त्रविचारमित्यर्थः। पूर्वपक्षमारच्य सिद्धान्तमारचयति—*सिद्धान्तस्त्वित्यादिना* ॥ *तस्य तु = अहंप्रत्ययस्य तु। "श्रुत्यादिभिश्चे"त्यनन्तरं बाधादिति शेषः। *प्रामाण्यानभ्युपगमात्* ॥ अहंप्रत्ययस्येति शेषः। *अध्यासत्वम्* ॥ अहंप्रत्ययस्येत्यर्थः। एवं च सति फलितमाह—*एवं चेति* ॥ *तेषाम् = वेदान्तानाम्। *मुख्योऽर्थ इति* ॥ लक्षणया प्रतिपाद्यमानो मुख्यार्थः। तथाच मुख्यार्थसंभवाद् न वेदान्तानामुपचरितार्थत्वमित्यर्थः। यद्यपि मुख्यार्थ इत्युक्ते वाच्यार्थ इति प्रतीयते, स च विशिष्ट एव, न शुद्धोऽद्वितीयः प्रत्यगात्मा ; तथाऽप्यत्र "मुख्यार्थः" इत्यनेनानुपचरितार्थो विवक्षित इति द्रष्टव्यम्। *तस्य = अद्वितीयब्रह्मस्वरूपस्य प्रत्यगात्मनः। *ननु* अस्मिन् सूत्रे विषय-प्रयोजने प्रवृत्त्यङ्गे सूत्रणीये, ते किमिति न सूत्रिते? इत्याशङ्क्य,

प्रदीपः

रूपं गोचरयति—यतः कदाचित् शरीरम्, कदाचिदिन्द्रियम्, कदाचिन्मन इत्यव्यवस्थयैवाहमाऽर्थः प्रत्यक्षतोऽवगम्यते, व्यवस्थितश्चार्थो वेदान्तवाक्यैः। तानि ह्येकमेवात्मानं स्पष्टं बोधयन्ति, इति न वेदान्तवैयर्थ्यम्। *ननु*—ब्रह्ममीमांसा-

भामती

प्रयोजनवत्त्वाच्च युक्ता जिज्ञासा, इत्याशयवान् सूत्रकारस्तज्जिज्ञासामसूत्रयत्—*अथातो ब्रह्मजिज्ञासेति* ॥ जिज्ञासया संदेह-प्रयोजने सूचयति ॥

तत्र साक्षादिच्छाव्याप्यत्वाद् ब्रह्मज्ञानं कण्ठोक्तं प्रयोजनम्। नच कर्मज्ञानात्पराचीनमनुष्ठानमिव ब्रह्मज्ञानात्पराचीनं किंचिदस्ति, येनैतदवान्तरप्रयोजनं भवेत्, किन्तु ब्रह्ममीमांसाख्यतर्केतिकर्तव्यतानुज्ञातविषयैर्वेदान्तैराहितं निर्विचिकित्सं ब्रह्मज्ञानमेव समस्तदुःखोपशमरूपमानन्दैकरसं परमं प्रयोजनम्। तमर्थमधिकृत्य हि प्रेक्षावन्तः प्रवर्तन्तेतराम्। तच्च प्राप्तमप्यनाद्यविद्यावशादप्राप्तमिव, इति प्रेप्सितं भवति ; यथा स्वग्रीवागतमपि ग्रैवेयकं कुतश्चिद् भ्रमान्नास्तीति मन्यमानः परेण प्रतिपादितोऽप्राप्तमिव प्राप्नोति। जिज्ञासा तु संशयस्य कार्यम्, इति स्वकारणं संशयं सूचयति। संशयश्च मीमांसारम्भं प्रयोजयति। तथाच शास्त्रे प्रेक्षावत्प्रवृत्तिहेतुसंशय-प्रयोजन-

ऋजुप्रकाशिका

सूत्रकृद् जिज्ञासापदेन ते सूत्रयति स्मेत्याह—*जिज्ञासयेति* ॥ सन्दिग्धस्यैव जिज्ञास्यत्वाद् जिज्ञासया सन्देहसूत्रणं भवतीति भावः। सन्देहसूत्रणेन विषयः सूत्रितः ; सन्दिग्धस्यैव जिज्ञास्यतया शास्त्रीयविचारविषयत्वादिति द्रष्टव्यम्। *ननु* ब्रह्मजिज्ञासापदेन सन्देहसूत्रणद्वारोक्तविधया विषयसूत्रणेऽपि प्रयोजनं कथं सूत्रितम्? इत्याशङ्क्य, ब्रह्मजिज्ञासाया ब्रह्मज्ञानेच्छारूपत्वेन साक्षादिच्छाव्याप्यत्वेन ब्रह्मज्ञानलक्षणं प्रयोजनं कण्ठतः सूत्रितमित्याह—*तत्र साक्षादित्यादिना प्रयोजनमित्यन्तेन* ॥ *ननु* ब्रह्मज्ञानमवान्तरप्रयोजनम्, कर्मज्ञानवद् न परमप्रयोजनम्, इत्यत आह—*नचेति* ॥ एतद् ब्रह्मज्ञानं कीदृशं प्रयोजनम्? इत्याकाङ्क्षामुद्भावयति—*किन्त्विति* ॥ परमप्रयोजनमेव तदित्याह—*ब्रह्ममीमांसाख्येति* ॥ *कर्तव्यतानुज्ञातविषयैरिति*। ब्रह्मज्ञानहेतुभूतविचारविषयैरिति पर्यवसन्नोऽर्थः। ब्रह्मज्ञानमेवेत्यत्र सम्बध्यते। *ननु* ब्रह्मज्ञानस्य सुख-दुःखाभावयोरन्यतरत्वाभावात् कथं तस्य परमप्रयोजनत्वमिति? अत आह—*समस्तदुःखोपशममिति* ॥ यद्यपि ब्रह्मज्ञानं न सुखरूपम्, नवा दुःखाभावरूपम् ; तथाऽपि परमप्रयोजनीभूतसमस्तदुःखोपशमरूपानन्दैकरसब्रह्माभिव्यञ्जकत्वात् तदपि निखिलदुःखोपशमरूपानन्दैकरसप्रायम्, इति तद् ब्रह्मज्ञानं परमप्रयोजनमेवेत्यर्थः। आनन्दैकरसस्य परमप्रयोजनत्वे हेतुमाह—*तमर्थमधिकृत्य हीति* ॥ *तम् = आनन्दैकरसरूपम्। *अर्थम् = प्रयोजनम्। *अधिकृत्य = उद्दिश्येत्यर्थः। हिशब्दो हेत्वर्थः। *हि = यस्मात् कारणाद् आनन्दैकरसं प्रयोजनमुद्दिश्य प्रेक्षावन्तस्तरां प्रवर्तन्ते, तस्मात् कारणादानन्दैकरसरूपं तद् ब्रह्म प्रयोजनमित्यर्थः। *ननु* यत् प्रेप्सितं तदेव प्रयोजनम्, आनन्दैकरसब्रह्मणो नित्यप्राप्तत्वेनाप्रेप्सितत्वात् कथमस्य प्रयोजनत्वमिति? अत आह—*प्राप्तमपीति* ॥ तत्र दृष्टान्तमाह—*यथा स्वग्रीवागतमपीति* ॥ कण्ठभूषणं ग्रैवेयकशब्दार्थः। *प्रतिपादितः = बोधितः। अप्राप्तमिवेति छेदः। ब्रह्मज्ञानं प्रयोजनं साक्षादिच्छाव्याप्यत्वाद् जिज्ञासापदेन कण्ठतः सूत्रितमस्तु, संशयः कथं सूत्रितः? जिज्ञासासूत्रे संशयस्याप्रतीतेः, इत्यप्रतिपन्नस्य पुनरधस्ताद् आशङ्कायां संशयसूत्रणमुक्तमेव दृढीकर्तुमाह—*जिज्ञासा त्विति* ॥ एवं संशयस्यार्थात् सूत्रणम्, न कण्ठत इति भावः। संशयसूत्रणेन किमिति? अत आह—*संशयश्चेति*॥ संशयः स्वविषयं ब्रह्म विचार्यकोटिनिविष्टं कृत्वा तद्विचारात्मकमीमांसारम्भं प्रयोजयतीत्यर्थः। *ननु* शास्त्रे प्रेक्षावत्प्रवृत्तिहेतुभूतसंशय-प्रयोजने सूचनीये, किं जिज्ञासासूत्रे तत्सूचनेन? इत्याशङ्क्य, यः शास्त्रीयविषयसूचकः संशयः प्रयोजनमित्युभयम्, अस्मिन् "अथातो ब्रह्मजिज्ञासा" इति सूत्रे सूचितम्, अत एवास्य सूत्रस्य शास्त्रादित्वम्, शास्त्रादित्वादेव तत्सूचनमावश्यकमित्यभि-

प्रदीपः

शास्त्रत्वादस्य ब्रह्मस्वरूपनिर्णयार्था एव वेदान्ताः, नात्मस्वरूपनिर्णयार्था इति, अत आह—*अस्यां शारीरकमीमांसायामिति* ॥

पञ्चपादिका

ननु अब्रह्मोपासनान्यपि वेदान्तेषु दृश्यन्ते प्राणादिविषयाणि, *सत्यम्* ; तान्यपि कार्यब्रह्मावाप्तिक्रमेण मुक्तिफलान्येव । वक्ष्यत्येतत्सूत्रकारः—"कार्यात्यये तदध्यक्षेण सहातः परमभिध्यानादि"ति । *यथाचायमर्थः सर्वेषां वेदान्तानाम्, तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्याम इति* प्रतिज्ञातेऽर्थे वेदान्तानां तात्पर्यमुपदर्शयितुं समन्वयसूत्रप्रमुखैः सूत्रवाक्यैर्ग्रथितो न्याय इति दर्शयति । शरीरमेव शरीरकम्, शरीरके भवः शारीरको जीवः । तमधिकृत्य कृतो ग्रन्थः शारीरकः । तदिह वेदान्तानां जीवस्य तत्त्वमधिकृत्य प्रवृत्तानां ब्रह्मरूपतायां पर्यवसानमिति कथयितुं प्रणीतानां शारीरकं जीवतत्त्वमधिकृत्य कृतत्वमस्तीति शारीरकाभिधानम् । मुमुक्षुत्वे सत्यनन्तरं ब्रह्मज्ञानं कर्तव्यमिति यद्यप्येतावान्सूत्रस्य श्रौतोऽर्थः ; तथाऽप्यर्थाद् ब्रह्मज्ञानस्य मोक्षः प्रयोजनं निर्दिष्टं भवति । *तथाहि*—पुरुषार्थवस्तुकामनानन्तरं यत्र प्रवृत्तिरुपदिश्यते, तस्य तत्साधनत्वमप्यर्थात्

पञ्चपादिकाविवरणम्

नोपपद्यते, इत्याशङ्कामपनुद्य, वृत्तसङ्कीर्तनपूर्वकमुत्तरभाष्यस्य तात्पर्यमाह—*मुमुक्षुत्वे सत्यनन्तरमित्यादिना* ॥ कथं ब्रह्मज्ञानस्य मोक्षः प्रयोजनमर्थसिद्धमिति ? तदाह—*पुरुषार्थवस्तुकामनेति* ॥ प्रवृत्तिरिति प्रवृत्तिविषयेष्टसाधनताऽभिधीयते । सैव हि विधिरिति वक्ष्यामः ॥

यस्मिन्धात्वर्थे प्रवृत्तेर्हितसाधनता लिङादिपदैरुपदिश्यते, स धात्वर्थः सामान्येन हितसाधनोऽधिकारिविशेषणेन फलविशेषेण सामर्थ्यात् सम्बध्यते ; सामान्यप्रतीतेर्विशेषपर्यवसानमन्तरेणानुपपत्तेः । अतश्च विचारो हि सामान्येन हितसाधनतयाऽवगम्यमानः स्वसामर्थ्यसिद्धज्ञानद्वारेणाधिकारिविशेषणमोक्षविशेषफले पर्यवस्यतीत्यर्थः । *ननु*—पुरुषार्थकामिनो यत्र नियोग उपदिश्यते, तत्र नियोगो धात्वर्थस्य पुरुषार्थ-

ऋजुविवरणम्

प्रदर्शनप्रतिज्ञा ? इत्याशङ्क्य प्रयोजनमाह—*वेदान्तविषयेति* ॥ एतदुक्तं भवति—विषय-प्रयोजनाभावेऽनारम्भशङ्का विचारशास्त्रेऽपि तुल्या, सा चानेनैव परिहृतेति । *ननु*—अनन्तरभाष्यव्याख्याने प्रस्तुते किमर्थम्—"मुमुक्षुत्वे सत्यनन्तरमि"त्यादिना सूत्रार्थानुवादः कृतः ? असंगतत्वात्, इत्याशङ्क्यावतारयति—*ननु विचारकर्तव्यतामात्रमिति* ॥ प्रवृत्तिशब्देन पुरुषव्यापारस्य भावनाख्यस्य स्वीकारशङ्कानिराकरणायाह—*प्रवृत्तिविषयेष्टसाधनतेति* ॥ *ननु*—मुख्यं प्रयत्नं विहायेष्टसाधनत्वाभिधायित्वं कथं निश्चीयते ? मुख्यप्रयत्नहानेन तस्यैव स्वीकारे कारणादर्शनादित्याशङ्क्याह—*सैव हि विधिरिति* ॥ "यत्रे"ति व्याचष्टे—*यस्मिन् धात्वर्थ इति* ॥ "उपदिश्यते" इत्यत्र कैरुपदिश्यते ? इत्यपेक्षायामाह—*लिङादिपदैरिति* ॥ *ननु*—टीकाग्रन्थः परस्परव्याहतः, "उपदिश्यते" इत्यनेनेष्टसाधनत्वस्य वाचनिकत्वमुक्तम्, तत्साधनत्वमप्यर्थादित्यार्थिकत्वं चोक्तम् ; नह्येकस्मिन्नुपदेश एकस्य श्रौतत्वमार्थिकत्वं चोपपद्यते, इत्याशङ्क्य विषयभेदमाह—*स धात्वर्थः सामान्येनेति* ॥

तत्त्वदीपनम्

कस्यचित् फलत्वसंभवात्, इति शङ्कते—*कथमिति* ॥ कृतकराशेर्निर्विण्णत्वान्मोक्षस्यैव फलत्वमित्याह—*तदाहेति* ॥ इष्टसाधनस्य लिङर्थत्वाद् भावनापरपर्याया प्रवृत्तिर्लिङर्थ इति कथमुक्तम् ? तत्राह—*प्रवृत्तिरिति* ॥ प्रेरणादेर्लिङर्थत्वात् कथमिष्टसाधनता लिङर्थः ? इत्याशङ्क्याह—*सैवेति* ॥ इष्टसाधनतामात्रस्य लिङर्थत्वाद् ब्रह्मज्ञानस्य कथं मोक्षसाधनत्वं सेत्स्यति ? इत्याशङ्क्याह—*यस्मिन्नित्यादिना* ॥ अपेक्षितं पूरयति—*लिङादीति* ॥ *सामर्थ्यात्= अनुपपत्तेरित्यर्थः । सामर्थ्यमेवाह—*सामान्येति* ॥ सामान्योक्तं न्यायं प्रस्तुते योजयति—*विचारो हीति* ॥

इष्टसाधनत्वं लिङर्थ इत्याकर्ण्य तदमृष्यमाणः प्राभाकरः शङ्कते—*ननु पुरुषार्थेति* ॥ लोके लिङादेः कार्ये शक्तिग्रहात् तदनुसारेण वेदेऽपि लिङादिना कार्यं बोध्यते, तच्च भावार्थविलक्षणम्, भावस्य क्षणभङ्गुरतया समयान्तर-

पञ्चपादिकाविवरणम्

साधनत्वं कल्पयति ; ततश्च विधीयमानो विचारो नियोगसामर्थ्यान्मोक्षसाधनमिति कल्प्यताम्, किमिष्टसाधनत्वविधिसामर्थ्यकल्पनयेति ? *नैतत् सारम्* ; अनुपपत्त्यभावात् । *तथाहि*—नियोगस्वरूपं तावन्न फल-धात्वर्थसंबन्धमन्तरेणानुपपन्नम् ; अनाप्तनियोगे नैयमिके चाऽदर्शनात् । प्रवर्तकत्वमनुपपन्नमिति चेत्, यदि फलकामनाऽपि नियोगेन प्रवृत्तावपेक्ष्यते, सैव तर्हि प्रवृत्तिहेतुः, न नियोगः ; प्रत्यक्षादिषु तस्याः प्रवर्तने स्वातन्त्र्यदर्शनात् । अथ नापेक्ष्यते कामः, तर्हि फलकामनामनपेक्ष्य बलवदनिल-सलिलौघनुद्यमान इव पुरुषे नियोगेन प्रवर्त्यमाने न फलसंबन्धकल्पनावकाशः ; सलिलादिनोदनेऽपि प्रसङ्गात् । *ननु* फलकामिनो नियोगः प्रमीयमाणोऽनुपपन्नः फलसंबन्धमन्तरेण ; अन्यथा फलकामिनियोगो न स्यात्, *कोऽयमभिप्रायः* ? यदि तावत् फलकामना नियोगाधिकारिविशेषणं न स्यात् फल-धात्वर्थसंबन्धमन्तरेणेति, तन्न ;

ऋजुविवरणम्

एवं सामान्येनोक्त्वा प्रकृते योजयति—*विचारो हीति* ॥ *ननु पुरुषार्थेति* ॥ क्रियातिरिक्तं कार्यं लिङाद्यभिधेयम् । तच्च कृतिसाध्यं प्रधानं तेन च प्रवर्तकेन रूपेणाभिधीयते । तच्च कृतिसाध्यं घटे प्रवर्तकम् । नियुङ्क्त इति नियोगः । नच यागादेः फलसाधनत्वाभावे तत्र प्रवर्तकत्वमुपपद्यते ; अतो नियोगसामर्थ्यात् फलसाधनत्वं प्रतीयत इति भावः । नियोगोऽनुपपत्त्या साधनत्वं कल्पयति ; अन्तरङ्गत्वात् । स्वरूपानुपपत्तिं निराकरोति—*नियोगस्वरूपमिति* ॥ *ननु*—नियोगो धात्वर्थे प्रेरकः ; नच धात्वर्थस्य फलसाधनत्वाभावे तत्र प्रवर्तकत्वमुपपद्यते, इति तस्य कथं फलसाधनत्वं कल्प्यते ? इति चोदयति—*प्रवर्तकत्वमनुपपन्नमिति* ॥ प्रवर्तकत्वसिध्यर्थं फलकामनामप्यपेक्षते वा ? न वा ? सापेक्षत्वे दूषणमाह—*यदि फलकामनाऽपीति* ॥ द्वितीयं पक्षं परिगृह्णाति—*अथ नापेक्ष्यत इति* ॥ *ननु*—फलकामिन इति* ॥ कामिकार्यतया यागे प्रवर्तकः ; तस्यापि काम्यमानसाधनत्वाभावे प्रवर्तकत्वानुपपत्तेः, तृप्तिकामनियोगविषयस्य भोजनादेस्तृप्तिसाधनत्वं दृष्टम् ; अतत्साधने ग्रामगमनादौ तस्य नियोगादर्शनात्, एवं सर्वत्र द्रष्टव्यम् । फलस्य धात्वर्थसाध्यत्वाभावे पुरुषस्य कर्मण्यैश्वर्यलक्षणाधिकाराभावः ; फलभागित्वाभावात्, ततोऽधिकारापर्यवसितो विधिरेव न भवतीति । यद्वा—फलकामिव्यावृत्ततयाऽवगम्यमानः प्रवर्तको नातत्साधने तेनाकारेण प्रवर्तकः ; तदभावे विषयाधीनस्वसिध्यभाव इत्यपि प्रतिभानात् पृच्छति—*कोऽयमभिप्राय इति* ॥ *यदि तावत् फलकामनेति* ॥ काम्यमानं फलमित्यर्थः । जीवनादीनामिव कर्मजन्यफलभागित्वमैश्वर्यं

तत्त्वदीपनम्

भाविफलसाधनत्वासंभवादित्यभिप्रेत्याह—*नियोग इति* ॥ इदमुक्तं भवति*—लिङादिबोधितो नियोगो नियोज्यविषयमपेक्षते, कस्य कुत्र नियोग इति ? प्रकृत्युपात्तो यागो विषयत्वेन, स्वर्गकामी नियोज्यत्वेन च लक्ष्यते, यागस्य चेप्सितस्वर्गासाधनत्वे स्वर्गकामिनियोगविषयत्वानुपपत्तिः । ततश्च लिङादिबोधितनियोगसामर्थ्याद् याग-स्वर्गयोः साध्यसाधनतासंबन्ध इत्यर्थः । फलितं दर्शयति—*ततश्चेति* ॥ नियोगपक्षे धात्वर्थस्य पुरुषार्थसाधनत्वं न सिध्यतीत्याह—*नैतदिति* ॥

फल-धात्वर्थसंबन्धाभावे नियोगस्वरूपानुपपत्तिः ? उत तत्प्रवर्तकत्वस्य ? आहो फलकामिनियोगस्य ? इति विकल्प्याद्यमर्थं प्रत्याह—*तथाहीति*॥ नचात्र विकल्पासंभवः; पूर्वोक्ताभिप्रायस्यास्पष्टत्वादिति द्रष्टव्यम् । 'स्वर्गकामः सिकता भक्षयेदि'त्यनाप्तनियोगः । चशब्देन नैमित्तिकं समुच्चिनोति । द्वितीयमुत्थापयति—*प्रवर्तकत्वमिति* ॥ नियोगः किं फलकामनामपेक्ष्य प्रवर्तयति ? उत न ? आद्ये कामस्यैव प्रवर्तकत्वमापतितमित्याह—*यदीति* ॥ नियतपूर्वक्षणवर्तित्वात् कामनाया इत्यर्थः । इतरस्याप्यावश्यकत्वादुभयोः प्रवर्तकत्वशङ्कां निरस्यति—*न नियोग इति* ॥ द्वितीयमनुवदति—*अथेति* ॥ अस्मिन्पक्षे न धात्वर्थस्य फलसम्बन्धसिद्धिरित्याह—*तर्हि फलेति* ॥ तृतीयमुत्थापयति—*ननु फलेति*॥ "नियोगः" इत्यत्र यागविषय इति पदं द्रष्टव्यम् । अनुपपत्तिमेवाह—*अन्यथेति* ॥

किं कामनाया अधिकारिविशेषणत्वमात्रानुपपत्त्या फल-धात्वर्थसंबन्धासिद्धिरुच्यते ? उत साध्यस्य विशेषणत्वानुपपत्त्या ? इति विकल्पयति—*कोऽयमिति* ॥ आद्यमनूद्य प्रत्याह—*यदि तावदिति* ॥ गृहदाहादिरादि-

पञ्चपादिकाविवरणम्

जीवनादीनामसाध्यानामप्यधिकारिविशेषणत्वदर्शनात् । साध्यस्य विशेषणत्वमनुपपन्नमिति चेत्, न तावदनेन साध्यत्वं सिद्धवत्कर्तुं शक्यते। स्वरूपेण साध्यत्वं चेत्, न; अविवक्षितत्वात् । *तथाहि*--अधिकारिविशेषव्यावृत्तिमात्रप्रयोजनतया विशेषणपरेण शब्देन साध्यता न विवक्ष्यते। नार्थादपि साध्यत्वविवक्षा; तत्र प्रमाणस्याद्याप्यदर्शनात् । कामनैव न सिद्धस्वरूपाऽधिकारिविशेषणम्; स्वर्गस्य तद्व्यावर्तकत्वात् ॥

किञ्च अन्यसाध्यस्यापि व्यापारान्तरेऽधिकारिविशेषणत्वं दृश्यते, "अध्येतुकामो भैक्ष्यं चरेत्"

ऋजुविवरणम्

न भवति; नित्ये व्यभिचारात्, फलाभावे स्वामित्व-शेषित्वयोरनिरूपणात्, कर्मजन्यापूर्वेण शेषित्वरूपाधिकारपर्यवसानाच्च, अतो नाधिकारपर्यवसानमिति भावः। द्वितीयपक्षे कामनान्तर्भावाद् दूषणमुक्तमित्यनुपन्यासः ॥

ननु कर्मियोगात्साध्यत्वेन प्रतीयमानो विशेषणम्, तथा सति कर्मण्यैश्वर्यपर्यवसायी विधिस्तत्साधनत्वं ज्ञापयति, तदभावे तस्य तत्रैश्वर्यायोगादिति चोदयति—*साध्यस्येति*॥ साध्यत्वेन यदधिकारिविशेषणम्, तन्नियोगविषयभूतधात्वर्थसाध्यत्वेनैवेत्यर्थः। कथं साध्यत्वमविवक्षितम्, बोधकशब्दस्य विद्यमानत्वात्? इत्याशङ्क्याह—*तथा ह्यधिकारीति*॥ मा भूच्छब्दतः साध्यत्वप्रतीतिः, अर्थाद्भविष्यतीत्याशङ्क्याह—*नार्थादपीति*। तत्र प्रमाणस्येति*॥ कस्यानुपपत्त्या फलस्य साध्यत्वमिति निश्चयो नास्तीत्यर्थः। *ननु*—कर्मियोगात् स्वर्गः साध्यत्वेन प्रतीयते, अतः साध्यस्वर्गवानधिकारी प्रतीयते; साध्यस्य साधनाकाङ्क्षत्वात्, धात्वर्थस्य चान्योत्पादनस्वभावत्वात्, अत उभयसामर्थ्यात् फल-धात्वर्थयोः साध्य-साधनभावः, इति विमर्शोत्तरकालं कालान्तरवर्तिसाध्यस्वर्गसिध्यर्थमस्थायिकार्ये व्युत्पत्तिकल्पना। तस्य च नियोज्यापेक्षस्य नियोज्यविशेषणापेक्षायां नियोगसाध्यस्यैव नियोज्यविशेषणत्वात् स्वर्गो विशेषणम्, पश्चात् कर्मण्यैश्वर्यपर्यवसायिनः साध्य-स्वर्गस्यैवाधिकारिविशेषणत्वं बोध्यत इत्याशङ्क्याह—*कामनैवेति*॥ *ननु*—कामनाया अपि स्वर्गविशेषिताया अधिकारिविशेषणत्वं वक्तव्यम्, तदागमन्यायात्, तत्कामिनामैश्वर्यं काम्यमानसाधनत्वेन। यद्वा—अधि=उपरि, यस्मात् करणं पुरुषस्य भवति, सोऽधिकार इति व्युत्पत्त्या फलमेव सामान्येन प्रतीयते, कर्मण्यैश्वर्येऽप्यधिकारे फलमेव प्रतीयते; फलसाधनत्वेनैव पुरुषार्थत्वात् कर्मणाम्। तदुक्तम्—"कर्मण्यपि जैमिनिः फलार्थत्वात्"इति। अतः फलमेव विशेषणम्। तस्य च साध्यत्वेनैव प्रतीतत्वादेतत्साधनसाध्यत्वमपीत्याशङ्क्याह—*किंचान्यसाध्यस्येति*॥ परस्त्रीकामनायाः प्रायश्चित्तप्रकरणसामर्थ्याद् निमित्तत्व-

तत्त्वदीपनम्

शब्दार्थः। द्वितीयमुत्थापयति—*साध्यस्येति*॥ किं येन धात्वर्थेन फलसंबन्धः सिषाधयिषितः, तत्साध्यत्वम्? उत साध्यत्वमात्रं सामान्यशब्देन विवक्षितमिति? प्रथमं प्रत्याह—*न तावदिति*॥ स्वर्गादेर्यागसाध्यत्वे सिद्धे तद्विशेषणत्वानुपपत्त्या साध्य-साधनसंबन्धसिद्धिः, तत्सिद्धौ च यागसाध्यत्वं स्वर्गादेरितीतरेतराश्रयत्वमित्यर्थः। द्वितीयमनुवदति—*स्वरूपेणेति*॥ किं स्वर्गकामपदात् साध्यताप्रतिपत्तिः? उतार्थात्? इति विकल्प्याद्यमपवदति—*नाविवक्षितत्वादिति*॥ तदेव स्पष्टयति—*तथाहीति*॥ नियोगस्य नियोज्यसापेक्षत्वादपेक्षिताधिकारिविशेषसमर्पकं स्वर्गकामपदं न साध्यतां समर्पयतीत्यर्थः। *अधिकारिविशेषेति*॥ अधिकारिविशेषस्य व्यावृत्तिविशेषणम्, तन्मात्रप्रयोजनतयेत्यर्थः। द्वितीयं प्रत्याह—*नार्थादपीति*॥ विशेषणत्वानुपपत्त्याऽपीत्यर्थः। जीवनादेरसाध्यस्यापि विशेषणत्ववदसाध्यस्यापि स्वर्गादेर्विशेषणत्वं संभवतीत्यर्थः। स्वर्गस्याधिकारिविशेषणत्वमङ्गीकृत्य साध्यत्वं निराकारि, नच विशेषणत्वमपीत्याह—*कामनेति*॥ स्वर्गोऽप्यधिकारिविशेषणतया भातीत्याशङ्क्य, कामनाविशेषणत्वान्नैवमित्याह—*स्वर्गस्येति*॥

काम्यमानत्वात् स्वर्गस्य साध्यत्वं परम्परयाऽधिकारिविशेषणत्वं चेत्याशङ्क्य विशेषणत्वेऽपि न फल-धात्वर्थसंबन्धसिद्धिरित्याह—*किंचेति*॥ अध्ययनादेर्भैक्ष्याचरणाद्यसाध्यत्वेऽपि भैक्ष्याचरणादिनियोगाधिकारिविशेषण-

पञ्चपादिकाविवरणम्

"परस्त्रीकामः प्रायश्चित्तं कुर्यात्" "ग्रामकामो भुङ्क्ष्वे"त्यादौ। नचाधिकारिविशेषणत्वमपि स्वर्गकामनायाः संभवति ; अयोगान्ययोगव्यवच्छेदासंभवात्। *तथाहि*—स्वर्गकामपदं दर्श-पौर्णमासनियोगस्य पुरुषेणासंयोगं न व्यवच्छिनत्ति ; नित्यविधिनैव पुरुषान्वयस्य सिद्धत्वात्। नापि नियोगस्यास्वर्गकामसंबन्धव्यवच्छेदार्थं विशेषणम् ; अत्रापि दर्श-पौर्णमासनित्यविधिसंबन्धविरोधात्। नच नित्य-काम्यनियोगभेदः ; साङ्गदर्श-पौर्णमासनियोगस्याविशिष्टत्वात्, अधिकारिमात्रभेदात्। तस्मात् "दण्डी प्रैषानन्वाहेति"वद् विशेषणस्वर्गपरमिदं वचनम्, न विशिष्टपुरुषपरम्, इति फलवचनमेतत् स्वर्गकामपदम्। अर्थात् स्वर्गकामोऽधिकारी भवति। फलवचनं च साधनवचनेनान्विताभिधानमर्हति, इति न नियोगाभिधानावकाशः। ततश्चेष्टसाधनमेव लिङादिशब्दार्थो विधिरिति ॥

ऋजुविवरणम्

निश्चयादन्यसाध्यत्वमेव। ग्रामादिष्वपि प्रमाणान्तरेणान्यसाध्यत्वावगमाद् व्यावर्तकत्वमात्रम्, इह तु साध्यत्वेन प्रतीतस्य विशेषणत्वात् प्रमाणान्तरेण साधनान्तराप्रतीतेः सामर्थ्याद् धात्वर्थसाध्यत्वं प्रतीयत इत्याशङ्क्याह—*नचाधिकारिविशेषणत्वमिति* ॥ पूर्वं विशेषणत्वमङ्गीकृत्य साध्यत्वं निरस्तम्, इदानीं विशेषणत्वमपि नास्तीत्यपिशब्दार्थः। *ननु*—नित्यनियोगसम्बन्धो यावज्जीववाक्येन क्रियते, अनेन तु काम्यदर्श-पूर्णमासयोः स्वर्गकामेनायोगव्यवच्छेदोऽन्ययोगव्यवच्छेदश्च क्रियत इति विशेषणत्वमुपपद्यत इत्याशङ्क्याह—*नच नित्य-काम्येति* ॥ *ननु*—एवं सति शब्दविरोधः ; स्वर्गे कामो यस्य, असौ स्वर्गकामः, इति विशिष्टः पुरुषः प्रतीयते, नच पुरुषस्वत्वाभावः, इष्टविशेषप्रतीत्यभाव इष्टसाधनवाक्यार्थस्याप्यभावप्रसङ्गात्, त्वयाऽप्यधिकारिसिध्यर्थं विशिष्टपुरुषप्रतीतेरङ्गीकरणीयत्वादित्याशङ्क्याह—*तस्माद् दण्डीति* ॥ भवतु फलपरत्वं स्वर्गशब्दस्य, तथाऽपि तस्य धात्वर्थसाध्यत्वं नियोगायत्तमिति कृत्वा नियोगाभिधानम्, अथवा भवतु फलपरत्वम् ; तथाऽपि कथं साध्य-साधनभावः ? इत्याशङ्क्याह—*फलवचनं चेति* ॥ नियोगाभिधायकत्वकल्पनमपि तद्विरुद्धमिति भावः ॥

तत्त्वदीपनम्

स्वदर्शनवत् स्वर्गस्य यागासाध्यत्वेऽपि यागनियोगाधिकारिविशेषणत्वं स्यादित्यर्थः। वस्तुतः कामनाया अपि नाधिकारिविशेषणत्वमित्याह—*नचेति* ॥ किं पुरुषे दर्श-पूर्णमासविनियोगयोरसंबन्धस्य व्यावृत्त्यर्थं विशेषणम् ? उतान्ययोगस्य ? इति विकल्प्योभयथाऽसंभवमाह—*अयोगेति*॥ नियोग-पुरुषयोरसंबन्धोऽयोगः, अस्वर्गकामिनियोगसंबन्धोऽन्ययोगः। असंभवमेवाह—*तथाहीति* ॥ नित्य-काम्यनियोगयोर्भेदात् स्वर्गकामपदस्यायोगान्ययोगव्यवच्छेदकत्वसंभवमाशङ्क्याह —*नचेति* ॥ किं नित्य-काम्यनियोगवैजात्यं भिन्नत्वम्? उत व्यावृत्तिमात्रम् ? नाद्य इत्याह—*साङ्गेति* ॥ भेदमात्रं त्वस्वर्गकामसंबन्धेऽपि न विरुध्यत इत्यर्थः। नियोगस्योभयत्रैकविधत्वे नित्य-काम्यविभागः कथं घटेत ? इत्याशङ्क्याह—*अधिकारीति* ॥ कामिनिर्वर्तितस्य काम्यत्वम्, जीवनादिविशिष्टाधिकारिनिर्वर्तितस्य नित्यत्वमित्यर्थः। स्वर्गकामपदस्याधिकार्यसमर्पकत्वे वैयर्थ्यमित्याशङ्क्य, फलसमर्पकत्वेनार्थवत्त्वमाह—*तस्मादिति* ॥ अधिकारिसमर्पकत्वाभावस्तच्छब्दार्थः। 'मैत्रावरुणः प्रैष्या'दिति वाक्यान्तरसिद्धप्रैषानुवादेन दण्डसंबन्धः प्रतिपाद्यते—"प्रैषानन्वाहे"ति यत्, तद् दण्डी सन्निति, तद्वदस्यापि विशेषणपरत्वमित्यर्थः।

स्वर्गकामपदस्य फलसमर्पकत्वेऽधिकारिसमर्पकाभावान्निरधिकारमिदं शास्त्रमापद्येतेत्यत्राह—*अर्थादिति* ॥ स्वर्गकामादिपदसमभिव्याहृतलिङादिना यागस्य स्वर्गसाधनत्वे बोधिते 'मदभीप्सितफलसाधनमिदं कर्मे'ति कर्माधिकारितां भजते, ततो न निरधिकारत्वमित्यर्थः। भवतु स्वर्गकामपदस्य फलसमर्पकत्वम्, तथाऽपि कथं नियोगस्यावाक्यार्थत्वम् ? इत्याशङ्क्याह—*फलवचनमिति* ॥ 'इष्टसाधनमि'त्युक्ते कस्येष्टस्य साधनमिति वीक्षायामपेक्षितविशेषसमर्पकं स्वर्गकामपदम्, स्वर्गकामपदात् स्वर्गे प्रतिपन्ने किं तस्य साधनमित्याकाङ्क्षायाम्—साधनविशेषसमर्पकं लिङादिपदम्, इति न नियोगकल्पनमित्यर्थः। इष्टसाधनस्यापि न लिङर्थत्वम् ; प्रवर्तकस्य तदर्थत्वात्, इष्टसाधनस्य

पञ्चपादिकाविवरणम्

अन्ये मन्यन्ते—विषयनियोज्यव्यावृत्ते नियोगेऽभिधीयमाने विषय-नियोज्ययोरन्वयः सामर्थ्यादवगम्यते ; अन्यथाऽधिकारिणो विषयेण कर्तृ-कर्मानन्वयेनाननुष्ठीयमाने विषये नियोगस्य निवृत्त्ययोगात्, ततश्चाधिकारिणा धात्वर्थोऽन्वीयमानस्तद्विशेषणेन स्वर्गेणाप्यन्वेति ; विशिष्टेनान्वयस्य विशेषणेनाप्यन्वयात् । तत्रान्वयो गुण-प्रधानभावादृते नोपपद्यते, इति स्वर्गः प्राधान्येन,कर्म गुणभावेन,इति संपत्स्यते साध्य-साधनसंबन्धः—*इति*॥

नैतत्सारम् ; जीवन-गृहदाहादिविशेषणेनापि यागस्यान्वयप्रसङ्गात् । को दोष इति चेत्, जीवना-देर्धात्वर्थे प्रत्यङ्गत्वेनान्वये विकृतावतिदेशः प्राप्नुयात् । तत्र "यावज्जीवं सौर्यं चरुं निर्वपेदि"ति स्यात् । प्राधान्येनान्वये जीवनादेरपि कर्मसाध्यत्वं स्यात् । तस्मात् स्वर्गकामपदं फलविशेषपरतया सामान्येन श्रेयः-

ऋजुविवरणम्

कस्यानुपपत्त्या विषयनियोज्ययोरन्वय इति ? तदाह—*अधिकारिण इति । शेषं सुगमम् ॥

तत्त्वदीपनम्

मरीचिमण्डलोदयादौ व्यभिचारान्न प्रवर्तकत्वम् । तस्मादन्य एव लिङर्थ इत्याशङ्क्याह—*ततश्चेति* ॥ कृति-योग्येष्टसाधनत्वस्य लिङर्थत्वान्नातिप्रसङ्ग इत्यर्थः ॥

लिङादिबोधितनियोगस्य सामर्थ्यात् फल-धात्वर्थसंबन्धसिद्धिरिति मतं निराकृत्य, विशिष्टाधिकार्यन्वयानुप-पत्त्या धात्वर्थ-फलसंबन्धसिद्धिरिति मतान्तरमुत्थापयति—*अन्य इति* ॥ विषय-नियोज्यौ विना नियोगाभिधाना-नुपपत्तेस्तद्विशिष्टो नियोगो विधीयते । तथाच विषय-नियोज्ययोरपि परस्परनिर्वर्त्य निर्वर्तकतालक्षणसंबन्धसिद्धिरित्यर्थः । हेतुमाह—*सामर्थ्यादिति* ॥ अनुपपत्तिमेवाह—*अन्यथेति* ॥ कर्तृ-कर्मानन्वयेनेति* ॥ निर्वर्त्य-निर्वर्तकता-लक्षणसंबन्धाभावेनेति यावत् । *अयमर्थः*—कृतिसाध्यतया नियोगस्तावदुपलक्ष्यते । साक्षाच्च तस्य कृतिसाध्य-त्वाभावाद् यागनिर्वृत्त्या नियोगनिर्वृत्तिरिति वक्तव्यम्, नचानुष्ठात्रभावे यागनिर्वृत्तिः, इति याग-नियोज्ययोर्निर्वर्त्य-निर्वर्तकतालक्षणोऽन्वय उपेय इति । विषय-नियोज्ययोरन्वयेऽपि फलविशेषणान्वयः कथम् ? अत्राह—*ततश्चेति* ॥ विषय-नियोज्ययोरन्वयस्तच्छब्दार्थः । धात्वर्थस्य स्वर्गकामेनान्वीयमानत्वात् स्वर्गेणान्वयो वक्तव्यः ; इतरथा विशिष्टान्वय एव न स्यादित्यर्थः । फल-धात्वर्थयोः संबन्धेऽपि कथं साध्यसाधनता ? तत्राह—*तत्रेति* ॥ दर्शपूर्णमासवत् समप्रधानभावेनानयोरन्वयस्तावन्न संभवति, ईप्सितानीप्सितरूपत्वात् । तस्माद् गुणप्रधानभावेनाऽन्वयो वक्तव्यः, तत्र स्वर्गस्येप्सितत्वेन साध्यत्वम्, यागस्य च क्रियात्मकत्वात् साधनत्वमिति साध्य-साधनभाव इत्यर्थः ॥

विशिष्टान्वयानुपपत्त्या विशेषणान्वयमतिप्रसङ्गेन दूषयति—*नैतत्सारमिति* ॥ परस्त्रीकाम आदिशब्दार्थः । इष्टापत्तिं शङ्कते—*को दोष इति* ॥ जीवनादेर्यागेनान्वीयमानत्वं किमङ्गतया ? उतोद्देश्यत्वेन ? इति विकल्प्याद्यमति-प्रसङ्गेन दूषयति—*जीवनादेरिति* ॥ प्राकृतानां विकल्पान्वयादतिदेश इष्यत इत्याशङ्क्याह—*तत्रेति* । नच यावज्जीवमनुष्ठेयत्वम् ; काम्यत्वव्याघातादित्यर्थः । द्वितीयं दूषयति—*प्राधान्येनेति* । जीवनस्य कर्मान्तराधीनत्वा-न्नेदानीन्तनकर्मसाध्यत्वम्, तथा गृहदाहादेरपि सिद्धत्वान्नैतत्साध्यत्वमित्यर्थः । मतान्तरे धात्वर्थ-फलसंबन्धाऽ-सिद्धेरुक्तरूप लिङाद्यर्थत्वं नाश्रयणीयमित्युपसंहरति—*तस्मादिति* ॥ विशेष-सामान्यपदाभ्यां स्वर्गकामपद-लिङादि-पदयोर्वैयर्थ्यशङ्कां निरस्यति—*स्वर्गेति* ॥ स्वर्गकामपदसमभिव्याहृतलिङादिना विशेषप्रतिपत्त्युपगमे पूर्वापरविरोधः

प्रदीपः

कुत्सितं शरीरं शरीरकम्, शरीरके भवः, शारीरकः, आत्मा ; तन्मीमांसा शारीरकमीमांसा । आत्मैव तु ब्रह्म । तथाच 'ब्रह्म-मीमांसा' 'आत्ममीमांसे'ति चानर्थान्तरम् । वेदान्ता अपि शारीरकमेव जीवात्मानं ब्रह्माभिन्नं प्रतिपादयन्तीति न कोऽपि विरोधः । अत्र कुत्सार्थकस्य कप्रत्ययस्य शरीरपदे प्रयोगात् सर्वं शरीरजातं कुत्सितं नात्मना शुद्धेन सम्बन्धमर्हति, इति वस्तुगत्याऽशरीरमात्मानं शारीरकपदं गमयति, इति चिदचिच्छरीरकब्रह्ममीमांसैवेयमिति वादस्य नावसरलेशोऽपीति गृह्यते ॥

पञ्चपादिका

निर्दिष्टं प्रतीयते। तथा सति कुतस्तन्मोक्षसाधनं ब्रह्मज्ञानं भवतीत्यपेक्षायामर्थादस्माच्छास्त्राद्भव-

पञ्चपादिकाविवरणम्

साधनविध्यभिधायिना लिङादिपदेनान्विताभिधानं करोति। *ननु* शाब्दे फलविशेषान्वये सामान्येन श्रेयः-साधनत्वापर्यवसानसामर्थ्याद् विशेषान्वय इत्युक्तमयुक्तम्, *नैष दोषः*; विशेषसाकाङ्क्षश्रेयःसामान्यसाधनत्व-विधिसामर्थ्यात् स्वर्गकामपदं फलविशेषपरं कल्प्यते, विध्याकाङ्क्षानिबन्धनत्वात् पदान्तरतात्पर्यस्य। ततश्च विधिसामर्थ्यात् फलसम्बन्ध इत्युक्तम्। *ननु* तिङ्-कृत्तद्धित-समासैरनभिहित इति विशेषणाद् लिङा यागस्य करणताभिधाने 'ज्योतिष्टोमेने'ति तृतीया नोपपद्यत इति, *न*; याग-ज्योतिष्टोमसामान्य-विशेषप्रकृत्यर्थभेदोपरक्त-करणत्वभेदाददोष इत्यलमतिप्रसङ्गेन॥

विषयसिद्धिः कथमिति? तदाह—*तथा सति कुत इति*॥ तदेवमित्याद्युक्तानुकीर्तनम्। *"प्रथमं तावदि"ति भाष्यस्य तात्पर्यकथनम्। *ननु* विषयः समन्वयलक्षणेनैव गम्यते, प्रयोजनं च चतुर्थाध्यायेनैव

तत्त्वदीपनम्

स्यादिति शङ्कते—*ननु शाब्देति*॥ यागस्वर्गसंबन्धस्य शाब्दत्वे लिङादिबोधितसामान्यापर्यवसानात्तत्सिद्धि-रित्युक्तं पीड्येतेत्यर्थः। पराशयानवबोधविलसितेयं विरोधशङ्केत्याह—*नैष दोष इति*॥ प्रधानाकाङ्क्षा-नुसारेणेतरपदार्थसमर्पकत्वात्प्रधानस्य लिङादेः श्रेयःसामान्यसाधनबोधित्वादाकाङ्क्षितार्थसमर्पकत्वं स्वर्गकामपदस्य। तस्मादपर्यवसानात् फलविशेषसिद्धिरित्युक्तमिति न विरोधः॥

इष्टसाधनस्य लिङर्थत्वे 'ज्योतिष्टोमेने'ति तृतीया विरुध्येतेति शङ्कते—*नन्विति*॥ लिङा यागस्य करणता-भिधाने 'ज्योतिष्टोमेने'ति तृतीया नोपपद्यत इति प्रथमं संबन्धानुपपत्तिमेवाह—*तिङ्कृदिति*॥ तिङश्च कृतश्च तद्धिताश्च समासाश्चेति तिङ्कृत्तद्धितसमासाः, तैरनभिहितकरणकारके तावत्तृतीयाविधानं लक्ष्यते, तत्र च तिङा करणताया अभिहितत्वात्तृतीया विरुध्यत इत्यर्थः। तृतीया-तिङोः सामान्य-विशेषविषयत्वान्न व्याकरणविरोध इत्याह—*न यागेति*॥ देवतोद्देशेन द्रव्यत्यागरूपयागसामान्यगतं करणत्वं तिङर्थः, यागविशेषगतं करणत्वं तृतीयार्थ इत्यविरोध इत्यर्थः॥ इष्टसाधनताया लिङर्थत्वे नित्यकाम्यविभागानुपपत्तिरिति शङ्कायामाह—*इत्यलमिति*॥

अन्याप्रतिपाद्यत्वे सत्येतत्प्रतिपाद्यो हि विषयः, तत्र च सूत्रे प्रतिपादकविशेषाप्रतिपत्तेः कथं विषयप्रतिपत्तिरिति शङ्कते—*विषयसिद्धि रिति*॥ ब्रह्मणः प्रमाणान्तरानधिगमनीयत्वाच्छास्त्रादेव तत्प्रतिपत्तेरित्यर्थाद्विषयनिर्देश इत्याह—*तदाहेति*॥ आदिसूत्रत्वस्य ज्ञातुं शक्यत्वात्तत्कथनं व्यर्थमित्याशङ्क्य, आदिसूत्रत्वं ज्ञापयितुं न प्रवृत्तमित्याह—*प्रथमं तावदिति*॥ आदिसूत्रत्वात्प्रथममुपादानमित्यर्थः। आदिसूत्रत्वेऽपि तयोः प्रथममुपादानं कस्मादिति शङ्कते—

वार्तिकम्

"ईक्षतेर्नाशब्दमि"त्यादिन्यायेन तद्विषयत्वस्य वेदान्तानां निराकरिष्यमाणत्वादित्याशयः। एवमेतावता प्रबन्धेन सूत्रार्थोपपत्तये योऽयमार्थिको न्यायः सूत्रकारेणासूचि, तदिदं शास्त्रम्, सम्भावितविषयप्रयोजनम्, अविद्यात्मकबन्धप्रत्यनीकत्वात्, जाग्रद्बोधवत्– इति स प्रतिपादितः॥

प्रदीपः

वस्तुतस्तु—"तस्यैष एव शारीर आत्मा"इति वाक्येनानन्दमयपर्यायगतेन शरीरादिपरम्परया प्रदर्श्यमानो य आत्मोपक्षिप्तः कोशपञ्चकातीतः सर्वान्तरः,स एवात्र शारीरकपदेन विवक्ष्यते—य एव शरीरादिरूपकार्यमुखेन ब्रह्मवल्ल्याम्, तत्कारणान्नादिमुखेना-नन्दवल्ल्यां च प्रतिपाद्यते, नतु शरीर-शरीरिभावमुखेन। तथाच यदि शरीरिब्रह्मस्वरूपमेव वेदान्तार्थः, तर्हि अन्तर्यामिब्राह्मण-मेकमेव निर्णेयम्, न सर्वं वेदान्तशास्त्रम्, इति सर्ववेदान्तमीमांसेयमनर्थिका स्यात्, इति जगदभिन्ननिमित्तोपादानमविद्यावृत-मात्मस्वरूपमेव वेदान्तार्थः, न चिदचिच्छरीरकं ब्रह्मेति सूत्रयन्नाह—*वेदान्तमीमांसाशास्त्रस्येति*॥ नत्वन्तर्यामिब्राह्मण-मात्रमीमांसाशास्त्रस्येति भावः। कारणवाक्यान्येव वेदान्तानां व्याचिख्यासितानि; यतस्तान्येव स्पष्टब्रह्मलिङ्गानि, अन्तर्यामि-ब्राह्मणन्त्वस्पष्टब्रह्मलिङ्गमिति कथं तत्प्राधान्येनैव सर्वेषां वेदान्तानां नयनमिति भावः।

वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम्—

भामती

सूचनाद् युक्तमस्य सूत्रस्य शास्त्रादित्वमित्याह भगवान् भाष्यकारः—*वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्य 'अस्माभिः' इदमादिमं सूत्रम्* ॥ पूजितविचारवचनो मीमांसाशब्दः। परम-पुरुषार्थहेतुभूतसूक्ष्मतमार्थनिर्णयफलता विचारस्य पूजितता। तस्या मीमांसायाः शास्त्रम्, सा ह्यनेन

ऋजुप्रकाशिका

प्रेत्याहेत्याह—*तथाचेति* ॥ कैर्व्याचिख्यासितस्य ? इत्यपेक्षायाम्—*अस्माभिरित्युक्तम्* ॥ *ननु* भाष्ये "वेदान्तशास्त्रस्य व्याचिख्यासितस्ये"ति वक्तव्ये मीमांसाशब्दः किमर्थ इति ? अत आह—*पूजितेति* ॥ विचारस्य पूजितता वा किमर्थेति ? अत आह—*परमपुरुषार्थेति* ॥ "मीमांसाशास्त्रस्ये"त्यत्र मीमांसारूपं शास्त्रमिति भ्रमं वारयति—*तस्या मीमांसाया इति* ॥ *सा=मीमांसा। हिशब्दो हेत्वर्थः। *हि* यस्मात् कारणात् *अनेन* सा = मीमांसा *शिष्यते = शिष्येभ्यो यथावत् प्रतिपाद्यते, तस्मात् कारणाद् इदं तस्या मीमांसायाः शास्त्रमित्यर्थः। इतिशब्दस्तत्प्रतिपादनसमाप्तिद्योतनार्थः। *ननु* "अथाऽतो ब्रह्मजिज्ञासा" इति सूत्र-

पञ्चपादिका

तीति शास्त्रस्य ब्रह्मज्ञानं विषयो निर्दिष्टः। तदेवं मुमुक्षुत्वान्तरं ब्रह्मज्ञानकर्तव्यतोपदेशमुखेन वेदान्तानां विषयप्रयोजननिर्देशेऽप्यार्थं सूत्रस्य व्यापारं दर्शयित्वा तदपेक्षितमप्यर्थात् सूत्रितमविद्यात्मक-बन्धमुपवर्ण्य प्रतिज्ञातार्थसिद्धये हेत्वाकाङ्क्षायामस्मिन्नेव तं प्रदर्शयिष्याम इति व्याख्येयत्वमुपक्षिप्य व्याख्यातुकामः प्रथमं तावत्प्रयोजन-विषययोरुपादाने निमित्तमाह—*वेदान्तमीमांसाशास्त्रस्य व्याचिख्या-सितस्येदमादिमं सूत्रम्—*अथातो ब्रह्मजिज्ञासेति* ॥ *अयमस्यार्थः—शास्त्रस्यादिरयम्। आदौ

पञ्चपादिकाविवरणम्

प्रमीयते ; तत्र किमिति विषय-प्रयोजने प्रथमसूत्रेण सूचिते इति ? तदाह—*शास्त्रस्यादिरयमिति* ॥ *ननु*

तत्त्वदीपनम्

नन्विति॥ विषय इति* ॥ समन्वयस्य लक्षणं ज्ञापनं येनाऽध्यायेन स तथोक्तः। आदित्वात्प्रथमोपादानमित्याह—*तदाहेति* ॥ बह्वर्थत्वे वाक्यभेदः स्यादिति शङ्कते—*ननु एकस्येति* ॥ सूत्रस्य बह्वर्थत्वं भूषणम्, इत्याह—*तत्राहेति* ॥

"अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥"

इत्यादिवाक्यात्सूत्रस्यानेकार्थतायामलंकारताऽधिगतिरित्यर्थः। सूत्रवाक्यार्थस्य दर्शितत्वात् प्रतिपदं व्याख्या-मारभते भाष्यकार इत्युक्तमयुक्तमित्याशङ्क्य तात्पर्यकथनवत्पदव्याख्यानमपि कर्तव्यम्, 'पदच्छेदः पदार्थोक्ति'रित्यादे-

वार्तिकम्

ननु—कुत एतदध्यवसीयते सूत्रकारेणायं न्यायोऽस्मिन् सूत्रे सूच्यत इति ? कुतो वा त्वया साक्षात् सूत्रार्थं परित्यज्यादौ स एव व्याक्रियते ? इति—*चेत्*, तत्राह—*वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रमिति* ॥ वेदान्तमीमांसाशास्त्रस्य यत इदमादिसूत्रम्, अतोऽस्मिन् सूत्रे सूत्रकारेण तद्विषय-प्रयोजने अभिहिते इति निश्चीयते ;—

प्रदीपः

तदेवं ब्रह्मपदार्थाद्वितीयात्मस्वरूपसंभावनार्थमेकं वर्णकम्, वेदान्तविचारः सार्थकत्वात्कर्तव्य इति व्यवस्थापनार्थमेकं वर्णकमिति वर्णकद्वयं ब्रह्मजिज्ञासापदसूचितं संगृहीतम्। वर्णकद्वयमपीदं कथंचन सूत्रारूढमित्युक्तमेव, यतः सूत्रकारैरनेन

भामती

शिष्यते। सूत्रं च बह्वर्थसूचनाद् भवति। यथाहुः—'लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च। सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः ॥' इति ॥

इति श्रीवाचस्पतिमिश्रकृतौ भामत्यामध्यासभाष्यं समाप्तम्।

ऋजुप्रकाशिका

मित्युक्तम्, तत् कथम्? इत्याशङ्क्य बह्वर्थसूचनादित्याह—*सूत्रं चेति* ॥ *ननु* बह्वर्थसूचनमात्रेण कथं सूत्रत्वम्? सूत्रलक्षणलक्षितत्वाभावात्, इत्याशङ्क्य सूत्रलक्षणलक्षितत्वमस्तीति ज्ञापयितुं सूत्रलक्षणमाह—*यथाहुः—लघूनि सूचितार्थानीत्यादिना* ॥

इति भामतीव्याख्यायामृजुप्रकाशिकायामध्यासभाष्यं संपूर्णम् ॥

पञ्चपादिका

च प्रवृत्त्यङ्गतया प्रयोजनं विषयश्च दर्शनीयः। सूत्रं चैतत्। अतो यः कश्चिदर्थः शब्दसामर्थ्येनार्थबलाद्वा उत्प्रेक्षितः स सर्वस्तदर्थ एवेति भवत्ययमर्थकलापस्तन्महिमाधिगतः। एवं सूत्रस्यादित्वेन कारणेन सूत्रतया च विषयप्रयोजनं तत्सिद्धिकरं चाविद्याख्यं बन्धं तत्सामर्थ्यावगतमापाद्य तत्र सूत्रसामर्थ्यं दर्शयितुं प्रतिपदं व्याख्यामारभते ॥

इति परमहंसपरिव्राजकादि-श्रीशङ्करभगवत्पादान्तेवासिवर-श्रीपद्मपादाचार्यकृतौ पञ्चपादिकाया-मध्यासभाष्यं नाम प्रथमवर्णकं समाप्तम् ॥

पञ्चपादिकाविवरणम्

एकस्य सूत्रवाक्यस्यानेकार्थत्वमयुक्तमिति, तत्राह—*सूत्रं चैतदिति* ॥ तत्राथशब्द इत्यादिपदव्याख्यानभाष्यस्य वृत्तसङ्कीर्तनपूर्वकं तात्पर्यमाह—*एवं सूत्रस्यादित्वेनेति* ॥

इति श्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्यस्वप्रकाशानुभवभगवतः कृतौ पञ्चपादिकाविवरणेऽध्यासभाष्यं नाम प्रथमवर्णकं समाप्तम् ॥

ऋजुविवरणम्

तत्त्वं पदार्थं प्रतिभासमानं मृषा हि भेदादि न तात्त्विकं तत्। अद्वैतसिध्यर्थमिदं हि तावन्निरूपितं लक्षणसंभवाद्यैः ॥
मुक्तिश्च तस्मादिति वर्णकेऽस्मिन्नाद्ये तदेवेह निरूपणीयम्। निरञ्जनानन्दचिदेकरूपं प्रत्यक्स्वरूपं प्रतिपाद्यतेऽस्मिन् ॥

इति स्वामीन्द्रपूर्णपूज्यपादशिष्यसर्वशास्त्रविशारदजनार्दनात्मजसर्वज्ञविष्णुभट्टोपाध्यायकृतौ ऋजुविवरणेऽध्यासभाष्यं नाम प्रथमवर्णकं समाप्तम् ॥

तत्त्वदीपनम्

व्याख्यानलक्षणत्वादित्याशयेनाह—*तत्राथशब्द इति* ॥ बन्धस्याध्यासात्मकत्वात्प्रत्यग्ब्रह्मैक्यलक्षणो विषयोऽनर्थनिवृत्तिलक्षणं प्रयोजनं चेति सिद्धम्। ततश्च संभावितविषयफलत्वाद्वेदान्तशास्त्रमारम्भणीयमिति प्रथमवर्णकसिद्धम्।

इति परमहंसपरिव्राजकाचार्याखण्डानुभूतिशिष्येणाऽखण्डानन्दमुनिना विरचिते विवरणतत्त्वदीपनेऽध्यासभाष्यं नाम प्रथमवर्णकं समाप्तम् ॥

वार्तिकम्

"सिद्धार्थं ज्ञातसंबन्धं श्रोतुं श्रोता प्रवर्तते। शास्त्रादौ तेन वक्तव्यः संबन्धः सप्रयोजनः॥ इति न्यायात्, अन्यथा श्रोतॄणां तत् श्रोतुं प्रवृत्त्यनुपपत्तेरित्याशयः॥ यदुक्तं त्वया भाष्यकारेण कुतः सूत्रस्य साक्षादर्थं परित्यज्यार्थिकोऽर्थः प्रथमं व्याख्यायत इति? तत्रोत्तरम्—*व्याचिख्यासितस्येति* ॥ मया व्याख्यातुमिष्टस्येत्यर्थः। यतो ममेदृशं शास्त्रं व्याख्यातुमिष्टम्, अतो मद्व्याख्यानस्याप्येतद्विषयप्रयोजनकत्वात्, तत्प्रतिपादकत्वादेतस्य न्यायस्य मया प्रथमं प्रतिपादनं कृतमित्यभिप्रायः। उपवर्णितस्तावत् सूत्रतात्पर्यसिद्धोऽर्थः।

इति शारीरकमीमांसाभाष्यवार्तिकेऽध्यासभाष्यं संपूर्णम् ॥

भाष्यभावप्रकाशिका

शारीरको जीवः, तस्य परमात्मरूपताप्रतिपादिका मीमांसा *शारीरकमीमांसा* ॥ *इत्यध्यासभाष्यम्* ॥

इति पूज्यश्रीचित्सुखमुनिकृतौ शारीरकमीमांसाभाष्यव्याख्यायां भाष्यभावप्रकाशिकायामध्यासभाष्यं संपूर्णम्।

प्रदीपः

सूत्रेण केनापि पदेनाध्यासभाष्यार्थः सामान्यतया वेदान्तविचारसार्थक्यं वा विशदं न सूत्रितम्। सूत्राक्षरानुगृहीतन्तु अधिकारिनिर्णयपरम्, ब्रह्मासन्दिग्धत्वव्यवस्थापनपरं च वर्णकद्वयमेवेति सूचयन्नाह—*इदमादिमं सूत्रमिति* ॥ सूत्रार्थवर्णनमुखेनाधिकरणशरीरमित एव भविष्यतीति भावः। सूत्रलक्षणन्तु—"अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्। अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥" इति श्लोकावगम्यमेवंरूपम्। "सूचनात्सूत्रमुच्यते" इति वाक्यान्तरसिद्धमपि लक्षणं नात्र विस्मरणमर्हति। तथाच सिद्धान्तमात्रोपक्षेपकं सूत्रं पूर्वपक्षस्यापि सूचकमेव, इति पूर्वपक्षपरं भाष्यं यथा भाष्यलक्षणलक्षितम्, एवमध्यासभाष्यादिकमपीति न दोषः॥ "अथातो ब्रह्मजिज्ञासे"ति सूत्रं हि "तद् विजिज्ञासस्व" "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिविषयवाक्यानामधिगतकर्मावबोधोऽधिकारीति पूर्वपक्षस्यापि सूचकम्, नतु केवलं साधनचतुष्टयसम्पन्नरूपाधिकारिनिर्णयरूपसिद्धान्तमात्रस्य, इति न केवलं सारवत्, किन्तु विश्वतोमुखमपि। "व्याचिख्यासितस्ये"ति पदं भाषितुमभिलषितस्येति व्याख्येयम्। तेन च व्याख्यानस्यास्य भाष्यत्वप्रसिद्धिरप्युपपद्यते। भाष्यलक्षणन्तु—"सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः। स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥" इति वचनसिद्धमेव। वर्तते चेदं लक्षणमुक्तसूत्रविवरणेऽपि भगवत्पादीये। व्याख्येयमादिमं सूत्रमनुसन्धत्ते—*"अथातो ब्रह्मजिज्ञासेती"ति* ॥ अत्रादिमशब्दप्रयोगाद् विंशत्यध्यायात्मकं ब्रह्ममीमांसाशास्त्रमिति पक्षो निरस्यते। अधिकं चात्र वक्तव्यमुपरिष्टात्स्पष्टीभविष्यति ॥

इति शारीरकमीमांसाभाष्यटिप्पणे प्रदीपाख्येऽध्यासभाष्यं संपूर्णम्।

अध्यासभाष्यं नाम प्रथमवर्णकं सम्पूर्णम् ॥

अथ द्वितीयं वर्णकम्

पञ्चपादिका

सिद्धैव ननु ब्रह्मजिज्ञासा ? "अथातो धर्मजिज्ञासे"ति सकलवेदार्थविचारस्योदितत्वात्।

पञ्चपादिकाविवरणम्

तत्रोक्तस्तावद्विचारविधेः फलानुबन्धो व्यवहितविषयब्रह्मात्मतानुबन्धश्च ; इदानीमव्यवहितविचारविषयानु-

ऋजुविवरणम्

अभावयन् भावमपीह सम्यग् वदेद्विदित्वाऽपि तमन्यथा वा।
विद्वत्समूहे विदितात्ममोहो नापत्रपेदेष कथं नु वादी॥
मायाङ्गनालास्यवितानभूमिं विनेयमायाविनिवारणं तम्।
आनन्दरूपं निजबोधयुक्तं नौमीन्द्रपूर्णं करुणात्तदेहम्॥

अगतार्थविचारेण विचार्य यन्निरञ्जनम्। सदानन्दचिदेकं तदिन्द्रपूर्णगुरुः स्वयम्॥
"सिद्धैव ब्रह्मजिज्ञासे"त्यादिना किं निरूपितम्। न तावदयमाक्षेपो विचारविधिगोचरः॥
अनुबन्धद्वयं तावत्पूर्वत्रैव निरूपितम्। अधिकारोऽपि तेनार्थात्फलकामस्य सिध्यति॥
अनुबन्धत्रयं मुक्त्वा नाक्षेपः सुकरो भवेत्। विचारस्यापि नानेन न्यायेनाक्षेपसंभवः॥
विषयादेः पुनः क्षेपे पौनरुक्त्यं भवेत्, ततः। सङ्गतिश्चापि नैवास्य वर्णकस्योपलभ्यते॥
तेन पूर्वं यथेच्छं वा प्रारभ्यं वर्णकं त्विदम्(१)। कथंचिदर्थभेदोऽपि पूर्वमेवाथवा भवेत्॥
सिद्धे विचारे ह्यगते विधेये वेदान्तवाक्यानुगतं फलादि।
निरूपणीयं ननु पूर्वमेव निरूपणं स्याद् विधिमूलकत्वात्॥
शङ्कामिमां चेतसि सन्निधाय वृत्तानुकीर्त्या क्रमहेतुभूतम्।
आक्षेपबीजं प्रकटीचकार "तत्रोक्त"इत्यादिसमीरितेन॥

तावच्छब्दः क्रमार्थः। "विचारविधेरि"ति विधिग्रहणेन वेदान्तानां विधिविषयत्वेन विधिं प्रति प्राधान्यमसूसुचत्। "विचारविधेः फलानुबन्धः" इत्यनेनान्यदपि द्योतितम्, यद्यपि वेदान्तानां प्राधान्येन विषयादिनिरूपणपरं पूर्ववर्णकम्; तथाऽपि करणेतिकर्तव्यताभावेनैकविषयत्वाद्विधिविषयादिनिरूपणमपि कृतम्; अतो नाकस्मिकत्वं विधिविषयविचारस्य शङ्कनीयम्। व्यवहितग्रहणेन विषयभेदो दर्शितः। *इदानीमिति* आक्षेपफलप्रदर्शनपूर्वकमाक्षेपविषयं सहेतुकं दर्शयति। एतदुक्तं भवति—

स्वरूपोपाधिरूपत्वाद्विषयादि निरूपितम्। व्यवधानेऽपि पूर्वं तत्प्रयोगानुगतं त्विह॥

तत्त्वदीपनम्

विचारविध्यपेक्षितविषय-फलाधिकार्यनुबन्धानां मध्ये विषय-फले तावत् प्रतिपादिते, अर्थादधिकार्यपि सिद्ध एव, इति किं *सिद्धैव ननु ब्रह्मजिज्ञासेत्यादिना* ? नच—विचारविषयदर्शनार्थं वर्णकान्तरप्रारम्भ इति—शङ्क्यम्; असंदिग्धतयाऽप्रतिपाद्यत्वात्। गतार्थत्वागतार्थत्वाभ्यां संदेहेऽप्येतद्विचारस्यैव प्राथम्यं किं न स्यादित्याशङ्क्य तात्पर्यमाह—*तत्रेति*॥ फलमेवानुबन्धः। अनुबध्यते संबध्यते विधिनेत्यनुबन्धः। व्यवहितेति पदच्छेदः। विचारविधिवाक्योत्थज्ञानस्य विचारः साक्षाद् विषयप्रणाड्या ब्रह्मात्मतेति विभागः॥ अनर्थनिवृत्त्याऽऽनन्दावाप्तिफलस्येप्सितत्वाद् ब्रह्मण आत्मत्वाच्च तद्विचारस्य प्राचीनतन्त्रन्यायेन सिद्धत्वान्न पुनः कर्तव्यता, अनन्यसाधारणस्य विषयत्वादिति शङ्कायां तन्निराकरणाय प्रवृत्तिः, इत्यनयोः पौर्वापर्यं युक्तमित्यर्थः॥

---

(१) नारभ्यमिति शेषः।

पञ्चपादिका

ब्रह्मज्ञानस्य च चोदनालक्षणत्वेन धर्मस्वरूपत्वात्, अतः सिद्धैव ब्रह्मजिज्ञासाऽपि ॥

पञ्चपादिकाविवरणम्

बन्धमन्यत एवाप्राप्तानुष्ठानं दर्शयितुं प्रथममाक्षिपति—*सिद्धैव ननु ब्रह्मजिज्ञासेति* ॥ वेदान्तानामर्थनिर्णयापेक्षितो न्यायकलापः—"अथातो धर्मजिज्ञासे"त्यादिसूत्रैः सूत्रित इत्यर्थः । *ननु* विधिवाक्यार्थनिर्णयस्तत्र प्रवृत्तः, इत्याशङ्क्याह—*सकलवेदार्थस्य विचारितत्वादिति* । वेदस्य कार्यमात्रपरत्वादित्यर्थः । *ननु*—वेदान्ततात्पर्याद् ब्रह्मावगम्यते, न कार्यम्, अनवगम्यं च न वाक्यप्रमेयमिति, तत्राह—*ब्रह्मज्ञानस्य चेति* ॥ *ननु* क्रियाविधिकलापो निरूपितः, ज्ञानविधिनिरूपणायेदमारभ्यत इति, नेत्याह—*अतः सिद्धैवेति* ॥ उत्पत्ति-विनियोग-प्रयोगाधिकाराणां विध्यपेक्षितरूपाणां क्रियाप्रतिपत्त्योरविशेषेण निरूपितत्वादित्यर्थः । *ननु*—

ऋजुविवरणम्

अत्रैवं विचारसंक्षेपः—

विचारविधिर्विचारमारम्भयति ? नवेति ? नेति तावत्प्राप्तम् ; अनन्यसाधारणविषयाभावात्, तन्निर्णयप्रयोजनाभावाच्चेति । आरम्भयतीति सिद्धान्तः ; तस्य विध्यन्तरप्रयुक्तत्वाभावेनैतद्विधिविषयत्वसंभवात्, तद्द्वारा प्रयोजनस्यापि संभवादिति । *ननु*—व्यधिकरणं चोद्यम्—"अथातो धर्मजिज्ञासे"त्यादिना "ननु ब्रह्मजिज्ञासे"ति, इत्याशङ्क्याभिप्रायमाह—*वेदान्तानामिति* ॥ कथं सकलवेदार्थस्य विचारितत्वम् ? वेदान्तानामनुदाहृतत्वात, ब्रह्मणश्चानिरूपितत्वात्, इत्याशङ्क्य व्याचष्टे—*वेदस्येति* ॥ "अतः सिद्धैवे"ति कथमुक्तम् ? ज्ञानविधिनिरूपणाभावादित्याशङ्क्य व्याचष्टे—*उत्पत्ति-विनियोगेति* ॥

तत्त्वदीपनम्

विचारशास्त्रं विषयः, तत् किमारम्भणीयम् ? उतानारम्भणीयम् ? इति गतार्थत्वागतार्थत्वाभ्यां संदेहे पूर्वपक्षमाह —*प्रथममिति* ॥ "धर्मजिज्ञासे"त्यत्र ब्रह्मजिज्ञासा सिद्धेति कथम् ? वैयधिकरण्यात्, न खलु घटस्य कृतकत्वं शब्दस्यानित्यतां गमयितुमीष्टे, इत्याशङ्क्याह—*वेदान्तानामिति* ॥ अथवा—ब्रह्मप्रतिपादकवाक्यान्युदाहृत्य तत्राविचारणात् कथं गतार्थत्वम् ? इत्याशङ्क्य वाक्योदाहरणाभावेऽपि तत्प्रतिपादकन्यायसंदर्भः सिद्ध इत्याह—*वेदान्तानामिति* ॥ पूर्वोत्तरमीमांसयोर्विषयभेदं शङ्कते—*ननु विधीति* ॥ पूर्वोत्तरकाण्डयोर्भिन्नप्रमेयतया न्यायोऽपि भिन्न इत्यर्थः । तत्र धर्मस्य विचारितत्वाद्ब्रह्मणश्चाविचारितत्वात् कथं सर्वस्य निरूपितत्वम् ? इत्याशङ्क्याह—*वेदस्येति* ॥ लोके सकलपदानां कार्यपरतया सङ्गतिग्रहणात् कार्यमेव वेदार्थः । तस्य च तत्र निरूपितत्वात् किमपरमविशिष्टम् ? यद्विचाराय पुनरारम्भ इत्यर्थः ॥

सर्वस्य वेदस्य कार्यपरत्वमुक्तम्, तदाक्षिपति—*ननु वेदान्तेति* ॥ तात्पर्यपर्यालोचनया यद् येन प्रमीयते तत् तत्परम्, कार्यं च न वेदान्तैः प्रमीयते, इति न तस्य तदर्थत्वम्, किं तु ब्रह्मणः, तत्रोपक्रमादिना पर्यवसितत्वादिति शङ्कार्थः । "आत्मा द्रष्टव्यः" इत्यादौ ज्ञानविधिरुपलभ्यते, तदपेक्षितार्थप्रतिपादकानि चेतराणि, ततः कथं वेदान्तानामकार्यनिष्ठत्वम् ? इत्याशयेनाह—*तत्राहेति* ॥ विधिपरत्वाविशेषेऽपि विध्योर्भिन्नत्वात् तदर्थनिरूपणार्थं पृथगारम्भ इति शङ्कते—*ननु क्रियेति* ॥ विधिभेदेऽपि न्यायसाम्यान्न पुनरारम्भ इत्याह—*नेत्याहेति* ॥ न्यायसामान्यमेवाह—*उत्पत्तीति* ॥ अयमर्थः*—कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः, "आग्नेयोऽष्टाकपालः" इत्यादिः । अङ्गसंबन्धबोधको विधिर्विनियोगविधिः, 'प्रयाजादिभिरुपकुर्या'दित्यादिः । साङ्गे कर्मण्यनुष्ठापको विधिः प्रयोगविधिः, "प्रयाजादिभिरुपकृत्य दर्श-पूर्णमासाभ्यां यजेते"त्यादिः । कामना-जीवनादिनिमित्तवतः कर्मण्यैश्वर्यप्रतिपादको विधिरधिकारविधिः, "स्वर्गकामो यजेते"त्यादिः ॥ वेदान्तानां विधिपरत्वेऽप्याशङ्कान्तरनिरासार्थं पुनः प्रारम्भ इति प्रत्यवतिष्ठते—*नन्विति* ॥ लोके वाक्यस्य प्रमाणान्तरदृष्टार्थबोधित्वं नियतम्, ततो वेदस्यापि तथात्वम् ; "अविशिष्टस्तु वाक्यार्थः" इति न्यायात्, नच तत् संभवति ; धर्मादौ मानान्तराप्रवृत्तेरित्यादिन्यायाद् वेदस्य ।-

पञ्चपादिकाविवरणम्

यथा प्रथमेऽध्याये वेदस्य प्रामाण्यं निरूपितम् ; द्वितीये कर्मोत्पत्तिविधिभेदः ; तृतीये विहितानामङ्गाङ्गिभावो निरूपितः ; चतुर्थे क्रतु-पुरुषार्थप्रयुक्तानुष्ठेयपरिमाणम् ; पञ्चमेऽनुष्ठानक्रमः ; षष्ठे विध्यपेक्षितोऽधिकारनिर्णयः,

ऋजुविवरणम्

कर्मोत्पत्तिविधिभेद इति ॥ तथाचाहुर्वार्तिककारीयाः—कर्मभेदोऽध्यायार्थः, स चोत्पत्तिविधिभेदे सति भवति, नान्यथा, इति कर्मभेदसिध्यर्थमुत्पत्तिविधिभेदनिरूपणं क्रियत इति। एतदेव व्यक्तमुक्तं प्रकरणान्तराधिकरणे—"सत्यं कर्माविधातव्यम्, तथाऽपि तु न भिद्यते। उत्पत्तिविधिभेदे हि भेदो नास्ति च सोऽत्र न॥" इति॥

क्रतुपुरुषार्थेति॥ किंचिदङ्गजातं क्रतुं निमित्तीकृत्यापूर्वप्रयुक्तम्। क्रतुशब्देनापूर्वं बोध्यते। किञ्चित् पुरुषार्थप्रयुक्तमिति ; फलप्रयुक्तमित्यर्थः॥

तत्त्वदीपनम्

प्रामाण्यमिति प्रापय्य राद्धान्तितम्—पुंवाक्यस्यायं स्वभावः—यत् प्रमाणान्तरसिद्धबोधित्वम्, त्रय्याश्च पुंबुद्धिरचितत्वसाधकताऽनिरूपणादनपेक्षता ; तथा तदर्थे बाधानुपलब्धेरविसंवादित्वम् ; संवादकाभावादननुवादित्वादिति न्यायात् तस्या मानत्वमिति प्रथमे पादे समर्थितम्। पुनश्चार्थवादादेर्धर्माबोधकतयाऽप्रामाण्यशङ्कायां विध्यपेक्षितप्राशस्त्यापूर्वोपकारिप्रत्यय-विधेयार्थ-परिच्छित्तिजननेन प्रामाण्यमुक्तम् ; तथा स्मृतेरपि, इति विध्यर्थवाद-मन्त्र-नामधेय-स्मृत्यात्मकवेदस्य प्रामाण्यमित्यर्थः॥

वेदादेव श्रेयःसाधनाद्यवच्छिन्नभावनादिबोधात् प्रवृत्त्यादिसिद्धेः किमपरमवशिष्टम्? इति शङ्कानिरासेन विध्यंशभेदं निरूपयितुं द्वितीयं प्रवृत्तमित्याशयेनाह—*द्वितीय इति*॥ कर्म चोत्पत्तिविधिश्चेति कर्मोत्पत्तिविधी, तयोर्भेद इति विग्रहः। प्रस्थानभेदमाश्रित्य कर्मोत्पत्तिविधी इत्युक्तम्, कर्मविषयोत्पत्तिविधीनां भेद इति वा विग्रहः। तत्र तत्रोपलभ्यमानं कर्मैकम्? उत नाना? इति जिज्ञासायां यत्र शब्दान्तराभ्यास-संख्या-गुण-प्रक्रिया-नामधेयाद्यन्यतमं भेदकं प्रमाणमुपलभ्यते, तत्र भेदः, नेतरत्रेति चिन्तितम् ; अन्यथाऽनुष्ठानविशेषासंभवादित्यर्थः॥

विनियोगविधेः शेष-शेषिसंबन्धबोधनलक्षणविनियुक्तिव्यापारनिरूपणार्थं तृतीयं लक्षणमारब्धम्, तदनुपपन्नम् ; किमुपकारित्वातिरिक्तं शेषत्वम्? उत तदेव? अन्त्य आधानादेरपि शेषत्वं स्यात्, नाऽग्निमोऽपि; तत्स्वरूपप्रमाणयोरनिरूपणात्। किं परार्थत्वं शेषत्वम्? उतान्योद्देशेन क्रियमाणत्वम्? आद्य उपकारकत्वमेव शेषत्वं स्यात्, द्वितीय उद्देश्यस्य सिद्धत्वम्? उत प्रयोजनत्वम्? आद्ये दर्शादेरपि सिद्धत्वात्तत्र वर्तमानस्य प्रोक्षणादेरपि तदङ्गत्वं स्यात्, द्वितीये स्वर्गोद्देशेन प्रवृत्तयागादेरपि तत्त्वात् तदुपकारकत्वमेव स्यात्। श्रुतिस्तावन्न शेषशेषितायां प्रमाणम् ; "सक्तून् जुहोती"त्यादौ व्यभिचारात्। तत एव न तन्मूला लिङ्गादयोऽपि मानत्वं भजेरन्। नचानङ्गत्वेऽननुष्ठेयत्वम् ; आधानादिवदुपपत्तेः, इति शङ्कायां तन्निरासेन विध्यंशभेदनिरूपणार्थं तृतीयमारब्धमित्याह—*तृतीय इति*॥ नच तत्स्वरूपानिरूपणम् ; समीहितप्रवृत्तिविषयत्वाधीनप्रवृत्तिविषयत्वं शेषत्वम्। नच तत्र मानाभावः ; श्रुत्यादीनामेव मानत्वात्, नचाव्यभिचरितविधितः सामान्यसंबन्धसिद्धौ श्रुत्यादिकं विशेषसिद्धौ प्रभवति। ततश्च "सक्तून् जुहोती"त्यादिवाक्यस्य होमस्यासमीहितसक्तुगतातिशयावबोधित्वानुपपत्तेस्तन्निरपेक्षश्रुत्यादीनां न तत्र मानता। आधानादेश्चाग्निप्रयुक्तस्योत्तरयागानङ्गस्योपकारकत्वम्। नचास्य तथात्वम्; प्रयोजकान्तरानिरूपणात्। तस्मात् शेषत्वव्युत्पादनार्थं तृतीयलक्षणारम्भ उचित इत्यर्थः॥

उक्तन्यायेनेतिकर्तव्यताविशिष्टे कर्मस्वरूपे प्रतिपन्ने कामिनो जीवनादिनिमित्तवतो वा प्रवृत्तिसिद्धेः किं प्रयोगविधिव्यापारनिरूपणेन? साङ्गप्रधानयौगपद्यानुष्ठानसिद्धिः प्रयोगविधेः फलम्, नच तत् संभवति ; प्रयोगविधित्वाभिमते फलवाक्येऽङ्गाश्रुतेः। अतो न चतुर्थमारब्धव्यमिति शङ्कायां चतुर्थमारब्धव्यमित्याह—*चतुर्थ इति*॥ विधिं क्रतुशब्देन लक्षयित्वा तत्प्रयुक्ततयाऽनुष्ठेयस्य फलप्रयुक्ततया चानुष्ठेयस्य च परिमाणं चिन्तितमित्यक्षरार्थः। प्रवर्तकान्तरानिरूपणाद्विधेः प्रवर्तकत्वं वक्तव्यम्, साङ्गप्रधानयौगपद्यानुष्ठानस्यान्यतोऽसंभवात्

पञ्चपादिकाविवरणम्

इति पूर्वषट्केन प्रकृतिविध्यपेक्षितो विचारः कृतः। समग्राङ्गसंयुक्तो विधिः प्रकृतिः, विकलाङ्गसंयुक्तो विकृतिरित्युच्यते। तत्र सप्तमेन प्रकृत्युपदिष्टानामङ्गानां विकृतावतिदेशो निर्णीतः ; अष्टमे तु"आग्नेयोऽष्टाकपालः" इत्यादिप्रकृत्युपदिष्टानामङ्गानां "सौर्यं चरुं निर्वपेदि"त्यादिविकृतौ द्रव्य-देवतादिसामान्यद्वारेण विशेषातिदेशो

तत्त्वदीपनम्

प्रयोगविध्यायत्तत्वम्। नच तत्राङ्गाश्रुतिः; साङ्गप्रधानवाक्यैकवाक्यतालब्धमहावाक्यस्य तद्विधित्वापत्तेरिति॥ अक्रियाकारकत्वेन क्रमस्याविधेयत्वादविहितस्य चानङ्गतया प्रयोगविधिविधेयत्वं न संभवति। नचैकस्य कर्तुर्युगपदनेकानुपपत्त्या प्रयोगवचनस्य क्रमविधायकत्वम्, व्युत्क्रमेणाप्यनुष्ठानोपपत्तेर्नियतक्रमासिद्धेः, तद्विषयं पञ्चममनारब्धव्यमिति शङ्कायां तन्निरूपणार्थमिदमारब्धव्यमित्याह—*पञ्चम इति*॥ नियतक्रमानास्थाने किमनेन क्रमेणेदमनुष्ठेयम्, उताऽन्येन ? इति चिन्तया प्रयोगविक्षेपापत्तावविक्षिप्तसाङ्गप्रधानयौगपद्यानुष्ठानानुपपत्त्या नियतः क्रम आश्रयणीयः। तत्र क्रमस्याक्रियाकारकत्वेऽपि श्रुत्यर्थ-पाठ-स्थान-मुख्य-प्रवृत्तिलक्षणप्रमाणसद्भावेन प्रयोगविधिना स्वाङ्गतयाऽऽक्षिप्यत इति क्रमनिरूपणमुचितमित्यर्थः॥

भावनाया भाव्याकाङ्क्षायामेकपदोपात्तयागादिर्भाव्यत्वेन संबध्यते ; न स्वर्गादि भिन्नपदोपात्तत्वात्, स्वर्गपदस्य च सुखसाधनद्रव्यवाचित्वात्, 'भूतं भव्यायोपदिश्यते' इति न्यायाच्च। ततश्च स्वर्गादिना यागादिं भावयेदिति वाक्यार्थोऽवगम्यते। नच तस्य काम्यतानुपपत्तिः; साधनस्यापि काम्यत्वात्। तस्मात् कर्मणः फलविधुरत्वात् तद्भोक्तृत्वलक्षणकर्मैश्वर्यस्याधिकारस्यासंभवात् तद्व्युत्पादनार्थं लक्षणान्तरं नारब्धव्यमिति शङ्कानिरासेनाधिकारव्युत्पादनार्थं षष्ठमारब्धव्यमित्याह—*षष्ठ इति*॥ कर्मणां फलविधुरत्वे वाद्यादिवत् प्रवर्तकतया प्रामाण्यं न स्यात्। नच यागादेः स्वतःफलत्वम्; क्लेशात्मकत्वात्, श्रेयःसाधनान्वितभावनायाः प्रत्ययार्थत्वादेकप्रत्ययोपात्तस्वर्गादेः फलत्ववद्भोक्तृत्वलक्षणाधिकारनिरूपणमुचितमित्यर्थः। पूर्वोत्तरषट्कयोर्हेतु-हेतुमत्त्वलक्षणसङ्गतिकथनार्थं पूर्वषट्कार्थं संकलयति—*इति पूर्वेति*॥ प्रकृति-विकृतिस्वरूपमाह—*समग्रेति*॥ दर्श-पूर्णमास-सोमयागादिः प्रकृतिः, "सौर्यं चरुं निर्वपेत्" इत्यादिर्विकृतिः॥

अतिदेशं निरूपयितुं लक्षणान्तरमारब्धव्यम्। नच तदुपपद्यते; उपदेशेनैव सर्वत्र सर्वधर्माणां प्राप्तत्वात्। *तथाहि*—करणभूतधात्वर्थस्याङ्गापेक्षत्वात् तदुद्देशेन तावद्धर्मा विधीयन्ते। यज्यादिश्रुतिसामर्थ्याच्च सर्वेषां धात्वर्थानां प्रतिपन्नानां प्रकरणादिना विशेष्टुमशक्यत्वात्, उद्देश्यत्वात्, ग्रहस्य चोद्देश्यैकत्वेनाविशेष्यत्वात्। ततो यागादिमात्रोद्देशेन विधीयमानानां धर्माणां विकृतावप्युपदेशेन प्राप्तत्वात् तद्व्युत्पादनवैयर्थ्यमिति शङ्कानिरासेन विधिभेदोपपिपादयिषया सप्तममारब्धव्यमित्याह—*तत्र सप्तमेनेति*॥ भावनायाः प्राधान्यात् तदाकाङ्क्षयाऽङ्गानां संबन्धो वक्तव्यः। तत्र च साक्षात्तदन्वयानुपपत्तेः पश्चात्करणसंबन्धः। नच सकलभावनासंबन्धित्वेनाङ्गाधिगतिः; भावनाया विधेयत्वात्; धर्मविधावविधेयत्वात् प्रकरणादिना विशेषणोपपत्तेः प्रतिप्रकरणं धर्माणां व्यवस्थितत्वम्। तत्र च सौर्यादीनि कर्माण्यविहितेतिकर्तव्यताकानि लक्ष्यन्ते। करणानां चेतिकर्तव्यताऽनुगृहीतानामुपकारकत्वदृष्टेः, अत्रापि तदपेक्षायां प्रयाजादिवैदिकपदार्थवर्गस्य दर्श-पूर्णमासाद्युपकारकत्वेन सामर्थ्यस्य क्लृप्तत्वात् तस्योपकारत्वं कल्प्यते, इत्यतिदेशसिद्धिरित्यर्थः॥

विशेषातिदेशं निरूपयितुं लक्षणान्तरं प्रवर्तते। नच तद्युज्यते; विकृतिभावनाया विध्यन्ताकाङ्क्षयाऽतिदेशप्राप्तिसमये विशेषहेत्वदर्शनात्, सर्वेषां प्राकृतकर्मणां सकलविध्यन्तातिदेशस्यैवोपपत्तेः। *ननु* करणमुपकाराय विध्यन्तमपेक्षते। प्रकृतौ च सकलविध्यन्तानामुपकारकत्वेन क्लृप्तत्वाद्विशेषातिदेश इति—चेत्, तथाऽपि नियामकाभावाद् यस्य कस्यचिदतिदेश इति शङ्कायां तन्निराकरणेन विशेषातिदेशं न्यरूपयदित्याह—*अष्टम इति*॥ सर्वस्येतिकर्तव्यतयोपकारकत्वे तावन्न मानम्। नच विध्यन्तविशेषकल्पकाभावः, तस्य प्रकृतौ क्लृप्तोपकारकत्वात् सादृश्यात् तत्कल्पनासंभवात्, कर्मण्याग्नेयाङ्गप्रवृत्तिरेकदेवतात्वेन, ऐन्द्राग्नस्य द्विदैवतत्वेनाग्नीषोमीयस्य

पञ्चपादिकाविवरणम्

निरूपितः; नवमे तु प्रकृत्युपदिष्टमन्त्र-साम-संस्कारकर्मणां विकृतावतिदिष्टानां प्रकृति-विकृत्योर्द्रव्य-देवताभेदे सति प्रकृतिगतद्रव्यादिशब्दं विहाय विकृतिगतद्रव्यादि-शब्दाध्याहारलक्षण ऊहो दर्शितः; यथा—"अग्नये जुष्टमि"ति मन्त्रस्य विकृतौ 'सूर्याय जुष्टमि'ति पदप्रक्षेपः; दशमे तु विकृतावतिदिष्टानामङ्गानां प्रकृतौ सावकाशानां विकृतिगत-विशेषाङ्गोपदेशादिना बाधो दर्शितः, यथा प्रकृतेर्विकृतावतिदेशप्राप्तानां बर्हिषां "शरमयं बर्हिरि"ति विकृतौ विशेषोपदेशेन बाधः; एकादशे त्वनेकशेषिविधिप्रयुक्तस्य शेषस्य सकृदनुष्ठानादेव सर्वशेषिणामुपकारसाम्यं तन्त्रं नामोक्तम्-यथा "आग्नेयोऽष्टाकपालः" "उपांशुयाजमन्तरा यजति" "अग्नीषोमीयमेकादशकपालमि"ति च पौर्णमासकर्मत्रयप्रयुक्तस्य प्रयाजादेः सकृदनुष्ठानादेव शेषित्रयोपकार इति; द्वादशे त्वेकशेषिप्रयुक्तस्य शेषानु-

तत्त्वदीपनम्

पशुबन्धान्तरेषु दैक्षस्य पशोः प्रवृत्तिर्द्रव्यसारूप्यात्, ऐकादशिनि सवनीयस्य सुत्याकालत्वसामान्यादित्यर्थः ॥ प्रकृतौ करणावच्छिन्ना तावद्भावना प्रतीयते, करणीभूतदर्श-पूर्णमासस्वरूपाकाङ्क्षायां चेतिकर्तव्यतान्वयः। तथा च—"अग्नये जुष्टं निर्वपामि" इत्यादिमन्त्राणामवघातादिसंस्काराणां च साधनांशप्रयुक्तत्वेऽप्याग्नेयादिस्वरूपसाधनांश-प्रयुक्तत्वोपपत्तेर्यागान्तरसाधने नीवारसूर्यादावप्राप्तेरूहायोगात् तद्व्युत्पादनार्थं न नवमं लक्षणमारभ्यमिति शङ्का-निरासेन विधिव्यापारभेदनिरूपणार्थं तदारम्भ इत्याह—*नवमे त्विति* ॥ भावनाया भाव्यसिद्धये करणेतिकर्तव्य-ताकाङ्क्षणात्करणेतिकर्तव्यतयोर्भावनाऽन्वयपश्चाद्भाविनोऽनुग्राह्यानुग्राहकत्वस्य भाव्यसिद्ध्यर्थत्वावगतेः फलस्य चापूर्व-द्वारा भाव्यत्वेनापूर्वस्यैव साक्षाद्भाव्यत्वावगमात्, करणस्येतिकर्तव्यतान्वयोऽपूर्वसाधनत्वप्रयुक्तः, न स्वरूपप्रयुक्त इति प्रतीतेः, संस्काराणां मन्त्राणामपूर्वसाधनांशप्रयुक्तत्वान्नीवारसूर्यादावप्यपूर्वसाधनत्वाविशेषात् प्राप्तेरनूदितानां च तदुप-कारकरणाशक्तेरूहव्युत्पादनमुचितमित्यर्थः। मन्त्राश्च सामानि च संस्कारकर्माणि चेति तथोक्तानि, अग्नि-सूर्यरूपेण देवताभेदे "अग्नये जुष्टम्" इति मन्त्रस्यातिदेशप्राप्तस्य विकृतौ प्रसरानुपपत्तावग्निपदपरित्यागेन सूर्यपदप्रक्षेपः, 'गिरा गिरा च दक्षसे' इत्यत्र गिरेतिपदपरित्यागेनेरापदप्रक्षेपः साम्नामूहः। द्रव्यान्तरसंबन्धिनोऽवघातादेर्द्रव्यान्तरसंबन्धः संस्कारोहः ॥ प्राकृताङ्गस्य विकृतौ लुप्तकार्यस्याननुष्ठेयत्वमुपपादयितुं दशम आरभ्यते, न च तत् संभवति। विकृति-भावनेतिकर्तव्यतामपेक्षते। तत्राश्रुतावतिदेशप्राप्तमाश्रयणीयम्। नच—तत्कार्यस्य तुषविमोकादेरसंभवादपवाद इति—वाच्यम्; पदार्थावगत्युत्तरकालीनत्वादुपकारकल्पनायाः प्रकृतौ, विकृतावपि प्रथमं पदार्थानां प्राप्तेस्तत्र दृष्टाति-शयासंभवे कृष्णलादावदृष्टम्—कल्प्यं "कृष्णलान् घृते श्रपयती"त्यादाविवेति प्राप्ते, तन्निरासेन प्रयोगविधिव्यापार-निरूपणार्थं लक्षणान्तरमारब्धव्यमित्याह—*दशम इति* ॥ वैकृतभावनया समधिगतकरणविशेषया करणोपकारमा-काङ्क्षमाणया प्राकृतोपकार आक्षिप्यते, उपकारस्य च पदार्थतन्त्रत्वात्तेषामाक्षेपः। तत्र चोपकारलोपे तल्लोपः। तथा चावघातकार्यस्य तुषविमोक्षादेः कृष्णलादावसंभवात् कुशादिकार्यस्य च वेद्यास्तरणादेः प्रत्यक्षोपदिष्टशरमयादिना सिद्धेस्तदनवताराद् बाधनिरूपणमुचितमिति ॥

तन्त्रं न निरूप्यम्, तस्यैवासंभवात्; दर्श-पूर्णमास-ज्योतिष्टोमादिष्वङ्गानां तन्त्रैक्यं तावदनुपलब्धम्। नच—प्रयोगैक्याभावनिबन्धनं तदिति—शङ्क्यम्; आग्नेयादिष्वपि प्रयोगैक्यासंभवात्तन्त्रानुपपत्तेः। नचैकफलसाधन-त्वेन प्रयोगैक्यम्; तेषामुत्पत्तिवाक्येऽन्योन्यनिरपेक्षतया फलकरणताऽधिगतेरित्यानारम्भशङ्कानिरासेन प्रयोगविधि-व्यापारभेदप्रदर्शनार्थं आरम्भ इत्याह—*एकादश इति* ॥ यद्यप्युत्पत्तिवाक्ये प्रत्येकं फलसाधनताशक्तिरधिगता; तथाऽपि फलविशेषाकाङ्क्षापरिपूरकफलवाक्ये तेषामेकसाध्यसाधनत्वं तृतीययाऽधिगतम्; तथा चैकफलसाधनतया एकप्रयोगाङ्गतयाऽङ्गतन्त्रोपपत्तेस्तद्व्युत्पादनमुचितमित्यर्थः ॥

पशुतन्त्रमध्यपतितस्य पशुपुरोडाशाख्यस्य कर्मणो न पशुमात्रोद्देशानुष्ठिताङ्गजनितोपकारशालित्वम्; अनु-द्दिश्यमानपुरोडाशाद्युपकारित्वे प्रमाणाभावात्; प्रसङ्गानुपपत्तेः, तद्व्युत्पादनार्थं न लक्षणान्तरारम्भ इति शङ्का-निरासेन विधिव्यापारभेदनिरूपणार्थं आरम्भ इत्याह—*द्वादश इति* ॥ प्रधानोद्देशेनाङ्गानां विधाने त्वर्थादन्यो-

पञ्चपादिका

अभ्यधिकाशङ्काऽभावादिति ।

पञ्चपादिकाविवरणम्

ष्ठानस्याप्रयोजकसामर्थ्ययुक्तशेष्यन्तरेऽप्युपकारः प्रसङ्गी नाम दर्शितः—यथा पशुविधिप्रयुक्तानामङ्गानां पशुपुरोडाशेऽप्युपकारः । तदेवं प्रत्यध्यायमाशङ्कान्तरनिराकरणेन विध्यंशभेदो निरूपितः, तथा प्रतिपत्तव्यस्य ब्रह्मणः प्रत्यक्षादिभिरसिद्धत्वात् प्रतिपत्तिविध्ययोगाशङ्कायां तन्निराकरणायेदमारभ्यत इति, तत्राह—*अधिकाशङ्काऽभावादिति* ॥ यूपाहवनीयादिवद् ब्रह्मणः सिद्धिः, असिद्धौ वाऽऽरोपितरूपेणैवोपासनसिद्धिरित्यर्थः ॥

अत्र पूर्ववादी सिद्धान्त्येकदेशीयान् दूषयितुं वेदान्तानां विधिनिष्ठत्वमङ्गीकृत्यैव याऽभ्यधिकाशङ्का, तन्निरा-

ऋजुविवरणम्

"अभ्यधिकाशङ्काऽभावादि"त्यसम्बद्धम्; प्रतिपत्तव्याभावेन विध्यसंभवस्योक्तत्वात्, इत्याशङ्क्याभिप्रायमाह—*यूपाहवनीयादिवदिति* ॥ *ननु*—यूपाहवनीयादिवद् न ब्रह्मणः सिद्धिः, तत्र 'यूपं तक्षती"ति यूपोद्देशेन तक्षणादिविधानं न संभवति; यूपस्याप्रसिद्धत्वात्, अतः खदिरादि छिनत्ति यूपीकर्तुमित्यलौकिकाकारस्य साध्यत्वं प्रतीयते। तथाच संशयात् तस्य विनियोगदर्शनादलौकिकाकारसिद्धिः, तथा "अग्नीनादधीत"इति साध्यतया प्राप्तानामग्नीनाम्—"आहवनीये जुहोती"त्यपूर्वसंज्ञया विनियोगादाधान-पवमानेष्टिजन्यातिशयवाचित्वनिश्चयादलौकिकाकारसिद्धिः, नत्वत्र ब्रह्मणि प्रमाणमस्ति; विधिवाक्यस्य "योषितमग्निमि"त्यादिवाक्यवदग्राहकत्वात्, अन्यस्य कार्यपरत्वेन तत्र तात्पर्याभावादित्याशङ्क्याह—*असिद्धौ वेति* ॥

"अत्र केचिदि"त्यादिग्रन्थो न सिद्धान्तिनः; स्वपक्षे दूषणपरिहारस्य प्रस्तुतत्वात् तद्विहायान्यस्यासङ्गतेः, नापि पूर्वपक्षवादिनः; तेन"अभ्यधिकाशङ्के"त्यनेनैवारम्भस्य निरस्तत्वात् पुनर्निरासे पौनरुक्त्यप्रसङ्गात्, नापि तस्यैव पुनराक्षिप्य समर्थनम्; केचिद्ग्रहणानर्थक्यप्रसङ्गादित्याशङ्क्यावतारयति—*अत्र पूर्ववादीति* ॥ "यत्रापी"-

तत्त्वदीपनम्

पकारकत्वम्, जामात्रर्थं स्थापितस्य दीपस्यान्योपकारकत्ववत् । अतः प्रासङ्गिकोपकारस्यापि शास्त्रप्रमाणकत्वात् तद्व्युत्पादनार्थं लक्षणान्तरमुचितमित्यर्थः ॥ अप्रयोजकं च तत्सामर्थ्ययुक्तं चेत्यप्रयोजकसामर्थ्ययुक्तम्, तच्च तत् शेष्यन्तरं चेत्यप्रयोजकसामर्थ्ययुक्तशेष्यन्तरम्, तत्रेत्यर्थः । प्रयोजकं यत्सामर्थ्यं तेन युक्तं न संभवतीत्यप्रयोजकसामर्थ्ययुक्तम्, तच्च शेष्यन्तरं चेति तथोक्तं तत्रेति वा विग्रहः । "अग्नीषोमीयं पशुमालभेते"त्येष पशुविधिः । तत्प्रयुक्तानि यानि प्रयाजादीन्यङ्गानि, तत्कृतस्तूपकारः पशुपुरोडाशाख्येऽपि कर्मण्यविशिष्ट इत्यर्थः । दृष्टान्तमुपसंहरति—*तदेवमिति* ॥ *तत्*=तत्र पूर्वस्मिंस्तन्त्रे । *एवम्*=उक्तविषयात् । दार्ष्टान्तिकमाह—*तथेति* ॥ आम्नायस्य विधिपरत्वान्न ततोऽपि सिद्धिरिति द्रष्टव्यम् ॥

प्रतिपत्तव्याभावेन प्रतिपत्तिविध्यसंभवस्योक्तत्वात् कथमभ्यधिकाशङ्काऽभावः ? तत्राह—*यूपेति*॥ *अयमर्थः*—"यूपं तक्षति" "यूपमष्टाश्रीकरोति" "खादिरो यूपो भवती"त्यादिवाक्यपर्यालोचनया तक्षणादिसंस्कारविशेषविशिष्टो दारुविशेषो यूपोऽलौकिकोऽप्याम्नायाद् विधिपरान्निश्चीयते, यथा वाऽलौकिकोऽप्याहवनीयः—"अग्नीनादधीते"त्यादिवाक्यात् संस्कृतोऽग्निरिति निश्चीयते, यथा वा स्वर्गकामपदसमभिव्याहारादलौकिकस्याप्यपूर्वस्याधिगतिः, तथा विधिपरादपि सत्यादिवाक्याद् ब्रह्मसिद्धिरिति । द्वैतग्राह्यध्यक्षादिविरोधादाम्नायोऽन्यपरस्तत्साधयितुं नेष्ट इत्याशङ्क्याह—*असिद्धावपीति* ॥ "वाचं धेनुमुपासीते"त्यादाविवाऽऽरोपितब्रह्मोपास्तिसंभवान्नाधिकाशङ्केत्यर्थः ॥

आरम्भसमर्थनं किं पूर्वपक्षिणः ? उत सिद्धान्तिनः ? नाद्यः; तस्यानारम्भवादित्वात्, न द्वितीयः; विध्युपगमेनारम्भसमर्थनात्, सिद्धान्तिना च तदनङ्गीकरणादित्याशङ्क्याह—*अत्रेति* ॥ अत्रानारम्भचोद्ये सिद्धान्त्येकदेशीयान् दूषयितुं पूर्ववादी तेषामारम्भप्रकारं दर्शयतीति संबन्धः । सिद्धान्त्यभिमतादारम्भप्रकाराद् वैलक्षण्यमाह—*वेदान्तानामिति* ॥ विधिनिष्ठत्वमङ्गीकृत्यैव योऽयमारम्भप्रकारः, तं दर्शयतीति संबन्धः । विधि-

पञ्चपादिका

अत्र केचित्—अभ्यधिकाशङ्कां दर्शयन्तो ब्रह्मजिज्ञासां पृथक्—आरभन्ते। केयमत्राभ्यधिकाऽऽशङ्का? "चोदनालक्षणोऽर्थो धर्मः" इति ब्रुवता विधेः प्रामाण्यं दर्शितम्। अत्र केषुचिद् वाक्येषु विधिरेव न श्रूयते—"सदेव सोम्येदमग्र आसीदि"त्येवमादिषु; यत्रापि विधिः श्रूयते "आत्मा वा अरे द्रष्टव्यः" "तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमि"ति। तत्र यद्यपि कृत्या अविशेषेण विधौ स्मर्यन्ते; तथाऽपि, यो भावाभिधायी तव्यप्रत्ययः, स क्रियायां पुरुषं नियोक्तुं शक्नोति। यत्र पुनः कर्म प्राधान्येनोच्यते, तत्र द्रव्ये गुणभूतां क्रियां कार्यान्तरसम्बन्धित्वेन विधातुं न

पञ्चपादिकाविवरणम्

करणायैव तेषामारम्भप्रकारं दर्शयति—*अत्र केचिदिति* ॥ *ननु* क्वचिदेव विधिश्रवणेऽपि तदाकाङ्क्षितानुबन्धसमर्पणेन व्यवहितमपि वेदान्तवाक्यजातं तदेकवाक्यतया संबध्यते, किं सर्वत्र विधिश्रवणेन? इत्याशङ्क्याह—*यत्रापि विधिः श्रूयत इति* ॥ तत्रापि विधेरनुपपत्तिरिति भावः ॥ *ननु* भाव-कर्मणोर्विहितानामपि कृत्यप्रत्ययानां "कृत्याश्चे"ति विधौ स्मरणात् तव्यप्रत्ययेन ज्ञानं विधीयत इति, तत्राह—*तत्र यद्यपि कृत्या इति*॥ तथापीह विधिर्न सम्भवतीत्यर्थः। *ननु* गन्तव्यमिति गमनविधानवद् ज्ञानं विधीयताम्, *सत्यम्* युक्तं भावविषये तव्यप्रत्यये विधानमित्याह—*यो भावाभिधायीति* ॥ भाव इति धात्वर्थमात्रमुच्यते। तत्प्राधान्येन स्वतन्त्रफलाय विधातुं शक्यत इत्यर्थः। *ननु* कर्माभिधायितव्यप्रत्ययादपि धात्वर्थविषयो

ऋजुविवरणम्

त्यत्र वाक्यार्थप्रतीत्यभावेन साकाङ्क्षत्वादभिप्रायं दर्शयति—*तत्रापीति* ॥ भाव-कर्मणोर्विहितत्वात् तव्यप्रत्ययस्य न तत्र विध्यर्थत्वसंभव इति विवक्षितम्। अयं चाभिप्राय उत्तरग्रन्थेऽनुवादव्याजेन सूचितः। *भाव-कर्मणोर्विहितानामिति* ॥ "तत्र यद्यपि कृत्याः"इत्यस्य साकाङ्क्षत्वात्पूरयति—*तथाऽपीहेति* ॥ "यो भावाभिधायी"त्यसंबद्धम्; सर्वेषां भावाभिधायित्वात् "क्रियाप्रधानत्वादि"ति चागमको हेतुः; कर्मप्रधानस्यापि क्रियायां प्रवर्तकत्वदर्शनादित्याशङ्क्य व्याचष्टे—*भाव इति *धात्वर्थमात्रमिति* ॥ "अथ पुनर्विपरीतः"इत्यनेन सक्तुषु गुण-

तत्त्वदीपनम्

विचारस्य पूर्वत्र निर्वृत्तत्वात् पुनरारम्भो व्यर्थ इत्याशङ्क्याह—*याऽधिकाशङ्केति* ॥ "सोऽरोदीदि"त्यादिवाक्यानां विधिविधुराणामपि विध्यपेक्षितप्रतिपादकत्वेन यथा प्रामाण्यम्, तद्वत्सत्यादिवाक्यानामिति शङ्कते—*ननु क्वचिदिति*॥ "आत्मा वा अरे द्रष्टव्यः" इत्यादावित्यर्थः। *अनुबन्धेति* ॥ प्रतिपत्तिविध्यपेक्षितविषयसमर्पणेनेत्यर्थः। अपेक्षितं पूरयति—*तत्रापीति* ॥ "तयोरेव कृत्य-क्त-खलर्थाः" इति सूत्रेण भाव-कर्मणोस्तव्यप्रत्ययस्य विधानादत्र विध्यर्थत्वमित्यर्थः। तव्यप्रत्ययस्य भावाद्यभिधायित्ववद्विध्यभिधायित्वमपि युक्तमिति शङ्कते—*नन्विति* ॥ किं कृत्यप्रत्ययस्य भाव-कर्मणी अर्थः? उत ते एव? इति विकल्प्याद्यमङ्गीकरोति—*भावेति* ॥ द्वितीयं निरस्यति—*कृत्याश्चेति* ॥ तव्यप्रत्ययस्य त्रिषु विधानाविशेषेऽप्यत्र विध्यर्थत्वं न संभवतीत्याशयेनाह—*तत्राहेति* ॥ यद्यपीत्यत्रापेक्षितं पूरयति—*तथाऽपीति* ॥ "आत्मा वा अरे द्रष्टव्यः" इत्यस्य कर्मप्रधानत्वान्न विधिप्रधानत्वमित्यर्थः। कर्मविषयत्वेऽपि विध्यर्थत्वं दृष्टमिति शङ्कते—*नन्विति* ॥ गमनविधानमात्रमङ्गीकरोति—*सत्यमिति* ॥ नच तद्वदत्रापि विधिपरत्वमित्याह—*युक्तमिति*॥ "गन्तव्यमि"त्यत्र तव्यप्रत्ययात् क्रियायाः साध्यताप्रतिपत्तेर्न कर्मपरत्वम्, अस्य च कर्मपरत्वान्न विधिप्रधानत्वमित्यर्थः। सर्वप्रत्ययानां भावत्वाधिकरणवस्त्वभिधायित्वाद्भावाभिधायीति विशेषणवैयर्थ्यमाशङ्क्याह—*भाव इति धात्वर्थेति* ॥ क्रियामात्रमित्यर्थः। फलाभावे क्रियायां पुरुषनियोगानुपपत्तेः फलपरत्वे च क्रियाप्रधानत्वादित्यनुपपन्नमित्याशङ्क्याह—*तत्प्राधान्येनेति* ॥ धात्वर्थमात्रं तच्छब्दार्थः। प्राधान्येनेत्येतद् विवृणोति—*स्वतन्त्रेति* ॥ कर्मकारकासमवेतादृष्टफलायेत्यर्थः। तत्र हेतुमाह—*तत्प्राधान्येनेति*॥ कर्मपरस्यापि विधिपरत्वं दृष्टमिति शङ्कते—*ननु कर्मेति* ॥

पञ्चपादिका

शक्नोति। द्रव्यपरत्वे चानुत्पाद्यत्वात्, अविकार्यत्वात्, अनाप्यत्वात्, असंस्कार्यत्वात् , संस्कृतस्य च कार्यान्तरे

पञ्चपादिकाविवरणम्

विधिरवगम्यते—"स्वाध्यायोऽध्येतव्यः" इति, तत्राह—*यत्र पुनः कर्म प्राधान्येनोच्यत इति* ॥ तत्रापि स्वतन्त्रफलाय वा कर्म विधीयते ? किं वा कर्मकारकगतफलायेति ? न तावत् स्वतन्त्रफलायेत्याह—*तत्र द्रव्ये गुणभूतामिति* ॥ अथ कर्मकारकसमवायिफलाय विधिः ? तत्राह—*द्रव्यपरत्व इति* ॥ *ननु* आत्मनि विहितक्रियासामर्थ्यादज्ञानाधर्मादिमलापकर्षः संस्कारः स्यादिति, नेत्याह—*संस्कृतस्य चेति* ॥ तत्र "सक्तून् जुहोती"ति क्रतुप्रकरणे श्रवणात् क्रत्वङ्गता सक्तुहोमस्यावगता। तत्राङ्गानि च द्विविधानि—अर्थकर्माणि संस्कारकर्माणि च। क्रतूपकारकाण्यनाश्रित्य स्वातन्त्र्येण विहितानि प्रयाजादीन्यर्थकर्माणि, व्रीह्यादिकारकगुणभूतानि संस्कारकर्माणि। तत्र न तावत् सक्तुहोमस्यार्थकर्मता ; सक्तुद्रव्यस्य गुणभूतत्वात् प्रोक्षणादिवत्। संस्कारकर्म च द्विविधम्—विनियुक्तसंस्कारः—यथा "व्रीहिभिर्यजेते"ति विनियुक्तव्रीहीनुद्दिश्य प्रोक्षणादिसंस्कारः, कश्चिद्विनियोक्ष्यमाणसंस्कारः—यथा "आहवनीये जुहोती"ति विनियोक्ष्यमाणस्याधानेन संस्कारः ; संस्कृतस्य विनियोग इत्यर्थः। तत्र होमेन भस्मीकृतानां सक्तूनामुभयथाऽपि क्रतौ विनियोगाभावाद्

ऋजुविवरणम्

प्रधानभावो विपरीतः स्वीक्रियत इत्युक्तम्, तत्रादौ केन प्रकारेण सक्तुषु विनियोगः प्रतीयते ? प्रथमप्रतीते च काऽनुपपत्तिः ? अनुपपत्तौ सत्यां केन प्रकारेण विनियोग आश्रितः ? प्रकृते च कथं विनियोगाश्रयणम् ? इत्यपेक्षायां विवृणोति—*तत्र सक्तून् जुहोतीति क्रतुप्रकरण इति* ॥ विनियोक्ष्यमाणस्येत्युक्तेऽग्निस्वरूपमात्रे विनियोगशङ्का स्यात्, तन्निवृत्त्यर्थमाह—*संस्कृतस्येति* ॥ "तत्रापि न ज्ञायते" इत्यसंबद्धम् ; उपासनास्वरूपस्यात्मनस्तन्निर्वर्तकत्वस्य चोक्तत्वादित्याशङ्क्यावतारयति—*तत्र होमेनेति* ॥ "अथ ज्ञायते"इति व्याहतम् ; विभक्ति-

तत्त्वदीपनम्

कार्यान्तरसंबन्धित्वेन विनियोक्तुं न शक्नोतीत्युक्तम् ,तदिष्टमित्याशङ्क्य विकल्पोत्तरत्वेन व्याचष्टे—*तत्रापीति*॥ द्वितीयमुत्थापयति—*अथेति* ॥ "द्रव्यपरत्वे" इत्यादेरयमर्थः—कृत्यप्रत्ययस्य कर्मकारकगतातिशयफलार्थक्रियाविधिपरत्वेऽङ्गीक्रियमाण आत्मन्युत्पत्त्याद्यन्यतमकर्मफलं वक्तव्यम्। नच तत् संभवति। न तावदात्मन उत्पत्तिः ; अनादित्वात्, नापि विकारसंभवः ; नित्यत्वात्, नाप्याप्तिः ; सर्वगतत्वेन नित्याप्तत्वात्, नापि संस्कार्यत्वम्। संस्कारो द्विविधः—गुणाधानलक्षणो मलापकर्षलक्षणश्चेति। नाद्यः ; निर्गुणत्वादिति* द्वितीयमुत्थापयति—*नन्वात्मनीति* ॥ विनियुक्तविनियोक्ष्यमाणयोः संस्कारसंदर्शनादात्मनश्चोभयरूपत्वाभावान्न संस्कार्यत्वमित्याह—*नेत्याहेति* ॥

आत्मप्राधान्यभङ्गेनोपास्तेः प्राधान्यमास्थीयते सक्तुन्यायेनेत्युक्तम्, तत्र कोऽसौ सक्तुन्यायः ? इति वीक्षायां पूर्वतन्त्रनिर्वृत्तमर्थमाह—*तत्र सक्तूनित्यादिना* ॥ *तत्र=पूर्वतन्त्रे। भवत्वङ्गाङ्गिता, तथाऽपि कथं "सक्तून् जुहोती"त्यत्र गुण-प्रधानभाववैपरीत्यम् ? इत्याशङ्क्य वैपरीत्यं दर्शयितुमङ्गद्वैविध्यमाह—*तत्रेति* ॥ अङ्गाङ्गिनोरिति यावत्। कान्यर्थकर्माणि ? कानि चेतराणि ? इति वीक्षायामाह—*क्रतूपकारकाणीति* ॥ *अनाश्रित्य स्वातन्त्र्येणेत्यनयोर्व्याख्यान-व्याख्येयभाव इति द्रष्टव्यम्। अनूयाजादिरादिशब्दार्थः। एवमङ्गद्वैविध्यं प्रदर्श्यास्यार्थकर्मतां निराचष्टे—*तत्रेति* ॥ अर्थकर्म-संस्कारकर्मणोर्मध्य इत्यर्थः। "व्रीहीन् प्रोक्षति" "पत्न्यवेक्षत"इत्यत्र प्रोक्षणावेक्षणादिकं प्रति व्रीह्यादीनां यथा प्राधान्यम्, तथा "सक्तून् जुहोती"त्यत्र द्वितीयाश्रुत्या सक्तूनां प्राधान्यं होमस्योपसर्जनत्वं च लक्ष्यत इति नार्थकर्मत्वमित्यर्थः ॥

तर्हि संस्कारकर्मत्वं किं न स्यात् ? इत्याशङ्क्य तदसंभवं दर्शयितुं तद्द्वैविध्यमाह—*संस्कारकर्मेति*॥ विनियुक्त-विनियोक्ष्यमाणसंस्काररूपेण द्विविधत्वमित्यर्थः। विनियोक्ष्यमाणसंस्कार इत्युक्तेऽग्निमात्रस्य विनियोक्ष्यमाणत्वात्संस्कारवैयर्थ्यशङ्का स्यात्,तदर्थमाह—*संस्कृतस्येति*॥ भवत्वेवम्,ततः किमिति ? अत आह—*तत्र होमेनेति*॥

पञ्चपादिका

उपयोगाभावादसंस्कार्यत्वम् । अतः—"आत्मानमुपासीते"त्यात्मन ईप्सिततमत्वं न सम्भवति ॥ अथ पुनर्विपरीतो गुण-प्रधानभावः सक्तुन्यायेन कल्प्येत, तत्रापि न ज्ञायते—किं तदुपासनम् ? कथं चात्मना तत् क्रियत इति ? अथ ज्ञायते ज्ञानमुपासनम्, आत्मा च विषयभावेन तन्निर्वर्तयतीति, एवं तर्हि तदेवायातम्—ज्ञानेनात्माऽऽप्यत इति, तच्च कृतकरणमनर्थकम् ; नित्याप्तत्वादात्मनः । संस्कार्यत्वे

पञ्चपादिकाविवरणम्

वैयर्थ्यायोगाच्च संस्कारकर्मत्वं परित्यज्य 'सक्तूनि'ति प्राधान्यं च विहाय 'सक्तुभिरि'ति गुणभावेन कर्मप्राधान्यमुपादायार्थकर्मता निरूपिता यथा ; तथा'आत्मानमि'ति साध्यतया प्राधान्यं विहाय, 'आत्मनोपासीते'ति गुणत्वोपगमेन स्वतन्त्रफलायोपासनं प्राधान्येन विधीयतामिति शङ्कते—*अथ पुनर्विपरीत इति* ॥ तत्र यथा होमप्राधान्येऽपि सकर्मकत्वाद्धातोः सक्तव एव कर्मकारकतया भस्मीक्रियन्ते, एवमवगमस्यापि सकर्मत्वादर्थतः कर्माभावे न विधानमिति परिहरति—*तत्रापि न ज्ञायत इति* ॥ शब्दतः करणत्वेऽप्यर्थतः कर्मताऽऽत्मन एवेत्याशङ्कते—*अथ ज्ञायत इति* ॥ तर्हि कर्मकारकत्वे सत्यात्मनि कश्चिदतिशयो वक्तव्यः, तदभावान्निष्कर्मकं ज्ञानं न विधातुं शक्यत इत्याह—*एवं तर्हि तदेवायातमिति* ॥ *ननु* अवभास्यतयाऽवाप्तिरात्मनि विधेयक्रियाफलमिति, नेत्याह—*तच्च कृतकरणमनर्थकमिति* ॥ नित्यचैतन्येन प्रतीतितोऽवाप्तत्वान्न ज्ञान-

ऋजुविवरणम्

व्यत्ययेन पूर्वमात्मनः कर्तृत्वभावेन निर्वर्तकत्वमुक्तम्, अत्र तु विषयभावेन निर्वर्तकत्वकीर्तनात्, इत्याशङ्क्यावतारयति—*शब्दतः करणत्वेऽपीति* ॥ "एवं तर्ही"त्यसंबद्धम् ; नहि विषयत्वं प्राप्यत्वेन नियतम्, येनैवमुच्यते, इत्याशङ्क्याह—*तर्हि कर्मकारकत्व इति* ॥ कृतकरत्वे "नित्याप्तत्वादि"ति हेतुरुक्तः, व्यधिकरणः सः ; न ह्यात्मनो नित्याप्तत्वे सति ज्ञाततयाऽऽप्तिकरणस्य विधेयज्ञानस्य कृतकरत्वदोषः, इत्याशङ्क्य व्याचष्टे—*नित्यचैतन्येनेति* ॥

तत्त्वदीपनम्

मा भूत् तर्हि विनियोगः, इत्याशङ्क्याह—*वैयर्थ्येति* ॥ स्वतन्त्रफलसाधनत्वाश्रवणाद् दर्श-पूर्णमासप्रकरणे पाठात् फलकल्पनानुपपत्तेः, अध्ययनविध्युपात्तत्वेनानर्थक्यासंभवाच्च श्रुतिभङ्ग इत्यर्थः । *कर्मप्राधान्यमिति* ॥ क्रियाप्राधान्यमित्यर्थः । दार्ष्टान्तिकमाह—*तथाऽऽत्मानमिति साध्यतयेति* ॥ उपास्तिजनितातिशयविशिष्टतयेत्यर्थः । *स्वतन्त्रफलायेति* ॥ मुक्तिफलायेत्यर्थः । उपासनशब्दस्य प्रसिद्धार्थत्वादात्मनः कर्तृत्वस्य च प्रसिद्धत्वात् "तत्रापीति" प्रश्नानुपपत्तिमाशङ्क्याह—*तत्र यथेति* ॥ सक्तूनां शब्दतः प्राधान्यभङ्गेऽप्यर्थात् कर्मत्ववदुपास्तेरप्यात्मा कर्म ? उत न ? नान्त्यः ; उपास्तेर्ज्ञानापरपर्यायत्वाद् ज्ञानस्य च सकर्मकत्वात् कर्माभावेऽनुपपत्तेः । तथाऽऽत्मनस्ताद्दगुपासननिर्वर्तकत्वं चानुपपन्नमिति टीकार्थः । आद्यं कल्पमुत्थापयति—*शब्दत इति* ॥ जानातेः सकर्मकत्वादुपास्तेरपि तदपरपर्यायत्वात् सकर्मकत्वमित्यभिसन्धायोक्तम्—*ज्ञानमिति* ॥

आत्मनः कर्मत्व आत्मनेति तृतीया कथम् ? तत्राह—*आत्मनीति* ॥ आत्मनो विषयत्व आप्यत्वं स्यादिति कथमुक्तम् ? विषयस्याप्यत्वे नियमाभावादित्याशङ्क्याह—*तर्हीति* ॥ येन यस्यातिशय उत्पाद्यते, स तस्य विषय इति नियमादात्मनश्च विषयत्वे क्रियाजनितातिशयशालित्वं वक्तव्यम्, तत्र चोत्पत्ति-विकृति-संस्कृतीनां नित्याविकार्य-निर्गुणात्मन्यसंभवादाप्तिर्वक्तव्या, सा च न संभाव्यते, भेदाभावात्, अन्यच्चान्येन प्राप्यते । तस्मान्निष्कर्मकबोधाभावात् तद्विध्यनुपपत्तिरित्यर्थः ॥

आत्मनः स्वरूपेणाप्तत्वेऽप्यवभास्यत्वविशिष्टाकारेणाप्तिसंभव इति शङ्कते—*नन्ववभास्यतयेति* ॥ आत्मनः स्वप्रकाशाव्यभिचारित्वान्नात्र प्रकाशसंबन्धस्य क्रियाफलत्वमित्याह—*नेत्याहेति* ॥ अवभास्यत्वविशिष्टाकारेण साध्यत्वशङ्कायां नित्यावभासत्वादिति वक्तव्यम्, किमिदमुक्तं नित्याप्तत्वादिति ? तत्राह—*नित्येति* ॥ नित्येन चैतन्येन नित्यसंबन्धत्वान्न क्रियाऽधीनप्रकाशत्वमित्यर्थः । *कर्माभिधायिन इत्यादेरयमर्थः*—

पञ्चपादिका

चोपयोगाभाव उक्तः। अतो विध्यभावादविवक्षितार्था वेदान्ताः, इति धर्मजिज्ञासानन्तरं स्नाने प्राप्त इदमारभ्यते—*अथातो ब्रह्मजिज्ञासेति*॥ अनन्तरं ब्रह्म जिज्ञासितव्यम्, न स्नातव्यमित्यभिप्रायः। कर्माभिधायिनोऽपि कृत्यप्रत्ययान्नियोगसंप्रत्ययान्न नियोक्तृत्वं निराकर्तुं शक्यते; 'कटस्त्वया कर्तव्यः' 'ग्रामस्त्वया गन्तव्यः' इतिवत्। *यत्तूक्तम्—द्रव्यपरत्वे प्रयोजनाभावादानर्थक्यं नियोगस्य—इति, *तदसत्*; अविद्योच्छेदस्योपलभ्यमानत्वात्। अविद्या च संसारहेतुभूता॥

अपरे पुनरेवमारभन्ते—ब्रह्मणि प्रत्यक्षादिप्रत्ययान्तराणामसंभवात् परिनिष्पन्ने वस्तुनि प्रतिपत्तिहेतुतया सम्भावितसामर्थ्यानामप्याम्नायस्य पुनः कार्यविषयतया सुतरामसम्भवं मन्वानस्य भवति संकर्षपर्यन्ते वेदार्थविचारावसानमिति बुद्धिः, तन्निरासार्थं पुनः प्रतिज्ञातम्। इहापि सर्वेष्वेवात्मज्ञानविधानेषु कार्यनिष्ठतां वर्णयन्ति समाम्। तत्त्वावबोधश्च कार्यम्; अधिकारनियोगविषयतयाऽवगमात्—*इति*; ततस्तद्विचारार्थं शास्त्रमारब्धव्यमिति॥

पञ्चपादिकाविवरणम्

कर्मेतेत्यर्थः। *अपरे पुनरित्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः*॥ अविद्याधर्मादिनिवृत्तिः संस्कारः, नच संस्कृतस्यान्यत्र विनियोगाकाङ्क्षा; स्वयं पुरुषार्थत्वात्, पुरुषार्थसंस्कारस्य च नियोगापेक्षत्वात् तदर्थमारभ्यत इति पृथगारम्भवादिनो मतम्॥

*अपरे पुनरेवमारभन्त इत्यादेरयमर्थः—प्रतिपत्तिविध्यपेक्षितोऽपि चतुर्विधो न्यायः प्रथमतन्त्रे निरूपितः। तत्र तद्विषयस्य ब्रह्मणो निरूपणाय शास्त्रमारब्धव्यम्, तच्च न संभवति; ब्रह्मणि प्रमाणाभावादिति। *अत्रोच्यत इत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः*। *अधिकारिनियोगविषयतयेति*॥ अयमर्थः—

ऋजुविवरणम्

'नित्ये'त्यस्य व्याख्या—*नित्यचैतन्येनेति*॥ "आप्तत्वादि"त्यस्य व्याख्या—*प्रतीतितोऽवाप्तत्वादिति*॥ तत्रैकदेशिना परिहारावसरेऽविद्योच्छेदः प्रयोजनमित्युक्तम्, तत्राविद्योच्छेदस्य संस्काररूपत्वासंभवे यत्कारणमुक्तम्, तन्न परिहृतम्, तथा"अविद्या च संस्कारहेतुभूते"ति कीर्तनं व्यर्थमित्याशङ्क्याभिप्रायमाह—*अविद्याधर्मादीति*॥

"अपरे पुनरेवमि"त्यादिना ब्रह्मणि लौकिकस्य प्रमाणस्य वेदस्य चासंभवाच्छास्त्रानारम्भ इत्युक्तम्, तदनुपपन्नम्; विधिनिरूपणाय शास्त्रारम्भ इति वक्तुं शक्यत्वात्, पौनरुक्त्यं च स्यादित्याशङ्क्याभिप्रायमाह—*अपरे पुनरेवमित्या-

तत्त्वदीपनम्

"द्रष्टव्यः" इत्यत्र तव्यप्रत्ययस्य कर्मपरत्वान्न नियोगप्रतीतिरिति यत्तूक्तम्, तत्राह—*कर्मेति*॥ 'कटस्त्वया कर्तव्यः' इत्यादावुत्पत्त्यादिफलसंभवान्नियोगसंभवेऽपि नात्र तत्संभवः; प्रयोजनाभावात्, इत्युक्तमनुवदति—*यत्त्विति*॥ मलापगमरूपसंस्कारसंभवादसिद्धो हेतुरित्याह—*तदसदिति*॥ संस्कृतस्यान्यत्र विनियोगाभावान्न संस्कारः फलमित्युक्तम्, तन्निराकर्तुं लौकिकसंस्कारवैलक्षण्यमाह—*अविद्याधर्मेति*॥ भवत्वेवम्, ततः किमिति? अत आह—*नचेति*॥ सुखप्राप्ति-दुःखनिवृत्त्यन्यतरस्य पुमर्थत्वात् प्रोक्षणादिजनितसंस्कारस्याताद्दक्त्वान्नियोगानुप्रवेशित्वं युज्यते, न तथाऽत्रेत्यर्थः॥

ब्रह्मणि मानाभावाद् ब्रह्ममीमांसा नारभ्येत्यधिकाशङ्कानिरासार्थं पुनरारम्भ इत्युक्तम्—*अपरे पुनरित्यत्र*, तन्न संभवति; विधिनिरूपणायाः संभवादित्याशङ्क्याशयमाह—*अपरे पुनरिति*॥ *संकर्षपर्यन्त इत्यादेरयमर्थः*—देवताकाण्डं संकर्षशब्दार्थः। आम्नायो न ब्रह्मणि मानम्; कार्यपरत्वादित्युक्तम्, तत्र कार्यपरत्वमङ्गीकरोति—*इहापीति*॥ कर्मकाण्डवदित्यपिशब्दार्थः। *आत्मज्ञानविधानेष्विति*॥ आत्मप्रतिपादकसत्यादिवाक्येष्वित्यर्थः। *समामिति*॥ कर्मकाण्डसमामित्यर्थः। तर्हि ब्रह्मण्यप्रामाण्यमिति, तत्राह—*तत्त्वेति*॥ निर्विषयज्ञानविध्यनुपपत्त्या वेदान्तानां ब्रह्मण्यवान्तरतात्पर्यमित्यभिसन्धिः। तत्र हेतुमाह—*अधिकारीति*॥ कोऽसावधि-

पञ्चपादिका

अत्रोच्यते—नारब्धव्यम् ; गतार्थत्वात्। कथम् ? यस्तावत्प्रथम आरम्भप्रकारः कर्मणि कृत्यप्रत्ययेन नियोगसंप्रत्यय इति, तत् स्वयमेव विधायकत्वं दर्शितम्। प्रसिद्धं चैतत् "स्वाध्यायोऽध्येतव्यः" इत्येवमादीनां विधायकत्वम्। नात्राधिकाशङ्काकारणं किञ्चित्। *ननु* चतुर्विधस्यापि क्रियाफलस्यात्मन्य-

पञ्चपादिकाविवरणम्

ज्ञानस्य फलसम्बन्धोऽवगम्यते, तत्फलकामिना तदनुष्ठेयम्, नियोगाचानुष्ठानमिति फलकामिनियोगविषयतयाऽवगमादिति भावः ॥

अत्रोच्यते इत्यादिनाऽऽरम्भद्वयं पूर्ववादी निराचष्टे। यदि लोके कृत्यप्रत्ययो न नियोगं गमयतीति शङ्कते, तन्नास्तीत्याह—*तत्स्वयमेवेति* ॥ *अथ वेदे, तत्राह—*प्रसिद्धं चैतदिति* । अतः प्रथमसूत्रेणाध्ययनविधिमङ्गीकुर्वतां गत एवायं विचार इत्यर्थः। *ननु चतुर्विधस्येत्यादिरुक्तार्थः* । करणत्वेऽपि चात्मन

ऋजुविवरणम्

देरिति* ॥ "तत्त्वावबोधश्च कार्यमि"ति प्रतिज्ञायाधिकारिनियोगविषयतयाऽवगमो हेतुत्वेनोक्तः। तत्र कथं ज्ञानस्य कार्यत्वम् ? धात्वर्थस्य कार्यत्वायोगात्, ज्ञानस्य कार्यत्वे वा न नियोगकल्पनावकाशः ; अन्यस्यैव कार्यत्वात्, नापि ज्ञानस्य तद्विषयत्वसंभवः ; कोऽयमधिकारिनियोगः ? कथं च तद्विषयत्वमिति न ज्ञायते, तदर्थमभिप्रायमाह—*ज्ञानस्य फलसम्बन्ध इति* ॥ "प्रसिद्धं चे"त्यसम्बद्धम्, कथं स्वाध्यायवाक्यस्य विधायकत्वं प्रसिद्धम् ? कर्माभिधायकत्वेनाविधायकत्वशङ्कानिरासापेक्षत्वात्, "नात्राधिकाशङ्काकारणमि"त्यप्यसम्बद्धमुक्तम् ; अधिकाशङ्काया अपरिहृतत्वादित्याशङ्क्याभिप्रायमाह—*अतः प्रथमसूत्रेणेति* ॥ सक्तुन्यायेन कर्तृत्वमात्मनो भवतीत्यधिकाशङ्कापरिहारे कृते टीकाकारेण "तदपि ने"त्यादिना सक्तुन्यायासंभवेनाधिकाशङ्का प्रदर्शिता, "आत्मविषयज्ञानस्य नित्यसिद्धत्वादि"ति च हेतुरुक्तः, स च व्यधिकरणः ; न ह्यात्मविषयस्य ज्ञानस्य सिद्धत्वमात्मन उपासनाकर्तृत्वनिषेधायालम्, "इत्युक्तमि"ति च न ज्ञायते—किमुक्तम् ? कुत्रोक्तम् ? इति, एतन्मनसि निधाय व्याचष्टे—*करण-

तत्त्वदीपनम्

कारिनियोगः ? कथं वा तद्विषयत्वम् ? इति शङ्कायामाह—*ज्ञानस्येति* ॥ "तरति शोकमात्मविदि"त्यादिना ज्ञानस्य शोकनिवृत्त्यादेश्च साध्य-साधनताऽवभासते। निरधिकारज्ञाननिर्वृत्तिद्वारा कृतिव्याप्यत्वमिति ज्ञानं नोत्पत्तुमर्हतीति शोकविषयो न संभवति ; ततो "द्रष्टव्यः" इत्यत्र प्रवृत्त्युपात्तं ज्ञानं विषयत्वेन संबध्यते, नियोगस्य च साक्षात्कृतिव्याप्यत्वसंभवाद् ज्ञानस्य कार्यत्वमित्यर्थः। इतेः—"अर्थः" इत्यनेन संबन्धः। उक्तार्थस्य टीकारूढतामाह—*फलेति*॥ *अत्रोच्यत इति* उपक्रमादुत्तरग्रन्थस्य सिद्धान्तत्वमिव प्रतिभाति। नच तदुपपद्यते ; अनारम्भस्य समर्थ्यमानत्वादित्याशङ्क्याह—*अत्रोच्यत इति* ॥ किं लोके कर्माभिधायिकृत्यप्रत्ययान्नियोगाप्रतिपत्तिः ? उत वेदे ? इति विकल्प्याद्यं दूषयति—*यदीति* ॥ 'कटस्त्वया कर्तव्यः' इत्यादौ नियोगप्रतिपत्तेरित्यर्थः। द्वितीयमनूद्य प्रत्याह—*अथेत्यादिना* ॥ आशङ्कानिराकरणफलमाह—*अत इति* ॥ अध्ययनविधेर्विधायकत्वप्रसिद्धिरतःशब्दार्थः। "स्वाध्यायोऽध्येतव्यः" इत्यत्र कर्मकारकस्य वैफल्यात् सक्तुन्यायेन 'स्वाध्यायेनाधीयीते'त्यध्ययनस्य प्राधान्यमित्याशङ्क्याह—*प्रथमेति* ॥ स्वाध्यायस्याध्ययनक्रियया संस्कार्यत्वात् संस्कृतस्वाध्यायजनितविज्ञानस्य फलवत्त्वात् कर्मकारकप्राधान्येऽपि विधिपरत्ववद् "द्रष्टव्यः" इत्यत्रापि विधिपरत्वसंभवान्नाधिकाशङ्केत्यर्थः ॥

किंच कृत्स्नाध्ययनानन्तरं वेदार्थविचारकर्तव्यतां सूत्रयन् जैमिनिर्ज्ञानकाण्डार्थस्यापि विचार्यतां प्रतिजज्ञे, विचारप्रयोजकस्याविशेषादित्याशयवानाह—*प्रथमेति* ॥ आत्मनि क्रियाजनितातिशयानिरूपणान्न कर्मकारकत्वम्, ततः कथमधिकाशङ्काऽभावः ? इति शङ्कायां कर्मकारकत्वासंभवेऽप्यात्मनः करणत्वकल्पनाद् नाधिकाशङ्काऽवतार इत्यनारम्भवादिनोक्ते "तदपि ने"त्यत्र कर्मकारकत्वं निरस्तम्, तदिष्टमेव ; आत्मनः करणत्वोपगमात्, इत्याशङ्क्याह—*करणत्वेऽपीति* ॥ जानातेः सकर्मकत्वात् शब्दतः करणत्वेऽप्यर्थत आत्मनः कर्मकारकत्वमुपगन्तव्यम्,

पञ्चपादिका

संभव उक्तः । यद्येवं सक्तुन्यायो भविष्यति ? तदपि न ; आत्मविषयज्ञानस्य नित्यसिद्धत्वादित्युक्तम् । सिद्धस्यैव पुनरभ्यासो विधिनिमित्त उपासनाख्यो भविष्यति ; अभ्युदयफले हिरण्यधारणवत् । *ननु* न विधानतोऽप्यात्मविषयज्ञानसन्तानः कर्तव्यः, स तु नित्यमात्मनि जाग्रतः सिद्धः ? एवं तर्ह्यर्थाविरुद्धेषु कालेष्वात्मन्येव चेतःसमाधानं भविष्यति ॥

पञ्चपादिकाविवरणम्

एव कर्मकारकत्वे स्वतोऽपरोक्षतया नित्यसिद्धस्य विधेयक्रियाजन्यप्रतिभासायोगादकर्मत्वान्निष्कर्मकं ज्ञानं न विधातुं शक्यमित्युक्तमित्याह—*तदपि नेति* ॥ आत्मनि च चतुर्विधफलाभावादकर्मत्वेऽपि कर्तृसमवायिमोक्षतदवभासिज्ञानसन्ताननियमविधिः स्यात् ; यथा "हिरण्यं बिभृयादि"ति पक्षेऽप्राप्तस्य नियमविधिरभ्युदयः, तद्वदित्याह—*सिद्धस्यैवेति* ॥ *ननु* अवस्थात्रयेऽपि ज्ञानसन्तानाविच्छेदान्न नियमविधिरित्याह—*ननु न विधानतोऽपीति* ॥ तर्ह्यनात्मप्रतिभासनिवृत्तये परिसङ्ख्याविधिरदृष्टार्थः स्यादित्याह—*एवं तर्हीति* ॥ अतो गतार्थत्वान्नाधिकाशङ्केति भावः । सत्यपि ज्ञानविधाने प्रयोजनाभावान्न शास्त्रारम्भ इत्याह—*यत्पुनरात्म-

ऋजुविवरणम्

त्वेऽपि चात्मन इति*॥ "सिद्धस्यैव पुनरि"त्यसंबद्धम् ; अकर्मकत्वेन पूर्वं विधिनिराकरणं कृतम्, अत्रापि कर्मत्वाभावेनैव विध्यभावः सिध्यति । "विधिनिमित्तः" इत्यप्यसंबद्धमुक्तम्, त्रिकालाप्राप्तविषयत्वाद् विधेः, विषमश्च दृष्टान्तः ; हिरण्यधारणे विध्यभावात्, फलवत्त्वाच्चेत्याशङ्क्यावतारयति—*आत्मनि च चतुर्विधफलाभावादिति* ॥ अधिकाशङ्कानिराकरणावसरे कथंचिद् विधित्वसमर्थनमसङ्गतमित्याशङ्क्याह—*अतो गतार्थत्वादिति* ॥ *ननु*—पूर्वं निवर्त-

तत्त्वदीपनम्

नच तदुपपद्यते ; आत्मनः स्फुरद्रूपत्वात्, ज्ञानक्रियाजन्यस्फुरणातिशयशालित्वायोगात् ; ततो न ज्ञानविधिरित्यधिकाशङ्का युक्तेत्यर्थः । स्वरूपज्ञानस्याप्यात्मव्यवहारहेतुत्वात् तद्विषयत्वमात्मन उक्तं टीकायामिति द्रष्टव्यम् ॥

'अहमि'त्यात्मज्ञानस्य सिद्धत्वात् तत्र विधिर्व्यर्थः, ततश्च "सिद्धस्यैवे"त्यादिग्रन्थानुपपत्तिरित्याशङ्क्याह—*आत्मनीति*॥ *हिरण्यं बिभृयादिति*॥ "तस्मात् सुवर्णं हिरण्यं धार्यमि"त्यत्र हिरण्यधारणं किं क्रत्वङ्गतया विधीयते ? आहो यद्धिरण्यम्, तद्धार्यमिति धारणसंस्कारः ? आहो पुरुषार्थो हिरण्यधारणविधिः ? तत्र नान्त्यः संभवति ; फलस्याश्रुतत्वात्, ततः क्रत्वङ्गतया धारणविधिपरत्वम्, संस्कारविधिपरत्वं वेति प्राप्ते, प्रतिविधीयते—तत्र न तावत् संस्कारविधिपरत्वम् ; क्रत्वङ्गहिरण्याप्रतिपत्तेः । न खलु हिरण्यपदमात्रात् क्रत्वङ्गताप्रतीतिः ; लोकेऽपि हिरण्यसद्भावात् । नच कृत्यप्रत्ययबलाद् हिरण्यस्य संस्कार्यता ; संस्कारस्य स्वरूपेण फलत्वाभावात् । नच क्रत्वनुप्रवेशितया फलवत्त्वम् ; तत्र मानाभावात् । नच क्रत्वङ्गतया हिरण्यधारणविधेः फलवत्त्वम् ; कंचित्क्रतुमनारभ्याम्नानात् ; तथा सति पुरुषार्थोऽयं विधिरिति श्लिष्यते । नच फलाश्रवणम् ; "दुर्वर्णोऽस्य भ्रातृव्यः" इत्याद्यर्थवादबलाद् भ्रातृव्यदुर्वर्णतायाः स्वस्य शोभनरूपतायाश्चाधिगतेः । तस्मात् पुरुषार्थत्वम् ; तथा चात्मज्ञानाभ्यासोऽपि मोक्षार्थं विधीयते द्रष्टव्य इत्यादिनेत्यर्थः ॥

अभ्यासस्य सिद्धत्वेऽपि विधेयत्वं युज्यते, हिरण्यधारणवत् । ततश्च "ननु न विधानतः" इत्याद्यनुपपन्नमित्याशङ्क्याह—*नन्ववस्थेति* ॥ सुषुप्तावप्यविद्योपहितचैतन्यप्रतिभासादवस्थात्रयेऽपीत्युक्तम्, द्वयोः साधनयोः पक्षेऽप्राप्तावन्यतरनिवृत्तिफलको नियम आश्रीयते, नचात्र पक्षेऽप्राप्तिरस्ति ; आत्मज्ञानस्य सदा सिद्धत्वादित्यर्थः । आत्मनि नित्यं जाग्रतः पुरुषस्य ज्ञानसंतानो नित्यसिद्ध इति संबन्धः । 'आत्मनी'ति विषयसप्तमी । ज्ञानविध्यसंभवे चोदिते, आत्मन्येव चेतःसमाधानाभिधानं चोद्याननुरूपमित्याशङ्क्य, पक्षान्तरप्रदर्शनार्थत्वान्न विरोध इत्याह—*तर्ह्यनात्मेति* ॥ व्यवहारभङ्गशङ्कां निरस्यति—*अर्थाविरुद्धेष्विति* ॥ गात्रयात्रानिर्वाहकसमयातिरिक्तसमये-

पञ्चपादिका

यत्पुनरात्मज्ञानादविद्योच्छेदस्तदुच्छेदात् संसारनिवृत्तिः फलमित्युपन्यस्तम्, तदसत्; अहमित्यात्मानं नित्यमेव जानाति सर्वो लोकः। न च संसारो निवृत्तः। *अथ* पुनरहंप्रत्ययावसेयादन्यदेवात्मरूपं पराकृतभोक्तृ-भोक्तव्य-भोगग्रन्थि ज्ञेयत्वेनात्मज्ञानविधिना ज्ञाप्यत इति, *तदसत्*; विधिर्हि सामान्यतःसिद्धस्य क्रियात्मनो विशेषसिद्धौ प्रभवति, नात्यन्तासिद्धसद्भावे। तद् यदि नाम

पञ्चपादिकाविवरणम्

ज्ञानादित्यादि* ॥ नचानर्थनिवृत्तौ स्वयमहेतुरपि ज्ञानसन्तानो विधानादनर्थं निवर्तयति; विशेषाभावादित्यर्थः। तर्ह्यलौकिकात्मतत्त्वज्ञानमविद्यादिदोषनिवृत्तिफलं विधीयतामित्याशङ्कते—*अथ पुनरहंप्रत्ययावसेयादिति* ॥ न; अत्यन्तमसिद्धमुद्दिश्य विधानानुपपत्तेरित्याह—*तदसत्; विधिर्हीति* ॥ यथा सामान्यप्रसिद्धं यागमुद्दिश्य पूर्वानुभूतयागव्यक्तिसदृशं व्यक्त्यन्तरं बुद्धिस्थमेव विधीयते, एवमलौकिकात्मज्ञानं सामान्यतः प्रसिद्धमुद्दिश्य पूर्वानुभूतज्ञानव्यक्तिसदृशं व्यक्त्यन्तरं बुद्धावाकलय्य तत् कर्तव्यतया विधेयमित्यर्थः। *ननु* ज्ञानसामान्यस्य लोके सिद्धत्वात् तदुद्देशेन विधाने तद्व्यक्तित्वेनालौकिकात्मज्ञानं कर्तव्यतया प्रतीयतामिति, नेत्याह—*तद्यदि नाम ज्ञानमिति* ॥ तादृगात्मज्ञानस्य ज्ञानसामान्यव्यक्तित्वेनाप्रसिद्धत्वात् तादृशं

ऋजुविवरणम्

कत्वसामर्थ्याभावात् संसारानिवृत्तिः, विधानोत्तरकालं तु निवर्तक इत्याशङ्क्य व्याचष्टे—*नचानर्थनिवृत्ताविति* ॥ "तदसत्; विधिर्ही"त्यनेन नालौकिकात्मज्ञानं निराकर्तुं शक्यम्; तस्यापि ज्ञानत्वाकारेण सिद्धत्वात्, अथ सामान्यतः सिद्धिशब्देन व्यक्तिसिद्धिरेव विवक्षिता, न तर्हि विधेयत्वं संभवति; प्रसिद्धत्वादेव। नाप्येवंविधे विधानं दृश्यते, इत्याशङ्क्य व्याचष्टे—*यथा सामान्यप्रसिद्धमिति*॥ *अलौकिकात्मज्ञानमिति*॥ विधिस्वाभाव्यात् प्रसिद्धविलक्षणव्यक्तिलाभ इत्यर्थः। "तद्यदि नामे"त्यनेन कथं विधानायोग्यत्वमुक्तम्? न ह्याकाशमुष्टिहननकल्पत्वमस्यास्ति; अनुष्ठातुं शक्यत्वादित्याशङ्क्य व्याचष्टे—*तादृगात्मज्ञानस्येति* ॥

तत्त्वदीपनम्

ष्वित्यर्थः। अधिकाशङ्कानिराकरणं प्रक्रम्य विधित्वसमर्थनमेव कृतम्; तत्र को हेतुरित्याशङ्क्याह—*अत इति* ॥ विधिसंभवोऽतःशब्दार्थः। विध्यभावादविवक्षितार्थत्वाशङ्कायां विधिं समर्थयता शङ्कैव निराकृतेति न विरोध इत्यर्थः। तर्हि विधिनिरूपणार्थमेवारम्भ इत्याशङ्क्याह—*गतार्थत्वादिति* ॥

शङ्कावादिनिराकरणस्य प्रस्तुतत्वात् तेन चाविद्याद्युच्छेदस्यानुपन्यस्तत्वात् तन्निराकरणमनुपपन्नमित्याशङ्क्य, तत्र पूर्वपक्षवत् सिद्धान्तोऽप्यसमञ्जस इत्येतत् टीकाकृतोच्यत इत्याह—*सत्यपीति* ॥ कर्मप्रधानात् कृत्यप्रत्ययादपि नियोगप्रत्यय इत्येकदेश्युक्तमङ्गीकृतम्—*सम्प्रतीति*॥ अत्र किं लौकिकात्मज्ञानादविद्यानिवृत्तिः? उतालौकिकात्मज्ञानात्? नाद्यः; अनुपलब्धेरिति टीकार्थः। लौकिकात्मज्ञानस्य स्वरूपेणानिवर्तकत्वेऽपि विधीयमानाकारस्य निवर्तकत्वशङ्कां निरस्यति—*नचानर्थेति* ॥ विधीयमानस्यापि संसारिविषयत्वसविशिष्टमिति न निवर्तकत्वम्; विरुद्धयोर्निवर्त्य-निवर्तकतादृष्टेरित्यर्थः। निर्विशेषात्मज्ञानं विधीयत इत्युक्तम्—"अथ पुनरि"त्यत्र, तदसंभवि, आत्मनि संसारभावात, अनात्मनि च तदसंभवाद् न तन्निवृत्तिफलत्वं निर्विशेषात्मज्ञानस्येत्याशङ्क्य वस्तुत आत्मनि दोषासंभवे कल्पितदोषनिबर्हणार्थं, विधिरर्थवानित्याह—*तर्ह्यलौकिकेति* ॥

अप्रसिद्धेर्विधिर्न संभवतीत्युक्तम्—"तदसदि"त्यत्र, तत् कस्मादिति वीक्षायामाह—*नात्यन्तमिति* ॥ ज्ञानस्योद्देश्यत्वासंभवादित्यर्थः। तत् कस्मादिति? अत्राह—*यथेति* ॥ आत्मज्ञानेऽपि सामान्यप्रसिद्धिरस्त्येवेति शङ्कते—*ननु ज्ञानेति* ॥ अलौकिकात्मज्ञाने कथं तर्हि कर्तव्यता सिध्येदिति? अत आह—*तद्व्यक्तित्वेनेति* ॥ नात्र सामान्यप्रसिद्धिरित्याह—*नेत्याहेति* ॥ लौकिकात्मज्ञानस्य सिद्धत्वात् तत्र कथं सामान्यसिद्ध्यभावः? इत्याशङ्कान्तरस्य सिद्धत्वमसिद्धत्वं वेति विकल्प्यान्त्यं प्रत्याह—*तादृगात्मेति* ॥ *प्रथममुत्थापयति* ॥ *अथेति* ॥

पञ्चपादिका

ज्ञानं लोके सिद्धम्, तथाऽपि निरस्तप्रपञ्चात्मविषयमसिद्धमाकाशमुष्टिहननवन्न विधातुं शक्यम्। अथ तादृगात्मज्ञानं सिद्धम्? किं विधिना? यदपि मतान्तरम्—प्रत्यक्षादेरगोचरत्वात् शास्त्रस्य च कार्यार्थत्वात् संकर्षपर्यन्त एव विचारे वेदार्थपरिसमाप्तौ प्राप्तायां वेदान्तेष्वपि कार्यनिष्ठता समाना, ब्रह्मतत्त्वावबोधश्च कार्यम्; अधिकारिनियोगविषयतयाऽवगमात्; अतस्तद्विचाराय शारीरकारम्भः—इति, तदप्युक्तेन न्यायेन ब्रह्मावगमस्य सिद्धत्वेऽसिद्धत्वे च कार्यत्वासंभवेन प्रत्युक्तम्॥

अपरं मतम्—सत्यं कार्यविषयो वेदः, न तु तावन्मात्रे; तस्मिन् सति यो योऽर्थोऽव-

पञ्चपादिकाविवरणम्

ज्ञानं कर्तव्यतया बुद्धावारोपयितुं न शक्यमित्यर्थः। अथ तादृगात्मज्ञानं सिद्धम्, किं स्वात्मनि? पुरुषान्तरे वा? पुरुषान्तरे चेत्, अन्यस्याधिकारिणस्तदप्रतिपत्तेर्न तादृशं व्यक्त्यन्तरं कर्तव्यतया बुद्धावारोपयितुं शक्यम्। अथ स्वात्मनि? तत्राह—*किं विधिनेति*॥ *यदपि मतान्तरमित्यादिरुक्तार्थः*। *तद्विचाराय=ब्रह्मविचाराय शास्त्रारम्भ इत्यर्थः॥

अपरं मतमिति॥ स एव प्रतिपत्तिविधिवादी स्वपक्षमुपपादयति—सत्यम्, कार्यपरादपि वेदाद् ब्रह्मणोऽपि प्रतिपत्तेर्युक्तः प्रतिपत्तिविधिरित्याह—*नतु तावन्मात्र इति*॥ *ननु*—विरुद्धमिदम्, अर्थान्तरपरात् शब्दादर्थान्तरप्रतिपत्तिरिति, तत्राह—*तस्मिन् सतीति*॥ विधिप्रमाणाद्विधिसंसृष्टतयाऽन्येऽपि

ऋजुविवरणम्

"अतस्तद्विचाराये"त्यत्र तच्छब्देन तत्त्वावबोधस्य निर्देश इति शङ्का स्यात्; प्रकृतत्वात्, तथा सत्यारम्भ एव न सिध्येत्; तदर्थं व्याचष्टे—*ब्रह्मविचारायेति*॥

अपरं मतमित्यादावङ्गीकृत्य विधिं पुनः। ब्रह्मण्यपि प्रमाणत्वं वेदान्तानां प्रदर्शितम्॥
अपरग्रहणात् तत्र मतान्यत्वं प्रतीयते। अयुक्तं तन्मतान्यत्वं प्रत्यभिज्ञाविरोधतः॥
पौनरुक्त्येन पूर्वस्य कीर्तनं नैव युज्यते।

तस्मान्न मतान्तरम्; पूर्वोक्ताद्विशेषाभावात्, पूर्वत्रापि "ब्रह्मतत्त्वावबोधश्च कार्यम्, अतस्तद्विचाराये"ति वदता ब्रह्मण्यपि प्रामाण्यमङ्गीकृतमेव; अन्यथा ब्रह्मणि प्रमाणाभावाद् न शास्त्रारम्भ इति शङ्काया अपरिहारात्, नापि तस्यैव कीर्तनम्; अनवसरत्वात्, पुनरुक्तत्वप्रसङ्गाच्चेत्याशङ्क्य ग्रन्थसमुदायस्य तात्पर्यमाह—*अपरं मतमिति*॥ *स एवेति*॥ पूर्वं ब्रह्मणि प्रामाण्यमस्तीत्यभिप्रेतम्, नतु तदित्थमिति प्रदर्शितम्; इदानीं प्रामाण्यप्रकारप्रदर्शनेन तस्यैव पुनरुपपादनं क्रियत इति भावः। *ननु*—अवगमस्य कार्यत्वासंभवेन तन्मतं दूषितम्, पुनस्तन्मतसमर्थने क्रियमाणे तद्दूषणपरिहारेण प्रतिपत्तिविधिसंभवः प्रदर्शनीयः, "कार्यविषयः" इति च व्यर्थम्; प्रतिपत्तिविधिसमर्थनस्य प्रस्तुतत्वाद् न तद्विहायान्यस्यापि वेदार्थत्वप्रदर्शनमुपयुज्यते, नापि प्रतिपत्तिविधिसंभवः; प्रतिपत्तव्याभावात्, वेदस्य कार्यनिष्ठत्वाभावात्, इत्याशङ्क्याह—*सत्यं कार्यपरादपीति*॥ कथमवगतिमात्रेण वेदार्थत्वम्? नान्तरीयके व्यभिचारात्, अस्यानिष्टत्वाच्च, प्रमाणादन्यस्य प्रमित्ययोगादित्याशङ्क्याह—*विधिप्रमाणा-

तत्त्वदीपनम्

विकल्पासहत्वान्नैतदित्याह—*किं स्वात्मनीति*॥ अवबोधस्य प्रकृतत्वात् "तद्विचाराये"त्यत्र तच्छब्देन तद्ग्रह इति शङ्का स्यात्, तदर्थमाह—*ब्रह्मविचारायेति*॥ कार्यशेषत्वेन वेदान्तानां ब्रह्मणि प्रामाण्यमित्युक्तम्, *अपरं मतमि*त्यत्र, तदयुक्तम्, पौनरुक्त्यप्रसङ्गादित्याशङ्क्य तत्प्रपञ्चनरूपत्वान्मैवमित्याह—*अपरं मतमिति*॥ *स एवेति*॥ द्वितीयासंभवादित्यर्थः। *ननु* "तावन्मात्रे" इत्यत्र कार्ये ब्रह्मणि च प्रामाण्यमुक्तम्, तदयुक्तम्; उभयत्र प्रामाण्यकल्पकाभावादित्याशङ्क्याह—*सत्यमिति*॥ निर्विषयप्रतिपत्तिविध्यसंभवाद् ब्रह्मणोऽपि प्रामाण्यमित्यर्थः। वाक्यभेदप्रसङ्गाद् नोभयत्र तात्पर्यकल्पनमिति शङ्कते—*ननु विरुद्धमिति*॥ वाक्यभेदप्रसङ्गं निरस्यति—*विधिप्रमाणादिति*॥ स्वतन्त्रार्थ-

पञ्चपादिका

गम्यते, स स वेदार्थः, यथा रूपे सति चक्षुषः प्रवृत्तिः, न च रूपमात्रं चक्षुषो विषयः, किंतु तस्मिन् सति द्रव्यमपि ; एवमिहापि वस्तुतत्त्वमपि विषयः। कथं तत्? *उच्यते* ;—"इदं सर्वं यदयमात्मे"ति न तावत् सर्वरूपताऽऽत्मन उपदिश्यते। यदि सर्वरूपताऽऽत्मन उपदिश्येत, ततः सर्वस्याचेतनत्वात् तद्रूपत्वे बोद्धृत्वहानौ बोधकत्वं शब्दस्य हीयेत ; अतः सर्वस्यात्मस्वभावता

पञ्चपादिकाविवरणम्

पदार्थास्तदपेक्षिताः प्रमीयन्त इत्यर्थः। यथा रूपविषयस्य चक्षुषस्तत्संसर्गि सर्वं विषय इति दृष्टान्तमाह—*यथा रूपे सतीति* ॥ *ननु*—"द्रष्टव्यः" इत्यादिना नापरोक्षज्ञानं विधेयम् ; सुखसंवेदनतया स्वर्गादिवत् पुरुषार्थस्याविधेयत्वात्, नापि शाब्दज्ञानम् ; तत्र विधेरश्रवणादिति चोदयति—*कथमिति*॥ अस्ति शाब्द-ज्ञाने विधानमित्याह—*उच्यत इति* ॥ *ननु* इदं वाक्यमात्मनोऽनात्मरूपताविधानपरम् ; अतोऽ-पुरुषार्थत्वान्न विधेयमिति, नेत्याह—*न तावत् सर्वरूपतेति* ॥ प्रतिपन्नमुद्दिश्याप्रतिपन्नात्मरूपस्यैव विधानादित्यर्थः। दूषणान्तरमाह—*यदि सर्वरूपताऽऽत्मन इति* ॥ किं तर्हि विधीयत इति ? अत आह—*अतः सर्वस्येति*॥ "नेति ने"त्यादिवाक्यपर्यालोचनयाऽप्यनात्मोपमर्देनात्मैव विधेय इत्याह—*अनात्म-स्वरूपविलयेनेति* ॥ *ननु* आत्मनोऽद्वितीयत्वप्रतिपादनपरमिदं वाक्यम्, न तत्र ज्ञाने वस्तुनि वा

ऋजुविवरणम्

दिति* ॥ "यथा रूपे सती"ति विषम इवाभाति ; अन्यप्रमाणादन्यप्रमितौ दृष्टान्तो दर्शनीयः, अत्र रूपे सति वस्त्वन्तरे प्रवर्तमानस्य स्वविषय एव प्रवृत्तेरित्युक्तत्वादित्याशङ्क्यावतारयति—*यथा रूपविषयस्येति* ॥ "कथमि"त्यनेन प्रकृतविषय आक्षेपः प्रश्नो वा क्रियत इति प्रतिभाति, प्रकृतं च ब्रह्मण्यपि प्रामाण्यम्, प्रतिपत्तिविधिसंभवश्च, न तावत् तदुभयाक्षेप-प्रश्नावुच्येते "तदुच्यते" इत्यारभ्यान्यस्यैव निरूपितत्वात्, नापि परिहारपर्यालोचनयाऽर्थान्तरविषयत्व-कल्पना ; असंगतत्वप्रसङ्गादित्याशङ्क्यावतारयति—*ननु द्रष्टव्य इत्यादिनेति* ॥ तत्र विधेरिति* ॥ शाब्दज्ञानं कर्तव्य-मित्यश्रवणादित्यर्थः। "उच्यते" इत्यादिना प्रतीकग्रहणेन सर्वस्यात्मस्वभावताविधानप्रदर्शनमसंगतम् ; प्रकृतचोद्यस्या-परिहारात्, इत्याशङ्क्यावतारयति—*अस्ति शाब्देति ॥ न विधेयमिति* ॥ आत्मनोऽनात्मरूपत्वं तज्ज्ञानं वा न विधेयमित्यर्थः ॥ *ननु*—"यदयमात्मे"ति यच्छब्दसम्बन्धादात्मनोऽनुवादेनानात्मरूपताविधानं प्रतीयते, इत्या-शङ्क्याभिप्रायमाह—*प्रतिपन्नमिति* ॥ "यदिदं सर्वं तदयमात्मे"ति वचनव्यक्तिरित्यर्थः। "अनात्मस्वरूपविलयेन ही"त्यत्र 'हि'शब्दश्रवणात् पूर्वोक्तार्थे हेतुरनेनोक्त इति प्रतिभाति, तदसम्बद्धम्, अनात्मोपमर्देनात्म-नोऽवगतिदर्शनाभावात्, व्यर्थो हेतुः ; पूर्वमेव हेतोरुक्तत्वादित्याशङ्क्यावतारयति—*नेति नेतीत्यादि* ॥ न्यायत

तत्त्वदीपनम्

प्रतीत्यनङ्गीकरणान्न वाक्यभेद इत्यर्थः। "यथा रूपे सती"त्यत्र चक्षू रूपं विषयीकुर्वद् द्रव्यमपि विषयीकरोतीत्युक्त्या घटव्यापि गगनमपि गमयतीति प्रतिभानं स्यात्, तन्निरस्यति—*यथेति* ॥ कथंशब्दसूचितामनुपपत्तिं दर्शयति—*ननु द्रष्टव्य इति* ॥ ज्ञानविध्यसंभवचोद्ये सर्वस्यात्मत्वमुच्यते, तत् प्रस्तुताननुसारीत्याशङ्क्याह—*अस्तीति* ॥

"इदं सर्वं यदयमात्मे"त्यत्रात्मनोऽनात्मरूपत्वं विधीयते ? उतानात्मनस्तद्रूपत्वम् ? नाद्यस्तावद्युज्यत इत्याह—*नन्विदमिति* ॥ न द्वितीयोऽपि ; विरोधादित्यर्थः। आद्यः पक्षोऽनङ्गीकारपराहत इत्याह—*नेत्याहेति* ॥ अनुपदेशे हेतुमाह—*प्रतिपन्नमिति* ॥ अनात्मन आत्मताऽपि न विधेया ; विरोधादित्याशयेन शङ्कते—*किं तर्हीति* ॥ आरोपितरूपपरिहाराय तस्यात्मत्वं प्रतिपाद्यत इत्याह—*अत आहेति* ॥ "नचैत-दुत्प्रेक्षामात्रम् ; दृष्टत्वादि"त्युक्तं टीकायाम्, तत् स्पष्टयति—*नेतीति* ॥ "इदं सर्वमि"त्यत्र विध्यश्रवणेऽपि पूर्वोत्तर-वाक्ययोर्विधिश्रवणाशङ्कां निरस्यति—*नन्वात्मन इति* ॥ वाशब्दश्चार्थे। अश्रुतस्यापि विधेः कल्पनायां दृष्टान्त-

पञ्चपादिका

विधीयते। अनात्मस्वरूपविलयेन हि वस्तुनोऽवगतिर्दृष्टा। *ननु* अत्र विधिर्न श्रूयते; *कल्प्यतां तर्हि* विधिः। किं प्रतीते विध्यर्थे विधिः कल्प्यते? उताप्रतीत इति? यदि प्रतीते कल्प्यते, कल्पना-वैयर्थ्यम्। अर्थप्रतीत्यर्थं हि शब्दो मृग्यते। प्रतीतेऽर्थे शब्दं कल्पयता किं कृतं स्यात्? अथाप्रतीत

पञ्चपादिकाविवरणम्

विधिरवगम्यत इत्याह—*नन्वत्र विधिर्न श्रूयत इति* ॥ "पूषा प्रपिष्टभागः" इत्यादाविव कल्प्यतामित्याह—*कल्प्यतां तर्हीति* ॥ *किं प्रतीते विध्यर्थ इत्यादेरयमर्थः*—कालत्रयानवमृष्टेऽनुष्ठानयोग्ये कर्मणि शब्दसामर्थ्यात् प्रतिपन्ने तदन्यथानुपपत्त्या च कर्तव्यरूपे नियोगेऽवगते विधायकपदार्थे पश्चाद्विधिर्विधायकपदं कल्प्यते? किं वा एवंविधार्थेऽप्रतिपन्नेऽननुष्ठेये वस्तुमात्रे च प्रतिपन्ने विधिपदं कल्प्यत इति? प्रतीते चेत्, प्रमितयेऽनुवादाय वा पदं कल्प्यते? नानुवादेन प्रयोजनम्। प्रमितये चेत्, तत्राह—*प्रतीते कल्पना-वैयर्थ्यमिति* ॥ प्रतिपादकतया लिङादिपदकल्पनावैयर्थ्यमित्यर्थः। अननुष्ठेयवस्तुप्रतिपत्तौ विधिकल्पना-हेत्वभावान्न तत्र पदादनुष्ठेयप्रतिपत्तिरित्याह—*अथाप्रतीत इति* ॥ अर्थवादसंसर्गेष्वपि कल्पनाप्रसङ्गादिति

ऋजुविवरणम्

उक्तेऽर्थे प्रमाणदर्शनं क्रियत इति भावः। "प्रतीते विध्यर्थे"इत्यादिविकल्पोऽनुपपन्नः; विध्यर्थे ज्ञापकाभावे ज्ञानशङ्काया असंभवित्वात्, तथा कोऽयं विध्यर्थः? कश्च विधिः? इति न ज्ञायते; विप्रतिपत्तिदर्शनात्, इत्ये-तन्मनसि निधाय व्याचष्टे—*इत्यादेरयमर्थ इति* ॥ प्रमितेऽप्यर्थे शब्दकल्पनादर्शनात् कथं व्यर्थत्वम्? इत्या-शङ्क्य व्याचष्टे—*प्रतिपादकतयेति* ॥ "अथाप्रतीते"इत्यनेन द्वितीयपक्षेऽपूर्वं कौशलमिति वदतः किमत्रापूर्वत्वं विव-क्षितमिति न ज्ञायते, तदर्थमवतारयति—*अननुष्ठेयेति* ॥ *ननु*—संसर्ग एव विधिकल्पको दृष्टः, तत् कथं कल्पनाहेत्वभावः? इत्याशङ्क्याभिप्रायमाह—*अर्थवादेति* ॥ "नन्वश्रूयमाणे"त्यादि चोद्यं व्यर्थम्; न्यायत इह कल्पनानुपपत्तेर्दर्शितत्वात्, न ह्यन्यत्र कल्पनाप्रदर्शनेनात्र दोषापगमो भवति; नाप्यत्र दोषाभावे तद्विषय-

तत्त्वदीपनम्

माह—*पूषेति* ॥ प्रपिष्टरूपो भागोऽस्येति प्रपिष्टभाग इति समाससामर्थ्याद् द्रव्य-देवतासंबन्धः प्रतीयते, तस्य चापूर्वत्वात् पूषोद्देशेन पिष्टद्रव्यत्यागः कर्तव्य इति विधिपदं यथा कल्प्यते, तथाऽत्रापीत्यर्थः ॥

विधिपदकल्पनात् प्राग्विध्यर्थज्ञापकाभावात् "किं प्रतीते" इत्यादिविकल्पोऽनुपपन्नः, तथा विध्यर्थप्रतिपत्तौ विधिकल्पनं वृथेत्याशङ्क्य तात्पर्यमाह—*किं प्रतीत इति* ॥ पचतीत्यादौ क्रियाप्रतिपत्तावपि न विधिपदकल्पनम्, तत्राह—*कालत्रयेति* ॥ नियोगस्य विधित्वात् कथं तदर्थत्वमुक्तं टीकायाम्? तत्राह—*विधायकेति* ॥ विधिशब्दस्यार्थपरत्वं निरस्यति—*विधिरिति* ॥ कल्पकाभावेन कल्पनापत्तिशङ्कां निरस्यति—*अननुष्ठेय इति* ॥ "इदं सर्वमि"त्यादिवाक्यात् प्रतीयमानस्य पदार्थसंसर्गस्य क्रियामन्तरेणानुपपत्तेः सा तावत् प्रतीयते, सा च नियोगमाक्षिपति, ततस्तद्व्यवहाराय विधिपदं कल्प्यते? उत पदार्थसंसर्गमात्रस्य तत्कल्पकत्वम्? इति विकल्पार्थः। अधिष्ठानबोधनान्तरीयकसिद्धेरभावस्य, यथाऽनुवादकं 'नेदं रजतमि'ति वचनम्, तथाऽनुवादाय विधिपदकल्पनमित्य-भिसन्धायोक्तम्—*अनुवादायेति* ॥ *नानुवादेनेति* ॥ अनन्यथासिद्धप्रयोजनं विनाऽनुवादकल्पनाऽयुक्तेत्यर्थः। निर्विकल्पकज्ञानेन वस्तुनि दृष्टेऽपि यथा सविकल्पकज्ञानापेक्षा, तद्वदत्रापीत्याशङ्क्याह—*प्रतिपादकतयेति* ॥ तत्र प्रमेयभेदसद्भावाद् ज्ञानान्तरप्रार्थनम्, नच तथाऽत्र प्रमेयभेदः, इति विधिपदकल्पनं मुधेत्यर्थः ॥

"अपूर्वमिदं प्रमाणकौशलमि"त्यत्र प्रमाणकौशलस्यापूर्वत्वमुक्तम्, तत् कथम्? इति वीक्षायामाह—*अननुष्ठे-येति* ॥ पदार्थसंसर्गस्य विधिपदकल्पकत्वात् तत्र हेत्वभावोऽसिद्ध इत्याशङ्क्याह—*अर्थवादेति* ॥ "सोऽरोदी"-दित्यादिवाक्योपलब्धपदार्थसंसर्गेष्वपि विधिपदकल्पनमापतेदित्यर्थः। "पूषा प्रपिष्टभागः" इत्यत्रापि विध्यर्थप्रति-

पञ्चपादिका

एव विध्यर्थे विधिं कल्पयित्वा ततोऽर्थः प्रतिपत्तव्य इति, *अपूर्वं प्रमाणकौशलम्* । *ननु* अश्रूयमाणविधिष्वपि "तस्मात्पूषा प्रपिष्टभागोऽदन्तको हीत्यादिषु विधिः कल्पितः, *सत्यम्* ; युक्तं तत्र पूष्णः पिष्टद्रव्यसम्बन्धः समासाभिहितो न सिद्धो वर्तते, नापि कुतश्चिद्भविष्यतीति ; प्रमाणाभावात् । नापि विधिना केनचित् पदैकवाक्यता, येन वपोत्खननादिवत् कथंचिदालम्बनं कल्प्येत ; अतो निरालम्बनत्वपरिहाराय कार्यपरता कल्प्यत इति । *ननु* इहाप्यात्मपदं चेतनस्य भोक्तुर्वाचकम् ; सच नियोज्यत्वान्नियोगमाक्षिपति, *नैतत्सारम्* ; नियोगो हि पुरुषविशेषमनाश्रित्यानुपलब्धो लोके तमा-

पञ्चपादिकाविवरणम्

भावः । *ननु* विकल्प-दूषणयोः सर्वत्राविशेषान्न क्वचिदपि विधिकल्पनमिति मन्वानश्चोदयति—*नन्वश्रूयमाणेति* ॥ यत्र द्रव्य-देवतासंबन्धः कालत्रयानवमृष्टः प्रमीयमाणः स्वाविनाभूतं यागं गमयति, यागश्च स्वाविनाभूतं नियोगमिति श्रुतसामर्थ्यादेव विध्यर्थः प्रतिपन्नः, तत्र व्यवहारमात्राय पूषोद्देशेन पिष्टद्रव्यत्यागः कर्तव्य इत्युपसंह्रियते, न तथेह श्रुतसामर्थ्याद्विध्यर्थः प्रतिपन्न इत्याह—*सत्यं युक्तं तत्रेति* ॥ *ननु* इहापि श्रुतस्यात्मनः सामर्थ्यान्नियोगः प्रतिपन्न इत्याह—*नन्विहाप्यात्मपदमिति* ॥ न ; याग-नियोगयोर्नियोगप्रतिपत्तारमन्तरेणानुपपत्तिवत् प्रतिपत्तुर्नियोगमन्तरेणानुपपत्त्यभावादित्याह—*नैतत्सारम् ; नियोगो हीति* ॥ *ननु* यः कश्चिद्वेदे संसर्गः प्रतिपन्नः, स साक्षात्परम्परया वा नियोगसंसृष्ट एव ; "वायुर्वै क्षेपिष्ठे"-

ऋजुविवरणम्

चोद्यस्योपयोगः, इत्याशङ्क्यावतारयति—*ननु विकल्प-दूषणयोरिति* ॥ "सत्यं युक्तं तत्रे"त्यनेन द्रव्य-देवतासम्बन्धस्य कार्यत्वमुक्तमिव प्रतिभाति ; प्रकृतत्वात्, नच तद् युक्तम् ; नियोगस्यैव कार्यत्वात्, नापि नियोगविषयत्वेन कार्यत्वम् ; भावार्थविषयत्वान्नियोगस्य, असंगतं च ; तत्रापि पूर्वचोद्यसाम्यात्, इत्याक्षेपे तत्र वैषम्यस्यानुक्तत्वादित्याशङ्क्यावतारयति—*तत्र द्रव्य-देवतासम्बन्ध इति* ॥ कथं वैदिकसंसर्गस्य नियोगेनाविनाभावः ? अर्थवादसंसर्गेषु व्यभिचारादित्याशङ्क्याह—*वायुर्वै क्षेपिष्ठेत्यादाविति* ॥ "नासौ धातुना विने"त्ययुक्तम् ; वैदिकसंसर्गस्य

तत्त्वदीपनम्

पत्त्यप्रतिपत्त्योर्विधिपदकल्पनाऽनुपपत्तिः समेत्याशङ्क्य तात्पर्यमाह—*ननु विकल्पेति* ॥ उक्तचोद्यपरिहारानभिधानात् "सत्यमि"त्यादिग्रन्थानुपपत्तिरित्याशङ्क्य तात्पर्यमाह—*यत्रेति* ॥ तर्हि प्रतिपन्ने विध्यर्थे विधिपदकल्पनं वृथेत्याशङ्क्याह—*तत्र व्यवहारेति* ॥ प्रवृत्तेः साङ्गप्रधानकर्मावच्छिन्ननियोगबोधाधीनत्वात् तस्य च विधिपदं विना विध्यर्थेऽनुपपत्तेस्तत्कल्पनमित्यर्थः । "स प्रजापतिरात्मनो वपामुदखिददि"त्यादौ यथा विधिकल्पनं विनाऽर्थवत्त्वम्, तद्वदत्रापीति शङ्कायां टीकायामुक्तम्—*नापीति* ॥

"नियोगमाक्षिपती"त्यत्राक्षेपशब्दः प्रतिक्षेपवाचक इति शङ्का स्यात्, नच सोपपद्यते ; नियोज्यत्वहेतोर्वैयधिकरण्यात्, इत्याशङ्क्याक्षेपशब्दः प्रतिपत्तिवाचीति दर्शयति—*नन्विहापीति* ॥ पुरुषस्य नियोगाक्षेपकत्वचोद्ये नियोगस्य पुरुषाक्षेपकत्वाभिधानमनुचितमेवेत्याशङ्क्य निदर्शनार्थत्वाद् न विरोध इत्याह—*न यागेति* ॥ "प्रतिपत्तारमि"त्यत्र यागकर्तारमिति पदं द्रष्टव्यम् । क्रियायाः कर्तारं विना यथाऽनुपपत्तिः, नियोगस्य च नियोज्यं विना यथाऽनुपपत्तिः, तथाऽत्र नानुपपत्तिरित्यर्थः । विधेर्निरस्तत्वात्—"अथापी"त्यत्र कथं तस्याङ्गीकृतिः ? इत्याशङ्क्याह—*ननु यः कश्चिदिति* ॥

पदार्थसंसर्गस्य किं साक्षान्नियोगसंसर्गः ? उत परम्परया ? नाद्यः ; "सोऽरोदीदि"त्यादौ व्यभिचारात्, नेतरः ; स्वर्गकामवाक्ये व्यभिचारादित्याशङ्क्याह—*साक्षादिति* ॥ नियोगस्य प्राधान्यात् तत्संसृष्टत्वं तावदवश्यंभावि, क्वचित् साक्षात् क्वचित्प्रणाड्येति विभागः । वैदिकपदार्थसंसर्गो नियोगसंसृष्ट इति न नियमः ; "वायुर्वै क्षेपिष्ठे"त्यादौ व्यभिचारात्, इत्याशङ्क्याह—*वायुरिति* ॥ "वायव्यं श्वेतमालभेत भूतिकामः" इत्येतद्विध्य-

पञ्चपादिका

क्षिपेद् विश्वजिदादिषु। पुरुषः पुनः किं नियोगमन्तरेण नोपलब्धो लोके? येन विधिकल्पना भवेत्। अथापि भवतु नाम विधिः, नासौ धातुना विना केवलो लभ्यते, धातुनैव सह कल्प्यते। कोऽसौ धातुः? यदि तावत्कर्तव्यमिति, तत्रानात्मस्वभावता न निवृत्ता प्रपञ्चस्य। यथा—'अमी पिष्टपिण्डाः सिंहाः क्रियन्तामि'ति पिष्टस्वभावता न निवृत्ता। इतिकर्तव्यता चानिर्दिष्टा; तत्र साकाङ्क्षं

पञ्चपादिकाविवरणम्

त्यादावपि परम्परया विधिसंसर्गाभ्युपगमात्, तत्र सर्वस्यात्मस्वभावताऽप्यविनाभावाद्विधिमुपस्थापयतीति, तत्राह—*अथापि भवतु नामेति* ॥ भावार्थविषयत्वान्नियोगस्य नासौ भूतसंसर्गविषय इति भावः। एवं तर्हि भावार्थोऽपि विधिविषयः संसर्गमात्रेणाविनाभूतः, इति सोऽपि कल्प्यतामित्याह—*धातुनैव सह कल्प्यत इति* ॥ सर्वधात्वर्थदोषविवक्षया पृच्छति—*कोऽसाविति* ॥ प्रथमं सर्वधात्वर्थसामान्यातिलङ्घने कारणाभावात् कृतिधातुमुपस्थापयति—*यदि तावत्कर्तव्यमिति* ॥ तत्र दूषणमाह—*तत्रानात्मस्वभावतेति* ॥ प्रपञ्चविलयनेनैव ह्यात्मदर्शनमिति भावः। दूषणान्तरमाह—*इतिकर्तव्यता चेति* ॥ शमादयस्तु ज्ञानेति-

ऋजुविवरणम्

कल्पकत्वाङ्गीकारात्, तस्य चेह विद्यमानत्वात्, पुनस्तस्य विधिसंसर्गानङ्गीकारे "अथापी"त्यनेन विरोधादित्याशङ्क्याभिप्रायमाह—*भावार्थविषयत्वादिति* ॥ अयमर्थः—अपूर्वकृतिसम्बन्धघटकस्तन्निरूपको विषयः। स च भावार्थो 'भावार्थनय'साधित इति। "धातुनैव सहे"त्ययुक्तम्; धातोः कल्पकाभावात्, इत्याशङ्क्यावतारयति—*एवं तर्हीति* ॥ *ननु*—यो विवक्षितो धातुः; तन्निराकरणेनैवालम्, किं धातुविषयप्रश्नेन इत्याशङ्क्याभिप्रायमाह—*सर्वेति* ॥ सर्वेषु धातुषु दूषणं वक्तव्यं चेत्, केन विशेषेण कृतिधातोरादौ निराकार्यत्वेनोपन्यासः? इत्याशङ्क्याभिप्रायमाह—*प्रथमं सर्वेति* ॥ मा भूत् प्रपञ्चस्वरूपविलयः; कथं तदभावो दूषणम्? नहि प्रपञ्चविलयो विहितः, नापि तेन विनाऽनुपपत्तिरित्याशङ्क्याभिप्रायमाह—*प्रपञ्चविलयनेनेति* ॥ *ननु*—इतिकर्तव्यतानिर्देशो दृश्यते—"शान्तो दान्तः"इत्यादिना, अत इतिकर्तव्यताया अनिर्देशोऽसिद्ध इत्याशङ्क्याभिप्राय-

तत्त्वदीपनम्

पेक्षितवायुप्राशस्त्यबोधनद्वारा "वायुर्वै क्षेपिष्ठा देवता" इत्यादेरपि विधिसंसृष्टत्वमित्यर्थः। *अविनाभावादिति* ॥ विधिं विना पदार्थसंसर्गस्यानुपपत्तेरित्यर्थः। 'फलिनो द्रुमाः' इत्यादौ विधिमन्तरेणापि पदार्थसंसर्गदृष्टेर्न नियम इत्याशयेनोक्तम्—*अथापीति* ॥ निर्विषयस्य नियोगस्यानुपलब्धेरनिष्पत्तेश्च कल्पितोऽपि नियोगोऽकिंचित्कर इत्याह—*नासाविति* ॥ केवलस्य निर्विषयस्यानुपलब्धेरपि भूतविषयत्वेन लाभमाशङ्क्याह—*भावार्थेति* ॥ *अथवा*—धातुमन्तरेण विधेरुपपत्त्यभावात्—"नासावि"त्यादिग्रन्थानुपपत्तिमाशङ्क्याह—*भावार्थेति* ॥ कृतिसाध्यत्वेन तावन्नियोगोऽवभासते, कृत्या च साक्षात्साध्यत्वविशिष्टतया तदप्रतिपत्तेः कृतिसाध्यभावार्थसाध्यत्वेन तत्प्रतिपत्तिरित्यर्थः। कल्पकाभावात् कथं धातुनैव सह कल्प्यतामित्युक्तमित्याशङ्क्याह—*एवं तर्हीति* ॥ किंशब्दस्याक्षेपार्थतामाह—*सर्वेति* ॥ कृतिधातोरेव प्रथमं निराकरणे को हेतुरिति? अत आह—*प्रथममिति*। कृधात्वर्थस्य 'यागः कर्तव्यो दानं कर्तव्यमि'ति सकलधात्वर्थानुगततयोपलम्भात् प्रथमं तदनुवादेन निरसनमित्यर्थः॥

अनात्मोपमर्दस्यात्मप्रतिपत्त्यनुपयोगित्वात्—"अनात्मस्वभावता न निवृत्ते"त्यस्य दूषणाभासत्वमाशङ्क्याह—*तत्र दूषणमिति* ॥ साम्यदूषणत्वमेवाह—*प्रपञ्चेति* ॥ कर्त्रादिप्रपञ्चप्रतिपत्तावात्मदर्शनासंभवात् तदुपमर्देनैव तत्संभव इत्यर्थः। चशब्दार्थमाह—*दूषणान्तरमिति* ॥ "शान्तो दान्तः" इत्यत्र शमादीतिकर्तव्यताप्रतिपत्तेस्तदनिर्देशासिद्धिमाशङ्क्याह—*शमादय इति* ॥ "शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्येदि"ति ज्ञानाङ्गत्वं शमादीनां लक्ष्यत इत्यर्थः। विध्यध्याहारस्याङ्गीकृतत्वात्—"अध्याह्रियेते"त्यनुपपन्न-

पञ्चपादिका

वचनमनर्थकं स्यात्। अथ ज्ञातव्य इत्यध्याह्रियेत? एवमपि स एव दोषः; अनात्मस्वभावता न निवृत्तेति, अशक्यार्थोपदेशश्च। नहि वस्तु वस्त्वन्तरात्मना ज्ञातुं शक्यते। एवं तर्हि ज्ञातव्य इत्यध्याह्रियेत, तत्र धात्वर्थोऽनुवादः, प्रत्ययो विधायकः। कुतः प्राप्तेरनुवादः? अभिधानत इति ब्रूमः। एवं तर्हि विधानमनर्थकम्, स्वाध्यायकाल एव निष्पन्नत्वात् ज्ञानस्य।

पञ्चपादिकाविवरणम्

कर्तव्यम्, न प्रपञ्चविलयनेतिकर्तव्यमित्यर्थः। धात्वन्तरमाह—*अथेति* ॥ दूषयति—*एवमपीति* ॥ नहि योषिदादिष्वग्न्यादिभावेन ज्ञायमानेषु योषिदादिभावो निवर्तते; विधेयबुद्धेरप्रामाणिकत्वादिति भावः। उभयथाऽपि धात्वर्थविधौ दूषणान्तरमाह—*अशक्यार्थोपदेशश्चेति* ॥ *ननु* योषिदग्न्यादिषु मानसी क्रिया, ज्ञानं तु विधीयमानमनात्मानं निवर्तयतीति, तत्राह—*नहि वस्तु वस्त्वन्तरात्मनेति* ॥ तर्हि पुरुषस्वरूपप्रविलयनेन स्थाणुनिश्चयप्रमाणवदनात्मप्रविलयेनात्मनो निश्चायकं प्रमाणज्ञानमन्यतः प्राप्तमनूद्य विधिमात्रमध्याह्रियत इत्याह—*एवं तर्हि ज्ञातव्य इत्यादिना* ॥ तर्हि विधिवाक्यार्थमितिव्यतिरेकेण ब्रह्मसंवेदनस्यान्यतः प्राप्तस्यानुवादो वक्तव्यः, नच प्रमाणान्तरमस्तीत्याह—*कुतः प्राप्तेरिति* ॥ *ननु* विधायकपदव्यतिरिक्तेभ्यो वेदान्ताभिधानेभ्य इत्याह—*अभिधानत इति* ॥ तर्हि विधिनिमित्तप्रतिपत्तिमनपेक्ष्याभिधानप्रमाणादेव ब्रह्मसंवेदने सिद्धे न विधिना कृत्यमित्याह—*एवं तर्हि विधानमनर्थकमिति* ॥ *ननु*

ऋजुविवरणम्

माह—*शमादय इति* ॥ "एवमपि स एवे"ति कथमुक्तम्? प्रपञ्चस्य ब्रह्मरूपत्वज्ञाने प्रपञ्चाकारस्य मिथ्याभूतस्य निवृत्तिसंभवादित्याशङ्क्याभिप्रायमाह—*नहि योषिदादिष्विति* ॥ अशक्यार्थोपदेश इत्युक्तम्; योषिदादिवदेव प्रपञ्चस्य ब्रह्मात्मतया ज्ञातुं शक्यत्वात्। पूर्वपक्ष एवेदं वक्तव्यम्, केन विशेषेणेहोच्यते? इत्याशङ्क्यावतारयति—*उभयथाऽपि धात्वर्थेति* ॥ "नहि वस्तु वस्त्वन्तरात्मने"ति पुनरुक्तम्; "अशक्यार्थे"त्यनेनाशक्यत्वस्योक्तत्वात्, अयुक्तं च; योषिदादिवदेव ज्ञातुं शक्यत्वात्, इत्याशङ्क्यावतारयति—*ननु योषिदग्न्यादिष्विति* ॥ "एवं तर्ही"ति पुनरुक्तम्; अप्रमाणज्ञाने विवक्षिते "अथ ज्ञातव्यः"इत्यनेन, प्रमाणज्ञाने तु विवक्षिते "नहि वस्त्वि"त्यनेन, परिहारोऽपि स एवेत्याशङ्क्यावतारयति—*तर्हि पुरुषस्वरूपेति* ॥ "यथा मन्त्रेष्वि"त्यत्र कस्य पूर्वप्राप्तस्य पुनर्विधानम्? कथं वा प्राप्तिः? किंनिमित्तं पुनर्विधानम्? किंच तत्र विधायकम्? कथं च दृष्टान्त-दार्ष्टान्तिकयोस्साम्यम्? इति न ज्ञायते, अथ ज्ञाने पुनः कर्तव्यतायां दृष्टान्तत्वेनोपादानाद् मन्त्रेषु ज्ञानमेव कर्तव्यतया प्रतीयते;

तत्त्वदीपनम्

मित्याह—*धात्वन्तरमिति* ॥ "तरति शोकमात्मवित्" "भिद्यते हृदयग्रन्थिरि"त्यादिना प्रपञ्चस्य ज्ञाननिवर्त्यत्वप्रतिपत्तेरनात्मस्वभावता न निवृत्तेत्यनुपपन्नमित्याशङ्क्य, त्वन्मत एव श्रुतिर्नोपपद्यत इत्याशयेनाह—*दूषयतीति* ॥ आशयमेवाह—*न हि योषिदिति* ॥ दृष्टान्तो विषम इति शङ्कते—*ननु योषिदिति* ॥ ज्ञायतेऽर्थोऽनेनेति ज्ञानम्, न चान्यस्यान्यात्मतालक्षणोऽर्थोऽस्तीति ज्ञानमेव न भवेदित्यभिप्रायेणाह—*तत्राहेति* ॥ पूर्वत्र ज्ञानविधेर्निरस्तत्वाद् "एवं तर्ही"त्यत्र न ज्ञानविधिशङ्केत्याशङ्क्याह—*तर्हीति* ॥

प्रपञ्चः परमार्थ इत्यभ्युपेत्य न न तस्य ज्ञानेनोपमर्द इत्युक्तम्, संप्रति तस्याध्यस्तत्वमाश्रित्य ज्ञानानिरस्यत्वमुच्यत इत्यर्थः। विधित आत्मज्ञानप्राप्तेः "कुतः प्राप्तिरि"त्ययुक्तमित्याशङ्क्याह—*विधीति* ॥ आत्मज्ञाने सिद्धे तदनुवादेन ज्ञानं विधातव्यम्, विधाने च ज्ञानसिद्धिः, इतीतरेतराश्रयप्रसङ्गादन्यतो ज्ञानप्राप्तिर्वक्तव्या, न चान्यत्वमस्तीत्यभिप्रायः। *"अभिधानतः" इत्यत्र किं विधिरभिधानम्? उतान्यत्? इति वीक्षायामाह—*ननु विधायकेति*॥ अभिधानमपि विध्यपेक्षया प्रमितिं जनयतीति न विधिवैयर्थ्यमित्याशङ्क्याह—*तर्हि विधीति* ॥ ज्ञाने विध्यसंभवान्न विध्यधीनं ज्ञानमित्यर्थः। निष्पादितक्रिये कर्मण्यविशेषाधायिनः साधनस्य साधनत्वं हीयेतेति न्याय-

पञ्चपादिका

पुनः कर्तव्यतया चोद्यते, यथा मन्त्रेषु ।

पञ्चपादिकाविवरणम्

निष्पन्नेऽपि संवेदने पुनस्तादृशं व्यक्त्यन्तरं चोद्यत इत्याह—पुनःकर्तव्यतयेति* ॥ *ननु* किं तेन कार्यम् ? पूर्वेणैव प्रयोजनसिद्धेरिति, तत्राह—*यथा मन्त्रेष्विति* ॥ *अयमर्थः*—मन्त्राः स्वाध्यायविधिनैवोपात्ता गृहीतपद-पदार्थसम्बन्धस्य स्वार्थे प्रत्ययमुत्पाद्य व्यवस्थिताः स्वार्थस्याननुष्ठेयत्वाद् ब्राह्मणवाक्यैश्च प्रमितत्वात् प्रवृत्ति-निवृत्तिप्रयोजनशून्या व्यवतिष्ठन्ते । तत्र—"ऐन्द्रया गार्हपत्यम्" "बर्हिर्देवसदनं दामि" "इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्ते" इत्यादिश्रुति-लिङ्ग-वाक्यादिभिर्व्रीह्यादिवत्कर्माङ्गभावेन विनियुक्ताः प्रधानापूर्वनिर्वृत्ति-द्वारेण प्रयोजनवन्तो मन्त्रा इत्युच्यन्ते । तत्र मन्त्राः केनोपकारेणापूर्वसिद्धेरुपकुर्वन्ति ? इति वीक्षायामध्ययनविधेरर्थज्ञानार्थत्वाद् दृष्टोपकारे सत्यदृष्टकल्पनानुपपत्तेस्तेष्वनुष्ठानकाले प्रतिपत्त्यपेक्षस्य द्रव्य-देवतादेः प्रतिपत्ति-

ऋजुविवरणम्

तथापि— अर्थावबोधे विनियुज्यतेऽसौ स्वाध्यायवाक्यात्सकलो हि वेदः ।
मन्त्रे पुनः को हि विशेषहेतुः कर्तव्यता येन तदीयबोधः ॥

इत्याशङ्क्याभिप्रायमाह—*अयमर्थो मन्त्रा इति* ॥

मन्त्रे प्रयोजनाभावो जपार्था वा भवन्तु ते । पुनःकर्तव्यता नैव तद्बोधे लभ्यते ननु ॥

इत्याशङ्क्याह—*तत्रैन्द्र्येति* ॥ भवत्वेवमपूर्वार्थत्वम्, तथाऽपि कथं पुनर्ज्ञानानुष्ठानलाभ इति ? तदाह—*तत्र मन्त्राः केनेति* ॥ *ननु*—अध्ययनविधेरर्थज्ञानप्रयोजनत्वेऽपि हुंफडादिषु केवलादृष्टजनकत्वं दृष्टम्, तद्वदिहापि स्यादित्याशङ्क्याह—*दृष्टोपकारे सतीति* ॥ *ननु*—भवत्वध्ययनविधेरर्थज्ञानार्थत्वम्, भवतु च दृष्टोपकारसंभवः, नैतावता तस्य स्वीकारः; शेषिण आकाङ्क्षितोपकारजनकत्वं हि शेषस्याङ्गीकार्यम्, नत्वन्यापेक्षया संभवमात्रेणैवोपकारलाभः, इत्याशङ्क्याह—*अनुष्ठानकाल इति* ॥ *ननु*—अनुष्ठानकाले यद्यपि द्रव्य-

तत्त्वदीपनम्

विरोधात् "पुनः कर्तव्यतये"त्यनुपपन्नमित्याशङ्क्याह—*ननु निष्पन्न इति* ॥ अनन्यथासिद्धप्रयोजनाभावान्न ज्ञानान्तरकल्पनं युक्तमिति शङ्कते—*ननु तेनेति* ॥ प्रयोजनाभावोऽसिद्ध इति सनिदर्शनमाह—*तत्राहेति* ॥

"यथा मन्त्रेष्वि"त्युक्तं विवृणोति—*अयमर्थ इति* ॥ मन्त्राः किमदृष्टार्थाः ? उत दृष्टार्थाः ? इति संदेहे पूर्वतन्त्रोक्तं पूर्वपक्षमाह—*मन्त्रा इत्यारभ्य व्यवतिष्ठन्त इत्यतः प्राक्तनेन ग्रन्थेन*॥ अङ्गुल्यग्रादिवाक्यसाम्यं व्यावर्तयति—*स्वाध्यायेति* ॥ अध्ययनभावनाभाव्यत्वेन स्वाध्यायमभिदधता स्वाध्यायशब्देन कृत्स्नवेदवाचिना मन्त्राणामपि भाव्यत्वं निर्दिष्टम्, तथाच न नैरर्थक्यमित्यर्थः । नच प्रवर्तकत्वेनार्थवत्त्वमित्याह—*गृहीतेति* ॥ विदितपदार्थसङ्गतिकस्य पुंसः प्रतीतिं जनयन्ति मन्त्राः, न तु प्रवृत्तिम् । तत्र हेतुमाह—*स्वार्थस्येति* ॥ गृहीतः पद-पदार्थसंबन्धो येन पुंसा स तथोक्तः । बोधकत्वेनार्थवत्त्वं व्यावर्तयति—*ब्राह्मणेति* ॥ तस्माददृष्टार्था मन्त्रा इति पूर्वपक्षे, सिद्धान्तमाह—*तत्रेति* ॥ तत्र मन्त्राः प्रधानापूर्वनिर्वृत्तिद्वारेण प्रयोजनवन्त इत्युच्यन्त इति सम्बन्धः ॥

अपूर्वं फलमिति युज्यतेऽङ्गानाम्, न तु मन्त्राणामित्यत्राह—*श्रुतीति* ॥ तदेवाह—*ऐन्द्र्येति* ॥ ऐन्द्र्येति तृतीयाश्रुत्या इन्द्रलक्षणाग्निप्रकाशिकाया ऋचो गार्हपत्योपस्थाने विनियोगः समधिगतः । तथा पुरोडाशसदनभूतं बर्हिः खण्डयामीति श्रुतपदसामर्थ्याद् बर्हिषो लवने "बर्हिर्देवसदनं दामि"इत्यादेर्मन्त्रस्य विनियोगः । तथा—ऋतस्य सत्यफलसाधनभूतस्याश्वस्य इमां रशनां गृहीतवन्त इति मन्त्रस्य "इत्यश्वाभिधानीमादत्ते" इति वाक्याद् रशनाऽऽदाने विनियोगः प्रतीयते । प्रकरण-स्थान-समाख्या आदिशब्दार्थः । प्रधानापूर्वनिर्वर्तकत्वं किं दृष्टद्वारा ? उतादृष्टद्वारा ? इति वीक्षायामाह—*तत्र मन्त्रा इति* ॥ अध्ययनविधेरर्थावबोधपर्यन्तत्वेऽपि हुंफडादीनामदृष्टजनकत्वं दृष्टम्, तद्वत् स्यादिति शङ्कायामाह—*दृष्टेति* ॥ अपूर्वस्य मन्त्राऽऽकाङ्क्षाऽभावान्मन्त्रस्य कथं तदङ्गत्वम् ? इत्या-

पञ्चपादिका

प्रयोगवचनस्तत्र विधायक इति । इहापि प्रयोगवचनो विधायकः ?

पञ्चपादिकाविवरणम्

मुत्पाद्य तद्द्वारेणापूर्वस्योपकुर्वन्तीति कल्प्यते । ततश्च मन्त्रैरप्यनुस्मृत्यानुष्ठानेऽपूर्वसिद्धिः, न ब्राह्मणवाक्यैः, इति गम्यते । तत्र प्रयोगविधिरङ्गैरपूर्वोपकारं कारयन्मन्त्रैरर्थज्ञानं कारयतीति । तत्र यथा प्रयोगवचनो मन्त्रैः प्रथमोत्पन्नज्ञानातिरिक्तमपूर्वोपकारि ज्ञानान्तरमनुष्ठापयति, एवं ब्रह्मसंवेदनमपरमनुष्ठीयते मोक्षफलायेति । *ननु* युक्तं तत्र स्वार्थे प्रत्ययमुत्पाद्य निवृत्तानां मन्त्राणां श्रुत्यादिविनियोगसामर्थ्यात्प्रयोगवचनेन ज्ञानस्य पुनः-कर्तव्यत्वम्, नचात्मज्ञाने प्रयोगवचनोऽस्तीत्याह—*प्रयोगवचनस्तत्र विधायक इति* ॥ इहापि तर्हि स सम्पाद्यत इत्याह पूर्ववादी—*इहापि प्रयोगवचनो विधायक इति* ॥ *कथम्* ? 'वेदान्तैरात्मज्ञानं कुर्यादि'ति सर्ववेदान्तशब्दकरणविशिष्टोत्पत्तिविधिस्तावदध्याहृतः "सोमेन यजेते"तिवत् । स च विधिः कथं ज्ञानं कर्तव्यमितीतिकर्तव्यभेदमीक्षमाणः प्रकरणपठितशमादिविधीन् फलवदात्मज्ञानविधिसन्निहितानितिकर्तव्यतात्वेन विनियोजयन् विनियोगविधिः सम्पद्यते । पुनश्च साङ्गे कर्मणि नियोज्यमधिकारिणं ममेदं कर्तव्यमिति प्रतिपत्तार-

ऋजुविवरणम्

देवताप्रतिपत्तिरपेक्षिता ; तथाऽपि न मन्त्रैरेव प्रतीतिरिति नियन्तुं शक्यते ; ब्राह्मणवाक्यस्यापि प्रतिपत्ति-हेतोर्विद्यमानत्वात्, इत्याशङ्क्याह—*ततश्च मन्त्रैरपीति* ॥ "इहापी"त्यत्र कस्यायं ग्रन्थ इति वक्तुं न ज्ञायते, नन्वित्यादीनां द्योतकानामभावात्, अतो व्यक्तं करोति—*पूर्ववादीति* ॥ सिद्धान्त्येकदेशीत्यर्थः । *ननु*——नात्र प्रयोगः सम्पादयितुं शक्यते ; उत्पन्ने कर्मणि विनियोगोत्तरकालमधिकारसम्बन्धे पश्चात्प्रयोगः, इह तूत्पत्त्याद्य-भावादित्याक्षिपति—*कथमिति* ॥ *विशिष्टोत्पत्तिविधिरिति* ॥ विशिष्टस्याज्ञातस्य ज्ञापको विधिरध्याहृतः । *ननु* विशिष्टप्रतीतौ नोत्पत्तिविधित्वं संभवति ; स्वरूपज्ञानमात्रहेतुत्वादुत्पत्तिविधेः, इत्याशङ्क्य दृष्टान्तमाह—*सोमेनेति* । "सोमेन यजेते"त्यत्र सोमशब्दस्यार्थान्तरे रूढस्य नामत्वासंभवाद् गुणवाचित्वे पृथगुत्पत्त्यभावाद्विशिष्टोत्पत्तिरप्यङ्गी-कृता, तद्वदित्यर्थः *इतिकर्तव्यभेदमिति* ॥ इतिकर्तव्यमेव भेदे विद्यत इति व्युत्पत्त्या स्वव्यतिरिक्तमेवाङ्ग-जातमित्यर्थः । *नियोज्यम् = कार्यबोद्धारम् ; प्रतीत्यनुबन्धिनम् । *अधिकारिणम्* = कर्मण्यैश्वर्यवन्तम्, मदर्थं

तत्त्वदीपनम्

शङ्क्याह—*अनुष्ठान इति* ॥ द्रव्यादिप्रतिपत्तेर्ब्राह्मणवाक्यादपि सिद्धत्वान्न मन्त्राकाङ्क्षेत्याशङ्क्याह—*ततश्चेति* ॥ मन्त्राणामानर्थक्यानुपपत्त्या तेनैव द्रव्यादिकं स्मृत्वा कर्मानुष्ठानेऽपूर्वनिष्पत्तिरिति नियम्यत इत्यर्थः । तथाऽपि मन्त्रै-रेवानुष्ठानसमयेऽर्थज्ञानं संपादनीयमिति विधिवचनाभावान्न तदित्याशङ्क्याह—*तत्रेति* ॥ निर्दिष्टं दृष्टान्तं संक्षेपेण दर्शयन् दार्ष्टान्तिकमाह—*तत्र यथेति* ॥ अपूर्वोपकारिप्रत्ययस्य प्रयोगवचनादनुष्ठेयत्वे श्रुत्यादिकमुपेक्षितं स्यादित्या-शङ्क्य तात्पर्यमाह—*ननु युक्तमिति* ॥ प्रयोगवचनो ह्यङ्गं प्रयुङ्क्ते । अङ्गत्वं च श्रुत्यादिसमधिगम्यमिति न तद्-वैयर्थ्यमित्यर्थः॥ आत्मज्ञाने प्रयोगवचनानुपलब्धेः "इहापी"त्येतदनुपपन्नमित्याशङ्क्यानुपलम्भेऽपि तस्य न्यायकल्प्यत्वान्न विरोध इत्याह—*इहापीति* ॥ प्रयोगविधेरुत्पत्ति-विनियोगाधिकारविधिपुरःसरत्वात्तदभावेऽपि कथं प्रयोगविधिः ? इति शङ्कते—*कथमिति* ॥ तदभावोऽसिद्ध इत्याह—*वेदान्तेति* ॥ आत्मज्ञानं कुर्यादित्येतावानुत्पत्तिविधिः, तस्य करणाकाङ्क्षां निवारयितुम्—"वेदान्तैरि"त्युक्तम् । करणस्येतिकर्तव्याकाङ्क्षया तत्संबन्धबोधकत्वोपाधावुत्पत्ति-विधेरेव विनियोगविधित्वमित्याह—*सर्वेति* ॥ शमादिविधीनां ज्ञानविधिशेषत्वे युक्तिमाह—*फलवदिति* । नियोज्याभावे विध्यनुपपत्तेर्नियोज्यसंबन्धबोधकत्वोपाधौ विनियोगविधेरेवाधिकारविधित्वमित्याह—*पुनश्चेति* ॥ नियोज्यमिति* । नियुङ्क्त इति नियोगः=प्रेरकः, मम प्रेरकोऽयं नियोग इति नियोज्यत्वेनान्वितमित्यर्थः । *अधिकारिणमिति*॥ मत्फलसाधनमिदं कर्मेति भोक्तृत्वेनान्वितमित्यर्थः । *'ममेदं कर्तव्यमि'ति* ॥ 'मयेदं कार्यमि'ति कर्तृत्वेनान्वितमित्यर्थः ।

पञ्चपादिका

ननु मन्त्रेषु स्वार्थस्यान्यतः सिद्धत्वात् प्रत्ययपरत्वं युज्यते, इह तु स्वार्थविधिपराणां शब्दानां

पञ्चपादिकाविवरणम्

माकाङ्क्षन्नर्थवादगतं मोक्षं रात्रिसत्रन्यायेनोपसंहृत्य मोक्षकामो वेदान्तवाक्यकरणैः शमादीतिकर्तव्यतानुगृहीतैरात्मज्ञानं कुर्यादिति स एव विनियोगविधिरधिकारविधिः सम्पद्यते। पुनः स एव साङ्गं तत्त्वज्ञानमधिकारिणमनुष्ठापयन्प्रयोगविधिः सम्पद्यत इति। पुनश्च सिद्धान्ती मन्त्रेभ्यो वेदान्तानां वैलक्षण्यमाह—*ननु मन्त्रेष्वेति* ॥ *प्रत्ययपरत्वमिति*। अपूर्वोपकारिप्रत्ययमात्रे मन्त्राणां तात्पर्यम्, नार्थतथात्व इत्यर्थः।

ऋजुविवरणम्

कर्मेति प्रतिपत्तारम्। *ननु* नियोज्यादधिकारिणो भेदे कथं नियोज्यमधिकारिणमिति सामानाधिकरण्यम्? प्रथमं नियोज्यत्वेनान्वितस्यैवाधिकारित्वेनान्वयादिति ब्रूमः। *"ममेदं कर्तव्यमिति प्रतिवक्तारमि"ति* नियोज्यस्वरूपप्रदर्शनम्। *रात्रिसत्रन्यायेनेति* ॥ स चैवम्—रात्रिसत्रे श्रूयते—"प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती"ति। तत्र नियोज्यः कल्प्यः। स च किं स्वर्गकामो भवति? किं वाऽऽर्थवादिकप्रतिष्ठाकामः? इति सन्देहे "सः स्वर्गः स्यात्सर्वान् प्रत्यविशिष्टत्वादि"ति पूर्वाधिकरणन्यायेन स नियोज्यविशेषणीभूतः स्वर्गः स्यात्, "सर्वान् प्रत्यविशिष्टत्वात्=सर्वसाधारणत्वात्; सर्वेषां तदर्थित्वादिति विश्वजिदादिन्यायेन पूर्वपक्षं कृत्वा राद्धान्तितम्—"फलमात्रेयो निर्देशादि"ति। आर्थवादिकमेव फलं स्वीक्रियत एवेत्यात्रेयो मन्यते; तस्य निर्दिष्टत्वात् सार्थवादेनैव वाक्येन नियोगः प्रतीयते; सम्भूयकारित्वव्युत्पत्तेः। तेन नियोगोऽर्थवादसामञ्जस्यायार्थवादिकमेव फलं स्वीकरोतीति। "नन्वि"त्युपक्रमाच्चोद्यमेतदिति शङ्कानिवृत्त्यर्थमाह—*पुनश्च सिद्धान्तीति* ॥ सिद्धान्तैकदेशिनिराकरणेन स्वपक्षसाधनस्य प्रकृतत्वात्पूर्वपक्ष्येवात्र सिद्धान्तीत्यभिधीयते। "प्रत्ययपरत्वमिति"विरुद्धमभिधीयते; स्वार्थस्यान्यतः सिद्धत्वे प्रत्ययपरत्वमपि न युज्यते, प्रत्ययपरत्वमेव स्वार्थपरत्वं यतः, इत्याशङ्क्य व्याचष्टे—*प्रत्ययपरत्वमित्यपूर्वोपकारीति* ॥ वेदान्तानां कथं स्वार्थपरत्वं निश्चितम्? येन प्रत्ययपरत्वं निराक्रियते, इत्याशङ्क्योपपादयति—*तत्र

तत्त्वदीपनम्

रात्रिसत्रन्यायेनेति ॥ 'प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ती'ति श्रूयते। तत्र वर्तमानापदेशित्वेऽप्यपूर्वत्वादुपयन्तीत्यस्य विधित्वं तावत्सिद्धम्। तत्र रात्रिसत्रस्य निरधिकारस्यानुपपत्तेः कश्चिदधिकारी वक्तव्यः। स किं स्वर्गकामः? उत प्रतिष्ठाकामः? इति जिज्ञासायां "स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टः" इति न्यायात् स्वर्गकाम इति तावत्प्राप्तम्। "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोती"तिवत् "प्रतितिष्ठन्ती"त्यस्यापि वर्तमानापदेशत्वात् फलविधित्वानुपपत्तेः स्तुतिमात्रत्वमिति स्वर्गकाम एव नियोज्य इति प्राप्ते, सिद्धान्तितम्—"फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यादि"ति। वर्तमानापदेशित्वेऽपि श्रुतिसमर्पितं संनिहितं प्रतिष्ठाफलं विहाय भिन्नवाक्योपात्तस्वर्गफलकल्पनाऽयोगात् प्रतिष्ठां फलत्वेनादाय प्रतिष्ठाकामो रात्रिसत्रं कुर्यादिति विधिः परिणम्यते; तथा "तरति शोकमात्मवित्" "ब्रह्म वेद ब्रह्मैव भवती"त्याद्यर्थवादसमर्पितं मोक्षं फलत्वेन संगृह्य तत्काम आत्मज्ञानं कुर्यादिति विनियोगविधेरधिकारविधित्वमिति। अनुष्ठानस्य विध्यायत्तत्वादनुष्ठापयितृत्वोपाधावधिकारविधेः प्रयोगविधित्वमाह—*पुनः स एवेति* ॥

"ननु मन्त्रेष्वि"त्येकदेशिनश्चोद्यमिति प्रतिभाति; नन्वित्युपक्रमात्, इति शङ्कायामाह—*पुनश्चेति* ॥ सिद्धान्तोपयुक्तार्थाभिधायित्वादनारम्भवाद्येव सिद्धान्तशब्देन शब्दित इति द्रष्टव्यम्। मन्त्राणामर्थपरत्वाभावात् प्रत्ययपरत्वम्, वेदान्तानां त्वर्थपरत्वान्न प्रत्ययपरत्वमित्युक्तं टीकायाम्, तदनुपपन्नम्; प्रत्ययपरत्वेऽर्थपरताया अवश्यंभावित्वात्, अन्यथा प्रत्ययपरत्वस्यैवानुपपत्तेरिति शङ्कायामाह—*प्रत्ययपरत्वमिति* ॥ मात्रवोऽर्थमाह—*नार्थेति* ॥ "वाचं धेनुमुपासीते"त्यादौ स्वार्थाभावेऽपि यथोपास्तिविधिपरत्वम्, तथाऽत्रापीत्यर्थः। भूतार्थत्वाद् वेदान्तानामपि न स्वार्थविधिपरत्वमिति शङ्कायामाह—*तत्रेति* ॥ *भूतार्थत्वेऽपीत्यस्यायमर्थः—*स्वार्थविधिपरत्वमिति* ॥ स्वा-

पञ्चपादिका

प्रत्ययपरत्वं विरुध्यते, *नैष दोषः* ; अन्यार्थमपि प्रकृतमन्यार्थं भवति, तद्यथा—शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयत उपस्पृश्यते च ; एवमिहापि। यथा पदार्थानां विधायकः शब्दः क्रमस्यापि विधायकः, एवं स्वार्थस्य विधायकः शब्दः प्रत्ययस्यापि विधायको भविष्यति ॥

तदेतदनिरूपितमिव दृश्यते। कथम्? मन्त्राः स्वाध्यायविधिनोपादापिताश्चार्थस्यान्यतः सिद्धत्वात् तं प्रमातुमशक्नुवन्तः प्रमाणत्वात् प्रच्युता व्रीह्यादिवत् प्रमेयतामापन्नाः श्रुत्यादिप्रमाणैः, युक्तम्, यद्विनियुज्येरन्, विनियुक्ताश्चानुष्ठेयस्यानुष्ठानकाले स्मृत्यपेक्षस्य स्मारकतया गृह्येरन्निति, इह तु "इदं सर्वं यदयमात्मे"ति यत् पदसमन्वयनिमित्तं सर्वस्यात्मस्वभावताग्राहि विज्ञानम्, तत् स्वविषयस्यान्यतोऽसिद्धत्वात् प्रमेयपरत्वान्न विधेर्विषयः। अथ विधेर्विषयः, न प्रमेयमवगमयितुमलम्। न युगपदुभयं सम्भवति ; वैरूप्यप्रसङ्गात् ॥

पञ्चपादिकाविवरणम्

तत्र वेदान्तानां स्वार्थविधिपरत्वं प्रयोजनवदज्ञातार्थावगन्तृत्वादिति। तत्र विधेयप्रत्ययसमर्पणेन विधिपरत्वमज्ञातार्थपरत्वं चोभयं न विरुद्धमित्याह—*अन्यार्थमपि प्रकृतमिति* ॥ *ननु* स्थायिपदार्थानां क्रमेण वा युगपद्वाऽनेकानि कार्याणि सम्भवन्ति, शब्दस्य तु तात्पर्यात् सकृत्कार्यहेतोः कथमुभयपरत्वमिति ? तत्राह—*यथा वा पदार्थानामिति* ॥ सिद्धान्ती ब्रह्मण्याभिधानिकप्रथमप्रत्ययोपगमेनैव पुरुषार्थसिद्धेर्न मन्त्रेष्विव विधिशेषतया द्वितीयप्रत्ययायोत्पत्ति-विनियोगाधिकार-प्रयोगविधिकल्पनमपेक्ष्यत इति दर्शयितुं मन्त्रेभ्यो वैलक्षण्यमाह—*तदेतदनिरूपितमिवेति* ॥ विधिविषयसमर्पणेन विधिप्रमितिशेषस्य योषिदग्न्यादिवाक्यस्य तज्जन्यज्ञानस्य वा प्रमेयपरत्वादर्शनादिति वाक्यशेषः। *ननु* लौकिकप्रमाणगम्यत्वात् प्रमेयस्य तत्परत्वाभावः, इह तु विधि-ब्रह्मणोरलौकिकत्वादुभयपरत्वं स्यादिति, नेत्याह—*न युगपदुभयमिति* ॥ ज्ञानं प्रति ब्रह्मणः प्रमेयतया

ऋजुविवरणम्

वेदान्तानामिति* ॥ "तदेतदनिरूपितमि"त्यादिना मन्त्रेषु प्रामाण्यच्युतेर्विनियोगः ; तेन स्मारकतया ग्रहणमिति प्रदर्शितम्, तदसंगतम् ; उभयपरत्वं संभवतीति चोदिते तदसंभवो दर्शनीयः, नान्यप्रदर्शनमुपयुज्यत इत्याशङ्क्यावतारयति—*सिद्धान्ती ब्रह्मणीति* ॥ "अथ विधेर्विषयः"इत्यनेन विधिविषयत्वे प्रमेयपरत्वं नास्तीत्युक्तम्, नतु युक्तिरभिहिता। नच वचनमात्रेणार्थसिद्धिः, इत्याशङ्क्य पूरयति—*विधिविषयेति* ॥ "न युगपदि"त्यनेनोभयपरत्वमाशङ्क्य वैरूप्यमुक्तम्, तदयुक्तम् ; योषिदग्न्यादिवाक्यवदुभयपरत्वाभावस्य पूर्वग्रन्थेनैव सिद्धत्वाद् न पुनः शङ्कोदयः, तेन न युगपत् क्रमविकल्पो युक्त इत्याशङ्क्यावतारयति—*ननु लौकिकेति* ॥ प्रमाणान्तरयोग्ये वस्तुनि न विधेस्तात्पर्यम्, तद्विरोधात्, अतिप्रसङ्गाच्चेति भावः। *प्रमेयतयेति* ॥ प्रमया ईयत इति प्रमेयमिति

तत्त्वदीपनम्

र्थबोधपरत्वमित्यर्थः। "अन्यार्थमपि प्रकृतमि"त्यत्रान्यशब्दार्थमाह—*तत्र विधेयेति* ॥ *तत्र* = वेदान्तेषु। कुल्यादृष्टान्तो विषम इति शङ्कते—*ननु स्थायीति* ॥ शब्दस्य क्षणिकत्वान्न क्रमेण कार्यकरत्वमित्याह—*सकृदिति* ॥ स्थायित्वेऽपि शब्दस्य तात्पर्यवृत्त्या बोधकत्वम्। नचोभयत्र तात्पर्यमित्यभिप्रायेणाह—*तात्पर्यादिति* ॥ समिदादयो यागाः पदार्थशब्दार्थः। "समिधो यजती"त्यादिवाक्यं शब्दशब्दार्थः। एकेन कर्त्रा बहूनां युगपन्निर्वर्त्यत्वानुपपत्तेः क्रमो विधीयते, तद्वदत्रापि विधिपरत्वं प्रमेयपरत्वं चेति टीकार्थः ॥

वेदान्तानामुभयपरत्वसंभवे चोदिते तदसंभवः पूर्वपक्षिणा प्रदर्शनीयः, किमिदमुच्यते—मन्त्राणामप्रमाणत्वात्कर्मसु विनियोग इति ? तत्राह—*सिद्धान्तीति* ॥ अनारम्भवादीति यावत्। ज्ञानस्य विधेयत्वेन प्रमेयपरत्वमित्युक्तम्—"नच प्रमेयमवगमयितुं क्षममि"त्यत्र, तत्र हेतुमाह—*विधिविषयेति* ॥ नियोगो विधिशब्दार्थः। योषिदादिदृष्टान्तो विषम इति शङ्कते—*ननु लौकिकेति* ॥ अलौकिकत्वमङ्गीकृत्योभयपरत्वं दूषयति—*नेत्या-

पञ्चपादिका

ननु एवं सति गुणकर्मणां सर्वत्र विधानं निराकृतं स्यात्।

पञ्चपादिकाविवरणम्

प्राधान्यम्, विधेयज्ञानविशेषणतया गुणभावः, प्रमेयत्वादुपादेयता, विधिं प्रत्युद्देश्यता, प्रमेयत्वाद्विधेयता, विधानायानुवाद्यता च, इति ब्रह्मणः स्वज्ञानस्य विधिविषयतया तत्प्रमितिशेषत्वे च प्राधान्योपादेयत्व-प्रमेयत्वानि तद्विरुद्धगुणत्वोद्देश्यत्वानुवाद्यत्वानि चैकस्यां शब्दजन्यप्रमितौ प्रसज्यन्ते। तदिदं वैरूप्यम्। *ननु* प्रथमज्ञानमर्थपरम्, द्वितीयज्ञानं विधिविषयतया तत्परमित्यविरोधः किं न स्यात्? *न*; शब्दस्योभयपरत्वाभावे तज्जन्यज्ञानस्यासकृज्जनितस्याप्युभयपरत्वानुपपत्तेः। *ननु* वैरूप्यप्रसङ्गो न दोषमावहति, अन्यथा गुणकर्मविधानानुपपत्तेरिति चोदयति—*नन्वेवं सति गुणकर्मणामिति* ॥ क्रत्वङ्गभूतकारकसंस्कारार्थानि कर्माणि

ऋजुविवरणम्

प्रमायास्तादर्थ्यं प्रतीयते, इति प्रमेयत्वं प्राधान्ये हेतुः। *विशेषणतयेति* ॥ व्यावर्तकत्वेन तादर्थ्यम्। *प्रमेयत्वात्=प्रमाविषयत्वात्। प्रमाजन्यातिशययोगित्वं हि विषयत्वम्, तेन रूपेणोपादेयतया साध्यत इत्यर्थः। *उद्देश्यता* = सिद्धता। *प्रमेयत्वाद्विधेयता*। अज्ञातता प्रमेयत्वहेतुः; अज्ञातस्यैव विषयत्वात्। अनुवाद्यता ज्ञातता; ज्ञातस्यैवोद्देश्यत्वात्। ब्रह्मणः प्रसज्यत इत्यन्वयः। *प्राधान्योपादेयत्व-प्रमेयत्वानीति* ॥ 'ज्ञानं कर्तव्यमि'त्युक्ते कृतेर्ज्ञानार्थत्वाद् ज्ञानस्य च प्राधान्यम्, कृतिसाध्यत्वादुपादेयत्वम्, प्रमेयत्वम् = अज्ञातत्वं तेन रूपेणेति। *तद्विरुद्धेति* ॥ कृतिव्यावर्तकत्वाद् गुणत्वमुद्देश्यत्वं सिद्धत्वमनुवाद्यत्वं ज्ञातत्वमिति। यद्वा—ज्ञानस्य विधिविषयतयेति विषयं प्रदर्श्य, "प्राधान्ये"त्यनेन ब्रह्मण्येवोक्तविरुद्धत्रिकस्य संकलय्य सकलस्य प्रदर्शनं कृतम्। ज्ञानभेदे हि सर्वत्र वैरूप्यसंभवान्न दूषणत्वम्, तदर्थमाह—*एकस्यामिति* ॥ "नन्वेवं सती"ति चोद्यं व्यर्थम्; स्वपक्षे दोषपरिहारासाधकत्वात्, नहि तत्र विधानानुपपत्तिप्रदर्शनमेवानेन क्रियते; सिद्धान्तान्तरदूषणरूपनिग्रहस्थानप्रसङ्गात्, इत्याशङ्क्यावतारयति—*ननु वैरूप्यप्रसङ्ग इति* ॥ गुणानां कर्मणां चेति न विवक्षितम्, नापि गुणभूतकर्मणामिति; उभयथाऽपि चोद्यानुदयात्, तेन पारिभाषिकत्वाद् गुणकर्मणामिति पदं व्याचष्टे—*क्रत्वङ्ग-

तत्त्वदीपनम्

हेति* ॥ विरुद्धस्वभावो वैरूप्यम्, तत्प्रसङ्गादित्युक्तम्, तत्र किं तद्वैरूप्यम्? कथं वा तत्प्रसङ्गः? इत्याशङ्कायामेकस्यैव ज्ञानस्य विधेयपरत्वं प्रमेयपरत्वं च? अथवैकस्य प्रमेयपरत्वम्? अन्यस्य विधिपरत्वम्? इति विकल्प्याद्यं दूषयति—*ज्ञानं प्रतीति* ॥ *प्रमेयतयेति* ॥ ज्ञानक्रियाजन्यफलशालितयेत्यर्थः। *विधेयज्ञानविशेषणतयेति* ॥ विधेयं यद् ज्ञानम्, तत् प्रति विशेषणम्, तस्य भावः, तत्ता, तयेति विग्रहः। कर्मकारकतया ज्ञानजनकत्वाद् ब्रह्मणो गुणत्वमित्यर्थः। *प्रमेयत्वादुपादेयतेति* ॥ प्रमाजन्यातिशयविशिष्टत्वरूपेणोपादेयता साध्यत इत्यर्थः। *विधिं प्रतीति* ॥ सिद्धप्रमितिविशिष्टतया सिद्धत्वमुद्देश्यत्वमित्यर्थः। *प्रमेयत्वाद् विधेयतेति* ॥ अज्ञातं हि प्रमेयं भवति, ततश्च प्रमेयत्वाद्विधेयता; अज्ञाततेत्यर्थः। *विधानायाऽनुवाद्यतेति* ॥ विधानाय ज्ञानमुद्देष्टव्यम्, उद्देशश्च ज्ञाते। तथाच सविषयस्योद्देश्यत्वाद्विषयस्याप्युद्देश्यत्वेनानुवाद्यत्वमित्यर्थः। ततः किमिति? अत आह—*इतीति*॥ ब्रह्मणः प्रसज्यन्ते इत्यनेन संबन्धः। गुणत्वादिप्रापकमाह—*स्वज्ञानस्येति* ॥ प्राधान्यादिप्रापकमाह—*तत्प्रमितीति* ॥ ब्रह्म तच्छब्दार्थः। अथवा—ज्ञानस्य विधेयत्वाद्विधिप्रमितिशेषत्वे तथा ब्रह्मपरत्वे चाश्रिते सतीति योजना। प्रमेयत्वपदं विधेयत्वपरमिति द्रष्टव्यम्। द्वितीयं पक्षमुत्थापयति—*ननु प्रथमेति* ॥ शब्दानामुभयत्र तात्पर्याभावादेकत्र तात्पर्यं वक्तव्यम्, ततश्च कथं तज्ज्ञानमुभयपरं स्यादित्याह—*न शब्दस्येति* ॥ *ननु* "एवं सती"ति चोद्यं न फलपर्यवसायि? अन्यत्र विध्यसंभवमात्रेणात्रोक्तदोषानुद्धरणादित्याशङ्क्य तात्पर्यमाह—*ननु वैरूप्येति* ॥

"यत्रोभयोः समो दोषः परिहारोऽपि वा समः। नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥"

इति न्यायविरोधादेतादृशबोधानुत्थितिरित्यर्थः। गुणकर्मपदस्याप्रसिद्धार्थत्वाद् व्याचष्टे—*क्रत्वङ्गेति* ॥ ब्रह्म-

पञ्चपादिका

न निराकृतं स्यात् ; यत्र प्रमाणान्तरसिद्धं गुणकर्मणः कर्मकारकम्, तत्र तस्योत्पत्त्याद्यन्यतमफलं तद् विधीयते ; यत्र पुनः प्रमाणान्तरादसिद्धो ज्ञानस्य कर्मभूतो विषयः, स तेनैव प्रमीयमाणो न सिद्धवदुद्देश्यः, येन तदुद्देशेन तत्रातिशयाधानाय ज्ञानं विधीयते ॥

पञ्चपादिकाविवरणम्

गुणकर्माणि । तत्र क्रियाजन्यातिशयविशिष्टमेव कर्मकारकं कारकविभक्त्यभिधेयमित्यङ्गीकृत्य वैरूप्यमुच्यते । व्रीहीणां तावत् प्रमाणान्तरसिद्धत्वात् कारकत्वाच्चानुवाद्यत्व-गुणत्वोद्देश्यत्वानि सिद्धानि, विधेयप्रोक्षणजन्यातिशयवत्तया साध्यत्वोपादेयत्व-प्राधान्य-विधेयत्वानि विभक्तिसामर्थ्यात्प्रतीयन्ते, इत्येकस्यां प्रमितौ गुणकर्मसु वैरूप्यमिति ॥ तत्र न क्रियाजन्यातिशयो वैभक्तिकः, किन्तु तदर्थक्रियाविध्यनुपपत्तिगम्यः ; अतः शाब्दज्ञाने गुणत्वोद्देश्यत्वानुवाद्यत्वान्येव प्रतीयन्ते, प्राधान्य-प्रमेयत्वोपादेयत्वानि त्वर्थापत्तिप्रमित्यन्तरेऽवभासन्ते, इति ज्ञानभेदान्न वैरूप्यदोष इति परिहरति—*न निराकृतं स्यादिति* ॥ इहापि तर्हि ब्रह्मज्ञान-विधेयज्ञानयोर्भेदाद् विरुद्धत्रिकस्य व्यवस्थयाऽवभास इति, नेत्याह—*यत्र पुनः प्रमाणान्तरादिति* ॥ *ननु* इहापि ज्ञानद्वयमेवेष्यताम्, कस्तर्हि सामग्रीभेदः ? नचैकसामग्रीजन्यज्ञानसहस्रस्यापि प्रमेयभेदः सम्भवति । अस्तु तर्हि

ऋजुविवरणम्

भूतेति* ॥ कथमत्र वैरूप्यम् ? संस्कारस्य विधिसामर्थ्यलभ्यस्य शब्देन प्रतीत्यभावात्, एकप्रतीतिप्राप्तस्यैव दूषणहेतुत्वादित्याशङ्क्याह—*तत्र क्रियाजन्येति* ॥ "न निराकृतमि"ति कथमुक्तम् ? एकप्रमाणगम्यत्वाङ्गीकारेण चोद्यस्य कृतत्वात्, तथा "यत्र प्रमाणान्तरसिद्धमि"त्यनेन शब्दव्यतिरिक्तप्रमाणान्तरमुक्तमिति प्रतिभाति, तदयुक्तम् ; प्रमाणान्तरस्यादर्शनात्, "उत्पत्त्याद्यन्यतमं फलं विधीयते" इति वदता प्राधान्यादीनां शाब्दत्वमुक्तमिति प्रतिभाति, तथा सति ज्ञानभेदाभावाद् वैरूप्यम्,अतिशययुक्तत्वेन तद्रूपता ; तद्युक्तत्वबोधकपदाभावे शाब्दत्वायोगादित्याशङ्क्याह—*तत्र न क्रियेति* ॥ *ननु* एकयैव सामग्र्या द्विविधं ज्ञानमुत्पाद्यताम्, किं सामग्रीभेदेन ? इत्याशङ्क्याह—*नचैकसामग्रीति* ॥ "अथार्थवादे"त्यनेन विधायकपदव्यतिरिक्तपदानां बोधकत्वमर्थवाददृष्टान्तेन चोदितमिव प्रतिभाति ; दृष्टान्तसामर्थ्यात् सन्निधानसामर्थ्याच्च, तथा सति विषमो दृष्टान्तः ; अर्थवादपदानां पृथग्बोधकत्वा-

तत्त्वदीपनम्

ज्ञानस्य प्रमेयपरत्वाद् विधेयत्वाच्च वैरूप्यं प्रसज्यत इत्युक्ते गुणकर्मविधानानुपपत्तेर्न वैरूप्यप्रसङ्गो दोष इत्युक्तम्, तन्न युक्तम्, तत्र शब्दाद् व्रीहीणां गुणत्वादिकं प्रथते, प्राधान्यादिकं त्वर्थापत्त्येति वैषम्यादित्याशङ्क्याह—*तत्रेति* ॥ "व्रीहीनि"ति द्वितीयया कर्मकारकत्वेन प्राधान्यादिकमपि प्रथत इत्यर्थः । वैरूप्यमेव स्पष्टयति—*व्रीहीणामिति* ॥ अनुवाद्यत्वोद्देश्यत्वयोर्हेतुः प्रमाणान्तरसिद्धत्वम्, गुणत्वे च कारकत्वमिति द्रष्टव्यम् ॥

शाब्द्यामेकस्यां प्रतिपत्तौ प्राधान्यादिप्रतिपत्तेरुपपादितत्वाद् "न निराकृतं स्यादि"त्याद्यनुपपन्नम्, इत्याशङ्क्य प्रतिपत्तिभेदमाह—*तत्र न क्रियेति* ॥ व्रीह्याद्युद्देशेन विहितप्रोक्षणक्रियानिष्पत्त्युत्तरकालमतिशयो जायते, ततश्च व्रीहिमात्रं विभक्त्यर्थ इत्यर्थः । प्रकृतेऽपि ज्ञानभेदाङ्गीकारेण गुणकर्मसाम्यं शङ्कते—*इहापीति* ॥ नच "प्रथमज्ञानमि"त्यनेन पौनरुक्त्यं शङ्क्यम् ; तत्रैकस्मात् शब्दादुत्पन्नज्ञानद्वयस्योभयपरताया निरस्तत्वात् । अत्र च करणभेदेन ज्ञानभेदस्याभिप्रेतत्वादिति द्रष्टव्यम् । करणभेदोऽसिद्ध इत्याह—*नेत्याहेति* ॥ आत्मा, प्रमाणान्तरगम्यः, भूतत्वात् ; संमतवत्, इत्याशयेन शङ्कते—*नन्विहापीति* ॥ भूतत्वेऽपि प्रमाणान्तरायोग्यत्वान्न तद्गम्यत्वमित्यभिप्रेत्याह—*कस्तर्हीति* ॥ सामग्रीभेदाभावेऽपि ज्ञानद्वयं जायतामिति मन्वानं विस्मरणशीलं प्रत्याह—*नचेति* ॥ एकसामग्र्युत्थज्ञानद्वयस्य प्रमेयभेदपरताऽदृष्टेरित्यर्थः । सामग्रीभेदाभावोऽसिद्ध इति शङ्कते—*अस्तु तर्हीति* ॥ विधिविधुराणि पदानि स्वारसिकवृत्त्या ब्रह्मज्ञानं जनयन्ति, तच्च स्वतःपुरुषार्थसंस्पर्शमलभमानं विधिद्वारा पुरुषार्थसंस्पर्शि, इति विध्येकवाक्यता सत्यादिपदानामित्यर्थः ॥

पञ्चपादिका

तस्मादत्र युगपदुभयासम्भवाद् भवत्येव वैरूप्यप्रसङ्गः। नच स एव समन्वयः स्वावयवाद्विधेर्विभक्तः कार्यक्षमः ; अवान्तरवाक्यस्य प्रमाणत्वायोगात्। *अथ* अर्थवादपदानामिव परस्परतः संसृज्य कञ्चिदर्थमवबोध्य विधिसम्बन्धमनुभवेदित्यभिप्रायः ? तदसत् ; युक्तमर्थवादपदानि स्वार्थफलरहितानि तत्र पर्यवसानाभावात् फलवदङ्गतामश्नुवीरन्निति, इह पुनरपरामृष्टविधिः पदसमन्वयः स्वार्थमवगमयन्निरस्तनिखिलप्रपञ्चावग्रहमपास्तातिशयानन्द-नित्यानुभवैकरसं शिवमद्वैतमात्मतत्त्वमवगमयेत्, तत्र कुतो विधिशेषताकृतं कृत्यं प्राप्तं प्रापणीयम् ? "आत्मलाभान्न परं विधीयते" इति स्मृतेः॥

पञ्चपादिकाविवरणम्

विधायकपदव्यतिरिक्तपदसमुदायस्य पृथगेव ब्रह्मस्वरूपं प्रतिपाद्य पुनस्तदनुवादज्ञानं जनयित्वा तस्य विधिविषयत्वसमर्पणेन पुनर्विधायकपदेन पदैकवाक्यतेति, नेत्याह—*नच स एव समन्वय इति*॥ *ननु* तर्हि विधिपदेन यानि पदैकवाक्यभूतानि, तद्व्यतिरिक्तपदानां पृथगन्वयेन ब्रह्मप्रतिपत्तिशेषतेत्याशङ्कते—*अथार्थवादपदानामिवेति*॥ एवं तर्हि न ब्रह्मवाक्यस्य विधिवाक्यशेषता, नाप्यर्थवादतेत्याह—*तदसत्; युक्तमर्थवादपदानीति*॥ *ननु* इहापि भूतार्थत्वादर्थवादजन्यज्ञानवद्विधिशेषतेति, नेत्याह—*इह पुनरपरामृष्टेति*॥ प्रयोजनपर्यन्तत्वाय विधिशेषता, न भूतत्वनिमित्तेति भावः। यद्यपि शाब्दज्ञानादग्रहणं निवर्तते; तथाऽपि मिथ्याज्ञान-तत्संस्काराविद्यानिवृत्तिरपरोक्षानुभवात्, तस्य च शाब्दज्ञानादनुत्पद्यमानफलस्य सिद्धये

ऋजुविवरणम्

भावात्, पूर्वग्रन्थे निरस्तत्वादित्याशङ्क्यावतारयति—*ननु तर्हि विधिपदेनेति*॥ अर्थवादपदानां कथंचिदन्वयमङ्गीकृत्य दृष्टान्तः, अथवा—अङ्गवैषम्येणार्थवादतुल्यतां कृत्वा विधिवाक्यशेषतामात्रे दृष्टान्त इति ज्ञेयम्। भवतु नामात्मलाभः परमपुरुषार्थः; तथाऽपि भूतार्थत्वनिमित्तं विधिशेषत्वं पराकर्तुं न शक्यत इत्याशङ्क्याभिप्रायमाह—*प्रयोजनपर्यन्तत्वायेति*॥ "अथ पुनरि"त्यत्र "न तथे"ति पूर्वग्रन्थोक्तस्वरूपं निर्दिश्य, तदनुभवनिषेध इति प्रतिभाति, तदयुक्तम्; अनुभवदर्शनात्, "तेन साक्षात्करणाये"ति व्यधिकरणम्; "अनुभवाये"ति वक्तव्यत्वात्, अथ पूर्वमनुभवः साक्षात्कारः, अतस्तन्निषेध इति, तदयुक्तम्; अनुपयोगात्, शब्दादुत्पत्तिसंभवाच्च, विधानसंभवश्चोक्तः; तेन नाधिकं किंचिदित्याशङ्क्याह—*यद्यपीति*॥ "किं तद् ज्ञानमि"ति पृष्ट्वा प्रत्यक्षगोचरत्वनिराकरणं ब्रह्मणोऽसङ्गतम्। नच तन्मुखेन ज्ञानस्वरूपनिराकरणम्; विधीयमानज्ञानजन्यत्वमापरोक्ष्यस्येति चोद्येऽक्षजत्वशङ्कानुदयादसंगतं निराकरणमित्याशङ्-

तत्त्वदीपनम्

किं पदैकवाक्ये पृथगर्थप्रतिपत्तिमुत्पाद्य विध्येकवाक्यत्वं कथ्यते ? आहो वाक्यैकवाक्ये ? नाद्य इत्याह—*नेत्याहेति*॥ पदैकवाक्येऽप्यवान्तरवाक्यकल्पनया प्रामाण्याङ्गीकृतौ "न सुरां पिबेदि"त्यादावप्यवान्तरवाक्यकल्पनया तस्य प्रामाण्यमापतेत्, नच तथाऽऽस्थीयते, युज्यते वेति टीकार्थः। द्वितीयं पक्षमुत्थापयति—*ननु तर्हीति*॥ दृष्टान्तो विषम इत्युक्तम्—"तदसदि"त्यत्र, तदसंगतम्; अर्थवादपदानामिवार्थवादत्वाद् विधिशेषतया पुमर्थसंस्पर्शित्वादित्याशङ्क्य, असिद्धो हेतुरित्याह—*एवं तर्हीति*॥ प्रकारान्तरेण सत्यादिवाक्यस्य विधिशेषत्वं शङ्कते—*नन्विहेति*॥ विषमो दृष्टान्त इत्याह—*नेत्याहेति*॥ तथाऽप्यनुमानस्य किं दूषणमिति ? अत आह—*प्रयोजनेति*॥ स्वार्थप्रतिपादने फलविधुरत्वमुपाधिरित्यर्थः॥

टीकायां 'शिवमि'त्युक्त्याऽऽत्मनः सुखत्वमुक्तम्, तत्राज्ञायमानस्य तस्यापुमर्थत्वाद् ज्ञातत्वम्, तथाचाद्वैतहानिशङ्कायां तत्स्फुरणमर्थ्यते, न तु तद्विषयमित्यभिसन्धिनोक्तम्—*अनुभवेति*॥ आत्मनः सुखत्वात् कथमनुभवैकरसत्वम् ? इत्याशङ्क्यानयोरभेदादित्याह—*आनन्देति*॥ तयोः सविशेषत्वात् कथमभेदः ? इति शङ्कायामुक्तम्—*अपास्तेति*॥ तच्चोभयोर्विशेषणम्। शाब्दज्ञानादग्रहणस्य निवृत्तत्वात् किं साक्षात्कारेण ? इत्याशङ्क्य तात्पर्यमाह—*यद्यपीति*॥ आत्मज्ञानस्य विधित्सितत्वात् किं तद् ज्ञानम् ? इति प्रश्नानुपपत्तिमाशङ्क्य तात्पर्यमाह

पञ्चपादिका

अथ पुनः शाब्दज्ञानान्न तथाऽनुभवः, तेन साक्षात्करणाय विधिरिति, किं तज्ज्ञानमनुभवाय विधीयते? प्रत्यक्षादीनां तावदगोचरः; "न चक्षुषा गृह्यते" इत्यादिमन्त्रवर्णात्। शाब्दं च नेष्यते भवता, *सत्यम्* न शाब्दज्ञानं विधिविकलमनुभवायालम्, विहितं त्वनुभवहेतुरिति, तदयुक्तम्; यत् तावत् स्वाध्यायाध्ययनविधिग्राहितात् पदसमन्वयात् स्वभावतः समुत्पन्नम्, तत् तावन्न विधीयते; प्रमेयपरतया विधिविषयत्वानुपपत्तेरित्युक्तम्। अथ पुनस्तदेव ज्ञानं सन्तनुयादिति

पञ्चपादिकाविवरणम्

ज्ञानं विधीयत इत्याशङ्कते—*अथ पुनः शाब्दज्ञानादिति* ॥ तर्हि विधीयमानज्ञानस्य व्रीह्यादिवत्करण-कारकं वक्तव्यम्, तन्न सम्भवतीत्याह—*किं तज्ज्ञानमिति* ॥ *ननु* प्रत्यक्षादीनामपरोक्षज्ञानसाधनत्वं प्रसिद्धमिति, *न*; पूर्वज्ञानवदतत्फलत्वप्रसङ्गादित्याह—*शाब्दं चेति* ॥ *ननु* विधीयमानं शाब्दं ज्ञानमिति, किं तज्ज्ञानं विधीयमानतया परोक्षफलं प्राथमिकज्ञानम्? तत्सन्तानो वा? न तावत् प्राथमिकमित्याह—*तदयुक्तं यत्तावदिति* ॥ उभयपरत्वे वैरूप्यस्य दर्शितत्वादिति वाक्यशेषः। *ननु* प्रथमज्ञानेनावगते ब्रह्मणि तदुद्देशेन प्रत्ययसन्तानो विधीयताम्, तत्संस्कारप्रचयादपरोक्षसिद्धेरिति शङ्कते—*अथ पुनस्तदेव ज्ञानमिति* ॥ किमुपासनविधिसामर्थ्यादिदमवगतम्? किं वा "आत्मन्येवात्मानं पश्येदि"ति दर्शनविधानसामर्थ्या-दिति? न तावदुपासने विधिः श्रूयते; "आत्मेत्येवोपासीत" "आत्मानमेव लोकमुपासीत" "तमेव धीरो विज्ञाये"त्यादेः स्वभावसिद्धप्रत्ययोपादानेनालौकिकात्मविषयप्रतिपादनपरत्वात्, एवकारविशेषणश्रवणाद् वाक्यस्य

ऋजुविवरणम्

क्याह—*तर्हि विधीयमानस्येति* ॥ "शाब्दं च नेष्यते"इत्ययुक्तम्; तेन तथैव चोदितत्वात्, अनङ्गीकारे चोत्तर-ग्रन्थे "सत्यमि"ति चोद्यानुपपत्तिप्रसङ्गादित्याशङ्क्यावतारयति—*पूर्वज्ञानवदिति* ॥ प्रमेयपरस्यैव विधिविषयत्व-मपि भवत्विति टीकायामनुपपत्तिमाशङ्क्याह—*उभयपरत्व इति* ॥ "अथ पुनस्तदेवे"त्ययुक्तम्; सिद्धस्यावृत्त्य-नुपपत्तेः, इत्याशङ्क्याह—*ननु प्रथमेति* ॥ "तत्कथमि"त्यसम्बद्धम्; उपास्ति-ध्यायत्योर्विद्यमानत्वादित्याशङ्क्य, तस्यार्थान्तरत्वं दर्शयितुं तयोरविधायकत्वं दर्शयति—*किमुपासनाविधीति* ॥ कथमेषामलौकिकात्मविषयत्वप्रति-पादनपरत्वमेव, नतूपासनास्वरूपविधायकत्वमिति? तदाह—*एवकारविशेषणेति* ॥ सगुणश्रुतौ गुण एव विधिः

तत्त्वदीपनम्

—*तर्हीति* ॥ किं चक्षुराद्यन्यतममात्मप्रतिपत्तौ करणम्? उत शब्दः? इति विकल्प्याद्यमुत्थापयति *ननु प्रत्यक्षेति*॥ श्रुतिविरोधान्मैवमित्याह—*नेत्याहेति*॥ द्वितीयमनुवदति—*ननु शब्द एवेति*। शब्दस्य परोक्षज्ञानजननस्वाभाव्यात् तद्वैपरीत्यमयुक्तमित्याह—*न पूर्वेति* ॥ अविहितस्यापि प्रत्ययस्य विहितप्रत्ययवत् शाब्दप्रत्ययत्वादनुभवफलकत्वम्? इतरस्यापि तत्र स्यादिति टीकाऽनुपपत्तिमाशङ्क्य, सहकार्यपेक्षया शाब्दज्ञानस्यान्यथात्वमिति शङ्कते—*ननु विधीयमान-मिति* ॥ शाब्दज्ञानमात्रस्य विधेयत्वानङ्गीकृतेरनुक्तोपालम्भः, इत्याशङ्क्य विकल्पोत्तरपरतया व्याचष्टे—*किं तदिति* ॥ नच शाब्दज्ञानस्य विधेयतोक्तेर्विकल्पानुपपत्तिरित्याशङ्क्य, किं शाब्दज्ञानमात्रस्य विधेयत्वम्? उतावृत्ति-विशिष्टस्येति विकल्पोपपत्तेरिति द्रष्टव्यम्। उभयरूपत्वाभावे हेतुमाह—*उभयपरत्व इति* ॥ अलौकिकात्मज्ञान-मात्रस्यासिद्धत्वात् कथं तदुद्देशेन संतानविधानाभिधानम्? इत्याशङ्क्य टीकार्थं स्पष्टयति—*ननु प्रथमेति* ॥

उत्तरोत्तरज्ञानजनिसमये पूर्वपूर्वज्ञानस्य नष्टत्वात् कथमपरोक्षप्रथोदयः? तत्राह—*तत्संस्कारेति* ॥ "उपासीते"त्यादिशब्दात् प्रतिपत्तेः "तत्कथं लभ्यते" इत्ययुक्तमित्याशङ्क्य विकल्पपूर्वकं व्याचष्टे—*किमुपासनेति* ॥ *स्वभावसिद्धेति* ॥ अलौकिकात्मप्रत्ययमुपासीतेत्यनूद्य निष्प्रपञ्चात्मा प्रमाणान्तरानधिगत आत्मैवेति वाक्येन प्रति-पाद्यत इत्यर्थः। अलौकिकात्मप्रतिपादकत्वं कस्मात्? यथाश्रुति तदुपास्तिविधिपरत्वमेव किं न स्यात्? इत्या-शङ्क्याह—*एवकारेति* ॥ ततः किमिति? अत आह—*वाक्यस्येति* ॥

पञ्चपादिका

विधीयते, तत् कथं लभ्यत उपास्ति-ध्यायत्योर्ज्ञानसन्तानवाचिनोरन्यतरस्याप्युपादानमन्तरेण ? नापि ज्ञानेनैव स्वसन्तानो लक्ष्यते ; साहचर्याद्यव्यभिचरितसम्बन्धाभावात् । नाप्यभ्यासात् साक्षाद्भावः सिद्धः ।

पञ्चपादिकाविवरणम्

विशेषणपरत्वात्, उभयप्रतिपादने वाक्यभेदात्, "निदिध्यासितव्यः" इति चात्मप्रतिपादनपरे वाक्यभेदाभावाय स्तुतिपरत्वात् । अथ दर्शनविधिसामर्थ्यादिति, नेत्याह—*तत्कथं लभ्यत उपास्ति-ध्यायत्योरिति* ॥ *ननु* ज्ञानस्य सर्वत्र प्रवाहेणाविनाभावाज्ज्ञानविधानेन सन्तानविधिर्लक्ष्यत इति, नेत्याह—*नापि ज्ञानेनैवेति* ॥ अथापि कथञ्चिदुपासनविधानं कल्प्येत निदिध्यासनविधेः ; तथाप्यपरोक्षफलस्याहेतुत्वादुपासनस्य न शाब्दज्ञानाद्विशेष इत्याह—*नाप्यभ्यासादिति* ॥ अभ्यासस्याप्रमाणत्वाद्विषयस्यासम्प्रयुक्तत्वाच्च न वस्त्वापरोक्ष्यमभ्यासात्, किन्तु मिथ्याऽऽपरोक्ष्यमित्यर्थः *ननु* "ततस्तु तं पश्यते निष्कलं ध्यायमानः" इति ध्यानमपरोक्षफलं श्रूयते, *सत्यम्* ; एकत्र चित्तस्य समवधानता तदैकाग्र्यनिमित्तं भवति, तदेकाग्रचेतसा सह-

ऋजुविवरणम्

संक्रामतीत्यर्थः । कथं गुण एव विधिः संक्रामति ? उभयस्य विधेयत्वं कस्मान्नाङ्गीक्रियते, इत्याशङ्क्याह—*उभयप्रतिपादन इति* ॥ भिन्नपदोपात्तयोः सम्बन्धाभावे विशिष्टविध्यसंभव इति भावः । तर्हि विशेषणरहितम् 'उपासितव्यम्' इत्यादिवाक्यं विधायकमस्त्वित्याशङ्क्याह—*आत्मप्रतिपादनेति* ॥ "नाप्यभ्यासादि"ति व्यर्थम् ; अभ्यासस्य विधाननिराकरणे साक्षाद्भावहेतुत्वशङ्काया दूरनिरस्तत्वात्, इत्याशङ्क्यावतारयति—*अथापि कथञ्चिदिति* ॥ *ननु*—अभ्यासस्य साक्षात्कारहेतुत्वं दृष्टं कामिनीध्याने, इत्याशङ्क्याभिप्रायमाह—*अभ्यासस्येति* ॥ "नापि श्रूयते" इति ग्रन्थमाक्षिपति—*ननु "ततस्तु तमि"ति* ॥ *ननु*—शब्दस्यैवापरोक्षज्ञानसाधनत्वम्, ध्यानस्य तु निमित्तत्वमेवेति वक्तुं न शक्यते ; "ध्यायमानः पश्यती"त्ति साक्षाद्धेतुत्वप्रतीतिविरोधात्, इत्या-

तत्त्वदीपनम्

यदुक्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम् । तदुक्तमेवकारश्च स्यादुपादेयलक्षणम् ॥

ईत्यभियुक्तोक्तेरित्यर्थः । विशेषणपरत्वादित्युक्तं व्यतिरेकमुखेन द्रढयति—*उभयेति* ॥ "निदिध्यासितव्यः" इति वाक्यादुपासनविधिमवगच्छाम इत्याशङ्क्याह—*निदिध्यासितव्य इति* ॥ "निदिध्यासितव्यः" इत्यत्रापि वाक्ये नोपास्तिविधानमिति शेषः । तत्र हेतुमाह—*आत्मेति* ॥ पूर्वोत्तरवाक्ययोरात्मपरत्वादेतदपि तत्परमित्यर्थः । "अधस्तात्समिधं धारयन्ननुद्रवेदि"त्यधोधारणविधिपरेऽपि वाक्ये यथोपरिधारणविधिः, तथाऽत्रापीत्याशङ्क्याह—*वाक्यभेदेति* ॥ तत्रैकार्थ्यासंभवाद् वाक्यभेदः, न तथाऽत्र, तव्यप्रत्ययस्याहार्थेऽपि स्मरणात् स्तावकत्वेनाप्यन्वयोपपत्तेरित्यर्थः । द्वितीयमनुवदति—*अथेति* ॥ उपास्तिवाचकपदाभावेऽपि ज्ञानशब्देन तस्य लक्ष्यमाणत्वाद्विधानं युक्तमिति शङ्कते—*ननु ज्ञानस्येति* ॥ अविनाभावादिति* ॥ ज्ञान-प्रवाहयोः साहचर्यमात्रं विवक्षितम् ; अनात्मज्ञानवदात्मज्ञानस्यापि प्रवाहसाहचर्यात्, तेन तल्लक्षणेत्यर्थः । प्रवाहाभावेऽपि ज्ञानस्य दृष्टत्वान्न लक्षणेत्याह—*नेत्याहेति* ॥ अभ्यासस्याविधेयत्वे साक्षात्कारहेतुत्वं दूरापास्तमित्युत्तरग्रन्थवैयर्थ्यमाशङ्क्योपासनविधिमङ्गीकृत्य तस्य साक्षात्कारहेतुत्वं निरस्यतीत्याह—*अथापीति* ॥ *कथंचिदिति* ॥ वाक्यभेदेनेत्यर्थः । कामुकस्य कामिनीध्यानात्तदापरोक्ष्यदृष्टेः कथं तस्य तद्धेतुत्वाभावः ? इत्याशङ्क्याह—*अभ्यासस्येति* ॥ इन्द्रियसंप्रयुक्तं ह्यपरोक्षम्, नष्टव्यवहितकामिन्यादेरतादृक्त्वान्नापरोक्षत्वमित्याह—*विषयस्येति* ॥

आत्मज्ञानाभ्यासस्य साक्षात्कारहेतुतायाः श्रुतत्वात् कथं तदपलापः ? इति शङ्कते—*ननु तत इति* ॥ अन्तःकरणशुद्धिसमनन्तरमित्यर्थः । श्रवणमात्रमङ्गीकरोति—*सत्यमिति* ॥ तर्हीष्टसिद्धिरित्याशङ्क्य, ध्यानं किं साक्षात् साक्षात्कारं प्रसूते ? उत परम्परया ? इति विकल्प्यान्त्यमङ्गीकरोति—*एकत्रेति* ॥ समवधानताशब्देन ध्यानं

पञ्चपादिका

नापि श्रूयते, येन तदुद्देशेन ज्ञानसन्तानो विधीयेत। *ननु* किमत्र श्रवणेन ? स्वयमेव साक्षा-

पञ्चपादिकाविवरणम्

कारिणा शब्द एव—"औपनिषदमि"ति तद्धितप्रत्ययसामर्थ्यादपरोक्षज्ञानमुत्पादयति ; ध्यायमानो ज्ञानप्रसादेन पश्यतीति वाक्यस्यान्वयात्, चित्तैकाग्र्यस्य सूक्ष्मवस्तुदर्शननिमित्तत्वात्, दृष्टेनैवोपकारसिद्धावदृष्टकल्पनायोगात्, आपरोक्ष्यकामस्योपासनायां स्वयंप्रवृत्तेः, दृष्टार्थत्वाच्च निदिध्यासनविधानस्येत्युक्तम्, तदेतदाह—*नापि श्रूयत इति* ॥ दृष्टसामर्थ्यानुवादत्वाद्वाक्यस्य विधिर्न श्रूयत इत्यर्थः। *ननु* ऐकाग्र्यद्वारेणापरोक्ष्यनिमित्तत्वाद् दृष्टद्वारेणापि प्रवर्ततामिति चोदयति—*ननु किमत्र श्रवणेनेति* ॥ परिहारग्रन्थः स्पष्टार्थः।

ऋजुविवरणम्

शङ्क्य व्याचष्टे—*ध्यायमानो ज्ञानेति* ॥ *ननु*—ध्याननिरपेक्षशब्दस्य लोके बोधकत्वदर्शनादत्रापि शब्दस्य हेतुत्वे ध्यानस्य वैयर्थ्यमित्याशङ्क्याह—*चित्तैकाग्र्यस्येति* ॥ *ननु*—कथमैकाग्र्यद्वारेणैव हेतुत्वम् ? ननु साक्षादित्याशङ्क्याह—*दृष्टोपकारसिद्धाविति* ॥ *ननु*—अदृष्टस्य साधनत्वस्य कल्पनं नास्ति ; विधानसामर्थ्यादेव साधनत्वसिद्धेः, इत्याशङ्क्याह—*आपरोक्ष्यकामस्येति* ॥ अथवा—भवतु नामैकाग्र्यद्वारेण हेतुत्वम्, तथाऽपि विधानस्य विद्यमानत्वात् "नापि श्रूयते" इति ग्रन्थस्यासामञ्जस्यं तदवस्थमित्याशङ्क्याह—*आपरोक्ष्येति* ॥ कथं स्वयमेव प्रवर्तत इति ? तदाह—*दृष्टार्थत्वाच्चेति* ॥ अदृष्टार्थत्वादिति पाठे नियमादिवैयर्थ्यमिति ज्ञेयम्। "तदेतदाहे"त्युक्तार्थे टीकामवतारयति प्रकृतसमर्थनमस्योपपादनार्थमिति दर्शयितुम्। *ननु*—एवमपि न श्रूयत इति न वक्तव्यम् ; श्रवणस्य विद्यमानत्वादित्याशङ्क्यानुवादाभिप्रायमेतत् श्रवणवचनमिति व्याचष्टे—*दृष्टसामर्थ्येति* ॥ *"ननु* किमत्र श्रवणेने"ति चोद्यमनुपपन्नम् ; स्वसिद्धान्तविरोधात्, विधिनिष्ठत्वमङ्गीकृत्यैव तत्सिद्धान्तप्रवृत्तेः, इत्याशङ्क्यावतारयति—*नन्वैकाग्र्यद्वारेणेति* ॥ शब्दजन्यज्ञानव्यतिरेकेण द्वितीयज्ञानस्य प्रापकं

तत्त्वदीपनम्

विवक्षितम्। *ननु* ऐकाग्र्यस्य प्रमाकरणत्वाप्रसिद्धेः कथं तद्द्वारेण साक्षात्कार इति ? तत्राह—*तदैकाग्र्येति* ॥ तत्र हेतुमाह—*औपनिषदमिति* ॥

एवं कल्पनायां "ध्यायमानः पश्यते"इति श्रुतिः पीडेयतेत्याशङ्क्याह—*ध्यायमान इति* ॥ ज्ञायतेऽनेनेति ज्ञानमन्तःकरणम्, तस्य प्रसाद ऐकाग्र्यम्, तेन सहकारिणा शब्दादात्मतत्त्वं ध्यानवान् पश्यतीत्यर्थः। ध्यानस्य शब्दसहकारित्वमदृष्टचरमिति शङ्कां निरस्यति—*चित्तेति* ॥ स्पष्टदृष्टौ ध्यानानपेक्षायामपि सूक्ष्मदृष्टौ तदपेक्षाऽन्वयाद्यधिगतेरित्यर्थः। परिशिष्टमाद्यं कल्पं प्रत्याह—*दृष्टेनेति* ॥ ध्यानस्य साक्षात्प्रमितिहेतुताया लोकेऽदृष्टत्वात् कल्पनाऽनुपपत्तेरित्यर्थः। अन्वय-व्यतिरेकसिद्धसाधनत्वादपि नाभ्यासे विधिरित्याह—*आपरोक्ष्येति* ॥ "मनन-निदिध्यासनाभ्यां सह श्रवणं नामाङ्गि विधीयते" इत्यत्र निदिध्यासनविधिराश्रितः, ततः कथं तन्निरसनमित्याशङ्क्याह—*अदृष्टार्थत्वादिति*॥ साक्षादापरोक्ष्यहेतुत्वेन निदिध्यासनं विधीयत इति यन्मतम्, तदत्र निषिध्यते, प्रथमवर्णके तु निदिध्यासनविध्यायत्तं यदिदं चित्तैकाग्र्यलक्षणदृष्टफलसमवाय्यदृष्टम्, तस्मिन् सति शब्दादेवापरोक्षप्रत्ययोत्पत्तेरभिधानान्न किंचिद्व्यवद्यमित्यर्थः। दृष्टार्थत्वादिति पाठे कथं स्वतः प्रवृत्तिरिति शङ्कां निराचष्टे—*दृष्टार्थत्वादिति*॥ "ततस्तु तं पश्यते"इति श्रूयमाणत्वात्—"नापि श्रूयते" इति कथमुक्तम् ? इत्याशङ्क्य, किं ध्यायमान इत्यस्याप्रवृत्तप्रवर्तकत्वम् ? उत विधिः ? इति विकल्प्याद्यं दूषयति—*दृष्टेति* ॥ ध्यानस्यैकाग्र्यद्वारेण यदिदं ज्ञानहेतुत्वं प्राप्तम्, तदनूद्यत इत्यनुवादाभिप्रायमेतदित्यर्थः। द्वितीयं प्रत्याह—*विधिरिति* ॥ विध्यङ्गीकारेणारम्भसमर्थनस्य प्रस्तुतत्वात् "ननु किमत्र श्रवणेने"त्यनुपपन्नमित्याह—*नन्वैकाग्र्ये ति* ॥ नाप्रवृत्तप्रवर्तकम्, किंतु बोधकमेतदित्यर्थः। समुच-

पञ्चपादिका

त्कारकरणाय पुरुषार्थत्वादभिमुखः पुरुषः ; सिद्धश्च ज्ञानाभ्यासः शास्त्रश्रवणादौ साक्षात्करणे हेतुः, *यद्येवम्* किं विधिना ? स्वयमेव पुरुषार्थे निर्ज्ञाते हेतौ प्रवर्तते । यत् पुनर्निदर्शनम्—शाल्यर्थं कुल्याः प्रणीयन्त इति, युक्तं तत्र ; प्रत्यक्षत उभयार्थताया उपलभ्यमानत्वात्, इह पुनर्न्यायतः प्रतिपत्तव्यम् । स च न्यायो न युगपत् सम्भवतीत्युक्तम् । यदपीदमुक्तम्—पदार्थानां विधायकः शब्दः क्रमस्यापि विधायकः, एवमैकात्म्यस्य प्रतिपादकः समन्वयो विधिविषयमपि ज्ञापयिष्यतीति, तदप्यपेशलम् । यत् तावत्प्रत्येकं प्रयाजादिविधयः, तैः पुनर्न तेषामेव विधानम् ।

पञ्चपादिकाविवरणम्

अतो ज्ञानद्वयाभावादेकस्य ज्ञानस्योभयार्थताऽयोगान्न ब्रह्मज्ञानं विधेयमिति भावः । *यत्पुनरिति स्पष्टार्थः* । न स्थायिवस्तुदृष्टान्तेन तात्पर्यसापेक्षशब्दव्यापारनिर्णय इत्याह—*युक्तं तत्रेति* ॥ *ननु* "समिधो यजति" "तनूनपातं यजति" "इडो यजति" "बर्हिर्यजति" "स्वाहाकारं यजती"ति पञ्च वाक्यानि पञ्च पदार्थान् विधाय तेषां क्रममपि विदधति, अतः शब्दस्यैव द्वैयर्थ्यमित्युक्तमनुवदति—*यदपीदमुक्तमिति* ॥ पदार्था एव शब्दगम्याः, क्रमस्त्वर्थापत्तिगम्यो न शब्दगम्य इति परिहरति—*यत्तावत्प्रत्येकमिति* ॥ ये

ऋजुविवरणम्

प्रमाणं ज्ञानं नास्तीत्युक्तम्, नतु तस्य प्रकृतोपयोगः कथितः ; अतो ग्रन्थसमुदायस्याभिप्रायमुपसंहारेण दर्शयति—*अतो ज्ञानद्वयेति* ॥ "यत्तावदि"त्यत्र यच्छब्दस्यैकवचनस्य "विधयः" इत्यनेन बहुवचनेनान्वयायोगाद् व्याचष्टे—*ये तावदिति* ॥ "न तेषामि"त्यनेन प्रयाजादीनामेवोपात्तत्वेन योग्यत्वाद् निर्देशः, तथा सति तैर्विधिभिस्तेषां प्रयाजादीनां न विधानमित्युक्तं स्यात्, यद्वाऽवधारणेनान्यस्यापि विधानप्रतीतेर्विरोधः, तदर्थमाह—*तेषामेव न क्रमस्येति* ॥ "नापि ते क्रमशब्दाभिधेयाः"इत्यत्र शब्दाभिधेयत्वनिराकरणं दृश्यते, तदप्रस्तुतम् ; प्रयोगवचनोऽ-

तत्त्वदीपनम्

यार्थेनापिशब्देन विधेरभिधानम् । विधिं विना पुमान् ध्याने कस्मात् प्रवर्ततामिति ? तत्राह—*दृष्टेति* ॥ दृष्टमैकाग्र्यं द्वारं कारणं यस्य साक्षात्कारस्य, स तथोक्तः, तेनेति विग्रहः । साक्षात्कारनिमित्तमिति यावत् । तथाऽपि ध्याने प्रवृत्तिः कस्मादिति ? अत्राह—*ऐकाग्र्येति* ॥ अत्र ध्यानेऽप्रवृत्तप्रवर्तकत्वलक्षणविधिश्रवणेन किं फलिष्यति ? न तावत् साक्षात् कृतौ प्रवर्तयतीत्याह—*स्वयमिति* ॥ नापि तत्साधनेच्छालक्षणा प्रवृत्तिस्तन्निबन्धना ; अन्यतः सिद्धत्वादित्याह—*सिद्ध इति* ॥ तस्मात्तन्निर्वर्तनलक्षणप्रवृत्तेर्विध्यधीनत्वं वक्तव्यम् । तदर्थं विधिकल्पनमिति टीकार्थः । फलगुणादिनाऽपि प्रवृत्तिसंभवान्न तदर्थं विधिकल्पनमिति परिहाराभिप्रायः । टीकायामपेक्षितमुपसंहरणं पूरयति—*अत इति* ॥

क्वचिदुभयार्थतादृष्टौ तन्न्यायेनेतरत्रापि तत्कल्पनात् समाध्याभासत्वमाशङ्क्य, किं शब्दस्य क्रमेणोभयार्थत्वम् ? उत युगपत् ? नाद्य इत्याह—*न स्थायीति* ॥ कुल्यायाः स्थायित्वात् क्रमेणानेकार्थत्वं घटते, न तु शब्दस्य ; तात्पर्यवृत्त्या बोधकत्वात्, तात्पर्यस्य चोभयार्थताऽयुक्तेरित्यर्थः । *स चेत्यस्यायमर्थः*—कस्तर्हि न्यायः—इत्याशङ्क्य निर्विषयज्ञानविध्यनुपपत्त्योभयार्थत्वमुक्तं स्मरेत्याह—*स चेति* ॥ ओमिति चेत्, तत्राह—*नेति* ॥ कल्पान्तरमप्यनेन निरस्तमिति ॥ वैरूप्यप्रसङ्गेन निरस्तमिति द्रष्टव्यम् । अथवा—अवगमविध्यनुपपत्त्योभयपरत्वं स्वीक्रियताम्, तत्राह—*स चेति* ॥ उभयपरत्वे साधको न्यायो नेति कथमुच्यते ? तदुपलब्धेरित्याशङ्क्य, विरुद्धत्रिकद्वयापत्तिरूपन्यायान्तरपराहतेर्नैवमित्याह—*न युगपदिति* ॥ पदार्थानां विधायकः शब्दः क्रमस्यापि विधायक इत्युक्तम्, तत्र कोऽसौ विधायकः शब्दः ? इति वीक्षायामाह—*ननु समिध इति* ॥ प्रतिवचनस्य प्रश्नाननुसारित्वमाशङ्क्य तात्पर्यमाह—*पदार्था इति* ॥ एकस्य युगपदनेककर्मानुष्ठानानुपपत्त्या क्रमप्रतिपत्तिरित्यर्थः । शब्दस्योभयत्र प्रामाण्यं किं न स्यादित्यत आह—*न शब्देति* ॥ अन्यथासिद्धत्वादित्यर्थः । यच्छब्दस्यैकवचनत्वान्न तेषां विधानम् इत्यनेना-

पञ्चपादिका

नापि ते क्रमशब्दाभिधेयाः । प्रयोगवचनोऽपि प्रयुञ्जानस्तानेव प्रयुङ्क्ते । न ते क्रम इत्युक्तम् ॥

पञ्चपादिकाविवरणम्

तावदित्यर्थः । *तेषामेव । *न* ॥ क्रमस्य विधानमित्यध्याहारः । किं पदार्थेभ्योऽर्थान्तरभूतस्य क्रमस्य वाक्यैः प्रतिपादनमुच्यते ? किं वा पदार्थमात्रस्यैव क्रमस्य प्रतिपादनमिति ? न तावदुत्तरः कल्प इत्याह—*नापि ते क्रमशब्दाभिधेया इति* ॥ *ननु* विहितमङ्गं भवति, अङ्गं च प्रयुङ्क्ते प्रयोगविधिः ; अतः प्रयोगवचन-प्रयोज्यत्वेन क्रमस्यापि विधेयत्वे वाक्येभ्य एवापदार्थस्यापि क्रमस्य विधिरेष्टव्य इति, नेत्याह—*प्रयोगवचनोऽपीति*॥ विहितस्यैव प्रयोज्यत्वात् पदार्थानामेव विहितत्वादित्यर्थः ; अन्यथा विहिते(१) प्रयोगविधिः, प्रयोगविधौ च विधिकल्पनेतीतरेतराश्रयात् । *ननु पदार्था एव क्रमः, तस्मात् पदार्थान् प्रयुञ्जानः क्रममपि प्रयुङ्क्त इति, नेत्याह—*न ते क्रम इत्युक्तमिति* ॥ *अपर आह—न क्रमो नाम कश्चिदस्ति, एकैकस्मिन् पदार्थेऽ-

ऋजुविवरणम्

पी''त्यनेन प्रयोगविधिप्रयोज्यत्वनिरसनं चायुक्तम् ; नहि तेन प्रयोगविधिप्रयोज्यत्वमुक्तम् । यच्च समिदादिवाक्यानां क्रमविधायकत्वं तेनोक्तम्, तच्च न परिहृतम् ; अतो व्यर्थो ग्रन्थ इत्याशङ्क्यावतारयति—*किं पदार्थेभ्य इति* ॥ तेषामिति धर्मपक्षस्य प्रकृतत्वेन धीस्थत्वादादौ निर्देशः कृतः, स्वरूपपक्षस्य तु द्वितीयस्यापि निरन्तरत्वादादौ निराकरणं कृतम् । प्रयोगविधिप्रयोज्यत्वनिराकरणमप्रस्तुतम्, तेन हि पदार्थविधायकानामेव क्रमविधायकत्व-मुक्तम् ; अतः ''प्रयोगवचनोऽपी''त्यस्य वैयर्थ्यमिति यदुक्तम्, तत्परिहाराय प्रयोगविधिप्रयोज्यत्वनिराकरणम् ; समि-दादिवाक्यविधेयत्वनिराकरणार्थं प्रयोगविधिप्रयोज्यत्वेन समिदादिवाक्यविधेयत्वस्य विवक्षितत्वात्, इति प्रदर्शनपूर्वकं द्वितीयं पक्षं परिगृह्णाति—*ननु विहितमिति* ॥ ''तानेव प्रयुङ्क्ते''इति प्रतिज्ञामात्रमेव कृतम्, नतु युक्तिरभिहिता ; अतस्तद् व्याचष्टे—*विहितस्यैवेति* ॥ भवतु विहितस्यैव प्रयोज्यत्वम्, तथाऽपि विहितत्वमेव प्रयोगसामर्थ्यान्निश्ची-यतामित्याशङ्क्याह—*अन्यथा विहित इति* ॥ कथमस्य वस्तुभूतत्वम् ? युगपद्वर्तमानाश्रयाभावात्,

तत्त्वदीपनम्

न्वयो युक्त इत्याशङ्क्याह—*ये तावदिति । प्रत्येकमिति* ॥ कर्म कर्म प्रतीत्यर्थः । प्रयाजादिविधिभिः प्रयाजादीनां विधानमङ्गीकृतम्, ततश्च न तेषामेव विधानमित्यनुपपन्नमित्याशङ्क्याह—*तेषामेवेति* ॥ प्रयाजादीनां क्रमशब्दाभि-धेयत्वस्य तेनानुक्तत्वात् तन्निषेधोऽसमञ्जस इत्याशङ्क्य, हेत्वन्तराभिप्रायेण विकल्पपूर्वकमवतारयति—*किं पदार्थेभ्य इति*॥ एकैकपदार्थप्रतिपत्तावपि तदप्रतिपत्तेर्न पदार्थात्मकत्वं क्रमस्येत्यर्थः । आद्यपक्षमुत्थापयति—*ननु विहितमिति* ॥ वाक्ये क्रमस्य विधानमित्यत्र हेतुमाह—*प्रयोगवचनेति*॥ प्रयोज्यत्वमात्रेण कथं तस्य विधेयत्वम् ? इत्याशङ्क्याह—*अङ्गमिति* ॥ तथाऽपि कथं तस्य विधेयत्वमिति ? तत्राह—*विहितमङ्गं भवतीति* ॥ विहितस्याङ्गत्वादङ्गस्य च प्रयोगवचनप्रयोज्यत्वाद् विधायकान्तरस्यानिरूपणाद् वाक्यमेव विधायकमित्यर्थः । प्रयोगवचनप्रयोज्यत्वमेवासिद्ध-मित्याह—*नेत्याहेति* ॥ टीकापेक्षितं हेतुमाह—*विहितस्येति* ॥

पदार्थानामेव विहितत्वमसिद्धम् ; प्रयोगवचनप्रयोज्यत्वेन क्रमस्यापि विहितत्वादिति मन्वानं प्रत्याह—*अन्यथेति* ॥ *प्रयोगवचनप्रयोज्यत्वेन=विहितत्वेनेत्यर्थः । प्रयोगवचनप्रयोज्यत्वमन्तरेणापि क्रमस्य विहितत्वं सेत्स्यति, इति नेतरेतराश्रयत्वमिति शङ्कते—*ननु पदार्था इति* ॥ एकैकतरूपलब्धावपि वनानुपलब्धिवदेकैकपदार्थो-पलब्धावपि क्रमानुपलब्धिर्युक्तेत्यर्थः । वनस्य तर्वात्मकत्वाभावादनुपलब्धिः, क्रमस्य तदात्मकत्वे तदुपलब्धावुप-लब्धिः स्यात्, नच साऽस्ति, इति पदार्थात्मकत्वमसिद्धमित्याह—*नेत्याहेति* ॥ पदार्थविधायकेन क्रमाभावो नाश्रीयते, ततश्च तन्निषेधोऽनुपपन्न इत्याशङ्क्याह—*अपर आहेति* ॥ किमेकैकपदार्थवृत्तिः क्रमः ? उतानेकपदार्थ-वृत्तिः ? नाद्य इत्याह—*एकैकस्मिन्निति* ॥ द्वितीयेऽपि किं युगपदुत्पद्यमानानेकवृत्तिः ? उत क्रमेण ? नाद्य

(१) प्रयोगवचनप्रयोज्यत्वेनेति तत्त्वदीपनादृतः पाठः ।

पञ्चपादिका

नच क्रमो नामैकान्ततो नास्त्येव ; तद्बुद्धि-शब्दयोर्निरालम्बनत्वप्रसङ्गात् । तत्र क्रमो नाम वस्तुभूतो धर्मो विद्यत एव । त एव केनचिदुपाधिना वनवत् क्रमबुद्धिशब्दालम्बनं भवेयुः । स्मृतिविज्ञानमेव वाऽनुष्ठानकाले यथोपलब्धि पदार्थान् परामृशेत् । सर्वथाऽस्ति तावदेकैकपदार्थालम्बनज्ञानातिरिक्तं ज्ञानान्तरम् ॥ तच्चैकत्वात् कर्तुः, अनेकत्वाच्च पदार्थानाम्, युगपदनुष्ठानासम्भवादपेक्षितं

पञ्चपादिकाविवरणम्

दर्शनात्, अनेकपदार्थाश्रयत्वे पदार्थयौगपद्यात् क्रमायोगात्, अयौगपद्ये चोभयाश्रयधर्मायोगादिति, तत्राह— *न च क्रमो नामेति* ॥ *ननु* संयोगवदुभयाश्रयत्वे पदार्थयौगपद्यमित्युक्तम्, तत्राह—*तत्र क्रमो नाम वस्तुभूत इति* ॥ क्रमत्वादेव न यौगपद्यापेक्षेति भावः । *ननु* देश-काल-वस्तूपाधिपरामर्शमन्तरेण क्रमो न दृश्यत इति, तदाह—*त एवेति* ॥ *ननु* अनुष्ठेयपदार्थानामनिष्पन्नस्वभावत्वाद् न देश-काल-वस्तुक्रम इति, तत्राह—*स्मृतिविज्ञानमेवेति* ॥ पाठक्रम एव स्मर्यमाणोऽनुष्ठेयपदार्थेषूपरज्यत इत्यर्थः । सर्वथेत्युपसंहारः । *ननु* क्रमस्य विधायकं वक्तव्यम्, *न* ; क्रमस्याविधेयत्वात्, किंत्वनुष्ठेयविशेषणतया प्रमीयते क्रमः, न विधीयते ; अननुष्ठेयत्वात् । केन तर्हि प्रमीयते ? एकस्यानेकपदार्थप्रयोगानुपपत्त्येत्याह—*तच्चैकत्वात्कर्तु-

ऋजुविवरणम्

असङ्गतश्चायं ग्रन्थ इत्याशङ्क्याभिप्रायमाह—*क्रमत्वादेवेति* ॥ "स्मृतिविज्ञानमि"त्यनेन यथोपलब्धिपदार्थपरामर्श उक्तः, नतु क्रमप्रतीतौ निमित्तमुक्तम्, नच—पदार्थोपलब्धिनिरूपणमुपयुज्यते, इत्याशङ्क्य व्याचष्टे—*पाठक्रम एवेति । *ननु क्रमस्येति* ॥ यदि क्रमोऽङ्गीक्रियते, तर्हि विधायकेन भवितव्यम् ; तदभावे विधिस्वीकाराभावात्, तथा सति समिदादिवाक्यानामेव विधायकत्वेन दृष्टान्ततेति भावः । *न क्रमस्येति* ॥ क्रमस्वरूपमेवाङ्गीक्रियते, नतु विधेयता, तेन न विधायकापेक्षेति भावः । तर्हि क्रमाप्रतिपत्तिरेव, प्रतीतौ वा विधेयत्वनिराकरणमित्याशङ्क्याह—*किन्त्वनुष्ठेयेति* ॥ प्रयुक्त्युत्तरकालत्वेन नियोगसिध्यर्थत्वाभावादविधेय इति भावः । "यद्यदवबोध-

तत्त्वदीपनम्

इत्याह—*अनेकेति* । क्रमायोगादिति* ॥ क्रमभवनायोगादित्यर्थः । द्वितीयेऽपि किमपरिसमाप्यानेकत्र वर्तते ? उत परिसमाप्य ? इति वक्तव्यम् । नाद्य इत्याह—*अयौगपद्य इति* ॥ जाताजातयोः संयोगादृष्टेरित्यर्थः । द्वितीये त्वेकव्यक्त्युपलम्भे 'गौरि'त्युपलब्धिवदेकव्यक्तिप्रतिपत्तावपि क्रमो न निरूपणपथमवतरतीत्युक्तमनुवदति—*ननु संयोगवदिति* ॥ यौगपद्यप्रसङ्गमुक्तं निरस्यति—*क्रमत्वादिति* ॥ संयोगस्य न संयोगविशिष्टेऽवयविनि वृत्तिः, नापि तदभावविशिष्टे, किंतु प्रयोगयोग्ये ; तथा क्रमस्यापि एकक्षणावच्छिन्नपदार्थवृत्तित्वे क्रमत्वव्याघाताद् अयुगपद्भाविपदार्थवृत्तित्वम् । नच—अविद्यमानत्वात् पदार्थानां तदाश्रयत्वं नेति—शङ्क्यम् ; अविद्यमानस्यापि प्रतियोगिनोऽभावनिरूपकत्ववद् भविष्यदादेर्व्याप्तिनिरूपकत्ववत् क्रमाश्रयत्वोपपत्तेः । तस्मादयुगपद्भाविष्वपि क्रमोपपत्तिरित्यर्थः ॥

एकदेशतरुव्यतिरेकेण वनानुपलब्धिवत्पदार्थादिव्यतिरेकेण क्रमानुपलम्भाद् गौरवाच्च कथं तत्स्वीकरणमिति शङ्कते—*ननु देशेति* ॥ इष्टापत्त्योत्तरमाह—*तदाहेति* ॥ दृष्टान्तो विषम इति शङ्कते—*नन्वनुष्ठेयेति* ॥ तरूणामेकदेशत्वात् तदुपाधौ वनबुद्ध्यादिविषयत्वम्, समिदादीनां युगपदभावान्नैकदेशकालतया क्रमबुद्ध्यादिविषयत्वमित्यर्थः । स्मृतिज्ञानस्योपलब्ध्यनुरोधेन पदार्थपरामर्शित्वेऽपि कथं पदार्थे क्रमप्रतिपत्तिः ? इत्याशङ्क्याह—*पाठेति* ॥ क्रमविधायकाभावान्न तस्यानुष्ठेयत्वमिति शङ्कते—*ननु क्रमस्येति* ॥ अननुष्ठेयत्वमिष्टमित्याह—*न क्रमस्येति* ॥ शङ्कते—*किंत्विति* ॥ पाठक्रमानुसारेणार्थेऽपि क्रमप्रतिपत्तेर्न तदपलाप इत्याह—*अनुष्ठेयेति* ॥

अक्रियात्मनोऽपि दध्यादेर्यथा क्रियोपरक्ततया विधेयत्वम्, तद्वदत्रापीति शङ्कां निरस्यति—*न विधीयत इति* ॥ अथवा अतिप्रसङ्गचोदकस्य क्रमे मानं वक्तव्यमिति विवक्षितम् ? उत विधायकम् ? इति विकल्प्याद्यं निराचष्टे—*अनुष्ठेयेति* ॥ द्वितीयं निरस्यति—*न विधीयत इति* ॥ कुतस्तर्हि क्रमप्रतिपत्तिरिति शङ्कते—*केनेति* ॥

पञ्चपादिका

सन्निहितं च प्रयोगवचनेन गृह्यत इति युक्तम् । न तथेह ज्ञानद्वयमस्ति ; यदैकात्म्ये विधिविषयत्वे च वर्तेत । तस्मादिह विधेयाभावाद् विधानाश्रवणात्, अध्याहारे च प्रमाणाभावाद् न प्रयोगवचनोऽस्ति, यो मन्त्राणामिव ज्ञानस्यापि पुनः प्रयोगं विधास्यते । तस्मादसदेतत् कार्यविषयोऽपि वेदो वस्तुतत्त्वमवबोधयति—*इति* ॥ यत् पुनर्निदर्शनं चक्षू रूपे सति द्रव्यमपि बोधयति, एवं कार्ये सति तत्त्वमपि वेदोऽवगमयतीति, युक्तं तत्र यद्यदवबोधयति चक्षुः, तत्र तत्र स्वतन्त्रमेव प्रमाणम्, इह पुनर्यत्र तात्पर्यम्, तस्य प्रमेयता, न यद्यत् प्रतीयते, तस्य तस्येति वैषम्यम् ॥

आह—मा भूद् ज्ञानद्वयम्, योऽयमाभिधानिकः प्रत्ययः, स विधिविषय एव भवतु । तस्मिन्

पञ्चपादिकाविवरणम्

रिति* ॥ *सन्निहितं चेति* ॥ अर्थक्रमाभावे पाठक्रम इत्यर्थः । तस्मात् सर्वत्र प्रमाणद्वयेनैव प्रमेयद्वयसिद्धिरिति प्रकरणार्थः । *न तथेह ज्ञानद्वयमित्यारभ्य वेदोऽवगमयतीतिपर्यन्तः स्पष्टार्थः* । प्रतिवस्तुसंप्रयोगं निरपेक्षमेव प्रमाणं चक्षुः, न तथा प्रतिपदार्थं प्रमाणं शब्दः, किन्तु यत्र तात्पर्यम्, तत्र सम्भूयैव प्रमाणमित्याह—*युक्तं तत्र यद्यदवबोधयतीति*॥ *ननु* आभिधानिकमात्मतत्त्वज्ञानं प्रमेयपरमेव मा भूत्, किन्तु विधिविषयतया विधायकपदजन्यविधिप्रमितिविषयत्वेन विधिशेष इत्याह—*मा भूदिति* ॥ कथं तर्हि ब्रह्मात्मसिद्धिरिति ? तत्राह—*तस्मिन् विहितेऽर्थादिति* ॥ *ननु* कस्यानुपपत्त्या तत्त्वसिद्धिरिति ? तदाह—

ऋजुविवरणम्

यती''त्यनेन कथं वैषम्यम् ? यत्र बोधमुत्पादयति, तत्र स्वतन्त्रस्य प्रामाण्यं भवतु, इतरत्र तात्पर्याधीनता प्रमेयस्य भवतु, तथाऽपि यत्र यत्र शब्दो बोधमुत्पादयति, तत्र तत्र चक्षुरिन्द्रियशब्दबोधकत्वसंभवादुभयपरत्वप्रसङ्गादित्याशङ्क्याह—*प्रतिवस्तुसंप्रयोगमिति* ॥ ''आह मा भूदि''ति ज्ञानद्वयनिषेधेन कथं चोद्यं क्रियते ? आभिधानिकज्ञानस्य विधिविषयत्वेऽपि प्रमेयपरत्वे परिपन्थ्यभावात्, ''तस्मिन् विहिते''इति च व्याहतम् ; आभिधानिकज्ञानेन प्रमेयसिद्धावर्थसापेक्षत्वाभावात्, ''सविषयत्वादि''ति च विरुद्धो हेतुः ; अनुपपत्तिनैरपेक्ष्येण ज्ञानादेव तत्सिद्धिप्रतीतेः, तथा सति ज्ञानद्वयमेव, तच्च पूर्वं निरस्तम् ; अतो नाधिकमित्याशङ्क्याह—*नन्वाभिधानिक-

तत्त्वदीपनम्

पदार्थानामलौकिकत्वात् क्रमस्तावन्न लौकिकः, नापि शाब्दः ; तस्यान्यपरत्वादित्यर्थः । पूर्वोत्तरवाक्ययोरपि क्रमाप्रतिपत्तेः ''संनिहितं चे''ति कथमुक्तमित्याशङ्क्याह—*संनिहितं चेति* । तच्चेत्यादेरयमर्थः*--तत्=ज्ञानान्तरम् । प्रयोगवचनेन गृह्यत इति संबन्धः । प्रयोगवचनस्य न क्रमज्ञानापादकत्वम् ; अनुपपत्त्यदर्शनादित्यत्राह—*एकत्वादिति*॥ व्युत्क्रमेणानुष्ठानेऽप्याकाङ्क्षोपरमशङ्कां निरस्यति—*संनिहितमिति*॥ अनतिक्रम्येति शेषः । पदार्थानामनिष्पन्नत्वात् तत्क्रमाभावेऽपि पाठक्रममनतिक्रम्य संनिहितमनुष्ठेयमाग्नेयादिप्रयोगवचनेन गृह्यत इति योजना । संनिहितविषयत्वेन संनिहितमिति वा । दृष्टान्तनिरसनोपसंहरणमपेक्षितं दर्शयति—*तस्मादिति*॥ अथवा--नियोगबोधकेन लिङादिपदेन यथा विषयादिसिद्धिः, तद्वदत्राप्युभयसिद्धिः किं न स्यादिति शङ्कायामाह—*तस्मादिति* ॥ लिङादेर्नियोगप्रतिपत्तिः, अर्थाद्विषयादिप्रतिपत्तिः, इति प्रमाणभेद इत्यर्थः ॥ ''चक्षुर्यद्यदवबोधयति, तत्र तत्र स्वतन्त्रमेव प्रमाणमि''त्युक्तम्, तदनुपपन्नम् ; संप्रयोगसापेक्षत्वादित्याशङ्क्याह—*प्रतिवस्त्विति* ॥ वस्तु वस्तु प्रति संप्रयोगो विद्यते यस्य, तत् प्रतिवस्तुसंप्रयोगम्, संप्रयोगे सति तावन्मात्रेऽक्षस्य प्रामाण्यं संभवतीत्यर्थः । आभिधानिकप्रत्ययो विधिविषय एवेति कथमुच्यते ? आत्मनोऽपि प्रतिपत्तेरित्याशङ्क्याह—*नन्वाभिधानिकमिति* ॥ यद्यप्यात्मा शब्दात्प्रतीयते ; तथाऽपि न तस्य तत्र तात्पर्यमित्यर्थः ॥ किंपरं तर्हि ज्ञानम् ? इति पृच्छति—*विधायकेति* ॥ प्रमितिविषयत्वं नाम प्रमितिनिर्वाहकत्वमित्यर्थः ।

पञ्चपादिका

विहितेऽर्थात् सर्वस्यात्मस्वभावता सिध्यति ; सविषयत्वादवगमस्य । एवमप्यविवक्षितोऽर्थः शब्दात्, विवक्षितस्त्वर्थादिति शोभतेतरां वाक्यार्थवित्ता !! नच नियोगतः प्रतिपत्तिविधिर्वास्तवं संसर्गं गमयति । भवन्ति हि परिकल्पितविषया अपि प्रतिपत्तयश्चोदनालक्षणाः फलवत्यः—"वाचं धेनुमुपासीते"त्येवमाद्याः । एतदेवात्र युक्तम् ; अतत्परस्य प्रत्यक्षादिविरोधे तथाऽध्यवसायहेतुत्वायोगात् । तस्मात् कार्यनिष्ठे वेदे वस्तुतत्त्वसिद्धिर्मनोरथ एव । अतोऽहंप्रत्ययावसेय एवात्मा । न तस्य शब्दाव-

पञ्चपादिकाविवरणम्

सविषयत्वादिति ॥ अवगमसिध्यन्यथानुपपत्त्यैवेत्यर्थः । परिहरति—*एवमप्यविवक्षितोऽर्थ इति* ॥ एकस्मिन् विषये प्रथमप्रतिपत्तिरप्रमाणम्, तस्मिन्नेव द्वितीयज्ञानं प्रमाणमिति = श्रुतिश्च न प्रमाणं श्रुत्यर्थापत्तिश्च प्रमाणमित्यादि विरुद्धमित्यर्थः । किञ्चावगमविधानानुपपत्तिर्नावगम्यस्य वस्तुत्वं गमयतीत्याह—*नच नियोगत इति* ॥ *ननु* ज्ञानस्य स्वतःप्रामाण्यात् तथाभूतार्थतैव युक्ता ; अन्यथाऽऽरोपितज्ञानस्य विधौ प्रयोजनाभावादिति, तत्राह—*भवन्ति हि परिकल्पितविषया इति* ॥ आभिधानिकप्रत्ययस्य विधिसंसर्गात् प्रागपि स्वतःप्रामाण्यं किं न स्यादिति भावः । *ननु* विधेयज्ञानस्यापि स्वविषयप्रमितिरेव दृष्टं फलम्, तत्परित्यज्यारोपितविषयत्वेऽदृष्टकल्पना स्यादिति, तत्राह—*एतदेवात्र युक्तमिति* ॥ सकलप्रमाणविरोधेन

ऋजुविवरणम्

मिति* ॥ "सविषयत्वादि"त्यस्येष्टविघातकारित्वं परिहरति—*अवगमसिध्यन्यथाऽनुपपत्त्येति* ॥ "शोभतेतरामि"-त्यत्र विरुद्धलक्षणयाऽशोभास्पदत्वमुक्तम्, तत्र कथमशोभनत्वम् ? शब्दादविवक्षायामर्थात्सिद्धिसंभवादित्या-शङ्क्याभिप्रायमाह—*एकस्मिन्नेवेति*॥ *ननु* एकविषयत्वेऽपि पूर्वज्ञानमन्यपरशब्दजन्यतया न प्रमाणम्, द्वितीये तु तात्पर्यात्प्रामाण्यनिश्चयः, इत्याशङ्क्याह—*किंचावगमविधानेति*॥ विधितात्पर्यं नास्तीति भावः । *नियोगत इति*॥ नियमेनेत्यर्थः । *ननु*—तत्राभिधानिकज्ञानस्य विरोधेन प्रामाण्यासंभवात् कल्पितविषयत्वं योषिदादिषु, इह तु संभवात् स्वतः प्रामाण्यमित्याशङ्क्याह—*आभिधानिकेति* ॥ भवत्वतत्परत्वादिकम्, तथाऽपि दृष्टफलत्वाविरो-धाददृष्टकल्पनापरिहाराच्च प्रतीतिरेव फलमित्याशङ्क्याभिप्रायमाह—*सकलप्रमाणेति* ॥ "आत्मोपासनं मोक्षफलं

तत्त्वदीपनम्

अवगमस्य सविषयत्वं कथमिति वीक्षायामाह—*अवगमेति* ॥ शब्दादप्रतीयमानोऽप्यर्थात् प्रतिपन्न एव, इति परिहार-स्याभासत्वमाशङ्क्याह—*परिहरतीति* ॥ सम्यक्परिहारत्वमाह—*एकस्मिन्निति* ॥ श्रुत्यनुपपत्तिः किं श्रुतावन्त-र्भवति ? उत न ? आद्ये शब्दाद् जायमानस्याद्यज्ञानस्य ब्रह्मण्यप्रामाण्यम्, द्वितीयस्य तु प्रामाण्यमित्यतिसाहसमित्यर्थः । द्वितीयं दूषयति—*श्रुतिरिति* ॥ प्रत्यक्षादिविरोधादनुपपत्तिरपि न प्रमाणमित्यर्थः । 'तत्त्वमस्या'दिना विधिर्न प्रतीयते, तथाऽपि तत् तत्र प्रमाणमिति विरुद्धमित्यादिशब्दार्थः । प्रतिपत्तिविधिना करणेतिकर्तव्यसंसर्गप्रतिपत्तेर्नियमेन वास्तवं संसर्गं न गमयतीति कथमुक्तम् ? इत्याशङ्क्याह—*किंचेति* ॥ अवगम्यसत्त्वमन्तरेणानुपपत्त्यभावा-दित्यर्थः । अनुपपत्त्यभावोऽसिद्ध इति शङ्कते—*नन्विति* ॥ हेत्वन्तरमाह—*अन्यथेति* ॥ *आरोपितज्ञानस्य*= क्षारोपितविषयज्ञानस्य । *प्रयोजनाभावादिति* ॥ अत्रोपासनविधिवैयर्थ्यं स्यादित्यनुषङ्गः ॥ समारोपितविषयाणामपि वाग्धेन्वाद्युपास्तीनां चोदनाप्रामाण्याद् यथा फलवत्त्वमाश्रीयते, तथाऽत्रापीत्याह—*तत्राहेति* ॥ स्वतःप्रामाण्यात् तथाभूतार्थत्वमित्युक्तं निरस्यति—*आभिधानिकेति* ॥ स्वतःप्रामाण्ये विधिसंसर्गाभावेऽपि तस्य प्रामाण्यं किं नाश्रीयत इत्यर्थः । दृष्टान्तो विषम इति शङ्कते—*ननु विधेयेति* ॥ वाग्धेन्वादेरविद्यमानत्वादारोपितविषयत्वं युक्तम्, आत्मनस्तु परमार्थत्वात् तत्प्रमितिजनकत्वेन ज्ञानस्य फलवत्त्वसंभवे समारोपितविषयत्वेनादृष्टफलकल्पनम-युक्तमित्यर्थः । प्रत्यक्षविरोधाद् "वाचं धेनुमुपासीते"त्यादेर्यथा स्वविषयप्रमितिजनकत्वाभावः, तथाऽत्रापीत्याह—*तत्राहेति* ॥ अदृष्टकल्पना स्यादित्युक्तं निरस्यति —*सकलेति* ॥ कार्यनिष्ठत्वे वस्तुत्वसिद्धेर्न कार्यनिष्ठत्वमिति

पञ्चपादिका

सेयमतीन्द्रियं रूपान्तरमस्ति ; शब्दस्य तत्र सामर्थ्याभावात् । एवं च सति "अयमात्मा ब्रह्म" "एष त आत्माऽन्तर्याम्यमृतः" इति ब्रह्मान्तर्याम्यादिशब्दा अहंप्रत्ययावसेय एवात्मनि कथंचिद् वर्तन्ते । तेन "स आत्मा तत्त्वमसी"ति विद्यमानैरारोपितैश्च गुणैरात्मोपासनं मोक्षफलं च विधीयत इति, युक्तम् । अतः कार्यानुरक्तस्य वेदार्थस्य सम्भवात् तस्य च सर्वात्मना विचारितत्वात् किमपरमवशिष्टम् ? यद् ब्रह्मजिज्ञासारम्भं प्रयुञ्जीत, *उच्यते*—स्यादेतदेवम्, यदि सर्व एव वेदार्थो विचार्यत्वेन—"अथातो धर्म-

पञ्चपादिकाविवरणम्

दृष्टकल्पनाददृष्टकल्पनमेव युक्तमित्यर्थः । "तस्मात् कार्यनिष्ठे वेदे" इत्यनारम्भवादी सिद्धान्त्येकदेशीयदूषणमुपसंहरति । *ननु* वेदान्तानां धर्म-ब्रह्मविषयत्वाभावेऽध्ययनविध्युपात्तानामानर्थक्यं स्यादिति, नेत्याह—*एवं च सत्ययमात्मा ब्रह्मेत्यादिना* ॥

तत्रात्मनो वेदान्तसङ्कीर्तितसमस्तगुणविशिष्टस्योपासनोत्पत्तिविधौ शमादीतिकर्तव्योपसंहारेण विनियोगविधौ मोक्षकामनियोज्यसम्बन्धितया चाधिकारविधौ साङ्गे कर्मण्यधिकारिणोऽनुष्ठापकतया च प्रयोगविधौ वेदान्ताः पर्यवस्यन्ति ; तच्च सर्वं निरूपितमिति । अत्र किं शब्दानां कार्यान्वितस्वार्थावबोधसामर्थ्यात् सर्वो वेदः कार्यपरतया निरूपित इत्युच्यते ? किं वा सूत्रकाराद्यभियुक्तवचनसामर्थ्यादिति ? न तावत्प्रथमः कल्पः ; समन्वयसूत्रे तस्य निराकरिष्यमाणत्वात् । अभियुक्तवचनसामर्थ्याच्चेत्, तत्राह—*स्यादेतदेवं यदि सर्व एव वेदार्थ

ऋजुविवरणम्

विधीयते"इत्युक्तम्, ननु तत्र चातुर्विध्यं दर्शितम् । तच्च नियोगवादे विशेषसंभवाद् दर्शयति—*तत्रात्मन इति* ॥ "उच्यते ; स्यादेतदि"त्यादिः परिहारो न युक्तः ; नहि तेन सर्वो वेद उदाहृत्य विचारित इत्याक्षेपः कृतः ; किन्तु कार्यनिष्ठत्वाद् वेदस्य कार्योपयोगिसकलन्यायस्य निरूपितत्वादवशिष्टाभाव इति ; अतो न युक्तोऽयं परिहार इत्याशङ्क्यावतारयति—*अत्र किं शब्दानामिति* ॥ अयमभिप्रायः—

उपेत्य कार्यनिष्ठं हि प्रामाण्यं वेदगोचरम् । मीमांसारम्भ आक्षिप्तो येनैवं पूर्ववादिना ॥
विधिप्रयोज्यता नैव विचारस्योपपद्यते । विध्यन्तरहृतो नैव विषयोऽस्य विधेर्भवेत् ॥
"अथातो ब्रह्मजिज्ञासे"त्येतत्तेन विधायकम् । न भवेत् तेन शास्त्रस्य पृथगारम्भसंभवः ॥
इत्याक्षेपः कृतो नात्र कार्यनिष्ठत्वसाधनात् । सिद्धे वेदस्य कार्यार्थे प्रामाण्ये क्षेपसम्भवः ॥
स्यादेतदिति टीकायां तदेवासिद्धमीरितम् ॥

तत्त्वदीपनम्

भ्रमं निरस्यति—*तस्मादिति* ॥ कार्यपरत्वं च सिद्धान्त्येकदेशिनोच्यते । तत्र कार्यनिष्ठत्वे वस्तुनिष्ठत्वं न संभवतीति तन्मतनिरसनमित्यर्थः । *अत इत्यादेरयमर्थः*—

कार्यनिष्ठं वचो न वस्तुपरं चेत्, कथं तर्ह्यात्मसिद्धिः ? इत्याशङ्क्य, किमात्ममात्रासिद्धिः ? उत विशेषासिद्धिः ? इति विकल्प्याद्यो नेत्याह—*अत इति* ॥ उभयपरत्वानुपपत्तिरतःशब्दार्थः । द्वितीयं निरस्यति—*न तस्येति* ॥ "तत्त्वमसि" "अयमात्मा ब्रह्मे"त्यादीनां न वस्तुनि प्रामाण्यम् ; अनिष्टेः, नापि धर्मे ; तस्याप्रतिपत्तेः । अतश्च नास्तिकतुल्यता स्यादिति शङ्कते—*ननु वेदान्तानामिति* ॥ "आदित्यो यूपः" इत्यादौ यूपादिशब्दानां यथोपचारादन्यत्र प्रवृत्तिः, तद्वदत्रापीत्याह—*नेत्याहेति* ॥ सर्वात्मनेत्यस्यार्थमाह—*तत्रात्मन इति* ॥ तत्रेति पदं निरूपितमित्यनेनानुषज्यते । उत्पत्तिविध्यादिः प्रागेव व्याख्यातः ॥

"उच्यते" इत्यादिना सर्वस्य वेदार्थस्य न विचारितत्वमित्युक्तम्, तदसाधु ; वेदान्तानामुदाहृत्य विचारणाभावेऽपि तेषां विधिपरत्वाद्विध्यपेक्षितन्यायस्य च पूर्वतन्त्रोदीरितत्वेनानारम्भोक्तेरित्याशङ्क्य, कार्यपरत्वमेवासिद्धमित्याह—*अत्रेति* ॥ पूर्वतन्त्र इत्यर्थः । धर्मस्योपक्रान्तत्वेऽपि यथा प्रसङ्गात् प्रतिषेधचोदनार्थो निरूपितः,

पञ्चपादिका

जिज्ञासे''त्युपक्रान्तः, विचारितश्च स्यात्, यावता कार्यनिष्ठ एव वेदभागो विचारितः, न वस्तुतत्त्वनिष्ठः ॥

पञ्चपादिकाविवरणम्

इति* ॥ *ननु* धर्मस्यैवोपक्रान्तत्वेऽपि प्रासङ्गिकत्वेनेदं ब्रह्म निरूपितमिति, नेत्याह—*विचारितश्चेति* ॥ कथमवगम्यते न वेदार्थोपाधौ विचारः प्रवृत्त इति ? सूत्र-भाष्य-वार्तिककारवचनसामर्थ्यादित्याह—*यावता कार्यनिष्ठ एवेति* ॥

अत्रायमाशयः—अथातो धर्मजिज्ञासा । धर्ममीमांसाशास्त्रं विषयः । तत् किमारम्भणीयम् ? न वा ? इति विचारः । नारम्भणीयमिति पूर्वः पक्षः ; विचार्यमाणार्थनिर्णये प्रत्यक्षादीनामसाधनत्वात्, आम्नायस्य चाध्ययनविधिनाऽदृष्टार्थतया विनियोगात् । तदर्थमध्ययनविधिरदृष्टार्थो दृष्टार्थो वा ? इति विचार्यते । दृष्टसाधने

ऋजुविवरणम्

''ननु धर्मस्ये''त्यनुवादव्याजेन धर्मग्रहणसामर्थ्यात् तयैव विचारितत्वं टीकाकारस्याभिप्रेतमिति दर्शितम् । *ननु*—धर्मोपक्रमात्सर्ववेदार्थस्य विचारितत्वं नास्तीति वक्तुं न शक्यते, किन्तु वेदार्थोपाधौ विचारप्रवृत्त्यभावे ; इतरथा वेदार्थ एव धर्मशब्दः कया विवक्षया प्रयुक्तः ; तावन्मात्र एव वेदार्थ इति वक्तुं शक्यत्वादिति पृच्छति—*कथमवगम्यत इति* ॥ ''यावता कार्ये''ति परिहारो न युक्तः ; ''विचारितः'' इत्यनेन वेदार्थोपाधिविचारप्रवृत्त्यभावे प्रमाणानुपन्यासात्, तथा येन केनचिद्विचारितत्वे प्रमादादपि तथा विचारित इति वक्तुं शक्यत एव, तदर्थमवतारयति—*सूत्र-भाष्य-वार्तिकेति* ॥

एवमपि व्यधिकरणोऽयं परिहारः ; कार्यनिष्ठस्यैव विचारितत्वं वेदार्थोपाधिविचारं न निवारयति ; वेदार्थोपाधौ विचारं प्रक्रम्य तथा विचार इति वक्तुं शक्यत्वात्, अतः कथं तद्वचनसामर्थ्यादप्येकदेशविचारोऽयम्, न सर्ववेदार्थविचार इति सिध्यति ? इत्याशङ्क्याभिप्रायमाह—*अयमाशय इति* ॥ अथवा—यावता कार्यनिष्ठ इति व्यर्थम् ; पूर्वग्रन्थेनैव सर्ववेदार्थस्य विचारितत्वं निराकुर्वता कार्यनिष्ठस्यैव विचारितत्वमुक्तम्, अथ तत्र वेदार्थस्य विचारितत्वं नास्ति, किन्त्वेकदेशस्येति प्रतीयते ; तथाऽपि धर्मग्रहणसामर्थ्याद् एकदेशविशेषोऽपि निश्चित एव ; अतो व्यर्थ इत्याशङ्क्यावतारयति—*कथमवगम्यत इति* ॥ ''यावता कार्यनिष्ठ एवे''त्यनेन प्रतिज्ञा, उत्तरेण विचारस्वरूपप्रदर्शनमिति प्रतिभाति ; तथा सति ''कथं धर्मो नामे''त्यादिनैव ग्रन्थेनालम्, किं ''तथाहि शास्त्रारम्भः'' इत्यनेन ? पुनरुक्तत्वादित्याशङ्क्याभिप्रायमाह—*अयमाशय इति*॥ *आम्नायस्येति* ॥ अध्ययनस्यादृष्टार्थत्वे यदेकस्माद्पूर्वम्, 'तदेकतरत्तदर्थमि'ति न्यायेनानर्थपरः स्वाध्यायो न विचारार्ह इति भावः । *अध्ययनविधिरदृष्टार्थो दृष्टार्थो वेति* ॥ ''स्वाध्यायोऽध्येतव्यः''इत्यत्र तव्यप्रत्ययव्यापारः शब्दभावना, तद्भाव्यपुरुषप्रवृत्तिलक्षणार्थभावनाया अंशत्रयाकाङ्-

तत्त्वदीपनम्

तद्वद्वेदान्तार्थोऽपि निरूपित इति शङ्कते—*ननु धर्मस्येति* ॥ *प्रासङ्गिकत्वेनेति*॥ सर्वो वेदो धर्मे प्रमाणमित्युक्तं वेदान्तानां कथं धर्मे प्रामाण्यम् ? इति शङ्कायां सर्वस्य वेदस्य कार्याधीनत्वात् तच्छेषत्वेन वेदान्तानामपि प्रामाण्यस्याभ्युपगमनीयत्वाद् ब्रह्मणस्तत्र निरूपितत्वमिति भावः । उक्तार्थे विनिगमकारणं पृच्छति—*कथमिति* ॥ विवक्षितवेदान्तार्थनिरूपणमनुपलब्धिविरुद्धमित्याह—*नेत्याहेति* ॥ अनुपलब्धिरसिद्धेत्यभिसन्धिः । ''यावते''त्यत्रापेक्षितहेतुमाह—*सूत्रेति* ॥

सामर्थ्यमेव दर्शयति—*अत्रायमाशय इति* ॥ आलम्बनसंभवासंभवाभ्यां चिन्तेति द्रष्टव्यम् । विचारो नाम प्रमाणानुग्राहकस्तर्कः । तत्रानुग्राह्यं प्रमाणं प्रत्यक्षादि ? उताम्नायः ? नाद्य इत्याह—*विचार्यमाणेति* ॥ धर्मस्य प्रत्यक्षाद्ययोग्यत्वान्न तेषामनुग्राह्यत्वमित्यर्थः । द्वितीयं दूषयति—*आम्नायस्येति* ॥ अदृष्टार्थतया विनियोगोऽसिद्ध इत्याशङ्क्याह—*तदर्थमिति* ॥ हेतुसिद्ध्यर्थमित्यर्थः । *अध्ययनविधिरिति* तव्यप्रत्ययाभिधेयशब्दभावना कथ्यते । शब्दभावनाभाव्यार्थभावनायाः किमदृष्टं फलं भाव्यम् ? उत दृष्टम् ? इति विमर्शार्थः । अन्तिमं

पञ्चपादिकाविवरणम्

विधेरयोगाददृष्टनियमाद् विधिरदृष्टार्थ इति प्राप्तम् । *ननु* स्वाध्यायोऽध्ययनक्रियाकर्मतयाऽवगम्यमानः संस्कार्यो वा, आप्यो वा, इति दृष्टसम्भवे कथमदृष्टार्थता सम्भवेत् ? *न* ; संस्कृतस्य क्रत्वन्तरे विनियोजकप्रमाणाभावात्, अवाप्तस्य च निष्फलत्वात् । *ननु* अवाप्तादाम्नायात् फलवदर्थावबोधे दृष्टफले नादृष्टं कल्पयितुं शक्यते, *न* ; दृष्टफलसाधनेऽन्यत एव प्रवृत्तेर्विधिवैयर्थ्यप्रसङ्गात् । *ननु* कर्मकारकप्रधानस्याध्ययनस्य कथं स्वतन्त्रादृष्टफलत्वं कल्प्येत ? *न* ; कर्मकारकस्य वैफल्यात् सक्तुन्यायेन 'स्वाध्यायेनाधीयीते'ति वैपरीत्यकल्पनात् । *ननु* न श्रूयते फलमध्ययनस्यार्थवादेऽपि, *तन्न ; जपाध्ययनफलस्य घृतकुल्यादेरध्ययनत्व-

ऋजुविवरणम्

क्षिण्याः किमदृष्टफलं भाव्यम् ? उत दृष्टमित्यर्थः । *दृष्टसाधन इति* ॥ अप्रवृत्तप्रेरणात्मको विधिरिति निर्णीतम्, स तु दृष्टफलसाधने विधित्वव्याघातादृष्टमवलम्बत इति भावः । *ननु स्वाध्याय इति* ॥ दृष्टं निर्वर्त्यमत्र नास्ति, ततोऽदृष्टार्थत्वमुक्तम्—"धर्ममात्रे तु कर्म स्यादि"त्यत्र, अत्र तु दृष्टमस्तीति भावः । *दृष्टफलसाधन इति* ॥ मा भूद्विधिः ; अध्ययनेनैव स्वाध्यायमर्थावबोधं वा भावयेदिति नियमविधिरस्तु, मैवम् ; तयोः श्रवणादिनापि सिद्धिदर्शनेन मानान्तरविरोधाद् न नियमः स्यात् ; अनारभ्याधीतत्वात्, क्रतुसंस्पर्शाभावाद् न नियमसंभव इति भावः ॥ *ननु* अनन्यनिष्ठभावार्थेऽदृष्टार्थत्वमुक्तम्, इह त्वन्यनिष्ठ इति चोदयति—*ननु कर्मकारकेति* ॥ *जपाध्ययनफलस्येति* ॥ अयमर्थः—स्वाध्यायविधिर्हि स्वाध्यायकरणिकामध्ययनभावनां विदधाति । सच भाव्यमा-

तत्त्वदीपनम्

दूषयति—*दृष्टेति* ॥ अन्वय-व्यतिरेकसिद्धफलसाधने विध्यसंभव इत्यर्थः । "व्रीहीनवहन्यादि"त्यत्र दृष्टफलसाधनेऽपि विधिर्दृष्टः, इत्याशङ्क्य तत्राप्यदृष्टमस्तीत्याह—*अदृष्टेति* ॥ यत्रादृष्टम्—तत्रैव विधिरिति नियमादित्यर्थः । तस्मादाद्यः पक्ष उपादेय इत्याह—*अदृष्टार्थ इति* ॥

किमध्ययनविधेः स्वतन्त्रादृष्टार्थत्वम् ? उत कर्मकारकसमवाय्यदृष्टार्थत्वम् ? इति विकल्प्याद्यं दूषयति—*ननु स्वाध्याय इति* ॥ *अवगम्यमान इति* ॥ तव्यप्रत्ययेनेत्यर्थः । क्रियाजनितातिशयशालित्वं संस्कार्यत्वशब्दार्थः । अवाप्तिः स्वाधीनोच्चारणक्षमत्वम्, तद्विषयत्वमवाप्यत्वमित्यर्थः । कर्मकारकगतत्वेन दृष्टस्यातिशयस्यात्र संभवात् कथं स्वतन्त्रादृष्टार्थत्वमित्याह—*इतीति* ॥ दृष्टसंभवोऽसिद्ध इत्याह—*न संस्कृतस्येति* ॥ क्रतौ विनियुक्तस्य विनियोक्ष्यमाणस्य वा संस्कारो दृष्टः, स्वाध्यायश्च न तादृशः, इति न संस्कार्यत्वमित्यर्थः । सुख-दुःखप्राप्ति-निवृत्त्योरन्यतरस्य फलत्वात् स्वाध्यायाप्तेश्चानीदृक्त्वाद् नाप्तेरपि फलत्वमित्याह—*अवाप्तस्येति* ॥ अवाप्तेः स्वरूपेणाफलत्वेऽपि प्रणाड्या फलत्वमस्तीति शङ्कते—*नन्विति* ॥

फलत्वमङ्गीकृत्य विधित्वं दूषयति—*न, दृष्टेति* ॥ *अन्यत इति* ॥ रागादिनेत्यर्थः । "व्रीहीनवहन्यात्" इति कर्मकारकसमवाय्यदृष्टार्थो यथा विधिः, तद्वत् "स्वाध्यायोऽध्येतव्यः" इत्यत्राप्यवाप्तस्वाध्यायसमवेतादृष्टार्थत्वेन विधिरर्थवान् स्यादिति चेत्, मैवम् ; वैषम्यात्, "व्रीहिभिर्यजेते"ति व्रीहीणां दर्श-पूर्णमासापूर्वे विनियुक्तानां कथमपूर्वसाधनत्वम् ? इति वीक्षायां पुरोडाशादिद्वारेति निश्चीयते । पुरोडाशभावश्च तण्डुलनिष्पत्त्या, तण्डुलनिष्पत्तिश्चावहननेनैवेति नियम्यते । नच तथा स्वाध्यायस्यापूर्वाङ्गत्वम्, येनाध्ययने नियमो घटेतेति । तस्मात् कर्मकारकसमवाय्यदृष्टार्थो विधिरित्ययमपि पक्षोऽसङ्गत इति द्रष्टव्यम् । तव्यप्रत्ययविरोधान्न स्वतन्त्रादृष्टार्थत्वमिति शङ्कते—*ननु कर्मेति* ॥ 'ग्रामो गन्तव्यः' इत्युक्ते यथा गमिक्रियाया ग्रामसमवेतातिशयसाधनत्वम्, तद्वदध्ययनस्यापि स्वाध्यायगतातिशयहेतुत्वस्य तव्यप्रत्ययात् प्रतिपत्तेः कथं स्वतन्त्रादृष्टफलत्वमित्यर्थः । "सक्तून् जुहोति" इत्यत्र सक्तुप्राधान्यभङ्गवत् स्वाध्यायेऽपि प्राधान्यं त्यज्यताम्, क्रियाजनितातिशयानिरूपणादित्याह—*न, कर्मकारकस्येति* ॥ वाक्यस्य तर्हि का गतिः ? इत्याशङ्क्याह—*सक्तुन्यायेनेति* ॥

अध्ययनविधेर्न स्वतन्त्रादृष्टार्थत्वं फलाश्रवणादिति शङ्कते—*ननु न श्रूयत इति* ॥ "यदृचोऽधीते पयसः

पञ्चपादिकाविवरणम्

सामान्येन प्रथमाध्ययनेऽप्यतिदिश्य रात्रिसत्रन्यायेन 'घृतकुल्यादिकामः स्वाध्यायेनाधीयीते'ति फलविपरिणामात्। संस्कारकर्मत्वाभावाच्च न फलश्रुतेरर्थवादता। *ननु* अदृष्टार्थत्वेऽपि स्वाभाविकस्यार्थावबोधसामर्थ्यस्य का हानिः? *न*; विषनिर्हरणादिकार्यान्तरे विनियुक्तानां मन्त्राणामर्थविवक्षाप्रतिबन्धदर्शनात्। तस्मादाम्नायस्यार्थविवक्षाऽभावात्, प्रत्यक्षाद्यविषयत्वात्, प्रमाणानुग्राहकत्वाच्च विचारस्य, निरालम्बनो धर्मविचारो नारब्धव्य इति प्राप्तम्। आरम्भणीय एवायं विचार इति सिद्धान्तः; तस्य स्वाध्यायाध्ययनविधिप्रमितकर्तव्यत्वात्॥

ननु निरालम्बनत्वमुक्तम्, *न*; आम्नायस्यालम्बनत्वात्। *ननु* अदृष्टार्थोऽसौ दर्शितः, *न*; अध्ययनस्य कर्मकारकप्रधानत्वात् स्वतन्त्रादृष्टार्थत्वायोगात्। *ननु* कर्मकारके न किञ्चित् प्रयोजन-

ऋजुविवरणम्

काङ्क्षमाणोऽध्ययनत्वं स्वाध्यायपदयुक्तत्वं वा चोदनालिङ्गमतिदेशप्रमाणमपेक्ष्य घृतकुल्यादिकं स्वीकरोतीति। अयं च भट्टोम्वेकपक्षः। अन्ये तु तस्यैवान्यथाऽभिप्रायमाहुः—फलार्थवादयोर्नातिदेशः संभवति; विश्वजिदादिष्वधिकारिकल्पनानुपपत्तिप्रसङ्गात्, तेन न घृतकुल्यादिफलत्वं विवक्षितम्, किन्तु स्वर्गादिफलत्वमेवेति। तस्मिंश्च पक्षे इदमुपलक्षणमात्रमिति मन्तव्यम्। *ननु*—इयं फलश्रुतिरपापश्लोकश्रवणवदर्थवादरूपा फलं समर्पयितुं न शक्नोतीत्याशङ्क्याह—*संस्कारकर्मत्वेति*॥ *ननु*—अदृष्टार्थत्वेऽपि विचारारम्भः संभवति;—विचारानुग्राह्यस्य वेदस्य प्रमाणत्वादिति चोदयति—*नन्वदृष्टार्थत्वेऽपीति*॥ मा भूदाम्नायस्यार्थविवक्षा, केवलविचार एव कस्मान्न भवति? इत्याशङ्क्याह—*प्रमाणानुग्राहकत्वादिति*॥

"क्रतुविध्युपादाने"त्युपादानशब्दः श्रुतार्थापत्त्यभिप्रायेणेति मन्तव्यम्; कथं क्रतुविध्युपादानेन विनियोज्यत्वम्?

तत्त्वदीपनम्

कूल्या अस्य पितॄन् स्वधा अभिवहन्ती"त्याद्यर्थवादेषु फलं श्रूयत इत्याशङ्क्य, तस्य नित्यजपाध्ययनविधिफलत्वान्न प्रथमाध्ययनविधिफलत्वमित्याह—*अर्थवादेऽपीति*॥ फलाश्रवणमसिद्धमित्याह—*तन्न जपेति*॥ घृतकुल्यादेरिति कर्मणि षष्ठी। "न स पापं श्लोकं शृणोती'त्यादिफलश्रवणस्य यथाऽविद्यमानार्थवादत्वम्, तद्वदस्यापीत्याशङ्क्याह—*संस्कारेति*॥ विनियुक्त-विनियोक्ष्यमाणयोः संस्कारो दृष्टः, स्वाध्यायस्य चातथात्वान्न तदध्ययनस्य संस्कारकर्मत्वम्। तथाऽद्रव्यत्वात् क्रत्वनङ्गत्वाच्च न तत्फलश्रुतेरर्थवादता। इतरस्य तु वाक्यात् क्रत्वङ्गतायां सिद्धायां पर्णतादिफलश्रवणस्यार्थवादत्वं घटत इत्यर्थः। श्रुतव्याकरणस्य वैदिकपदश्रवणादर्थप्रतिपत्तिर्जायमाना लक्ष्यते, अतश्चाम्नायमूलविचारप्रवृत्तिरिति शङ्कते—*नच दृष्टेति*॥ अङ्गुल्यग्रादिवाक्योत्थप्रतिपत्तिवदाभासत्वेनाप्याम्नायार्थप्रतिपत्तिर्घटत इत्याशयेनाह—*न विषेति*॥ अर्थविवक्षायाः प्रतिबन्धोऽभावः, तस्य दृष्टेरित्यर्थः। पूर्वपक्षमुपसंहरति—*तस्मादिति*॥ अदृष्टार्थत्वं तच्छब्दार्थः। "अविषयत्वादि"त्यत्र विचार्यमाणार्थस्येति शेषः। प्रमाणवदेव विचारस्यापि स्वातन्त्र्येणार्थसाधकत्वात् किमालम्बनान्वेषणेन? इत्याशङ्क्याह—*प्रमाणेति*॥ प्रमाणप्रतिपन्नार्थसंभवासंभवसाधकत्वस्वाभाव्याद् विचारस्यानुग्राह्यं वक्तव्यम्, नच तदस्तीति विचारानारम्भ इत्यर्थः। *स्वाध्यायाध्ययनविधिप्रमितकर्तव्यत्वादिति*॥ "अध्येतव्यः" इति तव्यप्रत्ययाभिहितशब्दभावना भाव्यं विनाऽनुपपद्यमाना पुंप्रवृत्तिलक्षणामर्थभावनामुत्पादयति, सा च भाव्यं विनाऽनुपपन्ना, इति यो भाव्यत्वेन संबध्यते, तस्य फलवदर्थावबोधपर्यन्तत्वाभावे भाव्यतानुपपत्तेरर्थावबोधपर्यन्तताऽऽक्षिप्यते; अर्थनिर्णयस्य च विचाराधीनत्वाद् विचारकर्तव्यतामध्ययनविधिराक्षिपतीत्यर्थः। स्वाध्यायस्याविवक्षितार्थत्वान्न तदर्थनिर्णयार्थं विचारप्रवृत्तिः, अर्थभावनाभाव्यं त्वन्यदेव किंचिदित्यभिसन्धाय शङ्कते—*नन्विति*॥ गूढाभिसंधिरुत्तरयति—*नाम्नायस्येति*॥ यथाश्रुतमादाय शङ्कते—*न दृष्टार्थ इति*॥ सिद्धान्ती स्वाभिसन्धिमुद्घाटयति—*नाध्ययनस्येति*॥ क्रियाजन्यातिशयशालिनः कर्मकारकत्वात् स्वाध्याये चातिशयानिरूपणाद् नास्य कर्मकारकत्वमिति शङ्कते—*ननु कर्मकारक इति*॥ अतिशयानिरूपणमसिद्धमित्याह—

पञ्चपादिकाविवरणम्

मस्तीत्युक्तम्, *न* ; उभयस्याप्युपपत्तेः—अध्ययनेन दृष्टद्वारेणाप्यते, साङ्गाध्ययनविधिसामर्थ्यात् संस्क्रियते च स्वाध्याय इति। *ननु* संस्कृतस्य विनियोगाभाव उक्तः, *न* ; क्रतुविध्युपादानप्रमाणादेव विनियोगसिद्धेः। क्रतुविधिर्हि स्वविषयावबोधमाकाङ्क्षमाणस्तस्य जनकतया संस्कृतं स्वाध्यायमुपादत्ते। *ननु* उपादानप्रमाणं ज्ञानस्य जनकतया स्वाध्यायमात्रमादत्ते, न संस्कारमिति, *सत्यम्* ; अध्ययनविधिसामर्थ्यादेव संस्कृतस्वाध्यायजन्यविशिष्टज्ञानवतैवानुष्ठितो यागोऽपूर्वं जनयतीति कल्प्यते। अतो विधिसामर्थ्यमीक्षमाणः क्रतुविधिः स्वविषयज्ञानजनकतया संस्कृतस्वाध्यायमुपादत्ते। *ननु* स्वतन्त्रादृष्टं कल्प्यतामित्युक्तम्, *न* ; दृष्टार्थाक्षरस्वीकरण-तज्जन्यज्ञानादिसमवाय्यदृष्टसम्पत्तौ श्रुतविरोधेन कारकवैपरीत्यमादाय स्वतन्त्रादृष्टकल्पनानुपपत्तेः। आधानवदनङ्गस्याप्यध्ययनस्य क्रतूपकारित्वं न विरुध्यते। *ननु*

ऋजुविवरणम्

नहि क्रत्वपूर्वस्य तेन विनाऽनुपपत्तिरित्याशङ्क्याह—*क्रतुविधिर्हीति*। *ननूपादानप्रमाणमिति* ॥ श्रुत्यादिसमर्पितस्य विधिना स्वीकारः, नेह तदस्तीति। अनारभ्याधीतश्चाध्ययनविधिः, न क्रत्वनुप्रविष्टः ; अतस्ततो न नियमविधिरिति भावः। *अध्ययनविधिसामर्थ्यादिति* ॥ कर्मकारकप्रधानाध्ययनविधानतः शब्दस्वभावसिद्धार्थस्वभावानुरोधेन क्रत्वव्यभिचरितसम्बन्धपदार्थमुखेन वा पर्णमय्या इव क्लृप्ते क्रत्वनुप्रवेशे नियमसंभवः। संस्कृतस्य विनियोगात्, फलवत्कर्मावबोधोपयोगेन निरुद्धकार्यतया न सक्तुन्याय इति भावः। *ननु*—अध्ययनस्यानङ्गस्य कथं क्रतूपकारकत्वमित्याशङ्क्याह—*आधानवदिति* ॥ *ननु*—नाध्ययनस्य स्वतन्त्रादृष्टसाधनत्वं कल्प्यम्, अपितु श्रूयते, यद्वा—न क्रतूपकारकत्वं संभवति ; स्वतन्त्रादृष्टसाधनत्वादिति चोदयति—*ननु तव्यप्रत्ययेनेति* ॥

तत्त्वदीपनम्

नोभयस्येति ॥ अवाप्ति-संस्कारलक्षणातिशयस्येत्यर्थः। तदेव विवृणोति—*अध्ययनेनेति* ॥ अवाप्तिः स्वाधीनोच्चारणक्षमत्वम्, तदर्थो वाङ्मनसव्यापारोऽध्ययनमिति विभागः। *दृष्टद्वारेणेति* ॥ प्रथमं पाद आप्यते, अनन्तरमर्धर्चः, ततः पूर्णमाप्यते, इति क्रमेण सकलस्वाध्यायावाप्तिरित्यर्थः। *साङ्गेति* ॥ प्राङ्मुखादीतिकर्तव्यतासहितेत्यर्थः। स्वाध्यायस्याविनियुक्तत्वान्न संस्कारः फलमिति शङ्कते—*ननु संस्कृतस्येति* ॥ विनियोगाभावोऽसिद्ध इत्याह—*न क्रतुविधीति* ॥ क्रतुविध्यनुपपत्तिप्रमाणादित्यर्थः। स्वाध्यायमन्तरेण क्रतुविधेरनुपपद्यमानं रूपं न पश्याम इत्याशङ्क्याह—*क्रतुविधिरिति* ॥ करणेतिकर्तव्यताज्ञानाभावेऽनुष्ठानानुपपत्तेस्तज्ज्ञानमवश्यंभावि, तच्च न स्वाध्यायं विना, इति संस्कृतस्वाध्यायाक्षेप इत्यर्थः। स्वाध्यायमात्राद् बोधोत्पत्तेर्न संस्कारस्याक्षेप इति शङ्कते—*ननूपादानेति* ॥ पाठकादेः स्वाध्यायश्रवणेऽपि बोधानुत्पत्तेः कथं स्वाध्यायमात्रस्य तज्जनकताभिधानमिति? अत्राह—*न संस्कारमिति*॥ संस्कारमन्तरेणापि साङ्गाध्ययनवतो बोधो युक्त इत्यर्थः। क्रतुविधिः स्वरूपेण न संस्कारमाक्षिपति? उतान्यापेक्षयाऽपि? इति विकल्प्याद्यमङ्गीकरोति—*सत्यमिति* ॥ द्वितीयं दूषयति—*अध्ययनेति* ॥ वाक्यपाठमात्रजनितज्ञानस्यापूर्वोपकारकत्वे लिखितपाठाद्यवाप्तवेदोत्थज्ञानस्यापूर्वोपकारकत्वसंभवात् साङ्गाध्ययनविधानं न स्यात्, अस्ति च तत्। तस्मात् संस्कृतस्वाध्यायोत्थज्ञानस्यापूर्वजनकत्वमित्यर्थः। तथाऽपि कथं क्रतुविधेः संस्काराक्षेपकत्वमिति? तत्राह—*अत इति* ॥ *विधिसामर्थ्यमिति* ॥ साङ्गाध्ययनविधिसामर्थ्यमित्यर्थः। दृष्टादृष्टप्रयोजनकल्पनाद् वरं स्वतन्त्रादृष्टकल्पनमित्याशयेनोक्तं चोद्यं स्मारयति—*ननु स्वतन्त्रेति* ॥ "प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपी"ति न्यायमभिसन्धाय समाधत्ते—*न दृष्टेति* ॥ दृष्टं यदिदमक्षरस्वीकरणम्, तज्जन्यज्ञानादि, तत्समवायीत्यर्थः। प्रवृत्तिरादिशब्दार्थः। *श्रुतिविरोधेनेति* ॥ "स्वाध्यायोऽध्येतव्यः" इति तव्यप्रत्ययेन कर्मकारकभूतस्य स्वाध्यायस्य प्राधान्यम्, अध्ययनस्य च तच्छेषत्वं लक्ष्यते, तत्परित्यागेन स्वाध्यायस्योपसर्जनत्वमादायाध्ययनस्य स्वतन्त्रादृष्टार्थत्वकल्पनमयुक्तमित्यर्थः॥ अध्ययनस्य क्रत्वङ्गताऽभावात् कथं तदुपकारकत्वमित्याशङ्क्याह—*आधानवदिति*॥ अध्ययनस्य स्वाध्यायसंस्कारार्थत्वं तव्यप्रत्ययविरुद्धमिति शङ्कते—*ननु तव्येति*॥ अवधारणस्योपरक्तमित्यनेनानुषङ्गः। अध्ययनस्या-

पञ्चपादिकाविवरणम्

तव्यप्रत्ययेन प्रकृत्यर्थोपरक्तमपूर्वमेव स्वतन्त्रमभिधीयते, *तन्न*; अपूर्वाभिधानेऽपि भिन्नपदोपात्तप्रकृत्यर्थोपरक्तापूर्वाभिधानाद् वरमेकपदोपात्तकर्मकारकगतापूर्वाभिधानम् । भावार्थजन्यमपूर्वं न द्रव्यादिजन्यमित्येतावत्, समवायस्तु यत्र क्वापि संभवति। अदृष्टार्थतया च स्वाध्यायस्यार्थविवक्षाऽभावेऽध्ययनविधिवाक्यस्याप्यर्थविवक्षाऽभावाद् अदृष्टार्थतयाऽध्ययनविधानमेव न स्यात्। तस्मात् साङ्गाध्ययनविधिप्रयुक्तादृष्टस्य स्वसमवायितयाऽक्षरग्रहणार्थावबोध क्रतुप्रवृत्त्यादिदृष्टफलसापेक्षत्वात् स्वाध्यायस्य स्वभावनिमित्तार्थावबोधप्रतिबन्धकताभावाद् विव-

ऋजुविवरणम्

"अपूर्वाभिधानेऽपी"त्यत्र प्रकृत्यर्थस्य धात्वर्थस्य भिन्नपदोपात्तत्वाभिधानं तव्यप्रत्ययस्य कर्माभिधायित्वेन कर्मप्रधानत्वात् प्रकृत्यंशस्य पृथगर्थत्वात्पृथक्पदत्वमङ्गीकृत्य। "एकपदोपात्तकर्मकारके"त्यत्रापि कर्माभिधायित्वात्तव्यप्रत्ययस्य, कर्मगतापूर्वाभिधायकत्वेनैकार्थत्वाभिप्रायेणैकपदत्वम्, यद्वा—

तव्यप्रत्यय एवेदं कर्ममात्रं ब्रवीति सः। विशेषे त्वन्यसाकाङ्क्षो यज्ज्योतिरिव तत्र तु ॥
प्रकृतिप्रत्ययार्थस्य लाभात् प्रत्यय एव तैः। पदमित्युच्यते यद्वा विशेषार्पकसंयुतः ॥

ननु—भावार्थगतत्वाभावेऽपूर्वस्य भावार्थाधिकरणविरोध इत्याशङ्क्याह—*भावार्थेति* ॥ *ननु*—दृष्टार्थत्वे स्वाध्यायस्यार्थविवक्षा न स्यात्, जपमन्त्रवदित्याशङ्क्याह—*अदृष्टार्थतयेति* ॥ *ननु*—अध्ययनवाक्यस्यादृष्टार्थत्वं तस्यार्थविवक्षाप्रतिबन्धकं न भवति; स्ववाक्यार्थमध्ययनावच्छिन्नफलभावनारूपं प्रत्येवैतदर्थ्यम्, नार्थान्तरे; तेन नान्यपरत्वेनाविवक्षितार्थत्वम्, इतरवाक्यानां तु यागाद्यवच्छिन्नफलभावनारूपात् स्वार्थादन्यत्रैदमर्थ्यमित्यविवक्षितार्थताऽन्यविनियोज्यत्वं चार्थविवक्षाप्रतिबन्धकम्, नतु विनियोज्यत्वमात्रम्, स्वाध्याये तु न तथाविधमर्थाविवक्षाकारणमस्तीत्याह—*तस्मात्साङ्गाध्ययनेति* ॥ स्वसमवायितया=अक्षरसमवायितयेत्यर्थः। *एतदुक्तं भवति—स्वकर्त्रदृष्टस्य निरपेक्षस्वर्गादिफलत्वादर्थविवक्षाप्रतिबन्धकत्वमपि स्यात्, कर्मगतस्य तु कर्मद्वारेणैव फलमपेक्षितं स्वाध्यायगतकर्मत्वप्रतीतिनिर्वाहाय; स्वतन्त्रफलकल्पनायां गौरवप्रसङ्गात्, अक्षरसामर्थ्यसिद्धार्थावबोधफलत्वे तु नासौ दोषः, इति विनियोगोऽपि न सामर्थ्यसिद्धार्थावबोधप्रतिबन्धकः; "वसन्ताय कपिञ्जलानालभेत"इत्यादिषु व्यभिचारात्। तदुक्तम् ॥

"विधिशक्तिर्न मन्त्रस्य नियोगेनापनीयते। स्वतो विधास्यति ह्येष नियोगात् स्मारयिष्यति ॥"

तत्त्वदीपनम्

पूर्वद्वारेण फलसाधनत्वं कस्मात्? स्वाध्यायसंस्कारद्वारेण फलसाधनत्वमेवास्त्वित्याशङ्क्याह—*स्वतन्त्रमिति* ॥ स्वाध्यायासमवेतमित्यर्थः। अपूर्वस्य प्रकृत्यर्थेनान्वयः; तयोः समानपदोपात्तत्वाद् न स्वाध्यायेन भिन्नपदोपात्तेनेत्यर्थः। इष्टसाधनतादेः प्रत्ययार्थत्वान्नापूर्वस्य तदर्थत्वमित्याह—*तन्नेति* ॥ अङ्गीकृत्याह—*अपूर्वेति* ॥ "सुप्तिङन्तं पदमि"ति पाणिनिस्मरणाद् यद्यप्यध्येतव्य इत्येकं पदम्; तथाऽपि "पद गतावि"ति स्मरणाद् बोधकं पदमित्याश्रित्य तव्यप्रत्ययात् प्रकृतेः क्रियाबोधकत्वाद् भिन्नत्वनिर्देश इत्यर्थः। "तयोरेव कृत्य-क्त-खलर्थाः" इति तव्यप्रत्ययस्य कर्मण्यपि स्मरणादेकपदोपात्तत्वं कर्मकारकस्य। तत्र तव्यप्रत्ययस्य स्वोपात्तकर्मकारकसमवेतापूर्वाभिधाने नैरपेक्ष्यम्; इतरथा पदान्तरसापेक्षत्वम्, तथाच लाघवादाद्यः पक्ष आस्थेय इत्यर्थः ॥

अपूर्वस्य क्रियाजन्यत्वात् तदुपरक्तत्वं युक्तमित्याशङ्क्याह—*भावार्थेति*॥ यद् येन जायते, तत् तत्समवायीति न नियन्तुं शक्यम्; छिदिक्रियासाध्ये द्वैधीभावादौ व्यभिचारादित्यर्थः। अध्ययनस्यादृष्टार्थत्वे विषमन्त्रवद् वेदस्याविवक्षितार्थत्वं स्यादिति यत्तूक्तम्, तदनुपपन्नम्। किं स्वतन्त्रादृष्टार्थत्वमेवार्थपरताप्रतिबन्धकम्? उतेतरदपि? आद्येऽपीदं विवेचनीयम्—किमाम्नायमात्रस्य? अथवाऽध्ययनविधायकव्यतिरिक्तस्येति? नाद्य इत्याह—*अदृष्टार्थतयेति* ॥ न द्वितीयोऽपि; अध्ययनविधिवाक्यस्य विवक्षितार्थत्ववदितरत्रापि तदुपपत्तेरित्यर्थः। द्वितीयमुपसंहारव्याजेन निरस्यति—*तस्मादिति* ॥ अदृष्टस्य प्रतिबन्धकत्वाभावादित्यनेन संबन्धः। तत्र हेतुमाह—*स्वसमवायित-

पञ्चपादिका

तथाहि—शास्त्रारम्भो व्याख्यातृभिरेवं निरूपितः। कथम्? धर्मो नाम कश्चित्साधयितुः कालान्तरे श्रेयःसाधनो लोकाख्यप्रमाणाभासोत्थेन ज्ञानेन सामान्यतो विषयीकृतः। तद्विशेषं प्रति विप्रतिपन्नाः परीक्षकाः—केचिदग्निहोत्रादिकं धर्ममाचक्षते; केचिच्चैत्यवन्दनादिकम्। तत्राग्निहोत्रादिलक्षण एव धर्मोऽभिप्रेतः। न तत्प्रतिपादकानां वेदवाक्यानां विचारावसरः, नापि विवक्षितार्थत्वम्। अतश्चैत्यवन्दनादीनामेवान्यतमो धर्मः। तत्प्रतिपादकानां बुद्धादिवाक्यानामेवान्यतमं विचार्यम्; न वा तदपि। नहि पौरुषेये वाक्ये शब्दशक्त्यनुसारेणार्थः, अपि तु तेन विवक्षित इति। एवमाशङ्किते-–धर्माय वेद-

पञ्चपादिकाविवरणम्

क्षितार्थमाम्नायमवलम्ब्य धर्मविचारः कर्तव्य इति। तदेवमर्थविवक्षया धर्मविचारावसरप्रदर्शनपरे शास्त्रारम्भे न सर्ववेदार्थविचारसिद्धिः, इति प्रारभ्यमाणविचारो धर्मविषयः, न वेदार्थमात्रविषय इत्युपपादयति—*तथाहि शास्त्रारम्भ इति* ॥ *ननु* "वेदवाक्यान्येव विचारयेदि"त्यादिभाष्यलिङ्गाद् वेदार्थमात्रविचारारम्भोऽवगम्यत इति शङ्कते—*कथमिति* ॥ सामान्यप्रसिद्धि-विशेषविप्रतिपत्त्योर्भाष्यकारेण धर्मे प्रदर्शितत्वात् स एव विचार्यत इत्याह—*धर्मो नाम कश्चित् साधयितुरिति* ॥ एवं विषय-विप्रतिपत्ती दर्शयित्वा धर्मविषय एव पूर्वपक्षप्राप्तिं दर्शयतीत्याह—*तत्राग्निहोत्रादिलक्षण एवेति* ॥ नकारस्तु पूर्व-परयोः सम्बध्यते। *"एवमाशङ्किते" इत्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः* ॥

ऋजुविवरणम्

इति। "'तथाच शास्त्रे'ति ग्रन्थः पुनरुक्तः; पूर्वेणैव शास्त्रस्यैकदेशविषयत्वसिद्धेरित्याशङ्क्यावतारयति—*प्रारभ्यमाणेति* ॥ "कथमि"ति न प्रश्नः? पौनरुक्त्यात्, प्रतिवचनं च नाञ्जसमित्याशङ्क्याह—*ननु वेदवाक्यान्येवेति* ॥ "धर्मो नामे"त्यनेन धर्मे विप्रतिपत्तिः प्रदर्शिता, सा जिज्ञासायोग्यत्वोपयोगिनी। न भाष्यकारादिभिर्धर्मविचारः कृत इति तदेव चोदितत्वात् दर्शनीयमित्याशङ्क्याह—*सामान्यप्रसिद्धीति* ॥ "तत्राग्निहोत्रादिलक्षणः" इत्यादिग्रन्थः किमर्थः? इति न ज्ञायते; परस्परव्याहतत्वात्, अग्निहोत्रादिलक्षणस्य धर्मत्वं प्रतिज्ञाय तत्प्रतिपादकानां विचारावसरे विवक्षितार्थत्वनिराकरणादित्याशङ्क्यावतारयति—*एवं* विषयविप्रतिपत्ती इति* ॥ तत्राग्निहोत्रादौ कथं पूर्वपक्षपरिग्रहः? नहि पूर्वपक्षिणोऽग्निहोत्रादेर्धर्मत्वमभिप्रेतमित्याशङ्क्य व्याचष्टे—*नकारस्त्विति* ॥

तत्त्वदीपनम्

येति* ॥ अदृष्टं स्वशब्दार्थः, स्वाध्यायो वा। मीमांसारम्भप्रदर्शनफलमाह—*तदेवमिति* ॥ स्वाध्यायाध्ययनस्य विचारहेतुत्वात् तदनन्तरं तस्यावसर इत्यर्थः ॥ पूर्वग्रन्थेन प्राचीनविचारस्यैकदेशविषयत्वसिद्धेः—"तथाचेत्यादि"ग्रन्थवैयर्थ्यमित्याशङ्क्याह—*प्रारभ्यमाणेति* ॥ आरम्भपर्यालोचनयाऽगतार्थत्वं पूर्वत्रोक्तम्, अत्र त्वारभ्यमाणपर्यालोचनयाऽपि तदुपपाद्यत इत्यर्थः। कथंशब्दसूचितामनुपपत्तिं दर्शयति—*ननु वेदेति* ॥ प्रतिवचनस्य प्रश्नाननुसारित्वशङ्कां निरस्यति—*सामान्येति* ॥ वेदार्थमात्रविचारपक्षे तत्रैव सामान्यप्रतिपत्तिविशेषविप्रतिपत्ती दर्शनीये, तथा नच प्रदर्शिते। तस्माद्धर्मविषयसामान्यादिप्रसिद्ध्यादिदर्शनाद् वेदवाक्यानीत्यविशेषवचनं तद्विशेषविषयत्वेन नियम्यत इत्यर्थः। "तत्राग्निहोत्रादिलक्षणः" इत्यादिः किं पूर्वपक्षिणो ग्रन्थः? उत सिद्धान्तिनः? नाद्यः; तेनाग्निहोत्रादेर्धर्मत्वेनानङ्गीकरणात्, न द्वितीयः; वेदवाक्यानां विचारावसराद्यङ्गीकरणात् तन्निषेधानुपपत्तेः। अतश्चासंगतोऽयं ग्रन्थ इत्याशङ्क्य तात्पर्यमाह—*एवमिति* ॥

पूर्वपक्षत्वमप्यनुपपन्नमित्युक्तमित्याशङ्क्याह—*नकारस्त्विति* ॥ *तत्रेत्यादेरेषोऽर्थः*—यावज्जीवादिवाक्येषु सत्सु कथमग्निहोत्रादेर्धर्मत्वाभावः? इति शङ्कायामुक्तम्—*न तत्प्रतिपादकानामिति* ॥ विवक्षितार्थत्वाद्विचारानवसरो वा कथमिति? अत आह—*नापीति* ॥ वक्तुर्विवक्षाधीनं शब्दतात्पर्यम्, अपौरुषेये च वेदे तन्न घटत इत्यर्थः। बुद्धादिवाक्यमपि न विचार्यम्, विवक्षाऽनुरोधेन तस्याप्रामाण्यादित्याह—*नवेति* ॥ फलाभावाद्

पञ्चपादिका

वाक्यानि विचारयंस्तदर्थविवक्षाविचारावसरप्रदर्शनार्थम्—"अथातो धर्मजिज्ञासे"ति सूत्रयामास जैमिनिः—वेदमधीत्यानन्तरं धर्मजिज्ञासा कर्तव्या, न स्नानं गुरुकुलनिवृत्तिरूपमिति दर्शयितुमिति। एवं स्थिते शास्त्रारम्भे, न सर्ववेदार्थविषयं शास्त्रमिति प्रतीतिः, किन्तु धर्मातिरिक्तोऽपि सिद्धरूपो वेदार्थोऽस्ति, स च पर्युदस्तो जैमिनिना ; न्यायान्तरविषयत्वादिति गम्यते। तत्कथं यत्तावदिदम्? उच्यते ;

पञ्चपादिकाविवरणम्

एवमाशङ्किते शास्त्रारम्भे सिद्धान्तसूत्रं तत्प्रतिपाद्यार्थकथनेनावतारयति—*धर्माय वेदवाक्यानीति* ॥ यस्याम्नायस्यार्थविवक्षा, तस्यैवाम्नायस्य विचारावसरश्चेति तदर्थविवक्षा-विचारावसरौ। विवक्षा-विचारावसर-धर्म-विचारान् सूत्रार्थान् सूत्रयोजनया दर्शयति—*वेदमधीत्यानन्तरमिति* ॥ ततः किमायातमिति? अत आह—*एवं स्थित इति* ॥ किं तत्र विवक्षितं गम्यत इति? तत्राह—*किंतु धर्मातिरिक्त इति* ॥ *अयमर्थः*—वेदस्यार्थविवक्षाप्रदर्शनेन वेदार्थविचारः कर्तव्य इति वक्तव्ये धर्मग्रहणं कुर्वन् मा भूत् सर्ववेदार्थविचारप्रतिज्ञा, किंत्वेकदेशविचारोऽयमिति मन्यते सूत्रकार इति गम्यते। *ननु* 'अथातः'शब्दाभ्यां स्वाध्यायस्य पूर्व-निर्वृत्ततया विचारहेतुत्वमुच्यते। स्वाध्यायो हि स्वार्थविचारहेतुर्भवति, न धर्मविचारहेतुः ; अतः 'अथातः'

ऋजुविवरणम्

"न तत्प्रतिपादकानामि"त्यत्रत्यो नकारोऽग्निहोत्रादिलक्षण एव धर्मो नेत्यत्राप्यन्वीयत इति तदर्थविवक्षा। "विचारा-वसरः" इति स एव धर्मरूपोऽर्थः, तदर्थविवक्षायां विचारावसरप्रदर्शनार्थमिति प्रतिभाति ; तदयुक्तम् ; धर्मे विवक्षा-प्रदर्शनाभावात्, यद्वा—तस्याम्नायस्यार्थस्तदर्थ इति निर्देशेऽपि तदर्थविवक्षायां विचारावसर इति प्रतिभाति, तदयुक्तम् ; तावन्मात्रस्य सूत्रार्थत्वप्रसङ्गादित्याशङ्क्य व्याचष्टे—*तस्यैवाम्नायस्येति* ॥ *ननु*—न धर्मग्रहण-सामर्थ्यात् सिद्धस्वरूपवेदार्थपर्युदाससिद्धिः ; नहि तेन विना धर्मग्रहणानुपपत्तिरित्याशङ्क्य व्याचष्टे—*अयमर्थो वेदस्येति* ॥ भवतु स्वाध्यायस्य विचारहेतुत्वम्, नैतावता वेदार्थविचारसिद्धिः ; धर्मविचारेऽपि तस्य हेतुत्वात्, इत्याशङ्क्याह—*स्वाध्यायो हीति* ॥ *सामान्य-विशेषाभ्यामिति*=सामान्यप्रसिद्धि-विशेषविप्रतिपत्तिभ्या-मित्यर्थः। *ननु* वेदस्य विवक्षितार्थत्वप्रदर्शनमनुपयोगीति चोद्यस्य "अग्निहोत्रादिरि"ति न परिहारः ; धर्मत्वा-कारेण जिज्ञास्यत्वप्रदर्शनस्य व्यधिकरणत्वात्। न हि तेन वेदार्थजिज्ञासादर्शनात् वेदार्थोपाधिर्विचार इति चोदितम् ; अनुपयोगपर्यवसितत्वात्, अथानुपयोगमुखेन वेदार्थविचारपरत्वम् ; तथाऽप्युपयोग एव कथनीयः, नतु धर्मस्य योग्यत्वनिरूपणं युक्तम्। न वेदार्थस्यापि तेनैव रूपेण योग्यत्वनिरूपणं युक्तम्, "यतो न वेदार्थे"-त्यनेन निरूपितत्वात्, "अग्निहोत्रादिरपी"ति वदता अन्यस्यापि विचारावसरप्रदर्शनाद् विरुद्धम् ; "यतस्त-

तत्त्वदीपनम्

विचारवैयर्थ्यमित्याशङ्क्याह—*धर्मायेति* ॥ अविवक्षितार्थत्वान्न विचारः, विवक्षितार्थत्वेऽपि न तद्विचारप्रयोजक-मस्तीत्याशङ्क्याह—*तदर्थेति* ॥ स चासावर्थश्चेति तदर्थः। तद्विवक्षया विचारावसर इति प्रतिभासं व्यावर्त-यति—*तस्येति* ॥ सूत्रव्याख्यानमिहानुपयुक्तमित्याशङ्क्याह—*विवक्षेति*॥ भूतार्थविचारो जैमिनिना पर्युदस्त इति कथं गम्यते? तत्राह—*अयमर्थ इति* ॥ सामान्यप्रसिध्यादेर्धर्मविषयत्वोक्तेर्न प्रश्नावसरः, इत्याशङ्क्य तात्पर्यमाह—*नन्वथेति* ॥ "स्वाध्यायस्ये"त्यत्र विषयवाचकेन विषयिणोऽध्ययनस्याभिधानमिति द्रष्टव्यम् ॥

अध्ययनस्य विचारहेतुत्वेऽपि कथं सकलवेदार्थविचारप्रतिज्ञासिद्धिः? इत्याशङ्क्याह—*स्वाध्याय इति* ॥ स्वाध्यायाध्ययनस्य भाव्यसाकाङ्क्षत्वाद् भाव्यस्य चार्थावबोधस्य विचारमन्तरेणानुपपत्तेर्वेदार्थविचार आक्षिप्यत इत्यर्थः। धर्मस्यापि तदर्थत्वान्न तद्विचारप्रतिज्ञाविरोध इत्याशङ्क्याह—*न धर्मेति* ॥ स्वाध्यायाध्ययनमात्र-भाव्यस्यार्थावबोधस्य सकलवेदार्थविचारहेतुत्वम्, न तु धर्मरूपतद्विशेषविचारहेतुत्वमित्यर्थः। विरोधस्यानिराकरणात्

पञ्चपादिका

धर्मो नाम लोकप्रवादात् सामान्यतः सिद्धः। तस्य स्वरूप-प्रमाणयोर्विप्रतिपत्तावग्निहोत्रादिरपि वेदार्थो धर्मतया विचारपदवीमुपारोहति; यतस्तस्यापि विचारावसरो विद्यते, तेन विवक्षितोऽसौ। नचाध्ययन-मात्रात् कृतकृत्यता। अतोऽध्ययनानन्तरं न गुरुकुलान्निवर्तितव्यम्, किन्तु वेदार्थो धर्मः, किं वाऽन्य

पञ्चपादिकाविवरणम्

शब्दविरोधान्न धर्मविचारः प्रतिज्ञातुं शक्यत इति चोदयति—*तत्कथं यत्तावदिदमिति* ॥ सामान्य-विशेषाभ्यां विचार्यमाणप्रधानाभिधायिधर्मपदग्रहणसामर्थ्यात्, तस्यैव विप्रतिपत्त्या पुरुषार्थसाधनतया च जिज्ञासित-त्वात्, प्रामाण्यप्रतिपादनात् प्राग्वेदार्थे सामान्यप्रतिपत्ति-विशेषविप्रतिपत्ति-पुरुषार्थसाधनत्वादीनामनवगमात्, जिज्ञासितत्वायोगाद् धर्म एव विचार्यत इत्याह—*उच्यते धर्मो नामेत्यादिना* ॥ तत्र धर्मे जिज्ञासायोग्यत्व-प्रदर्शनेन वेदार्थे तदभावं विवक्षति। *लोकप्रवादादिति* ॥ *ननु* धर्मविचारे स्वाध्यायस्य पूर्वनिर्वृत्त-तया हेतुत्वम्, अर्थविवक्षायाः प्रदर्शनं चानुपयोगीत्युक्तम्, *सत्यम्* ; अग्निहोत्रादेरपि धर्मस्कन्धत्वाद् दैवगत्या च धर्मत्वादुपयोग इत्याह—*अग्निहोत्रादिरपि वेदार्थ इति* ॥ *यत इति* ॥ विप्रतिपत्तिस्कन्धत्वादित्यर्थः।

ऋजुविवरणम्

स्यापी"ति चाग्निहोत्रादिग्रहणमनुपयोगि ; तत्रानर्हत्वशङ्काकारणाभावात्, तेन नादेयोऽयं ग्रन्थ इत्याशङ्क्याह—*सत्यमग्निहोत्रादेरपीति*। *दैवगत्या चेति* ॥ वेदबोध्यश्रेयस्साधनत्वयुक्तत्वं धर्मत्वम्, तस्याग्निहोत्रादेर्विद्यमानत्वेन तद्ग्रहणमुपयोगश्चेति भावः। यद्वा—धर्मस्कन्धस्यापि चैत्यवन्दनस्य नैव विवक्षितार्थत्वप्रदर्शनमुपयुज्यते, धर्मत्वाकारेणापि कथमुपयोगः? इत्याशङ्क्याह—*दैवगत्या चेति* ॥ "तेन विवक्षितोऽसावि"त्यत्र संनिहिताग्नि-होत्रादीनां निर्देशशङ्का स्यात्। नहि तस्य विवक्षितत्वमत्र व्युत्पाद्यं योग्यं वा ; नाप्यन्यत् सन्निहितमस्ति, तेन साकाङ्क्षत्वादनर्थकम्, इत्याशङ्क्य पूरयति—*स्वाध्याय इति* ॥ *ननु*—धर्मस्यापि वेदार्थत्वाविशेषाद् धर्म-ग्रहणमेव कर्तव्यमिति नियन्तुं न शक्यते, प्राधान्यं च वेदार्थस्य सम्पादयितुं शक्यते, अतो न धर्मग्रहणमित्याशङ्क्याह

तत्त्वदीपनम्

प्रतिवचनस्याननुरूपत्वमाशङ्क्योत्तरग्रन्थसंदर्भस्य तात्पर्यमाह—*सामान्येति* ॥ इत्थम्भावे तृतीया। 'श्रेयःसाधनं धर्मः' इति सामान्यरूपेणाग्निहोत्रादिरेवेति विशेषरूपेण विचार्यमाणः, अत एव प्रधानभूतो यो धर्मस्तस्याभिधायि यद्धर्मपदम्, तद्ग्रहणसामर्थ्यादिति विग्रहः। 'अथातः'शब्दाभ्यां प्राबल्यं दर्शयितुम्—"प्रधाने"ति विशेषणम्। तदुप-पादयितुम्—"सामान्ये"त्यादि। धर्मस्यैव विचार्यत्वे हेत्वन्तरमाह—*तस्येति* ॥ न केवलं विप्रतिपन्नत्वेन संदिग्धत्वाद्धर्मस्य विचार्यत्वम्, किं तु फलत्वादपीत्याह—*पुरुषार्थेति* ॥ वेदार्थस्य तद्वैलक्षण्यमाह—*प्रामाण्येति* ॥ वेदप्रामाण्यसिद्धौ तदर्थोऽधिगम्यते, नान्यथा। अत एव न विशेषप्रतिपत्त्यादेरधिगम इत्यर्थः ॥

एवं समुदायार्थमभिधायोक्तमर्थं टीकारूढं करोति—*तत्रेति* ॥ 'अथातः'शब्दपर्यालोचनया वेदार्थ एव विचारित इत्युक्तमनुवदति—*ननु धर्मेति* ॥ *उक्तमिति* ॥ उक्तमङ्गीकरोति—*सत्यमिति* ॥ तर्हि न धर्मस्य विचार्यतेत्यत आह—*अग्निहोत्रादेरिति* ॥ *धर्मस्कन्धत्वादिति* ॥ धर्मविप्रतिपत्तिस्कन्धत्वादित्यर्थः। तर्हि चैत्यवन्दनादेरपि धर्मस्कन्धत्वात् सोऽपि विचार्यः स्यादित्याशङ्क्याह—*दैवगत्येति*॥ *धर्मत्वादिति*। अग्निहोत्रा-देर्वेदबोध्यश्रेयःसाधनत्वाधिकरणत्वादित्यर्थः। नच—अस्मिन् पक्षे स्वाध्यायस्य हेतुत्वादिकथनमनुपयोगि स्यादिति—वाच्यम् ; अग्निहोत्रादेरपि वेदार्थत्वात् तत्प्रदर्शनस्याप्युपयोगित्वादित्यर्थः। तदभिप्रेत्य वेदार्थ इत्युक्तं टीकायाम्। वेदार्थोऽपि श्रेयःसाधनत्वाद् विचार्य इति वक्तव्यम्, तच्चात्राप्यस्तीति। तदिदमुक्तम्—*धर्मायेति* ॥ किंच धर्मप्रमाणविप्रतिपत्त्युपलब्धेराम्नायार्थविवक्षाप्रदर्शनमुपयुक्तमित्युक्तम्—"यतः" इत्यत्र,तत्र यच्छब्देन प्रकृतस्य विचार्यस्य परामर्शशङ्कां व्यावर्तयति—*यत इति* ॥ "स्वरूप-प्रमाणयोर्विप्रतिपत्तावि"त्यत्रोक्तप्रमाणविप्रतिपत्तेर्यच्छब्देन परामर्श

पञ्चपादिका

एवेति जिज्ञासामर्हतीति वदितुं धर्मग्रहणं युक्तम्—अथातो धर्मजिज्ञासेति, न वेदार्थजिज्ञासेति ; यतो न वेदार्थतया ज्ञाने प्रवृत्तिः। यत्पुनर्धर्मस्य स्वरूप-प्रमाणकथनाय द्वितीयं सूत्रम्, तद्वेदप्रमाणको धर्म इति स्यात्—किमिदं "चोदनालक्षणः" इति ? तद् नूनम्—न सर्वो वेदो धर्म एव कार्यात्मके पर्यवस्यति, कश्चिदस्य भागः कार्यताशून्ये वस्तुतत्त्वेऽपि वर्तत इति मन्यते ॥

ननु चोदनाग्रहणस्यान्यदेव प्रयोजनम्, "चुद प्रेरणे" इति प्रेरणाकर्मणश्चोदनेति रूपम् ;

पञ्चपादिकाविवरणम्

तेन विवक्षितोऽसौ स्वाध्याय इति प्रदर्शनीयमित्यर्थः। *ननु* पुरुषार्थत्वाचेद् धर्मविचारः, अध्ययनेनैव तत्सिद्धेः किं धर्मविचारेणेति ? नेत्याह—*नचाध्ययनमात्रादिति* ॥ अतो न—'अथातः'शब्दविरोध इत्याह—अतोऽध्ययनानन्तरमिति* ॥ किंच धर्मशब्दस्य प्रधानत्वाद् 'अथातः'शब्दविरोधेऽपि धर्मविचार एव युक्त इत्याह—*इति वदितुं धर्मग्रहणं युक्तमिति* ॥ पुरुषा हि धर्ममेव जिज्ञासन्ते, न वेदार्थम् ; तस्यापि धर्मत्वप्रयुक्तत्वादुपादानस्येत्याह—*यतो न वेदार्थेति* ॥ सामान्यग्रहण-विशेषविप्रतिपत्ति-पुरुषार्थसाधनत्व-धर्मशब्दग्रहणैर्धर्मविचारपरं प्रथमसूत्रमित्युक्तम्, द्वितीयमपि सूत्रं तथैवेत्याह—*यत्पुनर्धर्मस्येति* ॥ धर्मलक्षणपरं सूत्रम्, अर्थात् प्रमाणप्रतिज्ञेति प्राभाकराः। मुखतः प्रमाणप्रतिज्ञा, अर्थाद् धर्मलक्षणत्वमिति वार्तिककारीयाः। सर्वथाऽप्युभयं विवक्षितमिति। तत्र वेदग्रहणे प्राप्ते सर्वो वेदो धर्मविषयो मा भूदिति चोदनामग्रहीदिति गम्यत इत्याह—*तन्नूनमिति* ॥ *ननु* चोदनाग्रहणं सर्ववेदस्य धर्मे प्रामाण्यपरिहाराय न भवति, किंत्वन्यदेव प्रयोजनमित्याह—*ननु चोदनाग्रहणस्येति* ॥

ऋजुविवरणम्

—*पुरुषा हि धर्ममेवेति* ॥ वेदार्थजिज्ञास्यत्वं नास्तीति कथमुक्तम् ? धर्मस्यापि वेदार्थस्य जिज्ञास्यत्वदर्शनात्, इत्याशङ्क्याह—*तस्यापि धर्मत्वेति*॥ "स्वरूप-प्रमाणकथनाये"त्ययुक्तम्, विरोधादित्याशङ्क्याह—*धर्मलक्षणेति*॥ तत्र "तन्नूनम्" इति न सम्बद्धम् ; नहि चोदनाग्रहणस्य वस्तुतत्त्वनिष्ठवेदभागेन विनाऽनुपपत्तिरित्याशङ्क्यावतारयति—*तत्र वेदग्रहण इति* ॥ "प्रेरणाकर्मणः" इति प्रेरणैव कर्म वाच्यं यस्यासौ, प्रेरणाकर्मा ; तस्यैवं रूपमिति। *ननु*—"चुद प्रेरणे"इत्यत्र द्वयं प्रतीयते—शब्दः, तद्वाच्यः प्रेरणा च ; तत्र को विधिः—लिङादिशब्दः ? तदर्थो वा ?

तत्त्वदीपनम्

इत्यर्थः। "विवक्षितोऽसावि"त्यत्राग्निहोत्रादिपरामर्शशङ्कां निरस्यति—*तेनेति* ॥ "जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः"इत्यादिवाक्यादध्ययनस्य जपद्वारेण पुरुषार्थहेतुत्वप्रतिपत्तेर्विचारो वृथेति शङ्कते—*ननु पुरुषार्थत्वादिति*॥ कर्मकारकप्रधानाध्ययनविधायि-तव्यप्रत्ययविरोधान्न तस्य स्वतन्त्रपुरुषार्थसाधनत्वमित्याह—*नेत्याहेति* ॥ टीकापेक्षितं विरोधनिराकरणोपसंहरणमाह—*अत इति* ॥ *इत्याहेति* ॥ इत्यभिसन्धाय धर्मजिज्ञासा युक्तेत्याहेत्यर्थः। विरोधमङ्गीकृत्य दूषणमाह—*किंचेति* ॥ विचार्यमाणविषयत्वेन धर्मशब्दस्य प्राधान्यमित्यर्थः। किंच जिज्ञासितं हि विचार्यम्, धर्मश्च जिज्ञासितः, इति स एव विचार्य इत्याह—*पुरुषा हीति*॥ वेदार्थजिज्ञासाया अपि दृष्टत्वाद् धर्ममेवेति कथमुक्तम् ? तत्राह—*तस्यापीति* ॥ चोदनाया वेदात्मकत्वात्—"चोदनालक्षणो धर्मः" इत्यभिधानं युक्तमित्याशङ्क्य तात्पर्यमाह—*सामान्येति* ॥ यद्यपि चोदनाया वेदात्मकत्वम् ; तथाऽप्यचोदनात्मकवेदार्थविशेषशङ्कां व्यावर्तयितुं वेदग्रहणं युक्तमित्यभिप्रायः। एकस्य सूत्रवाक्यस्य स्वरूप-प्रमाणपरत्वमयुक्तम्, इत्याशङ्क्य श्रुत्यर्थाभ्यामुभयोर्विवक्षितत्वान्न विरोध इत्याह—*धर्मेति* ॥ चोदनाग्रहणस्य भूतार्थप्रतिपादकवेदवाक्येन विना नानुपपत्तिरित्याशङ्क्याह—*तत्र वेदेति* ॥ "अन्यदेव प्रयोजनमि"त्यत्र कस्मादन्यदिति वीक्षायामाह—*ननु चोदनेति* ॥ अर्थभावनालक्षणपुरुषप्रवृत्तेः पुरुषार्थपर्यवसायित्वं विरोधयितुं चोदनाग्रहणमित्यर्थः।

प्रयोजनान्तरं दर्शयितुं चोदनाशब्दनिष्पत्तिः प्रदर्श्यते—*चुद प्रेरणे* इति टीकायाम्। *तस्यार्थः*—प्रेरणा कर्म

पञ्चपादिकाविवरणम्

अयमर्थः—लिङादिशब्दव्यापारः पुरुषप्रवृत्तिलक्षणार्थभावनालक्षणभाव्यनिष्ठः स्वज्ञानकरणकः स्तुति-निन्दार्थवादादिज्ञानेतिकर्तव्यताको लिङादिशब्देनाख्यातत्वसामान्यादर्थभावनाभिधायिनाऽपि लिङ्-विशेषेणाभिधीयमानः शब्दभावनेति कथ्यते। शब्द एव वा प्रदर्शितांशत्रयविशिष्टः शब्दभावना, शब्दगुणो

ऋजुविवरणम्

यदि शब्दः; ततः प्रेरणाकर्मणः"इत्यनुपपन्नम्; शब्दस्य तदात्मकत्वाभावात्, अथार्थः, तदा "पुरुषार्थे प्रेरयितुमशक्नुवन्नि"ति व्यर्थं विशेषणम्; नह्यर्थस्य प्रेरणात्मकस्य प्रेरकत्वमस्ति। नापि पुरुषार्थे प्रेरकत्वम्; स्वव्यापारत्वाभावात् पुरुषार्थस्य। तदुक्तम्—"स्वव्यापारे हि पुरुषः कर्तृत्वेन नियुज्यते"इति। "तस्य लिप्सार्थलक्षणे"ति च "भावनाकर्मतामापादयती"त्यपि व्यधिकरणम्; पुरुषार्थे प्रवर्तकत्वं हि वक्तव्यम्, नतु भावनाकर्मत्वापादनेन तत् परिहृतं भवति, नाप्येतद् द्वयं मुक्त्वान्यदस्मिन् ग्रन्थे विधिरूपं प्रतीयते, यस्यानुपपत्त्या स्वर्गादीनां भावनाकर्मता स्यात्, अतो न चोदनाग्रहणस्य प्रयोजनान्तरं भवतीत्याशङ्क्य व्याचष्टे—*अयमर्थ इति*॥ "प्रेरणात्मको विधिरि"त्यस्य व्याख्या—*लिङादिशब्दव्यापार इति*॥ लिङादिशब्दस्य हि वाच्यद्वयम्—स्वव्यापारो विधिरूपः; पुरुषव्यापारश्च। तत्र पुरुषव्यापारस्याप्यभिधेयत्वं दर्शयितुमंशत्रयाभावे प्रवर्तकत्वाभावाच्च तद् दर्शयति—*पुरुषप्रवृत्तीति*॥ अनेन कथं व्यापारस्य प्रवर्तकत्वमिति चोद्यं परिहृतम्; शब्दव्यापारत्वात् तस्य; "स्वज्ञानकरणकः" इत्यनेन सर्वदा प्रवर्तकत्वं च निरस्तम्। *ननु*—लिङादिव्यापारस्यैतादृशस्य बोधकं न किंचिदुपलभ्यते। बोधकाभावेन तज्ज्ञानाभावात्। कथं ज्ञानस्य करणत्वम्? अज्ञातस्य च व्यापारस्य कथं प्रवर्तकत्वम्? स्वरूपास्तित्वं च न तस्येत्याशङ्क्याह—*लिङादिशब्देनेति*॥ "लिङादिशब्देने"त्यादिना "शब्दभावनेति कथ्यते" इत्येवमन्तेन बोधकशब्दप्रदर्शनपूर्वकं स्वरूपं दर्शयता लिङादिशब्द-तद्वाच्यपुरुषप्रवृत्तिव्यतिरेकेण तृतीयं नास्तीति चोद्यं परिहृतम्। कथं लिङादिशब्दव्यापारस्य ज्ञानं करणम्? साधकतमं हि करणं भवति। नच शब्दव्यापारे ज्ञानं साधकतमं भवति। करणानुग्राहिणी चेतिकर्तव्यता। तदभावे च नेतिकर्तव्यतानिरूपणं युक्तम्। अन्यार्थप्रवृत्तकृतिव्यापारत्वमपि न संभवति; भावनायां प्रवृत्तकृतेरभावादित्याशङ्क्य करणस्वरूपमाह—

तत्त्वदीपनम्

वाच्यं यस्य धातोः, स प्रेरणाकर्मा, तस्य निष्पन्नं रूपं चोदनेति। शब्दभावना विधिरिति केचित्; इष्टसाधनमित्यन्ये; नियोग इत्यपरे; ततः कथं प्रेरणात्मको विधिरित्युक्तमित्याशङ्क्याह—*अयमर्थ इति*॥ प्रेरणा लिङादिशब्दव्यापारः, स च शब्दभावनेति कथ्यत इति संबन्धः। परिस्पन्दपरिणामलक्षणोऽर्थभावनोत्पादनानुकूलः शब्दव्यापारः शब्दभावनेति द्रष्टव्यम्। शब्दभावना प्रवर्तिका चेत्, तर्हि तयैवालम्, किमर्थभावनया? येन तद्भाव्यत्वेन स्वर्गादिकमाद्रियते, तत्राह—*पुरुषेति*॥ शब्दभावनाया भाव्यसाकाङ्क्षत्वाद् भाव्यान्तरादर्शनाच्च धात्वर्थोत्पत्त्यनुकूल औदासीन्यप्रच्युतिलक्षणः कर्तृव्यापारोऽर्थभावनाभाव्य आस्थेय इत्यर्थः॥ तर्हि शब्दव्यापारस्य सदा पुंस्प्रवृत्तिजनकत्वं किं न स्यात्? इत्याशङ्क्य, सहकार्यभावाद् मैवमित्याह—*स्वज्ञानेति*॥ शब्दभावना स्वशब्दार्थः। तथाऽपि सर्वान् किमिति न प्रवर्तयतीति? अत्राह—*स्तुतीति*॥ "स प्रजापतिरात्मनो वपामुदखिददि"त्यादिः स्तुत्यर्थवादः; "सोऽरोदीदि"त्यादिर्निन्दार्थवादः, तदुत्थज्ञानमितिकर्तव्यतेति यावत्। फलवाक्यमादिशब्दार्थः। शब्दभावना-प्रतिपत्त्युपायाभावात् कथं तद् ज्ञानमिति? अत आह—*लिङादीति*॥ लिङ्गादिशब्देनाभिधीयमान इति संबन्धः॥

लिङादीनामर्थभावनाभिधायित्वाद् न शब्दभावनाभिधायित्वमित्यत आह—*आख्यातेति*॥ कथं तर्हि शब्दभावनाभिधायकत्वम्? तत्राह—*लिङ्विशेषेणेति*॥ लिङ्रूपो विशेषो यस्य स तथोक्तः। लिङ्शब्दश्च प्रत्ययान्तरगत-विशेषोपलक्षणार्थः। लिङादिशब्दस्याख्यातत्वाकारेणार्थभावनाभिधायकत्वम्, लिङादिविशेषाकारेण शब्दभावनाभि-धायकत्वमित्यर्थः। पक्षान्तरमाह—*शब्द एवेति*॥ *शब्दगुणो वेति*॥ अर्थभावनायाः स्वरूपेण निष्पन्नत्वेऽ-

पञ्चपादिका

ततः प्रेरणात्मको विधिरपुरुषार्थे प्रेरयितुमशक्नुवन् पदान्तराभिहितमपि स्वर्गादिकं भावनाकर्मतामापादयति—एकपदोपादानात् संनिहिततरं धात्वर्थं विहायेति कथयितुमिति, *नैतत्सारम्*; अध्ययनविधि-

पञ्चपादिकाविवरणम्

वा। सर्वत्र हि करणमितिकर्तव्यतानुगृहीतं भाव्यनिर्वृत्तिद्वारेणैव भावनां प्रति करणं भवति। तत्र शब्दभावनाविषयं ज्ञानं लिङादिशब्दजन्यं प्रवर्तकज्ञानत्वात् स्तुत्यादिज्ञानानुगृहीतं पुरुषप्रवृत्ति-निवृत्तिहेतुः, इति भाव्यनिर्वृत्तिद्वारेण शब्दभावनां प्रति करणमुच्यते। सा च शब्दभावना पुरुषप्रवृत्तिमुत्पादयन्ती तस्याः पुरुषार्थविषयत्वमन्तरेण नोत्पादयितुं क्षमते; अपुरुषार्थे पुरुषस्याप्रवृत्तेः। ततश्चोदनाप्रयुक्तपुरुषप्रवृत्तेः समानपदोपात्तमपुरुषार्थं धात्वर्थं भाव्यं विहाय पुरुषविशेषणमपि स्वर्गादिकं भाव्यत्वेनोपादाय धात्वर्थकरणिका प्रयाजादीतिकर्तव्यताका स्वर्गादिभाव्यनिष्ठा पुरुषप्रवृत्तिरर्थभावना संपद्यते। तदेवंविधार्थभावनानिष्पत्तये शब्दभावनायाः प्रवर्तकत्वद्योतनाय चोदनाग्रहणम्—*इति* ॥

नैतत् सारम्; अध्ययनविधिरित्यादिपरिहारः। *तस्यायमर्थः*—"स्वाध्यायोऽध्येतव्यः" इति तव्यप्रत्ययव्यापारः शब्दभावना, अध्ययने पुरुषप्रवृत्तिलक्षणार्थभावनाभाव्यनिष्ठा स्वविषयप्रवर्तकज्ञानकरणिकाऽध्ययनफला, अर्थवादादिविज्ञानेतिकर्तव्यताका भवति। सा च पुरुषप्रवृत्तिलक्षणामर्थभावनामध्ययनकरणिकां स्वाध्यायभाव्यनिष्ठां प्राङ्मुखत्वादीतिकर्तव्यताकामुत्पादयति। सा च भाव्यस्य स्वाध्यायस्य फलवद्विज्ञानजननिमित्तत्व-

ऋजुविवरणम्

सर्वत्र हि करणमिति ॥ तथा प्रकृतेऽपि करणत्वं दर्शयति—*शब्दभावनेति* ॥ कथं तत्र स्तुत्यादिज्ञानानुगृहीतमेव करणमिति तन्निश्चीयत इति? तदाह—*प्रवर्तकज्ञानत्वादिति* ॥ अथवा—भवतु करणमेवंविधम्, ज्ञानस्य तु कथं करणत्वमित्याशङ्क्याह—*तत्र शब्दभावनेति*॥ "प्रेरणात्मकः"इत्यत्रार्थद्वयं प्रतीयते—प्रेरणारूपम्, तदुत्पाद्यं च; सिद्धवस्तुनः प्रेरकत्वाभावात्। तच्च प्रेरणादिरूपं "लिङादिशब्दव्यापारः" इत्यनेन दर्शितम्, इदानीं द्वितीयं प्रेरणाकर्मरूपं दर्शयति—*पुरुषप्रवृत्तिमिति* ॥ "अपुरुषार्थे प्रेरयितुमशक्नुवन्नि"त्येतद् व्याचष्टे—*तस्याः पुरुषार्थविषयेति* ॥ *समानपदोपात्तम्=एकपदोपात्तमित्यर्थः। *पुरुषविशेषणमपीति* ॥ स्वर्गे कामना यस्यासौ स्वर्गकाम इति पुरुषस्य प्राधान्यं प्रतीयते; तथाऽपि विधिसामर्थ्यात् काम्यमानता; सामर्थ्यात्, पुरुषस्य क्रियाक्षेपतः प्राप्तत्वाच्च? 'साधकं तु तादर्थ्यादि'ति न्यायेन स्वर्गप्रधानत्वं शब्दस्य विनिश्चित्य साध्यता निश्चीयत इति भावः। "अध्ययनविधि"रित्यसम्बद्धम्; नहि विधिरध्ययने पुरुषं प्रवर्तयति; ताल्वोष्ठपुटव्यापारत्वादध्ययनस्य, स्वव्यापारे हि पुरुषः कर्तृत्वेन नियुज्यत इति हि न्यायविदः। तथा "अध्ययनस्य पुरुषार्थरूपार्थावबोधकत्वमि"त्यसम्बद्धम्। नाध्ययनस्य क्रियारूपस्यार्थावबोधकत्वसंभवः; शब्दधर्मत्वात् तस्येत्याशङ्क्य व्याचष्टे—*तस्यायमर्थ

तत्त्वदीपनम्

र्थभावनानिष्पादकत्ववैशिष्ट्योत्पत्तौ ज्ञानस्य करणत्वमित्यर्थः। सामान्योक्तन्यायं प्रस्तुते योजयति—*तत्र शब्देति* ॥ ततः किमिति? अत आह—*सा चेति* ॥ *तस्या इति* ॥ पुरुषप्रवृत्तेरित्यर्थः। अर्थभावनायाः पुरुषार्थपर्यवसायित्वेऽपि कथं स्वर्गादिभाव्यता? तस्य पुरुषविशेषणत्वात्, धात्वर्थस्य च समानपदोपात्ततया संनिहितत्वादित्याशङ्क्याह—*ततश्चेति* ॥ *चोदनेति* ॥ शब्दभावनाभाव्यार्थभावनाया इत्यर्थः ॥

न स्वर्गादेर्भावनाभाव्यत्वम्, अदृष्टेरित्याशङ्क्य, सेतिकर्तव्यधात्वर्थानुष्ठानात् स्वर्गसिद्धिर्युक्तेत्याशयेनाह—*धात्वर्थेति* ॥ तथाऽपि वेदपदव्युदासेन चोदनाग्रहणे किं निमित्तम्? इत्याशङ्क्याह—*तदेवमिति* ॥ अध्ययनस्य पुरुषार्थपर्यवसायित्वेऽपि यागभावनायाः कथं स्वर्गपर्यवसायित्वम्? ततः परिहारस्याभासत्वमित्याशङ्क्याह—*नैतत्सारमिति* ॥ समाधिप्रकारमेवाह—*तस्येति* ॥ स्वविषयं प्रवर्तकं ज्ञानं चेति स्वविषयप्रवर्तकज्ञानम्, तत्करणं यस्याः, सा तथोक्ता। अध्ययनस्य फलमध्ययनफलम्, तत्प्रतिपादका येऽर्थवादादयः, तदुत्थं ज्ञानमितिकर्तव्यता यस्याः, सा तथोक्ता। प्राकरणिकस्य ज्ञानस्याप्यङ्गत्वात् तद्धेतुप्रकरणमादिशब्दार्थः। उत्तरो ग्रन्थः स्पष्टार्थः ॥

पञ्चपादिका

रध्ययने माणवकं प्रेरयन्नध्ययनस्य पुरुषार्थस्वरूपार्थावबोधकत्वमनापाद्य न शक्नोति प्रेरयितुम् ; पारम्पर्येणाप्यपुरुषार्थे विधेरपर्यवसानात्, अतस्तदर्थं न चोदनाग्रहणम् ; वेदग्रहणेनापि तत्सिद्धेः। अपिच वेदग्रहणमेव युक्तम्; असन्देहात्, चोदनाग्रहणे हि सन्देहः स्यात् ; लोकेऽपि विद्यमानत्वात्। *अथ* वेदाधिकरणे "वेदांश्चैके सन्निकर्षमि"ति विशेषाभिधानाद् वैदिकत्वसिद्धिरिति, *सोऽयमाभाणको लोके* "पिण्डमुत्सृज्य करं लेढी"ति, सूत्रकारस्याप्यकौशलं प्रदर्शितं स्यात्। ततश्चोदनाग्रहणाद-

पञ्चपादिकाविवरणम्

मन्तरेणार्थभावनामुत्पादयितुमसमर्था स्वाध्यायगतलिङादिशब्दाभिधेयक्रतुभावनानां स्वर्गादिविषयत्वं परम्परया कल्पयति, इत्यध्यनविधिसामर्थ्यादेव वेदस्य विशिष्टफलविषयभावनानां प्रतिपादकत्वं सिद्धम्। अतो वेदग्रहणेनैव भावनानां धात्वर्थं विहाय स्वर्गाद्यालम्बनत्वं सिध्यतीति। *अपिच* चोदनाग्रहणे वेदान्तानामर्थान्तरपरत्वाशङ्का स्यात्, तन्निवृत्तये वेदग्रहणमेव युक्तमित्याह--*अपिच वेदग्रहणमेवेति*॥ संदेहान्तरमाह—*चोदनाग्रहणे हीति*॥ *ननु* वेदाध्ययनानन्तरं धर्मविचारं प्रतिज्ञाय चोदनालक्षण इति ब्रुवन् वैदिकचोदनामेव ब्रवीति, *न*; तत्र विशेषाभावात्। अनेन च सूत्रेण तत्रापि सर्वचोदनानन्तर्यं किं न स्यात्? प्रकारान्तरेण वैदिकचोदनानियममाह—*अथ वेदाधिकरण इति*॥ लक्षणसूत्रे प्राप्तं वेदग्रहणं विहायान्यत्र कुर्वन्न बुद्धिपूर्वकारी स्यादिति परिहरति—*सोऽयमाभाणक इति*॥ अतो वेदान्तानां धर्मपरत्वपर्युदासाय चोदनाग्रहणमित्याह—*ततश्चोदनाग्रहणादिति*॥ तस्मात् सूत्र-भाष्य-वार्तिककाराभिप्रायेण ब्रह्मपरत्वमेव, न

ऋजुविवरणम्

इति*॥ "चोदनाग्रहणे ही"ति 'हि'शब्दप्रयोगात् पूर्वस्यैव विवरणमेतदिति प्रतीयते ; तथा सत्युत्तरग्रन्थोपपादितलौकिक-वैदिकयोर्मध्ये सन्देह एव विवक्षितः स्यात्, तथा सति पूर्वं वेदान्तानामर्थान्तरपरत्वशङ्का स्यादिति व्याख्यानमसम्बद्धमेव स्यात्, तदर्थं व्याचष्टे—*सन्देहान्तरमिति*॥ *तत्र विशेषाभावादिति*॥ *तत्र = तस्मिन् सूत्रे। वेदाध्ययनानन्तरमिति विशेषाभावात्। अथशब्दस्यानन्तर्यमात्रवाचित्वात्, अथवा—अध्ययनविधिप्रयुक्तत्वाद् विचारस्य तदानन्तर्येऽपि तस्यैव हेतुत्वमिति निश्चेतुं न शक्यते ; आनन्तर्ये हेतुत्वे च तात्पर्यायोगादिति। अथवा—न तेन वैदिकनियमः ; धर्मप्रमाणमात्रस्य प्रथमसूत्रे प्रामाण्यप्रतिज्ञाङ्गीकारायोगादित्यर्थः। *ननु*—'अथातः' शब्दाभ्यां वेदस्य हेतुत्वप्रतीतेरनन्तरं चोदनाग्रहणाद् वैदिकत्वनियम इति चेत्, तत्राह—*अनेन चेति*॥ द्वितीय-

तत्त्वदीपनम्

टीकोक्तप्रकारादन्यथा संदेहव्युदासमाह—*अपिचेति*॥ प्रवर्तकवचनस्य चोदनात्वात् तल्लक्षणो धर्म इत्युक्तेऽप्रवर्तकसत्यादिवाक्यानामर्थान्तरपरत्वशङ्का स्यात्, तन्निरासार्थं सर्वस्य वेदस्य धर्मे प्रामाण्याभिधानमुचितमित्यर्थः। "असन्देहादि"त्येतत्प्रपञ्चरूपत्वमुत्तरग्रन्थस्य व्यावर्तयति—*संदेहान्तरमिति*॥ चोदनानां लोके वेदे च विद्यमानत्वात् 'चोदनालक्षणोऽर्थो धर्मः" इत्यत्र कीदृश्या ग्रहणमिति विशयः स्यात्, तन्निरासार्थं वेदग्रहणमेवोचितमित्यर्थः। सन्देहव्युदासस्यान्यथोपपत्तिं शङ्कते—*ननु वेदेति*॥ वेदस्य प्रथमसूत्रे प्रस्तुतत्वाद् द्वितीयसूत्रेऽपि वेदचोदनैवोपादीयत इत्यर्थः। प्रथमसूत्रस्यापि संदिग्धार्थत्वान्न तेनैतन्नियम इत्याह—*न तत्रेति*। प्रथमसूत्र इत्यर्थः। विशेषाभावादिति*॥ वेदाध्ययनानन्तरमिति विशेषाभावादित्यर्थः॥ अथशब्दस्यानन्तर्यार्थत्वात् कस्यानन्तर्यमिति वीक्षायां वेदाध्ययनानन्तर्यं परिशेषात् सिध्यतीत्याशङ्क्य परिशेषोऽसिद्ध इत्याह—*अनेनेति*॥ वेदाधिकरणपर्यालोचनया चोदनाशब्दार्थो निरूप्यत इत्याह—*प्रकारान्तरेणेति*॥ *एके=नैयायिकादयो *वेदान्* पुरुषबुद्धिविरचितानाचक्षते। तत्र हेतुमाह—*संनिकर्षमिति*॥ पुरुषसंबन्धाभावे 'काठकमि'त्यादिसमाख्यानुपपत्त्या पुम्बुद्धिप्रभवत्वमिति वेदाधिकरणाक्षरार्थः। सूत्रकारस्य कथमकौशलमिति शङ्कायामाह—*लक्षणेति*॥ सूत्र-भाष्य-वार्तिककाराभिप्रायेण वेदैकदेशस्य विचारितत्वं प्रागुक्तम्, तत्कथं सूत्रकार एवेत्युक्तम्? इत्याशङ्क्योपलक्षणपरतया व्याचष्टे—*तस्मादिति*॥

पञ्चपादिका

चोदनात्मकोऽपि वेदभागोऽभिप्रेत इति गम्यते, येन वेदार्थमात्रस्य धर्मत्वं मा भूदिति चोदनेत्यवोचत्। तदेवं सूत्रकार एव स्वशास्त्रविषयातिरिक्तं वेदभागमविचारितमसूसुचत्॥ *ननु* "दृष्टो हि तस्यार्थः कर्मावबोधनम्" "तद्भूतानां क्रियार्थेन समाम्नायः" "आम्नायस्य क्रियार्थत्वादि"ति च सर्वस्य कार्यार्थत्वं दर्शितम्, *सत्यम्*; तत्प्रक्रमबलात् तन्निष्ठो वेदभाग इति गम्यते, न सर्वत्र। अपिच "दृष्टो हि तस्यार्थः कर्मावबोधनमि"ति न सर्वस्य कर्मावबोधनमर्थ उच्यते, कथम्? वेदाध्ययनानन्तरं स्नानविधायकमाम्नायमुपलभ्य वेदस्यानर्थकत्व आशङ्किते "अतिक्रमिष्याम इममाम्नायम्, अनतिक्रामन्तो वेदमर्थवन्तं सन्तमनर्थकमवकल्पयेम; दृष्टो हि तस्यार्थः कर्मावबोधनमि"त्यर्थसद्भावः प्रदर्शितः,

पञ्चपादिकाविवरणम्

धर्मपरत्वमित्याह—*तदेवं सूत्रकार इति*॥ *ननु* तेषामेव कृत्स्नस्य वेदस्य धर्मे विनियोजकं वचनमस्तीत्याह—*ननु दृष्टो हि तस्यार्थ इति*॥ सत्यम्; धर्मचोदनासूत्रप्रक्रमसामर्थ्यादुत्तरं सामान्यवचनं प्रकृतविशेष उपसंह्रियत इत्याह—*सत्यम्; तत्प्रक्रमबलादिति*॥ सामान्येन परिहारमभिधाय प्रत्येकमाह—*अपिच दृष्टो हीति*॥ *ननु* आम्नायशब्देन सकलवेदस्य धर्मावबोधे विनियोगः स्पष्ट इति चोदयति—*कथमिति*॥ न विनियोगकात्स्न्र्यपरं भाष्यम्, किंत्वाम्नायस्यार्थसद्भावपरम्; यथा 'रूपं प्रत्यक्षमि'त्युक्ते न सर्वप्रत्यक्षस्य रूपे विनियोगः, किन्तु रूपस्य प्रत्यक्षान्वयमात्रं कथ्यते, तद्वदिति परिहरति—*वेदाध्ययना-

ऋजुविवरणम्

सूत्रगतचोदनाग्रहणसामर्थ्येन पूर्वसूत्रेऽपि सर्वचोदनानन्तर्यं किं न स्यात्? तस्यासन्दिग्धत्वात्, प्रथमसूत्रस्य साधारणत्वादिति भावः। "तदेवं सूत्रकारः" इति विशेषोपसंहारस्य प्रक्रमविरुद्धत्वपरिहारायावतारयति—*तस्मात्सूत्रभाष्येति*॥ *ननु*—सूत्रकारादिवचनसामर्थ्यादेकदेशस्यैव कार्यपरत्वं प्रतीयत इत्युक्तम्, तत् कथं चोद्यमित्याशङ्क्यावतारयति—*ननु तेषामेवेति*॥ "सत्यमि"त्यनेन सर्वं व्याख्यातम्, "तेनापि चे"ति पुनरुक्तमित्याशङ्क्याह—*सामान्येनेति*॥ शेषं नेयम्॥

तत्त्वदीपनम्

सूत्रकृदादिवचनसामर्थ्यादेकदेशस्य विचारितत्वप्रतिपत्तेः कथं चोद्योऽस्त्वित्याशङ्क्याह—*ननु तेषामिति*॥ *तस्य=आम्नायस्य *कर्मावबोधनम्* नियोगज्ञापनम्, दृष्टं प्रयोजनमिति भाष्यार्थः। *तेषु=पदार्थेषु *भूतानाम्=वर्तमानानां पदानाम्, *कार्येण=वाक्यार्थेन* तत्प्रतिपत्त्यर्थत्वेन समाम्नाय इति सूत्रार्थः। नच—परस्परविरोधात् तद्वचनमप्रमाणमिति—शङ्क्यम्; उत्तरानुसारेण प्राचीनवचनान्तरस्य नयनसंभवादित्यर्थः। "सत्यमि"त्यत्रोपक्रमानुसारेणोत्तरस्य नयनमित्युक्तम्, तत् कस्मात्? विशेषाभावादित्याशङ्क्य तात्पर्यमाह—*सत्यमिति*॥ कार्यार्थत्वं दर्शितमित्युक्तमङ्गीकृतं चेत्, तर्हि कथमेकदेशविशेषगतत्वं विचारस्येत्याशङ्क्याह—*धर्मेति*॥ धर्मसूत्रं चोदनासूत्रं चेति धर्म-चोदनासूत्रे, तयोः प्रक्रमसामर्थ्यादित्यर्थः॥

"दृष्टो ही"ति ग्रन्थस्यैकदेशविषयत्वोक्तेः—"अपिचे"ति पुनरुक्तमित्याशङ्क्याह—*सामान्येति*॥ तत्र कृत्स्नवेदवाचकपदाभावादिति द्रष्टव्यम्। कथंशब्दसूचितामनुपपत्तिं दर्शयति—*नन्वाम्नायस्येति*॥ "अतिक्रमिष्याम इममाम्नायमि"त्यत्राम्नायस्य प्रकृतत्वात् तच्छब्देन तत्परामर्शः। कर्मावबोधनं दृष्टोऽर्थ इति विशेषणादर्थान्तरव्यावृत्तिर्लक्ष्यते। ततः कथं नार्थान्तरसद्भाव इत्युक्तमित्याशङ्क्याह—*न विनियोगेति*॥ कृत्स्नस्य वेदस्य न कर्मणि विनियोगपरत्वमित्यर्थः। यद्यप्यानर्थक्यशङ्कायामर्थमात्रप्रदर्शनमुचितम्; तथाऽपि 'धर्मजिज्ञासे'त्युपक्रमानुरोधेन कर्मावबोधनमित्युक्तम्, न तु सकलस्याम्नायस्य कर्मणि विनियोगाभिप्रायेणेत्यर्थः। *अतिक्रमिष्याम इति*॥ अधीत्य=अर्थं मीमांसित्वा, स्नायादिति कल्पयाम इत्यर्थः। अयोगान्ययोगव्यवच्छेदशब्दमस्पष्टत्वाद् व्याचष्टे—*अयोग-

पञ्चपादिका

नार्थान्तरासद्भावः। सोऽयमयोगव्यवच्छेदः, नान्ययोगव्यवच्छेदः। कर्मशब्देन धर्म एव कार्यत्वादभिहितः; यतस्तदवबोधप्रवृत्तो वेदस्यार्थवत्त्वं मृगयते—किं वेदस्यार्थो विद्यते? न वा? स च धर्मत्वेनावगन्तुं शक्यते? न वेति? तस्मान्न कर्मावबोधनमेव वेदार्थोऽभिप्रेतो भाष्यकृतः। यत्पुनः—"आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामि"ति, तत्र यद्यानर्थक्यमर्थाभावः, तदसत्; यत एवं भूतार्थमनुवदन्तीति दर्शितोऽर्थः। अथ निष्प्रयोजनत्वम्; स्वाध्यायाध्ययनविधिर्निष्प्रयोजनमक्षरमात्रमपि न ग्राहयतीति, भवतु "सोऽरोदीदि"त्यादीनाम्; अपुरुषार्थप्रतिपादकत्वात्, एकवाक्यत्वात् पृथक् कार्यकल्पनानुपपत्तेः, कल्पयितुं चाशक्यत्वात्। यानि पुनरपास्ताशेषाशिवमात्मानमनुभवपर्यन्तमवबोधयन्ति वाक्यानि, तान्यनवद्यप्रयोजनत्वाद् भवन्तितरामेव प्रयोजनवन्ति। अतः स्वयमपुरुषार्थत्वात्

पञ्चपादिकाविवरणम्

नन्तरमित्यादिना* ॥ अयोगव्यवच्छेद इति* ॥ वेदस्य कर्मावबोधेनासंबन्धं निराकृत्य संबन्धः प्रतिपाद्यत इति। *नान्ययोगव्यवच्छेद इति* ॥ वेदास्यार्थान्तरसंबन्धो नास्तीति नाभिधीयत इत्यर्थः। *ननु* कर्मशब्दः प्रमेयमात्रपरतया धर्म-ब्रह्मणोरविशिष्टः किं न स्यादिति? नेत्याह—*कर्मशब्देन चेति* ॥ क्रियायां विषयमात्रे च प्रसिद्धस्य शब्दस्य कुतः क्रियापरत्वमिति? प्रकरणादित्याह—*यतस्तदवबोध इति* ॥ तस्मादित्युपसंहारः। यत्पुनरित्युक्तानुवादः। आनर्थक्यशब्देनाभिधेयाभावः प्रयोजनाभावो वाऽभिधीयते? न तावदभिधेयाभाव इत्याह—*तत्र यद्यानर्थक्यमर्थाभाव इत्यादिना* ॥ अथेति निष्प्रयोजनत्वमनूद्य दूषणमाह—*भवतु सोऽरोदीदिति* ॥ *ननु* तेषामपि "पूषा प्रपिष्टभागः" इत्यादिसंसर्गेष्विव प्रयोजनं कल्प्यतामिति, नेत्याह—*एकवाक्यत्वादिति* ॥ *ननु* "अधस्तात् समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यः" इत्युपरिधारणस्य पूर्वेणैकवाक्यस्य विधानवत् सप्रयोजनो विधिः कल्प्यतामिति, नेत्याह—*कल्पयितुं चाशक्यत्वादिति* ॥ वेदान्तवाक्यान्यपि तर्हि प्रयोजनशून्यतया क्रियार्थानीति, नेत्याह—*यानि पुनरपास्ताशेषाशिवमिति* ॥ अतः सूत्रं क्रियाप्रकरणपठितवाक्यविषयमित्याह—*अतः स्वयमपुरुषार्थत्वादिति* ॥ क्रिया-

तत्त्वदीपनम्

व्यवच्छेद इत्यादिना* ॥ यद्यपि न निखिलस्याम्नायस्य धर्मे विनियोगपरं भाष्यम्; तथाऽपि धर्मवदेव ब्रह्मणोऽपि वेदार्थत्वोक्तेर्न पृथग् ब्रह्मविचार इत्याशयेनाशङ्कते—*ननु कर्मेति* ॥ कर्मशब्दस्योभयत्र प्रयोगेऽपि नात्र तद्विवक्षेत्याह—*नेत्याहेति* ॥ तत्र हेतुं पृच्छति—*क्रियायामिति* ॥ धर्मस्यात्र प्रकृतत्वात् स एवात्र निर्दिश्यत इत्याह—*प्रकरणादिति* ॥ आनर्थक्यमर्थाभाव इति तेनानुक्तत्वात् तन्निराकरणमनुचितमित्याशङ्क्य विकल्पपूर्वकं व्याचष्टे--*आनर्थक्येति* ॥ "अथे"त्यनेन द्वितीयं विकल्पमनूद्य "स्वाध्यायाध्यनविधिरि"त्यनेन तस्य निरसनमिति प्रतिभाति, तदर्थमाह—*अथेति* ॥ "अथे"त्यारभ्य "न ग्राहयती"त्यन्तोऽनुवादः। उत्तरेण दूषणमित्यर्थः। निष्प्रयोजनत्वमिष्टमिति शङ्कायामध्ययनविध्युपात्तत्वान्न तस्येष्टत्वमित्यभिप्रायेणोक्तम्—*स्वाध्यायेति* ॥ यद्यपि "सोऽरोदीदि"त्यादिवाक्ये पुरुषार्थसंसर्गो नोपलभ्यते; तथाऽपि स कल्प्यत इति शङ्कते—*ननु तेषामिति* ॥ वाक्यभेदप्रसङ्गाद् न पृथक् फलकल्पनमित्याह—*नेत्याहेति* ॥ वाक्यभेदोऽपि क्वचिद् दृष्ट इति शङ्कते—*नन्वधस्तादिति* ॥ उपरिधारणस्यापूर्वत्वात् पूर्वेणैकवाक्यताऽनुपपत्तेश्च तत्र वाक्यभेदकल्पनम्, न तथाऽत्र तत्कल्पकमस्तीत्याह—*नेत्याहेति* ॥ पुमर्थशून्यत्वात् "सोऽरोदीदि"त्यादिवाक्यानां क्रियार्थत्वं चेत्, तर्हि वेदान्तानामपि भूतार्थत्वात् फलशून्यत्वमिति शङ्कते—*वेदान्तेति* ॥ फलशून्यत्वमसिद्धमित्याह—*नेत्याहेति* ॥ वेदान्तानां सफलत्वमभिधाय, "अतः स्वयमि"त्यत्र फलवैधुर्याभिधाने विरोध इत्याशङ्क्याह—*अत इति* ॥ वेदान्तानां क्रियासंस्पर्शमन्तरेण फलवत्त्वसंभवोऽतःशब्दार्थः। केषांचिदेव क्रियाशेषत्वम्, न सर्वेषामित्येतत्प्रतिपादकत्वेनोदाहरणमनुपलब्धिविरुद्धमित्याशङ्क्याह—*क्रियेति* ॥ तद्विधान्ये-

पञ्चपादिका

तदर्थोपकारितया कथञ्चित् पुरुषार्थस्तावकत्वेन प्रयोजनवत्त्वमुक्तम्, न सर्वस्यैवाक्रियार्थत्वेनानर्थक्यमाशङ्क्य क्रियार्थत्वेनार्थवत्त्वमुक्तम्। तथाच तद्विधान्येव तत्र वाक्यान्युदाहृतानि ॥ यदपि केचित्—शास्त्रप्रस्थानमन्यथा वर्णयन्ति—न हि किलैवं शास्त्रं प्रस्थितम्—किं वेदलक्षणो धर्मः ? उत बुद्धवाक्यादिलक्षण इति ? किं तर्हि ? अधीतवेदस्य योऽर्थोऽवगतः, तत्रैव विप्रतिपत्तयः सन्ति–किमयमसौ ? उतायमिति ? तन्निराकरणार्थः शास्त्रारम्भः—*इति* ॥

पञ्चपादिकाविवरणम्

प्रकरणपठितानामेव प्रयोजनशून्यानां स्तावकत्वेन क्रियान्वयो दर्शितः, न वेदान्तानामित्यत्र लिङ्गमाह—*तथाच तद्विधान्येवेति* ॥ न वेदान्तवाक्यं किंचिदप्यर्थवादाधिकरणे क्रियाशेषत्वेनोदाहृतमस्तीत्यर्थः ॥

यदपि केचिदिति प्राभाकराणां शास्त्रारम्भप्रकारं दर्शयति। *अयमाशयः*—अध्ययनविधिर्हि विचारं विदधाति। स च स्वाध्यायस्य फलपर्यन्ततामाकाङ्क्षन् वेदार्थविचारमेव विदध्याद्, न धर्मविचारमिति। *ननु* सामान्यप्रतिपत्ति-विशेषविप्रतिपत्तिभ्यां जिज्ञासितोऽर्थो विचारमर्हति, न तथा वेदार्थ इति, तत्राह—किं तर्हि अधीतवेदस्येति* ॥ "उद्भिदा यजेत पशुकामः" इत्यत्र पशुकाममुद्दिश्य यागो विधीयते ? यागविधानं वोद्दिश्य पशुकामाधिकारः ? किं वोभयमिति ? तथा सत्रे यजमाना एवर्त्विजः, इति यजमानानुद्दिश्य ऋत्विग्भावो विधीयते ? किंवर्त्विज उद्दिश्य यजमानभावो विधीयते ? इत्यादिवचनव्यक्तिसंशयाद् विचार इति॥

"अथातो धर्मजिज्ञासा"। वेदार्थविचारो विषयः। स कर्तव्यो वा ? नवा ? इति विचारः। नेति तावत् प्राप्तम्; आलम्बनप्रमाणाभावात्। *ननु* आम्नायालम्बनो विचारः स्यात्, *न*; अध्यापनविधिशेष-

ऋजुविवरणम्

कथं प्रकारान्तरेण शास्त्रारम्भः संभवति; धर्मस्यैव जिज्ञासितत्वात्। नहि धर्मोपाधिं मुक्त्वाऽन्यद् विचारस्य प्रयोजकमप्यस्तीत्याशङ्क्याह—*अयमाशय इति*॥ यद्येवं वचनस्य व्यक्तिसन्देहाद् विचारारम्भः, तर्ह्येकदेशविचारः स्पष्ट एव, तेन नायमारम्भः पृथगुपन्यसनीयः, इत्याशङ्क्याह—*अथातो धर्मजिज्ञासेति*॥ यद्यपि वचनव्यक्तिसन्देहनिरासार्थः सकलशास्त्रारम्भः; तथाऽप्युपोद्घातत्वेन प्रारम्भः सर्ववेदार्थविषय इति दर्शयति—*वेदार्थविचारो विषय इति*॥ अध्ययने शब्दात् कस्यचिदप्यधिकारो नावगम्यते, अनन्यप्रयुक्तविषयाभावाच्च न कल्प्यः। तत्र प्रथमभावित्वात् प्रयोजकविध्यधिकारस्य तन्निष्पत्तिरध्ययनस्य प्रयोजनम्, तथा सत्यर्थावबोधप्रयोजनत्वाभावाद् नाध्ययनविधिविधेयो विचार इति वर्तमानप्राभाकराः। तत्र शेषत्वे पूर्वपक्षान्तर्गतत्वेनास्य पक्षस्य लाभात् चिरन्तनपक्षमेव दर्शयति—*अध्यापनविधिशेषतयेति*॥ यद्वा—इदानीन्तनैरपि राद्धान्तेऽपूर्वार्थत्वमङ्गीकृत्यार्थावबोधप्रयोजनत्वस्वीकारादनन्तरपूर्वपक्षान्तर्गतत्वेनापि स्वीकारादनुपन्यासः। *ननु*—न वेदाध्यापनविधिशेषत्वं संभवति; विनियोजका-

तत्त्वदीपनम्

वेत्येवकारार्थमाह—*न वेदान्तेति*॥ "केचिदि"त्यत्र केषां ग्रहणमिति वीक्षायामाह—*यदपि केचिदिति*॥ धर्मोपाधौ शास्त्रारम्भः पूर्वत्र निर्दिष्टः, ततोऽन्यथा शास्त्रारम्भेऽधर्मोपाधौ विचार इत्युक्तं स्यात्, स चानुपपन्नः, नच तत्र हेतूपन्यास इत्याशङ्क्याह—*अयमाशय इति*॥ सामान्यप्रतिपत्त्यादेर्वेदार्थेऽसंभवान्न तदुपाधौ विचार इति शङ्कते—*नन्विति*॥ असंभवोऽसिद्ध इत्याह—*तत्रेति*॥ वेदार्थविप्रतिपत्तिमभिनयति—*उदिति*॥

उद्देश्य-विधेयभावनिरूपणार्थ उपक्रम इत्यनुपपन्नम्; आद्ये सूत्रे तदनुपादानात्, इत्याशङ्क्य, सामान्येन वेदार्थस्य विचार्यत्वसिद्धौ तद्विशेषविचारोपपत्तिरित्याशयेन वेदार्थमात्रविचारं समर्थयते सूत्रकृदित्याह—*अथात इति*॥ आलम्बनप्रमाणभावाभावाभ्यां चिन्तेति द्रष्टव्यम्। पूर्वपक्षमाह—*नेतीति*॥ हेत्वसिद्धिं शङ्कते—*नन्वाम्नायेति*॥ तस्य विवक्षितार्थत्वसिद्धौ तद्विचारो युज्यते, तदेवासिद्धमित्याह—*नाध्यापनेति*॥ अध्यापन-

पञ्चपादिकाविवरणम्

तयाऽऽम्नायस्य स्वार्थविवक्षाऽभावात् । कथम् ? अध्ययनं तावदध्यापनविधिप्रयुक्तानुष्ठानत्वात् तच्छेषतामश्नुते । स्वाध्यायोऽप्यध्ययननिर्वृत्तिद्वारेणाध्यापननिर्वृत्तिपरो विषनिर्हरणादिवाक्यवन्न स्वार्थविवक्षामर्हतीति केचित् । अन्ये तु स्वाध्यायविधिवाक्ये तव्यप्रत्ययेनापूर्वस्य प्रतिपादनात् तदङ्गता तावत् स्वाध्यायस्याधिगता । तत्र विहिताध्ययनस्य प्रयोजकत्वादध्यापनविधेः प्रथमावगतामपूर्वाङ्गतामनपाकृत्यैवाध्ययनेनाध्यापनं निर्वर्त्यत इति । ततश्चापूर्वाङ्गत्वादविवक्षितार्थत्वाद् विचारानारम्भः प्राप्तः ॥

तत्रारम्भणीयो विचारः ; स्वाध्यायस्य विवक्षितार्थत्वात् । *ननु* अध्यापनविधिशेषः स्वाध्याय इत्युक्तम् , *न* ; प्रयुक्तिमात्रेणाङ्गत्वानुपपत्तेः । न ह्याधानमुत्तरक्रतुप्रयुक्तिमात्रात् तदङ्गं भवति । *ननु* लिङ्ग-संख्या-प्रयाजादयः क्रतुविधिप्रयुक्तानुष्ठानास्तदङ्गतामश्नुवते, *न* ; प्रकरणादिविनियोगप्रमाण-

ऋजुविवरणम्

भावात्, इत्याक्षिपति—*कथमिति*॥ अध्ययनस्याध्यापनविधिप्रयुक्तिप्रकार उत्तरग्रन्थे व्यक्त इति नेह प्रतन्यते । *स्वाध्यायोऽपीति* ॥ अध्ययनं नामोच्चारणम्, तच्चोच्चार्यमाणनिष्ठम् , अतस्तेन विनाऽनुपपत्तेस्तदाक्षिपति । अतोऽध्ययनप्रयोजको विधिः तदुपकारकमपि प्रयुङ्क्ते । प्रयुक्तस्य चाङ्गत्वाद् न विवक्षितार्थत्वमिति भावः । अत्र प्रयुक्तिमात्रादङ्गत्वं न संभवति ; अनङ्गस्याप्युपकारस्य प्रयुक्तिसंभवात् , अतो नाविवक्षितार्थत्वमस्मिन् पक्ष इति प्रकारान्तरमाहुः, तद् दर्शयति—*अन्ये त्विति* ॥ *ननु*—अध्ययनविधौ स्वाध्यायस्यापूर्वाङ्गत्वेऽप्यध्यापनविधिना प्रयुक्ततया अध्ययनस्यापूर्वार्थता व्यावर्तिता, अनिरुद्धकार्यस्य शेषित्वानिर्वाहात्, अतः स्वाध्यायस्यापि तद्द्वारा शेषत्वव्यावृत्तिरित्याशङ्क्याह—*तत्र विहिताध्ययनस्येति* ॥ यद्यपि प्रयोजकविध्यधिकारः प्रथमभावी ; तथाऽपि न तन्निष्पत्तिरध्ययनप्रयोजनम् ; अकर्तृगतत्वात् , कर्तृगतस्यैवैश्वर्यस्य कर्तृत्वोपपादकत्वात् । ऋत्विगादेरपीयमेवंविधा । नचाध्ययने कर्तुरन्यस्याधिकारः, येन साक्षात् कर्तृगतोऽधिकार ऋत्विजामिव न शास्त्रार्थः स्यात् । तच्च क्रियास्वभावजन्यं दृष्टम् ; अन्तरङ्गत्वादित्याह—*आरम्भणीय इति* ॥ कथं प्रयुक्तिमात्रादङ्गत्वानुपपत्तिरित्याशङ्क्य व्यभिचारं दर्शयति—*नह्याधानमिति* ॥ *ननु लिङ्गसंख्येति* ॥ न प्रयुक्तिरङ्गत्वव्यभिचारिणीति वक्तुं शक्यम् ; ग्राहकगृहीतपश्वेकत्वादेस्तत्साधनपश्वङ्गताऽभावप्रसङ्गात् । नच तृतीयाऽङ्गत्वं बोधयति । सा हि प्रातिपदिकार्थान्वितकरणत्वैकत्वे विवक्षति ; नतु करणत्वविशिष्टस्यैकत्वम्, एकत्वविशिष्टस्य वा करणत्वम्, येन

तत्त्वदीपनम्

विधिशेषत्वमसिद्धमित्याह—*कथमिति* ॥ "उपनयीत तमध्यापयीते"ति उपनयनाध्यापनयोरेकाधिकारत्वादुपनयनविधेश्च साधिकारत्वादध्यापनविधेरपि साधिकारत्वम् । अध्यापनस्य चाध्ययनमन्तरेणासंभवादध्ययनस्य तच्छेषत्वमित्याह—*अध्ययनमिति* ॥ तथाऽपि कथं स्वाध्यायस्य तच्छेषत्वम् ? तत्राह—*स्वाध्यायोऽपीति* ॥ अध्येतव्याभावेऽध्ययनासंभवात् स्वाध्यायस्याध्ययनविधिनिष्पत्तिद्वाराऽध्यापनविधिनिष्पत्तिपरत्वमित्यर्थः । तथाऽपि कथमर्थविवक्षाऽभावः ? इत्याशङ्क्याह—*विषेति* । अध्यापनविधिप्रयुक्तिमात्रादध्ययनस्य न तदङ्गत्वम् , न ह्याधानमुत्तरक्रतुप्रयुक्तिमात्रात् तदङ्गमित्याशङ्कायां तेषामेव पक्षान्तरमाह—*अन्ये त्विति*॥ "भूतं भव्यायोपदिश्यते" इति न्यायात् स्वाध्यायस्यापूर्वशेषत्वमित्यर्थः ॥ स्वाध्यायाध्ययनस्याध्यापनविधिनिर्वर्तकतया विनियुक्तत्वात् कथं तस्याध्ययनापूर्वशेषत्वम् ? तत्राह—*तत्र विहितेति* ॥ अध्यापनविधेरध्ययनमात्रप्रयोजकत्वेऽनुपनीताध्यापनमप्यापतेत् । तस्माद् विहिताध्ययनप्रयोजकत्वम् , इति स्वाध्यायस्याध्ययननियोगाङ्गत्वमित्यर्थः । सिद्धान्तमाह—*तत्रेति* ॥ स्वाध्यायस्य विवक्षितार्थत्वात् तदनुग्राहकविचारारम्भो युक्त इत्यर्थः । विवक्षितार्थत्वमसिद्धमित्युक्तं चोद्यं स्मारयति—*नन्वध्यापनेति* ॥ अध्यापनविधिप्रयुक्तानुष्ठानत्वादध्ययनस्य तदङ्गत्वमित्येतत्तावदयुक्तमित्याह—*न प्रयुक्तीति* ॥ प्रयोजकत्वमपि दृष्टमिति शङ्कते—*ननु लिङ्गेति* ॥ "पशुना यजेत" 'अरुणया क्रीणाती"ति लिङ्गम् ; "सप्तदश प्राजापत्यानि"त्यादौ संख्या । प्रोक्षणादिरादिशब्दार्थः । तत्रापि न तत्प्रयुक्तिमात्रमङ्गत्वप्रयोजकमित्याह—*न प्रकरणादीति* ॥

पञ्चपादिकाविवरणम्

सामर्थ्यादङ्गभावः, तदङ्गत्वाच्च तत्प्रयुक्तानुष्ठेयता। न तथेह विनियोगे प्रमाणमस्ति। न प्रयुक्तिमात्रादङ्गतेति विशेषः। अतः स्वातन्त्र्याद् विवक्षितार्थः स्वाध्याय इति। यत्त्वध्ययनापूर्वाङ्गतेति, तत्राप्यपूर्वस्य प्रयोजनाकाङ्क्षायां दृष्टे सत्यदृष्टकल्पनाऽनुपपत्तेः स्वाध्यायसामर्थ्यजन्यं प्रयोजनवद्विज्ञानं फलत्वेन कल्प्यते। *ननु* न नैयोगिकं तत्, किन्तु दृष्टसामर्थ्यजन्यं फलविज्ञानम्, *सत्यम्*; अनैयोगिकफलस्यैव विज्ञानस्यानुष्ठानाङ्गतयाऽपूर्वोपकारः कल्प्यते; अथवाऽर्थे तात्पर्यं विज्ञानस्य नैयोगिकफलत्वाधीनमिति कल्प्यते;

ऋजुविवरणम्

वाक्यादेवापूर्वसाधनावस्थक्रत्वन्वयिपशुवदपूर्वीयक्रतुकरणावस्थपश्वन्वयित्वेनैकत्वकरणत्वयोस्तदङ्गता स्यात्, विरम्यव्यापारानुपपत्तेः, प्रातिपदिकगतस्वार्थाभिधायकत्वेनानुशासनात्। नापि संख्यासामर्थ्यादप्यन्वयः; संख्यायाः संख्येयमात्रावच्छेदकत्वेन; न लिङ्गं साधनावस्थपश्वङ्गत्वे मानम्, तेन प्रायुक्तिकमेव शेषत्वम्, सुतरां प्रयाजादेः; अन्वयमात्रबोधस्याप्यभावात् संख्याविधेव, *मैवम्*; प्रयुक्तिर्हि विध्याक्षेपरूपमुपादानम्। तच्च न संख्याया अङ्गत्वे मानम्, किन्तु लिङ्ग-संख्ययोः स्वभावतः संख्येयावच्छेदकत्वात्। परतन्त्रस्य पराङ्गताधीः, किन्तु यदंशि स्वरूपम्, तस्य स्वरूपमात्रेणाङ्गित्वे सान्निध्यान्मानधीस्थग्राह्कसम्बन्धविरोधाद् ग्राहकीयपश्वन्वयित्वमङ्गित्वस्यौपादानिकमिति परिहरति—*न प्रकरणादिति*॥ प्रकरणात् प्रयाजादीनां विनियोगः। *तत्राप्यपूर्वस्येति*॥ न ह्यध्ययनविधावनुष्ठानाय नियोगाभिधानाय वा नियोज्यापेक्षाऽस्तीत्युक्तम्, तथाऽप्यश्रुते शेषिरूपाधिकारिण्यज्ञातपरार्थस्य विधेः कृत्युद्देश्यत्वासंभवात् कृतिप्राधान्यमेव न पर्यवस्यतीति तत्प्राधान्यपर्यवसानायाधिकारापेक्षा युक्ता। साध्यविशिष्टश्च पुरुषः कृत्युद्देश्यः, न साध्यं केवलम्, तेन तयोरेकैव कृतिप्रधानता। विधिश्च स्वसाधने कर्मणि कस्यचिदधिकारपर्यवसितः। स च यत्र नियोगपराच्छब्दात् प्रतीयते, तत्र फलान्तराभावेऽपि नियोगतः कर्मफलात् तन्निरूपणम्, यत्र तु शब्दात्, न तत्र फलान्तरेण तन्निरूपणं कार्यम्, न विधिमात्रतः। अतो विषयफलत एव निरूपणं युक्तमित्यर्थावबोधस्वीकार इति भावः। *ननु न नैयोगिकमिति*॥ नार्थावबोधस्य प्रयोजनत्वम्; नियोगसाध्यत्वाभावे नैकस्मिन् वाक्ये साध्यद्वयप्रसङ्गादिति भावः। *सत्यमनैयोगिकमिति*॥ नैकस्मिन् वाक्ये साध्यद्वयं प्रतीयते, अपि त्वर्थज्ञानमार्थिकमेवाधिकारिपर्यवसानोपयोगित्वेन विधानात् स्वीक्रियत इति भावः। इदानीं त्वदुपकारकत्वे न तत्फलत्वम्; व्यभिचारात्, इत्याशङ्क्य, कारकदशायामनुत्पत्तिमङ्गीकृत्य तज्जन्यत्वेनैव तत्फलत्वं दर्शयति—*अथवेति*॥ *ननु*—शब्दसामर्थ्यजन्यज्ञानस्य कथं नैयोगिकफलत्वम्? कल्पकाभावादित्याशङ्क्याह—*अर्थे तात्पर्यमिति*॥ अत एव शूद्राणां नैयोगिकफलस्य ज्ञानस्याङ्गभूतस्याभावात् कर्मानधिकारः; अन्यथा ज्ञानमात्रस्य तेषामपि संभवाद् भवेदेव कर्माधिकारः। यद्वा—"सत्यम्; नैयोगिके"ति पाठः। सत्यमित्यर्धाङ्गीकारः। सामर्थ्यजन्यस्यापि नैयोगिकफलत्वम्; नैयोगिकफलस्यैव ज्ञानस्यानुष्ठानद्वाराऽपूर्वोपकारकत्वादपूर्वोपकारकत्वान्यथानुपपत्त्याऽपूर्वफलत्वं कल्प्यते। नैयोगिकफलस्यैव ज्ञानस्यानुष्ठानाङ्गत्वे सिद्धे नैयोगिकफलत्वकल्पना, तदेवासिद्धमित्याशङ्क्यावतारयति—*अथवाऽर्थ इति*॥ सोऽयं मध्येऽधिकारः, स चार्थावबोधो नाध्ययनमात्रात्, इति तदितिकर्तव्यताभूतं विचारमध्ययनविधिरेव

तत्त्वदीपनम्

दुस्थ्यादिवत् प्रयुक्तिमात्रमपि प्रयोजकमिति न शङ्क्यम्, निरस्तत्वादित्याह—*नचेति*॥ मतान्तरमनूद्य निरस्यति—*यत्त्विति*॥ अपूर्वस्य स्वरूपेणापुरुषार्थत्वात् पुरुषार्थपर्यवसायित्वं वक्तव्यम्। नच दृष्टे फले संभवत्यदृष्टकल्पना युक्तेत्यर्थावबोधः फलमित्यर्थः॥ अर्थावबोधस्य न विधिफलत्वम्, अन्वय-व्यतिरेकसिद्धत्वादिति शङ्कते—*नन्विति*॥ अन्वय-व्यतिरेकाभ्यां स्वाध्यायस्य पदार्थावबोधजननसामर्थ्यं दृष्टम्, तज्जन्यमित्यर्थः। दृष्टसामर्थ्यजन्यमित्येतदङ्गीकरोति—*सत्यमिति*॥ न तर्हि विधिफलत्वमित्यत्राह—*नैयोगिकेति*॥ साङ्गाध्ययनसंस्कृतस्वाध्यायसमुत्थं यद् ज्ञानम्, तदेवापूर्वोपकारि; अन्यथा विधिवैयर्थ्यं स्यादित्यर्थः। लोके विवक्षायामानादेस्तात्पर्यनिमित्तत्वं समधिगतम्, तस्या वेदेऽनुपपत्तेः साङ्गाध्ययननियोगाधीनं तात्पर्यकल्पनमित्याह—*अथवेति*॥

पञ्चपादिका

तत्रापि न निखिलवेदार्थविचारप्रतीतिः । तत्कथम् ? तथा सति 'अथातो वेदार्थजिज्ञासे'ति स्यात् ; यतो न धर्म इति कृत्वा विचारः, किन्तु वेदार्थ इति, *सत्यम्*—तथाऽपि शास्त्रकाराणां

पञ्चपादिकाविवरणम्

लौकिकतात्पर्यनिमित्तविवक्षाद्यभावात्। तदेवं विवक्षितार्थत्वात् शास्त्रमारम्भणीयमिति।। तत्र वेदार्थविचारारम्भेऽपि न वेदान्तानां गतार्थत्वमिति परिहरति—*तत्रापि न निखिलवेदार्थेति* ।। वेदार्थोपाधिविचारेऽपि धर्मग्रहणसामर्थ्यात् तदेकदेशो विचारित इति भावः । *ननु* कृत्स्नाध्ययनविधिप्रयुक्तो विचारः कथमेकदेशविषयः स्यादिति चोदयति—*तत्कथमिति* ।। परिहरति—*तथा सत्यथात इति* ।।

प्रतिवाक्याध्ययनविचारं विधिव्यापारभेदात् प्रयोजनभेदवशादेकदेशविचारेऽपि न विधिप्रयोज्यत्वविरोधः ; यथा चक्षुषा रूपं पश्येदिति विधिप्रयुक्त्या रूपैकदेशनीलदर्शनेऽपि तत्प्रयुक्तिर्न विरुध्यते, तद्वदित्यर्थः । अन्यथा विध्यनुसारेण कृत्स्नवेदार्थविचारविवक्षायां धर्मग्रहणं न स्यादित्याह—*यतो न धर्म इति कृत्वेति* ।। धर्मग्रहणस्य न वेदार्थैकदेशविचारपर्युदासः प्रयोजनम्, किंतु वेदार्थस्य पुरुषार्थतासिद्धिः प्रयोजनमिति शङ्कते—

ऋजुविवरणम्

प्रमितिसिध्यर्थमाक्षिपतीत्याह—*तदेवमिति*॥ कथं निखिलवेदार्थविचारप्रतिपत्त्यभावः ? वेदार्थोपाधौ विचारस्य प्रवृत्तत्वादित्याशङ्क्याभिप्रायमाह—*वेदार्थोपाधीति* ॥ *ननु कृत्स्नाध्ययनविधीति* ॥ कृत्स्नस्य वेदस्य विचारप्रयोजको विधिः कृत्स्नाध्ययनविधिः ; तत्प्रयुक्त इत्यर्थः । अध्ययनविधिव्यापारो विचारश्चैक एवेति तत्प्रयुक्तो विचारः सर्वविषयः स्यादिति भावः । यद्यपि वेदार्थग्रहणं न कृतं सूत्रकृता ; तथाऽपि विधिसामर्थ्यात् सर्ववेदार्थविचारस्तावत्प्रतीयते, धर्मग्रहणस्य विवक्षान्तरमपि वक्तुं शक्यत एव ; अतो नैकदेशस्य विचारसिद्धिरित्याशङ्क्याह—*प्रतिवाक्याध्ययनमिति* ॥ *ननु*—विधिस्वारस्यात् प्राप्तं सर्वविषयत्वं परित्यज्य कथमेकदेशविषयत्वं विचारस्येत्याशङ्क्याह—*अन्यथा विध्यनुसारेणेति* ॥ "धर्म इत्येव कृत्वे"त्यसम्बद्धम् ; वेदार्थस्य सन्दिग्धत्वाद् धर्मशब्दप्रयोगसामर्थ्यात् पुरुषार्थलाभाच्च

तत्त्वदीपनम्

तत्रेत्यस्यार्थमाह—*तत्र वेदार्थेति* ॥ वेदार्थोपाधौ विचारस्य प्रवृत्तत्वात् कथं न निखिलप्रतीतिरित्युक्तम् ? इत्याशङ्क्याह—*वेदार्थेति* ॥ वेदार्थमात्रस्य विचार्यत्वे धर्मग्रहणानुपपत्तिरित्यर्थः कथंशब्दसूचितामनुपपत्तिं दर्शयति—*ननु कृत्स्नेति* ॥ विचारस्यैकदेशविषयत्वे कृत्स्नाध्ययनविधिप्रयुक्त्यनुपपत्तिरित्यर्थः ॥

'नैवमि'त्यादिपरिहारसूचकाभावादेकग्रन्थत्वशङ्कां निरस्यति—*परिहरतीति* ॥ किं विचारस्य कृत्स्नाध्ययनविधिप्रयुक्तत्वात् सकलवेदार्थविषयत्वं विवक्षितम् ? अथवैकदेशविषयत्वे कृत्स्नाध्ययनविधिप्रयुक्त्यनुपपत्तिः ? तत्राद्ये दूषणं टीकायामभिधाय द्वितीयं दूषयति—*प्रतिवाक्येति* ॥ वाक्याध्ययनं वाक्याध्ययनं प्रति, तथा वाक्यविचारं वाक्यविचारं प्रति चेत्यर्थः । अध्ययनविधेः सकलवेदसाधारण्येऽपि केषांचिद्वाक्यानामध्ययन इतिकर्तव्यभेदापेक्षणाद् विधिव्यापारभेदः ; तथाच मुमुक्षूणामल्पत्वाद्भोगार्थिनां च बहुलत्वात् तदभिलषितस्वर्गाद्यनुरोधेन तद्वाक्यविचार आक्षिप्यते, न कृत्स्नवेदविचारः ; सर्वेषां वेदान्तार्थजिज्ञासाभावादित्यर्थः । तत्र दृष्टान्तमाह—*यथेति* ॥ "तथा सती"त्यनेन हेतोरुक्तत्वात्—"यतः" इत्यादेर्वैयर्थ्यमित्याशङ्क्य, अस्मिन् कल्पे न केवलमश्रुतकल्पना, श्रुतत्यागोऽपीत्याह—*अन्यथेति* ॥

'धर्मजिज्ञासे'ति धर्मग्रहणादेकदेशविचारपर्युदासः, इतरथा वेदार्थजिज्ञासेति स्यादित्युक्ते "सत्यमि"ति तदङ्गीकारः पूर्वपक्षिण आभाति, तथाच न विप्रतिपत्तिरित्याशङ्क्याभिप्रायं दर्शयति—*धर्मेति* ॥ तर्हि धर्मग्रहणमनुपपन्नमिति शङ्कते—*किंत्विति* ॥ प्रयोजनवशाद् ग्रहणमित्याह—*वेदेति* ॥ धर्मोपाधौ न विचारप्रवृत्तिरित्येतावन्मात्रं सत्यशब्देनाङ्गीक्रियते ; धर्मशब्देन वेदार्थस्य विवक्षितत्वात् तस्यापि विचारयोग्यतया वेदार्थोपाधौ विचारस्य युक्तत्वात्,

पञ्चपादिका

पुरुषार्थसिद्ध्यर्थं शास्त्रप्रणयनम्, ततश्च पुरुषार्थकथनार्थं धर्मग्रहणमिति। एवं तर्हि धर्म इत्येव कृत्वा विचारो भवतु ; तस्य पुरुषार्थत्वात्संदिग्धत्वाच्च। तथा चोत्तरमपि सूत्रमनुगुणं भवति—"चोदनालक्षणोऽर्थो धर्मः" इति धर्मस्वरूपविप्रतिपत्तिनिरासपरम् ; इतरथा वेदार्थविप्रतिपत्तौ तन्निरासार्थं

पञ्चपादिकाविवरणम्

सत्यम् ; तथापि शास्त्रकाराणामिति ॥ परिहरति—*एवं तर्हीति* ॥ धर्मशब्दस्य हि वेदार्थे प्रयोगनिमित्तं वक्तव्यम्, न तावद् रूढिः ; चैत्यवन्दनादावपि प्रयोगविप्रतिपत्तेः। अथान्वय-व्यतिरेकसिद्धः श्रेयःसाधनाभिधायी धर्मशब्दः, तथाभूतत्वाद्वेदार्थस्यापि धर्मशब्दस्तत्र प्रवर्तत इति, एवं तर्हि स्वाध्यायपाठादेव ब्रह्मणः प्रतीयमानस्य धर्मशब्दाभिधेयत्वाभावात् श्रेयोरूपत्वात् तस्यार्थात् पर्युदस्तत्वाद् धर्म इत्येवं कृत्वा विचारो युक्तः ; अन्यथाऽऽपातप्रतिपन्नधर्म ब्रह्मसंग्रहज्ञापनाय वेदार्थजिज्ञासेति वक्तव्यमिति भावः। नह्यनुष्ठेयश्रेयोरूपमपि ब्रह्मपदान्वयमात्रादेव विचारात्प्राङ् न प्रतीयत इति शक्यं वक्तुम्। लक्षणसूत्रमपि धर्मविषयम्, न वेदार्थविषयमित्याह—*तथाचोत्तरमपीति* ॥ लक्षणं हि लक्ष्यस्यान्यप्रसङ्गविभ्रमनिरासपरम्। तत्र च धर्म एव चैत्यवन्दनादौ प्रसक्ततया विप्रतिपन्नः, न वेदार्थः। अतो लक्षणस्य कृतार्थत्वाय धर्म एव लक्ष्यत इत्याह—*धर्मस्वरूपविप्रतिपत्तिनिरासपरमिति* ॥ *ननु* वेदार्थेऽपि विप्रतिपत्तयः सन्ति—किमर्थवादलक्षणो वेदार्थः, किं वा चोदनालक्षणः ? इति ; तन्निरासाय लक्षणमुच्यत इति, तत्राह—*इतरथा वेदार्थविप्रतिपत्ताविति* ॥ मन्त्रादिषु कार्यस्याप्रतीतेर्येन यत्प्रतीयते, स तस्यार्थ इति नियमान्नैवं विप्रतिपत्तिरिति भावः। *ननु* धर्म-

ऋजुविवरणम्

तस्यैव जिज्ञास्यत्वोपपत्तेरित्याशङ्क्याभिप्रायमाह—*धर्मशब्दस्य हीति* ॥ कथं ब्रह्मणो धर्मरूपत्वाभावः ? इत्याशङ्क्याह—*श्रेयोरूपत्वादिति* ॥ *ननु*—विचारात्प्राग् ब्रह्म न प्रतीयते, धर्मवत्, कथं तत्संग्रहणाय वेदार्थग्रहणमापद्येतेत्याशङ्क्याह—*नह्यनुष्ठेयेति* ॥ *ननु*—धर्मग्रहणसामर्थ्याद् वेदार्थग्रहणाभावात् तन्निरासपरत्वं निराकर्तुं शक्यते, सिध्येद् लक्षणस्योपयोगस्तावत् ; अस्मिन्नपि पक्षे धर्मग्रहणस्य प्रकारान्तरेणाप्युपयोगस्य वक्तुं शक्यत्वात्, इत्याशङ्क्याभिप्रायमाह—*मन्त्रादिष्विति* ॥ *ननु*—वेदार्थग्रहणाभावाद् वेदार्थविप्रतिपत्तिनिराकरणाभाव इत्यसंबद्धम् ; पूर्वसूत्रेण विशेषाभावप्रसङ्गात्, पूर्वसूत्रे हि वेदार्थग्रहणाभावाद्धर्मग्रहणे सत्येव प्राधान्येनोक्तम्, अत्र लक्षणानुपपत्तिर्दर्शनीया, सा च नोक्ता ; धर्मग्रहणस्य न वेदार्थविप्रतिपत्तिनिरासेऽपि कथंचित् प्रयोगो वक्तुं शक्यत इत्येतन्मनसि निधायाऽभिप्रायमाह—*मन्त्रादिष्विति* ॥ "यतो न धर्मग्रहणे" इत्यसम्बद्धम् ; धर्मस्यैव वेदार्थत्वात्

तत्त्वदीपनम्

ततः परिहारस्याभासत्वमाशङ्क्याह—*परिहरतीति* ॥ सम्यक्परिहारमेवाह—*धर्मशब्दस्येति* ॥ धर्मशब्दः किं वेदार्थे रूढ्या वर्तते ? आहो गुणयोगेन ? नाद्य इत्याह—*न तावदिति* ॥ अविप्रतिपन्नप्रयोगस्य रूढित्वादत्र च प्रयोगविप्रतिपत्तेर्न वेदार्थे रूढत्वमित्यर्थः। द्वितीयमनुवदति—*अथान्वयेति* ॥

"वेदार्थोपाधौ विचारः" इति वदता किमभिसंहितम् ? किं तदर्थब्रह्मपर्युदासः ? उत संग्रहः ? इति। श्रेयःसाधनं धर्मशब्दार्थः, ब्रह्म च श्रेयः, इति न धर्मशब्दवाच्यत्वमित्यर्थः। न द्वितीय इत्याह—*अन्यथेति* ॥ ब्रह्मण आपातप्रसिद्धिरसिद्धेत्याशङ्क्याह—*न ह्यनुष्ठेयेति* ॥ अनुभवविरोधादित्यर्थः। धर्मग्रहणसामर्थ्याद् विचारस्यैकदेशविषयत्वं पूर्वत्रोक्तम्, "तथाचे"त्यत्रापि तदेवोच्यते, इति पौनरुक्त्यमित्याशङ्क्याह—*लक्षणेति* ॥ वेदार्थजिज्ञासोपक्रमे तस्यैव लक्षणं वक्तव्यम्, नान्यस्येत्यर्थः। वेदार्थविषयमेव लक्षणाभिधानमिति शङ्कां निरस्यति—*लक्षणं हीति* ॥ वेदार्थेऽपि विप्रतिपत्तेः संभवात् तन्निराकरणार्थं लक्षणाभिधानं युक्तमिति शङ्कते—*ननु वेदेति* ॥ अस्मिन्पक्षे सूत्रमननुगुणं स्यादित्याह—*तत्राहेति* ॥

किंच "किमर्थवादलक्षणः" इत्यत्र कार्यरूपे वेदार्थे विप्रतिपत्तिरभिसंहिता ? उत ब्रह्मरूपे ? अथवोभयरूपे ? नाद्य इत्याह—*मन्त्रादिष्विति* ॥ नेतरः ; विधेर्मन्त्रादेश्च तदप्रतिपत्तेरित्यभिसन्धिः। धर्मशब्देन वेदार्थस्य विवक्षितत्वाद्

पञ्चपादिका

'चोदनालक्षणो वेदार्थः' इति स्यात्, यतो न धर्मग्रहणे सति वेदार्थविप्रतिपत्तिः शक्या निराकर्तुम्। कथम्? यत्तावत् चोदनालक्षणो योऽर्थः, स धर्म इति धर्मत्वं ज्ञाप्येत, तदा स एव वेदार्थो नान्य इति न लभ्यते। *अथ* पुनः स धर्म इति नाम-नामिसम्बन्धो विधीयते, *तदप्रक्रान्तम्*; निष्प्रयोजनम्, अतिप्रसङ्गश्चापद्येत॥

पञ्चपादिकाविवरणम्

ग्रहणेऽप्यर्थवादलक्षणत्वं निराकृत्य चोदनालक्षणत्वं वेदार्थस्य किन्न सिध्यतीति? अत आह—*यतो न धर्मग्रहणे सतीति*॥ वेदार्थविप्रतिपत्तिनिराकरणप्रतिभासाभावाद् धर्मविप्रतिपत्तिनिरासप्रतिभासादप्रतिपन्नवेदार्थविप्रतिपत्ति-निरासग्रहणायोगादित्यर्थः। *अथ* धर्मशब्दस्य वेदार्थे प्रयोगात् तद्विप्रतिपत्तिनिरास एव विवक्ष्यतामिति चोदयति—*कथमिति*॥ तत्र न तावद् रूढिमाश्रित्य धर्मशब्दस्य वेदार्थे प्रयोग इत्युक्तम्। नापि लक्षणया; अभिधेयादन्यस्य लक्ष्यत्वेन वेदार्थस्याधर्मत्वप्रसङ्गात्। इदानीं स्वार्थप्रक्षेपेण वा तत्र प्रवृत्तिः? शब्दमात्रस्य वा संज्ञा-संज्ञिसम्बन्धपरतयोपयोग इति शिष्यते? तत्र न तावत् स्वार्थप्रक्षेपेणेत्याह—*यत्तावच्चोदनालक्षणो योऽर्थ इति*॥ चोदनालक्षणस्य धर्मत्वेऽभिधीयमाने धर्मस्य वा चोदनालक्षणत्वे, वेदार्थस्त्वेतावानिति न निर्णीतं भवति; चोदना-धर्मशब्दयोर्वेद-तदर्थाभिधायित्वाभावात्; यथा यच्चाक्षुषं तद्रूपमित्युक्ते न सर्वस्य प्रत्यक्षस्य रूपमर्थ इत्युक्तं भवति, तद्वदिति भावः। चोदनालक्षणे धर्मसंज्ञाविधिपरत्वं सूत्रस्य निराकरोति—*अथ पुन-

ऋजुविवरणम्

धर्मस्य चोदनालक्षणत्वे वेदार्थे तद्विप्रतिपत्तिनिरासासिद्धिः। "न शक्या निराकर्तुमि"त्यसंबद्धमि"त्याशङ्क्य व्याचष्टे—*वेदार्थविप्रतिपत्तिनिराकरणेति*॥ *ग्रहणायोगात्=स्वीकारायोगादित्यर्थः। प्रकारान्तरेणापि धर्मशब्दस्य प्रयोगसंभवात् कथं टीकाकारेण पक्षद्वयमेव जघन्यं निराक्रियते? इत्याशङ्क्य पारिशेष्यादित्यभिप्रायमाह—*न तावद्रूढिमिति*॥ "यत्तावदि"त्यनेन यो धर्मः, स चोदनालक्षण इति वचनव्यक्त्यभावात्, "अप्रतिषिद्धमनुमतमि"ति न्यायेन स्वीकार-शङ्का स्यात्, तथा वेदार्थस्यैतावत्त्वं न लभ्यत इत्युक्तम्, नतु युक्तिरभिहिता; अतस्तत्राभिप्रेतां

तत्त्वदीपनम्

विप्रतिपत्तिनिरासः संभवतीत्याशयेन शङ्कते—*ननु धर्मेति*॥ आशयानवबोधेनोत्तरमाह—*अत आहेति*॥ टीकाऽपेक्षितं हेतुमाह—*वेदार्थेति*॥ अप्रतिपन्नस्य वेदार्थविप्रतिपत्तिनिरासस्य ग्रहणं स्वीकारः, तस्यायोगादिति विग्रहः। पूर्ववादी स्वाशयमुद्घाटयति—*अथ धर्मशब्दस्येति*॥

टीकायां लक्षणा-रूढिनिरासाभावात् ताभ्यां धर्मशब्दस्य वेदार्थे प्रवृत्तिशङ्कां निरस्यति—*तत्र न तावदिति*॥ विप्रतिपन्नप्रयोगत्वादित्यर्थः। लक्षणापक्षं दूषयति—*नापीति*॥ लक्षणाशब्देन किं जहल्लक्षणा विवक्षिता? उताजहल्लक्षणा? नाद्य इत्याह—*अभिधेयादिति*॥ गङ्गापदलक्ष्यस्य तीरस्य गङ्गात्वाभाववज्जहल्लक्षणायां धर्म-पदेन लक्ष्यमाणस्य वेदार्थस्य धर्मत्वं हीयेतेत्यर्थः। तस्मात् पक्षान्तरं परिशिष्यत इत्याह—*इदानीमिति*॥ *स्वार्थ-प्रक्षेपेण=अजहल्लक्षणयेत्यर्थः। *संज्ञेति*॥ डित्थादिशब्दविशेषो यथाऽर्थविशेषे संकेतितः, तद्वद्धर्मशब्दोऽपि वेदार्थे संकेतित इत्यर्थः। तत्राद्यं दूषयति—*तत्र न तावदिति*॥ *यत्तावदिति*॥ यदि तावदित्यर्थः। अजहल्लक्षणया धर्मशब्दस्य वेदार्थे प्रवृत्तौ तदियत्ता न सिध्यतीत्युक्तम्, तत्र हेतुमाह—*चोदनालक्षणस्येति*॥ चोदनाशब्दस्य वेदैकदेशवाचित्वाद् धर्मशब्दस्य च श्रेयःसाधनवाचित्वाद् न वेदार्थेयत्तासिद्धिरित्यर्थः॥

"अथ पुनरि"त्यत्र कस्य नामत्वम्? कस्य वा नामित्वं विवक्षितमिति विवक्षायामभिप्रायमाह—*चोदनेति*॥ धर्मस्य विचारोपक्रमविरुद्धं नाम-नामिसंबन्धप्रतिपादनमित्याह—*तदप्रक्रान्तमिति*॥ अनुपक्रान्तत्वेऽप्यनन्यथा-सिद्धफलभावे तदभिधानं युज्यते, नच तदस्तीत्याह—*निष्प्रयोजनमिति*॥ एतादृशस्यापि प्रतिपादन इदं प्रतिपाद्यं नेदमिति नियमो न स्यादित्याह—*अतिप्रसङ्ग इति*॥ धर्मशब्दस्य वेदार्थवाचकताया निरस्तत्वाद् वेदार्थ एव

पञ्चपादिकाविवरणम्

रित्यादिना* ॥ अङ्गीकृत्य दूषणमाह—*अथापि कथञ्चिदिति* ॥ *अयं भावः*—*चोदनालक्षणस्य वेदार्थत्वेऽर्थशब्दस्य वैयर्थ्यं स्यात्; श्येनादीनामपि चोदनालक्षणत्वाद् वेदार्थत्वाच्च तद्व्यावृत्त्यनुपपत्तेः, अचोदनालक्षणत्वेऽवेदार्थत्वे च ताभ्यामेव श्येनादिनिवृत्तेरर्थशब्दस्य वैयर्थ्यं स्यात्, लक्षणवाक्येऽनुवादमात्रानुपपत्तेश्च। प्रमाणप्रतिज्ञायामप्यर्थशब्दस्य वैयर्थ्यं स्यात्, धर्मविचारपक्षे श्येनादेः प्रतिषेधचोदनाविषयस्यानर्थत्वेनाधर्मत्वसिद्धिः प्रयोजनमिति। तथा चोदनाशब्दोऽपि कृत्स्नवेदलक्षणापरो वक्तव्यः। कथम्? चोदनाव्यतिरिक्तोऽपि वेदभागोऽस्ति वा? न वा? नास्ति चेत्, चोदनालक्षणोऽर्थश्चोदनार्थ इति लक्ष्य-लक्षणयोरैक्यमेव स्यात्। अस्ति चेत्, सोऽप्यर्थवान् वेदभागः? निरर्थको वा? अर्थवांश्चेत्, कथं चोदनाप्रमेयोऽचोदनाभागस्यार्थः स्यात्? अर्थशून्यश्चेत् चोदनाव्यतिरिक्तो वेदभागः, कथं तर्हि चोदनार्थोऽर्थानर्थवद्भागद्वयसमुदायवेदार्थः स्यात्। तस्माच्चोदनाशब्दः कृत्स्नवेदलक्षणापर इति। चोदनालक्षणो वेदार्थ इति वाक्ये शब्दद्वयदूषण-

ऋजुप्रकाशिका

युक्तिं दर्शयति—*चोदनालक्षणस्येति* ॥ रूपम् = विषय इत्यर्थः। *ननु*—धर्मशब्दवाच्यत्वमङ्गीकृत्य दूषणं वक्तुं प्रारभ्य "कथञ्चिदि"ति न युक्तं वक्तुम्; उक्तदूषणस्याङ्गीकृतत्वात्, तदभिप्रायेणापरितोषानुपपत्तेः, नच वेदार्थस्य धर्मशब्दवाच्यत्वेऽन्यद् दूषणमस्ति; अतः कथञ्चिदिति वक्तुं न युक्तमित्याशङ्क्याभिप्रायमाह—*अयं भाव इति* ॥ *ननु* अर्थशब्दः श्येनादिव्यावृत्त्यर्थो भवति, कथं वैयर्थ्यमित्याशङ्क्याह—*श्येनादीनामपीति* ॥ अत्र चोदनालक्षणत्वसामर्थ्यात् प्राप्तमर्थवत्त्वमर्थशब्दोऽनुवदतीत्याशङ्क्याभिप्रायमाह—*लक्षणवाक्य इति* ॥ मा भूल्लक्षणपरत्वं शब्दस्य, प्रमाणप्रतिज्ञैवानेन क्रियतामित्याशङ्क्याह—*प्रमाणप्रतिज्ञायामपीति* ॥ धर्मविचारपक्षेऽप्यर्थशब्दवैयर्थ्यमित्याशङ्क्याह—*धर्मविचारपक्ष इति* ॥ *ननु* न चोदनाशब्दस्य कृत्स्नवेदलक्षणापरत्वम्, स्वार्थमात्रपरत्वेऽपि लक्षणं संभवेत्, अतोऽनुपपत्त्यभावान्न लक्षणेत्याक्षिपति—*कथमिति* ॥ कथं चोदनाप्रमेय इति*॥ यश्चोदनाप्रमेयः, स वेदार्थ इति वचनव्यक्तौ, सकलवेदबोध्यत्वं विधेयम्। तत्रैवं योजना—चोदनाप्रमेय इतरभागस्य कथमर्थः स्यादिति? विरोधात्। अथ यो वेदार्थः, स चोदनालक्षण इति, तत्राप्यनुपपत्तिरनेनैवोच्यते—चोदनाव्यतिरिक्तवेदभागस्यार्थश्चोदनाप्रमेयः कथं स्यादिति? *कथं तर्हीति* ॥ वेदस्य भागद्वयम्,—अर्थवान् चोदनाभागः, अपरश्चार्थशून्यः। तत्र पूर्ववदेव योजना—यदा चोदनार्थोऽनूद्यः, तदा चोदनाया अर्थोऽर्थानर्थवद्भागद्वयस्य वेदस्य कथमर्थः स्यात्?

तत्त्वदीपनम्

चोद्यत इति कथमुक्तमित्याशङ्क्य, अङ्गीकारवादत्वान्न विरोध इत्याह—*अङ्गीकृत्येति* ॥ धर्मशब्दस्य वेदार्थवाचकत्वमङ्गीकृतं चेत्, तर्हि "कथंचिदिति" व्यर्थमित्याशङ्क्य तात्पर्यमाह—*अयं भाव इति* ॥ श्येनादिव्यावृत्त्यर्थमर्थपदमित्याशङ्क्य, श्येनादीनां चोदनालक्षणत्वं वेदार्थत्वं चास्ति? उत न? इति? विकल्प्याद्यं दूषयति—*श्येनादीनामिति* ॥ द्वितीयं दूषयति—*अचोदनेति* ॥ ताभ्यां सिद्धोऽप्यर्थोऽनूद्यतेऽर्थशब्देनेत्याशङ्क्याह—*लक्षणेति* ॥ द्वितीयसूत्रं लक्षणपरमिति पक्षेऽर्थशब्दवैयर्थ्यमभिधाय प्रमाणपरत्वपक्षेऽपि तद् दर्शयति—*प्रमाणेति* ॥ धर्मोपाधौ विचारप्रतिज्ञायां कथमर्थशब्दोऽर्थवान्? इत्याशङ्क्याह—*धर्मेति* ॥ एवं गुरुमतेऽर्थशब्दवैयर्थ्यमभिधाय दोषान्तरं समुच्चिनोति—*तथेति* ॥ चोदनाशब्देन कृत्स्नवेदलक्षणायां को हेतुरिति शङ्कते—*कथमिति* ॥ *लक्ष्यलक्षणयोरैक्यमिति* ॥ अस्यायमर्थः—धर्मशब्दाभिहितवेदार्थशब्देन चोदनालक्षणोऽर्थो निर्दिश्यते, "चोदनालक्षणः" इत्यत्रापि स एव निर्दिश्यते, इति लक्ष्य-लक्षणयोरैक्यं स्यादिति। आद्यमनुवदति—*अस्ति चेदिति* ॥ विकल्पासहत्वान्नायमपि साधुरित्याह—*सोऽपीति* ॥ आद्ये चोदनाभागप्रमेयस्य चोदनाप्रमेयत्वं व्याहन्येतेत्याह—*अर्थवानिति* ॥ द्वितीयेऽपि व्याघात इत्याह—*अर्थशून्य इत्यादिना* ॥ अर्थानर्थवदिति* ॥ सविषयनिर्विषयरूपवाक्यद्वयसमुदायरूपवेदार्थ इत्यर्थः। फलितं दर्शयति—*तस्मादिति* ॥ *शब्दद्वयेति*। अर्थशब्दवैयर्थ्यं चोदनाशब्दस्य स्वार्थपरित्यागश्चेति दूषणद्वयमित्यर्थः ॥

पञ्चपादिका

अथापि कथंचिद् धर्मशब्देन वेदार्थ एवोच्यत इति कल्प्येत, तथा सति चोदनालक्षणो वेदार्थो नार्थवादादिलक्षणः, इति सिद्धप्रामाण्यवेदार्थविचारोऽयं स्यात्, उत्तरलक्षणवत्। तत्रानन्तरं प्रामाण्यप्रतिपादनं न युज्येत ॥

पञ्चपादिकाविवरणम्

मभिप्रेत्य—*अथापि कथंचिदित्युक्तम्* ॥ तथा सति वेदस्य प्रामाण्यादर्थवत्त्वनिश्चये विचारात् प्रागेव संजाते किं वेदार्थश्चोदनालक्षणः? किं वाऽर्थवादादिलक्षणः? इति विशये, नार्थवादादिलक्षणः, किन्तु चोदनालक्षणो वेदार्थ इति निर्णयपरं सूत्रं स्यात्, तच्चानुपपन्नम्; निश्चितत्वादर्थवत्त्वस्येत्याह—*तथा सति चोदनालक्षण इति* ॥ *ननु* प्रथमसूत्रे स्वाध्यायस्यार्थविवक्षायाः प्रदर्शितत्वादर्थवत्त्वनिश्चयात् तदुद्दिश्य लक्षणविधानं युक्तम्, *न*; अनिश्चिते प्रामाण्येऽर्थविवक्षाऽयोगात्। तत्र चाध्ययनविधि-प्रयुक्ताप्रामाण्यमात्रनिराकरणेनार्थविवक्षा दर्शिता, नतु पौरुषेयत्व-प्रमाणान्तरयोग्यविषयत्वादिनिमित्ताप्रामाण्यं निराकृत्य तत्र प्रामाण्यं व्यवस्थापितम्। तस्मादर्थवत्त्वानिश्चयाद् वेदार्थश्चोदनालक्षण इति नियन्तुं न शक्यते। *अथ* प्रथमसूत्रसामर्थ्यादेवार्थवत्त्वमङ्गीकृत्य लक्षणविधानमिति, तत्राह—*तत्रानन्तरं प्रामाण्यप्रतिपादनं न युज्येतेति* ॥ *ननु* तस्यैव दृढीकरणाय पुनःप्रतिपादनम्, *न*; अर्थवत्त्वे निश्चिते दृढीकरणप्रयोजनाभावात्, अनिश्चिते च लक्षणप्रवृत्त्यभावात्। *ननु* वेदप्रामाण्यस्यापि

ऋजुविवरणम्

निरर्थकत्वविरोधात्। अथ वेदार्थोऽनूद्यः, तदा सार्थक-निरर्थकभागद्वयवेदस्यार्थश्चोदनाया अर्थः कथं स्यादिति? "उत्तरलक्षणवदि"त्यत्र लक्षणशब्दोऽध्यायवाची। *ननु*—अप्रामाण्यनिराकरणेन विवक्षितार्थत्वं प्रथमसूत्र एव सिद्धम्, अतः प्रमाणत्वाद् विवक्षितार्थत्वमपि तेनैव सिद्धमित्याशङ्क्याह—*तत्र चाध्ययनविधीति*॥ ननु*—उत्तरत्र

तत्त्वदीपनम्

वेदप्रामाण्यस्य मीमांसकेनाभ्युपगमात् सिद्धप्रामाण्यविचार इतीष्टमित्याशङ्क्य तात्पर्यमाह—*तथा सतीति* ॥ विचारादिति* ॥ प्रामाण्यविचारादित्यर्थः। अनिश्चितत्वमसिद्धमिति शङ्कते—*ननु प्रथमेति* ॥ किं वेदप्रामाण्यनिश्चयपूर्वकमर्थवत्त्वं निश्चितम्? उत न? इति विकल्प्यान्त्ये दूषणमाह—*नानिश्चित इति* ॥ आद्येऽपि किं विधिप्रयुक्ताप्रामाण्यमात्रस्य निराकरणम्? उत सर्वप्रकाराप्रामाण्यस्य? इति विकल्प्याद्यमङ्गीकरोति—*तत्र चेति*॥ द्वितीयं दूषयति—*नत्विति* ॥ विरुद्धार्थत्वादिरादिशब्दार्थः। सकलप्रकाराप्रामाण्यनिराकरणस्य सूत्रेऽनुप-लम्भादित्यर्थः। अर्थात् प्रामाण्यं तत्र निर्दिष्टमिति शङ्कते—*अथेति* ॥ प्रथमसूत्र एव प्रामाण्यसिद्धौ "तत् प्रमाणं बादरायणस्ये"त्यादिना पुनः प्रामाण्यप्रतिपादनं मुधेत्याह—*तत्राहेति* ॥ उक्तप्रपञ्चनरूपत्वान्नोत्तरग्रन्थवैयर्थ्यमिति शङ्कते—*ननु तस्येति* ॥ किमर्थवत्त्वे निश्चिते तद्दृढीकरणार्थमारम्भः? उतानिश्चिते? इति विकल्प्योभयमपि क्रमेण निरस्यति—*नार्थवत्त्वे इत्यादिना* ॥

भाष्यभावप्रकाशिका

व्याचिख्यासितस्येति धर्ममीमांसयाऽगतार्थत्वं सूचयति। आदित्वात्सूत्रत्वाच्च श्रोतृप्रवृत्ति-सिद्धये विषयादेर्ग्रहणमनेन कृतमिति दर्शयति—*इदमादिमं सूत्रमिति* ॥ बाह्यप्रवृत्तिकमथशब्दो-पात्तमधिकारिणमुद्दिश्य ब्रह्मज्ञानाय विचारविधानाद् विचारसाध्यब्रह्मज्ञानाद् बन्धनिवृत्तिः प्रयोजनं सूचितम्; तत्कामिनस्तदनुपाये नियोगायोगात्, तथा जीवगतबन्धाध्यासस्यान्यतत्त्वज्ञानान्निवृत्त्ययोगाद् ब्रह्मज्ञानमपि जीवतत्त्वविषयम्, इति तयोरैक्यं विषयोऽप्यर्थात् सूचित इति भावः ॥

पञ्चपादिका

"वृत्तं प्रमाणलक्षणमि"ति च मन्त्रार्थवादेषु च कार्यार्थत्वे विप्रतिपत्तिर्न स्यात्। सा चोत्तरत्रैव निरस्यते। अतः पूर्वोक्तेन न्यायेन कार्यनिष्ठ एव वेदभागो विचार्यतया प्रक्रान्तो विचारितश्च,

पञ्चपादिकाविवरणम्

वेदार्थत्वादेव प्रतिपादनम्, न वेदस्यार्थवत्त्वनिश्चयायेति, *न* ; वेदप्रामाण्यस्यापि वेदार्थत्वे, सिद्धे वस्तुनि प्रामाण्यप्रसङ्गात्। भाष्यकारश्च द्वितीयाध्यायमारभमाणो "वृत्तं प्रमाणलक्षणमि"ति प्रथमाध्यायेन वेदस्य प्रामाण्यमेव साधितं दर्शयति, तन्न युज्यते वेदस्यार्थवत्त्वनिश्चयपूर्वे विचारे। अतो धर्मे प्रमाणप्रतिज्ञैव, लक्षणं वा द्वितीयसूत्रेण क्रियत इत्याह—*वृत्तं प्रमाणलक्षणमिति चेति* ॥ *किंच* अस्मिन्नेव सूत्रे मन्त्रार्थवादयोर्धर्मे प्रामाण्यनिराकरणादर्थवादाधिकरणमनपेक्षितं स्यादित्याह— *मन्त्रार्थवादेषु चेति* ॥ स्तावकत्वेनान्वयप्रकारप्रतिपादनार्थमधिकरणमिति चेत्, *न* ; अत्रैव धर्मे प्रामाण्यनिराकरणात्, धर्मस्य प्रतिपादकतया तत्र पूर्वपक्षानुदयात्। उपसंहरति—*अतः पूर्वोक्तेन न्यायेन कार्यनिष्ठ एव वेदभागो विचार्य-

तत्त्वदीपनम्

प्रथमसूत्र एव वेदप्रामाण्यं सिद्धम्। नच—एतावतोत्तरत्र न तत्प्रतिपादनानुपपत्तिः, कर्मवदेव प्रामाण्यस्यापि वेदार्थत्वात् प्रतिपादनोपपत्तेरिति—शङ्क्यम्, अध्ययनविधिर्ह्यध्ययनस्य फलपर्यन्ततार्थं वेदस्य फलवदर्थावबोधनसामर्थ्यं प्रतिपादयति, तेन वेदप्रामाण्यस्यापि वेदार्थतोपपत्तिरित्यभिप्रायः। प्रामाण्यस्य वेदार्थत्वमसिद्धमित्याह—*न वेदेति* ॥ प्रथमसूत्र एव प्रामाण्यप्रतिपादनमितोऽप्ययुक्तमित्याह—*भाष्यकार इति* ॥

वेदार्थस्य चोदनाप्रमाणकत्वं न द्वितीयसूत्रार्थ इत्यत्रोपपत्त्यन्तरं समुच्चिनोति—*किं चास्मिन्निति* ॥ *अर्थवादाधिकरणमिति* ॥ "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते"इति सूत्रम्। सर्वस्याम्नायस्य धर्मपरत्वेनार्थवत्त्वे "वायुर्वै क्षेपिष्ठे"त्यादीनामपि तथात्वं वक्तव्यम्, अन्यथाऽऽनर्थक्यं स्यादित्येतद्ध्यत्र प्रतिपाद्यते। नच तद् युज्यते ; द्वितीयसूत्र एव धर्मेऽप्रामाण्यनिराकरणादित्यर्थः। सिद्धबोधिनो मन्त्रादेः साक्षाद् धर्मे प्रामाण्यानुपपत्तेरानर्थक्यं स्यादिति शङ्कायां गतिप्रदर्शनार्थमधिकरणारम्भो युक्त इति शङ्कते—*स्तावकत्वेनेति* ॥ प्रयोगविध्यपेक्षितप्राशस्त्यानुष्ठानोपयुक्तद्रव्य-देवतादिस्मरणद्वारा विध्यन्वयित्वमित्यर्थः। तथाऽपि पूर्वपक्षाभावान्ना-

भाष्यभावप्रकाशिका

अथवा—"अथातो ब्रह्मजिज्ञासे"ति जिज्ञासापदेन सन्देह-प्रयोजने सूत्रयति। तत्र साक्षादिच्छाव्याप्यत्वाद् ब्रह्मज्ञानं कण्ठोक्तं प्रयोजनम् ; तस्य परमानन्दसाक्षात्कारगोचरस्य प्रेक्षावत्प्रतिपत्तिविषयतोपपत्तेः। जिज्ञासा तु संशयस्य कार्यमिति स्वकारणं संशयं सूचयति ; संशयश्च शास्त्रारम्भं प्रयोजयति। तदेवं शास्त्रे प्रेक्षावत्प्रवृत्तिहेतुसंशय-प्रयोजनसूचनायोक्तमस्य शास्त्रादित्वमित्याह—*वेदान्तमीमांसेति*॥ वेदान्तमीमांसेति परमपुरुषार्थसाधनसूक्ष्मार्थनिर्णयफलो विचारः कथ्यते ; तस्याः = मीमांसायाः शास्त्रम् ; शास्यते अनेन शिष्येभ्यो यथावत् प्रतिपाद्यत इति। सूत्रमिति च बह्वर्थसूचनसामर्थ्यं दर्शयति। यथाहुः—

"लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च। सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः" इति ॥ (१)

(१) "वेदान्तमीमांसाशास्त्रस्य" इति भाष्यशीर्षावसरे पृष्ठे(५३०)योजनीयोऽप्ययं ग्रन्थः कथंचन प्रमादात् तदाऽनुपलब्धः, इदानीमेवोपलब्ध इति सांप्रतमेव योज्यते।

पञ्चपादिका

न वस्तुनिष्ठः ; इत्यतो वस्तुतत्त्वनिष्ठं वेदभागं विचारयितुमिदमारभ्यते ।

इति परमहंसपरिव्राजकादि-श्रीशङ्करभगवत्पादान्तेवासिवर-श्रीपद्मपादाचार्यकृतौ पञ्चपादिकायां जिज्ञासासूत्रावतरणं नाम द्वितीयवर्णकं समाप्तम् ॥

पञ्चपादिकाविवरणम्

तया प्रक्रान्तो विचारितश्च, न वस्तुनिष्ठ इति । अतो वस्तुतत्त्वनिष्ठं वेदभागं विचारयितुमिदमारभ्यते ।

इति श्रीमत्परमहंसपरिव्राजकानन्यानुभवपूज्यपादशिष्यस्वप्रकाशानुभवभगवतः कृतौ पञ्चपादिकाविवरणे द्वितीयवर्णकं समाप्तम् ॥

ऋजुविवरणम्

प्रामाण्यस्य प्रतिपादनेन पूर्वमर्थविवक्षाऽभाव इति वक्तुं न शक्यते ; तस्यान्यार्थत्वात्, इति चोदयति—*ननु वेद-प्रामाण्यस्येति* ॥ शेषं सुगमम् ॥

इति स्वामीन्द्रपूर्णपूज्यपादशिष्य-सर्वशास्त्रविशारदजनार्दनात्मज-सर्वज्ञ-विष्णुभट्टोपाध्यायकृतौ ऋजुविवरणे जिज्ञासासूत्रावतरणं नाम द्वितीयवर्णकं समाप्तम् ॥

तत्त्वदीपनम्

धिकरणारम्भ इत्याह—*नात्रेति* ॥ तस्मादगतार्थत्वाद् वेदान्तमीमांसाशास्त्रमारम्भणीयमिति सिद्धम् । तदेतदभि-प्रेत्योक्तम्—*वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येति* ॥

इति परमहंसपरिव्राजकाचार्याखण्डानुभूतिशिष्येणाऽखण्डानन्दमुनिना विरचिते विवरणतत्त्व-दीपने जिज्ञासासूत्रावतरणं नाम द्वितीयवर्णकं समाप्तम् ॥

जिज्ञासासूत्रावतरणं नाम द्वितीयवर्णकं सम्पूर्णम् ॥



भाष्यभामत्यृजुप्रकाशिका-वार्तिक-भाष्यभावप्रकाशिका-प्रदीपानां द्वितीयवर्णके न सम्बन्धः, किन्तु पञ्चपादिकाप्रस्थान एवेति मन्तव्यम् ।

